॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थाङ्काः १८६, १८७, २०१, २१७, २५९, २६०, २६३, २६४, २७७, २७८, २८४, २९२, ३०१, ३१९, ३३७, ३३९, ३४३, ३४६, ३४९, ३६२, ३६५

(ग्रन्थसंख्या ४२)

श्रीमद्गदाधरभट्टाचार्यचक्रवर्तिविरचिता

गादाधरी

तर्कवाचस्पति-श्रीगङ्गेशोपाध्यायविरचित-**तत्त्वचिन्तामणिना**
श्रीरघुनाथशिरोमणिविरचित-**दीधित्या** च गर्भिता

म० म० विन्ध्येश्वरीप्रसादद्विवेदिना, म० म० रामाचरण
भट्टाचार्येण, न्यायाचार्य पं० श्रीरामशास्त्रिणा,
पं० श्रीढुण्ढिराजशास्त्रिणा च सम्पादिता

तस्या इदं

पण्डितश्रीकीर्त्यानन्दझान्यायवेदान्ताचार्येण
श्रीसत्कारिशर्मणा वङ्गीयेन च

परिशोधितं द्वितीयं संस्करणम्

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

१९७०

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : द्वितीय, वि० संवत् २०२६
मूल्य : १-२ भाग १००-००

गोपाल मन्दिर लेन
पो० बा० न, वाराणसी-१ (भारतवर्ष)
फोन ६३१४५

प्रधान शाखा
चौखम्बा विद्याभवन
चौक, पो० बा० ६६, वाराणसी-१
फोन : ६३०७६

THE

CHOWKHAMBA SANSKRIT STUDIES

A

Collection of Rare & Extraordinary Sanskrit Works.
Nos 186, 187, 201, 217, 259, 260, 263, 264, 277,
278, 284, 292, 301, 319, 337, 339, 343,
346, 349, 362 & 365

(Work No. 42)

THE

GĀDĀDHARĪ

A Commentary on Dīdhiti the Commentary by Śrī Raghunatha Śiromaṇi on the Tattvacintamaṇi of Śrī Gangeśa Upādhyāya

(With Texts)

Edited By

M M VINDHYEŚVARĪPRASĀDA DVIVEDI,
M M VĀMĀCARANA BHATTĀCĀRYA,
NYĀYĀCĀRYĀ ŚRI RĀMĀ ŚĀSTRI &
NYĀYOPĀDHYĀYA ŚRĪ DHUNDHIRĀJA ŚĀSTRĪ

SECOND EDITION REVIESED BY

PT KIRTYĀNANDA JHĀ, Nyaya Vedantacārya

AND

ŚRĪ SATKĀRIŚARMĀ VANGIYA

THE

CHOWKHAMBA SANSKRIT SERIES OFFICE

VARANASI-1

1970

Gopal Mandir Lane
P. O. Chowkhamba, Post Box 8,
Varanasi-1 (India)
1970
Phone : 63145

Second Edition
1970
Price Parts I & II, Rs 100-00

Also can be had of
THE CHOWKHAMBA VIDYABHAWAN
Publishers & Oriental Book-Sellers
Chowk, Post Box 69, Varanasi-1 (India)
Phone : 63076

प्रकाशकीयम्

अनुमानगादाधर्या इदं परिष्कृत द्वितीयं संस्करणं न्यायशास्त्रे व्युत्पन्नानां व्युत्पित्सूनां च विद्वत्तल्लजानां करसरोरुहेषूपायनीकुर्वतामस्माकं चेतांसि कमपि परमानन्दसन्दोहं गाहन्ते। बहोः कालात् पूर्वमनया संस्थया प्रकाशितस्यानुमानगादाधरीग्रन्थस्यास्यालाभेन इदानीन्तनानां विदुषां क्लेशं तल्लाभाय चाग्रहातिरेकं दर्शं दर्शमेवास्माभिर्महता द्रव्यव्ययेनास्य पुनः प्रकाशनं विधीयते, केवलं शास्त्रस्य सेवाबुद्ध्या।

प्रस्तुतसंस्करणस्य सम्पादनमादित आरभ्यावच्छेदकत्वनिरुक्तिप्रकरणस्य कियन्तमंशं (प्रथमपृष्ठादारभ्य ३९२ तमपृष्ठं) यावत् काशीस्थ जो० म० गोयन्कासंस्कृतमहाविद्यालयीयन्यायविभागाध्यक्षैः पण्डितप्रवरैः श्रीकीर्त्यानन्दझा-न्यायवेदान्ताचार्यैः शेषभागस्य तु पुनरेतत्कार्यालयस्थैः न्याय-व्याकरणाद्यनेकशास्त्रेषु कृतश्रमैः पण्डितश्रीसत्कारिशर्मवङ्गीयैर्विहितम्। एतत्संस्करणस्य प्रकाशनादि सर्वमेव कार्यजातमेतत्कार्यालयस्थ विद्वद्वर्यपण्डितश्रीरामचन्द्रझामहोदयानां प्रबन्धेनैव स्वल्पीयसा कालेन पूर्तिमगात्। इमे सर्व एव विद्वांसोऽस्माकं सुबहून् धन्यवादानर्हन्ति।

वाचकमहाभागैः कृपया एतदत्रावधेयं यत् प्रस्तुतसंस्करणे यद्यपि ३९२ तम पृष्ठाङ्काद्व्यवहितोत्तरत्वेन ५०१ इति पृष्ठाङ्क आयाति तथाऽपि तत्र ग्रन्थन्यूनता न शङ्कनीया; अविच्छेदेनैव तत्र ग्रन्थसङ्गतिर्वर्तत इति सुधियो विभावयन्तु।

आशास्महे एतत्संस्करणप्रकाशनायास्मदीयः प्रयासो विदुषां कृपाकटाक्षलाभेन साफल्यमेष्यतीति शम्।

मार्गशु० ७
वि० सं० २०२६

विद्वच्चरणचञ्चरीक
—प्रकाशकः

अनुमानगादाधर्यां

उपोद्घातः ।

(१) न्यायशास्त्रस्य माहात्म्यम् ।

अथेयं प्रकाश्यते मुद्रयित्वा नव्यन्यायशास्त्रचूडामणि-मणिग्रन्थ-व्याख्यानरूपायाः शिरोमणिरित्यपरसंज्ञया प्रथितायाः दीधितेष्टीका गादाधरी। एतस्याः खलु निर्माता तर्ककर्कशप्रज्ञाप्रतिभाप्रभाप्रभाव-विहितानेकनिबन्धो वङ्गदेशीयविद्वन्मण्डलाभ्यर्हितपादपीठस्तार्किक-कुलनिकरकैरवकलाकरो बुधकुलकलापकमनीयावनितलस्फुरन्मनी-षाविकाशित आगम इव सदा लोकहितपरायणः पुरन्दरोद्यानमिव विमत्सरः विदुरोऽपि धृतराष्ट्रपक्षपातः कुलाचारनिरतोऽपि कौलाचा-रविरतः कारुण्यकेदारङ्कारुण्यकुङ्कुमस्य क्षीरसागरो विवेकरत्नविस-रस्याप्रतिमप्रतिभाप्रसारविनिर्जितप्रतिपक्षाचार्यवर्यो श्रीजीवाचार्यतः प्राप्तजन्मा द्विजवरो नव्यनैयायिकानामग्रणीर्गदाधरभट्टाचार्यः। नव्य-न्यायशास्त्रस्यातिगहनस्य बीजभूतं षोडशपदार्थतत्त्वविवेकद्वाऽपिसिद्धौ-पधायमानं न्यायदर्शनमप्रतिरूपस्वरूपसंसारान्धकूपप्रतिघातविक-लीकृतानसुभृतः समुद्दिधीर्षुणा करुणावरुणालयेन भगवता महर्षिणा गोतमेन व्यरचि। तच्च—

> अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
> पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इत्यादिनोक्तचतुर्दशविद्यासु न्यायविस्तरपदेन संगृहीतं न्यायवार्ति-कभूमिकायां म० म० पं० विन्ध्येश्वरीप्रसादद्विवेदिभिः श्रुतिस्मृत्यादि-प्रमाणप्रदर्शनपूर्वकं यथा प्रशंसितं, परमतदूषणोद्धारेण चास्य यथा बौ-द्धादिनास्तिकदर्शनेभ्यः प्राचीनत्वं च व्यवस्थापितं तत्तत्रैव द्रष्टव्यम्। तस्यैव च प्रत्यक्षानुमानोपमानशब्दाख्यप्रमाणचतुष्टयवादिनो महर्षेर्मत-मवलम्बमानेन लोकोत्तरनव्यन्यायप्रपञ्चप्रजापतिना महार्षिकल्पेन श्री-मद्गङ्गेशोपाध्यायेन प्रमाणादिषोडशपदार्थनिरूपणपरस्य पञ्चाध्याया-त्मकस्य न्यायशास्त्रस्य प्रमाणप्रकरणात्मकमेकांशमवलम्ब्य प्रमा-णचतुष्टयव्यवस्थापनपरो युक्तिदीप्तिजालजटिलस्तत्त्वचिन्तामणिर्म-हानिबन्धः सर्वेषां प्रमेयज्ञानसौलभ्याय प्रमाणतत्त्वावधारणार्थमेव निरमायि। तत्रेदमादिमं वाक्यम्-'अथ जगदेव दुःखपङ्कनिमग्न-मुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणि-

को मुनि. प्रणिनाय तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादितत्त्वज्ञानान्नि श्रेयसाधिगम इत्यादावसूत्रयत् । तेष्वपि प्रमाणाधीना सर्वेषा व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यत' इति । न्यायदर्शनस्थं 'प्रत्यक्षानुमानोपमानशब्दा प्रमाणानि' इति पञ्चदशाक्षरात्मक १ अ०१आ० ३ सूत्रमेकमेवावलम्ब्य श्लोकद्वादशसाहस्त्र्यात्मकश्चिन्तामणिमहानिबन्धो (१)गङ्गेशोपाध्यायेन स्वमतिप्रागल्भ्येन यथा विदधे तथा नाव्यक्तं नव्यन्यायाम्बुधिपरिशीलनपराणा तर्करसिकानाम् । स चेदानीं मिथिला-वङ्ग-द्रविडादिदेशीयैर्महापण्डितै साक्षात् परम्परया वा व्याख्यातः क्रोडपत्रादिभिरलङ्कृत श्लोकाना लक्षाणामष्टाविंशत्योपबृंहितो नव्यन्यायशास्त्रत्वेन व्यवहर्तिं गमितोऽनेकैर्भारतीयै पाश्चात्यैश्च विद्वद्भि । एतेनाऽस्य ग्रन्थस्य नवीनत्वन्तद्व्याख्यानरूपाणां च दीधिति जागदीशी-माथुरी-गादाधरी-क्रोडपत्रादीनां प्रलापत्वमात्रत्वं चेति निरस्तम् । शास्त्रतात्पर्यानवबोधात् गोतमीयसूत्राधारेणास्य विनिर्मितत्वाच्च । सूत्रभाष्यवार्तिकादीन्येवानवस्थितानि नवीनान्यकर्मण्याणि चत्याद्याक्षेपेण न्यायस्य समूलोच्छेद कर्तुमिच्छन्तोऽविज्ञातन्यायागममहिमान पल्लवग्राहिपाण्डित्येनैव नैयायिकमन्या पाश्चात्या अभिनवदार्शनिकास्त्वस्माभि. खद्योतभाष्यचन्द्राख्यटीकाद्वयसहितस्य भाष्यस्य भूमिकाया दत्तोत्तरा इति विरम्यतेऽनास्मादृशामवर्णनीये न्यायशास्त्रस्य गाम्भीर्ये । अत एवोक्त रघुनाथतार्किकशिरोमणिनाऽनुमानचिन्तामणिदीधितौ—

न्यायमधीते सर्वस्तनुते कुतुकाश्चिबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधिय ॥

एवमुदयनाचार्यश्रीहर्षादिभिरपि तत्रतत्र प्रतिपादितमेवास्य माहात्म्यम् ।

(२) न्यायशास्त्रस्य नव्यप्राच्यविवेकः ।

केचित्तु अवच्छेदकावच्छिन्नशब्दादिभिर्व्याख्यातत्वेनास्य नवीनत्वसाधनमिच्छन्ति । तदपि शास्त्रतात्पर्यस्यानवगमान्न युक्तमिति भ्रम. । अन्यथा पातञ्जलदर्शनीयसमाधिपादस्थ 'पूर्वेषामपि गुरु का

---

(१) गङ्गेशोपाध्यायप्रभृतीना नव्यनैयायिकानामैतिह्यं' विषयविवेचनप्रकरणे यथाक्रममनुपदमेव टिप्पण्यामुपपादयिष्यते ।

लेनाऽनवच्छेदात्' इति २६ सूत्रे तद्भाष्यादौ चावच्छेदकादिशब्दानां व्यवहारात् तेषामपि नव्यत्वं स्यात् ।

इदमत्र विचार्यते । किं तावत् न्यायशास्त्रस्य प्राचीनत्वमर्वाचीनत्वं वा ? यद्यपि सूत्रकारीयप्रमाणभागनिरूपकत्वाद्गङ्गेशोपाध्यायप्रचलितशैलीसम्पन्नानां ग्रन्थानामवयावत्प्राचीनेष्वेवान्तर्भावः समुचितः, तथा तत्त्वचिन्तामण्यादिगादाधर्यन्तेषु सविवेचनेषु ग्रन्थेषु कुत्रापि आद्यावन्ते वा नव्यशास्त्रं प्राच्यन्यायशास्त्रं चेति व्यपदेशस्यादर्शनात्सकलमेव न्यायशास्त्रमेकविधमेव भवितुं युक्तम्, तथापि भारद्वाजकृतस्य न्यायवार्तिकस्य 'अतिजरतीना'मित्यादिवाक्येन प्राचीनत्वं संस्थापयन्तो वाचस्पतिमिश्रादय एव प्राच्यनव्यव्यवहारे प्रमाणम् । नचैवमपि तत्त्वचिन्तामण्यादिनिबन्धानां नव्यत्वं पूर्वोक्तरीत्याऽसंभवीति वाच्यम् । न्यायसारमारभ्योपलभ्यमानेषु न्यायशास्त्रनिबन्धेषु 'इति प्राच्याः इति नव्या' इत्यादिना विभक्तसूभयव्यवहारस्य प्रचलितत्वेन तन्निरासस्याशक्यत्वात् ।

अत्र केचित् । आत्मादिप्रमेयपदार्थानां तत्त्वज्ञानान्निःश्रेयसमङ्गीकुर्वद्भिः गौतमादिमहर्षिभिर्निरात्मविज्ञानात्मवादिचार्वाकबौद्धादिपराजयार्थमात्मनोऽनुमानेन सिद्धिस्तावत् प्रदर्शिता । परार्थानुमानापरपर्यायस्य च न्यायस्य पूर्वाङ्गोत्तराङ्गसाकल्येनैव वस्तुसाधनक्षमत्वमिति तदनुसारिणां सूत्रग्रन्थानां शास्त्रीयसकलपदार्थप्रतिपादकानां भाष्यवार्तिकतात्पर्यटीकादिव्याख्याग्रन्थानां समानतन्त्रसिद्धानां चोक्तलक्षणसम्पन्नानां प्राचीनत्वम् । तदेकदेशप्रमाणव्याख्यानरूपाणान्तु तत्त्वचिन्तामण्यादीनां सव्याख्यानां निबन्धानां नव्यत्वमित्याहुः।

तन्मन्दम् । तथासति प्रमाणमात्रविवेचनपराणां जैनबौद्धादिग्रन्थानां प्राचीनानामपि नव्यत्वव्यवहार आपद्येत ।

अपरे तु बाहुल्येन नास्तिकत्वेनाभिमतानां चार्वाकबौद्धादीनामेव तत्त्वचिन्तामणिपूर्वकालीनेषु सूत्रभाष्यादिग्रन्थेषु खण्डनस्योपलम्भात्तेषां पुराणत्वव्यवहारः, तत्त्वचिन्तामण्यादिषु तु आस्तिकत्वेन गृहीतानां मीमांसा-सांख्यादिदर्शनानामेवाधिक्षेप इति नव्यत्वव्यपदेश इति वदन्ति ।

वस्तुतस्तु अलौकिकनूतनप्रतिभाशालिना विद्वद्वरेण गङ्गेशोपाध्यायेन भाष्यग्रन्थं मन्थानं विधाय तात्पर्यटीकादिङ्नागादिनिबन्ध-

प्रग्रहैर्न्यायवैशेषिकसूत्राम्बुधिं मथित्वा तत्सारभूतोऽयं तत्त्वचिन्तामणिर्नूतन एवोदपादीति तत्कालमारभ्य विनिर्मितस्य न्यायशास्त्रनिकरस्य नव्यत्वव्यवहार इति युक्तमुत्पश्यामः।

केचित्तु विद्वांसोऽस्य न्यायशास्त्रस्य प्राच्यं-नव्यं-नव्यनव्यं चेति त्रिविधं विभागं वदन्ति। तत्र सूत्रकारमारभ्योदयनात्पूर्वजातं प्राच्यम्(१) उदयनाद्गङ्गेशाद्वा दीधितिकारात्प्राग् नव्यम्(२) शिरोमणिमारभ्य निबद्धं तु सर्वं न्यायशास्त्रं नव्यनव्यमि(३ ति तेषामाशयः।

अत्र तृतीयविभागस्य मूलं विमृश्यमाणमवच्छेदकादिप्रवेशनिबन्धनमेव प्रतिभासते, तच्च व्यभिचरितत्वादयुक्तमित्युक्तमेव। किञ्चैवं सति 'अतिजरतीना' मिति वाचस्पत्यनचनाद्यातुर्विध्यमप्यापद्येत। प्रदर्शितवचनवलेनोद्योतकारान्तानां गौतमकणादादीनामतिप्राचीनत्वमुद्योतकरभारद्वाजोत्तरकालवर्तिनां पुराणत्वं स्वस्य स्वसमकालस्थितानामुदयनादीनां च नव्यत्वमाविष्कुर्वता तदुत्तरसमयजातानां गङ्गेशोपाध्यायादीनां नव्यनव्यत्वस्य संभवदुक्तिकतया (१)अतिप्राचीन (२)प्राचीन (३)नव्य (४)नव्यनव्येति चतुर्धा विभागस्य वक्तुं शक्यत्वात्। तस्माद्वस्तुतस्त्वित्यादिना प्रदर्शित एव प्राचीनार्वाचीनव्यपदेशः साध्विति कृतं वाग्विवादेन।

(३) नव्यन्यायशास्त्रस्य विषयविवेचनम्।

स चायं प्राचीनतर्कशास्त्राम्बुधिनिर्मन्थनसमुद्भूतो नव्यन्यायशास्त्रकल्पनायुक्तीनामादिमः कल्पतरुस्तत्त्वचिन्तामणिः प्रत्यक्षा(१)नुमानो(२)पमान(३)शब्दा(४)ख्ये खण्डचतुष्टये विभक्तः। तत्रादिमे खंडे त्रयोदश विषया विवेचिताः। तेषु प्रथमं धर्मव्यवस्थापनं विदधतोपाध्यायेन दृष्टादृष्टप्रयोजनककर्मणां साफल्यमङ्गीकुर्वतामप्याच्छन्ननास्तिकानां पराजयार्थं ग्रन्थारम्भे विहितस्य मङ्गलस्य साफल्यप्रदर्शनापदेशेनाविगीतशिष्टाचारविषयाणां स्वेष्टदेवतोपासनादीनां श्रद्धया कृतानां पूजनान्तानां साफल्यं व्यक्तीकृतं मङ्गलवादे (१)। (२)प्रामाण्यवादे (३)अन्यथाख्यातिवादे च मीमांसकानां स्वतःप्रामाण्यवादिनां निरासो विहितः। (४) (५)लौकिकालौकिकप्रत्यक्षवादौ सर्वतन्त्रसिद्धौ युक्त्या प्रदर्शितौ। (६)समवायवादे च वेदान्तिनां मीमांसकानामपि मतं दूषयित्वा समवायः साधितः। (७)अभावोऽपि सांख्यादिमतविप्रतिपत्तिखण्डनद्वारा स्थापितः। (८)अनुपलब्धिवादेऽनु-

पलब्धेः प्रमाणान्तरत्वं निरस्तम् । (९)प्रत्यक्षकरणवादे लौकिकप्रत्यक्षकरणानां विवेचनं, (१०)मनोणुत्ववादे मनसोऽणुत्वं च स्थापितम् । (११)अनुव्यवसायवादेन ज्ञानस्य स्वतो ग्राह्यत्ववादिना मीमांसकानां (१२।१३) सविकल्पकनिर्विकल्पकवादाभ्यां च निर्विकल्पमात्रस्य प्रत्यक्षत्वमिच्छतां बौद्धानां खण्डनं विहितम् ।

एवमनुमानखण्डेऽपि सप्तविंशतिविषयाणां निरूपणं विवेचितम् । ते चानुमानखण्डमभ्यस्यतां नैयायिकानां प्रथिता एवानुमित्यादयः ईश्वरानुमानान्ता विषयाः । तत्रापि द्वौ मुख्यभागौ व्याप्तिवादो हेत्वाभासवादश्च । अतो व्याप्तिवादे व्याप्तिसिद्धान्तलक्षणं हेत्वाभासे हेत्वाभाससामान्यलक्षणञ्चातीवोपयोगि सर्वेषामभिमतं प्रथितं चेति,तदुपादाय गंगेशप्रभृतीनां नव्यनैयायिकानामुभयत्र लक्षणे निष्कृष्य विवेचयामः ॥

श्रीसद्गुरुः शरणम् ।

(४) मण्युक्ते सिद्धान्तलक्षणे मतान्तरप्रदर्शनम् ।

अत्रोच्यते [१]प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति व्याप्तिलक्षणं श्रीमता गङ्गेशोपाध्यायेन(१) सिद्धान्तितम् ।

---

(१) एष खलु नव्यनैयायिकतिलको दरभङ्गामण्डलान्तर्गते कमलारोधसि वर्तमाने कोरानग्रामे कस्यचिच्छ्रोत्रियस्य सदने समजनि । शैशवात एव चायं तर्कशास्त्रे निष्णातो महाकाल्युपासकश्चाभूत् । स च सप्तपदार्थीनिबन्धप्रणेतुः शिवादित्यस्योल्लेखात् वैशेषिकदर्शनावलम्बिनो रत्नकोशाख्यमहानिबन्धधृतमतस्योट्टङ्कनाच्च पञ्चशताधिकैकादशशतई-स्वीयसंवत्सरादूर्ध्वमासीद्भूमण्डल इत्यनुमीयते । यतश्चिन्तामणिग्रन्थे व्याघ्रशिशुक–सिंहशिशुकापराह्वयोरानन्दसूरि–अपरचन्द्रसूरिणोर्बौद्ध-नैयायिकयोर्मतं सिंहव्याघ्राख्यव्याप्तिपूर्वपक्षलक्षणयोरपदेशेनोद्धृत्य निरस्तम् । खण्डनखाद्यमतखण्डनाच्च ११४६ ई० समये वर्तमानस्य कन्नौजाधिपतेर्जयचन्द्रस्य राज्ञः सभापण्डितस्य श्रीहर्षस्य समकालीनोऽयमिति वदन्तीतिहासविज्ञाः । एवं चाधमतेन गङ्गेशोपाध्यायस्य समयस्त्रयोदशशताब्द्याः प्रथमभागोऽन्त्येन तु द्वादशशताब्द्या अन्तिमभाग इति विज्ञायते ।

तत्र च नैयायिकशिरोमणिना (१)रघुनाथसार्वभौमेन दीधितिग्रन्थे कालो घटवान् कालपरिमाणादित्यत्राव्याप्तिवारणाय [२]साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभावरूपोऽर्थो विवक्षितः। एवं च कालिकसम्बन्धसामान्ये महाकालानुयोगिकत्वसत्त्वेऽपि गगनप्रतियोगिकत्वविरहात् गगनाभाव एव घटवान् महाकालत्वादित्यादौ प्रतियोगिव्यधिकरणतया प्रसिद्ध इत्यव्याप्तिदोषो वारितो भवति।

(१)ई० १४७७ परिमितेऽब्दे श्रीमता रघुनाथसार्वभौमेन नदियाशान्तिपुरे जनुर्गृहीता। बाल्य एव तस्य पिता लोकान्तरमगमत्। जनन्या महता कृच्छ्रेण रघुनाथस्य पोषणं विहितम्। पञ्चवार्षिकोऽयं मात्रा कदाचिद्ग्न्यानयनार्थमादिष्ट आधारं विनैव तमानेतुं कस्यांचित् चतुष्पाठ्यां प्रविष्टः। ततश्च भूतिपुञ्जं करे संस्थाप्याग्निं गृहीत्वा गन्तुकामः स चतुष्पाठीशिक्षकेन वासुदेवसार्वभौमविदुषा लक्षितः। तस्य बुद्धिगाम्भीर्यमवलोक्य जातहार्देन सार्वभौमेन रघुनाथः स्वशिष्यतामानायि। रघुनाथसार्वभौमोऽपि व्याकरणसाहित्यादौ व्युत्पत्तिमुपलभ्य न्यायशास्त्रेऽपि परिश्रमं विधाय तत्र व्युत्पत्तिमुपलिप्सुर्गुरोराज्ञया मिथिलां गत्वा पक्षधरमिश्राणां छात्रो बभूव। रघुनाथस्त्वेकाक्ष एवासीदित्यपि वदन्ति तद्वृत्तज्ञाः। एकदा नैयायिकछात्रैः पंडितैश्च भूयिष्ठे विद्वत्समाजे चतुष्पाठ्या अध्यापकः पक्षधरस्तर्कशास्त्रे व्युत्पन्नं रघुनाथसार्वभौममन्यैर्मैथिलछात्रैर्विवादयित्वा न ते विचारा ग्राम्या इत्यन्तेऽधिक्षिप्तवान्। तदसहमानेन सार्वभौमेन पक्षधरमिश्रान् हन्तुं सासिना तद्गृहसमीपेऽप्रावृतशरीरेणास्थायि। निशि कान्तया सहेन्दोः सुषमां पश्यतो गवाक्षस्थितस्य पक्षधरमिश्रस्य शिरश्छेत्तुं यदा प्रवृत्तो रघुनाथस्तदेन्दोरप्यधिकं प्रकाशमानमेकं मुखं जगत्यस्मिन् वर्तते यदहमहोरात्रं चिन्तये यदाधारं नैयायिकप्रवरं मिथिलायामद्य जेतुं कोऽपि न क्षम, इति पक्षधरवचनश्रवणमात्रेण तद्धस्ताद्सिर्भूमौ विग्रहश्च चरणयोः पपातेत्यपि रघुनाथसार्वभौमानां कीर्तिपताका वंगदेशेऽधुनापि गीयते। तेन च बौद्धाधिकारे [१] किरणावलीप्रकाशे [२] न्यायलीलावतीप्रकाशे[३] खंडनखंडखाद्ये च[४] दीधित्याख्या टीका कृता। १ पदार्थतत्त्वनिरूपणम् २अवच्छेदकत्वनिरुक्तिः ३नञ्वादः ४आख्यातवादश्चेति चत्वारो मूलग्रन्थाश्च निर्मिताः।

किन्तु कालस्य जगदाधारतया संयोगसमवायाभ्यां गगनादेरवृत्तित्वे-पि स्वरूपसम्बन्धेन चेत् वृत्तित्वं तदोक्तरीत्या गगनाभावोऽपि प्रतियो-गिव्यधिकरणो भवितुं नार्हतीति उक्तकल्पं परित्यज्य-[३]निरुक्तप्र-तियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धा-वच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छि-न्नस्य व्यापकत्वमित्यर्थान्तरं कृतं तेनैव। तथा च संयोगेन घटाद्यभाव-मादायैवोक्तदोषवारणं सम्भवतीति।

अनयोश्चाद्यकल्पे उक्ताव्याप्तिवारणेऽपि घटत्वान्नित्यज्ञानत्वादित्या-दौ विषयितासम्बन्धे गगनप्रतियोगिकत्वनित्यज्ञानानुयोगिकत्वोभय-सत्त्वेन गगनाभावमादायापि प्रतियोगिव्यधिकरणाभावस्य प्रसिद्ध्य-सम्भवादव्याप्तिं निराकर्तुं श्रीमता (१)जगदीशतर्कालङ्कारेण [४]सा-ध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितस्वरू-पसम्बन्धे यदभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामा-न्याभाववत्त्वं हेतुमतस्तदभावप्रतियोगितानवच्छेदकं यत्साध्यताव-

(१) जगद्विख्यातस्य चैतन्यमहाप्रभोः श्वशुराणां सनातनमिश्राणा-मात्मजस्य प्रपौत्रोऽयं जगदीशतर्कालङ्कारः ई० पञ्चत्रिंशाधिकशोड-षेऽब्दे जागदीशीं लिखितवानिति वदन्ति इतिहासज्ञाः। अष्टादशवर्ष-देशीयोऽयं मातृकालप्रहणं विधाय भवानन्दसिद्धान्तवागीशानां चतुष्पाठ्यां न्यायशास्त्रमधीतवान्, किन्तु—

श्रीसार्वभौमस्य गुरोः पदाब्जं विद्यार्थिनां कल्पतरोः प्रणम्य।
विनिर्मितः श्रीजगदीशविज्ञैर्विद्योततामाद्यमणेर्मयूखः॥

इत्याद्युक्त्या सार्वभौमान्तेवासिनमेवात्मानं मन्यते स्म जग-दीशः। शब्दशक्तिप्रकाशिकायां' इति पुनर्न्यायरहस्येऽस्मद्गुरुचरणा' इत्युल्लेखदर्शनाच्चायं न्यायरहस्य-न्यायकुसुमाञ्जलिकारिकाव्याख्या-पदार्थप्रकाशादिन्यायग्रन्थप्रणेता रामभद्रसार्वभौम एवेति सिद्ध्यति। (१) तत्त्वचिन्तामणिदीधितिप्रकाश(जागदीशी) (२) चिन्तामणिमयूख (३) न्यायादर्श (न्यायसारावली) (४) शब्दशक्तिप्रकाशिका-(५) तर्कामृत (६) पदार्थतत्त्वनिर्णय (द्रव्यभाष्यटीका) (७) न्याय लीलावतीदीधितिव्याख्याख्याः सप्त निबन्धा न्यायशास्त्रे जगदीशत-र्कालङ्कारेण प्रणीताः। तल्लेखे शब्दसंक्षेपेऽपि यदर्थगाम्भीर्यं तन्नाव्यक्तं नव्यन्यायकोविदानाम्॥

च्छेदकमित्याद्यर्थेनैवोक्तदोषद्वयसमाधानसंभवे निरुक्तप्रतियोगिकत्वे-त्यादिरीत्या दीधितकारोक्तायां खण्डशः प्रसिद्धौ वैयर्थ्याक्षेपः प्रदर्शितः।
[५]यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबन्धसामान्ये सा-ध्यतावच्छेदकसम्बन्धत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसम्ब-न्धत्वोभयाभावस्तादृशप्रतियोगितानवच्छेदकत्वस्यैव साध्यतावच्छेदके विवक्षणेऽपि उक्तदोषवारणं संभवतीति कथमेवं नोक्तमित्यादिरीत्यापि दीधितावाक्षेपोऽदर्शि। विश्वनाथन्यायपञ्चाननास्तु गगनादेर्वृत्तित्व-मङ्गीकृत्यान्यं प्रतियोगिताघटितमुभयाभावकल्पमेवोद्धृतवन्तो न्याय-सिद्धान्तमुक्तावल्याम्।

अन्त्यस्य प्रतियोगिताघटितोभयाभावकल्पस्य व्यभिचारिण्य-तिव्याप्तिवारणाय जगदीशतर्कालङ्कारेण—[६] स्वावच्छेदकता-घटकसम्बन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणं हेत्वधि-करणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताक-त्व–यत्सम्बन्धावच्छिन्नावच्छेदकताकत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमित्यर्थः। एवं च वृत्त्यनियामकस-म्बन्धस्य प्रतियोगितावच्छेदकत्वाभावेऽपि प्रतियोगितावच्छेदक-ताघटकसम्बन्धत्वस्य चैत्रो न पचतीत्यादौ पाकविशिष्टायाः कृतेरभावस्य वृत्त्यनियामकानुकूलत्वसम्बन्धेन चैत्रादावन्वयानुरो-धेन सर्ववादिसंमतत्वात्, व्यभिचारिणि च सामान्याभावप्रतियो-गितायामेव तादृशोभयाभावविरहान्नातिव्याप्तिरिति पूर्वकल्पोपरि मध्यमतापदेशेनान्यः कल्पोऽपि उल्लिखितः॥

(१)मथुरानाथतर्कवागीशास्तु [७] स्वावच्छेदकसम्बन्धेन स्वा-

---

(१)श्रीमान् नव्यनैयायिकप्रवरो मथुरानाथतर्कवागीशः सप्तत्य-धिकपंचदशशताब्द्यामासीत्। अस्य च पिता—

न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसंपत्तेः।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा॥ १॥
श्रीमता मथुरानाथतर्कवागीशधीमता।
विशदीकृत्य दर्श्यन्ते प्रत्यक्षमणिफक्किकाः॥ २॥

इति तत्त्वचिन्तामणिरहस्याख्याया माथुर्याः प्रारम्भिकपद्यद्वय-प्रदर्शनेन श्रीरामतर्कालङ्कारनाम्ना प्रथितो रघुनाथशिरोमणेरन्तेवा-सी बभवेति प्रतीयते। मथुरानाथतर्कवागीशस्तु रघुनाथशिरोमणि-

वच्छेदकावच्छिन्नसामान्यासम्बन्धिनिरुक्तहेतुसम्बन्धिका या या प्रतियोगिता तदनवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्न-साध्यसामानाधिकरण्यं व्याप्तिरित्यादिनोक्तचिन्तामणिसिद्धान्तलक्षणस्यार्थं निष्कृष्य तत्रापि वह्निमान् धूमादित्यादावसम्भवस्य प्रतियोगिताव्यक्तिषु साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्य स्वावच्छेदकसम्बन्धेनेत्यत्र साध्यतावच्छेदकसम्बन्धेनेत्युक्त्या वा निवारणेऽपि कालो घटवान् कालपरिमाणादित्यादौ अव्याप्तिं प्रदर्श्य [८]स्वावच्छेदकसम्बन्धेन स्वावच्छेदकावच्छिन्नसामान्यासम्बन्धिनिरुक्तहेतुसम्बन्धिकप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व-यद्धर्मनिष्ठपर्याप्तावच्छेदकत्वोभयाभावस्तद्धर्मावच्छिन्नसाध्यसामानाधिकरण्यमित्यर्थं कृतवन्तः। इत्थं चोक्तस्थले समवायादिसम्बन्धावच्छिन्नघटाद्यभावप्रतियोगितामादाय प्रसिद्धिसंभवेनाव्याप्तिवारणं सुलभमेव। घटवान्नित्यज्ञानत्वादित्यादौ वृत्त्यनियामकविषयतादिसम्बन्धेन साध्यतायामव्याप्तिवारणं च वृत्तिनियामकसम्बन्धवत् वृत्त्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वं स्वीकुर्वद्भिर्मथुरानाथतर्कवागीशैर्जगदीशतर्कालङ्काराणामुक[४]लक्षणार्थकरणप्रयासो व्यर्थतामापादितः। एवं तादात्म्यादिवृत्त्यनियामकसम्बन्धेन साध्यत्वे हेतुत्वे चाव्याप्तिवारणायाधिकरणत्वं वृत्तित्वमपहाय सम्बन्धित्वविशेषं शोभनं मन्वानेन मथुरानाथेन दीधितिकारोक्तायाः तादृ-

---

समस्य विद्वद्वरस्योक्तश्रीरामतर्कालङ्कारस्यैव सविधे न्यायशास्त्रमधीत्य माथुरीतिनाम्ना सुप्रथितां मणिग्रन्थस्य व्याख्यां चक्रे। सर्वासु च चिन्तामणिव्याख्यासु अधिकं सरलतया नास्यास्तादृग् प्रचारो नवद्वीपेऽभूद्यथा जागदीश्याः। निम्नलिखिता ग्रन्था मथुरानाथतर्कवागीशेन निबद्धा —

(१) तत्त्वचिन्तामणिरहस्यम् (माथुरी)
(२) मण्यालोकरहस्यम्।
(३) दीधितिरहस्यम्।
(४) सिद्धान्तरहस्यम्।
(५) लीलावतीप्रकाशरहस्यम्।
(६) लीलावतीप्रकाशदीधितिरहस्यम्।
(७) बौद्धाधिकाररहस्यम्।

शसंयोगिवृत्तिधूमत्वादिरूपव्याप्तेः खण्डनमपि कृतम् ।

(१)गदाधरभट्टाचार्यास्तु सम्बन्धघटितशिरोमण्युक्त[२]उभया-भावघटितकल्पे संयोगेन घटादिसाध्यके घटत्वादिहेतावतिव्याप्तिवा-

(१) नव्यन्यायशास्त्रग्रन्थाम्बुधिपारङ्गतः श्रीमान् चक्रवर्तिविरुदावलीसम्पन्नः श्रीगदाधरभट्टाचार्यः पूर्ववङ्गदेशावयव-घोग्राममण्डलान्तर्गत-लक्ष्मीपासाग्राममधिवसन् सप्तदशशताब्द्यामभूत् इति इतिहासविदां सम्मतम् । तेन च नदियानाम्नि न्यायशास्त्रस्याद्यपीठे गत्वा हरिराम-तर्कवागीशानां सविधे तर्कशास्त्रमधीतम् । किन्तु गुरोः पश्चात् पूर्ववङ्गदेशोद्भवत्वात्प्रथितबुधवंशानुद्भूतत्वाच्च तत्रस्थैश्छात्रैर्न्याय-विद्भिर्दक्षमतिरप्यसौ नादृतोऽभूत् । ततश्च चक्रवर्तिमहाशयेन गुरुच-तुष्पाठी त्यक्ता स्थापिता च स्वकीयाऽन्या चतुष्पाठी आरामवाटिका च । कदाचिदेकेन छात्रेण कुसुमावचयार्थं तत्रागत्य कश्चित् पादपमेवो-द्दिश्य पूर्वपक्षसमाधाने कुर्वंश्चक्रवर्तिमहाशयो सविस्मयमालोकितः । ततश्च जाता अनेके शिष्यास्तस्य न्यायशास्त्रेऽप्रतिमया प्रतिभया-ऽगाधपाण्डित्येन वशीभूताः । एकदा तत्समकालीनस्य जगदीशतर्का-लङ्कारस्य समीपे गदाधरभट्टाचार्याणां कश्चिच्छात्रः प्राप्त-वान् । तर्कालङ्कारेण स्थलविशेषव्याख्यानार्थं पृष्टः स च्छात्रो यथा धीत व्याख्यातवान् । तर्कालङ्कारस्तु अशुद्धमिदं न सम्यक् गुरवे निवेदयेति तमादिष्टवान् । श्रुतवृत्तान्तास्तु गदाधरभट्टाचार्याः-स्व-मतिवैभवेनासङ्गतस्यापि तस्य स्वव्याख्यानानुसारेण मूलपाठमपि संयोज्य लिखित्वा कस्यचिद्धस्तेन प्रेषितवन्तः । दृष्ट्वा तु तादृशं बुद्धिदार्ढ्यं चकितो जगदीशतर्कालङ्कारमहाशयो मुग्ध इवाभूदित्येषापि किंवदन्ती तद्वैदुष्ये प्रमाणम् । प्रणीतवांश्चायं (१)तत्त्वचिन्तामणिदीधि-तिप्रकाशिका (२)चिन्तामणिव्याख्या (३)आलोकटीका (४)मुक्तावलि-टीका (५)रत्नकोशवादरहस्यव्याख्यान् व्याख्याग्रन्थान् । (६)आख्या-तवाद (७)कारकवाद (८)नञ्वाद (९)मुक्तिवाद (१०)विषयतावाद (११)व्युत्पत्तिवाद (१२)शक्तिवाद (१३)स्मृतिसंस्कारवादादयो मौल ग्रन्था अपि तेन निबद्धाः । येन स नव्यनैयायिकेषु प्रधानतया विश्रुतो-भवत् । अयं भवानन्दरायस्य ज्येष्ठसूनोर्नदियाशान्तोन्द्रस्य राघवरायस्य समये सुप्रसिद्धनैयायिको बभूव । नदियाशान्तिपुरमेवातः परं तस्य निवासस्थानमभूद्, गौडदेशीयश्चातःपरं सोऽगण्यत ॥

रणाय संयोगमात्र एव निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणयत्कि-ञ्चिद्व्यक्तयनुयोगिकत्वोभयाभावमादृत्य,-यस्य घटस्याधःस्थितपटे येन संयोगेन घटविशिष्टबुद्धिर्जनिता तेनैव संयोगेन पटेन समं परिवृत्त्य स्थापिते तद्घटे घटविशिष्टबुद्धिरपि जन्यते तत्र संयोगे घटप्रतियो-गिकत्वघटानुयोगिकत्वस्यावश्यकतया संयोगेन घटसाध्यके तद्घट-तत्पटान्यतरत्वरूपेण हेतुतायामतिव्याप्तिं निरसितुं [९]साध्यताव-च्छेदकसम्बन्धानुयोगितासामान्ये निरुक्तप्रतियोगिकत्वविशिष्टसम्ब-न्धनिरूपितत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावरूपमर्थं विवक्षितवन्तः । एवं च स्वस्मिन् स्वविशिष्टबुद्ध्यनुदयेन स्वप्र-तियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगितायामस-त्त्वात् संयोगीयानुयोगितासामान्ये घटप्रतियोगिकत्वविशिष्टसम्ब-न्धनिरूपितत्वतद्घटनिष्ठत्वोभयाभावोऽक्षत इति नोक्तदोषः । एतेनैत-त्कल्पे समवायैक्यमतेनातिव्याप्तिसमुद्भावनं यथाश्रुताभिप्रायेण बोध्यम् इत्युक्तं तैः । किन्तु 'इदन्तु बोध्य'मित्यादिना गदाधरभट्टाचा-र्येणापि दीधितिकारोक्तस्योभयाभावघटितोक्तप्रतियोगिवैयधिकरण्या-नुधावनस्याक्षेपः कृत एव । साध्यतावच्छेदकावच्छिन्नाभावनिरूपित-स्वविशिष्टसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणेति पदस्यार्थकरणेनैव महाका-लो घटवान् महाकालत्वादित्यादावव्याप्तिवारणसम्भवात् हेतुमन्निष्ठ-तदधिकरणतायाः साध्याभावाधिकरणताभिन्नत्वसत्त्वेन विशिष्टभेदस-त्त्वात्, कालिकसम्बन्धावच्छिन्नघटाद्यभावस्यैवैतादृशविशेषणाक्रान्त-तया प्रतियोगिव्यधिकरणस्याभावस्य प्रसिद्धत्वात् । एवं च प्रतियो-गिवैयधिकरण्यस्य 'यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरण-त्वं हेतुमत' इत्यादिक्रमेण निर्वचनेऽननुगमात् तत्तत्प्रतियोगितावच्छे-दकत्वाभावकूटनिवेशने व्याप्तेर्दुर्ज्ञेयतेत्यादि दूषणान्तराणामप्यनवकाश इत्यादिनोक्तार्थकरणस्य प्रयोजनान्तरमपि गदाधरेण प्रदर्शितम् । द्वि-तीयकल्पानुसरणं तु स्वमतेन दीधितिकारजगदीशाभ्यामनुसृतं प्रद-र्श्य मतान्तराभिमतस्य पूर्वोक्ते घटवान्नित्यज्ञानत्वादित्यादिस्थलेऽव्या-प्तिवारकस्य साध्यतावच्छेदकसम्बन्धे [३१०] निरुक्तप्रतियोगिप्रति-योगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगित्वसाध्यप्रतियोगिक-त्वैतन्त्रित्वावच्छिन्नाभावरूपार्थस्य कालिकसम्बन्धेन घटादिसाध्यके-

ऽव्याप्तिप्रसञ्जकत्वात्कल्पान्तरानुसरणबीजप्रदर्शनं 'अत्र के चि'दित्यादि-ग्रन्थोक्तमुक्तनैयायिकशिरोमणिनाऽधिकं परिहृतम्। अयं च गादाधर्या-मत्र विशेषो द्रष्टव्यः । रघुनाथसार्वभौमेन सम्बन्धघटितोभया-भावकल्पपरित्यागे द्रव्यं जातेरित्यादावतिव्याप्तिवारणरूपं यद्बीजं दत्तम् । तस्य [११]साध्यतावच्छेदकसम्बन्धतावच्छेदकरूपविशिष्ट-निरूपितानुयोगितासामान्ये निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनि-रूपितत्व-हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावरूपार्थविव-क्षया समवायभेदमते समवायकालिकविशेषणतोभयसम्बन्धेन द्रव्य-त्वस्य साध्यतायां केवलसमवायादिना द्रव्यत्वादेर्हेतुतास्थलेऽति-व्याप्तिवारणेऽपि न निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्व-स्थाने निरुक्तप्रतियोगिप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वनिवे-शेन द्रव्यं जातेरित्यादावप्यतिव्याप्तिर्वारयितुं शक्येति वदता गदा-धरभट्टाचार्येण समवायस्यैक्यमतेनैव कथमतिव्याप्तिः पूर्वकल्पे दत्ता दीधितिग्रन्थ इति शिरोमणिमतेऽस्वरसः प्रदर्शितः ॥ एवमुक्त-प्रतियोगिताघटितोभयाभावकल्पे विषयतादिवृत्त्यनियामकसम्बन्धेन साध्यतायां तादृशसम्बन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगि-तानवच्छेदकत्वेन तत्सम्बन्धावच्छिन्नत्वस्याप्रसिद्धतयाऽव्याप्ति-वारणाय वृत्त्यनियामकसम्बन्धेन व्यापकतास्वीकारपक्षे तत्स-म्बन्धस्याभावप्रतियोगितानवच्छेदकत्वमङ्गीकृत्य [१२]प्रतियोगिता-वच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणकाभाव-प्रतियोगितावच्छेदकतासामान्ये साध्यतावच्छेदकसम्बन्धावच्छि-न्नत्व-तादृशरूपावच्छिन्नत्वोभयाभावरूपोऽर्थो विवक्षितः । तथाच उक्तसम्बन्धेन साध्यतायां सद्धेतौ तत्सम्बन्धावच्छिन्नावच्छेदक-ताकसाध्यवदभावो न प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रति-योगितावच्छेदकानधिकरणहेत्वधिकरणकः, अतोऽन्यसम्बन्धेन सा-ध्यादिमदभावः तत्सम्बन्धेनान्यावच्छिन्नाभावो वा तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयाभावसत्त्वान्नाव्याप्तिरिति संक्षेपः ॥

(५) मत्युक्ते हेत्वाभाससामान्यलक्षणे मतान्तरप्रदर्शनम् ।

(१) अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् ।
(२)यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम् तत्त्वम्। (३)ज्ञाय-मानं सदनुमितिप्रतिबन्धकं यत्त्वं वा हेत्वाभाससामान्यलक्षणमिति

लक्षणत्रयमुट्टङ्कितं मणिग्रन्थे।

तत्र च प्रतिबन्धकज्ञानविषयव्यभिचारादिघटकसाध्यादावति-प्रसङ्गवारणाय द्वितीयलक्षणमुपात्तमिति रघुनाथ-मथुरानाथादीनामभिप्रायः। तत्र च प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणाय विशिष्टान्तराघटितत्वनिवेशः शिरोमणिना प्रोक्त.। यद्विषयकत्वेनेत्यादिद्वितीयलक्षणस्य तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्-साध्यकतद्धर्मावच्छिन्नतद्धेतुकानुमितिप्रतिबन्धकस्वार्थकत्वस्य पर्वतत्वेन पक्षत्वे वह्नित्वेन साध्यत्वे विशिष्टधूमत्वेन हेतुत्वे पर्वतादेः काञ्चनमयत्वविरहस्यादोषत्वेन तत्रातिव्याप्तिवारणायावश्यकत्वेन निर्वह्निः पर्वतो वह्निमान् पर्वतावृत्तिवह्निमान् वा तद्व्यभिचारिणः पर्वतावृत्तेर्वा धर्मादित्यादौ तादृशानुमितेरप्रसिद्धतयाऽव्याप्तिवारणार्थं (४)यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरमनुमितौ अनाहार्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकः तत्त्वं हेतुदोषत्वम्। (५) प्रकृतपक्षे प्रकृतसाध्यवत्त्वस्य प्रकृतसाध्यव्याप्यप्रकृतहेतुमत्त्वस्य चावगाहिनो ज्ञानस्य यद्विषयकं ज्ञानं विरोधिविषयकं तत्त्वं तादृशज्ञानविरोधित्वं वा हेतुदोषत्वम्। (६) यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वं तत्र हेत्वाभासत्वमिति मतान्तरेणार्थत्रयं प्रदर्शितम्।

तत्र च प्रथमकल्पे प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिं निराकर्तुं वस्तुतस्त्वित्यादिना (७) यद्विषयकनिश्चयत्वविरोधियादृशयादृशप्रतियोगिको निरुक्तोभयव्यतिरेकस्तदन्यद्विषयकनिश्चयत्वविरोधितादृशविषयिताप्रतियोगिकस्तथाविधविशिष्टाघटितत्वरूपतादृशविशिष्टान्तराघटितत्वस्य निवेशः प्रदर्शितो जगदीशतर्कालङ्कारेण। साध्याभाववद्वृत्तित्वरूपाया अन्वयव्याप्तेरेवानुमित्युपयोगित्वात् तादृशव्याप्तिविशिष्टप्रकृतहेतुमत्त्वावगाहित्वस्यैव लक्षणे निवेशमङ्गीकुर्वतां नव्यानां मतेन तु (८)प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यावगाहित्वस्य प्रकृतसाध्यीयतादृशव्याप्तिविशिष्टप्रकृतहेतुमत्त्वावगाहित्वस्य

च त्रित्वावच्छिन्नाभावो यद्धर्मावच्छेदेन यादृशधर्मवत्तानिश्चयत्वविरोधिविषयिताप्रतियोगिकस्तद्धर्मावच्छिन्न एव तादृशधर्मविशिष्टस्य प्रकृतपक्षतावच्छेदकविशिष्टपक्षकप्रकृतहेतुकसाध्यकन्यायस्थले दोष त्वं विवृतं जागदीश्याम्। अस्मिंस्तु मते जगदीशभट्टाचार्याणामभिमानं 'परैरपरिशीलित प-था' इत्युक्ते। (९)यादृशविशिष्टविषयकनिश्चयवृत्तित्वविशिष्टाया विरोधिविषयताया प्रयुक्तो व्यापक प्रकृतपक्षे प्रकृतसाध्यावगाहित्वस्य प्रकृतसाध्यव्याप्यप्रकृतहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्व हेतुदोषत्वम् इत्यादिस्तु रामभद्रसार्वभौमामाणा गुरुचरणानामप्यभिप्रेतोर्थ साध्याभाव याप्यविशेषपक्षात्मकस त्प्रतिपक्षेऽव्याप्तिप्रसङ्गाद्यापादनेन खण्डित श्रीमज्जगदीशतर्कालङ्कारमहोदयै। कल्पे चास्मिन् सर्वत्र सर्ववस्तुना भ्रमे मानाभावाद्यत्र यस्य यद्वाप्यस्य वा भ्रमो नास्ति तत्र तस्य साध्यताया तदभाव-विशिष्टतद्वस्तुरूपबाधादावव्याप्त्यादिरूपाऽस्वरसबीजस्य 'वदन्ति' इत्युक्त्या सूचितस्योद्घाटनान्न तत्र शिरोमणेर्निर्भर इति जगदीशग्रन्थेन बुध्यते। दीधित्युक्ते (२) कल्पेऽपि यत्र स्थलविशेषे साध्यत द्व्याप्ययो पक्षे समूहालम्बनभ्रमो न कस्याप्युत्पन्न तत्रत्यदोषे पर्वत पर्वतान्यो धूमादित्यादिस्थलीयबाधादावव्याप्तितादवस्थ्याद्दीधितिकारस्यानिर्भर एवेति जगदीशेनोक्तम्। तृतीयेऽव्यननुगतेऽपि लक्षणे स्वमतेन कस्यचिदस्वरसस्यानुल्लेखात्तत्र दीधितिकारस्य निर्भर सूचितो जगदीशभट्टाचार्यैं॥

मथुरानाथतर्कवागीशास्तु चिन्तामण्युक्त(१)कल्पे दीधितकारदस्वरस प्रदर्श्य यद्विषयकत्वेनेत्यादि(२)कल्पे प्रमेयत्वविशिष्ट व्यभिचारादावतिव्याप्तिनिरासक जागदीश्यामुक्तं विशिष्टान्तराघटितत्वनिवेश प्रमेयत्वमवृत्ति प्रमेयत्वादित्यादौ अवृत्तित्वाभाववद्वृत्ति-प्रमेयत्वादिरूपव्यभिचारेऽव्याप्तिभिया परित्यज्य प्रतिबन्धकताया स्वानिरूपितविशिष्टविशेष्यकत्वानवच्छेद्यत्वविशेषणं दत्तवन्त। तत्र च स्वानिरूपितविशिष्टविशेष्यकत्वानवच्छिन्नत्वं स्वानिरूपितविशिष्टविशेष्यकत्वानतिरिक्तवृत्तिप्रतिबन्धकताभिन्नत्वमुक्तम्। प्रमेयत्वादि विशिष्टवह्न्यभाववद्ध्रदात्मकविशिष्टविषयकत्वावच्छिन्नप्रतिबन्धकताया स्वानिरूपितेन केवलवह्न्यभाववद्ध्रदविशेष्यकत्वेनाप्यवच्छिन्नत्वात् नोक्तदोषापत्ति। (१०)प्रकृतपक्षतावच्छेदकरूपेण प्रकृतपक्षे

प्रकृतसाध्यतावच्छेदकरूपेण प्रकृतसाध्यवैशिष्ट्यावगाहिनी प्रकृतसाध्यतावच्छेदकरूपेण प्रकृतसाध्यनिरूपितव्याप्तिप्रकारेण प्रकृतहेतुतावच्छेदकरूपेण प्रकृतहेतुवैशिष्ट्यावगाहिनी च या बुद्धिः सा यत्र यद्वगाहते तत्र तद्वैशिष्ट्यावगाहि यज्ज्ञानं यत्प्रतिबन्धकतानतिरिक्तवृत्ति यादृशविशिष्टनिरूपितविषयतासामान्यं तादृशविशिष्टत्वं हेतुदोषत्वमित्याकारोऽपि उक्तकल्पार्थो निर्वह्निः पर्वतो वह्निमान् वह्निव्यभिचारिधर्मत्वादित्यादिस्थलसङ्ग्रहाय माथुर्यामुक्तः।

गदाधरचक्रवर्तिनस्तु यद्विषयकनिश्चयस्येत्यादिदीधितिनिबद्धप्रथमकल्पस्यावच्छेदकावच्छेदेन साध्यसिद्धिस्थले (११)यद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापको विरोधिविषयताप्रयुक्तो व्यापकत्वविशिष्टसंयोगसंसर्गकवह्निप्रकारकत्वघटितोभयाभावस्तत्त्वरूपमर्थं प्रदर्श्य व्यापकत्वाद्यविशेषितसंयोगसंसर्गकवह्निप्रकारकघटितोभयाभावघटितं साध्यसामानाधिकरण्येन साध्यस्थले निर्दिष्टवन्तः। अवच्छेदकावच्छेदेन साध्यसिद्धौ सामानाधिकरण्येन बाधाव्याप्त्या सामानाधिकरण्येन तत्सिद्धौ च सामानाधिकरण्येन बाधातिव्याप्त्या चोभयसाधारणलक्षणस्यासंभवस्तैः प्रदर्शितः। एवं मेयत्वविशिष्टव्यभिचारादिवारणाय यथाश्रुतविशिष्टान्तराघटितत्वनिवेशमुपदर्शितव्यभिचारघटितबाधादावव्याप्तिवारणाय परिहृत्य विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यतादृशोभयाभावप्रयोजकाभावाधिकरणताकत्वरूपं विशेषणं निवेशितं गादाधर्याम्, तथाच मेयत्वविशिष्टव्यभिचारादिविषयिताप्रयोज्याया उक्तोभयाभावप्रयोजकव्याप्त्ययवगाहित्वाभाववत्तायाः शुद्धव्यभिचारादिविषयिताप्रयोज्यत्वनियमेन न मेयत्वविशिष्टव्यभिचारादौ विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यनिरुक्तोभयाभावप्रयोजकाभावाधिकरणताकत्वमिति नोक्तदोषप्रसङ्गः। यत्त्वित्यादिना रामभद्रसार्वभौममतमपि निबध्य तत्तुच्छमित्यादिना जगदीशवन्निरस्तम्। पक्षतावच्छेदकविशिष्टे निरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिविषयतायाश्च विरोधिविषयतात्वमङ्गीकुर्वतां मतेन (१२)यन्निरूपिततादृशविषयताशालिनिश्चयोत्तरानुमितित्वव्यापक. उभयाभावस्तत्त्वमित्याचार्यैश्चोदासीने घटादावतिव्याप्तेर्वारणाय त्यादृशविरोधिविषयताया विवक्षणीयतया प्रमान्यवृत्ति तदीयविषयितासामान्यं तादृशनिश्चयावृत्ति तदीयविषयताया एव विलक्षणेन नि-

र्वाहसम्भवे विरोधिविद्विषयताशालिनिश्चयोत्तरानुमितिसामान्ये द्वयोर्व्यतिरेक इत्यनभिधाय यद्विषयकनिश्चयस्येत्यादिवक्ष्यमाणकाभिधानस्यानौचित्यप्रदर्शनेन निरस्तः ॥ दीधित्युक्तद्वितीयकल्पस्य च घटवद्भूतलादिरूपोदासीनपदार्थविषयकसमूहालम्बनात्मकपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतद्व्याप्यहेतुप्रकारकज्ञानविषयकघटवद्भूतलादिप्रतिबन्धकज्ञानविषयघटाभाववद्भूतलादावतिव्याप्तिं निरसितुं यद्रूपावच्छिन्ने यद्रूपावच्छिन्नप्रकारकत्वत्वावच्छिन्नं तादृशग्रहत्वव्यापकं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकस्वावच्छिन्ननिरूपितविषयिताकधर्मवत्स्वरूपोऽर्थो विवक्षितः । तृतीये त्वननुगतकल्पे 'तावदन्यान्यत्वस्येतरभेदानुमापकत्वमेव न तु दोषपदप्रवृत्तिनिमित्तत्वम्, किन्तु अभावप्रयोजकसामान्यवृत्तिविषयितानिरूपकत्वमेव, अन्यथा निर्वह्नित्वविशिष्टे वह्निसाधने धूमो दुष्ट इत्यादौ दुष्टपदस्य वह्न्यभावविशिष्टनिर्वह्नित्वाद्यवच्छिन्नान्यतमवदर्थकत्वेन निर्वह्नित्वविशिष्टे निर्वह्नेः साधने इत्यादेः प्रसिध्या तस्य हेत्वन्वयिनि निर्वह्नित्वविशिष्टविशेष्यकवह्न्यनुमितिप्रयोजकत्वार्थकत्वासम्भवेनान्वितार्थकत्वप्रसङ्गात् इत्यादिना गदाधरचक्रवर्तिभिरुक्तकल्पे दोषपदार्थविवेचनं विहितम् । पूर्वोक्तेषु च कल्पेषु कश्चित्केचिद्दन्तीत्यादिपदैः स्वरसस्य प्रदर्शनाद्दीधितिकारस्यान्तिम एव कल्पे निर्भर इति गदाधरचक्रवर्तिनापि सूचितम् ॥

(१)पक्षधरमिश्रास्त्वालोकाख्ये चिन्तामणिव्याख्याने हेत्वाभास-

---

(१) जयदेवापरसंज्ञाः श्रीपक्षधरमिश्रा दरभङ्गामण्डलान्तर्गते कोराननाम्नि ग्रामे कमलासरित्तटे निवसतो भद्रसेनमिश्रस्य भार्यायां सुमित्रादेव्यां १२७५ ई० वर्षे समजनि । ते च हरिमिश्रविदुषः स्वपितृव्यस्यैवान्तेवासिनोऽभूवन्—

> अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
> तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥

इत्यालोकग्रन्थस्याद्यपद्येनोह्यते । तेषां पाण्डित्यविषय एवमाभण्यते—

> शङ्करवाचस्पत्योः शङ्करवाचस्पती सदृशौ ।
> पक्षधरप्रतिपक्षीलक्ष्यीभूतो न च क्वापि ॥

सामान्यलक्षणं दुष्टानां हेतूनामेव न तु दोषाणां तृतीयलक्षणस्येव प्रथमस्यापि ज्ञायमानदोषस्य प्रतिबन्धकत्वमते तादृशाभावप्रतियोगिनां यथार्थज्ञानमिति षष्ठीसमासाङ्गीकारेण तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वरूपस्यार्थस्य सम्भवान्न कश्चिद्दोष इत्याहुः। अत्र च ज्ञानविषयतावच्छेदकस्य प्रतिबन्धकतावच्छेदकत्वन्नानेऽनुमितिप्रतिबन्धकतावच्छेदको विषय एव चेति कल्पद्वयं प्रदर्श्यान्तिमकल्पाभिप्रायेणाग्रिमं लक्षणद्वयमित्युक्त्वा विशेषोऽपि तैरयमबोधि। प्रथमेऽनुमितिप्रतिबन्धकतावच्छेदकधर्मे यथार्थज्ञानविषयत्वमित्यनेन यथार्थपदगर्भमेव तद्वत्त्वं लभ्यत इति व्यर्थविशेषणत्वात्तादृशधर्मवत्त्वमात्रमुपादाय लक्षणान्तरप्रणयनम्। तत्रापि मध्यमे विषयस्यैव प्रतिबन्धकत्वं प्राप्यते न च तत्सम्भवति ज्ञानस्यैव तथात्वादिति चरममाश्रित्य सिद्धान्तः। एवं च सर्वसामञ्जस्ये प्रथमस्य धर्मिलक्षकत्वमुत्तरयोर्व्यभिचारादिधर्मलक्षकत्वं बाधितादौ व्यभिचारत्वादिनैव सामान्यलक्षणेन सङ्ग्रह इत्यादि कल्पनमकल्पनमेवेति।

मिश्राणां दुष्टलक्षणपरेऽन्यत्र व्याख्याने यथार्थपदसार्थक्यसम्भवाचास्वरससम्भावना। अत एवात्र गदाधरमतस्यास्था प्रतीयते। जगदीशतर्कालङ्कारस्तु पक्षवृत्तितया ज्ञायमानस्य वह्न्यभावरूपबाधस्य स्वरूपसम्बन्धेनैव ययथार्थज्ञानं तद्विषयत्वस्य धूमादौ वर्तमानत्वात् पर्वतो वह्निमान्धूमादित्यादावतिव्याप्तिरूपामरुचिं दत्तवान्। तथा च तस्य दुष्टलक्षणपरत्वे निर्भर इति वदामः।

(१)प्रकाशकृद्रुचिदत्तस्यापि मते'हेतुवदवभासमान'इति योगाद्दुष्टो धर्म्येव हेत्वाभासपदवाच्य इति तल्लक्षणमाहानुमितीति' प्रतीकस्य

एतेषां तार्किकी सृष्टिः—(१) तत्त्वचिन्तामण्यालोकः (२) द्रव्यपदार्थः (द्रव्यकिरणावलीप्रकाशः) (३) लीलावतीविवेकः (लीलावतीप्रकाशटीका)। तर्ककर्कशमतयोऽपीमे साहित्यकलालङ्कृतवाग्विभवा बभूवुरिति तन्निर्मिताभ्यां प्रसन्नराघव–चन्द्रालोकाभ्यामवसीयत इति।

(१)रुचिदत्तमिश्रस्तु जयदेवमिश्रस्य प्रधानशिष्यो त्रयोदशशताब्यामलंचकार मिथिलादेशम्। तत्त्वचिन्तामणिप्रकाशः न्यायकुसुमाञ्जलिप्रकाशमकरन्दश्च तत्पाण्डित्यद्योतकरी कृतिरिति इतिहासविदां सम्मतम्।

प्रकरणारम्भे ग्रहणाद्दुष्टधर्मिपरतयैवोक्तलक्षणानां व्याख्यानमित्यवधार्यते। तेन च मण्युक्तप्रथमलक्षणस्य व्यभिचारादिधर्मेऽतिव्याप्तिवारणायानुमितिप्रतिबन्धकपदेन ज्ञानस्यानुमितिप्रतिबन्धकतावच्छेदकधर्मानुमितिप्रतिबन्धकज्ञाने विषयतयाऽवच्छेदकरूपान् व्यभिचारत्वाद्युपाधीनादाय तद्वत्त्वनोत्रयथार्थज्ञानविषयत्वरूपं हेत्वाभासत्वं विवक्षितम्। अत्र व्यर्थविशेषणताया द्वितीयतृतीयलक्षणानुसरणस्य बीजत्वं प्रदर्श्य तत्रापि ज्ञानविषयीभूतस्य व्यभिचारादेर्न प्रतिबन्धकत्वं किन्तु तज्ज्ञानस्यैवेत्यपरितोषो द्वितीयलक्षणानुसरणे हेतुः प्रदर्शितः। एतेन व्यभिचारादय उपाधय एव लक्षिताः तद्विषयकत्वेनैव लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वात् लक्षणद्वये तत्पदस्य च तद्वत्त्वपरत्वेन तद्वत्त्वमर्थः, तेन व्यभिचारादिधर्मे नाव्याप्तिः धर्मिणि लिङ्गे च नासम्भव इति सूचितम्। एवं च क्वचिदस्मते प्रथमस्य लक्षणस्य धर्मिलक्षकत्वमुत्तरयोश्च दोषलक्षकत्वं प्रतीयते द्वितीयमादाय च सिद्धान्तत्वाभिमानस्तेषाम्। इदं च वर्धमानमतेनोक्तन्तेन पक्षधरमिश्रोक्तैतन्मतनिरासस‌ङ्गतिः॥

(१) न्यायसिद्धान्तमुक्तावल्यां यद्विषयकत्वेनेत्यादिना द्वितीयलक्षणमेवोद्धृतम्। शिरोमण्युक्तोऽन्त्यकल्पोऽपि परिगृहीतः। सत्प्रतिपक्षादीनामनित्यदोषत्वाभिप्रायेण 'परे त्वि'त्यादिना द्वितीयस्यैव लक्षणस्य कल्पान्तरप्रदर्शनं कृतम्। तत्र यथार्थपदवैयर्थ्यं प्रथमलक्षणस्य परित्यागे हेतुः, व्यभिचारादिज्ञानस्यैव प्रतिबन्धकत्वं न तु ज्ञायमानदोषाणामित्यभिमानेन तु तृतीयं परित्यज्य द्वितीयलक्षणमेव विश्वनाथपञ्चाननेन गृहीतमिति दिक्॥

(६) उपसंहारः।

एवमनुमानान्ते गङ्गेशोपाध्यायेनोपमानखण्डचिन्तामणौ उपमितितत्करणादीनां विवेचनं कृत्वा चतुर्थे शब्दखण्डे प्रथमं शाब्दबोध-

(१) विश्वनाथन्यायपञ्चाननानामैतिह्यविषयो न्यायचन्द्रिकोपेतायां काशीसंस्कृतपुस्तकमालामुद्रितायां मुक्तावल्या भूमिकायां सविस्तरमस्माभिर्निरूपितस्तत्रैव द्रष्टव्यः। डाक्टरसतीशचन्द्रविद्याभूषणमहोदयैर्निबद्धेन (Indian Logic History) पुस्तकेन ज्ञायते यदुक्तपञ्चाननेन नञ्वादटीका-अलङ्कारपरीक्षा-कारकचक्रन्यायबोधिन्याख्या अपरेऽपि निबन्धा विनिर्मिताः।

प्रमां निरूप्य शब्दप्रामाण्यविचारः सविस्तरमुक्तः। ततश्च शाब्दबोध-कारणीभूतानाकाङ्क्षायोग्यताऽऽसत्तितात्पर्यादीन् विविच्य शब्दनित्य-तावादिमीमांसकमतखण्डनाय तदनित्यतास्थापनं विहितम्। उच्छि-न्नप्रच्छन्नवादेन वेदानां पौरुषेयत्वं च व्यवस्थाप्य विधि-अपूर्व-शक्ति-लक्षणा-समास-आख्यात-धातु-उपसर्गाणां वादास्तदर्थविवेचनद्वारा विप्रतिपत्तिनिरासाय प्रदर्शिताः। प्रामाण्यचतुष्टयप्रामाण्यवादे गौतम-मतेन प्रमाणचतुष्टयस्योपसंहारेण ग्रन्थसमाप्तिः कृता श्रीमता गङ्गेशो-पाध्यायेन। (१)खण्डचतुष्टयेऽप्युक्तमणेर्व्याख्यानानां बाहुल्येऽप्यनु-

(१) तत्त्वचिन्तामणेरद्ययावदुपलब्धानां साक्षात्परम्पराव्याख्या-नानां निघण्टुपत्रम्—

तत्त्वचिन्तामणिर्मूलम्।

1 मणिव्याख्या (कणादतर्कवागीशभट्टाचार्यकृता) 1560 A. D.
2 चिन्तामणिदीधितिः (रघुनाथतार्किकशिरोमणिकृता)
1477-1547 A. P
[1] मणिदीधितिटीका (रामरुद्रतर्कवागीश०) 1700A.D.
[2] दीधितिप्रकाशिका (गदाधरभट्टाचार्य०) 1650 A.D.
[3] दीधितिटीका (रघुदेवन्यायालंकार०) 1650 A.D.
[4] मणिदीधितिप्रकाशिका (रुद्रन्यायवाचस्पति०) 1700
[5] दीधितिगूढार्थविद्योतनं (जयरामन्यायपंचानन०)
1700 A.
[6] दीधितिप्रकाशिका (जगदीशतर्कालंकार०) 1700A.D.
[7] दीधितिटीका (रामभद्रसार्वभौम०) 1680 A.D
[8] दीधितिरहस्यम् (मथुरानाथतर्कवागीश०) 1570 A.D.
[9] दीधितिप्रसारिणी (कृष्णदाससार्वभौम०) 1515
[10] दीधितिप्रकाशिका (भवानन्दसिद्धान्तवागीश०)
1625 A.D.
3 तत्त्वचिन्तामणिप्रकाशः(हरिदासन्यायालङ्कार०)1480-1540A.D.
4 अनुमानखण्डटीका (वाचस्पतिमिश्र०) 1450 A.D.
5 चिन्तामणिमयूखः (शङ्करमिश्र०) 1450 A.D.
6 चिन्तामणिप्रकाशः। (वर्धमानोपाध्याय०) 1250 A.D.
7 तत्त्वचिन्तामण्यालोकः (पक्षधरमिश्र०) 1275 A.D.

मानखण्डदीधितया प्रायश पठनपाठनादौ प्रचारस्योपलभ्यमानत्वात् परीक्षासु तद्ग्रन्थस्यानप्रकरणानां व्यवस्थापनाच्च काशीस्थचौखम्बा संस्कृतपुस्तकमालायामनुमानजागदीशीसहिता सा पूर्वं मुद्रिता। अनुमानखण्डदीधिते गदाधरकृतव्याख्यायास्तु प्राञ्जलेन स्वरूपसुषमा गुणपाशवशीभूततार्किकमण्डलीषु सम्प्राप्तपठनपाठनप्रचाराया अद्यापि कात्स्न्येनामुद्रिताया पुस्तकान्वेषणे बहु क्लिश्यन्तोऽन्तेवासिन समीक्ष्य पुण्यवल्लाभलालसासमेधितोत्साहवशीकृतान्त करण संस्कृतविद्यानुरागी श्रीयुतहरिदासगुप्तमहोदयानामात्मज श्रेष्ठिकुलावतस श्रीजयकृष्णदासगुप्त महोदय प्रवर्तयामास मुद्रित पत्रप्रूफपरिशोधनाय महामहोपाध्यायप०विन्ध्येश्वरीप्रसादद्विवेदिनोऽस्मद्गुरुवरान् म०म० प० वामाचरणभट्टाचार्यन्यायाचार्यांश्च । महतोऽस्य ग्रन्थस्य परिशोधने भट्टाचार्याणामवकाशाभावादस्मत्सहाध्यायिना न्यायाचार्येण प० श्रीरामशास्त्रिणा दत्ते साहाय्ये गादाधर्या सशोधनकार्यं समीचीनतया प्रचलितमासीत् । किन्त्वस्माकं दैवदुर्विपाकवशात् केवलान्वयिप्रकरणपर्यन्त परिशोध्य

---

[1] त० चि० आलोकारहस्य (मथुरानाथ०) 1570 A.D
[2] मण्यालोकटिप्पणी (हरिदासन्यायालङ्कार०) 1480–1540
[3] त० चि० आलोककण्टकोद्धार (मधुसूदनठक्कुर०) 1575
[4] आलोकदर्पण [महेशठक्कुर०] 1400
[5] त० चि० आलोकपरिशिष्टम् [देवनाथठक्कुर०] 1562
[6] अनुमानालोकप्रसारिणी [कृष्णदाससार्वभौम०] 1515
[7] शब्दालोकविवेक गुणानन्दवागीश०] 1570
[8] प्रत्यक्षालोकसारमञ्जरी [भवानन्द०] 1625
[9] त० चि० आलोकटीका [गदाधरभट्टाचार्य०] 1650 A.D
8 चिन्तामणिप्रकाश (रुचिदत्तमिश्र०) 1275 A D
9 त० चिन्तामणिमयूख [जगदीशतर्कालङ्कार०] 1625 A D
10 त० चि० आलोकविवेक [जयरामन्यायपञ्चानन०] 1700
11 त० चिन्तामणिटीका [भवानन्दसिद्धान्तवागीश०] 1625
12 DO [हरिरामतर्कवागीश०] 1625 A D
13 त० चि० गूढार्थदीपिका [रघुदेवन्यायालङ्कार०] 1650
14 त० चिन्तामणिव्याख्या [गदाधरभट्टाचार्य०] 1650 A.D

पुरन्दरपुरातिथौ संजाते द्विवेदिमहोदये श्रीरामशास्त्रिणि चोक्तगुरुमहोदयेनैव प्रोत्साहितोऽहं यथामति प्रावर्तिषि गादाधर्याः संशोधने। अस्याश्च वाराणसीस्थराजकीयसंस्कृतपाठशालापुस्तकालयस्थितं तदध्यक्षपण्डितप्रवर श्रीगोपीनाथकविराज एम० ए० महोदयप्रसादेन लब्धं प्रायशोऽशुद्धं विश्वविख्यातवैदुषीविभवानामस्मद्गुरुवरपूज्यपादश्रीमहामहोपाध्यायवामाचरणन्यायाचार्यमहोदयानां वद्धाक्षरलिखितं च पुस्तकं, चिन्तामणेस्तु चौखम्बामुद्रितं, दीधितेः जीवानन्दमुद्रितमन्यच्च पुस्तकं समासाद्य हेत्वाभासग्रन्थे केवलव्यतिरेक्यर्थापत्तिप्रकरणयोश्च गादाधरीव्याख्याया अभावात् तत्र प्रातःस्मरणीयैः तर्कतीर्थोपाधिसमलङ्कृतैः बटुकनाथशास्त्रिभिरस्मत्तातपादैः कृत विवरणाख्यव्याख्यान च सन्निवेश्य योग्यपाठविशेषं च कुण्डल्यन्तर्गतं विधाय यथाबुद्धि चैवमयं प्रकाशितोऽसौ महानिबन्धः। दुरवगाहेऽत्र ग्रन्थे अग्रभवतां तातकल्पानां गुरुवर्याणां काशीविद्यालयस्थमुख्याध्यापकानां नैयायिकप्रवराणां म० म० पं० श्रीमदम्बादत्तशास्त्रिणां साहाय्येनैव मया विषमस्थलपारावारतरणमकारीति तदुपकाराच्च कदापि विस्मरिष्यामि। तदेवमस्मिन्महति निबन्धजलधावुदुम्बरकीटकल्पेन बहुपराद्धं स्यादिति सम्भावयन् प्रकृतिसुभगशिक्षाभिलाषान्तःकरणो विद्वन्मण्डलीमण्डनायमानान् तार्किकान् साञ्जलिकलिकोपहारं प्रीयतामनेन क्लेशलेशेन कृतशः सर्वान्तर्यामी श्रीजगदीश्वर इत्यभ्यर्थयते—

विदुषामनुचर

ढुण्ढिराजशास्त्री।

गादाधरी-दीधितिसहिततत्त्वचिन्तामणेः प्रकरणानां

सूचीपत्रम् ।

गादाधरी-दीधिति-सहितस्य तत्त्वचिन्तामणेः

अनुमानखण्डस्य ग्रन्थानुक्रमेण

विषयसूचीपत्रम् ।

विषयः । — पृष्ठाङ्के

(१) अनुमितिप्रकरणे ।

(४ पूर्वपक्षप्रकरणे)

(५) सिद्धान्तलक्षणप्रकरणे ।

(९) अतएवचतुष्टयप्रकरणे ।

(११) तर्कप्रकरणे ।

(१४) उपाधिप्रकरणे।

(१५) पक्षताप्रकरणे ।

(१७) केवलान्वयिप्रकरणे ।

(१८) केवलव्यतिरेकिप्रकरणे ।

(१९) अर्थापत्तिप्रकरणे।

(२०) अवयवप्रकरणे ।

(२२) सव्यभिचारप्रकरणे।

(२५) अनुपसंहारिप्रकरणे ।

(२८) असिद्धिप्रकरणे

(२९) बाधप्रकरणे

विषयसंख्या ६३५ पत्रसंख्या १९४०

(३१) ईश्वरवादप्रकरणे ।

(३३) मुक्तिवादप्रकरणे ।

श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता

गादाधरी

श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

अथ अनुमितिप्रकरणम्

(गा०) अभिवन्द्य मुहुः समादरात् पदपाथोजयुगं मुरद्विषः[1] ।
विवृणोति गदाधरः सुधीरतिदुर्बोधगिरः शिरोमणेः ॥

प्रारिप्सितग्रंथपरिसमाप्तिपरिपन्थिप्रत्यूहव्यूहविध्वंसपटीयसीं परमेश्वरप्रणतिमादौ निबध्नाति ओमित्यादि—

(दी०) ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥
परगुरुनयाभिवर्तमाना मननास्वाद्यरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदम् ॥
न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥
मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो
भूयो विधाय विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य
भावावबोधविहितो न दुनोति दोषः ॥

(गा०) समस्तैरकारोकारमकारैः सन्धिवशेन प्रणवभावमावहद्भिरव्यय-

---

१. पुरद्विषः—पा० २ पु० । किन्तु मुरद्विष इत्येव साधु' "नत्वा नन्दतनूजसुन्दरपद"मिति प्रत्यक्षगादाधर्यां वर्तमानत्वात् । "श्रीकृष्णचरणद्वन्द्व नत्वे"ति बौद्धाधिकारगादाधर्यां वर्तमानत्वाच्च ।

तया लुप्तचतुर्थीकैः प्रत्येकशक्त्योपस्थापितस्य वासुदेवादित्रयस्याभेदेन परमात्मनो विशेषणत्वमत्राभिहितम्। अत्र च जगत्पालनादिकर्तृत्वं नारायणादिपदार्थतावच्छेदकम्। उद्देश्यतावच्छेदकस्य परमपदार्थोत्कर्षस्यापि तद्रूपतयाऽन्वयानुपपत्तेः[1] अपि तु विग्रहविशेषवत्त्वमेव. ओंपदार्थस्य परमात्मन एकत्वेऽपि पदार्थतावच्छेदकानां नारायणादिशरीराणां भेदो द्वन्द्वस्य साधुतामुपपादयति। यद्यपि जातिविशेषावच्छिन्नशरीराणां स्वनिष्ठचेष्टानुकूलप्रयत्नवत्त्वरूपपरम्परासम्बन्धेन[2] प्रवृत्तिनिमित्ततापेक्षया धर्मान्तराविशेषितानां शरीरनिष्ठजातिविशेषाणामेव समवायेन तथात्वमुचितं तथापि सर्वं वेत्ति विष्णुरित्यादिप्रामाणिकप्रयोगानुरोधेन विष्ण्वादिपदस्यात्मनि शक्तेर्निरूढलक्षणाया वा आवश्यकत्वात् तत्पर्यायस्याकारादेरपि शरीरविशेषावच्छिन्नात्मपरता युज्यत एव। न चैतत्स्थले शरीरपरत्वे योग्यता कथञ्चिन्निर्वहति शरीरस्य समवायेन ज्ञानाश्रयत्वविरहात् ईश्वरबुद्धेर्व्याप्यवृत्तितयाऽवच्छेदकत्वस्यास्यानार्थतास्वीकारेऽप्यप्रतीकारात्। स्वसमानाधिकरणप्रयत्नासाधारणकारणकचेष्टाश्रयत्वादेरस्यानार्थत्वे गौरवात्[3]। शरीरविशेषा एव प्रणवार्थाः तेषाञ्च निपातार्थतया भेदान्वय एव परमात्मनीति तु न साधु. ओमित्यस्याव्ययपरतायामेव चादयोऽसत्त्व इत्यादिना निपातत्वसम्भवात्। अनिपातत्वेऽव्ययत्वमेव कुत इति चेत्, स्वराद्यन्तर्गतत्वोपगमात् विगृहीतस्याकारादेरनव्ययत्वेऽपि समस्तस्य तथात्वं कल्प्यते बाधकविरहात्। ईश्वरस्य सर्गादिकर्तृत्वे ब्रह्मादीनां तथात्वबोधकानामागमानामपि प्रामाण्यमित्येतत्सूचयितुं तस्य ब्रह्माद्यभेदाभिधानमिति न तद्वैयर्थ्यमाशङ्कनीयम्। वस्तुतस्तु शरीरविशेषानवच्छिन्न एव भगवत्योमितिपदस्य रूढिः। ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविध स्मृत इति समस्तं व्यस्तं त्वां शरणद गृणात्योमितिपदमित्यादिबहुतरतत्साधकसत्त्वात्। रूढेश्चावच्छेदकं जगत्कर्तृत्वमेव। एवं च[4] ओमि-

१ घटो घट इति वाक्यात् शाब्दबोधवारणाय तद्धर्मावच्छिन्नाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वसम्बन्धेन शाब्दबुद्धौ तद्धर्मभेदस्य कारणत्वं वाच्यम् प्रकृते च तदभावात् शाब्दबोधानुपपत्तिरिति भावः।

२ अत्र स्वानुकूलप्रयत्नवत्त्वसम्बन्धेनोपपत्तौ स्वनिष्ठचेष्टानुकूलप्रयत्नवत्त्वपर्यन्तनिवेशनं किमर्थमिति चेत्। ईश्वरप्रयत्नस्य कार्यमात्रं प्रत्यनुकूलतया स्वानुकूलप्रयत्नवत्त्वसम्बन्धेन घटादिरपि विनिगमनाविरहात्प्रवृत्तिनिमित्तता स्यादतः स्वनिष्ठचेष्टानुकूलेति। स्वनिष्ठचेष्टानुकूलत्वं स्वनिष्ठचेष्टात्वावच्छिन्नजन्यतानिरूपितजनकत्वम्।

३ ईश्वरप्रयत्नस्य कार्यमात्रं प्रति साधारणकारणतया सर्वविषयकज्ञानसमानाधिकरणजगदन्तर्गतमात्रासाधारणचेष्टाश्रयत्वस्य चैत्रे सत्त्वात्सर्वं वेत्ति चैत्र इत्यपि प्रयोगः स्यादतस्तादृशप्रयत्नासाधारणकारणकत्वनिवेशः।

४ यत्र रूढपदं यौगिकपदं च वर्तते तत्र रूढपदमेव विशेष्यबोधकं भवतीत्याशयः।

त्येन विशेष्यपदं तदन्यानि च चतुर्थ्यन्तपदानि सर्वाण्येव विशेषणपराणि । नम पदं स्वापकर्षबोधकप्रयत्नकृत्यापारार्थकं तदेकदेशीभूतापकर्षान्वयि अवधित्वमवधिमत्त्वं वा नम स्वस्नीत्यादिसूत्रानुशिष्टचतुर्थ्यर्थं. क्रियान्विततादृशार्थविवक्षायामेवापादानपञ्चमीप्रसक्त्या नम पदार्थघटकापकर्षान्वितनादृशार्थविवक्षायां शेषषष्ठ्येव प्रसज्यत इति सर्वा ह्युपपदविभक्तय षष्ठ्यपवादिका इति न विरुध्यते ।

वस्तुतस्तु[1] स्वावधिकोत्कर्षवत्तया ज्ञापनं नमस्कार तदेकदेशज्ञानान्वयि विषयत्वं विषयित्वं वा चतुर्थ्यर्थं । गुरुं प्रणमतीत्यादौ तादृशज्ञानविषयतया गुरुप्रभृते कर्मत्वेऽपि प्रकृते ज्ञानस्य धात्वनुपस्थाप्यतया न भगवत कर्मता । नारायणं नमस्करोतीत्यादौ नारायणादे कर्मत्वं प्रयत्नेनोपपादनीयम्[2] । नमस्करोति प्रणमतीत्यादौ समभिव्याहृतस्य कर्तुरेव स्वावधिकोत्कर्षबोधको व्यापार प्रतीयते न तूच्चारयितुरेव प्रकृते च केवलात्मम पदात् प्रयोक्तुरेव तादृशव्यापार प्रतीयत इति स्वावधिकोत्कर्षवत्तया भगवज्ज्ञानानुकूलो मदीयो व्यापार इत्याकारक शाब्दबोध । विष्टम्येति । विष्टम्भो धृति सा च पतन विरोधिव्यापार स च ईश्वरप्रयत्न ईश्वरसंयोगो वा । यथा विहायसि भ्राम्यतां विहङ्गमादीनां शरीरधारकप्रयत्नाधिष्ठानात्र पतनं तथा भूरादिलोकानां गुरुतराणामपि प्रयत्नवदीश्वरसंयोगादेव न पतनमिति निरुक्तधृतिकर्तृत्वं भगवतोऽव्याहतमेव । पतन विरोधित्वं पतनानुत्पादप्रयोजकत्वम्, एवं च धात्वर्थतावच्छेदकपतनानुत्पादवत्तया भूतानां कर्मता मुखं व्यादाय स्वपितीत्यत्रेव समानकालीनत्वमेव क्त्वाप्रत्ययार्थ न तूत्तरकालीनत्वम् । भगवतो भूतधारकत्वम् "उत्तम पुरुषस्त्वन्य परमात्मेत्युदाहृत । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर ॥" इत्युपनिषदोऽपि प्रमापयन्ति । अखण्डेति । अत्र नित्यसुखज्ञानघने इति नित्यसुखज्ञानात्मकायेति वा व्याख्यानं वैदान्तिकानामेव शोभते न तु नैयायिकानां तैर्नित्यसुखस्यात्मनि ज्ञानसुखाभेदस्य चानभ्युपगमादतस्तन्मते अखण्डो ह्यसम्भिन्न आनन्दो यस्मात् सोऽखण्डानन्द एवंभूत उपासनारूपो बोधो यस्येत्येव व्याख्येयम् । अथवा ग्रन्थकृता नित्यसुखाभिव्यक्तिर्मुक्तिरितिभट्टमतस्य परिष्कृतत्वात्तदवलम्ब्यैवैतदभिहितम् । तथा चाखण्डस्य नित्यस्यानन्दस्य बोध साक्षात्कारो यस्मादितिव्युत्पत्त्या भगवत उपासनाविषयतया मुक्तिप्रयोजकत्वमेवाखण्डेत्यादिना प्रति-

---

१ गुरु प्रणमतीत्यादौ गुरोर्धात्वर्थतावच्छेदकवत्त्वविरहाद् द्वितीयानुपपत्तिरत आह वस्तुतस्त्विति ।

२ नारायणं नमस्करोतीत्यत्र नम पदं तात्पर्यग्राहकं भूधातोरिव तादृशव्यापारोऽर्थ इत्येव स्वीकरणीयमिति ।

पादितम्। 'पूर्णाय तृप्ताय, तृप्तिश्च स्वीयसुखेच्छाबदन्यत्व'मिति' कुसुमाञ्जलिप्रकाशे भगवतोऽष्टषट्कव्याख्यानावसरे वर्धमानोपाध्यायैरभिहितम्। परमेति। परमत्वमुत्कर्षः स चात्मान्तरावधिकः सर्वविषयकनित्यज्ञानादिमत्त्वमेवेश्वरस्य, एवं चार्थत एव तस्यात्मत्वलाभेऽपि आत्मपदसमभिव्याहारेणैवोत्कर्षपरतालाभ इति न तद्वैयर्थ्यम्।

वस्तुतस्तु आत्मपदं ज्ञानावच्छिन्नस्य वाचकं न तु सुखादिसमवायिकारणतावच्छेदकीभूतद्रव्यत्वव्याप्यजातिविशेषावच्छिन्नस्य सुखादिसमवायिकारणतारहितस्येश्वरस्य तादृशजातिमत्त्वे मानाभावात् सुखत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुतायां अनभ्युपगमेऽपि धर्मादिविरहेणात्मनि सुखाद्युत्पादासम्भवेन तादृशजातावेव युक्तेर्दुर्लभत्वाच्च। एवं च यथा परमसुन्दर इत्यादौ पदार्थतावच्छेदकसौन्दर्यादिगत उत्कर्षः परमपदेन प्रत्याय्यते तथात्रापि आत्मपदार्थतावच्छेदकज्ञाननिष्ठः सर्वविषयकत्वादिरूप उत्कर्षस्तत्पदेन बोध्यत—इति। एवं च भगवत उत्कर्षप्रतिपादकत्वेन स्तुतिरूपतया अयमपि श्लोको मङ्गलरूप इति ध्येयम्॥

नन्वेकानन्तरमपराभिधाने सङ्गतिसत्त्वमपेक्षितं न तु तत्प्रदर्शनं तथा च प्रत्यक्षोपजीवकत्वादित्यादिना कार्यत्वरूपसङ्गतिप्रदर्शनमफलम्। न च प्रत्यक्षानन्तरमनुमानं निरूप्यत इत्यभिधाने तत्पूर्वमेव किमेतन्न निरूपितमित्याकाङ्क्षोदयान्निरूपणपौर्वापर्यनियामकस्य प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावस्य प्रदर्शनमावश्यकमिति वाच्यम्, निरूप्ययोरुपजीव्योपजीवकभावस्य निरूपणक्रमनियामकतायाः स्वयं दूषणीयतया स्वमते क्रमनियामकाकाङ्क्षया तदभिधानासङ्गतेरित्याशङ्कां परिजिहीर्षुः सङ्गतिप्रदर्शनस्य प्रत्यक्षानुमानग्रन्थैकवाक्यताप्रतिपत्तिप्रयोजनकत्वं निरूपणप्रतिज्ञाया निष्फलत्वशङ्कानिराचिकीर्षया तस्याः शिष्यावधानफलकत्वं च दर्शयति पूर्वापरेति॥

(दी०) पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च सङ्गतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षमित्यादि।

(चि०) प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते।

(गा०) 'एकवाक्यत्वं' साकाङ्क्षत्वे सति एकार्थप्रतिपत्तिपरत्वं, तथा च जैमिनिसूत्रम् 'अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्या'दिति। एकार्थप्रतिपादकयोर्घटोऽस्ति न राशोऽस्तीत्यादिवाक्ययोरेकवाक्यतावारणाय साकाङ्क्षत्वनि-

१. स्वसमानाधिकरणत्वस्वविषयकत्वोभयसम्बन्धेन सुखविशिष्टेच्छावदन्यत्वमित्यर्थः।

वेशः, तदुत्थाप्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वान्यतरवत्त्वमेव तत्साकाङ्क्षत्वम्, प्रकृते च प्रत्यक्षग्रन्थोत्थाप्यायाः किमस्योपजीवकमित्याकारिकाया उपजीवकज्ञानविषयिण्या आकाङ्क्षाया विषयसिद्धिसम्पादनेन निवर्तकत्वमनुमानग्रन्थस्येति निरुक्तनत्साकाङ्क्षतानिर्वाहः, भूतलं घटवदित्युक्ते को घट इत्याकाङ्क्षया प्रयुक्तस्य कम्बुग्रीवादिमानित्युत्तरस्य तदेकवाक्यतावारणायार्थेऽन्यनिवेश, यद्यपि तादृशवाक्ययोरपि यं कञ्चिदर्थमादायार्थैक्यमस्ति तथापि परस्परसहकारेण विशिष्टैकार्थप्रतिपादकत्वं दलद्वयार्थः। प्रकृते च प्रत्यक्षपरिच्छेदानुमानपरिच्छेदयोर्मिलित्वा विशिष्टैकार्थविषयकशाब्दबोधाजनकत्वेपि चत्वारि प्रमाणानीत्यप्रामाण्यशङ्कानास्कन्दितनिश्चयं प्रति परिच्छेदचतुष्टयस्यैव कथञ्चिदुपयोगितया तादृशप्रतिपत्तिप्रयोजकत्वाभिप्रायविषयत्वरूपमर्थैक्यं निराबाधमेव। एतादृशैकवाक्यताघटकसाकाङ्क्षताज्ञानं सङ्गतिज्ञानाद्भवति, यद्यदर्थसङ्गतार्थकं भवति तत्तत्साकाङ्क्षमितिव्याप्तेः सङ्गतिज्ञानस्य साकाङ्क्षत्वानुमितिसामग्रीघटकत्वात्, प्रत्यक्षोपजीवकमित्यनभिधाय उपजीवकत्वादिति पञ्चम्यन्ताभिधानमुपजीवकत्वस्य सङ्गतित्वलाभाय। प्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपपरम्परया प्रयोजकत्वस्य हेतुपञ्चम्यर्थतया प्रत्यक्षानन्तरानुमानाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपानुमानसङ्गतित्वस्य लाभात्।

वस्तुतो दर्शितपञ्चम्यर्थस्य जिज्ञासाघटितत्वात्साकाङ्क्षतालाभायैव पञ्चम्यभिधानम्। अत एव सङ्गतित्वेन सङ्गतेरेकवाक्यताव्याप्यत्वे उपजीवकत्वरूपतद्वान्तररूपेणापि तद्व्याप्यताया आवश्यकत्वात् सङ्गतित्वज्ञानं विनाप्येकवाक्यताप्रतिपत्तिसम्भवात्सङ्गतित्वलाभाय पञ्चम्यन्ताभिधानमनर्थकमित्यपि निरस्तम्। न च पञ्चम्यर्थान्वयबलात्प्रत्यक्षोपजीवकत्वज्ञानजन्यजिज्ञासाया अनुमानाभिधानप्रयोजकतालाभेऽपि जिज्ञासायां प्रत्यक्षग्रन्थोत्थाप्यत्वस्यानुमानग्रन्थनिवर्तनीयत्वस्य चालाभान्निरुक्तसाकाङ्क्षत्वलाभो न सम्भवत्येवेतिवाच्यम्, जिज्ञासायां प्रत्यक्षोपजीवकत्वज्ञानजन्यत्वलाभे तादृशज्ञानप्रयोजकीभूतप्रत्यक्षग्रन्थप्रयोज्यत्वस्यानुमानाभिधानप्रयोजकत्वलाभेऽनुमानप्रतिपादकग्रन्थनिवर्त्यत्वस्य चार्थतो लाभात्। अनुमानग्रन्थे प्रत्यक्षग्रन्थैकवाक्यताप्रतिपत्तिश्च उभयोरेकग्रन्थान्तर्गतत्वज्ञानसम्पादनेन समस्तचिन्तामणिग्रन्थज्ञानाधीनप्रत्यक्षादिचतुष्टयधर्मिकप्रमाणेतरभेदपरिच्छेदरूपफलविशेषेच्छावतोऽधीतप्रत्यक्षपरिच्छेदस्य शिष्यस्य तादृशफलोपयोग्यनुमानपरिच्छेदाध्ययनप्रवृत्तावुपयुज्यते।

केचित्तु एकवाक्यत्वं निःश्रेयसरूपैकफलप्रयोजकत्वं, तत्प्रतिपत्तिश्चानुमानग्रन्थज्ञानधर्मिकनिःश्रेयसरूपेष्टसाधनताज्ञानरूपा शिष्यप्रवृत्तावुपयुज्यते

जायते च सा सङ्गतिमदर्थप्रतिपादकत्वरूपहेतुमत्ताज्ञानजनकात्सङ्गतिप्रदर्शनादिति व्याकुर्वन्ति ।

तदसत्, उक्तहेतोस्तादृशैकवाक्यताशून्यनिःश्रेयसानुपयोगिशास्त्रसाधारणतया व्यभिचारित्वात् । निःश्रेयसत्वं परित्यज्य फलत्वरूपेण फलप्रवेशे फलस्योत्कटेच्छाप्रयोजकरूपविशेषाज्ञानात्प्रेक्षावत्प्रवृत्त्यनुपयोगितापत्तेः एकफलकत्वस्य एकवाक्यतापदार्थताविरहाच्च । शिष्याणामिति । 'अवधानम्' अनुमाननिरूपणात्मकस्य तत्र व्याप्तिविशिष्टेत्यादिप्रकृतशब्दस्य विशिष्य शुश्रूषा । अनुमाननिरूपणत्वेन सामान्यतस्तादृशशब्दे प्रमाणतत्त्वप्रतिपादकज्ञानविषयत्वावगतावपि विशिष्य तच्छ्रवणे बुभुत्सितार्थप्रतिपादकत्वाग्रहाद्विशिष्य तच्छुश्रूषा न सम्भवतीति अनुमानमिदानीं निरूप्यत इति प्रतिज्ञाय तदभिधाने च विशिष्य प्रकृतनिरूपणेऽनुमानविषयकत्वग्रहेण बुभुत्सितप्रमाणतत्त्वप्रतिपादकता प्रकृतशब्दश्रवणे विशिष्य गृह्यत इति तादृशशुश्रूषारूपावधानं निर्वहतीति तत्फलकत्वं प्रतिज्ञायाः । तादृशावधानं च विशिष्य तच्छ्रवणे शिष्यप्रवृत्तावुपयुज्यते विरोधिन्यायाद्यनुपादित्सासम्पन्न्या विघटनेन शब्दश्रवण एव वा । न च सङ्गतिप्रदर्शनानुमाननिरूपणप्रतिज्ञयोः प्रत्येकमुक्तप्रयोजनद्वयान्वये चकारासङ्गतिरिति वाच्यम्, प्रत्यक्षोपजीवकत्वादित्यादिसमुदितवाक्यस्यैव प्रतिजानीत इति प्रतिज्ञापदेन विवक्षितत्वात् । अन्यथा प्रत्यक्षमित्यादीतिक्रियाविशेषणान्वयायोगादेकपदार्थे एव तदुभयान्वयेन तत्सङ्गतेः । एकदेशस्य एकवाक्यताप्रतिपत्त्यादिफलकत्वेनापि समुदाये तत्फलकत्वाबाधात्, सङ्गतिभिन्नांशप्रतिपादनद्वारा नैकवाक्यताप्रतिपादकत्वमुक्तप्रतिज्ञावाक्यस्य किन्तु सङ्गत्यंशप्रतिपादनद्वारेति तस्य सङ्गतिप्रदर्शनरूपताप्रतिपत्तये सङ्गतिं प्रदर्शयन्नित्यभिहितम् । धातुसम्बन्धे प्रत्ययाः इत्यनेन समभिव्याहृतक्रियासमानकालीनतायामनुशिष्टशतृपदात्सङ्गतिप्रदर्शनप्रतिज्ञयोरेककालीनत्वलाभेनार्थतस्तदभेदप्रतीतेः । प्रतिजानीत इति अव्यवहितोत्तरकालकर्तव्यतया बोधयतीत्यर्थः, लट्प्रत्ययस्यात्र वर्तमानसामीप्यार्थकत्वादिति भावः ॥

प्रत्यक्षोपजीवकत्वादिति पञ्चम्या ज्ञापकत्वरूपहेतुत्वपरताभिमानेन निरूपणक्रमनियामकाकाङ्क्षया उपजीव्योपजीवकभावप्रदर्शनमिति साम्प्रदायिका वर्णयन्ति, तन्मतमेव प्रथमतोऽनुवर्तमान फलीभूतप्रत्यक्षानुमितिप्रमयोः प्रत्यक्षानुमानप्रमाणयोश्च कार्यकारणभावस्य प्रमाकरणनिरूपणक्रमनियामकतामाह अत्रेति ।

(दी०) अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्च प्रत्यक्षफलस्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेऽपि न मतो प्रत्यक्षमि-

तिस्तथा अनुमितयस्तु सर्वाः साक्षात्परम्परया वा व्याप्त्यादिप्रत्यक्षो-पजीविकाः पुरस्कृतश्चायमुपजीवकतोत्कर्षः ।

(गा०) 'अत्र' प्रत्यक्षानुमानग्रन्थपौर्वापर्ये इत्यर्थः', नियामक इति शेष, नियामकत्वमेव वा सप्तम्यर्थ । 'फलत' फलयोः, प्रत्यक्षप्रमानुमिति-प्रमयोरितियावत् । 'स्वरूपतः' स्वरूपयो , प्रत्यक्षप्रमाणानुमानप्रमाणयोरिति यावत् ।

'अत्र' अनयो' प्रत्यक्षानुमानयोरित्यर्थ , 'फलत.' फलघटितपरम्परास-म्बन्धेन, 'स्वरूपत ' साक्षात्सम्बन्धेन, वर्तत इति शेष. तथा चोभयथैव स निरूपणक्रमनियामक इति भाव इति केचित् ।

अत्रेतीदंपदं प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थपरं सप्तम्यर्थ प्रतिपाद्यत्वं तथा च फलयो प्रमाणयोश्च उपजीव्योपजीवकभाव क्रमनियामकतया एतद्ग्रन्थप्रतिपाद्य इत्यर्थ , उपजीव्यत्वस्य शब्दत साक्षादलाभेपि उपजीव-कतानिरूपकत्वेनार्थतस्तल्लाभान्न विरोध इत्यपरे ।

ननु प्रत्यक्षानुमित्योरुपजीव्योपजीवकभावस्य तन्निरूपणपौर्वापर्यनिया-मकता तदेव सम्भवति यद्युपजीवकत्वमानन्तर्याभिधानव्याप्यं भवेत्, व्याप्तिश्च यत्प्रत्यक्षोपजीवकं भवति तत्प्रत्यक्षनिरूपणाव्यवहितोत्तरनिरूपणविषय इति विशेषतो यद्यदुपजीवकं भवति तत्तन्निरूपणाव्यवहितोत्तरनिरूपणविषय इति सामान्यतो वा ग्राह्या, उभयत्र प्रत्यक्षानन्तरमनिरूपिते तदुपजीवकपदार्था-न्तरे व्यभिचार । तदव्यवहितोत्तरनिरूपणविषयत्वे सतीति विशेषणं हेतौ निवेश्य तादृशव्यभिचारवारणेऽपि प्रथमे दृष्टान्ताभाव , व्यतिरेकिदृष्टान्तः सुलभ इति चेत् , तदाऽनुमानत्वमेव प्रत्यक्षनिरूपणानन्तरनिरूपणनियामकं किन्नोच्यते अप्रयोजकत्वशङ्का पुनस्तुल्यैवेति द्वितीय एव पक्ष आदरणीयः तत्रापि अनुमित्युपजीवकतदनुव्यवसायतदात्मकोपनयादिजन्योपनीतप्रत्य-क्षादेस्तन्निरूपणाव्यवहितोत्तरमनिरूपणेन व्यभिचारो दुर्वार इति शङ्कां निरा-चिकीर्षु' प्रत्यक्षप्रमानिष्ठानुमित्युपजीवकतातोऽनुमितिनिष्ठप्रत्यक्षोपजीवक-तायामानन्तर्याभिधानव्याप्यतावच्छेदकं विशेषमाह प्रत्यक्षफलस्येति । 'तथा' साक्षात्परम्परया वा अनुमित्युपजीविका, अनुमितयश्चेति । यादृशानुमिति-कारणज्ञानमनुमित्यादिरूपमेव तत्र साक्षात्प्रत्यक्षोपजीवकत्वासम्भवात्पर म्परया वेति । तथा चोपजीवकत्वमत्र जन्यजन्यादिव्याप्तं कार्यत्वरूपं न विवक्षितमपि तु तत्साधारणं प्रयोज्यत्वरूपमेवेति न दोष. । 'अयं' निरूपण-विषयतावच्छेदकप्रमाविभाजकधर्मावच्छिन्नत्वरूपोपजीवकतानिष्ठ उत्कर्ष , 'पुरस्कृत ' आनन्तर्याभिधानप्रयोजकतया आदृत इत्यर्थ', त्वर्थेन चकारेणा-

विभाजकावान्तरधर्मावच्छिन्नत्वस्य पुरस्कृतत्वं क्वचिच्छिन्नं, तथा च प्रत्यक्षत्वावच्छेदेन प्रत्यक्षे नानुमित्युपजीवकत्वमस्तीति प्रत्यक्षं प्रागेव निरूपितं, तथाविधानुमितित्वावच्छेदेन चानुमितौ प्रत्यक्षोपजीवकत्वमस्तीति सा पश्चान्निरूपितेति भावः ॥

प्रत्यक्षेऽपि निरूप्यतावच्छेदकफलविभाजकधर्मावच्छेदेनादृष्टद्वाराऽनुमितिप्रयोज्यत्वमस्तीत्याशङ्कते यद्यपीति ।

(दी०) यद्यपि सकलमेव प्रत्यक्षफलमुपजीव्यदृष्टजननीं समयमत्कर्तव्यतादि[१] परिच्छेदिकामनुमितिम्, ईश्वरप्रत्यक्षन्तु न फलं, तथापि दृष्टद्वारकमिह तथात्वमादरणीयम् इतरस्याविनिगम्यत्वात् । सर्वं चानुमितिकरणमिन्द्रियापेक्षोत्पत्तिकम् । अनुमितिं भावयतोऽपीश्वरज्ञानस्य तत्करणतानिर्वाहकप्रत्यासत्तिविरहेणातत्त्वात् । सर्वं पुनरिन्द्रियं नानुमानाधीनजन्म मनःश्रवणयोरजन्यत्वात् । दृष्टद्वारा वा तथात्वमादरणीयम् । न चोत्पत्तिमदपीन्द्रियं दृष्टद्वारकमनुमानमपेक्षते ॥

(गा०) 'अदृष्टजननीं' स्वजनकादृष्टप्रयोजिकां, 'समय' पदसङ्केतः, 'मत्कर्तव्यता' स्वकृतिसाध्यता, 'तत्परिच्छेदिकां' तद्विषयिणीं, शब्दाधीनायामदृष्टजनकयागादिगोचरप्रवृत्तौ प्रवृत्तिपरवाक्याधीनवाक्यार्थबोधोऽपेक्षित, तत्र च इदं पदमत्रार्थे शक्तं[२] शक्तिभ्रमाजन्यलक्षणाग्रहाजन्यैतद्विषयकत्वाद्[३] इष्टजनकत्वादित्यनुमानाधीनशक्तिग्रहोऽपेक्षितः । अन्यत्र च इदं मत्कर्तव्यं मत्कृतिं विनाऽनुत्पद्यमानत्वे सति मदिष्टसाधनत्वादित्यनुमानाधीनकृतिसाध्यताधीरपेक्षितेति प्रवृत्तिद्वाराऽदृष्टप्रयोजिकाऽनुमितिर्जन्यमात्रं प्रत्येव प्रयोजिका अदृष्टस्य कार्यमात्रं प्रति हेतुत्वादिति भावः । नन्वेवमपि प्रमाविभाजकप्रत्यक्षत्वाश्रयस्य भगवत्प्रत्यक्षस्य नित्यतयाऽनुमित्यनुपजीवकत्वान्निरूप्यतावच्छेदकधर्मावच्छेदेन प्रत्यक्षे नानुमित्युपजीवकत्वसम्भव इत्यत आह 'ईश्वरे'ति । न फलमिति, तथा च तत्साधारणप्रत्यक्षत्वं न फलविभाजकमतिप्रसक्तत्वादपि तु तद्व्यावृत्तं जन्यप्रत्यक्षत्वमेव तदेव च निरूप्यतावच्छेदकं तदवच्छेदेन चादृष्टद्वाराऽनुमित्युपजीवकत्वमक्षतमेवेति

१ आदिपदेन मदिष्टसाधनता ग्राह्या ।

२ अत्रार्थे व्यभिचारवारणाय शक्तिभ्रमाजन्येति ।
लाक्षणिकपदे व्यभिचारवारणाय लक्षणाग्रहाजन्येति ।

३ शब्दानधानप्रवृत्ताविदमर्थं ।

भाव.।[1] 'दृष्टद्वारकं' दृष्टमात्रद्वारकं, अदृष्टाद्वारकमिति यावत्, तेन दृष्टस्य यागादेरनुमितिद्वारत्वेऽपि न क्षति'। अदृष्टाद्वारकत्वं च स्वजनकादृष्टजनकानिरूपितत्वं, स्वं हेतुमत्तयाऽभिमतं, 'तथात्वम्' उपजीवकत्वम्, 'इह' आनन्तर्याभिधाने. 'आदरणीयं' नियामकतया स्वीकरणीयं, तथा च' यत्स्वजनकादृष्टाजनकत्वनिरूपितनिरूपणविषयतावच्छेदकप्रमितिविभाजकधर्मावच्छिन्नोपजीवकतावत्त्वं तन्निरूपणान्यवहितोत्तरनिरूपणविषय इत्येव व्याप्तिरादरणीया। तत्र च न व्यभिचारावकाश इति भाव । नन्वदृष्टद्वारकोपजीवकतया आनन्तर्याभिधाननियामकत्वमङ्गीकृत्य प्रत्यक्षमेव किं पश्चान्न निरूप्यत इत्यत आह ज्ञातस्येति। अदृष्टद्वारकोपजीवकत्वम्पेत्यर्थः। 'अविनिगम्यत्वात्' विनिगमनाया अविषयत्वात्। तथा चादृष्टद्वारा प्रवृत्त्यौपयिकोपादानप्रत्यक्षोपजीवकतया अनुमितौ सत्वेनादृष्टद्वारकोपजीवकत्वस्य तुल्यतया आनन्तर्याभिधाननियामकत्वं न सम्भवतीति भाव । प्रत्यक्षप्रमाणस्य चक्षुरादेरप्यदृष्टद्वारा समवायादिप्रतिच्छेदकानुमानोपजीवकत्वात् स्वरूपनिष्ठोपजीवकतायाः कथमानन्तर्याभिधाननियामकत्वमित्याशङ्कां परिजिहीर्षुरनुमाननिष्ठोपजीवकतायां विशेषं दर्शयति सर्वमिति। यत् प्रमाणं स्वनिष्ठप्रामाण्यग्रहार्थं प्रमाणान्तरमपेक्षते तदपि तदुपजीवकमुच्यते. प्रकृते च तादृशमुपजीवकत्वं न विरक्षितं नित्येनापीन्द्रियेण प्रामाण्यग्रहार्थमनुमानापेक्षणादिति स्वोत्पत्तौ तदपेक्षितत्वरूपमुपजीवकत्वमेवेति स्फुटीकर्तुम् इन्द्रियोपजीवकमित्यनभिधाय इन्द्रियापेक्षोत्पत्तिकमित्यभिहितम्। एतावता एतस्यैव परीक्षाकृता शङ्कोत्तरभावेन यदभिहितं तत्स्वाभिधानसौष्ठवमादर्शितम्। एवं च निरूपणीयतावच्छेदकानुमितिकरणत्वादिरूपप्रमाणविभाजकरूपावच्छेदेनोपजीवकत्वमेवानन्तर्याभिधाननियामकं वाच्यमित्याशय.। नन्वनुमितिं प्रति भगवज्ज्ञानस्य उपादानप्रत्यक्षत्वेन[3] व्याप्तिज्ञानत्वेन च कारणत्वात् तदप्यनुमितिकरणम्

१ केचित्तु 'अत्र' कार्यतावच्छेदकप्रमाविभाजकधर्मावच्छिन्नत्वरूप उपजीवकत्वनिष्ठो वर्णः, 'पुरस्कृत' आनन्तर्याभिधानप्रयोजकतावच्छेदकतया आहुत इत्यर्थं । ननु नित्यानित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वाभावात् जन्यप्रत्यक्षत्वमेव तन्नतावच्छेदक तथा च प्रत्यक्षेऽपि कार्यतावच्छेदकीभूतप्रमाविभाजकधर्मावच्छेदेनादृष्टद्वारा अनुमित्युपजीवकत्वमस्तीत्याशङ्कते सर्वमिति । ननु नित्यानित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे क्षतिविरहात् प्रत्यक्षत्वमेव तादृशो धर्मस्तथा च कथमनुन्धर्मावच्छेदेनानुमित्युपजीवकत्वमस्त्येव इत्यत आह ईश्वरेति । न केवल न तादृशप्रत्यक्षसाधारणप्रत्यक्षत्व तन्यतावच्छेदक नित्यानित्यसाधारणधर्मस्य तथात्वे अपसिद्धान्तप्रसङ्गात् तथा च जन्यप्रत्यक्षत्वमेव कार्यतावच्छेदक तदवच्छेदे नादृष्टद्वारा अनुमित्युपजीवकत्व न सम्भवतीति भाव । इति २ पुस्तके अधिक पाठः ।

२. पूर्वाभिहितार्थे निरूपितवारस्यातिशयेन तत्परित्यज्य यत्पदार्थोपदृष्टान्तकरत्व प्रवेश्य व्याप्तिमाह तथा चेत्यादिना ।

३ समवायसम्बन्धेन कार्यमात्र प्रति विषयतासम्बन्धेन उपादानप्रत्यक्ष कारणमेवेत्योपादानप्रत्यक्षविधया ईश्वरप्रत्यक्षमपि हेतुरिति भाव ।

अथ च नित्यतया न प्रत्यक्षोपजीवकमिति कथमनुमितिकरणत्वावच्छेदेन प्रत्यक्षोपजीवकत्वेत्याशङ्क्य तस्यानुमित्यसाधारणकारणत्वाभावं व्यवस्थापयति अनुमितिमिति। 'भावयतोऽपि' उपादानप्रत्यक्षविधया जनयतोऽपि, तत्करणतेति अनुमितित्वावच्छिन्ननिरूपितकरणतानिर्वाहकतत्समवायिसमवेतत्वरूपप्रत्यासत्तिविरहेणेत्यर्थः । 'अतत्त्वात्' अनुमितित्वावच्छिन्नकारणत्वात्। अयमभिप्रायः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्यत्रात्मशरीरादिव्यावृत्तं प्रमित्यसाधारणकरणत्वमेव प्रमाणपदेन विवक्षितं तच्च प्रमितिविभाजकधर्मावच्छिन्नकरणत्वम्। एवं चानुमानपदेनापि अनुमितित्वावच्छिन्नकरणत्वमेव विवक्षितं तदेव विभाजकम्। ईश्वरज्ञानं च न तथा, तथाहि फलायोगव्यवच्छिन्नव्यापारवत्कारणत्वं करणत्वं न तु कारणत्वमात्रं तथा सति छिदानुपधायककुठारादिव्यक्तेरपि तत्करणताप्रसङ्गेन तत्कुठारेण छिन्नमिति प्रयोगापत्तेः । तदर्थश्च स्वनिरूपककार्यतावच्छेदकसम्बन्धेन कार्याधिकरणे तत्कार्योपधायकव्यापाराव्यवहितप्राक्क्षणावच्छेदेन स्वावच्छेदकसम्बन्धेन वर्तते यत्तद्वृत्तित्वविशिष्टकारणत्वं[1], त्वं करणता। ईश्वरज्ञानस्य सोपादानप्रत्यक्षविधया कारणता तदवच्छेदकविषयतासम्बन्धेन तस्यानुमितिसमवायिनि वृत्तावपि तस्या जन्यत्वावच्छिन्ननिरूपिताया अनुमितित्वावच्छिन्नानिरूपितत्वात् अनुमितित्वावच्छिन्ननिरूपिता च या ज्ञानत्वावच्छिन्नकारणता तदवच्छेदकसमवायसम्बन्धेन तस्यानुमितिसमवायिन्यसमवायात्मन्यवृत्तेर्नानुमितित्वावच्छिन्नकारणत्वमिति. तथा च तादृशकरणत्वावच्छेदेन प्रत्यक्षप्रमाणोपजीवकत्वमक्षतमेवेति एवं जन्यज्ञानत्वावच्छिन्नकरणस्य मन प्रभृते प्रत्यक्षानुपजीवकत्वेऽपि न क्षति, उक्तरीत्या तस्याप्यनुमितित्वावच्छिन्नाकरणत्वात् ।

केचित्तु प्रमाणतावच्छेदकरूपावच्छिन्नोपजीवकत्वस्यानन्तराभिधानप्रयोजकत्वाभिमानेनेश्वरज्ञानस्य कार्याधिकरणाप्रत्यासन्नत्वेनाकरणत्वेऽपि अनुमितिकरणतावच्छेदकव्याप्तिज्ञानत्ववत्तया निरुक्तोपजीवकत्वस्यानन्तराभिधाननियामकत्वानुपपत्तिरिति पूर्वपक्षयन्ति. नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमानुरोधाज्जन्यव्याप्तिज्ञानत्वमेवानुमितिजनकतावच्छेदकम्, अतत्त्वादित्यस्य च अनुमितिकरणतावच्छेदकरूपाभावादित्यर्थः, प्रत्यासत्तिघटितफलोपधायकताया जन्यत्वविशिष्टतादृशरूपव्यापकतया[2] तदभावस्य

[1] अव्यवहितोत्तरत्वसम्बन्धेन ... प्रति ... सम्बन्धेन ... कारणत्वमनुपेतेत्यत्र, अव्यवहितपूर्वत्व ... तद्व्यक्तिज्ञानं ... कुठारे ... ... कार्याधिकरणेऽसत्त्वेऽपि न करणत्वहानि । एवं कुठारेण छिन्नत्वाद्यापत्तिरपि बोध्यम् ।

[2] निरुक्तविशिष्टतादृशरूपव्यापकतयेति २ पु० पा० ।

तादृशरूपाभावहेतुतेति समादधति च। तदसत्, उक्तरीत्यैव सामञ्जस्यात्।

सर्वं पुनरिति। तथा च प्रत्यक्षत्वावच्छिन्नकरणत्वावच्छेदेन नानुमानोपजीवकतेति नानुमानानन्तरं प्रत्यक्षनिरूपणापत्तिरिति भावः। नानुमानोपजीवकमितिपरित्यज्य नानुमानाधीनजन्मेत्यभिधाने बीजं पूर्वोक्तमेव। अनुमितिस्वरूपयोग्यमात्रस्यैव तत्करणत्वमभ्युपेत्यादृष्टाद्वारकोपजीवकत्वस्यानन्तर्याभिधाननियामकतामङ्गीकरोतीति वक्ष्यमाणेति। तथा चेश्वरज्ञानस्यानुमितिकरणत्वेऽपि न क्षतिः। निरूप्यतावच्छेदकसामानाधिकरण्येनादृष्टाद्वारकोपजीवकतायाः एवानन्तर्याभिधाननियामकत्वोपगमात्। यावदनुमितिकरणेषु प्रत्यक्षोपजीवकताविरहेऽपि क्षतिविरहात्। न चोपमानदपीति। यद्यपि चक्षुर्वर्णप्रवृत्त्यौपयिकमनुमानं खण्डचक्षुष्यदृष्टमङ्गीकृत्यैव महाचक्षुर्नाशकतदवयवविभागानुकूलावयवक्रियाजनकधर्मगमकतया तेन प्रयोजकं भवति तथापीदानीं जन्यत्वरूपस्यैवोपजीवकत्वस्यादरणीयतया खण्डचक्षुषश्चानुमाननिष्ठान्यथासिद्धिनिरूपकत्वेन तज्जन्यताविरहान्नातिप्रसङ्गः। एवं चादृष्टाद्वारकस्य प्रवर्तकानुमानस्यान्यथासिद्धतया चक्षुराद्यहेतुत्वेऽपि परमेश्वरीयव्याप्तिज्ञानरूपानुमाननिरूपितचक्षुरादिनिष्ठजन्यतावारणायैव स्वजनकादृष्टाजनकनिरूपितत्वात्मकमदृष्टाद्वारकत्वमुपजीवकताविशेषणमुपात्तमिति ध्येयम्।

अथवा पुरस्कृतश्चायमिति ग्रन्थ एवं व्याख्येयः, 'अयं' निरूप्यतावच्छेदकावच्छिन्नत्वरूपः उत्कर्षः, 'पुरस्कृतः' फलस्य स्वरूपस्य चानन्तर्याभिधानप्रयोजकतावच्छेदकतया आदृतः, एवं च प्रमितिविभाजकधर्मावच्छिन्नत्वस्य विशिष्यानिवेशाच्च दृष्टान्तसौलभ्यमपि बोध्यम्। निरूप्यतावच्छेदकं च सर्वत्र विभाजकरूपमेव, येन रूपेण विभागः कृतस्तद्रूपावच्छिन्नस्यैव लक्षणादेराकाङ्क्षितत्वात्। यद्यपीत्यादिपूर्ववत्। ननु फलस्यानुमितेर्निरूप्यतावच्छेदकानुमितित्वावच्छेदेन प्रत्यक्षफलोपजीवकत्वेऽपि स्वरूपेऽनुमितिकरणे तादृशप्रत्यक्षप्रमाणोपजीवकत्वमसिद्धमीश्वरज्ञानस्यापि ज्ञानत्वेनानुमितिकरणत्वात्तस्य च नित्यतयाऽनुपजीवकत्वादतः प्रमाणस्यानन्तराभिधाने विभाजकधर्मसमानाधिकरणमुपजीवकत्वमेव नियामकं वाच्यम्, तच्च न संभवति चक्षुरादौ दीपदानादिगोचरप्रवृत्त्यौपयिकानुमानोपजीवकतायाः अदृष्टाद्वारकत्वविशेषणेन व्यावृत्तावपि खण्डचक्षुरादिनिष्ठायाश्चक्षुर्वर्णनादिप्रवृत्त्यौपयिकानुमाननिरूपितमहाचक्षुर्नाशादिद्वारकोपजीवकताया अदृष्टाद्वारकतया निरुक्तोपजीवकतायाश्चानन्तराभिधानव्यभिचारित्वादित्य शङ्कामनुमितिं प्रतीश्वरज्ञानस्य करणत्वनिराकरणेनानुमितिकरणत्वावच्छिन्ने प्रत्यक्षप्रमाणोपजीवकत्वं व्यवस्थापयन्निराकुरुते सर्वमित्यादिना। अनुमितिमित्यादेः पूर्वोक्त एवार्थः, तथा च निरूप्यतावच्छेदकरूपावच्छिन्नोपजीवकत्वमेव सर्वत्रानन्तराभिधानप्रयोजक-

मितिभाव.। एतादृशोपजीवकत्वस्य प्रत्यक्षेऽसत्त्वं दर्शयन् शङ्कितव्यभिचारविरहं स्पष्टयति तर्हि पुनरिन्द्रियमिति। 'मनःश्रवणयोरजन्यत्वादिति' तथा च प्रत्यक्षप्रमितिकरणत्वावच्छेदेनाविशेषितमुपजीवकत्वमेव नास्ति सुतरामदृष्टाद्वारकत्वविशेषितं तत्। तादृशस्य जन्येऽपि इन्द्रिये क्वचिदेव सत्त्वादिति भाव.। यदि परमेश्वरज्ञानस्यापि स्वरूपयोग्यतामात्रेण करणत्वमुपेयते, तदा स्वरूपेऽवच्छेदकावच्छेदेनोपजीवकत्वमसिद्धमिति अन्यादृशमेवोपजीवकत्वमनन्तराभिधाननियामकं वाच्यं तच्चानुमाननिरूपितम् दृष्टद्वारा प्रत्यक्षेऽक्षतमिति व्यभिचार इत्यत आह दृष्टद्वारा चेति। स्वरूपनिष्ठमदृष्टाद्वारकं प्रयोज्यप्रयोजकत्वं कार्यत्वरूपमुपजीवकत्वमेवादरणीयमित्यर्थ.। चक्षुर्दर्पणादिप्रवृत्त्योपयिकानुमानस्यान्यथासिद्धया चक्षुरादिषु न तत्कार्यत्वमिति भाव ॥

एतावतोपजीवकत्वस्यानन्तर्याभिधाननियामकतापक्षं किञ्चित्परिष्कृत्य तं परित्यक्तुकामः दर्शितसामान्यनियमे व्यभिचारमाशङ्कते अथेति।

(दी०) अथोपजीव्यं निरूप्यैवोपजीवकं निरूप्यत इति न नियमः क्वचित् कार्यं निरूप्यापि कारणनिरूपणादिति चेत् किं चातः न हि सङ्गतिरनन्तराभिधानव्याप्ता। आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः सङ्गतिः, जायते च कार्ये कारणे वा ज्ञाते कारणत्वस्य कार्यत्वस्य वा ज्ञानात् किमस्य कारणं कार्यं चेति जिज्ञासा अतस्तयोर्द्वयोरपि सङ्गतित्वमित्थञ्चोपजीवकतायास्तुल्यत्वेऽपि न क्षतिरिति मन्तव्यम्।

(गा०) उपजीवकमुपजीव्यनिरूपणानन्तरनिरूपणविषय एवेति नियमो नेत्यर्थ', कार्यं निरूप्यापीति कारणनिरूपणात्प्रागेव कार्यनिरूपणादित्यर्थः। यथाऽत्रैवानुमानग्रन्थेऽनुमानात् पूर्वमेवानुमितिर्निरूपितेति भाव.। व्यभिचारस्यान्ततस्तदुपजीवकताभिदारमकविशेषणान्तरप्रक्षेपेण वारणसम्भवेऽप्यप्रयोजकत्वं दुर्वारमेव अनुमानात् पूर्वमनुमितेरिव बाधकाभावेन प्रत्यक्षात्प्रागेवानुमानस्य निरूपणसम्भवात्तावतापि निरूपणीययोस्तयोरुपजीव्योपजीवकभावाव्याघातादिति हृदयम्। ज्ञापकत्वरूपहेतुताया प्रत्यक्षोपजीवकत्वादितिपञ्चम्यर्थतोपगम एव दर्शितनियमाभावे विरुध्यते स्वज्ञानजन्यजिज्ञासाद्वारा प्रयोजकत्वरूपं हेतुत्वञ्च नियमाभावेऽप्यविरुद्धमेवेत्याशयेन समाधत्ते किं चात इति। 'अत.' दर्शितनियमाभावात्। किमनिष्टं न किञ्चिदपीत्यर्थ.। नन्वेवमुपजीवकत्वस्य सङ्गतित्वानुपपत्ति. सामान्यतोऽन-

न्तराभिधानव्याप्यस्यैव सङ्गतित्वादित्यत आह न हीति । सङ्गतित्वम् अनन्तराभिधाननिरूपितदर्शितप्रकारसामान्यव्याप्तिनिर्वाहं यतो नेत्यर्थः । अत्र एतदेव कुत इत्याशङ्कायां यद्यदुपजीवकं भवति तत्तन्निरूपणानन्तरनिरूपणविषय इति व्याप्तिविरहेऽपि उपजीव्यतायाः सङ्गतित्वमभिधास्यमानस्तस्यां सङ्गतित्वाभावस्वीकारनिराकरणाय तत्साधारणसङ्गतिलक्षणमाह आनन्तर्येति । 'हि' हेतौ, अनन्तरमेवानन्तर्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् यन्निरूपणाव्यवहितोत्तरनिरूपणप्रयोजिका या जिज्ञासा तज्जनकज्ञानविषयो यो धर्मः स तन्निरूपितसङ्गतिरित्यर्थः । उपजीवकत्वादावेतल्लक्षणसङ्गमनप्रकारो ग्रन्थकृताग्रे दर्शयिष्यते । प्रयोजकान्तानुपादाने सङ्गतित्वस्य निरूपकविशेषनियन्त्रितत्वानुपपत्तिः, कथञ्चित्तदुपपादने यथाऽस्य किमुपजीवकमित्यादिजिज्ञासां प्रति उपजीवकत्वादिज्ञानं हेतुः घटादिजिज्ञासायां घटत्वादिधीस्तथेति तद्विषयघटत्वादेः प्रत्यक्षादिसङ्गतित्ववारणाय प्रयोजकान्तम् । अथ यत्र प्रत्यक्षादौ निरूपिते स्वसामग्रीवशात्को घट इति कस्यचिज्जिज्ञासया केनचिद्घटो निरूपितस्तत्रादृशनिरूपणप्रयोजकतथाविधजिज्ञासामादाय घटत्वादावपि प्रत्यक्षादिसङ्गतित्वप्रसङ्गः प्रयोजकान्तमुपादायापि न शक्यते वारयितुं, यदि चैवं सति तत्र घटत्वादेः सङ्गतित्वमिष्टमेव प्रसङ्गमध्ये तस्यान्तर्भावनीयत्वाच्च न सङ्गतेः षोढात्वव्याघात अन्यथा तत्र सङ्गत्यन्तराभावेन तादृशनिरूपणस्यासम्बद्धप्रलापतापत्तेः, न ह्याकाङ्क्षिताभिधानं तयेत्युच्यते तदा प्रयोजकान्तमनर्थकमितिचेन्न, यन्निरूपणानन्तरं कदाचिदपि कस्यचिद्यद्धर्मवान्तरधर्मप्रकारकज्ञानेच्छा न जाता अपि तु कालान्तरे जायते तदा तस्य सङ्गतित्ववारणायैव प्रयोजकान्तोपादानात् । न च कालस्यानवधित्वात्पुंसां चासंख्यत्वात् तादृशधर्म एव दुर्लभ इति वाच्यम् , तादृशधर्मसम्भावनयाऽतिव्याप्तिसन्देहेन तद्वारकविशेषणदानौचित्यात् ।

वस्तुतस्तु जिज्ञासुमेकं पुरुषं प्रति सङ्गतमपि अतादृशमन्यं प्रत्यसङ्गतमिति यं प्रतिपादयितुमानन्तर्याभिधानं तादृशाभिधानप्रयोजकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽर्थस्तं प्रति सङ्गतिरिति पुरुषविशेषनियन्त्रितमेव सङ्गतित्वं निर्वाच्यं तथा च यन्निरूपणानन्तरं यद्धर्मावच्छिन्नस्य विशेषजिज्ञासा यस्य पुंसो न जाताऽपि तु अन्याभिधानानन्तरमेव तस्य धर्मस्य तं प्रति तत्सङ्गतित्ववारणाय तदुपादानमावश्यकम् । आनन्तर्याभिधानप्रयोजकज्ञानविषयत्वस्य निवेशने पटादिकं निरूप्य प्रतिपाद्यस्य जिज्ञासामन्तरेणैव यत्रासम्बद्धघटाद्यभिधानं केनचित्कृतं तत्रास्य घटज्ञानं भवत्वित्याकारकेच्छाजनकीभूतवक्तृघटादृज्ञानविषयघटत्वादावतिप्रसङ्गः तादृशज्ञानस्यापि घटादिबुबोधयिषाद्वारा पटा-

घाभिधानानन्तरघटाभिधानप्रयोजकत्वाद्‌तन्तत्प्रयोजकजिज्ञासाजनकेति ।[1] परकीयज्ञानगोचरेच्छा च न जिज्ञासा ज्ञातुमिच्छा जिज्ञासेति व्युत्पत्त्या स्वीयज्ञानगोचरेच्छाया एव तत्त्वात् । जिज्ञासाया आनन्तर्याभिधानप्रयोजकत्वं च शब्दप्रयोगात्मकाभिधानानुकूलवक्तृबुबोधयिषानुकूलं यत्प्रतिपाद्यज्ञानस्यासिद्धत्वज्ञानं तत्सम्पादकीभूतस्यासिद्धत्वस्यापेच्छाविषयत्वप्रतिपादकस्य किं प्रत्यक्षोपजीवकमित्यादिप्रश्नवाक्यस्य व्यवहर्तव्यज्ञानविषया निर्वाहकं यज्जिज्ञासाप्रत्यक्षं विषयविधया तदानुकूल्येन । न च जिज्ञासाजनकत्वोपादानेऽपि उक्तस्थले कथञ्चिद्वक्तृघटादिज्ञानानुकूलघटजिज्ञासाजनकज्ञानविषयेऽतिप्रसङ्गो दुर्वार एवेति वाच्यम् ? प्रतिपाद्यपुरुषीयजिज्ञासाया एव तल्लक्षणघटकत्वात् । अथैवमपि अनुमानाद्यनन्तरोपमानादिनिरूपणे यथा उपमानजिज्ञासाया प्रयोजकत्वं तथा तादृशजिज्ञासानुकूलानुमानादिज्ञानसम्पादनेनानुमानादिजिज्ञासाया अपीति तज्जनकज्ञानविषयानुमानादिनिष्ठप्रत्यक्षोपजीवकत्वादेरप्यनुमानादिनिरूपितसङ्गतित्वापत्तिरिति चेन्न, जिज्ञासामद्वारीकृत्य प्रयोजकत्वस्यैव विवक्षणीयत्वात् प्रतिपाद्यपुरुषज्ञानविषयिणी वक्तुरिच्छा च न जिज्ञासा अतस्तस्याः प्रतिपाद्यजिज्ञासाद्वारत्वेऽपि न क्षतिः । यदभिधानानन्तराभिधानप्रयोजकजिज्ञासायां तदभिधानप्रयोज्यत्वमपि निवेश्यम्, अन्यथा घटपटनिरूपणानन्तरं यत्र घटसम्बन्धेन दण्डादिस्मरणे को दण्ड इत्यादिजिज्ञासया दण्डादिनिरूपणं तत्र तादृशजिज्ञासाजनकज्ञानविषयस्य पटनिरूपितसङ्गतित्वप्रसङ्गात्[2] । जिज्ञासाजनकसुखादिरूपफलेच्छाविषयेऽतिव्याप्तिवारणाय ज्ञानपदम् । अथैवमपि ज्ञाननिष्ठेष्टसाधनत्वस्यापि जिज्ञासाजनकज्ञानविषयत्वात्तत्रातिव्याप्तिः । न च तस्य कारणतारूपसङ्गतित्वेन लक्ष्यतैवेति वाच्यम्, निरूप्यनिष्ठकारणत्वादीनामेव सङ्गतित्वादनुमानादिज्ञाननिष्ठेष्टसाधनताया प्रत्यक्षानुमानादिसङ्गतित्वविरहात् । न च जिज्ञासां प्रत्यसाधारणकारणत्वमेव निवेशनीयम्, इष्टसाधनताज्ञानं तु उपायेच्छामात्रं प्रत्येव जनकमिति नैतस्य जिज्ञासायामसाधारण्यमिति न तज्जनकतामादायेष्टसाधनत्वेऽतिव्याप्तिरिति वाच्यम्, जिज्ञासायामसाधारणकारणत्वं हि जिज्ञासात्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणत्वं तच्च ज्ञानगोचरेष्टसाधन-

[1] अथात्र आनन्तर्याभिधानप्रयोजकज्ञाने प्रतिपाद्यपुरुषीयत्वनिवेशनादेवोक्तदोषव्युदाससम्भवे जिज्ञासापदवैयर्थ्यमिति चेन्न । यत्र वक्तुर्घटज्ञानं प्रतिपाद्यपुरुषीयघटादिज्ञानमन्यानुबोधयिषाधीनं तत्र पटाभिधानानन्तरघटाभिधानप्रयोजकीभूत यद्वक्तृबुबोधयिषानुकूलघटज्ञानं तद्विषयघटत्वादावतिव्याप्तिवारणाय तत्सार्थक्यात् । न च तथापि आनन्तर्याभिधानप्रयोजकप्रतिपाद्यपुरुषीयघटज्ञानानुकूलजिज्ञासाजनकघटत्वादावतिव्याप्तिरिति वाच्यम् ? जिज्ञासया अनिरूपितप्रयोजकत्वस्य तस्य जिज्ञासायामसत्त्वादिति ध्येयम् ।

[2] जिज्ञासायां तदभिधानप्रयोज्यत्वनिवेशपक्षे जिज्ञासामद्वारीकृत्येति विशेषणं नास्तीति बोध्यम् ।

नाज्ञानस्याप्यक्षतमेव ज्ञानगोचरेच्छात्वस्यैव तज्जन्यतावच्छेदकत्वात् एकोपायधर्मिकेष्टसाधनताज्ञानादन्योपायविषयकेच्छानुदयादुपायविशेषविषयकत्वमन्तर्भाव्यैव इष्टसाधनताधिय उपायेच्छाहेतुत्वकल्पनात्। यदि च समानविशेष्यताप्रत्यासत्त्यैवेच्छां प्रति इष्टसाधनताज्ञानस्य हेतुत्वकल्पनेनातिप्रसङ्गवारणसम्भवाद्विशिष्य ज्ञानादिरूपोपायविषयकत्वमिष्टसाधनताधीजन्यतावच्छेदककोटौ न निवेश्यते तथा च जिज्ञासात्वघटितधर्मो नेष्टसाधनताज्ञानजन्यतावच्छेदकः फलसमानविषयकान्यवृत्तित्वस्य जनकताविशेषणत्वाद्वा इष्टसाधनताज्ञानजनकताव्यावृत्तिरित्युच्यते तदाऽसम्भव इष्टसाधनताज्ञानात्मकस्य उपजीवकत्वादिप्रकारकज्ञानस्योपजीवकत्वजिज्ञासाजनकतायां प्रमाणाभावेन निरुक्तजनकताया एवाप्रसिद्धेः। न च सामान्यधर्मज्ञानस्य विशेषजिज्ञासां प्रति कारणत्वान्तरमन्वयव्यतिरेकसिद्धमशक्यापह्नवमेव घटत्वादिज्ञानं विना को घट इत्यादिप्रश्नमूलीभूताया अवान्तरधर्मप्रकारेण घटादिज्ञानेच्छाया अनुत्पादस्यानुभवसिद्धत्वादिति वाच्यम्, विशेषधर्मप्रकारेण घटज्ञानं भवत्वित्याकारकतादृशजिज्ञासाजनकतादृशज्ञानत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानस्य घटत्वादिरूपसामान्यधर्मप्रकारकतानियमात् सामान्यधर्मप्रकारकज्ञानाभावस्थले तादृशेष्टसाधनताज्ञानाभावनियमात् तत एव तथाविधेच्छानुत्पादोपपत्तेरुक्तयुक्त्या सामान्यधर्मप्रकारकज्ञानस्य कारणत्वान्तरासिद्धेरिति चेन्न, जनकज्ञानविषयेत्यनेन जनकीभूतेष्टसाधनताज्ञानीयज्ञाननिष्ठविशेष्यतायां विषयितासम्बन्धेन यदवच्छेदकत्वं तन्निरूपितावच्छेदकतात्मकविषयताविशेषस्य विवक्षितत्वात् तादृशविषयताविशेषलाभायैवार्थपदं किमस्योपजीवकमित्यादिजिज्ञासाप्रयोजकीभूतोपजीवकत्वाद्येकदेशोत्तरवर्तित्वादिवारणाय तादृशविषयतापर्याप्त्यधिकरणत्वं निवेश्यं तल्लाभायैव वा तत्। यद्यपि जिज्ञासानिरूपितज्ञाननिष्ठविशेष्यतावच्छेदकतावच्छेदकत्वविशेषस्यापि लघोर्लक्षणत्वं संभवति तथाप्यत्र लक्षणे तदनिवेशान्न वैयर्थ्यावकाशः। इच्छादीनां याचितमण्डनन्यायेन जनकज्ञानविषयतयैव सविषयकत्वमिति प्राचीनमताभिप्रायेणैव वा जनकज्ञाननिवेशनम्। विषयनिष्ठधर्मितावच्छेदकतायां येन सम्बन्धेनावच्छेदकीभूतो यो धर्मस्तेन सम्बन्धेन तद्वत्त्वमेव सङ्गतित्वव्यवहारनियामकं तेन स्वरूपादिसम्बन्धेनोपजीवकत्वादिप्रकारिका या उपजीवकज्ञानं भवत्वित्याकारकजिज्ञासा तद्विषयीभूतोपजीवकत्वादेः कालिकादिसम्बन्धेनाधिकरणे कालादौ नातिप्रसङ्गः। जायते चेति। कार्ये ज्ञाते कारणत्वस्य ज्ञानात्कारणज्ञानमिष्टसाधनमित्याकारककारणत्वविषयकज्ञानात् किमस्य कारणमिति प्रश्नप्रयोजिका कारणे ज्ञाते कार्यत्वस्य ज्ञानात् कार्यज्ञानमिष्टसाधनमिति कार्यत्वविषयकज्ञानात् किमस्य

कार्यमितिप्रश्नमूलीभूता जिज्ञासा जायते अतः कार्यकारणाभिधानानन्तरं तत्कारणकार्याभिधानप्रयोजकताहशताहशजिज्ञासाजनकज्ञानविषयत्वात् कारणत्वस्य कार्यत्वस्य च सङ्गतित्वं न तु कार्यत्वस्यैवेत्यर्थः। "सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्यैक्ये षोढा सङ्गतिरिष्यते ॥" इति सङ्गतिपरिगणने हेतुतापदमजहत्स्वार्थवृत्त्या कार्यत्वकारणत्वोभयसाधारणेन केनचिद्रूपेण तदुभयपरमिति नाधिक्यमिति भावः।

अत्र स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग इति प्रसङ्गलक्षणं तत्र स्मृतस्य पूर्वाभिहितवस्तुसम्बन्धेन स्मृतस्य उपेक्षानर्हत्वं द्वेष्यज्ञानविषयताविरोधिरूपं जिज्ञासाविषयतावच्छेदकरूपमिति यावत्। स्मृतस्येत्यभिधानं जिज्ञासाया आनन्तर्याभिधानप्रयोजकतालाभाय उपोद्घातादिपञ्चकभिन्नत्वे सतीति पूरणीयं, तथा चोपोद्घातादिपञ्चकभिन्ना सङ्गतिः प्रसङ्ग इति पर्यवसितार्थः, तेनाधेयत्वाधिकरणत्वघटत्वादीनामपि स्थलविशेषे सङ्गतिसामान्यलक्षणाक्रान्ततया प्रसङ्गाद्यनन्तर्भावे उक्तसङ्गतिपरिगणनविरोध इति निरस्तम्। तेषां सर्वेषामेव यथाव्याख्यातप्रसङ्गसङ्गतिलक्षणाक्रान्ततया तत्रैवान्तर्भावात्। उक्तरूपं च विभाजकमात्रमतस्तथाविधरूपेण ताहशधर्माणां निरूपणप्रयोजकजिज्ञासाविषयतावच्छेदकत्वविरहेऽपि न क्षतिः। एवं सङ्गत्यन्तरेऽपि बोध्यम्। यद्यपि भेदमनिवेश्य सर्वा सङ्गतिः प्रसङ्ग एवान्तर्भावयितुं शक्यते तथापि विभाजकस्य स्वतन्त्रेच्छतया न पर्यनुयोगावसरः।

उपोद्घातश्च प्रकृतोपपादकत्वं तदुक्तं "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इति। प्रकृतसिद्ध्यर्थां प्रकृतोपपादकविषयिणीं किमस्योपपादकमिति चिन्ताम् उपोद्घातमुपोद्घातसङ्गतिनिर्वाहिकां विदुरित्यर्थः। ताहशजिज्ञासामादायैवोपपादकत्वे सङ्गतिलक्षणसमन्वयादिति भावः। उपपादकत्वं च निर्वाहकत्वं, तच्च क्वचित्प्रकृतघटकसाधकतया क्वचिदन्यथापि तत्र विशिष्टपरामर्शत्वस्यानुमितिजनकतावच्छेदकत्वम् अनुमितिलक्षणघटकं तद्घटकतया तदुपपादकत्वं तेन विना तद्घटितलक्षणानिर्वाहादिति युक्त्यभिधानरूपतद्व्यवस्थापनेन उपोद्घातसङ्गतिः। क्वचित्प्रकृतघटकत्वमेव तद्यथा आचारप्रयोजकत्वं वेदस्य, साक्षात्प्रवर्तकस्य वाक्यार्थज्ञानजनकत्वगर्भमिति प्रवर्तकज्ञानमाचारप्रयोजकताघटकत्वेन प्रकृतोपपादकमित्युपोद्घातसङ्गत्या विधिवादे प्रवर्तकज्ञाननिरूपणम्। सामान्यलक्षणाप्रत्यासत्तेरनुमितिपूर्वं नियमतो विशिष्टपरामर्शनिर्वाहकतया विशिष्टपरामर्शत्वावच्छिन्नानुमितिकारणतानिर्वाहकत्वादेव तद्घटितानुमितिलक्षणोपपादकत्वम्। न तु ताहशलक्षणाघटकतया तत्सम्पादकत्वञ्च तत्प्रयोजकत्वं तच्च स्वरूपसम्बन्धविशेषः। एवमन्यत्रापि द्विविधमुपपादकत्वं यथासम्भवमूह्यम्। अवसर-

सङ्गतिरग्रे विचारणीया, हेतुता विवेचितैव । निर्वाहकैक्यम् एकनिर्वाहक-निर्वाह्यत्वं, तदन्यत्वे सति तन्निर्वाहकनिर्वाह्यत्वमिति यावत्, कार्यैक्यम् एककार्यप्रयोजकत्वं, तदन्यत्वे सति तत्प्रयोज्यकार्यप्रयोजकत्वमिति यावत् । निर्वाहकैककार्यत्वे इति पाठे निर्वाहकत्वमेकनिर्वाह्यनिर्वाहकत्वं निर्वाहकत्वं च प्रयोजकत्वम्, एककार्यत्वम् एककारणकार्यत्वम् । एतेन यथाश्रुते एक-निर्वाहकनिर्वाह्यत्वालाभात् निर्वाहकत्वस्योपपादकतारूपत्वे उपोद्घातेन गतार्थत्वात्प्रयोजकतारूपत्वे हेतुत्वान्तर्भाव इति परास्तम्, सर्वत्र तत्तत्प्र-कारकजिज्ञासामादाय लक्षणसमन्वयः कार्य इत्यलं विस्तरेण । इदं त्वव-धातव्यं, किं प्रत्यक्षोपजीवकमिति जिज्ञासया नानुमानमत्र निरूपितमपि तु किमनुमानमिति जिज्ञासयैव तथा सत्येवानुमानत्वरूपलक्ष्यतावच्छेदक-विशिष्टे लक्षणप्रतिपादकस्य तत्करणमनुमानमित्युत्तरस्य सङ्गतेः अन्यथा-र्थान्तरप्रसङ्गात् किं प्रत्यक्षोपजीवकमितिजिज्ञासायाः प्रत्यक्षोपजीवकत्व-विशिष्टेऽनुमितिकरणत्वरूपविशेषधर्मबोधकवाक्यादेव निवृत्तेः, तथा चानन्त-र्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपसङ्गतित्वं प्रकृते नोपजीव कत्वे संभवतीति तादृशजिज्ञासाजनकनिरूप्यतावच्छेदकधर्मप्रकारकस्मरण-प्रयोजकनिरूप्यनिष्ठः सम्बन्धः सङ्गतिरित्येव लक्षणं युक्तं प्रत्यक्षानुमान-पदार्थयोरुपजीव्योपजीवकभावरूपसम्बन्धज्ञानादनुमानपदार्थत्वरूपप्रकृतल-क्षणलक्ष्यतावच्छेदकप्रकारेणानुमानस्मरणादनुमानपदार्थः क इति जिज्ञासया-ऽनुमितिकरणमनुमानपदार्थ इति निरूपणादुपजीवकत्वे सङ्गतित्वनिर्वाहात्, एवं सर्वत्र पूर्वापरनिरूपणविषययोः सम्बन्ध एव सङ्गतिर्न तु निरूप्यता-वच्छेदकधर्मः, एतदनुसारेणैव प्रसङ्गादिस्वरूपाण्यूह्यानीति । इत्थञ्चोपजीव-कत्वस्यानन्तर्याभिधानाव्याप्यस्यापि सङ्गतित्वे च तुल्यत्वेऽपि प्रत्यक्ष-साधारणत्वेऽपि न व्यभिचारः क्षतिकरः ॥

ननु न्यूनतापरिहारायानुमानोपमानयोरपि सङ्गतिप्रदर्शनमुचितमिति बहुवादिसम्मतत्वादुपमानात्प्रागित्यपि सङ्गतिप्रदर्शनपरमेव भविष्यति सा च कथमुपमानग्रन्थ एव न प्रदर्शितेत्याशङ्कायामाह लाघवायेति ॥

(दी०) लाघवायात्रैवोपमानस्य सङ्गतिं दर्शयति बहुवादीति । सुप्रसिद्धतया निरसनीयाल्पवादिविप्रतिपत्तिकत्वेन सुप्रतिपदतया चानु-मान एव व्युत्पित्सोः प्रथमं जिज्ञासा नोपमानेऽप्रसिद्धत्वात् निरसनीय-बहुवादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च । औत्सर्गिकीं रीतिमनुरुध्य चेदं तेन प्रथमं कस्यचित् दुरूहे जिज्ञासोदयेऽपि न क्षतिः । तथा

चावसरसङ्गत्योपमाननिरूपणमितिभावः । यथा चावसरस्य सङ्गतित्वं तथा व्यक्तमाकरे ॥

(गा०) अनुमानस्येवोपमानस्यापि प्रत्यक्षसङ्गततया प्रत्यक्षनिरूपणाव्यवधानेनोपमानमेव किं न निरूपितमुपमाननिरूपणानन्तरमप्यनुमाननिरूपणसम्भवादिति क्रमनियामकाकाङ्क्षाया इदानीमुदयात्तन्निवृत्तये क्रमनियामकमभिधातव्यं तावतैव सङ्गतिलाभोऽपि भवतीति ग्रन्थान्तरे सङ्गतिप्रदर्शनापेक्षया अत्र क्रमनियामकाभिधानस्य सङ्गतिपरत्वे लाघवमिति भावः । बह्वादिसम्मतत्वस्य प्राथमिकजिज्ञासानिर्वाहकत्वेन प्राङ् निरूपणप्रयोजकत्वं घटयति सुप्रसिद्धतयेति । सुप्रसिद्धत्वसुप्रतिपदत्वे जिज्ञासाप्राथम्ये हेतू, विप्रतिपत्तिकत्वेनेत्यन्तं सुप्रतिपदत्वे हेतुः, अनुमान एवेति स्वोक्तैवकारार्थं विवृणोति नोपमान इति । अप्रसिद्धत्वदुरूहत्वे प्रथमतो जिज्ञासानुत्पादे हेतू, विप्रतिपत्तिकत्वेनेत्यन्तं दुरूहत्वे हेतुः, सुप्रसिद्धार्थस्य बहुधा प्रस्तावो भवति अतस्तज्ज्ञानस्य भूयानुपयोगः न त्वप्रसिद्धार्थज्ञानस्येति तज्ज्ञानस्य बह्वायासानुबन्धित्वेन प्रथमतो बलवान् द्वेषो भवति सूचीकटाहन्यायादिति तेन तत्सामग्र्या वा प्रतिबन्धान्न तादृशार्थे प्रथमतो जिज्ञासेति भावः । 'औत्सर्गिकी' प्रायिकीम्, इदं दुरूहत्वज्ञानस्य बलवद्द्वेषसम्पादकतया जिज्ञासाविरोधित्वम् । कस्यचिदिति । तज्ज्ञानाधीनसुखदुःखयोर्न्यूनाधिकभावज्ञानरहितस्येत्यादिः । नन्वेतावता क्रमनियामकत्वलाभेऽपि सङ्गतिर्न लब्धैव उक्तरूपस्य सङ्गतित्वविरहादित्याकाङ्क्षायामाह तथा चेति । अनुमाने उपमानापेक्षया प्राथमिकजिज्ञासाविषयत्वप्रयोजकबह्वादिसम्मतत्वकथनेन विरोधिभूतानुमानजिज्ञासाया विषयसिद्ध्या निवृत्तौ सत्यामुपमानं निरूपणीयमिति सूचनादिति भावः । ननु विरोधिजिज्ञासानिवृत्तिरवसरः स च नोपमानाभिधानप्रयोजकजिज्ञासाविषयतावच्छेदक इति कथं तत्र दर्शितसङ्गतिलक्षणसमन्वय इत्यत आह यथा चेति । तथा व्यक्तमिति । 'आकरे' मूलसूत्रे । अयमाशयः विरोधिजिज्ञासानिवृत्तिर्नावसरः अपितु तन्निवृत्तौ सत्यामवश्यवक्तव्यत्वमेव, तत्र च किमिदानीं वक्तव्यमिति जिज्ञासाजनकज्ञानविषयतामादाय लक्षणसमन्वयः । यद्यपि तादृशजिज्ञासाविषयताया जिज्ञासानिवृत्तिघटितं नावच्छेदकमिति तेन रूपेण सङ्गतित्वं नास्ति अपि तु निवृत्त्युपलक्षिततत्तत्कालवक्तव्यत्वत्वरूपेणैव, तथापि न क्षतिः यादृशस्य सङ्गतित्वं तादृशस्यैव विभाजकत्वमित्यनियमात् जिज्ञासानिवृत्तेर्विभाजकधर्मघटकत्वे बाधकाभावादिति ॥

सार्वभौमानां मतमाह शब्दान्तरेति ।

(दी०) शब्दान्तरसमयग्राहकं सप्रवृत्तिनिमित्तकत्वबोधकं सामान्यतो दृष्टमन्ततोऽदृष्टजनकप्रवृत्त्यौपयिकं चानुमानमपेक्षते निखिलमेवोपमानमितीहाप्युपजीवकत्वमेव सङ्गतिरित्यपि केचित्।

(गा०) द्वितीयान्तस्यानुमानमित्यस्य प्रथमोक्तं तथाविधनयं विशेषणम्। शब्दान्तरसमयग्राहकमिति' अतिदेशवाक्यस्थस्योपमानग्राह्यशक्तिकगवयादिपदभिन्नगवादिपदस्य शक्तिग्राहकं गोपदं गोत्वविशिष्टवाचकं तद्विशिष्टविषयकशक्तिभ्रमाद्यजन्यशाब्दबोधजनकत्वादित्याकारकमित्यर्थ, तादृशानुमानं विना गोपदशक्त्यग्रहेणातिदेशवाक्यजन्यशाब्दबुद्धेरनुत्पत्त्या उपमानानन्तरत्वात्तस्योपमानेऽपेक्षणीयतेति भावः। सप्रवृत्तिनिमित्तकेति। गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादिति सामान्यतो गवयत्वप्रवृत्तिनिमित्तकत्वसाधकमित्यर्थ., ईदृशानुमानेनैवोपमानाप्रामाण्यवादिनस्तत्फलं विशेषतः प्रवृत्तिनिमित्तपरिच्छेदमुपपादयन्ति, गोसादृश्यस्य गवयत्वजातेश्च प्रत्यक्षत उपस्थितो सादृश्यस्य प्रवृत्तिनिमित्तत्वे गौरवं जातिविशेषस्य तथात्वे लाघवमिति लाघवप्रतिसन्धानेन सामान्यतः सप्रवृत्तिनिमित्तकत्वस्य व्याप्यतया गृहीतादपि लिङ्गाद्विशेषतो जातिविशेषप्रवृत्तिनिमित्तकत्वानुमितिसम्भवात्। सिद्धान्तिभिस्तु व्यापकतावच्छेदकेनैव रूपेण साध्यमनुमितौ भासत इति नियममवलम्ब्य उपमानप्रामाण्यं व्यवस्थाप्यते, उपमानेन च गवयादिपदे विशेषतो गवयत्वादिप्रवृत्तिनिमित्तकत्वग्रहः सम्भवति, गवयत्वादिप्रकारकसादृश्यज्ञानात्तद्रूपेण पदवाच्यत्वे गृह्यमाणे तदवच्छेदेनैव ग्रहात्सादृश्यग्रहेपि गवयपदशक्तिरवश्यं किञ्चिद्धर्मावच्छिन्ना तत्रानतिप्रसक्तस्य गोसादृश्यादेस्तद्व्यक्तित्वानां चावच्छेदकत्वे गौरवं जातिविशेषस्य तथात्वे लाघवमित्याकारकस्तर्कोऽपेक्षितः, अन्यथा तद्व्यक्तित्वादिप्रकारेणापि सादृश्यज्ञानसम्भवात्तेषामपि प्रवृत्तिनिमित्ततासिद्धिप्रसङ्गात्तादृशलाघवज्ञानसंपादनेन दर्शितसामान्यतो दृष्टस्यापि तथाविधोपमानोपजीव्यत्वमित्यवधेयम्। उक्तानुमानयोः सादृश्यज्ञानरूपोपमानस्वरूपानुपजीव्यतया तस्याप्युपजीव्यमनुमानान्तरमाह अन्तत इति। अदृष्टेति। अदृष्टजनिका विहितक्रियादिगोचरप्रवृत्तिस्तत्प्रयोजकं समयादिपरिच्छेदकमनुमानमित्यर्थ, उपमानस्याप्यदृष्टजन्यत्वादिति भावः। निखिलोपमानस्यैव निरूपणीयतया सङ्गतिमत्त्वमपेक्षितमतो निखिलमित्युक्तम्।

अनुमानेऽप्यदृष्टद्वारा समयपरिच्छेदकोपमानोपजीवकतायाः क्वचित्सत्त्वादुपमाननिष्ठोपजीवकतायास्ततो विशेषप्रदर्शनाय निखिलमिति तु न सत्, अनादौ संसारेऽतिपरम्परया कदाचित्कस्यचित् शक्तिपरिच्छेदकोप-

मानस्य मूलतासम्भवेन तादृशविशेषासम्भवात्। यत्र प्रत्यक्षादिरूपप्रकृतिसाध्यताज्ञानात् प्रवृत्तिरुपमानजनकीभूतादृष्टजनिका तत्रानुमानोपजीवकताया अपि उक्तरीत्यैवोपपादनीयत्वात्। केचिदित्यस्वरस्यसूचनाय, स च षट्वादिसम्मतत्वकथनस्य उपजीवकत्वसङ्गतिलाभासम्पादकतया तस्यानुपयोगितापातात्। न चोपमानापेक्षयाऽनुमानस्य षट्वादिसम्मतत्वोक्त्यानुपमानं कणादादिभिरनुमान पर्यान्तर्भावितमिति लभ्यते तावता तन्मतनिराकरणायानुमानभिन्नत्वेनोपमानं निरूपणीयमित्यस्य लाभेनानुमाननिरूपणोपजीवकताया उपमाननिरूपणे लाभ इति तदुक्तेरुपजीवकत्वसङ्गतिलाभोपयोगितेतिवाच्यम् . निरूपणयोरुपजीव्योपजीवकभावस्यासङ्गतित्वात् क्रमनियामकलाभायैव तदुक्तिर्न तु सङ्गतिलाभायेति चेत् तथापि उपमानसङ्गत्यप्रदर्शनेन मूले न्यूनताया दुर्वारत्वात्॥

स्वमते सङ्गतेर्निरूपणपौर्वापर्यानियामकतया तन्नियामकापेक्षायां निरूपणयोः कार्यकारणभावं दर्शयति सम्भवति चेति॥

(दी०) सम्भवति चेह निरूपणयोरपि कार्यकारणभावः अथ तत्पूर्वकमित्यादिसूत्रे प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणात् तच्छब्देन व्याप्त्यादिप्रत्यक्षपरामर्शात् अत्रापि सहचारप्रत्यक्षजन्यत्वादिना तन्निरूपणात् तस्य च प्रत्यक्षनिरूपणाधीनत्वात्। एवमनुमानभिन्नत्वेनोपमाननिरूपणमप्यनुमाननिरूपणापेक्षमिति सङ्क्षेपः॥

(गा०) 'इह' प्रत्यक्षानुमानयोः, सतम्यर्थो निरूपणान्वयि विषयत्वम्, 'निरूपणयोः' निरूपणपदार्थघटकज्ञानयोः। अथ तत्पूर्वकमित्यादीति। "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं चेति" विभाजकसूत्रमित्यर्थः। तत्र च पूर्ववदित्यादेः कारणलिङ्गकं कार्यलिङ्गकं तदन्यलिङ्गकं चेत्यर्थः। तस्य चेति। प्रत्यक्षघटितविशेषणपुरस्कारेणानुमाननिरूपणस्येत्यर्थः। प्रत्यक्षनिरूपणेति। विशिष्टज्ञानस्य विशेषणज्ञानाधीनत्वादिति भावः। अनुमानभिन्नत्वेनेति। वैशेषिकादिमतनिराकरणाय तेन रूपेणैवोपमानस्य निरूपणीयत्वादितिभावः॥

(दी०) तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीये करणस्य क्रियाभेदभिन्नमूर्तिकतया क्रियालक्षणपूर्वकं तल्लक्षणमाह व्याप्तीत्यादिना॥

(चि०) तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञान-

मनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते ॥

(गा०) तत्रेत्यादिराहेत्यन्त एको ग्रन्थः । तत्र प्रतिज्ञायां सप्तम्यर्थो निरूपणान्वयि विषयत्वं । लक्षणेति । लक्षणमितरभेदानुमापकरूपम् , स्वरूपं लक्षणग्रहोपयोगि अनुमितिकरणतावच्छेदकरूपं तच्च लिङ्गपरामर्शत्वम्, प्रामाण्यं प्रत्यक्षाद्यतिरिक्तप्रमितिकरणत्वम्, आदिपदाद्विभाजकरूपपरिग्रहः । 'निरूपणीये' प्रतिपादनीये, 'तल्लक्षणं' अनुमानलक्षणम्, आहेत्यनेनास्यान्वयः । सतिसप्तम्याः प्रयोजकत्वमर्थः लक्षणाभिधानस्य निरूपणात्मकतया प्रयोज्य-प्रयोजकभावासम्भवेऽपि सविशेषणे हीत्यादिन्यायान्निरूपणघटकप्रतिपत्त्यंशे लक्षणाभिधानस्य प्रयोज्यप्रयोजकभावे तात्पर्यं स्वरूपादिप्रतिपत्तावपि तदभिधानप्रयोजकाकाङ्क्षोत्थापकतया लक्षणाभिधानस्य प्रयोजकत्वं बोध्यम् । ननु प्रमाणलक्षणात् प्रागेव कथं प्रमा लक्षिता । न च प्रमाणलक्षणस्य प्रमाघटिततया तामविज्ञाय न तज्ज्ञातुं शक्यत इति प्रमाणलक्षणप्राथम्ये बीजं, तथा सत्यनुमितिलक्षणघटकव्याप्त्यादेरपि प्रथमं निरूपणापत्तेरित्या-काङ्क्षायामनुमितिलक्षणप्राथम्ये बीजान्तरमाह करणस्येति, अनुमानस्येत्यर्थः । 'क्रियायाः' अनुमितेः, यो 'भेदः' प्रत्यक्षविजातीयत्वं, 'तद्भिन्नमूर्तिकतया' तदधीनं यत् प्रत्यक्षकरणताभिन्नं प्रमाणान्तरव्यवहारौपयिकं प्रमित्यन्तरकरणतात्मकं

[illegible]

जनिका विहितक्रिया-
नमित्यर्थ , उपमान-
रूपणीयतया सङ्गति-

चकतायाः क्वचित्स-
निखिलमिति तु न
शक्तिपरिच्छेदकोप-

प्युपजीव्यमनुमानान्तरमाह अन्यत इति । अदृष्टेति । अदृष्ट
दिगोचरप्रवृत्तिस्तत्प्रयोजकं समयादिपरिच्छेदकमनुमा
स्याप्यदृष्टजन्यत्वादिति भावः । निखिलोपमानस्यैव नि
मत्त्वमपेक्षितमतो निखिलमित्युक्तम् ।

अनुमानेऽप्यदृष्टद्वारा समयपरिच्छेदकोपमानोपजी
स्यादुपमाननिष्ठोपजीवकतायास्ततो विशेषप्रदर्शनाय
सत् , अनादौ संसारेऽतिपरम्परया कदाचित्कस्यचित्

मितिनिरूपणयोः प्रयोज्यप्रयोजकभावलाभायैव पूरणमिति । तदत्यन्तमसत्, निरूपणस्य तत्पदोपस्थाप्यत्वे क्रियात्वाभावेन "यस्य च भावेनेति" सूत्राविषयतया सतिसप्तम्यनुपपत्तेः। न च निरूपणीय इत्यपि पूरणीयमतो नेयमनुपपत्तिरिति वाच्यम्, एवमप्यनुमितिनिरूपणस्यानुपस्थिततया तत्र प्रयोजकत्वान्वयासम्भवात्। न च मूलेऽनुमितिरित्यनन्तरं निरुप्यत इत्यपि पूरणीयमतो नेयमनुपपत्तिरिति वाच्यम्, तदकथनेन दीधितिकृतो न्यूनतापातात् लक्षणमध्ये निरूपणप्रतिज्ञान्तरासङ्गतेश्चेत्यलमसदावेशेन ॥

उपाध्यायव्याख्यामुपन्यस्यति अत्रेत्यादिना आहुरित्यन्तेन ।

(दी०) अत्र व्याप्तिविशिष्टत्वपक्षधर्मत्वसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः । कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वात् । ज्ञानपदोपसन्धानेन च बाधिताबाधितसाधारणतज्ज्ञानलाभान्न भ्रान्तानुमितावव्याप्तिरित्याहुः ॥

(गा०) अत्र एतल्लक्षणे अर्थ इत्यनेनान्वयः । एतल्लक्षणवाक्यप्रतिपाद्यार्थ इत्यर्थः, अथवा व्याचक्षत इत्यर्थकेनाहुरित्यनेनान्वय ।

व्याप्तीति । व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्वावगाहिज्ञानजन्यत्वमित्यर्थ । प्रकृत्यर्थतावच्छेदकरूपभावार्थ एव तत्प्रत्ययस्यानुशिष्टत्वात् सामानाधिकरण्यस्यातथाभूतस्य प्राधान्येन ज्ञानान्वयासम्भवाद्यथाश्रुतासङ्गतेः, उक्तार्थेऽपि सामानाधिकरण्यान्तं नोपलक्षणं किन्तु विशेषणमतो ज्ञानेन समं तस्यान्वयात्केवलपक्षधर्मताविषयकधीनिरासः । अत्रोभयसामानाधिकरण्यावगाहित्वमेकधर्मिण्युभयसम्बन्धावगाहित्वं सम्बन्धसम्बन्धस्यापि विशिष्टज्ञानविषयताया प्राचीनैरुपगमात् अनुमितिजनकविशिष्टपरामर्शे व्याप्त्यादिसम्बन्धतया भासमानस्यापि तत्सम्बन्धस्य सम्बन्धो हेतौ भासत इति व्याप्तिवैशिष्ट्यपक्षधर्मत्वयोः सामानाधिकरण्यावगाहिता निर्वहतीति लक्षणसमन्वयः ।

पक्षधर्मता च पक्षानुयोगिको हेतुतावच्छेदकसम्बन्धः न तु पक्षवृत्तित्वं पक्षविशेष्यकपरामर्शस्य पक्षवृत्तितानवगाहित्वात् तत्रापि सम्बन्धतया पक्षनिरूपिताधेयत्वभानोपगमे पक्षस्य प्रकारतापत्तेः । न च पक्षानुयोगिकहेतुतावच्छेदकसम्बन्धविवक्षयापि पक्षविशेष्यकपरामर्शे तादृशसम्बन्धस्य सम्बन्धः पक्ष एव भासते व्याप्तिसम्बन्धस्य सम्बन्धश्च हेताविति नैकधर्मिण्युभयसम्बन्धावगाहित्वरूपसामानाधिकरण्यावगाहितानिर्वाह इत्याशङ्क्यम् । विशिष्टबुद्धौ विशेष्ये सम्बन्धस्यानुयोगित्वरूपसम्बन्धो विशेषणे च तस्य

प्रतियोगित्वरूपसम्बन्धो भासत इति सिद्धान्तात् पक्षविशेष्यकपरामर्शेऽपि हेतौ व्याप्तिप्रतियोगिकसम्बन्धानुयोगित्वस्य पक्षानुयोगिकसम्बन्धप्रतियोगित्वस्य च भानेन एकत्रोभयसम्बन्धावगाहिताया अक्षतत्वात्। न चैवं व्याप्यविशेष्यकपरामर्शासङ्ग्रहस्तत्र हि हेतौ पक्षानुयोगिकसंयोगादिरूपहेतुतावच्छेदकसम्बन्धो न पक्षरूपविशेषणस्य सम्बन्धतया भासते विशेष्ये सम्बन्धानुयोगित्वस्य विशेषणे च तत्प्रतियोगित्वस्य भाननियमात् तादृशज्ञानस्य हेतुपक्षयोर्वाधितसंयोगाद्यनुयोगित्वप्रतियोगित्वाद्यवगाहित्वे भ्रमत्वप्रसङ्गात् तद्वैपरीत्ये च विशेष्यविशेषणभाववैपरीत्यप्रसङ्गात् भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वयोरेव विशेषणत्वविशेष्यत्वात्मकत्वात्। परं तु स्वानुयोगिकसंयोगादिप्रतियोगित्वरूपमाधेयत्वमेव तथा भासते स च न हेतुतावच्छेदकसम्बन्धः न वा पक्षानुयोगिक इति वाच्यम्, सम्बन्धसम्बन्धतया तत्र संयोगादिरूपहेतुतावच्छेदकसम्बन्धप्रतियोगित्वस्य हेतावभानेऽपि विशेषणीभवत्पक्षसम्बन्धतया तत्र तद्भानादेव एकत्र व्याप्तिवैशिष्ट्यानुयोगित्वपक्षानुयोगिकहेतुतावच्छेदकसम्बन्धप्रतियोगित्वभानेनोभयसामानाधिकरण्यावगाहितानिर्वाहात्।

अथवा एतन्मते पक्षविशेष्यकपरामर्श एव सर्वत्रानुमितिहेतुर्लाघवात्। नन्वेवमपि वह्निव्याप्यो धूमः द्रव्यवान् पर्वत इति ज्ञानजन्येऽतिव्याप्तिः तादृशज्ञानस्यापि धूमाद्यात्मकैकहेतौ तदुभयसम्बन्धावगाहित्वात् एकविषयतानिरूपितोभयसम्बन्धविषयतापर्यन्तस्य लक्षणवाक्यतोऽलाभात् तद्विवक्षणे च तथाविधव्याप्तिवैशिष्ट्यपक्षसम्बन्धविषयतानिवेशेनैवोपपत्तौ मिश्रोक्तद्वन्द्वोपेक्षाया निर्बीजत्वापत्तेः। न चोभयसामानाधिकरण्यमेकनिष्ठापरसामानाधिकरण्यं तथा च पक्षसम्बन्धनिष्ठव्याप्तिवैशिष्ट्यवत्सम्बन्धावगाहिज्ञानजन्यत्वमर्थः तत्सम्बन्धस्तत्प्रतियोगिकत्वमेव उक्तसमूहालम्बनस्य केवलपक्षधर्मतादिज्ञानस्य च वस्तुगत्या यो व्याप्तिवैशिष्ट्यवान् धूमादिः पक्षसम्बन्धनिष्ठतत्प्रतियोगिकत्वावगाहित्वेऽपि न क्षतिः। तत्प्रत्ययान्तेन यादृशविशिष्टमुपस्थाप्यते तादृशविशिष्टस्यैव वैशिष्ट्यमवगाहित्वे विशेषणं विवक्षणीयमिति कथितज्ञानस्य च व्याप्त्यादिघटिततादृशविशिष्टनिरूपितविषयिताशून्यत्वेन लक्षणाघटकत्वादिति वाच्यम्, व्याप्तिविशिष्टहेतुमान् पक्ष इत्येतादृशपरामर्शे संयोगांशे भासमानहेतुप्रतियोगिकत्वनिरूपितविषयितायां व्याप्तिवैशिष्ट्यवत्प्रतियोगिकत्वरूपविशिष्टविषयनिरूप्यत्वेऽपि पक्षसम्बन्धनिष्ठत्वस्य विशेषणकोटावप्रविष्टत्वेन तद्घटितोक्तविशिष्टविषयनिरूपितत्वाभावेन तदसङ्ग्रहात्। पक्षसम्बन्धनिष्ठत्वस्योपलक्षणत्वे च तदविषयकज्ञानवारणासम्भवात् भावप्रत्ययेन वा अवगाहित्वविशेषणतया

एकपदार्थतावच्छेदकनिष्ठापरतत्सामानाधिकरण्यं कथं प्रतिपादनीयं भाव रूपार्थ एव तदनुशासनात् प्रकृत्यर्थासाधारणधर्मस्यैव भावार्थत्वात्, न हि नीलोत्पलत्वमित्यादौ उत्पलत्वादिनिष्ठनीलिमादिसामानाधिकरण्यं प्रकृत्यर्थासाधारणधर्मः तस्य नीलोत्पलादिरूपप्रकृत्यर्थेऽवर्तमानत्वात्। न चैकपदार्थनिष्ठापरपदार्थतावच्छेदकसम्बन्ध एव पदार्थतावच्छेदकद्वयसामानाधिकरण्यम्, प्रकृते च पक्षसम्बन्धप्रतियोगिनिष्ठव्याप्तिवैशिष्ट्यानुयोगित्वमेव तथा, तच्च प्रकृत्यर्थासाधारणधर्म एवेति वाच्यम्, पृथिवीत्वमित्यादितो गन्धाद्यप्रतीतेः प्रकृत्यर्थतावच्छेदकधर्मस्यैव भावार्थत्वस्वीकारेण कथितस्य प्रकृत्यर्थधर्मत्वेऽपि प्रकृतिजन्यबोधे प्रकारताविरहेण भावार्थत्वानुपपत्तेः। न च "कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानमत्वतलभ्याम्" इत्यनुशासनाद्भावार्थभिन्नोऽप्युक्तसम्बन्धस्तत्प्रत्ययार्थ एवेति वाच्यम्, तथा सति अत्रोत्पलत्वं नास्तीत्यादिनिश्चयस्य नीलोत्पलत्वमित्यादिवाक्यजन्यबोधे ग्राह्याभावानवगाहितया स्वतो विरोधित्वानुपपत्तेः अनुभवविरोधित्वापत्तेश्च। परामर्शविषयव्याप्तिवैशिष्ट्यानुयोगित्वस्य विशेषणकोटौ पक्षसम्बन्धप्रतियोगिनिष्ठत्वाभावात् तस्य निरुक्तविशिष्टविषयकत्वासम्भवेन तत्प्रत्ययेन तादृशविशिष्टार्थप्रत्यायनसम्भवेऽप्यप्रतीकाराच।

अथ सामानाधिकरण्यान्तेन व्याप्तिवैशिष्ट्यसामानाधिकरण्यावच्छिन्नं पक्षधर्मत्वमेव विवक्षितं पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वादित्यस्यापैकपदार्थतावच्छेदकसामानाधिकरण्यापरपदार्थतावच्छेदकबोधकत्वादिरेवार्थ इत्यविरोधः। उक्तं च यज्ञपत्युपाध्यायैरेव "तदुत्तरतल्प्रत्ययो व्याप्तिविशिष्टत्वे सति पक्षधर्मत्वं भावमाहेति।" एवं च सामानाधिकरण्यान्तभावेन न भावप्रत्ययार्थता नीलोत्पलत्वमित्यादिव उत्पलादौ नीलाद्यभेदान्वयेन नीलाभिन्नोत्पलादेः प्रकृतितो लाभात्, तादृशोत्पलादीतरावृत्तित्वसहितसकलतादृशोत्पलादिवृत्तित्वेन चान्यलभ्यप्रकृत्यर्थं परित्यज्य इतरांशे शक्त्या भावप्रत्ययेन बोधनात्, नीलाभिन्नोत्पलादिवृत्तित्वरूपनीलिमादिसामानाधिकरण्यस्योत्पलत्वादौ लाभनिर्वाहात् प्रकृते च तदितरावृत्तित्वांशः साकल्यांशश्चोपलक्षणतयैव विवक्षितो न तु ज्ञानान्वयिविषयविशेषणतया अत. परामर्शस्य तद्विषयकत्वेऽपि न क्षतिः। व्याप्तिवैशिष्ट्यसामानाधिकरण्यं च व्याप्तिविशिष्टप्रतियोगिकत्वमेव पक्षधर्मपदस्य प्रतियोगितासंसर्गेण पक्षानुयोगिकसमभिव्याहृतव्याप्तिघटकहेतुसम्बन्धावच्छिन्नपरतया प्रकृत्यर्थतावच्छेदकतावच्छेदकसम्बन्धेनैव च प्रकृत्यर्थवृत्तिताया भावप्रत्ययेन बोधनात् प्रतियोगितासम्बन्धेन प्रकृत्यर्थवृत्तिताया एव तत्पदोत्तरभावप्रत्ययतो लाभात् तस्या एव च तत्प्रतियोगिकत्व-

रूपत्वात्, सम्बन्धविधया भासमाने संयोगादौ तत्प्रतियोगिकत्वस्य तदीयसम्बन्धविधया भानात्। व्याप्तिविशिष्टप्रतियोगिकत्वमपि सम्बन्धविषयताया अवच्छेदकमिति व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षधर्मपदार्थतावच्छेदकपक्षसम्बन्धविषयताकत्वरूपं विशिष्टविषयकत्वं परामर्शेऽक्षतमिति चेत्, एवमपि व्याप्तिविशिष्टे य पक्षधर्म तस्य तत्त्वेन तत्प्रतियोगिकत्वरूपसम्बन्धविशेषणतया तादृशपक्षधर्मत्वावच्छिन्नविशेषिततत्प्रतियोगिकत्वावच्छिन्नविषयताया एव विशिष्टान्वयबलेन लाभात्। परामर्शे च पक्षधर्मत्वावच्छिन्नस्य पक्षांशेऽप्रकारतया तदवच्छिन्नप्रतियोगिकत्वावच्छिन्नसम्बन्धविषयताकत्वविरहेण तदसङ्ग्रहात्।

यदि च पक्षधर्मत्वमप्युपलक्षणमुच्यते तदाप्यभेदसम्बन्धेन पक्षधर्मत्वावच्छिन्नांशे प्रकारीभवतो व्याप्तिविशिष्टत्वावच्छिन्नस्य उपलक्षणत्वे तदन्तर्गतव्याप्तेरपि तथात्वेन तद्विषयकज्ञानाव्यावृत्तेस्तस्य विशेषणत्वभ्रौव्यात् पक्षांशे प्रकारीभवति हेतौ व्याप्तिप्रकारकपरामर्शस्यासङ्ग्रह. अभेदेन व्याप्तिविशिष्टस्य हेतुविषयतानवच्छेदकत्वात् एवं भावप्रत्ययार्थप्रविष्टं सकलतद्वृत्तित्वं तन्निष्ठभेदप्रतियोगितानवच्छेदकत्वं साकल्यघटितस्य तस्यान्यादृशस्य दुर्वचत्वात्, नानाव्यक्तिकस्य गुरुत्वादेर्यत्र प्रकृत्यर्थतावच्छेदकता प्रत्येकं तत्र प्रकृत्यर्थनिष्ठभेदप्रतियोगितावच्छेदकस्यापि तस्यानुगततदवच्छेदकावच्छिन्नस्य तादृशभेदप्रतियोगितानवच्छेदकत्वमभ्युपेयते नातस्तदसङ्ग्रह' अन्यथा यथाश्रुते अनिस्तारात्। कस्याश्चिदपि गुरुत्वादिव्यक्तेः सकलगुरुत्वादिमद्वृत्तित्वात्। न चैवं गुरुत्वमित्यादितो गन्धादेरपि बोधापत्ति तस्यापि गुणत्वावच्छिन्नस्य गुर्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वादिति वाच्यम्, गुणत्वावच्छिन्ने तदितरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वरूपतदितरावृत्तित्वासत्त्वेन तद्योगात् तदितरत्वव्यापकभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नतन्निष्ठभेदप्रतियोगितानवच्छेदकत्वस्य च भावप्रत्ययप्रवृत्तिनिमित्तत्वात्। तदितरावृत्तित्वं तु न यथाश्रुतं प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन वृत्तेर्विवक्षणीयतया सत्त्वमित्यादौ सदितरसमवेतत्वाप्रसिद्धे, महानसीयवह्नित्वमित्यादौ शुद्धवह्नित्वाद्यनतिरेकिणो महानसीयवह्नित्वादेर्महानसीयवह्न्यादिरूपप्रकृत्यर्थेतरपर्वतीयवह्न्यादिवृत्तित्वेन तदितरावृत्तित्वबोधासम्भवाच्च। तथा च कर्मधारयोत्तरभावप्रत्ययेन विशेष्यपदार्थतावच्छेदके विशेषणपदार्थतावच्छेदकसामानाधिकरण्यं कथं बोधनीयं प्रकृत्यर्थतावच्छेदकनिष्ठाया वृत्तेस्तदर्थाप्रवेशादिति महदसमञ्जसम्।

उच्यते, निरुक्ततदितरावृत्तित्वसहितसकलतद्वृत्तित्वस्य शक्यतानन्य-

भयेन प्रकृत्यर्थमनन्तर्भाव्य भावप्रत्ययप्रवृत्तिनिमित्तत्वे सामान्यत इतरत्वव्यापकत्वस्य केवलान्वयिमात्रनिष्ठतया घटत्वावच्छिन्नभेदसाधारण्यविरहेण घटत्वादौ प्रथमदलस्य बाधः। वृत्तिमद्भेदप्रतियोगितानवच्छेदकत्वरूपद्वितीयदलमपि प्रमेयत्वाद्यनवच्छिन्ने तत्र बाधितं घटेतरत्वव्यापकत्वादेश्चाशक्यतया न बोधनिर्वाहः, अतो लाघवाच्च धर्मत्वमेव तत्प्रवृत्तिनिमित्तमुच्यते, धर्मत्वं च प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन सम्बन्धित्वमेव, घटत्वमित्यादितो द्रव्यत्वादिबोधप्रसङ्गो रूपादिबोधप्रसङ्गश्च भवतामपि समानः द्रव्यत्वादेरपि घटत्वविशिष्टतया घटेतरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वात् घटरूपादेरपि घटरूपत्वाद्यवच्छिन्नस्य घटादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वात्, एवं गुरुत्वमित्यादितोऽपि गुरुत्वादिसमनियतरसादिबोधो भवतामपि दुर्वारः, तदितरावृत्तित्वादिना भासमाने धर्मे तत्प्रकृत्यर्थतावच्छेदकनिष्ठाधेयतासम्बन्धेन प्रकृत्यर्थस्यान्वयमुपगम्य तद्वारणे च धर्मत्वेन शक्तिमतेऽपि धर्मत्वे प्रकृत्यर्थतावच्छेदकनिष्ठत्वसहितनिरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वयमुपगम्य तत्तत्पदार्थतावच्छेदकनिष्ठाधेयतया धर्मान्तरेऽसत्त्वेन तादृशातिप्रसङ्गो वारणीयः। एवं च व्याप्तिविशिष्टाभिन्नपक्षधर्मप्रतियोगिकत्वेन पक्षसम्बन्धे व्याप्तिविशिष्टपक्षधर्मतापदेन बोध्यमानेऽभेदेन पक्षधर्मान्वयिनि व्याप्तिविशिष्टे विशेषणतापन्नव्याप्तिवैशिष्ट्यस्यापि पक्षधर्मे विशेषणतया भानमुपेयम् एकविशेषणतया उपस्थितस्य पदार्थतावच्छेदकस्य स्वातन्त्र्येणैवेतरविशेषणतयाऽभानात्, अन्यथा घटं जानातीत्यादौ घटत्वादिविशिष्टनिरूपितविषयिताशालिज्ञानपर्यन्तस्य तात्पर्यविषयत्वेऽपि लाभासम्भवात्, पदार्थतावच्छेदकघटत्वादेः स्वावच्छिन्ननिरूपितत्वसम्बन्धेन विषयितायामन्वयेनैव तल्लाभनिर्वाहात्। एवं च व्याप्तिवैशिष्ट्याविशेषितव्याप्तिविशिष्टाभिन्नत्वोपलक्षितपक्षधर्मप्रतियोगिकत्वमेव विषयतावच्छेदकतया विवक्षितमिति पक्षधर्मे व्याप्तिविशिष्टाभेदानवगाहिपरामर्शस्यापि सङ्ग्रहः। वह्निव्याप्यधूमवानितिज्ञाने व्याप्तिवैशिष्ट्यस्य धूमांशे प्रकारत्वेऽपि तदंशे सम्बन्धतया भानादेव धूमनिष्ठावच्छेदकतारूपविषयतायामवच्छेदकत्वसम्भवात् तद्घटितव्याप्तिविशिष्टधूमप्रतियोगिकत्वविशिष्टहेतुतावच्छेदकसम्बन्धविषयकत्वमव्याहतम्। न च व्याप्तिविशिष्टस्य हेतोः संयोगादिरूपसम्बन्धांशे सम्बन्धतया भासमाने तत्प्रतियोगिकत्वे तादृशहेतोः सम्बन्धान्तराभानात्तस्यापि च संयोगादौ सम्बन्धान्तराभानात् तदीयसम्बन्धान्तरघटितव्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टसंयोगादिविषयकत्वं वह्निव्याप्यधूमवानित्यादिबुद्धेर्दुरुपपादमेवेति वाच्यम्, तदवच्छिन्नविषयताकत्वरूपतद्विशिष्टविषयकत्वस्य तदीयसम्बन्धाभानेऽप्यव्याहतेश्च। अन्यथा

गुरुमते ज्ञानस्य विशिष्टविषयकत्वानुपपत्तेः तैर्विशिष्टबुद्धौ सम्बन्धभानानुपगमात्। न च वैशिष्ट्यांशे विशेषणीभवन्त्या व्याप्तेर्व्याप्तिविशिष्टेत्यादिवाक्यजन्यबुद्धौ सम्बन्धसम्बन्धोऽप्येतन्मते विषय इति तद्घटितमेव विशिष्टं व्याप्तिविशिष्टपक्षधर्मतापदार्थं, एवं व्याप्तिविशिष्टस्य हेतोः संयोगादिसम्बन्धांशे भासमानतत्प्रतियोगिकत्वांशेऽपि सम्बन्धान्तरभानमावश्यकं तथा च तद्घटितव्याप्तिविशिष्टप्रतियोगिकत्वस्य पक्षसम्बन्धनिष्ठविषयतावच्छेदकत्वं लक्षणवाक्यलभ्यमिति तादृशविशिष्टस्य च कथं व्याप्तेः संसर्गतया तद्वैशिष्ट्यावगाहिपरामर्शीयविषयतावच्छेदकता तत्र वैशिष्ट्यांशे व्याप्तिप्रतियोगिकत्वमात्रस्य तत्सम्बन्धतया भानेन तत्र तदीयसम्बन्धान्तराभानादिति वाच्यम्, लक्षणवाक्यजन्यबोधे वैशिष्ट्यांशे व्याप्तिसम्बन्धसम्बन्धस्याधिक्यस्य शब्दतः भानेऽपि तस्य वैशिष्ट्यनिष्ठविषयतावच्छेदकत्वाविवक्षणसम्भवेन सामञ्जस्यात्। न हि यस्मिन् विषये यस्य यत्सम्बन्धभानं तन्निष्ठविषयतायां तदीयतत्सम्बन्धावच्छिन्नत्वं विशिष्टवैशिष्ट्यबोधे भासत एवेति नियमः प्रामाणिकः, घटं जानातीत्यादिवाक्यजन्यघटत्वादिविशिष्टवैशिष्ट्यबोधे घटादिविषयतायां समवायानुयोगित्वावच्छिन्नत्वभानस्यापि नियमेनानभ्युपगमात्।

अथ व्याप्तिघटकहेतुसम्बन्धावच्छिन्नबोधकपक्षधर्मपदोत्तरभावप्रत्ययस्य उक्तरीत्या प्रकृत्यर्थतानवच्छेदकसम्बन्धान्तरव्यावृत्तहेतुप्रतियोगिकत्वबोधकतया सम्बन्धान्तरस्यातद्घटत्वेन तत्संसर्गकहेतुमत्ताज्ञानवारणेऽपि हेतुतावच्छेदकसम्बन्धसंसर्गकनिर्धर्मितावच्छेदकज्ञानवारणमशक्यमेव, तस्यापि व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नतादृशसम्बन्धविषयकत्वात्। न च पक्षपदस्य धर्मितावच्छेदकवैशिष्ट्यार्थकतया पक्षधर्मतापदेन धर्मितावच्छेदकविशिष्टधर्म्यनुयोगिकत्वावच्छिन्नसंसर्गबोधनात् तदवच्छिन्नसंसर्गावगाहिज्ञानमेव ज्ञानान्तार्थ इति निर्धर्मितावच्छेदकज्ञानव्यावृत्तिरिति वाच्यम्, पक्षधर्मतापदेन पक्षधर्मप्रतियोगिकत्वेनैव पक्षसम्बन्धबोधनात् पक्षानुयोगिकत्वेन सम्बन्धस्य तदबोध्यत्वात्।

मैवम्, यतः संशयवारणाय ज्ञानपदस्य निश्चयार्थकत्वमावश्यकं निश्चयत्वम् च विपरीतकोटिधर्मितावच्छेदकतानापन्नधर्मावच्छिन्नविशेष्यताकज्ञानत्वम्, तथा च तादृशविशेष्यताकत्वावच्छेदेन व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नसम्बन्धावगाहित्वस्य विवक्षणात् हेतुमत्तांशे निर्धर्मितावच्छेदकज्ञानं न लक्षणघटकमिति, एवं पक्षपदस्यानुपादानेऽपि सामञ्जस्यात्तदुपादानं धर्मपदस्य हेतुतावच्छेदकसम्बन्धप्रतियोगिपरत्वलाभायेति दिक्।

अथवा धर्मान्तरविशिष्टावच्छिन्नबोधकप्रकृतिकभावप्रत्ययः प्रकृत्यर्थताव-

च्छेदकधर्मान् ताद्रूप्येणैव प्रत्याययति। गुरुत्वमेकत्वमित्यादितो जातिविशेषपुरस्कारेणैव गुरुत्वैकत्वादिगुणबोधनात्। उक्तं च गुणदीधितौ "प्रतीतिस्तु ताद्रूप्येण धर्मत्वेन वेति।" न च शक्त्यानन्त्यप्रसङ्गाच्चायं पक्षः साधुरिति वाच्यम्, तदादीनामुपलक्षणीभूतबुद्धिविषयतावच्छेदकत्वेन प्रवृत्तिनिमित्तघटत्वाद्यनुगमेन शक्त्यैक्यवत्प्रकृतेऽपि प्रकृत्यर्थतावच्छेदकतावच्छेदकत्वरूपोपलक्षणेन प्रकृत्यर्थतावच्छेदकतावच्छेदकजातिविशेषादीनामनुगमेन शक्त्यैक्यसम्भवात् विशेषरूपेण लक्षणाया एव वोपगन्तव्यत्वात्। तादृशभावप्रत्ययार्थं च प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन सम्बन्धित्वं संसर्गतया भासते। तथा च प्रकृते पक्षानुयोगिकसम्बन्धावच्छिन्नबोधकपक्षधर्मपदोत्तरभावप्रत्ययस्य पक्षानुयोगिकसम्बन्धित्वेनैव तादृशसम्बन्धबोधकतया पक्षपदस्य धर्मितावच्छेदकविशिष्टार्थकतया धर्मितावच्छेदकविशिष्टानुयोगिकत्वावच्छिन्नव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नसम्बन्धावगाहिज्ञानलाभस्सामञ्जस्यम्। सम्बन्धांशे विशेषणप्रतियोगिकत्वं यथा विशेषणस्य सम्बन्धतया भासते तथा विशेष्यानुयोगिकत्वमपि विशेष्यस्य सम्बन्धतया भासते। अत्र पक्षे हेतुसम्बन्धविधया भासमानस्य संयोगादेर्विषयता हेतुप्रतियोगिकत्वेनेव पक्षतावच्छेदकावच्छिन्नानुयोगिकत्वेनाप्यवच्छिन्नेति न किञ्चिदनुपपन्नम्।

व्याप्तिवैशिष्ट्यसामानाधिकरण्यं व्याप्तिविशिष्टसम्बन्धित्वं तत्प्रतियोगिकत्वपर्यवसितं पक्षधर्मत्वं पक्षानुयोगिकसम्बन्ध पक्षधर्मपदस्य प्रतियोगितया पक्षानुयोगिकसम्बन्धावच्छिन्नमानबोधकत्वात् प्रतियोगित्वानुयोगित्वयो सम्बन्धसम्बन्धतया विशेषणविशेष्यांशे भानोपगमसम्भवात् प्रतियोगित्वादेर्ज्ञानान्वयित्वेऽपि पक्षव्याप्ययो सम्बन्धसंसर्गविधयाऽवगाहमानस्य परामर्शस्य नासङ्ग्रह, व्याप्तिविशिष्टप्रतियोगिकत्वादे सम्बन्धविशेषणतया तन्निष्ठविषयताया अवच्छेदकतया ज्ञानेनान्वयो न तु विषयतया, साक्षादेव तथा सति विशृङ्खलतावत्समूहालम्बनजन्येऽतिप्रसङ्गात् विषयांशे सम्बन्धविधया यद्भासते प्रकार इव तत्रापि विषयतावच्छेदकत्वं विषयतानिरूपितविषयतापर्यवसितमक्षतमेवेति सम्बन्धविषयताया व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नत्वनिर्वाह। यदि च ताद्रूप्येणैव पक्षसम्बन्ध[१] स्वावच्छिन्नबोधकपदोत्तरतत्प्रत्ययार्थं प्रकृत्यर्थस्य तत्प्रतियोगिकत्वं तु संसर्ग एव न तु प्रकारस्तथा च व्याप्तिविशिष्टप्रतियोगिकत्वस्य विषयत्वान्वयिपक्षसम्बन्धविशेषणताविरहेण तत्पारतन्त्र्येण विषयत्वान्वयासम्भवात् सम्ब-

---

[१] पाठोऽयं २। ३। ४ पुस्तके न दृश्यते।

न्धविषयतायां न तदवच्छिन्नत्वलाभसम्भव इति मन्यते तथा व्याप्तिविशिष्टस्यैव सम्बन्धविषयतायामवच्छेदकतयाऽन्वयो विवक्षणीयः तस्यैव सम्बन्धविशेषणतया लक्षणार्थे प्रवेशात् । यद्यपि कर्मधारयलभ्यस्याभेदेन व्याप्तिविशिष्टविशिष्टस्य पक्षधर्मस्यैव पक्षसम्बन्धांशे विशेषणतया तादृशस्यैव ज्ञानान्वयो दर्शितदिशा स्वीकार्यः, तथा च यादृशपरामर्शः पक्षधर्मे व्याप्तिविशिष्टाभेदमवगाहते तस्यैव संग्रहो न तु तत्र व्याप्तिसम्बन्धावगाहिन इति तन्नये व्याप्तिः, एवं लक्षणवाक्यजबुद्धौ व्याप्तिवैशिष्ट्यस्य पदार्थतावच्छेदकतया प्रकारत्वे तत्सम्बन्धसम्बन्धस्यापि भानमावश्यकं सम्बन्धसम्बन्धस्य नियमेन विशिष्टबुद्धौ भानवादिनाम्, तथा च विशिष्टपदार्थघटकस्य तस्यापि ज्ञानान्वयध्रौव्यं विशेषणान्तर्गतस्योपलक्षणत्वायोगादिति व्याप्तिवैशिष्ट्यं यत्र संसर्ग एव तादृशपरामर्शस्य दुःसङ्ग्रहतैव, तादृशपरामर्शस्य संसर्गसंसर्गीयसंसर्गान्तरभानस्य निर्युक्तिकतयाऽनवस्थाभयेन च केनाप्यनभ्युपगमात्, तथापि व्याप्तिवैशिष्ट्ये धर्मिणि प्रकारतया भासमाने वैशिष्ट्यविशेषणतापन्ना व्याप्तिरपि तेन संसर्गेण तत्प्रकारतया भासते पक्षविशेषणतया उपस्थितस्य स्वातन्त्र्येणैवान्यत्र विशेषणत्वानुपगमात्, एवं व्याप्यविशेषितस्य प्रतियोगिकतया सम्बन्धविशेषणत्वे इतरपदार्थविशेषणतापन्नस्य व्याप्यस्यापि प्रतियोगितया सम्बन्धविशेषणत्वमिति स्वीकृत्यैव व्याख्यातम्, एवं च सति व्याप्तिविशेषितधर्मिणो ज्ञानान्वयमाप्नुवाने सम्बन्धे विशेषणत्वं व्याप्तिवैशिष्ट्यविशेषितधर्मिणोऽभेदेन व्याप्यविशेषितस्य पक्षसम्बन्धविशिष्टस्य चोपलक्षणत्वमित्यतः सर्वसामञ्जस्यात् । इत्थमेव दण्डांशे लौहित्यप्रकारकज्ञाने विशिष्टविषयान्वयपरस्य लौहित्यविशिष्टदण्डं जानातीति वाक्यस्य प्रामाण्यनिर्वाह इत्यलमतिसूक्ष्मानुधावनेन ।

पदार्थतावच्छेदकद्वयेति । अन्वयबलेन एकपदार्थतावच्छेदकविशिष्टधर्मिसंसर्गोपरागेणापरपदार्थतावच्छेदकबोधकत्वादित्यर्थः । ननु कर्मधारयलभ्यव्याप्तिविशिष्टाभिन्नपक्षधर्मरूपप्रकृत्यर्थान्वितपक्षसम्बन्धरूपतत्प्रत्ययान्तार्थस्य लक्षणवाक्यार्थघटकस्याप्रसिद्ध्या ह्रदो वह्निमानित्यादिभ्रमानुमितावव्याप्तिरित्याशङ्कायां समाधत्ते ज्ञानपदेति । 'ज्ञानपदोपसन्धानेन' ज्ञानबोधकपदसमभिव्याहारनियन्त्रितव्युत्पत्तिविशेषेण । 'बाधिताबाधितसाधारणतज्ज्ञानलाभात्' पक्षधर्मतांशे बाधिताबाधितसाधारणस्य व्याप्तिवैशिष्ट्यसामानाधिकरण्यस्य ज्ञानलाभात् ।

अयं भावः ज्ञानवाचकपदसमभिव्याहृतस्य विषयविशेषणतया स्वार्थबोधकस्यापि पदस्य विषये स्वार्थानन्वयनिश्चयदशायां विषयाविशेषणतयैव ज्ञानविषयतावच्छेदकतया स्वार्थबोधकत्वं व्युत्पत्तिसिद्धं कथमन्यथा विशेष-

दर्शिनो भ्रान्तिज्ञा लोहितवह्निज्ञानवानयमित्यादिवाक्यं प्रयुङ्क्ते, तथा च वह्निव्याप्तिविशिष्टप्रतियोगिकत्वविषयतानिरूपितह्रदसम्बन्धविषयताशालिज्ञानत्वेन भ्रमात्मकपरामर्शस्यापि उक्तलक्षणवाक्याल्लाभः[1]। एवं च गुणादिरूपपक्षानुयोगिकहेतुतावच्छेदकसंयोगादिसम्बन्धाप्रसिद्धावपि गुणादिरूपपक्षे संयोगादिना हेतुमत्ताभ्रमजन्यानुमितौ नाव्याप्तिः। पक्षानुयोगिकत्वविषयतानिरूपितसंयोगादिविषयताशालित्वेन तादृशभ्रमस्यापि लक्षणवाक्यतो लाभात्। इदं त्वापाततः पदार्थद्वयाभेदविवक्षायामेव कर्मधारयस्य साधुतया अत्र पक्षधर्मे व्याप्तिविशिष्टाभेदाविवक्षायां कर्मधारयानुपपत्तिः, तद्विवक्षायां च भ्रमस्थले विवक्षितलक्षणवाक्यार्थाप्रसिद्ध्याऽव्याप्तिः स्फुटैव एतदभिप्रेत्यैव भ्रमानुमित्यव्याप्त्या मतमेतदग्रे दूषयिष्यति, उक्तवाक्यस्य चाप्रामाण्यमिष्टमेव किं तु लोहितं वह्निं जानातीत्यस्यैव प्रमाणत्वम्॥

सांसर्गिकविषयतायाः सम्बन्धान्तरावच्छिन्नत्वं निर्युक्तिकमित्याशयेन दूषयति परामर्शेनेति॥

---

१ अथ लोहितं वह्निं जानातीत्यादौ लोहितवह्न्यादिपदार्थस्याभेदेनान्वये तात्पर्यानुपगमे समासासाधुत्वेन तात्पर्यस्यावश्यकत्वेऽपि तद्वाक्यप्रामाण्यनिर्वाहाय लोहितपदस्य तत्र लौहित्यादिना भासमानार्थकत्वमुपेयते, तत्र तत्पदशक्तिविरहेऽपि ज्ञानविषयबोधकतत्तदर्थकपदस्य तत्त्वेन भासमाने निरूढलक्षणोपगमात्। तेन रूपेण भासमानत्वञ्च तत्प्रकारतानिरूपकविषयतावत्त्वं तादृशविषयतावच्छेदेन च वह्न्यादेर्विषयतानिरूपकत्वं विषयितार्थकविभक्तिसमभिव्याहारात् प्रतीयते। अतो वह्निः शुद्ध इत्यादिप्रमाया लोहितो वह्निरित्यादिज्ञानान्तरीयलौहित्यादिप्रकारतानिरूपकविषयतावद्वह्न्यादिविषयकत्वेऽपि न तज्ज्ञानपरोक्तवाक्यस्य प्रामाण्यापत्तिः लौहित्यादिविशेष्यतापन्नवह्न्याद्यविषयकवह्न्यादिज्ञाननिष्ठतद्विषयितायाः लौहित्यादिविशेष्यताभ्यामनिरूपितत्वात् द्रव्यत्वादिनिष्ठघटाद्यनुयोगिकाधिकरणतानिरूपकत्वे घटाद्याधेयतावच्छेदकतायां यादृशमवच्छेदकत्वं विषयितायास्तादृशविषयितानिरूपकतावच्छेदकत्वं विषयतानात्मकमपि विषयतायामविरुद्धमेव। एवं च प्रकृतेऽपि व्याप्तिविशिष्टपदं व्याप्तिप्रकारेण भासमानपरं तस्य पक्षधर्मेऽभेदेनान्वयः। तस्य भावप्रत्ययार्थे पक्षसम्बन्धे स्वप्रतियोगिकत्वेन भासमानत्वसम्बन्धेन यस्य विशेषणस्य येन सम्बन्धेन विशेष्येऽन्वयः ज्ञानविषयतया भासमाने विशेष्ये स्वीयतत्सम्बन्धोपरागेण भासमानत्वस्यैव तद्विशेषणसम्बन्धतया भानमिति व्युत्पत्तेः अराजकीये धननिष्ठस्वत्वे राजकीयत्वभ्रमरूपज्ञानपरे राज्ञो धनं जानातीत्यादिविशेषदर्शिवाक्ये षष्ठ्यर्थस्वत्वे निरूपितत्वसम्बन्धेन राज्ञोऽन्वये योग्यतानुपपत्त्या निरूपितत्वेनैव भासमानत्वस्य तत्र तत्सम्बन्धताया उपगन्तव्यत्वात्। तथा च व्याप्तिप्रकारेण वह्न्यासने तत्प्रतियोगिकत्वेन भासमानपक्षसम्बन्धावगाहिज्ञानजन्यत्वलाभात् भ्रान्तानुमित्यव्याप्तिर्न वा तत्र लक्षणवाक्याल्लक्षणबोधानुपपत्तिरिति चेन्न। एवमपि पक्षधर्मपदस्य यथाश्रुतार्थपरताया आवश्यकत्वाद्वह्निव्याप्यजलवान् ह्रद इत्यादिपरामर्शजन्यभ्रमानुमितिसंग्रहेऽपि वह्निव्याप्यधूमवान् ह्रद इति भ्रमजन्यानुमितेरसंग्रहत्वात्। तत्र व्याप्तिप्रकारेण भासमानधूमे वास्तवपक्षधर्मताविरहात् पक्षधर्मपदस्य पक्षधर्मत्वेन भासमानार्थकत्वे पक्षसम्बन्धस्य प्रकृत्यर्थतानवच्छेदकतया तदुत्तरभावप्रत्ययेन बोधनासम्भवात् तेन रूपेण भासमानत्वरूपप्रकृत्यर्थतावच्छेदकस्य भावप्रत्ययेन विवक्षणे परामर्शस्य तदनवगाहितया असामञ्जस्यादिति २ पुस्तके अधिकः पाठः।

(दी०) तत्र परामर्शेन नियमतो व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहे मानाभावात् गौरवेण तद्विषयत्वेनाहेतुत्वात्। सम्बन्धसम्बन्धाग्रहेऽपि विशिष्टज्ञानत्वस्योपपादितत्वात् भ्रमस्थले च तादृशसामानाधिकरण्याप्रसिद्ध्या तज्ज्ञानासम्भवात् असत्ख्यातिनिरासात् अवान्तरवाक्यार्थायोग्यत्वनिर्णये महावाक्यार्थज्ञानानुदयात् विषाणे शशसम्बन्धाभावनिश्चयदशायां शशविषाणजन्यमिदं कार्मुकमिति शाब्दबुद्धेर्ब्रह्मणापि दुरुपपादत्वात्।

(गा०) परामर्शत्वस्य व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहत्वव्याप्यत्वे मानाभावादित्यर्थः। व्याप्तिविशिष्टधूमसंयोगी वह्निव्याप्यधूमवांश्च पक्ष इत्यादिपरामर्शस्य व्याप्तिसम्बन्धपक्षसम्बन्धप्रकारकतया तत्सम्बन्धावगाहित्वं प्रामाणिकमेवेति नियमत इत्युक्तम्, तथा च यत्र व्याप्तिवैशिष्ट्यं पक्षधर्मता च संसर्गतयैव भासते तज्जन्यानुमितावव्याप्तिर्यथाश्रुतलक्षण इति भावः। ननु तादृशज्ञानादनुमितिर्न भवत्येव तादृशसामानाधिकरण्यविषयकत्वेनैव परामर्शस्यानुमितिहेतुत्वात्, तथा च काव्याप्तिरित्यत आह गौरवेण चेति। व्याप्तिविशिष्टहेतुविशिष्टपक्षज्ञानत्वेनैव लाघवेन हेतुत्वात् व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यविषयकत्वेन हेतुत्वे सामानाधिकरण्यविषयकत्वस्याधिकस्य निवेशात्, तथा च तदुभयसामानाधिकरण्यानवगाहिनोऽपि विशिष्टज्ञानादनुमित्युत्पत्तिर्निष्प्रत्यूहैवेति भावः। ननु सम्बन्धसम्बन्धावगाहिज्ञानत्वमेव विशिष्टज्ञानत्वं न तु सम्बन्धज्ञानत्वमेव दण्डपुरुषसंयोगा इत्यादिसमूहालम्बनस्यापि तथात्वापातात्, तथा चानुमितिजनकज्ञाने विशेषणीभूतव्याप्तिसाधनयोः संसर्गसंसर्गानवगाहित्वे तद्विशिष्टज्ञानत्वमेव तस्य नोपपद्यत इति कथमनुमितिजनकत्वमित्यत आह सम्बन्धेति। 'अग्रहेऽपि' अविषयीकरणेऽपि। विशिष्टज्ञानत्वस्येति। अयमाशयः सम्बन्धसम्बन्धावगाहिज्ञानत्वमपि न विशिष्टज्ञानत्वं सम्बन्धसम्बन्धमादायापि समूहालम्बनसम्भवात् अपि तु तत्प्रकारकधीत्वमेव तद्विशिष्टधीत्वं प्रकारत्वं च विषयताविशेषः। न च प्रकारतात्वं सांसर्गिकविषयतानिरूपितविषयतात्वं यदि तदा विशेष्यताया अपि तथात्वादतिप्रसङ्गः अपि तु सम्बन्धविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितविषयतात्वमेव, विशेष्यविषयता च तादृशानुयोगित्वविषयतानिरूपितैव न तु तादृशप्रतियोगित्वविषयतानिरूपिता विशेषणांश एव संसर्गप्रतियोगिताभानादिति नातिप्रसङ्गः, एवं प्रतियोगित्वस्थानेऽनुयोगित्वं निवेश्य विशेष्यतात्वं निर्वाच्यमिति

संसर्गीयप्रतियोगित्वानुयोगित्वरूपसंसर्गान्तरभानं विशिष्टबुद्धावावश्यकमिति वाच्यम्, संसर्गतात्ववत्प्रकारतात्वविशेष्यतात्वयोरपि स्वरूपसम्बन्धविशेषात्मकत्वादिति विशिष्टबुद्धे संसर्गसंसर्गावगाहितानियमेऽपि उक्तरीत्या भ्रमानुमितावव्याप्तिर्निष्प्रत्यूहैवेत्याशयेनाह भ्रमस्थले चेति। तज्ज्ञानासम्भवादिति व्याप्तिवैशिष्ट्यसमानाधिकरणपक्षधर्मत्वज्ञानासम्भवादित्यर्थः। तथा च तादृशविशिष्टज्ञानजन्यत्वं लक्षणवाक्यार्थस्तस्य भ्रमानुमितिसाधारण्यमशक्यमेव भ्रमस्य व्याप्तिवैशिष्ट्यसमानाधिकरणपक्षधर्मत्वविषयत्वासम्भवेन लक्षणवाक्यार्थानन्तर्भावादिति भावः। ननु भ्रमेऽसदेव वैशिष्ट्यं भासत इति टीकाकारानुमतं तथा च वह्निव्याप्यधूमवान् ह्रद इत्यादिभ्रमस्य व्याप्तिविशिष्टधूमादिप्रतियोगिकह्रदानुयोगिकासद्वैशिष्ट्यविषयकत्वमव्याहतमेवेति कथं तादृशज्ञानासम्भव उच्यते इत्यत आह असदिति। 'असत' 'ख्यातिनिरासात्' ज्ञानविषयत्वनिरासात्, ज्ञानविषयताव्यापकत्वस्य सत्त्वे व्यवस्थापनादिति यावत्। यदि चासतो ज्ञानविषयतासत्त्वेऽपि अभावाधिकरणताया अपसिद्धान्तत्वात् ज्ञानविषयत्वसमानाधिकरणाभावाप्रतियोगित्वरूपं तद्व्यापकत्वं सत्त्वेऽक्षतमेवेति नार्थतोऽसत्ख्यातिनिराससम्भव इति मन्यते तदा सद्वृत्तित्वे तादृशज्ञानविषयतात्वव्यापकत्वमेव विवक्षणीयम्, असत्ख्यातिवादिनामसद्वैशिष्ट्यज्ञानविषयत्वस्य परमार्थत्वात्, न च भ्रमस्य सन्मात्रविषयकत्वे भ्रमत्वव्याघात इत्याशङ्क्यं तथात्वेऽपि व्यधिकरणप्रकारकत्वेन भ्रमत्वस्य निर्वाहात्। इदं च वस्तुगतिमनुरुध्याभिहितम्, वस्तुतोऽसद्वैशिष्ट्यभानेऽपि न प्रकृते निस्तारः, अलीकस्य संसर्गतयैव ज्ञानादिविषयताया वाचस्पत्यनुमतत्वात् तन्मतानुसरणेऽपि असत्या व्याप्तिवैशिष्ट्यसमानाधिकरणपक्षधर्मताया स्तत्प्रत्ययान्तेन प्रतिपादनासम्भवात् अपारमार्थिकधूमप्रतियोगिकह्रदानुयोगिकवैशिष्ट्यावगाहिभ्रमात्मकपरामर्शजन्यत्वस्य लक्षणवाक्यतोऽलाभात् लक्षणस्यासद्घटितत्वेनाभ्रान्तस्य तत इतरभेदानुमानासम्भवाच्च, भ्रान्तपुरुषीयानुमानस्यातिप्रसक्त्यादिनापि सम्भवात्। ननु व्याप्तिविशिष्टपक्षधर्मयोरभेदो लक्षणवाक्यत प्रतीयतां तथापि न तदंशस्य लक्षणघटकत्वमुपगम्यते अतिव्याप्त्याद्यवारकत्वात् अवश्यविवक्षणीयव्याप्तिविशिष्टप्रतियोगिकत्वादिविषयतानिरूपितसंसर्गीयविषयतामात्रनिवेशेनैव सामञ्जस्यात्, लक्षणवाक्यप्रतिपाद्यताया लक्षणघटकतानियतत्वे ज्ञानान्तरमधारयपक्षेऽपि अवश्यविवक्षणीयस्य ज्ञानविशेषणव्याप्तिप्रकारकत्वांशे पक्षधर्मताविषयकत्वावच्छिन्नत्वस्य निवेशेनैव सामञ्जस्याल्लक्षणवाक्यलभ्यस्य ज्ञानांशे पक्षधर्मताविषयकत्वविशेषणस्य वैयर्थ्येन लक्षणदोषात्। एवं च भ्रमानुमितौ न लक्षणाव्याप्तिशङ्केत्याशयेनायोग्यताज्ञानाद्विशेषदर्शिनां नोक्तवाक्यात्प्रमा

नुमितौ लक्षणग्रहः सम्भवतीति विशेषदर्शिनं प्रति प्रकृतवाक्यानर्थक्यमिति दूषणान्तरमाह अवान्तरेति। पक्षधर्मांशेऽविशेषणस्य व्याप्तिवैशिष्ट्यादेर्नैस्वातन्त्र्येण ज्ञानान्वयसम्भवः व्युत्पत्तिविरोधात्, अपि तु तद्विशेषणतापन्नस्यैवेति तत्र तदनन्वयनिश्चयोऽवान्तरवाक्यार्थयोग्यतानिश्चयः तस्मिन् सति समुदायलक्षणवाक्यजन्यमहावाक्यार्थज्ञानासम्भवादित्यर्थः। महावाक्यार्थयोग्यताज्ञानस्यावान्तरवाक्यार्थविषयकत्वनैयत्येनावान्तरवाक्यार्थधीविरोधिनोऽयोग्यताज्ञानस्य महावाक्यार्थयोग्यताज्ञानविरोधित्वादिति भावः। एतदेव दृष्टान्तेन द्रढयति विषाण इति। शशसम्बन्धाभावेति। शशस्य विषाणजन्यमिति वाक्यजन्यसम्बन्धप्रकारकबोधाभिप्रायेणेदम्, शशविषाणजन्यमिति वाक्यजन्यबोधस्य विषाणांशेऽभेदेन शशपदलक्ष्यशशसम्बन्धिप्रकारकतया सम्बन्धिभेदनिश्चयस्यैव तद्विरोधित्वात्। समासव्यासयोः समानप्रकारकानुभवजनकत्वानुरोधेन षष्ठीतत्पुरुषस्थले सम्बन्ध एव लक्षणा, समासे व्युत्पत्तिवैचित्र्येण नामार्थयोरपि भेदान्वयबोधाभ्युपगमादित्याशयेनेदमिति कश्चित्। शशसम्बन्धविशिष्टविषाणपरसर्वनामघटितवाक्यजन्यबोधपरतया व्याख्यानं पुनरसत्, तथा सति विषाणे शशसम्बन्धस्य पदार्थतयाऽवान्तरवाक्यार्थत्वायोगात्॥

भ्रमानुमितेरलक्ष्यतया नाव्याप्तिप्रसक्तिरित्याशङ्कते न चेति।

(दी०) न चात्र प्रमाणप्रस्तावात् प्रमैव लक्ष्या। यदि च सल्लिङ्गपरामर्शादपि भ्रान्तानुमितिस्तदा चरमज्ञानपदं प्रमापरमिति वाच्यम्॥

(गा०) 'प्रमाणप्रस्तावात्' प्रमाणतत्त्वमत्र विविच्यत इत्युपक्रमेण प्रमाणस्य निरूपणीयत्वात्, तन्निरूपणोपयोगितया प्रमैवानुमितिर्लक्षणीया। यद्यपि ह्रदो वह्निमानित्याद्यनुमितेरपि ह्रदत्वाद्यंशे प्रमात्वमेव विधेयांशे प्रमात्वविवक्षणे लिङ्गोपधानमतेऽपि धूलीपटलादौ व्याप्यत्वावगाहिज्ञानजन्यायां पर्वतादिपक्षकवह्न्याद्यनुमितौ विधेयांशे प्रमात्वस्याक्षततया लिङ्गोपहितेत्याद्यग्रिमग्रन्थानुत्थितेः यावद्भ्रमभेदकूटविवक्षणे तु ह्रदो वह्निमान् पर्वतश्च वह्निमानित्यादिसमूहालम्बनानुमितौ अलक्ष्यतापातेनातिप्रसङ्गः, तथापि भ्रमान्यवृत्तिविषयितावत्त्वमेव प्रमात्वं विवक्षणीयम्। उक्तसमूहालम्बनज्ञानीयवह्निमत्पर्वतादिविषयिता समूहालम्बनानात्मिकायां पर्वतो वह्निमानित्यनुमितावपि वर्तते, ज्ञानव्यक्तिभेदेन विषयिताभेदानुपगमात् यतस्तस्यालक्ष्यतैव, ह्रदो वह्निमानित्याद्यनुमितिनिष्ठाया ह्रदादिविषयिताया अपि भ्रमत्वघटकतया भ्रमत्वनैयत्यमेवातो न तस्यालक्ष्यत्वम्।

यद्यप्येतावतापि लिङ्गोपहितेत्याद्यग्रिमग्रन्थासङ्गतिरस्ति, तथाहि लिङ्गोपधानमतेऽपि शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्ह्यादिप्रकारतायास्तादृशप्रकारताशालिसंशयनिरुत्स्यर्थं तादृशसिद्धिप्रतिबन्धकस्यार्थं च स्वीकरणीयत्वात् तादृश्याधोक्तस्वरूपस्यास्तादृशानुमितेर्लक्ष्यत्वं दुष्परिहरमेवेति, तथापि तादृशविषयितायां परामर्शजन्यतावच्छेदकत्वमपि विवक्षणीयम्, अन्यथा ह्रदत्वादिविषयितामादाय भ्रान्तानुमितेरपि लक्ष्यतापातात्, तथा च तादृश्याश्च बाधाभावादेर्जन्यतावच्छेदकत्वादिति ध्येयम्।

ननु गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्याद्यसङ्कीर्णबाधस्थले या पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहिन्यनुमितिस्तस्या अतिव्याप्तिस्तादृशानुमितेः साध्यस्य पक्षतावच्छेदकावच्छिन्नत्वांशे भ्रमरूपतया लक्ष्यत्वात् विशिष्टेऽपि पक्षे गन्धव्याप्यतया पृथिवीत्वादिरूपहेतुमत्तावगाहिनः परामर्शस्य प्रमात्वेन व्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहित्वाद्युक्तलक्षणस्याक्षतत्वादित्यत आह यदि चेति। सर्वत्रानुमाने पक्षधर्मताबलात्पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमेव भासते न तु तयोरवच्छेद्यावच्छेदकभावोऽपि तेन विनापि हेतोर्व्याप्तिपक्षधर्मत्वोपपत्तेस्तद्भासकबलाभावादित्यभिसन्धाय उक्तबाधासङ्करस्य तस्य पक्षपतिना दूषितत्वात्, तन्मते च न सल्लिङ्गपरामर्शाद् भ्रमानुमितिरपि तु मिथ्यादिभत एवेत्यतो यदि चेत्युक्तम्। न च बाधितवङ्गो लाघवज्ञानसत्त्वे सल्लिङ्गपरामर्शादपि बाधितो वह्निः पक्षे भासत इति सर्वेषामेवानुमतं परं तु तादृशानुमितेर्व्यापकतावच्छेदकविशेषधर्मप्रकारकत्वं प्राचीना न मन्यन्ते अत एव सामान्यधर्मावच्छिन्ननिरूपितव्याप्तिबलात्प्रवृत्तानुमाने विशेषबाधस्यादोषत्वं समानप्रकारकत्वेन विरोधित्वं व्यवस्थाप्य व्युत्पादितमुपाध्यायैर्बाधग्रन्थे, तावतापि च बाधितविषयलाघवज्ञानजन्यानुमितेस्तदभाववति तत्प्रकारकत्वरूपभ्रमत्वावच्छिन्नभेदघटितप्रमात्व दुरपवादमेवेति यदि चेत्यसङ्गतमेवेति वाच्यम्, तदवच्छिन्नाभाववति तदवच्छिन्नप्रकारकत्वावच्छिन्नभेदघटितप्रमात्वस्य लक्ष्यताप्रयोजकत्वोपगमेन पर्वतादौ वह्नित्वादिना बाधितवह्न्यादिविषयकानुमितेर्लक्ष्यतासम्भवेन तत्सङ्गतेः। न चोक्तप्रमात्वस्य लक्ष्यतानियामकत्वे जलपर्वतो वह्निमान्, पर्वतो जलवह्निमानित्याद्यनुमिता स्वरूपतो भासमानविषयादौ भ्रमरूपायां विशिष्टपक्षाद्यप्रसिद्ध्याऽव्याप्तिर्दुर्वारैव तत्रापि तादृशप्रमात्वसत्त्वादिति वाच्यम्, तदभाववति स्वरूपतस्तत्प्रकारकभ्रमभेदमपि प्रमात्वशरीरे निवेश्य तद्वारणसम्भवात्।

केचित्तु यत्किञ्चिद्विधेयतावच्छेदकावच्छिन्नवत्पक्षावगाहित्वलक्षणपारिभाषिकप्रमात्वेनैव लक्ष्यताया विवक्षितत्वात् लाघवज्ञानाधीनोक्तानुमितौ

महानसीयत्वादेः प्रकारत्ववादिमनेऽपि वह्नित्वस्यैव विधेयतावच्छेदकतया पक्षस्य तदवच्छिन्नवत्त्वमेव तादृशप्रमात्वानपायात् । गन्धप्रागभावकालावच्छिन्नो घटो गन्धवानित्यादौ नव्यनये तादृशकालावच्छिन्नगन्धसमवायस्य सम्बन्धस्यात्तेन सम्बन्धेन च पक्षे विधेयाभावाच्च लक्षणा । न चेदृशप्रमात्वस्य लक्ष्यतानियामकत्वे लिङ्गोपधानमतेऽप्यव्याप्यादिलिङ्गकानुमितेरलक्ष्यत्वाप्रसक्त्या लिङ्गोपहितेत्याद्यग्रिमग्रन्थो नावतरतीति वाच्यम्, इदानीं लाघवज्ञानजन्यानुमितेरलक्ष्यतायां क्षतिविरहात्, भ्रमान्यवृत्तिविषयतावत्त्वमेव लक्ष्यतानियामकं वक्तव्यमित्याशयात्तथोक्तिसङ्गतेरिति वदन्ति ।

प्रमापरमिति । अत्रापि लक्ष्यतानियामकं यादृशं प्रमात्वं तदेव विवक्षणीयम् । अतः किञ्चिदंशे प्रमात्वमादाय नातिप्रसङ्गस्य दुर्वारता ॥

(दी०) अव्याप्यापक्षधर्मयोस्तत्त्वादिना परामर्शेन जनितायां वस्तुतः साध्यवत्पक्षावगाहितया प्रमायामव्याप्तेः । लिङ्गोपहितलैङ्गिकभाननिरासेनांशिकभ्रमत्वस्याप्ययोगात् । परमेश्वरतादृशज्ञानजन्यत्वस्य चातिप्रसञ्जकत्वात् । अत एव व्याप्तिविशिष्टे पक्षधर्मता तज्ज्ञानं वेत्यादिकमपास्तम् ।

(गा०) अव्याप्यापक्षधर्मयोरिति । अव्याप्ये धूलीपटलादौ व्याप्यत्वावगाहिना अपक्षधर्मे च महानसत्वादौ पक्षधर्मत्वावगाहिना परामर्शेन जनितायां वस्तुतो वह्न्यादिमति पर्वतादौ वह्निमत्त्वावगाहिन्यां प्रमानुमितावव्याप्तेरित्यर्थः । तज्जनकपरामर्शस्य व्याप्तिविशिष्टप्रतियोगिकपक्षानुयोगिकसम्बन्धानवगाहित्वात् धूलीपटलादिसम्बन्धस्य व्याप्याप्रतियोगिकत्वात् महानसत्वादिसम्बन्धस्य पक्षाननुयोगिकत्वादिति भावः । नन्वनुमितौ पक्षांशे व्याप्यत्वेन लिङ्गभानोपगमादुक्तानुमितेर्यथायोगं व्याप्तिपक्षधर्मतांशे भ्रमरूपतयाऽलक्ष्यतैवेति कथमव्याप्तिरत आह लिङ्गोपहितेति । लिङ्गविशिष्टपक्षे साध्यभानस्य मणिकृता निराकार्यत्वेनोक्तानुमितेर्व्याप्त्यादिअंशे भ्रमत्वस्याप्ययोगादित्यर्थः । लिङ्गोपहितलैङ्गिकभाने परामर्शजन्यतावच्छेदककोटावव्यवहितोत्तरत्वादि न निवेश्यते लिङ्गविषयताया जन्यतावच्छेदकत्वोपगमेनैव व्यभिचारवारणसम्भवादिति रीत्या लाघवसत्त्वेऽपि मणिकृतां तन्नासम्मतेस्तदीयलक्षणं तन्मतमवलम्ब्य व्याख्यातुमुचितमिति भावः । ननूक्तानुमितिष्वपि व्याप्तिविशिष्टप्रतियोगिकपक्षानुयोगिकसम्बन्धावगाहिभगवज्ज्ञानजन्यत्वसत्त्वान्नाव्याप्तिरित्यत आह परमेश्वरेति । तादृशेति । व्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहीत्यर्थः, 'अतिप्रसञ्जकत्वात्' प्रत्यक्षादावतिव्याप्तत्वात्, तथा चातिप्रसङ्गवारणाय तादृशसम्बन्धावगाहिनिश्चयत्वावच्छिन्न-

कारणता जन्यतानवच्छिन्नकार्यता वा निवेशनीया, तथा चोक्तभ्रमजन्यानुमितौ भगवज्ज्ञानस्य उपादानप्रत्यक्षविधयैव कारणत्वं तस्याश्च जन्यत्वेनैव तज्जन्यतेति नाव्याप्तिनिरासस्सम्भव इति भावः। न च भगवज्ज्ञानस्य परामर्शत्वेनापि जनकता नित्यस्येत्यादिव्याप्त्यनभ्युपगमात् परामर्शहेतुतायां जन्यत्वस्याधिकस्यानिवेशादिति तादृशजनकतानिरूपितजन्यतामादायैव कूटलिङ्गकप्रमानुमितावव्याप्तिवारणसम्भव इति वाच्यम्, तादृशानुमित्यव्यवहितपूर्वं तदधिकरणात्मनि व्याप्तिविशिष्टप्रतियोगिकपक्षानुयोगिकसम्बन्धावगाहिनिश्चयासत्त्वेन व्यभिचारप्रसक्त्या तादृशनिश्चयत्वावच्छिन्नजन्यतावच्छेदकस्य तादृशानुमितितो व्यावर्तनीयतया तद्रूपावच्छिन्नजन्यतामादाय लक्षणसमन्वयासम्भवादिति भावः।

इदमनावधेयम्—वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्यापि न व्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहित्वेन हेतुना धूमत्वादिना धूलीपटलावगाहितदाकारभ्रमासंग्रहात्, तथा च तद्रूपावच्छिन्नकारणताघटितलक्षणस्य प्रत्यक्षविशेषाद्यतिव्याप्तिवारणायोपगमेऽसम्भव एव स्यात्कथमुक्ताव्याप्त्यभिधानम्। यदि किञ्चिल्लिङ्गसाध्यकानुमिति प्रमात्मकपरामर्शादेव तदा तत्तद्रूपेण हेतुतासम्भवान्नासम्भव इत्युच्यते, तदा तादृशानुमितिजनकपरामर्शकारणताघटितजातिघटितलक्षणोपगमेनोक्ताव्याप्तेरपि नावकाशः।

वस्तुतस्तु विषयतायां विशिष्टान्वयबलादुक्तवाक्यतो व्याप्यवच्छिन्नहेतुनिष्ठावच्छेदकताकपक्षसम्बन्धविषयताकत्वेनापि परामर्शलाभात्तद्रूपस्यैव कारणतावच्छेदकत्वविवक्षया नासम्भव उक्तस्थलाव्याप्तिर्वा, तद्रूपस्य भ्रमसाधारणत्वात् वास्तवव्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धस्य लक्षणवाक्यजन्यबोधेऽवश्यं भानेन तद्विषयकत्वेन परामर्शोपस्थितावपि न तस्य कारणतावच्छेदकत्वम्, अपि तु कारणतासामानाधिकरण्यमेव, कूटलिङ्गकपरामर्शसाधारणोक्तरूपावच्छिन्नकारणताया भगवज्ज्ञाने वास्तवव्याप्यप्रतियोगिकतादृशसम्बन्धावगाहित्वसामानाधिकरण्यसत्त्वेन कूटलिङ्गकप्रमानुमितिपरलक्षणवाक्ये नावान्तरवाक्यार्थायोग्यत्वमपीति लक्षणवाक्यतो व्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टपक्षसम्बन्धावगाहिज्ञानवृत्तित्वेन कारणत्वे भासमाने व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छिन्नत्वेनापि तद्भासते, तथा च व्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टपक्षसम्बन्धावगाहिज्ञानवृत्तित्वोपलक्षितव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छिन्नत्वविशेषितजनकताया लक्षणघटकत्वादीश्वरज्ञानवृत्तिजनकतायाश्च तादृशत्वात् तादृशानुमितौ लक्षणसमन्वयः प्रत्यक्षादावतिव्याप्तिवारणञ्च सम्भवतीति ध्येयम्।

'अत एव' भ्रमजन्यानुमितावव्याप्तेरेव, व्याप्तिविशिष्टे या पक्षधर्मता इति सप्तमीतत्पुरुषेण वास्तवव्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहित्वरूपकर्मधारयपक्षीयार्थ एव पर्यवसानाद् व्याप्तिविशिष्टे यत्पक्षधर्मताज्ञानमिति ज्ञानान्तेन विषयत्वार्थकसप्तमीतत्पुरुषसमासेन वास्तवव्याप्तिविशिष्टविषयकपक्षसम्बन्धज्ञानस्य लाभाद् वह्निव्याप्यधूलीपटलवान्पर्वत इत्यादिज्ञानासङ्ग्रहादिति भाव । आदिपदाद् व्याप्तिविशिष्टा व्याप्तिसमानाधिकरणा या पक्षधर्मता इत्यादिसमासस्य परिग्रह । यद्यपि वक्ष्यमाणज्ञानान्तकर्मधारयपक्षे प्रकारितारूपस्यैव तत्प्रकारकज्ञानविषयत्वरूपस्य वैज्ञानिकस्य वैशिष्ट्यस्य विवक्षया ज्ञानान्तसप्तमीतत्पुरुषपक्षेऽपि व्याप्तिविशेष्यतापन्नहेतुविषयत्वावच्छेदेन पक्षधर्मताविषयकज्ञानपर्यवसानादुक्ताव्याप्तिपरीहार सम्भवति, यत्र व्याप्तेरप्रसिद्धिस्तत्रापि व्याप्तिपदस्य वक्ष्यमाणकल्पे विलक्षणप्रकारितायामिव एतत्कल्पेऽपि विलक्षणप्रकारतानिरूपितविशेष्यताया लक्षणामुपगम्याव्याप्तिपरीहारसम्भव , पक्षधर्मत्वाप्रसिद्धिस्थलेऽपि वक्ष्यमाणैव गति , तथापि व्याप्तिपदलक्षणाया आवश्यकत्वे तत्पुरुषमुपेक्ष्य लाघवात्कर्मधारय एव आश्रयितुमुचित इत्याशयेन तत्पुरुष उपेक्षित ॥

मिश्रोक्त द्वन्द्वपक्ष दूषयितुमुपन्यस्यति व्याप्तीति ।

(टी०) व्याप्तिविशिष्टश्च पक्षधर्मश्चेति द्वन्द्वाश्रयणाद् व्याप्तिविशिष्टत्वपक्षधर्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेऽपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिसूत्रेऽन्यत्र च द्वन्द्वस्य दर्शनात् । पदार्थद्वयाभेदबोधकाच्च कर्मधारयाद्भेदाभेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वन्द्वस्य भेदात् । विशिष्टपदस्य धर्मपरतया वा व्याप्तिवैशिष्ट्यपक्षधर्मत्वयोर्लाभात् । न चैवमालोको वह्निव्याप्यो धूमवान् पर्वत इति ज्ञानजन्येऽतिप्रसङ्गः, एकत्र तदुभयावगाहित्वस्योक्तत्वादिति केचित् ।

(गा०) 'व्याप्तिविशिष्टत्वपक्षधर्मत्वावगाहीति' व्याप्तिसम्बन्धपक्षसम्बन्धविषयकेत्यर्थ , द्वन्द्वात्पर इत्यादिन्यायेन भावप्रत्ययार्थेन व्याप्तिविशिष्टस्यान्वयादिति भाव । एव च सम्बन्धविधया व्याप्तिवैशिष्ट्याद्यवगाहिज्ञानस्य तत्समानाधिकरण्यानवगाहित्वेऽपि तदवगाहित्वस्याक्षतत्वान्नासंग्रह । यद्यपि व्याप्तिवैशिष्ट्यादेर्ज्ञानविषयत्वान्वये व्याप्त्यादेरुपलक्षणत्वेऽतिप्रसङ्गात् विशेषणतैवोपगन्तव्या, तथा च तद्विशिष्टस्य वैशिष्ट्यादेर्ज्ञानविषयतान्वये वैशिष्ट्यानुयोगिकविशेषणवैशिष्ट्यस्यापि तदन्वय आवश्यक इति संसर्गतया व्याप्त्यादिवैशिष्ट्यावगाहिज्ञान तु सङ्ग्रहमेव, विशेषणसंसर्गस्य

तदन्वयोपगमे च उपाध्यायमतेऽपि नोक्तपरामर्शसंग्रहः उक्तयुक्त्या लक्षणवाक्यजन्यबोधे व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यस्य तत्तत्संसर्गतयैव भानात्। तथापि संसर्गसंसर्गभानोपगमे एतन्मते सकलपरामर्शसंग्रहः उपाध्यायमते च व्याप्त्यादिवैशिष्ट्यं यत्र संसर्गतया भासते तस्य तावता संग्रहेऽपि भ्रमस्थले उभयसामानाधिकरण्याप्रसिद्ध्याऽव्याप्तेर्दुर्वारैवेति विशेषः। अथाभ्युपगम्यतां संसर्गे विशेषणप्रतियोगित्वस्य संसर्गतया भानं तथापि तद्विषयताया अनुमितिकारणतावच्छेदककोटिनिवेशे मानाभाव इति वक्ष्यमाणातिप्रसङ्गस्य वारणाय येन रूपेण परामर्शस्य लक्षणवाक्याल्लाभस्तस्य जनकतावच्छेदकताया विवक्षणीयतया संसर्गानुयोगिकसम्बन्धविषयत्वघटितलक्षणवाक्यप्रतिपाद्यतावच्छेदकरूपस्य चानुमितिजनकतानवच्छेदकतयाऽसम्भव इति चेन्न, प्रकारतात्वस्य संसर्गप्रतियोगित्वविषयतानिरूपितविषयतात्वरूपतया प्रकारतात्वेन व्याप्तिप्रकारतानिवेशेन संसर्गप्रतियोगित्वविषयताया अपि कारणतावच्छेदकगर्भे निवेशाद् वैशिष्ट्यानुयोगिकसंसर्गविशेषावच्छिन्नत्वेनोपस्थितव्याप्तिविषयताघटितसमुदाये तादृशसम्बन्धावच्छिन्नत्वस्योपलक्षणत्वोपगमेन तदंशं परित्यज्य इतरांशे कारणतावच्छेदकत्वविवक्षणसम्भवाच्च। ननु पदार्थयोरभेदे न द्वन्द्वस्य साधुता "पदार्थानां प्रधानत्वे परस्परविभेदतः। एकदैकक्रियायोगाद् भवति द्वन्द्वसंज्ञकः" इत्यभियुक्तैरभिधानाद् एकघटादिपरघटकलशादिपदे तददर्शनात्, तथा च प्रकृते व्याप्तिविशिष्टपक्षधर्मपदयोर्द्वन्द्वसाधुत्वानुरोधेन विभिन्नधर्मिपरत्वोपपत्तये एकधर्मिनिष्ठव्याप्तिवैशिष्ट्यपक्षधर्मत्वावगाहिपरामर्शासंग्रह इत्याशङ्क्य एकधर्मिपरत्वेऽपि द्वन्द्वमुपपादयति पदार्थयोरिति।

'पदार्थयोः' पदजन्यप्रतीतिविशेष्यतयाऽभिप्रेतयोः। पदार्थतावच्छेदकभेदेनेति। तथा च पदजन्यप्रतीतिविषयतयाऽभिप्रेतत्वरूपपदार्थतावच्छेदकादिसाधारणपदार्थत्वाश्रयस्य भेद एव द्वन्द्वनियामक इति भावः। एतेन नानार्थेतरसरूपैकशेषस्थलेऽपि विशेष्यघटादिव्यक्तिभेदेन द्वन्द्वप्रसक्त्या सरूपैकशेषस्य द्वन्द्वापवादकताप्रवादसङ्गतिः। घटत्वेनैकघटतात्पर्यकघटकलशपदयोः प्रतिपाद्यघटघटत्वयोर्भेदेऽपि न द्वन्द्वः एकपदप्रतिपाद्येऽपरपदप्रतिपाद्यत्वावच्छिन्नभेदस्यापेक्षितत्वात्। वस्तुतः पदार्थयोर्भेदः पदार्थवैलक्षण्यं एकपदप्रतिपाद्यविशिष्टार्थस्यापरपदप्रतिपाद्यविशिष्टार्थापर्याप्तविषयताश्रयत्वं पर्यवसितं द्वन्द्वनियामकम्। एतेन मेयवाच्ययोरभेद इत्यादौ मेयपदप्रतिपाद्ये वाच्यादिपदप्रतिपाद्यत्वावच्छिन्नभेदासत्त्वेऽपि न क्षतिः। गगनाकाशयोरभेद इत्यादौ च गगनादिपदं तद्वाच्यत्वावच्छिन्नपरमिति पदार्थतावच्छेदकभेदेन द्वन्द्वः। अथ द्वन्द्वबाधार्थं सरूपैकशेषानुशासनमित्ययुक्तं समस्यमानपदा-

नामानुपूर्वीभेदरूपवैरूप्यस्य द्वन्द्वनियामकतां स्वीकृत्यैव सरूपाणां द्वन्द्ववारणसम्भवादिति चेन्न, न हि द्वन्द्वबाध एव सरूपैकशेषफलम्, किंतु तदननुशासने घटा इत्यादौ बहुत्वान्वयानुपपत्ति "सकृदुच्चरितः शब्दः सकृदर्थं प्रत्याययति" इति व्युत्पत्तेरेकघटपदेन बहुघटबोधनासम्भवात् सकृदर्थं प्रत्याययतीत्यस्यानेकशक्तिविषयाबोधकत्वार्थकत्वेऽपि इन्द्रोपेन्द्रचन्द्रपरे हर्य इत्यादावगति, एकशेषानुशासने तु तत्र बहुपदेभ्य एव बहूनां बोध बहुपदाश्रवणं च इतरेषां लोपात्, एकशेषस्य इतरलोपपर्यवसितत्वात्।

अत्राहु सरूपैकशेष कृतद्वन्द्वानामेव न तु द्वन्द्वापवादकता तस्य तथा सति सविभक्तिकानामेव द्वन्द्वसम्भवात् सविभक्तिकानामेव एकशेषस्य वाच्यतया श्रूयमाणपदोत्तरं सुब्विभक्तेरवस्थानापत्ते, लुप्तपदानां श्रूयमाण बहुवचनाप्रकृतितया तदर्थान्वितस्वार्थबोधकतायास्तदानुपपत्तेश्च, समासोत्तरं बहुवचनोपगमे च समासान्तर्गतसकलपदानामेव समासोत्तरविभक्तिप्रकृतितया सामञ्जस्यात्'। वस्तुतस्तु नैष्यत एवैकशेष उक्तव्युत्पत्तेप्रामाणिकत्वात् सति तात्पर्ये सकृदनुसंहितादप्येकपदाद् युगपदनेकार्थबोधस्येष्टत्वादिति। 'अन्यत्र' नीलघटयोरभेद इत्यादौ, अत्र पदार्थतावच्छेदकगतमेव द्वित्वादिकं द्विवचनादिना प्रत्याय्यते साधुत्वार्थकमेव वा द्विवचनादिकम्, उर्वश्यप्सरस इत्यादौ बहुवचनवत् तत्रापि प्रकृत्यर्थगतगुणादिकमादाय बहुत्वबोधकत्वमिति तु न युक्तम्, गुणादेरप्रकृत्यर्थत्वात् तत्साधारणबहुत्वबोधोपगमेऽतिप्रसङ्गात्, अजहत्स्वार्थलक्षणया गुणादीनामपि प्रकृत्यर्थत्वोपगमे मुख्यार्थपरपदोत्तरबहुवचनस्य पदसाधुत्वमात्रार्थतायामविवादादित्यलमप्रस्तुतानल्पजल्पनेन। नन्वेकधर्मिबोधकपदयोरपि द्वन्द्वोपगमे द्वन्द्वस्य कर्मधारयभेदानुपपत्ति, तादृशपदद्वयसमासस्यैव कर्मधारयत्वात् इत्यत आह पदार्थेति। तथा च वस्तुतोऽभिन्नधर्मिबोधकपदद्वयकसमासत्वं न कर्मधारयलक्षणमपि तु एकपदार्थेऽपरपदार्थाभेदबोधकसमासत्वमेवेति भाव। 'भेदाभेदोदासीनत्वम्' भेदाभेदज्ञानाविषयत्वम्, भिन्नतयाऽभिन्नतया वाऽभासमानत्वमेवेति भाव। भेदोपादानं दृष्टान्तविषया अभेदभानव्यवच्छेदेनैव कर्मधारयविशेषोपपत्ते, कर्मधारयस्थलेऽभेद इव इतरेतरद्वन्द्वस्थलेऽपि पदार्थस्य तत्तावच्छेदकस्य वा भेदो यथायोगं भासत इति भ्रमनिराकरणाय वा तदुपादानम्। आस्तां वा पदार्थभेदेनैव द्वन्द्व, तथापि तत्प्रत्ययान्तेन विशिष्टान्तस्य द्वन्द्वोपगमादुक्तार्थतासम्भव इत्याशयेनाह विशिष्टपदस्येति। भावप्रत्ययान्तोपगमेनेति शेष।

¹ न च कृतद्वन्द्वानामेव शेषोपगमे पादौ मम वा इत्यादौ "द्वन्द्वश्च प्राणितूर्य" तेनाङ्गानां द्वन्द्वस्यैव" इत्यादिसूत्रैरेकवद्भावप्रसक्त्या बहुवचनानुपपत्तिरिति वाच्यम्। तत्र सूत्रे द्वन्द्वपदस्य एकशेषाविषयो यो द्वन्द्वस्तत्परत्वोपगमात्। इति २ पुस्तके अधिक पाठ।

केचित्तु व्याप्तिविशिष्टपदपक्षधर्मपदयोर्द्वन्द्वे पक्षधर्मपदस्याल्पाच्त्वेन पूर्वनिपातापत्तिरत पक्षधर्मतापदेन द्वन्द्वमाहेत्यवतारयन्ति। 'धर्मपरतया' वैशिष्ट्यपरतया, 'ज्ञानजन्ये' अनुव्यवसायादौ। अतिप्रसङ्ग इति। तादृशसमूहालम्बनस्यापि व्याप्तिवैशिष्ट्यपक्षधर्मत्वोभयावगाहिताया अक्षतत्वादिति भाव। इदं च यथाश्रुताभिप्रायेण तत्त्वेन जनकताविवक्षणे त्वसम्भवो बोध्य। अनुमित्यजनकोपदर्शितसमूहालम्बनसाधारणस्य तदुभयावगाहिज्ञानत्वस्य तज्जनकतानवच्छेदकत्वात्। एकेति। एकधर्मिविषयकत्वावच्छेदेनेत्यर्थ। तथा च व्याप्तिवैशिष्ट्यावगाहितावच्छेदकविषयिता निरूपकधर्मिविषयिताकत्वावच्छेदेन पक्षधर्मत्वावगाहित्वं पर्यवसितम्। एतादृशार्थस्य लक्षणवाक्ये एवेति पदपूरणादिना लाभो बोध्य।

(दी०) तदप्यसत्। एवमपि धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीति ज्ञानजन्येऽतिप्रसङ्गात्। एकरूपेण तदुभयावगाहित्वस्योक्तौ च मीमांसकमतानुप्रवेशात्। मिथस्तदुभयोपश्लेषावगाहित्वस्य च परामर्शाव्यापकत्वात्। न च तदुभयविषयत्वनियतधर्मावच्छिन्नकारणताप्रतियोगिककार्यताशालित्वमर्थं, पक्षधर्मतापदोपादानवैयर्थ्यात्।

(गा०) एवमपि' एकत्रोभयावगाहिताविवक्षणेऽपि, ननु एकधर्मावच्छिन्नधर्मिण्युभयावगाहित्वविवक्षणात्र धूमो वह्निव्याप्यो द्रव्य पर्वतवृत्तीति ज्ञानजन्येऽतिप्रसङ्ग इत्यत आह एकरूपेणेति। मीमांसकमतानुप्रवेशादिति। मीमांसकैर्यथा वह्निव्याप्यवानयमित्यादिव्याप्यतावच्छेदकरूपानवगाहिपरामर्शादनुमितिरपलप्यते धूमो वह्निव्याप्यो धूमवान् पर्वत इत्यादिसमूहालम्बनाच्चानुमितिरभ्युपेयते तेषामेकरूपेण व्याप्तिपक्षधर्मताज्ञानस्यानुमितिहेतुत्वात् तथोक्तरीत्या लक्षणं व्याचक्षाणेनापि तत्र तत्रानुमितिरपलपनीया स्वीकार्या च अन्यथाऽव्याप्त्यतिव्याप्त्यो प्रसक्तादित्यर्थ। तथा च विशिष्टपरामर्शत्वेनानुमितिहेतुतायदिना नैयायिकाना नोक्तरूपावच्छिन्नकारणताया लक्षणे प्रवेशसम्भव इति न्यायमतेऽव्याप्त्यादिदाप आवश्यक एवेति भाव।

यद्यपि धर्मिनिरूपितैकविषयितावच्छिन्नतदुभयविषयिताविवक्षणे न समूहालम्बनजन्येऽतिप्रसङ्ग न वा व्याप्यतावच्छेदकानवगाहिपरामर्शजन्यानुमित्यसंग्रह, तथापि व्याप्तिपक्षधर्मत्वाप्रसिद्धिस्थलेऽव्याप्तिरेवेतत्कल्पेनादोजमित्यवधेयम्। ननु परस्परोपश्लेषेणोभयावगाहित्वविवक्षणान्न समूहालम्बनजन्येऽतिप्रसङ्ग, तच्चेतरसम्बन्धविषयकत्वावच्छेदेनापरावगाहित्वं सम्बन्ध सामानाधिकरण्यमित्यत आह मिथ इति। परामर्शाव्यापकत्वादिति। सम्बन्धावगाहिताया विशिष्टबुद्धावप्रामाणिकतया व्याप्तिवैशिष्ट्यावच्छेदकप्रकार-

परामर्शस्य तत्सामानाधिकरण्यानवगाहित्वादिति भाव । यद्यप्युभयसामानाधिकरण्यावगाहितया परामर्शाव्यापकत्वस्य प्रागेवाभिहितत्वादिदानीम् उक्तशङ्का नावतरितुमर्हति, तथापि पूर्वमुपाध्यायमते भ्रान्तानुमित्यव्याप्तेरेव निर्भरस्य कृतत्वात् सम्बन्धसम्बन्ध्यवगाहित्वाभ्युपगमेन शङ्कासम्भवो बोध्य । परामर्शाव्यापकत्वादित्युपलक्षणम् । उक्तार्थस्य लक्षणवाक्यादलाभेऽपि दोषो बोध्य , उभयविषयकत्वविशिष्टस्य निरूपितत्वेन जन्यतायाम न्वयो विवक्षित , इत्युभयविषयकत्वस्य जनकतावच्छेदककोटिप्रविष्टत्वस्य लाभान्नानुव्यवसायादावतिव्याप्तिरिति शङ्कते न चेति । तदुभयविषयकत्वे तद्विशिष्टज्ञानत्वे चाऽवच्छेदकत्वपर्याप्तिनिवेशेऽसम्भव संशयान्यत्वादे रधिकस्यानुमितिजनकतावच्छेदककुक्षिनिवेशात्तत्पर्याप्त्यनिवेशसूचनाय घटितार्थकं नियतपदम् । एतेनोभयविषयकत्वनियतत्वं यदि तद्व्यापकत्वं तदा व्याप्तिवैशिष्ट्यविषयकत्वपक्षधर्मत्वविषयकत्वोभयाभाववद्वृत्तित्वरूपाया उभयविषयकत्वव्याप्तेः केवलव्याप्तिवैशिष्ट्यविषयकत्वाभाववद्वृत्तित्वाघटितस्योभयत्वावच्छिन्नाभावस्य निवेशाद्व्याप्तिपक्षधर्मताशवैयर्थ्यप्रदर्शनासङ्गति , यदि च ज्ञानत्वस्य तदुभयाभाववद्वृत्तितया विशेषणान्तरविशिष्टज्ञानत्वरूपपरामर्शत्वे तदभावो दुर्घट इति स्वव्यापकतत्कत्वरूपव्याप्तिरेव निवेशनीयेत्युच्यते, तदाप्युभयत्वावच्छिन्नविशेषणतया व्यापकताया प्रवेशे व्याप्तिवैशिष्ट्यविषयकत्वत्वावच्छिन्नविशेषणतया तदप्रवेशाद्वैयर्थ्यं दुर्वारमेव । एवमुभयविषयकत्वनियतकारणतानिवेशेनापि उपपत्तेस्तन्नियतधर्मावच्छिन्नत्वनिवेशनमप्यफलं नियतत्वांशस्य लक्षणवाक्यादनुपस्थित्या तद्घटितलक्षणालाभश्चेति दूषणमप्यपास्तम् । एवं केषाञ्चिदुभयविषयकत्वव्याप्यतद्व्यक्तित्वावच्छिन्नविषयादिकारणतामादाय परामर्शानुव्यवसायादावतिव्याप्तिवारणायानेकवृत्तित्वं विषयिताघटितधर्मावच्छिन्नत्वं वा कारणतायामधिकं निवेश्यमित्यप्यनुपादेयमेव । यत्राङ्कुरविशेषसाध्यकस्थले एक एव परामर्शस्तत्रानेकवृत्तित्वस्य उभयविषयकत्वावच्छिन्नत्वस्य च कारणताविशेषणत्वेऽव्याप्तिरेव परामर्शे च तद्व्यक्तित्वेनैव हेतुत्वात् । न च योगिनां तद्विषयकज्ञानस्यावश्यं सत्त्वात् तत्साधारणतद्विषयकत्वेन हेतुत्वं कल्पनीयं तच्चोभयवृत्त्यपीति वाच्यम् , यत्र भ्रमरूप एव तादृशपरामर्शस्तत्र तद्व्यक्तित्वेन हेतुत्वादव्याप्तेर्दुर्वारत्वादिति तत्र ज्ञातिघटितलक्षणमेव शरणीयम् । पक्षधर्मताविषयकत्वमात्रनियतधर्मावच्छिन्नकारणताप्रवेशे साधारणधर्मवत्ताज्ञानजन्यतामादाय संशये प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानजन्यतामादाय च धूमवत्पर्वतो नास्तीत्यभावप्रत्यक्षे धूमवत्पर्वतवान् धूमवत्पर्वता घटवानित्यादिविशिष्टवैशिष्ट्यबोधे चातिव्याप्तेर्व्याप्तिवैशिष्ट्यविषयकत्वोपादानमावश्यकमित्याशयेन पक्षधर्मतांशवैयर्थ्यमाह पक्षेति । न च व्याप्तिवै

शिष्ट्यविषयकत्वनियतधर्मावच्छिन्नकारणताप्रवेशे वह्निव्याप्यो धूमो द्रव्यं न वेत्याकारकसंशये व्याप्तिविषयकधर्मिज्ञानजन्यतामादायातिप्रसङ्ग इति वाच्यम्, पक्षधर्मतापदोपादानेऽपि तद्दोषतादवस्थ्यात् तादृशधर्मिज्ञानादेरपि धर्मिवृत्तित्वावगाहित्वात्। न च स्वधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नवृत्तित्वावगाहित्वनिवेशान्न दोष इति वाच्यम्, तादृशसंशयधर्मितावच्छेदकावच्छिन्ने कोटिद्वयसहचरितधर्मवत्ताज्ञानस्य तथात्वाद् व्याप्तिविषयकत्वाच्च तज्जन्यतामादायातिप्रसङ्गस्य दुर्वारत्वात्।

न च तादृशदोषवारणाय विशेषणान्तरप्रक्षेप आवश्यकः, तथा च व्याप्तिवैशिष्ट्यविषयकत्वघटितलक्षणे व्याप्यविषयकत्वस्य चरमज्ञाने व्याप्यविषयकज्ञानवृत्तित्वस्य जन्यतायां वा निवेशेनैव पक्षधर्मताघटितलक्षणेऽपि यदंशे पक्षधर्मतावगाहिज्ञानं जनकं तदंशे पक्षधर्मतानवगाहित्वस्य चरमज्ञाने, तदनवगाहिज्ञानवृत्तित्वस्य जन्यतायां वा निवेशेन प्रतीकारः सम्भवति, धूमवत्पर्वतो नास्तीत्याद्यभावप्रत्यक्षादौ धूमाद्यंशे पक्षधर्मताज्ञानत्वेन जनकत्वेऽपि तादृशप्रत्यक्षादेरपि तदंशे पक्षधर्मत्वावगाहित्वात् साधारणधर्माद्यंशे पक्षधर्मत्वावगाहिज्ञानजन्ये संशयेऽपि सामग्रीवशेन साधारणादिधर्मांशे पक्षधर्मताभानात्प्रत्यक्षे उपस्थितवस्तुभानसामग्र्या नियतत्वात् चरमज्ञानपदस्य निश्चयपरत्वाद् वा संशयत्वस्यार्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वमते च न संशयातिव्याप्तिरित्येकतरोपादानवैयर्थ्यादित्यभिधानमेवोचितमिति वाच्यम्, एवमपि सादृश्यांशे स्वविषयधर्मिवृत्तिताज्ञानजन्यायां तत्र तदनवगाहिन्यामुपमितावतिव्याप्तेर्दुर्वारत्वात्। ननु व्याप्तिवैशिष्ट्यघटितलक्षणेऽपि वह्निव्याप्यधूमवत्पर्वतसदृशं महानसमित्यतिदेशवाक्यार्थज्ञानजन्यायामुपमितावतिव्याप्तिर्दुर्वारैवेति चेन्न, एतादृशातिव्याप्तेरुभयपददानेऽपि सत्त्वात्केवलपक्षधर्मताघटितलक्षणे धूमवत्पर्वतसदृशं महानसमिति ज्ञानजन्योपमितावतिव्याप्तेर्दुर्वारत्वात्तदुपेक्षितम्।

केचित्तु साधारणज्ञानजन्यतामादाय संशयातिव्याप्तिवारणमेव पक्षधर्मताघटितलक्षणोपेक्षाबीजमित्याहुः। एतन्मते व्याप्तिवैशिष्ट्यघटितलक्षणेऽपि वह्नितदभावोभयसहचरितधर्मव्याप्यधूमवान् पर्वत इति ज्ञानजन्यसंशयेऽतिव्याप्तिर्दुर्वारैवेति बोध्यम्।

मिश्राद्युक्तं ज्ञानान्तकर्मधारयपक्षमवलम्ब्य समाधातुमुपक्रमते व्याप्तिविशिष्टमिति।

(दी०) व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमिति तु स्यात्। यद्यप्यत्रापीन्धनसमानाधिकरणात्यन्ताभावप्रतियोगि-

तानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणेन्धनवानित्यादिपरामर्शजन्येऽव्याप्तिरखण्डव्याप्तेरप्रसिद्धेः, भ्रमानुमितेर्लक्ष्यत्वे चानाकाशमात्मन इत्यादौ सुतरां तथा, तथापि वाक्यपदार्थानां तथाविधपरस्परोपश्लेषानवगाहित्वं निरस्तितम् । न च व्यतिरेकिण्यव्याप्तिः, व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात् ॥

(गा०) व्याप्तिविशिष्टत्वं यदि व्याप्त्याश्रयत्वं तदाऽनुमितिजनकज्ञानमात्रस्य न तथात्वमपि तु लिङ्गस्यैवेत्यसङ्गतिरतस्तद्व्याचष्टे व्याप्तिप्रकारकेति । व्याप्तिविशिष्टपदेन प्रकारितारूपवैशिष्ट्यस्य व्याप्तिपदेन वा लक्षणया व्याप्तिप्रकारिताया विवक्षितत्वादिति भावः । नन्वेवं व्याप्तेः पक्षधर्मताया वा भ्रमजन्यानुमितावव्याप्तिपरीहारेऽपि धूमो वह्निव्याप्यो द्रव्यवान् पर्वत इत्यादिज्ञानजन्येऽतिव्याप्तिर्दुर्वारैव ।

अथ व्याप्तिप्रकारकत्वपक्षधर्मताविषयतयोरवच्छेद्यावच्छेदकभावविवक्षणान्नायं दोषः विशृङ्खलरीत्या भासमानपदार्थविषयतयोरवच्छेद्यावच्छेदकभावविरहात्, पक्षधर्मताविषयताकत्वावच्छिन्ने ज्ञानरूपोद्देश्ये व्याप्तिप्रकारकत्वस्य विधेयतया तयोरवच्छेद्यावच्छेदकभावलाभोऽपि व्युत्पत्तिसिद्ध एवेति चेत्, एवमपि वह्निव्याप्यकालीनधर्मवानित्यादिज्ञानव्यावर्तनमशक्यम्, येन सम्बन्धेन यस्य प्रकारता तत्सम्बन्धविषयकत्वेनैव तत्प्रकारकत्वस्यावच्छेद्यावच्छेदकभावोपगमे पक्षानुयोगिकसम्बन्धस्यानुमितिजनकज्ञाने व्याप्यस्यैव सम्बन्धतया भानात् तद्विषयकत्वेन व्याप्यप्रकारकत्वस्यैवावच्छेद्यावच्छेदकभावः स्यात्, न तु व्याप्तिप्रकारकत्वस्येत्यसम्भव एव । एवं यत्र अन्यानुयोगिक एव सम्बन्धो व्याप्यस्य पक्षांशे भातस्तादृशभ्रमजन्यानुमितावव्याप्तिरपि दुर्वारा तादृशभ्रमे वास्तवपक्षानुयोगिकसम्बन्धस्य पक्षधर्मतापदार्थस्याभानात् पक्षांशे हेतुतावच्छेदकसम्बन्धेन हेतुप्रकारकज्ञानपर्यन्तं च पक्षधर्मताया ज्ञानमिति समासेनाशक्यप्रतिपादनमिति न तस्य पक्षधर्मताज्ञानशब्दार्थता । शब्दव्युत्पत्त्यनादरे चालं समासविशेषमादृत्य व्याख्ययेति ।

अत्राहुः—पक्षे धर्मतया हेतुतावच्छेदकसम्बन्धेन ज्ञानमिति तृतीयासमासगर्भसप्तमीसमासादरात् पक्षविशेष्यकत्वावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारताकत्वविशिष्टज्ञानं पक्षधर्मताज्ञानपदार्थः । पक्षधर्मतयेत्यत्र तृतीयाया एवावच्छिन्नप्रकारतावत्त्वार्थकत्वात् तत्र व्याप्तिप्रकारताकत्वान्वये च हेतुनिष्ठनिरुक्तप्रकारकत्वावच्छिन्नव्याप्तिप्रकारकत्ववज्ज्ञानलाभः । व्याप्तिहेत्वोः साक्षाद्विशेष्यविशेषणभावेन तद्विषयकत्वयोरनुमितिजनकपरामर्शेऽव

च्छेद्यावच्छेदकभावोऽक्षत एवेति सर्वत्रानुमितौ लक्षणसमन्वयः। एवमपि व्याप्तिपदप्रतिपाद्यविशिष्टार्थाप्रसिद्धिस्थलेऽव्याप्तिरित्याशङ्कते यद्यपीति। वह्नि-व्याप्येन्धनवानित्याकारकज्ञानविषयसाध्याभाववद्वृत्तित्वाभावरूपव्याप्तिरपि हेत्वन्तरे प्रसिद्धैवातो हेतुसमानाधिकरणेत्यादिव्याप्तेर्विशेषणान्देनोल्लेखः। अखण्डेत्यनेन व्याप्तिघटकहेत्वादिपदार्थानां खण्डशः प्रसिद्धिमात्रमिति सूचितं तावतैव समाधानमप्युपपत्स्यत इत्यपि। अत्र व्याप्त्यप्रसिद्धिः साध्यतावच्छेदके स्वविशेषणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदक-त्वासत्त्वेन। अत्र हेतुव्यापकतावच्छेदकत्वस्येन्धनत्वादौ वह्नित्वावच्छिन्न-सामानाधिकरण्यस्य प्रकृतहेतावपि प्रसिद्ध्या व्याप्तिविशिष्टेत्यनेन साध्यता-वच्छेदके प्रकृतहेतुव्यापकतावच्छेदकत्वावगाहित्वे सति प्रकृतहेतौ साध्य-तावच्छेदकावच्छिन्नसामानाधिकरण्यावगाहित्वविवक्षया न दोष इत्यतो व्यापकत्वादिघटकपदार्थानामपि खण्डशो निवेशाय अनुक्तिमाप्यहेतुकस्य-लेऽव्याप्तिं शङ्कते भ्रमानुमितेरिति। भ्रमस्य पूर्ववदलक्ष्यत्वसम्भवादुक्तं लक्ष्ये-वेति। भावसाध्यकानुमितौ साध्यस्य नियमतो विशेषणतया इदमाकाशव-दित्याकारिकैवानुमितिर्बोध्या, प्रतिज्ञाजन्यबोधस्यानुमितिसमानप्रकारकत्वा-द्यनियमेन शब्दलाघवाय भ्रमात्मकमा मत इत्युक्तम्। 'सुतरां' हेतुव्यापकत्व-साध्यसामानाधिकरण्ययोः खण्डश उपादानेऽपि, 'तथा' अव्याप्तिः, हेत्व-धिकरणसाध्याधिकरणयोरप्रसिद्ध्या हेतुव्यापकत्वसाध्यसामानाधिकरण्ययो-रप्यखण्डयोरप्रसिद्धेरिति भावः। अत्र भ्रमानुमितेरलक्ष्यत्वेऽपि वास्तवव्या-पकत्वावगाहित्वनिवेशे धूमवत्त्वादिना पदार्थान्तरावगाहिधूमव्यापकवह्निस-मानाधिकरणधूमवानयमित्यादिज्ञानजन्यायां प्रमानुमितावव्याप्तिः धूमाधिक-रणाद्यनवगाहनेन तादृशज्ञानस्य वास्तवधूमाधिकरणादिघटितव्यापकत्वाद्य-नवगाहित्वादिति तु न शङ्क्यम्, तथा सति तादृशभ्रमजन्यानुमितावपि प्रमात्मकस्य वह्निव्याप्यधूमवान् पर्वत इत्याकारकवास्तवव्यापकत्वाद्यवगा-हिपरामर्शस्य स्वरूपयोग्यतया लक्षणगमनसम्भवात्। इदं च जात्यघटित-यथाश्रुतलक्षणाभिप्रायेण जातिघटितनिष्कृष्टलक्षणस्य प्रमारूपपरामर्शजन्या-नुमितिवृत्तिजातिमादाय सर्वत्र लक्षणसमन्वयात्। न च परामर्शानुव्यव-सायादावतिव्याप्तिवारणाय व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वावच्छिन्नजनक-तानिरूपितजन्यतया विवक्षणीयतया धूमादिलिङ्गकपरामर्शस्यापि उक्तभ्र-मसाधारण्याय व्याप्त्यादिघटकनावत्पदार्थानां परस्परोपश्लेषावगाहिनिश्चय-त्वेन जनकत्वस्योपगन्तव्यत्वाद् न वास्तवव्याप्त्याद्यवगाहिताघटितलक्षण-समन्वय इति वाच्यम्, सर्वत्र विषये भ्रमस्य भ्रमजन्यानुमितेश्चाप्रामा-णिकतया यत्साध्यलिङ्गपक्षकपरामर्शः अनुमितिजनकपरामर्शो वा प्रमारूप

एव तत्साध्यपक्षलिङ्गकानुमितौ लाघवेन व्याप्तिघटकतत्तत्पदार्थान् खण्डशोऽनिवेश्य विशिष्टव्याप्त्यादेरेव विषयितयाऽनुमितिजनकतावच्छेदकत्वोपगमात् तादृशजनकताघटितजातिघटितलक्षणस्य व्याप्तिपदार्थघटितस्य निष्प्रत्यूहत्वात्। न च प्रमेयत्वकेवलसामानाधिकरण्यत्वादिना व्याप्त्याद्यवगाहिज्ञानवारणाय तादृशानुमितिजनकतायामपि हेत्वादिपदार्थानां परस्परोपश्लेषावगाहित्वमेवावच्छेदकमुपगन्तव्यमिति वाच्यम्, प्रमेयत्वाद्यवच्छिन्ननिरूपितविषयितायाः अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणहेत्वादिसाध्यसामानाधिकरण्यान्तपदार्थस्तोमघटितविशिष्टपदार्थप्रतियोगिकसम्बन्धत्वविरहेण विषयितासम्बन्धेन तादृशविशिष्टविषयस्य प्रमेयत्वादिना व्याप्त्याद्यवगाहिज्ञानयावर्तकतया ततोऽनुमित्यप्रसङ्गात्, स्वरूपतो येषां व्याप्तिघटकता रूपान्तरेण तदवगाहितावत्पदार्थस्तोमात्मकव्याप्तिज्ञानवारणाय स्वरूपतस्तत्प्रकारकत्वनिवेशनस्यावश्यकत्वात् विशिष्टव्याप्तिनिवेशसम्भव इत्यपि न वाच्यं विशेषणानवच्छिन्नतत्तत्पदार्थघटितविशिष्टनिरूपितविलक्षणविषयितायाः एव विषयितात्वेन जनकतावच्छेदकतापर्याप्त्यधिकरणतादृशविशिष्टविषयसम्बन्धतया तादृशविषयेणोक्तज्ञानव्यावृत्तेः। अत एव दीधितिकारोऽपि परामर्शग्रन्थे अन्यथाख्यात्यनभ्युपगन्तृमते व्यापकतावच्छेदकपदार्थानां खण्डशः परस्परोपश्लेषानवगाहित्वमनिवेश्यापि विशिष्टविषयपुरस्कारेण व्यापकतावच्छेदकहेतुता सम्भवतीति अवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमतिरिच्यत इत्यनेन दर्शयिष्यति। विशिष्टविषयस्य प्रमामात्रनिष्ठजनकतावच्छेदकत्वाभिप्रायेणैव च व्याप्त्यादिप्रकारकत्वमनभिदधानो वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नकारणतेत्यादिना जातिघटितलक्षणमभिधास्यते तत्र च वह्न्यादिपदं दर्शितसाध्यविशेषपरमित्यलं पल्लवितेन। तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमिति। साधनाधिकरणादिपदार्थानाम् अधिकरणाधेयत्वादिपदार्थांशे तत्तत्सम्बन्धावगाहित्वमित्यर्थः। तत्तदंशे तेन सम्बन्धेन तत्तत्प्रकारकत्वमिति यावत्, तेनात्मादीनां समवायसम्बन्धाप्रसिद्धावपि नोक्तभ्रमानुमित्यसंग्रहः, हेत्वादिप्रकारताऽपि हेतुतावच्छेदकावच्छिन्नत्वेनैव निवेश्या अतो धूमत्वादिना धूलीपटलादिभ्रमसङ्ग्रहः। यद्यप्येवमपि अधिकरणं धूमवद्वृत्तिरधिकरणीयेत्यादिविशृङ्खलरीत्या तावत्पदार्थराशिमवगाहमाना धीर्न व्यावृत्ता, तथापि धूमादिप्रकारतानिरूपितविशेष्यतावच्छिन्ना या अधिकरणप्रकारता तन्निरूपितविशेष्यतावच्छिन्ना या वृत्तित्वप्रकारता इत्यादिरीत्या साध्याधिकरणवृत्तित्वप्रकारतापर्यन्तनिवेशात्तद्व्यावृत्तिः, उक्तसमूहालम्बनतो विशिष्टप्रकारकधियो वैलक्षण्याय तत्रान्तराभासमानाधिकरणादिपदार्थ

विशेषणनिरूपितविशेष्यत्वविशेष्यान्तरनिरूपितप्रकारत्वयोरवच्छेद्यावच्छेदकभावोपगमात् ।

केचित्तु एकविशेष्यतापदस्य यत्रापरांशे प्रकारता तत्र तन्निष्ठप्रकारताविशेष्यत्वयोरभेद एव, तथा च धूमादिप्रकारतानिरूपिता या अधिकरणप्रकारता तन्निरूपिता या वृत्तित्वप्रकारता एवं रीत्यैव निवेशः, एवं च एकपदार्थनिष्ठावच्छेद्यावच्छेदकभावापन्नविषयताद्वयनिवेशापेक्षया एकविषयतां निवेश्य कारणतावच्छेदकनिर्वचने लाघवमित्यपि वदन्ति ।

तच्चिन्त्यं, तथा सति रक्तदण्डवत्पुरुषवानयमित्यादिज्ञानानां पुरुषादिप्रकारतानिरूपितदण्डादिविशेष्यताकत्वेन पुरुषाभाववान् दण्ड इत्यादिनिश्चयप्रतिबध्यतापसङ्गात् तत्र गत्यन्तरानुसरणे गौरवादिति । इदं तु बोध्यं व्याप्तिघटकसाधनतावच्छेदकादिसकलपदार्थानां विषयताविशेषणत्वेन खण्डशो निवेशो न सर्वत्र । जात्यघटितलक्षणस्य साध्यादिभेदेन भिन्नत्वात् सल्लिङ्गजायां कूटलिङ्गजायां वा यल्लिङ्गकयत्साध्यकानुमितौ व्यापकताघटकसाधनतावच्छेदकमारभ्य यद्विशेषणपर्यन्तांशे प्रमात्मक एव परामर्शो हेतुस्तद्विशेषणविशिष्टपर्यन्तविषयस्य विशिष्टत्वेनैव विषयिताविशेषणतया कारणतावच्छेदकताया लाघवेनोचितत्वात् । सकलपदार्थविषयितानां कारणतानवच्छेदकतया तद्घटितधर्मावच्छिन्नकारणताया लक्षणे निवेशासम्भवात्, तथा च तादृशविशिष्टविषयिताघटितधर्मावच्छिन्नकारणताघटितमेव लक्षणम्, यत्र च व्यापकताघटकसाधनतावच्छेदकांशे भ्रमादप्यनुमितिस्तत्रैव च सकलपदार्थानां खण्डशो निवेश इति । मूलस्थव्याप्तिपदमपि लक्षणया निरुक्तप्रकारताविशेषपरं निरूपकत्वमेव च तद्वैशिष्ट्यमतो नोपदर्शितस्थले व्याप्तिपदार्थघटितलक्षणासङ्गतिः ।

केचित्तु इत आरभ्य यथाश्रुतशब्दार्थपरित्याग एवारब्धः, विवक्षणीयस्य व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वावच्छिन्नजनकताकत्वस्य मूलस्थशब्दव्युत्पत्त्यलभ्यतया तत्परित्यागस्याग्रे आवश्यकत्वात् । न च ज्ञानपदस्य लक्षणया निश्चयत्वावच्छिन्नरूपविशेषपरतया निश्चयत्वावच्छिन्नलाभः । निश्चयत्वेन ज्ञानलाभेऽपि निश्चयत्वावच्छिन्नजनकताया अलाभात् । यदि च विशिष्टवैशिष्ट्यविवक्षया तादृशनिश्चयत्वविशिष्टनिरूपितजन्यतालाभेन सामञ्जस्यादित्युच्यते, तथापि ज्ञानविशेषणतया व्याप्तिप्रकारकत्वादीनामेव लाघवेन जनकतावच्छेदकत्वादभेदसम्बन्धेन व्याप्तिप्रकारकादेरेव च ज्ञानविशेषणतया मूलोक्तशब्दतो लाभेन विवक्षणीयालाभादित्याहुः ।

जात्यघटितयथाश्रुतलक्षणे व्यतिरेकिलिङ्गकानुमिताव्याप्तिमाशङ्कते न चेत्यादिना । अव्याप्तिरिति । व्यतिरेकिणि चिन्तामणिकारमते व्यतिरेकव्या-

व्यापकाभावस्यैव गमकतया तत्रोक्तव्याप्तिप्रकारेण हेतुमत्ताज्ञानस्य अनुमितिजनकत्वादिति भावः । साध्याभावव्यापकाभावप्रतियोगित्वप्रकारकहेतुमत्ताज्ञानस्य विनक्ष्यते चान्वयिन्यपि सिद्धिर्न स्यात् । व्यभिचारधीर्न । साध्याभाववत्त्वितरत्वप्रतिबन्धकतावच्छेदकविषयतात्वेन धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वावच्छिन्नाद्यभावव्यापकतावच्छेदकानुयोगितानिरूपितप्रतियोगितावच्छेदकधूमत्वविषयत्वेऽननुगमस्य तादृशविषयताशालिपक्षधर्मतानिश्चयस्य निवेशनीयत्वादित्यर्थः । यथाश्रुतविषयाननुगमो नादरणीय भ्रमासंग्रहात्, रूपान्तरेण व्याप्तिविषयकज्ञानजन्येऽतिप्रसङ्गात् प्रतिबन्धकतावच्छेदकविषयताशालिज्ञानस्य तादृशविषयतावद्विषयकत्वेन निवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वाच्च । व्याप्त्यवच्छिन्नहेतुविषयतैव वा व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वेन निवेशनीया, तत्प्रतिबन्धकत्वेन पक्षधर्मताज्ञानमेव न कथं निवेश्यत इति चेन्न, तथा सति वह्निव्याप्यो धूमोऽव्यवान् पर्वत इति ज्ञानाव्यावृत्ते प्रतिबन्धकतावच्छेदकविषयतानिरूपितविशेष्यतावच्छिन्ना या हेतुविषयता तन्निरूपितपक्षविषयताशालित्वेन प्रतिबन्धकतावच्छेदकहेतुविषयतावच्छिन्नतत्प्रकारतानिरूपितपक्षविषयताशालित्वेन वा ज्ञाननिवेशस्यावश्यकत्वात् ।

अत्र व्यापकताज्ञानस्य कथञ्चिद्व्यभिचारधीविरोधित्वेऽपि साध्याभावव्यापकाभावप्रतियोगित्वज्ञानस्य तद्विरोधित्वे मानाभाव ग्राह्याभावावगाहित्वात्, हेत्वभावप्रतियोगिकाभावत्वेन हेतौ साध्याभावसामानाधिकरण्यावगाहिना हेत्वभावे साध्याभावसमानाधिकरणाभावप्रतियोगित्वमवगाहमाना धियं हेत्वभावे साध्याभावसमानाधिकरणाभावाप्रतियोगित्वरूपसाध्याभावव्यापकत्वज्ञानस्य विरोधित्वेऽपि हेतुतावच्छेदकरूपेण हेतौ साध्याभावसामानाधिकरण्यधियं प्रति तस्यातथात्वात्, हेत्वभावाभावत्वेन हेतुधर्मिकव्यभिचारधीनिवेशे च हेतुव्यापकसाध्यसामानाधिकरण्यज्ञानासंग्रह, हेत्वभावाभावत्वेन हेतुविषयकतत्समानाधिकरणाभावप्रतियोगित्वग्रहे तेनैव तद्विषयकतत्समानाधिकरणाभावाप्रतियोगित्वज्ञानस्य प्रतिबन्धकत्वादित्याशङ्कां मणिमन्त्रादिन्यायेन एकविधव्यभिचारधियं प्रति उभयज्ञानस्य प्रतिबन्धकत्वव्यवस्थापकं तत्सत्त्वे फलानुत्पादनियममाह भवति हीति ॥

(टी०) भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावाप्रतियोगित्वे वा गृहीते नियमतो वह्निव्यभिचारधीप्रतिरोधः । तथाविधधूमसमानाधिकरणत्वादिकं तु न तथा । रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात् । व्यतिरे-

कसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा । न च भ्रमसंशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य हेतुतामते तत्रातिव्याप्तिः, तथाविधनिश्चयत्वेन हेतुताया विवक्षितत्वात् । विशेषदर्शनस्य च भ्रमादिविरोधित्वेन तत्त्वमित्युक्तत्वात् ॥

(गा०) रासभादौ धूमव्यापकवह्निसामानाधिकरण्यग्रहेऽपि वह्निव्यभिचारग्रहाद्वह्निसमानाधिकरणधूमत्वग्रहानुधावनम् । 'वह्निव्यभिचारधीप्रतिरोध.' तद्ग्रहसमानधर्मिकव्यभिचारज्ञानानुत्पादः । नन्वत्र प्रतिबन्धकतावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः, व्यापकसामानाधिकरण्यघटकसामानाधिकरण्यांशस्य व्यभिचाराविघटकतया व्यापकताविषयकत्वस्यैव तद्धियो व्यभिचारधीविरोधिताबीजत्वात्, सामानाधिकरण्यविषयतायाः प्रतिबन्धकतावच्छेदकशरीरेऽनन्तर्भावेन प्रतिबन्धकतावच्छेदकताया धूमव्यापकत्वविषयतावच्छिन्नवह्निविषयताया वा उपादेयतया तादृशविषयतया च समं पक्षविशेषणतापन्नहेतुविषयत्वादेर्निरूप्यनिरूपकभावविरहेण दर्शितरूपेण परामर्शनिवेशासम्भवात्, अतोऽत्र यादृशविषयताकनिश्चयत्वव्यापकं प्रतिबन्धकत्वं तादृशत्वमेव प्रतिबन्धकतावच्छेदकत्वं वाच्यम्, तथा च धूमव्यापकवह्निसमानाधिकरणधूमसामानाधिकरण्यादिविषयकनिश्चयत्वस्यापि धूमधर्मिकव्यभिचारधीप्रतिबन्धकताव्याप्यतया तद्विषयताया अपि तथात्वमक्षतमेवेति वह्निव्याप्यधूमसमानाधिकरणरासभवानिति ज्ञानजन्येऽतिप्रसङ्गः । न च पक्षविशेषणतया भासमानो यादृशो धर्मस्तादृशधर्मांशे व्यभिचारज्ञानमेव विवक्षितमतो नायं दोष इति वाच्यम्, तादृशरासभवान् धूमवांश्च पक्ष इति समूहालम्बनस्य तावताप्यवारणादित्याशङ्क्य पक्षविशेषणतापन्नहेतोर्यादृशविषयता प्रतिबन्धकतावच्छेदिका प्रतिबन्धकतावच्छेदकविषयतानिरूपिता वा स्वावच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकविषयतात्वेन तादृशप्रतिबन्धकतावच्छेदकविषयतानिरूपितत्वेन वा सैव निवेश्येत्याशयेन समाधत्ते तथाविधधूमेति । वह्निव्याप्यधूमसामानाधिकरण्याद्यवच्छिन्नरासभादिविषयत्वं तु 'न तथा' न स्वावच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वादिमदित्यर्थः । एवमपि धूमव्यापकवह्निसमानाधिकरणरासभसमानाधिकरणधूमवानित्यादिज्ञानाव्याप्तिरत आह व्यतिरेकेति ।

परे तु ननु वह्नित्वाद्यवच्छिन्नधर्मिकधूमत्वाद्यवच्छिन्नव्यापकताग्रहत्वेनैव धूमो वह्निव्यभिचारीत्यादिव्यभिचारज्ञानप्रतिबन्धकता लाघवात् आवश्यकत्वाच्च न तु धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तिज्ञानत्वेन

गौरवात् मानाभावाच्च। तथा च तादृशव्याप्तिविषयता न व्यभिचारग्रहप्रतिबन्धकतावच्छेदिका। अथ इदन्त्वाद्यवच्छिन्ने तादृशधूमत्वादिरूपव्याप्तिग्रहे तदवच्छिन्ने व्यभिचारग्रहानुदयात् समानधर्मिकव्यभिचारज्ञानं प्रति तादृशधूमत्वादिरूपव्याप्तिज्ञानत्वेनापि मणिमन्त्रादिवत्पृथक् प्रतिबन्धकता वाच्या, तथा च तादृशव्याप्तिविषयताया व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वमक्षतमेवेति। न च धर्मितावच्छेदकतानिरूपकविशेष्यतानिरूपकविरोधिप्रकारताया एव प्रतिबन्धकतावच्छेदकतया धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववत्त्वात् पक्ष इत्याकारकतादृशधूमत्वात्मकव्याप्त्यंशे निवेशितावच्छेदकत्वानीयतादृशव्याप्तिप्रकारताया व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वासम्भवात्तादृशपरामर्शासंग्रहः, प्रतिबन्धकतावच्छेदकीभूतप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रकारताशालिपक्षधर्मताज्ञाननिवेशे च धूमत्वादिना पदार्थान्तरावगाहिपरामर्शासंग्रहः, तादृशप्रकारतावच्छेदकतापर्याप्त्यधिकरणस्य वास्तवधूमादिघटितव्याप्तित्वस्य तादृशभ्रमप्रकारतानवच्छेदकत्वादिति वाच्यम्, धर्मिविशेष्यतानिष्ठव्यभिचारधीप्रतिबन्धकतावच्छेदकतायां निरूपितत्वसम्बन्धेन यत्प्रकारताया अवच्छेदकत्वं तदवच्छेदकतापर्याप्त्यधिकरणरूपाश्रयीभूतप्रकारताशालित्वेन सकलपरामर्शसंग्रहसम्भवादिति चेत्तर्हि, वह्निव्याप्यधूमसामानाधिकरण्यादिविषयत्वेन किमपराद्धं दर्शितव्याप्तिवत्तद्घटितधर्मान्तराणामपि व्यापकत्वघटितत्वाविशेषात्, किमपराद्धं वा धूमत्वाद्यसहितेन धूमव्यापकवह्निसामानाधिकरण्यत्वादिना, तत्तद्विषयिताया अपि व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वोपगमे वह्निव्याप्यधूमसमानाधिकरणरासभवानयं धूमव्यापकवह्निसमानाधिकरणरासभवानयमित्यादिज्ञानजन्येऽतिप्रसङ्गो दुर्वार इत्याशङ्क्य मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वान्तरकल्पनमप्यनुभवानुरोधेनैव, धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिरूपव्याप्यत्वग्रहे तद्धर्मितावच्छेदकावच्छिन्ने व्यभिचारधीर्नोत्पद्यत इति निर्विवादानुभवात्तद्ग्रहस्य समानधर्मितावच्छेदकव्यभिचारधीप्रतिबन्धकत्वमावश्यकम्, वह्निव्याप्यधूमसमानाधिकरणो रासभ इत्यादिज्ञानदशायां च रासभादौ वह्निव्यभिचारग्रहस्यैवानुभवाच्च तथाविधधूमसामानाधिकरण्यज्ञानत्वेनापि प्रतिबन्धकत्वान्तरमिति विशेषमाह भवति हीत्यादिना रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहादित्यन्तेन। ननु धूमव्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषये यदि व्यभिचारज्ञानानुत्पादोऽनुभवसिद्धस्तदा वह्निर्धूमव्यापक इत्यादिज्ञानकालीनकेवलधूमत्वादिग्रहविषयेऽपि तदनुत्पादस्तथा सामानाधिकरण्यांशस्याकिञ्चित्करत्वादिति साध्ये धूमादिव्यापकताग्रहकालीनधूमत्वादिग्रहत्वेनैव प्रतिबन्धकत्वमुचितम्। वस्तुतो पर्वतादौ धूमत्वाद्यवच्छिन्नव्यापकताग्रहदशायां धूमत्वाद्यवच्छेदेन वह्निव्य-

भिचारस्यापि सुग्रहतया धूमव्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषयेऽवच्छेदकधर्मदर्शनरूपप्रतिबन्धकवशादेव न व्यभिचारग्रह इति न तादृशधूमत्वादिग्रहविषयताया व्यभिचारग्रहप्रतिबन्धकतावच्छेदकत्वमिति नोक्तानुगमः साधीयान् अत आह व्यतिरेकसहचारेणेतीति ध्येयम् ।

'व्यतिरेकसहचारेण' अन्वयसहचारग्रहनिरपेक्षव्यतिरेकसहचारग्रहेणापि । अन्वयात । अन्वयव्याप्तिर्गृह्यत इत्याचार्यमताश्रयणादित्यर्थः । तथा च व्यतिरेकिण्यपि अन्वयव्याप्तेरेव गमकतया अनुगमासम्भवेऽपि नाव्याप्तिरिति भावः । यद्यप्येतन्मतं न विचारसहमित्युपेक्ष्य मणिकृता व्यतिरेकव्याप्तेरनुमित्योपयिकत्वं व्यवस्थापितम्, तथापि जातिघटितलक्षणादरेणाननुगमनिबन्धनाव्याप्तेः परिहरणीयतया आपाततस्तन्मतावलम्बनेन समाहितम् । ननु विपरीतभ्रमानन्तरं ग्राह्यसंशयानन्तरं च विना ग्राह्यव्याप्यवत्ताज्ञानं पुरुषत्वादिनिश्चयो नोत्पद्यते सति तु तस्मिन् जायते अतोऽन्वयव्यतिरेकाद्विपरीतज्ञानानन्तरप्रत्यक्षनिश्चयत्वावच्छिन्नं प्रत्यपि ग्राह्यव्याप्यवत्ता निश्चयत्वेन हेतुता कल्प्यते । न च ग्राह्याभावज्ञानेन प्रतिबन्धादेव विपरीतभ्रमाद्यनन्तरं प्रत्यक्षनिश्चयानुत्पत्तिनिर्वाहे किं विशेषदर्शनस्य हेतुतयेति वाच्यम्, विपरीतभ्रमादिसत्त्वेऽपि सति विशेषदर्शने प्रत्यक्षनिश्चयोत्पत्त्या प्रत्यक्षनिश्चये ग्राह्याभावग्रहस्याप्रतिबन्धकत्वात् विपरीतनिश्चयकालेऽनुमित्यादेर्वारणाय विपरीतनिश्चयस्य विशिष्य विरोधित्वकल्पनाया आवश्यकत्वेऽपि प्रत्यक्षनिश्चयान्यत्वस्य तत्प्रतिबध्यतावच्छेदकत्वोपगमात् । न च प्रत्यक्षनिश्चयं प्रति विपरीतज्ञानस्याप्रतिबन्धकत्वे शङ्खो न श्वेत इत्यादिपित्तादिदोषजन्यविपरीतनिश्चयकाले श्वेतत्वव्याप्यशङ्खत्वादिदर्शनाच्छङ्खः श्वेत इत्यादिचाक्षुषापत्तिः, तादृशदोषस्यैव श्वेत्यादिग्रहप्रतिबन्धकत्वात् । यदि च विनष्टेऽपि दोषे तादृशविपरीतनिश्चयसत्त्वे न श्वैत्यादिप्रत्यक्षं तदास्तु प्रत्यक्षे समानेन्द्रियजन्यस्य दोषविशेषाजन्योपनीतभानभिन्नविपरीतनिश्चयस्य प्रतिबन्धकत्वम् । एवं शङ्खः श्वेत इति चाक्षुषनिश्चयोत्पत्तौ सत्यां यत्र दोषसमवधानं तत्र तादृशनिश्चयसत्त्वे यदि दोषात् शङ्खो न श्वेत इति चाक्षुषनिश्चयस्तदा तन्निर्वाहोऽपि समानेन्द्रियजन्यविपरीतनिश्चयस्य प्रतिबन्धकत्वादेव, अत एव साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनमेव विरोधीत्यनेन मणिकृता दोषविशेषजन्यभ्रमे समानेन्द्रियजन्यलौकिकग्राह्याभावज्ञानस्य विरोधिता नान्यविपरीतज्ञानस्येत्यभिधानं सङ्गच्छते । चक्षुषा वंशे उरगत्वभ्रमेऽपि त्वचा तत्र तदभावग्रहात्समानेन्द्रियजन्यत्वनिवेशनं शङ्खो न श्वेत इत्यादिनिश्चयानन्तरं सति विशेषदर्शने चाक्षुषसामग्रीविगमे शङ्खः श्वेत इत्यादिमानसज्ञानमिष्यत एव विशेषदर्शनेन तन्निश्चयजनादौ विशेषदर्शनेन

प्रतिबन्धात्तादृशनिश्चयान्तरस्य चानुत्पत्त्या तादृशमानसोत्पादस्यावश्यकतया तत्पूर्वक्षणे तदुत्पादोपगमे अनुभवविरोधविरहात्। अस्तु वा तादृशमानसादिसाधारणं लौकिकनिश्चयान्यज्ञानत्वमेवानुमित्यादिसाधारणविपरीतनिश्चयप्रतिबध्यतावच्छेदकम्, यत्र सत्यपि चक्षुरादेः सन्निकर्षे करार्द्यदर्शनसहितदूरत्वादिदोषादयं स्थाणुरित्यादिभ्रमस्तत्र करादिदर्शने नायं स्थाणुरित्यादिलौकिकनिश्चयस्तत्रैव भ्रमोत्तरप्रत्यक्षे विशेषदर्शनहेतुता। अथ तत्र भ्रमोत्पत्तिक्षणे न कथं तादृशलौकिकज्ञानं विपरीतज्ञानोत्तरप्रत्यक्ष एव विशेषदर्शनहेतुतया तदुत्पत्तिक्षणे प्रत्यक्षोत्पत्तेः विशेषदर्शनहेतुताविरहेऽपि दुर्वारत्वात्। यदि च दूरत्वादिदोषेण प्रतिबन्धान्न तदा तदुत्पादापत्तिरिति, तदा भ्रमोत्तरं विशेषदर्शनात्कथं तदुत्पत्ति, तदापि तद्दोषसत्त्वादिति चेन्न, विशेषदर्शनसहितस्यैव दूरत्वादेः प्रतिबन्धकत्वेनोभयोपपत्तेः।

अस्तु वा तादृशदोषसमवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनस्य हेतुत्वान्तरं विपरीतज्ञानवत्तादृशदोषाणां चाप्रतिबन्धकत्वमिति मते प्रत्यक्षविशेषेऽतिव्याप्तिमाशङ्क्य निराकरोति न चेत्यादिना। 'भ्रमः' विपरीतनिश्चयः। एतच्च मतं मिश्राणामेवानुमतं न तूपाध्यायानां तैर्विशेषदर्शनाभावविशिष्टसंशयसाधारणविपरीतज्ञानप्रतिबन्धकताभ्युपगम्य संशयाद्युत्तरं प्रत्यक्षनिश्चयवारणात्। न च विशेषदर्शनाभावविशिष्टग्राह्याभावज्ञानत्वेन विशिष्टबुद्धिप्रतिबन्धकत्वे बाधनिश्चयकाले लिङ्गपरामर्शरूपविशेषदर्शनादनुमित्यापत्तिर्विशिष्टाभावसत्त्वात्, एवं निश्चयत्वानिवेशात् संशयोत्तरं संशयानुपपत्तिः योग्यतासंशयस्य शाब्दबोधप्रतिबन्धकतापत्तिश्च प्रतिबध्यतावच्छेदके निश्चयत्वप्रवेशेन संशयोत्तरसंशयोपपादने बाधनिश्चयोत्तरमपि संशयापत्तिरिति वाच्यम्, परोक्षज्ञाने बाधनिश्चयस्य प्रतिबन्धकत्वान्तरकल्पनेन बाधनिश्चयदशायामनुमित्यापत्तिवारणात् प्रत्यक्षनिश्चयत्वस्यैव च संशयादिसाधारणविपरीतधीप्रतिबध्यतावच्छेदकतया ग्राह्यसंशयोत्तरं संशयशाब्दबोधाद्युपपत्तेः। न चैवं बाधनिश्चयोत्तरं संशयस्यापत्तिः, अनुमित्यादिसाधारणबाधनिश्चयप्रतिबध्यतावच्छेदकगर्भे प्रत्यक्षनिश्चयान्यत्वस्य प्रवेशनीयतया संशयस्य बाधनिश्चयप्रतिबध्यतोपपत्तेः। न च प्रत्यक्षनिश्चयान्यबुद्धौ विपरीतनिश्चयत्वेन प्रतिबन्धकत्वान्तरस्यैतन्मतेऽप्यावश्यकत्वेन प्रत्यक्षनिश्चये विशेषदर्शनाभावविशिष्टविपरीतज्ञानाभावहेतुताकल्पनापेक्षया विशेषदर्शनस्य लघोर्हेतुत्वकल्पनमेवोचितमिति वाच्यम्, व्याप्तेः सम्बन्धादिभेदेन भिन्नतया व्याप्यदर्शनस्याननुगमेन व्यभिचाराच्च हेतुताकल्पनासम्भवात्। नानाविधविशेषदर्शनाभावकूटविशिष्टविपरीतज्ञानाभावस्य चानुगतत्वाच्च। अन्यथा अन्यत्रापि उत्तेजकहेतुतयातिप्रसङ्ग-

चारणसम्भवेन सर्वत्रोत्तेजकविलयप्रसङ्गात्। एवमसत्यपि विशेषदर्शने विपरीतज्ञानासत्त्व इव विपरीतज्ञानसत्त्वेऽपि सामान्यसामग्रीबलात्प्रत्यक्षसामान्यापत्तिर्दुर्वारैवेति विपरीतज्ञानानुत्तरप्रत्यक्षे संशयसाधारणविपरीतज्ञानाभावस्य विशेषसामग्रीत्वमावश्यकमिति गौरवम्। न च नानाविधविशेषदर्शनाभावानां विपरीतधीप्रतिबन्धकतावच्छेदकगर्भनिवेशे एकाभावविशिष्टत्वेनैवापराभावस्य निवेशनीयतया तावदभावानां परस्परम् अप्रामाण्यग्रहाभावादिभिश्च समं विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यमिति तादृशतादृशविशेषदर्शनानन्तरप्रत्यक्षे तादृशविशेषदर्शनतो विपरीतज्ञानानुत्तरप्रत्यक्षे तदभावस्य च पृथक्कारणत्वं युक्तमिति वाच्यम्, आनन्तर्यस्य स्वत्वघटितत्वेन कार्यकारणभावस्य तत्तद्व्यक्तिविश्रामापत्तेः। यदि च नानाविधविशेषदर्शनानां विपरीतज्ञानविरोधित्वेनानुगमादेकविशेषदर्शनस्यान्यविशेषदर्शनजन्यप्रत्यक्षे व्यभिचार इति न तज्जन्यतावच्छेदककोटावानन्तर्यनिवेशनमत एवावच्छेदकधर्मदर्शनस्यापि संग्रह इत्युच्यते, तदाऽपि विपरीतज्ञानानुत्तरप्रत्यक्षे विशेषदर्शनस्य व्यभिचारवारणाय विपरीतज्ञानाव्यवहितोत्तरत्वस्य विशेषदर्शनजन्यतावच्छेदकगर्भेऽवश्यं निवेशनीयतया विशेषदर्शनजन्यतावच्छेदकस्य तत्तद्व्यक्तिविश्रामो दुर्वार एव, एवं विपरीतज्ञानप्रतिबध्यतावच्छेदकशरीरेऽव्यवहितोत्तरत्वाभावप्रवेशस्यावश्यकतया तदननुगमात्तदभावजन्यतावच्छेदकस्य तत्तद्विपरीतज्ञानाव्यवहितोत्तरत्वाभावकूटगर्भत्वाद्गौरवं दुर्वारमेव।

यदपि विशेषदर्शनजन्यप्रत्यक्षं व्याप्यधर्मविशिष्टधर्मिविशेष्यकमेव तदनुत्तरं तु न तथा, तथा च तथात्वातथात्वयोर्विशेषदर्शनविपरीतज्ञानाभावजन्यतावच्छेदकत्वप्रवेशेनैव व्यभिचारवारणे नानन्तर्यप्रवेश इति। तदपि न, करादिमान् पुरुष इत्यादिनिश्चयकालीनकरादिमत्त्वनिश्चयरूपावच्छेदकधर्मनिश्चयस्य पुरुषत्वादिनिश्चायकतया तज्जन्यनिश्चये विपरीतज्ञानाभावव्यभिचारस्यानन्तर्यमनिवेश्य दुर्वारत्वात् करादिमत्त्वावच्छिन्नविशेष्यकत्वस्य विपरीतज्ञानाभावजन्यतावच्छेदकत्वे करादिमान् पुरुष इत्यादिनिश्चयशून्यकालीनकरादिमत्ताग्रहोत्तरजातस्य करादिमानयं पुरुष इत्यादिप्रत्यक्षस्यासंग्रहप्रसङ्गात्।

यत्तु विपरीतज्ञानविरोधित्वेनैव विशेषदर्शनादीनां हेतुता, तत्त्वं च विपरीतज्ञानाव्यवहितपूर्वत्वशून्यक्षणवृत्तित्वविशिष्टत्वम्। तदवच्छिन्नं च निश्चयपूर्वं सर्वत्रैव सुलभमिति सामान्यतो निश्चयत्वमेव तज्जन्यतावच्छेदकमिति विपरीतज्ञानानुत्तरप्रत्यक्षे तदभावहेतुतापि नास्ति। न चैवं विशेषदर्शनोत्पत्तिकाले संशयाद्यनुत्पत्त्या तत्पूर्वक्षणेऽपि उक्तकारणसत्त्वाद्विशेष

दर्शनानन्तरमिव तदुत्पत्तिक्षणेऽपि निश्चयो जायतामिति वाच्यम्, इष्टत्वात्। न च यत्र संशयाद्यनन्तरम् असत्यपि विशेषदर्शने न संशयादिस्तत्र तन्निश्चयापत्तिरिति वाच्यम्, विपरीतकोटिभ्रमनिवर्तकविशेषदर्शनाद्यसत्त्वे उपस्थिततत्कोटिज्ञानोत्पत्तेर्बाधकविरहेणावश्यकत्वादिति। तदप्यसत्, अव्यवहितपूर्वत्वस्य तत्तद्व्यक्तिघटिततया गौरवादिति। एवं विशेषदर्शनानां हेतुत्वं दीधितिकाराणामप्यननुमतं संशयोत्तरं विशेषदर्शनासत्त्वे संशयजनककोट्युपस्थितिधर्मिज्ञानादिघटितसामग्रीबलात्संशयस्यैवोत्पादेन संशयान्यज्ञानत्वरूपनिश्चयत्वावच्छिन्नापत्त्ययोगात्। तत्सामग्र्यभावसहितज्ञानसामान्यसामग्र्या एव तज्ज्ञानान्यज्ञानत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात्। अथैवं संशयसामग्र्यभावस्य निश्चयोत्पत्तावपेक्षणे संशयप्रयोजकोविशेषदर्शनस्याभावो तदभावो विशेषदर्शनं तन्निश्चये हेतुरित्यायातमितिचेन्न, तत्प्रयोजकाभावस्य तदन्यत्वावच्छिन्नाजनकस्यापि तदन्यत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात्, अन्यथा पटज्ञानान्यघटज्ञानत्वावच्छिन्नोत्पत्तावपेक्षितस्य पटादिज्ञानसामग्र्यभावस्य पटज्ञानान्यज्ञानत्वावच्छिन्नहेतुताप्रसङ्गात्। विपरीतनिश्चयानन्तरं च तेन प्रतिबन्धादेव न प्रत्यक्षं विपरीतनिश्चयस्य प्रत्यक्षसाधारणलौकिकसन्निकर्षाजन्यविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वात्, विपरीतनिश्चयानन्तरं विशेषदर्शनेऽपि तन्नाशानन्तरमेव प्रत्यक्षं जायते।

यत्तु भूतले घटो नास्तीतिशाब्दादिनिश्चयानन्तरं लौकिकसन्निकर्षवशाद्घटावगाही तत्संशयः कथं नोत्पद्यते लौकिकसन्निकर्षाजन्यतज्ज्ञानस्येव तदभावनिश्चयप्रतिबध्यत्वादतो लौकिकनिर्णयान्यतद्वत्ताज्ञानत्वं तदभावनिश्चयाभावजन्यतावच्छेदकं वाच्यम्, एवमपि यादृशसामग्रीबलाल्लौकिकप्रत्यक्षे घटो भासते तत्सहितघटाभावोपस्थित्यादिसहितघटाभावभानसामग्रीतो बाधकाले संशयापत्तिर्दुर्वारैवेति निश्चयेऽपि विशेषसामग्र्यन्तरं कल्पनीयम्। तच्च निरुक्तविपरीतज्ञानविरोधित्वावच्छिन्नमेवेति विशेषदर्शनस्यापि तेन रूपेण हेतुत्वमायातीति। तदसत्, लौकिकसामग्र्या बलवत्त्या विपरीतकोटिभानप्रतिबन्धकत्वात् उक्तसंशयापत्त्ययोगात्। तत्प्रतिबन्धकत्वाकल्पने उक्तबाधनिश्चयानन्तरलौकिकसन्निकर्षाद्यत्र वासनया घटादिनिश्चयस्तत्र घटाभावभानप्रतिबन्धकासत्त्वेन तद्भानापत्त्या संशयापादनस्य ब्रह्मणोऽपि दुर्वारत्वादिति विशेषदर्शनहेतुतायां विवादान्मत इत्युक्तम्। संशयोत्तरप्रत्यक्षनिश्चये विशेषदर्शनहेतुत्वे घटादिप्रकारकमानसेच्छाविरहविशिष्टघटाभावादिशाब्दसामग्र्या योग्यतासंशयात्मकघटादिसंशयघटिताया घटादिमानसं प्रति प्रतिबन्धकत्वं न कल्प्यत इति लाघवं तदानीं घटाभावादिमानसे तादृशशाब्दसामग्र्या प्रतिबन्धकतया मानसघटादिसंशयस्य

विशेषदर्शनरूपकारणविरहेणैव च घटादिमानसनिश्चयस्य च वारणसम्भवात्। विशेषदर्शनसत्त्वे च तस्य विपरीतकोटिज्ञानादर्थाप्रतिबन्धकत्वात् सामग्र्यभावाज्जायत एव मानसमिति केचित् मिश्रमतं परिष्कुर्वन्ति। ननु दीधितिकारमतेऽपि व्याप्यवद्धर्मिनिश्चयस्य विशेषणज्ञानादिविधया तदुत्तरप्रत्यक्षे हेतुतया तथाविधनिश्चयत्वेन हेतुत्वाविवक्षादशायां तादृशप्रत्यक्षेऽतिव्याप्तेरावश्यकत्वाद्विशेषदर्शनस्य हेतुतामते इत्यभिधानमयुक्तमिति चेन्न, निश्चयत्वेन हेतुत्वविवक्षणे मिश्रान्यमते नातिव्याप्तिर्मिश्रमते च तादृशनिश्चयत्वेनापि प्रत्यक्षविशेषे हेतुतेत्याशयेन तथाभिधानात्। अग्रे च तादृशनिश्चयत्वेन हेतुताविवक्षामात्रेण न समाधानम्, अपि तु तद्विवक्षया प्रत्यक्षे तादृशनिश्चयत्वेन हेतुता विरहप्रदर्शनेन चेति सामञ्जस्यात्।

अथवा तादृशनिश्चयजन्यतावच्छेदकानुभवत्वव्याप्यजातिमत्त्वविवक्षणे नान्यमतेऽतिव्याप्तिरित्याशयेन विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनहेतुतामतेऽतिव्याप्त्यभिधानम्। विशेषदर्शनेत्यादि। सत्त्वर्थे 'भ्रमादिविरोधित्वेन' ग्राह्याभावविरोधित्वेन। 'तत्त्वम्' प्रत्यक्षविशेषहेतुत्वम्। उक्तत्वादिति। विशेषदर्शनत्वरूपेण हेतुत्वे अन्धकारे घटसंशये आलोकसमवधानात्तन्निश्चयानुपपत्तिः। एवं कुङ्कुमादौ तैलसंयोगादिरूपव्यञ्जकविरहाधीनसौरभादिसन्देहानन्तरं व्यञ्जकसमवधानेऽपि तन्निश्चयानुपपत्तिः। न चालोकित्वस्य विशेषदर्शनजन्यतावच्छेदकत्वोपगमान्नेयमनुपपत्तिः तत्र सौरभादेर्लौकिकप्रत्यक्षस्यैव विशेषदर्शनं विनोत्पत्तेरिति वाच्यम्, लौकिकसन्निकर्षसत्यपि यत्र विशेषादर्शनसहितदूरत्वादिदोषप्रयुक्तः पुरुषत्वादिसंशयः तत्र विशेषदर्शने सत्येव लौकिकप्रत्यक्षोत्पत्तेर्विशेषदर्शनजन्यतावच्छेदकरूपेण लौकिकस्यापि प्रत्यक्षस्य संग्राह्यत्वात्। अत एव विशेषदर्शनामनुमितिसामग्रीसत्त्वादनुमितिरेव भविष्यति न प्रत्यक्षमिति कथं तस्य प्रत्यक्षहेतुतेत्याक्षिप्य समानविषये प्रत्यक्षसामग्र्या बलवत्त्वमिति प्रत्यक्षमेव जायते नानुमितिरिति मणिकारेण समाहितं व्युत्पत्तिवादे। विशेषदर्शनस्यालौकिकप्रत्यक्षमात्रहेतुत्वे तादृशप्रत्यक्षसामग्र्या अनुमितिसामग्र्यपेक्षया हीनबलत्वासङ्गतेः। यदि च विपरीतज्ञानोत्तरप्रत्यक्षनिष्ठविशेषदर्शनजन्यतावच्छेदकशरीरे लौकिकत्वनिवेशेऽपि न क्षतिः, दूरस्थे धर्मिणि पुरुषत्वादिसन्देहोत्पत्तिक्षण एव लौकिकसन्निकर्षेण निश्चयवारणाय दूरत्वादिदोषसमवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनहेतुताया आवश्यकत्वं तत एव दूरस्थे धर्मिणि संशयोत्तरमपि विशेषदर्शनं विना पुरुषत्वादिनिश्चयवारणसम्भवादित्युच्यते, तदापि सन्न्यासादिभेदभिन्नानानिश्चयाप्रत्ययवारणाय विशेषदर्शनावच्छेदकधर्मदर्शनसाधार

णविशेषदर्शनत्वस्यानुगतस्याभावान्न तेन रूपेण हेतुतासम्भव इति विपरीत ज्ञानविरोधित्वमेवानुगमकं वाच्यमिति भावः।

अथ यदि आलोकसंयोगादिसाधारण्यं विपरीतज्ञानविरोधित्वस्य तदा तत्कथमुपपद्यतां घटवद्भूतलादावालोकसंयोगसत्त्वेऽपि तत्र चक्षुःसंयोगाद्य सत्त्वे तत्सत्त्वेऽपि च दूरत्वादिदोषाद्घटादिसंशयोत्पत्त्या आलोकसंयोगत्वेन विपरीतज्ञानाविरोधित्वात्।

अस्तु वा लौकिकप्रत्यक्षकारणान्तरसहितालोकसंयोगत्वेन तथात्वं तथापि तस्यात्मनिष्ठोऽन्यः सम्बन्धोऽन्यश्च विशेषदर्शनस्येति उभयोरनुगतकारणतावच्छेदकसम्बन्धो दुर्वच इति चेन्न, लौकिकप्रत्यक्षकारणालोकसंयोगादिसमवहितात्ममनोयोगस्यैवात्मनिष्ठप्रत्यासत्त्यस्य विपरीतज्ञानविरोधित्वोपगमेन तत्साधारणतद्रूपावच्छिन्नस्य विशेषदर्शनस्य समवायसम्बन्धेनैव हेतुतासम्भवादित्यलमधिकेन॥

तथाविधनिश्चयत्वेन हेतुताविलक्षणस्य प्रयोजनान्तरमपि दर्शयति अत एवेति।

(दी०) अत एव लिङ्गवत्त्वादिलक्षणादिदेशवाक्यार्थज्ञानजन्योपमितौ नातिव्याप्तिः, तथाविधवाक्यार्थप्रतिसन्धानत्वेन तस्य हेतुत्वात्। न चोपनयार्थज्ञानजन्यन्यायार्थज्ञाने तच्छन्देन सङ्केतितशब्दान्तरेण वा व्याप्त्यादिविशिष्टोपस्थितिद्वारा जनिते शाब्दबोधेऽतिव्याप्तिः? व्युत्पादयिष्यते च महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं सदादेश्च विशेषरूपेणोपस्थापकत्वमिति वाच्यम्, तदतिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशात्मिश्रणत्वस्याप्रवेशात्॥

(गा०) 'लिङ्गवत्त्वादिलक्षण' वह्निव्याप्यधूमवत्त्वादिघटितो य 'अतिदेशवाक्यार्थ' सादृश्यविशिष्टे पदविशेषवाच्यत्वादिबोधकवाक्यप्रतिपाद्योऽर्थः, तद्विषयकं यज्ज्ञानं वह्निव्याप्यधूमवत्पर्वतसदृशो महानसपदवाच्य इत्यादिज्ञानं तज्जन्यायामयं महानसपदवाच्य इत्याद्युपमितौ वस्तुगत्या साध्यव्याप्यत्वावच्छिन्नहेतुप्रकारकं पक्षविशेष्यकं यत्तादृशं ज्ञानं तज्जन्यत्वेऽपि नातिव्याप्तिरित्यर्थः। तथाविधवाक्यार्थेति। महानसपदवाच्यत्वविशिष्टवह्निव्याप्यधूमवत्पर्वतसादृश्यावच्छिन्नधर्मिज्ञानत्वेनेत्यर्थः। यद्यपि भ्रमसाधारण्याय तादृशविशिष्टवाक्यार्थघटकतत्तत्पदार्थानां परस्परोपश्लेषावगाहिज्ञानत्वेन चोपमितिविशेषे हेतुताया वक्तव्यतया पक्षांशे व्याप्तिप्रकारेण हेतुमत्तावगा

हिज्ञानत्वरूपमुपमितिजनकतावच्छेदकम्, तथापि पक्षांशे व्याप्याभावानवगाहितादृशहेतुमत्तावगाहिज्ञानत्वरूपमनुमितिजनकतावच्छेदकव्याप्यवत्पक्षनिश्चयत्वं नोक्तोपमितिजनकतावच्छेदकम्। अतिदेशवाक्यार्थज्ञाने व्याप्यवत्त्वस्य धर्मितावच्छेदककोटिनिविष्टतया भानाद्धर्मितावच्छेदकघटकांशे च संशयस्यानभ्युपगमात् उपमितिजनकतायां तादृशनिश्चयत्वनिवेशस्यानर्थक्यादतो न तादृशरूपावच्छिन्नजनकताकत्वरूपानुमितिलक्षणस्य तत्रातिव्याप्तिः। अत एव निश्चयत्वनिवेशनमप्यर्थवत्। अन्यथा निश्चयत्वेनानुमितिजनकत्वेऽप्यधिकं त्वित्यादिन्यायादनुमितिजनकताया पक्षविशेष्यकव्याप्यवत्ताज्ञानत्वावच्छिन्नत्वात् तादृशज्ञानत्वावच्छिन्नजनकताकत्वनिवेशमात्रेण भ्रमादिविरोधित्वावच्छिन्नहेतुताकप्रत्यक्षविशेषेऽतिव्याप्तिवारणसम्भवेन तद्वानर्थक्यमापद्येत।

वस्तुतस्तु वह्निव्याप्यवत्त्वेन पर्वतसदृशो महानसपदवाच्य इत्यतिदेशवाक्यार्थज्ञानसहकृतव्याप्यवत्ताघटितसादृश्यज्ञानजन्यायामुपमितौ जनकतावच्छेदककोटौ व्याप्यांशे पर्वतादिवृत्तित्वावगाहित्वस्याधिकस्य निवेशोऽपि धर्म्यंशे व्याप्यवत्त्वावगाहिनिश्चयत्वरूपानुमितिजनकतावच्छेदकावच्छिन्नहेतुताकत्वस्य तादृशोपमितावक्षतत्वादतिव्याप्तेर्वारणाय तादृशनिश्चयत्वपर्याप्तहेतुतावच्छेदकताकत्वपर्यन्तनिवेशनमावश्यकम्। तथा चानुमितिजनकतावच्छेदकता यादृशसमुदाये पर्याप्ता तादृशसमुदायस्यैव लक्षणे निवेशनमावश्यकम्। अन्यथा समुदायपर्याप्तावच्छेदकताया एकदेशापर्याप्ततया असम्भवापातात्। अत एवोक्तनिश्चयत्वघटकाभावदलस्यापि सार्थकता। एवं चाप्रामाण्यज्ञानानास्कन्दितत्वस्य कारणतावच्छेदकतामते तदंशोऽपि लक्षणे निवेशनीयः। न च सादृश्यज्ञानस्योपमितिहेतुतायां पर्वतादिवृत्तित्वावच्छिन्नव्याप्यादिविषयता पर्वतादिवृत्तित्वावच्छिन्नविषयतात्वेनैव निवेश्या न तु व्याप्यादिविषयतात्वेन प्रयोजनाभावात्। तथा चानुमितिजनकतावच्छेदकधर्मस्योक्तोपमितिजनकतावच्छेदककोटिनिवेशोऽपि नास्ति किं पर्याप्तिनिवेशेनेति वाच्यम्, व्याप्यवत्त्वघटितसादृश्यावच्छिन्नधर्मिकातिदेशवाक्यार्थज्ञानस्य तद्घटितसादृश्यज्ञानसहकारेण फलजनकतयोभयत्र सादृश्यात्मकधर्मांशे विशिष्यावश्यं निवेशनीयत्वात्। न च पर्याप्तिविवक्षायामपि धूमव्यापकवह्निमत्सादृश्यात्मकतादृशवह्निमद्वृत्तिधूमवत्तानिश्चयजन्योपमितावतिव्याप्तिर्न शक्यते वारयितुमिति वाच्यम्, सादृश्यघटकभेदविषयताया अपि प्रवेशेन निरुक्तनिश्चयत्वे तत्कारणतावच्छेदकतापर्याप्तिविरहात्। लाघवाद्भेदाघटितसादृश्यज्ञानमेवोपमिता कारणमिति तु न शङ्क्यम्। तथा सति गवादावपि तादृशसादृश्यनिश्चयसत्त्वेन गवयादिपदवाच्यत्वोपमित्या-

पत्ते। यदि च वैधर्म्यज्ञानादप्युपमितिः स्वीक्रियते वैधर्म्यस्य चेतरवैधर्म्यत्वेन ज्ञानं नापेक्ष्यते तदा व्याप्यधर्मरूपवैधर्म्यज्ञानजन्योपमितावतिव्याप्तिः कारणतावच्छेदकतापर्याप्तिनिवेशेऽपि दुर्वारैवेति तद्वारणप्रकारश्चिन्त्य। महावाक्यार्थविषयकशाब्दबोधेऽवान्तरवाक्यार्थविषयकनिश्चयस्य तादृशनिश्चयत्वेनैव हेतुता। एवं विशिष्टपदार्थगोचरशाब्दबोधेऽपि विशिष्टपदार्थोपस्थितेस्तद्विषयकनिश्चयत्वेनैव हेतुता न तु विशेषणान्तरप्रवेश इत्यभिमानेन शाब्दबोधविशेषेऽतिव्याप्तिं शङ्कते न चेत्यादिना। उपनयार्थज्ञानेति। उपनयवाक्यप्रतिपाद्यसाध्यव्याप्यहेतुमत्पक्षरूपावान्तरवाक्यार्थज्ञानेत्यर्थः। न्यायार्थज्ञान इति। निगमनसहकृतोपनयजन्ये वह्निव्याप्यधूमवानयं धूमज्ञानज्ञाप्यवह्निमानित्यादिमहावाक्यार्थज्ञान इत्यर्थः। तेन प्रतिज्ञादिपञ्चवाक्यात्मकन्यायस्य विशिष्टार्थज्ञानजनकताया स्वयं दूषणीयत्वेऽपि न क्षतिः। यद्यपि वह्निव्याप्यधूमवांश्चायमित्याद्युपनयजन्यबोधे व्याप्यवतः एवाभेदो धर्मिणि भासते न तु व्याप्यस्य व्याप्यतावच्छेदकसम्बन्धः नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात्। तथा च नातिव्याप्तेरवसरः पक्षांशे व्याप्यप्रकारकज्ञानस्यैव लक्षणघटकत्वात्। यत्र तादात्म्यसम्बन्धेन धर्मिणो हेतुता तत्र व्याप्यस्य पक्षांशे तेन सम्बन्धेनोपनयप्रतिपाद्यत्वेऽपि व्याप्याभेदस्यैव हेतौ भानात्तदंशे व्याप्तिप्रकारकत्वाभावेन नातिव्याप्त्यवसरः, तथापि तादात्म्यसम्बन्धावच्छिन्नव्याप्तिविशिष्टधर्मिरूपहेतुपरतच्छब्दघटितस्य स चायमिति वाक्यस्य प्रतिपाद्ये विशिष्टार्थे निगमनार्थस्यान्यस्य वा कस्यचिदर्थस्यान्वयबोधस्तत्रातिव्याप्तिपरोऽयं ग्रन्थः, साध्यव्याप्यहेतुविशिष्टपक्षपर्यन्तपरतच्छब्दजन्यबोधातिव्याप्तिपरश्च तच्छब्देनेत्यग्रिमग्रन्थ इति न पौनरुक्त्यम्।

व्याप्यविशिष्टपक्षरूपवाक्यार्थज्ञानजन्यतामादाय तद्घटितमहावाक्यार्थबोधे संयोगादिसम्बन्धेन पक्षादौ व्याप्यप्रकारकज्ञानकारणताघटितलक्षणस्यातिव्याप्त्यसम्भवादेव च व्याप्यविशिष्टपक्षात्मकपदार्थज्ञानजन्यबोधेऽतिव्याप्तिमाह तच्छब्देनेति। तादृशविशिष्टार्थवाचकपदान्तराभावात्सर्वनामानुधावनम्। सर्वनाम्नो विशेषरूपेण पदार्थोपस्थापकतामते एव तज्जन्योपस्थितेः पक्षविशेष्यकव्याप्तिविशिष्टहेतुप्रकारकनिश्चयरूपतासम्भवः न तु वक्तृबुद्धिस्थत्वेनोपस्थापकतामते इत्यविवादायाह सङ्केतितशब्दान्तरेणेति। व्याप्तिविशिष्टहेतुविशिष्टपक्षे आधुनिकसङ्केतशालिना घटादिपदेनेत्यर्थः। इदमुपलक्षणम् विशिष्टपक्षलाक्षणिकपर्वतादिपदे चेत्यपि बोध्यम्। 'व्याप्त्यादिविशिष्टोपस्थितिद्वारा' व्याप्त्यवच्छिन्नहेतुविशिष्टपक्षोपस्थितिद्वारा, जनिते वह्निव्याप्यधूमवान् पर्वतोऽस्तीत्याकारकशाब्दबोधेऽतिव्याप्तिः। ननूपनयार्थघटितमहावाक्यार्थबोधे कथमतिव्याप्तिः उपनयार्थज्ञानस्य पक्ष

विशेष्यकव्याप्यप्रकारकज्ञानत्वेन तद्धेतुताया अप्रामाणिकत्वात्, तत्तत्पदार्थज्ञानत्वेन तदन्वयबोधे हेतुत्वादेवानुपस्थितपदार्थान्वयबोधाप्रसक्तेः। न च खण्डशः सकलपदार्थोपस्थितावपि अवान्तरवाक्यार्थज्ञानं विना तद्घटितमहावाक्यार्थज्ञानानुदयात् अवान्तरवाक्यप्रतिपाद्यो यादृशविशिष्टार्थः तद्विषयकज्ञानत्वेन महावाक्यार्थज्ञाने हेतुत्वमावश्यकमिति वाच्यम्, दण्डी कुण्डली वासस्वी चैत्र इत्यादि दण्ड्यादिविशेषणान्वितचैत्रादिज्ञानं विनैव तादृशवाक्यार्थघटिततावद्विशेषणान्वितविशिष्टरूपमहावाक्यार्थधियः समूहालम्बनरूपतावत्पदार्थावगाहिस्मृतित उत्पत्तेर्मणिकृता स्वीकारादित्यत आह व्युत्पादयिष्यत इति। 'महावाक्यार्थज्ञानस्य' एकविशिष्टार्थेनापरपदार्थसंसर्गावगाहिज्ञानस्य। अवान्तरेति। तादृशविशिष्टार्थविषयकज्ञानत्वावच्छिन्नजन्यत्वमित्यर्थ ।

अयं भाव यादृशविशेषणविशिष्टस्य विशेष्यस्य विशेषणस्य वा शाब्दोपस्थितिस्तादृशेनैव विशिष्टेन विशेष्यस्य विशेषणान्तरस्य चान्वयबोधोऽनुभवसिद्ध, यत्र च युगपदेवैकस्मिन्धर्मिणि समूहालम्बनोपस्थितानां विशेषणानां तुल्यतया भानात्तत्रासावेकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यबोध, अतो न तत्र विशेषणविशिष्टविशेष्योपस्थितेरपेक्षा एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यं विशेष्ये वा यत्र विशेषणान्तरविशिष्टस्य वैशिष्ट्यं भासते स बोधो विशिष्टविषयकबोधादेवोत्पद्यते, न तु विश‍ृङ्खलसमूहालम्बनात्। अत एवेष्टविशेष्यकोपायसाध्यताज्ञानस्य प्रवर्तकतामाशङ्क्य तन्मते विधिवाक्याद्वाक्यभेदभिया कृतिसाध्ययागसाध्यमिष्टमित्येतादृशस्य समूहालम्बनविलक्षणविशिष्टयागविशेषणकबोधस्यैव स्वीकार्यतया तदर्थमन्तरा कृतिसाध्यो याग इत्यवान्तरवाक्यार्थबोधस्य कल्पनीयतया गौरवम्, उपायविशेष्यकफलसाधनताबोधस्य प्रवर्तकत्वे चाहत्यैवैकत्र द्वयमिति रीत्या कृतिसाध्यत्वेष्टसाधनत्वरूपविशेषणद्वयावगाही यागः कृतिसाध्य इष्टसाधनमिति बोध स्वीक्रियते इति लाघवमित्युक्तं विधिवादे मणिकारेण। विशिष्टेन समभिव्याहृतान्वयबोधे विशिष्टधियो हेतुत्वे तादृशान्वयतात्पर्यघटितशाब्दसामग्र्या भिन्नविषयकप्रत्यक्षादिप्रतिबन्धकतायां विशिष्टविषयकैकोपस्थितिर्निविशते अन्यथा तत्स्थाने तत्तद्विशेषणविशेष्योपस्थितिद्वयमतो लाघवादपि तद्धेतुतासिद्धिः। एवं चोपनयप्रनिपाद्यहेतुविशिष्टपक्षविशेष्यकेनरान्वयबोधेऽतिव्याप्तिर्दुर्वारैवेति। ननु नद्यादेर्विशेषरूपेणोपस्थापकतया विचारामहत्वात्कथं नद्यादिपदजन्यशाब्दबोधेऽतिव्याप्तिसङ्गतिः। तथाहि नद्यादिपदस्य न घटत्वादिरूपविशेषधर्मविशिष्टे शक्तिर्नानार्थताप्रसङ्गेन गौरवात्। घटादिकं बुद्धिस्थीकृत्य प्रयुक्तात्स्वच्छन्दात्पटादिबोधस्य शक्तिभ्रममन्तरेणापि

प्रसङ्गात्। न च वस्तुगत्या यद्रूपावच्छिन्नं बुद्धिस्थीकृत्य यत्पदव्यक्ति प्रयुक्ता तद्रूपावच्छिन्ने तस्या शक्तिरतो नायं दोष इति वाच्यम्, एवमपि पदव्यक्तिभेदेनानन्तशक्तिकल्पनया गौरवात्। यत्पदव्यक्तिप्रयोज्या प्रयोज्य-वृद्धप्रवृत्तिर्नोपलब्धा तत्पदव्यक्तिशक्तेरगृहीतत्वेन ततोऽन्वयबोधानुपपत्तिश्च अत सामान्यत स्वप्रयोक्तृपुरुषबुद्धिस्थे तदादिपदसामान्यशक्ति कल्पनीया। तथा च तत्त्वेनैवोपस्थिति सर्वनामपदाद्भविष्यति न तु विशेषरूपेण। न च बुद्धिस्थत्वेन शक्त्यानुगमेऽपि तेन रूपेण व्युत्पत्तौ सत्यां घटत्वादि-रूपविशेषधर्मपुरस्कारेण बुद्धिस्थत्वरूपविशेषधर्मदर्शनादुपलक्षणीभूतघटत्वा-दिप्रकारेण शक्तिग्रहसम्भव इति तेन रूपेण न तत्पदादुपस्थितिर्दुर्लभा सम्बन्धग्रहप्रकारताया एव स्मृतिप्रकारताप्रयोजकतया प्रकारांशे शक्तिग्रहा-नपेक्षणादिति वाच्यम्, द्रव्यादिपदाद्घटत्वादिप्रकारेण शक्तिभ्रमशून्यस्य शाब्दबोधानुदयाच्छक्त्यधीनोपलक्षणीभूतधर्मप्रकारकोपस्थिते शाब्दबोधा नुपयोगित्वादित्यत आह तदादेश्चेत। विशेषरूपेणोपस्थापकत्वं व्युत्पादयि-ष्यते इत्यनुषङ्गेणान्वय.।

अयमभिप्राय.—स्वप्रयोक्तृबुद्धिप्रकारत्वेनानुगतीकृतघटत्वादिरूपविशे-षधर्मविशिष्टे तत्पदशक्तिरतो न विशेषणभेदेन शक्त्यानन्त्यं न वा विशेषधर्मप्रकारकशाब्दबोधेपर्योगिविशेषधर्मप्रकारकोपस्थितेर्दुर्घटता। न च तादृशबुद्धिविषयत्वविशिष्टे शक्त्यैवोपपत्तौ किमेतावता प्रयासेन विशेषरूपेणोपस्थापकतया विरहेऽपि क्षतिविरहादिति वाच्यम्, विशे-षधर्मप्रकारकसंशयनिवृत्त्यर्थमपि तदादेर्विशेषरूपेणोपस्थापकताया अन-श्योपपाद्यत्वात्। बुद्धिप्रकारत्वेन प्रवृत्तिनिमित्तघटत्वादीनामनुगमेऽपि तादृशधर्मस्याशक्यतया तदंशपरित्यागेन निर्विशेषणकघटत्वादिप्रकारकबो-धोपपत्ति, बुद्धिप्रकारत्वस्याशक्यत्वेऽपि च तत्पदं बुद्धिप्रकारविशिष्टं बोध यत्वित्याकारकभगवत्सङ्केतरूपशक्तौ तेनानुगतरूपेण घटत्वपटत्वादिभाना-च्छक्तैक्यम्, बुद्धिप्रकारत्वस्य सङ्केतविषयत्वेऽपि तस्य शक्योपलक्षणता न तु शक्यान्तर्भावेन विशेषणत्वम्, तदुपलक्षितघटत्वादिप्रकारकत्वेनैव बोधस्य सङ्केतविषयत्वात् न तु तद्विशिष्टप्रकारकत्वेन। शाब्दबोधप्रकारतायां शाब्दबोधविषयतावच्छेदकत्वेन सङ्केतविषयत्वशानं प्रयोजकम्, यथा घटत्वस्य घटपदजन्यशाब्दबुद्धिप्रकारतायां घटत्वावच्छिन्नो घटपदजन्यशा-ब्दबोधविषयतावान्भवत्वित्याकारकसङ्केतीयशाब्दबोधविषयतावच्छेदकत्वेन विषयत्वस्य ज्ञानं तादृशसङ्केतग्रहश्च घटत्वावच्छिन्नविषयतानिरूपितसङ्के-तीयशाब्दबोधविषयत्वप्रकारतानिरूपितविषयतावान्घट इत्याकारक। शाब्द-बोधप्रकारतावच्छेदकतायां च शाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन सङ्केतविषयत्वज्ञानम्। यथा लोमत्वस्य पशुपदजन्यशाब्दबोधप्रकारतावच्छे-

दन्तायां लोमत्वावच्छिन्नलोमावच्छिन्न पशुपदजन्यशाब्दबोधविषयताया भवत्वित्याकारकसङ्केतीयशाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन विषयत्वज्ञानं तादृशसङ्केतग्रहश्च लोमत्वावच्छिन्नस्वनिष्ठावच्छेदकताकत्वसम्बन्धावच्छिन्नलोमनिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्ना या शाब्दबोधविषयत्वप्रकारता तन्निरूपितविशेष्यतावाँल्लोमादिमानित्याकारक । प्रकृते च बुद्धिप्रकारताश्रयावच्छिन्नस्तत्पदजन्यशाब्दबोधविषयो भवत्वित्याकारकभगवत्सङ्केतीयशाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन विषयत्वं न बुद्धिप्रकारत्वस्य किं तु तदंशे सङ्केतेन शाब्दबोधविषयतावच्छेदकतासामानाधिकरण्यस्यैवावगाहनात् सङ्केतीयशाब्दबोधविषयतावच्छेदकतासमानाधिकरणत्वेनैव विषयत्वमिति तस्य तत्पदजन्यशाब्दबोधप्रकारतानवच्छेदकत्वनिर्वाह । इदं च विशिष्टशक्तपदस्थले उपलक्षितवाचकगगनादिपदस्थले च यद्धर्मं धर्मितावच्छेदकीकृत्य शाब्दबोधविषयत्वेन सङ्केतविषयत्वग्रहस्तद्धर्मप्रकारक एव बोध उत्पद्यत इति तत्र शब्दाश्रयत्वाद्यनियतधर्मप्रकारकबोधनिर्वाह ।

दीधितिकारास्तु सर्वत्रैव शाब्दबोधप्रकारतायां तदवच्छेदकतायां च सङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वतदवच्छेदकत्वरूपशक्यतावच्छेदकत्वतदवच्छेदकत्वज्ञानं हेतु । यथा घटपदपशुपदस्थले घटत्वलोमत्वादे । *गगनपदस्थले* च शब्दाश्रयत्व एव निरुक्तशक्यतावच्छेदकत्वसत्त्वात् शब्दाश्रयत्वप्रकारक एव शक्तिभ्रमाजन्यबोध इति घटगगनपदयोरविशेष इति वदन्ति ।

तन्मते बुद्धिप्रकारत्वस्य शाब्दबोधप्रकारतानवच्छेदकत्वं दुरुपपादम् । नानार्थहर्यादिपदस्थले चोपलक्षणीभवता येनाप्यनुगतरूपेण प्रवृत्तिनिमित्तानामभावादशक्यस्वरूपसदनुगतरूपसत्त्वेऽपि शक्तिभेदान्नानार्थतानिर्वाह । बुद्धिप्रकारविशिष्टवाचकं तत्पदमिति सर्वोपसंहारेण व्युत्पत्तिसौकर्यादपूर्वचैत्रत्वादिविशिष्टे तदादिघटितवाक्यात्प्रवृत्त्याद्यनुपलम्भेऽपि न तत्प्रकारकशाब्दबोधस्य तदादिपदादनुपपत्ति । अथ सामान्यतो व्युत्पत्तौ चैत्रत्वाद्यपूर्वधर्मविशिष्टगोचरत्वेऽपि स्वरूपतस्तद्धर्मप्रकारेण शक्त्यग्रहात्स्वरूपतस्तत्प्रकारकोपस्थितेस्तादृशशाब्दबोधस्य चानुपपत्ति । जातिमान् हस्तिपकसम्बन्धीति ज्ञानात्स्वरूपतो हस्तित्वादिप्रकारकस्मरणानुदयात्स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसम्बन्धिधिय एव हेतुत्वात् ।

यत्त्वनुगमकधर्ममोपवशात्सामान्यव्युत्पत्त्यधीनं स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणं सुघटमिति ततस्तादृशचैत्रत्वादिप्रकारकपदार्थोपस्थितिशाब्दबोधयोर्नानुपपत्तिरिति ।

तदसत्, स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकानुभवस्य हेतुताया व्यवस्थापनात्मोपदर्शेन तद्विशिष्टतत्प्रकारकानुभवाद्विशिष्टतत्प्रकारकस्मरणानुपपत्तेरिति चेन्न, प्रकरणादिना निर्विशेषणकचैत्रत्वाद्यवच्छिन्ने चक्तृबुद्धिविषयताग्रहे वक्तृबुद्धिविषयतावच्छेदकविशिष्टवाचक तत्पदमिति स्मृतौ सत्यामविशिष्टचैत्रत्वादिविशिष्टवाचकतायास्तदादिपदेन मानसज्ञानस्यैवान्ततः सम्भवेन सर्वसामञ्जस्यात्। न च चैत्रोऽस्यबुद्धिस्थ इति निश्चयेऽपि विशिष्य चैत्रत्वादिविशिष्टवाचकताया अनिश्चयेन तत्प्रकारकशाब्दबोधानुपपत्तिरिति वाच्यम्, यद्विशिष्टविषयकबुद्धिप्रयोज्यं यत्पदं तत्तद्विशिष्टवाचकमिति सामान्यतः व्याप्त्यवधारणेन प्रकरणाद्यधानस्य चैत्रत्वविशिष्टबुद्धिप्रयोज्यत्वग्रहस्य विशेषदर्शनतया तद्विशिष्टवाचकतासंशयविघटकत्वेन विशिष्टवाचकताया सुनिश्चेयत्वात्। नन्वेवमपि स्वप्रयोजकबुद्धिप्रकारत्वे स्वपदार्थस्याननुगमेन सकलतत्पदाद्युपसंहारेण व्युत्पत्तिर्दुर्घटेति यत्पदव्यक्त्यधीनप्रवृत्तिर्नोपलभ्या तस्या व्युत्पत्त्यनुपपत्तेः तदधीनशाब्दबोधानुपपत्तिवारणमशक्यमेवेति वाच्यम्, तदननुगमोद्धारस्यावहिते परिचिन्तनीयत्वादित्यलमधिकेन।

तत्रातिरिक्तेति। शाब्दबोधनिरूपितावान्तरवाक्यार्थबोधरूपपदार्थोपस्थितिनिष्ठजनकतावच्छेदककुक्षिगर्भेऽनुमितिजनकतावच्छेदकोक्तधर्मोप्रविष्टस्य पदवृत्तिज्ञानजन्यत्वस्य निवेशादित्यर्थः। यत्रावान्तरवाक्यार्थबोधानन्तरं चरमपदज्ञानं तदुत्तरं चरमपदार्थस्मृतिस्तत्र तदानीमवान्तरवाक्यार्थगोचरशाब्दबोधस्य विनष्टत्वात्। महावाक्यार्थबोधहेतुत्वासम्भवेऽपि यत्र तादृशशाब्दबोधोत्पत्तिद्वितीयक्षण एव पूर्वोत्पन्नचरमपदज्ञानात् चरमपदार्थस्मृतिस्तात्पर्यविषयकसमूहालम्बनरूपा तत्रैव तादृशशाब्दबोधस्य महावाक्यार्थबोधहेतुत्वम्। अन्यत्र समूहालम्बनरूपतावत्पदज्ञानजन्यतावत्पदार्थगोचरसमूहालम्बनस्मृतिरेव गतिः।

इदं तु बोध्यम्—अवान्तरवाक्यार्थबोधस्य महावाक्यार्थबुद्धौ शाब्दत्वनातिपुरस्कारेणैव कारणता न तु पदजन्यत्वेन गौरवात्। न च तथा सति विशिष्टविषयकशाब्दबोधादिव विशिष्टे गृहीतवृत्तिकपदजन्यविशिष्टस्मृतेरपि विशिष्टे इतरान्वयबोधोत्पत्त्या तत्र विशिष्टविषयकशाब्दधियो व्यभिचारः स्यादिति तादृशस्मृतिसाधारणपदजन्यत्वेनैव हेतुत्वमुचितमिति वाच्यम्, पदज्ञानजन्यत्वेन स्मृतिशाब्दधियोरनुगमे पदरूपलिङ्गज्ञानजन्यार्थविषयकानुमित्या शाब्दप्रसङ्गात्, वृत्तिमत्पदजन्यस्मृतित्वशाब्दत्वाभ्यां कारणताद्वयस्यावश्यकत्वान्मिथो व्यभिचारस्य चागतया तत्तत्कारणाव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशेनैव वारणीयत्वात्। यत्राथा

न्तरवाक्यार्थबोधान्महावाक्यार्थधीस्तन्नाप्यवान्तरवाक्यार्थधीघटकार्थान्तरस्य पदजन्यस्मृतेरवान्तरवाक्यार्थबोधानन्तरमवश्यकल्पनीयतया तस्याः सकलपदार्थविषयकत्वोपगमेन पदार्थस्मृतेरवान्तरवाक्यार्थधीजन्यशाब्दबोधे व्यभिचारवारणं तु न सम्यक्। विशिष्टे गृहीतवृत्तिकपदार्थानां विशिष्टस्मृतेरिव विशेष्यमात्रे गृहीतवृत्तिकपदार्थानामुद्बोधकान्तरवशाद्विशेषणमनवगाहमानाया विशिष्टस्मृतितो ऽन्यविशिष्टपक्षादिविषयकेतरान्वयबोधकारणत्व गृहीतविशिष्टवृत्तिकपदजन्योपस्थितित्वेनैव विशिष्टविषयकस्मृतेस्तादृशान्वयबोधहेतुतया वक्तव्यतया विशिष्टवृत्तिग्रहानपेक्षावान्तरवाक्यार्थशाब्दधीजन्यबोधे तस्या व्यभिचारस्यावश्यकत्वात्, प्रकारान्तरेण तद्वारणे तात्त्पदार्थविषयकस्मृतिकल्पनाया अकिञ्चित्करत्वात्। अतोऽवान्तरवाक्यार्थधिय शाब्दत्वपुरस्कारेण कारणत्वान्तरमावश्यकमिति पदजन्यत्वपदं पदाजन्यबोधव्यावृत्तधर्मपरम् तच्च शाब्दत्वादिकमपीति। अधिकप्रवेशेन निरुक्तनिश्चयत्वपर्याप्तजनकतावच्छेदकताघटितस्य लक्षणस्य नातिव्याप्तिरित्युक्त्वा निश्चयत्वप्रवेशेन पर्याप्तनिवेशेऽपि नातिव्याप्तिरित्याह निश्चयत्वेति। परामर्शसहायानभ्युपगमेन सहायान्यत्वस्यासंयुक्त्या शाब्दत्वादेर्निवेशनीयतया ज्ञानत्वस्य च पदजन्यबुद्धावव्यावर्तकत्वादिति भावः॥

व्याप्तिविशिष्टहेतुरूपविशेषणतावच्छेदकविशिष्टस्य तद्विशेषणधर्मितावच्छेदकपर्यन्तत्वाद्यवच्छिन्नस्य वैशिष्ट्यावगाहिनि शाब्दबोधे प्रत्यक्षादिसाधारणविशिष्टवैशिष्ट्यबोधनिष्ठतद्विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतामादाय तत्राति शङ्कते न चेत्यादिना॥

(टी०) न च तथापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात् तादृशे शाब्दबोधे प्रत्यक्षे चातिव्याप्तिः, दण्डो रक्तो न वेति संशये रक्तदण्डवानयमिति ज्ञानानुदयादिति वाच्यम्। ज्ञानोपरमेऽपि विशिष्टविषयोद्बोधनेनेच्छाद्यनुपपत्तेः कृतेश्च साक्षात्काराद्विशेषणविषयकाद्विशिष्टसंस्कारादेव विशिष्टस्मरणाच्च तद्विषयकगुणानां तत्र हेतुत्वे न्यूनवृत्तेर्ज्ञानत्वस्य तत्प्रवेशादिच्छादिसंस्काराद्यनुमितेरनुदयात् संस्काराद्यन्यतमत्वेन गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात्॥

(गा०) 'तथापि' अवान्तरवाक्यार्थबोधादिनिष्ठशाब्दबोधसाधारणकारणतामादायातिव्याप्तेरुक्तरीत्या वारणेऽपि। 'तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रतीति' पर्यन्तत्वादिरूपधर्मितावच्छेदकावच्छिन्नविशेषणतापन्नस्यातिव्या-

शिष्टधर्मा दि विशिष्टवैशिष्ट्यज्ञानत्वावच्छिन्न प्रतीत्यर्थ। 'तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन' पर्वतत्वाद्यवच्छिन्नविशेष्यकत्वानि विशिष्टधर्मादिप्रकारकनिश्चयत्वेन। 'तादृशे' वह्निव्याप्यधर्मवत्पर्वतवान्देश इत्यादि विशिष्टवैशिष्ट्यबोधरूपे, शाब्दबोधेऽतिव्याप्तेर्वारितत्वात् तस्यैव प्रथममुपन्यास, स्मृतिव्यावृत्तधर्मस्य जन्यतावच्छेदकत्वे स्मृतौ नातिव्याप्तिसम्भव। उपमिते पदवाच्यत्वावगाहिन्या तादृशविशिष्टवैशिष्ट्यबोधकरूपता प्रायशो न सम्भवत्यत प्रत्यक्षशाब्दबोधमात्रोपादानम्।

अथ किमिदं विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकं विशिष्टवैशिष्ट्यबोधत्वम्, न तावद्विशिष्टप्रतियोगिकं यद्वैशिष्ट्य तदवगाहित्वम् व्यधिकरणसम्बन्धावगाहिविशिष्टभ्रमे व्यभिचारात्। नापि विशिष्टप्रकारकत्वम्, काञ्चनमयपर्वतमिमानित्यादिभ्रमप्रकारीभूत विशिणप्रसिद्धे। तत्र काञ्चनमयो वह्निरित्यादिज्ञानानपेक्षणीयतापत्ते। नापि विशेषणान्तरप्रकारेण भासमानप्रकारकत्वम्, रक्तो दण्ड दण्डवान् पुरुष इति समूहालम्बनस्थलेऽपि रक्तो दण्ड इति ज्ञानापेक्षाप्रसङ्गात्। नापि विशेषणान्तरप्रकारतानिरूपितविशेष्यत्वावच्छिन्नप्रकारताकत्वम्, रक्तत्वादिप्रत्येकपदार्थोपस्थितिमूलके रक्तदण्डवानिति ज्ञाने व्यभिचारात्। न हि तादृशाकारकबोधो रक्तो दण्ड इत्यादिविशिष्टज्ञानानन्तरमेव जायत इति दीधितिकाराद्यनुमतम्। बाधग्रन्थे काञ्चनमयत्वविशिष्टवह्नेरप्रसिद्ध्यैवोपनीतकाञ्चनमयत्वादिविशिष्टवह्निवैशिष्ट्यानुमिति शुद्धवह्नित्वावच्छिन्नव्याप्यधर्मादिमत्त्वज्ञानादिना पर्वते न सम्भवतीति कथ तद्विरोधितया व्यधिकरणकाञ्चनमयत्वावच्छिन्नवह्न्यभावस्य दोषान्तरासङ्कीर्णबाधस्य हेत्वाभासतेति मणिकारोक्तेर्विशिष्टविशेषणज्ञान विनापि विशेष्ये विशेषण तत्र च विशेषणान्तरमिति रीत्या तादृशानुमितिसम्भव इत्यभिधाय स्वय दूषणीयत्वात्, विशिष्टयाविज्ञान विनापि तद्घटकप्रत्येकपदार्थोपस्थितिभ्यो विशिष्टपरामर्शात्पत्त्यानुमितिरिति मिश्रेणान्येन चाभिधानात् एकत्वविशिष्टकर्तु पूर्वमज्ञानेऽपि क्षितिरेककर्तृकेत्यनुमितेरनेन स्वीकृतत्वाच्च। अत्राहु विशेषणान्तरवत्त्वादिविशेष्यतापन्नदण्डादिप्रकारक ज्ञानं द्विधा रक्तत्वाद्यवच्छिन्नप्रतियोगिकत्वेन दण्डादिवैशिष्ट्यावगाहि तद्रूपानवच्छिन्नतद्वैशिष्ट्यावगाहि च, तादृशविशिष्टप्रतियोगिकत्व च दण्डादिप्रकारतानिरूपकससर्गतायामवच्छेदकतया भासते तद्विशिष्टसयोगादेरेव दण्डादिससर्गतया भानात्। दण्डादि विशेषणतापन्नरक्तत्वादेरेव वा स्वावच्छिन्नप्रतियोगिकसयोगात्मकपरम्परासम्बन्धेन पुरुषादौ प्रकारता तादृशे विशिष्टवैशिष्ट्यबोधे एव विशेषणतावच्छेदकप्रकारकधी कारण न तु विशिष्टविशेषणावगाहिन्यपि

रक्तत्वादिकं वैशिष्ट्यप्रतियोगिन्युपलक्षणतयावगाहमाने द्वितीयबोधे। अत एव च प्रतियोगिविशेषिताभावबुद्धौ घटो नास्तीत्याकारिकायां प्रतियोगिनि प्रकारीभवतो घटत्वादे प्रतियोगितावच्छेदकतयैव भानमिति तत्र घटत्वादिप्रकारकज्ञानापेक्षानियम। यद्यपि विशिष्टविशेषणावगाहिज्ञानमात्र एव विशिष्टज्ञानापेक्षायां मणिकारादेः स्वरसस्तथापि लाघवोपनीतैकत्वादिविशिष्टत्वर्यनुमितिर्वैशिष्ट्यज्ञानमनपेक्ष्यैवोत्पद्यत इत्यनुरोधाद्दीधितिकारादीनां दर्शितविशेषादर। दण्डो नास्ति रक्तो नास्तीत्यादिज्ञानदशाया नियमतो रक्तदण्डो नास्तीत्यादिज्ञानोत्पादविरह एवोक्तविशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकविशेषणधीहेतुतास्ल्पक। दण्डो रक्त इत्यादिज्ञानदशायामपि कदाचित्तादृशसमूहालम्बनबुद्धावुत्पद्यमानाया दण्डो रक्तो नास्तीतिबुद्धेरनुत्पादेऽगत्या तत्रानानुगतस्य कस्यचित्प्रतिबन्धकता कल्प्यत इति विवेचनीयं चेदमधिकमन्यत्र।

केचित्तु रक्तदण्डवानित्यादिज्ञानीया रक्तत्वादिविशेष्यतापन्नदण्डादिनिष्ठा प्रकारता द्विविधा। काचिद् दण्डादिविशेषणतापन्नरक्तत्वाद्यन्तर्भावेन पर्याप्ता काचित्केवलदण्डादावेव। तत्र प्रथमा विशेषणतावच्छेदकप्रकारकज्ञानाधीना नापरा, पुरुषादिविशेष्यतानिरूपितप्रकारताया रक्तत्वादिवृत्तित्वेऽपि पुरुषो न रक्त इत्यादिधीर्न तादृशप्रकारताकोक्तज्ञानविरोधिनी इत रविशेषणतानवच्छिन्नाया पुरुषादिविशेष्यतानिरूपितरक्तत्वादिप्रकारताया एव तत्प्रतिबध्यतावच्छेदकत्वादित्याहुः।

अपरे तु यथा विशेष्यतानिरूपितप्रकारतामात्रं न विशेष्यतावच्छेदकता भूतल घटवदित्यादौ भूतलत्वादेर्घटादिधर्मितावच्छेदकतापत्तेर्वैपरीत्यस्यापि प्रसङ्गात्। अपि तु विलक्षणैव विषयता सा च प्रकारतातिभिन्ना तदन्यैव वा। एवं विशेषणतावच्छेदकतापि विलक्षणविषयता तन्निरूपकदण्डादिनिष्ठप्रकारताशालिनि बोधे विशेषणतावच्छेदकरक्तत्वादिप्रकारकज्ञानापेक्षा प्रत्येकोपस्थितिमूलकं रक्तदण्डवानयमित्यादिज्ञानं च न तथाविधविलक्षणप्रकारताशालीति वदन्ति। तदुभयमपि न सम्यगिव प्रतिभाति, विशिष्टज्ञानपूर्वकस्तदपूर्वकस्योरविलक्षणाकारज्ञानयोर्विषयभेदमन्तरेण विषयतावैलक्षण्यस्याननुभवात्। विशिष्टज्ञानकार्यतावच्छेदकतया तत्सिद्धिरित्यपि बालप्रलपितं तादृशविलक्षणविषयतासिद्धावेव तन्नियामकतया विशिष्टज्ञानहेतुतासिद्धेः। यदि च विशिष्टप्रतियोगिकविलक्षणसंसर्गावगाहिनि बोध एवान्वयव्यतिरेकाभ्यां विशिष्टविशेषणज्ञानं हेतुः तज्जन्यतावच्छेदकं यदि विशिष्टप्रतियोगिकत्वावच्छिन्नसंसर्गतावच्छिन्नत्वं तदा गौरवम् उक्तवैलक्षण्यपुरस्कारेण प्रकारताविशेषस्य कार्यतावच्छेदकत्वे च लाघवमिति विशिष्टप्रति

योगिकवैशिष्ट्यावगाहित्वेव ज्ञाने प्रकारताया व्यासज्यवृत्तित्वादिरूपवैलक्ष-ण्यसिद्धिरप्रत्यूहेत्युच्यते तदा न विवदामहे इति प्रकृतमनुसराम ।

ननु यथा विशेषणतावच्छेदकरक्तत्वांशे निर्धर्मितावच्छेदकतद्विशिष्ट वैशिष्ट्यबोधे तत्प्रकारकज्ञानत्वेनैव हेतुता न तु तत्र संशयान्यत्वप्रवेश तथा तदंशे सधर्मितावच्छेदककविशिष्टवैशिष्ट्यबोधेऽपि तत्तद्धर्मितावच्छेदकाव च्छिन्नविशेष्यकतत्प्रकारकज्ञानत्वेनैव संशयसाधारणहेतुता स्वीनियते निश्चयत्वेन विशेषणतावच्छेदकप्रकारकधीहेतुताया मणिकारादिभिरनाभिधा नादिति कथमतिव्याप्तिरतस्तया हेतुतामनुभवेन द्रढयति दण्डो रक्तो न वेति । ननु दण्डो रक्तो न वेति संशयानन्तरं रक्तदण्डवानिति निश्चयानुत्पाद स्यानुभवसिद्ध, स च विशेषणसन्देहे विशिष्टसन्देहस्यौचित्यार्जितत्वा दुपपद्यते निश्चयोत्पत्तौ संशयसामग्र्यभावस्यापेक्षितत्वाद्रक्तदण्डवान वेति विशिष्टसंशयस्त्वनुभवसिद्ध एवेति निश्चयत्वेन हेतुताया साधक विरहो बाधकस्य च सत्त्वम् ।

अत्र केचित् यदि विशेषणतावच्छेदकप्रकारकसंशयादपि विशिष्टवैशि ष्ट्यबोध उपेयते तदाऽप्रामाण्यशङ्कास्कन्दितादपि ज्ञानात्तदुपगम आव श्यक ज्ञानाप्रामाण्यसन्देहेन विषयसन्देहस्यैव जननात् संशयेऽप्रामाण्यसं शयस्याकिञ्चित्करत्वात् । अतोऽप्रामाण्यनिश्चयानास्कन्दितज्ञानात्फलवारणा याप्रामाण्यनिश्चयानास्कन्दितत्वेनैव हेतुता वक्तव्येत्यप्रामाण्यज्ञानीयगुरुश रीरनिश्चयत्वनिवेशात् गौरवमित्यप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वेन हेतुत्व मेवोचितमिति विशेषणसंशयाद्विशिष्टसंशयानुपपत्तिरेवाधकमपि कथञ्चि दुद्धरणीयमिति वदन्ति ।

वस्तुतस्तु संशयस्य विशिष्टवैशिष्ट्यबोधजनकत्वे दण्डो रक्तो न वेत्या दिसंशयाद्रक्तत्वतदभावाद्युभयविशिष्टदण्डादिवैशिष्ट्यावगाहिबोधोऽपि स्या त्, न चेष्टापत्तिः, तादृशज्ञानस्यैकत्र दण्डादौ धर्मिणि विरुद्धोभयप्रकारक-तया रक्तत्वादिनिश्चयत्वालम्भनात् विशेष्यान्तरविशेषणतापन्नधर्मिकसंश यस्य चानुभवविरुद्धतया तत्र संशयत्वोपगमासम्भवाच्च । अत एव च नैवतं विशेष्ये विशेषणमिति रीत्या रक्तदण्डवानितिज्ञानेऽपि उक्तसंशय कार्यसहवृत्तितया प्रतिबन्धक इति वदन्ति ।

न च तत्र संशयस्य प्रतिबन्धकत्वे विशिष्टवैशिष्ट्यबोधसाधारणधर्म एव तत्प्रतिबध्यतावच्छेदकोऽस्तु तावतैव तत्र संशयानन्तरतद्विशिष्टवैशि ष्ट्यबोधवारणे तत्र तत्प्रकारकज्ञानत्वेनैव हेतुत्वमुचितमिति वाच्यम्, तत्सं शयद्वितीयक्षणे कथञ्चित्तत्प्रकारकनिश्चये तद्द्वितीयक्षणे तद्विशिष्टवैशिष्ट्य धीनिर्वाहाय विशिष्टवैशिष्ट्यविषयताभिन्नवैशिष्ट्यविषयताया एव संशयप्रति बध्यतावच्छेदकत्व वाच्यमिति निश्चयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वे संशयोत्तरं विनापि निश्चयं विशिष्टवैशिष्ट्यधीप्रसङ्गात् । न च यत्र दण्डे रक्तत्वस्य संशय पुरुषे च दण्डस्यानुमितिसामग्री रक्तेतरदण्डस्य पुरुषे

बाधग्रहश्च तत्र संशयसत्त्वेऽपि केवलं विशेष्ये विशेषणमित्यादिरीत्या रक्तदण्डवान्पुरुष इत्याद्यनुमित्युत्पत्तेः कथं तादृशबोधे संशयप्रतिबन्धकतेति वाच्यम्, प्रत्यक्षं प्रत्येव तत्प्रतिबन्धकताया वक्तव्यत्वात्। अलौकिकत्वमपि तत्र विशेषणं देयं संशयसत्त्वेऽपि लौकिकसन्निकर्षाद्रक्तदण्डवानिति ज्ञानोत्पत्तेः। लौकिकप्रत्यक्षसामग्र्या विपरीतज्ञानविरोधितयैव च विशेषणधर्मिकलौकिकप्रत्यक्षात्मकसंशयस्य नापत्तिः। एवं च विशिष्टवैशिष्ट्यबोधव्यावर्तकविशेषणानवच्छिन्नेऽपि विशेष्ये विशेषणमिति रीत्या बोधे विशेषणे तद्विशेषणसंशयस्य प्रतिबन्धकत्वेऽपि दण्डो रक्तो न वेति संशयबलादितरबाधाद्युपनीतरक्तत्वादिविशेषितदण्डाद्यनुमितौ रक्तत्वादिविशिष्टवैशिष्ट्यावगाहिताप्रसङ्गस्य तादृशसन्देहानन्तरजातरक्तत्वादिविशेषितदण्डादिप्रकारकलौकिकप्रत्यक्षे विशिष्टवैशिष्ट्यावगाहिताप्रसङ्गस्य च वारणाय तद्बुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुताकल्पनमावश्यकम्।

यत्तु निश्चयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वे निश्चयत्वघटकयोस्तदभावाप्रकारकत्वतत्प्रकारकत्वदलयोर्विशेषणविशेष्यभावे विनिगमकाभावेन कारणताबाहुल्यमिति तदभावप्रकारकज्ञानत्वेन संशयस्य प्रतिबन्धकत्वमेव कल्पयितुमुचितम्। यत्र संशयद्वितीयक्षणे स्मरणादिरूपस्तन्निश्चयस्तत्र द्वितीयक्षणे संशयनाशे सत्येव विशिष्टबोध उपेयत इति।

तदसत्, तथा सति तुल्ययुक्त्यानुमित्यादावपि लिङ्गादिसन्देहस्य तदभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वापातात् निश्चयत्वाच्छिन्नहेतुताघटितानुमितिलक्षणेऽसम्भवापत्तेः।

यत्तु विशिष्टवैशिष्ट्यबोधं प्रति निश्चयत्वेन हेतुत्वे विशेषणसंशयजन्यविशिष्टसंशयानुपपत्तिरिति बाधकम्, तदप्यकिञ्चित्करम्। दण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चयरूपकोटितावच्छेदकावच्छिन्नप्रसिद्धिस्थल एव चैत्रीयो दण्डो रक्तो न वेति विशेषरूपावच्छेदेन रक्तत्वाभावावगाहिसंशयात्मकदण्डवान्न वा चैत्र इति विशिष्टसंशयोदयात् तथाविधनिश्चयस्य तादृशसंशयाविरोधित्वात्।

यत्तु तत्र विशेष्ये विशेषणमित्यादिरीत्यैव विशिष्टकोटेरवगाही संशयो न तु विशिष्टवैशिष्ट्यावगाहीति समाधानम्, तदसत्, धर्मिणि रक्तत्वादिविशेषितदण्डादेरुक्तरीत्या भानसम्भवेऽप्यभावांशे विशिष्टप्रतियोगिकवैशिष्ट्यभाननियमात्। अभावांशे रक्तत्वादिविशिष्टदण्डादिवैशिष्ट्यभानस्यावश्यकत्वात्तदुपपत्तेर्दर्शितप्रकारं विना असम्भवात्। न च लौकिकप्रत्यक्ष एवाभावांशे तद्धर्मविशेषितप्रतियोगिनी प्रकारतया भासमाने तद्विशिष्टवैशिष्ट्यावगाहितानियम इति संशये कोट्योरुपनयादेव भानाद्विशिष्टवैशिष्ट्यानवगाहनसम्भव इति वाच्यम्, दण्डसामान्याभावस्यैव रक्तत्वाद्युपलक्षितप्रतियोगिकत्वादभावांशे रक्तत्वादिविशिष्टदण्डादिरूपप्रतियो-

गिवेशिष्ट्यानवगाहने तादृशसंशयस्य दण्डादिसामान्याभावावगाहितया दण्डवानिति विशिष्य निश्चयदशायां दण्डादौ रक्तत्वादिसंशयाद्विशिष्टसंश यानुपपत्तेरित्यधिकमन्यत्रानुसन्धेयम् ।

रक्तो दण्डो न वेति संशयानुव्यवसाये च रक्तत्वादिविशिष्टदण्डादि-रूपविषयप्रकारेण न ज्ञानभानं किंतु दण्डादिविशेषणतानापन्नरक्तत्वादि-प्रकारत्वेनैवेति न तदनुपपत्तिरिति संक्षेपः । विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेनैव हेतुता न तु तादृशसंशयान्य-ज्ञानत्वेनेति संशयान्यत्वविशिष्टज्ञानत्वरूपनिश्चयत्वावच्छिन्नकारणताघटि-तलक्षणस्य न तत्रातिव्याप्तिरिति समावत्ते ज्ञानोपरमेऽपीत्यादिना ज्ञानत्व स्याप्रवेशादित्यन्तेन । ज्ञानत्वस्यावच्छेदकगर्भाप्रवेशे हेतुगर्भविशेषणं न्यून वृत्तीति । न्यूनवृत्तित्वं चावच्छेद्यत्वाभिमतहेतुताया अव्यापकत्वम् । ज्ञा नत्वानिवेशेऽनुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षापत्ति स्मृता वेवोद्बोधकस्य हेतुतया प्रत्यक्षे च तद्विरहस्याकिञ्चित्करत्वात् तेन विनापि ज्ञानेन विशिष्टवैशिष्ट्यप्रत्यक्षजननादिति तु न देश्यम् । अगत्यो-द्बोधकासमवधानविशिष्टसंस्कारत्वाभावस्यावच्छेदककोटौ प्रवेशेन तदापत्ते वारणीयत्वात् । कालान्तरे उद्बोधकसमवहितसंस्काराद्विशिष्टवैशिष्ट्या वगाहिस्मरणनिर्वाहाय संस्कारभेदमुपेक्ष्य विशिष्टसंस्कारत्वाभावानुधा वनम् । उद्बोधकसमवहिते संस्कारे च विशेषणाभावाद्विशिष्टसंस्कारत्वा भाव सुलभ । भेदस्याप्यव्याप्यवृत्तित्वे तूद्बोधकाभावविशिष्टसंस्कारभेद एव निवेश्य । अत एव ज्ञानत्वाप्रवेशे लाघवासम्भवेन न्यूनवृत्तित्वमेव तदनि वेशप्रयोजकतयाऽभिहितम् । तद्विषयकगुणानां तत्तद्धेतुत्व इति न्यूनवृत्तिता प्रकाशनाय, 'तद्विषयकगुणानां' विशिष्टविशेषणावगाहिनामिच्छाद्वेषकृति संस्काराणाम् । ननु विशिष्टविषयकेच्छादिस्थलेऽपि तज्जनकविशिष्टज्ञान स्यावश्यकत्वात् सर्वत्र ज्ञानमेव हेतुर्न त्विच्छादिकमित्याशङ्कायामिच्छा देर्विशिष्टवैशिष्ट्यबोधहेतुत्वे हेतुमाह ज्ञानोपरमेऽपीत्यादिना । ज्ञानोपरमेऽपि, इच्छादिजनकविशिष्टज्ञाननाशेऽपि । विशिष्टविषयोपधानेनेति । रक्तत्वादिविशि ष्टदण्डादिरूपविषयप्रकारेणेत्यर्थः । इच्छाद्वेषयोः साक्षात्कारादित्यन्वयः । रक्तदण्डमिच्छामि रक्तदण्डं द्वेष्मि इत्याकारकेच्छाद्वेषसाक्षात्कार इच्छा त्वादिप्रकारक इच्छादिद्वितीयक्षणोत्पन्नेच्छात्वादिनिर्विकल्पकादिच्छावृत्ती यक्षण एव उत्पत्स्यते तत्पूर्वक्षण एव जनकज्ञानं नश्यतीति न विशिष्ट वैशिष्ट्यावगाहीच्छाप्रत्यक्षाव्यवहितप्राक्क्षणे ज्ञानसत्त्वमिति इच्छादिकमेव हि तत्र हेतु ।

यदि चेच्छात्वादिनिर्विकल्पकेऽपि विशिष्टविषयप्रकारेणेच्छादिकं भासते तथा च तदेव निर्विकल्पकमिच्छादौ विशिष्टवैशिष्ट्ययोधात्मक मिच्छासाक्षात्कारपूर्वं स्यास्यतीति तादृशज्ञानस्य न व्यभिचार । अत एव नरसिंहाकारकं तन्निर्विकल्पकमितिसिद्धान्त इत्युच्यते । तत्रापि यत्र वि

शिष्टविषयकफलसाधनताज्ञानं प्रथमं तदुत्तरं च फलेच्छा तदनन्तरं च विशिष्टोपायविषयिणीच्छा तत्रेच्छात्वनिर्विकल्पकरूपे विशिष्टविषयकेच्छासाक्षात्कारे एवं द्विष्टसाधनताज्ञानानन्तरजातफलद्वेषजन्योपायद्वेषविषयकसाक्षात्कारे च ज्ञानस्य व्यभिचारो दुर्वार एव द्विक्षणस्थायिनो ज्ञानस्य तत्पूर्वक्षण एव नाशादिति भावः ।

कृतिसाक्षात्काराव्यवहितपूर्वं च ज्ञानस्य विनश्यदवस्थस्यापि सत्त्वं सम्भावितमपि नेति सूचयितुं स्वातन्त्र्येण कृतिसाक्षात्कारे व्यभिचारं दर्शयति कृतेश्चेति । अत्रापि विशिष्टविषयोपधानेनेत्यनुषज्यते । ननु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतया विशेषणज्ञानं विना विषयविशिष्टकृत्यादिसाक्षात्कार एव न भवितुमर्हतीति अगत्या तत्पूर्वं विषयस्मरणमेव कल्पनीयम् । तथा च विशेषणतावच्छेदकप्रकारकज्ञानत्वावच्छिन्नस्यापि न तत्र व्यभिचार इत्यत आह विशेषणेति । ज्ञानोपरमेऽपीत्यनुषज्यते । रक्तत्वादिरूपविशेषणज्ञाननाशेऽपि रक्तत्वादिविषयकाद्रक्तत्वादिविशिष्टदण्डादिविषयकसंस्कारादेव तादृशविशिष्टविषयकस्मरणोत्पत्तेरित्यर्थः । तथा च तत्र व्यभिचारभयेन विशेषणज्ञानस्यापि विशेषणविषयकत्वेनैव विशिष्टधीहेतुता वाच्या । तथा च विशेषणविषयककृत्यादित एव विषयविशेषितकृत्यादिसाक्षात्कारसम्भवान्न ज्ञानापेक्षेति विशिष्टवैशिष्ट्यबुद्धावपि विशिष्टविषयकगुणमात्रस्य हेतुत्वम्, इत्थं च विशिष्टवैशिष्ट्यावगाहिसंस्कारादेव विशेषणतावच्छेदकप्रकारकज्ञानं विनैव तादृशस्मरणनिर्वाहोऽपीति भावः । एवमनुपनायकज्ञानस्यापि सविषयकत्वेन हेतुतातो न विषयोपनयार्थं ज्ञानापेक्षेति बोध्यम् । अनुद्बुद्धसंस्कारात् उपनीतभानवारणाय ज्ञानप्रत्यासत्तिहेतुतायामविशिष्टसंस्कारभेद एव निवेश्य न तदुद्बोधकासमवधानविशिष्टसंस्कारत्वाभावादि, कालान्तरीणोद्बोधकसमवधानविशिष्टसंस्कारादुपनीतभानानुपगमे क्षतिविरहात् । ततः स्मरणोत्पादे क्षणैकविलम्बेनैवोपनीतभाननिर्वाहात् । न च स्मरणकल्पने गौरवाद्विशिष्टसंस्कारत्वाभावनिवेशनमेवोचितमिति वाच्यम्, उद्बोधकानामननुगततया तदभावसहस्रस्य निवेशनीयतया महागौरवात् । लघुरूपेण कारणतासिद्धौ तन्निर्वाहकस्मरणकल्पनागौरवस्य फलमुखत्वेनादोषत्वात् । अत एव निर्विकल्पकादिस्मरणकल्पनेन विशेषणधियोऽपि विशेषणज्ञानत्वेन हेतुत्वमग्रे व्यवस्थापयिष्यते इदानीं तु निर्विकल्पकस्मृतिर्न सिद्धान्तसिद्धा कृत्यादिसाक्षात्कारश्चान्तरा विषयस्मरणं विनैवानुभवसिद्ध इत्याशयेन विशेषणज्ञानादिहेतुतायां ज्ञानत्वाप्रवेशोऽभ्युपगत इत्यवधेयम् ।

अनुमितावपि सविषयकत्वमात्रेण न कुतो हेतुत्वमित्याकाङ्क्षायामाह इच्छादीति । व्याप्यवत्पक्षविषयकेच्छादीत्यर्थः । ज्ञानस्य चिरान्तरितत्वविरहेण कदाचिदिच्छादेरनुमित्युत्पादकतायामिष्टापत्तिः सम्भवतीत्याशङ्क्याह संस्कारश्चेति । व्याप्यविशिष्टपक्षविषयकसंस्काराच्चेत्यर्थः । ननु विशिष्टवै-

शिष्ट्यबोधादिहेतुतायामनुद्बुद्धसंस्कारान्यत्ववदनुमितिहेतुतायामपि ज्ञानत्वमुपेक्ष्य संस्कारस्येच्छादेश्च व्यावर्तनाय तदन्यत्वमेव किं न निवेश्यत इति तटस्थप्रश्ने उत्तरयति संस्काराद्यन्यत्वस्येति । अगत्या तु विशेषणतावच्छेदकप्रकारस्य गुणहेतुतायामेव च्छेदकगौरवसहिष्णुतेति भावः । अतिव्याप्तिशङ्कया तु संस्काराद्यन्यत्वस्यादिग्रन्थो नावतरति । संस्काराद्यन्यत्वेनानुमितिहेतुत्वेऽपि उभयत्रैकरूपेणाहेतुतयातिव्याप्तेरनवकाशात् । ज्ञानत्वघटितधर्मावच्छिन्नकारणतावच्छेदकलक्षणेऽसम्भवशङ्कानिरासपरोऽयं ग्रन्थ इत्यप्याहुः ॥

परामर्शप्रत्यक्षं प्रत्यनुमित्यादिव परामर्शत्वेन हेतुता परामर्शं विना तत्प्रत्यक्षानुदयादित्यभिमानमूला परामर्शप्रत्यक्षातिव्याप्तिशङ्का तत्र तेन रूपेण हेतुतां निराकुर्वाणो निरस्यति न चेति ।

(दी०) न च परामर्शानुव्यवसायेऽतिव्याप्तिः, सामान्यतः प्रत्यक्षे विषयत्वेन तत्तद्विषयकप्रत्यक्षे तत्त्वेन कदाचित् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना वा हेतुत्वम्, न तु यावानेव तत्तदितरत्वादिर्विषयनिष्ठो धर्मस्तेन तद्विषयत्वेन कार्यकारणभावः, मैत्रावलोकितचैत्रनिर्मितनीलतरघटतद्विषयकत्वादिना तत्त्वेऽनन्तकार्यकारणभावप्रसङ्गान्मानाभावादन्यथोपपत्तेश्च ॥

(गा०) परामर्शादिप्रत्यक्षे सामान्याव्याप्यहेतुप्रकारकपक्षविशेष्यकसंशयान्यज्ञानत्वरूपपरामर्शत्वेन हेतुतां निराकर्तुं वस्तुगत्या यत्प्रत्यक्षनिरूपितविषयनिष्ठहेतुतावच्छेदकं तन्निर्धारयति सामान्यत इत्यादिना । 'सामान्यत' प्रत्यक्षत्वरूपसामान्यधर्मावच्छिन्ने प्रत्यक्षे । विषयत्वेनेति । विषयतायाः स्वाश्रयविषयादिभेदेन भिन्नत्वेऽपि विषयतात्वमनुगमकम्, कारणस्य प्रत्यासत्तिस्तादात्म्यम्, कार्यस्य लौकिकसन्निकर्षजज्ञानीयविलक्षणविषयता, अत एवातीतादिविषयस्य न प्रत्यक्षविषयत्वं कार्याव्यवहितपूर्ववृत्तिविषयरूपकारणस्य तत्र तादात्म्येनासम्बद्धत्वात् । अव्यवहितप्राक्क्षणवृत्तिकारणसम्बन्धस्य कार्यसम्बन्धप्रयोजकत्वात्, अतीतानागतघटादिरूपविषये कार्याव्यवहितप्राक्क्षणवृत्तेश्चक्षुःसंयोगादेरसत्त्वेऽपि अतीतानागतशब्दादिरूपविषयविशेषाणामिन्द्रियसमवायतत्संयुक्तसमवाययोः सत्त्वेन तत्प्रत्यक्षस्य विषयतयोत्पत्तिवारणाय विषयस्य हेतुत्वमावश्यकम् । यदि चाव्यवहितप्राक्क्षणावच्छिन्नकारणसम्बन्ध एव कार्योत्पत्तिप्रयोजकः, न तु तादृशक्षणवृत्तित्वोपलक्षितकारणस्यापि सम्बन्धः, तत्क्षणे प्रतिबन्धकसमवहितस्यापि देशस्यान्यदेशावच्छेदेन तत्क्षणवृत्तिप्रतिबन्धकात्यन्ताभावस्यान्यकालावच्छेदेनाधिकरणतया तत्र द्वितीयक्षणे कार्यापत्तेः । एवं चातीतादिविषयस्य

वर्तमानकालासम्बन्धितयावच्छेद्याधिकरणसम्बद्धस्यैव चावच्छेदकतया नित्यस्यापि सन्निकर्षस्य वर्तमानकालावच्छेदेन न तत्र सत्त्वमिति नातिप्रसङ्गः। अथैवमतीतादौ विषये सामान्यप्रत्यासत्त्यापि प्रत्यक्षं न जायेत तत्र वर्तमानकालावच्छेदेन नित्यस्यापि सामान्यस्यासत्त्वादिति चेन्न, कारणताघटकं व्यापकत्वं द्विधा, क्वचिद्यत्र यदा कार्यं तत्र तदव्यवहितप्राक्क्षणावच्छेदेन कारणमित्येवं रूपम्, क्वचिच्च यत्र यदा कार्यं तत्र तदव्यवहितप्राक्क्षणवृत्तिकारणमित्येवं रूपम्, यत्र यस्य कारणता प्रथमोक्तव्यापकताघटिता तस्य प्राक्क्षणावच्छेदेन देशे सत्त्वमेव कार्योत्पत्तिप्रयोजकम्, यस्य कारणता द्वितीयव्यापकताघटिता प्राक्क्षणवृत्तेस्तस्य यदा कदाचिद्देशे सत्त्वं देशे कार्योत्पादप्रयोजकम्। लौकिकसन्निकर्षादेः प्रत्यक्षहेतुतायां च प्रथमं व्यापकत्वम्, सामान्यप्रत्यासत्त्यादेस्तद्धेतुतायां च द्वितीयमिति नातीतादिविषयस्य लौकिकप्रत्यक्षप्रसङ्गो न वा सामान्यप्रत्यक्षानुपपत्तिरित्युच्यते, तदापि पूर्वक्षणावच्छिन्नसन्निकर्षाद्विषयनाशकाले तत्प्रत्यक्षापत्तिवारणाय विषयस्य कार्यसहभावेन हेतुत्वमावश्यकम्। यदि च विषयनाशोत्पत्तिकालेऽपि प्रत्यक्षमिष्यते "सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिनेति" प्रवादस्तु प्राक्क्षणे वर्तमानतापरः। अत एवाशुविनाशिसुखादिप्रकारकलौकिकप्रत्यक्षस्य सुखाद्युत्पादतृतीयक्षणे निर्वाह। विशेषणतान्स्य हेतुत्वोत्पत्तिक्षणे तद्विरहेण द्वितीयक्षणे तद्विशिष्टबुद्ध्यसम्भवादित्युच्यते, तदापि प्रत्यक्षविशेषे विषयविशेषस्य हेतुताया व्यवस्थापनीयतया यद्विशेषे यद्विशेषस्य प्रयोजकता तत्सामान्ये तत्सामान्यस्येति नियमात्सामान्यकार्यकारणभाव आवश्यक।

तत्तद्विषयेति। तत्तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुतेत्यर्थः। न चेदृशविशेषकार्यकारणभावो निष्प्रामाणिकः तत्तद्व्यक्तिविषयकप्रत्यक्षस्य सन्निकर्षादिशालिव्यक्त्यन्तरे दृष्टत्वात् यावतीषु व्यक्तिषु सन्निकर्षादिघटितसामग्रीसमवधानं युगपत्तावद्व्यक्तिभासकसामग्र्या तावद्व्यक्तिविषयकस्यैकस्यैव प्रत्यक्षस्योत्पत्तेरिति वाच्यम्, तत्तद्व्यक्तिभेदेनेन्द्रियसन्निकर्षादिघटितसामग्रीभेदनिर्वाहाय तत्तद्व्यक्तित्वेन विषयस्य हेतुताया आवश्यकत्वात्। अन्यथा तत्तद्घटेन्द्रियसन्निकर्षादीनां साधारणधर्मपुरस्कारेणैव हेतुतया तद्व्यक्तिभासकसामग्र्या एतद्व्यक्तिभासकसामग्रीतो वैलक्षण्यासम्भवात्। तादृशहेतुतान्तरे तादृशसामग्र्याः पृथक्तत्तद्व्यक्तित्वावच्छिन्नघटितत्वेनैव वैलक्षण्यात्। तद्वैलक्षण्ये च तद्व्यक्तिविषयकग्राह्यग्रहाभावादिघटितायाः समवायेन तद्व्यक्तिविषयकविशिष्टप्रत्यक्षसामग्र्या विषयतासम्बन्धेन तत्तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीप्राक्क्षणवृत्तित्वविशिष्टायाः समवायेन तत्तद्व्यक्तिविषयकविशिष्टबुद्ध्युत्पादप्रयोजिकाया व्यक्त्यन्तरस्थाने सन्निकर्षदशायामप्यात्मनि सत्त्वेन तदानीमात्मनि समवायेन तादृशबुद्ध्यापत्तेर्दुर्वारत्वात्। न च सन्निकर्षस्यैव तत्तद्व्यक्तिसन्निकर्षत्वेन

हेतुत्वमस्तु तावताप्यन्यव्यक्तिमात्रवृत्तिसन्निकर्षवति काले विषयतया तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरहः सुघटः तदानीं तादृशान्यव्यक्तिसन्निकर्षाभावादिति वाच्यम्, गुरुधर्मे तत्तद्व्यक्तिसन्निकर्षत्वेन हेतुतापेक्षया लाघवात् तद्व्यक्तित्वेन विषयहेतुताया एवोचितत्वात्। न चोक्तकाले तत्तद्व्यक्तित्वावच्छिन्नस्य विषयस्य सत्त्वेन तद्घटितसामग्र्यभावेनैवेति न विषयतया तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरह इति विशिष्य विषयहेतुतया नोक्तातिप्रसङ्गवारणसम्भव इति वाच्यम्, एकाधिकरणप्रत्यासत्तिकारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीत्वात्तादात्म्यसम्बन्धेन तद्व्यक्तित्वावच्छिन्नसम्बन्धिन्या तत्तद्व्यक्त्या समवायादिनाऽप्रत्यासन्नस्येन्द्रियसंयोगादेः सत्त्वेऽपि उक्तसामग्रीविरहात्। यदि च तद्धर्मघटितधर्मावच्छिन्नजनकसामग्री तद्धर्मवत्ताप्रयोजकसामग्रीसमवहिता कार्यं जनयति अत आत्मनि तद्व्यक्तिविषयकज्ञानजनकसामग्र्याः तद्विषयकत्वप्रयोजकसमवधानमपेक्षणीयम्, प्रत्यक्षस्य तद्व्यक्तिविषयकत्वप्रयोजकं च तद्विषयतानियामकसामग्र्यास्तद्व्यक्तित्वसामानाधिकरण्यम्, उक्तस्थले चेन्द्रियसन्निकर्षादेः तदभावात्तत्तद्व्यक्तित्वेन तत्तत्प्रत्यक्षाहेतुत्वेऽपि न क्षतिरित्युच्यते, तदापि तत्तद्दण्डादिव्यक्तिवृत्तितद्रूपाद्यात्मकविशेषणधीघटिता सामग्री तद्विशिष्टबुद्धिजनने तद्दण्डादिरूपविशेष्यभासकसामग्रीसापेक्षा वाच्या। व्यक्त्यन्तरभासकसन्निकर्षादिघटितसामग्र्यास्तद्व्यक्तिभासकसामग्र्या अविशेषे च व्यक्त्यन्तरमात्रसन्निकर्षदशायामपि तद्व्यक्तिगतरूपादिज्ञानात्तद्विशिष्टबुद्ध्यापत्तिर्दुर्वारैव। न हि तद्रूपादिज्ञानजन्यतावच्छेदकगर्भे तद्दण्डादिव्यक्तिविषयकत्वमपि प्रविष्टम्, येनोक्तप्रयोजकापेक्षया नातिप्रसङ्गः स्यात्, तथा सति तत्प्रत्यक्षमात्रासंग्रहप्रसङ्गादिति तत्तद्व्यक्तित्वेन विषयहेतुत्वमावश्यकम्, तद्व्यक्तिविषयकत्वरूपकार्यतावच्छेदकोपलक्षितप्रत्यक्षस्य समूहालम्बनरूपस्य विषयतासम्बन्धेन व्यक्त्यन्तरे उत्पत्तावपि तद्विशिष्टस्यानुत्पत्तेर्न तद्व्यक्तित्वावच्छिन्नहेतुताया व्यभिचारः, तादृशकार्यतावच्छेदकविशिष्टसमानाधिकरणाभावघटितव्यापकताया अक्षतत्वात्, तद्व्यक्तिवृत्तिविषयतात्वेनैव कार्यतावच्छेदकसम्बन्धत्वोपगमान्न व्यभिचार इत्यप्याहुः ।

ननु परामर्शत्वपरामर्शप्रत्यक्षत्वयोरतिसामान्यातिविशेषोक्तरूपवद्विभेदेऽपि मध्यविधकार्यकारणभावस्तेन रूपेणापीति शङ्कामपाकर्तुं मध्यविधकार्यकारणभावस्य प्रामाणिकत्वे तदवच्छेदकं विशिष्यज्ञानात्मकं लघु रूपं दर्शयति कदाचिदिति। तादृशकार्यकारणभावस्य निर्युक्तिकत्वं कदाचिदित्यनेन सूचितम्। यद्यप्यतीन्द्रियाणां गुरुत्वादृष्टभावनास्थितिस्थापकानां प्रत्यक्षस्य चक्षुराद्ययोग्यस्पर्शादीनां च चक्षुरादिना ग्रहणस्य च वारणाय योग्यजातीयानां स्वविषयकप्रत्यक्षे हेतुत्वकल्पनमावश्यकम्, तथा सति यावद्विशेषकारणताकल्पनेनातीन्द्रिये विषयतया प्रत्यक्षवारणसम्भवात्, तथा घ्राणादिपदग्राह्यघटादिप्रत्यक्षे घटत्वादिना कार्यकारणभावोऽतिनिर्युक्तिक एव।

वस्तुतस्तु अतीन्द्रियविषयाणां तादात्म्येन प्रतिबन्धकत्वकल्पनयैवातिप्रसङ्गवारणे योग्यजातीयानां पुनः न प्रत्यक्षहेतुता अन्यत्रत्यमूहनीयम् ।

इदानीं प्रतिबन्धं दर्शयन् परामर्शप्रत्यक्षे परामर्शत्वेन हेतुतां निराकरोति नचेति । तत्तद्विषयत्वादिरित्यादि । व्याप्तिप्रकारकत्वपक्षधर्मताविषयकत्वज्ञानत्वसंशयेतरत्वादिघटित इत्यर्थः । घटत्वादिविषयकत्वादिना' घटत्वतत्प्रकारकप्रत्यक्षत्वादिना । ननु हेतुत्वस्य प्रामाणिकत्वे गौरवं न दोषायेत्यत आह मनागपीति । ननु परामर्शादिशून्यकाले तत्प्रत्यक्षत्वावच्छिन्नापत्तिवारणाय तदनुपपत्त्या परामर्शादिप्रत्यक्षे परामर्शत्वादिना कारणत्वकल्पनमावश्यकमित्यत आह मनागपीति । प्रत्यक्षविषयताप्रयोजिकाया विषयप्रत्यासत्त्या प्रत्यक्षोत्पादकसामग्र्या विषयनिष्ठतद्धर्मसामानाधिकरण्यरूपात् प्रत्यक्षीयतद्धर्मसामानाधिकरण्यप्रयोजकादेव तत्तद्धर्मवत्त्तिविषयताकप्रत्यक्षत्वावच्छिन्नोत्पत्तिनियमोपपत्तेरित्यर्थः । अत एव मयोजनकत्वमाजनित्वधर्मान्तराणामपि न कार्यतावच्छेदकत्वमिति भावः ॥

वह्निव्याप्यधूमवान्पर्वत इति स्मरणे तादृशनिश्चयत्वेन हेतुत्वादतिव्याप्तिरिति शङ्कते अथेति ।

(दी०) अथ विशिष्टस्मरणेऽतिव्याप्तिः । न चोपेक्षान्यत्वेन तत्र हेतुत्वम्, उपेक्षात्वं हि न जातिश्चाक्षुषत्वादिना सङ्करप्रसङ्गात् आंशिकत्वोपगमात् ॥

(गा०) 'विशिष्टस्मरणे' व्याप्यविशिष्टपक्षस्मरणे । न च स्मृतिजनकतायाम् अप्रामाण्यज्ञानाभाववैशिष्ट्यानिवेशादनुमितिजनकतायां च तन्निवेशात् नैकरूपेणोभयत्र हेतुतेति नातिव्याप्तिरिति वाच्यम्, अनुमितिजनकतायामप्रामाण्यज्ञानाभावनिवेशे विशेष्यविशेषणभावे विनिगमनाविरहादप्रामाण्यज्ञानाभावस्य पृथक्कारणत्वोपगमात् । अथ धूमत्वादिना धूमादिविषयकज्ञानत्वेन रूपेण धूमाद्यन्तरस्मरणवारणाय तत्तद्धूमादिव्यक्तित्वघटितत्वमपि स्मृतिजनकतावच्छेदके प्रविष्टं न त्वनुमितिजनकतावच्छेदकतायामिति कथमवच्छेदकतापर्याप्तिघटितलक्षणेऽतिव्याप्तिः । न च पर्याप्त्यनिवेशाभिप्रायेणैव तदभिधानम्, 'नचोपेक्षान्यत्वेनेति' शङ्कानवतारात् । न च समानविशेष्यकत्वसम्बन्धेनाभिलषितेतराद्यक्तिविषयकत्वस्य स्मृतिजनकतायां न [illegible]

विषयकात् रूपान्तरेण [illegible]

मादिविषयकस्मरणस्य [illegible]

त्वादिप्रकारकविषयतात्वेन विषयताया कार्यकारणसम्बन्धत्वोपगमे कारणतावच्छेदकगर्भे व्याप्त्यादिविषयतानिवेशे प्रयोजनविरहेण तद्रूपावच्छिन्नजनकताघटितोक्तलक्षणस्यातिव्याप्त्यनवकाशात् । उक्तविषयताया सम्बन्धत्वेऽप्यभावत्वादिनाभावान्तरस्य व्याप्तिशरीरे यत्र भानं तत्रापराभाया

द्विषयकस्मरणापत्तिर्दुर्वारैवेति तत्तद्व्यक्तिविषयतात्वेनाभावत्वावच्छिन्नविषयता स्मृतिजनकताया निवेशनीया न त्वनुमितिजनकतायामिति व्याप्तिरसङ्गतैवेति चेन्न, यत्साध्यव्याप्यहेतुविशिष्टधर्मिविषयकं सर्वमेव ज्ञानं तत्तद्धर्मप्रकारेण तद्धर्मिविशेष्यव्यक्तिविषयकं तत्साध्यव्याप्यतद्धेतुविशिष्टधर्मिज्ञानस्य तादृशस्मृतिहेतुतायां तत्तद्धर्मिविषयकत्वस्याप्रयोजकत्वेनानिवेशात्तादृशपरामर्शहेतुताघटितलक्षणाभिप्रायेणैवैतद्व्याप्त्यभिधानात्, जातिघटितलक्षणस्येदानीमकरणात्। न च तादृशस्थलेऽपि नानासाधनादिप्रकारेण नानाधिकरणावगाहिज्ञानस्य यद्यदधिकरणादिव्यक्तिसाधनादिप्रकारेण तद्विषयता तत्तत्साधनादिव्यक्तिभिन्नतत्तद्विषयसाधनादिप्रकारेण तद्विषयाधिकरणादिव्यक्त्यन्तरविषयकस्मरणापत्तिर्दुर्वारैवेति तत्तद्व्यक्तिप्रकारतानिरूपिततत्तद्व्यक्तिविशेष्यतया विशिष्य कार्यकारणभावे निवेशनमावश्यकमिति वाच्यम्, तत्स्थलीयपरामर्शस्य तत्स्मरणनिष्ठकार्यतावच्छेदकगर्भे तत्तत्साधनादिव्यक्तिप्रकारतानिरूपिततत्तत्साधनाधिकरणव्यक्तिविषयताया विशिष्य निवेशादेव स्मृतौ वैपरीत्येन भानासम्भवात् कारणतावच्छेदककोटौ तत्तद्व्यक्तिविषयतात्वेन विषयतानिवेशे प्रयोजनविरहात् तावतैव च शङ्कितव्याप्तिसङ्गते ।

परे तु यद्युपमितिविशेषेऽतिव्याप्तिवारणाय कारणतावच्छेदकत्वपर्याप्ति परामर्शत्वांशे निवेशनमावश्यकमिति मन्यते तदापि परामर्शत्वशरीरे या या विषयता प्रविष्टास्तदन्यविषयत्वानवच्छिन्नत्वरूपं परामर्शत्वपर्याप्तावच्छेदकताकत्वमेव लक्षणप्रविष्टकारणतायां निवेश्यं लाघवात् न तु परामर्शत्वघटका यावन्तः पदार्थास्तदन्यपदार्थानवच्छिन्नत्वम् अधिकभेदनिवेशे गौरवात्, एवञ्चोपमितिविशेषे हेतुतावच्छेदकेऽधिकविषयतानिवेशादेव नातिव्याप्त्यवकाशः, स्मृतिकारणतावच्छेदके च तत्तद्विषयाणामधिकानां निवेशेऽप्यधिकविषयतानामनिवेशात्तत्रातिव्याप्तिशङ्कासङ्गतिः । अतिरिक्तविषयतानवच्छिन्नत्वन्तु उपेक्षान्यत्वानवच्छिन्नत्वमपि निवेश्यमित्याशयमूलाया शङ्काया न चेत्यादिना निरास इत्याहुः ।

अथ तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन हेतुतयैव स्मृतेर्विषयनियमे ज्ञानस्य ज्ञानत्वेनैव स्मृतित्वावच्छिन्नं प्रति हेतुता न तु तत्तद्विषयकस्मृतौ तत्तद्विषयकनिश्चयत्वेनेति कथमतिव्याप्तिः । न चैव तत्संशयात्तत्स्मरणवारणाय तत्र स्मृतौ तन्निश्चयत्वेन हेतुत्वमावश्यकमिति वाच्यम्, संस्कारस्य तद्धर्मिकतद्धर्मप्रकारकस्मरणे तद्धर्मितदभावप्रकारकान्यतद्धर्मिकतत्प्रकारकसंस्कारत्वेन हेतुतयैव तद्गोचरसंशयात्तत्स्मरणापत्त्ययोगात्संशयजन्यसंस्कारस्य विरोधिप्रकारकत्वनियमादिति चेन्न, संस्कारस्य संस्कारत्वेनैव हेतुता ज्ञानस्य तु तद्गोचरस्मृतौ तन्निश्चयत्वेनेत्यस्यापि सम्भवेन विनिगमकाभावात् ज्ञानहेतुतायामपि विषयादिनिवेशस्यापरिहार्यत्वात् । न च तद्गोचरज्ञानजन्यस्य संस्कारस्य कालादिना नाशे अन्यगोचरसंस्कारात्तद्गो

चरस्मरणवारणाय संस्कारहेतुतायां विषयनिवेशनमावश्यकमिति वाच्यम्, संस्कारहेतुतायां विषयानिवेशेऽप्युक्तस्थले तन्निश्चयरूपकारणव्यापारविरहेण तत्स्मरणापत्त्यसम्भवात्।

वस्तुतोऽन्वयव्यतिरेकाभ्यां तद्गोचरस्मृतौ तद्गोचरनिश्चयत्वेन हेतुत्व सिद्धौ तन्निर्वाहकतया व्यापारीभूतसंस्कारकल्पना संस्कारे प्रमाणान्तराभावादिति कथं संस्कारेण तद्गोचरनिश्चयत्वावच्छिन्नस्यान्यथासिद्धिर्यतस्तद्रूपावच्छिन्नमहेतुः स्यात्, न हि यदुपजीव्य यत्सिध्यति तत्तद्व्याघातकम्। एतेन संस्कारहेतुतायां विषयानिवेशे तदंशे उपेक्षात्मकज्ञानजन्यादन्यगोचरसंस्कारात् तत्स्मरणापत्तिवारणाय तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन हेतुत्वमावश्यकमिति ज्ञानहेतुतायां विषयनिवेशो व्यर्थ इत्यपि प्रत्युक्तम्।

फलव्यापारौ प्रति करणस्यैकेनैव रूपेण हेतुतेति प्राचीनसम्मतनियमानुरोधेन ज्ञानस्य स्मृतिजनकतायां विषयनिवेशनमावश्यकमित्यपि वदन्ति।

यत्तु ज्ञानस्य ज्ञानत्वेनैव स्मृतिहेतुता तद्विषयकस्मृत्युद्बोधकविशेषाणां हेतुताया आवश्यकत्वात्तत एव विषयनियमोपपत्तेः उद्बोधकानां फलबलकल्प्यत्वात्। न च सम्बन्धिपदज्ञानादीनामननुगतरूपेणेव तत्तद्गोचरस्मृतिहेतुतया तद्गोचरज्ञानं विनापि तत्स्मरणापत्तिरिति वाच्यम्, तत्सम्बन्धित्वेन गृहीतं यत्तज्ज्ञानस्यैव तद्विषयस्मारकतया तादृशोद्बोधकसमवधानस्थले तज्ज्ञानस्याप्यावश्यकत्वादिति। तदसत्, तथा सति ज्ञानत्वमात्रेणापि ज्ञानस्य स्मृतिहेतुताया अप्रामाणिकत्वापत्तेः। उद्बोधकेन ज्ञानविशेषान्यथासिद्धौ कालान्तरे यज्ज्ञानस्योपयोगिता तज्ज्ञानार्थं विशेषदर्शिनां शास्त्राध्ययनादावप्रवृत्तिप्रसङ्गाच्च।

वस्तुतः स्मृतौ सम्बन्धिज्ञानस्य सम्बन्धावगाहित्वेन न हेतुता यत्र सम्बन्धो येन रूपेण गृहीतः सम्बन्धाविषयकादपि तत्प्रकारकज्ञानात्सम्बन्ध्यन्तरस्मरणात्। नापि सम्बन्धग्रहविषयतावच्छेदकावच्छिन्नविषयकत्वेन सम्बन्धग्रहस्योपलक्षणतया भाविसम्बन्धग्रहविषयविषयकज्ञानस्याप्युद्बोधकतापत्तेः, सम्बन्धग्रहे सामान्यतः पूर्वत्वमव्यावर्तकं तज्ज्ञानपूर्वत्वं चाननुगतम्। सम्बन्ध्युद्बोधे च पूर्वसम्बन्धग्रहोऽप्यस्मारकः सम्बन्धोद्बोधका अप्यननुगता एव, एवं च स्मृत्युपधायकसम्बन्धिज्ञानानां तत्तद्व्यक्तित्वेनैव हेतुता वाच्या, तथा च यादृशसम्बन्धिज्ञानसत्त्वे यस्य पुंसो नियमतोऽनुभूतस्य यद्विषयस्य स्मृतिस्तद्वस्तुज्ञानस्य तत्तद्व्यक्तिरूपेण नानाहेतुत्वकल्पनामपेक्ष्य तत्पुरुषीयतद्विषयस्मृतौ तद्वस्तुज्ञानत्वेनानुगतरूपेणैकहेतुतैव कल्प्यते यत्पूर्वं च तद्विषयस्य ज्ञानुभवदन्तरकालीनतद्वस्तुज्ञानात्तस्य तद्विषयस्मृतिवारणाय च तद्गोचरस्मृतौ तद्विषयकनिश्चयत्वेनापि हेतुत्वमावश्यकमिति दिक्।

उपेक्षात्मकज्ञानात्स्मरणानुत्पत्त्या तदन्यत्वस्याप्यधिकस्य स्मृतिकारण-

तावच्छेदके निवेश्यतया नोपदर्शितनिश्चयत्वपर्याप्तावच्छेदकताककारणताकत्वं स्मृताविति नातिव्याप्तिरिति शङ्कां निरस्यति न चेति । 'उपेक्षान्यत्वम्' उपेक्षान्यावच्छिन्नभेदः, तस्य तदा स्मृतिकारणतावच्छेदकघटकता स्यात् यद्युपेक्षात्वं स्मृतिजनकधीव्यावृत्तो जातिविशेषः स्यात्, स्मृत्यजनकज्ञानत्वरूपस्योपेक्षाव्यवहारविषयस्योपाधे स्मृतिजनकतायां प्रवेशासम्भवात् स्मृत्यजनकान्यत्वस्य स्मृतिजनकत्वरूपत्वात्, स्वस्य च स्वानवच्छेदकत्वात्, न हि तादृशजातिः शक्यकल्पना, जातिसङ्करादिदोषग्रासादित्याह उपेक्षात्व हीति । अत्र च जातित्वाभावानुमाने उपेक्षात्वस्य स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकत्वेन पक्षता । अथेत्यादिग्रन्थकृन्मतेऽपि स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकत्वस्य संशयत्वे तद्घटकविरोधिप्रकारकत्वे वा प्रसिद्धत्वात् । तत्र जातित्वाभावस्योभयमतसिद्धत्वेऽप्युक्तपक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नांशतः सिद्धसाधनं दोषः । अत्रोपेक्षापदप्रवृत्तिनिमित्तत्वेन पक्षता उपेक्षापदप्रवृत्तिनिमित्तत्वस्य प्रसिद्धत्वेऽपि वादिनस्तस्य स्मृत्यजनकत्वादिरूपतया तदवच्छिन्नान्यत्वस्य स्मृतिजनकतावच्छेदकत्वासम्भवेन स्मृतेरनुमितिजनकतावच्छेदकपर्याप्तजनकतावच्छेदकताकत्वाक्षतेः । अत्राप्यवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नोक्तदोष इत्यपि केचित् ।

तच्चिन्त्यम्, उपेक्षात्वस्य जातित्ववादिना तस्योपेक्षापदप्रवृत्तिनिमित्तत्वानभ्युपगमेऽपि क्षतिविरहात् अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेऽपि तत्र जातित्वाभावासिद्धेः, तादृशादपि स्मृत्युत्पादाच्चेत्यग्रिमग्रन्थासङ्गतेश्च । तद्रूपवतः स्मृत्युत्पादकत्वे तद्रूपनिष्ठस्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकताया एव विरोधित्वान्नानुपेक्षापदप्रवृत्तिनिमित्ततायाः इति ।

यत्तु स्मृतिजनकावृत्तिज्ञानधर्मत्वेन पक्षता, तादृशधर्मत्वं च तत्तज्ज्ञानान्यतरत्वादौ प्रसिद्धमिति । तदसत्, एकांशे उपेक्षात्मकज्ञानस्यापि अन्यस्मृतिजनकतयोपेक्षात्वस्य स्मृतिजनकावृत्तित्वाप्रसिद्धेः, अन्यथांशिकत्वोपगमाच्चेति बाधकासङ्गतेः ।

स्वीययावद्विषयविषयकस्मृतिजनकावृत्तिज्ञानधर्मत्वेन तु पक्षत्वं सम्भवति । चाक्षुषत्वादिनेति । आदिना ज्ञानत्वव्याप्यनिखिलजातिपरिग्रहः । तत्तज्जातिनिरूपितसङ्करस्य च पृथगेव हेतुता बोध्या न तु मिलितस्य वैयर्थ्यात् । तज्जात्यव्यापकत्वे सति तज्जातिव्यभिचारित्वे सति तज्जातिसामानाधिकरण्यं सङ्करः । अव्यापकत्वं तत्समानाधिकरणप्रतियोग्यसमानाधिकरणाभावप्रतियोगित्वं तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वं वा । तज्जातिव्यभिचारित्वं च तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकतदभावसामानाधिकरण्यम् । यद्यपि व्याप्यजातिमान्नित्यऽपि कालिकादिसम्बन्धेन व्यापकजात्यवच्छिन्नस्य भेदो वर्तते, व्याप्यजातेरपि व्यापकजातिशून्ये कालिकादि-

सम्बन्धेन वृत्तेर्विरुद्धजातेरपि कालिकादिसम्बन्धेन सामानाधिकरण्यमस्ति समवायेन चावच्छेदकत्वं वृत्तिश्च पक्षस्योपेक्षात्वस्य नोभयमते, उपेक्षात्वस्योपाधित्वमते विशेषणताविशेषेणैव वृत्तेरिति स्वरूपासिद्ध्यापत्तिः।

वस्तुतस्तु गुणगतजातिसङ्करस्य यत्र हेतुना तत्र साधनाप्रसिद्धिरेव गुणे जातिभिन्नस्यासमवायात्। समवायघटितचाक्षुषत्वसङ्करस्य क्वचिदपि प्रसिद्धिविरहात्। तथापि समवायस्वरूपविशेषणतान्यतरसम्बन्धेन तथात्वं बोध्यम्।

अथवा समवायेनावच्छेदकत्वस्थाने समवायावच्छिन्नावच्छेदकतानात्वं यत्समवेतं तदन्यत्वम्, समवायेन तदभावादिमति समवायेन वृत्तिस्थाने समवायेन तद्वृत्तित्वे सति यत्समवेतं तदन्यत्वम्, तज्जातिसमानाधिकरणत्वस्थाने तज्जातिमत्समवेतत्वे सति यत्समवेतं तदन्यत्वं च निवेशनीयमिति नासिद्धिः। विशिष्टभेदस्य पक्षस्य समवेतत्वेऽसमवेतत्वे चाक्षतत्वात्। यदि चैतन्निरूपकजातिभेदेन भिन्नमेव तत्तज्जातीनां विशिष्योपादानादिना चाक्षुषत्वादिसङ्करस्य यत्र हेतुना तत्र व्याप्यजातौ व्यभिचारवारकं व्यभिचारित्वविशेषणं व्यर्थं चाक्षुषत्वादेर्व्याप्यजात्यप्रसिद्धेः, तत्परित्यागे च ज्ञानत्वाद्यव्यापकत्वसमानाधिकरणचाक्षुषत्वादेरिव चाक्षुषत्वाद्यव्यापकत्वसमानाधिकरणस्योपेक्षात्वस्यापि जातित्वं स्यादित्यप्रयोजकत्वशङ्काग्रास इत्युच्यते, तदा यज्जात्यव्यापकत्वे सति यज्जातिव्यभिचारि यत्तत्तज्जातिसमानाधिकरणजातिरिति सामान्यतो व्याप्त्या उपेक्षात्वे चाक्षुषत्वादिसमानाधिकरणजातित्वाभावः साध्यः, चाक्षुषत्वाद्यव्यापकज्ञानत्वादौ ज्ञानत्वाद्व्याप्यचाक्षुषत्वादौ च व्यभिचारवारणाय दलद्वयम्।

वस्तुतस्तु स्वाव्यापकस्वव्यभिचारिजातित्वव्यापकविरोधप्रतियोगि यद्यत्स्वं तत्तद्भेदकूटं हेतुरुक्तत्वोपेक्षात्वादौ जातिसङ्कीर्णधर्मे जातित्वाभावः साधनीयः, उपेक्षात्वाद्यव्यापकतद्व्यभिचारिचाक्षुषत्वादिजातौ तद्विरोधान्तरेणोपेक्षात्वादेर्निरुक्तस्वानन्तर्भावात्। तत्र च तादृशभेदकूटस्योभयमतसिद्धत्वात्। न च सत्ताव्यभिचारिजातेरप्रसिद्ध्या न तादृशं स्वं सत्तेति तत्र व्यभिचार इति वाच्यम्, अपरजातित्वाभावस्यैव साध्यत्वोपगमात्तत्र साध्यसत्त्वेन व्यभिचारानवकाशात्। यत्र च तुल्ययुक्त्या आपादितजात्यन्तरेण सङ्करस्य जातित्वबाधकता यथा प्राचां भूतत्वमूर्तत्वयोः परस्परं सङ्करेण जातित्वखण्डनम्, तत्र जातिसङ्करस्यैतोरसिद्धत्वेऽपि व्याप्यव्यापकभावानापन्नसमानाधिकरणद्वयवृत्तित्वेन स्वाश्रयैकधर्मव्यापकापरवृत्ति यत्तदन्यत्वे सति स्वाश्रयैकधर्मवदवृत्ति यत्तदन्यत्वे च सति अनेकवृत्तित्वेन वा तदुभयत्वे जातित्वाभावसामानाधिकरण्यं साधनीयम्। विनिगमनाविरहेणोभयत्र जातित्वाभावपर्यवसानमिति कृतमतिविस्तरेण।

ननु चाक्षुषत्वादिव्याप्यनुपेक्षात्वं नानेव स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकमुपगन्तव्यम्, भेदकूटस्य कारणतावच्छेदकत्वे बाधका-

भावात्। तथा च न जातिसङ्कर इत्याशङ्क्य बाधकान्तरमाह अनियमेनेति। यत्र समूहालम्बनज्ञानस्यैकविषयस्मारकत्वमपरविषयास्मारकत्वञ्च तत्रो-पेक्षात्वजात्यनभ्युपगमे सकलविषयस्मारकत्वं तदभ्युपगमे च सकलविषयास्मारकत्वं स्यादिति यस्य यद्विषयास्मारकत्वं तस्य तद्विषयावच्छेदेनो-पेक्षात्वं स्वीकरणीयम्, अन्यविषयांशे च तदभाव इति तद्विषयकस्मृतौ च तद्विषयावच्छिन्नमुपेक्षान्यत्वं प्रयोजकं वाच्यमिति अव्याप्यवृत्तित्वादुपेक्षात्वं न जातिरित्यर्थः। न चांशिकोपेक्षायामपि न विषयान्तरावच्छेदेनो-पेक्षात्वाभावः स्वीक्रियते किं तु तद्विषयकत्वस्योपेक्षात्वानवच्छेदकत्व-मात्रम्, अनियोग्यनवच्छेदकस्य तस्य तदभावावच्छेदकत्वानियमात्, तथा-नियमे दण्डादेर्द्रव्यत्वादिना घटादिजनकत्वाभावप्रसङ्गादिति नोपेक्षात्वस्याव्याप्यवृत्तित्वं स्वाभावसामानाधिकरण्यादिति वाच्यम्, जातौ स्वाभावसामानाधिकरण्यवत् किञ्चिदवच्छिन्नवृत्तिकताया अपि सिद्धान्तविरुद्धत्वात्। यद्यपि उपेक्षात्वस्य स्मृत्यजनकत्वादिरूपोपाधित्वमते न स्वाभावसामानाधिकरण्यमवच्छिन्नवृत्तिकत्वं चेति नायमुभयसिद्धो हेतुः, तथापि तन्मतसिद्धहेतुनैव तं प्रति जातित्वाभावः साध्यते अत एवोपगमादित्युक्तम्।

वस्तुतस्तु प्रमेयत्वादिनांशिकत्वजातित्वोभयाभावः साधनीयः। उपेक्षान्यत्वेन स्मृतिहेतुतावादिना च तस्यांशिकत्वोपगमाज्जातित्वाभावमादाय पर्यवसानमित्यांशिकत्वोपगमाच्चेत्यनेन दर्शितम्॥

ननु माभूदुपेक्षात्वं जातिस्तथापि चरमयत्नाजनकत्वरूपोपाधिरेव तद्विषयकज्ञाने उपेक्षात्वं हानोपादानभिन्नज्ञाने उपेक्षात्वव्यवहारात्तदवच्छिन्नान्यत्वमेव तद्विषयकस्मृतिप्रयोजकं वाच्यम्। अत एवैकज्ञानस्य किञ्चिद्विषयास्मारकत्वं किञ्चिद्विषयस्मारकत्वं चोपपद्यते निरुक्तोपेक्षात्वस्य विषयभेदनियन्त्रितत्वात्। अथवा स्वसमानाधिकरणतद्विषयकजिज्ञासानुत्तरत्वं तदित्याशङ्कां निरस्यतीति नापीति॥

(दी०) नापि प्रवृत्तिनिवृत्त्यजनकत्वमजिज्ञासितविषयत्वं वा तादृशादपि स्मृत्युत्पादात्। नापि संस्काराजनकत्वम्, तज्जनकतावच्छेदकरूपान्तरापरिचयात् अन्योन्याश्रयप्रसङ्गात्, संस्कारानुत्पत्त्यैवास्मरणसम्भवे स्मृतिजनकतायां तदप्रवेशाच्च। नाप्यनुभवत्वेन तथात्वम्, संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात्। समूहालम्बनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः, जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः॥

प्रवृत्तिनिवृत्त्यन्यतरजनकमिति । स्मृतिप्रयोजकभेदप्रतियोगितावच्छेदकमित्यर्थे तूपेक्षात्वमित्यनुपपद्यते । तस्योपेक्षाप्रवृत्तिनिमित्तमित्यर्थकत्वे न तदनुसङ्गसम्भव प्रवृत्तिनिवृत्त्यजनकत्वादेरपेक्षापदनिमित्तत्वे तादृशज्ञानस्य स्मृत्युत्पादकतायामबाधकत्वेनाग्रिमहेत्वसङ्गते । किन्तु स्मृतिप्रयोजकभेदप्रतियोगितावच्छेदकमिति पूरणीयम् । तादृशादपीति । तथा चोक्तरूपयो स्मृतिप्रयोजकभेदप्रतियोगितावच्छेदकरूपत्वे तादृशयो स्मृत्युत्पादकता न स्यादिति भाव । नन्वपेक्षाज्ञानात्संस्कारानुत्पादेन तद्विषयकसंस्काराजनकत्वरूपोपेक्षात्वावच्छिन्नभेदस्तत्संस्कारजनकत्वपर्यवसितस्तत्स्मृतिजनकतावच्छेदको वाच्य इत्याशङ्कां निरस्यति नापीति । तज्जनकताव च्छेदकेति । संस्कारं प्रत्युपेक्षासाधारणरूपेण निश्चयत्वमात्रेण हेतुत्वे उपेक्षाया संस्काराजनकत्वं दुर्घटमिति संस्काराजनकत्वस्य तदेवोपेक्षात्वरूपता सम्भवति यद्युपेक्षाव्यावृत्तरूपेण संस्कारजनकता स्यात्तादृशं च रूपमुपेक्षात्वनिश्चयत्वादन्यदर्दुर्वचमत संस्कारं प्रत्यप्युपेक्षान्यत्वेन हेतुता वाच्या ईदृशोपेक्षात्वस्य संस्काराजनकत्वरूपत्वे आत्माश्रय । स्मृत्यजनकत्वरूपत्वे च संस्कारं प्रति स्मृतिजनकत्वेन स्मृतिं प्रति च संस्कारजनकत्वेन हेतुतेत्यन्योन्याश्रय इति नेतद्युक्तमित्यर्थ । ननु संस्कारजनकतावच्छेदकस्योपेक्षासाधारण्येऽपि उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन संस्कारप्रतिबन्धकत्वोपगमात्तासां संस्कारानुपधायकत्वनिर्वाह । अशिकोपेक्षाव्यक्तीनां तत्तद्विषयकसंस्कारत्वमेव प्रतिबध्यतावच्छेदकमिति तासामन्यविषयकसंस्कारोपधायकतयाऽन्यविषयस्मारकतोपपत्तिरित्यत आह संस्कारेति ।

यत्तु ननु तत्तद्व्यक्तित्वेनैवोपेक्षाव्यक्तीनां भेदा संस्कारजनकतावच्छेदका । न चैवं भेदसहस्रस्य विशेष्यविशेषणभावे विनिगमनाविरह, एकैकभेदं पृथक्पृथङ्निवेश्यैकैककारणताभ्युपगमात् एकोपेक्षाज्ञानव्यक्तिदशायामन्योपेक्षाव्यक्तिभिन्नज्ञानसत्त्वेऽपि तदुपेक्षाव्यक्तिभिन्नज्ञानरूपकारणविरहेणैव संस्कारानुत्पादसम्भवात् । न चोपेक्षाद्वयसत्त्वे सकलकारणसत्त्वात्संस्कारापत्ति, तद्वारणाय तादृशव्यक्तिभेदद्वयस्यैकत्र निवेश्यत्वात् तयोर्भेदयोर्विशेषणविशेष्यभावे विनिगमनाविरहात्कारणताद्वयमिष्टमेव । उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतामतेऽपि तत्कालीनसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबन्धकतया गौरवात् । एवं च संस्कारानुपधायकत्वरूपोपेक्षात्वावच्छिन्नभेदस्य स्मृतिजनकतावच्छेदकत्वेऽपि नान्योन्याश्रय इत्यत 'संस्कारेति' इत्यवतारणम्, तदसत्, तत्तदुपेक्षान्यत्वेन कारणतामतेऽपि तेन रूपेण ज्ञानस्य संस्कारहेतुता तत्तदुपेक्षाव्यक्तीनां तत्कालीनसंयोगादिव्यक्तेर्वा तत्प्रतिबन्धकता कल्प्यते इत्यनुयोगव्याख्यानस्यसमाधानत्वात् ।

संस्कारानुत्पत्त्यैवेत्यस्योपेक्षाज्ञानादित्यादि । संस्काराजनकत्वस्य तदेवोपेक्षात्वरूपतासम्भवो यद्युपेक्षाधी संस्कारं जनयेत्, तथा सति संस्कार-

रूपव्यापारविरहेणैवोपेक्षाया अस्मारकत्वसम्भवे उपेक्षात्वस्य संस्काराजनक-स्वरूपस्य सुनिर्वचत्वेऽपि तदवच्छिन्नान्यत्वस्य निष्प्रयोजनकतया स्मृतिजनकतावच्छेदकगर्भेऽनिवेशादित्यर्थः । तथा च विशिष्टस्मरणातिव्याप्तिर्दुर्वारैवेति भावः । न च तद्विषयकस्मृतौ तद्विषयकसंस्काररूपव्यापारेण यथा तद्विषयकज्ञानत्वावच्छिन्नस्य नान्यथासिद्धिस्तथोपेक्षान्यत्वसहिततद्रूपावच्छिन्नस्यापीति तेन रूपेण स्मृतिहेतुता दुर्वारैवेति वाच्यम्, संस्कारासिद्धौ संस्काराजनकत्वरूपोपेक्षात्वावच्छिन्नभेदघटितधर्मपुरस्कारेण कारणताकल्पनासम्भवात् । तादृशधर्मावच्छिन्नकारणतायाः संस्काररूपव्यापारसिद्धावनुपजीव्यतया तेन तद्रूपावच्छिन्नस्यान्यथासिद्धावुपजीव्यविरोधरूपबाधकानवकाशात् ।

यत्तु ननूपेक्षात्वस्याननुगतस्य निर्वचनासम्भवेऽप्युपेक्षाज्ञानास्मरणानुपपत्त्या तत्तदुपेक्षाव्यक्तिभिन्नत्वेनैवागत्या स्मृतिहेतुत्वमुपेयं तथा च न विशिष्टस्मृतावतिव्याप्तिरित्यत आह 'संस्कारानुपपत्त्यैवेति' इत्यवतार्य उपेक्षाज्ञानात्संस्कारो नोपगम्यते गौरवात् । तन्निर्वाहाय च संस्कारजनकतायामुपेक्षाभेदनिवेशस्यावश्यकत्वे स्मृतिजनकतायां न तन्निवेशः संस्काराभावेनैवोपेक्षितास्मरणोपपत्तेः । न चैवं फलव्यापारौ प्रति करणस्यैकरूपेणाहेतुतेति नियमपरित्यागे निश्चयत्वमपि संस्कारजनकतायामेव निवेश्यतां तथा च कथमतिव्याप्तिरितिवाच्यम्, संस्कारजनकतायां निश्चयत्वनिवेशे उपेक्षान्यत्वेन सह विशेष्यविशेषणभावे विनिगमनाविरहात्स्मृतिकारणतायामेव निश्चयत्वनिवेशौचित्यात्, संशयाद्धर्मिगोचरसंस्कारस्यावश्यकतया निश्चयत्वेन विशिष्टसंस्काराहेतुत्वे संशयजन्यसंस्कारे विशिष्टविषयकत्वमात्रकल्पनमुपेक्षान्यत्वेन तदहेतुत्वे च उपेक्षाज्ञानात् विशिष्टविषयकसंस्काररूपधर्मिकल्पनमिति न विनिगमनाविरहेण वैपरीत्यप्रसक्तिः । वस्तुत उपेक्षाज्ञानानां संस्कारप्रतिबन्धकत्वमेवोपेयते, तथा च फलव्यापारौ प्रति करणस्यैकरूपेण हेतुत्वनियमादुभयत्रैव निश्चयत्वप्रवेशः । एतेनांशिकोपेक्षाज्ञानादन्यविषयकसंस्कारस्य प्रामाणिकतया तद्भेदाः स्मृतिजनकतायामेव निवेश्यन्ते न तु संस्काराजनकतायां तथा सति सर्वांशे उपेक्षाभेदैः सह विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यप्रसङ्गात् इति निश्चयत्वं संस्कारजनकतायामेव निवेश्यम्, स्मृतिजनकतायां तन्निवेशेऽप्यांशिकोपेक्षाभेदैः सह विशेष्यविशेषणभावे विनिगमनाविरहतादवस्थ्यादित्यपास्तम् । तथा च विशिष्टस्मरणेऽतिव्याप्तिः सुदृढैवेति व्याख्यानम् । तदसत्, व्यापारासिद्धिदशायाम् कल्पनीयस्य तत्तदुपेक्षान्यत्वेन स्मृतिहेतुत्वस्योत्तरकालकल्प्यव्यापारविरहेण कार्यातिप्रसङ्गवारणसम्भवेऽपि निराकरणासम्भवादुक्तशङ्कया 'संस्कारानुपपत्त्यैव' इत्यादिफक्किकावतारणासङ्गतेः ।

ननु तद्विषयकस्मृतौ तद्विषयकज्ञानत्वेन न हेतुताऽपितु तत्तद्विषय-

कानुभवत्वेनैव। अनुभवत्वस्यापि जातित्वेन ज्ञानत्वापेक्षया गौरवाभावात्। स्मृत्युत्तरमपि पूर्वानुभवादेव स्मरणोपपत्तेः स्मृतेः स्मृतिहेतुताया अप्रामाणिकत्वात्। तथा च न ज्ञानत्वघटितधर्मावच्छिन्नकारणताघटितानुमितिलक्षणस्य विशिष्टस्मृतावतिव्याप्तिः। न चानुभवत्वापेक्षयाऽगुरुणा ज्ञानत्वेनापि स्मृतिहेतुताया विनिगमनाविरहेण दुर्वारतया तादृशकारणतामादायातिव्याप्तिर्दुर्वारैवेति वाच्यम्, अगुरुव्याप्यधर्मपुरस्कारेण कारणत्वसम्भवे व्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वादित्याशङ्कां निरस्यति नाप्यनुभवत्वेनेति। 'संस्कारस्य फलनाश्यतया' स्वजन्यस्मृतिनाश्यतया, प्रथमस्मरणेनैव पूर्वानुभवजन्यसंस्कारनाशे, 'सकृदनुभूतस्य' स्मरणोत्तरमननुभूतस्य विषयस्यानुभवरूपकरणव्यापारासत्त्वेन 'असमरणप्रसङ्गात्' स्मरणान्तरानुपपत्तेरित्यर्थः। स्वजन्यस्मरणस्य संस्कारनाशकत्वे स्मृतिसाधारणेन ज्ञानत्वेन स्मृतिहेतुत्वेऽपि घटपटादिरूपनानाविषयावगाहिनानुभवेन जनितस्य तावद्विषयकसंस्कारस्य घटाद्येकैकगोचरस्मरणेनापि विनाशात्तदुत्तरं पटादिस्मरणानुपपत्तिः तद्विषयकसंस्काराभावात्। स्मृतिजन्यघटादिगोचरसंस्कारस्य च भिन्नविषयकतया पटादिस्मारकत्वायोगादित्याशङ्कां निरस्यति समानेति। 'समानाकारस्य' अन्यूनाकारस्य, अतः प्रत्येकगोचरनानासंस्कारजनितसमूहालम्बनस्मरणे स्वजनकसकलसंस्कारनाशहेतुता निराबाधा। अथात्र नाशकता यदि स्वजन्यस्वान्यूनविषयकस्मृतित्वेन तदा स्वपदस्य तत्तत्संस्कारव्यक्तिपरताया आवश्यकत्वात्तत्तद्व्यक्तिभेदेन कारणतावाहुल्यम्, तदुपगमे तत्तद्व्यक्तित्वेनैव नाशकताया युक्तत्वात्।

यदि च प्रतियोगितासम्बन्धेन संस्कारनाशं प्रति जनकत्वानतिरिक्तविषयकत्वोभयसम्बन्धेन स्मृतित्वेन हेतुता जनकत्वनिवेशात् स्वजन्यसंस्कारस्य स्मृत्या न विनाशः। जनकत्वस्थाने तद्घटकं पूर्ववर्तित्वमेव वा निवेश्यं नियमान्यथासिद्धत्वप्रवेशावैफल्यात्। न च व्यधिकरणस्मृतेरपि नाशकतापत्तिः, व्यधिकरणस्मृतिं प्रत्यपि संस्कारस्य स्वरूपयोग्यतया सामानाधिकरण्यनिवेशस्योभयमते आवश्यकत्वात्, वस्तुतः सामानाधिकरण्यसहितमनतिरिक्तविषयकत्वमेव सम्बन्धः न तु जनकत्वस्य पूर्वकालीनत्वस्य वा निवेशः। ज्ञानादीनां क्षणिकत्वावारणाय प्रतियोगितासम्बन्धेन नाशं प्रति पूर्वत्वसम्बन्धेन नाशस्य सामान्यकारणताया आवश्यकत्वात् तत एव स्वजनकस्मरणेन संस्कारस्य स्वोत्पत्तिद्वितीयक्षणे नाशापत्त्यनवकाशात्। तदानीं च स्मृतेर्विनाशेन ततस्तदुत्तरक्षणेऽपि तन्नाशापत्त्यसम्भवात्। अनतिरिक्तविषयकत्वं च स्वावृत्तिविषयिताशून्यत्वं न तु स्वाविषयाविषयकत्वम्, प्रमेयत्वादिना सकलप्रमेयविषयकस्मरणस्याविषयाप्रसिद्धेः संस्कारनाशकतानुपपत्तेः, भावत्वादिना सकलभावादिविषयकस्मरणादृष्ट इत्यादिज्ञानजन्यसंस्कारनाशापत्तेश्चेत्युच्यते, तदापि सम्बन्धमध्ये तत्तत्स्मरणव्यक्तिरूपस्वपदार्थमनन्तर्भाव्यानतिरिक्तविषयकत्वस्यावृत्ति-

विषयताया अप्रसिद्ध्या दुर्निर्वचत्वेन तत्तद्व्यक्तिविश्रामस्यावश्यकत्वात् । स्वनिष्ठभेदप्रतियोगितावच्छेदकविषयिताशून्यत्वरूपानतिरिक्तविषयकत्वेऽपि भेदे तत्तत्स्मृतिव्यक्तिनिष्ठत्वनिवेशनमावश्यकम्, अन्यथावच्छेदकत्वान्तस्य विषयितायामव्यावर्तकतापत्तेरिति चेत्, सत्यम्, तत्प्रकारकतद्विशेष्यकसंस्कारनाशं प्रति तत्प्रकारकतद्विशेष्यकस्मृतित्वेन कारणता, कार्यस्य सम्बन्धः प्रतियोगिता, कारणस्य पूर्ववर्तित्वसहितं तदसहितं वा सामानाधिकरण्यम्, तत्तद्विषयकान्यसंस्कारनाशं प्रति तत्तद्विषयकसंस्कारभेदोऽपि प्रतियोगिप्रत्यासत्त्या हेतुः, अतो घटत्वप्रकारकघटविशेष्यकसमूहालम्बनात्मकस्मृत्या यथा समूहालम्बनात्मकस्तत्प्रकारकतद्विशेष्यकसंस्कारो नाश्यते तथा समूहालम्बनात्मकोऽपि तादृशसंस्कारो नाश्यताम्, अन्यविषयकस्मृतिविरहस्य तद्विषयकस्मृतिघटितसामग्रीविरहाप्रयोजकत्वादिति दूषणस्य नावकाशः । समूहालम्बनात्मकतद्विषयकसंस्कारनाशप्रयोजकसामग्र्या अन्यविषयकसंस्कारभेदरूपकारणकूटघटितत्वात्, समूहालम्बनसंस्कारनाशप्रयोजकसामग्र्या अन्यविषयस्मृतिघटितत्वात्, समूहालम्बनसंस्कारे च तादृश्याः कस्या अपि सामग्र्या उक्तस्थलेऽसत्त्वात् । न चैवं गोत्वाभाववान् गोत्वाभाव इत्यादिज्ञानजन्यसंस्कारस्य गोत्वाभाव इत्याकारकस्मरणादिना नाशापत्तिः, तादृशसंस्कारनाशे तादृशस्मृतिसहकारिणां यावत्तद्विषयविषयकसंस्कारभेदानां सत्त्वात्तद्विषयकगोत्वादिविषयकसंस्कारभेदस्य च तदसहकारित्वात्, गोत्वाभावादिनिष्ठतत्सम्बन्धस्यापि तत्स्वरूपतया तादृशस्मृतिनाश्यसंस्कारविषयत्वेन तद्विषयकसंस्कारभेदस्यापि तादृशस्मृतिसहकारित्वासम्भवादिति वाच्यम्, तत्तत्प्रकारकान्यसंस्कारनाशे तत्तत्प्रकारकसंस्कारभेदत्वेन हेतुताया उपगन्तव्यतया गोत्वाभाव इत्यादिस्मृतिनाश्यसंस्कारसाधारणस्य गोत्वाभावादिप्रकारकसंस्कारभेदस्य तादृशस्मृतिसहकारितया गोत्वाभाववान् गोत्वाभाव इत्यादिधीजन्यसंस्कारे तादृशभेदासत्त्वेनोक्तापत्त्यभावात् । द्रव्यत्वादिना घटपटादिविशेष्यकसंस्कारस्य तेन रूपेण घटमात्रविशेष्यकस्मृतितो विनाशवारणाय तत्तद्विशेष्यकान्यसंस्कारनाशे तत्तद्विशेष्यकसंस्कारभेदस्य हेतुत्वमपि वाच्यम् । एवं समानप्रकारकसमानविशेष्यकनानासंसर्गावगाहिसंस्कारस्यैकमात्रसंसर्गकस्मृतितो विनाशवारणाय तत्तदन्यसंसर्गकसंस्कारनाशे तत्तत्संसर्गकसंस्कारभेदस्यापि हेतुता बोध्या ।

वस्तुतस्तादृशधर्मिविशेष्यतानिरूपिततत्संसर्गावच्छिन्नतादृशधर्मप्रकारताकान्यसंस्कारनाशे तथाविधतादृशधर्मप्रकारताकसंस्कारभेदो हेतुरित्येवोपगन्तव्यम्, अन्यथा द्रव्यत्वपृथिवीत्वोभयरूपेण घटं पटं चावगाहमानस्य संस्कारस्य द्रव्यत्वमात्रेण च घटं पृथिवीत्वमात्रेण च पटमवगाहमानात् स्मरणाद्विनाशापत्तेः, तत्र द्रव्यत्वमात्रेण घटं पृथिवीत्वमात्रेण पटमवगाहमानस्य संस्कारस्य यादृशसामग्रीतो नाशस्तादृशसामग्र्यास्तत्राक्षतत्वात्,

तादृशसंस्कारस्यापि द्रव्यत्वपृथिवीत्वोभयप्रकारकतया घटपटोभयविशेष्यकतया च तन्नाशकसामग्र्यां तत्तत्प्रकारकभेदलक्षद्विशेष्यकसंस्कारभेदाप्रवेशात्, तन्नाशकसामग्रीघटकद्रव्यत्वपृथिवीत्वेतरधर्मप्रकारकसंस्कारभेदघटपटभिन्नविशेष्यकभेदानां चोक्तसमूहालम्बनसंस्कारेऽपि सत्त्वात्। संस्कारनाशं प्रति तादात्म्यसम्बन्धेन संस्कारत्वेनाप्येकहेतुता कल्पनीया अतः संस्कारनाशप्रयोजकसामग्र्या नादृशादिसाधारण्यम्।

केचित्तु समूहालम्बनजन्यघटपटादिसंस्कारा भिन्नभिन्ना एव संस्कारयौगपद्ये क्षतिविरहात्। तथा च स्मृतिवृत्तिविषयतावत्त्वस्यापि स्मृतिनिष्ठनाशकतावच्छेदकप्रत्यासत्तिघटकत्वोपगमाद् घटादिस्मृत्या पटादिसंस्कारस्य न विनाशनं तस्य तत्स्मृतिवृत्तिपटादिविषयतावत्त्वाभावादित्युत्तरकाले पटादिस्मरणनिर्वाह। एवं घटवद्भूतलमित्यादिविशिष्टज्ञानाद् घट इत्यादिस्मृतिनिष्ठप्रत्येकपदार्थीयविषयताशून्या एव विशिष्टगोचरसंस्कारा उपगम्यन्ते, ते च न तादृशस्मृतितो विनश्यन्ति तत्र तादृशस्मृतिनिष्ठविषयतावत्त्वविरहादत उत्तरकालं विशिष्टस्मृतिनिर्वाहः। घट इत्यादिस्मृतेरपि घटादिविषयकसंस्कारत्वावच्छिन्नविशिष्टसंस्कारफलकतया तद्व्यावर्तनाय फलस्य समानाकारकताकथनसङ्गतिरित्याहुः।

स्मृतिवृत्तित्वाभाववद्विशिष्टविषयताविरहः संस्कारप्रत्यासन्नस्तन्नाशकएकैकगोचरस्मृतिदशायां संस्कारनिष्ठविषयान्तरविषयतायां स्मृतिवृत्तित्वाभावसत्त्वेन तया प्रतिबन्धान्न समूहालम्बनसंस्कारनाश इत्यपरे।

ननु अनुगतरूपेण स्मृतेः संस्कारनाशकत्वं निर्युक्तिकं भवतां चरमस्मृतिजन्यस्येव ममाप्यनुभवजन्यसंस्कारनाशस्याप्यननुगतेनापि कालादिना नाशसम्भवात्। न च यत्र विषये चरमस्मृतिव्यक्तय उपेक्षारूपास्तत्रानुभवजन्यसंस्कारस्यानुगतास्मरणरूपनाशकाभ्युपगम एव युक्तस्तत्र चरमस्मृतिजन्यसंस्कारस्याप्रसिद्ध्याननुगतकालादेर्नाशकताया अनावश्यकत्वादिति वाच्यम्, ज्ञानत्वेन स्मृतिसंस्कारहेतुतामते चरमस्मृतिविशेषाणां संस्कारजनकत्वनिर्वाहाय तत्तद्व्यक्तित्वेन तासां संस्कारप्रतिबन्धकतायाः कल्पनीयतयाऽनुभवत्वेन स्मृतिसंस्कारहेतुत्ववादिन उक्तस्थलेऽनुभवजन्यसंस्कारनाशेऽननुगतानां हेतुत्वोपगमेऽपि गौरवानवकाशाच्चरमस्मृतिव्यक्तीनामपि तत्तद्व्यक्तित्वेन संस्कारनाशकतासम्भवात्संस्कारस्य फलनाश्यताप्रवादसङ्गतिरित्यनुभवत्वेन स्मृतिसंस्कारहेतुतायां नोक्तबाधकावकाश इत्यत आह जायते यतः। अनुभवजन्यसंस्कारापेक्षया स्मरणाद्दृढस्तदुत्तरस्मरणादितश्च दृढतरदृढतमाः संस्कारा जायन्त इत्यवश्यमेव स्वीकार्यम्। दार्ढ्यं चोत्कर्षरूपो जातिभेदो झटिति स्मृत्युत्पादप्रयोजकः। न च दैववशसम्पन्नझटित्युद्बोधकसमवधानादेव झटिति स्मृतिनियमोपपत्तौ न तत्प्रयोजकतया

संस्कारगतो जातिविशेष सिध्यतीति वाच्यम्, यादृशसमन्विविशेषज्ञान सत्त्वे पुन पुन स्मरणोत्तरं नियमत स्मृतिर्नत्वनुभवमात्रोत्तरं तादृशो-द्वोधकघटितसामग्र्यनुगमाय संस्कारगतजातिविशेषस्यावश्यकत्वात् झटिति स्मृतेर्दबाधीनत्वमुपगम्य संस्कारातिशयखण्डने शास्त्रादावभ्यासोऽपि नोप-युज्येतेति नानुभवत्वेन स्मृतिसंस्कारहेतुतासम्भव इत्याशय।

इदन्तु बोध्यं दृढदृढतरादिसंस्कारं प्रति समानविषयकस्मृतित्वतादृ-शस्मरणोत्तरस्मरणत्वादिना न हेतुता पुन पुनरनुभवादपि संस्कारदार्ढ्य-दर्शनात्। नापि समानविषयकज्ञानोत्तरज्ञानत्वादिनोपेक्षोत्तरोत्पन्नोपे-क्षातो दृढतरसस्कारानुदयाद्रोगादिना ज्ञातार्थगोचरसंस्कारनाशोत्तरजा तज्ज्ञानात्तदनुदयाच्च। किन्तु समानविषयकसंस्कारत्वेन दृढसंस्कारं प्रति, दृढदृढतरादिसंस्कारत्वेन च दृढतरदृढतमसंस्कारं प्रति जनकता, अत एव भावनाया पटुतरभावनाजनकत्वप्रवाद। भावनाया भावनान्तरजनने चोत्त-रोत्तरज्ञानं सहकारि तस्य संस्कारत्वावच्छिन्नं प्रत्येव स्मृतिसाधारणज्ञा नत्वघटितधर्मपुरस्कारेण हेतुता, न चैवं स्वजन्यज्ञानसहकारेणेव स्वजनक-ज्ञानसहकारेणापि संस्कार पटुपटुतरसंस्कारं जनयत्विति वाच्यम्, स्व जन्यसस्कारानुपहितज्ञानत्वेनैव संस्कारहेतुत्वोपगमात्। अन्यथा सर्वत्र विनश्यद्वस्थज्ञानात् पटुतरसस्कारान्तरस्य दुर्वारत्वादनन्ताप्रामाणिकसं स्कारकल्पनागौरवेण इष्टापत्तेरयोगादिति॥

ज्ञानत्वेन स्मृतिसंस्कारहेतुत्वे युक्त्यन्तरमप्याह परित्यज्य चेति।

(दी०) परित्यज्य च निश्चिताव्यभिचारकं रूपं गृह्यमाणव्य-भिचारकेण कारणत्वकल्पनानुदयादिदमेव चान्यत्र सामान्यस्य च हेतुतावच्छेदकत्वे बीजम्। अभिहितं च तात्पर्यटीकायां प्रथमसूत्रे-ऽप्ययनविवेचनप्रस्तावे मिश्रैः। स्मृतीनां स्वकार्यसंस्कारविरोधिनीना-ममहभावादिति चेन्न, चरमज्ञानपदस्यानुभवपरत्वात्साक्षात्तज्जन्यत्वस्य वा विवक्षितत्वादित्यपि कश्चित्। किं च व्याप्यविशेष्यकात् पक्षवि-शेष्यकाच्च परामर्शादनुमितिदर्शनाच्च तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं लक्षणघटकमपि तदेव॥

(गा०) निश्चित कार्यतावच्छेदकावच्छेदेनाव्यभिचारो यद्रूपावच्छिन्न स्य तन्निश्चिताव्यभिचारकम्, गृह्यमाण कार्ये संशयसाधारणज्ञानविषयी भूतो यद्रूपावच्छिन्नस्य व्यभिचारस्तद्रूपं गृह्यमाणव्यभिचारकम्? तथा च ज्ञानत्वावच्छिन्नस्य स्मृतिसंस्कारयोर्न व्यभिचारशङ्कापि स्मृते संस्कारादि जनकत्वस्य सन्दिग्धत्वादनुभवत्वावच्छिन्नस्य तत्र व्यभिचार सन्दिग्ध इति न तेन रूपेण कारणताग्रह सम्भवतीति भाव।

यद्यपि व्यभिचारसंशयस्य ग्राह्यसंशयतया कल्पनात्मककारणताग्रहे न विरोधित्वसम्भवो ग्राह्यसंशयस्य परोक्षज्ञानाविरोधिताया: सर्वसम्मतत्वात्, तथापि कारणताया सामान्यविशेषरूपावच्छिन्नत्वयो संशये सामान्यरूपस्य नियतपूर्ववर्तितावच्छेदकत्वं क्लृप्तं विशेषरूपस्य तथात्वमसिद्धतया कल्प्यमिति तस्य कारणतावच्छेदकत्वे कल्पनागौरवमिति गौरवप्रतिसन्धानेन प्रतिबन्धाद्विशेषरूपेऽवच्छेदकत्वग्रहो न भवतीति बोध्यम्। 'इदमेव' निश्चिताव्यभिचारकत्वमेव. 'अन्यत्र' प्रवृत्त्यादिकार्ये, 'सामान्यस्य' इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकनिश्चयत्वाद्यपेक्षयाऽधिकसङ्ग्राहकस्य तदुभयवैशिष्ट्यावगाहिनिश्चयत्वादे। संस्कारस्य स्मृतिजन्यत्वं नापसिद्धान्त इत्याविष्कर्तुं तत्र टीकाकारसंवादमाह अभिहितं चेति। 'प्रथमसूत्रे' प्रमाणप्रमेयेत्यादिसूत्रे। अवयवविवेचनप्रस्ताव इति। तत्र पूर्वपूर्ववर्णस्मृतिसहित उत्तरवर्णानुभव एव पदप्रत्यक्षहेतुरस्तु इत्याक्षेपे, समाधानं स्वरानति। स्वं स्मृति, तत्कार्यो य संस्कार स एव स्वानन्तरोत्पन्नविशेषगुणविषया विरोधी नाशको यासां तासामित्यर्थ। एतच्च तृतीयक्षणानवस्थाननिर्वाहकं त्रिचतुरादिव्यक्तीनामेकक्षणानवस्थानरूपासहभावप्रयोजकतयाऽभिहितम्। चरम ज्ञानपदस्येति। 'अनुभवपरत्वात्' अनुभवत्वावच्छिन्नरूपविशेषार्थकत्वात्, तथा च तादृशनिश्चयत्वावच्छिन्नजन्यानुभवत्वं लक्षणं तस्य चानुभवत्वशून्यायां स्मृतावतिव्याप्तिर्न शङ्कास्पदमपीति भाव। अन्यस्य समाधानान्तरमुपन्यस्यति साक्षादिति। साक्षात्तज्जन्यत्वं तज्जन्याजन्यत्वे सति तज्जन्यतावच्छेदकावच्छिन्नाजन्यत्वे सति वा तज्जन्यत्वं परामर्शजन्यतावच्छेदकविशिष्टगोचरसंस्कारत्वावच्छिन्नजन्यायां स्मृतौ नास्तीति भाव। अत्र गौरवमस्वरसबीजम्। विशिष्टवैशिष्ट्यबोधहेतुतायां ज्ञानत्वनिवेशनव्यवस्थापनाया शक्यत्वेन तत्रातिव्याप्तिर्यथा वारणीया विशिष्टस्मरणेऽपि तेनैव प्रकारेण तद्वारणं सम्भवतीति चरमज्ञानपदस्यानुभवपरत्वं नावलम्बनीयमित्याशयेनाह व्याप्येति। 'व्याप्यविशेष्यकात्' आधेयतासम्बन्धेन व्याप्यरूपविशेष्ये पक्षप्रकारकात्पर्वते वह्निव्याप्य इत्याकारकात्. 'पक्षविशेष्यकात्' अधिकरणतासम्बन्धेन पक्षरूपविशेष्ये व्याप्यप्रकारकाद्वह्निव्याप्यवान् पर्वत इत्याकारकात्. 'परामर्शात्' 'अनुमितिदर्शनात्' अविलक्षणाया पर्वतो वह्निमानित्यनुमितेरनुभवात्, 'तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन' उभयानुगमकेन व्याप्यपक्षोभयनिरूपितवैशिष्ट्यविषयताशालिनिश्चयत्वेन, 'तत्र हेतुत्वम्' अनुमितिं प्रति कारणत्वम्, न तु विशिष्टवैशिष्ट्यबोधविशिष्टस्मरणजनकतावच्छेदकेन व्याप्यप्रकारकपक्षविशेष्यकनिश्चयत्वादिनाऽन्यतरासङ्ग्रहादित्यर्थ। ननु वैशिष्ट्यमत्र व्याप्यताघटकसम्बन्धरूपं विवक्षणीयम्, अन्यथातिप्रसङ्गात्, एवं च संयोगावच्छिन्नाधारत्वादिकमेव धूमादेर्व्याप्यताघटकं न त्वाधेयत्वम्, तदुक्तरूपेण पक्षप्रकारकस्य पर्वते धूम इत्यादिज्ञानस्य सङ्ग्रहे तत्र संयोगावच्छिन्नाधेयत्वस्यैव संसर्गत्वात्।

न च पर्वते धूम इत्यादावपि व्याप्यताघटक संयोगादिरेव संसर्गो न त्वाधाराधेयभाव इति वाच्यम्, पर्वतादिप्रतियोगिकसंयोगादेर्धूमादिरूपविशेष्यानुयोगिकत्वविरहेण तादृशप्रत्ययस्य भ्रमत्वापातात्, आधाराधेयभावानवगाहने सप्तम्युल्लेखानुपपत्तेश्च। न च संयोगाद्यवच्छिन्नाधेयत्वमेव च तत्र सम्बन्धस्तत्संसर्गकत्वेऽपि तदन्तर्गतसंयोगादिसंसर्गकत्वमक्षतमिति वाच्यम्, विशिष्टसंसर्गकत्वेऽपि विशेषणीभूतसंयोगादे संसर्गतावच्छेदकतया तद्विषयताया प्रकारविशेष्योभयनिरूपितत्वाभावात्, अन्यथा संयोगावच्छिन्नाधेयतासम्बन्धेन व्याप्यप्रकारकाद्व्याप्ये पर्वत इत्यादिज्ञानात् संयोगावच्छिन्नाधारतासम्बन्धेन पक्षप्रकारकात् पर्वतवान् धूम इत्यादिज्ञानाच्चानुमितिप्रसङ्गात्। एतेनाधाराधेयत्वयोस्तुल्यवित्तिवेद्यतयासंयोगाद्यवच्छिन्नाधारत्वावगाहित्वेन तादृशाधेयत्वावगाहित्वेन वा व्याप्यपक्षविशेष्यकपरामर्शयोरनुगम इति निरस्तम्। व्याप्ये पर्वत इत्यादिधियो दुर्वारत्वात्। व्याप्यनिरूपिताधारत्वावगाहित्वेन पक्षनिरूपिताधेयत्वावगाहित्वेन वाऽनुगमस्यान्यनिरूपिताधारत्वसम्बन्धावगाहिभ्रमासङ्कहेनासम्भवात्। अथ पर्वते धूम इत्यादिसप्तम्युल्लेखिप्रतीतौ संयोगावच्छिन्नाधेयत्वमेव पर्वतस्य संसर्गतया भासतां सा च पर्वतधूमयो संयोगानवगाहितयानुमितावहेतुरेवोक्तरूपेणानुगमस्तु संयोगसम्बन्धेनैव व्याप्यांशे च पक्षप्रकारको यश्च पक्षांशे तत्सम्बन्धेनैव व्याप्यप्रकारकस्तयोरेव परामर्शयो स्वीकरणीय प्रथमज्ञानस्योक्तयुक्त्या भ्रमत्वेऽपि तस्यानुमितिहेतुतायास्तेनाप्रत्याख्येयत्वादिति चेन्न, व्याप्यतावच्छेदकसंयोगेन व्याप्यस्य पक्षवृत्तायास्तत्र साध्यासत्त्वेऽप्युपपद्यमानतया व्याप्यांशे तेन सम्बन्धेन तद्वत्ताज्ञानस्य तत्र पक्षे साध्यानुमितिहेतुताया अनुभवविरुद्धत्वात्। अन्यथा समवायादिना द्रव्यत्वादिव्याप्ये गुणादौ तेन सम्बन्धेन सत्त्वादिप्रकारकप्रमात्मकज्ञानात्सत्त्वादौ बाधानवतारदशायां द्रव्यत्वादिसिद्धिप्रसङ्ग।

अत्राहु आधाराधेयत्वयोस्तुल्यवित्तिवेद्यतामते पर्वते धूम इत्यत्राधारता निरूपिताधेयता धूमवान् पर्वत इत्यत्र चाधेयतानिरूपिताधारता सम्बन्धो न तु तुल्यमुभयो संसर्गतया भानं प्रत्येकमुभयोरुभयप्रकारतापत्ते, एवं चोभयत्रैवाधारत्वविषयता पर्वतविषयताऽऽधेयत्वविषयता च धूमविषयतया निरूपिता, तथा च पक्षविषयतानिरूपिता या आधारताविशेषविषयता तन्निरूपितनिरूपितत्वविषयतानिरूपिताधेयत्वविषयतानिरूपितव्याप्यविषयताशालित्वेन द्वयोरनुगम। व्याप्ये पर्वत पर्वतवान् धूम इत्यत्र च पक्षविषयतानिरूपिताधेयत्वविषयता व्याप्यविषयता चाधारत्वविषयतानिरूपितेति वैपरीत्यान्नोक्तानुगमकरूपस्यैतत्साधारण्यमिति नातिप्रसङ्ग। न चाधारत्वावगाहित्वस्य कारणतावच्छेदकत्वे तदनवगाहिनो व्याप्यताघटकशुद्धसंयोगादिना पक्षे हेतुमत्ताज्ञानादनुमित्यनुदयप्रसङ्ग इति वाच्यम्, प्राचां मत

ष्टवैशिष्ट्यबोधादौ क्वापि नातिप्रसङ्गशङ्कापि । वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव लक्षणे निवेशात् । अत एव व्याप्यवत्पक्षाद्यभानग्रहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः । व्याप्त्यविषयकत्वेन वा जन्यज्ञानं विशेषणीयम् । एतेन स्मृतिं प्रति संस्कारद्वारा, अनुभवं प्रति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वा तस्या हेतुत्वस्य नियमतः कृतिसाक्षात्कारपूर्वं विषयस्मृतेश्च कल्पनाद्व्याप्यवत्त्वादिज्ञानेऽतिव्याप्तिरित्यपि परास्तम् ॥

(गा०) 'तत्र' स्मृतिस्थले, 'विशिष्यैव' व्याप्यप्रकारकपक्षविशेष्यकस्मृतित्वतादृशनिश्चयत्वादिरूपविशेषधर्ममुपादायैव, 'कार्यकारणभावः' कल्प्यत इति शेषः । अत्र हेतुमाह समानप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्चेति । तृतीयाया वैशिष्ट्यार्थकत्वात् । 'समानप्रकारकत्वेन' इत्यस्य समानप्रकारकयोरित्यर्थः । तथा चासमानप्रकारकज्ञानस्य स्मरणाहेतुत्वादित्यवधारणार्थः । एतावतानुगतरूपस्य कारणतातिरिक्तवृत्तित्वलाभः । असमानप्रकारकज्ञानस्य स्मृत्यकारणत्वे तस्य फलानुत्पादकत्वं हेतुमाह एकतरेति । व्याप्यादिमात्रविशेष्यकज्ञानात्पक्षादिविशेष्यकस्मरणानुत्पत्तेरित्यर्थः । एतदेव द्रढयति अन्यथेति । एकतरविशेष्यकज्ञानादप्यन्यतरविशेष्यकस्मृत्युत्पादोपगमे, व्याप्यादिविशेष्यकस्मृतीनां पक्षादिविशेष्यकत्वनियमापत्तेरित्यर्थः ।

केचित्तु नियमेनेत्यत्राऽकारप्रश्लेषः । तथा च 'अनियमेन' नियामकाभावेन, 'स्मृतेः' स्मृतिमात्रस्य, उभयविशेष्यकत्वप्रसङ्गादिति व्याचक्षते ।

विशिष्टवैशिष्ट्यबोधादाविति । विशेषणतावच्छेदकप्रकारकविशेषणविशेष्यकनिश्चयत्वावच्छिन्नजन्यव्याप्यविशिष्टपक्षवैशिष्ट्यबोधादावित्यर्थः । आदिना विशिष्टस्मृतिपरिग्रहः । व्यतिरेकिणि व्यतिरेकव्याप्तेरेव गमकतापक्षेऽन्वयव्यतिरेकव्याप्तिप्रकारतयोर्व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वेनानुगमस्य कारणतावच्छेदकत्वमते तादृशकारणताया एव लक्षणे निवेशादेकविधव्याप्त्यवगाहिज्ञानादन्यविधव्याप्तिविषयकविशिष्टवैशिष्ट्यबोधाद्यनुदयात् तज्जनकतावच्छेदकगर्भे विशिष्यैव तद्व्याप्तिविषयतानिवेशेन एकरूपेणानुमितिविशिष्टवैशिष्ट्यबोधादिहेतुताविरहात् तत्र च नातिव्याप्तिप्रसक्तिरित्याह वह्न्याद्यनुमिताविन्यादिना । विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयहेतुतानभ्युपगन्तृमिश्रमते व्याप्यविशिष्टपक्षवैशिष्ट्यावगाहिप्रत्यक्षसामान्येऽतिव्याप्तिविरहेऽप्यभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकप्रतियो-

गिविशेष्यकनिश्चयत्वेन हेतुता मिश्रेणावश्यं स्वीकरणीयेति वह्निव्याप्यवान्पक्षो नास्तीत्याद्यभावग्रहे तन्मतेऽप्यतिव्याप्तिरस्तीति दर्शितरीत्यैव वारणीयेत्याह अत एवेति। 'अत एव' उक्तरूपावच्छिन्नकारणताया लक्षणे प्रवेशादेव। व्याप्यवत्पक्षाद्यभावग्रहं प्रतीति। पक्षतावच्छेदकावच्छिन्नविशेषणतया व्याप्तिविशिष्टावच्छिन्ना या प्रतियोगिता तन्निरूपितानुयोगिताप्रकारकाभावलौकिकम् प्रतीत्यर्थः। 'व्याप्यवत्पक्षादिज्ञानत्वेन' व्याप्तिविशिष्टप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वेनेत्यर्थः। दण्डो रक्तो नास्तीत्याद्यभावग्रहस्य दण्डो रक्तो न वेति संशयादनुत्पत्तेरानुभविकतया विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकधीहेतुतावादिनां तद्विशेषहेतुतायामिव मिश्रमतेऽपि सधर्मितावच्छेदकप्रतियोगितावच्छेदकप्रकारकज्ञानहेतुतायां निश्चयत्वनिवेशस्यावश्यकत्वादिति भावः। 'न क्षतिः' नातिव्याप्तिः, व्याप्यपक्षविशेष्यकयोरन्वयव्यतिरेकव्याप्तिप्रकारकयोश्च परामर्शयोरनुगमकरूपस्याभावप्रत्यक्षजनकतानवच्छेदकत्वादिति भावः।

यदि चानुमितिपरामर्शयोः समानविशेष्यकत्वानुभवानुरोधाल्लिङ्गिनिगमकान्तराद्वा पक्षविशेष्यक एव परामर्शोऽनुमितिहेतुरुपेयते व्यतिरेकिणि च व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इति मतम्, व्यतिरेकव्याप्तेरनुमितिप्रयोजकत्वेऽपि *मणिमन्त्रादिन्यायेन विरोधिताया अप्रामाणिकतयानुग*मासम्भवेन पृथक्पृथगेव व्याप्तिज्ञानयोरनुमितिहेतुता व्यतिरेकिग्रन्थे दर्शनीयरीत्या च व्यभिचारवारणम्, तदा नोक्तरीतिद्वयेन विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणसम्भवः, न वा पूर्वोक्तरीत्यानुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यबोधवारणाय तद्धेतुतायां ज्ञानत्वप्रवेशस्यावश्यकत्वादित्यालोच्य तदतिव्याप्तिवारणाय विशेषणान्तरं प्रवेशयति व्याप्यविषयकत्वेनेति। लिङ्गोपधानस्य मणिकृतानभ्युपगमात् तन्मतेऽसम्भवेऽपि न क्षतिः। उक्तविशिष्टवैशिष्ट्यबोधविशिष्टस्मरणादेर्व्याप्तिविषयकत्वनियमाभावान्नातिव्याप्तिरिति भावः।

नन्वनुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिवारणायोद्बोधकाभावविशिष्टसंस्कारान्यत्वमेव विशेषणतावच्छेदकप्रकारकहेतुतायां निवेश्यं न तु ज्ञानत्वं पूर्वोपदर्शितव्यभिचारस्य दुर्वारत्वात्, अनन्यगतिकतया जनकतावच्छेदकगौरवस्यादोषत्वात्, भेदस्याव्याप्यवृत्तिताया उपगन्तव्यतया उद्बुद्धसंस्कारे उद्बोधकाभावविशिष्टभेदसत्त्वात् तादृशात् संस्काराद्विशिष्टवैशिष्ट्यस्मरणनिर्वाहः। संस्कारनिष्ठत्वविशेषितस्योद्बोधकाभाववैशिष्ट्यस्यात्यन्ताभाव एव वा निवेश्यः। स चोद्बोधकासमवहितज्ञानादिसाधारणोऽपि, तथा च ज्ञानत्वस्य विशिष्टवैशिष्ट्यधीजनकतायामनिवेशादेव तत्रातिव्याप्तिवारणसम्भवे किं व्याप्यविषयकत्वनिवेशनेन विशिष्टस्मरणातिव्याप्तेरनुभवत्वनिवेशेनापि वारणसम्भवादित्याशङ्क्य ज्ञानत्वेन विशिष्टवैशिष्ट्यबोधहेतुतायां व्यभिचारमुद्धरन् व्याप्यविषयकत्वनिवेशस्य तदतिव्याप्तिवारण-

प्रयोजनकत्वं दर्शयति एतेनेत्यादिना। प्रथमतो विशेषणज्ञानस्य हेतुतायां ज्ञानत्वेन व्यवस्थितौ विशेषणतावच्छेदकप्रकारकधियोऽपि हेतुत्वे तत्प्रवेश सम्भव इत्याशयेन विशिष्टबुद्धौ विशेषणज्ञानत्वेन हेतुत्वे पूर्वपूर्वपिदर्शित विशिष्टवैशिष्ट्यस्मरणे व्यभिचारमुद्धरति स्मृतिं प्रतीत्यादिना कल्पत्रयेण। संस्कारद्वारेति, विशेषणधियो हेतुत्वस्य कल्पनादित्यनेनान्वयः। तथा च न स्मृतौ ज्ञानत्वावच्छिन्नस्य व्यभिचारः। विशेषणज्ञानजन्यसंस्कारोत्पत्ति क्षण एव विशिष्टानुभवस्योत्पत्त्या तत्र संस्कारद्वारा हेतुत्वालम्भेऽपि न क्षतिः साक्षादेव तत्र तथात्वादित्याह अनुभव प्रति चेति। न च साक्षाद्धेतुत्वे स्मृतौ परम्परया हेतुत्वे चानुभवे व्यभिचारात् कथमयं कल्पः संभवत्युक्तिक इति वाच्यम्, स्वस्वव्यापारान्यतरत्वावच्छेदेन नियतपूर्ववर्तिताया एव कारणताघटकत्वात् प्रत्येकं व्यभिचारस्याकिञ्चित्करत्वात्। ननु व्यापार घटिता तस्य कारणता तदीयव्यापारमात्रसत्त्वं कार्योत्पत्तावपेक्षितं तथा च संस्कारादप्यनुभवसामग्रीसहकृताद्विशिष्टवैशिष्ट्यबोधापत्तिः, यदि च ज्ञानस्य स्वतः पूर्ववर्तिताया अपि कारणताघटकत्वात्तत्सत्त्वमपेक्षितं तदा स्मरणेनापि तदपेक्षतामतो व्यापारघटितमेकं कारणत्वमन्यच्च तदघटितं वाच्यम्, तथा च दर्शितव्यभिचारो दुर्वार एवेत्याशयेन कल्पान्तरमाह निर्विकल्पात्मकस्य वा स्मरणस्येति। विशिष्टस्मृतिपूर्वमित्यादि कल्पनादित्यनेनान्वयः।

केचित्तु विशेषणधिय इत्यग्रिमस्य विशेषणतावच्छेदकधिय इत्यर्थस्तथा विशेषणतावच्छेदकप्रकारकज्ञानस्यैव ज्ञानत्वेन हेतुताव्यवस्थापकोऽयं ग्रन्थः, एवं च विशेषणविषयकादित्यादिपूर्वग्रन्थोऽपि विशेषणविषयकपदस्य विशेषणतावच्छेदकप्रकारार्थकतया निर्विशिष्टस्मरणपदस्य विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुतायामेव व्यभिचारप्रदर्शनपर इति न सन्दर्भविरोध।

न चैवं निर्विकल्पकस्मरणकल्पनया न विशिष्टवैशिष्ट्यावगाहिस्मरणोपपत्तिर्निर्विकल्पकस्य विशेषणतावच्छेदकप्रकारकत्वविरहात्, किन्तु विशिष्टवैशिष्ट्यस्मरणपूर्वं विशिष्टविशेषणकस्मरणकल्पनयैव तदुपपत्तिरिति निर्विकल्पकात्मकस्य वा इत्यग्रिमग्रन्थविरोध, विशेषणतावच्छेदकस्मरणोपपादकतया तद्गोचरनिर्विकल्पकस्मरणोपगमेन सङ्गतावप्यन्तरा विशिष्टविशेषणगोचरस्मरणकल्पनीयत्वाकल्पनेन न्यूनतापत्तिश्चेति वाच्यम्, यतः स्मृतेर्निर्विकल्पकतायाः सविवादतया तादृशी स्मृतिर्न सम्भवतीति विशिष्टवैशिष्ट्यस्मरणपूर्वं विशिष्टस्मृतिकल्पनं न सम्भवतीति विशिष्टवैशिष्ट्यधीहेतुतायामिव विशिष्टधीसामान्यहेतुतायामपि ज्ञानत्वनिवेशे युक्तेस्तुल्यत्वादित्युभयत्रैव न ज्ञानत्वप्रवेश इत्यभिप्रायेणैव पूर्वमतिव्याप्तिसमाधानम्। एवं चेदानीं निर्विकल्पकस्मरणोपगमेनैव प्रत्यक्षस्थल इव निर्विकल्पक

विशिष्टज्ञानविशिष्टवैशिष्ट्यज्ञानानि स्मृतिस्थले क्रमशो भवन्तीति विशिष्टवैशिष्ट्यबोधं प्रति ज्ञानत्वेन हेतुत्वे बाधकाभाव इत्यर्थतो लाभादन्तराविशिष्टस्मृतिकल्पनाकथनेऽपि न न्यूनतेति ध्येयम् ।

अथातिप्रसङ्गवारणाय समानप्रकारकत्वेनैव स्मृतिं प्रति संस्कारज्ञानयोर्हेतुत्वान्न निर्विकल्पकस्मरणसंभवो घटत्वादिविशिष्टतद्घटादिगोचरसंस्कारादिजन्यतायां निर्विकल्पकसाधारणस्य घटत्वादिभिन्नप्रकारतानिरूपितविशेष्यताभिन्नतद्घटादिविषयताशालिघटत्वादिगोचरस्मृतित्वस्यावच्छेदकत्वे च यत्र द्रव्यत्वेन तद्घटावगाहिनो घटत्वेन चैतद्घटावगाहिनः संस्काराद्घटत्वतद्घटादिविषयकं निर्विकल्पकं तत्र घटत्वविशिष्टतद्घटविषयकसंस्कारादेर्व्यभिचार, एवं निर्विकल्पकस्मरणोपगमे प्रमेयत्वादिसामान्यलक्षणाजन्यज्ञानाधीनविश्वविषयकनिर्विकल्पकस्मरणेन स्वरूपतो निखिलजातिप्रकारकज्ञानं स्यात् । न च तादृशं ज्ञानमसर्वज्ञस्यानुभवसिद्धम् । न च स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसंस्कारादेर्हेतुतया तादृशकारणाभावात् सकलजातिनिर्विकल्पकसत्त्वेऽपि न स्वरूपतः सकलजातिप्रकारकस्मरणसंभवस्तादृशप्रत्यक्षादेरपि युगपत्सकलजातिसन्निकर्षविरहेण नापत्तिसंभव इति वाच्यम्, ज्ञानरूपसन्निकर्षसत्त्वेन तादृशमानसस्य दुर्वारत्वात् तत्कथमिदानीमपि निर्विकल्पकं स्मरणमङ्गीकृतमिति चेन्न, अनुद्बुद्धसंस्कारान्यत्वापेक्षया लघुना ज्ञानत्वेन विशिष्टधीहेतुतासिद्धौ तन्निर्वाहकतया निर्विकल्पकस्मरणस्यावश्यकत्वे तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वादिना सामान्यतो हेतुत्वान्तरस्य कल्पनीयतया विशिष्टसंस्कारादितो विशिष्टस्मरणस्येव तत्पूर्वं निर्विकल्पकस्यापि स्मरणस्य सम्भवः, न चोक्तक्रमेण सार्वज्ञ्यापत्तिः, स्वरूपतस्तत्प्रकारकोपनीतभाने स्वरूपतस्तत्प्रकारकज्ञानस्य हेतुत्वोपगमात् । उद्बोधकाकल्पनेन वा प्रमेयत्वादिसामान्यलक्षणाप्रयोज्ययावत्प्रमेयगोचरसंस्काराद्यावज्जातिनिर्विकल्पकस्यापि वारणसंभवात् । तदनभ्युपगमेऽपि स्वरूपतो मानयोग्यप्रमात्वघटकपदार्थनिर्विकल्पकमूलकप्रमेयत्वादिविषयकस्मरणजन्यतत्प्रकारकविश्वविशेष्यकस्मरणादेव कालादौ प्रमेयत्वादिना सकलप्रमेयप्रकारकस्मरणोपपत्तेरित्याशयेनेदानीं निर्विकल्पकस्मरणोपगमात् । ननु विशिष्टज्ञानत्वं परित्यज्य विशिष्टानुभवत्वस्य जन्यतावच्छेदकत्वोपगमेनैव विशिष्टस्मृतौ व्यभिचारवारणे किं निर्विकल्पकस्मरणादिकल्पनया । न च विशिष्टविषयकानुभवत्वापेक्षया लघुरूपविशिष्टविषयकत्वमेव स्मृतिसाधारणं विशेषणधीजन्यतावच्छेदकं तथा च निर्विकल्पकस्मरणमावश्यकमेवेति वाच्यम्, ज्ञानविनाशेऽपि तद्व्यापारभूतयेच्छया विशिष्टविषयककृतिजननात्तत्र व्यभिचारेण विशिष्टविषयकत्वमात्रस्य विशेषणधीजन्यतावच्छेदकत्वासंभवात् । न चोपादानप्रत्यक्षस्य साक्षात् कृतिहेतुतया कृतौ न ज्ञानत्वावच्छिन्नस्य व्यभिचार इति वाच्यम्, उपादानप्रत्यक्षस्य फलसमानविषयकत्वानियमेन सुखत्वादिविशिष्टफलविषयककृतौ

सुखत्वादिधियो व्यभिचारस्य दुर्वारत्वात्। एवं निर्विकल्पकस्मरणोपगमेऽपि कृतिसाक्षात्कारपूर्वं विशिष्टस्मृतिकल्पनया न तदुपपत्तिः कृतिद्वितीयक्षणोत्पन्ननिर्विकल्पकस्मरणेन विशिष्टविषयकस्मृतिजननकाले कृतिनाशेन विशिष्टविषयोपधानेन कृतिसाक्षात्कारासंभवा दित्यालोच्य विशिष्टानुभवत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वमाह अनुभवमिति। 'तस्या' विशेषणधिय, अनुभवत्वजात्यनङ्गीकारे विशिष्टप्रत्यक्षत्वस्यैव तथात्वं स्वीकरणीयमिति ध्येयम्।

इच्छाद्वेषसाक्षात्कारे व्यभिचारस्य कथितरीत्यानवकाशात् कृतिसाक्षात्कारे व्यभिचारमुद्धरति नियमत इति। यत्र यत्र कृतिसाक्षात्कारस्तत्र कृतिद्वितीयक्षणे विशिष्टविषयस्मृतिं कल्पयित्वा तदनन्तरक्षण एव कृतिप्रत्यक्षोपगमादित्यर्थः। न च कृतित्वनिर्विकल्पकविषयस्मरणयोर्युगपदुत्पादासम्भवात् क्रमेण तदुभयोत्पत्तौ कृतेर्विनाशाद्विषयविरहेण कृतित्वविशिष्टकृतिप्रत्यक्षानुपपत्तिरिति वाच्यम्, कृतित्वविशिष्टबुद्धौ तज्ज्ञानस्य हेतुत्वानुपगमेन तन्निर्विकल्पकस्यानभ्युपगमात्। तत्र विशेषणधियो हेतुत्वेऽपि विषयस्मरणस्यैव कृतित्वविषयकत्वोपगमेनोपपत्तौ तन्निर्विकल्पकस्यानावश्यकत्वात्। अनादौ संसारे सर्वदैव कृतित्वविषयकसंस्कारसंभवेन कृतिसाक्षात्कारजनकविषयस्मृतौ तद्भाने बाधकाभावात्। न चैवमन्यत्रापि निर्विकल्पकोच्छेदः, अपूर्ववैशत्वादेः प्राथमिकविशिष्टबुद्धिपूर्वं तत्स्मरणासम्भवेन तन्निर्विकल्पकस्यावश्यकत्वात्। यत्र विशिष्टान्तरचाक्षुषादिसामग्रीकाले घटादीन्द्रियसंयोगोत्पत्तिस्तत्रैव द्वितीयक्षणे विशिष्टान्तरचाक्षुषोत्पत्त्या घटत्वादिस्मरणासम्भवेन तदुत्तरं घटत्वादिविशिष्टधीनिर्वाहाय घटत्वादिनिर्विकल्पकस्यावश्यकत्वाच्च।

जन्यज्ञाने व्याप्यविषयकत्वनिवेशे यत्र व्याप्तिविशिष्टधूमादेः पक्षतावच्छेदकघटकता तत्रत्यानुमितौ वह्नित्वव्याप्यधूमादिविषयकसमूहालम्बनानुमितौ चाव्याप्तिः साध्याद्यननुगमनिबन्धनव्याप्त्यननुगमप्रयुक्ताऽव्याप्तिवारणानुरोधेनावश्यनिवेशनीयवह्निव्याप्तिविशिष्टपर्वतवृत्तिताज्ञानजन्यव्याप्यविषयकज्ञानजातीयत्वस्य लक्षणतया निराकर्तुमाह साध्येति।

(टी०) साध्यादेरननुगमादेकोपादानेऽन्यानुमितौ दैशाद्यव्याप्तिविषयिण्यां च तस्यामव्याप्तिः परमवशिष्यते। सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया निरसनीया। एतल्लाभायैव चानुभवार्थकं चरमज्ञानपदम्। एवञ्चान्वयव्यतिरेकव्याप्त्योः पृथक् प्रयोजकत्वेऽपि न क्षतिः। पर्वतवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताया वह्निव्याप्यवत्पर्वतनिश्चयत्वान-

न्छिन्नकारणताप्रतियोगिस्व्याप्यविषयकवृत्तिकार्यतावा वाऽवच्छे-
दिका ज्ञानवृत्तिः सामानाधिकरण्येन वाऽवच्छेदिका या जातिस्तद्वत्त्वं
वा बोध्यम् ।

(मा०) आदिना सम्बन्धविशेषादिपरिग्रह । 'एकोपादाने' परत्वाद्या-
दिघटितव्याप्त्या द्विविषयकपरामर्शजन्यताघटितलक्षणे. अन्यानुमितौ'
अन्यसाध्यकाद्यनुमितौ. 'दैवात्' दैववशसंपन्नज्ञानद्वयीविशेषात्. 'तस्याम्'
अनुमितौ. परमित्यनेनातिव्याप्तेरसंभवस्य च व्यवच्छेद । ताद् ... ति ।
पर्वतत्वव्याप्यवेशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नजन्ये व्याप्यविषयके वह्नि
व्याप्यधूमविशिष्टपर्वतत्वाद्यवच्छिन्नविषयकनिश्चयत्वावच्छिन्नजन्ये वा ज्ञाने
समवेतेत्यर्थ । तद्वृत्तित्वं तत्समवेतत्वम्, अतो न सम्बन्धान्तरेण तद्वृत्ति
त्वसत्ता दिकमादाय ज्ञानमात्रेऽतिव्याप्ति । सत्तागुणत्वज्ञानत्वानुभवत्वना
दिमादायातिव्याप्तिवारणाय अनुभवत्वव्याप्येति । व्याप्यत्वमिह भेदगर्भम्,
अनुभवत्वान्यत्वे सत्यनुभवान्यासमवेतत्वरूपं विवक्षितं तेनानुभव
त्वनिरास ।

यद्यप्यनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वरूपं यत्किंचिदनुभवास-
मवेतत्वरूपं वा तद्व्यापकत्वं निवेश्याप्यनुभवत्वान्तजातीनां वारणं संभ
वति. तथापीदृशव्यापकजातिवारकप्रकारान्. जातिघटितान्यलक्षणे
बहुशो ग्रन्थान्तरे च दर्शितत्वाद्विकप्रदर्शनायैकप्रकारोऽत्र दर्शित.
व्याप्यपदमेव उक्तभेदगर्भव्याप्यपेक्षया लघुशरीरदर्शितव्यापकत्वार्थमिति
तु न युक्तम्. या कश्चित् इत्याद. दर्शितभेदगर्भव्याप्तेर्व्याप्यपदार्थस्य स्फुट-
तयोपादानेन विरोधादिति ।

जातिपदं समवायेन तद्वत्त्वलाभाय जाति भिन्नज्ञानसमवेतधर्मप्रसिद्ध्या
जातित्वनिवेशवैयर्थ्यात् । यद्यपि तादृशधर्मोऽनुमितित्वं तदेव च लक्ष्यता-
वच्छेदकं तथापि स्वरूपतस्तस्य लक्ष्यतावच्छेदकता दर्शितरूपेण च लक्षण-
त्वमित्यविरोध । ननु व्याप्यविषयकत्वस्य जन्यज्ञानविशेषणत्वे संस्कार-
वारणायोपात्तं ज्ञानपदमनर्थकं व्याप्यज्ञाननिश्चयत्वावच्छिन्नजन्यसंस्कारस्य
व्याप्तिविषयकत्वनियमादित्याशङ्क्य तत्पदमुचार्थलाभनंशादकतया सार्थक-
यति एतल्लाभार्थं चेति । जन्यपदस्य लक्षणयाऽनुभवत्वव्याप्यजातिपुरस्कारेण
जन्यजातीयत्वार्थे तात्पर्यग्रहायैवेत्यर्थ । अनुभवत्वोपस्थापकज्ञानपदसम
भिव्याहारादनुभवत्वघटितोक्तार्थे झटिति तात्पर्यस्य ग्रहात् पटो घटजातीयं
द्रव्यमितिवज्ज्ञानं घटजातीयं द्रव्यमित्यादिवाक्यस्य स्वरसतोऽप्रयोगात्तत्त-
ज्जातीयार्थकपदस्य समभिव्याहृतपदोपस्थाप्यधर्मव्याप्यजात्या साज्ञात्यपर-
ताया औत्सर्गिकत्वादिति भाव । जातिघटनायाश्च प्रयोजनान्तरमपि दर्श-
यति एव चेति । 'पृथक् प्रयोजकत्वेऽपि' अनुमितिनिरूपितविभिन्नकारणता-

वच्छेदकशरीरे विशेषरूपेण प्रवेशेऽपि, 'न क्षति.' न एकतरघटितलक्षणकरणेऽपरव्याप्तिज्ञानजन्यानुमितावव्याप्तिः', एकतरव्याप्तिज्ञानजन्यजातीयत्वस्यापरव्याप्तिज्ञानजन्यानुमितावक्षतत्वादितिभावः । कार्यतासामानाधिकरण्यस्थाने कार्यतावच्छेदकत्वनिवेशने जातावनुभवत्वव्याप्यत्वविशेषणं विनैव सत्त्वादिवारणं संभवति तादृशजातीनां परामर्शजन्यतावच्छेदककोटिनिविष्टत्वादनुमितित्वस्यैव च तथात्वादित्याशयेनाह पर्वतेति । व्याप्यपक्षविशेष्यकपरामर्शयोरनुगतरूपेण हेतुतामते तद्रूपावच्छिन्नजन्यतयैव ज्ञानान्तरातिव्याप्त्यनवकाशात्तादृशकारणताघटितप्रथमकल्पे व्याप्यविषयकत्वानिवेशः । अवच्छेदकत्वस्य पर्याप्त्यनिवेशाद्विषयविशेषविषयकत्वस्याधिकस्य परामर्शजन्यतावच्छेदकत्वेऽपि नासंभव । समुदायस्य एकदेशानतिरिक्ततया समुदायस्यावच्छेदकत्वे तदेकदेशस्यापि तथात्वस्याव्याहतत्वात् । अत एवावच्छेदककोटिप्रविष्टवह्नित्वादिजातिमादाय वह्न्यादिरूपविषयेऽतिव्याप्तिवारणाय ज्ञानवृत्तिरिति । ज्ञानसमवेतेत्यर्थः ।

अथ वह्नित्वादिकमवच्छेदकविशेषणतयाऽवच्छेदकतायामेवावच्छेदकं न तु कार्यतायां तथा च कथं तज्जातिमादायातिप्रसक्तिः । न च स्वावच्छिन्नविधेयताकत्वसम्बन्धेन कार्यविशेषणतया वह्नित्वमपि कार्यतावच्छेदकमिति वाच्यम् । तादृशपरंपराया सम्बन्धत्वे मानाभावाद्विषयितासम्बन्धेन च वह्नित्वस्यातिप्रसक्ततयाऽवच्छेदकत्वायोगादिति चेन्न, अवच्छेद्याश्रये साक्षात्परंपरया वा यावन्ति विशेषणानि तावत्स्वेकैकार्यतावच्छेदकत्वोपगमे बाधकाभावात् कार्यतावच्छेदकादिविशेषणस्य कार्यतादौ तदवच्छेदकत्वे वाऽवच्छेदकत्वमित्यत्र विनिगमकाभावेऽपि न ज्ञानवृत्तीत्यादिवैयर्थ्यम् । न च व्यधिकरणस्यानवच्छेदकत्वनियमाद्विषयवृत्तेर्न कार्यतावच्छेदकत्वसंभव इति वाच्यम्, साक्षादवच्छेद्याश्रयविशेषणतया विलक्षणावच्छेदकतायामेव सामानाधिकरण्यापेक्षणात् । अवच्छेदकघटकानां भेदेऽपि अवच्छेद्यज्ञाननिरूपिताया अवच्छेदकत्वपर्याप्त्यधिकरणं यादृशं तादृशप्रकारावच्छेद्याश्रयविषयताया अभेदादवच्छेद्यकार्यत्वादेरभेद इति वह्निविधेयकानुमिति परामर्शजन्या इत्याकारके कार्यकारणभावग्रहेऽनुमितिविषयताया ऐक्यात् कार्यकारणभावैक्यम्, अनुमितित्ववह्नित्वादीनामवच्छेदकतावैलक्षण्येन तावत्समुदाये यद्यपि नैकमवच्छेदकत्वं तथापि तत्कार्यतानिरूपितावच्छेदकतात्वेन तदवच्छेदकतानां व्यासज्यवृत्तित्वे बाधकाभाव । तादृशानुगतरूपावच्छिन्नावच्छेदकत्वाश्रयतायाः समुदायवृत्तिधर्मेणैवावच्छेदादित्यलं पल्लवितेन । तादृशजातिमज्ज्ञानत्वस्य लक्षणत्वे सामानाधिकरण्यसम्बन्धेन तादृशजातिवैशिष्ट्यस्य ज्ञानत्व इव विषयवृत्तिधर्मेऽपि सत्त्वेन तद्व्यावर्तनाय ज्ञानत्वत्वरूपेण ज्ञानत्वस्याप्यवश्यं निवेशनीयतया गौरवमिति तदुपेक्षितम्, ज्ञानत्वाद्यवच्छिन्नसाध्यकादिपरामर्शजन्यताघटितज्ञानवृत्तिजातिमादाय लक्षणं दुष्करं तत्र विषयवृत्तिज्ञानत्वादिजातिमादायाति-

व्याप्तेर्दुर्वारत्वादिति तादृशपरामर्शजन्यताघटितमपि लक्षणं सम्भवतीति सूचयितुं ज्ञानवृत्तित्वविशेषणं परित्यज्य कल्पान्तरमाह सामानाधिकरण्येन वेति। कार्यविशेषणतया विलक्षणमवच्छेदकत्वमिह सामानाधिकरण्येनावच्छेदकत्वम्। अतो ज्ञानत्वादे कार्यतासमानाधिकरणत्वेऽपि न क्षति' ।

यत्तु आलोकादिलिङ्गकानुमितौ धूमादिलिङ्गकपरामर्शस्य व्यभिचारवारणाय स्वसमानाधिकरणतत्तल्लिङ्गकपरामर्शाव्यवहितोत्तरपर्वताद्युद्देश्यकवह्न्यादिविधेयकानुमितित्वमेव तल्लिङ्गकपरामर्शजन्यतावच्छेदकं वाच्यम्, तथा च परामर्शविशेषणतया ज्ञानत्वस्य परामर्शजन्यतावच्छेदकत्वात्तदादाय प्रत्यक्षादावतिप्रसक्तिवारणाय 'सामानाधिकरण्येनेति' कल्पानुसरणमिति। तन्न सार्थीय अव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वेऽनुमितित्वनिवेशस्य निष्प्रयोजनकतयाऽसंभवप्रसङ्गात्, न ह्यव्यवहितोत्तरत्वनिवेशे क्वापि व्यभिचार प्रसज्येत येन तद्वारकतयाऽनुमितित्वनिवेशनं सार्थकं भवेत्।

अथानुमितित्वाप्रवेशे धूमपरामर्शाव्यवहितोत्तरोत्पन्नतत्समानाधिकरणात्मघटसंयोगवह्नित्वाद्यधिकरणे घटादौ परामर्शाभावेन व्यभिचार इत्यनुमितित्वनिवेशसार्थक्यम्। न च विषयविशेषावगाहित्वनिवेशान्निर्विषयसंयोगादिव्यावृत्तिरिति वाच्यम्, अव्यवहितोत्तरत्वनिवेशे विषयविशेषावगाहितायाः प्रयोजनान्तराभावेनानिवेशात्। न च कार्यनिरूपितं दैशिकव्यापकत्वं न कारणताघटकम्, अपि तु कार्यतावच्छेदकव्यापकसामानाधिकरण्यप्रतियोगित्वम्, अत एव क्रियानधिकरणोत्तरदेशसंयोगोत्पत्तावपि तस्यास्तत्कारणत्वमिति वाच्यम्, प्रकृते कार्यनिरूपितदैशिकव्यापकताया कारणत्वाघटकत्वे कार्याधिकरणदेशत्वस्य कारणाधिकरणदेशत्वानियतत्वनिर्वाहात्। क्रियाधिकरण उत्पद्यमान संयोगो यथा तदनधिकरणोत्तरदेशे जायते तथा परामर्शाधिकरण इव तदनधिकरणेऽपि सिद्ध्यभावादिघटितानुमितिसामग्रीमत्यात्मन्यनुमित्युत्पादस्य दुर्वारत्वादिति चेत्, सत्यम्, अनुमितित्वमनिवेश्य स्वसमानाधिकरणपरामर्शाव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वे संयोगादिविशेषे व्यभिचारोऽस्त्येव तद्वारणाय स्वाव्यवहितपूर्ववर्तिपरामर्शसामानाधिकरण्यमेव विशेषणतया जन्यतावच्छेदकमुपेयताम्, तथा च तद्विशिष्टाधिकरणं परामर्शाधिकरणमेवेति तदुपलक्षितस्य संयोगादेः परामर्शाव्यभिचारेऽपि तद्विशिष्टाधिकरणताघटितव्यापकतागर्भकारणत्वमक्षतमित्यनुमितित्वनिवेशनमफलम्। न च स्वत्वाननुगमेन नोक्तधर्मस्य कार्यतावच्छेदकत्वमपि स्वाव्यवहितोत्तरत्वसामानाधिकरण्योभयसम्बन्धेन परामर्शविशेष एव तज्जन्यतावच्छेदक, तस्य चानुमितिरूपकार्ये विशेषणतया न कारणताघटकत्वसंभव, परामर्शसमानकालीनविनश्यदवस्थपरामर्शजन्यानुमित्यधिकरणताया परामर्शविशिष्टनिरूपितत्वेन कारणत्वाघटकतया

परामर्शस्य तादृशानुमित्यकारणत्वप्रसङ्गात्, न हि विशेष्यनिरूपिताधिकरणतावच्छेदककालावच्छेदेन विशेष्येऽसम्बद्धे व्यावर्तकेऽधिकरणतानिरूपकतावच्छेदकत्वरूपमधिकरणतानिरूपकविशेषणत्वमुपेयते, किन्तूपलक्षणत्वमेव. भूतलाद्यधिकरणे पुरुषादेः सत्त्वदशायां पुरुषाद्यसम्बद्धेन तद्व्यावर्तकेनापि दण्डादिना विशिष्टस्य पुरुषादेरधिकरणत्वस्य भूतलादावभावात्, परामर्शोपलक्षितस्य संयोगादेर्घटादौ व्यभिचार एवेत्यनुमितित्वनिवेशनमावश्यकमिति वाच्यम्, तदधिकरणतावच्छेदककालावच्छेदेनावृत्तेरप्येककालावच्छिन्नत्वाविशेषितस्य सामानाधिकरण्यसम्बन्धेन तदधिकरणतानिरूपकतावच्छेदकत्वोपगमात्। अत एव सिद्धिसिषाधयिषोभयकाले कालान्तरावच्छिन्नतदधिकरणात्मवृत्तिसिषाधयिषाविरहविशिष्टसिद्धिनिरूपिताधिकरणतासत्त्वेन विशिष्टसिद्ध्यभावरूपपक्षताया अनिर्वाह इत्यालोच्य दीधितिकृतां पक्षताग्रन्थ एकक्षणावच्छिन्नत्वविशेषितसामानाधिकरण्यसम्बन्धेन सिद्धौ सिषाधयिषाविरहवैशिष्ट्यमित्यभिधानं संगच्छते। अत एव पक्षताया विशिष्टाभावरूपाया अतीन्द्रियक्षणघटितत्वेनातीन्द्रियतया प्रत्यक्षासंभवाभिप्रायेण विशेष्याद्यभावरूपाया इत्यनुपदं तदभिधानस्यापि सङ्गतिः। एवञ्चानुमितित्वस्य परामर्शजन्यतावच्छेदककोटावप्रवेशेऽपि नोक्तव्यभिचारप्रसङ्गः। घटादौ परामर्शाधिकरणतानियतायास्तदुपलक्षिताधिकरणताविलक्षणायाः सामानाधिकरण्यघटितसम्बन्धेन परामर्शविशिष्टाधिकरणताया असत्त्वात्। नापि विनश्यदवस्थपरामर्शजन्यानुमित्यधिकरणतायाः कारणताघटकव्यापकतायामनिवेशे तस्याः परामर्शरूपकारणनियम्यता न स्यादिति दूषणस्याप्यवकाशः, तदधिकरणताया अपि विशिष्टाधिकरणतात्वेन तादृशव्यापकतायां प्रवेशात्। अस्तु वा स्ववृत्तित्वस्ववृत्तिधूमादिपरामर्शाव्यवहितोत्तरत्वोभयसम्बन्धेनात्मविशिष्टत्वमेव धूमादिपरामर्शजन्यतावच्छेदकं तावताप्यन्यलिङ्गकानुमितौ तस्य व्यभिचारवारणादात्मवृत्तित्वविशिष्टस्यैवाधेयतयात्मविशिष्टस्याप्यनात्मन्यवृत्तेरिति ज्ञानत्वादिकं निवेश्यापि संयोगादौ व्यभिचारवारणसंभवाद्विनिगमनाविरहेण तस्यापि कार्यतावच्छेदकताया दुर्वारत्वादतिप्रसङ्गाच्च। न चाव्यवहितप्राक्क्षणावच्छिन्नतल्लिङ्गकपरामर्शाधिकरणताविशिष्टसमवायस्तल्लिङ्गकपरामर्शजन्यतावच्छेदकसम्बन्धः, एवं च शुद्धमनुमितित्वमेव तज्जन्यतावच्छेदकं शुद्धज्ञानत्वादिकञ्च नित्यसाधारणमिति न तथात्वसंभव इति वाच्यम्, तथा सति ज्ञानत्वस्य कार्यतावच्छेदककोट्यप्रवेशेन तद्वारकविशेषणोपादानानुपपत्तेः। तस्मात्तत्साध्यपक्षकानुमितिरेकलिङ्गकपरामर्शजन्यैव प्रसिद्धा तत्पक्षकतत्साध्यव्याप्यवत्तापरामर्शजन्यताघटितमेव लक्षणमभिप्रेतम्। पर्वतादिपदमपि तत्पक्षादिपरमेव तत्र च न परामर्शविशेषणतया ज्ञानत्वस्य जन्यतावच्छेदककोटिप्रवेशप्रसक्तिरिति। तथा च ज्ञानत्वघटितयादृशसाध्यकानुमितिरेकलिङ्गकपरामर्शादेव तदनुमितिकारणताघटितमपि लक्षणं ज्ञानवृत्तित्वविशेषणमु-

पेक्ष्य सामानाधिकरण्येनावच्छेदकत्व निवेश्य कर्तुं शक्यते इत्याशयेन 'सामानाधिकरण्येन वेति' इत्यभिहितमिति तत्त्वम्।

ननु विशिष्टवैशिष्ट्यबोधातिव्याप्तिवारणाय नानापदार्थघटितगुरुतरव्याप्त्यविषयकत्वनिवेशनमयुक्तम्, अभावत्वादिर्यत्किंचिद्व्याप्तिघटकपदार्थाविषयकत्वं निवेश्यापि तद्वारणसम्भवाज्जातिघटनयाऽभावाद्यनुमितेरपि संग्रहादित्याशयेनाह व्याप्तिभान इति।

(दी०) व्याप्तिभानेऽवश्यं भासमानो यस्तादृशानुमित्यविषयस्तद्विषयत्वमात्रं वा ग्राह्यम्, यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वमिति वा वक्तव्यम्। अनुभवत्वजात्यनङ्गीकारे तु तद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवायित्वं वक्तव्यम्। व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्ना या विशिष्टपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यता तत्समानाधिकरणानुभवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि कश्चित्।

(गा०) व्याप्तिज्ञानविषयतद्घटकपदार्थान्तराविषयकत्वनिवेशेऽतिव्याप्तेर्दुर्वारत्वात् अवश्यमिति। अनुमितौ नियतभासमानव्याप्तिघटकसाध्याद्यविषयकत्वनिवेशस्यासंभवसंपादकत्वादसंभव इत्यत आह—तादृशानुमित्यविषय इति। प्रकृतसाध्यकयत्किञ्चिदनुमित्यविषय इत्यर्थः। यत्किञ्चिदनुमित्यविषयताया प्रकृतसाध्यादिसाधारणत्वात् सामान्यतोऽनुमितिविषयतायाः प्रकृतसाध्यकयावत्प्रमेयविशेष्यकसमूहालम्बनानुमितिविषयतायाश्च केवलान्वयित्वात्। 'प्रकृतसाध्यकेति' 'यत्किञ्चिदिति' चातिव्याप्त्यसम्भवयोर्वारकतामाविष्कर्तुमेवोक्तभङ्ग्याभिधानम्, निवेशस्तु तादृशपदार्थस्य कस्यचिदेकस्य विशिष्यैवेत्यवधेयम्। अनुभवत्वव्याप्यजातिघटितलक्षणे परामर्शत्वावच्छिन्नकारणताप्रतियोगिकव्याप्त्यविषयकवृत्तिकार्यताशालित्वेन कतिपयानुमितीनां निवेशनमयुक्तम्, तद्व्यक्तित्वेनैकानुमितिव्यक्तिमुपादायानुभवत्वव्याप्यजात्या तद्व्यक्तिजातीयत्वस्यापि लघोर्लक्षणत्वसंभवादित्याशयेन तादृशजातिघटितलक्षणं तथैव निष्कर्षयति या काञ्चिदिति। अनुभवत्वस्य तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक एव भेदो निविष्टो न त्वनुभवत्वत्वावच्छिन्नप्रतियोगिताकः, अनुभवत्वत्वशरीरे सकलानुभवसमवेतत्वस्य निविष्टत्वात्, तदवच्छिन्नभेदनिवेशनेनैवानुभवत्वज्ञानत्वादिसकलव्यापकजातिवारणसंभवे भेदप्रतियोगितावच्छेदकशरीरेऽनुभवेतरासमवेतत्वनिवेशनेनान्यत्वान्तस्य ज्ञानत्वादिसाधारण्यं संपाद्य तद्वारणायानुयोगिन्यनुभवान्यासमवेतत्वरूपविशेषणान्तरप्रवेशस्य प्रक्षालनाद्धीत्यादिन्यायविषयत्वात्

तद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वस्य लक्षणत्वसंभवेऽपि न क्षति। अनुभवत्वव्याप्यताघटितपूर्वलक्षणस्यैवेदानीं निष्कर्षणात्।

तद्व्यक्तिपदेन प्रत्यक्षादिव्यक्तिमुपादायोक्तशब्देन प्रत्यक्षादिलक्षणमपि संभवतीत्याशयेन प्रत्यक्षाद्यसमवेतत्वं नोपात्तमिति केचित्। तन्न, तद्व्यक्तिसमवेतयत्किंचिदनुभवासमवेतधर्मसमवायित्वम्' इत्येकशब्देन प्रमाचतुष्टयलक्षणसंभवात्तथानभिधानबीजानुयोगस्य तावताप्यपरिहारात्। धर्मसमवायित्वमिति। समवायेन तद्वत्त्वमित्यर्थः। यथाश्रुते कालिकादिसम्बन्धेन तादृशानुमितित्वसमवायस्यातिव्याप्ततया सम्बन्धविशेषेण समवायवत्तानिवेशस्यावश्यकत्वे समवायस्यैव सम्बन्धताया उचितत्वात्। नन्वनुभवचतुष्टयसाधारणी जातिरप्रामाणिकी प्रत्यक्षत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वसम्भवादिति स्मृत्यन्यज्ञानत्वमेवानुभवत्वं तथा चानुभवत्वान्यत्वविशेषणमयुक्तम्, स्मृत्यन्यत्वविशिष्टस्यापि ज्ञानत्वस्य ज्ञानत्वानतिरिक्ततया विशेषणान्तरेण वारितत्वात्। एवम् 'अनुभवान्यासमवेतेति' स्मरणान्यज्ञानान्यासमवेतेत्यर्थकं तत्र स्मरणभिन्नज्ञानत्वनिवेशनमनतिप्रयोजनकं ज्ञानान्यसमवेतेच्छात्वादेस्तद्व्यक्तिसमवेतत्वविशेषणेनैव वारणात् स्मरणान्यान्यत्वेन स्मृत्युपादानमपि 'न हि घट इत्यादिवक्तव्येऽनघट इति कश्चिद्वदति' इति न्यायेनायुक्तमित्यत आह अनुभवेति। अनुभवत्वजात्यङ्गीकर्तृमतेऽनुभवत्वान्यत्वविशेषणस्यानुभवत्वव्यावर्तनायावश्यकतया तदनङ्गीकारेत्वित्युक्तम्।

मूलोक्तलक्षणे चक्रवर्तिव्याख्यानमुपन्यस्यति व्याप्तीति। व्याप्तिज्ञानत्वावच्छिन्नेति। धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नेत्यर्थः। विशिष्टपरामर्शत्वावच्छिन्नेति। वह्निव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नेत्यर्थः। धूमो वह्निव्याप्य इत्याकारकव्याप्तिप्रकारकनिश्चयस्य करणविधया हेतुत्वं तज्जन्यतावच्छेदकं धूमलिङ्गकवह्निविधेयकानुमितित्वम्, वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शस्य च तद्व्यापारविधया तत्त्वं तज्जन्यतावच्छेदकं च पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नविधेयताकधूमलिङ्गकानुमितित्वम्, एवं च धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकीभूतोपदर्शितधर्मावच्छिन्नव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिका च या पर्वतो वह्निमानित्येतादृशानुमितिनिष्ठा कार्यता तादृशकार्यतासमानाधिकरणानुभवत्वव्याप्यजातिश्चानुमितित्वजातिरेव, तामादाय सकलानुमितौ लक्षणसमन्वयः। वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधवृत्तितथाविधनिश्चयत्वावच्छिन्नविशेषणतावच्छेदकप्रकारकज्ञानीयकारणताप्रतियोगिककार्यतामादायातिप्रसङ्गवारणायावच्छिन्नान्तम्, तथा च वह्निव्याप्तिविशिष्टावच्छिन्नपर्वतप्रकारताशा

लिङ्गज्ञानत्वावच्छिन्नतादृशकार्यतायां धूमत्वावच्छिन्नविशेष्यकवह्निव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकावच्छिन्नत्वाभावान्न तामादायातिप्रसङ्गः। वह्निव्याप्यधूमवान् पर्वत इत्येतादृशनिश्चयत्वावच्छिन्नकारणताया अपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकतादृशनिश्चयवृत्तित्वात्। तादृशकारणतानिरूपितकार्यतावच्छेदकावच्छिन्नतादृशकार्यतामादायातिप्रसङ्ग इत्यतस्तादृशनिश्चयवृत्तित्वमपहाय तादृशनिश्चयत्वावच्छिन्नत्वनिवेशनम्, तादृशनिश्चयत्वान्यूनवृत्तित्वं तदर्थं, अन्यथा वह्निव्याप्यधूमवान्पर्वत इत्यादिविशेषणतावच्छेदकप्रकारकनिश्चयस्य वह्निव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन पर्वतत्वावच्छिन्नविशेषणतापन्नधूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताशालिनिश्चयत्वेन च विनिगमनाविरहेण हेतुत्वात् 'अधिकं तु' इत्यादिन्यायेन तादृशनिश्चयहेतुताया अपि तथाविधनिश्चयत्वावच्छिन्नतया तन्निरूपितकार्यतामादायातिप्रसङ्गवारणासंभवात्, तादृशनिश्चयत्वान्यूनवृत्तित्वनिवेशे च वह्निव्याप्यधूमवान् पर्वत इत्येतादृशविशेषणतावच्छेदकप्रकारकनिश्चयहेतुताया वह्निव्याप्यो धूम इत्येतादृशनिश्चयावृत्तित्वेन तादृशनिश्चयत्वन्यूनवृत्तित्वेन न दोषः। वह्निव्याप्यधूमवत्पर्वतवान् देश इत्येतादृशविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्यताया अपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्ना या विशेषणतावच्छेदकप्रकारकनिश्चयविधया कारणता तत्प्रतियोगिकव्याप्तिविशिष्टधूमवैशिष्ट्यावगाहिबोधनिष्ठकार्यतासमानाधिकरणत्वादुक्तातिप्रसङ्गवारणासंभवेन तादृशकार्यतासामानाधिकरण्यमपहाय तदवच्छेदकावच्छिन्नत्वनिवेशनम्। एवञ्च तादृशव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकीभूतवह्निव्याप्त्यवच्छिन्नधूमविशेषणताकबुद्धित्वेन वह्निव्याप्यत्वविशिष्टधूमावच्छिन्नपर्वतविशेषणताकबुद्धित्वावच्छिन्नायाः कार्यताया अनवच्छिन्नत्वान्नातिप्रसङ्ग.। अथैवमपि वह्निव्याप्यत्वावच्छिन्नधूमविशेषणताकबुद्धित्वावच्छिन्नजन्यतावच्छेदकघटकीभूतेन बुद्धित्वेन वह्निव्याप्यत्वविशिष्टधूमावच्छिन्नपर्वतविशेषणताकबुद्धित्वावच्छिन्नजन्यताया अवच्छिन्नत्वान्नोक्तातिप्रसङ्गवारणसंभवः। न च तदवच्छेदकावच्छिन्नेत्यत्र तदवच्छेदकपदस्यावच्छेदकतापर्याप्त्यधिकरणपरत्वान्नावच्छेदकैकदेशज्ञानत्वावच्छिन्नत्वमादायातिप्रसङ्ग इति वाच्यम्, समुदायस्यैकदेशानतिरिक्तत्वात् समुदायस्य तथात्वे एकदेशस्यानथात्वमित्यस्य शब्दमात्रत्वादिति चेन्न, तदवच्छेदकावच्छिन्नेत्यत्र तदवच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकताकत्वं विवक्षितम्, न्यूनाधिकपदार्थावच्छिन्नोक्तजन्यतयोरवच्छेदकत्वे च नैकधर्मावच्छिन्नपर्याप्तिके न्यूनाधिकवृत्तिभ्यां तावत्पदार्थसमुदायत्वाभ्यामेव तत्पर्याप्त्यवच्छेदादिति नातिप्रसङ्गः। प्रकृते च व्याप्तिनिश्चयव्याप्यत्ताानिश्चयनिरूपितजन्यतावच्छेदककुक्षिनिविष्टपदार्थानां न्यूनाधिकभाववि-

रहेणैकेनैव समुदायत्वेन तदुभयावच्छेदकतापर्याप्तिरव्यवच्छिद्यतेऽतो नासंभव ।

अथ धूमो वह्निव्याप्य इत्येतादृशव्याप्तिनिश्चयस्य धूमलिङ्गकवह्निविधेयकानुमितित्वमेव जन्यतावच्छेदकमुपेयते न तु तत्र पक्षविषयत्वान्तर्भाव स्तथा सत्यनन्तपक्षभेदेन तत्कारणतावाहुल्यप्रसङ्गात्, वह्निव्याप्यधूमवान् पर्वत इतिपरामर्शजन्यतावच्छेदककोटौ च पर्वतविषयत्वान्तर्भाव आवश्यको ऽन्यपक्षकानुमितौ तदहेतुत्वात्कथं तादृशजन्यतावच्छेदकत्वयोरेकपदार्थावच्छिन्नपर्याप्तिकत्वम्। न च तदवच्छेदकावच्छिन्नेत्यत्र तदवच्छेदकयावत्पदार्थावच्छिन्नत्वमेव निवेशनीयं न त्वेकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकताकत्वं धूमो वह्निव्याप्य इतिविशेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदककोटौ धूमनिष्ठविशेषणताया निवेशाद्वह्निव्याप्यधूमवान् पर्वत इति विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदककोटौ च तन्निष्ठविशेषणतावच्छेदकताया एव निवेशान्नैतादृशजन्यतायास्तादृशजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वमिति नातिप्रसङ्ग, प्रकृते च परामर्शजन्यतावच्छेदककोटौ पक्षविषयत्वस्याधिकस्य निवेशेऽपि तज्जन्यताया व्याप्तिज्ञानजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वमव्याहतमेवेति नासंभव इति वाच्यम्, धूमो वह्निव्याप्य इत्येतादृशव्याप्तिनिश्चयजन्यतावच्छेदककोटौ पर्वतविशेष्यताऽनिरूपितमहानसादिनिष्ठविशेष्यतानिरूपितवह्निविधेयताया अपि वह्निविधेयतात्वेन निवेशाद्वह्निव्याप्यधूमवान् पर्वत इत्येतादृशपरामर्शजन्यतावच्छेदककोटौ च पर्वतनिष्ठविशेष्यतानिरूपितवह्निविधेयताया एव निवेशात् परामर्शजन्यताया व्याप्तिनिश्चयजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वविरहात्। एवं व्याप्तिनिश्चयजन्यतावच्छेदककोटौ तदव्यवहितोत्तरत्वमन्यलिङ्गकानुमितौ व्यभिचारवारणाय निवेशनीयं न तु व्याप्यवत्ताज्ञानाव्यवहितोत्तरत्वं गौरवाद्व्याप्यवत्तानिश्चयजन्यतावच्छेदकोटौ न तन्निवेश। तन्निवेशेऽपि धूमो वह्निव्याप्य इत्येतादृशज्ञानकालीनान्यलिङ्गकानुमितौ व्यभिचारादपितु व्याप्यवत्तानिश्चयाव्यवहितोत्तरत्वमेव, तथा च परामर्शजन्यताया न व्याप्तिज्ञानजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वमिति चेन्न, करणव्यापारनिरूपितफलनिष्ठजन्यतयो प्राचीनमत एकधर्मावच्छिन्नत्वनियमादगत्या पर्वतपक्षकधूमलिङ्गकवह्निविधेयकानुमितित्वमेव व्याप्तिज्ञानपरामर्शयोर्जन्यतावच्छेदकं वाच्यं तथा च तादृशजन्यतयोरेकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकताकत्वमक्षतमेवेति नानुपपत्ति। एतादृशनियमस्याप्रामाणिकत्वादयमेवास्वरस केचिदित्यनेन सूचित। धूमत्वावच्छिन्नधर्मिकव्याप्तिप्रकारकज्ञानीयकारणताया अपि वह्निव्याप्यधूमवान् पर्वत इत्येतादृशनिश्चयवृत्तित्वात्तत्प्रतियोगिककार्यतायास्तादृशव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्नत्वमा

द्यातिप्रसङ्गवारणाय विशिष्टपरामर्शवृत्तित्वमपहाय तदवच्छिन्नत्वनिवेश । पदान्तरव्यावृत्तिस्तु पूर्ववद्बोध्या । अत्र व्याप्त्यविषयकवृत्तित्वस्य निवेशे नेव विशिष्टवैशिष्ट्यबोधादिवृत्तिकार्यतामादायातिप्रसङ्गवारणं संभवति गुरुतरव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्न त्वस्य निवेशाद्गौरवमित्यप्यस्वरस केचिदित्यनेन सूचित ।

मिश्रव्याख्यानमुपन्यस्यति परे त्विति ।

(दी०) परे तु पक्षधर्मतेत्यत्र पक्षता विशेषणम्, तथा च पक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः, यथोक्ताया विशेष्याद्यभावरूपाया वा पक्षतायाः पत्यक्षवारणाय परामर्शस्योपादानं तत्त्वेन जनकत्वमेकावच्छेदेन तदुभयजन्यत्वं च विवक्षितं तेन बाधादिकालीनेन दैवात् प्रतियोगिविषयकेण परामर्शेन जन्ये पक्षतायाः प्रत्यक्षे तदुभयसमूहालम्बने वा नातिप्रसङ्गः । तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वनिरपेक्षया च नाव्याप्तिरित्याहुः । तच्चिन्त्यम् ।

(गा०) यथाश्रुतव्याख्येयलक्षणे पक्षताजन्यत्वनिवेशान्मूलोक्तशब्दात्त ल्लाभायाह पक्षधर्मत यत्रेति । प्रतिपाद्यकोटिनिविष्टत्वं सप्तम्यर्थ, तच्च 'पक्षता' इत्यत्रान्वेति । तथा च 'पक्षधर्मता' इत्यत्र तत्पदप्रतिपाद्यकोटिनिविष्ट पक्षतेत्यर्थ । तथा च पक्षपद न धर्मिमात्रपरमपि तु पक्षताविशिष्टधर्मिपरमेवेति भाव । विशेषणमिति । ज्ञानपदार्थं इत्यादि । धर्मस्वरूपविषयविशेषणत्वेन विषयतया ज्ञानान्वयिनि धर्मिरूपविशेष्यांशे न तस्य विशेषणत्वसंभव, परामर्शाविषयस्य तस्य तद्विषयविशेषणत्वासंभवाद्दण्डाद्यविषयकस्य पुरुषादिज्ञानस्य पुरुषादेर्दण्डादिमत्त्वेऽपि दण्डादिविशिष्टपुरुषाद्यविषयकत्वात्, दण्डपुरुषावित्यादिज्ञानस्य दण्डादिविषयकत्वेऽपि न तद्विशिष्टविषयकत्वम्, विषयतावच्छेदकस्यैव विषयविशेषणत्वादत पक्षतोपलक्षितधर्मिविषयकमेव ज्ञानमिह विवक्षितम्, तथासत्यपि पक्षताजन्यत्वसहितं परामर्शजन्यत्वं जन्यान्ताल्लभ्यते विशेष्यीभूततदन्वयिना तदन्वयिनो विशेषणत्वाज्ज्ञानविशेषणपक्षताया ज्ञानान्वितजन्यपदार्थजन्यतायामन्वयादित्याशयेन तथैव लक्षणार्थमाह तथा चेति । अथारुणया गवा सोमं क्रीणातीत्यादौ गवादावारुण्यादे साक्षात् प्रकारतया तत्र तस्य विशेषणत्वसंभवेन गवादिसाध्यतया प्रतीयमान सोमक्रयादावारुण्यादिसाध्यताप्रतीति संभवतीति प्रकृतस्थले तु पक्षताया ज्ञानांशे साक्षात्प्रकारत्वाज्ज्ञानान्वयिना जन्यत्वेन कथमन्वय । न चारुणयेत्यत्राप्यारुण्यं गवि न साक्षात्प्रकार, अभेदसम्बन्धेनारुण्यविशिष्टाया एव तत्र साक्षात् प्रकारत्वात् तथा च परंपरया

गवि प्रकारस्याप्यारुण्यस्य यथा गवान्वयिना तृतीयार्थसाध्यत्वेनान्वयस्तथा प्रकृतेऽपि ज्ञानविशेषणधर्मतायां प्रकारीभूतधर्मिणि प्रकारीभवन्त्याः पक्षताया ज्ञानान्वयितावच्छेदकावच्छिन्नजन्यत्वेऽन्वयः संभवतीति वाच्यम्, विशेषणविभक्तेरभेदार्थकतयाऽरुणाभेदस्यारुण्यपर्यवसितस्य साक्षाद्गोविशेषणत्वसंभवात्। मैवम्, 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादौ यथा लौहित्यस्य ऋत्विक्प्रचरणांशे परंपरया विशेषणस्यापि तदन्वयिनेष्टसाधनत्वेनान्वयस्तथा प्रकृतेऽपि परंपरया ज्ञानविशेषणीभूतपक्षताया अपि जन्यतान्वये बाधकाभावात्। एवं विशेषणविभक्तेः सार्थकतामतेऽरुणयेत्यादावारुण्यं गवि परंपरयैव प्रकार इति साक्षात्तत्प्रकारस्यैव तदन्वयिना अन्वय इति नियमाभावात्।

अथ भवतु परंपरया स्वविशेष्येऽन्वयिनापि स्वान्वयस्तथापि जन्यतायां ज्ञानान्वय उपलक्षणतया भासमानविषयांशे प्रकारीभूतायाः पक्षताया जन्यतान्वयो न संभवतीत्युपलक्षणपुच्छलग्नस्य विशेषणत्वायोगात्, लोहितोष्णीषा इत्यादौ लौहित्यविशेष्यीभूतोष्णीषादावप्येष्टसाधनतान्वयोपगमेन लौहित्यस्यारुणयेत्यादावारुण्यविशेष्यतद्धर्मिणोऽपि क्रयसाधनत्वान्वयोपगमेनारुण्यस्योपलक्षणपुच्छलग्नत्वाभावेन सामञ्जस्यात्, प्रकृते च परामर्शविषयेऽनुमितिजनकत्वबाधेन तदन्वयायोगादुपलक्षणताया एव वाच्यत्वादिति चेन्न, प्रकृतेऽपि जन्यपदस्य प्रयोज्यपरतया कारणतावच्छेदकप्रविष्टविषयाणामप्यनुमितिप्रयोजकतया तेषामपि जन्यपदार्थान्वयः संभवत्येवेति सामञ्जस्यात्, परामर्शादिप्रयोज्यताया लक्षणघटकत्वेऽपि परामर्शान्वयिप्रयोज्यताशरीरे जनकजनकत्वादिना याऽन्यथासिद्धिस्तद्निरूपकत्वस्य निवेशेनानुमितिजन्यप्रत्यक्षादावतिव्याप्तिवारणसंभवात्, विषयप्रयोजकतायाश्च लक्षणघटकत्वेन न विवक्षा, अतो न लक्षणे व्यर्थविशेषणता।

वस्तुतो ज्ञानांशे पक्षताश्रयधर्मिवृत्तिताविषयकत्वस्य साक्षात् प्रकारतया भाने पक्षताया अपि धर्मिपारतन्त्र्येण स्वाश्रयधर्मिवृत्तित्वविषयकत्वसम्बन्धेन तदंशेऽन्वयः स्वीक्रियते, तथा च ज्ञानांशे परंपरासम्बन्धेन साक्षात्प्रकारीभवन्त्याः पक्षताया जन्यत्वान्वयो निराबाध एव। दण्डिनं पुरुषमानयेत्यादावन्तराभासमाने मत्वर्थसम्बन्धे आनयकर्मत्वबाधेऽपि दण्डाद्यावानयनकर्मत्वान्वयो दण्डादेरपि स्वसम्बन्ध्यभेदसम्बन्धेन पारतन्त्र्येण पुरुषादौ साक्षात्प्रकारत्वोपगमेनोपपादनीयः।

यत्तु पक्षतायाः सहकृतत्वसम्बन्धेन ज्ञानविशेषणत्वात् पक्षताजन्यत्वलाभ इति। तदसत्, परंपरया विशेषणस्य परंपराघटकतत्तत्पदार्थघटितपरंपरासम्बन्धातिरिक्तसम्बन्धेनान्वये आकाङ्क्षाविरहादन्यथा दण्डी पुरुष

इत्यादावैकमालीनत्वादिसम्बन्धेनापि पुरुषादौ पारतन्त्र्येण दण्डदण्डत्वाद्यन्वयापत्तेः ।

अरुणयेत्यादावारुण्यरूपधर्मः एवारुणपदार्थः, तत्पदोत्तरतृतीययैवारुण्यस्य क्रयसाधनत्वं बोध्यते, न तु विशिष्टान्वयबलात्तल्लाभ इति मीमांसासिद्धान्तः । तदुक्तं "तृतीयया गुणस्यैव साधनत्वं क्रयं प्रति विस्पष्टं गम्यते न तु द्रव्यद्वारैव सिध्यति" इति आरुण्यस्य क्रयसाधनत्वं साधनतावच्छेदकतया प्रयोजकत्वमेव, धूमाद्वह्निमानित्यत्र धूमपदस्य मुख्यार्थपरत्वेनेति मते यथा हेतुपञ्चम्या धूमस्य कारणतायां विषयतयाऽवच्छेदकत्वरूपं वह्निज्ञानप्रयोजकत्वमेव प्रतिपाद्यते तथात्रापि हेतुतृतीयया साधनतावच्छेदकत्वप्रत्यायनसंभवात् । आरुण्यस्य साधनतावच्छेदकत्वञ्चाश्रयतासम्बन्धेन । 'तत्' तच्च, 'द्रव्यद्वारेव' आश्रयस्यसाधनतयैव, 'सिध्यति' उपपद्यते, इति तदर्थः । एवञ्च गोः क्रयसाधनतायां श्रुतिसिद्धायामारुण्यस्य तदवच्छेदकत्वे लाघवं तदाश्रयद्रव्यान्तरनिष्ठकारणतान्तरावच्छेदकत्वे गौरवमिति प्रतिसन्धानेन गोनिष्ठकारणतायामारुण्यस्यावच्छेदकत्वनिश्चये आरुण्यविशिष्टगौः क्रयसाधनत्वमर्थात् प्रतीयते तादृशबोधेऽरुणयेतिपदस्य तात्पर्यात्तुणिपरतयाऽरुणपदस्य गुणिपरगोपदसमानलिङ्गतेति कारिकाभिप्रायः । तथा चेति । पक्षताया उपदर्शितविशेषणत्वे चेत्यर्थः । पक्षतामहत्त्वेति । पक्षताजन्यत्वे सति परामर्शजन्यत्वमर्थः । परामर्शजन्यसाध्यव्याप्यहेतुविशिष्टपक्षवैशिष्ट्यावगाहिबोधतादृशपक्षाभावप्रत्यक्षादावतिव्याप्तिवारणाय पक्षताजन्यत्वोपादानम् । परामर्शजन्यत्वोपादानस्य प्रयोजनमाह स्फोरणाया इति । 'यथोक्ताया' सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपाया । ननु तादृशाभावस्य लौकिकप्रत्यक्षमेव न संभवति, एकक्षणावच्छिन्नैकात्मवृत्तित्वरूपातीन्द्रियलक्षणघटितधर्मावच्छिन्नप्रतियोगितावत्त्वात् । यदि चैकात्मवृत्तित्वमेव वैशिष्ट्यं सिषाधयिषाकालीनसिद्धौ कालान्तरावच्छेदेन स्वसमानाधिकरणसिषाधयिषाभावनिरूपिततादृशवैशिष्ट्यसत्त्वेऽपि तदानीं सिषाधयिषाविरहात्मकविशेषणाभावाधीनो विशिष्टाभावोऽक्षत एवान्यैकक्षणावच्छिन्नत्वनिवेशेऽपि तादृशसिद्धेर्द्वितीयक्षणे सिषाधयिषाया उत्पत्तिस्तन्नाशो वा तत्र सिषाधयिषाभावनिरूपितवैशिष्ट्यसत्त्वेन तस्या उत्पत्तिद्वितीयक्षणे तत्क्षणे वा विशिष्टाभावासत्त्वप्रसङ्गादिति 'सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेकक्षणावच्छेदेनैकदेशवृत्तित्वमिति, पक्षताग्रन्थे दीधितिकारलिखनं सिषाधयिषाविरहस्य विशेषणत्वलाभायेति यदि मन्यते तथाप्यनुगतानुगतसिषाधयिषाभावसहस्रस्य तादृशविशिष्टाभावप्रतियोगितावच्छेदकघटकत्वेन तस्य युगसहस्रेणापि ग्रातुमशक्यतया न लौकिकप्रत्यक्षसंभवः । सिषाधयिषायोग्यताया उत्तेजकत्वमते सुतरां तथा, योग्यतायास्तत्तत्क्षणात्मकतयाऽयोग्यत्वादित्यत आह विशेष्यभावरूपाया चेति । सिषाधयिषाभावाविशेषितसिद्ध्यभावरूपाया इत्यर्थः । आदिना सिषाधयिषाभावरूपवि-

शेषणाभावपरिग्रहः। यत्र विषयविशेषे सिद्धिकाले सिषाधयिषावशात् कदापि नानुमितिस्तत्र सिद्ध्यभावमात्रं पक्षता, यत्र च सिषाधयिषां विना कदापि नानुमितिस्तत्र सैव पक्षतेति तयोः प्रत्यक्षस्य न दुरपवादत्वमिति भावः। न च परामर्शानुपादानेऽपि स्थलविशेषीयविशिष्टाभावरूपपक्षताजन्यत्वघटितजातिघटितलक्षणं संभवतीति परामर्शोपादानमनर्थकमिति वाच्यम्, मूलोपात्तपरामर्शजन्यत्वांशसार्थक्याय प्रत्यक्षविषयपक्षताया एव निवेशयितुं युक्तत्वात्, परामर्शजन्यत्वं परामर्शनिष्ठजनकतानिरूपितजन्यत्वं तत्र परामर्शनिष्ठत्वस्थाने परामर्शत्वावच्छिन्नत्वं तदुभयजन्यतयोरेकावच्छेदकावच्छिन्नत्वं च निवेशयति तत्त्वेनेत्यादिना। 'तत्त्वेन' परामर्शत्वेन, पक्षताजन्यतावटकजनकतायाश्च न पक्षतात्वावच्छिन्नत्वनिवेशनं प्रयोजनविरहात्, 'तदुभयजन्यत्वं' पक्षतापरामर्शोभयजन्यत्वम्, तथा च पक्षताजन्यतावच्छेदकावच्छिन्ना या परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यता तद्वत्त्वं पर्यवसितम्। परामर्शत्वेन जनकताविवक्षायाः प्रयोजनमाह तेनेत्यादिना। अथ परामर्शसत्त्वेऽनुमितिरेव भविष्यति न तत्प्रत्यक्षम्, अनुमितिसामग्र्या भिन्नविषये बलवत्त्वाज्ज्ञातायाश्चानुमितौ न तत्प्रत्यक्षसम्भवः, तदानीं तस्या असत्त्वाद्विषयस्य च कार्यकालवृत्तितया हेतुत्वात्तथा च कथमतिव्याप्तिरित्याशङ्कापरिहारायाह बाधादिकालीनेनेति। आदिपदात् साध्याभावव्याप्यवत्ताज्ञानप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपानुमितिप्रतिबन्धकान्तरपरिग्रहः। तथा च तत्रानुमितिसामग्र्येव नास्तीति भावः। पक्षताप्रत्यक्षे परामर्शजन्यतासम्पादकं विशेषणमाह दैवात् प्रतियोगिविषयकेणेति। 'दैवात्' कदाचित्, स्वसामग्रीवशात्, 'प्रतियोगिविषयकेण' केवलसिद्धिविषयकेण, तथा च वह्निव्याप्यधूमवान् पर्वतः पर्वतविशेष्यकवह्निनिश्चयश्चेतिसमूहालम्बनस्मरणोत्तरकालीनेताद्दशनिर्णयाभाववानहमित्यादिप्रत्यक्षे पक्षताजन्यतावच्छेदकीभूतताद्दशसिद्ध्यभावप्रत्यक्षत्वावच्छिन्नायाः परामर्शनिष्ठसिद्धिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतायाश्च सत्त्वात्प्रसक्तोऽतिप्रसङ्ग उक्तसिद्धिज्ञानत्वावच्छिन्नजनकतायां परामर्शत्वावच्छिन्नत्वविरहान्न भवतीति समुदायार्थः। एकावच्छिन्नत्वविवक्षायाः फलमाह तदुभयसमूहालम्बने वेति। पक्षतापरामर्शोभयसमूहालम्बनप्रत्यक्षे वेत्यर्थः। ताद्दशप्रत्यक्षे विषयविधया ताद्दशपक्षतापरामर्शयोः कारणत्वेऽपि पक्षताप्रत्यक्षत्वपरामर्शप्रत्यक्षत्वरूपभिन्नधर्मयोरेव तदुभयजन्यतावच्छेदकतया नातिव्याप्तिरिति भावः।

अथ परामर्शप्रत्यक्षे परामर्शत्वेन न विषयस्य हेतुता, अपि तु सामान्यतः प्रत्यक्षे विषयत्वेनैवेति प्रागेवोक्तम्, एवञ्चैकावच्छिन्नत्वनिवेशनमफलम्। न च परामर्शप्रत्यक्षस्य वह्निव्याप्यधूमवत्पर्वतं जानामीत्याकारकस्य विशिष्टवैशिष्ट्यबोधतया विशेषणतावच्छेदकीभूतवह्निव्याप्यधूमप्रका-

रकपक्षनिश्चयत्वरूपपरामर्शत्वेन तत्र हेतुत्वमक्षतमेवेति वाच्यम्, मिश्रैर्विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वानभ्युपगमात्।

यत्तु ज्ञानव्याप्यसुखवदात्मभिन्नमिदं सिद्ध्यभाववांश्चाहमित्येतादृशलौकिकमानसेऽतिव्याप्तिवारणाय तदावश्यकं तत्र साध्यव्याप्यहेतुमत्पक्षनिश्चयत्वस्य प्रतियोगितावच्छेदकप्रकारकनिश्चयत्वात्मकतया मिश्रमते तथाविधभेदप्रत्यक्षजनकतावच्छेदकत्वादिति। तन्न, लौकिकमानसायोग्यवस्थादिव्याप्यवत्पक्षविषयकनिश्चयत्वरूपपरामर्शत्वावच्छिन्नकारणताया एव लक्षणे निवेशनीयतया ज्ञानव्याप्यसुखवदात्मरूपप्रतियोगिज्ञानमादायातिव्याप्त्यनवकाशात्तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्यानुपदमेव विवक्षणीयतयाऽव्याप्त्यनवकाशाच्चेति। मैवम्, परामर्शप्रत्यक्षे परामर्शत्वेन हेतुतायाः स्वयं दूषितत्वेऽपि मिश्राभ्युपगततया तन्मते तामादाय स्वमते चोक्तविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुतामादायातिप्रसङ्गवारणायोभयजन्यतायामेकधर्मावच्छिन्नत्वनिवेशस्यावश्यकत्वात्।

अथैकधर्मावच्छिन्नत्वं यद्यवच्छेदककोटिप्रविष्टैकधर्मकत्वं तदोक्तस्थले पक्षतापरामर्शजन्यत्वयोः प्रत्यक्षत्वरूपैकधर्मावच्छिन्नत्वात् तद्दोषतादवस्थ्यम्, यदि चैकधर्मपर्याप्तावच्छेदकताकत्वं तदाऽसंभवस्तत्तल्लिङ्गकपरामर्शव्यवहितोत्तरोत्पन्नानुमितित्वस्य परामर्शजन्यतावच्छेदकत्वात् पक्षताजन्यतावच्छेदककोटौ चोत्पन्नत्वान्तानिवेशात्, पक्षताजन्यतावच्छेदकतापर्याप्त्यधिकरणघटितधर्मावच्छिन्नपरामर्शजन्यत्वनिवेशोऽपि न निस्तारः, पर्वतो वह्निमानित्यादिसिद्धिकालेऽपि नीलपर्वतो वह्निमानित्याद्यनुमित्युत्पत्त्या पर्वतत्वाद्यंश उद्देश्यतावच्छेदकत्वपर्याप्तेः परामर्शजन्यतावच्छेदककोटिप्रविष्टाया अधिकायाः पक्षताजन्यतावच्छेदके निवेशादिति चेन्न, पक्षताजन्यतावच्छेदकतापर्याप्त्यधिकरणघटितधर्मावच्छिन्नपरामर्शजन्यतैव निवेशनीया व्यभिचारविरहेऽपि पक्षतापरामर्शयोः सामान्यसामग्रीत्वविशेषसामग्रीत्वनिर्वाहाय पर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शजन्यतावच्छेदककोटौ पर्वतत्वाद्युद्देश्यतावच्छेदकतापर्याप्तेरवश्यं निवेश्यतयोक्तदोषासम्भवात्, अन्यथा पर्वतो वह्निव्याप्यधूमवान्नीलपर्वतो वह्निव्याप्यधूमवानित्यादिसमूहालम्बनजन्यायाः पर्वतो वह्निमानित्यादिसिद्धिकालीनाया नीलपर्वतो वह्निमानित्याद्यनुमितेः पर्वतो वह्निमानित्यादिसिद्ध्यभावजन्यतावच्छेदकानाक्रान्तायास्तथाविधपरामर्शजन्यतावच्छेदकाक्रान्ततयाऽन्यलिङ्गकगुरुपर्वतत्वावच्छिन्नविशेष्यकवह्न्यनुमितेस्तादृशपरामर्शजन्यतावच्छेदकानाक्रान्तायास्तथाविधसिद्ध्यभावजन्यतावच्छेदकाक्रान्ततया तत्कार्यतावच्छेदकयोर्व्याप्यव्यापकभावविरहेण सामान्यविशेषभावानुपपत्तेः, अन्यथा परामर्शजन्यतावच्छेदके विषयनिवेशस्यापि निष्प्रयोजनकत्वापातात्। यदि चान्यलिङ्गकेच्छाकाले सिद्धिसत्त्वेऽनुमितिवारणाय सिद्ध्यनुत्तरत्वं तज्जन्य-

तावच्छेदककोटौ निवेश्यते तदा परामर्शजन्यतावच्छेदककोटावपि तादृश सिद्ध्यनुत्तरत्वं निवेशनीयमन्यथा सामान्यविशेषभावानुपपत्त्या परस्पर सहकारित्वासम्भवादिति नानुपपत्तिरिति सक्षेपः। पक्षतात्परामर्श त्वयोरननुगतसाध्यादिघटिततयैकोपादानेऽन्यानुमितावव्याप्तिरित्याशङ्क्याह तद्वृत्तीति। तादृशजन्यतावच्छेदकाश्रयवृत्त्यनुभवत्वव्याप्यजातिमत्त्व विवक्षये त्यर्थ। नाव्याप्ति। नैकोपादानेऽन्यानुमितावव्याप्ति। चिन्त्यमिति। जन्यता यामभावाविषयकवृत्तित्वनिवेशेनैव सकलातिव्याप्तिवारणे गुरुतरपक्षताज न्यत्वनिवेशे गौरवमेव चिन्ताबीजं बोध्यम्।

(दी०) तत्करणमिति। न च व्याप्त्यादिज्ञानकरणत्वेनेतरभेद-साधने व्याप्तिज्ञानत्वं तादात्म्यसम्बन्धेन व्याप्तिज्ञानमेव वा गमकम्, व्याप्तेरननुगमेऽप्यधिकस्य भागासिद्धिवारणमात्रप्रयोजनकत्वादिति वाच्यम्, फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात्, करणत्वनिरूप्यव्याप्तेस्तादृशव्याप्तिज्ञानत्वसाधनवच्छेद्यत्वाद्व्यतिरेकव्याप्ते-र्गमकतया वैयर्थ्यशङ्कानवकाशाच्चेति।

(गा०) तत्करणमितीति। 'तत्करणमनुमानम्'इत्यत्र तत्पदेन पक्षविशेष णतापन्नहेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकं यज्ज्ञानं तज्जन्यज्ञान परामृ श्यते, तेन तादृशज्ञानकरणत्वस्यानुमानलक्षणत्वं लभ्यते, तच्च न घटते, इतरभेदानुमापकस्यैव लक्षणत्वात्। तादृशलक्षणेनेतरभेदानुमाने तद्घटकस्य हेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकज्ञानत्वस्यैवानुमापकतासम्भवेनेत रांशस्य वैयर्थ्येन तस्यानुमानेतरभेदानुमापकत्वासम्भवात्। यदि च प्रकृत हेतुतावच्छेदकघटकधर्मस्यानुमापकत्वावच्छेदकत्वसम्भव एवेतरांशस्य वैयर्थ्यम्, प्रकृते च व्याप्तिज्ञानत्वस्यानुमापकत्वे व्याप्तिप्रकारकत्ववैशिष्ट्या वच्छिन्नज्ञानत्वत्वमेवानुमापकतावच्छेदकं तच्च प्रकृतहेतुतावच्छेदकीभूतता दृशज्ञानकरणतात्वस्य न घटकं तच्छरीरे स्वरूपतो ज्ञानत्वस्य निवेशात् सामानाधिकरण्यरूपस्य व्याप्तिप्रकारकत्ववैशिष्ट्यस्य चानिवेशादिति मन्यते, तदापि व्याप्तिज्ञानत्वावच्छिन्नस्य तादात्म्यसम्बन्धेनानुमापकत्वसम्भवाद् वैयर्थ्यं दुष्परिहरमेव। न च व्याप्तिज्ञानत्वं सामानाधिकरण्यसम्बन्धेन व्याप्तिप्रकारकत्वावच्छिन्नत्वम्, तच्च नोक्तलक्षणघटकं तच्छरीरे ज्ञानत्वा वच्छिन्नज्ञान एव व्याप्तिप्रकारकत्वस्य विशेषणत्वादिति कथं व्यर्थतेति वाच्यम्, उक्तलक्षणघटकयोरेकत्र द्वयमिति रीत्या ज्ञानविशेषणतापन्नव्या प्तिप्रकारकत्वज्ञानत्वयोरेव व्यासज्यवृत्तिव्याप्यतावच्छेदकत्वसम्भवेन वैय र्थ्यानुद्धारात्। न च साध्यादिभेदेन विभिन्नानां व्याप्तीनामनुगतरूपेण निवेशासम्भवात् किञ्चिद्व्याप्तिप्रकारकज्ञानत्वमेव हेतु कार्यं। तथा चानु

मानमात्रस्य पक्षीकृतत्वाद्भागासिद्धिरिति व्याप्तिज्ञानत्वादेर्नानुमापकत्वसम्भव किञ्चिद्व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्करणत्वं तु निखिलानुमानसाधारणमिति वाच्यम्, भागासिद्धिमात्रवारकविशेषणस्यापि व्यभिचारावारकतया तदन्तर्भावेन व्याप्यवच्छेदकत्वघिरहाद्व्यर्थताया अनुद्धारादित्याशङ्कते न चेत्यादिना वाच्यमित्यन्तेन। 'इतरभेदसाधने' अनुमानरूपपक्षे तदितरभेदानुमाने। 'गमकम्' अनुमापकम्। तथा चेतरांशस्य वैयर्थ्यमिति भाव.। 'अधिकस्य' व्याप्तिज्ञानाभिन्नांशस्य। वारणमात्रेति। मात्रपदेन व्यभिचारवारणप्रयोजनकत्वव्यवच्छेदः। 'फलोपहितस्य' अनुमितिरूपफलोपहितकरणस्य, 'लक्ष्यतया' इतरभेदसाधने पक्षतया, व्याप्तिज्ञानत्वादेरित्यादिना तादात्म्यसम्बन्धेन व्याप्तिज्ञानपरिग्रह.। 'अतिप्रसक्तत्वात्' पक्षानिरिक्तेऽनुमित्यनुपहितव्याप्तिज्ञानेऽपि वृत्तेः। तथा च व्याप्तिज्ञानत्वादेरनुमितिफलोपहितकरणरूपपक्षेतरभेदात्मकसाध्यव्यभिचारवारकत्वेनेतरांशस्य सार्थक्यमिति भावः। स्वरूपयोग्यकरणमात्रस्य लक्ष्यतामभ्युपेत्य समाधत्ते करणत्वनिष्ठव्याप्तेरिति। तादृशव्याप्तिज्ञानत्वावच्छिन्नत्वादिति, व्यधिकरणत्वेनेत्यादि.। तथा च तन्निष्ठवत्साध्यनिरूपितव्याप्तौ लघोरवच्छेदकस्य सम्भवे तद्घटितगुरुधर्मस्य नावच्छेदकत्वं गौरवज्ञानस्यावच्छेदकताग्रहविरोधित्वादन्यथोपपत्त्या तस्यावच्छेदकत्वे मानाभावाच्चेत्येव व्यर्थविशेषणताया दूषकताबीजं यथा वह्निमान्नीलधूमादित्यादौ, प्रकृते च करणत्वनिष्ठेतरभेदव्याप्तौ व्याप्तिज्ञानत्वत्वस्य व्यधिकरणतया अनवच्छेदकत्वासम्भवेन व्याप्तेश्चावच्छिन्नत्वनियमेनान्यथानुपपत्त्या गुरोरपि तादृशज्ञानकरणत्वस्यावच्छेदकत्वं वाच्यमिति न व्यर्थविशेषणता दोषः। उक्तं च न्यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना ग्रहीतुं न शक्यते तत्तस्य सार्थकमिति, अत एव वह्निमान् धूमप्रागभावादित्यादौ धर्मिभेदान्न वैयर्थ्यमित्यभिप्राय। न च व्याप्तिज्ञाननिष्ठकरणत्वं न व्याप्तिज्ञानत्वावच्छिन्नमनुमितिनियतपूर्ववर्तित्वं फलानुपधायकव्याप्तिज्ञानासङ्ग्रहादपितु तन्नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वमेव तादृशधर्मश्च व्याप्तिज्ञानत्वमेवेति तन्निष्ठव्याप्तेः कथं व्याप्तिज्ञानत्वत्वाद्यवच्छेद्यत्वासम्भव इति वाच्यम्, स्वरूपसम्बन्ध एव करणत्वमित्यभिप्रायेणैव तल्लिखनात्।

वस्तुतो व्याप्तिज्ञानत्वं न निखिलव्याप्तिज्ञानवृत्तिकरणतानिष्ठव्याप्यवच्छेदकं व्याप्तिज्ञानत्वरूपावच्छेदकघटकस्य ज्ञानविशेषणतापन्नव्याप्तिप्रकारकत्वस्यापि करणतात्मकत्वात्, व्याप्तिज्ञानत्वत्वस्य तद्वृत्तित्वाज्ज्ञानत्वे सति व्याप्तिप्रकारकत्वत्वस्य तादृशज्ञानत्वात्मककरणत्वावृत्तित्वान्नियतपूर्ववर्तितावच्छेदकत्वरूपकरणतात्वस्य चोभयसाधारण्येन चोभयनिष्ठव्याप्यवच्छेदकत्वं निष्प्रत्यूहमेव। व्याप्ते. साध्यादिभेदेनाननुगततयापि व्याप्तिप्रकारकत्वत्वस्य न निखिलव्याप्तिप्रकारकत्वसाधारण्यं तादृशज्ञानजन्यज्ञानवृ-

स्त्यनुभवत्वव्याप्यजातिमत्करणत्वं तु सर्वसाधारणमेवेति नानुपपत्तिलेशोऽपि। धर्मिभेदेऽपि वैयर्थ्यमभ्युपेत्य समाधत्ते व्यतिरेकव्याप्तेरिति। लक्षणस्य केवलव्यतिरेकिहेतुतया व्यतिरेकव्याप्तेरेव प्रकृते गमकतौपयिकी, तथा च साध्याभावत्वावच्छेदेन हेत्वभावव्याप्तेर्ग्राह्यतया हेतुतावच्छेदकस्य साध्यव्याप्यतानवच्छेदकत्वेऽपि न क्षतिरिति भाव।

(दी०) लिङ्गस्य नित्यत्वेऽप्यनुमितिकरणस्य स्वरूपतः प्रत्यक्षोपजीवकत्वं व्यवस्थापयन्नाह तच्चेति। अनुमितेर्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्षमितिमध्यनिवेशे तत्करणस्यापि प्रत्यक्षप्रमाणान्तर्भावः स्यादिति तन्निरस्यति 'तच्चेति'इत्यपि केचित्।

(गा०) अथ 'प्रत्यक्षोपजीवकत्वादिति' यदुक्तं तन्न घटते, ज्ञायमानधूमादेरनुमितिकरणतया तस्य प्रत्यक्षानुपजीवकत्वात्, धूमादेरदृष्टद्वारा प्रवृत्तिजनकीभूतोपादानप्रत्यक्षोपजीवकत्वेपि नित्यहेतोरतथात्वेनानुमानत्वावच्छेदेन तथात्वानुपपत्तेः, अनुमानसामान्यस्यैव निरूपणीयतयाऽनुमानत्वावच्छेदेनोपजीवकत्वसङ्गतावेव तद्ग्रन्थतात्पर्यादित्याशङ्कोद्धारपरतया 'तच्च' इत्यादिमूलमवतारयति लिङ्गस्येत्यादिना। 'स्वरूपत.' अनुमितिकरणत्वावच्छेदेन।

अन्ये तु अनुमानस्य प्रत्यक्षान्तर्भावशङ्कापरिहारफतया तादृशग्रन्थमवतारयन्ति तन्मनमाह अनुमितेरिति। ज्ञानाकरणकज्ञानत्वेनेति। तादृशज्ञानत्वप्रत्यनुभवत्वव्याप्यजातिमत्वेनेत्यर्थः। यथाश्रुते विशेषणतावच्छेदकप्रकारकज्ञानकरणकविशिष्टवैशिष्ट्यबोधाद्यावव्याप्तेस्तस्यैव प्रत्यक्षलक्षणत्वादिति भावः। 'प्रत्यक्षमितिमध्यनिवेशे' प्रत्यक्षविशेषात्मकत्वे, 'तत्करणस्य' अनुमितिकरणस्य, प्रत्यक्षप्रमाणान्तर्भावः स्यादिति, प्रमितिवैलक्षण्यस्यैव स्वतन्त्रप्रमाणत्वनियामकत्वादितिभाव.। 'तत्' अनुमितेर्ज्ञानाकरणकज्ञानत्वम्, अत्र चानुमितेर्ज्ञानाकरणकज्ञानत्वेऽपि न प्रत्यक्षप्रमित्यन्तर्भावः। अनुमिनोमि न साक्षात्करोमीत्यनुव्यवसायबलादनुमितौ प्रत्यक्षत्वविरुद्धानुमितित्वसिद्धेः। उक्तलक्षणे च चाक्षुषवृत्तित्वादिकं जातिविशेषणमुपगम्यानुमितेर्व्यावर्तनसम्भवादित्यस्वरसः केचिदित्यनेन सूचितः।

(दी०) अनुमानप्रमाण्यं परीक्षितुं चार्वाकमतमुत्थापयति अथेति।

(चि०) अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयाच्छतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके

धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात् संवादेन च प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति। न। अप्रमाणसाधर्म्येणाप्रमाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात्, एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्, तयोश्च परकीययोरप्रत्यक्षत्वात्, अनुमानमप्रमाणमितिवाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च।

(दी०) 'अनुमानम्' अनुमानत्वेनाभिमतं धूमादिज्ञानम्, असत्ख्यात्युपनीतमनुमानमेव वा, 'संवादेन' संवादाभिमानेन, सम्भावितस्यासतोऽनुगताकारस्य परमार्थसत्स्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्ले- संवादः, अनुमानाप्रामाण्ये च शब्दोपमानयोः सुतरामप्रामाण्यान्नाप्रत्यक्षं प्रमाणमित्याह इतीत्यादि। 'अप्रमाणसाधर्म्येण' प्रमाणताप्रयोजकरूपशून्यत्वेन, 'दृष्टसाधर्म्यस्य' साधर्म्यदर्शनस्य वा। नन्वभिहितमेव साधर्म्यदर्शनं सम्भावनां भावयति संभावनैव च बहुशो व्यवहारहेतुरित्यत आह 'अनुमानमिति'।

(गा०) 'परीक्षितुं' परमतं निराकृत्य व्यवस्थापयितुम्, अनुमित्याख्यप्रमितेश्चार्वाकेणानभ्युपगमात् तत्करणत्वरूपानुमानत्वावच्छिन्ने तेषामप्रामाण्यसाधनं न सम्भवति, अतोऽनुमानपदमन्यथा व्याचष्टे अनुमानमिति। अभिमतमित्यस्य परैरित्यादिः, 'धूमादिज्ञानम्' धूमादिज्ञानत्वावच्छिन्नम्, 'अनुमानम्' अनुमानपदार्थ इत्यर्थः। तथा च धूमादिज्ञानत्वेनैव पक्षतेति नानुपपत्तिरिति भावः। अनुमानपदाद्धूमादिज्ञानत्वादिना बोधो लक्षणयैवेत्यभिप्रेत्य मुख्यार्थपरतामपि सङ्गमयति असदिति। 'ख्याति' ज्ञानम्, 'उपनीतम्' विषयीकृतम्, अनुमानमेव वा' अनुमितिकरणत्वावच्छिन्नमेव वा, अनुमानपदार्थ इत्यनुषज्यते, तन्मतेऽलीक एव पदानां शक्तिर्न तु पारमार्थिके, सदसत्सम्बन्धाभावेन तत्र पदप्रवृत्तिनिमित्तीभूतानुगताकारासम्बन्धादनुगताकारस्य गोत्वादेरतद्व्यावृत्त्यात्मकत्वेनाभावरूपतयाऽलीकत्वादसतोऽप्यनुमितिकरणत्वावच्छिन्नस्य तन्मतेऽनुमानपदार्थतेति बोध्यम्। एवञ्च चार्वाकैरनुमित्यनभ्युपगमेऽप्यसत्ख्यातिस्वीकर्तॄणां तेषां मतेऽनुमितिकरणत्वावच्छिन्नेऽप्रामाण्यसाधने नाश्रयासिद्धिरूपदोष इति भावः। ननु लिङ्गज्ञानस्य पर्वतो वह्निमानित्याद्यनुमित्यजनकत्वे लिङ्गपरामर्शानन्तरं वह्न्यर्थिनः पर्वतगमनप्रवृत्त्यनुपपत्तिः पर्वतादौ वह्न्यादिनिश्चयं

विना तद्गमने वह्निप्राप्तिसाधनतावच्छेदकवह्निमद्देशगमनत्वनिश्चयायोगादित्याशङ्कां परिहरति मूले लोक इति। सम्भवनामात्रादिति। यद्यपि लिङ्गदर्शनेन स्मारितसाध्यस्य मानसनिश्चयोपगमेनाप्यनुमानस्याप्रामाण्यमायाति, तथापि सर्वत्र व्यभिचारसंशयसम्भवेन व्याप्तिनिश्चयासम्भवाद्विपरीतकोटिभानविरोधिविशेषदर्शनस्य तन्मतेऽसम्भवेन सोऽपि निश्चयस्तावन्न सम्भवतीत्याशयेन सम्भावनादरः। न च यत्र संशये कोटिद्वयांशे तुल्यता विपरीतकोट्यंशे पर्यौत्कट्यं तत्र प्रवृत्त्यादिवारणाय तदभावाप्रकारकत्वस्य तत्प्रकारकज्ञानकरणतायामवश्यं निवेशनीयतया कथं सम्भावनातः प्रवृत्त्यादिकार्यनिर्वाहः, तत्कोट्यंशे औत्कट्यरहिततदभावप्रकारकान्यत्वस्य तत्कोटिसम्भावनासाधारणस्य कारणतावच्छेदकत्वे च गौरवमिति वाच्यम्, अगत्या गौरवस्यादोषत्वात्।

वस्तुतस्तु तन्मतेऽनुगतधर्मस्यालीकतया सर्वत्र व्यवहितपूर्वापरीभावापन्नतत्तद्व्यक्त्योरेव हेतुहेतुमद्भावसम्भवः। तत्र च तदभावाप्रकारकत्वस्य निवेशो नास्त्येवेति तत्त्वम्।

ननु सम्भावनायाः प्रमाणान्तरगृहीतग्राहित्वरूपसम्वादेन प्रमितित्वसिद्ध्या तत्करणस्य धूमादिज्ञानस्य प्रमाणत्वं सेत्स्यतीत्यत आह मूले सम्वादेन चेति। वक्ष्यमाणयुक्त्या प्रमाणान्तरगृहीतग्राहित्वरूपसम्वादस्य तन्मते सम्भावनायामसत्त्वेन संवादेन प्रामाण्याभिमानादित्यसङ्गतमतो व्याचष्टे सवादेनेति। यथाश्रुतत्यागे बीजमाह सम्भावितस्येति। 'सम्भावितस्य' सम्भावनाविषयस्य, 'अनुगताकारस्य वह्नित्वादेः', 'अध्यक्षेण' प्रत्यक्षप्रमित्या, 'अनुल्लेखात्' अविषयीकरणादित्यर्थः। अनुगताकारस्य प्रमित्यविषयतासम्पादकं विशेषणमाह असत इति। वह्नित्वादेरतद्व्यावृत्तिरूपतयाऽलीकत्वं बोध्यम्। अध्यक्षस्यालीकाविषयत्वसम्पादकं विशेषणमाह परमार्थसत्स्वलक्षणमात्रेक्षिणेति। 'परमार्थसन्' पारमार्थिको यः, 'स्वलक्षणः' स्वतो व्यावृत्तो वह्न्यादिः, तन्मात्रविषयकेणेत्यर्थः। वह्नित्वादेरनुगताकारस्य पारमार्थिके वह्न्यादावसत्त्वेन तस्य कथमितरव्यावृत्तिः व्यावर्तकधर्मादर्शनादित्याशङ्कापरीहाराय स्वलक्षणेत्युक्तम्। तथा च न सम्भावनायाः प्रमित्यन्तरविषयकत्वरूपसम्वाद इति भावः। न चाध्यक्षस्य सम्भावनाविषयानुगताकाराविषयत्वेऽप्यध्यक्षविषयवह्न्यादिविषयकत्वेन सम्भावनायाः सम्वादित्वमक्षतमिति वाच्यम्, सदसतोरेकज्ञानाविषयतयाऽनुगताकारविषयिण्या विशिष्टबुद्धेः पारमार्थिकवह्न्यादिविषयकत्वासम्भवात्, अनुगताकारवह्नित्वादिसम्बन्ध्यलीकवह्न्यादेरेव विशिष्टधीविषयत्वाद्भ्रमस्यासन्मात्रविषयकत्वेन सङ्घटितस्य प्रमित्यन्तरविषयकत्वरूपसम्वादस्याभिमानो न भवतीत्यत आह अध्यक्षमूलकेति। सम्भावितस्येत्यनुषज्यते। 'विकल्पोल्लिखितत्वात्', तद्विषयकत्वात्। अनादिवासनामूलकशशविषाणादिविकल्पव्यावर्तनाय

प्रत्यक्षमूलकेति । 'सम्वादः', सम्भावनाया इति शेषः । तथा चाध्यक्षमूलकविकल्पोल्लिखितविषयत्वमेव सम्भावनानिष्ठसंवादः स एव प्रामाण्याभिमानप्रयोजकतया मूलकृतोक्त इति भावः । 'योग्योपाधीनामि'त्यादिग्रन्थेनानुमानाप्रामाण्य एव हेतुकथनात् 'इति नाप्रत्यक्षं प्रमाणमिति'अनुमानोपमानशब्दानां त्रयाणामप्रामाण्योपसंहारो न घटत इत्याशङ्कां परिजिहीर्षुरनुमानाप्रामाण्यसाधकहेतोरेवोपमानशब्दयोरप्रामाण्यसम्पादकहेतुपरतां दर्शयति, तन्मूलस्समयनिर्णयाधीनप्रवृत्तिकयोरिति । 'तन्मूलः'अनुमाननिर्णयाधीनो यः, 'समयनिर्णयादिः' शक्तिनिर्णयादिः, 'तदधीनप्रवृत्तिकयोः' तादृशसहकारिसमवधानाधीनप्रमारूपफलोपधानकयोरित्यर्थः । आदिपदात्तात्पर्यनिर्णयादिपरिग्रहः । समयादिसम्भावनात एव शाब्दादिप्रमा भविष्यतीत्यादिशङ्कापरिहाराय निश्चयेति उक्तम् । न चैवमनुमानं न प्रमाणमित्यनेनानुमानाप्रामाण्यमात्रस्य प्रक्रान्ततया त्रयाणामप्रामाण्योपसंहारविरोध इति वाच्यम्, अनुमानमप्रमाणमितिवाक्यस्य त्रितयाप्रामाण्य एव तात्पर्यात् । अप्रामाण्यसाधनेऽप्रमाणसाधर्म्यस्य यथाश्रुतस्य हेतुता न घटते प्रमाणेऽपि यत्किञ्चिद्रूपेणाप्रमाणघटादिसाधर्म्यसत्त्वादित्याशङ्कोद्धाराय प्रमाणतावच्छेदकरूपशून्यत्वधर्मेण साधर्म्यं विवक्षितं तथा च प्रमाणताप्रयोजकरूपशून्यत्वमेव पर्यवसितो हेतुरित्यभिसन्धायाह अप्रमाणेति । अयं च प्रसाध्याङ्कको हेतुः । नैयायिकमते व्याप्तिनिश्चयत्वरूपप्रमाणताप्रयोजकरूपस्यानुमाने सत्त्वादिति, अत एव पूर्वं मणिकृतोऽस्यैव तद्धेतोः सिद्ध्यर्थम् 'योग्योपाधीनाम्' इत्यादिग्रन्थेन सर्वत्र व्यभिचारसंशयसामग्रीसत्त्वमभिधाय व्याप्तिनिश्चयस्यैव दुर्घटत्वेन व्यभिचाराप्रकारकत्वे सति व्याप्तिप्रकारकज्ञानत्वरूपस्य व्याप्तिनिश्चयत्वस्याप्रसिद्धिः सूचिता । एवञ्चानुमानमप्रमाणं प्रमितिकरणतावच्छेदकरूपशून्यत्वादिति प्रथमतश्चार्वाकैः प्रयुज्यते तत्र च व्याप्तिनिश्चयत्वात्मकतादृशरूपस्यानुमाने सत्त्वाद्धेतुरयमस्माकमसिद्ध इति नैयायिकैरसिद्ध्युद्भावितायां व्याप्तिज्ञानत्वं व्यभिचाराप्रकारकत्वासमानाधिकरणं स्वावच्छिन्नोत्पत्त्यव्यवहितप्राक्क्षणत्वव्यापकव्यभिचारप्रकारकज्ञानसामग्रीकज्ञानमात्रधर्मत्वादिति तैरुद्भावनीयं तावता च निरुक्तनिश्चयत्वग्रहप्रतिबन्धात्तादृशनिश्चयत्वस्य प्रमाकरणतावच्छेदकत्वसन्देहाधीना सिद्धिसन्देहनिवृत्तिरिति ध्येयम् । दृष्टेत्यत्रातीतत्वमविवक्षितं तथा च ज्ञायमानेत्यर्थः । एतच्च ज्ञायमानलिङ्गकरणतामत एवोपपद्यतेऽतः स्वमताभिप्रायेण पूरयति साधर्म्यदर्शनस्य चेति । अभिहितमित्यत्र हेतुरित्यनन्तरोक्तेतिपदोपस्थाप्यप्रकृतवाक्यार्थः कर्मत्वेनान्वेति 'संभावनैव' परकीयसंशयादिविषयकसंभावनैव, 'व्यवहारहेतुः' अनुमानं न प्रमाणमितिशब्दप्रयोगप्रयोजक इत्यर्थः । तथा च परकीयसन्देहविपर्ययज्ञानस्य तन्निवृत्तिसाधनतारूपेऽसाधनताज्ञानसम्पादकतया तादृशशब्दप्रयोगप्रयोजकत्वोपपादनाय नानुमानप्रामाण्यमितिभावः ।

इदमुपलक्षणं जल्पस्थलेऽवयवप्रयोगेन मध्यस्थस्य परिगृहीतकोटिवि-

पयकसंभावनासम्पादकतयैव वादिजय इति ध्येयम् । तेन हेतुज्ञानान्मध्यस्थानुमितेरवश्याभ्युपेयतयाऽनुमानप्रामाण्यं निर्वहतीति प्रागुक्तदूषणमप्युद्धृतं भवतीति ध्येयम् ।

अनुमानमप्रमाणमितिवाक्यस्याप्रामाण्योपगमेऽप्रामाण्यस्य भ्रमजनकत्वरूपतयाऽनुमानस्य प्रामाण्यापातादप्रामाण्याभाववत्यप्रामाण्यप्रकारकत्वरूपस्य तज्जन्यज्ञानभ्रमत्वस्य विशेष्यांशे प्रामाण्यवत्त्वनिर्वाहत्वादिति मूलोक्तव्याघातमुद्धरति न वित्यादिना ।

(दी०) ननु न वयमापाततो भ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामो येन भ्रमस्य विषयबाधाधीनतया प्रामाण्यं संभाव्येतापि परन्तु प्रमाकरणत्वव्यतिरेकमत आह अपि चेति ।

(चि०) अपि चानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणतापत्तेः प्रामाण्यस्यानुमेयत्वात् स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः । व्याप्तिग्रहोपायश्च वक्ष्यते ।

(दी०) स्वत इति । न चानुगताकारासंस्पर्शिनि परमार्थसत्स्वलक्षणमात्रिणि स्वसंवेदनसंविदितप्रामाण्ये निर्विकल्पकज्ञानेनाप्रामाण्यं संदिह्यते परन्तु तदुत्तरभाविनि समुल्लिखितालीकानुगताकारे सविकल्पक एवेति वाच्यम्, निर्विकल्पकस्य स्वमात्रावलम्बनस्य स्वविषयत्वप्रामाण्यावगाहित्वानामनुमानाधीनसिद्धिकत्वात् । सर्वमिदं सति व्याप्तिनिश्चये स्यात् स एव तु न संभवत्युपायाभावादित्यत आह व्याप्तीति ।

आपातत इति । यावदसद्विषयकत्वस्य भ्रमत्वरूपत्वं न व्यवस्थापितं तावदित्यर्थ । तस्य भ्रमत्वरूपत्वे तस्य प्रामाण्यवद्विशेष्यकत्वं विनाप्युपपत्तेरनुमानप्रामाण्यानापादकत्वादिति भाव । 'निरूपयाम' अभ्युपगच्छाम, 'विषयबाधाधीनतया' विशेष्यतासम्बन्धेन विषयबाधव्याप्यतया, 'संभाव्येत' आपाद्येत, प्रमाकरणत्वव्यतिरेकमिति 'निरूपयाम' इत्यनुषज्यते । तथा च प्रमाकरणत्वतदभावयोरेव तृतीयपक्षो न संभवतीत्यन्यतराभ्युपगम आवश्यको ननु प्रमाकरणत्वभ्रमकरणत्वयोरपीति तदुभयमेव नाभ्युपेयते, शब्दस्य विशिष्टज्ञानाजनकत्वेऽपि पदार्थोपस्थितिद्वारा मानसविशिष्टज्ञानप्रयोजकत्वात् परप्रतिपत्त्यर्थं शब्दप्रयोग उपपद्यते मानसञ्च ज्ञानं निश्चय संभावना वेत्यन्यदेतदितिभाव । स्वत प्रामाण्यग्रहे तत्संशयानुपपत्तिरूप मूलोक्तबाधकमुद्धरति न चेत्यादिना । अप्रामाण्यसंशयाभावसंपादकहेत्वन्तर

सूचकं निर्विकल्पकविशेषणमाह अनुगताकारेत्यादिना । 'अनुगताकारासंस्पर्शिनि' वह्नित्वाद्यविषयके, एतेन निर्विकल्पके प्रामाण्यसंशयसम्पादकानुगताकारविषयकत्वरूपाप्रामाण्यसहचरितधर्माभावः सूचितः । 'परमार्थसत्त्वलक्षणसाक्षिणि' सन्मात्रविषयके, एतेन संशयविरोधिसन्मानविषयकत्वरूपाप्रामाण्यव्यावर्तकदर्शनं सूचितम् । स्वमवदनेति । स्वात्मकं यत्संवेदनं ज्ञानं तेन संवेदितं प्रामाण्यं यत्र तत्रेत्यर्थः । निर्विकल्पकस्य स्वांशे प्रामाण्यस्वगाहिताया स्वतः प्रामाण्येत्यादिपङ्क्त्यवतारार्थं प्रागेवाशङ्कितत्वेऽपि पुनरभिधानं निर्विकल्पकस्यैव तथात्वं न तु सविकल्पकस्येति सविकल्पके प्रामाण्यसंशयसम्पादकतत्सिद्धान्तसम्पादनाय । नन्वेवम् 'प्रत्यक्षप्रमायाः प्रामाण्यं सन्दिह्यते' इत्यनुभवः कथमुपपद्यतामित्यत आह तदुत्तरभाविनीति । निर्विकल्पकाव्यवहितोत्तरभाविनीत्यर्थः । तथा च निर्विकल्पकस्य सविकल्पकादिभिन्नत्वात्मकदोषादभ्रमात्मकस्तादृशानुभव इति भावः । एवं चाध्यक्षस्य स्वतः प्रामाण्यग्रहेऽपि न प्रामाण्यसंशयानुपपत्तिः प्रामाण्यग्रहस्य भिन्नधर्मिकतयाऽविरोधित्वादिति नानुमानप्रामाण्यसिद्धिरिति न वाच्यमिति समुदिततात्पर्यार्थः । निर्विकल्पकस्येति । 'अनुमानाधीनसिद्धिकत्वात्' तन्मानाधीनव्यवस्थितिकत्वादित्यर्थः । तन्मते निर्विकल्पकस्य स्वप्रकाशतया अनुव्यवसायाभावेन स्वस्य स्वनिष्ठस्वविषयकत्वाद्यवगाहित्वोपगमे विषयानवस्थाप्रसङ्गेन संभावनायाश्चाप्रमात्वेन तद्व्यवस्थापकप्रमाणाभावादिति भावः । 'सर्वमिदम्' अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनम्, व्याप्तिनिश्चये सतीत्यन्वयः । स एव' व्याप्तिनिश्चय एव. 'न संभवति' नोत्पत्तुमर्हति, 'उपायाभावात्' निश्चायकाभावात् ।

इति महामहोपाध्यायगदाधरभट्टाचार्यविरचिता
अनुमितिविवृतिः समाप्ता ।

अनुमानगादाधर्याम्

व्याप्तिपञ्चकप्रकरणम्

(चि०) नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः, न तावदव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वं साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात् ॥

(दी०) समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना । साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह साध्यवद्भिन्नेति । साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमर्थः ।

(गा०) अनुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वात् 'वक्ष्यते' इत्यनेन तत्प्रतीक्षां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपबीजं दर्शयन् 'नन्वित्यादि'ग्रन्थमवतारयति समारब्धेति । व्याप्तिग्रहोपायाकथनेन प्रामाण्यव्यवस्थापनस्यानिष्पन्नत्वात् 'समारब्धेति' परीक्षाविशेषणम् । परीक्षा परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम्, 'कारणीभूतेति' प्रतिपादनविशेषणम् । यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्यावश्यकत्वप्रदर्शनाय 'व्याप्तिग्रहोपायश्च वक्ष्यते' इत्येतद् ग्रन्थावतारणाद् व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात्, तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायस्येदानीमाकाङ्क्षितत्वम्, एवमपि तन्न व्याप्तिस्वरूपनिरूपणं विना संभवतीति प्रथमत एव तदेवोचितमित्येतत्सूचनायैतदभिहितम् । निदानमिति । व्याप्तिघटकीभूताव्यभिचारादिज्ञाने बाधाभावमुद्रया व्यभिचारज्ञानाभावो हेतुः । साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे च विशेषणज्ञानमुद्रया सहचारग्रहो हेतुरितिक्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपमप्रतिपाद्याशक्यत्वादिति भावः । प्रथमतः पूर्वपक्षस्यैवाभिधानेन निरूपयतीत्यसङ्गतमत आरभत इत्युक्तम्, निरूपणस्य परमतनिराकरणपूर्वकस्वसिद्धान्तकथनरूपतया पूर्वपक्षाभिधानतत्खण्डनयोरपि तदारम्भतेति ध्येयम् ।

मूले न तावदव्यभिचारितत्वमिति। 'व्याप्तिरिति' प्रश्नस्थमनुपज्यते, तथा चाव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इत्यर्थः। अनुमितिजनकत्वं नाव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नमिति तु पर्यवसितम्। अत्र हेतुमाह, तद्धि न साध्याभाववदवृत्तित्वमित्यादि, यतः साध्याभाववदवृत्तित्वादिरूपं तदव्यभिचरितत्वं न व्याप्तिरित्यनुषङ्गेणान्वयः। तथा च साध्याभाववदवृत्तित्वादिरूपा ये येऽव्यभिचारपदार्थास्तत्तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नत्वाभावकूटवत्त्वादिति निरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः। न चाप्रयोजकत्वम्, विशेषाभावकूटस्य सामान्याभावव्याप्यताया अविवादात्। अत्र साध्याभाववदवृत्तित्वादिरूपा ये पञ्चाव्यभिचारपदार्थास्तदवच्छिन्नविषयताघटितधर्मानवच्छिन्नत्वकूटस्य प्रत्येकसाधकं हेतुं वक्ष्यति केवलान्वयिन्यभावादिति। साध्येऽत्यन्ताभावाप्रतियोगित्वान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रहदशायामत्यन्तान्योन्याभावयोः साध्यतदवच्छिन्नप्रतियोगिकत्वमानासम्भवेन प्रतियोगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववदवृत्तित्वत्वावच्छिन्नविषयतायास्तादृशदशाविशेषीयानुमितिजनकज्ञानेऽभावादित्यर्थः। एवञ्च तादृशविषयताशून्यवृत्तित्वमेवानुमितिजनकतायां दर्शितसाध्यसाधको हेतुरभिमत इति नासिद्ध्यादिः। ईदृशादिशाऽग्रिमाग्रिमहेतवोऽपि परिष्करणीयाः। दीधितौ अव्याप्येति। कपिसंयोगी एतत्त्वादित्यादावित्यर्थः। अव्याप्तीति, तत्र हेत्वधिकरणे तद्वृक्षादावप्यन्यदेशकालावच्छेदेन कपिसंयोगाद्यभावसत्त्वादिति भावः। साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारयेऽभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्साध्याभावाधिकरणं तदवृत्तित्वमित्यर्थः स्यात्तथा सति तद्घटकीभूतस्याभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्तदवृत्तित्वस्यैव लक्षणत्वसंभवात् साध्याभाववत्त्वांशस्य वैयर्थ्यमतः सप्तमीतत्पुरुषं व्याचष्टे साध्यवद्भिन्न इति। तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमर्थः, तत्र पूर्ववदभेदेन साध्यवद्भिन्नपदार्थविशेषितधर्मिवृत्तित्वादेर्न घटकता तादृशपदार्थस्य धर्मिण्यविशेषणत्वाद् वृत्त्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशादिति न साध्याभावांशवैयर्थ्यमिति भावः। अभावे साध्यीयत्वानिवेशे ह्रदादिवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसंभव इति तद्वारणाय साध्यपदसार्थक्यम्। न चाधिकरणभेदेनाभावभेदमत एवैतल्लक्षणकरणारपर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम्, अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासेन भेदस्य लक्षणकर्तृसंमतत्वादाकाशाभावादेर्भेदकाभावेन तस्यैक्यात्, अत एवोक्तधर्माणां भेदकत्वम्, 'एतानि च न भेदकानि' इत्यग्रेन दीधितिकृन्निराकरिष्यति।

अथवा साध्याभावपदमनुयोगिताविशेषसम्बन्धेन साध्यीयपरम्, अभावीयविलक्षणानुयोगितालाभायैवाभावपदं न त्वभावत्वमपि निवेश्यते

प्रयोजनाभावात् तादृशविलक्षणसम्बन्धेन च साध्यीयस्तद्वद्वृत्तित्वमर्थ । तत्र च साध्यस्य यत्पदार्थविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वादिमति पर्वतादौ हेतोर्वृत्तेरसंभव स्यादिति तन्निवेश । अत्र च साध्याभाव साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्य, अन्यथा वह्निमान् धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमवति सत्त्वेन पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठस्य द्रव्यत्वाद्यात्मकस्य साध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेन चाव्याप्त्यापत्ते । साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया, अन्यथा ह्रदादिवृत्तिसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमादिमत्यपि वृत्तेरसम्भवस्य कालिकसम्बन्धेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसङ्ग । अत्र च साध्याभाववत्तायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकादिसम्बन्धेन पर्वतादौ वृत्तेरव्याप्ति, दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्यात्मादिषु वृत्तर्घटत्वाभावादिसाध्यकस्थले सद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासम्बन्धेन वृत्तित्वे मानाभावेन चाव्याप्ति, अत साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकनिश्चय प्रतिबन्धकस्तेन सम्बन्धेनाभाववत्त्वं निवेश्यं संयोगेन वह्न्यादौ साध्ये तादृशसम्बन्धो दैशिकविशेषणता । कालिकविशेषणतासम्बन्धेनाकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसम्बन्ध एव तथा, समवायादिना घटत्वादेरभावे दैशिकविशेषणतया साध्ये समवायादिरेवेति न दोष । न चैवं वृक्षनिष्ठाया कपिसंयोगाभावीयमूलावच्छिन्नविशेषणता तादृशसम्बन्धेन वृक्षादौ तादृशाभाववत्ताज्ञानेऽपि कपिसंयोगवत्ताज्ञानोत्पत्तेस्तादृशसम्बन्धो न लक्षणघटक इति साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थमिति वाच्यम्, संयोगतदभावयोरविरुद्धत्वज्ञानाभावदशायां वृक्ष कपिसंयोगाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्ताज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतसंसर्गताश्रयत्वात् ।

केचित्तु साध्यात्मकस्वाभावनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वं विवक्षितम्, स च सम्बन्धो यत्सम्बन्धावच्छिन्नप्रतियोगिताक स्वाभाव साध्यमिति नोक्तानुपपत्ति । अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतुकस्थले कालिकसम्बन्धस्यापि तत्सम्बन्धावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रति

योगितावच्छेदकत्वात्तेन साध्याभाववति काले हेतोर्वृत्तेरव्याप्तिः । न च साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशान्नायं दोषः कालिकसम्बन्धावच्छिन्नघटाभावादिरूपप्रमेयस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताया घटादावेव सत्त्वात् कालिकसम्बन्धस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावात्मकस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धत्वविरहादिति वाच्यम्, तादृशप्रमेयाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताको योऽभावस्तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपिततादृशप्रमेयाभावनिष्ठप्रतियोगितावच्छेदकत्वस्य कालिकसम्बन्धेऽप्यक्षततयाऽव्याप्तेर्दुर्वारत्वात् । न च यावत्साध्यनिरूपितत्वेन प्रतियोगिता विशेषणीया तथा चोपदर्शिताभावात्मकयत्किञ्चित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगितावच्छेदककालिकसंबन्धमादाय न दोष इति वाच्यम्, असमवेतप्रमेयस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावो नास्तीतिप्रत्ययाविषयतया तस्य तादृशप्रमेयाभावाभाववत्त्वे मानाभावात्, तादृशप्रमेयाभावनिष्ठयावत्प्रमेयनिरूपितप्रतियोगित्वाप्रसिद्ध्योक्तस्थलेऽव्याप्तितादवस्थ्यात् । न च साध्यतावच्छेदकसम्बन्धेन वृत्तिमद्यावत्साध्यनिरूपितप्रतियोगिताया निवेशनीयतया नोक्ताप्रसिद्धिरिति वाच्यम् सर्वत्र समवायिन्येकस्या सत्तयैव तादृशप्रमेयाभावाभावत्वनिर्वाहे सर्वसमवाय्यसंग्राहकगुणादीनां तादृशप्रमेयाभावाभावत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वादिति चेन्न, साध्यतावच्छेदकसम्बन्धेन वृत्तिमद्यत्किञ्चित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशे नैवोपपत्तेः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य दर्शितसाध्याभावाभावस्य साध्यत्वेऽपि तस्य साध्यतावच्छेदकसमवायसम्बन्धेनावृत्तित्वात् । न चैतत्कल्पेऽपि कालिकसम्बन्धेन प्रमेयसाध्यककालत्वादिहेतावव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रमेयाभावस्य यः कालिकसम्बन्धावच्छिन्नाभावस्तस्य स्वाभावात्मकस्य प्रमेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यम्, तादृशप्रतियोगितावच्छेदकीभूतयत्सम्बन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्सम्बन्धेन तद्वद्वृत्तित्वस्य विवक्षणीयत्वात्, उक्तस्थले च साध्याभावस्य कालिकसम्बन्धेन साध्यवद्भिन्नेऽवृत्तेः । अथैवं तादृशप्रतियोगिताया स्वनिष्ठत्वनिवेशो विफलस्तदनिवेशे घटभिन्नं घटत्वाभावादित्यादौ घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन घटत्वात्मकसाध्याभाववति घटत्वे हेतोर्वृत्तेः प्रसक्ताया अव्याप्तेरीदृशविवक्षयैव वारणसम्भवाद्घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन साध्यवद्भिन्ने घटेऽवृत्ते । न चैवं तादृशसाध्यस्य तादृशसम्बन्धेन साध्यवद्भिन्नवृत्तिरभाव एवाप्रसिद्ध इति कथमव्याप्तिपरिहार इति वाच्यम्, घटभेदस्य घटत्वाभावसमनियतत्वेन तद्भिन्नतया घटत्वेऽपि समवायसम्बन्धावच्छि

भावस्ताद्दशप्रतियोगितायाः सत्त्वेन तादृशप्रतियोगितावच्छेदकसमवायेन साध्यवद्भिन्नघटवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धिसम्भवात्। तादृशाभावयोर्भेदे स्वनिष्ठत्वस्य प्रतियोगिताविशेषणत्वेऽपि घटत्वरूपसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या तद्दोषतादवस्थ्यात्, संयोगिभेदस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपवैधर्म्येण संयोगाभावाभेदासम्भवेऽपि संयोगवत्त्वप्रकारकप्रमाविषयत्वाभावाभेदे बाधकाभावात्स्वरूपसम्बन्धस्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तेन सम्बन्धेन साध्यवद्भिन्नवृत्तेस्तादृशप्रमाविषयत्वरूपसाध्याभावस्य प्रसिद्ध्या संयोगिभिन्नं गुणत्वादित्यादावव्याप्तेरनवकाशादिति चेन्न, प्रतियोगितायां स्वनिष्ठत्वानिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताक आकाशाभावाभावादौ साध्य आत्मत्वादावव्याप्तेर्दुर्वारत्वात्। तादृशसाध्यस्य यः कालिकसम्बन्धावच्छिन्नाभावो दैशिकविशेषणतासम्बन्धावच्छिन्नतदभावस्य तादृशसाध्यस्वरूपतया दैशिकविशेषणतासम्बन्धस्य साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वात्तेन सम्बन्धेनाकाशाभावरूपसाध्याभावस्य साध्यवद्भिन्ने काले हेतुमति च वृत्तेः, प्रतियोगितायां स्वनिष्ठत्वनिवेशे च दैशिकविशेषणताया आकाशाभावनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वविरहेणाव्याप्तेरनवकाशात्। न च साध्यनिरूपितस्वनिष्ठप्रतियोगितानिवेशे साध्याभावपदोपादानवैयर्थ्यमभावान्तरनिष्ठप्रतियोगितायाः साध्यनिरूपितत्वविरहेणैव तद्व्यावृत्तेरिति वाच्यम्, स्वपदार्थस्य द्विधा निवेशेन साध्याभावनिष्ठसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वनिवेशप्रौढ्येण तत्पदवैयर्थ्यानवकाशात्। तादृशसम्बन्धेन साध्यवद्भिन्नवृत्ति यत्तद्वत्त्वमात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावान्तरवति हेतौ वृत्त्यानुपपत्तेरित्याहुः।

अत्रेदं बोध्यम्, साध्यवत्त्वग्रहविरोधिग्रहविषयसम्बन्धेन साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन वा नानुमित्यौपयिकव्याप्तिशरीरेऽभावसम्बन्धनिवेशसम्भवः साध्यभेदेन व्याप्तेर्भेदाल्लाघवेन तत्तत्साध्यकस्थले तत्तत्साध्याभाववति दैशिककालिकविशेषणतासमवायादिसंसर्गाणामेव विशिष्याभावसम्बन्धतया निवेशौचित्यात्, उक्तगुरुरूपेण विशेषणताविशेषादीनां सम्बन्धतया अत्यन्ताप्रामाणिकतया तद्रूपावच्छिन्नस्य सम्बन्धविधया व्याप्तिघटकत्वायोगाच्च, परन्तु यादृशसाध्यकस्थले यादृशसम्बन्धोऽभावसम्बन्धतया व्याप्तिघटकस्तत्परिचयायैव दर्शितोक्तयः, तथा च यादृशसम्बन्धेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्तते तादृशसम्बन्धेन तद्वत्त्वं निवेश्यमित्युक्त्यैव तत्परिचयसम्भवादित्यलं वाग्जालेन। तत्र च साध्याभाववत्पदेन साध्याभावत्वविशिष्टाधिकरणं विवक्षणीयम्, तेन गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ विशिष्टस्यानतिरिक्तया सत्तारूपसाध्याभावस्य गुणादौ सत्त्वेऽपि न क्षतिर्गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययात्तत्र तादृशाभावत्वविशिष्टाधिकरणत्वानभ्युपगमात्।

अथैतल्लक्षणे घटत्वघटाकाशसंयोगान्यतराभाववानाकाशत्वादित्यादावव्याप्ति, घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाववद्भिन्ने घटे वर्तमानस्य घटाकाशसयोगात्मकसाध्याभावस्य हेत्वधिकरणे गगनेऽपि वृत्ते, निरवच्छिन्नसाध्याभाववत्तानिवेशे च साध्यवद्भिन्नवृत्तित्वाशवैयर्थ्यादितिचेन्न, एतल्लक्षणकर्तृमते स्वप्रतियोगिसामानाधिकरण्यस्वप्रतियोगिवैयधिकरण्यरूपविरुद्धधर्माध्यासोऽभावस्य भेदक इत्येतादृशयुक्त्या द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यनुसृत्याव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्ति समाधीयते, तथा च घटाकाशसंयोगस्योक्तान्यतराभावप्रतियोगित्वेऽपि न तदभावरूपता, तथासति तादृशविरुद्धधर्मयो समावेशापत्तिस्तयोर्विरोधाभावे सयोगाभावस्याप्यधिकरणभेदेन भेदासिद्धेरव्याप्यवृत्तिसाध्यके सर्वत्रैवाव्याप्तेस्तदभिप्रायेण लक्षणान्तरस्यावतारणीयत्वादिति गगनेऽतिरिक्त एव तदभाव स्वीकरणीय, स च न साध्यवद्भिन्नवृत्तिरिति न दोष । साध्यवद्भिन्ने वर्तेत इत्यनेनानवच्छिन्नाया एव वृत्तेर्विवक्षणान्न घटाकाशसंयोगात्मकाभावमादाय दोष इति तु न शङ्क्यम्, तथा सति सुषुप्त्यादिकालावच्छेदेनास्मदाद्यात्मवृत्तौ स्वाश्रयाश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावे साध्ये सुखादावव्याप्तिस्तत्र साध्यवद्भिन्न ईश्वरे तादृशसम्बन्धेन निरवच्छिन्नवृत्तिकस्य ज्ञानत्वादिरूपाभावस्य तेन सम्बन्धेन सुखाद्यधिकरणेऽस्मदाद्यात्मन्यपि वृत्ते, उत्पत्तिकालावच्छिन्नघटादिवृत्तितादृशसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावादिसाध्यकघटत्वादिहेतावव्याप्तिश्च ॥

संयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयो प्रतियोगिसामानाधिकरण्यप्रतियोगिवैयधिकरण्ययोर्वक्ष्यमाणरीत्या न विरोध इत्यभिप्रायेणाव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्या लक्षणान्तरमवतारयति कर्मादाविति ॥

(दी०) कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवदिति । हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह सकलेति । साकल्यं साध्याभाववति साध्ये च बोध्यम् । साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः । तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः । न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः । अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणायाभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यम् । हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः । तत्प्रतियोगित्वञ्च हेतुतावच्छेदकरूपेण

बोध्यम्। तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः। न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्तादावतिप्रसङ्गः॥

(गा०) इदं त्ववधेयम्, द्रव्यवृत्तिसंयोगाभावो न गुणादौ स्वीक्रियतेऽपि तु क्लृप्ते तद्वृत्तिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभाव एव संयोगाभावत्वं कल्प्यतेऽनन्तगुणाद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथाविधैकाभावे संयोगाद्यभावत्वकल्पने लाघवात्। न च संयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभावे द्रव्यत्वाभावे द्रव्यभेदे संयोगिभेदादौ वा संयोगाभावत्वं कल्प्यत इत्यत्र विनिगमकाभाव इति वाच्यम्, तादृशाभावानां समनियततयाऽभेदात्। एवञ्च द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदः सप्रमाण एव। अथैवं द्रव्यत्वाभावादीनामप्यानन्त्यापत्तिः। कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यतेऽपि तु क्लृप्ते तद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्वमित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाद्यभावस्य गुणादिवृत्तितदभावतो भेदसिद्धिरिति चेदिष्टमेवैतदधिकरणभेदेनाभावभेदवादिनाम्। न चैवं संयोगाद्यभावत्वकल्पनायां धर्मिणामप्यानन्त्यादुक्तविनिगमकाभावसम्भव इति वाच्यम्, विनिगमनाविरहेऽपि द्रव्यत्वाभावादौ संयोगाद्यभावत्वकल्पनाया निष्प्रत्यूहत्वादिति। हेतोरिति। नानाधिकरणकस्येत्यादिः। अव्याप्तेरिति। एतद्रूपवानेतद्रसादित्यादावेतद्रूपाधिकरणस्य द्वित्वादिना भेदसत्त्वेऽपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगितायाः प्रतियोग्यवृत्तित्वेन वा भेदस्य विशेषितत्वे लक्षणगमनसम्भवात्तासम्भवो दर्शितः। साकल्यमिति। 'बोध्यम्' इत्यस्य विशेषणमित्यादिः। अत्र साध्याभाववति साकल्यविशेषणसत्त्व एव साध्ये तद्विशेषणव्यावृत्तिः सङ्गच्छते, अन्यथा साध्याभाववत्ताया हेतुमत्साधारण्येऽपि साध्याभाववद्यत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसम्भवादतः साध्ये तदभाववति चेत्यनुक्त्वा साध्याभाववति साकल्यविशेषणं प्रथमतो दर्शितम्। न च साध्याभाववति साकल्यविशेषणासत्त्वेऽपि वह्निमान् पर्वतान्यत्वादित्यादावतिव्याप्तिवारणमेव साध्ये साकल्यविशेषणप्रयोजनमस्त्युभयत्र साकल्यविशेषणादाने यत्किञ्चित्साध्याभाववति पर्वते हेत्वभावसत्त्वेनातिव्याप्तिः साध्ये साकल्यविशेषणसत्त्वे तु ह्रदादेरेव सकलसाध्याभाववत्तया तत्र हेतुसत्त्वेनातिव्याप्त्युद्धारान्नोक्ताभिप्रायवर्णनं सम्यगिति वाच्यम्, साध्याभाववति साकल्यविशेषणासत्त्वे साध्ये साकल्यविशेषणस्योक्तातिव्याप्तिवारणप्रयोजनकत्वसम्भवेऽपि साकल्यविशेषणस्य वक्ष्यमाणप्रयोजनस्यैव वास्तवतया तस्य साध्याभाववति साकल्यविशेषणसत्त्व एव सङ्गतेरादौ तत्प्रदर्शनस्योचितत्वात्।

वस्तुतस्तु साध्ये साकल्यविशेषणं परित्यज्य साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशरूपकल्पान्तरस्यावलम्बनीयतया चर-

मत्मेव तत्प्रदर्शनमुचितम्। 'साध्ये तदभाववति च बोध्यम्'इत्युक्त्वा 'साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वाऽभावो ग्राह्य, इत्युक्तौ साध्याभाववति च साकल्यं निवेश्यते साध्याभावो वैतादृशो निवेश्यत इत्येतादृशविकल्प प्रतीयते स चाविवक्षित इति सारम्। अव्याप्तिवारणाय साध्याभावे साकल्यविशेषणे धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकसकलसाध्याभावाधिकरणं गुणादिरेव न्यायदयोगोलकादेर्ह्रदासंयुक्तत्वावच्छिन्नप्रतियोगिताकाभावानधिकरणत्वादित्यतिव्याप्ति, वह्निमत्त्वप्रकारकप्रमाविषयो धूमादित्यादौ साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्षमात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्ध्याव्याप्तिश्चेति तदुपेक्ष्य साध्ये साकल्यविशेषणं निवेशितम्। ननु साध्ये साकल्यविशेषणदानेऽपि वह्निमान् धूमादित्यादावव्याप्तितादवस्थ्यं पर्वतादावपि पर्वतीयवह्नेर्ह्रदीयवह्नेरित्यादिनाऽभावस्य सत्त्वेन सकलसाध्याभावसत्त्वात्, व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणे च वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिर्वह्निमतस्तथाविधसकलसाध्याभावानधिकरणत्वात्, साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्तिधर्मस्तदनवच्छिन्नप्रतियोगिताकत्वनिवेशने च लाघवात्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वमेवाभावे विशेषणमुचितं किं साध्ये साकल्यविशेषणेनेत्यभिप्रेत्य तथैवाह साध्यतावच्छेदकेति। साध्याभाववति साकल्यविशेषणप्रयोजनमाह विपक्षेति। वैकल्पिकयोः साध्यतदभावयोः साकल्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेषणयोर्व्यावृत्तिमाह न चेति। एकव्यक्तिसाध्यक एतद्रूपवानेतद्रसादित्यादौ हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः पूर्वक्षणवृत्तित्वविशिष्टैतद्रूपादेरेतद्रसाधिकरणे वृत्तेरेतद्रूपैतद्रूपोभयत्वावच्छिन्नाभावोऽपि न तथा, प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेरिति तत्र लक्षणसङ्गतिरित्यतो नानाव्यक्तिसाध्यक इत्युक्तम्। अत एवाव्याप्तिरेवोक्ता नासम्भव। अत्र 'नानाव्यक्तिसाध्यकत्वम्, व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वम्, अत एवैतद्व्यक्तिवृत्तियावद्धर्मवानेतत्त्वादित्यादौ नानाव्यक्तिसाध्यकेऽव्याप्तिविरहेऽपि न क्षति। अव्याप्यवृत्तीति। कपिसंयोग्येतद्वृक्षत्वादित्यादावित्यर्थः। 'अव्याप्तेर्वारणाय' इत्यन्वय। व्यभिचारिणि चेति। पृथिवी कपिसंयोगादित्यादौ चेत्यर्थः। 'अभावद्वये' साध्याभावे हेत्वभावे च। तथा चाव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तिवारणाय साध्याभावे, व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यमित्यर्थः। यद्यपि हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतया कपिसंयोगी कपिविभागादित्यादावव्याप्यवृत्तिहेतुकेऽव्याप्तिवारणप्रयोजनकत्वं साध्याभावे तद्विशेषणस्य सम्भवतीति व्याप्यवृत्तीत्यकिञ्चित्करम्, तथापि

हेत्वभावे तद्विशेषणप्रतिसन्धानं विनैव व्याप्यवृत्तिहेतुकस्थलेऽव्याप्ति निर्णयो भवतीत्येतदभिसन्धायैव तदुक्तम् । प्रतियोगिवैयधिकरण्यञ्च न प्रतियोग्यधिकरणावृत्तित्वम्, अव्याप्यवृत्तिसाध्यके तथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्ध्याऽव्याप्तेरपि तु प्रतियोग्यनधिकरणवृत्तित्वम्, तथा च प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणे यावन्तु प्रतियोग्यनधिकरणवृत्तित्वविशिष्ट सन् वर्तते योऽभावस्तत्प्रतियोगित्वमर्थः । तेन कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणे सत्त्वेऽपि नाव्याप्तिर्न वैतद्वृक्षत्ववान् कपिसंयोगादित्यादौ तथाविधकपिसंयोगाद्यभावस्य सकलसाध्याभावाधिकरणे सत्त्वेऽप्यतिव्याप्तिः, प्रतियोग्यनधिकरणीभूतसाध्याभावाधिकरणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितोऽर्थः । प्रथमे साध्यतावच्छेदकसम्बन्धेन, चरमे हेतुतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम्, तेनायमात्माऽऽत्ममहाकालान्यतरत्वादित्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसम्बन्धेनात्मत्वाधिकरणत्वेऽपि नातिव्याप्तिर्न वा वह्निमान् धूमादित्यादौ साध्याभावाधिकरणयावदन्तर्गतकालस्थानादिषु कालिकविषयित्वादिसम्बन्धेन हेत्वभावप्रतियोग्यधिकरणतासत्त्वेऽप्यसम्भवोऽव्याप्तिर्वा, इत्थञ्च प्रतियोगित्वे सम्बन्धविशेषावच्छिन्नत्वेन न निवेशनीये सम्बन्धान्तरावच्छिन्नप्रतियोगिताकयोः साध्याभावहेत्वभावयोरुक्तसम्बन्धेन प्रतियोगिसमानाधिकरणतयाऽसम्भवातिव्याप्त्योरनवकाशात् । 'हेत्वभावोऽपीति, अपिशब्देन साध्याभावेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं निवेशनीयमिति सूच्यते, तेन विशिष्टसत्तावान् जातेरित्यादौ हेत्वधिकरणगुणादिषु साध्याभावप्रतियोगिसत्त्वादेः सत्त्वेऽपि नातिव्याप्तिः । अत 'साध्याभावोऽपि' इत्युक्तावप्रिमतरपदन् हेत्वभावपरामर्शासम्भवस्तत्र हेत्वभावपदोपादाने चाऽक्षराधिक्यमिति तन्नोक्तम् । 'तत्प्रतियोगित्वम्' साध्याभावनिष्ठाभावप्रतियोगित्वम्, 'हेतुतावच्छेदकरूपेण' हेतुतावच्छेदकावच्छिन्नमित्यर्थः । हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे स्वप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह द्रव्यत्वादाविति 'विशिष्टेति' गुणकर्मान्यत्वविशिष्टेत्यर्थः । हेत्वभावप्रतियोगिताया हेतुतावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह न चेति । अत्रापि 'द्रव्यत्वादौ साध्ये' इत्यनुषज्यते । 'विशिष्टसत्तात्वादिना' गुणकर्मान्यत्वविशिष्टसत्तात्वादिना । तृतीयार्थश्चावच्छिन्नप्रतियोगिताकत्वं तस्याभावेऽन्वयः, प्रतियोगिपदात्प्रकृतेशप्रतियोगित्वान्वितमवच्छिन्नत्वं वा तदर्थः । तादृशाभावेति । सकलसाध्याभाववन्निष्ठाभावेत्यर्थः । न च हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्थले हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेश्यतां ततोऽपि तत्प्रयोजननिर्वाहात्, तथाच द्रव्य सत्त्वादित्यादौ गुणादिनिष्ठ

विशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणतयैवातिव्याप्तिवारणसम्भवात्प्रतियोगिताया हेतुतावच्छेदकावच्छिन्नत्वनिवेशनमफलमिति वाच्यम्, हेत्वभावे हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणता तन्निरूपकाभावप्रतियोगित्वमर्थः स्यात्तदपेक्षया सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणता तद्रूपस्यास्मदीयफलितार्थस्यागुरुत्वात् । न च ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नानधिकरणत्वं तद्धर्मवत्त्वमित्येवार्थः स चातिलघुरेवेति वाच्यम्, एतादृशार्थकरणे मूलोक्तप्रतियोगिताया व्याप्तित्वं व्याहन्येतेति मूलानुसारेण दीधितिकृता गुर्वर्थानुसरणादुक्तविशेष्यविशेषणभावेनानिवेशे व्यर्थविशेषणतानवकाशात् ।

केचित्तु हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठविशिष्टसत्तात्वावच्छिन्नव्यधिकरणाभावप्रतियोगित्वरूपव्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य गुणेऽपि सत्त्वादुबाधानवतारदशायां तत्र द्रव्यत्वानुमित्यापत्तिः, अस्मन्मते तु 'तत्प्रतियोगित्वञ्च' इत्यतो लब्धस्य तादृशप्रतियोगितावच्छेदकहेतुतावच्छेदकस्य व्याप्तितया तद्विशिष्टवैशिष्ट्यावगाहिज्ञानस्य गुणेऽपि भ्रमत्वादित्याहुः ॥

एतल्लक्षणं दूषयित्वान्तरलक्षणमवतारयति यत्रैकव्यक्तिकमिति ॥

(दी०) यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह साध्यवदन्येति । अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं न हि भवति नीलो घटो घटादन्य इति ॥

(गा०) यत्रैकव्यक्तिकं साध्यं तत्राव्याप्तिरित्यन्वयः । एतद्रूपवानेतद्रसादित्यादावनेकाशेषत्वरूपसाकल्यस्य साध्येऽसत्त्वादितिभावः । साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानुसरणान्न तत्रैतद्दोषावकाश इत्यत आह विपक्षो वेति । 'विपक्ष' साध्याभाववान्, अनाप्यैकव्यक्तिक इत्यस्य विशेषणस्य लिङ्गव्यत्ययेनानुषङ्गः । तथा चैतद्घटभिन्नं पटत्वादित्यादौ साध्याभाववत्येतद्घटादौ साकल्याप्रसिद्ध्याऽव्याप्तिरित्यर्थः । सकलपदस्याशेषमात्रपरत्वे दोषान्तरमाह निर्धूमत्वादिव्याप्ये इति । 'तत्त्वेन' निर्धूमत्वव्याप्यत्वेन, तथा च धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावादित्यादावित्यर्थः । धूमत्वाद्यवच्छिन्नाभावे साध्य एकव्यक्तिकतया पूर्वदोषासम्भवेऽपि अन्तरेन तद्व्याप्यसाध्यकानुसरणम्, निर्धूमत्वव्याप्यजलत्वादेस्तादृप्येण

साध्यतायां सद्धेतुत्वानुपपत्तिरतस्तथेनेत्युक्तम्। हेत्वभावस्येति। अथ वह्न्यात्मकहेत्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासम्भवेऽपि सकलतन्निष्ठवह्न्यभावादिभेदप्रतियोगिनामादायैव लक्षणं सङ्गमनीयम्, हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशादेव व्यभिचारिणि सम्बन्धान्तरावच्छिन्नप्रतियोगिताकहेत्वभावमादायातिप्रसङ्गानवकाशेन हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशात्।

यत्तु वह्निमद्भेदहेतुताभिप्रायकोऽयं ग्रन्थः, भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपस्य स्वीकरणीयतया तस्य च प्रत्येकविश्रान्ततया यावद्विपक्षवृत्तित्वासम्भवात् तत्र हेतुभेदमादायापि लक्षणगमनासम्भवादिति तन्न, आकाशाभावाद्यधिकरणभेदभेदस्याकाशाभावाद्यधिकरणस्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसम्भवात्। न चैतादृशरीत्याकाशाभावमादाय भेदहेतुकव्यभिचारिण्यतिप्रसक्त्या हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयम्, तथा सत्यधिकरणस्वरूपाभावस्य स्वस्मिन्नेव तदभावत्वेन वृत्तिरिति नातिव्याप्त्यवकाश। एवञ्चाकाशाभावमादाय नोक्ताव्याप्तिपरिहारसम्भव इति वाच्यम्, उक्तस्थले आकाशाभावस्य हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यविरहादेवातिव्याप्तिवारणसम्भवेन तादृशविवक्षाया निष्प्रयोजनकत्वाद्वह्निमद्भेदहेतुकस्थले च साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेनाकाशाभावरूपहेतुभेदस्य प्रतियोगिव्यधिकरणत्वेनाव्याप्तिवारणसम्भवादिति दिक्।

अत्र केचित्, यत्र वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं साध्यं वह्न्यभावान्यत्वविशिष्टवह्न्यभावो हेतुस्तत्र वह्न्यभावस्यापि सकलसाध्याभाववदन्तर्गततया तत्र वह्न्यभावभेदासरत्वेन तमादाय लक्षणगमनासम्भवात्। न च तादृशविशिष्टहेतुकस्थले हेतुभेदस्य सकलसाध्याभाववन्निष्ठत्वासम्भवेऽप्यखण्डविशिष्टात्यन्ताभावस्य तथात्वमादायैव लक्षणं सङ्गमनीयमिति वाच्यम्, प्राचीनमते विशिष्टाभावस्य विशेषणाभावविशेष्याभावाभ्यामनतिरिक्ततया तादृशविशिष्टाभावस्य वह्न्यभावत्ववह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासम्भवात्। अथैवमपि विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्याखण्डतया सकलधर्मवन्निष्ठतया तमादायैव लक्षणं सङ्गमनीयमिति चेन्न, वृत्त्यनियामकतया विषयितादिसम्बन्धानामत्यन्ताभावप्रतियोगितानवच्छेदकत्वात्। संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावात्यन्ताभावस्याखण्डस्य सकलधूमवन्निष्ठत्वेऽपि वह्न्यभावप्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्ना तत्र लाघवेनाभावत्वस्यैवावच्छेदकत्वादिति न तमादायापि लक्षणसङ्गतिः। न च गुरुधर्मावच्छिन्नहेतुकस्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छेदके निवेश्यम्, तथा च वह्न्यभावत्वादेरपि तादृशावच्छे-

दकत्वमक्षतमेवेति वाच्यम्, एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत्वेन पारिभाषिकावच्छेदकत्वं न निविष्टमित्यभिप्रायेण तद्दोपदानादिति वदन्ति।

तदसत्, तथा सत्यपि सकलसाध्याभाववन्निष्ठं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाद्यभावमादाय लक्षणसमन्वयसम्भवात्। न च जन्यमात्रस्य कालोपाधितानपे साध्याभाववति पर्वतादौ कालिकसम्बन्धेन वह्न्यभावादिसत्त्वात्तत्र तत्सम्बन्धेन तन्याभावो न वर्तत एवेति वाच्यम्, कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमद्वयववावच्छेदेन तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात्। एवं विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्यामनतिरिक्तत्वे द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिसम्भवे तद्रुपेक्ष्याभावसाध्यकाभावहेतुकस्थलानुधावने बीजाभावात्। तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिवैयधिकरण्यं निविष्टं प्रतियोगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्नैव निविष्टेत्याशयेनैव तद्दोपदानम्। हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यदाने त्वग्रिमलक्षणापेक्षया गौरवमेव तल्लक्षणावतारे बीजमित्यम्। एतेन सकलशब्दस्य व्यापकतार्थकतया साध्याभावव्यापकीभूताभावप्रतियोगित्वमेव निष्कृष्टैतल्लक्षणार्थः, धूमवान् वह्नेरित्यादौ प्रमेयत्वाद्यर्थ वह्न्यभावस्य साध्याभावव्यापकत्वेऽपि न क्षति, यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात्, एवञ्च हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते व्यापकतालक्षणे प्रतियोगिवैयधिकरण्यानिवेशेनाव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकत्वासम्भवेनातिप्रसङ्गविरहात्। व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभाववन्निष्ठत्वमभावे निवेश्यं तेन वह्न्याद्यभाववति कालिकादिसम्बन्धेन धूमादिरूपाभावस्य वृत्तावपि धूमाभावादेर्न साध्याभावव्यापकताक्षतिः। सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिश्च लक्षणपञ्चक एव दोषः।

अस्तु वा हेतुतावच्छेदकसम्बन्धेन हेतुमत्ताज्ञानं प्रति यादृशसम्बन्धेन हेत्वभाववत्ताग्रहः प्रतिबन्धकस्तादृशसम्बन्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकं यद्यत्त्वं तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वम्, इत्थञ्च सत्तावान् जातेरित्यादावेतादृशं स्वं जातित्वाभावत्वादिकमेव तद्भिन्नञ्च जात्यभावत्वादिकमिति लक्षणसमन्वयः। इत्थञ्चैतद्वृक्षत्ववान् कपिसंयोगादित्यादौ कपिसंयोगाभावत्वावच्छिन्नानधिकरणत्वाप्रसिद्ध्या कपिसंयोगाभावत्वं नैतादृशं स्वमिति कपिसंयोगाभावत्वस्य साध्याभावव्यापकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिक-

रण्यविशेषणं देयमेव, न देयमेव वाऽधिकरणत्वाभावस्यैवाधिकरणभिन्नत्वस्थाने निवेशनीयत्वात्, कपिसंयोगाभावादेरिव तदधिकरणताया अप्यव्याप्यवृत्तितया तदभावस्य साध्याभाववति सत्त्वेनातिव्याप्त्यनवकाशात्। अधिकरणत्वाभावश्च भावप्रतियोगिकतयाऽतिरिक्त एवेति विशेषणताविशेषेण तद्वत्त्वं साध्याभाववति विशेषणीयमिति। एवञ्च निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेऽपि हेत्वभावत्वेन तेषां साध्याभावव्यापकत्वाभावादव्याप्तिरिति पूर्वपक्षोऽप्यकिञ्चित्करः। यत्र यावतां साध्याभाववतां सम्भवस्तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकं न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैवैतद्दोषदानात्, प्रकारान्तरानुसारेण परिष्कारे सकललक्षणानामेव परिष्कारसम्भवादिति कृतं पल्लवितेन।

परे तु 'निर्धूमत्वव्याप्ये तत्त्वेन साध्ये' इत्यस्य सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावव्याप्ये साध्ये तत्सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावादावव्याप्तिरित्यर्थः। तत्र च हेतोरपि सकलसाध्याभाववदन्तर्गततया तत्र हेतुभेदासत्त्वेन न वह्न्यभावभेदमादाय लक्षणसङ्गतिरित्यव्याप्तिर्दुर्वारैव, तथाहि सामानाधिकरण्यसम्बन्धेन पर्वतत्वादौ वर्तमानस्य वह्नेस्तादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य पर्वतादौ सत्त्वेन तत्र सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावसत्त्वात् साध्याभावाधिकरणत्वमविवादमेवेति ध्येयमित्याहुः।

साध्यवद्व्यक्तिविशेषभेदमादायाव्याप्तिं परिहरति अत्रेति। साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वमिति साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः। तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषस्तादृशभेदप्रतियोगितावच्छेदकतायास्तत्तद्विशिष्टवह्निमत्त्व एव पर्याप्तत्वात्। 'व्युत्पत्तिबललभ्यम्' अन्यादिपदसमभिव्याहारलभ्यम्, नञादिपदसमभिव्याहारज्ञानस्यैवैतादृशपदसमभिव्याहारज्ञानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दत्वावच्छिन्नं प्रत्येव जनकत्वादिति भावः। 'व्युत्पत्तिबललभ्यम्' इत्यनेन यथाश्रुतलक्षणमत्रत्यर्थमेवास्यमिति सूचितम्, तादृशसमभिव्याहारस्थले तत्प्रतियोगिताकाभावप्रमानबोधेऽतिप्रसङ्गं सूचयति न हि भवतीति। प्रामाणिकव्यवहार इति शेषः। तथा चान्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेऽपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोऽपि स्यादिति भावः। द्रव्यं न घट इत्याद्यप्रयोगादनुयोगितावच्छेदकावच्छेदेनैवान्योन्याभावादिरन्यादिपदेन प्रत्याय्यते, अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिरेव धर्म इति प्रकाशकृदङ्गीकृतव्युत्पत्त्यन्तरविरोधात् 'घटो घटादन्य' इति प्रयोगवारणसम्भवात् नील इति। 'घटादन्य' इत्यादौ प्राचीनमते पञ्चम्या प्रतियोगित्व-

मर्थः। तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासम्बन्धेनान्वयः। अथवा केवलाधेयत्वमेव घटस्य सम्बन्धः, धर्मिपारतन्त्र्येण घटत्वादेरप्यवच्छिन्नत्वसम्बन्धेन तत्रान्वयोपगमादेकविशेषणत्वेनोपस्थितस्याप्यन्यत्र पारतन्त्र्येणान्वयस्य व्युत्पत्तिसिद्धत्वात्, प्रतियोगित्वस्य व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशे भेदे निरूपकतासम्बन्धेनान्वय, 'घटादन्यः' इत्यादौ च निरूपकतासम्बन्धेन घटत्वावच्छिन्नप्रतियोगिताविशिष्टे लक्षणया घटादिपदार्थस्तत्पुरुषस्थले पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्टे लाक्षणिकत्वात्तादृशघटादिपदार्थस्य चाभेदसम्बन्धेन भेदेऽन्वयः।

नवीनमते 'घटादन्य' इत्यादावनुयोगित्वं पञ्चम्यर्थः, तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्नप्रतियोगितानिरूपकतासम्बन्धेनान्वयः। अनुयोगितायाश्चाश्रयतासम्बन्धेन भेदेऽन्वयः, समासस्थले च घटत्वावच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा तस्य चाभेदसम्बन्धेन भेदेऽन्वयः। अथैवं 'साध्यवदन्यावृत्तित्वम्'इत्येतादृशलक्षणवाक्यादभेदसम्बन्धेन तादृशप्रतियोगिनाविशिष्टविशेषितस्तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदस्तद्वदवृत्तित्वमेव प्रतीयते। तथा चानुमित्यौपयिकव्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधानेऽर्थान्तरप्रसङ्गस्तादृशप्रतियोगितासम्बन्धेन तादृशानुयोगितासम्बन्धेन वा साध्यवद्विशेषितभेदवदवृत्तिताज्ञानस्यैव लाघवेनानुमितिहेतुत्वादिति चेन्न, यादृशव्याप्तिज्ञानमनुमितिहेतुस्तस्यामेवास्य तात्पर्यच्छाब्दबोधविषयत्वेऽपि तन्मूलकोक्तव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्यनिर्वाहत्वात्तादृशशाब्दबोधस्यापि कथञ्चिदुपपादयितुं शक्यत्वाच्च। 'नीलो घटः कम्बुग्रीवादिमदन्य.' इत्यादिवाक्यस्याप्रमाणत्वात्, 'पटः कम्बुग्रीवादिमदन्य.' इत्यादिवाक्यस्य प्रमाणत्वादन्वयितावच्छेदकनिरूपितपारिभाषिकमवच्छिन्नत्वं प्रतियोगितायां भासत इत्युपेयम्, अत. 'साध्यवदन्य.' इत्यादौ मतुबन्तप्रतिपाद्यतावच्छेदकस्य साध्यसम्बन्धस्य साध्यापेक्षया गुरुतयानवच्छेदकत्वेऽपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः। पारिभाषिकं तदवच्छिन्नत्वञ्च तद्विशिष्टसम्बन्धिनिष्ठाभावीया या या प्रतियोगिता तत्तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वम्। एतादृशावच्छिन्नत्वस्य च सम्बन्धतया प्रातिस्विकरूपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेयत्वेऽपि न क्षतिः। सम्बन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात्, अनुमितिं प्रति च साध्यावच्छिन्नप्रतियोगिताकत्वावगाहिज्ञानमेव कारणं कल्पते लाघवान्न तु साध्यसम्बन्धावच्छिन्नप्रतियोगितावगाहिज्ञानम्, अनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निवेश्यते, कम्बुग्रीवादिमत्त्वात् घटादित्यादौ विशेषदर्शिनामनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकावच्छिन्नत्वमेवानुमित्यौपयिकव्याप्तिघटकं तादृशगुरुधर्मावच्छिन्नसाध्यकानुमानस्य केवलान्वयिसाध्यकस-

मशीलताव।दिनस्तु स्वरूपसम्बन्धरूपमेवावच्छिन्नत्वं व्याप्तिशरीरे निवेशयन्तीति समासः । मूले 'केवलान्वयिन्यभावात्' इत्यादावेतादृशलक्षणपञ्चकस्य केवलान्वयिन्यप्रसिद्धेरित्यर्थः । न च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्यावश्यं निवेशनीयतया सत्तावान् द्रव्यत्वादित्यादावव्याप्तिरस्तीति केवलान्वयिसाध्यकमात्रेऽव्याप्तिकथनमसङ्गतमिति वाच्यम्, केवलान्वयिपदेन हेतुतावच्छेदकसम्बन्धेन यत्किञ्चिदधिकरणवृत्त्यभावप्रतियोगित्वरूपकेवलान्वयित्वाश्रयसाध्यकमात्रस्योक्तत्वात् ।

अथवा हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमनिवेश्य हेतुतावच्छेदकसम्बन्धातिरिक्तो यो हेतुप्रतियोगिकः सम्बन्धस्तदन्यसम्बन्धावच्छिन्नवृत्तित्वमेव निवेश्यम्, वह्निमान् धूमादित्यादौ कालिकसम्बन्धेन धूमादेः साध्याभाववद्वृत्तित्वेऽपि तत्सम्बन्धस्य हेतुतावच्छेदकसम्बन्धातिरिक्तत्वाद्धेतुप्रतियोगिकत्वाच्च लक्षणाघटकतया तदन्यसम्बन्धेन तद्वृत्तित्वाभावोऽस्त्येवेति भावः । एवञ्च सत्तावान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वाप्रसिद्धावपि हेतुतावच्छेदकसम्बन्धातिरिक्तहेतुप्रतियोगिकसम्बन्धान्यविशेषणताविशेषादिना वृत्तित्वप्रसिद्ध्या नाव्याप्तिरिति ध्येयम् ॥

इति श्रीगदाधरभट्टाचार्यविरचिता शिरोमणिकृतव्याप्तिपञ्चकव्याख्याया विवृतिः समाप्ता ॥

सिंहव्याघ्रप्रकरणम्

(चि०) नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधिकरण्यानधिकरणत्वं वा, तदुभयमपि साध्यानधिकरणानधिकरणत्वम्, तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम् ॥

(दी०) नापीति । साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वं साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम्, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत्, तदनधिकरणत्वमित्यर्थः, साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः, तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः ॥

(गा०) साध्यासामानाधिकरण्यानधिकरणत्वमित्येतल्लक्षणे यदि तदधिकरणावृत्तित्वरूपमसामानाधिकरण्यं निवेश्यते तदा द्रव्यं सत्त्वादित्यादावतिव्याप्तिः, सत्ताया द्रव्यत्वाधिकरणवृत्तितया तादृशासामानाधिकरण्यानधिकरणत्वात्, तदनधिकरणवृत्तित्वस्यासामानाधिकरण्यपदार्थत्वेऽनन्तरवक्ष्यमाणलक्षणाभेद इत्यतो व्याचष्टे साध्येति। साध्यमसमानाधिकरणं यस्येत्यत्रासमानाधिकरणपदस्य स्वानधिकरणाधिकरणार्थकत्वे द्रव्यं सत्त्वादित्यादावेवातिव्याप्तिर्द्रव्यत्वादेः सत्ताद्यनधिकरणाधिकरणकत्वविरहेण यत्पदेन सत्त्वादेरुपादानासम्भवात्, सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च सत्तादेर्द्रव्यत्वाद्यनधिकरणाधिकरणकत्वादतस्तदधिकरणानधिकरणकत्वपरतया तत्पदं व्याचष्टे यदधिकरणेति । यदधिकरणानधिकरणकं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वे व्याप्तेर्विशिष्टैकार्थरूपतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्वाह', यत्त्वतत्त्वानुगमेन तत्त्वाधिकरणत्वाभावकूटस्य निवेशनीयतया दुर्ज्ञेयत्वं गौरवञ्चेत्याशयेन यत्त्वतत्त्वाघटितं साध्यासामानाधिकरण्यपदार्थमाह साध्यनिष्ठेति । साध्यनिष्ठं यत् 'असामानाधिकरण्यं' स्वाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वाभावः, 'तत्प्रतियोगित्वं' तत्प्रतियोगिकोटिप्रविष्टाधिकरणकत्वम्, साध्यनिष्ठाभावीयाधेयत्वनिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धेन यदवच्छेदकं तद्वृत्तित्वमितियावत्। वह्निमान् धूमादित्यादौ साध्यनिष्ठाभावो ह्रदाधेयत्वाभावस्तदीयप्रतियोगितायामुक्तसम्बन्धेनावच्छेदको

ह्रदादिस्तद्वृत्तित्वानधिकरणत्वं धूमादाविति लक्षणसमन्वयः। अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम्। अन्यथा वह्निमान् धूमादित्यादौ पर्वतादिसमवेतत्वाद्यभावमादायानुपपत्तेः, तथा च सत्तावान् समवायित्वादौ साध्यनिष्ठाभावीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकीभूताधिकरणाप्रसिद्धेरव्याप्तिः, वह्निमान् धूमादित्यादावपि धूमादेरयोगोलकीयवह्न्यादिनिष्ठपर्वतादिवृत्तित्वाभावस्य प्रतियोगितावच्छेदकपर्वतादिवृत्तित्वादव्याप्तिश्च, साध्यतावच्छेदकव्यापकीभूताभावनिवेशे च गौरवमित्याशयेन फलितार्थमाह साध्यनिष्ठाधेयत्वेति। आधेयत्वमिह साध्यतावच्छेदकव्यापकीभूतं ग्राह्यं तेन वह्निमान् धूमादित्यादौ महानसादेः पर्वतीयवह्निनिष्ठाधेयत्वानिरूपकत्वेऽपि नाव्याप्तिः। एवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयता निवेशनीया, तेनायमात्माऽऽत्ममहाकालान्यतरत्वादित्यादौ कालस्य कालिकसम्बन्धावच्छिन्नात्मत्वादिनिष्ठाधेयतानिरूपकत्वेऽपि नातिव्याप्तिः, तादृशाधेयत्वानिरूपकाधिकरणेत्यत्राधिकरणत्वमविवक्षितं तदनिरूपकत्वमात्रं निविष्टम्। प्रथमतो द्रव्यं सत्त्वादित्यादावतिव्याप्तेराशङ्कितत्वया व्यभिचारिसामान्यएवातिव्याप्तिमुद्धरति साध्यवद्भिन्नयेति। व्यभिचारनिरूपकाधिकरणस्य चेत्यर्थः। अत्राधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन ग्राह्यम्, अन्यथा वह्निमान् धूमादित्यादौ वह्निनिष्ठाधेयत्वानिरूपकस्वावयवादौ धूमादेः समवायेन वृत्तेरव्याप्त्यापत्ते, इत्थञ्च सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धात्मकसमवायादिसम्बन्धेन वृत्तेरप्रसिद्धे, एवं द्रव्यं विशिष्टसत्त्वादित्यादावपि विशिष्टसत्त्वादेः सत्ताद्यनतिरिक्ततया साध्यनिष्ठाधेयत्वानिरूपकाधिकरणगुणादिवृत्तित्वानधिकरणत्वासम्भवादव्याप्तिरित्यतो निष्कृष्टार्थमाह साध्यनिष्ठेति। अत्रापि पूर्वदोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयत्वं निवेशनीयम्, एवमधिकरणत्वमप्यविवक्षितम्, तादृशाधेयत्वानिरूपकत्वव्यापकतैवाभावे निवेशनीया, तादृशाधेयत्वानिरूपकवृत्तित्वमात्रनिवेशे धूमवान् वह्नेरित्यादौ वह्न्यधिकरणत्वसामान्याभावस्य साध्यनिष्ठाधेयत्वानिरूपकह्रदादिवृत्तित्वादतिव्याप्तिरतो व्यापकतानिवेशः, व्यापकत्वञ्च तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वम्, न तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, सर्वस्यैव तथाविधद्वित्वावच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः, न वा तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तादृशप्रतियोगितानवच्छेदकीभूताभावत्वादिकमादाय वह्न्यधिकरणत्वसामान्याभावस्यापि धूमनिष्ठाधेयत्वानिरूपकत्वव्यापकतया धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः, अनवच्छेदकत्वञ्चावच्छेदकतापर्याप्त्यनधिकरणत्वमतो नोभयवद्भेदमादाय दोषः।

अथवा यदधिकरणतासामान्याभावत्वं साध्यनिष्ठाधेयत्वानिरूपकवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकं तत्त्वमेव समुदायार्थः, अतोऽभावत्वादिना व्यापकतामादाय न दोषः। अधिकरणता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना

आद्या, तेन वह्निमान् धूमादित्यादौ वह्न्यनधिकरणधूमाभाववदादौ धूमाधिकरणत्वसामान्याभावासत्त्वेऽपि न क्षतिः, धूमवान् वह्नेरित्यादौ यत्किञ्चिद्वह्न्यधिकरणत्वाभावस्य धूमानधिकरणत्वव्यापकतयाऽतिव्याप्तिवारणाय सामान्यपदम्, तथा च तादृशाधेयत्वानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वम्, यद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वं वा तादृशाधेयत्वानिरूपकत्वव्यापकतावच्छेदकं तद्रूपवत्त्वं व्याप्तिरिति फलितार्थः, तेन धूमानधिकरणत्वव्यापकीभूतवह्न्यधिकरणत्वधूमाधिकरणत्वोभयसामान्याभावप्रतियोगितायाः वह्न्यधिकरणत्वसामान्यनिष्ठत्वेऽपि नातिव्याप्तिः, यदधिकरणतामात्रनिवेशे द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः, द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतात्वावच्छिन्नाभावासत्त्वादतो यद्रूपावच्छिन्नेति। हेत्वभावस्य व्यापकतानिवेशे व्यापकताशरीरे हेतुतावच्छेदकसम्बन्धावच्छिन्नं तद्वन्निष्ठत्वं निवेश्यम्, अन्यथा वह्निमान् धूमादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे ह्रदादौ धूमात्मकाभावस्य कालिकसम्बन्धेन वृत्तेरव्याप्त्यापत्तेः, तथा च सति सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेरतो हेत्वधिकरणत्वाभावस्य व्यापकताघटितमेव तल्लक्षणं कृतम्, तथा चाधिकरणताया विशेषणताविशेषेण वृत्तिमत्तया तेन सम्बन्धेन तद्वन्निष्ठत्वं निवेश्यमतो न दोषः। पूर्वकल्पपरित्यागे बीजमाह तेनेति। न दोष इति। सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धावपि तत्सम्बन्धावच्छिन्नाया द्रव्यत्वाधिकरणताया द्रव्ये प्रसिद्धाया अभावस्य साध्यनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वादिति भावः॥

साध्यवैयधिकरण्यस्य निरुक्तार्थकत्वे पुनः पौनरुक्त्यमतस्तद्व्याचष्टे साध्यवैयधिकरण्यमिति॥

(दी०) साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वम्। चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वयमेकोक्त्या अनूद्य दूषयति तदुभयमपीति। साध्येत्यादेः साध्यं यदधिकरणानधिकरणं तत्त्वाभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः। तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिसाध्यके च एकसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः क्वचिद्व्यभिचारिण्यतिप्रसङ्गश्चाद्ये, द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो निवक्षितस्तदा केवलान्वयिनि, यदि च यत्किञ्चित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः॥

(गा०) ननु मूले 'तदुभयमपि साध्यानधिकरणानधिकरणत्वम्' इत्येनोक्तलक्षणद्वयार्थानुवादोऽसङ्गतोऽसामानाधिकरण्यवैयधिकरण्ययोरधिकरणताद्वयघटितत्वेन तादृशलक्षणयोरधिकरणताद्वयघटितत्वादनुवादे चाधिकरणताद्वयमात्रस्य निवेशादित्यतस्तादृशमूलं सङ्गमयति चरमाधिकरणत्वांशस्येति। अनतिप्रयोजनकतयेति। अनधिकरणत्वस्याधिकरणत्वाभावरूपतया तद्घटकाधिकरणत्वांशं परित्यज्य साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावनिवेशेनैवोपपत्तेरिति भावः। असामानाधिकरण्याद्यधिकरणत्वाभावस्याखण्डस्यासामानाधिकरण्याद्यभावाघटिततया न वैयर्थ्यमिति'अनतिप्रयोजनकतया'इत्युक्तम्, 'तदपहाय' चरमाधिकरणत्वांशं परित्यज्य, 'द्वयं' साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावरूपनिष्कृष्टलक्षणार्थद्वयम्, 'साध्यानधिकरणानधिकरणत्वम्'इत्यनेन सत्तावान् द्रव्यत्वादित्यादावव्याप्तिवारणाय विवक्षितस्य प्रथमलक्षणनिष्कृष्टार्थस्य कथञ्चिदपि प्रतिपादनासम्भवात्तदनुवादकतानुपपत्तिरिति यथाश्रुतार्थानुवादपरतया सङ्गमयितुमनुवादनीयलक्षणद्वयार्थमाह साध्येत्यादेरिति। लक्षणद्वयस्य क्रमेणेतिशेष। 'तत्त्वाभाव, इत्यन्तेन प्रथमलक्षणार्थकथनम्, एवञ्च साध्यानधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणकं तद्बोध्यते तदुत्तरत्वप्रत्ययेन तत्त्वं साध्यपदोत्तरसन्निकृष्टनञा तदभाव प्रत्याय्यत इति प्रथमलक्षणार्थबोधकत्वं साध्यानधिकरणानधिकरणत्वमित्यस्य। न च साध्याधिकरणानधिकरणत्वपदेन नञ्पदसमासे सत्येव तदर्थाभावो नञा प्रत्याययितुं शक्यते, तथा च साध्यपदोत्तरनञ्निपातोऽसम्भवी समस्यमानपदपूर्वनिपतितस्यैव नञः साधुत्वात्, अन्यथाऽचित्रगुरित्यादौ चित्रादिपदोत्तरमपि नञ्निपातापत्तेरिति वाच्यम्, ससम्बन्धिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि साधुतासम्पादकत्वात्, अन्यथा घटानधिकरणत्वं साध्याभाववदवृत्तित्वमित्यादौ च घटाधिकरणत्वाभावतद्वृत्तित्वाभावप्रत्ययानुपपत्तेर्न हि तत्रानधिकरणत्वादिपदानां घटादिपदैः समासे तादृशार्थप्रतीतिरुपपद्यते, अनधिकरणत्वादिपदजन्यप्रतीतिविशेष्यीभूताभावेन सममेव घटादिसंसर्गभानात् समस्यमानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टेनापरपदार्थान्वये राजपुरुषादन्य इत्यर्थे राजा पुरुष इत्यादिसमासापत्तेः। एवं नञाऽन्वयितावच्छेदकावच्छिन्नाभावस्यैव बोधनादधिकरणसामान्यभेदवानेवानधिकरणपदार्थः स्यात् तस्य चाप्रसिद्ध्या नञ्पदाधिकरणपदयोः प्राथमिकसमासासम्भवाच्चेति, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपप्रथमलक्षणस्य निष्कृष्टयथाश्रुतार्थोऽपि साध्यानधिकरणानधिकरणत्वमिति शब्देन प्रतिपाद्यते, तथाहि आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेनाधिकरणानधिकरणपदेन स्वाधिकरणमनधिकरणमाधेयत्वानिरूपकं यस्येति व्युत्पत्त्याऽधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावत्त्वेनान्यपदार्थो बोध्यते

बहुव्रीहौ विग्रहवाक्यायादृशविशेषणविशेष्यभावापन्नस्य बोधस्तद्विपरीत-विशेषणविशेष्यभावापन्नस्य प्रत्ययाच्चित्रा गौर्यस्येति विग्रहवाक्यायत्पदार्थ सम्बन्धित्वेन चित्रगोश्चित्रगुरित्यतश्चित्रगोनिष्ठसम्बन्धप्रतियोगित्वेन यत्प-दार्थस्य बोधनात्, प्रकृतस्थले च विग्रहवाक्यादन्यपदार्थनिष्ठाधेयतानिरूप कत्वावच्छिन्नभेदवत्त्वेनाधिकरणप्रतीते, एवं साध्यं यदधिकरणानधिक रणं यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताधेयतावदिति व्युत्पत्त्या साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवदधिकरणवृत्तित्वं साध्यानधिकरणाधिकरणशब्देन प्रत्याय्यते तदभावश्च साध्यपदोत्तरनिविष्ट-नञ्पदघटितवाक्येनेति।

द्वितीयलक्षणार्थमाह साध्यवदिति। तथा च साध्यानधिकरणमधिकर-णमाधेयतानिरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधिकरणवृत्तित्वं प्रत्याय्यते तदभावश्च द्वितीयनञेत्युक्तशब्दस्येत दर्थानुवादकतेति भाव। पूरणसंवलितं 'तत्र'इतिग्रन्थं व्याचष्टे तत्रेत्यादिना। मूले केवलान्वयिनि वह्निमान् धूमादित्यादौ चाव्याप्तेर्हेत्वकथनात्प्रथमलक्षणे केवलान्वयिन्यव्याप्तिहेतुं पूरयति साध्येत्यादिनाऽप्रसिद्धेत्यन्तेन। साध्य-निष्ठाधेयतानिरूपकसामान्यभेदनिवेशाभिप्रायेणेयमप्रसिद्धिरभिहिता, यत्कि-ञ्चिन्निरूपकभेदनिवेशे च तादृशभेदवदधिकरणे हेतोर्वृत्तेरव्याप्तिर्बोध्या, वक्ष्यमाणक्रमेण नानाव्यक्तिसाध्यकहेत्वन्तरेऽप्यव्याप्तिसत्त्वाद्धूममात्रे तत्कथनं मूलकृतो न्यूनतासम्पादकमतो धूम इत्यस्योपलक्षणत्वाभिप्रायेण पाठमधृत्वैव व्याचष्टे नानाव्यक्तिसाध्यकेति। अत्र च यथासम्भवमव्याप्तिर्बोध्या तेनैतद्वृत्तियावद्धर्मवानेतत्त्वादित्यादौ वक्ष्यमाणरीत्याऽव्याप्तिविरहेऽपि न क्षति। अत एवाग्रे 'नानाधिकरणके सर्वत्र'इति वक्ष्यति।

अथवा 'नानाव्यक्तिसाध्यके' इत्यस्य मिथो व्यधिकरणद्वयवृत्तिसाध्यता-वच्छेदकक इत्यर्थ, अत्राव्याप्तेर्हेतुं पूरयति एकसाध्येत्यादिना इतीत्यन्तेन। अनया रीत्याऽव्याप्तिश्च यत्किञ्चित्साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेद-निवेशाभिप्रायेण, साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशे च केवलान्व-यिन्यव्याप्तिरेव दोष इतिध्येयम्। क्वचिदिति। पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद् द्रव्यत्वादित्यादावतिव्याप्तिरिति। विशिष्टद्रव्यत्वस्य शुद्धद्रव्यत्वानतिरेकितया पृथिव्यादे साध्यनिष्ठाधेयत्वानिरूपकत्वासम्भवादितिभाव। आधेयतायां साध्यतावच्छेदकावच्छिन्नत्वनिवेशे च नैष दोषोऽधिकरणतानिरूपकताव च्छेदकस्यैवाधेयतावच्छेदकतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदक-पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वादे पृथिवीनिरूपिताधेयतानवच्छेदकत्वादिति ध्येयम्। द्वितीयलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे च धूमादौ नाव्याप्तिरतस्तत्कल्पे केवलान्वयिसाध्यकाव्याप्तिरेव, यत्किञ्चित्साध्यव द्व्यक्तिभेदनिवेशे चोभयस्थल एवाव्याप्तिरिति मूलाभिप्रायं स्फुटयति द्वितीय चेत्यादिना। साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेद साध्यवैयधिकरण्ये विव

क्षित इति योजना, साध्यवैयधिकरण्यघटकतया विवक्षित इत्यर्थः। 'केवलान्वयिनि' केवलान्वयिन्येव। नानाधिकरणक एकव्यक्तिसाध्यकेऽपि सत्तावान् द्रव्यत्वादित्यादावेकस्य साध्यवतो भेदस्यान्यस्मिन् साध्यवति सत्वाद्व्याप्तेर्नानाव्यक्तिसाध्यकेऽपि एतद्वृत्तिधर्मवानेतत्वादित्यादावव्याप्त्यसम्भवान्नानाव्यक्तिसाध्यकेति नोक्तम्, तथा च द्वितीयलक्षणाभिप्रायेण धूम इति मूलं नानाधिकरणसाध्यकसामान्योपलक्षणमिति भावः॥

'साध्यासामानाधिकरण्यानधिकरणत्वम्' इत्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेऽपि द्रव्यं सत्त्वादित्यादावतिव्याप्तिर्न सम्भवति सामानाधिकरण्यस्याव्याप्यवृत्तितया सत्तायामपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधिकरण्याभावसत्त्वात् किन्तु वह्निमान् धूमादित्यादावव्याप्तिः स्वावयवाद्यवच्छेदेन धूमादौ वह्न्यादिसामानाधिकरण्याभावसत्वात्। सापि हेतुतावच्छेदकसम्बन्धेन यद्धेतुमत्तदवच्छिन्नत्वेनाभावं विशेष्य वारयितुं शक्यत इत्यभिप्रायेण तत्पदं तादृशाभावपरतया वर्णयतः सार्वभौमस्य मतमुपन्यस्यति केचित्विति॥

(दी०) केचित्तु साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थस्तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः। तादृशाभावश्च सम्बन्धान्तरेण तत्रैव वर्तमाने सुलभो व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वम्, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात्। न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः, विशिष्टस्यातिरिक्तत्वात्। अनतिरिक्तत्वे तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया व्याप्यत्वात्, केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः। तच्चिन्त्यम्। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमितिप्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन सामानाधिकरण्यस्य वाऽभावं गुणेऽवगाहते, न तु सत्तायामेव द्रव्यवृत्तित्वाभावम्, सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्वजनसिद्धप्रतीतिबाधितत्वात्, बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः। अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसङ्गाच्च। तत्र सामानाधिक-

रण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः। न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्, तद्वद्वृत्तिभिन्नत्वस्योपाधित्वात्। किञ्चेदमिदानीमितिप्रतीतिनियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः। तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः॥

(गा०) 'हेत्वधिकरणे' इति सतम्यर्थोऽभावान्वितमवच्छिन्नत्वम्, 'तेनैव सम्बन्धेन'इति तृतीयार्थोऽपि वृत्त्यन्वितमवच्छिन्नत्वम्, वृत्तिपदस्य सम्बन्धार्थकत्वे तु अभेद एव तदर्थः, अनधिकरणत्वपदस्याधिकरणत्वाभावोऽभावमात्रं वा यदर्थः स्यात्तदाऽव्याप्यवृत्त्यधिकरणताया अप्यव्याप्यवृत्तितया सत्त्वात् द्रव्यावच्छेदेन साध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्य सामानाधिकरण्यरूपतदभावाभावस्य चाक्षतत्वादतिव्याप्तिस्तदवस्थैवेत्यनधिकरणपदमधिकरणभेदवदर्थकतया व्याकरोति तदधिकरणेति। यद्यप्यधिकरणभेदेनाभावभेदाभावात्संयोगादिना धूमाधिकरणपर्वताद्यवच्छिन्नो यः सम्बन्धान्तरेण तद्वृत्तिरूपादिनिष्ठवह्न्यादिमत्संयुक्तत्वाभावस्तस्यैव स्वावयवावच्छेदेन धूमादौ वर्तमानतया धूमादेस्तादृशाभावानधिकरणत्वं दुर्घटम्, तथापि तादृशहेत्वधिकरणावच्छिन्नत्वविशिष्टाभावानधिकरणत्वस्यैव विवक्षणीयतया न दोषः। रूपे पर्वते न वह्निमत्संयुक्तत्वमितिप्रतीतिवद्धूमे पर्वते न वह्निमत्संयुक्तत्वमितिप्रतीत्यनुदयात् पर्वतावच्छिन्नत्वविशिष्टनिरूपिताया वह्निमत्संयुक्तत्वाभावीयविलक्षणाधिकरणताया रूपादावेवोपगमादभावाधिकरणतायामेव वाधिकरणविशेषावच्छिन्नत्वं निवेशनीयं तावतापि धूमरूपयोरभिन्नस्याप्यभावस्य परस्परानवच्छेदकावच्छिन्नाधिकरणताभेदेन कथितदोषनिराकरणसम्भवात्। उभयत्र हेतुतावच्छेदकसम्बन्धप्रवेशप्रयोजनं क्रमेण दर्शयति तेनेति। स्वावयवे संयोगेनावृत्तावपीत्यन्वयः। तथा च स्वावयवावच्छेदेन साध्यवत्संयुक्तत्वाभावसत्त्वेन तदभावस्याक्षततया प्रथमतो हेतुतावच्छेदकसम्बन्धानिवेशे स्वावयवरूपस्वाधिकरणावच्छिन्नसाध्यवत्संयुक्तत्वाभावानधिकरणत्वविरहेण संयोगेन धूमहेतौ कस्यापि साध्यस्य व्याप्तिर्न स्यादितिभावः। यद्यपि तादृशसम्बन्धनिवेशेऽपि वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धूमादावुत्पत्तिकालावच्छेदेन वह्निमत्संयुक्तत्वाभाववृत्तेः पर्वतादेरपि कालोपाधितया तादृशाभावावच्छेदकत्वाद्व्याप्तितादवस्थ्यम्, तथापि इदानीमितिप्रतीतिनियामककालस्यावच्छेदकत्वादिहेतिप्रतीतिनियामकदेशनिष्ठावच्छेदकताया वैलक्षण्यं दुरपह्नवं यदभावात्पर्वते धूमे न वह्निमत्संयुक्तत्वमितिप्रत्ययाभावो हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्वमेवाभावे निवेश्यमतो न दोषः। न च कालोपाधेरवच्छेदकतायामवच्छेद्याधिकरणेनावच्छेदकस्य कालिकसम्बन्धो नियामक इत्थं च तादृशसम्बन्धेनानवच्छिन्नत्वमेव देशस्यावच्छेदकतायां वैलक्षण्यमन्यस्य

वैचत्वात्, तथा च व्यभिचारिणि कालिकसम्बन्धेन हेतोर्वर्तमानसाध्यसामानाधिकरण्याभावे व्यभिचारनिरूपकहेत्वधिकरणावच्छेदकतायां कालिकसम्बन्धावच्छिन्नत्वविरहादतिव्याप्तिरितिवाच्यम्, कालिकव्याप्यवृत्तावपि कालिकसम्बन्धघटितात्मत्वाकाशत्वाद्युभयसामानाधिकरण्ये दैशिकसम्बन्धेनात्मत्वाद्यनधिकरणकालस्य देशविधयैवावच्छेदकत्वात् कालविधया कालस्यावच्छेदकत्वे तादृशसामानाधिकरण्यस्य कालिकाव्याप्यवृत्तित्वापत्ते कालिकसम्बन्धानवच्छिन्नत्वादन्यस्यैव वैलक्षण्यस्य देशविधयावच्छेदकताया स्वीकरणीयत्वात्। 'हेत्वधिकरणे' इत्यत्र हेतुपदमधिकरणभिन्नत्वानुयोगितत्तद्धेतुपरम्, अतो धूमाद्यन्तरसंयुक्तस्यावयवाद्यवच्छेदेन धूमादेस्तादृशाभाववत्त्वेऽपि न क्षति। प्रवञ्च व्याप्ते प्रतिधूमादिभिन्नत्वेऽपि येनापि रूपेणानुगताना तासा धूमत्वादिकमेवावच्छेदकम्।

यत्तु हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमेव, हेतुतावच्छेदकसम्बन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना याऽधिकरणता तदन्यत्वेन साध्यसामानाधिकरण्याभावाधिकरणताया विशेषणीयत्वान्नैष दोषो न वाऽननुगम। प्रवञ्च कालोपाधिविधया हेत्वधिकरणदेशस्यावच्छेदकत्वेनोक्तदोषस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकत्वनिवेशेनापि वारणम्भव पर्वतरूपादौ हेतुतावच्छेदकसम्बन्धावच्छिन्नपर्वतादिनिष्ठावच्छेदकतानिरूपसाध्यसामानाधिकरण्याभाववत्त्वाप्रसिद्धावपि रूपादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणताया धूमादिप्रसिद्धनिरुक्ताधिकरणताना भेदस्याक्षततया तदन्यत्वेन धूमादौ लक्षणसमन्वयादिति। तन्न साधु, तथा सति 'किञ्च'इत्यग्रिमदोषासङ्गते, गगननिष्ठसाध्यसामानाधिकरण्याभावाधिकरणताया पूर्वोक्ताधिकरणताभिन्नाया प्रसिद्धे। वह्निमति चेति। तथा च 'तेनैव सम्बन्धेन'इत्यनुक्त्वा 'यत्किञ्चित्सम्बन्धेन'इत्युक्तौ पर्वतावच्छिन्नवह्निमत्संयुक्तत्ववत्यपि तदवच्छिन्नवह्निमत्समवेतत्वाभावसत्त्वाद्धूमस्य वह्निव्याप्यत्वं नोपपद्यत इति भाव। साध्यवत्सम्बद्धत्वसामान्याभावनिवेशे वह्निमत्समवेतत्वसामान्याभावस्य लक्षणाघटकत्वेऽपि हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्सम्बद्धत्वसामान्याभावस्याप्रसिद्ध्याऽसम्भवो बोध्य, साध्यवद्सम्बद्धस्य गगनादेर्हेतुमति सम्बन्धासम्भवादवच्छेद्याधिकरणसम्बन्धिन एवावच्छेदकतया तन्निष्ठाभावे हेतुमतोऽनवच्छेदकत्वात्। न क्षतिरिति। नाव्याप्ति र्नासम्भवश्चेत्यर्थ। साध्यवत्त्वं साध्यतावच्छेदकसम्बन्धेन बोध्यम्। तेन समवायेन वह्नौ साध्ये संयोगेन धूमे पर्वतावच्छिन्नवह्निमद्वृत्तित्वसामान्याभावस्यासत्त्वेऽपि नातिव्याप्ति, न वा सद्धेतावपि यत्किञ्चित्सम्बन्धेन यसाध्यवान् तद्वृत्तित्वसामान्याभावस्यासत्त्वेऽपि नातिव्याप्ति। साध्यश्चोपलक्षणविधयाऽभावप्रतियोगितावच्छेदककोटौ निवेशनीयं न तु विशेषणविधया, तेनोत्पत्तिक्षणावच्छिन्नघटादौ गन्धाद्यसत्त्वात्तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गन्धादिविशिष्टवृत्तित्वाभावसत्त्वेऽपि गन्धवान् पृथिवीत्वादि-

त्यादौ, मूलावच्छिन्नवृक्षादौ कपिसंयोगाद्यभावसत्त्वात्तादृशवृक्षाद्यवच्छेदे नैतद्वृक्षत्वादौ कपिसंयोगादिविशिष्टवृत्तित्वाभावसत्त्वेऽपि कपिसंयोगि एतद्वृक्षत्वादित्यादौ नाव्याप्तिस्तत्तत्कालदेशावच्छिन्नतत्तदधिकरणावच्छेदेनापि तत्र तत्र हेतौ तादृशसाध्योपलक्षितवृत्तित्वसत्त्वात्। न चैवमपि धूमादौ पर्वतादिवृत्तेरनवच्छेदको यो देश कालो वा तदवच्छिन्नपर्वताद्यवच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमादौ सत्त्वादव्याप्तिर्दुर्वारेतिवाच्यम्, तत्तद्देशकालावच्छिन्नपर्वतादेर्धूमाद्यसम्बन्धितया धूमादावभाववृत्तावपि तादृशस्यानवच्छेदकत्वात्। न चैवमुत्पत्तिक्षणादिविशिष्टपर्वते धूमस्य न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यनुपपत्तिर्द्रव्यत्वे गुणे न पृथिवीत्वादिसामानाधिकरण्यमित्यादिप्रतीतिवदुक्तप्रतीतेः सामानाधिकरण्याद्यवच्छेदकत्वाभावावलम्बनता न सम्भवति विशेष्यस्यावच्छेदकत्वे विशिष्टस्यानवच्छेदकत्वासम्भवादितिवाच्यम्, तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्टपर्वताद्यवच्छेद्यत्वाभावावगाहितयैवोपपत्तेरुत्पत्तिक्षणे पर्वते धूमस्य न वह्निमत्संयुक्तत्वमित्यादौ पर्वतावच्छिन्नं यद्धूमस्य वह्निमत्संयुक्तत्वं तस्योत्पत्तिक्षणो नावच्छेदक इत्याद्यर्थः सम्भवति, धूमनिष्ठवह्निमत्संयुक्तत्वाभाव उत्पत्तिक्षणपर्वतोभयावच्छिन्नत्वं तु नार्थः पर्वतस्य प्रतियोग्यवच्छेदकतया तदन्तर्भावेन द्वयोरभावावच्छेदकत्वस्यासम्भवाद्घटपटोभयोर्घटत्वाभावाधिकरणतावत्। एतेनोक्तोभयावच्छिन्नसाध्यसामानाधिकरण्याभाववत्त्वव्यावर्तनाय हेत्वधिकरणमात्रावच्छिन्नत्वप्रवेशनं केषाञ्चिदनुपादेयमेव, तथा सति वह्न्यादिनिष्ठधूमसामानाधिकरण्याभावस्याप्ययोगोलकस्यावयवोभयावच्छिन्नतया हेतुतावच्छेदकसम्बन्धेन हेतुमन्मात्रावच्छेद्यतयाऽतिव्याप्तिप्रसङ्गाच्च।

केचित्तु विशिष्टपर्वतादेरवच्छेदकतामादायाव्याप्तिवारणायावच्छेदकान्तरानवच्छिन्नहेत्वधिकरणावच्छिन्नत्वमभावे निवेशनीयम्। एवञ्च पर्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाद्यभावावच्छेदकत्वस्यापि व्यावृत्तिः पर्वतादेः स्थूलकालतया वह्निमत्संयुक्तत्वादिरूपप्रतियोगिनोऽप्यवच्छेदकत्वात्तन्निष्ठाभावावच्छेदकताया अविरोधायावान्तरकालावच्छिन्नत्वोपगमादित्याहुः।

हेतुमदसम्बद्धे साध्यसामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणावच्छिन्नत्वविरहाद्धेतुतानवच्छेदकसम्बन्धेन हेतुमदसम्बद्धे हेतुमदवच्छिन्नतादृशाभावप्रसिद्धिमाह तत्रैवेति। हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वस्य तेन सम्बन्धेन हेत्वधिकरणावच्छिन्नाभावश्चेत्यर्थः। 'तत्रैव' तादृशहेतुमत्येव। न च तथाविधरूपादौ वह्निमत्संयुक्तत्वाद्यभावो व्याप्यवृत्तिरेवेति तत्राधिकरणविशेषस्यावच्छेदकत्वं निर्युक्तिकं प्रतियोगिमत्यभाववृत्तावेव विरोधभञ्जनार्थमवच्छेदकभेदापेक्षणाद्धूमवत्कपालादिसमवेतवह्निमन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभावसौलभ्येऽप्येतद्रूपवानेतद्रसादित्यादावेत-

द्रूपवत्समवेतत्ववति हेत्वधिकरणावच्छेदेन प्रतियोगिसत्त्वात्तदवच्छेदेन साध्यसामानाधिकरण्याभाववृत्त्यसम्भवाद्रेतद्रूपादिमति सम्बन्धान्तरेण वर्तमानसाध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणानवच्छिन्नत्वानिरुक्ताभावाप्रसिद्धेर्दुर्वारत्वादिति वाच्यम्, पर्वते रूपे न वह्निमत्संयुक्तत्वमितिप्रतीतिबलेन व्याप्यवृत्तेरपि सामानाधिकरण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमात्।

यत्तु व्याप्यवृत्तेरभावस्याधिकरणविशेषावच्छिन्नत्वानुपगमे हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये हेत्वनुयोगित्वहेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावो विवक्षणीयः, तथा च धूमादिनिष्ठम्वावयवाद्यवच्छिन्नतदधिकरणतायां हेतुतावच्छेदकसम्बन्धेन हेतुमदनवच्छिन्नत्वस्य रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपालाद्यवच्छिन्नतदधिकरणतायाञ्च हेत्वनुयोगिकत्वस्याभावेनोभयाभावसत्त्वाल्लक्षणसमन्वय इति। तन्न, व्याप्यवृत्तेरवच्छेदकत्वानुपगमे पृथिवी रूपादित्यादावतिव्याप्तिः, पृथिवीत्वादिव्यभिचारिजलीयरूपादिनिष्ठसाध्यसामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणतासामान्ये निरुक्तोभयाभावस्याक्षतत्वात्।

अथ हेत्वधिकरणावच्छिन्नत्वस्थानेऽवच्छिन्नत्वहेत्वधिकरणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वान्नायं दोषो जलरूपादिनिष्ठपृथिवीसमवेतत्वाभावाधिकरणतायामवच्छिन्नत्वविरहेणोभयाभावसत्त्वात्, एवञ्च तावतैव दर्शितप्रसिद्धेरपि निवारितत्वात्तादृशोभयाभाववत्तादृशाधिकरणतावदन्यत्वमेव निवेशनीयं न तत्ताधिकरणतासामान्ये हेत्वनुयोगिकत्वतादृशोभयाभाववत्त्वोभयाभाव प्रयोजनविरहादिति चेदेवमपि वक्ष्यमाणाया कालिकसम्बन्धेन हेनाद्यव्याप्तेरसङ्गतिर्दुर्वारैव। तत्र कालिकसम्बन्धेनावृत्तौ गगनादावेव दर्शितोभयाभाववत्साध्यसामानाधिकरण्याभावाधिकरणताया प्रसिद्धेरवृत्तावेव सर्वत्र तादृशाभाववत्त्वप्रसिद्ध्या सम्बन्धान्तरेण वर्तमानपर्यन्तानुधावनविरोधस्तस्माद्व्याप्यवृत्तेरवच्छेदकत्वमेव ग्रन्थकारानुमतमित्यवधेयम्।

द्रव्यं सत्त्वादित्यादावाशङ्कितातिव्याप्तिमुद्धरति व्यभिचारिणश्चेति। तादृशाति। हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थः। अवच्छेदकत्वं सप्तम्यर्थः, तादृशाभाववत्त्वं हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभाववत्त्वम्। अत्र प्रमाणाकाङ्क्षायामाह सत्तायामिति। तादृशप्रतीत्या द्रव्यत्वसामानाधिकरण्यवत्यामपि सत्तायां तदनवच्छेनकगुणाद्यवच्छेदेन तदभाववत्त्वावगाहनादिति भावः। एवं सत्तायां द्रव्यत्वसामानाधिकरण्याभावोपगमे विशिष्टसत्त्वे गुणाद्यन्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नेऽव्याप्तिरिति गुणाद्यवच्छेदेन साध्यसामानाधिकरण्याभाववत्या येनापि रूपेण तदनधिकरणत्वासम्भवादिति भावः विनिगमयति। तथा च विशिष्टसत्त्वं द्रव्यमात्रवृत्ति तदधिकरणत्वं न

गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववत्त्वमिति नाव्याप्तिरितिभावः । यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छिन्नत्वं निवेश्यापीयमव्याप्तिः शक्यते वारयितुं तथापि प्रकारान्तरेणाव्याप्तिवारणसम्भवे लक्षणेऽधिकनिवेशनमनुचितमित्यभिप्रेत्य विशिष्टस्यातिरिक्तत्वपक्ष आश्रितः । न च हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमावश्यकमन्यथेदं स्पर्शवद्भूतत्वमूर्तत्वोभयस्मादित्यादौ भूतत्वे मूर्तत्वे च हेतौ स्वाधिकरणे गगने मनसि च साध्यसामानाधिकरण्यविरहेणाव्याप्तिप्रसङ्गादितिवाच्यम्, उभयत्वस्यैकविशिष्टापरत्वरूपतामतमवलम्ब्य विशिष्टस्यातिरिक्तत्वेन तत्र स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेनोभयत्वस्यैव हेतुत्वमिति स्वीकृत्यैव वा तत्राव्याप्तेः समाधानसम्भवात् । ननु द्रव्यं गुणाद्यन्यत्वे सति सत्त्वादित्यादौ विशिष्टस्यातिरिक्ततापक्षमवलम्ब्याव्याप्तेर्वारणं न विचारसहम्, तथाहि गुणादिवृत्तिसत्त्वादितो गुणाद्यन्यत्वविशिष्टसत्तादेरतिरिक्तत्वेऽनुगतधर्ममात्रोच्छेदः एकव्यक्तिवृत्तित्वविशिष्टस्यापरव्यक्तिवृत्त्यन्यत्वात् । न च तत्तद्द्रव्यव्यक्तिवृत्तित्वविशिष्टसत्तादीनां मिथो भेदेऽपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यम्, शुद्धसत्त्वादौ तत्तद्द्रव्यव्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवता तदेकत्वासम्भवात्तदनभ्युपगमे तस्यावृत्तित्वप्रसङ्गादेवं सर्वेषामेव वस्तूनां तत्तत्क्षणवृत्तित्वरूपविशेषणभेदाद्भेदप्रसक्त्या क्षणभङ्गापत्तिपर्यवसानं दुर्वारमेव ।

अथ प्रत्यभिज्ञाद्यनुरोधेनैकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं स्वीक्रियत एव । परन्तु 'गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्ति' इदानीं पूर्वक्षणवृत्तित्वविशिष्टघटो नास्तीतिप्रतीत्यनुरोधेन मिथो भिन्ना अपि तत्तद्विशेषणविशिष्टसत्त्वादयः स्वीक्रियन्ते तदवलम्बनेनैव तादृशप्रतीत्युपपत्तेर्द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेण चानुगतसत्त्वादेर्न द्रव्यत्वानुमापकता स्वीक्रियते, अपि तु तदन्यतादृशविशेषणविशिष्टगुणाद्यवृत्तिवस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तिविरहेऽपि न क्षतिरिति चेत्, तादृशवस्तूनां केन रूपेण व्याप्यता, न द्रव्यवृत्तित्वादिविशिष्टत्वेन, तादृशरूपस्याव्याप्यानुगतधर्मसाधारण्यात्, नापि तादृशविशेषणविशिष्टतत्तद्द्रव्यव्यक्तित्वादिना, 'तादृशविशेषणवैशिष्ट्यांशस्य व्यर्थत्वात्तद्द्रव्यव्यक्तित्वानुपस्थितावनुमानानिर्वाहाच्च । एवं विशिष्टसत्ता नास्तीत्यत्र विशिष्टसत्तात्वावच्छिन्नाभावस्य न विषयतासम्भवस्तद्रूपावलीढानुगतसत्तान्तति तद्रूपावच्छिन्नाभावासम्भवात् । नापि तत्तद्द्रव्यव्यक्तित्वावच्छिन्नाभावस्य, तत्तद्द्रव्यव्यक्तित्वस्य प्रतियोगिकोट्यनुल्लेखात्, विशेषणावच्छिन्नप्रतियोगिकसम्बन्धो विलक्षण, स च नानुगतसत्तायाः सम्बन्धोऽपि त्वतिरिक्तविशिष्टसत्ताया एवेति प्रतियोगितावच्छेदकधर्मस्य गुणादिवृत्तिसत्तासाधारण्येऽपि तत्र विशिष्टाभावोऽक्षत एव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकसम्बन्धशून्यत्वमात्रस्य विशिष्टाभावसत्त्वेऽपेक्षितत्वादिति चेत्, तर्हि गुणादिसाधारणसत्ताया एव तादृशातिरिक्तसम्बन्धेन

गुणादिव्य वृत्तिः क्रियतां किं सम्बन्धान्तरकल्पनेनेत्यभिप्रेत्याह अतिरिक्तत्वे त्विति । विशेषणविशेष्यसम्बन्धस्यैवेति । सत्वगुणाद्यन्यत्ववैशिष्ट्यस्यैवेत्यर्थः । 'परम्परया' परम्परासम्बन्धेन, स्वावच्छिन्ननिरूपितसमवायादिसम्बन्धेनेतियावत् । व्याप्यत्वादिति । गुणाद्यन्यत्ववैशिष्ट्यावच्छिन्नाधिकरणताया गुणादावसत्त्वात्तादृशसम्बन्धेन तद्वैशिष्ट्यस्य द्रव्यमात्रवृत्तित्वादितिभावः । एवकारेण सत्ताया व्याप्यत्वव्यवच्छेदः । यत्र विशेषणवैशिष्ट्यावच्छिन्नसत्ताहेतुकद्रव्यत्वाद्यनुमितिरभिमता तत्र तद्वैशिष्ट्याहेतुकानुमितिरेवोपेयते वैशिष्ट्ये परम्परासम्बन्धेन व्याप्तिधीविरहे चानुमितिरसिद्धैवेतिभावः । यद्यपि विशिष्टनिरूपितसम्बन्धस्य विलक्षणत्वे तादृशसम्बन्धेन सत्ताया अपि व्याप्यत्वं निर्वहति, तथापि विशेषणावच्छिन्ननिरूपितसमवायत्वादिना न सत्तादिसम्बन्धता किं तु विशिष्टसत्तावानितिप्रत्यये वैशिष्ट्यस्यैव सत्तादिविशेषणतापन्नस्योक्तपरम्परासम्बन्धेन धर्मिणि विशेषणत्वोपगमाद्व्याप्तिप्रसङ्गशङ्कैत्याशयेनेदमभिहितम् । नन्वेवं रीत्या प्रथमलक्षणपरिष्कारे वक्ष्यमाणकेवलान्वयिसाध्यकाव्याप्त्यसङ्गतिस्तत्रापि सम्बन्धान्तरेण हेतुमद्वृत्तौ हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याभावप्रसिद्ध्या लक्षणगमनसम्भवादत आह केवलान्वयिनीति । द्वितीयलक्षणेति । न च 'तच्च' इत्यनेनोभयत्वावच्छिन्नस्यैव परामर्शात्प्रथमलक्षणेऽव्याप्त्यभावेऽसङ्गतिर्दुर्वारैवेति वाच्यम्, केवलान्वयिसाध्यके धूमे चाव्याप्तिप्रदर्शनादुभयत्वेनोपस्थितेऽपि लक्षणद्वये यथायोगं तत्तत्स्थलेऽव्याप्त्यन्वये तात्पर्यात् । यद्यपि धूमादावपि साध्यसामानाधिकरण्यसामान्याभावघटितस्य प्रथमलक्षणार्थस्य नाव्याप्त्यवकाशः, तथापि यत्किञ्चित्साध्यवद्व्यक्तिभेदनिवेशाभिप्रायेण द्वितीयलक्षणस्येव यत्किञ्चित्साध्यसामानाधिकरण्याभावनिवेशाभिप्रायेणैव प्रथमलक्षणस्यापि नानाव्यक्तिसाध्यकेऽव्याप्तिप्रदर्शनमविरुद्धम् । मूले च 'यत्किञ्चित्साध्यानधिकरणाधिकरणे' इत्युपलक्षणं यत्किञ्चित्साध्याधिकरणावृत्तिरित्यपि वोध्यम्, तेन प्रथमलक्षणाव्याप्तिसम्पादकहेत्वकथनान्न्यूनत्वस्य नावकाश इति ध्येयम् ।

सामानाधिकरण्यस्याव्याप्यवृत्तितायां प्रमाणसिद्धायामेव दर्शितातिव्याप्तिर्वारयितुं शक्यते तत्रैव न प्रमाणमुक्तप्रतीतेरन्यविषयकत्वादित्याह सत्ताऽभिति । प्रतीतिर्हीति । अभावं गुणेऽवगाहत इत्यनेनान्वयः । अवच्छेदकत्वस्येति । निरूपकत्वस्येत्यर्थः । तेन सामानाधिकरण्यस्य व्याप्यवृत्तितामते तदवच्छेदकत्वस्याप्रामाणिकत्वेऽपि न क्षतिः, उक्ताकारप्रतीतावचच्छेदकत्वानुल्लेखादवच्छेदकत्वाभावावगाहिता न सम्भवतीत्याशङ्क्याह परम्परेति । ननूक्तपरम्परासम्बन्धो न वृत्तिनियामक आकाशे द्रव्यत्वसामानाधिकरण्यवदित्यप्रत्ययादित्युक्तसम्बन्धावच्छिन्नाभाव एवाप्रामाणिक इति तादृशाभावावलम्बनतापि नोक्तप्रतीतेः सम्भवति इत्याशङ्कोद्धारायानुरूपं दृष्टान्तमाह द्रव्यत्व इति । गुणस्यावच्छेदकतानियामकद्रव्यत्वसम्बन्धशून्यतया

द्रव्यत्वनिष्ठाभावच्छेदकत्वं न सम्भवतीत्यगत्या गुणनिष्ठो द्रव्यत्ववृत्तिपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन तादृशसामानाधिकरण्यस्याभाव एव वा तादृशप्रतीतिविषय इत्यवश्यमुपेयं तद्वदत्रापीत्यर्थः। स्वरसतो यादृशशब्दाद्यादृशोऽर्थः प्रतीयते तादृशशब्दोल्लिखितप्रत्यये तादृशार्थविषयकत्वमेवासति बाधके युज्यत इत्याशयेन दर्शितप्रतीतेः सत्ताया गुणावच्छिन्नद्रव्यवृत्तित्वाभावावगाहिताया बाधकप्रतीतिमाह सत्ता न द्रव्यवृत्तित्वाभाववतीति। न च द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वरूपस्य सत्तायामस्मन्मतेऽपि सत्त्वान्नैतस्या प्रतीतेर्बाधकत्वं सम्भवति विरोध्यविषयकत्वादिति वाच्यम्, तादृशशब्देन द्रव्यवृत्तित्वाभावच्छेदस्यैव प्रत्यायनात्तदाकारप्रतीतेरपि तच्छेदावगाहितया बाधकत्वाच्छेदस्याव्यावृत्तिताविरहेण सामानाधिकरण्याभावच्छेदस्य तदभावविरोधित्वात्। यदि च भेदस्याव्याप्यवृत्तित्वमतमवलम्ब्य तादृशप्रतीत्योर्विरोध्यविषयकत्वमुपपाद्यते तदा सत्ताया द्रव्यत्वसामानाधिकरण्याभावेऽपि तदधिकरणभिन्नत्वस्याक्षततयाऽतिव्याप्तिवारणमशक्यमिति भावः। अव्याप्यवृत्तित्वबाधकदर्शितप्रतीतेरभावरूपविशेष्ये सत्तावृत्तित्वावगाहिताया उपगमात्तन्नाभावविशेष्यकसत्तावृत्तित्वविरोधिविषयकप्रत्ययं बाधकतयोपन्यस्यति द्रव्यवृत्तित्वाभाव इति।

यत्तु द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वं गुणाद्यवच्छेदेन न तु द्रव्यावच्छेदेनेति तदवच्छेदेन तत्र सत्तावृत्तित्वाभाव सम्भवति, एवं सत्तावृत्तित्वं सत्तात्वसामानाधिकरण्यरूपं सामानाधिकरण्यस्याव्याप्यवृत्तितामतेऽव्याप्यवृत्तीति तदनवच्छेदकगुणत्वाद्यवच्छेदेन द्रव्यवृत्तित्वाभाव सम्भवत्येवेति न विरोध, तथाप्युक्तयुक्त्या दर्शितप्रतीते सत्तावृत्तिभेदावगाहितया बाधकत्वं दुर्वारमेव।

यत्तु सत्तावृत्त्यभावेऽवच्छेदकभेदेन सत्तावृत्तित्वाभावसम्भवेऽप्यवच्छेदकाप्रतीतिदशाया जायमानतत्प्रत्ययस्य सत्तावृत्तित्वग्रहप्रतिबन्धकतया तदुत्तरं जायमानाया सत्ताया गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीते सामानाधिकरण्याभावे सत्तावृत्तित्वावगाहित्वासम्भवेन गुणनिष्ठसामानाधिकरण्यावच्छेदकत्वाभावावगाहित्वे सर्वत्रैव तदवगाहित्वकल्पनमुचितमिति भाववर्णनम्, तदसत्, एवं सत्यवच्छेदकविषयिण्या द्रव्यत्वसामानाधिकरण्यत्वेन सत्ताया तत्सामानाधिकरण्यविषयकप्रतीतेरपि बाधकतासम्भवेन 'सत्ता न द्रव्यवृत्तित्वाभाववती' इत्यादिप्रतीतिपर्यन्तानुधावनस्य निर्बीजतापातात्। नन्वेवं संयोगादिमति संयोगादेरप्यभावो मा सेत्सीद्मूले न कपिसंयोग इत्यादिप्रतीतेरपि मूलनिष्ठकपिसंयोगावच्छेदकत्वाभावावलम्बनतयोपपत्तेरित्यत आह बाधकाभावादिति। तत्र कपिसंयोगाभावो वृक्षावृत्तिरित्यादिप्रत्ययस्यानुभवादिति भाव। संयोगाभावे वृक्षावृत्तित्वप्रत्ययइव द्रव्यवृत्तित्वाभावे सत्ताऽवृत्तित्वप्रत्ययेऽपि विवादसम्भवाद्यत्र सामानाधिकरण्याभावस्य न प्रत्यक्षसम्भवस्तत्र तत्सत्त्वे मानाभावेन तदनधिक

रणत्वं निष्प्रत्यूहमित्यतिव्याप्तिरित्याह अतीन्द्रियसाध्यक इति। इदं गुरुद्रव्यत्वात्, पृथिवी आकाशाभावादित्यादावित्यर्थः।

अथवा स्तम्भादौ पिशाचत्वाभावस्येव स्तम्भत्वादौ पिशाचत्वसामानाधिकरण्याभावस्य महति वाय्वादौ रूपाभावस्येव महावायुत्वादौ रूपसामानाधिकरण्याभावस्यापि प्रत्यक्षत्वादुभयत्रातीन्द्रियत्वोपादानम्। तत्रेति। गुरुत्वादिसाध्यकस्थले साध्यसामानाधिकरण्याभावस्यातीन्द्रियप्रतियोगिकत्वेनातीन्द्रियतयाऽतीन्द्रियहेतुकस्थले च धर्मिण एव तथात्वेन हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासम्भवेन तत्र तदसिद्धेरित्यर्थः। 'तदभाववदवृत्तित्वेन' गुरुत्वाभाववदवृत्तित्वेन, 'तत्र' द्रव्यत्वादौ, 'तत्' गुरुत्वादिमदवृत्तित्वाभावत्वम्। अनुमेयमिति। तद्विरुद्धदृष्टान्तेनेत्यादिः। तद्वदिति। गुरुत्वादिमदित्यर्थः उपाधित्वादिति। तद्विरुद्धदृष्टान्ते तद्वद्वृत्तिभिन्नत्वस्य साध्यव्यापकतायाः पक्षीभूते प्रकृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनाव्यापकतायाः सुग्रहत्वात्, पक्षे साध्यसन्देहेन पक्षावृत्तितादृशोपाधौ साध्यव्यापकत्वनिश्चयासम्भवेऽपि सन्दिग्धोपाधित्वस्य दुर्वारत्वादनुकूलतर्कविरहेण सन्दिग्धोपाधेरपि दूषकत्वादिति भावः। नन्वेवमतीन्द्रियसंयोगादेरप्यव्याप्यवृत्तित्वं न स्यात् तद्वति तदभावस्य प्रत्यक्षासम्भवेनासिद्धेरनुमानस्याप्रयोजकत्वात्। एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामाश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे 'कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण', इति ग्रन्थेनाव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिरुद्भूता। तथा च तन्मते युक्तिर्भवतु मा वोभयथापि तदाश्रित्य पूर्वपक्षलक्षणं व्याचक्षाणो नापराध्यतीत्याशङ्क्य दूषणान्तरमाह इदमिदानीमिति। कालिकविशेषणतात्मकविलक्षणसम्बन्धेनेत्यर्थः। अभावादेरिहेतिप्रत्ययनियामको यो दैशिकविशेषणताविशेषस्तत्र तादृशसम्बन्धवैलक्षण्यस्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानम्। न चेदानीमितिप्रतीतौ सम्बन्धवैलक्षण्याभावेऽपि कालत्वेनाधिकरणावगाहनादिहेतिप्रत्ययात्तस्य वैलक्षण्यमुपपद्यत इति किं सम्बन्धवैलक्षण्येनेति वाच्यम्, सम्बन्धविशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वादिदानीं कालत्वाभाव इत्यादिप्रतीत्या काले कालत्वाभाववृत्तेः प्रामाणिकत्वेऽपि काले कालत्वं नास्तीतिप्रतीत्यनुदयान्नास्तीत्याकारकप्रतीतौ कालिकसम्बन्धव्यावर्त्तकरूपावच्छिन्नाया एव विशेषणताया नियामकत्वस्यावश्यकत्वाद्दैशिककालिकसम्बन्धसाधारणसम्बन्धतावच्छेदकस्याप्रामाणिकतया कालिकसम्बन्धतावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धेर्निष्प्रत्यूहत्वाच्च। सद्धेताविति। कालत्वादिसाध्यकघटादिहेतावित्यर्थः। काल इति। कालावच्छेदेनेत्यर्थः। अप्रसिद्धेरिति। वृत्तिमतः कालावच्छेदेन कालत्वादिसामानाधिकरण्यवत्त्वादवृत्तित्वनिष्ठतदभावस्य च कालानवच्छिन्नत्वादवच्छेद्याधिकरणासम्बन्धिनोऽनवच्छेदकत्वात्।

अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाल एव कालवृत्तित्वाभावप्रसिध्यति महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्वासत्त्वात् स्वस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठाभावानवच्छेदकत्वसम्भवाच्च। न च तादात्म्यसम्बन्धो नावच्छेदकतानियामको रूपे पर्वते न वह्निमत्संयुक्तत्वमितिप्रतीतिवत् स्वस्मिन् रूपे न वह्निमत्संयुक्तत्वमित्यादिप्रतीते सविवादत्वादिति वाच्यम्, तथा सति तादात्म्यसम्बन्धेन व्यभिचारिणि तदतिरिक्तसम्बन्धेन स्वासम्बद्धे हेतौ तेन सम्बन्धेन हेतुमत्त्वावच्छेदेन साध्यासामानाधिकरण्यवत्त्वविरहादतिव्याप्तेः स्फुटतया तद्दोषोपेक्षाया अनुचितत्वापातात्।

अत्र केचित् कालिकसम्बन्धेन गगनादेरपि वृत्तिमत्त्वमताभिप्रायकोऽयं ग्रन्थ, तथा च कालावच्छेदेन महाकालेऽपि कालिकसम्बन्धेन साध्यवद्वृत्तित्वसत्त्वात्तद्विरहिणोऽप्रसिद्धिर्न विरुध्यत इति वदन्ति।

वस्तुतस्तु स्वस्मिन्सामानाधिकरण्यतदभावयोर्वृत्तावच्छेदकत्वे स्वाधिकरणत्वमेव नियामकं न तु सम्बन्धितामात्रं स्वाधिकरणावच्छेदेनैव स्वस्मिन् तत्प्रतीतेरनुभवसिद्धत्वादत एव 'सम्बन्धान्तरेण सम्बद्धे' इत्युपेक्ष्य 'सम्बन्धान्तरेण वर्तमाने' इत्यभिहितम्। न च तादात्म्यादिवृत्त्यनियामकसम्बन्धेन व्यभिचारिण्यतिव्याप्त्यकथनान्न्यूनता दुर्वारैवेति वाच्यम्, तादृशसम्बन्धेन साध्यवद्वृत्तित्वस्य हेत्वधिकरणत्वस्य चाप्रसिद्ध्यातिव्याप्त्यसम्भवात्। न च तेन सम्बन्धेन सद्धेतौ लक्षणसङ्गमनाय वृत्तेरधिकरणतायाश्च स्थाने सम्बन्धप्रतियोगित्वानुयोगित्वयोरेव निवेशनीयत्वादतिव्याप्तेरावश्यकतेति वाच्यम्, प्राचा तेन सम्बन्धेन व्याप्त्यनभ्युपगमसम्भवेन वृत्त्यादेरपि निवेशसम्भव इत्यभिप्रायेणैवातिव्याप्त्यनुद्भावनात्। एतेन हेत्वधिकरणखण्डकालविशेषावच्छेदेन कालिकसम्बन्धेन तद्वृत्तौ तद्विषयकज्ञान एव साध्यासामानाधिकरण्यप्रसिद्धि सम्भवति। न चैवमपि कालत्ववान् सर्वस्मादित्यादौ खण्डकालस्य हेत्वनधिकरणतया हेत्वधिकरणावच्छिन्नसाध्यासामानाधिकरण्याप्रसिद्धिर्दुर्वारैवेति वाच्यम्, हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणतापर्यन्तानिवेशे वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नस्य यत्र हेतुत्वमभिहितं तत्र तादृशधर्मस्यैव तन्मते स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन हेतुत्वस्यानुमततयोक्तस्थले सर्वस्यैव तादृशसम्बन्धेन हेतुतया तादृशसम्बन्धेनावृत्तौ कालिकसम्बन्धेन कालवृत्तौ गगनत्वादावेव तादृशसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरिति निरस्तम्। तादृशकाले तज्ज्ञानस्य विषयतासम्बन्धसत्त्वेऽपि तादृशसम्बन्धस्य वृत्तिनियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीनताविरहे च तस्य तज्ज्ञानानधिकरणत्वात्तज्ज्ञानेऽभाववृत्तौ तत्कालस्यानवच्छेदकत्वान्महाकालानुयोगिकविशेषणताविशेषेण घटादिहेतुकस्थलाभिप्रायकोऽथ ग्रन्थस्तादृशसम्बन्धेन हेतुमत्ताया खण्डकालेऽभावाच्चोक्तदिशा प्रसिद्धिरित्यपि केचित्।

अत्र स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतादृशसम्बन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वं विवक्षणीयमिति नोक्ताव्याप्त्यवकाश, स्वावयवपरमाण्ववच्छेदेन घटादौ वर्तमाने कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तत्र लक्षणसमन्वयसम्भवात्, केवलान्वयिसाध्यके मेयत्वादौ सर्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वसत्त्वात् स्वनिष्ठतदभावाप्रसिद्ध्याऽव्याप्तिर्न क्षतिमावहति मूलकृतैव तत्राव्याप्तेर्वक्ष्यमाणत्वात्। यदि चैवमात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ हेतोरात्मान्यसम्बन्धवस्त्ववच्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्त्वादात्मनश्च केनापि सम्बन्धेन हेतुमत्त्वाभावात्तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववृत्त्यसम्भवाद्धेतुनिष्ठतादृशाभावप्रसिद्ध्याव्याप्तिरिति विभाव्यते, तदा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्वस्मिन् वर्तते योऽभावस्तत्प्रतियोगितानवच्छेदकतादृशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वकत्वं व्याप्तिरित्येव विवक्षणीयं कालत्ववान् घटादित्यादौ वर्तमान कालसमवेतत्वाद्यभाव एव प्रसिद्धस्तत्प्रतियोगितानवच्छेदकञ्च कालिकसम्बन्धावच्छिन्नकालवृत्तित्वत्वादिकमिति लक्षणसमन्वय। हेतुतावच्छेदकसम्बन्धेन यद्वृत्तिमत्तन्निष्ठतत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतत्सम्बन्धावच्छिन्नतद्वस्तुमद्वृत्तहेतूभयाधिकरणतावत्सामान्यकत्वं वा वक्तव्यम्, आत्मभिन्नं ज्ञानवदन्यत्वादित्यादावात्माद्यवच्छेदेन घटत्वाभावादिनिष्ठस्यात्मान्यवृत्तित्वाभावस्यानवच्छेदकं घटत्वाभावज्ञानवदन्यत्वोभयाधिकरणसामान्यमिति लक्षणसमन्वय। उभयाधिकरणत्वनिवेशाद्वह्निमान् धूमादित्यादौ धूमादिसंयोगिन कपालादेर्घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेऽपि न क्षति, कपालादे संयोगेन घटानधिकरणतयाक्तोभयाधिकरणतावत्सामान्यानन्तर्गतत्वात्।

अथवा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छिन्नस्ववृत्तिकान्यहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावकत्वविवक्षणान्न कश्चिद्दोष, सर्वत्र सद्धेतावन्ततोऽवृत्तौ प्रसिद्धे साध्यसामानाधिकरण्याभाव एव तादृशस्ववृत्तिकान्यत्वसत्त्वेन लक्षणसमन्वयात्। वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावेऽयोगोलकादेरिव तद्वृत्तित्वस्याप्यवच्छेदकत्वात् स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्त्यनवच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसामानाधिकरण्याभावकत्वं वा विवक्षणीयमित्याद्यपरिष्कारस्य पन्थानो द्रष्टव्या॥

इति महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्तिविरचिता
सिद्धव्याप्तिलक्षणविवृति समाप्ता॥

अनुमानगादाधर्याम्

व्यधिकरणधर्मावच्छिन्नाभावप्रकरणम्

(चि०) अथेदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात् । न चैवं घट एव व्यभिचारः, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वं हि व्यभिचारः, न च वाच्यत्वाभावस्तादृशो घटे इतिचेत्तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिस्तथा चाप्रसिद्धिः । प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकस्तद्विशिष्टज्ञानस्याभावधीहेतुत्वात् ॥

(दी०) समवायितयेति । वाच्यत्वं यथा न समवायि तथाग्रे वक्ष्यते । घटादिसमवायितयेत्यर्थ इत्यप्याहुः । प्रमेयसाध्यके च भावत्वेनाभावानामभावत्वेन भावानां वह्नित्वेन निर्वह्नौ अवृत्तिमात्रवृत्तिगगनत्वादिना निरुद्धघटत्वपटत्वाभ्यां च सर्वत्र प्रमेयमात्रस्याभावः सुलभः ॥

(गा०) 'अथ समवायितयेति'मूलम्, अथ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमे सर्वत्र तदभाववति हेतोर्वृत्तेरसम्भवे साध्याभाववद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसङ्गमने सर्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सौन्दडमतमवलम्ब्य लक्षणकर्तुरीदृशाशङ्का न सङ्गच्छत इति चेन्नोपाध्यायानुयायिन केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धनस्य दोषस्योद्भावितत्वात्साध्याभावस्य कथञ्चित्प्रसिद्धावेव लक्षणस्य निर्दोषतेत्यभिमानेनेयमाशङ्का तादृशाभिमानमेव निराकरिष्यत्यग्रे 'तर्हि' इत्यादिग्रन्थेन । व्यधिकरणधर्मावच्छिन्नाभावापगमे यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते तथा व्याप्तिलक्षणेऽपि तादृशसाध्याभाव एव निवेश्योऽन्यथाऽसम्भवस्यातिव्याप्तेर्वा प्रसक्तिर्व्याप्तेरव्यभिचाररूपतानुपपत्तिश्चेति पुनरप्रसिद्धिनिबन्धनाव्याप्ति । केवलान्वयिस्थल एवेति तदर्थं । न चेवमपि तत्तद्वह्नित्वावच्छिन्नाभावव्यावर्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेण साध्याभावस्य निवेशानी-

यतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले समवायित्वावच्छिन्नतदभावस्यातादृशत्वात्तादृशाभावप्रसिद्धिरनुपयोगिनीति कथमियमाशङ्का। साध्यप्रतियोगिकाभावमात्रनिवेशाभिमानस्याशङ्काबीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य च तादृशाभावस्य प्रसिद्धिसम्भवेन सौन्दडमतावलम्बनस्य निर्बीजत्वापातादिति वाच्यम्, महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकापर्याप्तस्वसमानाधिकरणधर्मनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगिताकाभाव एव निवेश्य इत्यभिमानेनाशङ्कासङ्गतेः। प्रमेयत्वादिना प्रमेयमानं यत्र साध्यतावच्छेदकं तत्र प्रमेयत्वादिविशिष्टप्रमेयापर्याप्तं तदविशेषितघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धं स्वसमानाधिकरणवृत्तितादृशावच्छेदकतानिरूपकप्रतियोगिताभिन्नश्च व्यधिकरणधर्मावच्छिन्नप्रतियोगितामात्रमेव। यत्र यादृशं साध्यतावच्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्वसमानाधिकरणधर्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावनिवेशाभिप्रायकोऽयं ग्रन्थ इत्यप्याहुः।

न चैवं प्रमेयत्वावच्छिन्नसाध्यकस्थलेऽपि व्यधिकरणधर्मावच्छिन्नाभावमात्रस्यैव लक्षणघटकतासम्भवाद्दीधितिकृतां तत्र गगनत्वघटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयाभावपर्यन्तानुसरणप्रयासो व्यर्थ इति वाच्यम्, महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्रतियोगिताकः साध्यतावच्छेदकापर्याप्तसाध्यनिष्ठधर्मवृत्त्यवच्छेदकताकान्यप्रतियोगिताको वाऽभावो निवेश्यस्तदभिप्रायेणैव तैस्तथाविधाभावानुसरणात्। न च घटत्वपटत्वोभयावच्छिन्नाभावप्रतियोगितावच्छेदकता साध्यवृत्तिधर्मनिष्ठैव घटत्वपटत्वयोः प्रत्येकं साध्यनिष्ठत्वादिति कथमसौ लक्षणघटक इति वाच्यम्, साध्यवृत्तिधर्मनिष्ठेत्यनेन यत्पर्य्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यं तस्य विवक्षिततया घटत्वपटत्वोभयपर्याप्तावच्छेदकताया अन्यत्वप्रतियोगिकोटावनन्तर्भावात्।

वस्तुतस्तु वृत्तिमद्वृत्तयो यावन्तः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावास्तद्वत्त्वमेव साध्याभाववदवृत्तित्वमित्यस्यार्थ', इत्यभिप्रायकतया 'अथ' इत्यादिग्रन्थः सार्वभौमैर्व्याख्यातः, दीधितिकृतामपि तादृशग्रन्थस्य तदभिप्रायकत्वमेवानुमतं कूटघटितलक्षणस्य स्वयमग्रे दूषणीयत्वेऽप्यापातत' सम्भवदुक्तिकतयैव तस्याशङ्कितुरभिप्रायविषयत्वौचित्यात्। व्यधिकरणधर्मावच्छिन्नाभाववादिमते निर्दोषस्यापि लक्षणस्य सम्भवेन तदुपेक्ष्य सदोषं कूटघटितलक्षणमवलम्ब्य 'प्रतियोग्यवृत्तिश्च' इत्यादिग्रन्थावतारणमनुचितमित्यभिप्रेत्यैव चाग्रे तल्लक्षणमाक्षिप्यमिति न सन्दर्भविरोधः। 'यत्समानाधिकरणा.' इत्यादिलक्षणाभिप्रायकता चात्र न युज्यते तादृशव्याख्यातेः साध्याभाववदवृत्तित्वरूपस्याप्रसक्तेर्मूलोक्तलक्षणपरिष्कारासम्भवात्। व्यभिचारशरीरे च साध्यतावच्छेदकावच्छिन्न-

साध्याभावनिवेशावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेरव्यभिचाररूपता न सम्भवतीत्यभिधानेनाव्यभिचारपदार्थरूपसाध्याभाववदवृत्तित्वाभावस्य व्याप्तित्वे निराकृते च साध्याभाववदवृत्तित्वस्य व्याप्तित्वानभ्युपगमेऽपि न क्षतिरित्याशयेन 'स्वसमानाधिकरणा' इत्यादिनिर्दोषलक्षणमवलम्ब्यैव स्वयं 'प्रतियोग्यवृत्तीत्यादि ग्रन्थस्यावतारणीयत्वात्। न च साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवदवृत्तित्वस्यापि व्यभिचारपदार्थत्वसम्भवादुक्तयुक्तेरव्यभिचाररूपत्वमक्षतमेवेति वाच्यम्, तादृशाभावकूटसामानाधिकरण्यस्य व्यभिचारपदार्थत्वे 'न चेवं घट एव' इत्यादिदर्शिताया ज्ञेयत्वादिहेतो वाच्यत्वव्यभिचारितापत्तेर्दुर्वारत्वाद्वाच्यत्वादे समानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धेर्व्यधिकरणधर्मावच्छिन्नाभावकूटवति च हेतोर्वृत्तेरिति सर्वमनाकुलम्। एवञ्च कूटघटितलक्षणाभिप्रायेणैव प्रमेयसाध्यकस्थले उक्ताभावानुधावनं ग्रन्थकृता सफलं घटत्वाद्यवच्छिन्नपटाद्यभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहादितिध्येयम्।

ननु वाच्यत्वं पदशक्तिः, सा च तत्तत्पदबोद्धव्यत्वप्रकारिका भगवदिच्छैव न तु पदार्थान्तरमपसिद्धान्तत्वात्। तथा च समवायित्वं समवायप्रतियोगित्वरूपं तदनुयोगित्वरूपं वा भवतु उभयथैव वाच्यत्ववृत्तीति तेन रूपेण तदभावस्य कथं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम्। न च भगवदिच्छाया वाच्यत्वपदार्थत्वे पटादेर्घटादिपदवाच्यतापत्तिर्घटादाविव पटादावपि घटादिपदबोद्धव्यत्वप्रकारिकाया भगवदिच्छाया विषयतासम्बन्धेन सत्त्वात्तदिच्छाया एकत्वादिति वाच्यम्, यद्धर्म्यंशे यस्य प्रकारता तस्यैव धर्मिणो विशेष्यतासम्बन्धेन तद्धर्मप्रकारकत्वविशिष्टवत्त्वोपगमात् पटादेर्घटादिपदबोद्धव्यतया भगवदिच्छयाऽनवगाहनात्तत्र विशेष्यतासम्बन्धेन तद्बोद्धव्यत्वप्रकारकत्वविशिष्टभगवदिच्छाविरहेण तदवाच्यत्वोपपत्ते। न चैवं विशिष्टेच्छाया वाच्यत्वरूपत्वे विशेषणांशे समवायित्वाभावात्तेन रूपेण विशिष्टाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम् व्याहतमेवेति वाच्यम्, यतो विशिष्टाभावप्रतियोगिता न विशेषणान्तर्भावेन पर्याप्ता अपि तु विशेष्यांशमात्रे, अवच्छिद्यते पुनरियं विशेषणेनेति प्रतियोगिताया अव्यासज्यवृत्तित्वात्। तथा च विशेष्यवृत्ते समवायित्वस्य कथं प्रतियोगिताव्यधिकरणत्वमिति। न च प्रतियोगिताया व्यासज्यवृत्तित्वानुपगमे सर्वेन घटत्वेन घटपटोभयं नास्तीतिप्रतीतिः कथमुपपद्यता घटादिमति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्त्वेन तद्विषयाभावस्य सत्त्वासम्भवादित्यभावविशेषीयप्रतियोगित्वमवश्यमेव व्यासज्यवृत्त्युपेयं तथा सति च तत्र प्रतियोगितापर्याप्त्यधिकरणस्योभयत्वावच्छिन्नस्य प्रतियोगितावच्छेदकघटत्वादिविशिष्टत्वासम्भवाद्यद्धर्मावच्छिन्ने प्रतियोगिताया पर्याप्तिः प्रतियोगितावच्छेदकविशिष्टस्य तदवच्छिन्नस्यैव चाभावविरोधितया तादृशाभावस्य। नसार्वत्रिकत्वानुप

पत्तिरिति वाच्यम्, प्रतियोगिताया अव्यासज्यवृत्तित्वेऽपि तन्नैकधर्मावच्छिन्नापर्याप्तिरूपविरोधशालिनोर्घटत्वघटपटोभयत्वयोः प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वोपगमात्तादृशाभावस्य विरुद्धघटत्वपटत्वाद्युभयावच्छिन्नाभाववत्केवलान्वयित्वोपपत्तेः।

यद्यपि घटपटौ न स्त इत्यादिप्रतीतिविषयत्समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्तर्भावेण पर्याप्तम्, तथापि तत्र द्वित्वधर्मितावच्छेदकतापन्नस्यैव घटत्वादेरवच्छेदकता प्रतीयते अत्र च स्वातन्त्र्येणापीति भेदः। आस्तां वोभयाभावप्रतियोगिताया गत्यन्तराभावाद्व्यासज्यवृत्तित्वं तथापि विशिष्टाभावप्रतियोगितायास्तथात्वमप्रामाणिकमेव दण्डिपुरुषादिमति पुरुषत्वेन दण्डविशिष्टो नास्तीत्यादिप्रतीतेरसिद्धेरित्यत आह दीधितौ वाच्यत्व इत्येति। तथाऽग्रे वक्ष्यत इति। अयमाशयः—वाच्यत्वं शक्तिविषयत्वं न तु शक्तिर्धातुनैव शक्तिप्रतिपादनात् प्रत्ययस्य निरर्थकतापत्तेर्विषयत्वञ्च पदार्थान्तरमिति प्राचीननैयायिकैकदेशिसिद्धान्तः, तस्य च समवायो न सम्बन्धोऽपि तु स्वरूपमेवेति समवायितया वाच्यत्वपदार्थाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेत्येकदेशिमतानुयायितया मणिकारलिखनसङ्गतिरिति। धर्मादसमवायितयेति। तथा च वाच्यत्वपदस्य भगवदिच्छापरत्वेऽपि नासङ्गतिरिति भावः। यथाश्रुतपरतयैवोपपत्तेः समवायिपदस्य विशेषपरतया व्याख्यानमनुचितमित्याहुरित्यनेनास्वरसः सूचितः।

ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धिसम्भवेऽपि प्रमेयत्वादिना प्रमेयसामान्यसाध्यकस्थले साध्याभावाप्रसिद्धिर्दुर्वारैवेति प्रमेयसामान्यावृत्तिधर्मस्याप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नप्रतियोगितावस्यापि तस्यासम्भवादित्यत आह प्रमेयमात्रके चेति। नाव नेन। अभावानां भावानामित्युभयत्रैव 'अभावे' इत्यग्रिमस्य सम्बन्धः, अभावत्वभावत्वाभ्यां भावाभावयोरभावौ समनियततयाऽभिन्नाविति तत्प्रतियोगितात्वेन प्रमेयत्वादिसमनैयत्यमित्येतादृशाभावोऽपि कूटघटनया परिष्करणीयसाध्याभाववदवृत्तित्वरूपप्रथमलक्षणघटको भविष्यतीत्यभिप्रायः। न च यद्भावीयप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके वह्न्यादिसाध्यके वा तादृशाभावाप्रसिद्धिर्निखिलव्यधिकरणधर्मावच्छिन्नाभावानां समनियतत्वेनाभिन्नतया घटादेरपि तथाविधवाच्यत्वाभावप्रतियोगित्वात् विशिष्टविशिष्टस्याभावादेरपि वह्न्याद्यभावप्रतियोगित्वादिति तत्तत्प्रतियोगितात्वेन समनैयत्यं विवक्षणीयमिति कथमुक्ताभावस्य लक्षणघटकत्वमिति वाच्यम्, समनैयत्यशरीरे व्यापकतायास्तदभावप्रतियोगितात्वावच्छिन्नाया व्याप्यतायाश्च विशेषरूपावच्छिन्नाया निवेशनेनानुपपत्त्यभावात्। ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपा व्यापकता चेत्समनैयत्यशरीरे निवेश्यते तदा व्यधिकरणधर्मावच्छिन्नयोर्भावाभाववृत्तिप्रतियोगित्वयोर्द्वयोरेव प्रत्येकं प्रमेयनिष्ठान्योन्या-

भावप्रतियोगितावच्छेदकतया नोक्ताभावस्य साध्यतावच्छेदकसमनियत प्रतियोगिताकत्वमित्यतोऽभावान्तरमाह वह्नित्वेनेति। 'प्रमेयमात्रस्याभाव' इत्यग्रेतनेनान्वय। वह्नित्वेन प्रमेय नास्तीतिप्रतीत्या प्रमेयसामान्य एव वह्नित्वावच्छिन्नप्रतियोगित्वावगाहनात्प्रमेयत्वव्यापिकैव तादृशाभावीयवह्नित्वावच्छिन्नप्रतियोगितेति भाव।

यदि च तत्र वह्निर्नास्तीतिप्रतीतिसिद्धवह्निमात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासत इत्युपेयते प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमे तु वह्निर्नास्तीत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगिताया वह्नित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसम्भवात् समानाधिकरणधर्मावच्छिन्नवह्नित्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वह्निभिन्नत्वादिना वह्न्याद्यभावीयवह्निमात्रवृत्तिप्रतियोगितामादाय वह्निमान् प्रमेयत्वादित्यादावतिव्याप्त्यापत्तेरित्युच्यते, तदा तादृशाभावस्य नोक्तरूपतेत्याशङ्कयाभावान्तरमनुसरति अवृत्तिमात्रेति। गगन नास्तीत्यत्र गगनत्वसामानाधिकरण्येन या गगनत्वावच्छिन्नप्रतियोगिता प्रतीयते सैव गगनत्वेन गगनभिन्नं नास्तीत्यादौ गगनभिन्नत्वादिसामानाधिकरण्येन प्रतीयतेऽवच्छेदकैक्येऽसति बाधके प्रतियोगिताया अप्यैक्यस्वीकाराद्गगनभिन्ननिष्ठप्रतियोगिताया गगनावृत्तित्वेन गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनोऽवृत्तित्वेन गगनतया गगनभिन्नाभावस्य केवलान्वयित्वोपपत्ते, वह्नित्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगितायाश्च वह्निनिष्ठतादृशप्रतियोगित्वाभेदे वह्न्यादिमति वह्नित्वादिना घटाद्यभावसत्त्वानुपपत्त्योक्तरीत्या तत्रैक्यप्रतियोगितापर्यसम्भव। एवञ्च गगनत्वावच्छिन्नैव प्रमेयत्वसमनियत प्रतियोगिता प्रसिध्यतीति भाव। उक्तविशेषलाभायैवावृत्तिमात्रवृत्तित्वकीर्तनम्। नन्वेवमपि यत्र विषयितासम्बन्धेन प्रमेयसामान्य साध्यमीश्वरज्ञानत्वादिक हेतुस्तत्र सत्तावान् जातेरित्यादौ साध्याभावकूटयति हेतुतावच्छेदकसम्बन्धेन वृत्त्यप्रसिद्ध्याऽव्याप्तेर्वारणायोपादेयसाधनसामानाधिकरण्यविशेषणाक्रान्तसाध्यतावच्छेदकसमनियतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धिर्गगनादेरपि विषयितासम्बन्धेनेश्वरज्ञानादिसम्बद्धत्वात्तादृशसम्बन्धेन गगनत्वादिना प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यासम्भवादित्यतोऽभावान्तरमाह विरुद्धेति। येन सम्बन्धेन घटत्वपटत्वयोर्विरोधस्तत्सम्बन्धावच्छिन्नतदुभयनिष्ठप्रतियोगितावच्छेदकताकप्रमेयसामान्याभाव इत्यर्थ। प्रतियोगितावच्छेदकतावच्छेदकोभयत्वविशिष्टघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिनोऽप्रसिद्ध्या विरोधिविरहेणोक्ताभावस्य केवलान्वयित्वमवधेयम्।

इदमुपलक्षण व्यधिकरणधर्मावच्छिन्नाभाववादिना प्रतियोगितावच्छेदकतावच्छेदकरूपेणेव तादृशसम्बन्धेनाप्यवच्छेदकस्य वृत्तिमत्ताया अवच्छेदकतायामतन्त्रत्वात्समवायादिसम्बन्धेन गगनाद्यवच्छिन्नप्रमेयसामान्याभाव

स्यापि सौलभ्यं बोध्यम् । अत्यन्ताभावस्येवान्योन्याभावस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्योपगमात्प्रमेयसामान्यस्य यत्र तादात्म्येन साध्यता तत्र घटत्वपटत्वाभ्यां समवायेन गगनादिना वा प्रमेयसामान्यभेदो लक्षणघटकः प्रतियोगितावच्छेदकावृत्तिसमवायित्वाद्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा तथेत्यवधेयम् ॥

ननु व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्यभिचाराभावरूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य लक्षणघटकतयाऽप्रसिद्धिनिबन्धनाव्याप्तेर्दुर्वारतयैव वादिनो निवृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावखण्डनपरग्रन्थानुत्थितिरित्यतस्तादृशग्रन्थमवतारयति नन्वित्यादिना ॥

(दी०) ननु पारिभाषिकमेवाव्यभिचरितत्वम् , तथाहि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम् । सर्वत्र वाच्यत्वाद्यभावस्य तथात्वाद्यावच्चोपादानम् ॥ अत एव भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोऽन्यत्वाद्यभावस्यातथात्वान्नातिप्रसङ्गः । साधनसमानाधिकरणस्य गोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि ॥

(गा०) पारिभाषिकमिति । तान्त्रिकसङ्केतरूपपरिभाषया व्याप्तिप्रतिपादकं न तु योगेनेत्यर्थः । 'अव्यभिचरितत्वम्' अव्यभिचरितत्वपदम् । अथवा पारिभाषिकमव्यभिचरितत्वं परिभाषयाऽव्यभिचरितत्वपदप्रतिपाद्यम् , व्याप्यत्वमिति शेषः, न तु योगेन तत्पदलभ्यमित्यर्थः । तथा च व्यभिचारघटकस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य व्याप्तिघटकत्वविरहेऽपि न न क्षतिरिति भावः । यदिति । यत्पदं यद्धर्मावच्छिन्नपरम् , अग्रे तत्पदं तद्धर्मावच्छिन्नपरम् , स च धर्मो हेतुतावच्छेदकीभूतधूमत्वादिः, सद्धेतुस्थले हेतुतावच्छेदकावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणाक्रान्तो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको घटत्वादिना वह्न्याद्यभावादिरेव तस्य च प्रतियोगिसामानाधिकरण्यमाद्यकमिति लक्षणसमन्वयः । व्यभिचारिणि व्यभिचारनिरूपकाधिकरणीभूते हेत्वधिकरणे साध्यतावच्छेदकेत्यादिविशेषणाक्रान्तः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावादिरपि तस्य च प्रतियोगिसामानाधिकरण्याभावात्तादृशाभावस्य प्रतियोग्यधिकरणे कालिकसम्बन्धेन वृत्तावपि विवक्षणीयस्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः । अयमात्मा ज्ञानादित्यादौ समाना-

धिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावादिकमादायाव्याप्तेर्वारणाय हेतुतावच्छेदकविशिष्टसामानाधिकरण्यमभावविशेषणम्, अभाववृत्तौ सम्बन्धभेदानिवेशेन वह्निमान् धूमादित्यादौ वह्नित्वादिना वह्न्यभावस्य प्रतियोगिमति पर्वतादौ कालिकसम्बन्धेन वृत्तेर्लक्षणसम्भवान्न तत्राव्याप्तिवारणं तत्फलमिति ध्येयम्।

अयमात्मा पृथिव्याद्यष्टद्रव्यातिरिक्तत्वे सति द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नात्मत्वाद्यभावाना प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिरतो हेतुसामानाधिकरण्यघटकहेतौ हेतुतावच्छेदकवैशिष्ट्यनिवेश। यद्यप्ययमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्नाभावमादाया व्याप्तिरभावे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यविशेषणेनापि वारयितुं शक्यते धूमवान् वह्नेरित्यादौ धूमादिसमानाधिकरणस्य तादृशाभावस्य प्रतियोगिसामानाधिकरण्यावश्यकत्वेऽपि स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्यैव विवक्षणीयतयाऽयोगोलकान्तर्भावेन तादृशाभावस्यातथात्वाच्चाव्याप्तिव्याप्ति, स्वविशिष्टहेत्वधिकरणेष्वद्य यत्पदेनैव हेतोरुपादेयतया तत्त्वमित्यन तत्पदेन तस्यैव परामर्शाद्व्याप्तेर्हेतु नेष्टत्वोपपत्तिरिति, तथापि कपिसंयोगाभाववान् जातित्वादित्यादौ साध्यसमानाधिकरणस्य कपिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या सत्तावानात्मत्वादित्यादौ सत्ताधिकरणकाले कालिकसम्बन्धेन विद्यमानस्य सत्ताभावस्य तदप्रसिद्ध्याऽव्याप्तिर्दुर्वारैवेति हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपात्तम्।

यत्तु अयमात्मा ज्ञानादित्यादावात्मत्वत्वादिनाऽऽत्मत्वादेरभावस्य लक्षणघटकत्वेऽपि नाव्याप्तिस्तस्य प्रतियोग्यधिकरणीभूतात्मादावेकज्ञानविषयत्वत्वाश्रयाश्रयत्वादिरूपपरम्परासम्बन्धेन वर्तमानतया प्रतियोगिसमानाधिकरणत्वादिति सामानाधिकरण्यान्तविशेषणमनर्थकमिति, तन्न, एकज्ञान विषयत्वादिना विशिष्टबुद्धौ प्रमाणाभावेन तेषां संसर्गत्वाभावात्। न चैवम् 'यदभावो व्यभिचारविरोधी' इत्युपाधिलक्षणे 'इहोपाधिर्नेहोपाधि' इतिप्रतीतिव्यवहारानुरोधेना'याप्यत्वस्य सम्बन्धतायाः ग्रन्थकृतैव स्वीकृतत्वात्तेन सम्बन्धेनैवात्मवृत्तेरात्मत्वाभावस्य प्रतियोगिसामानाधिकरण्यमक्षतमेवेति वाच्यम्, अव्याप्यतायाः सम्बन्धतायाः विवादेन यदभावपदस्य यदव्याप्यत्वाभावपरतामभ्युपगम्यापि ग्रन्थकृता तादृशलक्षणव्याख्यानात्तरसम्बन्धतायाः अप्रामाणिकत्वाभिप्रायेणेवान 'यत्समानाधिकरणा' इत्युपादानात्। यावत्पदासत्त्वे साध्यतावच्छेदकेत्यादिविशेषणस्य व्यावृत्तिर्न सङ्गच्छते यत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवादतश्चरमोक्तस्यापि तत्पदस्य व्यावृत्ति प्रथमतो दर्शयति सर्वत्रेति। 'तथात्वात्' प्रतियोगिसामानाधिकरण्यात्, तथा च यावत्पदादाने व्यभिचारिमान एवातिव्याप्तिरिति भाव। यद्यपि व्यभिचारिस्थल एव दोषस्य कथनीयतया सर्वत्र तादृशाभावस्य तथात्वकथनम्

सङ्गतं तथापि यावत्पदानुपादानेऽतिव्याप्तिरेव नान्यातिरित्येतत्सूचनाय 'सर्वत्र' इत्युक्तम्। अथवा 'सर्वत्र' सर्वाधिकरणावच्छेदेन, तथा च विवक्षणीयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यस्य सत्त्वं सूचितम्। ननु यावत्पदानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैवाभावो विशेषणीयस्तद्व्याप्यत्वञ्च स्वव्यापकतत्कत्वमतो नानवस्था, वह्निमान् धूमादित्यादौ तत्तद्वह्नयाद्यभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां यथाविवक्षणीयसामानाधिकरण्यविरहेऽपि घटत्वादिना वह्नयाद्यभावमादायेव लक्षणसङ्गतिः। इत्थञ्च धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादाय नातिव्याप्तिसम्भवस्तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघटकताविरहात्, एवं सति हेतुसमानाधिकरणत्वविशेषणमनर्थकमिति चेत् 'तदपि तर्हि त्यज्यताम्' इत्याशङ्कापरिहाराय तथाविधाभावनिवेशेऽपि यत्रातिव्याप्तिस्तत्र यावत्पदस्य व्यावृत्तिमाह अत एवेति। 'अत एव' यावत्पदोपादानादेव. 'द्वित्वावच्छिन्नाभावस्य' भूतत्वमूर्तत्वोभयत्वावच्छिन्नाभावस्य, 'प्रतियोगिसामानाधिकरण्येऽपि' मनसि हेत्वधिकरणेमूर्तत्वरूपप्रतियोगिसामानाधिकरण्येऽपि, तथा च यावत्पदानुपादाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकतादृशोभयाभावस्यैव प्रतियोगिसमानाधिकरणतयातिव्याप्तिः स्यादिति भावः। यावत्पदसत्त्वे यादृशाभावमादायातिव्याप्तेर्वारणं तादृशाभावं दर्शयति भूतत्वमनोऽन्यत्वाद्यभावस्येति। भूतत्वाभावस्य मनोऽन्यत्वाभावस्य चेत्यर्थः, 'असमानाधिकरणत्वात्' प्रतियोग्यसमानाधिकरणत्वात्, यावत्पदे दत्ते साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान् धूमादित्यादौ तादृशयावदन्तर्गतमहानसीयवह्न्याद्यभावमादायैवाव्याप्तिः स्यादिति यथोक्तविशेषणस्यैवोपादेयतया तादृशाभावयोरपि लक्षणघटकत्वादिति भावः। भूतत्वस्य वहिरिन्द्रियग्राह्यविशेषगुणात्मकतया प्रतियोगिस्वरूपाणां तन्निष्ठप्रतियोगितानाञ्चालनीन्यायेनोत्पत्तिकालावच्छेदेन वा साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया भूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमित्याशयेनाखण्डव्याप्यवृत्तिमनोऽन्यत्वाभावानुधावनम्। उक्तरीत्या 'अत एव' इत्यादिग्रन्थावतारात्प्रथमतो वाच्यत्वाभावमादाय सर्वत्रैव व्यभिचारिण्यतिव्याप्तेर्दर्शितत्वात्साध्याभावमादाय व्यभिचारिविशेषेऽतिव्याप्तिप्रदर्शनं सन्दर्भविरुद्धमित्याशङ्कानवकाशः।

केचित्तु यावत्पदानुपादाने वाच्यत्वादेरुदासीनपदार्थस्याभावमादाय व्यभिचारिसामान्येऽतिव्याप्तिर्विश्राम्यतु साध्याभावमादायापि क्वचिदतिव्याप्तिः स्यात् सा च यावत्पदोपादानान्न भवतीत्यभिप्रायकतया न सन्दर्भविरोध इत्याहुः।

परे तु ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकयावदभावनिवेशे
नैवोपपत्ते साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावद
भावनिवेशनमफलं तादृशप्रतियोगिताकत्वविशेषण यावर्तनीयस्य तत्तद्वह्न्य
भावस्य वह्नित्वव्यापकप्रतियोगिताकत्वाभावेनोक्तविशेषणेनापि व्यावर्तन
सम्भवादत आह अत एवेति । यत एव साध्यतावच्छेदकावच्छिन्नव्यापकता
वच्छेदकप्रतियोगियोगिताकाभावे यावत्त्वमुपात्तं न तु साध्यतावच्छेदकव्या
पकप्रतियोगिताकाभावे अत एवेत्यर्थ । भूतत्वेति । साध्यतावच्छेदकव्यापक
प्रतियोगिताकाभावनिवेशे भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ भूतत्वा
भावमनोऽन्यत्वाभावप्रतियोगितयो उभयत्वाव्यापकत्वेनोभयत्वावच्छिन्न
प्रतियोगिताकाभावादेरेव लक्षणघटकतयाऽतिव्याप्ति स्यात्, यथोक्तवि
शेषणाक्रान्ताभावनिवेशे च भूतत्वमनोऽन्यत्वाभावानामपि लक्षणघटक
तया नातिव्याप्तिरिति भाव । न च साध्यतावच्छेदकव्यापकप्रति
योगिताकाभावनिवेशेऽपि हेतुसमानाधिकरणस्य मनोभिन्नभेदस्य प्रति
योगितावच्छेदकतादात्म्यसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहान्ना
तिव्याप्ति साध्यतावच्छेदकव्यापकताया लक्षणेऽनिवेशे तादृशव्यापक
ताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशासम्भवात्प्रतियोगिता
वच्छेदकसम्बन्धेनैव तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति वाच्यम्,
प्रतियोगितावच्छेदकसम्बन्धेन तत्सामानाधिकरण्यनिवेशेऽपि वह्निमान्
धूमादित्यादौ हेतुसमानाधिकरणस्य वह्नित्वव्यापकप्रतियोगिताकस्य पर्वत
भिन्नभेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यं
पर्वतान्तर्भावेण नास्तीत्यव्याप्त्यापत्त्या तेन सम्बन्धेन प्रतियोगिसामाना
धिकरण्यस्य निवेशासम्भवात् साध्यतावच्छेदकसम्बन्धेनैव प्रतियोगि
सामानाधिकरण्यमगत्या वाच्यम्, तथा च मनोभिन्नभेदस्य तेन सम्बन्धेन
मूर्तत्वादिरूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यतिव्याप्ते साध्यताव
च्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे वक्ष्यमाणस्थलान्तरेऽ
प्यतिव्याप्ति स्यादिति तु नास्माकं दोष इत्यभिप्राय इति व्याचक्रु ।

तत्तु समीचीनतया न प्रतिभाति साध्यतावच्छेदकेत्यादिविशेषणस्यात्र
त्ये पश्चाद्वक्ष्यमाणतया तदुत्तरमेव साध्यतावच्छेदकावच्छिन्नेत्यादिविशेष
णस्थले साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वं विशेषणं किं नोपात्तमि
त्याकाङ्क्षोदयादादावेव तादृशविशेषणपरित्यागबीजकथनस्यासङ्गतत्वादि
ति । गोत्वाद्यभावस्येति । प्रतियोग्यसमानाधिकरणत्वादित्यर्थकेनाव्याप्यत्वादित्य
नेनान्वय । तथा च साध्यतावच्छेदकेत्याद्यनुपादानेऽसम्भव इति भाव ।
यद्यपि गोत्वाभावादेरपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामाना
धिकरण्यं पर्वतादावप्यस्ति तथापि व्यापकताया लक्षणाघटकत्वे साध्यतावच्छे
दकसम्बन्धेनैव प्रतियोगिसामानाधिकरण्यं धूमवान् वह्नेरित्यादौ धूमाभावादे·
पूर्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायाति

व्याप्तेर्वारणायावश्यं विवक्षणीयं तथा चायमसम्भव इति भावः। साध्यप्रतियोगिकाभावनिवेशेऽपि गौरवाद्यभावमादायासम्भवस्य वारणसम्भवादाह तत्तत्साध्यव्यक्त्यभावस्येति। अस्य च नानाव्यक्तिसाध्यक इत्यादिः। तथा च साध्याभावनिवेशेऽपि वह्निमान् धूमादित्यादावव्याप्तिः स्यादिति भावः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वञ्च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वम्, गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदिकाया अपि द्रव्यत्वाद्यभावप्रतियोगिताया न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं सत्तावति गुणादौ तादृशप्रतियोगित्वावच्छिन्नाभावसत्त्वादतो विशिष्टसत्ताद्यभाव एव लक्षणघटकस्तस्य च गुणादौ सत्तादिरूपप्रतियोगिसमानाधिकरणत्वादतिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नत्वोपादानम्, तथा च सति द्रव्यत्वाभावप्रतियोगिताया अपि विशिष्टसत्तात्वाद्यवच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतया तादृशाभावानाञ्च गुणादावतथात्वान्नातिव्याप्तिः। यत्किञ्चिद्रूपावच्छिन्नसाध्यवत्तानिवेशे च सत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदकप्रतियोगिताकद्रव्यत्वाद्यभावादिकमादायाव्याप्तिर्बोध्या, साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यमन्यथा धूमवान् वह्नेरित्यादौ धूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायाः कालिकविशेषणताविषयितादिसम्बन्धेन धूमादिमति काले ज्ञानादौ च संयोगादिसम्बन्धेन स्वावच्छिन्नाभावसत्त्वात् केनापि सम्बन्धेन न व्यापकतावच्छेदकत्वमिति केवलान्वयिवाच्यत्वादिनिष्ठप्रतियोगितैव स्वरूपादिसम्बन्धघटितव्यापकतावच्छेदिका स्यादित्यतिव्याप्तिः। न च सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावस्तदीयविषयतासम्बन्धावच्छिन्नप्रतियोगितानवच्छेदिका या प्रमानिष्ठप्रतियोगिता तन्निरूपकप्रमाभावस्य च न विवक्षणीयसाध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्सम्बन्धेन स्वविशिष्टयावद्धेत्वधिकरणे प्रतियोगिसामानाधिकरण्यं साध्यतावच्छेदकसंयोगादिसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकतायां संयोगादिसम्बन्धावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतासम्बन्धस्यापि घटकतया तेन सम्बन्धेनायोगोलकादौ प्रतियोगिनोऽसत्त्वादिति वाच्यम्, यतो विषयताया विषयतात्वेनैव सम्बन्धता प्रामाणिकी न तु तथाविधविशेष्यतात्वेनेति, परन्त्वेतादृशदिशा समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेतावेवातिव्याप्तिवारणं सम्भवति तत्र ज्ञानाभावस्य सम्बन्धसामान्येन साध्यनिष्ठव्याप्यतानिरूपितविषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसमवायेन घटादौ प्रतियोगिसामानाधिकरण्यविरहात्। न च सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावस्तदीयसम्बन्धसामान्यावच्छिन्नप्रतियोगितायां धूमाद्यभावीयसम्बन्ध-

सामान्यावच्छिन्नप्रतियोगित्वमप्यनवच्छेदकं संयोगत्वाद्यवच्छिन्नसंयोगादिसम्बन्धेन धूमादिमत्यभावसत्त्वेऽपि सम्बन्धत्वरूपव्यापकधर्मावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकतदभावासत्त्वात् तथा च धूमाद्यभावस्यापि लक्षणघटकतया तस्य च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसंयोगत्वाद्यवच्छिन्नसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिरिति वाच्यम्, सम्बन्धत्वेन सम्बन्धानामभावप्रतियोगितावच्छेदकसम्बन्धत्वे मानाभावात्तेन रूपेण सम्बन्धानां व्यापकताघटकत्वासम्भवात्।

वस्तुतस्तु प्रतियोगिसामानाधिकरण्यशरीरे व्यापकतायाः स्वातन्त्र्येण निवेशस्य प्रतिक्षेप्यत्वाज्ज्ञानवान् द्रव्यत्वादित्यादावतिव्याप्तिरवाधेति ध्येयम्।

वस्तुतस्तु संयोगसमवायादिसाधारणानुगतसम्बन्धत्वस्य कथञ्चित्सुवचत्वेऽपि तेन रूपेण संयोगादीनां सम्बन्धतया भानस्य निर्युक्तिकतया व्यापकताशरीरे लाघवानुरोधात्साध्यप्रकारेणाधिकरणस्य निवेशे साध्यसम्बन्धोऽपि विशिष्य संसर्गतया निवेश्यस्तथा च विशिष्य साध्यतावच्छेदकसम्बन्धनिवेशनमावश्यकम्, यत्किञ्चित्सम्बन्धेन साध्यवत्ताया व्यापकताघटकत्वे तु वह्निमान् धूमादित्यादौ विषयितासम्बन्धेन साध्यं प्रति गुणत्वाद्यभावप्रतियोगितया अपि व्यापकतावच्छेदकतया तादृशाभावस्य लक्षणघटकत्वेन तस्य च पर्वतादौ प्रतियोगिसामानाधिकरण्यविरहादसम्भवो बोध्यः। साध्यवन्निष्ठाभावप्रतियोगिप्रतियोगिकत्वनिवेशे सर्वस्यैव साध्यवन्निष्ठद्वित्वाद्यवच्छिन्नाभावप्रतियोगितया तादृशाभावाप्रतियोगिनोऽप्रसिद्धिरित्यतोऽवच्छेदकगर्भता। तादृशप्रतियोगितानवच्छेदकत्वञ्च तादृशप्रतियोगितायाः समानाधिकरणं यद्यद्वच्छेदकं तत्तदन्यत्वम्, अन्यथा व्यतिरेकिप्रतियोगितामात्रस्यैव व्यधिकरणतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया विरुद्धघटत्वपटत्वोभयाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्यैव लक्षणघटकत्वेन व्यभिचारिण्यतिप्रसङ्गात्।

यत्तु साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वनिवेशेनैव सर्वसामञ्जस्ये निरुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशनमफलम्, वह्निमान् धूमादित्यादौ घटत्वादिना वह्न्याद्यभावप्रतियोगिनां वह्न्यादीनां चालनीन्यायेन साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात्, व्यभिचारिणि व्यभिचारनिरूपकाधिकरणभेदाभावमादायैवातिव्याप्तिवारणसम्भवाच्च। न च साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षया तादृशविशेषणस्य न लघुशरीरतेति वाच्यम्, व्यापकतावच्छेदकताघटकाभावप्रतियोगितावच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नत्वस्याधिकस्य प्रतियोगितायां सम्बन्ध-

विशेषावच्छिन्नत्वस्य च निवेशनीयतया एतन्मते तदनिवेशेन लाघवात्, तन्मते तदनिवेशे सर्वासामेव प्रतियोगितानां साध्यवन्निष्ठो यो विषयितासम्बन्धेन स्वावच्छिन्नस्याभावस्तत्प्रतियोगितावच्छेदकतया व्यापकतावच्छेदकप्रतियोगिताया एवाप्रसिद्ध्यापत्तेः, भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसम्बन्धावच्छिन्नत्वस्यैतन्मते निवेशवद्धन्मतेऽप्यभावप्रतियोगितायां तन्निवेशस्यावश्यकतया तदंशे साम्यादिति। तदसत्, यतोऽनवच्छेदकप्रतियोगिकत्वमनवच्छेदकनिष्ठप्रतियोगितानिरूपकत्वं प्रतियोगितायां तन्निष्ठत्वञ्च स्वरूपसम्बन्धेन वाच्यमन्यथा वह्निमान् धूमादित्यादावपि विषयतासम्बन्धेन साध्यव्यापके प्रमेयमित्याकारकविश्वविषयकज्ञाने विषयितासम्बन्धेन जलत्वाद्यभावीयप्रतियोगिताया वृत्तेस्तादृशाभावस्य लक्षणघटकतापातात्। विषयिताया वृत्त्यनियामकतयैतद्दोषानवकाशेऽपि एतद्वह्निमानेतद्धूमादेतद्रूपवानेतद्रसादित्यादौ जलत्वाद्यभावप्रतियोगितायाः कालिकसम्बन्धेन साध्यव्यापकसाध्यतत्समानाधिकरणकर्मादौ वर्तमानतया लक्षणघटकत्वापातात् तथा च व्यापकनिरूपितवृत्तौ स्वरूपसम्बन्धावच्छिन्नत्वनिवेशस्यैतन्मतेऽप्यावश्यकतया न लाघवावकाशो विपरीतमेव गौरवमाधेयत्वांशनिवेशाधिक्येनेति। न च व्यापकनिष्ठप्रतियोगिताकत्वेनाभावो न निवेशनीयो येनोक्तगौरवं स्यादपि तु अनुयोगितासम्बन्धेन व्यापकविशेषित एव तत्र च व्यापकतावच्छेदकप्रतियोगिताकत्वेनाभावनिवेशापेक्षया लाघवमक्षतमेवेति वाच्यम्, प्रतियोगिप्रकारीभूतधर्मावच्छिन्ननिरूपितत्वानवच्छिन्नानुयोगिताया अभावांशे प्रतियोगिसम्बन्धतया भानं पटादिमति घटत्वावच्छिन्नाभावविषयिण्या द्रव्यं नास्तीत्याकारकप्रतीतेरापत्तेस्तदवच्छिन्ननिरूपितानुयोगिताया एव संसर्गतया भानोपगमाद्व्यापकत्वावच्छिन्नविशेषिताभावस्य लक्षणे निवेशे व्यापकत्वावच्छिन्ननिरूपितानुयोगितायाः सम्बन्धतया निवेशनीयतया सद्धेतौ हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्यव्यापकाभावस्य सम्बन्धविशेषावच्छिन्नप्रतियोगिताकस्य कथञ्चित्प्रसिद्ध्या लक्षणसमन्वयसम्भवेऽपि व्यभिचारिण्यतिव्याप्तिर्व्यभिचारनिरूपकाधिकरणेऽपि कस्यचित्साध्यव्यापकस्य वृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तेश्चेति। एवमनवच्छेदकपदेनावच्छेदकतापर्याप्त्यनधिकरणत्वमवश्यं वाच्यमन्यथा द्रव्यत्वाभावादेरपि वह्निमन्निष्ठपूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वाल्लक्षणाघटकत्वापत्तेः, तथा च घटत्वावच्छिन्नघटाभावादेरपि लक्षणघटकत्वापत्तिर्वह्निमन्निष्ठभेदप्रतियोगितावच्छेदकताया घटत्वविशिष्टपर्याप्ततया शुद्धघटस्य तत्पर्याप्त्यनधिकरणत्वात्।

अथ निरुक्तव्यापकतावच्छेदकताया निवेशे कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकत्वानुपपत्तिः 'कपिसंयोगाभावादिनिष्ठतत्प्रतियोगितानां साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावप्रतियोगितावच्छेदकत्वात्' इत्यग्रिमग्रन्थविरोधः। न च व्यापकताघटकाभावे प्रति-

योगिवैयधिकरण्यविशेषणसत्त्वात्साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकतेति वाच्यम्, प्रकृते व्यापकतायां तादृशविशेषणप्रवेशस्य निष्प्रयोजनकत्वात्।

अत्र केचित्, व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यकम्, अन्यथाऽभावे सम्बन्धसामान्येन साध्यवन्निष्ठत्वनिवेशे कालपरिमाणवान् द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैव कालिकसम्बन्धेन साध्यवद्वृत्तिर्यः स्वावच्छिन्नाभावस्तत्प्रतियोगितावच्छेदकतया वाच्यत्वादिनिष्ठप्रतियोगिताया एव व्यापकतावच्छेदकतयातिव्याप्त्यापत्तेः। दैशिकविशेषणतासम्बन्धेन तन्निष्ठत्वनिवेशे भावस्य तेन सम्बन्धेन वृत्तेरप्रामाणिकतया वह्निमान् धूमादित्यादौ पर्वतत्वाद्यभावनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकत्वापत्त्या पर्वतत्वाद्यात्मकाभावस्यापि लक्षणघटकत्वापाताद्धेतुसामानाधिकरण्यघटकाभावीयवृत्तावपि तादृशसम्बन्धावच्छिन्नत्वनिवेशे नानास्थाने तादृशसम्बन्धनिवेशेन प्रतियोगितानवच्छेदकत्वमित्यत्र च व्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितावच्छेदकतावारणाय सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्य निवेशेन च गौरवादभावे प्रतियोगिवैयधिकरण्यनिवेशनमेवोचितम्, व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणतयैव तमादाय दोषासम्भवादेतन्मतेऽवच्छेदकताया सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्यानिवेशादभावीयवृत्तौ सम्बन्धभेदानिवेशाच्च। प्रतियोगिवैयधिकरण्यञ्च न प्रतियोगिसमानाधिकरणभिन्नत्वं तथा सति तद्वह्निसंयोगाद्यभावस्य प्रतियोगिसमानाधिकरणतयाऽभावान्तरमादाय तद्वह्निसंयोगादिनिष्ठप्रतियोगिताया अपि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वापत्त्या तदभावमादायाव्याप्त्यापत्तेः। किन्तु प्रतियोग्यनधिकरणवृत्तित्वं तथा च प्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभाव इत्यभावान्तार्थनिष्कर्षः। अत्र च व्यापकताघटकत्वेनाभिमतो यः सम्बन्धस्तेन सम्बन्धेन प्रतियोग्यधिकरणत्वं वाच्यं तेन कालपरिमाणादिसाध्यकस्थले सम्बन्धसामान्येन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धावपि न क्षतिः। काल सर्ववान् कालपरिमाणादित्यादौ साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्ध्या तादृशसम्बन्धस्य व्यापकताघटकत्वासम्भवेऽपि न क्षतिः। तत्र समवायादिसम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकं घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात्। अथैवं दैशिकविशेषणतासम्बन्धस्य क्वापि व्यापकताघटकत्वं न स्यात् सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनस्तेन सम्बन्धेन साध्यवति वृत्तेस्तेन सम्बन्धेन स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसिद्धेः। न च तादृशसम्बन्धस्य व्यापकत्वाघटकत्वेऽपि क्षतिविरहः सामान्यादिमात्रवृत्तिसाध्यकस्थलेऽपि विषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकसाध्यवत्त्वप्रकारकप्रमाभावमादायैवोपपत्तिसम्भवादिति वाच्यम्, तादृशसम्बन्धस्यातथात्वे तेन सम्बन्धेन कपिसंयोगाभावादिसाध्यकमेयत्वादिहेतु-

कस्थले तन्निष्ठकपिसंयोगात्मकाभावीयप्रतियोगिताया व्यापकतावच्छेदकत्वानुपपत्त्याऽग्रिमग्रन्थासङ्गतितादवस्थ्यादिति चेन्न, लाघवानुरोधेन येन सम्बन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत्तादृशप्रतियोगितानवच्छेदकत्वमेव तादृशसम्बन्धघटितव्यापकतावच्छेदकत्वं वक्तव्यं इत्थञ्च कपिसंयोगाभावादिसाध्यकस्थले तन्निष्ठप्रतियोगित्वावच्छिन्नप्रतियोगिता नोक्तयादृशपदेनोपादातुं शक्यते तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवत्यलाभात् किन्तु घटत्वाद्यभावनिष्ठप्रतियोगितैव, दैशिकविशेषणतया तदवच्छेदकावच्छिन्नानधिकरणत्वस्य साध्यवति घटादौ सत्त्वात्तदनवच्छेदकत्वञ्च कपिसंयोगाभावादिनिष्ठप्रतियोगिताया इति कपिसंयोगादेर्दैशिकविशेषणताघटितव्यापकतावच्छेदकप्रतियोगिताकत्वानिर्वाह, समनियताभावैक्यमते घटाद्यभावानामपि घटत्वादिना प्रमेयसामान्याभावाभिन्नतया प्रमेयमात्रप्रतियोगिकत्वेन प्रतियोग्यनधिकरणीभूतसाध्यवतोऽप्रसिद्धिरत प्रतियोगितावदनधिकरणत्वं विहाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेश । न च घटाद्यभावानां प्रमेयमात्रप्रतियोगिकत्वेऽपि तदीयघटादिमात्रवृत्तिप्रतियोगितावदनधिकरणत्वमादाय व्यापकतालक्षणसामञ्जस्यमिति वाच्यम्, तादृशाभावानामभेदे घटो नास्तीत्यादिप्रतीतीनामपि घटत्वादिविशेषितघटादिवृत्तित्वेन यावत्प्रमेयनिष्ठप्रतियोगितावगाहित्वसम्भवाद्घटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वात् । समनियताभावानामभेदानभ्युपगन्तृनयेऽपि साध्याभावादिप्रतियोगितया साध्यवद्वृत्तिपदार्थाभावस्य प्रतियोगिनामादाय तादृशप्रतियोगितानां व्यापकतानवच्छेदकत्वापत्तिवारणाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकम् । अथ द्रव्यत्वाद्यभावीयद्रव्यत्वादिनिष्ठप्रतियोगितानामपि संयोगादिव्यधिकरणसम्बन्धघटितव्यापकतावच्छेदकत्वापत्ति· संयोगादिना तादृशप्रतियोगितात्मकप्रतियोगितावच्छेदकविशिष्टाधिकरणाप्रसिद्ध्या यादृशप्रतियोगितेत्यत्र तादृशप्रतियोगितावच्छिन्नाया· प्रतियोगिताया उपादातुमशक्यत्वात्प्रतियोगितान्तरमुपादाय तदनवच्छेदकत्वानिस्तारात् तथा च यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्यासम्भवादसम्भव·, एवं समवायादिसम्बन्धावच्छिन्नाभावादिनिष्ठप्रतियोगितायामपि तथात्वापत्ति । न च संयोगादिना द्रव्यत्वाद्यभावस्य स्वसमनियतघटत्वावच्छिन्नप्रतियोगिताकघटत्वाद्यभावाभिन्नतया संयोगादिना घटत्वादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वान्नासम्भव इति वाच्यम्, एवमपि सत्तावान् जातेरित्यादौ हेत्वधिकरणावच्छेदेन तादृशाभावानां संयोगेन प्रतियोगिसामानाधिकरण्यासम्भवेनाव्याप्तेर्दुर्वारत्वात् ।

मैवं, व्यापकताघटकत्वेनाभिमतो य· सम्बन्धस्तेन सम्बन्धेन वृत्तिमन्निष्ठत्वेन प्रतियोगिताया विशेषणीयत्वात्, द्रव्यत्वादे· संयोगादिनाऽवृत्तितया उक्तदोषानवकाश इत्याहु· ।

वस्तुतस्तु लघुरूपसमनियतगुरुधर्मस्यानवच्छेदकत्वे घटाद्यभावीयप्रति योगिताया अपि वह्न्यादिव्यापकतावच्छेदकत्वापत्तिस्तादृशप्रतियोगिनावि शिष्टघटाद्यभावप्रतियोगितायां लाघवेन घटत्वादेरेवावच्छेदकतया घटाद्यभा वप्रतियोगिनाना तदनवच्छेदकत्वात्। न च प्रतियोगितायास्तत्तदभावीय प्रतियोगितात्वेनावच्छेदकताया गौरवेऽपि स्वरूपतोऽनवच्छेदकत्वे न विशेष, प्रतियोगिताया स्वरूपतो मानाभावेन तेन रूपेणावच्छेदकताया अप्यसम्भ वादिति पारिभाषिकमेवावच्छेदकत्वं व्यापकताशरीरे निवेशनीयं तथा च साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नाभाववदसम्बद्ध त्वविशिष्टसामान्यकं फलत साध्यवद्यत्किञ्चिद्व्यक्त्यसम्बद्धत्वविशिष्टसा मान्यकं यद्यत्त्वं तदन्यत्वमेव व्यापकतावच्छेदकत्वम्, तथा च कपिसंयो गाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियो गिताकत्वमनायासेनैव निर्वहति यत कपिसंयोगाद्यभावनिष्ठप्रतियोगिता विशिष्टस्य सर्वत्रैव साध्यवति वृत्तेस्तस्याश्च स्वपदेनोपादातुमशक्यत्वात् तादृश स्व धर्मान्तरमेव तदन्यत्वञ्च तादृशप्रतियोगितायामक्षतमेवेति। अस म्बद्धत्वशरीरे च व्यापकताघटकत्वेनाभिमतो य सम्बन्ध स एव निवे शनीय, द्रव्यत्वादिनिष्ठप्रतियोगित्वञ्च संयोगादिसम्बन्धेन साध्यवदसम्बद्ध स्वविशिष्टसामान्यकमेवातो न संयोगादिघटितव्यापकतावच्छेदकत्वं तस्येति नोक्तदोषावकाश इति दिक्॥

(दी०) येन सम्बन्धेन हेतुस्तेनैव तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षतिः॥

(गा) येन सम्बन्धेन हेतुरिति। व्याप्यतावच्छेदकत्वेनाभिमतो य सम्बन्ध इत्यर्थ। 'बोध्यम्'इत्यस्य हेतुसामानाधिकरण्यघटकमित्यादि। 'तेन' तादृशसम्बन्धविशेषणेन, आत्मत्व साध्य इति। अयमात्मा ज्ञानादित्यादा वित्यर्थ। 'साध्याभावस्य' साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य, 'अत थात्वेऽपि', स्वविशिष्टस्य हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणस्याप्रसि द्धया निरूपणीयस्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकर ण्यविरहेऽपि, 'न क्षति' नाव्याप्ति। वह्निमान् धूमादित्यादौ धूमावयवादि वृत्तेर्वह्नित्वाद्यवच्छिन्नाभावस्य स्वविशिष्ट यद्धेतुतावच्छेदकसम्बन्धेन हेत्व धिकरणं तदवच्छेदेन प्रतियोगिसामानाधिकरण्यं सम्भवत्येव तथाविधहेत्व धिकरणपर्वतादेर्जन्यमानस्य कालोपाधितया कालिकसम्बन्धेन तादृशाभावा दिविशिष्टत्वात्तदन्तर्भावेन तेन सम्बन्धेन तादृशप्रतियोगिसामानाधिकरण्यस्यापि सत्त्वात्। अभावविशिष्टयादौ सम्बन्धविशेषानिवेशादित्यभिप्रायेण नित्यमा त्रवृत्तिहेतुकस्थलानुधावनम्।

अथ वह्निव्यापकस्य चरमक्रियाभावस्य योऽभावश्चरमक्रियात्मकस्तस्य कालिकसम्बन्धेन हेत्वधिकरणे महाकाले वर्तमानस्य न विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवस्तद्विशिष्टस्य हेतुतावच्छेदकसंयोगेन धूमाधिकरणस्याप्रसिद्धेर्धूमाधिकरणपर्वतादेस्तदसमानकालीनतया तत्र कालिकसम्बन्धेनापि तद्वैशिष्ट्यासम्भवादित्यात्मत्वसाध्यकपर्यन्तानुधावनमफलम्। न च वृत्त्यनियामकसंयोगेन धूमसम्बन्धिनि परमाणावेव चरमक्रियावैशिष्ट्यस्य प्रसिद्ध्या तत्र चरमक्रियाभावरूपप्रतियोगिनोऽपि सत्त्वात्सम्भवत्येव विवक्षणीयप्रतियोगिसामानाधिकरण्यं तादात्म्यसम्बन्धावच्छिन्नहेतुताकस्थलानुरोधेन 'हेत्वधिकरणावच्छेदेन' इत्यत्र हेतुसम्बन्धित्वमात्रस्यैव विवक्षितत्वादिति वाच्यम्, यादृशपरमाणौ कदापि धूमसंयोगो नास्ति तदीयचरमक्रियात्मकाभाववैशिष्ट्यस्य हेतुसम्बन्धिन्यसत्त्वेन तमादायैवाव्याप्तिसम्भवादिति चेत्, महाकालस्यैव वृत्त्यनियामकसंयोगसम्बन्धेन हेतुसम्बन्धितया तत्र कालिकसम्बन्धेन चरमक्रियात्मकाभाववैशिष्ट्यस्य दैशिकविशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवाद्वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छेदकसम्बन्धत्वात्। न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थलेऽव्याप्तिरस्त्येवेति वाच्यम्, तेन रूपेण सम्बन्धतायां मानाभावात् कालस्यावृत्तितया काले धूमसंयोगस्य कालनिष्ठधूमाधेयत्वानियामकत्वेऽपि धूमस्य तेन सम्बन्धेन कालवृत्तित्वमस्त्येवेत्यस्यापि सुवचत्वाच्च वह्निमान् धूमादित्यादौ साध्याभावमादाय नाव्याप्तिसम्भवः किन्तु चरमक्रियात्मकाभावमादायैवेति, अव्याप्तेः स्फुटतरप्रतिपत्त्यर्थमात्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चेति ॥

ननु ज्ञानवानात्ममहाकालान्यतरत्वादित्यादौ हेतुसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेव स्वविशिष्टहेत्वधिकरणमहाकाले कालिकसम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः। न च तादात्म्येन ज्ञानव्यापकस्यात्मनोऽभाव एव काले न प्रतियोगिसमानाधिकरण आत्मनोऽवृत्तितया काले कालिकसम्बन्धेनावृत्तेरिति वाच्यम्, आत्मनः कालावृत्तित्वे कालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्या तदुपगमस्यावश्यकत्वात्। नित्यद्रव्याणां कालावृत्तित्वेऽपि महाकालभिन्नो द्रव्यत्वात्, ईश्वरज्ञानभिन्नं गुणत्वादित्यादावतिव्याप्तिर्वृत्तिमतामेव महाकालभेदेश्वरज्ञानभेदव्यापकतया तदभावानां यावतामेव महाकाल ईश्वरज्ञानादौ च कालिकविशेषणताविषयितासम्बन्धघटितप्रतियोगिसामानाधिकरण्यसत्त्वादित्यत आह एवं दलान्तरेऽपीति ॥

(दी०) एवं दलान्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः ॥

(गा०) 'दलान्तरे' प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिमत्त्वादले,
'सम्बन्धभेदनिबन्धनो दोष ' कालिकादिसम्बन्धमादायातिव्याप्तिरूप , 'सम्ब
न्धैक्यविवक्षया' व्यापकताघटकसम्बन्धप्रतियोगिमत्त्वाघटकसम्बन्धयोरैक्य
विवक्षया, तथा च ज्ञानवान् आत्ममहाकालान्यतरत्वात् , महाकालभिन्नो
द्रव्यत्वादित्यादौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरू
पितव्यापकताघटकसमवायदैशिकविशेषणतादिसम्बन्धेन ज्ञानाभावमहाका
लभेदाभावादिप्रतियोगिनां कालादावृत्तेर्नातिव्याप्तिरिति भावः । अत्र च
येन येन सम्बन्धेन स्वप्रतियोगित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्न
व्यापकता तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यमभावस्य विवक्ष
णीयमन्यथेदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यादौ हेतुसमा
नाधिकरणनित्यज्ञानत्वाद्यभावस्य प्रतियोगिन साध्यं प्रति विषयितासम्बन्धे
नापि व्यापकतया तेन सम्बन्धेन हेत्वधिकरणेश्वरेच्छाकृत्यो प्रतियोगि
सामानाधिकरण्येनातिव्याप्ति , येन येनेत्युक्तौ च तथाविधसमवायादिसम्ब
न्धेनातथात्वान्नातिव्याप्ति ।अत्र साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपित
स्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्सम्बन्धत्वेन तादृशसम्बन्धस्य
प्रतियोगिसामानाधिकरण्यशरीरे न स्वातन्त्र्येण निवेशस्तथा सत्यभावे सा
ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्या
पातात् । न हि तादृशविशेषणानुपादाने गोत्वाद्यभावमादायासम्भव सम्भ
वति गोत्वाद्यभावानामपि हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूप
प्रतियोगिनिष्ठव्यापकताघटकदैशिकविशेषणतासम्बन्धेन प्रतियोगिसामाना
धिकरण्यसत्त्वाद्धूमवान् वह्नेरित्यादौ धूमाद्यभावस्यायोगोलके पूर्वक्षणा
दिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्येऽपि यावद्व्यापक
ताघटकसम्बन्धान्तर्गतसंयोगादिना प्रतियोगिसामानाधिकरण्यविरहात् ।
घटत्वाद्यभाववान् प्रमेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य तादृशप्रतियो
गिसामानाधिकरण्येऽपि विशेष्यतासम्बन्धघटितसाध्यव्यापकतावच्छेदक-
प्रतियोगिताकस्य घटावृत्तिघटत्वाभावादिप्रकारकप्रमाया अभावस्य तादृश
सम्बन्धेन घटे प्रतियोगिसामानाधिकरण्यविरहादति व्याप्त्यनवकाशात् ।
अपि तु साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपितयद्यत्सम्बन्धघटितव्या-
पकतावच्छेदकप्रतियोगिताका ये येऽभावास्तत्तत्सम्बन्धेन प्रतियोगिसमा
नाधिकरणा इत्येवं क्रमेणेव निवेशाद् व्यापकताया एकधैव लक्षणे निवेश इति ।

यत्तु साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशात्
ज्ञानवानात्ममहाकालान्यतरत्वादित्यादावतिव्याप्ति , इत्यत्र व्यापकताऽपि
साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या, अत एव वह्निमान् धूमादित्यादौ
घटत्वादिना घटवृत्तित्वविशिष्टद्रव्यत्वत्वादिना वा द्रव्यत्वादेरभावस्य सम
वायादिसम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यता
वच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षति-

रिति, तन्न, तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये कालत्वादिहेतावतिव्याप्त्यापत्तेस्तत्र महाकालान्यत्वविशिष्टघटाभाव-महाकालान्यत्वाभावादीनां कालिकसम्बन्धेन महाकाले घटादिरूपप्रतियोगि-सामानाधिकरण्यसत्त्वादिति। यदि च महाकालान्यत्वविशिष्टोऽपि घटो महाकाले वर्ततेऽन्यथा सिद्धान्तलक्षणे महाकालो घटवान् कालपरिमाणा-दित्यादौ महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य सुल-भतयोभयाभावघटितप्रतियोगिवैयधिकरण्यनिर्वचनायासस्य निष्प्रयोजन-कत्वापत्तेरिति दर्शितविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरेवेति मन्यते, तदापि घटत्वाभाववान् प्रमेयत्वादित्यादौ घटत्वात्मकाभावस्य साध्यता-वच्छेदकदैशिकविशेषणतासम्बन्धेन किञ्चिद्विशिष्टत्वाभावात्मकप्रतियोगि-सामानाधिकरण्यसत्त्वादतिव्याप्तिरेतन्मते दुर्वारैव। न च तेन सम्बन्धेन भावरूपप्रतियोगिसामानाधिकरण्यस्य विवक्षणीयतया नायं दोष इतिवाच्यम्, तथा सत्यभावसाध्यकसद्धेतौ निरुक्तयावदभावान्तर्गतभावरूपसाध्याभावस्य भावरूपप्रतियोग्यप्रसिद्ध्या भावरूपप्रतियोगिसामानाधिकरण्यासम्भवाद-व्याप्तिः, अभावपदस्य भावभिन्नाभावपरत्वे कपिसंयोगाभावसाध्यकस्थले कपिसंयोगात्मकाभावमादायाग्रे स्वविशिष्टयावत्पदव्यावृत्तिकथनस्यासङ्गत्या-पत्तेः। एवं साध्यतावच्छेदकसम्बन्धेन व्यापकत्वादिनिवेशे 'सर्वत्र'इत्या-दिना धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादायातिव्याप्तिप्रदर्शनस्यासङ्ग-त्यापत्तेश्चेति।

यत्तु दैशिकविशेषणताविशेषेण व्यापकता तेनैव सम्बन्धेन प्रतियोगि-सामानाधिकरण्यं सर्वत्र साध्यवत्त्वप्रकारकप्रमाविषयत्वाद्यभावमादायैव लक्षणसङ्गमनमतिव्याप्तिवारणञ्चेति, तदप्युक्तातिव्याप्तेरात्मत्वादिसाध्य-कस्थले साध्याभावमादाय हेतुतावच्छेदकसम्बन्धव्यावृत्तिप्रदर्शनविरोधा-च्चानुपादेयमेव।

केचित्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवे-शात् प्रागुक्तातिव्याप्तिः,इत्थञ्च व्यापकतापि तेन सम्बन्धेन बोध्या, अतो वह्नि-मान् धूमादित्यादौ संयोगादिघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वधिकरणे सम-वायादिना प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिस्तादृशाभावानां साध्यतावच्छेदकसम्बन्धघटितसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिताव-च्छेदकसम्बन्धघटितत्वव्यापकतावच्छेदकप्रतियोगिताकत्वाभावेन निरुक्तयाव-दभावान्तःपातित्वादिति। न चैवं व्यधिकरणधर्मावच्छिन्नाभावस्य सम्ब-न्धावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकत्वानु-पपत्तिरिति वाच्यम्, संयोगेन घटत्वेन पटो नास्तीत्यनुभवबलात्तादृशा-भावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वादनुभयानादरे च समाना-धिकरणधर्मावच्छिन्नाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वा-

सिद्धेः। अथवाधबुद्धिप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वभावश्यकमन्यथैकैकविधघटाद्यभावज्ञानस्य संयोगसमवायादिरूपनिखिलससर्गावगाहिज्ञानप्रतिबन्धकत्वप्रसङ्गात्। न च संयोगसम्बन्धावच्छिन्नघटादिप्रकारकबुद्धिं प्रति वस्तुगत्या संयोगादिसम्बन्धेन घटादिमत्ताविरोधी योऽभावस्तज्ज्ञानत्वेन प्रतिबन्धकत्वान्नोक्तातिप्रसङ्ग इति वाच्यम्, वास्तवतादृशाभावत्वादिना प्रतिबन्धकत्वे घटाभावत्वेन पदार्थान्तरावगाहिज्ञानस्य घटादिमत्ताज्ञानाविरोधित्वप्रसङ्गात् तस्मात्तत्संसर्गकविशिष्टबुद्धौ तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञानत्वेन प्रतिबन्धकताया वक्तव्यतया समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां सम्बन्धस्यावच्छेदकतासिद्धिरिति चेत्, तर्हि घटत्वविशिष्टपटाद्यवगाहिभ्रमघटत्वाद्यवच्छिन्नप्रतियोगिताकपटाद्यभावज्ञानयोरपि प्रतिबध्यप्रतिबन्धकभावसत्त्वात् तादृशप्रतिबध्यप्रतिबन्धकभावस्य सम्बन्धविशेषनियन्त्रितत्वानुरोधेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नत्वावश्यकत्वाद्व्यधिकरणधर्मावच्छिन्नाभावज्ञानस्याप्रतिबन्धकत्वे बाधग्रन्थे लाघवोपनीतकाञ्चनमयत्वादिना वह्न्याद्यनुमितिविरोधितया काञ्चनमयत्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वाभासतोक्तेरसङ्गत्यापत्तेरित्यलमप्रकृतविचारेणेति वदन्ति।

तदपि न साधीयः, निखिलाभावस्य किञ्चिद्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासम्बन्धेन तादृशप्रतियोगिसामानाधिकरण्यसत्त्वेन व्यभिचारिण्यतिव्याप्तेः। यावत्प्रतियोगितावच्छेदकसम्बन्धेन क्वचिदपि हेत्वधिकरणे संयोगविषयतादिरूपसकलसम्बन्धेन प्रतियोगिनोऽवृत्तेरसम्भवापत्तेः प्रकारान्तरानुसरणे च गौरवात्॥

अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य तदुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकस्य वाऽभावस्य निवेशे उभयत्वावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरुक्ता न तु रूपसामान्याभावसाध्यके, प्राचां मते विरुद्धे पृथिवीत्वादिहेतावित्यत्र किं बीजं तथा सति तत्रापि रूपसामान्याभावाभावस्य रूपस्य स्वध्वंसप्रागभावादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वेनातिव्याप्तिसम्भवादित्याशङ्कापरिहाराय तस्य स्वमते लक्ष्यत्वमेवोपपादयति रूपादीति॥

(दी०) रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव प्रलये परमाण्वुत्पत्तिकाले चावयविनि तत्सत्त्वात्॥

(गा०) यथोक्तलक्षणेऽतिव्याप्तिशङ्कया तु नैतद्ग्रन्थावतारस्तत्र पृथिव्यन्यत्वाद्यभावस्यापि यावदन्तर्गततया तस्य पृथिवीभेदरूपप्रतियोगिसामानाधिकरण्यासम्भवेनातिव्याप्तेरनवकाशात्।

यत्तु उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य पृथिव्यामपि सत्त्वेन पृथिव्यन्यत्वाभावस्य न रूपसामान्याभावव्यापकतावच्छेदकप्रतियोगिताकत्वमित्यभिसन्धिपूर्विका प्राचीनप्रवादमात्रेणासद्धेतुत्वाभिमानिना यथोक्तलक्षणेऽतिव्याप्तिशङ्का निराकरोति रूपादीति ।

सद्धेतुरेवेति, यादृशरीत्या पृथिव्यन्यत्वाभावस्य लक्षणाघटकत्वोपपत्तिस्तादृशरीत्या साध्यवति हेतुमत्ताया अप्यावश्यकतया सद्धेतुरेवेत्यर्थ इति व्याख्यानम्, तदनुपादेयमेव, तादृशाशङ्कितु पृथिव्या रूपसामान्याभावसत्त्वेऽविप्रतिपत्तावेवातिव्याप्तिशङ्कासम्भवेनाग्रे पृथिव्या रूपसामान्याभावव्यवस्थापनोपयिकाकाङ्क्षानुत्पत्त्या तदसङ्गत्यापत्ते । 'प्रलये' महाप्रलये, परमाणूना नित्यतया तत्रोत्पत्तिकालावच्छेदेन रूपसामान्याभावासम्भव इति भाव । यद्यपि पाकाद्रूपनाशोत्पत्तिकाले पूर्वरूपात्मकप्रतिबन्धकसत्त्वेन रूपान्तरानुत्पादेन तदानीमपि परमाणौ रूपसामान्याभावसम्भवस्तथाप्यविनश्यद्वस्थरूपस्य प्रतिबन्धकत्वे पूर्वरूपनाशोत्पत्तिक्षण एव पाकजरूपोत्पत्तिसम्भव इत्यभिप्रायेण प्रलयपर्यन्तानुधावनम् । रूपान्तरा... ति । अवयविद्रव्यस्य जन्यतया प्रलयेऽसत्त्वात्तदवच्छेदेन तत्राभावासम्भव इति भाव । 'तत्सत्त्वात्' रूपादिसामान्याभावसत्त्वात् ॥

ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्यात्यन्ताभावात्मकतया रूपप्रागभाववत्युत्पत्तिकालीनावयविनि रूपध्वंसवति प्रलयावच्छिन्नपरमाणौ कथं रूपसामान्याभावसम्भवो ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वादित्याशङ्का निरस्यति न च प्रतियोगिवदिति ॥

(दी०) न च प्रतियोगिवत्तद्ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वम्, मानाभावात् । अत एवान्तराश्यामे रक्तं रूपं नास्तीतिप्रत्ययः । न चैष रक्तिमध्वंसाद्यवगाही, पूर्वापररक्तिमध्वंसप्रागभाववति रक्तेऽपि तथा प्रत्ययप्रसङ्गात् ।

(गा०) यथा प्रतियोगिन एककालावच्छिन्नैकदेशावृत्तित्वरूपस्यात्यन्ताभावविरोधिता तथा स्वध्वंसप्रागभावयोरप्यत्यन्ताभावविरोधितेति नेत्यर्थ । मानाभावादिति । ननु रूपध्वंसप्रागभावावच्छिन्नाधिकरणे तदत्यन्ताभावस्य वृत्तौ प्रमाणाभावो घटाद्युत्पत्तिक्षणे तद्द्वितीयक्षणे च तत्प्रत्यक्षासम्भवेन तद्वृत्तित्वेन रूपात्यन्ताभावप्रत्यक्षस्य सुतरामसम्भवाद्द्वितीयादिक्षणावच्छेदेन रूपस्येव तत्रोत्पत्त्या तदभावीयविशेषणताया असत्त्वेन तृतीयक्षणादावपि तादृशप्रत्यक्षासम्भवात्तदनुभवे विप्रतिपन्नस्य प्रत्यक्षप्रमाणमनुद्भाव्य निरसितुमशक्यत्वाच्चानुमानञ्चाप्रयोजकमिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमर्थादायातमित्यत आह अत एवेति । ध्वंसप्रागभावयोरत्यन्ताभावा

विरोधित्वादेव, 'अन्तराश्यामे' पूर्वापरदशायां रक्ते मध्यदशाया श्याम इत्यर्थः । रक्त रूप नास्तीति प्रत्यय इति । ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे तत्र पूर्वरक्तध्वंसभाविरक्तप्रागभावयो सत्त्वेनात्यन्ताभावावगाहिन्या प्रमात्मकताद्दशप्रतीतेरनुपपत्तिरितिभाव । 'एव' रक्तं रूप नास्तीतिप्रत्यय, ध्वंसादीत्यादिना प्रागभावपरिग्रह । पूर्वापरेति । यत्र घटादौ पाकादेव रक्तनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशानन्तरञ्च रक्तान्तरं तन्नाशानन्तरोत्पन्नरूपान्तरनाशानन्तरं रक्तान्तरमुत्पद्यते तत्र मध्यरक्तदशाया रक्तं रूपं नास्तीति प्रतीत्यापत्तेरित्यर्थ, तत्रापि रक्तरूपध्वंसप्रागभावयो सत्त्वादिति भाव ।

एतेन भवन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत्ताद्दशध्वंसप्रागभावौ ताद्दशप्रतीतिविषयावन्तरा रक्तसमानकालीनो पूर्वापररक्तध्वंसप्रागभावौ च न तथाविधाविति नातिप्रसङ्ग इति निरस्तम् । ताद्दशध्वंसप्रागभावयोरेव रूपान्तरदशाया ताद्दशप्रतीतिनियामकतया तयोरपि तथात्वस्वीकारस्यावश्यकत्वात् । तत्र मध्यरक्तध्वंसप्रागभावयोरतथात्वस्वीकारे तु पूर्वापररक्तताद्दशाया ताद्दशप्रत्ययापत्ते । अथ रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावावेव ताद्दशप्रतीतिविषयौ इत्थञ्च रक्तरूपताद्दशायां लौकिकप्रत्यक्षात्मकताद्दशप्रत्यय आपाद्यतेऽनुमित्यात्मको वा, आद्ये रक्तरूपलौकिकप्रत्यक्षसामग्र्या रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन तदभावप्रत्यक्ष प्रति प्रतिबन्धकत्वान्नापत्तिरन्यथा भवन्मतेऽपि रूपान्तरकालावच्छेदेन तद्वृत्तिरक्तत्वावच्छिन्नात्यन्ताभावस्यैव तदानीं धर्म्यन्तरघटितसन्निकर्षात्तद्वृत्तितया प्रत्यक्षापत्तेर्विशेष्यघटितसन्निकर्षत्वेन सन्निकर्षस्याहेतुत्वाद्रक्तरूपग्रहप्रतिबन्धकदोषादिसत्त्वे च ताद्दशप्रत्ययस्येष्टत्वात् । नान्त्यस्तद्रूपावच्छिन्न याप्यवत्ताज्ञानादिसत्त्व आनुमानिकतथाविधप्रत्ययस्येष्टत्वात् । न च ताद्दशप्रत्ययस्य प्रमात्वापत्ति, भवन्मतेऽपि तथाविधात्यन्ताभावस्य तत्र सत्त्वात्ताद्दशप्रत्ययस्य प्रमात्वेनेष्टापत्ते । यदा च तत्र रक्तं रूपं तत्कालावगाहिन इदानीमत्र रक्तं रूप नास्तीति प्रत्ययस्य प्रमात्वं पुनरशक्यापादनं ताद्दशप्रत्ययेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वे तत्कालावच्छिन्नत्वावगाहनात्, यदा च न तत्र रक्तं रूपं तत्कालावच्छेदेनैव ध्वंसप्रागभावयो रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण ताद्दशविषयबाधात् तद्धर्मोपलक्षिताभावादौ तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुनरिष्टमेव । न च तद्धर्मिनिष्ठध्वंसादौ तत्कालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं कल्प्यते किं वा तत्कालावच्छेदेन तद्धर्मिण्येव रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाव कल्प्यत इत्यत्र विनिगमनाविरहाद्ध्वंसाद्यधिकरणेऽत्यन्ताभावसिद्धिर्निष्प्रत्यूहैवेति वाच्यम्, ध्वंसप्रागभावाधिकरणेऽत्यन्ताभावाकल्पने ध्वंसादेरतिरिक्तात्यन्ताभावाकल्पनेन लाघवाद्रक्तरूपात्यन्ताभावस्यैव तन्मते रक्तरूपध्वंसात्यन्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभावत्वात् ।

मैवम्, तद्धर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वोपगमे विशेषाभावानामेवाधिकरणविशेषावच्छेदेन सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वसम्भवादतिरिक्तसामान्याभावासिद्धिप्रसङ्ग। एवमेकस्यैवाभावस्याधिकरणविशेषकालविशेषवृत्तित्वावच्छेदेन घटत्वपटत्वादिरूपनानाधर्मावच्छिन्नप्रतियोगिताकत्वसम्भवेनाभावभेदविलोपप्रसङ्ग। एव रक्तानधिकरणकालावच्छेदेन रक्तध्वंसादे रक्तत्वावच्छिन्नप्रतियोगिताकत्वोपगमे तत्समानाधिकरणतदसमनियतध्वंसाद्यन्तरस्य तत्समानाधिकरणैक्यादेरेव वा तादृशकालावच्छेदेन तत्कल्पनमादाय विनिगमनाविरहप्रसङ्गश्चेति ध्वंसप्रागभावाधिकरणेऽत्यन्ताभावकल्पनमेव न्याय्यम्।

अथैतादृशयुक्त्या रक्तध्वंसादिमति तदत्यन्ताभावसिद्धावपि रूपध्वंसादिमत्या पृथिव्या रूपत्वावच्छिन्नाभावो निर्युक्तिक एवेति चेन्न, रूपोत्पत्तिद्वितीयक्षणे पुनस्तदधिकरणे सामान्यसामग्रीबलादरूपान्तरापत्तिवारणाय रूप प्रति रूपत्वावच्छिन्नाभावस्य हेतुत्व कल्पनीयम्। एवञ्चोत्पत्तिकालपाकाद्रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावास्वीकार तदनन्तर रूपानुत्पादप्रसङ्गो रूपोत्पादानन्तर रूपसामान्यस्य पुनरुत्पादश्च प्रागभावहेतुतया दुर्वारो रूपवत्यपि पाकजभाविरूपप्रागभावसत्वात्। न चेवमपि पृथिव्या रूपात्यन्ताभावो निर्युक्तिको यत्कालावच्छेदेन तत्र रूपात्यन्ताभावो भवता स्वीक्रियते तत्कालावच्छेदेन रूपप्रागभावे रूपत्वावच्छिन्नप्रतियोगितात्त्वस्वीकारेणैवोपपत्तेरिति वाच्यम्, दत्तोत्तरत्वात्।

इद त्ववेयम्, उक्तयुक्त्योत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावसिद्धावपि प्रलयकालावच्छेदेन परमाणौ तत्सत्वे मानाभाव। एव रूप प्रति रूपत्वावच्छिन्नाभावहेतुत्वमेव न कल्प्यते स्पर्शोत्पत्त्यनुरोधेनावश्यकल्पनीयस्पर्शसामान्याभावस्य तद्धेतुतयैव रूपवति रूपान्तरापत्ते शक्यवारणत्वात्, वायो स्पर्शोत्पत्त्यनन्तर स्पर्शोत्पत्तिवारणाय स्पश प्रति रूपाभावहेतुताया वक्तुमशक्यत्वात् तत्र स्पर्शाभावहेतुताया आवश्यकत्वात्। न च रूपं प्रति स्पर्शाभावहेतुत्वे यत्र पाकाद्रूपसत्त्वे स्पर्शनाशस्तत्र स्पर्शान्तरोत्पत्तिकाले रूपान्तरोत्पादप्रसङ्ग इति वाच्यम्, एकजातीयस्यवाग्निसंयोगस्य रूपरसगन्धस्पर्शनाशकतया स्पर्शनाशकाले रूपनाशस्याप्यावश्यकत्वादिति, ध्वंसप्रागभावाधिकरणे सामयिकात्यन्ताभावानभ्युपगन्तृमते तादृशात्यन्ताभावो न तदनधिकरणेषु कल्प्यतेऽनन्ताधिकरणेषु तादृशाभावकल्पनामपेक्ष्य लाघवादेकैकेषु तत्तद्धर्मावच्छिन्नतद्भेदेषु तद्धर्मावच्छिन्नप्रतियोगिताकत्वकल्पनेनैवोपपत्तेरिति ध्येयम्॥

(दी०) तत्सामानाधिकरण्यञ्च स्वनिष्ठहेत्वधिकरणावच्छेदेन बोध्यम्। तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्मावच्छेदेन तद्वति काले महाकाले वा वृत्तावपि यदा

गोत्वं तदा गौर्यत्र कालत्वं तत्र जन्यद्रव्यं प्रलयावृत्तिर्वेत्यादौ नातिप्रसङ्गः । हेतुमति प्रलये तत्सामानाधिकरण्याभावात् । स्वविशिष्टेतिविशेषणात् कपिसंयोगाभाववान् मेयत्वादित्यादौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेऽपि नाव्याप्तिः ॥

(गा०) 'तत्सामानाधिकरण्य' प्रतियोगिसामानाधिकरण्यम् । स्वविशिष्टेति स्व यत्राभावे प्रतियोगिसामानाधिकरण्य ग्राह्य स एव, हेत्वधिकरणावच्छिन्नेति । हेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकावच्छिन्नाधिकरण यत्तत्सामान्यान्तर्भावेनेत्यर्थः । तेन वह्न्यभावस्य धूमावयवावच्छेदेन द्रव्यविशिष्टसत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य गुणत्वाद्यवच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः । पर्यन्तादेः कालोपाधित्वानभ्युपगमे धूमत्वप्रकारकप्रमाविशेष्यत्वाभावस्य क्वचिदपि प्रतियोगिसामानाधिकरण्यस्योपपादयितुमशक्यतया धूमवान् वह्नेरित्यादावतिव्याप्त्यप्रसक्तेर्दर्शितविवक्षाया स्थलान्तरे प्रयोजनमाह तत्र गोत्वेति । 'तद्वति, गवादिमति, कालिकसम्बन्धेन गोत्वादिना गवादौ साध्ये प्रलयान्तर्भावेन व्यभिचारिणि गोत्वादिहेतौ लक्षणघटकाना गोत्वाद्यवच्छिन्नाभावाना गवादिमत्येतत्काले गवाद्यनधिकरणदेशावच्छेदेन महाकाले च प्रलयावच्छेदेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमक्षतमेव । एव दैशिकविशेषणताविशेषेण गवादिव्यापकप्रलयान्यत्वादेरभावोऽपि तेन सम्बन्धेन प्रलयान्यत्वादिमति महाकाले वर्तमानतया प्रतियोगिसमानाधिकरण एव प्रतियोगिसामानाधिकरण्यघटकीभूताभाववृत्तौ सम्बन्धविशेषानिवेशादित्यतिव्याप्ति स्यात् । निरुक्तविवक्षणे च स्वविशिष्टयावद्धेत्वधिकरणान्तर्गतप्रलयान्तर्भावेन तादृशाभावाना न प्रतियोगिसामानाधिकरण्य प्रलये तत्प्रतियोगिनोऽवृत्तेरिति समुदायार्थः । गवादिव्यापकस्य चरमध्वंसादेरभावस्य योऽभावश्चरमध्वंसादिस्तस्य गवादिमति खण्डकाले न प्रतियोगिसामानाधिकरण्य तत्र तस्यावृत्तेरतो महाकाल वेत्युक्तम् । महाकाले च कालिकसम्बन्धेन वृत्तेस्तथात्वमक्षतमेव । गोसाध्यकस्थले व्यापकतावच्छेदकजन्यद्रव्यत्वप्रलयावृत्तित्वाद्यवच्छिन्नाभावमादायातिव्याप्तिवारण न सम्भवतीति स्फुटीकरणाय तद्रूपावच्छिन्नसाध्यकस्थलेऽप्यतिव्याप्तिमाह यत्र कालत्वमित्यादिना । अथैतादृशविवक्षापेक्षया लाघवात्प्रतियोगिसामानाधिकरण्यघटकाभावीयवृत्तौ दैशिकविशेषणताविशेषावच्छिन्नत्वमेव निवेश्यता तथा सति दैशिकविशेषणताविशेषसम्बन्धेन प्रलयान्यत्वादेरभावस्य प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्त्युद्धारस्य शक्यत्वात् । न चैव वह्निमान् धूमादित्यादौ कालिकविशेषणताविशेषसम्बन्धेन हेत्वधिकरणवृत्तेर्द्रव्यत्वत्वादिना द्रव्यत्वादेरभावस्य दैशिकविशेषणतया द्रव्यवृत्तित्वाभावादव्याप्तिरिति वाच्यम्, हेतुसामानाधिकरण्यशरीरेऽप्यभावीयवृत्तौ दैशिकविशेषणतासम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात्

तावतापि लाघवानपायात्। न च दैशिकविशेषणताविशेषेण प्रतियोगिसामानाधिकरण्यनिवेशेऽप्युक्तस्थलेऽतिव्याप्तिस्तदवस्थैव प्रलयान्यत्वाभावस्य प्रलयमात्रवृत्तेरभावमात्राधिकरणकतया प्रलयात्मकाधिकरणस्वरूपत्वात्तस्य च प्रलयान्यत्वरूपप्रतियोग्यधिकरणे परमाण्वादौ दैशिकविशेषणतया वृत्तेरितिवाच्यम्, एवमपि प्रलयान्यकालत्वादेरभावस्य प्रलयातिरिक्ते गगनादावपि वर्तमानस्य प्रलयानात्मकतया प्रतियोगिसामानाधिकरण्यस्य दुरुपपादतयाऽतिव्याप्त्यनवकाशात्। नैवम्, दैशिकविशेषणताप्रतियोगिसामानाधिकरण्यप्रवेशेऽपि दैशिकविशेषणतासम्बन्धेन प्रलयावृत्तिसाध्यके कालत्वादिहेतावतिव्याप्तिर्दुर्वारैव तत्र प्रलयमात्रस्य व्यभिचारनिरूपकाधिकरणतया साध्यतावच्छेदकसम्बन्धेन साध्यं प्रति व्यापकतावच्छेदिका यदभावप्रतियोगिता व्यापकताघटकसम्बन्धावच्छिन्नप्रतियोगिताकस्य तस्य प्रलयमात्रवृत्तितया प्रलयात्मकत्वान्निरुक्तरीत्यैव प्रतियोगिसामानाधिकरण्यादितरसम्बन्धावच्छिन्नाभावस्य प्रलयानात्मकत्वेऽपि प्रलयान्यवृत्तितया सुतरामेव प्रतियोगिसमानाधिकरणत्वादिति निरुक्तविवक्षणमावश्यकम्। एतदभिप्रेत्यैव प्रलयावृत्तिसाध्यकानुसरणं ग्रन्थकृत इति।

वस्तुतस्तु प्रलयादिमात्रवृत्तेरभावस्य प्रलयाद्यनात्मकत्वेऽपि दर्शितस्थलेपूक्तविवक्षामन्तरेणातिव्याप्तिवारणमशक्यं प्रलयान्यत्वादेरभावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपसम्बन्धेन प्रलयात्मकनानाध्वंसान्तर्गतयत्किञ्चिद्ध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिना हेत्वधिकरणे ध्वंसान्तरे स्वस्य समानाधिकरणत्वाद्यत्किञ्चिद्ध्वंसान्यत्वाभावस्य तद्ध्वंसमात्रवृत्तेस्तद्ध्वंसमात्रवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरे सत्त्वेऽपि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य स्वानधिकरणध्वंसावच्छेदेन स्वाधिकरणेऽपि सत्त्वेन तत्रैव प्रतियोगिसमानाधिकरणत्वात् प्रलयान्यत्वविषयकत्वोपलक्षितप्रमाया विषयतासम्बन्धेन केवलान्वयितया तादृशसम्बन्धावच्छिन्नतादृशप्रमाभावाप्रसिद्धेः प्रलयान्यविषयकत्वविशिष्टप्रमाभावस्य प्रलये प्रसिद्धावपि प्रलये तदन्यविषयकनित्यप्रमारूपप्रतियोगिसमानाधिकरणत्वात् प्रलयाविषयकप्रमाभावस्य च जन्यप्रमामात्रप्रतियोगिकतया कालिकाव्याप्यवृत्तितया प्रतियोगिमत्यपि तच्छून्यकालावच्छेदेन वृत्तेस्तादृशाभावमादायातिव्याप्तिवारणासम्भवात् प्रतियोगितायाः स्वरूपसम्बन्धात्मिकाया. प्रतियोगिभेदेन भिन्नतया प्रलयान्यभेदप्रतियोगिताया न तादात्म्येन साध्यव्यापकतायामवच्छेदकत्वमिति तादृशभेदस्याधिकरणे प्रलयान्यत्वरूपप्रतियोगिनस्तेन सम्बन्धेनाऽसत्त्वेऽपि नातिव्याप्त्युद्धारः। उक्तविवक्षणे तु प्रलये प्रलयाविषयकप्रमाभावस्य विषयतया प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्तिवारणसम्भवः। एवमुक्तरीत्या घटत्वाभाववान् मेयत्वादित्यादौ व्यावृत्तिर्बोध्या। हेतुमति प्रलय इति। हेतुमत्सामान्यान्तर्गतप्रलयान्तर्भावेनेत्यर्थः। 'तत्सामानाधिकरण्याभावात्, गवादिरूपप्रतियोगि-

सामानाधिकरण्याभावात्, अत्र गवादेरभावस्येत्यनुपज्यते। हेतुमति स्ववैशिष्ट्यनिवेशफलमाह स्वविशिष्टेतीति। साम्प्रदायिकैर्द्रव्ये संयोगसामान्याभावानभ्युपगमात्सद्धेतुत्वार्थं कपिसंयोगाभावपर्यन्तानुधावनम्। सकलेत्यधिकरणावृत्ति वेऽपीति। नित्यगुणादौ केनापि सम्बन्धेन कपिसंयोगासत्त्वादितिभाव। एतेन हेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगिसामानाधिकरण्यं नास्तीति सूचितम्। नाव्याप्तिरिति। नित्यगुणादेः स्वविशिष्टत्वाभावात्तदन्तर्भावेनातथात्वेऽपि स्वविशिष्टहेत्वधिकरणान्तर्भावेन तथात्वस्याक्षतत्वात्। अत्रोक्तयुक्त्या व्यापकतावटकाभावे प्रतियोगिवैयधिकरण्यस्य प्रवेशनीयतया साध्यवत्किञ्चिद्व्यन्तरसम्बद्धस्वविशिष्टसामान्यकभिन्नत्वरूपव्यापकतावच्छेदकस्य निवेशनीयतया वा कपिसंयोगाभावादिनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकत्वनिर्वाह इत्यभिप्रेत्य कपिसंयोगाद्यात्मकाभावमादायाव्याप्तिराशङ्किता, अन्यथा पुनः सत्तावान् जातेरित्यादौ काले कालिकसम्बन्धेन हेतुसमानाधिकरणानां सत्तात्वाद्यवच्छिन्नसत्ताद्यभावानां हेत्वधिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेन प्रतियोगिसामानाधिकरण्यविरहात्प्रसक्ताव्याप्तेर्वारणाय 'स्वविशिष्टेति' विशेषणमावश्यकमिति। आदिपदग्राह्यमपि तादृशस्थलमेवेत्यपि वोध्यम्। अत्र च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावा प्रत्येकं हेतुतावच्छेदकविशिष्टाधिकरणसामान्यान्तर्भावेन तत्प्रतियोगिसामानाधिकरण्यं तादृशा यावन्तोऽभावा यद्रूपविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकास्तद्रूपवत्त्वमित्यादिकं तादृशाभावे हेतुसामानाधिकरण्यविशेषणाघटितं हेत्वधिकरणे स्वविशिष्टत्वविशेषणाघटितञ्च व्यधिकरणधर्मावच्छिन्नाभावघटितं लघुलक्षणं सम्भवतीति वोध्यम्॥

ननु धूमवान् वह्नेरित्यादावतिव्याप्तिर्धूमाभावादेरप्ययोगोलकादौ गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वाद्गोत्वाद्यभावस्य तत्प्रतियोगित्वञ्च धूमाभावे जलवृत्तित्वविशिष्टगोत्वाभावो नास्तीतिप्रतीतिनियामकाभावस्याभावाधिकरणकाभावप्रतियोगिकाभावतयाऽधिकरणीभूतधूमाभावस्वरूपत्वाज्जलवृत्तित्वादिविशिष्टगोत्वाद्यभावस्य शुद्धविशेष्यानतिरिक्तत्वादित्याशङ्क्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावातिरिक्तत्वलक्षणाभावस्वरूपतां प्रदर्शयन् तत्स्वरूपतां प्रतिक्षिपति जलेत्यादिना।

(दी०) जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावो न तु धूमाद्यभावो जलादावपि तदभावप्रत्ययप्रसङ्गात्॥

(गा०) न च धूमाभावस्य स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसंयोगसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहात्कथमतिव्याप्तिरङ्केति वाच्यम्, जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्यान्युक्तयुक्त्या धूमाभावस्वरूपतासम्भवात् संयोगसम्बन्धेन द्रव्यात्मकप्रतियोगिनैव सामानाधिकरण्यसत्त्वात्। न चेवं जलवृत्तिद्रव्यमेव तत्प्रतियोगि

तस्यैव प्रतियोगितावच्छेदकजलवृत्तित्ववैशिष्ट्याक्रान्तत्वात् तस्य च
धूमाभावविशिष्टसकलवह्निमति वृत्तौ मानाभावान्नातिव्याप्तिः प्रसज्यते। यदि
च जलवृत्तित्ववैशिष्ट्यमन्यतरत्वघटकीभूतभेदप्रतियोगिनि गोत्वाभावत्वा-
वच्छिन्न एव विशेषणं न त्वन्यतरत्वावच्छिन्ने विशेषणतया प्रतियोगितावच्छे-
दकमिति जलावृत्तिद्रव्यस्यापि तत्प्रतियोगित्वमित्युच्यते, तदा तादृशाभा-
वस्य विशिष्टाभावानात्मकतयाऽन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगो-
त्वाभावाधिकरणधूमाभावाधिकरणकत्वानुपपत्तिरिति वाच्यम्, जलवृत्ति-
द्रव्य धूमाभावविशिष्टयादृशहेत्वधिकरणे नियमतो वर्तते तादृशान्यभिन्नादि-
हेतुकस्थल एव धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिक-
रण्यमादायातिव्याप्तिमाशङ्क्य 'जलादिवृत्ती'त्यादिग्रन्थस्यावतारणीयत्वात्। न
चैवं तादृशान्यतराभावस्यैव धूमाभावस्वरूपताप्रतिक्षेप उचित इति 'विशिष्ट-
गोत्वाभावस्याभाव', इति ग्रन्थासङ्गतिर्दुर्वारैवेति वाच्यम्, एतादृशग्रन्थ-
स्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्य-
तरत्वावच्छिन्नाभावपरत्वात्। न चैवमप्ययोगोलकभेदाद्यभावस्यायोगोल-
कत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूपता-
विरहात्तस्य प्रतियोगिसामानाधिकरण्यं न घटत इत्यतिव्याप्त्यप्रसक्तिः
साध्यतावच्छेदकसम्बन्धेन व्यापकताया लक्षणाघटकत्वं प्रागेव दूषितमतो
नायोगोलकान्यत्वाद्यभावस्य लक्षणाघटकत्वसम्भव इति वाच्यम्, अयोगो-
लकभेदाभावादेरपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधि-
करण्यसम्भवात्। अयोगोलकभिन्नभेदस्वरूपायोगोलकत्वनिरूपितायोगोलक-
निष्ठप्रतियोगितायास्तादात्म्यसम्बन्धेन साध्यव्यापकतायामवच्छेदकत्वं
प्रतियोगितायाः प्रतियोगिस्वरूपतामते न सम्भवतीत्ययोगोलकभिन्नात्म-
कतत्प्रतियोगिनस्तादात्म्येनायोगोलकेऽसत्त्वेऽपि नातिव्याप्त्युद्धारः, एवञ्च
धूमसाध्यकस्थले धूमसामान्याभावीयप्रतियोगिताया धूमसामान्यव्यापक-
तावच्छेदकत्वासम्भवेऽपि तत्तद्धूमव्यक्तिसाध्यकस्थले तादृशाभावस्य
लक्षणघटकतया तदभिप्रायेण तस्य गोत्वाभावप्रतियोगिकत्वनिराकरणं
तत्तद्धूमव्यक्तेरप्यनेकाधिकरणवृत्तितया नायोगोलकभिन्नस्य तादात्म्येन त-
त्साध्यव्यापकत्वमिति। न चैवं धूमाभावस्य गोत्वाभावाद्यप्रतियोगिकत्वेऽपि
पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्ति-
तादवस्थ्यमिति वाच्यम्, तादृशप्रतियोगिना स्वप्रतियोगिनिष्ठव्यापकताघट-
कयावत्सम्बन्धान्तर्गतसंयोगादिना सामानाधिकरण्यविरहाद् घटत्वाभाव-
वान् मेयत्वादित्यादावपि घटत्वाभावादिप्रकारकजन्यप्रमाभावस्य यावद्व्या-
पकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्य-
विरहेणातिव्याप्त्यनवकाशात्। न चैवं जलवृत्तित्वविशिष्टगोत्वाभावद्रव्या-
न्यतराभावस्य धूमाद्यभावस्वरूपतया संयोगेन प्रतियोगिसामानाधिकरण्य-
सत्त्वेऽपि धूमवत्त्वादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटसम्बन्धान्तर्ग-

तद्विशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्यासम्भवात् धूमवान् वह्ने रित्यादावतिव्याप्त्यसम्भवात्ताहशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपो न युक्त इति वाच्यम्, ताहशाभावस्य तत्स्वरूपत्वे तुल्ययुक्त्या धूमवत्त्वप्रकारकप्रमाभावनिष्ठस्य जलादिवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वप्रकारकप्रमान्यतराभावस्य तत्स्वरूपतया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन तयंत्र सम विशेष्यतासम्बन्धेन ताहशाभावस्य सामानाधिकरण्यसत्त्वादतिव्याप्ति प्रसक्तिरिति। नन्वेवमपि धूमवान् वह्नेरित्यादावतिव्याप्तिर्दुर्वारैवोक्ताभावस्य जलत्वाद्यभावस्वरूपत्वे तुल्ययुक्त्या धूमवद्वृत्तित्वविशिष्टताहशाभावस्य धूमाभावस्वरूपत्वेन द्रव्यसामान्यस्य तत्प्रतियोगित्वानपायात्, एवं धूमाद्यभावस्य धूमत्वादिना प्रमेयसामान्याभावसमनियतत्वेन तदभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगित्वात्। यदि च धूमत्वादिना प्रमेयं नास्तीति प्रतीतौ धूममात्रस्यैव प्रतियोगित्वग्रहो न तु प्रमेयान्तरस्य, अथवा प्रतियोगिसामानाधिकरण्यशरीरे न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता निवेशनीया, एवञ्च ताहशप्रतियोगिताको हेतुसमानाधिकरणाभावो ग्राह्यो यावत्प्रमेयनिष्ठप्रतियोगिता च तथाविधधूमत्वावच्छिन्नेव ताहशधर्मानवच्छिन्ना च धूमादिमात्रवृत्तिप्रतियोगितैव तदाश्रयसामानाधिकरण्यञ्च नायोगोलकाद्यन्तर्भावेनेति मन्यते, तथापि धूमाभावस्य वह्निधूमोभयाभावसमनियततया तदभिन्नत्वेन वह्नेरपि तदभावप्रतियोगितयाऽयोगोलकान्यत्वाभावस्यायोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियततया तदभिन्नत्वेनाकाशाभावस्यापि तत्प्रतियोगितया धूमवत्त्वादिप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकद्रव्याभावसमनियततया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन धूमभेदस्य धूमत्वसमवेतोभयत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन समवेतमात्रस्यैव तत्प्रतियोगितया हेतुसमानाधिकरणताहशाभावाना स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन दर्शितप्रतियोगिभि सामानाधिकरण्यमक्षतमेवेत्यतिव्याप्ति।

अथ साध्यतावच्छेदकानवच्छिन्नव्यापकतानवच्छेदिका या या प्रतियोगिता तन्निरूपकाभावाना स्वविशिष्टयावद्धेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्य विवक्षणीयमिति नातिव्याप्तिरिति चेत्तर्हि ताहशी या या प्रतियोगिता तदाश्रयसामानाधिकरण्य यत्र क्वचिद्यावद्धेत्वधिकरणान्तर्भावेन तत्त्वमित्येतावतैव सामञ्जस्येऽभावे यावत्त्वस्य, तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य, हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसङ्ग, एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वाद्यवच्छिन्नप्रतियोगिताकसाध्याद्यभावमादाय लक्षणसमन्वयसम्भवाद्व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि क्षतिविरहेणताहशव्याप्तिलक्षणाशङ्काया 'प्रतियोग्यवृत्तिश्च' इत्यादिना ताहशभावखण्डनस्यासङ्गत्यापत्तिरित्यतो लक्षणान्तरमाह यत्समानाधिकरणानामिति ॥

(दी०) यत्समानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत्। ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव। शेषं दर्शितदिशाऽनुसेयमत आह प्रतियोग्यवृत्तिश्चेति ॥

(गा०) अत्रापि यत्तत्पदयो. पूर्ववत्तद्धर्मावच्छिन्नपरता बोध्या, वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वेन घटाद्यभावा एव तेषाञ्च स्वविशिष्टयावद्वेत्वधिकरणान्तर्भावेण वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वय अत्रापि प्रतियोगिसामानाधिकरण्यनिवेश उक्तक्रमेण धूमवान् वह्नेरित्यादावतिव्याप्तिरत प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेश । तथा च धूमाद्यभावानां वह्निधूमोभयत्वाद्यवच्छिन्नप्रतियोगिताश्रयवह्न्यादिना सामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्ति, द्रव्यत्वेन धूमो नास्तीतिप्रतीत्या च द्रव्यत्वादे प्रतियोगितावच्छेदकत्वं न भासतेऽपि तु धूमत्वादेरेव द्रव्यत्वादेस्तु तृतीयोल्लिखितवैशिष्ट्यमात्रं धूमादौ भासत इत्युपेयतेऽतस्तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदक द्रव्यत्वादिकमपि धूमाद्यभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणेऽप्यतिव्याप्तेर्दुर्वारतेत्याशङ्काया नावकाश. ।

एतेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टस्य वह्नित्वरूपेण योऽभावस्तस्य धूमाभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमित्यपास्तम्। वह्नित्वेन तादृशधूमवद्वृत्तित्वविशिष्टं नास्तीतिप्रतीतौ तादृशधूमवद्वृत्तित्ववैशिष्ट्यस्यैव प्रतियोगितावच्छेदकत्वावगाहित्वोपगमादन्यथा धूमवद्वृत्तित्वविशिष्टवह्निमति धूमशून्ये वह्नित्वरूपप्रतियोगितावच्छेकविशिष्टवह्निरूपप्रतियोगिसत्त्वेन तादृशप्रतीत्यनुदयप्रसङ्गात् ।

अस्तु वा तादृशवैशिष्ट्यसहितस्य वह्नित्वस्य तथात्वं तावतापि न क्षति. प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणपरत्वात्। अथैवमपि घटभिन्नत्वेन धूमघटान्यतरन्नास्तीत्यत्र घटधूमान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभानं धूमशून्ये घटवति तादृशप्रतीत्यनुपपत्ते । नापि घटभिन्नत्वसहितस्य तस्य गौरवात्, किन्तु घटभिन्नत्वमात्रस्यैव, एवञ्च तादृशाभावस्य धूमाभावसमनियततया धूमाभावस्यापि घटभिन्नत्वं प्रतियोगितावच्छेदकम्, एवं भेदत्वेनायोगोलकभेदघटात्यन्ताभावान्यतराभावस्यायोगोलकभेदत्वावच्छिन्नाभावसमनियततया भेदत्वमप्ययोगो-

लकभेदाभावप्रतियोगितावच्छेदकम्। एवं द्रव्यत्वभिन्नत्वेन द्रव्यत्वधूमत्वान्यतराभावस्य धूमभेदसमनियततया द्रव्यत्वभिन्नत्वमपि धूमभेदप्रतियोगितावच्छेदकम्, एवमिच्छान्यत्वेनेच्छाऽयोगोलकाविषयकज्ञानान्यतराभावस्यायोगोलकाविषयकज्ञानाभावसमनियततयेच्छान्यत्वमपि तादृशज्ञानाभावप्रतियोगितावच्छेदकं तादृशधर्मावच्छिन्नानाञ्चायोगोलकादावपि सत्त्वादतिव्याप्तिस्तदवस्थैवेतिचेत्, तर्हि तत्प्रतियोगितावच्छेदकेत्यनेन प्रतियोगिताया न्यूनवृत्तिभिन्नं सदवच्छेदकं तदेव विवक्षणीयम्, न्यूनवृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्वम्, तद्भिन्नत्वञ्च व्यधिकरणधर्मसाधारणमपि घटधूमान्यतरादिनिष्ठप्रतिगितायाश्च न्यूनवृत्त्येव घटभिन्नत्वादिकम्। न च वह्नित्वेन प्रमेयं नास्तीत्यत्र प्रमेयसामान्यवृत्तित्वेन या वह्नित्वावच्छिन्नप्रतियोगिता प्रतीयते वह्निर्नास्तीत्यत्रापि वह्निवृत्तितया सैव प्रतीयत इत्युपेयत एकधर्मावच्छिन्नविभिन्न प्रतियोगिताकल्पने गौरवात्, तथा च कालिकादिसम्बन्धेन हेतुसमानाधिकरणवह्नित्वावच्छिन्नवह्न्याद्यभावप्रतियोगिताया न्यूनवृत्तिभिन्नावच्छेदकाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम्, वह्नित्वेन प्रमेयं नास्तीतिप्रतीतौ प्रमेयत्वविशेषितस्य वह्नेरेव प्रतियोगित्वं भासते नान्यस्येत्यभ्युपगम इति तादृशाभावप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वस्यैवासिद्धेः।

अथवा प्रतियोगितावच्छेदकपदं प्रतियोगिताया अनतिरिक्तवृत्ति सदवच्छेदकं तत्परम्, अनतिरिक्तवृत्तित्वञ्च स्वव्यापकतत्कान्यत्वतत्सामानाधिकरण्योभयाभाववत्त्वम्, तथात्वञ्च व्यधिकरणधर्मसाधारणमपि, घटधूमान्यतरादिनिष्ठप्रतियोगितायाश्चातिरिक्तवृत्त्येव घटभिन्नत्वादिकम्, तादृशप्रतियोगिताया यावद्घटभिन्नादिसाधारण्यप्रसक्तेर्वह्नित्वाद्यवच्छिन्नप्रतियोगितायाश्च प्रमेयसामान्यवृत्तित्वेऽपि तदनतिरिक्तवृत्त्यवच्छेदकं वह्नित्वादिकमेव स्वव्यापकतत्कान्यत्वस्याप्रसिद्धत्वादिति नानुपपत्तिगन्धोऽपीति।

प्रतियोगितायाः स्वन्यूनवृत्तिभिन्नतत्कं सदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं वा विवक्षितम्, न्यूनवृत्तित्वञ्च सामानाधिकरण्यघटितमिति व्यधिकरणधर्मसंग्रहः। तत्प्रतियोगितासमानाधिकरणं सद्यत्तत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं तदन्यतत्प्रतियोगितावच्छेदकं वा निवेश्यम्। एतल्लक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावसमनियतत्वेन घटत्वादिना वह्न्याद्यभावस्य हेत्वधिकरणावच्छेदेन वह्नित्वावच्छिन्नरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसम्भवेऽपि वह्निघटोभयत्वावच्छिन्नाभावस्यापि तथाविधतया तस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावेनासम्भव इत्यतो व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुक्तम्, अत एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे हेतुसमाना-

धिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाव स्याप्रसिद्धयाऽसम्भव, अयमात्मा ज्ञानादित्यादौ केवलान्वयिसाध्यके चाव्याप्तिर्वा भवतीत्यभिप्रायकतया 'प्रतियोग्यवृत्तिश्च, इत्यादिग्रन्थसङ्गति । न चायमात्मा ज्ञानादित्यादौ पूर्वक्षणादिवृत्तित्वविशिष्टात्मत्वत्वादेरात्मत्वादिव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्योत्तरक्षणावच्छेदेन हेतुसमानाधिकरणत्वेद् वाच्य ज्ञेयत्वादगुणत्वादित्यादावप्येतत्क्षणान्यक्षणवृत्तित्वविशिष्टवाच्यत्वत्वादे विषयतासम्बन्धेन जन्यज्ञानत्वविशिष्टविषयक जन्यज्ञाननिष्ठतद्व्यक्तित्वादेश्च साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्यैतत्क्षणावच्छेदेन प्रलयान्तर्भावेन च हेतुसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि न तादृशाभावाप्रसिद्धिरिति वाच्यम्, प्रतियोगिवैयधिकरण्याघटितव्यापकताया एव निवेशनीयतया निरुक्तधर्मावच्छिन्नाभावानामपि साध्यवति सत्त्वेन तादृशधर्माणा व्यापकतावच्छेदकत्वासम्भवात् । न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव किं न निवेश्यते प्रमेयसाध्यकस्थले संयोगसमवायादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणसमन्वयादिति वाच्यम्, तथा सति लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यके तथाविधाभावाप्रसिद्धयाऽव्याप्त्यापत्ते ।

अत्र च ज्ञानवानात्ममहाकालान्यतरत्वादित्यादावतिव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन व्यापकत्वं तेनैव सम्बन्धेन प्रतियोगिसामानाधिकरण्य विवक्षणीयम्, महाकालान्यत्वविशिष्टघटादिसाध्यकस्थले कालत्वादेर्व्यभिचारित्वेऽपि तत्र हेतुसमानाधिकरणस्य महाकालान्यत्वविशिष्टघटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्याभावेनातिव्याप्त्यभावात्, तादात्म्यसम्बन्धेन प्रमेयसाध्यके तादृशसम्बन्धेन साध्य प्रति तादृशसम्बन्धेन व्यापकतायामवच्छेदकीभूतो य प्रमेयत्वादिरूपकेवलान्वयिधर्मस्तदवच्छिन्नस्य संयोगसमवायविषयितादिसम्बन्धावच्छिन्नाभावमादायैव लक्षणसमन्वयसम्भवात्, अभावप्रतियोगिताया साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रयोजनविरहेणानिवेशात् तन्निवेशेऽपि व्यधिकरणसमवायित्वावच्छिन्नप्रतियोगितावच्छेदकताकप्रमेयत्वादिमद्भेदमादाय लक्षणसमन्वयसम्भवात् 'समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्य' इति मिश्रोक्तेस्तादृशभेदस्यापि सोन्दडसम्मतत्वादिति केचित् ।

तदसत्, घटत्वाभाववान् प्रमेयत्वादित्यादौ पूर्वोक्तदिशाऽतिव्याप्ते । स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनमपि न सत्, तथा सति वाच्य ज्ञेयत्वादित्यादौ विषयतासंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि लक्षणसामञ्जस्यात् 'प्रतियोग्यवृत्तिश्च'इतिग्रन्थावतारासङ्गते ।

एतेन विषयतासम्बन्धेन व्यापकता तेन सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं विवक्षणीयम्, साध्यवत्त्वप्रकारकप्रमात्वाद्यवच्छिन्नाभावमादाय सर्वत्र लक्षणसङ्गमनमतिव्याप्तिवारणञ्चेति निरस्तम्, 'ज्ञेयत्वत्वादिना वाच्यत्वादीनामभाव' इत्येतादृशग्रन्थासङ्गतेश्च, ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य विषयतासम्बन्धेनाव्यापकत्वात्, किन्तु स्वप्रतियोगितावच्छेदकसम्बन्धेन व्यापकत्व तेनैव प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्य विवक्षणीय व्यभिचारिणि साध्याद्यभावस्य किञ्चिद्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकविशेषणताविशेषेण तादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्येऽपि तदवच्छिन्नभावसामानाधिकरण्यासम्भवान्नातिव्याप्ति । किञ्चिद्विशिष्टस्य स्वस्य योऽभाव सामानाधिकरण्यसम्बन्धेन तद्विशिष्टस्याभावश्च स्वसमनियतोऽपि स्वस्माद्तिरिक्त एव अभावमात्रप्रतियोगिकाभावस्येव तदभावप्रतियोगिरूपताया सिद्धान्तसिद्धत्वात् अतो धूमाद्यभावस्य सामानाधिकरण्यसम्बन्धेन ह्रदादिवृत्तित्वविशिष्टधूमाद्यभावाभावविशिष्टत्वावच्छिन्नाभावसामानाधिकरण्येऽपि न क्षति । वस्तुतस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वविशेषणमुपेक्ष्य प्रतियोगितावच्छेदकेऽभावावृत्तित्व निवेशनीय तादृशाभावविशिष्टत्वञ्चाभावसाधारणमिति न दोष । 'यावद्भावानाम्' इत्यत्राभावपदं भावभिन्नपरम्, अत कालिकादिसम्बन्धेन हेतुसमानाधिकरणस्य वह्न्यादिव्यापकतावच्छेदकरूपावच्छिन्नह्रदत्वाद्यभावाभावस्य ह्रदत्वादे स्वप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यासम्भवेऽपि न क्षति । न च ह्रदत्वाभावाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियततया स्वप्रतियोगितावच्छेदकतादृशप्रमाविषयत्वत्वावच्छिन्नभावसामानाधिकरण्यमस्त्येवेति वाच्यम्, तस्य भावतया भिन्नत्वात् । एव सति कपिसयोगाभाववान् मेयत्वादित्यादौ कपिसयोगात्मकाभावस्य लक्षणाघटकत्वेऽपि विवक्षणीयस्वविशिष्टेत्यस्य सार्थकता पूर्वदिशाऽवसेया । न च भावभिन्नाभावविवक्षणेऽयमात्मा ज्ञानादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वावच्छिन्नप्रतियोगिताकस्याकाशाभावादे स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासम्भवादत्र लक्षणसमन्वयासम्भव इति वाच्यम्, आकाशाभावीयतादृशाभावत्वस्य दैशिकविशेषणतया साध्यवद्वृत्तेराकाशाभावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्वविरहेण लक्षणाघटकत्वात् ।

अस्तु वा व्यापकतावच्छेदकरूपांश एव भाववृत्तित्वविशेषणम्, इदं वाच्यं ज्ञेयत्वादित्यादौ च व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावस्य प्रतियोगितावच्छेदकं न प्रतियोगितावच्छेदकसम्बन्धघटित

व्यापकतावच्छेदकमतस्तादृशाभावस्य न लक्षणघटकतेति नोक्तं'प्रतियोग्यवृत्तिश्च' इत्यादिग्रन्थासङ्गतिरिति ।

न च प्रतियोगितावच्छेदकसम्बन्धेन व्यापकताविवक्षणेऽपीदं वाच्यं ज्ञेयत्वादित्यादौ विषयितासम्बन्धेन वाच्यत्वत्वादिमतो ज्ञानादेर्यः स्वरूपसम्बन्धेनाभावस्तस्य स्वप्रतियोगितावच्छेदकीभूतस्वरूपसम्बन्धघटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकतया हेतुसमानाधिकरणतया स्वरूपसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणतया च तत्र व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि तमादायैव लक्षणसामञ्जस्यमिति तादृशग्रन्थासङ्गतितादवस्थ्यमिति वाच्यम्, धूमवान् वह्नेरित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभावस्य कालिकसम्बन्धेन धूमत्वादिविशिष्टवह्न्यादिना समं संयोगेन, समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकस्यायोगोलकावृत्तिजातित्वाद्यवच्छिन्नाभावस्य कालिकसम्बन्धेन तादृशजातित्वादिविशिष्टायोगोलकीयरूपादिना समं समवायेन, स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य कालिकसम्बन्धेन तादृशविषयत्वत्वादिविशिष्टसंयोगादिध्वंसेनानुयोगितासम्बन्धेन तादृशविषयत्वत्वादिविशिष्टतादृशविषयत्वाद्यभावेन च समं स्वरूपसम्बन्धेन, विषयतासम्बन्धावच्छिन्नप्रतियोगिताकधूमवत्त्वप्रकारकप्रमाद्यभावस्य विषयितासम्बन्धेन कालिकसम्बन्धेन वा तादृशप्रमात्वादिविशिष्टं यद्गोलकादिविषयकं ज्ञानं तेन समं विषयतासम्बन्धेन सामानाधिकरण्यसत्त्वादतिव्याप्तेर्वारणाय प्रतियोगितावच्छेदकघटकसम्बन्धेनैव प्रतियोगितावच्छेदकवैशिष्ट्यस्य विवक्षणीयतया वह्निमान् धूमादित्यादौ विषयितासम्बन्धेन द्रव्यत्वत्वादिमतः समवायसम्बन्धावच्छिन्नाभावस्य स्वप्रतियोगितावच्छेदकसमवायादिघटितद्रव्यत्वादिनिष्ठव्यापकतायां स्वरूपसम्बन्धेनावच्छेदकीभूतो यो द्रव्यत्वत्वादिस्तदवच्छिन्नप्रतियोगिताकस्य स्वप्रतियोगितावच्छेदकताघटकविषयितासम्बन्धेन प्रतियोगितावच्छेदकविशिष्टज्ञानादिना समं हेत्वधिकरणे स्वप्रतियोगितावच्छेदकसमवायादिना सामानाधिकरण्यं न सम्भवतीति व्यापकतावच्छेदकतायामपि स्वप्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयत्वेनेदं वाच्यं ज्ञेयत्वादित्यादौ दर्शिताभावानां लक्षणघटकत्वादिति दिक् ।

नन्वत्र लक्षणे समवायित्वादिना वाच्यत्वाद्यभावीयसमवायित्वादिरूपप्रतियोगितावच्छेदकस्य वाच्यत्वादिव्यापकतानवच्छेदकत्वाद्वाच्यत्वादिसाध्यकस्थले न तादृशाभावानां लक्षणघटकता तथा च तादृशाभाव एव दुर्लभ इत्यत आह न्यवच्छादिनेति । वाच्यत्वादीनामित्यादिपदाद् घटादेरपि परिग्रहः । शेषमिति । स्वविशिष्ट्यावद्धेत्वधिकरणान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविनिवेशनं हेतुसामानाधिकरण्यशरीरे सम्बन्धविशेषनिवेशनं तत्प्रयोजनञ्चेत्यर्थः । अत्र च निरुक्ताभावेषु स्वविशिष्ट-

हेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशापेक्षया प्रतियोगिवृत्तित्वमेव निवेशयितुमुचितं सद्धेतौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां तादृशाभावानां केवलान्वयितया प्रतियोगिन्यपि वृत्तेर्लक्षणसमन्वयसम्भवाद्वह्निमान् धूमादित्यादौ कालिकादिसम्बन्धेन हेतुसमानाधिकरणस्य रूपान्यत्वप्रकारकप्रमाविषयत्वाद्यभावस्य दैशिकविशेषणतया हेतुसामानाधिकरण्यनिवेशनेन वह्न्यादिभेदस्य प्रतियोगितावच्छेदकतादात्म्यसम्बन्धघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः। कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगादेरुक्तरीत्या व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण दैशिकविशेषणतया हेतुसामानाधिकरण्यविरहेण भावभिन्नत्वविरहेण च लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः। धूमवान् वह्नेरित्यादौ धूमाद्यभावस्य प्रतियोगिवृत्तित्वेऽप्ययोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाभावस्य भावप्रतियोगिकतयाऽयोगोलकत्वाद्यतिरिक्तस्य प्रतियोगिन्यवृत्तित्वान्नातिव्याप्तिरित्यवधेयम्[1] ॥

चक्रवर्तिलक्षणमाह केचित्त्विति।

(दी०) केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगिताया अनवच्छेदकम्, हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वाऽभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः। एवञ्च व्याप्तेरव्यभिचारिसम्बन्धरूपतापि सङ्गच्छते। हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात् ॥

(गा०) व्याप्यवृत्तेरिति। सद्धेतौ साध्यावृत्तिघटत्वादिना साध्याभाव एव लक्षणघटकस्तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वा

---

१ नन्वयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्यायोगोलकावृत्तित्वावच्छिन्नाभावमननियतत्वात् तद्भिन्नत्वेन तादृशाभावप्रतियोग्ययोगोलकावृत्तावयोगोलकेऽयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभाववत्त्वादतिव्याप्तिरिति चेन्न। हेतुसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकायोगोलकत्वप्रकारकप्रमाविषयत्वाभावत्वावच्छिन्नप्रतियोगिताकस्यायोगोलकत्वप्रकारकप्रमाविषयत्वस्वरूपाभावस्याभावमात्रवृत्तिप्रतियोगिकत्वेन स्वसमानयनात्पि भाववृत्तिप्रतियोगिताकत्वेनातिरिक्तादयोगोलकावृत्तित्वावच्छिन्नाभावातिरिक्तस्य यावल्लक्षणगतस्य प्रतियोगिवृत्तित्वविरहान्नातिव्याप्तिविरहात्। हेत्वधिकरणवृत्तित्वञ्च प्रतियोगिवृत्तित्वञ्च तादृशाभावत्वरूपेण बोध्यम्, तेनाधिकरणस्वरूपाभावमादाय कुत्राप्यव्याप्त्यतिव्याप्त्योर्नावकाशः। एवमयोगोलकभेदत्वेन प्रमेयसामान्याभावीयप्रतियोगिताया यदि यावत्प्रमेयवृत्तित्वं विचार्यते तदा प्रतियोगितावच्छेदकसमानाधिकरणत्वमेव विवक्षणीयमित्यवधेयमिति २ पुस्तके अधिक पाठ।

लक्षणसमन्वयः, व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि लक्षणघटकत्वान्नातिव्याप्तिः। कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तेर्वारणाय व्याप्यवृत्तेरिति। व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वं न त्ववच्छिन्नवृत्तिकान्यत्वम्, कपिसंयोगी सत्त्वादित्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावादेर्द्रव्येऽवच्छिन्नवृत्तिकतया तदन्यत्वाभावाद्घटत्वादिना साध्याभावस्यैव लक्षणघटकतयाऽतिव्याप्त्यापत्तेः। निरुक्तव्याप्यवृत्तित्वविशिष्टस्य च हेत्वधिकरणवृत्तित्वं बोध्यम्, अन्यथा कपिसंयोगी एतत्त्वादित्यादौ कपिसंयोगसामान्याभावस्य द्रव्ये हेतुसमानाधिकरणतया गुणादौ च निरवच्छिन्नवृत्तिकतया तमादायाव्याप्तिवारणासम्भवाद्धेत्वधिकरणनिरूपितनिरवच्छिन्नाधेयतावत्त्वं हेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरणताकत्वं वा दलद्वयपर्यवसितार्थः।

केचित्तु 'व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्य' इति समुदायस्य हेत्वधिकरणे व्याप्यवृत्तिर्यः साध्याभावस्तस्येत्यर्थः, हेत्वधिकरणे व्याप्यवृत्तित्वञ्च हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यदभावनिष्ठं तद्व्यक्तित्वं तत्त्वम्। न च विशिष्टसत्तावान् जातेरित्यादौ गुणादिनिष्ठसत्तादिरूपाभावप्रतियोगिताया विशिष्टसत्ताद्यभावनिष्ठतद्व्यक्तित्वस्यावच्छेदकत्वाद् विशिष्टसत्त्वाद्यभावस्य व्याप्यवृत्तित्वानुपपत्तिर्यदभावाभावत्वावच्छिन्नानधिकरणत्वं हेतुमतस्तत्त्वमिति विवक्षणे व्यधिकरणधर्मावच्छिन्नाभावासङ्ग्रहप्रसङ्गस्तदभावाप्रसिद्धेरिति वाच्यम्, यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकानुयोगितानिरूपकतानवच्छेदकं यदभावत्वं तत्त्वस्य विवक्षितत्वात्। गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययेन विशिष्टसत्ताभावत्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टायाश्च सत्ताया गुणादिवृत्तितानभ्युपगमेन विशिष्टसत्त्वाद्यभावस्य व्याप्यवृत्तितानिर्वाहादित्याहुः। ६

ननु संयोगिभिन्नं प्रमेयत्वादित्यत्रातिव्याप्तिः। संयोगिभेदाभावस्य तद्भेदप्रतियोगितावच्छेदकीभूतसंयोगात्मकस्याव्याप्यवृत्तित्वेन लक्षणघटकत्वाभावाद्व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसङ्क्रमनादिति चेन्न, संयोगिभेदस्य व्याप्यवृत्तित्वे तस्य द्रव्यत्वसंयोगप्रकारकप्रमाविशेष्यत्वाद्यवच्छिन्नभेदसमनियततया तदभिन्नत्वेन तद्भेदप्रतियोगितावच्छेदकद्रव्यत्वादिकमपि संयोगिभेदाभावस्तस्य हेत्वधिकरणे व्याप्यवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य च साध्यतावच्छेदके सत्त्वेनातिव्याप्त्यनवकाशात्। एवं द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादौ व्याप्यवृत्तेः सत्तारूपाभावस्य प्रतियोगितावच्छेदकं साध्यतावच्छेदकमित्यव्याप्तिरित्यपि नाशङ्कनीयम्, सत्तादिसत्त्वेऽपि द्रव्यादौ द्रव्यान्यत्वविशिष्टसत्ताभावो नास्तीत्यादिप्रत्ययानुदयाद्विशिष्टनिरूपिताधिकरण-

ताविशेषस्यैव विशिष्टाभावाभावत्वोपगमात्तावतापि नाभावाभावस्य प्रतियोगिरूपताक्षतिर्विशिष्टाभावस्य विशिष्टाधिकरणत्वाभावसमनियतत्वेन तद्भिन्नतया विशिष्टसत्ताधिकरणताया अपि विशिष्टाभावप्रतियोगित्वात् ।

परे तु संयोगत्वेन संयोगनिरूपिताधिकरणतायाः किञ्चिदवच्छिन्नत्वेऽपि संयोगिभेदाभावत्वेन तन्निरूपिताधिकरणता निरवच्छिन्नैव द्रव्ये संयोगिभेदस्याप्रत्ययादवच्छेदकमनन्तर्भाव्य तदभावत्वावच्छिन्नवत्ताप्रतीतेः । एवं द्रव्यादौ सत्तात्वावच्छिन्नसत्ताद्यधिकरणतासत्त्वेऽपि द्रव्यान्यत्वविशिष्टसत्तात्वादिनेव तदवच्छिन्नप्रतियोगिताकाभावाभावत्वेनापि न वृत्तिस्तत्र विशिष्टाभावो नास्तीत्यप्रत्ययात्, तथा च साध्यनिष्ठयादृशप्रतियोगिताकाभावत्वावच्छिन्ननिरूपितानवच्छिन्नाधिकरणता हेत्वधिकरणवृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यमिति न कश्चिद्दोष इत्याहुः ।

अथात्र हेत्वधिकरणवृत्तित्वं यदि येन केनचित्सम्बन्धेन तदा कालिकसम्बन्धेन धूमाधिकरणवृत्तिवह्नित्वाद्यवच्छिन्नवह्न्यभावादिकमादायाव्याप्तिः । यदि च कालिकसम्बन्धेन काले वह्न्यभावादेर्वृत्तिर्वह्न्यनधिकरणदेशावच्छिन्नैवेति नासौ हेत्वधिकरणे निरवच्छिन्नवृत्तिक इति मन्यते, तदापि सत्तावान् जातेरित्यादौ विषयितासम्बन्धेन हेतुमति ज्ञानादौ वर्तमानसाध्याभावमादायाव्याप्तिर्दुर्वारैव, दैशिकविशेषणतासम्बन्धेन हेत्वधिकरणवृत्तित्वनिवेशे च घटत्वाभावसाध्यके व्यभिचारिण्यतिव्याप्तिस्तत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य भावरूपसाध्याभावस्य तेन सम्बन्धेनावृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् । एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताके आकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिर्दैशिकविशेषणतया हेतुसमानाधिकरणस्याकाशाभावस्य प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदके सत्त्वात्, कालिकसम्बन्धेनाकाशाभावरूपप्रतियोगिमत्ताया एव कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावो नास्तीतिप्रत्ययनियामकत्वादाकाशाभावस्यैव तादृशसाध्याभावरूपत्वे बाधकविरहादिति चेन्न, स्वीययादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकज्ञानं विरोधि तादृशसम्बन्धेन हेत्वधिकरणवृत्तियोऽभावस्तदीयतादृशप्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वात् । आकाशाभावस्य दैशिकविशेषणतासम्बन्धो न दर्शिताकाशाभावाभाववत्ताज्ञानविरोधिज्ञानविषयोऽपि तु कालिकसम्बन्ध एव, न च तेन सम्बन्धेन स आत्मनि वर्तते, अत आकाशाभावीयसाध्यनिष्ठप्रतियोगिताया न यादृशप्रतियोगित्यनेनोपादानसम्भवः, अपि तु व्यधिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगिताया एव, तादृशाभावज्ञानस्य दैशिकविशेषणतासंसर्गकस्य व्यधिकरणधर्मप्रकारेण साध्यवत्त्वावगाहिनं भ्रमं प्रति विरोधित्वात्, सामान्यतश्च प्रतियोगिप्रकारकज्ञाननिवेशे आकाशप्रकारकज्ञानं प्रति दैशिकविशेषणता-

सम्बन्धेनाऽऽकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतयोक्तदोषतादवस्थ्यमिति यादृशप्रतियोगिताश्रयेत्युक्तम्। प्रतियोगिताश्रयवत्ताज्ञानञ्च तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारकं ग्राह्यं तेनाकाशत्वेन तादृशसाध्यवत्ताज्ञानं प्रति दैशिकविशेषणतयाऽऽकाशाभावप्रकारकज्ञानस्य विरोधित्वेऽपि न क्षतिः। एवञ्च यादृशप्रतियोगिताश्रयावगाहित्वनिवेशे प्रयोजनाभावाद् यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानं प्रतिबन्धकमित्येव वक्तव्यम्, साध्यवत्ताज्ञानविरोधित्वं चैतल्लक्षणे निवेश्यम्, न चाकाशत्वादिना साध्यवत्ताज्ञानविरोधितामादाय दर्शितदोषतादवस्थ्यं साध्यतावच्छेदकावच्छिन्नप्रकारताकज्ञानविरोधित्वपर्यन्तनिवेशे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववत्ताज्ञानस्य व्यधिकरणधर्मादिप्रकारकसाध्यवत्ताज्ञानं प्रत्येव विरोधित्वेन साध्यतावच्छेदकावच्छिन्नप्रकारताकज्ञानाविरोधितया तादृशसाध्याभावाप्रसिद्धेरिति वाच्यम्, घटत्वविशिष्टवह्निमदित्यादिज्ञानस्यापि साध्यतावच्छेदकावच्छिन्नप्रकारताकत्वस्य 'अधिकं तु' इत्यादिन्यायेनाक्षतत्वात्। न च तन्मात्रावच्छिन्नप्रकारताकत्वमवश्यं निवेश्यमन्यथाऽऽकाशत्वनिरुक्तसाध्यतावच्छेदकोभयरूपेण साध्यवत्ताज्ञानं प्रति दैशिकविशेषणतयाऽऽकाशाभाववत्ताज्ञानस्य विरोधितया तद्दोषतादवस्थ्यमिति कथं व्यधिकरणधर्मावच्छिन्नाभावसङ्ग्रह इति वाच्यम्, प्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकारतानिवेशेऽपि व्यधिकरणधर्मावच्छिन्नाभावासङ्ग्रहात्तदवच्छिन्नप्रकारतामात्रनिवेश उक्तस्थले आकाशाभावीयदैशिकविशेषणताया वारणासम्भवात्. द्वितीयलक्षणे यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकातिरिक्तानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन सम्बन्धेन स्वप्रकारकं ज्ञानं विरोधीति विवक्षणवदेतल्लक्षणेऽपि साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरोधितानिवेशेन प्रतीकारसम्भवादाकाशत्वादेस्तादृशाकाशाभावाभावत्वादिरूपसाध्यतावच्छेदकातिरिक्ततया तदवच्छिन्नप्रकारताकज्ञानविरोधितामादाय दोषाभावात्। हेतुसमानाधिकरणस्य व्याप्यवृत्तेर्वह्नित्वादिना घटाद्यभावस्य प्रतियोगितावच्छेदकमेव वह्नित्वादिरूपं साध्यतावच्छेदकमतः साध्याभावस्येति। यद्यपि वह्नित्वेन घटाभावादेर्घटत्वेन वह्न्यभावाद्यभिन्नतया तादृशाभावोऽपि साध्याभाव एव, तथापि प्रतियोगितावच्छेदकभेदेनाभावभेदमतेनेदं लक्षणम्, समनियताभावैक्यमताभिप्रायेण चाग्रिमं लक्षणम्, अथवा हेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वनिवेशान्न दोषो वह्नित्वादिना घटाद्यभावस्य घटत्वादिना वह्न्याद्यभावाभिन्नत्वेऽपि तदीयघटादिनिष्ठप्रतियोगिताया एव व्यधिकरणवह्नित्वाद्यवच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितायां वह्नित्वादेरनवच्छेदकत्वात्। प्रतियोगिता साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन निवेशनीया, तेन सम्बन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादाय नासम्भवः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नत्वं

व्यवस्थापितमेव। प्रतियोगितावच्छेदकत्वञ्च साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नं ग्राह्यं तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणस्य विषयितया गुणत्वादिमत: समवायेनाभावस्य ज्ञानादिनिष्ठप्रतियोगितावच्छेदकत्वेऽपि साध्यतावच्छेदकस्य न क्षतिः। सर्वत्र द्वित्वावच्छिन्नप्रतियोगिताकसाध्याभावमादायैवैतल्लक्षणसमन्वयसम्भवाद्व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि क्षतिविरहेण व्यधिकरणधर्मावच्छिन्नाभावखण्डनं मूलकृतोऽकिञ्चित्करमतो लक्षणान्तरमाह हेतुसमानाधिकरणस्येति। अत्र च व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वे व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमादायाव्याप्तेर्वारणायोपात्तस्य 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्याल्लक्षणासामञ्जस्यमिति तादृशाभावखण्डनं सङ्गच्छते। अत्रापि 'हेतुसमानाधिकरणस्य व्याप्यवृत्तेः' इत्यस्य पूर्वोक्त एव पर्यवसितार्थः, व्यावृत्त्यादिकमपि पूर्वोक्तमेव। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादावव्याप्तिवारणाय पूर्वोक्तरीत्यनुसरणे गौरवाद्व्याप्यवृत्तित्वं परित्यज्य प्रतियोगिव्यधिकरणत्वेनाभावं विशेषयति प्रतियोगिव्यधिकरणस्य चेति। पूर्वलक्षणे साध्याभावस्य विशिष्योपादानात्तस्य च हेत्वधिकरणे साध्यरूपप्रतियोगिना सामानाधिकरण्यमावश्यकमेवैकव्यक्तिवृत्तिसाध्यकेऽतस्तत्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्ध्याऽव्याप्तिरिति तन्नोक्तम्। प्रतियोगिव्यधिकरणत्वञ्च न प्रतियोग्यधिकरणावृत्तित्वम्, संयोगि सत्त्वादित्यादौ संयोगाद्यभावस्यानर्थात्यादभावान्तरमादायातिव्याप्तेः किन्तु प्रतियोग्यनधिकरणवृत्तित्वम्। एवञ्च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तेरितिदलद्वयपर्यवसितार्थः, प्रतियोग्यनधिकरणत्वञ्च साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणभिन्नत्वम्, अतः समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेतौ नातिव्याप्तिः। इत्थञ्च प्रतियोगिता न सम्बन्धविशेषावच्छिन्नत्वेन विशेषणीया विशेषणताविशेषेणाभावसाध्यके सर्वस्यैवाभावस्य तेन सम्बन्धेन किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरतो यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति सिद्धान्तलक्षणे वक्ष्यमाणरीत्या निष्कर्षणीयम्। अथ विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिवारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत इत्यस्यैव वाच्यतया वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावीयप्रतियोगितायाः लक्षणघटकत्वासम्भवस्तदवच्छेदकवह्नित्वावच्छिन्नानधिकरणत्वस्य हेतुमत्यसत्त्वात्तथा च 'सामानाधिकरण्येन' इत्यनर्थकम्।

अत्र केचिद्यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रयोभयानधिकरणत्वं हेतुमत इत्येव तत्सार्थक्याय विवक्षणीयं दर्शिताभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टस्य हेतुमति सत्त्वेऽपि तादृशप्रतियोगिता-

श्रयघटादेरसत्त्वादुभयानधिकरणत्वं हेतुमतोऽक्षतमेवेति तादृशप्रतियोगिता वच्छेदकत्वमादाय दोषवारणाय 'सामानाधिकरण्येन' इत्यस्य सार्थकता। न च वह्नित्वेन घटाद्यभावस्य प्रतियोगिता वह्निभिन्नयावद्वृत्तिरेकैव स्यानि यतेन तु घटपटादिरूपप्रतियोगिभेदेन भिना अभावस्य प्रतियोगितावच्छेद कस्य चैक्यात्तथा च घटादिनिष्ठप्रतियोगिताश्रयसाधनादेरेव साधनवति सत्त्वात्तादृशप्रतियोगिताश्रयानधिकरणत्वं न तत्रेति न 'सामानाधिकरण्येन'- इत्यस्य सार्थकतासम्भव प्रतियोगिभेदेन प्रतियोगिताभेदे तु महानसीयवह्न्यादिनिष्ठाया वह्न्यादिसामान्याभावीयप्रतियोगिताया पर्वतीयवह्न्याद्यवृत्तितया तादृशप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्त्वाद्वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरिति वाच्यम् यत प्रतियोगिभेदेन प्रतियोगिता या न भेद , अपि त्ववच्छेदकभेदेनेव, एवमपि वह्निभिन्नवान् घटादित्यादौ वह्निभिन्नत्वेन घटाद्यभावीयप्रतियोगिताया वह्निभिन्नेऽसम्भावितत्तया तदाश्रयानधिकरणत्वस्य वह्निशून्ये हेतुमत्यक्षततया तादृशप्रतियोगितावच्छेदकत्वमादायाव्याप्तेर्वारकतया 'सामानाधिकरण्येन' इत्यस्य सार्थकता, महाकालो घटवान् कालपरिमाणादित्यादौ तु महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितैव तादृशी महाकालस्य महाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणताशून्यत्वात्। अथवा वक्ष्यमाणरीत्या साध्यतावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वयादृशप्रतियोगिताश्रयप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतत्त्रित्वावच्छिन्नाभावस्तदनवच्छेदकत्वमेव वाच्यम् , एवञ्च तत्रावृत्तिगगनाद्यभावप्रतियोगितैव तादृशी, एवञ्च वह्नित्वादिना घटाद्यभावप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टप्रतियोगिकत्वतदाश्रयवह्निभिन्नप्रतियोगिकत्वयोरकस्मिन् सम्बन्धेऽसत्त्वेन तादृशप्रतियोगिताया अपि तथात्वात्तद्वारकतयापि 'सामानाधिकरण्येन' इत्यस्य सफलत्वमवधेयमित्याहु ।

परे त्वत्यन्ताभावस्येवान्योन्याभावस्यापि प्रतियोग्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वोपगमात् पर्वतादौ वह्नित्वविशिष्टाद्यवच्छिन्नजलादिमद्भेदोऽपि प्रामाणिक, एवञ्च स्वावच्छेदकविशिष्टावच्छिन्नस्वाश्रयवन्निष्ठप्रतियोगिताकभेदवद्धेत्वधिकरणक यत् प्रतियोगित्वं तदनवच्छेदकत्वं साध्यतावच्छेदकस्य निवेशनीयम् । एवञ्च वह्नित्वादिना जलाद्यभावीयप्रतियोगितापि तादृशं स्वं कथितभेदस्य तदवच्छेदकवह्नित्वादिविशिष्टावच्छिन्नतदाश्रयजलादिमन्निष्ठप्रतियोगिताकत्वादतस्तदवच्छेदकत्वमादाय दोषवारणाय सामानाधिकरण्येनेति। सयोगी द्रव्यत्वात् , वह्निमान् धूमादित्यादौ संयोगत्वविशिष्टाद्यवच्छिन्नसंयोगवह्न्याद्यभावप्रतियोगिताया गुणत्वद्रव्यत्वाद्यवच्छिन्नसंयोगिपर्वतभेदं संयोगवह्न्याद्यवच्छिन्नगुणद्रव्यादाय तथात्ववारणायावच्छिन्नान्तनिष्ठान्तयोरुपादानम् । अथवा यादृशप्रतियोगितावच्छेदकावच्छिन्नया दृशप्रतियोगिताश्रयवृत्तिप्रतियोगितावच्छेदकताकभेदवत्त्वं हेतुमतस्तदनव-

च्छेदकत्वं विवक्षणीयं वह्नित्वादिना घटाद्यभावप्रतियोगिताप्येतादृशी तादृशप्रतियोगितावच्छेदकवह्नित्वाद्यवच्छिन्नतादृशप्रतियोगितासमानाधिकरणप्रतियोगितावच्छेदकताकस्य वह्नित्वेन घटवान्नेति प्रतीतिविषयभेदस्य हेतुमति सत्त्वाद्व्यधिकरणधर्मस्यात्यन्ताभावप्रतियोगितावच्छेदकत्ववदन्योन्याभावप्रतियोगितायामप्यवच्छेदकत्वादत एव 'समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्यः' इति मिश्रैरभिहितम्; इत्थञ्च तादृशप्रतियोगितावारणाय सामानाधिकरण्येनेति। हेतुमतो वह्नित्वेन घटवद्भेदवत्त्वं घटत्वेन वह्निमद्भेदवत्त्वं चादाय वह्निनिष्ठप्रतियोगितायास्तादृशत्ववारणाय प्रकृतप्रतियोगितासमानाधिकरणत्वतदवच्छेदकावच्छिन्नत्वयोर्भेदप्रतियोगितावच्छेदकतायां निवेशनम्। महाकालो घटवान् कालपरिमाणादित्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितामादायैव लक्षणसमन्वयो न तु गगनत्वपटत्वादिना घटाद्यभावीयप्रतियोगिताम्, तस्या गगनाद्यवच्छिन्नघटाद्यवच्छिन्नकालभेदं गगनत्वपटत्वाद्यवच्छिन्नघटाद्यवच्छिन्नभेदञ्चादाय पूर्वप्रतीकाल्लाभसम्भवेऽपि सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः।

अथवा तादृशप्रतियोगितासामान्ये यद्धर्मसामानाधिकरण्यविशिष्टयद्धर्मावच्छेद्यत्वाभावो यद्धर्मसामानाधिकरण्ययद्धर्मावच्छेद्यत्वोभयाभावो वा तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरित्येव विवक्षणीयम्। एवञ्च व्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायापि लक्षणसमन्वयस्तत्र सम्भवतीत्यवधेयम्।

वह्नित्वेन वह्निधूमोभयं नास्तीत्येतादृशप्रतीतिविषयाभावस्य वह्निमान् वह्नित्वेन वह्निधूमोभयवान्नेतिप्रतीतिसिद्धभेदमादाय प्रतियोगिव्यधिकरणत्वेऽपि तस्य प्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रे पर्याप्तं तथा सति वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिमति तादृशाभावप्रत्ययप्रसङ्गात् किन्तु वह्नित्वतदुभयत्वयोरेव तत्पर्याप्तिरतस्तादृशप्रतियोगितायां समानाधिकरणतयाऽवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। यदि च तादृशाभावप्रतियोगितावच्छेदकं वह्नित्वादिकमेव न तु प्रतियोगिविशेषणतापन्नमुभयत्वम्, प्रतियोगिविशेषणतानापन्ने प्रतियोगितावच्छेदकत्वावगाहिप्रतीत्या तद्विशेषणतापन्ने तदनवगाहनादन्यथा वह्नित्वेन घटो नास्तीत्यादावपि वह्नित्वघटत्वाद्युभयस्मिन्नावच्छेदकत्वपर्याप्त्यवगाहनौचित्यात् 'सामानाधिकरण्येन'इत्यस्य वैयर्थ्यापत्तेः, वह्नित्वेनोभयाभावप्रतियोगिता च व्यासज्यवृत्तिरतो न तादृशाभावस्य केवलान्वयित्वानुपपत्तिरथवा सोन्दडमते प्रतियोगितावच्छेदकधर्मावच्छिन्नस्यैव तद्धर्मावच्छिन्नप्रतियोगिनोऽपि नाभावविरोधित्वं किन्त्वभावबुद्धौ प्रतियोग्यंशे प्रकारीभूतो यो धर्मस्तद्विशिष्टप्रतियोगितावच्छेदकावच्छिन्नस्यैवेति न केवलान्वयित्वानुपपत्तिरिति मन्यते तदा 'सामानाधिकरण्येन'इत्यस्य प्रतियोगितापर्याप्त्यधिकरणवृत्तित्वेन, प्रतियोग्यंशे प्रकारीभूतधर्मपर्याप्त्यधिकरणवृत्तित्वेन वेत्यर्थ इत्याहुः।

तदुभयमपि न युक्तम्, एवं सति घटत्वादिना साध्याभावप्रतियोगिताया अपि निरुक्तप्रतियोगिवैयधिकरण्यनिरूपकत्वसम्भवेन प्रथमलक्षणे 'प्रतियोगिवैयधिकरणस्य' इत्यनभिधानस्य निर्वाजतया सन्दर्भविरोधापत्तेः। वस्तुतो यादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नानधिकरणत्वं हेतुमतस्तदनवच्छेदकत्वं साध्यतावच्छेदकस्य विवक्षणीयं कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगादिनिष्ठप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकं कपिसंयोगत्वादिकमेव तदवच्छिन्नानधिकरणत्वञ्च न हेतुमत इति न कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिर्घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन च प्रमेयत्वादिना प्रतियोगिनो घटत्वेन प्रमेयं नास्तीत्यादिज्ञाने भानात्प्रमेयत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमत्यसम्भवाद्घटत्वाद्यवच्छिन्नप्रतियोगिताया यादृशप्रतियोगितेत्यनेनोपादानासम्भवात्तथाविधप्रतियोगिताया अप्रसिद्धिरतो 'यत्किञ्चित्' इत्युक्तम्, दण्डिमान् दण्डिसंयोगादित्यादौ तद्दण्डावच्छिन्नानधिकरणत्वमादाय दण्डिसामान्याभावस्य प्रतियोगिवैयधिकरण्येऽपि न क्षतिस्तत्तद्दण्डावच्छिन्नात्यन्ताभावप्रतियोगितावच्छेदकत्वमादाय दोषवारणाय तत्र परम्परासम्बन्धेन दण्डत्वादेः साध्यतावच्छेदकत्वस्वीकारस्यावश्यकत्वात्, तत्संयोगत्वतद्वह्नित्वादिविशिष्टप्रतियोगिविषयकाभावभाने संयोगत्ववह्नित्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगितायाः संसर्गतया भाने मानाभावात्तत्संयोगत्वतद्वह्नित्वाद्यवच्छिन्नानधिकरणत्वेऽपि हेतुमतो न क्षतिः। संयोगत्ववह्नित्वाद्यवच्छिन्नप्रतियोगिताया घटत्वाद्यवच्छिन्नप्रतियोगिताया घटत्वाद्यवच्छिन्नत्वेन घटो नास्तीत्यभावबुद्धौ संसर्गतया भानोपगमे भ्रमानिरूपितत्वेन प्रकारता विशेषणीया, विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिनासम्बन्धावच्छिन्नप्रकारतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वान्नातिव्याप्तिः, वह्नित्वाद्यवच्छिन्नघटादिनिष्ठव्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकघटत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् 'सामानाधिकरण्येन' इत्यस्य सार्थकता, एकमात्रवृत्तिसाध्यकस्थले साध्यनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नानधिकरणत्वं न हेतुमत इति साध्यवृत्तितथाविधप्रतियोगिताया अप्रसिद्ध्या न पूर्वोक्तलक्षणे प्रतियोगिव्यधिकरणत्वं निवेशितम्। वह्नित्वादिनोभयाभावमादाय दोषस्तु पूर्ववदेव वारणीय इति।

परे तु यदि घटत्वेन वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्यादौ वह्नित्वघटत्वादिरूपसमानाधिकरणधर्मस्यापि प्रतियोगितावच्छेदकत्वं भासते, अन्यथा तादृशप्रतीतौ प्रतियोगिनि तत्तद्धर्माणामुपलक्षणतया भानेन तद्विशिष्टवैशिष्ट्यानवगाहितया तन्निर्विकल्पकानन्तरमप्युत्पत्त्यापत्तेः। न च वह्नित्वघटत्वादेः प्रतियोगितावच्छेदकत्वानवगाहने तन्निर्विकल्पकानन्तरं तादृशा-

भावबुद्धिरित्थैव प्रतियोगितावच्छेदकतया यदवभासते तन्निर्विकल्पकानन्तरमेवाभावप्रत्ययाभ्युपगमादिति वाच्यम्, वह्नित्वादिनिर्विकल्पकानन्तरं तथाविधप्रत्ययोपगमे विशेषाभावेन [1]तदुत्तरं वह्नित्वाद्यंशे प्रतियोगितावच्छेदकत्वानवगाहिवह्निर्नास्तीत्याकारकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्ययस्यापि स्वीकारापत्तेः, एवं स्वातन्त्र्येण प्रतियोगितावच्छेदकताविषयकाभावबुद्धौ प्रतियोगिनि प्रकारस्योपलक्षणतया भानोपगमे वह्निमति वह्नित्वेन द्रव्यं नास्तीति प्रतीत्यापत्तेः। यत्तु प्रतियोगिप्रकारविरुद्धधर्म एव स्वातन्त्र्येण प्रतियोगितावच्छेदकत्वं भासत इति नियमान्न तदापत्तिरिति। तन्न, तथासति ह्रदादौ वह्नित्वेन किमपि द्रव्यं नास्तीति प्रतीत्यनुपपत्तेः। न च प्रतियोगित्वे प्रतीतिप्रकारीभूतधर्मान्यूनवृत्तित्वभाननियमात् पर्वतादिवृत्तिवह्नित्वाद्यवच्छिन्नाभावप्रतियोगिताया द्रव्यत्वन्यूनवृत्तित्वान्नोक्तापत्तिरिति वाच्यम्, वह्नित्वेन द्रव्यं नास्तीति शब्दजबोधे प्रतियोगिताया द्रव्यत्वान्यूनवृत्तित्वभासकाभावात्। न च संसर्गतया भासमाने वह्नित्वावच्छिन्नप्रतियोगित्वे द्रव्यत्वान्यूनवृत्तित्वस्य संसर्गतावच्छेदकतया भानमाकाङ्क्षानलादेव सम्भवतीति वाच्यम्, अन्यूनवृत्तित्वस्य नानापदार्थघटितस्य संसर्गघटकतया भाने मानान्तरविरहेण स्वरूपसम्बन्धावच्छिन्नत्वभानोपगमस्यैवोचितत्वादित्युच्यते, तदा व्याप्यवृत्तितानिवेशपक्षे वह्नित्वादेर्व्याप्यवृत्तिघटत्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकतामादायासम्भवप्रसक्तिरित्यालोच्य प्रतियोगिवैयधिकरण्यनिवेशनमनुससार। तदर्थश्च प्रतियोगितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव तथासत्यपि हेतुमतो घटत्वादिविशिष्टानधिकरणतया वह्नित्वादिना घटाद्यभावमादाय दोषप्रसक्त्या 'सामानाधिकरण्येन' इत्यस्य सार्थक्यसम्भवात्। न च प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदवत्त्वं तथा च संयोगत्वाद्यवच्छिन्नघटादिमद्भेदमादाय संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यापत्तिर्भेदप्रतियोगितावच्छेदकताया प्रकृतप्रतियोगितासामानाधिकरण्यनिवेशनेन सामञ्जस्यात्। न च[2] परे त्वित्यादिनाभिहितद्वितीयकल्प एव पर्यवसानमिति घटत्वादिना वह्न्याद्यभावस्यापि प्रतियोगिवैयधिकरण्यापत्त्या वह्नित्वादेस्तत्प्रतियोगिताया सामानाधिकरण्येनावच्छे

---

१ तदुत्तरमुपलम्भगविषया वह्नित्वाद्यवगाहिनो वह्निर्नास्तीत्याकारकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्ययस्यापि स्वीकारापत्तेरिति पा०।

२ न च घटत्वादिना वह्न्याद्यभावस्यापि घटत्वाद्यवच्छिन्नवह्न्यादिमद्भेदमादाय प्रतियोगिवैयधिकरण्यं दुर्वारं तादृशभेदीयवह्न्यादिनिष्ठप्रतियोगितावच्छेदकताया घटत्वाद्यवच्छिन्नवह्न्यभावीयवह्न्यादिनिष्ठप्रतियोगिताव्यधिकरणघटत्वादेरिव तत्समानाधिकरणवह्नित्वादेरपि सामानाधिकरण्येनावच्छेदकतायास्तादृशात्यन्ताभावप्रतियोगितावच्छेदकतावच्छेदकत्वात्। प्रकृतप्रतियोगिता समानाधिकरणधर्मावच्छिन्नत्वस्य भेदवारणासम्भवादिति वह्नित्वादेस्तत्प्रतियोगिताया सामानाधिकरण्येनावच्छेदकतयाऽव्याप्तिरिति वाच्यमिति २ पुस्तके पाठान्तरम्।

दकतयाव्याप्तिरिति वाच्यम्, व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदानभ्युपगमेनैवोक्तापत्त्यसम्भवात्, घटत्वेन पटवान्नेत्यादौ घटत्वाद्यवच्छिन्नपटात्यन्ताभावस्यैव विषयत्वोपगमात्, प्रतियोगितावच्छेदकं सामानाधिकरण्येन यत्रावच्छेदकं तादृशप्रतियोगितावच्छेदकताक एव वा भेदो निवेश्य.[1] । अथैवमपि घटत्वाद्यवच्छिन्नवह्न्याद्यभावस्य घटत्वावच्छिन्नघटादिमद्भेदमादाय घटत्वाद्यवच्छिन्नघटादिव्यधिकरणस्य प्रतियोगितावच्छेदकत्वमादायाव्याप्तिर्दुर्वारैवेति चेन्न, सामानाधिकरण्येन प्रतियोगितायामवच्छेदकं यद्यसदवच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदस्यैव निवेशनीयत्वात् । अथ वह्नित्वादिना घटाभावस्य यदि घटत्वादिकं प्रतियोगितावच्छेदकं तदा घटादिमति तादृशाभावासत्त्वप्रसङ्ग इति वह्नित्वघटत्वाद्योरेवावच्छेदकतापर्याप्तिरुपगन्तव्या, तथा चानवच्छेदकपदस्यावच्छेदकतापर्याप्त्यनधिकरणपरतया व्याख्येयतयैव तादृशाभावप्रतियोगितामादाय दोषाप्रसक्तेः 'सामानाधिकरण्येन' इत्यस्य वैयर्थ्यमशक्यवारणमेवेति चेन्न, प्रतियोगिविशेषणतापन्नतदनापन्नयोरवच्छेदकतावैलक्षण्येन प्रत्येकमेवावच्छेदकतापर्याप्तेः पर्याप्तिविवक्षामात्रेण प्रतीकारासम्भवात् 'सामानाधिकरण्येन'इत्यस्य सार्थक्यं तदपि प्रतियोगिविशेषणतापन्नस्य यादृशं विलक्षणमवच्छेदकत्वं तत्पर्याप्त्यनधिकरणत्वलाभायैव, यथा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव तत्प्रतियोगितावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्य घटादिमति वृत्तौ बाधकाभावात् । अस्तु वा विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्याप्तयोरप्यवच्छेदकतयोस्तत्तत्प्रतियोगितावच्छेदकत्वेनानुगतयोः समानाधिकरणव्यधिकरणधर्मद्वये पर्याप्त्यन्तरं तादृशानुगतरूपावच्छिन्नपर्याप्त्यधिकरणधर्मावच्छिन्नस्यैव वाऽभावविरोधितेति । एवञ्च ह्रदत्ववह्नित्वोभयावच्छिन्नवह्न्यभावमादाय पर्याप्तिनिवेशाव्याप्तिप्रदर्शनं समानाधिकरणधर्मस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकत्वपक्षीयव्याप्यवृत्तित्वघटितलक्षणाभिप्रायेणेति वदन्ति ।

'अव्यभिचारिसम्बन्धरूपता' अवयवशक्त्याऽव्यभिचारिसम्बन्धपदप्रतिपाद्यता, तथा च पूर्ववन्न तत्पदस्य पारिभाषिकतेतिभावः । ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाववदवृत्तित्वरूपस्य व्यभिचारपदार्थस्य तच्छरीरेऽनिवेशात्कथमेवमित्यत आह हेताविति । यथा हेत्वन्वयि साध्यतावच्छेदकावच्छिन्नसाध्याभाववदवृत्तित्वं व्यभिचारस्तथा साध्यतावच्छेदकान्वयिनो हेतुसमानाधिकरणाभावप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकत्वस्यापि तथात्वादित्यर्थः । 'वह्निर्धूमस्य व्यभि-

---

१. प्रतियोगिनावच्छेदकसामानाधिकरण्येन याऽवच्छेदकता तादृशावच्छेदकताकप्रतियोगिताकभेद एव वा निवेश्य इति २ पुस्तके पाठान्तरम् ।

चारी'इत्यत्राभाववद्वृत्तित्वं व्यभिचारपदार्थः । तदेकदेशे चाभावे पष्ठ्यर्थप्रतियोगिताया निरूपकत्वसम्बन्धेनान्वय, प्रतियोगितायां चाश्रयतासम्बन्धेन धूमस्य, अवच्छिन्नत्वसम्बन्धेन धूमविशेषणतापन्नधूमत्वस्यान्वय इति धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभ, साध्यतावच्छेदकावच्छिन्नसाध्यान्तर्भावेन च न व्यभिचारपदार्थता शक्त्यानन्त्यप्रसङ्गात् साध्यवाचकपदवैयर्थ्यापाताच्च । एव समानाधिकरणाभावप्रतियोगिताया सामानाधिकरण्येनावच्छेदकत्व व्यभिचारपदार्थ, सामानाधिकरण्ये च व्युत्पत्तिवैचित्र्यात्प्रथमान्तपदोपस्थाप्यस्यापि वह्निर्निरूपकत्वसम्बन्धेनान्वय, वह्न्याद्यन्तर्भावेनैव वा शक्ति, धूमपद लक्षणया धूमत्वपरम्, आधेयत्व पष्ठ्यर्थ, अन्वयश्चास्यावच्छेदकत्वे, निरूपकत्वमिन्प्रत्ययार्थ । तथा च धूमत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतानिरूपको वह्निरित्यन्वयबोध ।

यद्यपि लाघवरूपविनिगमकसत्त्वादभाववद्वृत्तित्व एव व्यभिचारपदशक्तिकल्पनमुचितम्, तथापि 'ज्ञेयत्व वाच्यत्वस्याव्यभिचारि'इति प्रामाणिकव्यवहारानुरोधादुपदर्शितगुरुरूपस्यापि व्यभिचारपदार्थत्वमावश्यकम्, तत्र वाच्यत्वाभावाप्रसिद्ध्या तदभाववद्वृत्तित्वाभावबोधासम्भवात्, उक्तरूपस्य व्यभिचारपदार्थत्वे च व्यभिचारस्याभावोऽव्यभिचारमित्यव्ययीभावाश्रयणात्। ज्ञेयत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमव्यभिचारपदार्थ, इन्प्रत्ययार्थो निरूपकत्वम्, वाच्यत्वपद वाच्यत्वत्वपरम्, पष्ठ्यर्थश्चाधेयत्वम्, तथा च वाच्यत्वत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकं ज्ञेयत्वमित्यन्वयबोध । अथैवमप्यव्यभिचारिसम्बन्धपदेनोक्तख्यातेः कथं लाभ' । न चाव्यभिचारिपद तादृशप्रतियोगितानवच्छेदकत्वाश्रयपरम्, सम्बन्धश्च तदाश्रयसामानाधिकरण्यमिति तल्लाभ इति वाच्यम्, वह्निर्वं धूमाव्यभिचारीतिप्रयोगाभावादुक्तधर्मबोधकव्यभिचारपदसमभिव्याहृतेन्प्रत्ययस्याश्रयत्वाबोधकत्वाद्व्यभिचारपदार्थान्वयितावच्छेदकं यद्रूप तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबोधकताया व्युत्पत्तिसिद्धत्वात्, साध्यतावच्छेदकस्याव्यभिचारिपदार्थत्वे हेतुसमानाधिकरणेत्यादिव्याप्तिबोधस्याशक्यत्वाच्चेति चेत्, अव्यभिचारिसम्बन्ध इत्यस्याव्यभिचारिहेतुनिष्ठं साध्यसामानाधिकरण्यमित्यर्थ । एवञ्च साध्यतावच्छेदकनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकहेतुनिष्ठसाध्यसामानाधिकरण्यमिति पर्यवसितम्, उक्तलक्षणवाक्यस्याप्ययमेवार्थं तात्पर्य न तु यथाश्रुतविशेषणविशेष्यभावे, तदापन्नस्याव्यभिचारिसम्बन्धपदेन बोधयितुमशक्यतया पारिभाषिकताया दुर्वारत्वात् । न च यद्रूपावच्छिन्नस्य यस्य व्याप्तित्वं तदन्यरूपेण तस्याव्यभिचारिसम्बन्धपदार्थत्वेऽपि न क्षतिरिति वाच्यम्, एव सति साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारपदार्थत्वेऽपि व्यतिरेकिसाध्यकोक्तख्यातेरव्यभिचारिसम्बन्धरूपतोपपत्तेरुक्तधर्मस्य व्यभिचारपदार्थ-

स्वव्यवस्थापनानुपयुक्तत्वात्। उक्तलक्षणेऽपि साध्यसामानाधिकरण्यमन्तर्भाव्याव्यभिचारिसम्बन्धरूपताया व्यवस्थापयितुं शक्यत्वात्। साध्यसामानाधिकरण्यानन्तर्भावेऽपि प्रतियोगिसमानाधिकरणस्वसमानाधिकरणनिष्ठयावदभावकत्वरूपपर्यवसितपूर्वलक्षणार्थस्याव्यभिचारिसम्बन्धरूपतासम्भवात्।

(दी०) अवच्छेदकत्वञ्चेह तत्पर्याप्त्यधिकरणत्वं तेन विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। मत्त्वमति गुणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिर्वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यम्, भवति च गुणत्वगुणावृत्तित्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्त्येव संयोगत्वमित्याहुः।

(गा०) अवच्छेदकत्वमिति। अनवच्छेदकमित्यत्र यदवच्छेदकपदं तत्तत्पर्याप्तिविषयावच्छेदकत्वमित्यर्थः। 'तत्पर्याप्त्यधिकरणत्व' पर्याप्तिसम्बन्धेनावच्छेदकतावत्त्वम्, तथा च पर्याप्तिसम्बन्धेनावच्छेदकत्वावच्छिन्नस्य भेदोऽनवच्छेदकपदेन विवक्षित इति भावः। 'विशिष्टवह्न्यभावस्य' प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्येत्यन्वयः। महानसीयत्वादिविशिष्टवह्न्यभावस्य प्रतियोगितायां महानसीयत्वसहितवह्नित्वस्यावच्छेदकत्वेऽप्याश्रयतासम्बन्धेनावच्छेदकतावदन्यत्वस्य वह्नित्वे दुर्लभत्वादिति भावः। प्रतियोगिविशेषणतापन्नधर्मान्तरसहितवह्नित्वावच्छिन्नाभावमादाय दोषं प्रदर्श्य प्रतियोगिविशेषणतापन्नधर्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयत इति नियमानभ्युपगन्तु व्यधिकरणधर्मावच्छिन्नाभाववादिनं प्रतियोग्यवृत्तिधर्मसहितप्रतियोगिवृत्तिधर्मपर्याप्तप्रतियोगितावच्छेदकताकोऽभावोऽस्तीति व्युत्पादनाय तादृशाभावमादायापि दूषणं दर्शयति ह्रदेति। उभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभयघटकप्रत्येकस्यावच्छेदकताया अव्याहतत्वादिति भावः। न क्षतिरिति। अवच्छेद्याश्रयविशेषणभावापन्नेषु तदनापन्नेषु वा नानाधर्मेषु पर्याप्तं यदवच्छेदकत्वं पर्याप्तिसम्बन्धेन तदवच्छिन्नभेदस्य तत्पर्याप्त्यनवच्छेदकप्रत्येकधर्ममात्रवृत्तिधर्मावच्छेदेन सत्त्वाद्वह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्वस्य घटत्वाद्यवच्छिन्ने घटपटोभयत्वाद्यवच्छिन्नभेदवन्निष्प्रत्यूहत्वादिति भावः। न च वह्निनिष्ठह्रदत्ववह्नित्वोभयावच्छिन्नप्रतियोगिताया सामानाधिकरण्येन यदवच्छेदकत्वं तद्वह्नित्वमात्रे पर्याप्तं ह्रदत्वस्य व्यधिकरणतयैवावच्छेदकत्वादिति कथं वह्नित्वस्य तादृशावच्छेदकत्वावच्छिन्नान्यत्वनिर्वाह इति वाच्यम्, यतः सामानाधिकरण्येनानवच्छेदकमित्यस्य तत्तत्प्रतियोगितासामानाधिकरणवृत्तियत्प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेद

कृटत्वमर्थं, इत्थञ्च ह्रदत्ववह्नित्वोभयावच्छिन्नप्रतियोगिताया समानाधिकरणवृत्त्यप्येकमेवावच्छेदकत्वमुभयपर्याप्तं तदवच्छिन्नभेदो वह्नित्वेऽव्याहत एवेति । ननु संयोगादिसाध्यकसद्धेतावव्याप्तिवारणाय तदभावव्यावर्तकव्याप्यवृत्तित्वादिविशेषणोपादाने तत्साध्यकसत्त्वादिरूपव्यभिचारिहेतावतिव्याप्तिप्रसङ्गोऽभावान्तरस्यैव लक्षणघटकत्वादित्याशङ्क्य व्यभिचारिहेतुकस्थले संयोगाद्यभावस्य लक्षणघटकत्वप्रदर्शनेन परिहरति सत्त्ववत्विति । 'व्याप्यवृत्ति'इत्युपलक्षणं प्रतियोगिव्यधिकरणश्चेत्यपि बोध्यम् । अयं भावः— व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वं न वा स्वसमानाधिकरणाभावप्रतियोगित्वसामान्याभावः, प्रतियोगिव्यधिकरणत्वञ्च न प्रतियोग्यधिकरणावृत्तित्वम्, किं त्वनवच्छिन्नवृत्तिकत्वं स्वाधिकरणयत्किञ्चिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वं वा व्याप्यवृत्तित्वम् । प्रतियोग्यनधिकरणवृत्तित्वञ्च प्रतियोगिवैयधिकरण्यं तच्च संयोगाद्यभावसाधारणम्, हेत्वधिकरणे तथात्वस्य निरुक्षितत्वात्सद्धेतुस्थले न तादृशाभावस्य लक्षणघटकता तत्र गुणादेर्हेत्वनधिकरणत्वात्, सत्त्वादिहेतुकस्थले तस्य हेत्वधिकरणतया तत्र व्याप्यवृत्तिः प्रतियोगिव्यधिकरणश्च साध्याभावो लक्षणघटक एवेति । वक्ष्यमाणमिति । सिद्धान्तलक्षण इत्यादि । 'तदवच्छेदकत्वं' प्रतियोगितावच्छेदकत्वम्, 'इहापि' एतल्लक्षणेऽपि, 'बोध्यम्' विवक्षणीयम् । अन्यथा लघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तिरिति भावः, तथा च संयोगादिरूपसाध्याभावस्य व्याप्यवृत्तित्वादिरूपविशेषणेन व्यावर्तनेऽपि न क्षतिः, व्याप्यवृत्त्यभावान्तरप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्त्वेन तदवच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्त्यप्रसक्तेरिति यथाश्रुतार्थोऽवगम्यते स च न सङ्गच्छते, सत्तावान् जातेरित्यादौ सत्तात्वस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितया सत्त्वाद्यसाधारणतयाऽव्याप्तेर्वारणाय स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वरूपतदनतिरिक्तवृत्तित्वस्यैव विवक्षणीयतया तद्घटकाभावे व्याप्यवृत्तित्वनिवेशे प्रयोजनविरहेण संयोगादिसाध्यकसद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादेर्निरुक्तानतिरिक्तवृत्तित्वस्य संयोगत्वादिसाधारण्यविरहेणाव्याप्त्यनवकाशेन हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वनिवेशनवैयर्थ्यात् । न च स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणादाने संयोगेन द्रव्यस्याव्याप्यवृत्तितापक्षे संयोगेन साध्यताया हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदक यद्विशिष्टसम्बन्धिनिष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धिस्तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्मावच्छिन्नानामेव संयोगेनाभावानां केवलान्वयित्वादिति स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणस्यावश्यकतेति वाच्यम्, संयोगाद्यभावव्यावर्तकस्यावच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्य निवे-

शने संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धाव-च्छिन्नाभावो गुणादीनामेव व्याप्यवृत्तिर्न तु द्रव्यस्येति तादृशाभावप्रति-योगितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धितादवस्थ्यात् प्रतियोगितयोः साध्यतावच्छेदकसम्बन्धा-वच्छिन्नत्वं परित्यज्यैकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषा-वच्छिन्नत्वस्य वा विशेषणत्वपक्षस्यैवावलम्बनीयतया व्याप्यवृत्तित्व-विशेषणवैयर्थ्यस्य दुरुद्धरत्वात् तस्मात् 'वक्ष्यमाणं वा' इति ग्रन्थ-स्याभावे व्याप्यवृत्तित्वादिविशेषणं न देयमेव तद्दानेऽपि संयो-गत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वीयपारिभाषिकावच्छेद-कत्वविरहेणाव्याप्त्यप्रसक्तेरित्याशयः। ननु पारिभाषिकावच्छेदकत्वशरीर-निविष्टस्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणमावश्यकमन्यथा तुल्ययुक्त्या सत्तादिहेतुकेऽपि संयोगत्वादौ पारिभाषिकावच्छेदकत्वानिर्वा-हादिति हेतुमन्निष्ठाभावेऽपि तद्विशेषणमावश्यकमन्यथाऽव्याप्तेरित्याशङ्कां सत्तादिहेतुकस्थले गुणत्वाद्यवच्छिन्नाभावप्रतियोगिताया· पारिभाषिकावच्छे-दकत्वं संयोगत्वादौ प्रदर्श्य वारयति भवति चेति। गुणत्वाद्यवच्छिन्नाभावानां व्याप्यवृत्तित्वाभिधानञ्च संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितान-वच्छेदकत्वसूचनाय. जन्यद्रव्येषूत्पत्तिकालावच्छेदेन गुणत्वाद्यवच्छिन्नाभा-वस्य नवीनैरभ्युपगमात्तन्मते गुणत्वस्य संयोगत्वविशिष्टसम्बन्धनिष्ठाभा-वीयप्रतियोगितानवच्छेदकत्वं न सम्भवतीति गुणावृत्तित्वानुधावनम् . सं-योगी गुणान्यत्वे सति सत्त्वादित्यादौ गुणावृत्तित्वं न विशिष्टहेतुसमाना-धिकरणाभावप्रतियोगितावच्छेदकमत· संयोगादिसाध्यकव्यभिचारिमात्रे यादृशप्रतियोगितावच्छेदकमुपादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं सम्भवति तादृशधर्ममाह द्रव्यमात्रसमवेतत्वेति॥

प्रगल्भस्य लक्षणद्वयमेकदोषेण दूषयितुमुपन्यस्यति साध्यतावच्छेदकवि-शिष्टेत्यादि॥

(दी०) साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यावच्छेद-कत्वसमानाधिकरणसाध्याभाववत्त्वकत्वम्। यत्समानाधिकरणसाध्याभा-वप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तम्, सर्वत्र साध्याभावपदवैयर्थ्यात्।

(गा०) विशिष्टाभावो विशेषणविशेष्यसम्बन्धाभावरूप उभयाभावस्तु परम्परासम्बन्धेन द्वित्वाभाव इति मतेनेदं लक्षणम्, अन्यथा व्यधिकरण-धर्मावच्छिन्नाभावं विनापि तादृशाभावमादाय लक्षणसमन्वयसम्भवे 'प्रति-योग्यवृत्ति-'इतिग्रन्थानुत्थितेरिति बोध्यम्। साध्याभावो वा पूर्वोक्तद्वितीय-रीत्या साध्यव्यापकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकश्च ग्राह्य। अवच्छेदकत्वमिहानतिरिक्तवृत्तित्वं न तु स्वरूपसम्बन्धविशेषो यथोक्तधर्म-

योस्तादृशावच्छेद्यावच्छेदकभावे मानाभावात् । स्वपदं हेतुतावच्छेदकावच्छिन्नहेतुपरम्, तथा च साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्ति यद्धर्मविशिष्टसमानाधिकरणसाध्याभावत्वं तद्धर्मवत्त्वं व्याप्तिरिति समुदितार्थः । सद्धेतौ साध्यासमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेत्वसमानाधिकरणत्वनियमात्तादृशसाध्याभावत्वं साध्यसामानाधिकरण्यानतिरिक्तवृत्तीति लक्षणसमन्वयः । व्यभिचारिणि तादृशसाध्याभावस्यापि हेतुसमानाधिकरणतया तदतिरिक्तवृत्त्येव तदिति न लक्षणसमन्वयः । गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्वारणाय साध्यतावच्छेदकविशिष्टेति । साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन संयोगादिना धूमादेरभावस्य कालिकादिना धूमादिमति स्वावयवे वृत्तावपि नातिव्याप्तिः । द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तेर्वारणाय हेतुतावच्छेदकविशिष्टत्वोपादानम्, तद्विशिष्टाधिकरणत्वं हेतुतावच्छेदकसम्बन्धेन बोध्यं तेन धूमादिसमवायिनिष्ठवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेऽपि न क्षतिः । साध्यहेतुसामानाधिकरण्यघटकवृत्तित्वद्वयमेकसम्बन्धेन बोध्यं तेन द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाद्यभावस्य कालिकादिसम्बन्धेन साध्यवन्महाकालादिवृत्तित्वेऽपि न क्षतिः । यद्यपि हेतुसमानाधिकरणसाध्याभावत्वघटकमभावत्वरूपं विशेष्यं व्यतिरेकिसाध्यके साध्यासमानाधिकरणाभावसाधारणमिति विशिष्टसाध्यसामानाधिकरण्यशून्यावृत्तित्वरूपं तदनतिरिक्तवृत्तित्वं दुर्घटम्, तथापि यावन्तः स्वसमानाधिकरणसाध्याभावा विशिष्टसाध्यसमानाधिकरणा इत्यर्थस्य विवक्षणीयत्वान्न दोषः । अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिः साध्याभावस्य साध्यवत्यपि वृत्तेरिति तु नाशङ्कनीयम्, व्यभिचारनिरूपकाधिकरणं यत्तद्वृत्तित्वावच्छिन्नाभावस्यापि साध्याभावतया तस्य च साध्यवत्यवृत्तेः । यत्समानाधिकरणेति । तद्रूपविशिष्टसमानाधिकरणेत्यर्थः । तेन द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावप्रमायाः साध्यवत्ताज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः । यद्धर्मावच्छिन्नसामानाधिकरण्यशरीरे च हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाधिकरणत्वं निवेशनीयं तत्प्रयोजनञ्च स्फुटमेव । अधिकरणवृत्तित्वं च निरवच्छिन्नं ग्राह्यम्, तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेतुसमानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादिविषयकप्रमाया अव्याप्यवृत्तित्वज्ञानविरहकालीनायाः साध्यवत्ताज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः । 'प्रमायां' प्रमासामान्ये, तेन व्यभिचारिणि नातिव्याप्तिः, समानाधिकरणधर्मावच्छिन्नाभावत्वेन व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्यापि विरोधित्वात्सद्धेतावपि लक्षणगमनासम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य प्रमासामान्यनिवेशनम्, प्रमापदञ्च यावद्भ्रमभिन्नपरमत उक्तभ्रमात्मकज्ञान-

स्याभाववत्त्वांशे प्रमात्वेऽपि न क्षतिः। साध्यवत्ताज्ञानपदमपि तत्सामान्यपरम्, अतो व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्य तद्धर्मवत्त्वेन साध्यवत्ताज्ञानविरोधित्वेऽपि न क्षतिः। एवञ्च साध्यपदं साध्यतावच्छेदकविशिष्टपरम्, ज्ञानञ्च स्वसमानधर्मितावच्छेदकत्वेन स्वविषयीभूताभावप्रतियोगितावच्छेदकसंसर्गकत्वेन च विशेषणीयं तेन धूमत्वाद्यवच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यान्तर्गतद्रव्यत्वादिना धूमादिप्रकारकं भिन्नधर्मावच्छिन्नविशेष्यकधूमत्वावच्छिन्नप्रकारकं समवायादिसम्बन्धेन धूमत्वाद्यवच्छिन्नप्रकारकञ्च ज्ञानं प्रत्यप्रतिबन्धकत्वात् कामिनीजिज्ञासादेरेव च तादृशज्ञानसामान्यविरोधित्वादित्याशङ्कानवकाशः। साध्याभावपदवैयर्थ्यादिति। अत्र च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यावच्छेदकत्वं स्वव्यापकतादृशसामानाधिकरण्यकत्वम्, तथा च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यत्वं यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकं तत्त्वं व्याप्तिरित्येतादृशार्थकत्वे प्रथमलक्षणे न साध्याभावपदवैयर्थ्यम् यत्समानाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्य यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वाद्यत्समानाधिकरणसाध्याभावनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकत्वस्यातिरिक्ततया तद्घटितलक्षणे यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वस्यानिवेशात्तद्घटितलक्षणसम्भवेऽपि प्रकृतलक्षणे वैयर्थ्यानवकाशात्। एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकं साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावस्तत्त्वमित्येतादृशार्थकत्वे द्वितीयलक्षणेऽपि न तद्वैयर्थ्यम्, यत्समानाधिकरणप्रमात्वव्यापकताघटकाभावाय यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकतायामभावान्तरस्यैव निवेशादित्यवधेयम्।

इति प्रगल्भलक्षणद्वयव्याख्या।

(दी०) यत्तु साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं वा व्याप्तिरिति। तन्न, अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात्॥

(गा०) साध्याभाववतीति। यन्निष्ठसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावस्तत्त्वमित्यर्थः। वह्निमान् धूमादित्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितविषयिता व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वत्वविशिष्टविषयितैव सा च न वह्न्यनुमितिप्रतिबन्धकतावच्छेदिका तच्छालिज्ञानस्यानुमित्यप्रतिबन्धकत्वात्, व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशी तद्वत्ताज्ञानस्य च व्यभिचारज्ञानविधयाऽनुमितिप्रतिबन्धक-

स्यात्ताद्दशविषयितया अनुमितिप्रतिबन्धकतावच्छेदकत्वान्नातिव्याप्तिः। यन्निष्ठत्वानुपादाने धूमांशे वह्नित्वावच्छिन्नवह्न्यभावचवद्वृत्तित्वावगाहिभ्रमनिष्ठवह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितया अनुमितिप्रतिबन्धकतावच्छेदकत्वाद्वह्निमान् धूमादित्यादावव्याप्तिरतस्तदुपादानम्, तथा च भ्रमविषयवह्नित्वेन वह्न्यभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावान्न दोषः। यन्निष्ठपदार्थनिरूपितविषयितासामान्ये यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्य इति वा यदुच्यते तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तिन्वमेव यत्र समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन भातं ताद्दशभानीयहेतुनिष्ठतथाविधसाध्याभाववद्वृत्तित्वविषयिताया अप्यनुमितिप्रतिबन्धकतावच्छेदकत्वादसम्भवोऽव्याप्तिर्वेति साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वं विषयिताविशेषणं ताद्दशभ्रमविषयिता च न साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपिता ताद्दशविषयितानिरूपकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य विशेषणीभूतं यत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं तद्विशिष्टत्वाभावात्। न च तद्विशिष्टनिरूपितत्वं यदि तदवच्छिन्ननिरूपकताकत्वं तदा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य तद्भ्रमविषयवृत्तावसत्त्वेऽपि तन्निष्ठविषयितानिरूपकत्वे व्यधिकरणीभूयाऽवच्छेदकत्वाद् भ्रमविषयितायास्तद्विशिष्टनिरूपितत्वमक्षतमेव। यदि च वस्तुगत्या यत्र तद्वैशिष्ट्यं तन्निरूपितत्वमेव तद्विशिष्टनिरूपितत्वं तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वमेवोक्तभ्रमविषयितायां अक्षतमिति कथं तद्व्यावृत्तिरिति वाच्यम्, तदवच्छिन्नतदाश्रयनिष्ठनिरूपकताकविषयतया एव तथात्वात् तथाहि विशेषणीभूतधर्मान्तरविशिष्टेन व्यावर्त्यमानस्य विशेष्यस्य भाने विशेषणांशे प्रकारीभवन्त्यां व्यक्तौ विशेष्यसम्बन्धितावच्छेदकतायाः विशिष्टवैशिष्ट्यबोधे भानात् साध्याभाववद्वृत्तित्वत्वरूपविशेषणविशिष्टविषयेण निरूपकीभूय विषयिताव्यावर्तने व्यावर्तकविषयस्याश्रयतया व्यावर्तकं यत्साध्याभाववद्वृत्तितात्वं तस्यापि निरूपकतावच्छेदकीभूय विषयिताव्यावर्तकत्वादुक्तभ्रमविषयिताव्यावृत्तिः, तद्व्यावर्तकविषयव्यावर्तकस्य तन्निष्ठसाध्याभाववद्वृत्तितात्वस्य ताद्दशविषयितानिरूपकतानवच्छेदकत्वात् ताद्दशविषयितया लक्षणाघटकत्वात्, एवञ्च भ्रमविषयिताव्यावर्तकतयैव साध्याभाववत्पदसार्थक्यम्, ताद्दशविषयितायाः उक्तक्रमेण हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टानिरूपितत्वेऽपि हेतुनिष्ठाधेयतात्वविशिष्टनिरूपितत्वानपायात् साध्याभावपदमनुपादायाभावाधिकरणवृत्तितात्वविशिष्टनिरूपितविषयितानिवेशे वृत्तौ समानाधिकरणधर्मावच्छिन्नाभावाधिकरणीयत्वभ्रमविषयितावारणेऽपि वृत्तिविशेषणे तन्निरूपकेऽधिकरणे यत्र समानाधिकरणधर्मावच्छिन्नाभावभ्रमस्तद्विषयतावारणासम्भवात्साध्याभावांशनिवेशस्यावश्यकत्वात्। न च तावत्पर्यन्तनिवेशेऽपि वह्नित्वावच्छिन्नवह्न्यभावत्वेन व्यधिकरणधर्मावच्छिन्नप्रति-

योगिताकवह्न्यभावमवगाह्य तादृशाभाववद्वृत्तित्वावगाहि यज्ज्ञानं तदीयतादृशसाध्याभाववद्वृत्तित्वविषयितापि साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको यः साध्याभावस्तद्वद्वृत्तित्वत्वस्यैव तत्र विशेषणतया भानात्तद्विशिष्टत्वस्य च तादृशज्ञाननिष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वे सत्त्वादिति तद्दोपतादवस्थ्यमिति वाच्यम्, अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यप्रकारकव्यभिचारज्ञानमेवानुमितिविरोधि, यत्र च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यं प्रकारस्तादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टस्य व्यधिकरणधर्मावच्छिन्नाभावस्याप्रसिद्ध्या तादृशज्ञानविषयितायां विशिष्टनिरूपितत्वासम्भवात्। न चैवमपि समानाधिकरणधर्मावच्छिन्नसाध्याभावव्यधिकरणधर्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयितायां व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तितात्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयतात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यम्, हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षितत्वात्, उक्तभ्रमे च समानाधिकरणधर्मावच्छिन्नाभावविषयितायास्तादृशविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेनाव्याप्त्यनवकाशात्।

अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्यैका प्रकारता तादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभवदभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासम्भवेऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धविषयितानिरूपकविषयितात्वेनानुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वादव्याप्तिर्दुर्वारैवेति चेन्न, तादृशभ्रमस्याप्रामाणिकत्वात् प्रामाणिकत्वे च संसर्गीयविषयिताद्वयानिरूपकत्वेनाभावविषयिताया विशेषणीयतया सामञ्जस्यात्।

अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्धस्य सम्बन्धविधया लक्षणघटकत्वमावश्यकम्, स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूप, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैवाप्रसिद्धिः, व्यतिरेकिसाध्यक-

सद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भवश्चरमस्य निवेशे च सर्वत्र व्यभिचारिण्यतिव्याप्तिः प्रतियोगितावच्छेदकधर्माणाञ्चोपलक्षणीभूतेन केनचिद्रूपेणानुगमय्य तेन रूपेण तेषां निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतया भानासम्भवात्। न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया एव सम्बन्धतया निवेशान्नाननुगमनिबन्धनोक्तदोष इति वाच्यम्, अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताविषयकाभावज्ञानस्य प्रतियोगिमत्त्वज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतयाऽवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया संसर्गतयाऽभानात्। न च स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एवाभावो निवेश्यः, न तु साध्यविशेषितः, वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकधूमादिहेतुकस्थले लक्षणघटक इति वाच्यम्, प्रमेयत्वाद्यवच्छिन्नसाध्यके तादृशाभावाप्रसिद्धेः, एवं स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र सम्बन्धघटकप्रतियोगिताया बाधितवह्न्यादिनिष्ठत्वस्य भानं तादृशज्ञानीयाभावविषयिताया उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावानिरूपिततयाऽनुमितिविरोधितया चानुपपत्तेर्दुर्वारत्वात्, स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगितानिवेशे च सर्वत्र सद्धेतावप्रसिद्धेः, एवं प्रतियोगिविशेष्यतापन्न एवाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकारत्वं प्रामाणिकं न तु प्रतियोगिविशेष्यतानापन्ने वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्येव प्रतीतेः, न तु वह्नित्वेन नास्तीति, तथा च विशिष्य प्रतियोग्यविशेषितस्योक्तसम्बन्धेन साध्यतावच्छेदकविशेषितस्याभावस्य विषयित्वनिरूपकतया निवेशो न सम्भवत्येवेति। मैवम्, प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता लक्षणे न निवेश्यते, अपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो यः सम्बन्धस्तत्प्रतियोगिसाध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकतावच्छेदकतात्वेन, यत्र हेतुसमानाधिकरणघटत्वाद्यवच्छिन्नवह्न्यभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूपकाभावनिष्ठो न निरुक्ततन्निरूपकतावच्छेदकसम्बन्ध इति तद्विषयिताव्युदासः, यत्र वह्नित्वावच्छिन्नघटाभावे तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः सम्बन्धतया भासते तत्र तत्सम्बन्धप्रतियोगी न वह्निरपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रतियोगित्वनिवेशात्तादृशज्ञानीयाभावविषयिताव्युदासः, साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्सम्बन्धानुयोगिनि वह्नित्वावच्छिन्नघटाभावे प्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्सम्बन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽप्यनुमितिविरोधित्वेऽपि च न दोषः, यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नित्वावच्छिन्नप्रति-

योगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धस्तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदकत्वं विवक्षणीयमिति। साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबन्धकतावच्छेदककोट्यप्रवेशादतिव्याप्तिरतो विषयितापर्यन्तनिवेशनम्। हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयितापर्याप्त्यभावविवक्षणे साध्यप्रतियोगिकाभावमात्रनिवेशे व्यभिचारिण्यतिव्याप्तिः प्रतियोगितायाः साध्यतावच्छेदकावच्छिन्नत्वावगाहिन एव ज्ञानस्यानुमितिप्रतिबन्धकतया तद्घटितविषये प्रतिबन्धकतावच्छेदकविषयितायाः अपर्याप्तेः, साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशश्च न सम्भवतीति तदुपेक्षितम्, व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयितायाः प्रतिबन्धकतावच्छेदकत्वाभावादतिव्याप्तिरत सामान्य इत्युक्तम्। प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपरम्, अन्यथा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावविषयकसमूहालम्बनात्मकप्रकृतानुमितिप्रतिबन्धकतावच्छेदकं यस्य हेतुनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायामपि सत्त्वात्सद्धेतावपि लक्षणगमनासम्भवात्। एवं 'प्रकृते'त्यनुपादाने कामिनीजिज्ञासादौ प्रसिद्धा याऽनुमितिसामान्यप्रतिबन्धकता तदवच्छेदकत्वाभावो धूमाभाववद्वृत्तित्वविषयितायामक्षत एव तद्विषयकज्ञानस्याप्यन्यलिङ्गकान्यसाध्यकान्यसंसर्गकानुमित्यप्रतिबन्धकत्वादत 'प्रकृतेति' तत्साध्यकतद्धेतुकतत्संसर्गकपरम्। सद्धेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायाः अनुमितिप्रतिबन्धकस्वरूपासिद्ध्यादिज्ञानवृत्तित्वादसम्भवः स्यादतो यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यस्यानुमितिप्रतिबन्धकवृत्तित्वाभावमुपेक्ष्य निरुक्तविषयितासामान्येऽनुमितिप्रतिबन्धकतावच्छेदकत्वाभावपर्यन्तानुधावनम्। अवच्छेदकत्वञ्च स्वरूपसम्बन्धविशेषः। न च धूमाभाववद्वृत्तित्वत्वेन घटादिविषयकज्ञानस्याप्यनुमितिप्रतिबन्धकतया धूमाभाववद्वृत्तित्वत्वविशिष्टविषयिताशालिज्ञानत्वेन प्रतिबन्धकताकल्पनस्यासम्भवात्तादृशविषयितायाः प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वासत्त्वेनातिव्याप्तिरिति वाच्यम्, धूमाभाववद्वृत्तित्वत्वप्रकारितानिरूपितविषयिताशालिज्ञानत्वेन भ्रमसाधारणप्रतिबन्धकताकल्पनसम्भवात् तादृशविषयितात्वेन वास्तवधूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वस्याक्षतत्वात्। न चैवं समानाधिकरणधर्मावच्छिन्नसाध्याभावव्यधिकरणधर्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयितायाः व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयितात्वेन च प्रतिबन्ध

कतावच्छेदकत्वादव्याप्तिरिति वाच्यम्, हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात्, उक्तभ्रमे च समानाधिकरणधर्मावच्छिन्नाभावविषयितायास्तादृशविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेनाव्याप्त्यनवकाशात्। न चैवं हेतुसमानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव यत्र हेतुसमानाधिकरणसाध्याभावत्वसमानाधिकरणधर्मावच्छिन्नसाध्याभावत्वाभ्यां भानं तादृशभ्रमविषयिताया हेतुसमानाधिकरणसाध्याभावत्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्मावच्छिन्नाभावत्वावच्छिन्नविषयतात्वेन प्रतिबन्धकतावच्छेदकत्वाच्चाव्याप्तिरिति वाच्यम्, अनुयोगिताद्वयावच्छिन्ननिरूपितत्वेन तादृशविषयिताया निवेशनीयत्वात्। अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्मावच्छिन्नाभावे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्यैका प्रकारता तादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावीयविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभवदभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासत्त्वेनासम्भवेऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धविषयितानिरूपितविषयितात्वेनानुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वादव्याप्तिर्दुर्वारैवेति चेन्न, तादृशभ्रमस्याप्रामाणिकत्वात् प्रामाणिकत्वे च संसर्गीयविषयिताद्वयानिरूपकत्वेन लक्षणघटकाभावविषयिताया विशेषणीयतया सामञ्जस्यात्।

अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्धस्यापि सम्बन्धविधया लक्षणघटकत्वमावश्यकम्, स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकत्वरूपः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावाप्रसिद्धिर्व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भवश्चरमस्य निवेशे च सर्वत्र व्यभिचारिण्यतिव्याप्तिः, प्रतियोगितावच्छेदकधर्माणामुपलक्षणीभूतेन केनचिद्रूपेणानुगमय्य निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतयाऽभानात्। न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया एव सम्बन्धतया निवेशान्नाननुगमनिबन्धनो दोष इति वाच्यम्, अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगित्वविषयकाभावज्ञानस्य प्रतियोगिमत्ताज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतयाऽवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितायाः संसर्गतयाऽभानात्। न च स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एवाभावो निवेश्यो न तु साध्य-

विशेषिते, वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकधूमादिहेतुकस्थले लक्षणघटक इति वाच्यम्, प्रमेयत्वावच्छिन्नसाध्यकस्थले तादृशाभावाप्रसिद्धेः, एवं स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र सम्बन्धघटकप्रतियोगितायां बाधितस्य वह्न्यादिनिष्ठत्वस्य भानं तादृशज्ञानीयाभावविषयिताया उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावनिरूपिततयाऽनुमितिविरोधितया चानुपपत्तेर्दुर्वारत्वात्, स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगितानिवेशे च सर्वत्र लक्षणाप्रसिद्धेः, एवं प्रतियोगिविशेष्यतापन्नाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्मस्य स्वातन्त्र्येण व्यधिकरणधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकारत्वं प्रामाणिकं न तु प्रतियोगिविशेष्यतानापन्ने वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्येव प्रतीतेः न तु वह्नित्वेन नास्तीति, तथा च विशिष्य प्रतियोग्यविशेषितस्योक्तसम्बन्धेन साध्यतावच्छेदकविशेषितस्याभावस्य विषयित्वनिरूपकतया निवेशो न सम्भवत्येवेति चेत्, मैवम्, प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता न लक्षणे निवेश्यतेऽपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो यः सम्बन्धस्तत्प्रतियोगिसाध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकताकत्वेन, यत्र हेतुसमानाधिकरणघटत्वावच्छिन्नवह्न्यभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूपकाभावनिष्ठो न निरुक्तलक्षणनिरूपकतावच्छेदकसम्बन्ध इति तद्विषयिताव्युदासः, यत्र वह्नित्वावच्छिन्नघटाद्यभावे तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः सम्बन्धतया भासते तत्र तत्सम्बन्धप्रतियोगी न वह्निरपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रतियोगित्वविरहात्तादृशज्ञानीयाभावविषयिताव्युदासः। साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्सम्बन्धानुयोगिनि वह्नित्वावच्छिन्नप्रतियोगिताकघटाभावे प्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्सम्बन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽप्यनुमितिविरोधित्वेऽपि च न क्षतिः। यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टः सम्बन्धस्तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धावच्छिन्ननिरूपकतावच्छेदकत्वं विवक्षणीयमिति दिक्।

न च व्यभिचारज्ञानस्यानुमितिकरणव्याप्तिज्ञानं प्रत्येव प्रतिबन्धकत्वादनुमित्यप्रतिबन्धकत्वमिति व्यभिचारिण्यतिव्याप्तिरिति वाच्यम्, तज्ज्ञानप्रतिबन्धकतावच्छेदकत्वाभावस्यैव विवक्षितत्वात्। 'अनुमित्यविरोधित्वज्ञानस्य' अनुमितिप्रतिबन्धकतावच्छेदकत्वाभाववद्धारकज्ञानस्यैव। अत्र—

हेतुन इति। एतन्मते निरुक्तविषयितानिष्ठतादृशावच्छेदकत्वाभावस्यैवानुमितिकारणीभूतज्ञानविषयत्वादिति भावः। 'अनुमित्यविरोधितया' अनुमितिजनकज्ञानाप्रतिबन्धकतया साध्याभाववद्वृत्तित्वज्ञानस्यानुमितिजनकत्वाभावादिति भावः। अतिप्रसङ्गादिति। हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वविषयितासामान्येऽनुमितिजनकज्ञानप्रतिबन्धकतावच्छेदकत्वाभावस्याक्षतत्वादिति भावः। न च हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयिताऽनुमितिजनकज्ञानप्रतिबन्धकतावच्छेदिकेत्येतादृशज्ञानीयहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयिताया अपि तादृशविषयितासामान्यान्तर्गततया तत्र च प्रकृतव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकत्वस्यापि सत्त्वेन नातिव्याप्त्यवकाश इति वाच्यम्, एवं सति सद्धेतावपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयितायामनुमितिजनकज्ञानविरोधित्वभ्रमनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितामादायानुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेन लक्षणगमनासम्भवात् तद्वारणायेतरविशेषणत्वेन तादृशविषयिताया एव लक्षणे निवेश्यतया विषयिताविशेषणत्वेन साध्याभाववद्वृत्तित्वविषयितामादायातिव्याप्तिवारणासम्भवादिति ध्येयम्॥

मिश्ररीत्या साजात्यघटनेन साध्याभाववद्वृत्तित्वरूपां व्याप्तिं परिष्कृत्योपन्यस्यति केचित्त्विति॥

(दी०) केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया ये तत्तदधिकरणनिरूपितवृत्तित्वाभावास्तद्वत्त्वं तत्त्वम्, साजात्यञ्च समानाममानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण। साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रत्येतव्यो व्याप्यवृत्तिश्च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्वा साध्यस्याभाववति हेतोर्वृत्तावपि नाव्याप्तिः।

(गा०) धूमवान् वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नाभावसजातीयस्य घटत्वादिना तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतो यावन्त इति। तथा च यावदन्तर्गतसमानाधिकरणधर्मावच्छिन्नाभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वान्नातिव्याप्तिः, तत्रैव समानाधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिवारणाय प्रत्येकं तत्तत्सजातीया इति। तथा च वक्ष्यमाणरूपेण व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वाभावान्न दोषः। यावत्साध्याभावत्वेन साध्याभावानां निरूपकतया साजात्येऽन्वयं व्यतिरेकिसाध्यके वह्निमान् धूमादित्यादौ यावत्साध्याभावसाजात्याप्रसिद्ध्याऽव्याप्तिरनस्तद्व्यक्तित्वेन तेषां साजात्येऽन्वयनिवेशलाभाय तत्तदिति। तत्तत्सजातीयत्वेनोपस्थितानां समा-

नाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयानामेकस्मिन्नधिकरणवृत्तित्वाभावे 'एकत्र द्वयम्' इतिरीत्याऽन्वये पुनर्व्यतिरेकिसाध्यकेऽव्याप्तिरेकत्वोभयसाजात्याभावादत एकैकाभावे एकैकाभावसजातीयाभेदान्वय उपगन्तव्यः, एतदर्थतात्पर्यग्राहकं 'प्रत्येकम्'इतिप्रथमा बहुवचनान्तम् 'तत्तदधिकरणवृत्तित्वाभावाः' इत्यस्य विशेषणम्। यावत्साध्याभावत्वेन साध्याभावानामधिकरणेऽन्वये वह्निमान् धूमादित्यादौ तत्तद्भेदावृत्तित्वावच्छिन्नसाध्याभावघटितसमुदायाधिकरणतायाः क्वचिदप्यसत्त्वेनाव्याप्तिः स्यादतस्तत्तद्व्यक्तित्वेन साध्याभावानामधिकरणेऽन्वयलाभाय चरमं तत्तदिति। तत्त्वमिति। अव्यभिचरितत्वमित्यर्थः। ननु तत्तत्सजातीयत्वं तत्तद्वृत्तिधर्मवत्त्वं तथा च समानाधिकरणधर्मावच्छिन्नाभाववृत्त्यभावत्वादिधर्मवत्त्वं व्यधिकरणधर्मावच्छिन्नाभावेऽपि वर्तत इति तस्यापि तत्सजातीयत्वाद्व्यभिचारिण्यतिव्याप्तिरत आह साजात्यञ्चेति। समानासमानाधिकरणेति। समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणेत्यर्थः। तृतीयार्थश्चाभेदः, तस्य च साजात्येऽन्वयः, विवक्षणीयमिति शेषः। तथा च 'तत्तत्सजातीयाः' इत्यस्य तत्तदभाववृत्तिताद‍ृशान्यतररूपवन्त इत्यर्थः। यद्यपि वह्नित्वावच्छिन्नाभावनिष्ठं स्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपं तच्च तदधिकरणवृत्तित्वाभावेऽसम्भावितमेव तथापि स्वासमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तदनिरूपकत्वं स्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम्, स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तदनिरूपकत्वमेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिह विवक्षितं तच्च साध्याभावतद्वद्वृत्तित्वाभावोभयसाधारणमेव। समनियताभावैक्यमते च स्वाधिकरणावृत्तिधर्मावच्छिन्ना या प्रतियोगिता तन्निरूपकत्वरूपो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेत्यस्य यथाश्रुतार्थ एवादरणीयः, तन्मते व्यधिकरणधर्मावच्छिन्नसाध्याभावतथाविधतद्वद्वृत्तित्वाभावयोरैक्यात्ताद‍ृशसाध्याभावस्य याद‍ृशप्रतियोगितानिरूपकत्वं ताद‍ृशप्रतियोगितानिरूपकत्वस्य तथाविधतद्वद्वृत्तित्वाभावे सत्त्वात्। एतेन समनियताभावानामैक्यमते व्यधिकरणधर्मावच्छिन्नाभावस्य समवायादिसम्बन्धावच्छिन्नगगनत्वावच्छिन्नगगनाद्यभावाभिन्नतया तस्य समानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरूपकतया व्यधिकरणधर्मावच्छिन्नाभावस्य निरुक्तरूपवत्त्वानुपपत्त्या स्वसमानाधिकरणधर्मावच्छिन्नसमानाधिकरणसम्बन्धावच्छिन्नप्रतियोगिताया अनिरूपकत्वपर्यन्तनिवेशनप्रयासो नोपादेयः, समनियताभावैक्यमते गगनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापि साजात्यविवक्षणं सम्भवतीति ध्येयम्।

ननु यावत्साध्याभावान्तर्गतानां तत्तत्साध्यव्यक्त्यभावादीनामधिकरणे हेतोर्वृत्त्या वह्निमान् धूमादित्यादावव्याप्तिरत आह साध्याभावश्चेति।

पूर्वोक्तद्वितीयरीत्येति। 'यत्समानाधिकरणानाम्' इत्यादिद्वितीयलक्षणरीत्येत्यर्थः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताभाव एव साध्याभावपदेन विवक्षित इति भावः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणे तथाविधवह्नियटोभयाभावमादाय दोषतादवस्थ्यमतः प्रथमरीत्येति नोक्तम्, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वादिसाध्यकस्थले लक्षणसमन्वयसम्भवेऽपि स्वरूपसम्बन्धेन तादात्म्यसम्बन्धेन वा प्रमेयमात्रसाध्यकस्थले तथाविधाभावाप्रसिद्ध्याऽव्याप्तिरतो व्यापकतावच्छेदकपर्यन्तानुधावनम्, तथा च ज्ञेयत्वत्वादिना वाच्यत्वाभाव एव तथेति न दोषः। साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे च वह्न्यादिसाध्यके तार्णातार्णोभयाभावादिकमादाय दोषस्य व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां निवेश्य वारणेऽपि सत्तादिसाध्यकस्थले विशिष्टसत्ताभावमादाय दोष इति तादृशाभावो न निवेशितः। व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता च न्यूनवृत्तिधर्मावच्छिन्नाऽतिरिक्तवृत्तिधर्मावच्छिन्ना वा या या प्रतियोगिता तदन्यत्वेन विशेषणीया, तेन वह्न्यादिसाध्यकस्थले वह्नित्वादिना महानसीयवह्निघटान्यतराभावमादाय न दोषः। न्यूनवृत्तित्वमतिरिक्तवृत्तित्वञ्च विरुद्धव्याप्त्युक्तं वाच्यं नातो व्यधिकरणधर्मावच्छिन्नाभावासंग्रहः, व्यापकता च साध्यतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या तेन संयोगादिना वह्न्यादिसाध्यकस्थले समवायादिना वह्न्याद्यभावमादायासम्भववारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन प्रतियोगिताया विशेषणीयतया समवायादिना द्रव्यत्वादिसाध्यके विषयतादिसम्बन्धेन साध्यव्यापकस्य ज्ञानादेः समवायादिनाऽभावमादाय दोषस्य नावकाशः। तादात्म्यसम्बन्धेन प्रमेयसाध्यकस्थले समवायित्वादिरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकः, समनियताभावैक्यमते तादृशभेदस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावाभिन्नतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्य प्रसिद्धिसम्भवात्।

यत्तु संयोगेन प्रमेयत्ववान्नेति प्रतीतिसाक्षिकः संयोगावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगितावच्छेदकताक एव भेदो लक्षणघटकोऽत्यन्ताभावस्येव तेन सम्बन्धेन तद्वृत्तियों धर्मस्तत्सम्बन्धेन तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्याप्युक्तयुक्तिबलात्सिद्धिरिति, तन्न, वह्निमान् धूमात्, गुणवान् द्रव्यत्वादित्यादौ विषयितादिसम्बन्धेन वह्नित्वगुणत्वादिमतः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य वारणाय व्यापकतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वेन प्रतियोगितावच्छेदकताया अवश्यं निवेशनीयतया तादृशाभावस्य प्रामाणिकत्वेऽपि लक्षणघटकत्वासम्भवात्।

ननु कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपि-

सयोगाद्यभावस्यापि लक्षणघटकतया तदधिकरणे च हेतोर्वृत्तेरव्याप्ति । न च साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य निष्फलतया कपिसंयोगत्वादेः साध्यव्यापकतानवच्छेदकत्वेन तादृशाभावाना न लक्षणघटकतेति वाच्यम्, संयोगेन वह्न्यादिसाध्यकस्थले वह्नित्वादीनां संयोगरूपसाध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकत्वसम्पत्तये व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशनस्यावश्यकत्वादन्यथा साध्यवत्युत्पत्तिकालावच्छेदेन वह्नित्वद्द्रव्यत्वाद्यवच्छिन्नस्य संयोगसम्बन्धेनाभावसत्त्वात् साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकस्यैवाप्रसिद्धिप्रसङ्गात् तथा च तत्तदधिकरणपदेन तत्तदभावीयव्याप्यवृत्तितानिरूपकाधिकरणमेव विवक्षणीयं व्याप्यवृत्तितानिरूपकत्वञ्च निरवच्छिन्नाधेयतानिरूपकत्वम्, एवञ्च संयोगाद्यभावस्य तथाविधाधिकरणं गुणादिरेवेति न दोष । इत्थञ्च कपिसंयोगाभाववान् कपिसंयोगाधिकरणत्वाभाववान् वा मेयत्वादित्यादौ कपिसंयोगतदधिकरणत्वादिरूपाणां यावत्साध्याभावान्त पातिनामभावानां तथाविधाधिकरणाप्रसिद्ध्याऽव्याप्तिरतः साध्याभाव व्याप्यवृत्तित्वेन विशिनष्टि व्याप्यवृत्तीत्यादि । तथा च तादृशाभावस्य तथाविधयावदन्तर्गततया तथाविधाधिकरणाप्रसिद्धावपि न क्षति । व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्व न त्ववच्छिन्नवृत्तिकान्यत्वम्, तथासति संयोगेन धूमसाध्यकव्यभिचारिणि संयोगेन धूमत्वाद्यवच्छिन्नधूमाद्यभावस्य महानसादाववच्छिन्नवृत्तिकतयाऽयोगोलकान्यत्वाद्यभावे साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतयाऽनिव्याप्ति, एवञ्च वह्न्यभावसंयोगाद्यभावस्यापि कचिन्निरवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया तदीयव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादाय दोषवारणायाधिकरणपदस्य व्याप्यवृत्तितानिरूपकाधिकरणपरत्वमावश्यकमित्यवधेयम् । कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिर्व्याप्यवृत्ते साध्याभावस्याकाशाभावस्य व्याप्यवृत्तितानिरूपकाधिकरणे आत्मादौ हेतोर्वृत्तेरतस्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेव तत्तदधिकरणपदेन विवक्षणीयम्, प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशाच्चैतद्रूपान्यत्वविशिष्टगुणत्ववान् गुणत्वादित्यादौ समवायरूपसाध्यतावच्छेदकसम्बन्धघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वाद्यवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकतया हेतुमत्यसत्त्वेऽपि नातिव्याप्ति । तथा च कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावादिसाध्यकात्मत्वादावव्याप्तिस्तत्र व्याप्यवृत्तियावत्साध्याभावान्त पातिन आकाशत्वाभावादेः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धेः कालेऽप्याकाशाद्यभावेन तादृशसाध्यरूपतदभावीयप्रतियो

गित्वात् सर्वत्रैव तादृशाभावस्य प्रतियोगिसमानाधिकरणत्वादतो व्याप्यवृत्तित्वमुपेक्ष्य तादृशाभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेशयति प्रतियोगितावच्छेदकावच्छिन्नेति । अत्र च समनियताभावैक्यमते सर्वेषामेव व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितया तत्प्रतियोग्यनधिकरणाप्रसिद्ध्या तदसंग्रहो विशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नयत्किञ्चित्प्रतियोगिताश्रयवैयधिकरण्यनिवेशे च वाच्यत्वत्वादिना घटाद्यभावस्य घटादिव्यधिकरणत्वेन लक्षणघटकतानिर्वाहेऽपि प्रतियोगिभेदेन प्रतियोगिताभेदमते जन्यज्ञानविषयत्वादिसाध्यकस्थले यत्किञ्चित्कालावच्छेदेन परमाण्वादौ प्रसिद्धस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य यत्किञ्चित्प्रतियोग्यनधिकरणत्वे प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्ध्याऽव्याप्तिस्तत्रापि यत्किञ्चित्प्रतियोगितान्तर्भावेन तादृशाधिकरणत्वप्रसिद्धिसम्पादने यत्किञ्चित्प्रतियोगिताश्रयप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणे तत्र हेतोर्वृत्त्याऽव्याप्तितादवस्थ्यम् । एवं वह्निमान् धूमादित्यादौ द्रव्यत्वावच्छिन्नस्य संयोगेन योऽभावस्तस्य द्रव्येऽप्युत्पत्तिकालावच्छेदेन वर्तमानस्य गुणादौ प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणे गुणादौ हेतुतावच्छेदकसम्बन्धेन धूमस्याप्रसिद्ध्याऽव्याप्तिवारणाय हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे प्रतियोगिवैयधिकरण्यमभावे विशेषणं देयम्, एवञ्चैतद्रूपान्यत्वविशिष्टसत्तावान् जातेरित्यादौ समवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे सत्तादिरूपप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतयाऽतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानम् ।

अथ केवलान्वयिसाध्यकस्थले लक्षणघटकानां वाच्यत्वत्वाद्यवच्छिन्नघटाद्यभावानां सर्वेषामेव प्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नानधिकरणाप्रसिद्धिः । न च यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वमेव निवेशनीयं तथा च समनियताभावानामैक्योपगमेन व्यतिरेकितावच्छेदकधर्मस्याप्युक्ताभावप्रतियोगितावच्छेदकतया तदवच्छिन्नानधिकरणत्वस्य प्रसिद्ध्या तेषां लक्षणघटकतेति वाच्यम्, तथा सति संयोगाभावसाध्यकस्थले संयोगाद्यात्मकाभावस्य यत्किञ्चित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वात् तद्व्यावर्तनासम्भवात् दुर्विशिष्टसाध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणं उक्तस्थले तादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणाप्रसिद्धेर्दुर्वारत्वात्, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वनिवेशे च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्ध्या तादृशप्रतियोगिवैयधिकरण्यं दुर्घटमिति ।

अत्र केचित् स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणा ये ये तदन्यत्वं व्यधिकरणान्तार्थं न तु प्रतियोगितावच्छेदका-

वच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वम्, व्यधिकरणधर्मावच्छिन्नाभावस्य विशिष्टप्रतियोग्यप्रसिद्ध्याऽसंग्रहात्। न चैव धूमवान् वह्नेरित्यादौ साध्यता वच्छेदकीभूतसंयोगसम्बन्धघटितव्यापकतावच्छेदकधूमत्वावच्छिन्नसंयोग सम्बन्धावच्छिन्नप्रतियोगिताकानां धूमाद्यभावानामुत्पत्तिकालावच्छेदेन धूमादिमति वृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदका वच्छिन्नप्रतियोगिव्यधिकरणतयातिव्याप्तिरिति वाच्यम्, साध्यतावच्छेदक सम्बन्धेन व्यापकतामनिवेश्य येन सम्बन्धेन व्यापकता तत्सम्बन्धावच्छिन्न व्यापकतावच्छेदकावच्छिन्नाभावं निवेश्य विषयतासम्बन्धेन साध्यव्या पकस्य ज्ञानस्य समवायसम्बन्धावच्छिन्नाभावमादायोक्तदोषस्य वारणीय तयाऽयोगोलकभेदादेरभावमादायैवातिव्याप्तिवारणसम्भवाद्यादृशप्रतियोगि तावच्छेदको यो धर्मस्तद्विशिष्टतादृशप्रतियोगिताश्रयसामानाधिकरण्य विव क्षणीयं तेन समनियताभावैक्यमते वाच्यत्वत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाभावाभिन्नतया वाच्यत्वादिप्रतियोगिकत्वेन प्रति योगितावच्छेदकवाच्यत्वत्वविशिष्टवाच्यत्वादिरूपप्रतियोगिसमानाधिकरण त्वेऽपि न क्षति। न चैवमपि वाच्यत्वादिसाध्यक सर्वेषामेवाभावानां पूर्व क्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिना समानाधिकरणतया प्रतियोग्य समानाधिकरणाभावाप्रसिद्धिरिति वाच्यम्, स्वावच्छेदकविशिष्टस्वाश्रया धिकरणवृत्त्यभावीयप्रतियोगिताभिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रति योगिता विशेषणीयेत्यत्रैव प्रतियोगितावच्छेदकेत्यादेस्तात्पर्यात्। वाच्यत्व त्वावच्छिन्नघटादिनिष्ठप्रतियोगिताया स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्ध्या निरुक्तप्रतियोगिताभिन्नत्वेन तन्निरूपकाभावमादाय लक्षणसमन्वयसम्भ वात्। न च तथापि एतदभावभिन्नं मेयत्वादित्यादौ साध्यव्यापकतावच्छेद कसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैतदभावमात्रवृत्तेरभाव मात्राधिकरणतयाऽधिकरणस्वरूपत्वादेतदभावभेदादिरूपप्रतियोगिसमानाधि करणकतया निरुक्तप्रतियोगिताभिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिता कोऽभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेत्यतिव्याप्तिरिति वाच्यम्, स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेन वर्तते योऽभावस्त दीयप्रतियोगिताभिन्नत्वेन च व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताया विशेषणीयतयैतदभावाधिकरणे चैतदभावभिन्ने एतदभावत्वेनैतदभावरूपे तदभावभेदाभावस्य वृत्तावपि तादृशाधिकरणे एतदभावभेदो नास्तीत्य प्रतीत्यैतदभावभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन तस्यावृत्तिरयादेतद भावभेदत्वावच्छिन्नप्रतियोगिताया निरुक्तप्रतियोगिताभेदस्याक्षतत्वा दित्याहुः।

तच्चिन्त्यम्, व्यापकतावच्छेदकसम्बन्धावच्छिन्नाभावनिवेशे व्यापकता शरीरे प्रतियोगिवैयधिकरण्यस्याभावाविशेषणत्वेऽपि संयोगादिना धूमादि साध्यकव्यभिचारिण्ययोगोलकान्यत्वाभावमादायातिव्याप्तिवारणसम्भवात्

तत्र तन्निवेशे प्रयोजनाभावेनाव्याप्यवृत्तिसाध्याभावमादायाव्याप्त्यनवकाशादभावे व्याप्यवृत्तित्वविशेषणव्यावृत्त्यसङ्गते, अस्तु वा साध्यव्यापकतावच्छेदकस्यापि साध्यवन्निष्ठव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितानवच्छेदकतया तदभावव्यावर्तनाय व्यापकताशरीरे प्रतियोगिवैयधिकरण्य प्रवेशस्तथाप्येतादृशप्रतियोग्यसामानाधिकरण्यविलक्षणे तस्याव्याप्तिवारण प्रयोजनकत्वाभिधानासङ्गतिः, अभावे तदनिवेशे व्याप्यवृत्तिसाध्यकेऽपि यावत्साध्यवद्विषयकजन्यज्ञानवृत्तिविशेषस्य प्रतियोगिवैयधिकरण्यघटित साध्यव्यापकताश्रयत्वात् कालविशेषावच्छेदेन हेतुमति तदभाववृत्तेरसम्भवस्यैव प्रसङ्गात्।

अत्र वदन्ति, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणे वृत्तित्वमेव तदर्थः। न च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्ध्या केवलान्वयिसाध्यके प्रतियोगितावच्छेदकविशिष्ट प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरव्याप्तिरिति वाच्यम्, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं हि स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवद्वृत्तित्वं ज्ञेयत्वत्वादिना वाच्यत्वाद्यभावस्य तादृशभेदसमानाधिकरणतया प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं सुघटमेव, व्यधिकरणधर्मावच्छिन्नस्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकज्ञेयत्वत्वादिना वाच्यत्ववद्भेदस्यैव तथात्वात्, कपिसंयोगाभाववान्मेयत्वादित्यादौ कपिसंयोगादिरूपसाध्याभावस्यापि ज्ञेयत्वत्वादिना कपिसंयोगाभाववद्भेदसामानाधिकरण्यसत्त्वात्, तस्य च स्वप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्य निरूपकाधिकरणाप्रसिद्ध्याऽव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकताया विशेषणम्। तत्रैव कपिसंयोगात्मकाभावीयप्रतियोगितावच्छेदकीभूतसमवेतसामान्याभावत्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्यापि निरुक्तप्रतियोगितावच्छेदकताकत्वात् तत्सामानाधिकरण्यमादाय कपिसंयोगाद्यात्मकाभावानां प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यवारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकं विशेषणीयम्, समवेतसामान्याभावत्वादेश्च कपिसंयोगाभावादिव्यापकतावच्छेदकतया न दोषः, न चात्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदके विशेषिते तत्तत्साध्यव्यक्त्यभावादीनामीदृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं न घटते साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतस्वप्रतियोगितावच्छेदकाप्रसिद्धेस्तथा च 'साध्याभावश्च' इत्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणासङ्गतिरिति वाच्यम्, 'साध्याभावश्च' इत्यादिग्रन्थस्य व्याप्यवृत्तितानिवेशकल्पेऽभावे साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणपरत्वात्, द्विती-

यत्कल्पे च प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र प्रतियोगितावच्छेदकस्य तादृशव्यापकतावच्छेदकत्वेन विशेषणात्तादृशरूपावच्छिन्नप्रतियोगिताक एवाभावोऽत्र लक्षणघटक इत्यर्थकत्वात्, एतत्कल्पे चाभावांशे तादृशप्रतियोगिताकत्वविशेषणविरहेऽपि क्षतिविरहात् तत्रैव कपिसंयोगाभावत्वादिना घटादिमद्भेदसामानाधिकरण्यमादाय तद्दोषवारणाय स्वप्रतियोगिवृत्तित्वं भेदप्रतियोगितावच्छेदकतायां विशेषणम्, संयोगसामान्याभावादेरपि कपिसंयोगाद्यात्मकाभावप्रतियोगितया कपिसंयोगाद्यात्मकाभावस्य प्रतियोगितावच्छेदककपिसंयोगाभावत्वादिना संयोगसामान्याभाववद्भेदसामानाधिकरण्यमादाय तद्दोषतादवस्थ्यवारणाय यादृशप्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेव भेदप्रतियोगितावच्छेदकतायां निवेशनीयम्, कपिसंयोगाभावत्वञ्च कपिसंयोगाभावनिष्ठप्रतियोगिताया एवावच्छेदकं संयोगसामान्याभावश्च न तादृशप्रतियोगिताश्रय इति न तादृशभेदमादाय दोष। भेदप्रतियोगितावच्छेदकतायां स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वमपि निवेशनीयं तेन कपिसंयोगाद्यात्मकाभावस्य कपिसंयोगाभावत्वावच्छिन्नकपिसंयोगाभावादिनिष्ठविषयितासम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्येऽपि न तद्दोषतादवस्थ्यम्। एवं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकत्वं स्वनिष्ठं यत् स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्यं तन्निरूपकत्वमतो व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपि न तादृशाधिकरणाप्रसिद्धिः, कपिसंयोगी एतत्त्वादित्यादौ हेत्वधिकरणेऽपि द्रव्यत्वादिना कपिसंयोगादिमतः कपिसंयोगत्वादिना च द्रव्यत्वादिमतो भेदसत्त्वात्तस्यापि तादृशाधिकरणत्वापत्तिरतोऽवच्छिन्नान्तनिष्ठान्तयोरुपादानम्, पूर्वक्षणावृत्तित्वविशिष्टस्वाभावत्वादिरूपप्रतियोगितावच्छेदकरूपेण कपिसंयोगादिमद्भेदमादाय तद्दोषतादवस्थ्यमतः तत्प्रतियोगिताश्रयनिष्ठप्रतियोगितावच्छेदकतायां तदवच्छेदकावच्छिन्नत्वं विवक्षणीयम्। एवं विशिष्टसाध्यव्यापकतावच्छेदकत्वेनापि प्रतियोगितावच्छेदकं विशेषणीयम्, तेन संयोगी द्रव्यत्वादित्यादौ संयोगाभावस्य द्रव्यवृत्तित्वात्तत्प्रतियोगितावच्छेदकद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्नद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वस्य द्रव्ये सत्त्वेऽपि तस्य न प्रतियोगिवैयधिकरण्यनिरूपकत्वापत्तिः। एवं सम्बन्धविशेषनिवेशनमपि पूर्ववद्बोध्यम्। तथा च स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्ना यावत्यः प्रतियोगितास्तदवच्छेदकावच्छिन्नतदाश्रयनिष्ठप्रतियोगितावच्छेदकताकभेदवदधिकरणवृत्तित्वव्यापकप्रतियोगिताकतत्तत्प्रतियोगितानिरूपकाभावसजातीयाभाववत्त्वमिति निष्कर्ष इति संक्षेपः। अभावे यथाश्रुतसाध्यप्रतियोगिकत्वं परित्यज्य

स्वप्रतियोगितावच्छेदके साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविशेषणस्य व्याप्यवृत्तित्वादिविशेषणस्य च व्यावृत्तिमाह तत्रेति । तत्तत्साध्यव्यक्तेरभाववतीति हेतोर्वृत्तावपि नाव्याप्तिरितियोजना । एतद्रूपवान्नेतद्रसादित्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववन्निरसाध्यमेव तत्र हेतोरवृत्तेर्लक्षणगमनसम्भवान्नासम्भव । अथ साध्यवति तत्रैतद्रूपतद्रूपोभयत्वावच्छिन्नाभावासत्त्वेन तत्रापि लक्षणगमनासम्भवादसम्भव । न च नासौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरण प्रतियोगितावच्छेदकीभूतोभयत्वेन रूपेणोभयवद्भेदस्योभयवतोऽप्रसिद्धत्वेनाप्रसिद्धिरिति वाच्यम्, उभयत्वेनान्यतरवद्भेदस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नतत्प्रतियोगिवृत्तिप्रतियोगितावच्छेदकतास्योभयत्वेनान्यतराभाववति सत्त्वात् तस्यापि तादृशभेदमादाय तत्रादिति चेन्न, व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य स्वव्यापकसाध्यतावच्छेदकप्रतियोगिताकस्य वाऽभावस्य निवेशे तादृशोभयाभाववारण सम्भवतीत्यभिप्रायेणाव्याप्तिलिखनात् । अव्याप्त्यनवृत्तेति । यद्यप्येतद्ग्रन्थस्य न्याययुक्तस्याभावे व्याप्यवृत्तित्वादिनिवेशनस्य प्रयोजनप्रदर्शनपरत्वे साध्यपदं कपिसंयोगाभावादिपरमेव वाच्य न तु कपिसयोगादिपरम्, कपिसयोगादिसाध्यकस्थले कपिसंयोगाद्यभावस्य लक्षणघटकत्वेऽपि स्वाधिकरणपदस्य व्याप्यवृत्तित्वादिनिरूपकाधिकरणपरताया अभावे व्याप्यवृत्तित्वादिनिवेशनेऽप्यावश्यकत्वात् तदीयव्याप्यवृत्तितानिरूपकाधिकरणे गुणादौ हेतोरवृत्तेरव्याप्त्यनवकाशात्, कपिसंयोगाभावादेर्गुणादौ निरवच्छिन्नवृत्तिकत्वादिरूपव्याप्यवृत्तित्वादिसत्त्वेन तादृशविशेषणेन व्यावर्तनासम्भवाच्च, तथा च कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावस्य लक्षणघटकत्वेऽपि तदीयव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिरेवाव्याप्तिप्रयोजिका न तु तादृशाभावीयाव्याप्यवृत्तितानिरूपकाधिकरणे हेतोर्वृत्तिरिति 'वृत्तावपि हेतोरिति' न सङ्गच्छते, तथाप्यभावे व्याप्यवृत्तित्वादिविशेषणानुपादाने यावदन्तर्गतकपिसंयोगादीना व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धि स्यादिति तादृशाधिकरणपर्यन्तं न विवक्षणीयं तथा सत्यव्याप्यवृत्तिसाध्यकस्थले हेतो साध्याभाववदवृत्तित्वनिबन्धनाव्याप्ति, सा च व्याप्यवृत्तिताद्युपादानात सम्भवतीत्यभिप्राय ।

अथवा कपिसंयोगादिसाध्यकस्थले हेतो साध्याभावीयाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वं तत्स्थलीयाव्याप्तिवारकव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वनिवेशौपयिकमतस्तदधीना या कपिसंयोगाभावादिस्थले कपिसंयोगाद्यात्मकाभावीयतादृशाधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिस्तत्सम्पादकमर्पीति न तादृशग्रन्थासङ्गति । एतेन व्याप्यवृत्तितानिरूपकाधिकरणानिवेशे व्याप्यवृत्तिसाध्यकस्थले क्षणविशेषवृत्तित्वविशिष्टसाध्याभावस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकस्या-

व्याप्यवृत्तेरधिकरणे हेतोर्वृत्त्या लक्षणगमनासम्भवादसम्भव एव सम्भवती त्यव्याप्तिरिति लिखनं न युज्यत इत्यपि निरस्तम् ॥

ननु तत्तत्साध्याभाववद्वृत्तित्वस्य हेतुवृत्तितानवच्छेदकविशेषधर्मव्या सज्यवृत्तिधर्मावच्छिन्नाभावमादाय व्यभिचारिण्यतिव्याप्तिस्तत्तत्साध्याभा ववद्वृत्तित्वत्वावच्छिन्नाभाव निवेश्य चेद्वार्यते, तदा व्यधिकरणधर्मावच्छि न्नसाध्याभावसजातीयस्य तादृशस्य तद्वद्वृत्तित्वत्वेन घटाद्यभावस्य प्रसि द्धिर्गुरुधर्मस्य प्रतियोगितावच्छेदकत्वाङ्गीकार एव सम्भवति, अन्यथा तादृ शाभाववद्वृत्तित्वत्वस्य वृत्तित्वत्वरूपलघुधर्मसमनियततया प्रतियोगितान वच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेः, अन्यूनानतिरिक्तवृत्तित्वरूपावच्छि न्नत्वनिवेशे ह्रदवृत्तित्वह्रदान्यनिर्धूमवृत्तित्वोभयाभावादेर्निर्धूमवृत्तित्वत्वादि समनियतधर्मावच्छिन्नप्रतियोगिताकतया वह्नौ धूमादिसाध्यकवह्न्यादि हेतावतिव्याप्ते, तत्तत्साध्याभाववद्वृत्तित्वत्वविशिष्टव्यापकतावच्छेदकरूपा वच्छिन्नाभावादिनिवेशे च निर्धूमवृत्तित्वत्वादिना ह्रदवृत्तित्वघटान्यतरा भावमादाय तद्दोषतादवस्थ्यमित्यन्यादृशाभाव तत्तदधिकरणवृत्तित्वाभाव- पदेन विवक्षति तनदिति।

(दी०) तत्तदधिकरणवृत्तित्वाभावश्च तत्तत्साध्याभाववद्वृत्तितात्व-व्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्तत्तत्साध्याभाववद्वृत्तितात्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताको वा बोध्यः, तेन साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसङ्गः।

(गा०) व्यापकान्तमनवच्छिन्नान्तं च प्रतियोगिताविशेषणम्, प्रथमवि शेषणप्रयोजनमाह तत्तत्साध्याभाववद्व्यक्तिविशेषेति। यद्व्यक्तौ हेतुरपि न वर्तते तादृ- शह्रदादिरूपव्यक्तीत्यर्थः। व्यभिचारनिरूपकहेत्वधिकरणमात्रवृत्तिर्योऽयो- गोलकादिव्यक्तिविशेषावृत्तित्वादिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकताव च्छेदकरूपावच्छिन्नाभावस्तद्व्यक्तिविशेषवृत्तित्वाभावस्य हेतावसम्भवात् किञ्चिद्विशिष्टस्य तादृशाभाववद्वृत्तित्वस्याभावमादायातिप्रसङ्गं दर्शयति पार्थिवत्वादिविशेषितस्येति। अग्रिमेण 'साध्याभाववद्वृत्तित्वस्य' इत्यनेनान्वि- तम्। वह्न्यादौ पार्थिवत्वादिविशेषणाभावात्तद्विशिष्टनिर्धूमवृत्तित्वाभाव स्यापि तत्र सत्त्वात्तमादायेत्यर्थः। द्वितीयविशेषणप्रयोजनं दर्शयति द्वित्वा द्यवच्छिन्नस्येति। घटनिर्धूमवृत्तित्वोभयत्वाद्यवच्छिन्नस्येत्यर्थः। नातिप्रसङ्ग इति। ह्रदादिवृत्तित्वत्वपार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियो गिताया वह्न्यादिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितया तत्तत्साध्याभाववद्वृत्ति- त्वत्वाव्यापकत्वात्, द्वित्वावच्छिन्नाभावप्रतियोगिताया द्वित्वादिवद्व्या सज्यवृत्तितावि‍रहेण निर्धूमवृत्तित्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूप

निर्धूमवृत्तित्वत्वादिव्यापकत्वसत्त्वेऽपि व्यासज्यवृत्तिधर्मावच्छिन्नत्वात्तादृशाभावानां लक्षणाघटकत्वादिति भाव । व्यासज्यवृत्तिधर्मस्य तत्तत्साध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वाविरहात्तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्मावच्छिन्नाभावनिवेशे द्वित्वावच्छिन्नाभावमादायातिप्रसङ्गस्य वारणसम्भवेऽपि प्रतियोगिताया व्यापकत्वविशेषणाप्रवेशे निर्धूमवृत्तित्वत्वादिना ह्रदादिवृत्तित्वघटान्यतराभावमादायातिप्रसङ्गो न शक्यते वारयितुमिति तत्र तद्विशेषणप्रवेशस्यावश्यकत्वे तत्तदभाववद्वृत्तित्वत्वव्यापकधर्मावच्छिन्नायास्तत्तदभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताया समानाधिकरणधर्मावच्छिन्नत्वनियतत्वेन व्यधिकरणधर्मावच्छिन्नतदभावासङ्ग्रह, तत्तदभाववद्वृत्तित्वत्वव्यापकत्वेनाविशेषिताया प्रतियोगिताया तत्तदभाववद्वृत्तितात्वव्यापकतावच्छेदकावच्छिन्नत्व निवेश्य घान्यतरत्वादिना साध्याभाववद्वृत्तित्वाभावसङ्ग्रहसम्भवेऽपि गौरवमिति व्यासज्यवृत्तिधर्मावच्छिन्नाभाववारणाय तादृशधर्मानवच्छिन्नत्वमेव तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्मावच्छिन्नत्वापेक्षया लाघवान्निवेशयितुमुचितमिति तदेव निवेशितम्, व्यासज्यवृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम् ॥

(दी०) अत्र च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं बोध्यं तेन वह्न्यभाववति समवायेन धूमस्य वृत्तावपि न दोषः । इत्थञ्च साध्याभावोऽपि हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्तमानो ग्राह्यस्तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिरिति ।

(गा०) साध्याभाववद्वृत्तित्वमिति । साध्याभाववत्सम्बद्धत्वमित्यर्थ । तेन तादात्म्यादिसम्बन्धेन वृत्तेरप्रसिद्धावपि न तत्सम्बन्धावच्छिन्नहेतुकस्थलेऽव्याप्ति, सम्बन्धप्रतियोगित्वरूपसम्बद्धत्वैकदेशे सम्बन्धे हेतुतावच्छेदकसम्बन्धेनेति तृतीयार्थाभेदान्वय । वृत्तावपीति । सम्बद्धत्वेऽपीत्यर्थ । न दोष इति । हेतुतावच्छेदकसम्बन्धानिवेशे वह्निमान् धूमादित्यत्र वह्न्यभाववत्संयुक्तत्वावच्छिन्नाभावप्रतियोगिताया वह्न्यभाववत्समवेतत्वाद्यवृत्तितया सामान्यतो वह्न्यभाववद्वृत्तित्वत्वं प्रत्यव्यापकत्वेन तादृशाभावस्य लक्षणघटकत्वानुपपत्ते, वह्न्यभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य तद्वद्वृत्तित्वसामान्याभावस्य वह्न्यभाववत्समवेतत्ववति धूमेऽसत्त्वादव्याप्ति प्रसज्यते, हेतुतावच्छेदकसम्बन्धनिवेशे च निर्वह्निसंयुक्तत्वावच्छिन्नाभावस्यापि तादृशसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकतया तमादाय लक्षणसमन्वय इति भाव । 'इत्थञ्च' हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वविवक्षणे च, सतीति शेष ।

तदविवक्षणे च वक्ष्यमाणाप्रसिद्धिविरहादुपदम्भासङ्गतिः। हेतुतावच्छेदकसम्बन्धेन यस्यचिदधिकरणे वर्तमान इति। अनुयोगितासम्बन्धेन हेतुतावच्छेदकसम्बन्धवद्वृत्तिरित्यर्थः। अथवा हेतुतावच्छेदकसम्बन्धेन धर्मवद्वृत्तिरित्यर्थः। विशिष्य हेतुतावच्छेदकपुरस्कारेण हेतुमत्त्वनिवेशनसम्भवेऽपि बहुपदार्थघटितहेतुतावच्छेदकस्थले धर्मत्वेन निवेशापेक्षया तेन रूपेण निवेशे गौरवमिति सामान्यतो निवेशलाभाय 'कस्यचित्'इत्यभिहितम्।

अथ द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि साध्याभावस्य सत्तादिरूपहेतुसामानाधिकरण्यसम्भवेऽपि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणनिरुक्तसाध्याभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनियमात्तादृशहेतुसमानाधिकरणत्वेनाभावविशेषणे केवलव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपेणैव साजात्यविवक्षणं सम्भवतीति तन्निवेशनमेवोचितमिति चेन्न, तथा सति तादृशयावत्साध्याभावसजातीयवत्त्वस्यैव लक्षणत्वं सम्भवतीति व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावस्यापि विशिष्टहेतुसमानाधिकरणत्वेन लक्षणघटकतया तद्घटितयावदभावसजातीयाप्रसिद्ध्यैवातिव्याप्तिविरहात्, सद्धेतौ तादृशयावदभावसजातीयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवादिति साध्याभाववद्वृत्तित्वाभाववत्त्वविशेषणवैयर्थ्यापत्तेः। हेतुतावच्छेदकसम्बन्धेनेति। समवायादिसम्बन्धेनेत्यर्थः। 'साध्याभाववद्वृत्तित्वस्य' स्वसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य। न क्षतिरिति। तादृशसाध्याभावस्य समवायसम्बन्धानुयोगवृत्तितया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात्तद्वति च तादृशसम्बन्धेनापि वृत्तेः प्रसिद्धेरिति भावः। अत्र च द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादावव्याप्तिर्विशेषणविशेष्यसम्बन्धस्य परम्परया हेतुत्वमभ्युपेत्य धारणीयेत्यभिप्रेत्य हेतुतावच्छेदकसम्बन्धेन किञ्चिदधिकरणवृत्तित्वमभावे विवक्षितम्। यदि च सत्तादेरेव विशिष्टसत्तात्वादिना व्याप्यत्वं हेतुतावच्छेदकविशिष्टनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतासामान्ये तत्तत्साध्याभावसजातीयतत्तदधिकरणानुयोगिकत्वाभावं तत्तत्साध्याभाववद्वृत्तितासामान्ये तत्तत्साध्याभावसजातीयहेतुतावच्छेदकसम्बन्धावच्छिन्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वाभावं वा निवेश्य निवार्यते, तदा जातिमान् सत्त्वादित्यादावुपदर्शिताप्रसिद्धिनिबन्धनाव्याप्तेरुक्तविवक्षामन्तरेणैव निवारणं सम्भवतीत्यवधेयम्।

इति मिश्रस्य साजात्यघटितलक्षणव्याख्या।

मिश्रास्तु साध्याभाववद्वृत्तित्वाभावरूपव्याप्तेर्जातिमान् सत्त्वात्, द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिमालोच्य सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपां व्याप्तिं साजात्यादिघटनया परिष्कृतवन्तस्तत्परिष्कृते च यथाश्रुते वक्ष्यमाणदोषमुद्धर्तुमभावप्रतियोगित्वस्थले स्वावच्छिन्नव्यापकतावच्छेदक-

तत्प्रतियोगितावच्छेदकत्वरूपपारिभाषिकतत्प्रतियोगितावच्छेदकत्वाश्रयहेतुतावच्छेदकवत्त्वं निवेशयन् तादृशलक्षणमाह यद्वेति ।

(दी०) यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वम् ।

(गा०) 'तादृशाः' व्याप्यवृत्तयः, 'साध्याभावाः' साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाः, 'प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य' एकैकं तत्तदभावसजातीयस्य तत्तदभावव्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तत्प्रतियोगितावच्छेदकं यद्धेतुतावच्छेदकावच्छिन्ननिरूपितव्यापकतावच्छेदकं 'तद्रूपवत्त्वं' 'तत्त्वं' तेन रूपेण व्याप्यत्वम्, वह्निमान् धूमादित्यादौ वह्नित्वाद्यवच्छिन्नवह्न्यभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नधूमाद्यभावो वह्नित्वावच्छिन्नघटाभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नघटाद्यभावस्तत्प्रतियोगितावच्छेदकं धूमत्वावच्छिन्नव्यापकतावच्छेदकमिति लक्षणसमन्वयः । व्यभिचारिणि धूमत्वावच्छिन्नवह्न्यभावसजातीयतत्तदभावव्यापकवह्नित्वावच्छिन्नघटाद्यभाव तादृशवह्नित्वावच्छिन्नवह्न्यभावसजातीयतत्तदभावव्यापकवह्नित्वावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वादे वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेऽपि तादृशयावत्साध्याभावान्तर्गतधूमत्वावच्छिन्नधूमाभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकस्य कस्यापि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिः । प्रथमाभावे व्याप्यवृत्तित्वविशेषणात्कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाद्यभावस्य केवलान्वयिन सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्त्यभावस्याप्रसिद्धावपि न क्षति व्याप्यवृत्तित्वविशिष्टतदभावं प्रत्येतद्वृक्षत्वाद्यभावस्य व्यापकत्वात्, साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकताया विवक्षणीयतया संयोगेन द्रव्यस्याव्याप्यवृत्तितामते संयोगेन तत्साध्यके तादृशसम्बन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयतया साध्यवन्निष्ठप्रतियोगिसमानाधिकरणाभावप्रतियोगितावच्छेदकस्यापि कपिसंयोगत्वादेः साध्यव्यापकतावच्छेदकत्वमक्षतमिति ध्येयम् ।

नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावस्य नानाधिकरणैकव्यक्तिसाध्यके यत्किञ्चिदधिकरणवृत्तित्वविशिष्टसाध्याभावस्य व्यापकीभूताभावो न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक इति तादृशसाध्याभावव्यावर्तनाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशनम्, व्यापकता च साध्यतावच्छेदक-

सम्बन्धघटिता ग्राह्या, तेन समवायेन द्रव्यत्वादिसाध्यकगुणादिहेतौ विषयतया साध्यव्यापकज्ञानादेः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावं प्रति हेतुतावच्छेदकसम्बन्धावच्छिन्नहेत्वभावस्याव्यापकत्वेऽपि न क्षतिः। साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन संयोगादिना वह्न्यादिसाध्यकधूमादिहेतौ समवायादिसम्बन्धावच्छिन्नवह्न्यभावं प्रति संयोगादिना धूमादेरभावस्याव्यापकत्वेऽपि न क्षतिः। व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावव्यापकव्यधिकरणहेतुतावच्छेदकावच्छिन्नप्रतियोगिताकाभावमादायातिप्रसङ्गवारणाय सजातीयत्वोपादानम्। व्यतिरेकिसाध्यकस्थले यावत्साध्याभावसजातीयाप्रसिद्धयैकैकतत्सजातीयत्वनिवेशनम्, साजात्यघटकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वादिकमनुगतं पूर्वं निरुक्तभेदकूटरूपमेव ग्राह्यम्, अन्यथा यत्र भिन्नभिन्नसम्बन्धेन साध्यहेतुभावस्तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तस्यैव तद्वत्तया सजातीयत्वेन तत्सजातीयाभावनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः सजातीयस्यापि साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य निवेशे हेतुव्यापकताया अपि तत्सम्बन्धघटिताया विवक्षणे उक्ताप्रसिद्धिनिबन्धनदोषासम्भवेऽपि 'सजातीयव्यापकीभूतस्य' इत्यादेर्वैयर्थ्यस्य दुर्वारत्वात्, तत्परित्यागे च चरमलक्षण एव पर्यवसानात्।

अथ सजातीयाभावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्यानिवेशेऽपि स्वमात्रनिष्ठयथाश्रुतसाजात्यनिवेशपक्षे नातिप्रसङ्ग आत्मत्वादिसाध्यके विषयतादिसम्बन्धेन हेतौ ज्ञानादौ समवायादिसम्बन्धावच्छिन्नज्ञानाद्यभावस्य साध्याभावव्यापकत्वेऽपि यथाश्रुतसाजात्याभावेनातिव्याप्त्यप्रसक्तेः, संयोगादिना वह्न्यादौ साध्ये समवायादिना हेतुं रूपविशेषं प्रति हेतुतावच्छेदकसमवायेन वह्न्याद्यभावप्रतियोगिनोऽव्यापकत्वेऽपि च न दोषः साध्यतावच्छेदकसम्बन्धेनैव हेतुव्यापकताया विवक्षणीयत्वादिति चेत्तर्हि, सजातीयाभावे साध्याभावव्यापकत्वविशेषणस्य वैयर्थ्यमापद्येत स्वाव्यापकाभावस्य स्वसाजात्यविरहेणैव व्यावर्तनात्, व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावसजातीयहेतुतावच्छेदकावच्छिन्नहेत्वाद्यभावमादायातिप्रसङ्गवारणाय व्यापकीभूतस्येति। व्यभिचारिणोऽभावस्य च व्यभिचारनिरूपकाधिकरणसाधारणसाध्याभावाव्यापकत्वान्न दोषः। व्यापकत्वञ्च न तत्समानाधिकरणाभावाप्रतियोगित्वम्, सर्वस्यैव द्वित्वावच्छिन्नाभावप्रतियोगितयाऽसंभवात्। न च तदधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेनावश्यं वाच्यं तथा च वह्न्याद्यभाववति धूमाद्यभावस्य धूमाद्यनात्मकद्वित्वाद्यवच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसम्बन्धेनावृत्त्या न तमादाय दोषावसर इति वाच्यम्, एवमपि यत्र स्वरूपसम्बन्धेन हेतुता तत्र तादृशाभावप्रतियोगितया हेत्वभावस्य व्यापकत्वानु-

पपत्तेर्दुर्वारत्वात्। नापि तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वं तत्,
अभावत्वाद्यात्मकतादृशरूपमादायाभावमात्रस्यैव व्यापकतया व्यापक-
त्वस्याव्यावर्तकतापत्तेः, एवं वह्न्याद्यभाववति धूमावयवादौ समवायादिना
वर्तमानं धूमादिरूपमभावमादाय तदभावस्य व्यापकताभङ्गभिया हेतुताव-
च्छेदकसम्बन्धेन सामानाधिकरण्यस्य निवेशनीयतया सत्तावान् जातेरि-
त्यादौ सत्त्वाद्यभाववति सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेर
प्रसिद्ध्याऽव्याप्तिश्चेति तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमेव
साध्याभावव्यापकत्वं निर्धूमो वह्निशून्यत्वादित्यादौ हेत्वभावस्य वह्न्यादे
प्रत्येकं धूमादिमन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽप्यखण्डस्य निर्वह्नित्व-
प्रकारकप्रमाविषयत्वाद्यभावस्य तादृशव्यापकतासम्भवात् तत्प्रतियोगिता-
वच्छेदकावच्छिन्नस्य हेतुव्यापकतयैव लक्षणसमन्वयः। तद्वन्निष्ठत्वं दैशिक
विशेषणतया ग्राह्यम्, अतो वह्न्याद्यभाववति धूमाद्यभाववद्भेदस्य कालिक-
सम्बन्धेन वृत्तावपि न क्षतिः। अभावाभावस्य प्रतियोगिरूपत्वेऽप्यभाव-
वद्भेदोऽतिरिक्त एवातो धूमाद्यभाववत्ययोगोलकादौ दैशिकविशेषणतया
वह्न्याद्यभाववद्भेदस्य वृत्तिरव्याहतैवेति न वह्न्याद्यभावस्य धूमाद्यभाव
व्यापकतापत्तिः। अथवा यदीयदैशिकविशेषणतासम्बन्धसामान्ये तत्तत्सा
ध्याभाववद्यत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावस्तदन्यत्वमेव तदभावव्यापक
त्वम्। अभावस्येति। भावभिन्नस्येत्यर्थकः, तेन धूमवान् जलत्वाभावादित्यादौ
जलत्वादिनिरूपितदैशिकविशेषणताया अप्रसिद्ध्या तत्र निरुक्तभेदकूटात्म
कव्यापकतासत्त्वेऽपि नातिव्याप्तिः। अभावरूपसद्धेतौ हेतुमत्त्वप्रकारक-
प्रमाविषयत्वाभावप्रतियोगितावच्छेदकावच्छिन्नव्यापकतामादायैव लक्षण
समन्वयः। धूमवान् वह्नेरित्यादावयोगोलकाद्यनुत्पत्तिकालावच्छेदेन वर्त
मानस्य वह्न्याद्यभावस्य निरुक्तव्यापकतासत्त्वादतिव्याप्तिरतो व्याप्यवृत्तेरिति।
यद्यपि तादृशाभावा अपि ह्रदादौ व्याप्यवृत्तयस्तथापि व्याप्यवृत्तित्ववि
शिष्टस्य व्यापकत्वं विवक्षणीयम्, अनवच्छिन्नविशेषणतासम्बन्धेन व्यापक-
तानिवेशलाभायैव वा तदुक्तम्। अवच्छिन्नवृत्तिकान्यत्वरूपं व्याप्यवृत्तित्वं
तु न शक्यते निवेशयितुं संयोगेन सद्धेतौ हेतुतावच्छेदकसम्बन्धेन हेत्व-
भावस्यालभ्यत्वात्। प्रतियोगितावच्छेदकेत्यत्र प्रतियोगिता हेतुतावच्छेदक
सम्बन्धावच्छिन्ना ग्राह्या, अन्यथा व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिता
कहेत्वभावस्य साध्याभावव्यापकस्य समनियताभावैक्यमते व्यधिकरण
धर्मावच्छिन्नाभावरूपतया समानाधिकरणधर्मावच्छिन्नसाध्याभावासजाती-
यत्वेन तमादायातिव्याप्तिविरहेऽप्यात्मत्वादिसाध्यके विषयतया हेतौ
ज्ञानादौ साध्याभावव्यापकसमवायसम्बन्धावच्छिन्नज्ञानाद्यभावमादायाति
व्याप्तिः। अभावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविशेषणं
प्रवेश्य च नातिप्रसङ्गवारणसम्भवः, समनियताभावैक्यमते समवाय-
सम्बन्धावच्छिन्नज्ञानाद्यभावस्यापि स्वसमवायिविषयकत्वसम्बन्धेन ज्ञानादि-

विशिष्टज्ञानादेर्विषयतासम्बन्धावच्छिन्नाभावसमनियतत्वेन तादृशसम्बन्धावच्छिन्नप्रतियोगिताकत्वात्, धूमाभावव्यापकमहानसीयवह्न्यभावप्रतियोगिनो वह्नित्वादिना वह्नित्वाद्यवच्छिन्नव्यापकत्वादतिप्रसङ्ग इति प्रतियोगिनो व्यापकतामुपेक्ष्य प्रतियोगितावच्छेदकस्य तदवच्छेदकत्वपर्यन्तानुधावनम्। द्रव्यं विशिष्टसत्त्वादित्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेर्हेतुतावच्छेदकोपलक्षितहेतुव्यापकत्वासम्भवार्थं प्रतीत्यनुक्त्वा यद्रूपावच्छिन्नं प्रतीत्युक्तम्, व्यापकता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, अतो महाकालभिन्नं कालत्वादित्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकस्य साध्यतावच्छेदकादेः कालिकादिसम्बन्धेन हेतुव्यापकतायामवच्छेदकत्वेऽपि नातिप्रसङ्गः। व्यापकतावच्छेदकताघटकसम्बन्धभेदनिवेशनादिकं स्वयमूह्यम्। न च धूमवान् वह्निमत्त्वप्रकारकप्रमाविषयत्वादित्यादावतिव्याप्तिर्धूमाद्यभावव्यापकस्य धूमाद्यभावस्य प्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाभावाभावत्वादेर्हेतुतावच्छेदकस्वरूपसम्बन्धघटितहेतुव्यापकतायामवच्छेदकत्वादिति वाच्यम्, भाववृत्तिप्रतियोगितावच्छेदकस्य व्यापकतावच्छेदकताया विवक्षणीयत्वात्।

यथाश्रुतमिश्रलक्षणं दूषयति साधनस्येति।

(दी०) साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्येति तु न वाच्यम्। द्रव्यं सत्त्वादित्यादौ सत्त्वादेर्गुणकर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रतियोगित्वादतिव्याप्तेः। ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च प्रमेयत्वव्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः।

(गा०) तादृशेति। ये ये साध्याभावाः प्रसिद्धास्तत्तत्सजातीयतत्तद्व्यापकेत्यर्थः।[1] 'तदवच्छेदकत्वं' तादृशप्रतियोगितावच्छेदकत्वम्। आद्ये द्रव्यं सत्त्वादित्यादाविति। द्वितीये ज्ञेयं प्रमेयादित्यादाविति। ननु प्रमेयत्वादेः केवलान्वयितावच्छेदकत्वेऽपि वाच्यत्वत्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमक्षतमेवेत्याशङ्कां निरस्यति प्रमेयत्वव्यधिकरणेति। प्रमेयत्वस्य केवलान्वयित्वादिति भावः। धूमाद्यभावं प्रति

१. तत्प्रतियोगितादौ सम्बन्धविशेषावच्छिन्नत्वानिवेशस्य साधनतावच्छेदकसम्बन्धघटितसाध्यहेतुव्यापकत्वयोर्निवेशस्तु न सम्यक्, तथा सति तादृशसाध्याभावप्रतियोगितावच्छेदक यद्रूपावच्छिन्न व्यापकतावच्छेदकमित्येतावतैव सामञ्जस्ये सजातीयव्यापकाभावादरस्यानतिप्रयोजकत्वापत्तेः, उक्तरीत्यनुसरणे च संयोगेन वह्न्यादौ साध्ये रूपविशेषादेः समवायेन हेतुतायां संयोगेन साध्यव्यापकस्य वह्नेर्हेतुतावच्छेदकसमवायेन हेत्वव्यापकत्वेनाव्याप्तेर्वारणाय द्वितीयाभावनिवेशस्यावश्यकत्वादिति क्वचिदधिकः पाठः।

विषयितासम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य योऽभावस्तस्य व्यापकत्वात्त मादाय, समवायेनात्मत्वे साध्ये समवायेन द्रव्यत्वे हेतावात्मत्वाभाव प्रति विषयितासम्बन्धेन द्रव्यत्वप्रकारकज्ञानस्य च समवायसम्बन्धावच्छिन्न प्रतियोगिताकाभावस्तस्य व्यापकत्वात्तमादाय चातिप्रसङ्गवारणाय प्रति योगितावच्छेदकताया हेतुतावच्छेदकतावटकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयतया व्यधिकरणसमवायादिसम्बन्धेन प्रमेयत्वस्याभावप्रतियोगि तायामसमानाधिकरणतयाऽवच्छेदकत्वसम्भवेऽपि न निस्तार इत्यवधेयम्।

अन्योन्याभाव एव व्यधिकरणधर्मावच्छिन्नावच्छेदकताको न त्वत्यन्ता भाव इत्याशयेनेदम्, अन्यथा घटत्वावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिता कात्यन्ताभावमादाय लक्षणगमनसम्भवात्। एतदुपलक्षण गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे कम्बुग्रीवादिमत्त्वाद्यवच्छिन्नहेतुकाव्याप्तिरपि द्रष्टव्या। एतेन व्यापकीभूताभावप्रतियोगिताया हेतुतावच्छेदकानवच्छिन्न त्वव्यधिकरणधर्मानवच्छिन्नत्वोभयाभावविवक्षणे प्रमेयहेतुकस्थले वाच्य त्वत्वादिना घटाद्यभावप्रतियोगिताया तादृशोभयाभाववत्त्वेन लक्षणसम न्वयेऽपि न निस्तार, उक्तस्थले हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्ध्याऽ प्रतीकारात्।

इति साजात्यघटितद्वितीयलक्षणव्याख्या।

उक्तलक्षणे सजातीयादिपरित्यागेन लघुलक्षणमाह यद्वेति।

(दी०) यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रति- योगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं वा तत्त्वमित्याहुः।

(गा०) व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावादिकमादायातिव्या प्तेर्वारणाय यावत इति। वह्निमान् धूमादित्यादौ महानसीयवह्नित्वावच्छिन्ना भावप्रतियोगितावच्छेदकस्य धूमत्वावच्छिन्नव्यापकतानवच्छेदकतयाऽव्या प्तिरिति तादृशा इति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपाव च्छिन्नप्रतियोगिताका इत्यर्थः। अत्र व्याप्यवृत्तित्वविशेषण प्रयोजनाभावाद नुपादेयम्। साध्याभावसजातीयत्वादिविशेषणावच्छिन्नस्याभावान्तरस्य प्रकान्तत्वात्तादृशपदे तत्परत्वभ्रमस्य झटिति निरासायाभावा इत्येतन्मात्र मनभिधाय साध्याभावा इत्युक्तम्। यावत्साध्याभावनिरूपिता न काचिदपि प्रतियोगितेति प्रत्येकपदम्। अत्र च व्यभिचारिणि प्रत्यपि कचित्किञ्चित्स म्बन्धेन साध्यतावच्छेदकावच्छिन्नस्य व्यापकतयाऽतिप्रसङ्गस्य वारणाय प्रतियोगितावच्छेदकसम्बन्धेनैव व्यापकता निवेशनीया, इत्थञ्च समवाय सम्बन्धावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकसमवायादिसम्बन्धेन वह्नि त्वावच्छिन्नस्य धूमाद्यव्यापकत्वादसम्भव इति प्रतियोगितावच्छेदक

सम्बन्धेनैव साध्यव्यापकता विवक्षणीया, तथा च केवलान्वयिसाध्यकस्थले व्यधिकरणसम्बन्धावच्छिन्नसाध्याभावमादाय निर्वाहो न भवतीति व्यधिकरणसम्बन्धावच्छिन्नाभावस्योपयोगिता बोध्या । धूमवान् वह्नेरित्यादौ धूमाद्यभावप्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाभावाभावत्वेन वह्न्यादिव्यापकत्वेऽपि नातिव्याप्तिः, साध्यतावच्छेदकावच्छिन्ननिरूपितस्वावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकावच्छिन्ना यावत्यः प्रतियोगिताः प्रत्येकं तदवच्छेदकरूपेण तदवच्छेदकसम्बन्धेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमित्येतादृशार्थस्यैव विवक्षणीयत्वात् । साध्यव्यापकतावच्छेदकं यद्रूपं तेन व्यापकत्वविवक्षणे व्यधिकरणधर्मावच्छिन्नाभावोपयोगिता न घटत इति साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वेन व्यापकतावच्छेदकनिवेशः । यथासन्निवेशे न वैयर्थ्यम्, प्रतियोगितायाः स्वरूपसम्बन्धरूपत्वे वह्नित्वावच्छिन्नप्रतियोगिताया यावत्साध्यव्यक्तिभेदेन भिन्नाया धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वं न सम्भवतीति व्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां व्यापकतावच्छेदकत्वं न निवेशितम् ।

इति मिश्रोक्तसाजात्यघटितलघुलक्षणव्याख्या ।

कूटघटितलक्षणे व्यभिचारिणि साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताको न निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावोऽपि तु जगद्वृत्तित्वसामान्याभाव एव, स च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरित्यतिव्याप्तिवारणाय कूटपदमुपात्तं तादृशातिव्याप्तिश्च समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसाधारणरूपेण साध्याभावस्य व्याप्यतावच्छेदककोटौ प्रवेशेन एव प्रसज्यते न तु विशिष्टसाध्याभावनिवेशे, तथा सति निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावस्यापि लक्षणघटकतानिर्वाहादिति कूटपदमनुपादाय विशिष्य साध्याभावं निवेश्यैव लक्षणमुचितं तदुपादाने बहूनां दोषाणां वक्ष्यमाणत्वादिति कूटघटितलक्षणवादिनमाक्षेप्तुं कूटाघटितं तल्लक्षणं दर्शयति परे त्वित्यादिना ।

(दी०) परे तु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः, येन सम्बन्धेन हेतुता तेनैव वृत्तिमत्त्वमपि बोध्यम्, तेन व्यधिकरणधर्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः । साध्याभावश्च पूर्ववद्बोध्यः, तद्वद्वृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्नप्रतियोगिताको बोध्यः, तेनालोकाद्यवृत्तित्वेन रूपेण

यो वह्निसामान्याभाववद्वृत्तित्वस्य यत्नेन्धनत्वावच्छिन्नवह्न्यभावा-धिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन्नसत्त्वेऽपि न क्षति-रित्याहुः ॥

(गा०) साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय व्यभिचारिमात्रेऽतिव्याप्तिरतो यावन्त इति। तथा च समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य यावत्तादृशाभावान्तर्गतस्य व्यभिचारिण्यसत्त्वान्नातिव्याप्तिः। वृत्तिमद्वृत्तित्वानुपादाने समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्यासंयुक्तादौ प्रसिद्धस्य हेतावसत्त्वात् संयोगादिसम्बन्धेन हेतावव्याप्तिर्न त्वसम्भवो यादृशसम्बन्धप्रतियोगित्वं वस्तुमात्र एव तादात्म्यविषयतादिरूपतादृशसम्बन्धेन हेतावेव परं लक्षणसमन्वयो भवति तादृशसम्बन्धेन जगत्सम्बद्धत्वस्य समानाधिकरणधर्मावच्छिन्नाभावप्रसिद्धेरिति तदुपादानम्। ननु वृत्तिमद्वृत्तित्वोपादानेऽपि जगत्संयुक्तत्वत्वावच्छिन्नाभावस्य जात्यादिरूपवृत्तिमति वर्तमानस्य वारणासम्भवाद् वह्निमान् धूमादित्यादावव्याप्तिर्दुर्वारैव निर्धूमसंयुक्तत्वाद्यभावस्य निर्धूमवृत्तित्वत्वाव्यापकप्रतियोगिताकस्तथा वृत्तिमन्मात्रस्यैव निर्धूमकालादिवृत्तित्वेन च निर्धूमवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वेन धूमवान् वह्नेरित्यादावतिव्याप्तेर्वारणाय हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्य निवेशनीयतया यत्र संयोगादिना हेतुत्वं तत्र जगत्संयुक्तत्वत्वावच्छिन्नाभावस्यापि हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकत्वाद्वृत्तिमत्पदस्य यथाश्रुतार्थकत्वे कालिकसम्बन्धेन गगनादेरवृत्तित्वमते तेन सम्बन्धेन यत्र हेतुता तत्रैव परमव्याप्तिवारकता तेन सम्बन्धेन जगद्वृत्तित्वाभावस्यावृत्तिमात्रे प्रसिद्धत्वादित्यत आह यत्र सम्बन्धेनेति। न क्षतिरिति। नाव्याप्तिरित्यर्थः। न तु नासम्भवस्तादात्म्यकालिकादिसम्बन्धेन हेतौ लक्षणसमन्वयसम्भवादिति। ननु नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभाववद्वृत्तित्वाभावस्य हेतावसत्त्वादव्याप्तिः कूटघटितलक्षण इव साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे वार्णतार्णदहनोभयत्वावच्छिन्नाभावमादाय वह्न्यादिसाध्यके गुणादिवृत्तित्वविशिष्टसत्ताद्यभाववद्वृत्तित्वाभावमादाय च सत्तादिसाध्यकेऽव्याप्तिर्दुर्वारैव एवमव्याप्यवृत्तिकपिसंयोगादिसाध्यके हेत्वधिकरणस्यैव जगत एव कपिसंयोगत्वाद्यवच्छिन्नाभाववत्तया तद्वद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेनाव्याप्तिविरहेऽपि तादृशकपिसंयोगाभावादिसाध्यकद्रव्यत्वादि

हेतौ कपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वाभावासत्त्वादव्याप्तिरित्यत आह साध्याभाववदिति। पर्यवदिति। भिन्नलक्षणे यथा साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिरभावो निवेश्यते तथाऽत्रापि निवेशनीय इत्यर्थः। तत्तद्वह्नित्वकथितोभयत्वावच्छिन्नप्रतियोगिताकाभावाना प्रथमविशेषणेन कपिसंयोगादिरूपाणाञ्च द्वितीयविशेषणेन व्यावृत्तिः। ननु साध्याभाववद्वृत्तित्वप्रतियोगिकाभावमात्रनिवेशे प्रकृतहेतुसाधारणस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्य समानाधिकरणधर्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्तिः सम्भवतीति यावत्तादृशाभावान्तर्गततद्धत्त्वस्य हेतावभावादसम्भवः, एवं समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकीभूतकिञ्चिद्धर्मावच्छिन्नस्याभावोऽपि यावत्तादृशाभावान्तर्गत इति तद्वत्त्वविरहादपि व्यतिरेकिसाध्यकहेतूनामव्यभिचारित्वानुपपत्तिस्तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावश्च विवक्षितुमशक्यः केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्य तादृशगुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि तस्यातथात्वमते व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य स्वघटककेवलवृत्तित्वत्वसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेर्दुर्वारत्वात्, तत्तदभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभावनिवेशे च वह्नित्वावच्छिन्नवह्न्यभावव्यक्तेस्तदभावत्वावच्छिन्नाभावस्यापि तादृशतया तस्य च धूमादावसत्त्वादव्याप्तिः साध्याभाववद्वृत्तित्ववृत्तितादृशधर्मावच्छिन्नाभावनिवेशनेऽपि घटवृत्तित्वत्वाद्यवच्छिन्नसाध्यके तादात्म्येन घटत्वव्यापकादिहेतौ तादृशसाध्याभाववान् यो घटत्वाभावादिस्तद्वृत्तित्वनिष्ठतादृशसाध्याभाववत्त्वरूपतथाविधधर्मावच्छिन्नाभावस्य घटादिमात्रवृत्तेर्हेतावसत्त्वात्तदव्याप्तिर्दुर्वारैव साध्याभावादिव्यावृत्तघटकतानिवेशे च प्रयासगौरवमिति तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावं विवक्षति तद्वदिति। 'स्वं' प्रतियोगिता। अत्र साध्याभावस्य साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगितायां व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारणसाध्याभाववद्वृत्तित्वत्वाव्यापकत्वेन तादृशाभावस्य लक्षणाघटकतया वृत्तित्वसामान्याभावस्य तथाविधप्रतियोगिताकस्य च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितयाऽतिव्याप्तिरिति तत्तद्व्यक्तित्वेनाभावस्य व्याप्यतावच्छेदककोटिनिवेशलाभाय तत्तदिति। यद्यपि यत्किञ्चित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्त्वं व्यभिचारिसाधारणम्, यावन्तः साध्याभावाः प्रत्येकं तत्तदधिकरणवृत्तित्वत्वसमनियतैःप्रतियोगितायां नानाविपक्षसाधकेऽप्रसिद्धिस्तत्तद्विपक्षावृत्तित्वावच्छिन्नाभाववत्तत्तद्विपक्षवृत्तित्वत्वव्याप्यप्रतियोगित्वाप्रसिद्धेः, तथापि यावतामभावानां प्रत्येकाधिकरणवृत्तित्वत्व-

सामानैयत्यस्य प्रत्येकप्रतियोगितान्वयेनैतदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताको यो योऽभावस्तदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकश्च यो योऽभावस्तद्वत्त्वमित्येवं रीत्या निवेशान्नानुपपत्तिः । एतल्लक्षणे साध्याभावसमुदायो न समुदायत्वेन प्रविष्टोऽपि तु प्रातिस्विकरूपेणेति कूटघटिताद्विशेषः । अथात्र स्वपदं न तत्तदभावीयप्रतियोगितात्वरूपेण प्रतियोगितापरं साध्याभाववद्वृत्तित्वत्वातिरिक्तेऽपि तदभावीयप्रतियोगितान्तरसत्त्वादिति तत्तत्प्रतियोगिताव्यक्तिपरं तद्वाच्यम्, तथा च यत्किञ्चित्प्रतियोगितानिरूपकाशेषाभावस्यातिव्यापकतया यावत्यस्तादृशप्रतियोगिताः प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयम्, तथा च समानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रतियोगितानिरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्ध्याऽव्याप्तिरिति वृत्तिमद्वृत्त्यभावीयत्वेन यावत्प्रतियोगिता निवेशनीया तथा च तन्निरूपकाभावे वृत्तिमद्वृत्तित्वविशेषणं व्यर्थं यावत्त्वविशेषणमपि तथेति चेत् नोपादीयत एव तत्र तद्विशेषणम्, वृत्तिमद्वृत्त्यभावीययावत्प्रतियोगिताविशेष्यीभूताभावे वृत्तिमद्वृत्तित्वयावत्त्वाभिधानात् । अत्र च गुरुधर्मान्याभावप्रतियोगितानवच्छेदकत्वे स्वव्यापकतदभाववद्वृत्तित्वत्वनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य यावत्त्वव्यापकतान्तविशेषणघटितत्वेनाभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नान्योन्याभावरूपव्यापकत्वपुरस्कारेण न प्रतियोगितानिवेशः सम्भवतीति तादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुरस्कारेणैव तन्निवेशः । न च स्वव्यापकतत्तदभाववद्वृत्तित्वत्वत्वस्य तत्तदभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वावच्छिन्नैकभेदोभयरूपेण प्रतियोगितानिवेशसम्भवादवच्छेदकभेदकूटनिवेशनमफलमिति वाच्यम्, घटभेदादिसाध्यकस्थले तदभावव्यक्तित्वेन घटत्वादिघटितस्य तदभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य स्वरूपतो घटत्वादिघटितघटवृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमपेक्ष्य गुरुशरीरतया प्रतियोगितावच्छेदकत्वेन तदवच्छिन्नैकभेदनिवेशासम्भवात् । अत्र कल्पे व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावस्य पर्वतावृत्तिवृत्तिमद्वृत्तेर्धूमादावभावादेकमानवृत्तिहेतावपि तादृशप्रतियोगिताकस्यैतल्लक्षणावच्छिन्नवृत्तित्वैतदन्यलक्षणावच्छिन्नवृत्तित्वोभयत्वावच्छिन्नाभावस्यैतल्लक्षणावच्छिन्नावृत्तौ वृत्तिमति वर्तमानस्याभावादसम्भवः । तादृशाभावव्यावर्तनाय व्याप्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वनिवेशे च गौरवं पर्वतवृत्तित्वत्वादिना जगद्वृत्तित्वसामान्याभावस्य व्यावृत्त्यसम्भवश्चेत्यत कल्पान्तरमनुसरति तन्नाध्याभा ति । अतिरिक्तान्तानिवेशे व्यधिकरणधर्मावच्छिन्नाभाववमानस्य सद्ग्रहाद्व्यभिचारिमात्रेऽतिव्याप्तिरिति तन्निवेशनम् । यद्यपि यथाश्रुतेनानेन महानसवृत्तित्वत्वादिना व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वाभाववारणं न सम्भवति महानसादिनिरूपितत्वविशिष्टवृत्तित्वत्व

स्य साध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वत्वरूपसाध्याभाववद्वृत्तित्वत्वान्यत्वविरहात्, तथापि साध्याभाववद्वृत्तित्वत्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यत्वशून्यत्वस्यानवच्छिन्नान्तेन विवक्षणान्न दोषो महानसवृत्तित्वत्वादिनिरूपितावच्छेद्यत्वस्य साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानिरूपितत्वात्। न चेत्थमपि साध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणमशक्यं तादृशधर्मनिरूपितावच्छेद्यतया तद्घटकसाध्याभाववद्वृत्तित्वत्वनिरूपितत्वस्य 'अधिकं तु' इत्यादिन्यायेनाव्याहतत्वादिति वाच्यम्, गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया महानसादिवृत्तित्वत्वसमनियतोपदर्शितगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वात्। अथ गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावपदस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावपरतया धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमत्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वत्वस्य स्वसमनियतधूमत्वावच्छिन्नाभाववद्वृत्तित्वत्वापेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धेः धूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च धूमत्वावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य निरुक्ताभावविशेषणानाक्रान्तत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वाभावस्यैव लक्षणघटकत्वात्। यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशोऽपि तु तदभावत्वेनैव एतदेव सूचयितुं तत्तत्पदमुपात्तम्, एवञ्च तत्तद्व्यक्तित्वेन धूमाभावघटिततदभाववद्वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकतया न धूमादिसाध्यकेऽतिव्याप्तिरित्युच्यते, तथापि एतद्व्यक्तिभिन्नं घटभिन्नं वा मेयत्वादित्यादावतिव्याप्तिस्तत्र तद्व्यक्तित्वेन रूपेण घटभेदाभावघटिततद्व्यक्तिमद्वृत्तित्वत्वापेक्षया लघोस्तत्समनियतस्य किञ्चिद्विशेषणानवच्छिन्नघटत्वघटितस्य घटवृत्तित्वत्वस्यैवाभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः घटवृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य लक्षणघटकत्वासम्भवाद् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्यैव तथात्वात्। यदि चाभावधर्मो विशेषणविधया न निवेश्यते अपि तु अभावप्रभृतिरेव, अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुपलक्षणतया निवेश्यम् एतल्लाभायैव तत्तत्पदोपादानमपि न तु तत्तद्व्यक्तित्वेनाभावनिवेशलाभार्थम्, उपलक्षणीभूतप्रतियोगिताविशेषेणाभावान्तरव्यावृत्तिसम्भवे तत्तद्व्यक्तित्वस्योपलक्षणतया निवेशप्रयोजनविरहात्, एवञ्च घटवृत्तित्वत्वावच्छिन्नाभावोऽप्युक्तस्थले लक्षणघटको घटभेदाभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात् प्रतियोगिताविशेषोपलक्षिताभाववद्वृत्तित्वपर्या

प्तनिरूपकताकान्यत्वपर्यन्तानिवेशात् धूमादिसाध्यकस्थले निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकशरीरेऽभावविशेषणस्याधिकस्य निवेशेऽपि न क्षतिः । न चाभावप्रतियोगिकोटावुपलक्षणतया भानस्यानुभवविरुद्धत्वाद् विशिष्टनिरूपितत्वाभावस्य निरूपितत्वसम्बन्धावच्छिन्नविशिष्टाभावरूपस्य वा विशिष्टनिरूपितत्वस्य प्रतियोगिकोटौ प्रतियोगिताविशेषस्य कथमुपलक्षणविधया निवेश इति वाच्यम्, अभावप्रतियोगिप्रकारशरीरे प्रतियोगितावच्छेदककोट्यप्रविष्टस्य न भानमित्येव भावप्रतियोगिनि तदवच्छेदके वोपलक्षणविधया न भानमित्यस्यार्थः । प्रकृते निरुक्तप्रतियोगिताकत्वस्य निरूप्यत्वप्रतियोगिविशिष्टाघटकत्वादेव निरूप्यत्वप्रतियोगिन्युपलक्षणत्वं न तु निरूप्यत्वाभावप्रतियोगितावच्छेदकघटकतयाऽप्रवेशात् । तदभावप्रतियोगितावच्छेदकप्रविष्टाभावस्याभावान्तरव्यावृत्तये तादृशप्रतियोगिताकत्वस्य प्रतियोगितावच्छेदकघटकतयैव निवेशात् यथा द्रव्यत्वस्य द्रव्यत्वोपलक्षितनिरूपितविषयित्वाभावप्रतियोगिनि नोपलक्षणत्वं किन्तु विषयितानिरूपकांश एवेति निर्धूमवृत्तित्वत्वस्य धूमव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तितात्वसमनियतत्वेऽपि व्यापकतावच्छेदकधर्मान्तरावच्छिन्नाभावघटितविशिष्टनिरूप्यत्वे धूमत्वावच्छिन्नधूमाभावघटितविशिष्टनिरूपितत्वरूपताविरहात् तत्तद्विशिष्टनिरूपितत्वयोर्न सामनैयत्यमिति न व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वघटितधर्मावच्छिन्नप्रतियोगिताकनिरूप्यत्वाभावाप्रसिद्धिः प्रतियोगितासंसर्गकज्ञान एव तादृशभानस्य तथात्वाज्जात्यवच्छिन्नप्रतियोगिताकोऽभाव इत्याकारकस्य स्वरूपतो घटत्वावच्छिन्नप्रतियोगिताकाभावभानस्य सर्वसम्मतत्वात्, प्रकृते च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको योऽभावस्तद्वद्वृत्तित्वत्वनिरूपितत्वप्रतियोगिकाभाववत्. समानाधिकरणधर्मावच्छेद्यत्वस्य योऽभावस्तद्वत्प्रतियोगिताका यावन्तोऽभावास्तद्वान् हेतुरित्याकारकव्याप्तिग्रहे प्रतियोगितायाः विशेषणत्वेनानुपपत्त्यभावादत एव व्यापकतावच्छेदकत्वादेरुपलक्षणविधया भानोपपत्तिः ।

न च तादृशनिरूपितत्वप्रतियोगिकस्य तत्त्वावच्छिन्नप्रतियोगिताकस्य वाऽभावस्य निवेशे निर्धूमवृत्तित्वत्वावच्छिन्नाभावे प्रतियोगितानिष्ठावच्छेद्यतायामपि किञ्चिद्विशिष्टतादृशनिरूपितत्वत्वावच्छिन्नाभावसत्त्वात् तादृशाभावासद्ग्रह इति वाच्यम्, तत्तदभाववद्वृत्तित्वत्वनिरूपितत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावस्यैव निवेशनीयत्वादेवञ्च तत्तद्व्यक्तित्वेनाभावनिवेशध्रौव्येण तत्तत्पदोपादानमपि साधु सङ्गच्छत इत्युच्यते, तथापि घटत्वभेदादिसाध्यके व्यभिचारिण्यतिव्याप्तिवारणमशक्यं निर्विशेषणकघटत्वादिवृत्तित्वत्वस्यैव तत्र घटत्वादिवृत्तित्वाभावप्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसाध्याभावस्य प्रतियोगितावच्छेदकशरीरेऽनिवेशेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् । न च जातेः

समवायेनैव स्वरूपतोऽवच्छेदकत्वं न तु सम्बन्धान्तरेणात एव गोत्वादिजातिनिष्ठव्यक्तौ पदविशेषप्रवृत्तिनिमित्तगवेतरासमवेतत्वादेरवच्छेदकत्वं स्वीकुर्वन्ति न तु तादात्म्यसम्बन्धेन लघोरपि गोत्वादिजातेरिति निर्विशेषणकघटत्वादिघटिततद्वद्वृत्तित्वत्वस्याभावप्रतियोगितावच्छेदकत्वं न सम्भवतीति वाच्यम्, तादृशनियमे मानाभावात्। यदि चाभावांशस्याप्युपलक्षणत्वं स्वीक्रियते तदा महानसवृत्तित्वत्वावच्छिन्नाभाववारणमशक्यमेव। यदि च साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वत्वावच्छेद्यताभिन्नसमानाधिकरणधर्मावच्छेद्यत्वाभावं निवेश्याविशेषितघटत्वादिवृत्तित्वाभावश्च सङ्गृह्यते, तदा तादृशाभावमादाय जातिसाधारणसङ्केताव्याप्तिर्वज्रलेपायते। एवं साध्याभाववद्वृत्तित्वत्वशरीरेऽभावादेर्विशेषणतया प्रवेशे वृत्तिमद्वृत्तिपदमनर्थकमापद्येत, व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य च समानाधिकरणधर्मावच्छिन्नाभावस्तत्प्रतियोगिताया लाघवेन वृत्तित्वत्वेनावच्छिन्नतया तदवच्छेद्यताया अभावाघटितविशिष्टपदार्थानिरूपितत्वात्।

अत्र वदन्ति, गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतेनेदमभिहितम्, व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वावच्छिन्नाभाववारणाय च साध्याभाववद्वृत्तित्वपर्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्मनिष्ठावच्छेदकतानिरूपकत्वमेव प्रतियोगिताया विशेषणं देयम्। न चैवं घटत्वादिना साध्याभाववद्वृत्तित्वाभावसङ्ग्रहफलकं समानाधिकरणपदोपादानं निरर्थद्वयनिवेशनञ्च विफलं तादृशाभावस्यासङ्ग्रहेऽपि केवलान्वयिसाध्यके साध्याभाववद्वृत्तित्वत्वेन घटाभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम्, विषयितादिसम्बन्धेन यत्र हेतुना तत्र हेतुतावच्छेदकसम्बन्धेन साध्याभाववति वृत्ते साध्याभाववद्विषयतारूपाया विषयादिरूपत्वेन साध्याभाववद्विषयतात्वादिरूपसाध्याभाववद्वृत्तित्वत्वस्य केवलान्वयितया तदवच्छिन्नाभावाप्रसिद्धेस्तादृशाभावघटितलक्षणानुपपत्तेः। न च साध्याभाववद्विषयतात्वादिकं येन सम्बन्धेनावृत्ति तेन सम्बन्धेन तदवच्छिन्नाभावमादाय लक्षणसमन्वयः सम्भवतीति वाच्यम्, कालिकसम्बन्धेन साध्याभाववद्वृत्तित्वत्वावच्छिन्नस्य योऽभावस्तस्य ध्वंसाद्यधिकरणहेतुव्यापकतया स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्यावश्यं निवेशनीयतया व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य लक्षणघटकत्वासम्भवात्। विषयताया जात्यादिरूपत्वेऽपि विषयतात्वविशिष्टस्य न समवायादिना वृत्तिस्तादृशस्य स्वस्मिन्नेव वृत्तेर्जात्यादौ च समवायाभावात् किं तु स्वरूपसम्बन्धेनैव, एवञ्च समवायादिसम्बन्धावच्छिन्नप्रतियोगिताक एव विषयतात्वावच्छिन्नाभावो लक्षणघटको भविष्यतीत्यपि न, कालज्ञानादिरूपहेतौ कालिकविषयतादिसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्यासत्त्वेन स्वरूपसम्बन्धावच्छिन्न

प्रतियोगिताकाभावस्यैव विवक्षणीयत्वात्। न चैवं साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नाभावस्यापि तत्राप्रसिद्धिर्घटत्वादेः साध्याभाववद्विषयतानिष्ठप्रतियोगिताव्यधिकरणत्वासम्भवादिति वाच्यम्, घटत्वादिना पटाद्यभावस्यैव तथात्वात्। अथैवमपि सामानाधिकरण्यमुपेक्ष्य साध्याभाववद्वृत्तित्वनिष्ठत्वेन धर्मविशेषणताकल्प घटत्वादेर्घटादिस्वरूपसाध्याभाववद्विषयतानिष्ठत्वेन गगनादेरपि स्वनिष्ठविषयतात्मकत्वेन साध्याभाववद्विषयतानिष्ठतया साध्याभाववद्वृत्तित्वत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नाभावाप्रसिद्ध्योक्तस्थलेऽव्याप्तिर्दुर्वारैव, येन रूपेण यत्साध्याभाववद्वृत्तित्ववृत्ति तद्रूपविशिष्टतदनवच्छिन्नप्रतियोगिताकाभावविवक्षणे गगनाद्यवच्छिन्नाभावस्य लक्षणघटकतानिर्वाहेऽपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्व यत्किञ्चिदविशेषिततत्तद्व्यक्तित्वानवच्छिन्नप्रतियोगिताकाभावस्य तथाविधस्य हेतावसत्त्वादसम्भव इति चेन्न, येन सम्बन्धेन यद्वर्तते तेन सम्बन्धेन तन्निष्ठावच्छेदकतासामान्यत्वस्य विवक्षणीयतया संयोगादिसम्बन्धेन घटत्वावच्छिन्नप्रतियोगिताकाभावमादायैवोक्तस्थले लक्षणसमन्वयसम्भवात्, उक्तार्थलाभायैव च साध्याभाववद्वृत्तित्ववृत्तित्वोपादानं न तु तदपि लक्षणघटकं प्रयोजनाभावात् सर्वत्र दर्शिताभावमादाय लक्षणसमन्वयसम्भवेन समवायादिसम्बन्धेन घटत्वावच्छिन्नसाध्याभाववत्त्वसंयुक्तत्वाद्यभावस्य लक्षणाघटकत्वेऽपि क्षतिविरहात्। एतेन धूमत्वत्वाद्यवच्छिन्नधूमत्वाद्यभावस्य धूमत्वप्रकारकप्रमाविषयत्वाद्यभावस्य च साध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य वारणाय साध्याभाववद्वृत्तित्वप्रतियोगिकत्वविशेषणमप्यनादेयम्। अत एव स्वसमानाधिकरणत्वस्य स्वप्रतियोगितावच्छेदकविशेषणत्वकल्पापेक्षया लाघवमेव एतत्कल्पानुसरणबीजभूत निष्प्रत्यूहमिति। यदि च गुरुधर्मो नाभावप्रतियोगितावच्छेदकस्तदा महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय साध्याभाववद्वृत्तित्वत्वातिरिक्तेत्यनेन साध्याभाववद्वृत्तित्वत्वाघटकत्वमेव विवक्षणीय तदर्थश्च स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तितात्वरूपविशिष्टनिरूपितविषयिताकत्वम्, एवञ्च शुद्धवृत्तित्वत्वावच्छिन्नवृत्तेरभावोऽपि लक्षणघटक इति वृत्तिमद्वृत्तिपदसार्थक्यम्। स्वाविषयकत्वञ्चेतरविशेषणतानापन्नस्वविषयिताशून्यत्वम्, अतो विशेषणविधया साध्याभाववद्वृत्तित्वत्वघटकसाध्याभावत्वादेस्तदघटकत्वनिर्वाह इति पूर्वोक्तदोषानवकाश। चरमापि विषयितेतरविशेषणतानापन्ननिरूपितैव ग्राह्या, तेन वृत्तित्वत्वादिविशेषणकज्ञाने साध्याभाववद्वृत्तित्वत्वादेर्विशेषणतया विषयत्वेऽपि वृत्तित्वत्वादेर्न साध्याभाववद्वृत्तित्वत्वाघटकत्वम्। न च साध्याभाववद्वृत्तित्वत्वघटकधर्मपर्याप्तप्रतियोगितावच्छेदकताकोऽभावो निवेश्यताम्, घटकान्तार्थश्च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वम्। न तु स्वाविषयकप्रतीत्यविषयतादृशविशिष्टत्वम्,

तत्तदभाववद्वृत्तित्वत्वविषयकप्रतीतौ केवलाधेयतात्वस्य विषयतया तदभाववन्निरूपितत्वविशिष्टाधेयतात्वे तदविषयकप्रतीत्यविषयत्वस्य दुर्घटतया तदभाववद्वृत्तित्वत्वादेस्तदघटकत्वानिर्वाहात् केवलाधेयतात्वस्यैव तद्घटकतया वृत्तिमद्वृत्ति तेन रूपेण घटाद्यभावमादायाव्याप्त्यापत्तेरिति वाच्यम्, तथासत्युक्तरीत्या विषयतासम्बन्धेन यत्र हेतुता तत्र तादृशाभावाप्रसिद्धेर्घटभिन्नं मेयत्वादित्यादौ निर्विशेषणकघटत्वादिवृत्तितात्वस्य यथा समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तितात्वघटकत्वं तथा वाच्यं मेयत्वादित्यादावपि तादृशस्य स्वाविषयकप्रतीत्यविषयव्यधिकरणधर्मावच्छिन्नसाध्याभावविशेषितघटत्वादिघटिततदभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयताकतया तदभाववद्वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेनाव्याप्तेस्तदभाववद्वृत्तित्वत्वाघटकधर्मावच्छिन्नाभावनिवेशेनैव वारणसम्भवात्। तादृशधर्मे निरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेऽपि स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्धर्म्यन्तरवृत्तित्वविषयिताकत्वेन साध्याभाववद्वृत्तित्वाघटकत्वस्यापि सत्त्वेन तदवच्छिन्नाभावस्यापि यथानिरुक्ताभावानात्मकत्वात्। न च स्वाविषयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यकत्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषणकघटत्वादिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तदघटकधर्मावच्छिन्नाभावनिवेशोऽपि सम्भवतीति वाच्यम्, तथा सति व्यापकताघटितसामान्यपदार्थनिवेशनेन तदघटकधर्मानवच्छिन्नाभावनिवेशापेक्षयाऽतिगौरवात्। समानाधिकरणपदसार्थक्यं तूक्तरीत्यैवेति ध्येयम्।

केचित्तु व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन पर्वतवृत्तित्वघटान्यतराभाववारणायैतन्मतेऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वकत्वं प्रतियोगिताविशेषणमावश्यकम्। तथा च साध्याभाववद्वृत्तित्वत्वेन घटाभावस्य लक्षणघटकता न सम्भवतीति निषेधद्वयनिवेशनसामानाधिकरण्यपदोपादानयोः सार्थकतेत्याहुः। वस्तुतस्तु साध्याभाववद्वृत्तित्वत्वातिरिक्तत्वं साध्याभाववद्वृत्तित्वत्वाघटकत्वत्वं तच्च स्वं यादृशविशिष्टं तादृशविशिष्टाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वम्, एवञ्च घटत्ववृत्तित्वस्य घटत्वत्वविशेषितघटत्ववृत्तित्वत्वाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वात् साध्याभाववद्वृत्तित्वत्वाघटकत्वेन न तद्धर्मावच्छिन्नाभावमादाय दोषप्रसक्तिः, एवञ्च गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽपि घटभिन्नं मेयत्वादित्यादौ घटत्वविशेषितघटवृत्तित्वत्वस्य न स्वाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वं साध्याभावत्वेन घटविषयकसाध्याभाववद्वृत्तिप्रतीतौ घटत्वविशेषितघटवृत्तित्वत्वाविषयकत्वासम्भवात्। एवं घटत्वभिन्नं प्रमेयत्वादित्यादौ घटत्वत्वविशेषितघटत्ववृत्तित्वत्वस्य न स्वाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्व-

कार्थं साध्याभावत्वेन घटत्वत्वविषयकसाध्याभाववद्वृत्तित्वत्वविषयक-प्रतीतौ घटत्वत्वविशेषितघटत्ववृत्तित्वत्वविषयकत्वासम्भवादिति नोभय-त्रातिव्याप्तिः । न वा वृत्तिमद्वृत्तिपदवैयर्थ्यं वृत्तित्वत्वस्य व्यधिकरणधर्मा-वच्छिन्नसाध्याभाववद्वृत्तित्वत्वाघटकत्वविरहेण तद्धर्मावच्छिन्नाभाव-वारणार्थं तदुपादानात् साध्याभाववद्वृत्तित्वत्वावच्छेदेन च स्वाविषयक-प्रतीतिविषयत्वं विवक्षणीयम् । तथा च स्वाविषयकप्रतीतिनिरूपितसाध्या-भाववद्वृत्तित्वत्वावच्छिन्नविषयताकत्वं पर्यवसितम् । अन्यथा साध्या-भाववद्विशेषितवृत्तित्वत्वस्य विशेष्यीभूतकेवलवृत्तित्वत्वानतिरिक्ततया विशेष्यीभूतवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वाविषयककेवलाधेयता-त्वविषयकप्रतीतिविषयत्वे साध्याभाववद्वृत्तित्वत्वस्य तथात्वावश्यकतया तद्घटकत्वप्रसङ्गेन केवलवृत्तित्वत्वावच्छिन्नाभावमादाय व्यभिचारिण्य-तिप्रसङ्गापातात् । नच महानसवृत्तित्वत्वावच्छिन्नाभाववारणार्थं साध्या-भाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभाव एव निवेश्यतां तद्घटकत्वञ्च स्वा-विषयकप्रतीत्यविषयसाध्याभाववद्वृत्तित्वत्वकत्वं किं निषेधद्वयसमानाधि-करणपदयोरुपादानेनेति वाच्यम्, एवं सति विशिष्टानुयोगिकाभावानभ्युपगमे साध्याभाववद्वृत्तित्वेऽपि साध्याभाववद्वृत्तित्वत्वरूपविशिष्टाविषयककेवला-धेयतात्वविषयकप्रतीतिविषयत्वाभावासत्त्वेन तस्य घटकत्वानिर्वाहेण केवलवृत्तित्वत्वस्यैव तद्घटकतया तदवच्छिन्नसमानाधिकरणधर्मावच्छिन्ना-भावस्य च वृत्तिमद्वृत्तितया व्यभिचारिण्यतिप्रसङ्गापातात् । नच स्वाविष-यकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयताकत्वरूप-घटकत्वमेव निवेश्यतां तथा सति नोक्तदोष इति वाच्यम्, तथा सति विषयतासम्बन्धेन यत्र हेतुता तत्र तादृशाभावाप्रसिद्ध्यापत्तेः । एवं घटत्व-भिन्नं मेयत्वादित्यादौ निर्विशेषणकघटत्वादिवृत्तित्वत्वस्य यथा समानाधि-करणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वघटकत्वं तथा वाच्यं ज्ञेयत्वादि-त्यादावपि तादृशस्य स्वाविषयकप्रतीत्यवृत्तिव्यधिकरणधर्मावच्छिन्नसाध्या-भावविशेषितघटत्वादिघटिततदभाववद्वृत्तित्वत्वविषयताकत्वेन तदभाव-वद्वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेनाव्याप्ते-स्तदभाववद्वृत्तित्वत्वाघटकधर्मानवच्छिन्नाभावनिवेशे च न दोषस्तादृशधर्मे निरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेऽपि स्वाविषयकप्रतीतिनिरूपित-साध्याभाववद्धर्म्यन्तरवृत्तित्वविषयताकत्वेन साध्याभाववद्वृत्तित्वत्वाघटक-त्वस्यापि सत्त्वेन तदवच्छिन्नाभावस्य यथानिरुक्ताभावानात्मकत्वात् । नच स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यक-त्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषणकघटत्वादिवृत्तित्वत्व-स्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तदघटकधर्मावच्छिन्नाभावनिवे-शोऽपि सम्भवतीति वाच्यम्, तथा सति व्यापकताघटितसामान्यपदार्थ-निवेशेन घटकधर्मानवच्छिन्नाभावनिवेशापेक्षयाऽतिगौरवात् । अत्र विषयित्वं

मुख्यविशेष्यत्वम्, तेन घटवृत्तित्वत्वावच्छिन्नसाध्यके तादात्म्येन घटत्व व्यापकादिहेतौ घटवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वाघटकत्वविरहेण तदवच्छिन्नाभावमादाय नाव्याप्तिः। नच तथापि सास्नाभाववान् द्रव्यत्वादित्यादावतिव्याप्तिस्तत्र सास्नावद्वृत्तित्वत्वस्य गुरुतया गोत्ववद्वृत्तित्वत्वस्य च तदघटकत्वेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव सङ्ग्रहादिति वाच्यम्, गोत्वाद्यभावादेरपि सास्नाद्यभावरूपसाध्यव्यापकतया गोत्वादिरूपतदभावस्यापि लक्षणघटकत्वात् तद्वद्वृत्तित्वत्वस्य च तद्वद्वृत्तित्वत्वाघटकत्वविरहेण दोषाभावात्। एवं जातिभिन्नं घटत्वत्वादित्यादौ जातित्वादिविशेषितघटत्वादिवृत्तित्वत्वस्य तद्विशेषितघटत्वादिवृत्तित्वत्वाविषयकप्रतीतिविषयत्वेन प्रत्येकं जातित्वविशेषितसकलजातिवृत्तित्वत्वस्य जातिभेदाभाववद्वृत्तित्वत्वाघटकत्वेऽपि घटत्वादिवृत्तित्वत्वस्य घटत्वत्वाद्यवच्छिन्नघटत्वभेदरूपसाध्यव्यापकाभाववद्वृत्तित्वाघटकत्वविरहेण तदवच्छिन्नाभावमादायैवातिव्याप्तिवारणसम्भवात्। नच साध्याभाववद्वृत्तित्वत्वघटकधर्मानवच्छिन्नाभाव एव निवेश्यतां किं समानाधिकरणपदोपादानेन केवलान्वयिसाध्यकस्थले वृत्तित्वेन घटाभावमादायैव लक्षणसमन्वयसम्भवादिति वाच्यम्, वृत्तित्वत्वेन पर्यन्तवृत्तित्व घटान्यतराभावमादायातिव्याप्तिवारणायेतन्मतेऽपि साध्याभाववद्वृत्तित्वत्वव्याप्यत्वस्य प्रतियोगितायां निवेशस्यावश्यकतया घटत्वेन साध्याभाववद्वृत्तित्वाभावसङ्ग्रहाय समानाधिकरणपदोपादानस्यावश्यकत्वादितिदिक्। प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वनिवेशनप्रयोजनमाह 'अशेषवृत्तिमन्तीति'। वह्निसामान्याभाववद्वृत्तित्वस्य योऽभावस्तस्य धूमादावसत्त्वेपीत्यन्वयः। 'वह्निसामान्याभाव' वह्नित्वावच्छिन्नवह्न्यभावः। साध्याभाववद्वृत्तित्वत्वव्यापकतानिवेशनप्रयोजनमाह यथेति। इन्धनेत्याद्यवच्छिन्नेति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया घटाभावोपेक्षणम्, 'महानसवृत्तित्वादेरभाव' इत्यत्र महानसवृत्तित्वत्वादिनैवेति बोध्यम्, तादृशाभावाधिकरणमहानसवृत्तित्वत्वाद्यवच्छिन्नतादृशवृत्तित्वनिष्ठप्रतियोगिताकत्व षष्ठ्यन्तार्थ इति तु न सत्, गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वेऽपि तादृशाभावविशेषितमहानसवृत्तित्वत्वाद्यवच्छिन्नाभावपर्यन्तानुसरणे सन्दर्भविरोधात्। अधिकरणत्वान्तस्योपलक्षणतया शेषांशस्य विशेषणतया भानस्य व्युत्पत्तिविरुद्धतया तथाविवक्षितुमशक्यत्वात्। अधिकरणविशेषानुपरक्तवृत्तेरभावमादायापि दोषं दर्शयति स्वनिष्ठेति। धूमादिनिष्ठसाध्याभाववद्वृत्तित्वव्यक्तेस्तद्व्यक्तित्वावच्छिन्नाभावस्येत्यर्थः। 'हेत्वन्तरवृत्ते' आलोकादिवृत्ते। एतेन वृत्तिमद्वृत्तित्वमस्तीति सूचितम्। 'स्वस्मिन्' धूमादौ। अत्र च लक्षणे सत्ताभाववान् द्रव्यत्वादित्यादौ सत्तावत्समवेतत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव समवेतवृत्तित्वेऽपि द्रव्यावृत्तित्वावच्छिन्नाभावस्यापि साध्यतावच्छेदका

वह्निव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तद्वत्समवेतत्वाभावस्य समवेतगुणत्वादिवृत्तितया द्रव्यत्वादेस्तद्वत्त्वाभावान्नातिव्याप्ति । एवमवृत्तिसाध्यकस्थलेऽपि साध्यतावच्छेदकावच्छिन्नव्यापकत्वाप्रसिद्ध्या नातिव्याप्ति । कूटघटितलक्षणे च तत्र तन्नातिव्याप्तिवारणाय साध्यसमानाधिकरणत्वे सतीति विशेषणं देयम् । एतल्लक्षणे चावृत्तिहेतुकेऽतिव्याप्तिवारणाय वृत्तिमत्त्वमात्रमुपादेयम्, कूटघटितलक्षणवदत्रापि महाकालान्यो घटादित्यादावतिव्याप्तिर्दुर्वार्या किं तु तदन्यदोषाणामेवात्रानवकाश इत्यवधेयम् ॥

इति कूटाघटितलक्षणव्याख्या ।

(दी०) अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वम्, तादृशवृत्तित्वाभावश्च स्वव्यापकतादृशवृत्तित्वव्यापकप्रतियोगिताको बोध्यः, प्रयोजनञ्चोक्तप्रायम् । साध्याभावाधिकरणवृत्तित्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरतः समुदायेति । साध्याभावश्च साध्यतावच्छेदकसम्बन्धेन बोध्यः, तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्वतवह्न्यवयवसंयोगे च पर्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि नातिव्याप्तिः ।

(गा०) अन्ये त्विति । घटत्वादिना निर्धूमवृत्तित्वाद्यभावमादाय व्यभिचारिण्यतिव्याप्तिवारणाय यावत्त्वोपादानम्, एवञ्च केवलान्वयिनि साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य प्रसिद्ध्या तत्समुदायाधिकरणगगनवृत्तित्वस्यावृत्तौ प्रसिद्धसमानाधिकरणधर्मावच्छिन्नाभावोऽपि यावदन्तर्गत इति तद्वत्त्वविरहात्तादृशसाध्यके विषयितावातिरिक्तसम्बन्धेन हेतावव्याप्ति । साधनसमानाधिकरणत्वेन साध्याभावविशेषणपक्षे च व्यतिरेकिसाध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य सद्धेतौ लक्षणघटकतया जगत एव तत्कूटाधिकरणतया व्यतिरेकिसाध्यकेऽपि विषयितातिरिक्तसम्बन्धेन हेतावव्याप्तिरिति वृत्तिमद्वृत्तित्वमभावविशेषणम् तादृशवृत्तीनाम् । साध्याभावसमुदायाधिकरणवृत्तित्वेत्यर्थः । प्रयोजनमिति । पूर्वदलप्रयोजनम् आलोकाद्यवृत्तित्वेन रूपेण निर्वह्निवृत्तित्वाभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणरूपं पूर्वलक्षणोक्तमेव, चरमदलप्रयोजनं तु साधनसमानाधिकरणत्वस्य साध्याभावाविशेषणत्वे केवलान्वयिसाध्यके ज्ञेयत्वादिहेतौ घटादिवृत्तित्वाभावमादायाव्याप्तिवारणमेव, न तु

वह्निमान् धूमादित्यादौ महानसवृत्तित्वाभावव्यावर्तनं तत्र महानसादेर्वह्नित्वावच्छिन्नवह्न्यभावानधिकरणत्वेन साध्याभावकूटानधिकरणत्वात्, एतस्य च प्रागनुक्तत्वात् 'उक्तप्रायम्' इत्युक्तम्। समुदायपदप्रयोजनमाह साध्याभावाधिकरणेति। व्यधिकरणधर्मावच्छिन्नाभावस्यैवेति। निर्धूमवृत्तित्वत्वाद्यवच्छिन्ननिर्धूमवृत्तित्वाद्यभावस्य प्रतियोगितायाः व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणमहानसादिवृत्तित्वावृत्तितया साध्याभावाधिकरणवृत्तित्वत्वाव्यापकतया जगद्वृत्तित्वसामान्याभावस्यैव तद्व्यापकप्रतियोगिताकतया तस्य च समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्याप्रसिद्धत्वादिति भावः। व्यभिचारिण्यतिव्याप्तिरिति। तादृशस्य जगद्वृत्तित्वाभावस्य सर्वत्रैव सत्त्वादिति भावः। अत्र च स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वं प्रतियोगिताविशेषणम्, तत्र च शेषदले समुदायानिवेशेऽपि निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य लक्षणाघटकत्वेऽपि नातिव्याप्तिः सम्भवति व्यतिरेकिसाध्यके तादृशप्रतियोगिताया एवाप्रसिद्धेः जगद्वृत्तित्वसामान्याभावीयप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वेऽपि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपपूर्वदलविरहात्। धूमाद्यभावसमुदायाधिकरणवृत्तित्वत्वशून्ये महानसादिवृत्तित्वे तादृशप्रतियोगितासत्त्वादिति पूर्वपक्षयित्वा शेषदले समुदायपदाप्रवेशे पूर्वदलमेव नोपादेयं तदनुपादानेऽपि वह्निमान् धूमादित्यादावालोकाद्यवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वस्यालोकादिनिष्ठपर्वतादिवृत्तित्वसाधारणसाध्याभावाधिकरण—वृत्तित्वत्वाव्यापकतया तादृशाभावमादाय दोषाप्रसक्तेः, तदुपादाने व्यतिरेकिसाध्यकमात्र एवोक्तरीत्या तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिप्रसङ्गाच्च, तथा च धूमवान् वह्नेरित्यादौ घटत्वेन जगद्वृत्तित्वाभावमादायातिव्याप्तिरित्याशयेन दीधितिकृतेदमभिहितम्। अतिव्याप्तिवारणाय शेषदले समुदायप्रवेशे च निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्यालोकावृत्तित्वावच्छिन्नाभावस्य वह्निमान् धूमादित्यत्र शेषदलाक्रान्ततया पूर्वदलोपादानमावश्यकम्, तत्र च समुदायाप्रवेशे व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वत्वव्याप्यप्रतियोगिताकस्यालोकावृत्तिवृत्त्यभावस्य धूमेऽसत्त्वादव्याप्तिरिति तत्रापि तत्प्रवेशनमिति केचित्समादधति।

परे तु प्रतियोगित्वव्यापकताविशेष्यतापन्नमेव साध्याभावसमुदायाधिकरणवृत्तित्वत्वं व्यापकत्वविशेषणविधया निवेश्यते न तु तद्दलस्योक्तरीत्या द्विधा निवेशः, एवञ्च पूर्वपक्ष एवायं नावतरति। न च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमते प्रतियोगित्वव्यापकत्वविशेषितसाध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वं नाभावप्रतियोगितावच्छेदकमिति प्रतियोगित्वे तादृशावच्छेदकत्वावच्छिन्नाभावरूपव्यापकतानिवेशासम्भवात्तद्दलस्य द्विधाविनिवेशनमावश्यक

मिति वाच्यम्, व्यापकत्वान्तस्योपलक्षणतया साध्याभावसमुदायाधिकरणवृत्तित्वत्वरूपव्याप्यांशे निवेशसम्भवाद्व्यापकतावच्छेदकावच्छिन्नाभाववानित्यादिज्ञाने व्यापकतावच्छेदकत्वांशस्येवोक्तावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकाभावबुद्धौ व्यापकताया उपलक्षणतया भानेऽविरोधात्। वस्तुतस्तु गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वमपि नाभावप्रतियोगितावच्छेदकं वह्नित्वावच्छिन्नवद्भेदभाववद्वृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वादिरूपसमनियतधर्मापेक्षया व्यधिकरणधर्मावच्छिन्नसाध्याभावेनाधिकेन घटितस्य गुरुत्वादिति तादृशधर्मावच्छिन्नाभावो निवेशयितुमशक्यः, किं तु तादृशान्योन्याभावप्रतियोगितावच्छेदकं यद्यत्तत्तद्भेदकूटवत्त्वमेव निवेशनीयम्, एवञ्च प्रतियोगिताव्यापकत्वघटितोक्तधर्मस्य प्रतियोगितानवच्छेदकत्वमप्यकिञ्चित्करमेवेत्याहुः। तेनेति। समवायेन वह्नेः साध्यत्वे पर्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि धूमे नातिव्याप्तिः, संयोगेन वह्नेस्तथात्वे वह्न्यवयवस्य तादृशाभावद्वयानधिकरणत्वेऽपि वह्न्यवयवत्वे नातिव्याप्तिः, समवायेन वह्नेः साध्यत्वे संयोगेन तस्य तथात्वे च पर्वतस्य वह्न्यवयवस्य च तादृशाभावद्वयानधिकरणत्वेऽपि पर्वतवह्न्यवयवसंयोगे नातिव्याप्तिरिति योजना, 'सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयं' संयोगसम्बन्धावच्छिन्नवह्न्यभावसमवायसम्बन्धावच्छिन्नवह्न्यभावद्वयम्, साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशने तादृशाभावद्वयानधिकरणस्य पर्वतादेः साध्याभावकूटानधिकरणतया तत्कूटाधिकरणवृत्तित्वाभावा यावन्तस्तद्वत्त्वं धूमादावव्याहतमेवेत्यतिव्याप्तिः स्यादेवेति भावः। न च साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावनिवेशेऽपि समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे नातिव्याप्तिर्वारयितुं शक्यते समवायसम्बन्धावच्छिन्नवह्न्यभावकूटाधिकरणसंयुक्तत्वस्य व्यधिकरणधर्मावच्छिन्नाभावस्येव संयुक्तवृत्तित्वाद्वह्न्यवयवमात्रसंयुक्ताप्रसिद्धेः संयुक्तमात्रस्यैव तादृशाभावकूटाधिकरणगगनसंयुक्तत्वादिति कथमत्र व्यावृत्तिप्रदर्शनं समवायेन धूमहेतुकस्थलपरता तु न युज्यते समवायेन धूमवतः साध्याभावकूटवत्त्वानिराकरणादिति वाच्यम्, संयुक्तमात्रस्यैव गगनादिसंयुक्तत्वेऽपि तादृशसंयोगस्य वृत्त्यनियामकतया तथा यस्य द्रव्यस्य वह्न्यवयव एवाधिकरणत्वप्रत्ययः प्रामाणिकः न त्वन्यत्र तत्र संयोगेन गगनादिवृत्तित्वाप्रसिद्ध्या संयोगेन वह्न्यवयवान्यवृत्तित्वाभावस्यैव संयोगेन वृत्तिमद्वृत्तेः सुलभतया वृत्तिपदस्य यथाश्रुतपरतामते तादृशाव्यावृत्तिदानसङ्गतेः, वृत्त्यनियामकतादात्म्यसम्बन्धेन व्याप्तिस्वीकारे वृत्तिपदस्य सम्बन्ध्यर्थकत्वमावश्यकमित्यभिप्रायेणैतदुपेक्ष्य द्वितीयस्थलानुसरणम्, साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे समवायादिसम्बन्धावच्छिन्नवह्न्यभावस्य वह्न्यवयवत्वरूपसाधनसामाना-

धिकरण्याभावेन न तत्रातिव्याप्तिसंभव एवं सत्ताभाववान् द्रव्यत्वादित्यादावतिव्याप्तिवारणाय साध्यसामानाधिकरण्ये सतीति विशेषणप्रवेशस्यावश्यकतया संयोगादिना वह्निमत्यवर्तमानवह्न्यवयववत्वादौ तेनाप्यतिव्याप्तिर्वारयितुं शक्यत इत्यत पर्वतवह्न्यवयवसंयोगहेतुकानुसरणम्. संयोगेन द्रव्यत्वस्याव्याप्यवृत्तितामते पर्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयाधिकरणत्वेऽपि न तस्य व्याप्यवृत्तित्वविशिष्टसाध्याभावकूटवत्त्वम्, अन्यथाऽव्याप्यवृत्तिसंयोगादिसाध्यके व्यभिचारिणि जगत एव साध्याभावकूटाधिकरणत्वेनातिव्याप्तिरिति दर्शितहेतौ पर्वतवृत्तित्वेऽपि तादृशाभावकूटाधिकरणवृत्तित्वाभावोऽक्षत एवेत्यतिव्याप्तिप्रसङ्ग ।

पूर्ववदत्र साध्याभावपदेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावविवक्षणे नानाविपक्षके तथाविधतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्ति साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावनिवेशने च गौरवमिति साध्यतावच्छेदकसमनियतप्रतियोगिताकाभाव एव विवक्षितुमुचितस्तावतापि दहनवृत्तिवह्नित्वावच्छिन्नप्रतियोगिताकानां तथाविधसाध्याभावानामधिकरणे धूमादेर्वृत्तावपि वह्नित्वावच्छिन्नवह्न्यभावघटिततादृशाभावकूटवत्त्ववृत्तेरव्याप्त्यनवकाशादित्याशयेन तथाविधमेवाभावं निवेशयति न ति

(दी०) तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि बोध्यः, तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नाभावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा, नाप्यभावत्वादिनाऽभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरित्याहुः ॥

(गा०) 'स्व' प्रतियोगिता, समनियताभावेऽन्यमते साध्याभावप्रतियोगिताया साध्याभावसमनियताभावप्रतियोगिपदार्थान्तरवृत्तित्वेऽपि साध्यतावच्छेदकेन व्यधिकरणेन वा धर्मेणावच्छिन्नाया साध्यमात्रवृत्तिप्रतियोगिताया साध्यतावच्छेदकसमनैयत्यमक्षतमेव । अथ घटत्वावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिता घटत्वावच्छिन्नवाच्यत्वादिवृत्तिप्रतियोगितातो न भिद्यते किंतु घटादिभिन्नयावद्वस्तुवृत्तिरेकैव स्वीक्रियते न तु वाच्यत्वादिमात्रवृत्तिस्तथा सति घटत्वेन प्रमेयत्वं नास्तीतिप्रतीतिविषयप्रतियोगितान्तरकल्पने गौरवादिति तादृशप्रतियोगिताया न वाच्यत्वत्वादिरूपसाध्यतावच्छेदकसमनैयत्यमिति चेत्, का क्षति, वाच्यत्वभिन्नत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिविषयमभावमादायैव तत्र लक्षणसमन्वयसम्भवात् स्वव्यधिकरणा

च्यत्वभिन्नत्वावच्छिन्नाया प्रतियोगिताया वाच्यत्वभिन्नवृत्तित्वस्यासम्भा विनत्वात् । वस्तुतस्तु घटत्वावच्छिन्नवाच्यत्वाभावप्रतियोगिताया व्यधिकरणघटत्वादेरिव समानाधिकरणवाच्यत्वत्वादेरप्यवच्छेदकत्वमावश्यकं घटत्वेन वाच्यत्वं नास्तीतिप्रतीत्या वाच्यत्वत्वादेः प्रतियोगितावच्छेदकत्वानवगाहने तादृशप्रतीतेर्वाच्यत्वत्वविशिष्टवैशिष्ट्यानवगाहित्वेन तत्र वाच्यत्वत्वादिप्रकारकज्ञानानपेक्षापत्तेः, एवञ्च घटत्वेन प्रमेयत्वं नास्तीत्यादिप्रतीतिविषयप्रतियोगिताया अतिरिक्तत्वमावश्यकमवच्छेदकभेदादिति घटत्वेन वाच्यत्वं नास्तीतिप्रतियोगिता वाच्यत्वादावेव वर्तते न त्वन्यत्रापि मानाभावादिति घटत्वादिना वाच्यत्वाभावोऽपि लक्षणघटक । अथैवं साध्यतावच्छेदकरूपावच्छिन्नाभावघटितलक्षणे वह्नित्वावच्छिन्नसाध्यकस्थले वह्नित्वादिना घटाद्यभावो लक्षणघटको न स्याद्व्यापकतावच्छेदकवह्नित्वादिपर्याप्तप्रतियोगितावच्छेदकताकत्वविरहान्महानसीयवह्न्याद्यवच्छिन्नाभाववारणायावच्छेदकतापर्याप्तिनिवेशस्यावश्यकत्वादिति चेन्न, व्यापकतावच्छेदकपर्याप्तत्वं हि व्यापकतानवच्छेदकापर्याप्तत्वं व्यापकतानवच्छेदकावृत्तित्वं तच्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकतायामक्षतमिति तादृशाभावमादायैव तत्तल्लक्षणसमन्वयसम्भव इति । अत एव 'यच्चेन्धनत्वावच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभाव' इति दीधितिग्रन्थ सङ्गच्छते, अन्यथेन्धनत्वादिना घटाद्यभावापेक्षाया निर्बीजत्वमापद्येत, एवञ्च सार्वभौमाणामेतल्लक्षणाभिप्रायकतया 'समवायितया वाच्यत्वाभावो घट एव प्रसिद्ध' इति मूलग्रन्थोपवर्णनमपि सङ्गच्छते । अथ पर्याप्तिसम्बन्धेनोभयत्वादिकं यत्र साध्यतावच्छेदकं तत्र प्रतियोगिताया अव्यासज्यवृत्तित्वेन तत्पर्याप्त्यधिकरणप्रत्येकव्यक्तौ पर्याप्तिसम्बन्धेनोभयत्वादेरत्यन्ताभावस्य तदवच्छिन्नभेदस्य च सत्त्वात्तस्य प्रतियोगिताव्यापकत्वं न सम्भवति । न चाव्याप्यवृत्तिसंयोगादेर्यत्र साध्यतावच्छेदकता तत्र प्रतियोगिताव्यापकत्वनिर्वाहाय प्रतियोग्यसामानाधिकरण्यं व्यापकताघटकाभावे निवेशनीयं तावतोभयत्वस्यापि व्यापकत्वं निर्वहति पर्याप्तिसम्बन्धेनोभयत्वपर्याप्त्यधिकरणस्य प्रत्येकानतिरिक्ततया प्रत्येकवृत्तेरुभयत्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वादिति वाच्यम् । पृथिवीत्वघटत्वोभयत्वादिना यत्र साध्यता तत्र जातित्वाद्यवच्छिन्नाभावप्रतियोगितासमानाधिकरणस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियोग्यधिकरणावृत्तित्वविरहेण तादृशप्रतियोगिताव्यापकतापत्त्या तादृशाभावमादाय तदवच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतावतिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैवाभावे निवेशनीयतयोभयत्वाभाव यावत्त्वनासम्भवात्तदभाववत प्रत्येक तदनधिकरणत्वात्तस्यैव तदधिकरणताया अपि व्यासज्यवृत्तित्वादिति चेन्न, सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षे प्रतियोगिसामानाधिकरण्याभावविशिष्टाभाववत्ताघटितव्यापकताया एव निवेशसम्भवात् पृथिवीत्वाद्युभ-

यत्ववति पृथिवीत्वावच्छेदेन तदभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि जलत्वादेस्तत्सामानाधिकरण्याभावविशिष्टतदभाववत्त्वेनातिप्रसङ्गाभावादुभयत्वाद्यभावस्य तदभाववत्येकैकस्मिन्नपि तत्सामानाधिकरण्याभावानभ्युपगमात्। तत्सामानाधिकरण्यावच्छेदकस्य प्रत्येकानतिरिक्तत्वात्। अथवा यन्निरूपितसाध्यतावच्छेदकताघटकसम्बन्धसामान्ये प्रतियोग्यधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावस्तदन्यत्वमेव प्रतियोगितावाव्यापकत्वमुभयत्वनिरूपितपर्याप्तौ तु न प्रत्येकानुयोगिकत्वाभावस्तदनुयोगिनः प्रत्येकानतिरिक्तत्वादिति।

यत्तु प्राचीनमते रूपादिसामान्याभावस्य रूपतद्ध्वंसतत्प्रागभावेतत्रितयप्रतियोगिकतया रूपध्वंसादिसाध्यकरूपादिहेतावतिव्याप्ती रूपादिसामान्याभावीयरूपध्वंसत्वावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनियतत्वेन तद्घटिताभावकूटाधिकरणे रूपादेरवृत्तेः। न च रूपस्यापि रूपध्वंसाभावरूपतया तद्घटितस्य रूपसामान्याभावाघटितकूटस्यापि यावतामेकाधिकरण्यमिति विवक्षया लक्षणघटकत्वादिति, तथा, जलपरमाण्वादौ रूपध्वंसत्वावच्छिन्नाभावबुद्धिनिर्वाहाय जन्यत्वाद्यवच्छिन्नाभावे रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वस्यावश्यकतया तत एव रूपादिसामान्याभाववत्यपि तत्प्रतीतिनिर्वाहादरूपादिसामान्याभावस्य रूपध्वंसादिप्रतियोगिकत्वानभ्युपगमात्, साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे तेनाप्युक्तस्थले रूपादिसामान्याभावव्यावर्तनात् स्वनिरूपकाभाववत्त्वसम्बन्धेन साध्यतावच्छेदकसमनियतप्रतियोगिताकूटाधिकरणत्वमेव निवेश्य लक्षणस्य परिष्करणीयतया रूपादिसामान्याभावानधिकरणस्यापि जलपरमाण्वादेरुक्तस्थले तत्कूटाधिकरणत्वेनातिव्याप्तेरनवकाशाच्च। प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते नानाव्यक्तिसाध्यकस्थले साध्यतावच्छेदकसमनैयत्यस्य प्रत्येकप्रतियोगितायामसत्त्वेऽपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यस्य विवक्षणान्न दोषस्तद्वह्नितत्तद्धूमादिस्वरूपप्रतियोगितानामपि स्वावच्छेदकवह्नित्वधूमत्वावच्छिन्नतदभावीयप्रतियोगितात्वेन वह्नित्वधूमत्वादिसमनैयत्याद्वह्नित्वाद्यवच्छिन्नवह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाद्यवच्छिन्नाभावीयवह्न्यादिस्वरूपप्रतियोगितात्मकतया तदवच्छेदकद्रव्यत्वाद्यवच्छिन्नप्रतियोगितात्मकतया घटादावपि सत्त्वान्न तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितात्वेन वह्नित्वादिसमनैयत्यमिति तदभावीयत्वं विशेषणम्, तथा सति वह्नित्वाद्यवच्छिन्नाभावीयप्रतियोगितायाः घटादावसत्त्वान्नानुपपत्तिः। यद्यप्येवमपि वाच्यत्वत्वादिसमनियतप्रतियोगित्वाप्रसिद्धिर्दुर्वारैव व्यधिकरणधर्मावच्छिन्नाभावानामभिन्नतया वाच्यत्वादिस्वरूपवाच्यत्वभिन्नत्वावच्छिन्नाभावीयप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगितानां घटादावपि सत्त्वात्, यत्किञ्चिदेकधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेन समनै-

यत्वघटकव्याप्यत्वविवक्षणे च पृथिवीत्वाद्यभावादिसाध्यकस्थले घटावृत्तित्वावच्छिन्नाभाववारणमशक्यं तदभावीयपृथिवीत्वाभावादिप्रतियोगिताना पृथिवीत्वाभावत्वाद्यवच्छिन्नाभावीयप्रतियोगितात्मकतया पृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वाभावत्वादिसमनैयत्यात्, तथापि यद्धर्मावच्छिन्नप्रतियोगितात्वेन यदभावनिरूपितत्वं तादृशधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेनैव व्याप्यत्वनिवेशान्न दोष पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वादिरूपाभावमात्रनिरूपितत्वं न तु घटावृत्तित्वावच्छिन्नाभावनिरूपितत्वमिति । यद्यपि पूर्वदलाप्रवेशे वह्न्यादिसाध्यके धूमादिहेतौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकव्यापकप्रतियोगिताकतत्तद्भेदावृत्तित्वावच्छिन्नाभावकूटाधिकरणत्वस्य गुणादौ प्रसिद्धत्वेऽपि तत्र हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिसम्भवस्तथापि साध्याभावकूटवति तादृशवृत्तेरप्रसिद्ध्याऽव्याप्तिस्तदनिवेशेऽपि सत्तावान् जातेरित्यादौ वक्ष्यत इति स्थलान्तरे कूटाधिकरणाप्रसिद्ध्याऽव्याप्तिवारणरूपं तत्प्रयोजनमाह यत्र पृथिव्याभावादा वेति । तत्ताद्रूप्यवन्ति । घटपटादिरूपेत्यर्थः । तत्र सद्धता वेति । तत्र साध्ये च सद्धेतुर्जलत्वादिस्तत्रेत्यर्थः । नाव्याप्तिरित्यनेनान्वयः, यावतामैकाधिकरण्यं सम्भवति तावदभावसमुदायाधिकरणविवक्षाया तद्दोषासम्भवेन स्थलान्तरे व्यावृत्तिमाह पृथिवीत्वादाविति । द्रव्यत्वादेः समवायेन हेतुत्वे जातित्वाद्यवच्छिन्नाभावघटितकूटाधिकरणे समवायेन वृत्तेरप्रसिद्ध्याऽतिव्याप्तेरनवकाशात् स्वरूपसम्बन्धेन हेतुत्वानुसरणम् । साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे जातित्वाद्यवच्छिन्नाभावस्य साधनासमानाधिकरणतया वारणसम्भवेऽपि प्रत्यक्षं साधनसमानाधिकरणजलावृत्तित्वतेजोऽवृत्तित्वाद्यवच्छिन्नसमवायसम्बन्धावच्छिन्नाभावकूटाधिकरणतायाः सामान्यादावेव सत्त्वादतिव्याप्तिर्दुर्वारैवेति ध्येयम् । द्वितीयदलप्रयोजनमाह नापीति । घटत्वाभावत्वादिना साध्यताया घटादावेव साध्याभावकूटाधिकरणत्वप्रसिद्धिरत उक्तम् अभाववादिनेति । आदिपदात्प्रमेयत्वपरिग्रहः । तत्तन्माव्याप्तिं । घटत्वाभावादिरूपसाध्यस्य च साध्यतावच्छेदकव्याप्यप्रतियोगिताको घटत्वपटत्वादिरूपोऽभावस्तत्समुदायाधिकरणाप्रसिद्धेरित्यर्थः, यावतामैकाधिकरण्यं सम्भवतीति विवक्षायामपि तादृशाभावसमुदायवति घटादौ हेतोर्वृत्तेरव्याप्तिरेव । न च यावतामभावानामैकाधिकरण्यसम्भवस्तादृशाभावकूटाधिकरणं यद्यत्तावदन्यतमवृत्तित्वव्यापकसमनियतप्रतियोगिताकोऽभावो विवक्षणीयो घटवृत्तित्वत्वाद्यवच्छिन्नाभावश्चोपदर्शितस्थले न तथा जगत एव तावदन्यतमान्तर्गतत्वात्, अपि तु घटत्वादिना जगद्वृत्तित्वसामान्याभाव एव वृत्तिमद्वृत्तिस्तथाविधाभावः, तावदधिकरणान्यतमत्वञ्च तत्तदधिकरणावृत्तिशून्यत्वं न तु तत्तदधिकरणान्यान्यत्वमतो नाप्रसिद्धिरिति वाच्यम्, एवमपि जातिप्रतियोगिकाभाववान् मेयत्वादित्यादौ जातिमतामेव प्रत्येकघटत्वपटत्वघटि

ततादृशकूटाधिकरणतया जातिमद्वृत्तित्वत्वावच्छिन्नाभावस्यापि तादृश तयाऽव्याप्तेर्दुर्वारत्वादिति। अत्र साध्याभाववत्तायां सम्बन्धविशेषानिवेशे कालपरिमाणवान् मेयत्वादित्यादावतिव्याप्तिः कालस्यापि कालिकसम्बन्धेन कालपरिमाणाभावाधिकरणतया जगत एव साध्याभावकूटवत्त्वाद्दैशिकविशेषणतासम्बन्धनिवेशे च घटत्वाभाववान् पटत्वादित्यादावव्याप्तिर्घटत्वादेस्तेन सम्बन्धेनावृत्तेस्तेन सम्बन्धेन तद्घटितकूटाधिकरणाप्रसिद्धेः, तेन सम्बन्धेन वृत्तिमत्त्वस्याभावविशेषणत्वे च घटत्वाभावसाध्यके व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिश्च घटातिरिक्तवस्तुमात्रस्यैव दैशिकविशेषणतया साध्याभावकूटवत्त्वात् साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धनिवेशेऽप्ययमेव दोषः, किञ्चिद्विशिष्टतादृशसाध्यस्य योऽभावस्तस्य दैशिकविशेषणतासम्बन्धावच्छिन्नाभावस्तद्रूप इति दैशिकविशेषणताया अपि निरुक्तसाध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वात्। स्वनिष्ठतादृशप्रतियोगितावच्छेदकसम्बन्धेन स्वाधिकरणत्वनिवेशे च व्यधिकरणधर्मावच्छिन्नाभावस्य साध्याप्रतियोगिकतया तदसङ्ग्रहप्रसङ्ग इति साध्यतावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानं प्रति यत्सम्बन्धावगाहियदभाववत्ताज्ञानं प्रतिबन्धकं तेन सम्बन्धेन तदभावाधिकरणत्वं विवक्षणीयं व्यधिकरणधर्मावच्छिन्नाभाववत्ताबुद्धिरपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिं प्रतिबध्नातीति तादृशाभावस्य लक्षणघटकत्वनिर्वाहः। यदि चाभाववत्ताज्ञानं प्रति दैशिकविशेषणतासंसर्गकमपि तदभावाभावत्वावच्छिन्नप्रकारकं ज्ञानं प्रतिबन्धकमभावाभावस्यातिरिक्ततामते तादृशज्ञानप्रतिबन्धकतया आवश्यकत्वात्, तस्य प्रतियोगिस्वरूपतामतेऽपि फलसाम्यानुरोधेन तदावश्यकत्वादभावाभावस्यातिरिक्तताग्रहदशाया तत्प्रतिबन्धकताया दुरपह्नवत्वाच्च, एवञ्च कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाभाव जातित्वादेरभावे साध्ये आत्मत्वजातित्वादावव्याप्तिर्दुर्वारैव दैशिकविशेषणतासम्बन्धस्यापि निरुक्तरूपाक्रान्तत्वात्। न चैवं तादृशसाध्यवत्यपि पक्षे तादृशसाध्याभावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबन्धकज्ञानसम्भवात् तद्विषयस्य हेत्वाभासतापत्तिरिति वाच्यम्, तत्र पक्षे साध्यं नास्तीतिज्ञानस्य भ्रमत्वं निर्विवादमिति तदुपपादनाय तादृशसाध्यप्रतियोगिनस्तादृशसाध्याभावत्वेन दैशिकविशेषणतया वृत्त्यनभ्युपगमादित्युच्यते, तदा निरुक्तसम्बन्धेन साध्याभावत्वावच्छिन्नाधिकरणताकूटवत्त्वमेव विवक्षणीयं हेतुमपि तादृशाधिकरणताविरहान्नोक्ताव्याप्तिः।

परे तु घटत्वादेरपि दैशिकविशेषणतास्वीकार आवश्यकोऽन्यथा घटे न घटत्वाभाव इत्यादिनञुल्लेख्यप्रतीतिव्यवहारयोरनुपपत्तिः काले न द्रव्यत्वमित्यादिप्रयोगाभावात्सप्तम्यर्थदैशिकविशेषणतासंसर्गावच्छिन्नाधेयतान्वितस्वार्थावगाहिबोधजनकत्वस्यैव नञ्पदे व्युत्पन्नत्वात्। न च भावरूपप्रति

योगिवाचकपदसमभिव्याहृतनञा [1]दैशिकविशेषणताऽभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा च प्रतियोगिभूताभावप्रतियोगितावच्छेदकसम्बन्ध प्रत्याय्यत इति व्युत्पत्तिरिति वाच्यम्, प्रतियोगितावच्छेदकसम्बन्धत्वेन सम्बन्धबोधोपगमे सर्वेषामेवाभावानां दैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकः किञ्चिद्विशिष्टस्वाभावस्य योऽभावस्तद्रूपतया तादृशसम्बन्धश्च प्रतियोगितावच्छेदक इत्यतिप्रसङ्गात्। विशिष्य समवायकालिकसम्बन्धभानस्यैवोपगन्तव्यतया प्रतियोगिन्यभावे सम्बन्धविशेषावच्छिन्नप्रतियोगिताक चावोधकाद्यमभावो नास्तीत्यादित सम्बन्धविशेषावच्छिन्नाधेयताप्रतीतौ नियामकाभावात् समभिव्याहारविशेषनिरपेक्षस्य तात्पर्यस्य कालिकादिसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावस्यात्मत्वरूपो योऽभावस्तस्य समवायादिसंसर्गता पर्यवसानमन्ययमभावो नास्तीति प्रत्ययप्रसङ्गात्। वास्तवत सम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपप्रतियोगिवाचकपदसमभिव्याहारस्य तत्सम्बन्धावच्छिन्नाधेयताभाननियामकत्वे वस्तुत कालिकसम्बन्धावच्छिन्नप्रतियोगिताकेऽस्मिन्नभावे कालिकसम्बन्धावच्छिन्नप्रतियोगिताक वस्त्रशयदशायामनायमभावो नास्तीत्यादिवाक्याद्धिकरणे एतदभावाभावप्रतीतावप्यधिकरणे कालिकसम्बन्धेनाभाववत्त्वादिसंशयस्य सर्वानुभवसिद्धस्योच्छेदापत्तेः। अथैव कालादावपि कालिकसम्बन्धावच्छिन्नघटत्वाभावो नास्तीतिप्रतीत्यनुरोधेन घटत्वादेर्दैशिकविशेषणतास्वीकारस्यावश्यकतया तत्र समवायावच्छिन्नघटत्वाभावो नास्तीतिव्यवहारापत्तिरिति चेन्न, प्रतियोगिमति तदभावत्वेन वृत्तेरनभ्युपगमादित्थञ्च दैशिकविशेषणतासम्बन्धेन साध्याभावत्वावच्छिन्नवत्त्व लक्षणे निवेशनीय कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववानात्मत्वादित्यादौ घटत्वाभावस्य तादृशसाध्याभावत्वेनात्मन्यवृत्तेर्नाव्याप्तिः। एतेन यादृशसाध्यकस्थले साध्याधिकरणे साध्याभावस्य तदधिकरणे च साध्यस्य न भ्रमप्रसिद्धस्तत्र प्रतिबध्यप्रतिबन्धकभावकल्पनाया असम्भवेन प्रतिबन्धकताघटितलक्षणस्याव्याप्तिरिति निरस्तमिति वदन्ति।

(दी०) तन्न, द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेरवृत्तेरतिव्याप्तेः। अपि चेदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तेः। द्रव्यत्वत्वावच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात्। किञ्च रूपाभावसाध्यके मद्धेतौ साध्याभावसमुदायनिविष्टरूप-

---

१ दैशिकविशेषणतासम्बन्धावच्छिन्नाधेयतयाऽभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा च प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाधेयतयाऽभाव प्रत्याय्यत इति पाठान्तरम्।

लरूपव्यक्त्यधिकरणाप्रसिद्धेः । यावतामभावानामैकाधिकरण्यं तावतां समुदाये निरुक्तेऽपीदं पृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वाद्रूपवदन्यत्वाद्वेत्यादावतिव्याप्तिस्तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वति तद्धेतोरवृत्तेः । वस्तुतो निखिलानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात् समानाधिकरणयावदभावाधिकरणाप्रसिद्धिर्दुर्वारैव ।

(गा०) तदुभयेति । द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नप्रतियोगिताया अपि तदुभयत्वसमनियततया तादृशाभाववतो गुणादेरेव निरुक्तसाध्याभावकूटाधिकरणत्वादिति भावः । प्रतियोगिवैयधिकरण्याघटितसमव्यापकत्वस्य साध्यतावच्छेदकविशेषणत्वमुपगम्य तदुभयत्ववति प्रत्येकमुभयत्वाभावसत्त्वेन तस्य प्रतियोगिताव्यापकत्ववारणे तु तद्रूपावच्छिन्नसाध्यकसद्धेतावव्याप्तिर्दुष्टया, व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकसजातीयो यो धर्मस्तदवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वोपगमे नेतादृशातिव्याप्त्यवकाश इत्यत स्थलान्तरेऽतिव्याप्तिमाह अपि चेति । द्रव्यत्वाद्यवच्छिन्नेति । शुद्धद्रव्यत्वत्वाद्यवच्छिन्नेत्यर्थः । पृथिवीत्वविशिष्टद्रव्यत्वपसमव्याप्तत्वादिति । किञ्चिद्विशेषणावच्छिन्नस्य शुद्धविशेष्यानतिरिक्तत्वादिति भावः । विशिष्टस्यानतिरिक्तत्वेन साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वस्थाने प्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकत्वनिवेशेन वा विशिष्टद्रव्यत्वादिसाध्यकस्थले शुद्धद्रव्यत्वाद्यभावस्य वारणसम्भवाद्दूषणान्तरमाह किञ्चेति । रूपाभावेति । रूपत्वावच्छिन्नाभावेत्यर्थः । 'सद्धेतौ' इत्यव्याप्तिसूचनाय । सकलरूपव्यक्त्यधिकरणाप्रसिद्धेरिति । तथा च तद्घटितसाध्याभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरिति भावः । यावतामिति । तथा च प्रकृते सकलरूपघटितसमुदायस्य न लक्षणघटकता सकलरूपाणामैकाधिकरण्यविरहात् । किं त्वेकैकरूपव्यधिकरणधर्मावच्छिन्नाभावघटितकूटानामेव प्रत्येकं तदधिकरणता च रूपवत्स्वेव प्रसिद्धेति नाव्याप्त्यवकाश इति भावः । इदमिति । वायौ पृथिवीवृत्तिद्वित्वसंयोगादिसत्त्वाद्वायुत्वादेरुक्तसाध्यव्यभिचारिता, गुणसामान्याभावस्य साध्यत्वे वायवीयस्पर्शादिरपि साध्याभावस्तद्घटितनिरुक्ताभावकूटवदवृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वादावभावान्नातिव्याप्तिसम्भव इति पृथिवीवृत्तीति । घटतद्वायुद्वित्वपटतद्वायुद्वित्वादिरूपपृथिवीवृत्तिगुणाभावाभावानां यावतामैकाधिकरण्यसम्भवेन तद्घटितकूटस्यापि लक्षणघटकतया तद्वति वायौ हेतोर्वृत्त्या नातिव्याप्तिसम्भव । न च द्वित्वादिरूपसाध्याभावस्योत्पत्तिकालेऽसत्त्वेन कालिनाव्याप्यवृत्तितया व्याप्यवृत्तित्वविशेषणेन तद्व्यावृत्तिः पार्थिवपरमाण्वेकत्वादिरेव लक्षणघटक इत्यतिव्याप्तिर्दुर्वारैवेति वाच्यम्, प्राचीनमते द्वित्वा

दिमति तत्प्रागभावादिकालावच्छेदेन तदत्यन्ताभाववत्त्वाद् द्वित्वादेरपि
व्याप्यवृत्तित्वादिति । पृथिवीपदमेतत्पृथिवीपरम्, इदंपदपृथिवीपदयो
कर्मधारयो वाभिप्रेत । न च स्वसमानाधिकरणाभावाप्रतियोगित्वमनव
च्छिन्नवृत्तिकत्वं वा व्याप्यवृत्तित्व न तु स्वसमानाधिकरणात्यन्ताभावाप्रति
योगित्वम्, तच्च न द्वित्वादिसाधारणमिति पृथिवीपदस्य पृथिवीसामान्य
परत्वेऽपि न क्षतिरिति वाच्यम्, एतदतिव्याप्तिवारणानुरोधेनात्यन्ताभाव
घटितव्याप्यवृत्तित्वस्यैव निवेशयितुमुचितत्वादेतद्रूपात्यन्ताभाववान् मेय-
त्वादित्यादावेतद्रूपात्मकाभावस्य लक्षणाघटकत्वेनातिव्याप्त्यापत्ते प्राचीन
मतेऽत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशस्यावश्यकत्वाच्च । अत एवाग्रेतनं
'रूपादिघटितत्वेन' इत्यपि साधु सङ्गच्छते । पार्थिवरूपभावस्यैवानित्य
तयाऽत्यन्ताभावघटितव्याप्यवृत्तित्वानिवेशे तस्य व्याप्यवृत्तित्वाभावेन
तदसङ्गत्यापत्ते, 'पृथिवीवृत्ति' इत्यत्र वृत्ति समवायेन बोध्या, तेन वाय
वीयस्पर्शादे कालिकसम्बन्धेन पृथिवीवृत्तित्वेऽपि न क्षति पृथिवीसमवेत
त्वावच्छिन्नाभावो गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽप्रसिद्ध पृथिवी
समवेतत्वावच्छिन्नत्वेनाभिमताया प्रतियोगिताया केवलसमवेतत्वस्यैवा-
वच्छेदकत्वसम्भवेन पृथिवीसमवेतत्वस्याभावप्रतियोगितानवच्छेदकत्वात् ।
न च पृथिवीसमवेतत्वावच्छिन्नाया जलत्वादिव्यावृत्तप्रतियोगिताया अति
प्रसक्ते समवेतत्वे नावच्छेदकत्वसम्भव इति वाच्यम्, समवेतत्वावच्छिन्न
प्रतियोगितातोऽतिरिक्ताया जलत्वादिव्यावृत्तप्रतियोगिताया एवाप्रसिद्धे
गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽपि पृथिवीसमवेतत्वावच्छिन्नाभाव
साध्यके नातिव्याप्तिसम्भवस्तादृशाभावस्य समवेतत्वावच्छिन्नाभावसमनिय
ततया तदभिन्नत्वेन समवेतमात्रस्यैव तदभावतया वायुत्वादेरपि तथात्वा
त् । न च पृथिवीसमवेतत्वविशिष्टाभाववति जलादौ समवेतत्वावच्छिन्ना
भावविरहात् तयो समनियतत्वमेव न गुरुधर्मस्याभावप्रतियोगितानवच्छेद
कत्वेऽपि पृथिवीसमवेतत्वस्य तादृशविशिष्टाभावप्रतियोगितावच्छेदकत्व
मावश्यकं समवेतत्वविशिष्टवति जलादौ तत्सत्त्वेन तन्मात्रस्य तत्प्रति
योगितावच्छेदकत्वासम्भवादिति वाच्यम्, विशिष्टाभावस्य साध्यत्वे तस्य
वायुसाधारणतया सद्धेतुत्वप्रसङ्गेन पृथिवीसमवेतत्वोपलक्षिताभावस्यैव
साध्यताया उपगन्तव्यत्वादिति गुणपदोपादानम्, पृथिवीसमवेतगुणत्वाव
च्छिन्नाभावश्च गुणादिसाधारणत्वान्न समवेतत्वावच्छिन्नाभावसमनियत इति
नोक्तदोषावसर । ध्वंसप्रागभावावच्छिन्ने सामान्याभावमुपगच्छता वाय्वा
देरप्युत्पत्तिकालावच्छेदेन पृथिवीवृत्तिगुणसामान्याभाववत्त्वादुक्तसाध्यके
वायुत्वादि सद्धेतुरेवेत्यतो नातिव्याप्तिसम्भव इत्यत साध्यान्तरमाह
सत्तान्येति । सत्तान्यत्वनिवेशप्रयोजनं पूर्ववत्, वायुत्वादेरपि सत्तान्यसम
वेताभावाभाववत्त्वात् पृथिवीति । अत्र पृथिवीपदं पृथिवीसामान्यपरमेव घटत्वा
बुद्धित्वादे स्वसमानाधिकरणसत्ताभावप्रतियोगित्वेन व्याप्यवृत्तित्वविशेषण

व्यावृत्तत्वात् 'रूपादिघटितत्वेन' इत्यत्र रूपपदोपादानं प्राचीनमताभिप्रायेणोपन्यस्तम्। पूर्वसाध्यमभिप्रेत्य हेतौ साध्यसामानाधिकरण्यविशेषणेन वायुत्वे नातिव्याप्तिरतो द्वितीयहेत्वनुसरणम्। ननु समनियताभावैक्यमते सत्तान्यपृथिवीसमवेतत्वावच्छिन्नाभावस्य सत्तान्यद्रव्यसमवेतत्वावच्छिन्नाभावाभिन्नतया विभ्वसमवेतपृथिवीसमवेतत्वावच्छिन्नाभावस्य विभ्वसमवेतस्पर्शवत्समवेतत्वावच्छिन्नाभावाभिन्नतया वायुत्वादिरपि तदभाव इति न तादृशाभावसाध्यकेऽतिव्याप्तिः सम्भवतीति पूर्वोक्तरूपाभाववान् वायुत्वादित्यत्राव्याप्तेरेवोक्तविवक्षायां दुर्वारतामाह वस्तुत इति। अत्रायमाशयः—यावतामेकाधिकरणं तावत्समुदायाधिकरणत्वमित्यस्य यत्किञ्चिदधिकरणवृत्तिसकलसाध्याभावाधिकरणत्वं यत्किञ्चिदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयताकत्वपर्यवसितमर्थः, साध्याभावाधिकरणाधिकरणकसकलसाध्याभावाधिकरणत्वं साध्याभावसमानाधिकरणसाध्याभावत्वव्यापकाधेयताकत्वपर्यवसितं वाऽऽद्ये व्यभिचारिमात्रेऽतिव्याप्तिर्जगत एव साध्यवद्यत्किञ्चिदधिकरणव्यक्तिवृत्तिसकलसाध्याभाववत्त्वादिति समुदायोपादानस्याकिञ्चित्करतया तद्विलक्षणासम्भवः, द्वितीये च साध्याभावसमानाधिकरणसाध्याभावत्वमुक्तस्थले निखिलरूपाणामेवाक्षतमिति तादृशसाध्याभावत्वव्यापिका न केनाप्यधिकरणेन निरूपिताधेयतेति तादृशाधिकरणाप्रसिद्धिस्तदवस्थेवेति।

ननु स्ववृत्तिसाध्याभावत्वव्यापकं यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तिताकाधिकरणमेवाधिकरणान्तार्थः, धूमवान् वह्नेरित्यादौ महानसादिकं न तथाऽयोगोलकवृत्तितायास्तद्वृत्तिसाध्याभावत्वव्यापकत्वादयोगोलकादिवृत्तिसाध्याभावत्वस्य च समानाधिकरणधर्मावच्छिन्नसाध्याभावसाधारणतया तद्वृत्तित्वाव्याप्यत्वादित्ययोगोलकाद्येव तादृशं स्वमिति नातिव्याप्तिः, तादृशयत्किञ्चिदधिकरणह्रदादिवृत्तित्वाभावस्य वह्न्यादौ सत्त्वेऽपि न क्षतिस्तादृशं यत्तत्त्वं तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकाभावस्य निवेशात्, अन्यतमत्वञ्च तत्तद्वृत्तिशून्यत्वं न तु तत्तदन्यान्यत्वमतो न केवलान्वयिसाध्यकेऽप्रसिद्धिरिति तादृशं स्वं यत्तत्तदधिकरणवृत्तित्वाभावकूटवत्त्वनिवेशेऽपि केवलान्वयिसाध्यकेऽव्याप्तिर्हेतुमतोऽपि तथात्वादिति तदुपेक्षितम्। रूपसामान्याभाववान् वायुत्वादित्यादौ च सकलरूपवतामेव तथात्वं स्ववृत्तिताया एव तत्तद्घटादिवृत्तिसाध्याभावत्वव्यापकत्वादतो नाव्याप्तिः। अथवा स्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्याभावत्वावच्छेदेन यदधिकरणवृत्तित्वं तादृशाधिकरणवृत्तिसकलसाध्याभाववत्त्वमेव यावतामित्यादेरर्थः, धूमवान् वह्नेरित्यादौ च यत्किञ्चिदधिकरणं न साध्यवत्तद्वृत्तिसकलसाध्याभावसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य तद्वृत्तित्वात् किन्त्वयोगोलकाद्येवेति जगतोऽतथात्वान्नातिव्याप्तिः, रूपाभाववान् वायुत्वादित्यादौ च ताद-

शाधिकरणं तद्रूपघटादिरेव व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तद्वृत्तिस कलसाध्याभावसमानाधिकरणत्वात्तस्य च तद्वृत्तित्वनियमात्, तद्वृत्ति-साध्याभावत्वञ्च तत्रैव प्रसिद्धमिति नाव्याप्त्यवसरः, शेषं पूर्ववत्। अथवा व्यासज्यवृत्तिसाध्याभावमात्रवृत्तिधर्मावच्छिन्नाधिकरणत्वमेव साध्याभाव-कूटाधिकरणत्वं जगत एव साध्याभावत्वावच्छिन्नाधिकरणतया व्यभिचारि-ण्यतिव्याप्तिवारणाय व्यासज्यवृत्तित्वं धर्मविशेषणम्, तथा सत्यपि जगत एव व्यधिकरणधर्मावच्छिन्नसाध्याभावमात्रवृत्तितथाविधधर्मावच्छिन्नाधि-करणत्वात् स एव दोष इत्यायेयतावच्छेदकतादृशधर्मन्यूनवृत्ति सङ्ख्यात्वं यत्तत्तदन्यतरत्न धर्मो विशेषणीय, न्यूनवृत्तित्वञ्च स्वसमानाधिकरणाभाव-प्रतियोगित्वमात्रम्, उक्तस्थले तद्रूपव्यधिकरणधर्मावच्छिन्नसाध्याभावोभ-यत्वादिरेव तादृशो धर्मस्तस्य रूपान्तरसाधारणत्रित्वादिन्यूनवृत्तित्वेऽपि तादृशत्रित्वाद्यवच्छिन्नस्य क्वचिदप्यवृत्तेस्तस्याधेयतानवच्छेदकतयाऽधेय तावच्छेदकीभूततादृशधर्मन्यूनवृत्तिताविरहात्। न च समनियताभावेऽस्ये व्यधिकरणधर्मावच्छिन्नसाध्याभावमात्रवृत्तिव्यासज्यवृत्तिधर्माप्रसिद्ध्या केव-लान्वयिसाध्यकेऽव्याप्तिरिति वाच्यम्, तथा सति व्यासज्यवृत्तित्वस्थलेऽ व्यासज्यवृत्त्यनेकवृत्तिधर्माभिन्नत्वस्य निवेशनीयत्वात् केवलान्वयिसाध्यके साध्याभावत्वस्यैव तथात्वादित्यतो दोषान्तरदानाय हेतुतावच्छेदकसम्बन्ध निरशयति किञ्चेति।

(दी०) किञ्च हेतुतावच्छेदकसम्बन्धेन या साध्याभाववति वृत्तिस्तदभावो वक्तव्यः, अन्यथा धूमादावव्याप्तिः, साध्यतावच्छेदक-सम्बन्धेन साध्याभाववति कालादौ वृत्तिमन्मात्रस्यैव वृत्तेर्व्यभिचारि-ण्यतिप्रसङ्गो वा, तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेता-वव्याप्तिः साध्याभाववति तेन सम्बन्धेन वृत्तेरप्रसिद्धेः, साधनसमाना-धिकरणत्वेन साध्याभावो विशेषणीया इति चेद्विशेष्यन्तां तथापि भूत-त्वमूर्तत्वायोरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिस्तादृ-शसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः। किञ्च महाकालान्य त्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण हेतावति-व्याप्तितादृशसाध्याभावसमुदायवति महाकाले तेन सम्बन्धेन वृत्तिम-न्मात्रस्यैव वृत्तेः।

(गा०) धूमादावव्याप्तिरिति। वह्निमन्मात्रसमवेतघटादिव्यक्तौ वर्तमानस्य निर्वह्निसमवेतत्वाभावस्य तत्रासत्त्वादिति भाव॥ एतच्च यत्किञ्चित्सम्बन्धा वच्छिन्नतादृशवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशाभिप्रायेण, अन्य-

था निर्वह्निसंयुक्तत्वादिसाधारणतादृशवृत्तित्वत्वं प्रति तथाविधाभावप्रतियोगिताया अव्यापकत्वात् तस्य लक्षणाघटकतया वृत्तिमन्मात्रस्यैव साध्याभाववदधिकरणकालादौ वृत्तेर्निर्वह्निवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वादव्याप्त्यसङ्गतेः। अत एव सम्बन्धमनिवेश्य तादृशाधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशपक्षे दूषणान्तरमाह साध्यतावच्छेदकसम्बन्धेनेति। एतच्च कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य कालादावसत्त्वेऽपि तस्य यथाविवक्षितसाध्याभावसमुदायवत्त्वमक्षतमेवेति सूचनाय। 'कालादौ' इत्यादिपदाद्विषयितादिसम्बन्धेन वस्तुमात्रसम्बन्धिन ईश्वरज्ञानादेः परिग्रहः। व्यभिचारिणीति। सत्साध्यके वृत्तिमन्मात्राधिकरणस्य कालादौ विवक्षितसाध्याभावकूटवत्त्व तादृशव्यभिचारिहेतावित्यर्थः। द्रव्यत्वसाधनके द्रव्यत्वपृथिवीत्वान्यतराभाववद्गुणद्रव्यत्वाभावयोर्वायुत्वादिहेतुके रूपाद्यात्मकसाध्याभावस्य सत्त्वादिसाध्यके संयोगेन समवायेन वा यत्र हेतुता तत्र सत्तात्वावच्छिन्नाभावस्य च साधनवदवृत्तित्वात् साधनसमानाधिकरणत्वेन साध्याभावे विशेषिते न तादृशाभावानादायोक्तस्थलेऽव्याप्त्यतिव्याप्तिप्रसङ्ग इत्याशङ्कते साधनसमानेति। सद्धेतौ व्यधिकरणधर्मावच्छिन्नाभावानामेव साधनसमानाधिकरणतया तादृशाभावकूटाधिकरणं जगदेव व्यभिचारिणि च साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि तथात्वात्तादृशाभावकूटाधिकरणं निःसाध्यमेव साधनसामानाधिकरण्योपलक्षिताभावाधिकरणत्वमेव निवेश्यं न तु तद्विशिष्टाधिकरणत्वं तेन व्यतिरेकिणि हेतौ तद्विशिष्टाधिकरणवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमदवृत्तित्वसम्भवेऽपि नाव्याप्तिः, साधनसमानाधिकरणत्वं च साधनतावच्छेदकसम्बन्धेन साधनतावच्छेदकविशिष्टवदवृत्तित्वं तेन द्रव्यत्वादेः कालिकसम्बन्धेनाधिकरणस्पन्दादौ सत्ताधिकरणे गुणादौ च द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नाभावस्य सत्त्वेऽपि द्रव्यत्वपृथिवीत्वोभयादिसाध्यके द्रव्यवृत्तित्वविशिष्टसत्त्वादौ नातिव्याप्तिः। न च सत्ताया साध्याभावकूटवद्गुणादिवृत्तित्वसत्त्वाद्विशिष्टसत्त्वे तदभावस्य दुर्लभतया नोपदर्शितसाध्यके विशिष्टसत्त्वेऽतिव्याप्तिप्रसक्तिरिति वाच्यम्, साधनतावच्छेदकावच्छिन्नवत्त्वानिवेशे द्रव्यत्वादिसाध्यके विशिष्टसत्त्वेऽव्याप्तिवारणाय साधनतावच्छेदके साध्याभावकूटवदवृत्तितावच्छेदकत्वाभावपर्यन्तनिवेशस्यावश्यकतयोक्तस्थलेऽतिव्याप्त्यप्रसक्तेः, संयोगे साध्ये संयोगेन घटादिहेतौ संयोगत्वावच्छिन्नसंयोगाभावस्योत्पत्तिकालावच्छेदेन साधनवति वृत्तेर्व्याप्यवृत्तित्वविशिष्टस्याधिकरणे गुणादौ संयोगेन वृत्तेरप्रसिद्ध्याऽव्याप्तिः संयोगि सत्त्वादित्यादौ जगत एव संयोगाभाववत्त्वेनातिव्याप्तेर्वारणाय व्याप्यवृत्तित्वविशिष्टाभाववत्त्वानिवेशनस्यावश्यकत्वादित्यतोऽनवच्छिन्नैव वृत्तिरत्र प्रवेश्या।[1] अथ सा

१ न च साधनसमानाधिकरणत्वेन साध्याभावविशेषणत्वेऽपि सत्तान्यपृथिवीसमवेतत्वस्य वायुत्वादित्यादौ साधनसमानाधिकरणघटतद्वायुद्वित्वघटैतद्वायुद्वित्वादिरूपसाध्याभावकूटाधिकरणपृथिवीवृत्ति

धनसमानाधिकरणत्वेन साध्याभावे विशेषितेऽपि सत्तावान् जातेरित्यादाव्याप्तिवारणमशक्यमेव प्रत्येकं साधनसमानाधिकरणाभ्यां द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावाभ्यां घटिताभावसमुदायस्य सामान्यादावेव सत्त्वात्तत्र च हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेः।

यत्तु द्रव्यत्वादिविशिष्टसत्ताभावप्रतियोगितावच्छेदककोटौ सत्तात्वं न निवेश्यते द्रव्यत्वादिवैशिष्ट्यमात्रस्यैव तत्प्रतियोगितावच्छेदकत्वसम्भवादिति द्रव्यत्वादिसाधारणद्रव्यत्वादिवैशिष्ट्यावच्छिन्नत्वप्रतियोगितायाः सत्तात्वसमनैयत्यविरहान्न तादृशाभावस्य लक्षणघटकतेति समाधानम्, तदतितुच्छम्, द्रव्यत्वविशिष्टसत्तावान् जातेरित्यादावपीदृशयुक्त्या साध्यतावच्छेदकतादृशविशिष्टसत्तात्वस्याभावप्रतियोगितानवच्छेदकत्वाद्द्रव्यत्वादिवैशिष्ट्यावच्छिन्नाभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावत्वाद् व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तेर्दुर्वारतयैतल्लक्षणवादिना गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतस्यावलम्बनीयत्वाद्द्रव्यत्वविशिष्टसत्तात्वादेः प्रतियोगितानवच्छेदकत्वेऽपि समवेतवान् जातेरित्यादौ समवायेनैतद्रूपान्यत्वविशिष्टाभावतद्रूपान्यत्वविशिष्टाभावादीनां समवेतत्वसमनियतप्रतियोगिताकतया प्रत्येकं साधनसमानाधिकरणतया च तद्घटितकूटाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिवारणासम्भवात्। एवं विशिष्टस्यातिरिक्ततामतावलम्बने दर्शितविशिष्टाभावानां साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहोपपादनेन समाधानमपि हेयम्, उक्तस्थल एव द्रव्यत्वतदन्यसमवेतोभयगुणत्वतदन्यसमवेतोभयाभावानां साध्यतावच्छेदकसमवेतत्वसमनियतप्रतियोगिताकानां प्रत्येकं साधनसमानाधिकरणानां समुदायवति सामान्यादौ समवायेन वृत्तेरप्रसिद्ध्याऽव्याप्तेस्तावतापि वारणासम्भवात्। न च यादृशाभावसमुदायाधिकरणं साधनाधिकरणं तादृशसमुदायाधिकरणवृत्तित्वाभावस्य विवक्षितत्वादुक्ताभावसमुदायाधिकरणतायाः साधनवत्यसम्भवान्न तत्समुदायस्य लक्षणघटकतेति नाप्रसिद्धिरिति वाच्यम्, एवं सत्यपि तादृशविशिष्टाभावाद्येकतरघटितव्यधिकरणधर्मावच्छिन्नाभावस्तोमस्य तादृशस्याधिकरणे केषाञ्चिद्वृत्तिमतामवृत्तेः साधनस्य च वृत्तेरव्याप्तितादवस्थ्यात्, एतादृशविवक्षानुसरणे भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यत्र भूतत्वमूर्तत्वोभयघटितसाध्याभावकूटवति हेतोरवृत्तितया वक्ष्यमाणातिव्याप्तेरसम्भवप्रसङ्गाच्च साधनवतो निःस्पर्शस्य कस्यचिदपि तादृशोभयघटितस्तोमाधिकरणत्वविरहेण तादृशस्तोमस्य लक्षणाघटकत्वात्, प्रतियोगितायां

त्वाभावप्रयुक्तातिव्याप्तेरनवतारित्वाद्दूषणान्तरदानमनुचितमिति वाच्यम्, यतो द्वित्वादिरूपाभावस्य नवीननये हेत्वधिकरणऽनवच्छिन्नवृत्तिकत्वविरह, अत एव पृथिवीवृत्तिगुणत्वादे सद्धेतुत्वमाशङ्क्य स्थलान्तरमनुसृतम्, इत्थञ्च नव्यनये तत्र दोषो न भवतीति भूतत्वमूर्तत्वेत्याद्यनुसरणम्।

साध्यतावच्छेदकव्याप्यत्वविशेषणवैयर्थ्यापत्तेश्च पृथिवी द्रव्यत्वप्रकारक-प्रमाविषयत्वादित्यादौ जलावृत्तित्वे तेजोऽवृत्तित्वाद्यवच्छिन्नाभावघटितकूटस्य क्वचिदपि साधनवत्यसत्त्वेन तादृशकूटस्य लक्षणाघटकत्वात् तादृशकूटवत्त्वं साधनवतः ह्रदवृत्तित्वाभावस्य साधनेऽसम्भावितत्वादित्यतिव्याप्त्यनवका-शादिति चेत्, अत्राहुः, साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसमानाधिकरण-धर्मावच्छिन्नाभावभिन्नत्वेन साध्याभावविशेषणादुपदर्शितविशिष्टाभावनि-रासः, गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वाव-च्छिन्नाभावस्य सङ्ग्रहायावच्छिन्नान्तम्, वृत्तिर्निरवच्छिन्ना ग्राह्याऽन्यथा संयोगी सत्त्वादित्यादौ संयोगत्वाद्यवच्छिन्नसंयोगाद्यभावस्य साध्यवद्-वृत्तितया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतयाऽतिव्याप्त्या-पत्तेः, सद्धेतौ साधनसमानाधिकरणस्य साध्यवद्वृत्त्यन्यत्वाप्रसिद्धेः समा-नाधिकरणधर्मावच्छिन्नेति। तथा च व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव विशिष्टभेदप्रसिद्धिः। न चैवं साध्यतावच्छेदकव्यापकत्वं प्रतियोगिता-विशेषणं व्यर्थम्भाववान् मेयत्वादित्यादौ घटत्वादिरूपाभावस्योक्तविशेषणे-नैव वारणादिति वाच्यम्, प्रमेयसाध्यकस्थले घटत्वपटत्वोभयावच्छिन्न-प्रमेयसामान्याभावस्य गगनत्वाद्यवच्छिन्नगगनाद्यभावाभिन्नस्य सङ्ग्रहाय साध्यतावच्छेदकव्यापकत्वेन समानाधिकरणधर्मस्यावश्यं निवेशनीयतया घटत्वपटत्वादिरूपाभावप्रतियोगितावच्छेदकघटत्वाभावत्वादेश्चाभावत्वाद्या-पकत्वेन घटत्वादौ विशिष्टभेदस्याक्षतत्वात्तद्विशेषणेन तद्व्यावृत्तेः। न च वाच्यत्वादिसाध्यकस्थले घटत्वावच्छिन्नवाच्यत्वाभावस्य संयोगादिरूप-व्यधिकरणसम्बन्धावच्छिन्नवाच्यत्वाभावाभिन्नतया साध्यतावच्छेदकव्याप-कसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमक्षतमिति तत्सङ्ग्रहाय समा-नाधिकरणसम्बन्धावच्छिन्नत्वस्य समानाधिकरणधर्मावच्छिन्नाभावप्रति-योगित्वविशेषणतया आवश्यकत्वात् प्रमेयसाध्यकस्थलीयोक्ताभावस्य व्यधिकरणसम्बन्धावच्छिन्नगगनाद्यभावाभिन्नत्वेऽपि प्रतियोगितावच्छेदक-धर्मे साध्यतावच्छेदकव्यापकत्वविशेषणमन्तरेणैव विशिष्टभिन्नत्वमव्याहत-मिति वाच्यम्, एवमपि गगनत्वादिना प्रमेयसामान्याभावस्य समानाधि-करणधर्मतादृशसम्बन्धावच्छिन्नप्रतियोगिताकत्वपोक्ताभावस्य तद्भिन्नत्वेन तत्र विशिष्टभेदनिर्वाहाय तादृशविशेषणस्यावश्यकत्वात्, समानाधिकरण-सम्बन्धावच्छिन्नत्वविशेषणं परित्यज्य साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं प्रतियोगितायां निवेश्य तत्कार्यस्य साध्यतावच्छेदकव्यापकत्वरूपप्रति-योगितावच्छेदकविशेषणसार्थकत्वस्य चोपपादनसम्भवाच्च साध्यवद्वृत्ति-तादृशाभावश्चोभयत्वादिना साध्याभाव एव प्रसिद्ध इति न काप्यनुपपत्तिः। एतेन नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वादित्यादौ साधनसमानाधि-करणं पटीयं नीलरूपं न घटे इति तादृशनीलरूपघटत्वात्मकसाध्याभाव-कूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरित्यपि निरस्तम्। तादृशाभावे उक्तभेदा-

सत्त्वेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् । एवं घटवृत्तित्वविशिष्टाकाशाभावादेरभावे साध्ये मेयत्वादिहेतौ साध्याभावस्य विशिष्टाकाशाभावादेराकाशाभावानतिरिक्ततया जगत एव साध्याभावकूटाधिकरणतापत्त्याऽतिव्याप्तिरिति साध्याभावत्वविशिष्टाधिकरणत्वमेव विवक्षणीयम्, तथा च पटे घटवृत्तित्वविशिष्टाकाशाभावाभावो नास्तीतिप्रत्ययाभावात् पटादेर्न तादृशविशिष्टाभावाधिकरणत्वमिति न दोषः । एवञ्च साधनाधिकरणेऽपि साध्याभावत्वेन वृत्तिर्विवक्षणीया, अन्यथा जातिमदन्यत्वविशिष्टाकाशाभावस्याभावे साध्ये समवायेन हेतौ साधनसमानाधिकरणाकाशाभावस्य साध्याभावत्वविशिष्टस्याधिकरणे सामान्यादौ समवायेन वृत्तेरप्रसिद्धत्वादव्याप्त्यापत्तेस्तादृशविवक्षयाप्युक्तोभयाभावसाध्यकस्थलेऽव्याप्तिवारणं सम्भवति प्रत्येकाधिकरणे उभयाभावाभावत्वेनावृत्तेः । यदि च घटवृत्तित्वविशिष्टाकाशाभावाद्यभावो घटत्वाद्यभावसमनियततया तदभिन्न इति घटत्वादिरपि तदभावस्तद्घटितकूटाधिकरणता च न जगत इति दर्शितातिव्याप्त्यनवकाशात् साध्याभावत्वविशिष्टाधिकरणत्वविवक्षणमफलमित्युच्यते तदापि साध्याभावत्वेन साधनवद्वृत्तित्वं तु साध्याभावत्वविशिष्टाधिकरणत्वाविवक्षणेऽपि घटान्यत्वविशिष्टद्रव्यत्वाभाववान् घटत्वादित्यत्र साध्याभावस्य द्रव्यत्वस्य द्रव्यत्वत्वादिना साधनसमानाधिकरणतया द्रव्यस्यैव तद्घटितकूटाधिकरणत्वेनाव्याप्तेर्वारणाय निवेश्यमेव । न चैवमपि पृथिव्यन्यद्रव्यत्ववद् द्रव्यत्वादित्यादौ साध्यतावच्छेदकविशिष्टघटवृत्त्योः प्रत्येकं साधनसमानाधिकरणयोर्घटान्यत्वविशिष्टद्रव्यत्वाभावघटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावयोरधिकरणं गुणाद्येवेत्यतिव्याप्तिर्दुर्वारैवेति वाच्यम्, विशिष्टस्यातिरिक्ततामवलम्ब्यैव तादृशातिप्रसङ्गस्य समाधातुं शक्यत्वादिति । भूतत्वमूर्तत्वाद्योरिति । उभयत्वावच्छिन्नाभावस्य साध्यत्वे हेतोर्व्यभिचारित्वाभावादन्यतरत्वावच्छिन्नाभावस्य साध्यत्वानुसरणम् । पृथिव्यादाविति । आकाशे भूतत्वस्य मनसि च मूर्तत्वस्य साधनसमानाधिकरणतयाऽऽकाशस्य मनसश्च प्रत्येकं तदुभयानधिकरणत्वेन साध्याभावसमुदायानधिकरणत्वादिति भावः । आदिशब्दाद्भूतभेदमूर्तभेदान्यतराभाववान् भूतमूर्तान्यतरत्वादित्यादौ भूतभेदमूर्तभेदात्मकसाध्याभावघटितसमुदायवति कालदिगादौ हेतोरवृत्त्याऽतिव्याप्तेः परिग्रहः । ननु साधनाधिकरणे येषां परस्परमैकाधिकरण्यं तत्समुदायस्य विवक्षितत्वान्नायं दोषो भूतत्वमूर्तत्वाद्योः प्रत्येकं साधनसमानाधिकरणत्वेऽपि साधनवति परस्परमैकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात्तदेकतरघटितकूटस्यैव तथात्वात् तद्वति च हेतोर्वृत्तेः प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं त्याज्यमेव, एवञ्च विशिष्टस्यानतिरिक्तत्वेऽपि पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ नोक्तरीत्याऽतिव्याप्तिः सम्भवत्युक्तविशिष्टाभावानां साधनवति द्रव्यादावैकाधिकरण्याभावात् । एवं तादृश-

कूटाधिकरणपृथिव्यादिवृत्तित्वस्य द्रव्यवृत्तित्वत्वादिना योऽभावस्तस्यापि तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गततया तद्घटचविरहादप्युक्तहेतौ नातिव्याप्तिसम्भव । न च द्रव्यवृत्तित्वत्वावच्छिन्नाभावप्रतियोगिताया आकाशादिवृत्तित्वसाधारणतया तादृशवृत्तित्वत्वाव्याप्यत्वात् तादृशाभावो लक्षणघटक इति वाच्यम्, साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे प्रतियोगिताया तादृशवृत्तित्वत्वव्याप्यत्वविशेषणव्यावृत्त्यभावेन तादृशविशेषणस्य परित्याज्यत्वाद् वह्निमान् धूमादित्यत्रालोकाद्यवृत्तित्वेन रूपेण निर्वह्निवृत्तित्वाभावस्य प्रतियोगिताया आलोकादिनिष्ठपर्वतादिवृत्तित्वसाधारणसाधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वत्व प्रत्यव्यापकतयैव तादृशाभावव्यावर्तनात् । व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणात्पर्वतसंयुक्तत्वपर्वतान्यसंयुक्तत्वोभयत्वाद्यवच्छिन्नाभावस्य पर्वतासंयुक्तघटादौ वर्तमानस्य धूमादावसत्त्वेऽपि न क्षति । प्रतियोगिताया तादृशवृत्तित्वत्वव्याप्यत्वविशेषणेऽपि तादृशाभावमादायाव्याप्तेरावश्यकतयैतस्य विशेषणस्य तद्विशेषणसत्त्वेऽप्यावश्यकत्वाच्चरमाभावप्रतियोगिताया तादृशवृत्तित्वत्वव्याप्यत्वविशेषणपरित्यागे यत्किञ्चित्साधनाधिकरणवृत्तिसाध्याभावसमुदायस्य विवक्षणेऽपि प्रथमाभावप्रतियोगिताया साध्यतावच्छेदकव्याप्यत्वविशेषणं परित्याज्यमेव पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलाद्यसमवेतत्वाद्यवच्छिन्नाभावकूटवत्त्वस्य साधनवत्यसत्त्वेऽपि तादृशाभावकूटवत्सामान्यादिवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गतानां पृथिव्यन्यवृत्तित्वत्वाद्यवच्छिन्नाभावानामेव वृत्तिमद्वृत्तीनां हेतावसत्त्वेनातिव्याप्त्यनवकाशात्, एवं सत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावघटितकूटाधिकरणसमवेतत्वाप्रसिद्धिनिबन्धनाव्याप्तिवारणायोपात्तसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वरूपसाध्याभावविशेषणस्थाने साध्याभावप्रतियोगितायां साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वं निवेश्य व्यधिकरणधर्मावच्छिन्नाभावीयगगनादिकिञ्चिद्विशिष्टतदभावनिष्ठप्रतियोगिताभिन्नव्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायैव व्यधिकरणधर्मावच्छिन्नाभावसङ्ग्रहे समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वस्यानिवेशनीयतयाऽभावसाध्यकस्थले साध्यतावच्छेदकन्यूनवृत्तिघटत्वाद्यभावत्वाद्यवच्छिन्नप्रतियोगितासु साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वाभावेन घटत्वाद्यात्मकाभावव्यावर्तनात् साध्याभावप्रतियोगिताया साध्यतावच्छेदकव्यापकत्वविशेषणमपि परित्यजनीयम्, उक्तरीत्यापि पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ पृथिव्यन्यद्रव्यत्वाद्यभावस्य हेतुमत्यसत्त्वेऽपि घटान्यवृत्तित्वत्वादिना गुणादिवृत्तित्वाभावमादायातिव्याप्तिर्वारणीयेत्यतो दोषान्तरमाह किञ्चेति ।

केचित्तु ननु स्ववृत्तिसाधनसमानाधिकरणसाध्याभावसमुदायाधिकरणं

यद्यत्साधनाधिकरणं तद्वृत्तिसाध्याभावसमुदायाधिकरणं यद्यत्स्वं तदेव साध्याभावसमुदायाधिकरणेत्यनेन विवक्षितं सद्धेतौ तादृशं स्वं जगदेव, वह्न्यधिकरणमहानसादिनिष्ठाना निर्वह्निह्रदादिनिष्ठानाञ्च धूमादिसमानाधिकरणसाध्याभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाना समुदायवद्यद्यत्साधनाधिकरणं तद्वृत्तितादृशसमुदायवत्त्वस्य महानसादौ साध्यवति साध्यशून्ये च ह्रदादौ सत्त्वाल्लक्षणसमन्वय । भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ पृथिव्यादिचतुष्कमिव तादृशं स्वं मनो गगनञ्च गगनवृत्तिभूतत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनरूपसाधनाधिकरण एव मनोवृत्तिमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य मनस्येव सत्त्वेन निरुक्तसाधनाधिकरणवृत्तिसाध्याभावसमुदायाधिकरणत्वस्य तत्र सत्त्वात् । स्वनिष्ठसाध्याभावे साधनसमानाधिकरणत्वविशेषणानुपादाने वह्न्यादिशून्यह्रदादिनिष्ठसमानाधिकरणधर्मावच्छिन्नसाध्याभावसमुदायाधिकरणत्वस्य साधनाधिकरणेऽसत्त्वात् साध्यवदेव तादृशं स्वं तद्वृत्तित्वाभावस्य वृत्तिमद्वृत्तेर्हेतावसत्त्वादव्याप्तिरतस्तत्र तद्विशेषणप्रवेश, प्रथमसमुदायपदानुपादाने भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ गगनं मनश्च न तादृशं स्वं तद्वृत्तिव्यधिकरणधर्मावच्छिन्नाभावाधिकरणमनोगगननिष्ठभूतत्वमूर्तत्वोभयघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनमनसो प्रत्येकमसत्त्वात् किन्तु पृथिव्यादिचतुष्कमेव तथाविधं स्वं तद्वृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरिति तदुपादानम्, धूमवान् वह्नेरित्यादावपि पर्वतादे स्ववृत्तिसाध्याभावकूटाधिकरणमहानसादिरूपसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणत्वाज्जगदेव तादृशस्वं स्यादतो यद्यदिति । तथा च पर्वतादिवृत्तिसाध्याभावकूटाधिकरणं यद्यत्साधनवदयोगोलकादेरपि तदन्तर्गततया तद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावघटितकूटस्य पर्वतादावसत्त्वात् तादृशं स्वं धूमादिशून्यमेवेति नातिव्याप्ति । यद्यत्साधनाधिकरणमित्यनुक्त्वा यद्यदधिकरणमित्येतावदुक्तौ भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ गगनादिवृत्तिसाध्याभावकूटाधिकरणं यद्यत्पृथिव्यादेरपि तदन्तर्गततया तद्वृत्तिमूर्तत्वादिघटितकूटस्य च गगनादावसत्त्वात्तादृशं स्वं न गगनादिकं भवेदपि तु पृथिव्यादिकमेवेत्यतिव्याप्तिरत साधनाधिकरणनिवेश पृथिव्यादेस्तत्र साधनानधिकरणत्वान्न दोष । धूमवान् वह्नेरित्यादावयोगोलकादिनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणत्वस्य पर्वतादे सत्त्वाज्जगदेव तादृशं स्वमिति चरमसमुदायपदोपादानम्, पूर्ववत्तादृशं यद्यत्स्वं तावदन्यतमवृत्तित्वत्वव्यापकप्रतियोगिताकोऽभावो विवक्षणीयोऽतो नातिव्याप्तिरसम्भवो वेत्यतो दोषान्तरमाह 'किञ्चेति' इत्यादु ।

महाकालेति । कालान्यत्वसाध्यके कालिकविशेषणताविशेषेण हेतौ साध्यसामानाधिकरण्यविशेषणेनातिव्याप्तिवारणसम्भवान्महाकालभेदसाध्यकानु

सरणम्। यद्यपि महाकालत्वसाध्यकेऽव्यतिव्याप्तिः सम्भवति वृत्तिमान एव महाकालातिरिक्तकालवृत्तित्वसत्त्वात्, तथापि तत्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितवक्ष्यमाणलक्षणे तत्तत्कालमात्रवृत्तितत्तत्कालावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्या नातिव्याप्तिः, साधनाधिकरणे सम्भवदेकाधिकरण्यकसाध्याभावसमुदायाधिकरणत्वस्य प्रयोजनान्तरानुरोधेन निवेशे तादृशाप्रसिद्धिविरहेऽपि साधनाधिकरणीभूतखण्डकालव्यक्तिविशेषावृत्तित्वावच्छिन्नाभावघटिततादृशकूटाधिकरणतत्तत्कालवृत्तित्वाभावस्य तत्तत्कालावृत्तौ वृत्तिमति वर्तमानस्य साधनेऽभावान्नातिव्याप्तिरित्यग्रिमस्य 'एतेन' इत्यादेरसङ्गतिरित्येकमात्रविपक्षकानुसरणम्। आदिपदान्महाकालत्वाभावादिपरिग्रहः, अवृत्तिहेतौ साध्यसामानाधिकरण्यविशेषणेनातिव्याप्तिवारणसम्भवादव्यभिचारणाति। वृत्तिमत्त्वमात्रमत्र विवक्षितं तन्मात्रस्यैव व्यावर्तकत्वात् समवायादिना द्रव्यत्वहेतुके तादृशसम्बन्धेन महाकालवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमति घटत्वादौ वृत्तेर्हेताववृत्तेर्नातिव्याप्तिसम्भव इति कालिकसम्बन्धावच्छिन्नहेत्वनुसरणम्। इदमुपलक्षणम्, ईश्वरज्ञानान्यत्वादिसाध्यके विषयितासम्बन्धेन हेतुमात्रे साध्याभावसमुदायवतीश्वरज्ञानादौ तेन सम्बन्धेन वस्तुमात्रस्यैव वृत्तेरतिव्याप्तिर्द्रष्टव्या। एतेन वृत्तिमद्वृत्तित्वविशेषणस्थले वृत्तिमदवृत्तित्वतादृशवृत्तित्वत्वव्यापकप्रतियोगितात्वोभयाभावस्य वृत्तिमदवृत्तित्वसाध्यवद्वृत्तित्वत्वव्यापकप्रतियोगिकत्वोभयाभावस्य वा निवेशे महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावे चरमदलाभावेनोभयाभावसत्त्वेऽपि न निस्तार। एवं यथाश्रुते घटत्वादिसाध्यके व्यभिचारिणि संयोगेन हेतौ साध्याभाववति संयुक्तमात्रस्यैव संयुक्तत्वादेतद्रूपत्वादिसाध्यके व्यभिचारिणि समवायेन हेतौ समवेतमात्रस्यैवेतद्रूपाद्यतिरिक्तसमवेतत्वादतिव्याप्तिरित्यपि द्रष्टव्यम्।

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावकूटाधिकरणस्य नानाविपक्षकस्थलेऽप्रसिद्धावपि साधनसमानाधिकरणतादृशाभावकूटाधिकरणस्य नाप्रसिद्धिरिति साधनसमानाधिकरणत्वविशेषणप्रक्षेपे तादृशाभावकूटाधिकरणत्वगर्भमेव लक्षणं सम्यक् साध्यतावच्छेदकव्यापकत्वापेक्षया साध्यतावच्छेदकावच्छिन्नव्यापकत्वस्य गुरुत्वेऽपि साध्यतावच्छेदकव्यापकप्रतियोगिकाभावघटितलक्षणे सत्तावान् जातेरित्यादौ विशिष्टसत्ताभावादिवारकनिरुक्तविशेषणप्रवेशेन महागौरवाद्विशिष्टस्यानतिरिक्तत्वे पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभावादेरपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितात्वयोक्तदिशाऽतिव्याप्तिवारणाय तादृशाभावघटितलक्षणेऽपि साधनवति सम्भवदेकाधिकरण्यकतादृशाभावसमुदायाधिकरणस्यावश्यं विवक्षणीयतया पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ समवायसम्बन्धा

वच्छिन्नजलासमवेतत्वावच्छिन्नाभावघटितकूटाधिकरणसामान्यादिवृत्तित्वाभावसत्त्वेऽप्यतिव्याप्तेरनवकाशात् साधनवति सम्भवदैकाधिकरण्यकत्वविवक्षामन्तरेणैव पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ घटान्यवृत्तित्वावच्छिन्नाभावमादायातिव्याप्तिवारणे तूक्तस्थलेऽपि तादृशाभावमादायातिव्याप्तिवारणसम्भवात् प्रतियोगिताया साध्यतावच्छेदकव्यापकत्वविशेषणं नोपादेयम् ।

यद्यपि साधनवति सम्भवदैकाधिकरण्यककूटनिवेशे द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावघटितकूटस्य सत्तावान् जातेरित्यादौ न लक्षणघटकताप्रसक्तिस्तथापि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे तादृशाभावैकतरव्यधिकरणधर्मावच्छिन्नाभावघटितकूटस्य तथात्वाद्व्याप्तिरिति तदुपेक्ष्योक्तरीत्या सार्वभौमलक्षणपरिष्कारमपि हेतुतावच्छेदकसम्बन्धेन वृत्तिमद्यावदधिकरणमहाकालमात्रविपक्षकव्यभिचारिण्यतिव्याप्त्या निराकुरुते एतेनेति ।

(दी०) एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिस्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तयस्तद्वत्त्वं व्याप्तिः केवलान्वयिनः संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन वर्तमानोऽपि न व्याप्यवृत्तिरुक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिद्ध्यादिसम्पादकाः पुनरभावा न हेतुसमानाधिकरणा उक्तसमुदायाधिकरणवृत्तित्वतदभाववृत्तिमत्त्वानि पूर्वोक्तरीत्या प्रत्येतव्यानीत्यादिकमपास्तम् ।

(गा०) अत्र प्रतियोगितायामवच्छिन्नान्तविशेषणव्यावृत्तिरभाववान् मेयत्वादित्यत्रैव वह्निमान् धूमादित्यत्रापि बोध्या, यादृशसाध्याभावकूटाधिकरण साधनवत् तार्णातार्णदहनोभयाभावादिघटितकूटस्यापि तथाविधकूटतया तथाविधोभयादिमद्वृत्तिपदार्थे वर्तमानस्य तादृशकूटाधिकरणवृत्तित्वाभावस्य हेतावसत्त्वात् । अत्र च साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीयाऽन्यथा वह्निमान् पर्वतवह्न्यवयवसंयोगादित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभाव समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावयो साधनाधिकरणे सम्भवदैकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वादतिव्याप्तिविरहेऽपि वह्निमान् धूमादित्यादौ साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नाभावकूटस्योक्तक्रमेण लक्षणघटकतया तद्वति वह्न्यवयवव्यतिरिक्ते हेतोर्वृत्तेरसम्भवापत्ते । व्यापकतापि साध्यतावच्छेदकसम्बन्धघटिता ग्राह्याऽन्यथा समवायेन वह्निसंयोगे साध्ये संयोगेन साध्यव्यापकस्य वह्ने समवायसम्बन्धा

च्छिन्नाभावघटितकूटाधिकरणवह्न्यवयवातिरिक्तवृत्तौ सद्धेतावव्याप्त्यापत्तेः । इत्थञ्च संयोगसम्बन्धेन साध्यतायां तेन सम्बन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतया व्याप्यवृत्तिपदोपादानसार्थक्यमिति केचित् ।

वस्तुतस्तु येन सम्बन्धेन व्यापकता तेन सम्बन्धेनाभावो ग्राह्यः । साध्यतावच्छेदकसम्बन्धस्य विशिष्य निवेशेऽवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वनिवेशे संयोगेन धूमादिसाध्यके तत्सम्बन्धावच्छिन्नधूमत्वावच्छिन्नाभावस्य धूमवत्यवच्छिन्नवृत्तिकतया व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य व्याप्यवृत्तित्वेनातिव्याप्त्यापत्त्याऽनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वस्यैव निवेशनीयतया 'एवम्' इत्यादिवक्ष्यमाणपङ्क्त्यसङ्गत्यापत्तेः । अन्योन्याभावघटितव्यापकतानिवेशाच्च व्याप्यवृत्तिपदसार्थक्यम् । संयोगाभावसाध्यकस्थले संयोगघटितकूटाधिकरणताया द्रव्यमात्रे सत्त्वात्तद्वृत्तिहेतावव्याप्तिवारणरूपं तत्प्रयोजनमाह केवलान्वयिन इति । एतेन तत्साध्यके द्रव्यवृत्तेः सद्धेतुत्वमक्षतमिति सूचितम्, गुणवान् द्रव्यत्वादित्यादौ गुणाद्यनवच्छिन्नवृत्तिकगुणाद्यभाववति नित्यद्रव्यातिरिक्ते हेतोर्वृत्त्याऽव्याप्तिवारणरूपमनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वविशिष्टाभावनिरूपिताधिकरणतानिवेशनफलमाह एवमिति । साध्याभावे उत्पत्तिकालावच्छेदेन द्रव्यवृत्तित्वकथनं द्रव्यत्वे तद्वृत्तित्वाभावासत्त्वेनाव्याप्तिप्रसङ्गसूचनाय, 'न व्याप्यवृत्तिः' इत्यत्र द्रव्यत्वाधिकरणेऽपीत्यनुषज्यत इति व्याख्यानमसत्, अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वनिवेशे संयोगी घटादित्यत्रोक्तरीत्याऽव्याप्तेर्वारणाय साधनवति व्याप्यवृत्तित्वस्यावश्यं निवेशनीयतया तत्राव्याप्त्यप्रसक्तेः, साधनवति व्याप्यवृत्तित्वपर्यन्तनिवेशनप्रयोजनप्रदर्शनपरतयैतत्पङ्क्तिव्याख्यापि न साधीयसी, व्याप्यवृत्तित्वविशिष्टाधिकरणत्वानिवेशे संयोगी सत्त्वादित्यत्र गुणादौ व्याप्यवृत्तेः संयोगाभावस्येव द्रव्यत्वाभावस्यापि लक्षणघटकतया जगतः साध्याभावकूटानधिकरणत्वादतिव्याप्त्यनवकाशेऽपि धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावकूटाधिकरणताया विश्वस्मिन्सत्त्वादतिव्याप्तेर्दुर्वारतया तत्प्रवेशनस्यावश्यकतया तावताप्युक्ताव्याप्तिवारणसम्भवात्, तस्माद्व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वमभिमतम्, अतोऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावापेक्षा, तन्निवेशे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्यैव निवेशनीयतया संयोगेन साध्यतायां व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव संयोगेन द्रव्याभावस्यावच्छिन्नवृत्तिकान्यतयाऽतिव्याप्तिः, तद्विशेषणस्यैव दैशिककालिकाव्याप्यवृत्तिसाध्यभेदेन स्थलद्वये व्यावृत्तिरभिहितेति सारम् ।

स्वसमानाधिकरणत्वनिवेशनप्रयोजनमाह स्वरूपेति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपेत्यर्थः । अप्रसिद्ध्यादीति । सत्तावान् जातेरित्यादौ

सत्तात्वाद्यवच्छिन्नाभावकूटाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तित्वाप्रसिद्धिसम्पादकारू पाभावादिसाध्यके रूपाद्यात्मकाभावकूटाधिकरणाप्रसिद्धिसम्पादकाः सम्भवदैकाधिकरण्यापन्नसाध्याभावस्तोमाधिकरणत्वविवक्षणे सत्तान्यपृथिवीसमवेतशून्यं वायुत्वादित्यादावादिपदग्राह्याया अतिव्याप्तेः सम्पादका बोध्याः । पूर्वोक्तरीत्येति । समुदायाधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन तदभावास्ताहशवृत्तित्वत्वव्यापकप्रतियोगिताका हेतुतावच्छेदकसम्बन्धेन वृत्तिमद्वृत्तित्वं लक्षणघटकं बोध्यमित्यर्थः । अपास्तमिति । न च सार्वभौममते सामानाधिकरण्यस्याव्याप्यवृत्तितया साध्याभावकूटघन्महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावोऽपि सामानाधिकरण्यानिरूपकखण्डकालाद्यवच्छेदेन घटादिरूपवृत्तिमति वर्तमान एवेति महाकालान्यत्वादिसाध्यके नातिव्याप्तिसम्भव इति वाच्यम्, तथा सति वह्न्यादावपि स्वावयवावच्छेदेन निर्धूमसंयुक्तत्वाद्यभावसत्त्वेन धूमवान् वह्नेरित्यादावतिव्याप्तेरुक्तस्थलेऽतिव्याप्तिवारणस्य सुदूरपराहतत्वात् ।

यत्तु हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणसामान्यावच्छेदेन तद्वत्त्वस्य विवक्षितत्वाचातिव्याप्तिर्व्यभिचारनिरूपकाधिकरणावच्छेदेन हेतौ तद्वत्त्वविरहादिति, तन्न, एवं सति स्वावयवाद्यवच्छेदेन घटादिवृत्तेः समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य पर्वतावच्छेदेन धूमादावसत्त्वादसम्भवापत्ते वृत्तिमद्वृत्तिपदेन हेतुतावच्छेदकसम्बन्धेन यस्य यदधिकरणं तदवच्छेदेन तद्वृत्तित्वविवक्षायामपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावकूटाधिकरणवृत्तित्वाभावस्याधिकरणानवच्छिन्नतयाऽसम्भवस्य दुर्वारत्वात् । यदि च वृत्तिमत्यनवच्छिन्नवृत्तयो यावन्तस्ताहशाभावकूटाधिकरणवृत्तित्वाभावा अनवच्छिन्नतद्वत्त्वं व्याप्तिरित्युच्यते, तदा सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षेऽपि न दर्शितदोषनिरासः सम्भवति समानाधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावस्य वृत्तिमत्यनवच्छिन्नवृत्तिकत्वविरहेण लक्षणाघटकत्वात् । हेतुतावच्छेदकसम्बन्धेन यस्य यदधिकरणं तदवच्छेदेन तदवृत्तित्वकिञ्चिदवच्छिन्नत्वोभयाभाववन्तो यावन्तस्ताहशाभावकूटवद्वृत्तित्वाभावा अनवच्छिन्नतद्वत्त्वं व्याप्तिरित्युक्तौ च न कश्चिद्दोष, समानाधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावे किञ्चिदवच्छिन्नत्वसत्त्वेऽपि कालिकसम्बन्धेन घटाद्यधिकरणखण्डकालावच्छेदेन घटाद्यवृत्तित्वासत्त्वेनोभयाभाववत्तायाः सत्त्वेन महाकालान्यत्वसाध्यके व्यभिचारिणि ताहशाभावस्य लक्षणघटकत्वेनातिव्याप्तिविरहात् समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य घटादौ कपालाद्यवच्छेदेन वृत्ते संयोगादिना यद्घटाद्यधिकरणं तदवच्छेदेन घटादावत्तेर्निरुक्तोभयाभाववत्त्वविरहाद् वह्निमान् धूमादित्यादौ न लक्षणघटकताऽपि त्ववच्छिन्नत्वविरहेणोभयाभाववतो व्यधिकरणधर्मावच्छिन्नाभावस्यैवेत्यव्याप्त्यनवकाशादिति ध्येयम् ।

सामानाधिकरण्यस्याव्याप्यवृत्तित्वे हेतुतावच्छेदकसम्बन्धेन किञ्चित्पदार्थाधिकरणवृत्तयो यावन्तस्तादृशाभावकूटाधिकरणवृत्तित्वनिरूपकत्वाभावा यदधिकरणावच्छेदेन वर्तन्ते तत्त्वमिति वक्तव्यं महाकालवृत्तित्वनिरूपकत्वस्य समानाधिकरणधर्मावच्छिन्नाभाव खण्डकालवृत्ति साधनाधिकरणमहाकाले नास्तीति नोक्तातिव्याप्त्यवकाश सङ्केतो तादृशाभावकूटाधिकरणजगद्वृत्तित्वनिरूपकत्वस्य व्यधिकरणधर्मावच्छिन्नाभावा एव हेतुतावच्छेदकसम्बन्धेन किञ्चिदधिकरणवृत्ति स च हेत्वधिकरणसामान्य एव वर्तत इति लक्षणसमन्वय । अथवा वृत्तिमदवृत्तयो यावन्तस्तादृशसाध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वाधिकरणतासामान्यकधर्मवत्त्वमेव विवक्षणीयम् । वृत्तिमत्त्वादिकञ्च दैशिकविशेषणतासम्बन्धेनैव ग्राह्यम् । इत्थञ्च कालिकसम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकरणताया सम्बन्धान्तरावच्छिन्नाधिकरणतावद्वृत्तेर्दैशिकविशेषणतासम्बन्धावच्छिन्नमहाकालवृत्तित्वाभावस्यासत्त्वादिति दृतं पल्लवितेन ॥

(चि०) प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकस्तद्विशिष्टज्ञानस्याभावधीहेतुत्वादन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः, गवि शशशृङ्गं नास्तीति प्रतीतेरप्रसिद्धेः शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः ।

इति महामहोपाध्यायश्रीगङ्गेशोपाध्यायविरचितेऽनुमानचिन्तामणौ व्यधिकरणधर्मावच्छिन्नाभावघटितलक्षण सम्पूर्णम् ।

(दी०) तद्विशिष्टेति । विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वादभावप्रत्ययो हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्वमवगाहते न तु स्वातन्त्र्येण घटो नास्तीत्येव प्रतीतेः । तदिहाभावप्रत्ययो यदि व्यधिकरणधर्मेणावच्छिन्नं प्रतियोगिनं नावगाहते नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वम्, अथावगाहते तर्हि भ्रम एव । न च ततोऽर्थसिद्धिरिति भावः । यदि पुनरानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीत्यादिप्रत्ययो न तदा तादृशाभावनिवारणं गीर्वाणगुरूणामपि शक्यमिति मन्तव्यम् ।

इति श्रीमन्महामहोपाध्याय रघुनाथशिरोमणिभट्टाचार्यविरचितायामनुमानचिन्तामणिदीधितौ व्यधिकरणधर्मावच्छिन्नाभावघटितव्याप्तिलक्षणं सम्पूर्णम् ।

(गा०) मूले 'प्रतियोग्यवृत्तिश्च धर्मा न प्रतियोगितावच्छेदक' इति व्यधिकरणधर्मावच्छिन्नाभावनिराकर्तुर्वादिन प्रतिज्ञावाक्यं तत्र धर्मत्वमनुपादेयम् । अवृत्तेरपि प्रतियोगितावच्छेदकत्वस्य निराकर्तव्यत्वात् तत्रेसाधकाभाव एव हेतुरुह्य, पक्षतावच्छेदकप्रतियोग्यवृत्तित्वशरीरे साध्यतावच्छेदके च सामान्यत प्रतियोगितयोर्न प्रवेश सर्वेषामेव किञ्चिदभाव प्रतियोगिनि सम्बन्धितया किञ्चिदभावप्रतियोगितावच्छेदकतया च विशिष्य प्रभावप्रसिद्धे किन्तु विशिष्यवाच्यत्वत्वादिना, तथा च वाच्यत्वाद्यवृत्तित्वावच्छिन्ने वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्व साधनीयं समूहालम्बनानुमितिरुद्देश्या, तत्तदभावीयप्रतियोग्यवृत्तित्वावच्छिन्ने तत्तदभावप्रतियोगितानवच्छेदकत्वसाधनं न सम्यक् समनियताभावैक्यमते समवायित्वादिना वाच्यत्वाद्यभावस्य घटत्वाद्यवच्छिन्नपटाद्यभावाभिन्नतया समवायिपटादीनामपि तथाविधवाच्यत्वाद्यभावप्रतियोगितया तद्वृत्तिसमवायित्वादेर्वाच्यत्वाद्यभावीयप्रतियोग्यवृत्तिताया दुर्घटत्वात् प्रतियोगिता विशिष्योपादाय तत्तत्प्रतियोगितावद्वृत्तित्वावच्छिन्ने तत्प्रतियोगितावच्छेदकत्वाभावसाधनमपि हेयं वाच्यत्वादिनिष्ठाया प्रसिद्धसमानाधिकरणद्वित्वाद्यवच्छिन्नाभावप्रतियोगिताया उपादाने सिद्धसाधनात् सोन्दडोपाध्यायैरपि व्यधिकरणसमवायित्वादिधर्मस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकतयानङ्गीकाराद् व्यधिकरणधर्मावच्छिन्नायाश्च प्रतियोगिताया उभयवाद्यसिद्धतया विशिष्योपादानासम्भवात् ।

परेतु विशिष्य समवायित्वत्वादिकं पक्षतावच्छेदकीकृत्य वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीय तादृशप्रतियोगितानवदवृत्तित्वमेव हेतु, यो यद्वृत्ति स तन्निष्ठप्रतियोगितानवच्छेदक इति सामान्यतो व्याप्तिप्रदर्शक 'प्रतियोग्यवृत्तिश्चे'तिग्रन्थ, वीप्साद्यभावेऽपि प्राथम्येन व्याप्तेर्लाभसम्भवाद् वाच्यत्वाद्यवृत्तिधर्ममात्रस्यैव व्यधिकरणतया वाच्यत्वादिनिष्ठप्रतियोगिताया तन्मतेऽवच्छेदकतया यद्यप्यत्रान्वयदृष्टान्तदुर्भिक्षं तथापि व्यतिरेकेण वाच्यत्वादिनिष्ठोभयत्वादिकमेव दृष्टान्त सम्भवतीत्यदोष । अथवा यो यद्वृत्ति स न तदवच्छेदक इति सामान्यव्याप्तौ कारणत्वादिव्यधिकरणकारणत्वाद्यनवच्छेदक एवान्वयेन दृष्टान्त, प्रतियोगितावच्छेदकत्वविषयतावच्छेदकत्वोभयसाधारणावच्छेदकतात्वस्यैक्ये भ्रमविषयता यधिकरणतदवच्छेदकजतत्वादावुक्तसामान्यव्याप्तेर्भङ्गवारणाय विषयतान्यत्वेन यत्पदाथा विशेषणीय इत्याहु ।

अथ कालिकादिसम्बन्धेन पटादिवृत्तिघटत्वादे समवायादिना पटादिनिष्ठप्रतियोगितावच्छेदकत्वखण्डनाय तत्तत्सम्बन्धेन प्रतियोग्यवृत्तित्व तत्तत्सम्बन्धेन प्रतियोगितावच्छेदकत्वाभावसाधने पक्षतावच्छेदकतया हेतुतया वा विवक्षणीयम्, तथा च समवायादिसम्बन्धेन वाच्यत्वादिवृत्तित्वाप्रसिद्धयोक्तरीत्या समवायादिसम्बन्धेन घटत्वाद्यवच्छिन्नवाच्यत्वाभावखण्डनानुप

पत्तिः। न च प्रतियोग्यवृत्तित्वमित्यनेन प्रतियोगिनिष्ठावच्छेदकताघटकसम्बन्धावच्छिन्नाभावप्रतियोगित्वमेव विवक्षणीयम्, तथा च घटत्वादेरेव वाच्यत्वादिनिष्ठसमवायादिसम्बन्धावच्छिन्नाभावप्रतियोगितया नाप्रसिद्धिरिति वाच्यम्, अव्याप्यवृत्तेः संयोग्यभावप्रतियोगितावच्छेदकस्य प्रतियोगिनिष्ठाभावप्रतियोगितयोक्तधर्मस्य पक्षतावच्छेदकत्वे बाधस्य हेतुत्वे च व्यभिचारस्य दुर्वारत्वात् प्रतियोगिनिष्ठभेदप्रतियोगितायामवच्छेदकताघटकसम्बन्धेनावच्छेदकत्वस्य विवक्षणे व्यधिकरणसंयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावनिराकरणानुपपत्तिस्तेन सम्बन्धेन घटत्वादेर्भेदप्रतियोगितावच्छेदकत्वस्य वादिनोऽप्यनुमतत्वात्। एवं घटत्वादौ समवायादिसम्बन्धेन वाच्यत्वादिनिष्ठप्रतियोगितायामवच्छेदकत्वस्याभावः प्रतियोग्यप्रसिद्ध्या साधयितुमशक्यः। मैवम्, स्वप्रतियोगिकत्वयदनुयोगिकत्वोभयाभावबद्यादृशसम्बन्धसामान्यको यः स स्वनिष्ठत्वतत्सम्बन्धावच्छिन्नत्वोभयाभाववत्तन्निष्ठप्रतियोगितावच्छेदकतासामान्यक इत्यर्थविवक्षायामेव सामञ्जस्यात् संयोगादिसम्बन्धसामान्ये घटत्वादिप्रतियोगिकत्ववाच्यत्वाद्यनुयोगिकत्वोभयाभावसत्त्वात् प्रथमस्वपदेन घटत्वाद्युपादानस्य मतद्वय एव सम्भवात् तत्र स्वनिष्ठत्वसंयोगादिसम्बन्धावच्छिन्नत्वोभयाभावबद्वाच्यत्वादिवृत्तिप्रतियोगितावच्छेदकतासामान्यकत्वसाधने नोद्देश्यासिद्धिः।

'प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः' इति मूलग्रन्थस्य तथात्वे मानाभावादिति शेषः। ननु समवायित्वया वाच्यत्वं नास्तीत्याद्याकारक समवायित्वादेर्वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहिप्रत्यय एव मानमित्युक्तहेतोरसिद्धयाशङ्कायामाह तद्विशिष्टज्ञानस्येति। अत्र च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावलौकिकप्रत्यक्षत्वावच्छिन्नहेतुत्वादित्यर्थः। यद्यप्यन्यथा घटनिर्विकल्पकानन्तरं घटाभावप्रत्ययापत्तेरिति मूलदर्शितयुक्त्या वाच्यत्वं न समवायीतिविशेषदर्शनप्रतिबध्यवाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानपर्यन्तापेक्षा समवायित्वावच्छिन्नवाच्यत्वाभावप्रत्यक्षे नायाति, तथापि स्वतन्त्रमहानसीयत्ववह्नित्वादिप्रकारकज्ञानान्महानसीयवह्निर्नास्तीति बुद्ध्यनुदयान्महानसीयवह्निर्नास्तीत्यभावबुद्धौ महानसीयवह्नित्वावच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितावगाहिन्यां यथा महानसीयत्वप्रकारेण वह्नित्वावच्छिन्नविषयकज्ञानं हेतुस्तथा समवायितया वाच्यत्वं नास्तीत्यादिबुद्धेर्वाच्यत्वादिनिष्ठप्रतियोगितायां समवायित्वाद्यवच्छिन्नत्वावगाहित्वे समवायित्वादिना वाच्यत्वत्वाद्यवच्छिन्नधर्मिकज्ञानमपेक्षितम्, तथा च वाच्यत्वं न समवायीतिविशेषदर्शनदशायामप्यनुभूयमाना तथाकारा प्रतीतिः कथमुपपद्येत। तस्या वाच्यत्वाद्यनुयोगिकसमवायित्वाभावावलम्बनत्वोपगमे सर्वत्रैव तथात्वमुपेयतामिति गतं व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वेनेत्यभिप्राय इति मिश्रानुसारिव्याख्यानम्, तत्रेयमनुपपत्तिरवतरति, तद्धर्मावच्छिन्नतन्निष्ठप्रतियोगिताकाभावबुद्धौ

तद्धर्मप्रकारकतज्ज्ञानत्वेन हेतुत्वासम्भवो घटत्वेन यत्किञ्चिद्घटज्ञानादपि यावद्घटप्रतियोगिकसामान्याभावबुद्ध्युत्पत्त्या व्यभिचारात् सम्भवेऽपि वा दर्शितविशेषदर्शनकाले निर्धर्मितावच्छेदककवाच्यत्वादिधर्मिकसमवायित्वादिभ्रमसम्भवेन व्यधिकरणधर्मावच्छिन्नाभावप्रतीतिनिर्वाहात्ताद्दशकारणताया अकिञ्चित्करत्वात् । न च वह्नित्वधर्मितावच्छेदककमहानसीयत्वप्रकारकबुद्धिं विना विश्रृङ्खलमहानसीयत्ववह्नित्वप्रकारकज्ञानसत्त्वेऽपि महानसीयवह्नित्वाद्यवच्छिन्नाभावप्रत्यक्षानुत्पत्त्या तद्धर्मसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तद्धर्मावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानत्वेन हेतुता वाच्येति वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं विना न समवायित्वाद्यवच्छिन्नवाच्यत्वत्वसमानाधिकरणप्रतियोगिताकाभावभानसम्भव इति वाच्यम्, महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगितायां द्रव्यत्वादेरपि सामानाधिकरण्यादुक्तकार्यकारणभावोपगमे द्रव्यत्वाद्यवच्छिन्नधर्मिकमहानसीयवह्नित्वप्रकारकज्ञानस्यापि ताद्दशप्रतियोगिताकाभावबुद्धावपेक्षणीयतापत्तेः । अथ तद्धर्मवद्वृत्तित्वेन भासमानप्रतियोगित्वे तद्धर्मावच्छिन्नत्वावगाहिन्यामभावबुद्धौ तद्धर्मावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानत्वेन हेतुता महानसीयवह्निर्नास्तीत्यत्र च वह्नित्वावच्छिन्ननिष्ठत्वेन संसर्गघटकतया भासमानप्रतियोगित्वे महानसीयत्वावच्छिन्नत्वं भासते स्वावच्छिन्नवह्निवृत्तिप्रतियोगिताकत्वस्याभावांशे प्रतियोगिविशेषणतापन्नमहानसीयत्वस्य सम्बन्धत्वादिति तत्र वह्नित्वावच्छिन्नधर्मिकमहानसीयत्वप्रकारकज्ञानस्यापेक्षा न तु धर्मान्तरावच्छिन्नधर्मिकस्य धर्मान्तरविशेषितवह्निवृत्तित्वेन तत्र प्रतियोगिताया अभानादिति चेत्, तर्हि प्रतियोगितावच्छेदकप्रकारकज्ञानमन्तरेणाप्यभावप्रत्यक्षसामान्यापत्तिः प्रत्यक्षविशेष एव तद्धेतुतायाः स्वीकृतत्वादेवमप्यनतिप्रसङ्गेन प्रतियोगिविशेषिताभावबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानमुद्रया प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वादेव निर्वाहे स्वतन्त्रतद्धेतुताया निर्बीजत्वापाताच्च । अस्तु वा एताद्दशरीत्यैव हेतुहेतुमद्भावस्तथापि समवायितया वाच्यत्वं नास्तीत्यत्र वाच्यत्वत्वसामानाधिकरण्यविशेषितस्वावच्छिन्नप्रतियोगिताया एव समवायित्वसंसर्गघटकतया भानोपगमसम्भवेन वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानस्यात्रानपेक्षणीयत्वमुपपद्यत इति ।

अत्रेदं समाधानमवधेयम्, तदुभयधर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तदुभयैकतरधर्मावच्छिन्नधर्मिकतदन्यतरप्रकारकज्ञानत्वेन हेतुता समवायितया वाच्यत्वाभावस्य च व्यधिकरणसमानाधिकरणयोः समवायित्ववाच्यत्वत्वोभयोरेव प्रतियोगितावच्छेदकत्वपर्याप्तिरवश्यमङ्गीकार्या समवायित्वमात्रस्य प्रतियोगितावच्छेदकत्वे वाच्यत्वत्वप्रकारकज्ञानमन्तरेणापि ताद्दशाभावप्रतीत्यापत्तेः । अत्र समवायितया वाच्यत्वं नास्तीतिप्रतीत्या समवायित्ववाच्यत्वत्वोभयपर्याप्तप्रतियोगितावच्छेदकत्वानवगाहने तस्याः समवायि-

वाच्यत्ववदिदमितिभ्रमविरोधित्वानुपपत्तेश्च तं प्रति समवायितया प्रमेयत्ववाच्यत्वोभयं नास्तीतिनिश्चयव्यावृत्तेन तदुभयांशे प्रतियोगितावच्छेदकतापर्याप्त्यवगाहिनिश्चयत्वेनैव प्रतिबन्धकत्वात्। न च विलक्षणवाच्यत्वप्रकारतानिवेशनादेव दर्शितनिश्चयव्यावृत्तिसम्भवे तदुभयांशेऽवच्छेदकत्वपर्याप्त्यवगाहित्वमप्रयोजकमिति वाच्यम्, यतस्तद्धर्मेऽभावप्रतियोगितावच्छेदकत्वपर्याप्तिस्तदवच्छिन्नस्याभावविरोधित्वप्रयोजिका तदवगाहित्वमेवाभावबुद्धेस्तदवच्छिन्नविशिष्टज्ञानप्रतिबन्धकतायां तन्त्रं समवायितया वाच्यत्वप्रमेयत्वोभयं नास्तीतिप्रतीते समवायित्ववाच्यत्वत्वोभयविशिष्टवत्ताबुद्ध्यप्रतिबन्धकत्वेऽप्युभयांशे प्रतियोगितावच्छेदकतापर्याप्त्यनवगाहित्वमेव बीजं तस्य च समवायितया वाच्यत्वं नास्तीतिधीसाधारण्ये तस्यास्तादृशविशिष्टधीप्रतिबन्धकत्वं न तूक्तोभयाभावबुद्धेरिति विशेष एव नोपपद्येत इति। यदि चैतस्या प्रतीतेः प्रतिबन्धकत्वं नान्यस्या इत्यत्र विषयतावैचित्र्यमात्रं बीजमास्थीयते तदा समानाधिकरणधर्मावच्छिन्नाभावविषयिण्या घटो नास्तीत्यादिबुद्धेरपि प्रतियोगितावच्छेदकत्वावगाहित्वं विलोप्यतां न हि तत्र घटत्वादिविशिष्टधीप्रतिबन्धकत्वानुरोधमन्तरेण युक्त्यन्तरं परिस्फुरति, स च भवतामकिञ्चित्कर एव, कपालसमवेतद्रव्यं नास्ति नीलो घटो नास्तीत्यादिप्रतीतिव्यावृत्तप्रकारताविशेषस्यैव तादृशधीप्रतिबन्धकतावीजत्वसम्भवात् तथा च तत्रैव समवायितया वाच्यत्वं नास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धावपि वाच्यत्वत्वांशे प्रतियोगितावच्छेदकत्वावगाहनमशक्यापह्नवमेवेति वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानमन्तरेण न तत्सम्भवः।

अथ यत्त्वतत्त्वाननुगमेन प्रतियोगितावच्छेदकभेदेन तत्प्रकारकज्ञानहेतुताभेदस्यावश्यकतया महानसीयत्ववह्नित्वादिरूपसमानाधिकरणधर्मावच्छिन्नाभावप्रत्यक्षं प्रत्येकैकधर्मावच्छिन्नविशेष्यकापरधर्मप्रकारकज्ञानत्वेन हेतुता वाच्या न तु व्यधिकरणसमवायित्वसमानाधिकरणवाच्यत्वत्वाद्युभयधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे, समवायित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रत्यक्षं प्रति समवायित्वादिप्रकारकज्ञानत्वेन क्लृप्तकारणतयैव तन्निर्वाहादिति न तत्र वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानापेक्षेति चेन्न, 'प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभावप्रतीत्याऽवगाह्यते न तु स्वातन्त्र्येण' इति नियमेन समवायितया वाच्यत्वं नास्तीत्याकारिकाया एव व्यधिकरणधर्मावच्छिन्नाभावप्रतीतेरुपगन्तव्यतया समवायित्वविशिष्टवाच्यत्वत्वावच्छिन्नवैशिष्ट्यावगाहिन्यां तादृशबुद्धौ तु वाच्यत्वं समवायीति विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्यापेक्षिततया विपकलितसमवायित्वादिप्रकारकज्ञानदशायां तादृशाभावप्रत्यक्षस्यानुत्पत्त्या तदानीं तदापत्तिवारणाय तादृशाभावप्रत्यक्षेऽपि वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानहेतुताया आवश्यकत्वादिति। अत्र च यथा विशिष्टवैशिष्ट्यबोधं

प्रति विशेषणतावच्छेदकप्रकारकधीहेतुत्वमनङ्गीकुर्वतां घटत्वादिनिर्विकल्पकाद् घटाद्यभावविषयकस्य घटो नास्तीत्यादिप्रत्यक्षस्योपगमस्तथा निर्धर्मितावच्छेदककसमवायित्वादिप्रकारकज्ञानादपि समवायित्वाद्यवच्छिन्नवाच्यत्वाद्यभावविषयकस्य समवायिवाच्यत्वं नास्तीतिप्रत्यक्षस्योपगमसम्भवाद् घटत्वादिप्रकारकज्ञानत्वेन वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन च प्रतियोगिज्ञानस्याभावप्रत्यक्षहेतुता न सिध्यतीति विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानहेतुतामतमाश्रित्यैवोक्तरीत्याऽभावलौकिकत्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य कारणतया तादृशकारणबाधेन व्यधिकरणधर्मावच्छिन्नाभावाप्रत्ययादिति मूलं व्याख्येयम्, तच्चानुचितम्, उक्तविशेषकारणताकल्पनोपजीव्यविशिष्टवैशिष्ट्यबोधसामान्यहेतुताश्रयविशेषणतावच्छेदकविशिष्टविशेषणज्ञानाभावस्यैव दर्शयितुमुचितत्वात्, अतो मूले 'हेतुत्वात्'इत्यस्यापेक्षणीयत्वादित्यर्थः, इत्याशयेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधियाऽपेक्षणे विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकविशिष्टविशेषणज्ञानकारणत्वमेव हेतुत्वेनाभिप्रेतमित्याह । तथा च जन्यतायामभावविषयकत्वावच्छिन्नत्वमविवक्ष्यमिति विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्य विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नाभावधीनिष्ठजन्यताप्रतियोगीभूतस्याभावेन समवायितया वाच्यत्वं नास्तीत्यादिप्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावावगाहित्वासम्भव इत्यर्थपरतया तद्व्याख्यानमेवोचितं न तु विशिष्टवैशिष्ट्यबोधहेतुतायामुपजीव्यकल्प्यहेतुत्वान्तरपरतयेत्याशयेनाह दीधितौ विशेषणतावच्छेदकेति। अयंभावः वाच्यत्वं समवायीति ज्ञानमन्तरेण समवायिवाच्यत्ववानयमिति विशिष्टवैशिष्ट्यबोधानुत्पत्त्या वाच्यत्वत्वावच्छिन्ननिरूपितत्वेन भासमानवैशिष्ट्ये समवायित्वावच्छिन्ननिरूपितत्वावगाहिज्ञाने वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन हेतुताकल्पनमावश्यकं समवायितया वाच्यत्वं नास्तीतिव्यधिकरणधर्मावच्छिन्नाभावबुद्धेरपि वाच्यत्वत्वावच्छिन्नीयत्वेन भासमानेऽनुयोगितारूपवैशिष्ट्ये समवायित्वावच्छिन्नीयत्वावगाहितया तत्र तादृशज्ञानमवश्यमपेक्षणीयमिति । ननु वैशिष्ट्यांशे वाच्यत्वत्वनिष्ठधर्मितावच्छेदकतानिरूपकविशेषणतापन्नसमवायित्वावच्छिन्नप्रतियोगिताकत्वावगाहिबुद्धावेव तदवच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं हेतुर्व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ च वाच्यत्वत्वावच्छिन्ने समवायित्वस्य विशेषणत्वं नोपेयतेऽपि तु तद्विशेषणतानापन्नस्यैव तस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाभावांशे विशेषणत्वमुपेयते वाच्यत्वसंसर्गतावच्छेदकतयैव वा तथाविधतदवच्छिन्नत्वस्य प्रतियोगितांशे भानमुपेयते तथा च तत्र नोपदर्शितज्ञानापेक्षेत्याशङ्कां परिजिहीर्षुर्भावं व्याचष्टे अभावप्रत्ययो हीति । 'विशेषणस्य' प्रतियोगिघटादिनिरूपितविशेषणतापन्नस्य घटत्वादेः, प्रतियोगितावच्छेदकत्वमवगाहते, प्रतियोगितया भासमानघटादिनिरूपितविशेष-

णत्वावच्छिन्ना या स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्ना घटत्वादिनिष्ठप्रकारता तच्छालो भवतीति यावत्। 'न तु स्वातन्त्र्येण' न प्रतियोगिविशेषणत्वेन, घटत्वादे: प्रतियोगितावच्छेदकत्वमवगाहते इत्यनुषङ्गेणान्वयः, तादृशसम्बन्धावच्छिन्नघटत्वादिनिष्ठप्रकारता प्रतियोगिनिरूपितप्रकारतानवच्छिन्ना न भवतीत्यर्थः। घटो नास्तीत्येवेत्यभावांशे स्वातन्त्र्येण घटत्वादिवैशिष्ट्योल्लेखरहिताया एवेत्यर्थः। 'प्रतीतेः' अनुभवादिति शेषः। एतावता किमायातमित्यत आह तदिहेति। 'अवच्छिन्नं' विशेषितम्, 'तस्यापि प्रतियोगितावच्छेदकत्वं' तस्य प्रतियोगितावच्छेदकत्वमपि, तथा च मानाभावेन व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वासिद्धिरिति भावः। अथ व्यधिकरणधर्मस्य प्रतियोगिविशेषणतयैव व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ भानमुपेयते। न चैवं सति तादृशबुद्धेः समवायित्वादिरूपविशेषणतावच्छेदकप्रकारकवाच्यत्वादिज्ञानजन्यतावच्छेदकाक्रान्ततया तादृशज्ञानं विना व्यधिकरणधर्मावच्छिन्नाभावबुद्ध्यनुपपत्तिरिति वाच्यम्, भ्रमात्मकतादृशज्ञानदशायामेव तद्बुद्ध्युपगमाद्विशेषदर्शनदशायामप्याहार्यतत्प्रकारकज्ञानसम्भवादनाहार्यस्यैव विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वे विशेषदर्शनकालीनायाः समवायितया वाच्यत्वं नास्तीत्यादिबुद्धेरगत्या वाच्यत्वाद्यधिकरणकसमवायित्वाद्यभावावगाहित्वमुपेयते, वाच्यत्वं समवायीत्यादिभ्रमानन्तरं समवायिवाच्यत्वं नास्तीत्याकारकप्रत्यय एव व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वे मानमास्तां तत्र तदवगाहितायाः सर्वानुभवसिद्धत्वेनापह्नोतुमशक्यत्वात्, तादृशप्रतीतेर्वाच्यत्वे समवायित्वाभावावगाहित्वोपगमे तत्पूर्वं वाच्यत्वं समवायीतिभ्रमापेक्षानुपपत्तेरित्याशयेनाशङ्कते अथावगाहत इति। समाधत्ते तर्हि भ्रम एवेति। व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वांशेऽपि भ्रम एवेत्यर्थः, वैशिष्ट्यभानएवावच्छेदकताया भानादवच्छेदकताया वैशिष्ट्यनियततया तद्बाधे तस्या अपि बाधादिति भावः। न चैवं 'गवि शशशृङ्गं नास्तीतिप्रतीतेरसिद्धेः' इति मूलासङ्गतिस्तादृशप्रतीतेः शृङ्गांशे शशीयत्वावगाहित्वानभ्युपगमे शशीयत्वे शृङ्गनिष्ठप्रतियोगितावच्छेदकत्वावगाहनासम्भवात्तदवगाहित्वे भ्रमत्वादुभयथापि व्यधिकरणधर्मावच्छिन्नाभावासाधकत्वात्तादृशप्रतीतिनिराकरणस्यानुपयुक्तत्वादिति वाच्यम्, अभ्रान्तानामपि गवि शशशृङ्गं नास्तीति व्यवहारमूलप्रतीतिसत्त्वेनोक्तनियमस्यैवासिद्ध्या व्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव तादृशप्रतीतेर्गोशृङ्गाधिकरणकशशीयत्वाभावावगाहित्वोपगमे तस्या गवाधिकरणकाभावावगाहितायामनुभवविरोध इत्याशङ्कामुत्थाप्याभ्रान्तपुरुषीयगवाधिकरणकाभावावगाहितादृशाभावप्रतीतिनिराकरणपरतया तद्ग्रन्थस्यावतारणीयत्वात्। नन्वभ्रान्तानां गवि शशशृङ्गं नास्तीति प्रतीतिर्माभूच्छशशृङ्गं नास्तीतिप्रतीतिर्नापह्नोतुं शक्यते सर्वेषामेव यथाविधव्यवहारदर्शनादित्याशङ्कायां शशशृङ्गं नास्तीत्यादिमूलावतारो बोध्यः।

यद्यपि शशशृङ्गं नास्तीति शब्देन शशे शृङ्गाभाव इत्याकारकः शाब्दबोधो न शक्यते जनयितुमनुयोगिवाचकपदोत्तरं सप्तमीविरहेण निराकाङ्क्षत्वात्तथापि पदार्थोपस्थित्यादिमूलकैतादृशमानसबोधजननेच्छया व्युत्पन्नानां तथा प्रयोग इत्याशयः। ननु घटत्वेन घटो नास्तीत्याकारकस्याभावप्रत्ययस्यानुभविकतया प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभावप्रत्ययोऽवगाहत इति न नियमस्तादृशप्रतीत्या स्वातन्त्र्येण भासमाने घटत्वादौ प्रतियोगितावच्छेदकत्वावगाहनात्, अन्यथा घटत्वेनेत्याकारकतानुपपत्तेः, तथा च घटत्वेन पटो नास्तीत्यादावपि घटत्वादौ पटादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहनं निराबाधमेवेति व्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव। न च तत्र व्यधिकरणधर्मस्यावच्छेदकत्वावगाहनसम्भवेऽप्यतिरिक्ताभावकल्पनागौरवभयेन तादृशप्रतीतेः पटाद्यधिकरणकघटत्वाभावावगाहित्वमेव स्वीक्रियत इति वाच्यम्, असति बाधके तच्छब्दोल्लेखिप्रतीतेस्तच्छब्दप्रतिपाद्यार्थविषयकत्वापरित्यागात्, घटाद्यधिकरणकघटत्वाद्यभावस्य च घटत्वेन पटो नास्तीत्यादिशब्दात्कथमप्यप्रतीतेः प्रतीतिबलात्पदार्थान्तरसिद्धौ तत्पदार्थकल्पनागौरवस्य फलमुखत्वेनाबाधकत्वात्। न च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणबाधेन तादृशप्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावावगाहिता न सम्भवतीति युक्तम्, पटत्वाद्यवच्छिन्नधर्मिकघटत्वादिप्रकारकप्रतियोगिज्ञानहेतुतायां मानाभावात् तादृशज्ञानं विनैव घटत्वेन पटो नास्तीत्याकारकस्य घटत्वादिविशिष्टपटादिवैशिष्ट्यानवगाहिनोऽभावप्रत्यक्षस्य स्वीकारात्। वस्तुतस्तु कुत्राप्यभावबुद्धौ स्वातन्त्र्येण प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य हेतुता नास्ति। न च तदकल्पने प्रतियोगिज्ञानशून्यकाले नास्तीत्याकारकप्रतियोग्यविषयकाभावप्रत्यक्षस्य घटत्वादिनिर्विकल्पकानन्तरं विशेष्ये विशेषणमितिरीत्या घटाभावप्रत्यक्षस्यापत्तिरिति वाच्यम्, प्रतियोगिज्ञानहेतुतामतेऽप्यभावे प्रतियोगितया घटादिरूपप्रतियोगिज्ञानविरोधिबाधादिग्रहसत्त्वे प्रतियोग्यविषयकाभावग्रहापत्तेर्दुर्वारत्वात्। यदि च निर्धर्मितावच्छेदकप्रतियोगिभाने बाधकाभावात् प्रतियोग्यविषयकाभावप्रत्ययो नापादयितुं शक्यते, तथापि तादृशबाधग्रहदशायां प्रतियोगिधर्मितावच्छेदकतानापन्नाभावत्वप्रकारकस्य स्वातन्त्र्येण ग्रहदशायां प्रतियोगिधर्मितावच्छेदकतानापन्नाभावत्वप्रकारकस्य स्वातन्त्र्येण प्रतियोगिविषयकस्य 'नास्ति घटीयश्च' इत्याद्याकारकसमूहालम्बनप्रत्यक्षस्यापत्तिः, एवं घटत्वावच्छिन्नप्रतियोगिताकाभावस्य यदा भानं तदा निर्विकल्पकोपस्थितद्रव्यत्वादेर्विशेष्ये विशेषणमितिरीत्या घटाद्यंशे भानापत्तिः कारणबाधेन न शक्यते वारयितुं तादृशाभावस्य द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकत्वविरहेण तद्भाने द्रव्यत्वादिप्रकारकज्ञानस्यानपेक्षणात्। यदि च यादृशप्रकारतापन्ने धर्मे स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नधर्म्यन्तरनिरूपितप्रकारतातदन्यप्रकारतानिरूपितविशेषणविषयतानिरूपितसंसर्गतास-

म्बन्धेन भानं प्रत्यभावीयानुयोगिताविशेषभेदस्य कारणतां कल्पयित्वेदृशोपपत्तिः प्रतियोगिप्रकारतानिरूपितधर्मितावच्छेदकतापर्याप्तवृत्तिप्रकारताविशेषसम्बन्धेन लौकिकप्रत्यक्षं प्रत्यभावत्वभेदस्य कारणतां कल्पयित्वा च पूर्वापत्तिर्वार्यते तदा तावतैव सकलापत्तिवारणादलं प्रतियोगिज्ञानहेतुतया। न चैवमपि प्रतियोग्यविषयकस्याभावत्वाप्रकारकप्रत्ययस्यापत्तिर्विना प्रतियोगिज्ञानहेतुतां न शक्यते वारयितुमिति वाच्यम्, प्रतियोगिज्ञानं विना प्रतियोग्यविषयकस्येदन्त्वादिनाऽभावप्रत्यक्षस्येदन्त्वादिरूपतादृशविशेषणज्ञानासत्त्वे च तादृशस्याभावनिर्विकल्पकस्येष्टत्वादभावनिर्विकल्पकानभ्युपगमे प्रतियोगिज्ञानहेतुतयाऽपि तद्वारणासम्भवादिदन्त्वादिनाऽभावप्रत्यक्षे व्यभिचारवारणायाभावत्वप्रकारकाभावप्रत्यक्षं प्रत्येव प्रतियोगिज्ञानस्य हेतुताया आवश्यकत्वात्, विशेषणानवच्छिन्नविषयतासम्बन्धेन प्रत्यक्षं प्रत्यभावभेदस्य हेतुतां स्वीकृत्य तद्वारणे च मयापि तस्य तथैव वारणीयत्वात्।

वस्तुतस्तु आपाद्याप्रसिद्ध्यैव तादृशफलापत्त्यनवकाशः प्रसिद्धाया घटो नास्तीत्यादिबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र प्रतियोगितावच्छेदकघटत्वादिप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविधया हेतुतायाः क्लृप्तत्वात्तादृशकारणविरहादेव न तच्छून्यकाले तदापत्तिः।

यत्तु अनाहार्यप्रतियोगितावच्छेदकविशिष्टप्रकारकोपलम्भविरहो विशेष्यीभूततत्तद्धर्मिप्रत्यासन्नोऽभावग्रहे हेतुः, तथा च यस्य पुंसः समवायित्वादिविशिष्टवाच्यत्वादिप्रकारकोऽनाहार्यभ्रमोऽप्रसिद्धस्तदीयः समवायितया वाच्यत्वं नास्तीत्याकारकप्रत्ययो न व्यधिकरणधर्मावच्छिन्नाभावमवगाहितुमीष्टे तदीयतादृशप्रतियोग्युपलम्भविरहरूपतदीयाभावप्रत्यक्षकारणस्यासिद्धेरिति तत्पुरुषीयतादृशप्रत्ययस्य वाच्यत्वाद्यनुयोगिकसमवायित्वाद्यभावविषयकत्वावश्यकत्वे सर्वैरेव तादृशप्रकारत्वमुचितमेकाकारप्रतीतेः पुरुषभेदेन विषयतावैचित्र्यानुचितत्वादिति मिश्रोक्तव्यधिकरणधर्मावच्छिन्नाभावनिराकरणपन्थाः सोऽपि न साधीयान्। अभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्त्वोपलम्भत्वेनैककारणतायाः स्वत्वाननुगमेन दुर्वचतया विशिष्य कल्पनस्यावश्यकत्वे यत्र तादृशोपलम्भप्रसिद्धिस्तत्रैव तादृशोपलम्भानन्तरमभावप्रत्ययवारणाय तदभावहेतुत्वोपगमाद्व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ क्वचिदप्रसिद्ध्या तदभावहेतुत्वासम्भवेऽपि सन्निकर्षादिघटितसामग्रीतस्तदुत्पत्तौ बाधकाभावादित्यत आह यदि पुनरिति। 'स्वरसवाही' विवादशून्यः, घटत्वेन घटो नास्तीति पाठः, घटत्वेन पटो नास्तीति पाठो न साधुस्तादृशप्रतीतेः पटाद्यनुयोगिकघटत्वाद्यभावावगाहिताया एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगन्तृभिरुपगमात् प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वं भासत इति नियमस्य तदाकारप्रतीतिबलेनाशक्यवारणत्वात्, 'आनुभविकः' इत्यस्य ,व्यधिकरणधर्मस्यावच्छेदकत्वावगाहितयाऽनुभवसिद्ध इत्यर्थकतया वा कथञ्चित्सङ्गमनीयः,

'गीर्वाणगुरूणामपि न शक्यम्' इत्यनेन प्रतीतिकारणबाधेन तादृशाभावनिराकरणतावन्तो मिश्रादय आक्षिप्ताः । 'यदि' 'तदा'इत्यनेन तादृशप्रतीतेरानुभविकत्वे विवादं प्रदर्श्य तादृशाभावस्यापारमार्थिकत्वं सूचितम् ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचिता व्यधिकरण-
धर्मावच्छिन्नाभावदीधितिविवृतिः समाप्ता ॥

अनुमानगादाधर्याम्

पूर्वपक्षप्रकरणम् ।

(चि०) अथ साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्तिः केवलान्वयिनि साध्यासामानाधिकरण्यं निरधिकरणे आकाशादौ प्रसिद्धमिति चेन्न ।

(दी०) साध्येति । साध्यस्यासामानाधिकरण्यं येषु तेषामनधिकरणत्वं तदभाववत्त्वमिति यावत् तस्मिन् सति साधिकरणत्वं तदवच्छिन्नाधिकरणताकत्वं सतिसप्तम्यावच्छेदकत्वलाभात्, तच्चेहान्यूनवृत्तित्वम्, एवञ्च साध्यवदवृत्तिसकलपदार्थाभाववत्त्वं यदधिकरणताया अन्यूनवृत्ति तत्त्वमिति तु फलितार्थः ।

(गा०) साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वमितिलक्षणे दलयो सामानाधिकरण्यं सतिसप्तम्यर्थं । तत्र विशेष्यदलमवृत्तिहेतुकातिव्याप्तिवारणपरमिति यथाश्रुतव्याख्यानं न साधु, अवृत्तौ साध्याधिकरणावृत्तित्वसत्त्वात् साध्यासामानाधिकरण्यपदस्य साध्यानधिकरणाधिकरणकत्वाद्यर्थकतायामेव विशेषणदलस्यावृत्तिसाधारण्यसम्भवात्, तथा च सत्येतादृशसाध्यासामानाधिकरण्यस्याप्रसिद्ध्या केवलान्वयिन्यव्याप्ते । अथ साध्यासामानाधिकरण्यं नोक्तरूपं किं तु साध्याधिकरणानधिकरणत्वरूपं तदनधिकरणत्वमप्यवृत्तिसाधारणमधिकरणाप्रसिद्ध्या तदनधिकरणाप्रसिद्धेरवृत्तौ तदसत्त्वादिति चेत्, एवमपि 'केवलान्वयिनि'इत्यादि ग्रन्थविरोध, तेन ग्रन्थेन गगनादौ साध्यासामानाधिकरण्यप्रसिद्धिदर्शनात् साध्याधिकरणयत्किञ्चिदनधिकरणके साध्यन्यूनवृत्तिहेतावव्याप्तिवारणाय साध्याधिकरणसामान्यानधिकरणत्वविवक्षणस्यावश्यकतया वृत्तिमत्यपि केवलान्वयिसामाधिकरण्यप्रसिद्ध्यसम्भवात्तत्साध्यकेऽव्याप्ते साध्यसमानाधिकरणे व्यभिचारिण्यतिव्याप्तेश्चेत्यालोच्य लक्षणमन्यथा व्याख्यातुमुपक्रमते साध्यस्यति । साध्यपदासामानाधिकरण्यपदयोर्बहुव्रीहिबलात्साध्यासमानाधिकरणलाभ, तदनधिकरणत्वं यदि तदधिकरणत्वाभावस्तदा केवलान्वयिन्यवृत्तेरेव साध्यवदवृत्तितया तदनधिकरणत्वाप्रसिद्ध्याऽव्याप्तिरतोऽनधिकरणपदमभाववदर्थकतया व्याचष्टे तदभाववत्त्वमिति । सतिसप्तम्या-सामानाधिकरण्यार्थकतया तदभाववत्त्वसमानाधिकरणसाधिकरणत्वस्य निवक्षितत्वे धूमादिहेतौ वह्न्याद्यसमानाधिकरणधूमत्वादिसत्त्वादव्याप्तिरत आह

तदवच्छिन्नेति । अवच्छेद्यावच्छेदकभाव कुतो लभ्यत इत्याशङ्कायामाह सतिसप्तम्येति । 'अनधिकरणत्वे सति'इत्यत्र या सप्तमी तयेत्यर्थः । अवच्छेदकत्वलाभादिति । तदभावत्वरूपप्रकृत्यर्थेऽधिकरणतानिरूपकत्वरूपसमभिव्याहृतसाधिकरणत्वपदार्थैकदेशाधिकरणतानिरूपकतावच्छेदकत्वलाभादित्यर्थः । अवच्छेदकत्वञ्चेदनतिरिक्तवृत्तित्वरूपं विवक्ष्यते तदा विषमव्याप्ते धूमादावव्याप्तिर्वह्न्याद्यसमानाधिकरणपदार्थाभावस्य हेतुशून्यसाध्याधिकरणसाधारणस्य हेत्वतिरिक्तवृत्तित्वात् साध्यव्यापके व्यभिचारिण्यतिव्याप्तिश्च तत्र साध्यसमनियतस्य साध्यासमानाधिकरणपदार्थाभावत्वस्य हेत्वनतिरिक्तवृत्तित्वादत आह तच्चेहेति । 'अन्यूनवृत्तित्वं' व्यापकत्वम्, समुदितार्थमाह साध्यवद्वृत्तीति । साध्यानधिकरणाधिकरणत्वरूपं साध्याधिकरणानधिकरणकत्वरूपञ्च साध्यासामानाधिकरण्यं केवलान्वयिसाध्यके न प्रसिद्ध्यतीति साध्यासामानाधिकरण्यपदस्य साध्यवद्वृत्तित्वार्थकता स्फुटीकृता, धूमवद्वृत्तिहृदत्वाद्यभावस्य वह्निव्यापकत्वादतिव्याप्तिरतः साध्यवद्वृत्तयो ये ये पदार्थास्तदभावकूटलाभाय सकलेति । इत्थञ्च साकल्यावच्छिन्नतावत्पदार्थाभावस्य केवलान्वयित्वेऽपि न क्षतिः । साध्यवद्वृत्तित्वावच्छिन्नप्रतियोगिताकैकसामान्याभावश्च निवेशयितुमशक्यः । येन येन सम्बन्धेन यस्य साध्यवद्वृत्तित्वं तत्तत्सम्बन्धावच्छिन्नतदभावस्य निवेशनीयत्वात्, प्रतियोगितावच्छेदकसम्बन्धाद्यननुगमेनाभावैक्यासम्भवात् । विशेषणताविशेषसम्बन्धमात्रनिवेशपक्षे तु तदननुगमविरहादेक एव सामान्याभावो निवेशनीयः । साध्यपदं साध्यतावच्छेदकविशिष्टपरमतो विशिष्टसत्तावान् जातेरित्यादौ गुणत्वादेः शुद्धसाध्यवद्वृत्तित्वेऽपि न क्षतिः । तद्वृत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम्, तेन समवायेन वह्नौ साध्ये पर्वतत्वादेर्वह्निसंयोगिवृत्तित्वेऽपि संयोगेन हेतौ धूमे नातिव्याप्तिः । यत्पदं हेतुतावच्छेदकविशिष्टपरमतो द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः । तदधिकरणता हेतुतावच्छेदकसम्बन्धेन बोध्या तेन समवायादिना धूमाधिकरणताया निर्वह्निसाधारण्येऽपि नाव्याप्तिः ॥

(दी०) यथासन्निवेशेऽधिकरणत्वस्य न वैयर्थ्यं हेतुतावच्छेदकसम्बन्धलाभाय वा तत् । येन येन सम्बन्धेन यो यः साध्यवद्वृत्तिस्तेन तेन सम्बन्धेन तत्तदभावो बोध्यः । एतेन साध्यवद्वृत्तित्वं यदि साध्यतावच्छेदकसम्बन्धेन विवक्षितं तदा समवायेन साध्यतायां साध्यवदसमवेतस्य सार्वत्रिकत्वात् सकलतच्छून्यामसिद्धिः । अथ तदभावोऽपि तादृशेनैव सम्बन्धेन वाच्यस्तदा जातिमान् प्रमेयत्वादित्यादावतिव्याप्तिर्जातिमदसमवेतानां समवायेनाभावस्य केवलान्वयित्वादत एव न संयोगेन समवायेन वा, इदं न जातिमज्जातित्वादि-

त्यादौ साध्यवत्समवेताद्यप्रसिद्धेश्च। नापि साधनतावच्छेदकेन, इदमेतद्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तेः। नापि विषयतया, घटभिन्नं मेयत्वादित्यत्राप्यतिव्याप्तेः सविषयकमात्रस्यैव घटभिन्नविषयत्वात्, घटनिर्विकल्पकेऽपि घटत्वादिभानात्। नापि सम्बन्धमात्रेण, द्रव्यं सत्त्वादित्यादावतिव्याप्तेः। वृत्तिमन्मात्रस्यैव स्वरूपसम्बन्धेन महाकाले वृत्तेरवृत्तेरभावस्य च केवलान्वयित्वादिति प्रत्युक्तम्। विशेषणताविशेषेण वा साध्यवदवृत्तित्वं वक्तव्यं सर्वत्रैव तत्तद्व्यक्तित्वं तत्तदन्यान्यत्वे तत्प्रकारकप्रमाविषयत्वे वा तत्सुलभम्। तेनैव सम्बन्धेन तदवच्छिन्नसामान्याभावो वाच्य इति।

(गा०) ननु हेतुव्यापकतानिवेशेनैवोपपत्तौ तदधिकरणत्वनिवेशवैयर्थ्यमत आह यथासन्निवेश इति। यथोक्तविशेष्यविशेषणभावक्रमेण निवेश इत्यर्थः। न वैयर्थ्यमिति। हेतुविशेषितव्यापकतायाः प्रकृतलक्षणाघटकतया तद्घटितस्य लक्षणत्वसम्भवेऽपि न वैयर्थ्यावसरः, प्रकृतलक्षणघटकस्य तथात्वसम्भव एवाधिकांशवैयर्थ्यात्। ननु वैयर्थ्याभावेऽप्यनतिप्रयोजनकत्वं दुर्वारमेवेत्यत आह हेतुतावच्छेदकसम्बन्धेनेति। हेतुतावच्छेदकसम्बन्धेन हेतुं प्रति व्यापकताया लक्षणघटकत्वसूचनायेत्यर्थः। सम्बन्धसामान्येन हेतुं प्रति व्यापकताया निवेशे वह्न्यादेरपि धूमाद्यव्यापकतापत्तेरिति भावः। यत्किञ्चित्सम्बन्धेन साध्यवदवृत्तेर्यत्किञ्चित्सम्बन्धावच्छिन्नाभावनिवेशे धूमाद्यसमानाधिकरणायोगोलकत्वादेर्व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य वह्न्यादिव्यापकत्वादतिव्याप्तिः। साध्यतावच्छेदकादिसम्बन्धेन साध्यवदवृत्तित्वादिविवक्षणे च वक्ष्यमाणदोषाणां दुर्वारतेत्यालोच्य साध्यवदवृत्तितानिर्वाहकसम्बन्धाभावप्रतियोगितावच्छेदकसम्बन्धयोरैक्यं विवक्षति येन येनेति। संयोगादिनाऽयोगोलकत्वादेर्धूमादिमदवृत्तित्वात्तत्सम्बन्धावच्छिन्नतदभावस्य च वह्न्यादिव्यापकत्वादतिव्याप्तिरतः 'येन येन' इति वीप्सा। तत्तदभाव इति। संयोगादिसम्बन्धावच्छिन्नसाध्यवदसंयुक्तत्वाद्यवच्छिन्नसामान्याभावा एव यथायथं लक्षणघटकाः, न तु तत्तत्पदार्थानां तत्तद्व्यक्तित्वावच्छिन्नाभावाः, अनन्ताभावनिवेशप्रसङ्गादित्यवधेयम्। एतादृशविवक्षाप्रयोजनं दर्शयति एतेनेत्यादिना। साध्यतावच्छेदकसम्बन्धेनेति। अस्य चाभावप्रतियोगितया भासमानायां वृत्तावन्वयः। समवायेनेति। संयोगादीनामप्युपलक्षकम्। साध्यवदसमवेतस्येति। मेयत्वादेरिति शेषः। असमवेतपदमप्यसंयुक्ताद्युपलक्षणपरम्। सकलतच्छून्येति। साध्यवदवृत्तिसकलपदार्थाभावाप्रसिद्धिरित्यर्थः। एकसम्बन्धेन व्यभिचारनिरूपकाधिकरणवृत्तेरप्यपरसम्बन्धावच्छिन्नाभावस्य हेतुव्यापकतामादायातिव्याप्तिवारणाय साध्यवद-

वृत्तेः सम्बन्धसामान्येनाभावोऽवश्यं निवेशनीयः, संयोगसमवायस्वरूपादिनिष्ठसम्बन्धताविशेषाणां मिथो भिन्नत्वेऽपि सम्बन्धतात्वेनानुगतानां तन्निष्ठप्रतियोगितावच्छेदकसम्बन्धतावच्छेदकत्वे मानाभावात्। सामान्यविशेषभावेनावच्छेद्यावच्छेदकीभूतसम्बन्धतयोर्भेदेनात्माश्रयविरहात्, प्रत्येकं सकलसम्बन्धावच्छिन्नाभावकूट एव वा निवेश्य इत्यभिप्रायेणेदम्, अन्यथा मेयत्वादेरपि समवायादिनाऽभावप्रसिद्ध्याऽसङ्गत्यापत्तेः। तादृशेनैवेति। साध्यतावच्छेदकसम्बन्धेनैवेत्यर्थः। एवकारेण सम्बन्धसामान्यव्यवच्छेदः, तावतैव धूमवान् वह्नेरित्यादावतिव्याप्तिवारणसम्भवादयोगोलकीयवह्न्यादेः साध्यतावच्छेदकसम्बन्धेनाभावस्य हेत्वन्यूनवृत्तिताविरहादिति भावः। जातिमानिति। समवायेन जातित्वावच्छिन्नसाध्यके व्यभिचारिणीत्यर्थः। केवलान्वयित्वादिति। व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकत्वेनेत्यादिः, केवलान्वयित्वे सुतरामेव हेत्वन्यूनवृत्तित्वमिति तदभिधानम्। विशिष्य समवायादिसम्बन्धनिवेशनं निरस्यति अत एवेति। एतादृशातिव्याप्तेरेवेत्यर्थः, समवायेन संयोगेन वा साध्यवदवृत्तेस्तेनैव सम्बन्धेनाभावः शक्यनिवेश इति शेषः। जातिमदसंयुक्तस्य संयोगेनाभावस्यापि केवलान्वयित्वादिति भावः। एतत्पक्षद्वयेऽधिकामव्याप्तिमाह इदमिति। समवेतादीत्यादिना संयुक्तपरिग्रहः। साधनतावच्छेदकेनेति। सम्बन्धेनेति शेषः। 'साध्यवदवृत्ति' इत्यादिकमपि पूरणीयम्। एवमग्रेऽपि, जात्यादिसाध्यके व्यभिचारिणि स्वरूपसम्बन्धस्यैव साधनतावच्छेदकतया तेन सम्बन्धेन साध्यवदवृत्तिजातित्वादेस्तादृशसम्बन्धावच्छिन्नाभावस्य हेत्वव्यापकत्वान्नैतत्कल्पेऽतिव्याप्तिशङ्कावतारः। 'इदम्' इति पक्षनिर्देशः, 'एतत्' इत्यस्य पक्षनिर्देशताभ्रमपरिहाराय, तथा सति रूपत्वावच्छिन्नभेदस्य साध्यतालाभेन तादृशसाध्यवदसमवेतरूपत्वादेः प्रसिद्ध्याऽतिव्याप्त्यनवकाशात्। अतिव्याप्तेरिति। एतद्रूपमानसमवेताप्रसिद्ध्येतद्रूपभिन्नासमवेतस्य समवायरूपसाधनतावच्छेदकसम्बन्धावच्छिन्नाभावस्य व्यधिकरणसम्बन्धावच्छिन्नाभावतया केवलान्वयित्वादिति भावः। तद्घटादिमानसमवेतस्य रूपादेः प्रसिद्ध्या गुणरूपैकव्यक्तिविपक्षानुसरणम्। नापि विषयतयेति। व्यभिचारिणि साध्यवद्विषयकस्य व्यभिचारनिरूपकाधिकरणविषयकज्ञानादेर्विषयतासम्बन्धावच्छिन्नाभावमादायातिव्याप्तिनिराकरणासम्भवाच्छङ्कावतारः। 'घटभिन्नं मेयत्वादित्यत्रापि' इत्यपिना पूर्वोक्तस्थलपरिग्रहः। घटभेदसाध्यकस्य नानाव्यक्तिविपक्षकत्वं द्रव्यविपक्षकत्वञ्च पूर्वोक्तस्थलाद्विशेष इति। पूर्वकल्पापेक्षयैतत्पक्षस्यातिद्वेयतासूचनायेव तस्याधिकस्य प्रदर्शनमतिव्याप्तिर्बीजम्, विषयतया साध्यवदवृत्तेस्तत्सम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वं दर्शयति मन्निपयकेति। मात्रपदं कृत्स्नपरम्। घटभिन्नविषयकत्वादिति। घट इत्याद्याकारस्य घटादिविषयकज्ञानादेरपि विशेषणीभूतघटत्ववत्सम्बन्धविषयकत्वादिति भावः। निर्विषयकस्य तादृशसम्बन्धावच्छिन्नाभावस्य च व्यधिकरणसम्बन्धावच्छिन्नाभावत्वादिति

शेष। ननु विशिष्टबुद्धौ विशेषणादिविषयकत्वनियमेऽपि घटभिन्नाविषयकं घटनिर्विकल्पकमेव सम्भवतीत्यत आह घटनिर्विकल्पकेऽपीति। घटत्वादीत्यादिना रूपादिपरिग्रह, तद्ग्राहकसन्निकर्षादिघटितसामग्र्या अपि तदानीं सत्त्वादिन्द्रियाणां स्वव्यवस्थापकगुणपुरस्कारेणैव प्रवृत्तेश्चानुवादो रूपादिभानस्यावश्यकत्वादिति भाव। सम्बन्धप्रमाणमिति। साध्यवद्वृत्तित्व सा च वत्सम्बद्धत्वसामान्य साध्यवदाधेयत्वसामान्य वा, तादृशसम्बन्धेनाभावश्च सम्बन्धत्वावच्छिन्नप्रतियोगिताचच्छेदकसम्बन्धताक एकोऽभाव प्रतियोगितावच्छेदकतया प्रसिद्धा ये ये सम्बन्धास्तदवच्छिन्नाभावकूटो वा, स्वरूपसम्बन्धेन, कालिकविलक्षणसम्बन्धेन। स्पष्टमिति। यत्र साध्यवति साध्यतावच्छेदकसम्बन्धेनावर्तमान तेन सम्बन्धेन क्वचिदपि न वर्तते तत्रापि विशेषणताविशेषेण साध्यवद्वृत्तेस्तेन सम्बन्धेन व्यभिचारनिरूपकाधिकरणवृत्तेर्वस्तुन प्रसिद्ध्या तस्य तादृशसम्बन्धावच्छिन्नाभावमादायातिव्याप्तिनिराकरणसम्भवादिति भाव। एव सति विशेषणताविशेषस्येव विशिष्योपादानमुचित सम्बन्धान्तरनिवेशने प्रयोजनाभावादित्याशयेनाह विशेषणताविशेषेणेति। दैशिकविशेषणतयेत्यर्थः। एव सति दर्शितातिव्याप्तीनां नावकाश इति सुचयितु व्यभिचारनिरूपकाधिकरणे तेन सम्बन्धेन वृत्तिमति तेन सम्बन्धेन साध्यवद्वृत्तित्वसौलभ्यमाह सवत्रैवेति। व्यभिचारिहेतुक इति शेष। तत्तद्व्यक्तित्व इति। यद्व्यक्तौ हेतौ साध्यव्यभिचार इत्यादि। अयोगोलकादिनिष्ठतद्व्यक्तित्वं तन्मात्रवृत्तिरूपाद्यात्मकमेव न तु पदार्थान्तर तस्य च न विशेषणताविशेषेण वृत्तिरिति केवलान्वयिन तस्य तादृशसम्बन्धावच्छिन्नाभावमादाय नातिप्रसङ्गनिराकरणसम्भव इति तत्र तत्सौलभ्यमनुपयुक्तमित्याशङ्क्याह तत्तद्व्यक्त्यन्य इति। तत्तद्व्यक्तित्वावच्छिन्नभेदावच्छिन्नभेदोऽपि स्वप्रतियोगितावच्छेदकतत्तद्व्यक्तित्वादनतिरिक्त एव तथा च वक्ष्यते 'न हि घटभिन्नभेदो घटत्वादतिरिच्यते' इत्याशङ्क्याह तत्प्रकारकेति। तत्तद्व्यक्तित्वादिप्रकारकेत्यर्थः। तत्प्रकारकभ्रमविषयत्वस्य साध्यवत्यपि सम्भवादिति। 'तत्' तेन सम्बन्धेन साध्यवद्वृत्तित्वम्, विशिष्य समवायादिसम्बन्धनिवेशे आत्मत्वाभावादिसाध्यकस्थले तेन सम्बन्धेन साध्यवद्वृत्तित्वाप्रसिद्धिरुक्ता विशेषणताविशेषस्य विशिष्य निवेशे तु न तद्दोषावसर इति सूचयितु सर्वत्र सद्धेतौ साध्यवन्निष्ठतद्व्यक्तित्वादौ तेन सम्बन्धेन साध्यवद्वृत्तित्वप्रसिद्धिपरमिति तु न सम्भवति ज्ञेयत्ववाच्यत्वादिनैव तत्प्रसिद्धिसम्भवात् तत्तद्व्यक्तित्वाद्यनुधावनस्य वैयर्थ्यापातात्, अभावे तत्सम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशे यत्किञ्चित्सम्बन्धावच्छिन्नाभावमादायातिव्याप्ति, सम्बन्धसामान्येनाभावनिवेशे च तेन सम्बन्धेन साध्यवद्वृत्तेसाध्यवत्समवेतादेस्तादृशाभावस्य हेतुमत्यसत्त्वादसम्भव इति तन्निवेशयति तनैवेति। इदानीं प्रतियोगितावच्छेदकसम्बन्धाद्यननुगमेन एव एकाभावो निवेशयितुं शक्यत इत्यभिप्रायेणाह तदवच्छिन्नसामान्याभाव इति। तादृशसा

ध्यवद्वृत्तित्वावच्छिन्नसामान्याभाव इत्यर्थः । मिश्रव्याख्यानमुपन्यस्यति केचित्त्विति ।

(दी०) केचित्तु नञ्व्यत्यासेनासाध्यानि साध्यविरोधीनि साध्यासमानाधिकरणानीति यावत् तानि सामानाधिकरण्यानधिकरणानि यस्य तत्त्वं साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्यसामान्यकत्वमिति फलितार्थः । अत्र च साध्यसामानाधिकरण्यं साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतावच्छेदकसम्बन्धेन वृत्तिः । परञ्च सामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेतुमति तेनैव वृत्तिः, तेन समवायेन पृथिवीत्वादेः साध्यतायां व्यभिचारिणि कालिकसम्बन्धेन हेतौ घटादौ द्रव्यत्वादेश्च समवायेन साध्यतायां समवायेन हेतौ सत्त्वगुणत्वादौ नातिप्रसङ्गः । न वा संयोगेन वह्न्यादौ साध्ये समवायेन तद्व्याप्यस्य रूपविशेषादेः कालिकसम्बन्धेनाधिकरणे काले स्पन्दे च कालपरिमाणस्पन्दत्वादेः समवायेन तदधिकरणे घटादेः संयोगेन वृत्तावपि चाप्रसङ्गः । सम्बन्धविशेषेण व्याप्यत्वलाभाय साधिकरणत्वमित्याहुस्तच्चिन्त्यम् ।

(गा०) 'नञ्व्यत्यासेन' साध्यपदानन्तरं श्रूयमाणस्य नञस्तत्पूर्वाभिसन्धानेन, तथा चासाध्यसामानाधिकरण्येति वक्तव्ये साध्यासामानाधिकरण्येनेत्यभिधानं प्रमादेनेति भावः । असाध्यपदस्य साध्यभिन्नार्थकत्वे एतद्वृत्तिधर्मवानेतत्त्वादित्याद्यतिरिक्ते सर्वत्र साध्यभिन्नस्य हेतुसमानाधिकरणतया क्वचिच्च साध्यभिन्नाप्रसिद्ध्याऽव्याप्तिरतो नञ्पदस्य विरोध्यर्थकतामाह साध्यविरोधिनीति । विरोधस्य तदभावव्याप्यतारूपत्वे केवलान्वयिनि साध्याभावाप्रसिद्ध्याऽव्याप्तिरतः साध्यासमानाधिकरणानीति । केवलान्वयिन्यवृत्तावेव साध्यासामानाधिकरण्यप्रसिद्धिः, व्यभिचारिहेतुकेऽपि साध्यासमानाधिकरणस्यान्ततोऽवृत्तेरेव हेत्वसमानाधिकरणतयाऽतिव्याप्तिरिति साध्यासामानाधिकरण्यरूपोद्देश्यतावच्छेदकावच्छेदेन हेत्वसामानाधिकरण्यरूपविधेयान्वयोऽत्र विवक्षित इत्याशयेन व्यापकत्वरूपमवच्छिन्नत्वमन्तर्भावयन् सामानाधिकरण्याधिकरणत्वाभावेऽधिकरणत्वांशमनतिप्रयोजनकतया परित्यजन् फलितार्थमाह साध्येति । साध्यपदं साध्यतावच्छेदकविशिष्टार्थकम्, तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः, व्यापकत्वं तद्भिन्नान्योन्याभावप्रतियोगितानवच्छेदकत्वं न तु तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वमभावत्वादिकमादायातिप्रसङ्गाद्गौरवाच्च । सा-

ध्यादिनिष्ठहेतुसामानाधिकरण्यव्यक्तिविशेषाभावस्य साध्यसामानाधिकरण्याभावव्यापकतामादायातिव्याप्तिवारणाय सामान्यपदं व्यापकाभावप्रतियोगितावच्छेदकत्वविशिष्टसामानाधिकरण्यत्वकधर्मवत्त्वमिति तु निष्कर्षः। तेन व्यभिचारिणि हेतुसामानाधिकरण्यसामान्यगगनोभयत्वावच्छिन्नाभावस्य साध्यसामानाधिकरण्याभावव्यापकत्वेऽपि न क्षतिः। स्वपदं हेतुतावच्छेदकपरम्, तद्विशिष्टसामानाधिकरण्यनिवेशाद् द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः। 'परञ्च सामानाधिकरण्यं' हेतुसामानाधिकरण्यम्। साध्यतावच्छेदकसम्बन्धनिवेशनस्य व्यावृत्तिमाह समवायेन पृथिवीत्वादेरिति। व्यभिचारिणि हेतौ घटादौ नातिप्रसङ्ग इत्यग्रिमेण सम्बन्धः। वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन पृथिवीत्वाधिकरणे काले तादृशहेतुतावच्छेदकसम्बन्धेन वृत्तेरवृत्तिमात्रनिष्ठतदभावं प्रति हेतुसामानाधिकरण्याभावस्य व्यापकत्वेऽपि समवायरूपसाध्यतावच्छेदकसम्बन्धेन साध्यवत्पृथिव्यादिनिरूपितकालिकसम्बन्धावच्छिन्नवृत्त्यभावस्य महाकालादौ हेतुसमानाधिकरणे जन्यपृथिव्यसमानकालीने चरमध्वंसादौ सत्त्वेन तत्प्रत्यस्याव्यापकत्वादिति भावः। साध्यवद्वृत्तित्वे हेतुतावच्छेदकसम्बन्धनिवेशप्रयोजनमाह द्रव्यत्वादेश्चेत्यादि। समवायेन साध्याधिकरणमहाकाले वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन वृत्ते साध्यवति सम्बन्धसामान्येन वृत्तेरभावं प्रति हेतुमद्वृत्तित्वाभावस्य व्यापकत्वेऽपि गुणत्वादिसाधारणं हेतुतावच्छेदकसम्बन्धेन द्रव्यादिवृत्तित्वाभावं प्रति तस्याव्यापकत्वादिति भावः। हेतुमत्त्वे हेतुतावच्छेदकसम्बन्धनिवेशप्रयोजनमाह संयोगेन वह्न्यादौ साध्ये इति। वह्निमान्तद्रूपादित्यादावित्यर्थः। 'समवायेन' इति व्याप्यतान्वयि, कालपरिमाणस्पन्दत्वादेर्वृत्तावपि नाप्रसङ्ग इत्यन्वयः। काले कालपरिमाणादेर्वृत्तिकथनेन साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतावच्छेदकसम्बन्धेन वृत्तेरभाववति तत्र सम्बन्धसामान्येन हेतुमत्समवेतत्वाभावासत्त्वान्न तस्य तादृशाभावव्यापकत्वमित्यव्याप्तिप्रसक्तिबीजं दर्शितं महाकालनिष्ठो यो वह्न्यादिसंयोगस्तत्साधारणरूपेण संयोगस्य साध्यतावच्छेदकसम्बन्धत्वे महाकालपरिमाणे सामानाधिकरण्याभावासम्भवात् स्पन्दत्वानुधावनम्। चतुर्थसम्बन्धनिवेशप्रयोजनमाह समवायेनेति। 'तदधिकरणे' रूपविशेषाधिकरणे। घटादेः संयोगेन वृत्तावपीति। एतेन साध्यवत्समवेतत्वाभाववति घटादौ हेतुसमवायिनि सम्बन्धसामान्येन वृत्तेरभावसत्त्वात्तस्य तादृशाभावाव्यापकत्वं दर्शितम्। सत्यन्तस्यैवाव्युत्पत्त्याऽऽवृत्ततया 'साधिकरणत्वम्' इत्यस्य वैयर्थ्यमाशङ्क्याह गम्यपविशेषेणेति। उपदर्शितसम्बन्धनिवेशलाभायेत्यर्थः। तथा च साधिकरणत्व लक्षणे न निवेश्यमिति भावः। तावन्मिति। चिन्तामणिबीजमेतद्रूपभिन्नं गुणत्वान्महाकालान्यो घटादित्यादावतिव्याप्तिः, हेतुतावच्छेदकसमवायकालिकादिसम्बन्धेन साध्यवद्वृत्तित्वस्य तेन सम्बन्धेनावृत्तावेव प्रसिद्धेः, तादात्म्येन सर्वविषयकज्ञानसाधारणसाध्यके विषयितया च

हेतावव्याप्तिस्तेन सम्बन्धेन साध्यवदसम्बन्धित्वाप्रसिद्धेः। यदि च सामाना-धिकरण्यद्वयघटकवृत्तित्वद्वये हेतुतावच्छेदकसम्बन्धं परित्यज्य सम्बन्धैक्यं विशेषणताविशेषसम्बन्धो वा निवेद्यते तदा नैतद्दोषावकाश इत्यवधेयम्।

(चि०) साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधिकरणत्वं वा केवलान्वयिनि यत्किञ्चित्साध्याधिकरणानधिकरणे धूमे चाव्याप्तेः। नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं पर्वतीयवह्नेर्महानसीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वाद्द्रव्यत्वादेरव्याप्यतापपत्तेश्च । न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वाऽभावविशेषणं देयं संयोगादौ साध्ये सत्त्वादेरनैकान्तिकत्वाभावप्रसङ्गात्। न हि प्रतियोगिविरोधी संयोगादेरपरोऽत्यन्ताभावोऽस्त्यधिकरणभेदेनाभावभेदाभावात्। नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः, मूले वृक्षः कपिसंयोगवान्नेत्यबाधितप्रतीतेस्तदन्योन्याभावस्यापि तत्र सत्त्वात्। न चैवं भेदाभेदः, अवच्छेदकभेदेन तत्सत्त्वाभ्युपगमात्, साधनवन्निष्ठान्योन्याभावाप्रतियोगि साध्यवद्यस्येति षष्ठ्यर्थव्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्व्याप्तिनिरूप्यत्वाद्वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च विशेषाभावकूटादेवाभावव्यवहारोपपत्तौ सामान्याभावे मानाभावात्। नापि साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसाध्यसामानाधिकरण्यं साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धे र्महानसादौ समवायितया वह्निवह्निमतोरत्यन्तान्योन्याभावयोः सत्त्वाद्धूमादावप्युक्तलक्षणाभावाच्च।

(दी०) यथाश्रुतं यथासम्भवं विकल्प्य दूषयति नेत्यादि। नन्वप्रतियोगिपदेन प्रतियोगितानवच्छेदकावच्छिन्नं वक्तव्यमत आह द्रव्यत्वादेरिति। 'प्रतियोगिविरोधित्वं' प्रतियोगितदधिकरणावृत्ति-

त्वम् 'व्याप्यवृत्तित्वं' स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्। अधिकरणेति। तथासत्यभाव एव न सध्येदिति भाव.। संयोगाद्य-भावस्य च द्रव्ये प्रतियोगिसामानाधिकरण्यमव्याप्यवृत्तित्वञ्च प्रति-योग्यधिकरणीभूतद्रव्यवृत्तित्वं स्वाधिकरणीभूतद्रव्यनिष्ठात्यन्ताभाव-प्रतियोगित्वं गुणे च प्रतियोग्यसामानाधिकरण्यं व्याप्यवृत्तित्वञ्च प्रति-योग्यनधिकरणीभूतगुणवृत्तित्वं स्वाधिकरणीभूतगुणनिष्ठात्यन्ताभावा-प्रतियोगित्वमेतानि च न भेदकान्यविरोधात् सामान्यतश्चाव्याप्यवृत्ता प्रतियोगिसमानाधिकरणे च न तथात्वव्यतिरेक इति भाव.। ननु गा-घ्यवान् यस्येति साध्यवति मस्तन्वोऽन्वय्यः स चाधिकरणत्वं माध्य-साधनयोरपि सामानाधिकरण्यमेवेत्यतो दूषणान्तरमाह साध्येति। साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे। यत्तद्भ्यामेव व्या-प्तिर्निरुक्तव्येत्यत आह वह्निमदिति। ननु यत्समानाधिकरणान्योन्या-भावप्रतियोगितावच्छेदक यद्रूपावच्छिन्नं न भवति तद्रूपावच्छिन्नेन सम तस्य सामानाधिकरण्यं व्याप्तिरित्यर्थ। न च धूमसमानाधिकर-णान्योन्याभावप्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निर्धूमवान् वह्निमान्नेत्यप्रतीतेरत आह विशेषेति। य एव प्रत्येकं वह्निमद्भेदा धूमसमानाधिकरणास्त एव चैकाधिकरणवृत्तित्वावच्छिन्ना वह्निमत्सा-मान्यभेदबुद्धिमुपपादयन्ति तत्प्रतियोगितावच्छेदकश्च वह्नित्वावच्छिन्नो वह्निरिति भवत्यव्याप्तिः। साधनेति। वैयधिकरण्यं तदनधिकरण-वृत्तित्वं तच्च केवलान्वयिनि साधनस्याप्रसिद्धमतिप्रसङ्गश्च पृथिवी द्रव्यत्वादित्यादौ, अतः समानाधिकरणोपादानम्, धूमादेरपि वह्न्यादि-समानाधिकरणद्रव्यत्वाद्यनधिकरणवृत्तित्वमतो यावदिति। यद्यपि पृथिवीत्वादिसमानाधिकरणघटत्वपटत्वाद्यनधिकरणवृत्तित्व द्रव्यत्वा देस्तदनधिकरणमात्रवृत्तित्वञ्च निखिलघटपटादिरूपादीनां तथापि तादृशधर्मानधिकरणमात्रवृत्तित्वानवच्छेदकसाध्यतावच्छेदकवत्त्वं बोध्यम्। न हि पृथिवीत्वसमानाधिकरणस्तादृशः कश्चिदेको धर्मो यदनधिकरण-मात्रवृत्तितावच्छेदकं रूपत्वादि, धूमत्वादिकं तु वह्न्यादिसमानाधिकर-णायोगोलकत्वाद्यनधिकरणमात्रवृत्तितावच्छेदकम्, तदवच्छेदकत्वञ्च

तदनतिरिक्तवृत्तित्वं तच्च तच्छून्यधर्मावृत्तित्वं तेन मेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्तितानधिकरणगगनादिवृत्तित्वेऽपि द्रव्यत्वस्य द्रव्यसाध्यकमेयत्वे नातिप्रसङ्गः।

(गा०) यथाव्याख्यातलक्षणस्य निर्दोषतया मूलोक्तदूषणासङ्गतिमाशङ्कयाह नन्वित्यादि। दूषयतीत्यनेन सम्बन्धः। तथाप्यव्याप्तमिति। विकल्पक्रियाविशेषणम्, साधनसमानाधिकरणाभावाप्रतियोगित्वघटितलक्षणे नानाव्यक्तिसाध्यस्य विशेषाभावमादाय दत्तं दोषमुद्धृत्य दूषणान्तरमवतारयति नन्विति। प्रतियोगितानवच्छेदेनेति। न चैवं धूमवान् वह्नेरित्यादौ धूमादेस्तथाविधद्रव्यत्वाद्यवच्छिन्नत्वमादाय दोषः, अनवच्छेदको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यं तद्रूपावच्छिन्ननिरूपितव्याप्तिरिति विवक्षणात्। प्रतियोगिविरोधित्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं व्याप्यवृत्तित्वञ्च यत्किञ्चित्स्वाधिकरणनिष्ठाभावाप्रतियोगित्वं तदा संयोगी सत्त्वादित्यादौ वक्ष्यमाणातिव्याप्त्यसङ्गतिः, हेत्वधिकरणान्तर्भावेण तद्विलक्षणेऽतिव्याप्तिपरिहारस्यापि सम्भवादित्यग्रिमग्रन्थानुरोधेन तदुभयं व्याचष्टे प्रतियोगिविरोधित्वमिति। तथातीति। अधिकरणभेदेनाभावभेदस्वीकार इत्यर्थः। 'अभाव एव' अधिकरणस्वरूपातिरिक्ताभाव एव, अभावाधिकरणस्याभावरूपत्वे घटादिशून्यानन्ताधिकरणव्यक्तीनां घटाद्यभावत्वं कल्पनीयमिति तदपेक्षया घटाद्यभावत्वस्यैकैकव्यक्तावेव कल्पनमुचितं लाघवादिति युक्त्या तत्सिद्धिः। यदि चाभावा अपि अधिकरणसमसंख्यकास्तदा किमपराद्धमधिकरणानामभावत्वकल्पनयेति भावः। ननु द्रव्यगुणादिनिष्ठसंयोगाद्यभावस्याभेदे संयोगाभावो द्रव्ये प्रतियोगिसमानाधिकरणो गुणे न तथा, गुणे व्याप्यवृत्तिः द्रव्ये न तथेति व्यपदेशो न स्यात्तस्य मिथो विरुद्धधर्मद्वयविषयकत्वादित्याशङ्क्य तादृशाभावव्यवहारविषयाणामविरोधं व्युत्पादयितुं तन्निर्वक्ति संयोगाद्यभावस्य चेति। 'द्रव्ये इत्यस्याव्याप्यवृत्तित्वमित्यनाप्यनुषज्यते, यथासंख्यमुद्देश्यद्वये विधेयद्वयान्वयः, एवमग्रेऽपि। गुण इति। व्याप्यवृत्तित्वमित्यनापि सम्बध्यते। 'न भेदकानि' संयोगाभावस्येत्यादिः। अविरोधादिति। प्रतियोग्यधिकरणवृत्तित्वतदनधिकरणवृत्तित्वयोर्भावाभावरूपत्वाविरहेणैकत्रापि संभवात्, द्रव्यनिष्ठाभावप्रतियोगित्वगुणादिनिष्ठाभावाप्रतियोगित्वयोरपि नीलघटपीतघटाभावसमशीलतया तथात्वादिति भावः। उक्तव्यवहारश्च पारिभाषिका एवावयवव्युत्पत्त्या तादृशार्थालाभादिति ध्येयम्।

यादृशयोर्विरोधस्तादृशयोर्न व्यवहारविषयतेत्याह सामान्यत इति। 'तथात्वव्यतिरेक.' इत्यनेनास्य सम्बन्धः। अव्याप्यवृत्तौ प्रतियोगिसमानाधिकरणे चेति। तथात्वेन च व्यवह्रियमाणे संयोगाभाव इत्यर्थः। 'सामान्यतो न तथात्वव्यतिरेकः' न स्वाधिकरणनिष्ठाभावप्रतियोगित्वसामान्याभावः, प्रतियोग्यधिकरणवृत्तित्वसामान्याभावश्च व्यपदिश्यत इति शेषः। स्वसमानाधिकरणा-

न्योन्याभावाप्रतियोगिसाध्यवत्कत्वमित्यत्र साध्यसाधनयो सम्बन्धो निविष्ट स च व्याप्यव्यापकभाव इत्यात्माश्रय इति दूषणं दूषणान्तरावतारायोद्धरति नन्विति। 'यस्य' इत्यनेन साध्यवति साधनस्य सम्बन्ध 'अन्वेष्ट्रय' विवक्षणीय, 'स चाधिकरणत्वं' न तु व्याप्यव्यापकभाव इति शेष, तथा च नात्माश्रय इति भाव। साध्यसाधनयो सम्बन्धनिवेशेऽपि न क्षतिस्तयोरपि सम्बन्धान्तरसभवादित्याशयेनाह साध्यसाधनयोरपीति। सामानाधिकरण्यमेव सम्बन्ध संभवतीति शेष। तथा च स एव वा विवक्षणीय इति भाव। मूले 'साध्यसाधनयो' साध्यत्वसाधनत्वयो '‹याप्तिनिरूप्यत्वात्' व्याप्तिघटितत्वात्, साध्यत्वसाधनत्वे यदि सिद्धिकर्मत्वतत्करणत्वरूपे तदा तयोर्व्याप्तिघटितत्वाभावादसङ्गतिरतो दीधितिकारस्तदन्यथा निरुक्ति साध्यत्वसाधनत्व इति। द्वन्द्वादिश्रूयमाणं व्याप्तीत्युभयत्र सम्बध्यते। यत्तद्भ्यामिति। यत्समानाधिकरणान्योन्याभावाप्रतियोगी यद्वान् तत्त्वं तद्व्याप्तिरिति क्रमेण साध्यत्वसाधनत्वेऽनन्तर्भाव्य इत्यर्थ। तथा च न व्याप्तेर्घटकता यत्तत्पदयोर्धूमत्वयह्नित्वादिविशेषरूपेण धूमवह्न्यादिपरत्वादित्थञ्च साधनतावच्छेदकादिभेदेन व्याप्तिभेदस्यागत्या स्वीकारादिति भाव। विशेषान्योन्याभावमादायोपन्यस्तं दूषणं सामान्याभावखण्डनपरमूलमवतारयितुमुद्धरति नन्विति। यदिति। यादृशरूपावच्छेदेन यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वाभावस्तादृशरूपावच्छिन्नसामानाधिकरण्यं तस्य तादृशरूपावच्छिन्ननिरूपिता व्याप्तिरित्यर्थ, पर्वतादौ महानसीयवह्न्यादिमदन्योन्याभावसत्त्वेऽपि शुद्धवह्नित्वावच्छेदेन महानसीयवह्न्यादावेव तत्प्रतियोगितावच्छेदकत्वाभाव सुलभ इत्याह न चेति। न हीत्यर्थ। 'वह्नित्वावच्छिन्न' शुद्धवह्नित्वावच्छिन्न। न चावच्छेदकत्वतदभावयोर्विरोधेनैकत्रावस्थानं दुर्घटमिति वाच्यम्, विभिन्नावच्छेदेन भावाभावयोरेकत्र वृत्तावविरोधेनावच्छेदकतानवच्छेदकरूपेणावच्छेदकत्वाभावसत्त्वे बाधकाभावात्। न च विशिष्टस्यावच्छेदकत्वे एकदेशस्यावच्छेदकतानवच्छेदकत्वमेव न सम्भवतीति कथं तदवच्छेदेन वह्न्यादावेवावच्छेदकत्वाभाव इति वाच्यम्, यतो हि यादृशस्यावच्छेदकतावच्छेदकत्वपर्याप्त्यनधिकरणत्वं तादृशधर्मावच्छेदेनावच्छेदकत्वाभावोपगमाद्विशिष्टवह्नित्वस्यावच्छेदकत्वेऽपि केवलस्य तस्य तत्पर्याप्त्यनधिकरणत्वेनानुपपत्त्यभाव। ननु सामान्याभावनिराकरणमनुपयुक्तं तावतापि सामान्यधर्मस्य प्रतियोगितावच्छेदकतयोक्ताव्याप्तिपरीहारादेवां विशेषाभावमानेण निर्वाहोऽपि न सामान्याभावानभ्युपगमे यत्किञ्चिद्दोषापत्तिः पर्वतादौ नायं वह्निमानित्यादिप्रतीतिव्यवहारयो प्रसङ्गादित्याशङ्क्यातिरिक्तसामान्याभावासत्त्वपक्षे दर्शितातिप्रसङ्गं परिहरन्नेव लक्षणाव्याप्तिं द्रढयति य एवेति। 'वह्निमद्भेदा' तत्तद्वह्न्यवच्छिन्नभेदा, 'एतावदधिकरणवृत्तित्वावच्छिन्ना' तादृशयावद्भेदाधिकरणैकव्यक्तिवृत्तित्वावच्छिन्ना, 'वह्निमत्सामान्यभेदबुद्धि' हृदो न वह्निमानित्याकारकबुद्धिम्,

'उत्पादयन्ति' विषयीभूयोपपादयन्ति, तादृशाधिकरणवृत्तित्वावच्छेदेन तादृशबुद्धिविषयतावच्छेदकरूपवन्त इत्यर्थः। एतावताऽतिप्रसङ्गो वारितः। तत्प्रतियोगितावच्छेदकश्चेति चकारो 'वह्नित्वावच्छिन्नः' इत्यनन्तरं योज्यः, 'वह्नित्वावच्छिन्नः' शुद्धवह्नित्वावच्छिन्नः, तस्य तत्प्रतियोगितानवच्छेदकत्वे तेषां न वह्निमानित्याकारकप्रतीतौ तादृशसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेन विषयतां स्वीकृत्योक्तातिप्रसङ्गवारणानुपपत्तेस्तद्दोषतादवस्थ्यमिति भावः। न च विशेषाभावकूटस्य तादृशप्रतीतिविषयतया यत्किञ्चिद्विशेषाभाववति न तत्प्रसङ्ग इति वाच्यम्, तत्तद्वह्नित्वेन सकलवह्नीनां युगसहस्रेणापि ज्ञातुमशक्यतया तत्तद्व्यक्त्याद्यवच्छिन्नभेदत्वेन भेदसमुदायस्य भानासम्भवाद्वह्निमत्प्रतियोगिकभेदत्वेन तावद्भेदभानोपगमे तेन रूपेण यत्किञ्चिद्भेदविषयकज्ञानस्यापि प्रकारगतविशेषाभावेन तदाकारतासम्भवात्पर्वतो न वह्निमानितिप्रतीतेर्दुर्वारत्वात्, न हि प्रकारत्वाविशेषे विषयन्यूनाधिक्येन विचित्राकारता बुद्धीनाम्, घटत्वमात्रप्रकारेण शतसहस्रादिव्यक्तिविषयकप्रतीतीनां घट इत्येवाकारदर्शनादधिकमग्रे वक्ष्यामः। साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यघटितलक्षणे वैयधिकरण्यं यदि तदधिकरणावृत्तित्वं तदा प्रमेयत्वादेर्वैयधिकरण्यस्यावृत्तौ प्रसिद्ध्या 'प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेः' इति मूलविरोध इत्यतोऽन्यथा व्याचष्टे वैयधिकरण्यमिति। ननु साधनवैयधिकरण्यानधिकरणत्वमेव कुतो न निवेश्यते इत्यत आह तच्चेति। तादृशवैयधिकरण्यञ्चेत्यर्थः। अप्रसिद्धमिति। यद्यपि समानाधिकरणयावद्धर्मोपादानेऽपि केवलान्वयिसाधनके साधनस्यापि तादृशयावद्धर्मान्तर्गततयाऽप्रसिद्धिरस्त्येव व्यतिरेकिसाधनकेऽपि तद्दोषाधिक्यम्, तथापि समानाधिकरणयावद्धर्मोपादाने व्यतिरेकित्वं धर्मविशेषणमङ्गीकृत्य वक्ष्यमाणप्रकारान्तरेण च परिष्कारः सम्भवति नान्यथेत्याशयेनेयं व्यावृत्तिर्दर्शिता। व्यावृत्त्यन्तरमप्याह अतिप्रसञ्जकञ्चेति। पृथिवी द्रव्यत्वादित्यादाविति। पृथिवीत्वादेर्द्रव्यत्वादिरूपसाधनानधिकरणवृत्तित्वानधिकरणत्वादिति भावः। धूमवान् वह्नेरित्यादौ साधनस्य नानाव्यक्तितयाऽयोगोलकीयवह्निवैयधिकरण्यं धूमे सम्भवतीति तदुपेक्षितम्, धूमादेरपीति। तथा च यावत्पदानुपादाने द्रव्यत्वमहानसत्वादिरूपयत्किञ्चिद्धर्मवैयधिकरण्यानधिकरणत्वमादाय व्यभिचारिण्यतिप्रसङ्गः स्यादिति भावः। नानाधिकरणमिति। यावतां धर्माणां प्रत्येकनिरूपितवैयधिकरण्यानधिकरणत्वं निवेश्यम्। अतो नानाधिकरणसाधनके तादृशयावद्धर्माधिकरणाप्रसिद्धावपि न क्षतिः। द्रव्यत्ववैयधिकरण्यमादायातिव्याप्तिश्च समवायेन साध्यतायाम्, न तु संयोगेन तथात्वे तेन सम्बन्धेन तद्वैयधिकरण्याप्रसिद्धेरित्यवधेयम्। पृथिवीत्वादीति। तथा च द्रव्यं पृथिवीत्वादित्यादावव्याप्तिर्द्रव्यत्वादौ पृथिवीत्वादिसमानाधिकरणयावद्धर्मवैयधिकरण्यानधिकरणताविरहादिति भावः। व्यधिकरणयोर्न व्याप्तिरितिमतावलम्बनेन वह्निमान् धूमादित्यादौ महानसीयवह्न्यादौ पर्वत

त्वादिवैयधिकरण्यसत्त्वेऽपि न दोष इत्येकव्यक्तिसाध्यकानुधावनम्। ननु तदनधिकरणमात्रवृत्तित्वमत्र वैयधिकरण्यं घटत्वादेस्तादृशवैयधिकरण्यञ्च सत्ताधिकरणेऽपि वर्तमानस्य द्रव्यत्वादेरेव आह तदनाधिकरणमात्रवृत्ति त्वञ्चेति। घटत्वपटत्वाद्यनधिकरणमात्रवृत्तित्वञ्चेत्यर्थः। निखिलघटपटादिरूपाणामिति यथासङ्ख्यमन्वयः, तथा च रूपवान् पृथिवीत्वादित्यादावव्याप्तिस्तावतापि दुर्वारैव कुत्रापि रूपे तादृशयावद्धर्मवैयधिकरण्यानधिकरणत्वासत्त्वादिति भावः। तादृशाव्याप्तिं परिजिहीर्षुर्वैयधिकरण्यपदस्य तदनवच्छेदकावच्छिन्नपरत्वमवलम्बते तथापीति अव्याप्त्यभावं स्फुटयति न हीति। कश्चिदेको धर्मस्तादृश इत्यन्वयः। पृथिवीत्वादिसमानाधिकरणनिखिलधर्माणामेव तद्व्यापकरूपादिसमानाधिकरणतया रूपत्वाद्यवच्छेदेन तादृशधर्मानधिकरणमात्रवृत्तित्वासम्भवादिति भावः। अनवच्छेदकाघटितलक्षणे धूमवान् वह्नेरित्यादौ यावद्धर्मान्तर्गतमहानसत्वादिकमादायातिव्याप्तेर्वारणं सम्भवति पर्वतादिधूमादेस्तदनधिकरणमात्रवृत्तित्वात्। इदानीं तु न तादृशधर्ममादाय तद्वारणसम्भवो धूमत्वाद्यवच्छेदेन तदनधिकरणमात्रवृत्तित्वादिति व्यभिचारनिरूपकाधिकरणमात्रवृत्तिधर्ममादाय तत्रातिव्याप्तिं वारयति धूमवानित्यादिके विनेति। नन्ववच्छेदकत्वमन्यूनानतिरिक्तवृत्तित्वं तच्च धूमत्वादेर्जलादिसाधारणायोगोलकत्वादिवैयधिकरण्यन्यूनवृत्तित्वादित्यत आह अत्र चेद्रकत्वञ्चेति। तादृशवैयधिकरण्यावच्छेदकत्वञ्चेत्यर्थः। वक्ष्यमाणप्रयोजनानुरोधेन तच्छून्यावृत्तित्वरूपतदनतिरिक्तवृत्तित्वपदार्थे तच्छून्ये धर्मत्वमधिकं निवेशयति तच्चेति। 'धर्मत्व' वृत्तिमत्त्वम्। नातिप्रसङ्ग इति। गगनादेर्गगनत्वादिवैयधिकरण्यशून्यत्वेऽपि धर्मत्वविरहेण तादृशधर्मावृत्तित्वस्य द्रव्यत्वादावक्षतत्वादिति भावः।

अथ तच्छून्यधर्मावृत्तित्वमित्यत्र साध्यतावच्छेदकताघटकसम्बन्धेन धर्मवृत्तित्वं निवेशनीयमन्यथा धूमत्वादेरपि कालिकादिसम्बन्धेनायोगोलकत्वादिवैयधिकरण्यशून्यवह्न्यादिवृत्तित्वेनावच्छेदकत्वानुपपत्तिः, तथा च द्रव्यवान् मेयत्वादित्यत्र गुणत्वादिवैयधिकरण्यशून्ये गुणादिवृत्तिसत्त्वगुणत्वादौ साध्यतावच्छेदकताघटकसमवायसम्बन्धेन वृत्तेरप्रसिद्ध्या द्रव्यत्वादेर्गुणत्वादिवैयधिकरण्यावच्छेदकत्वानुपपत्तिः। तथा च साधनसमानाधिकरणघटत्वानधिकरणसंयुक्तवस्तुनि द्रव्यत्वस्य वृत्तेरतिव्याप्तिरिति भावः। न च समवायेन तस्य साध्यत्वे साधनसमानाधिकरणघटत्वादिवैयधिकरण्यावच्छेदकत्वं द्रव्यत्वस्य सुघटं तद्वैयधिकरण्यशून्ये घटरूपादौ समवायेन वृत्तेः प्रसिद्धेरिति नातिव्याप्तिरिति वाच्यम्, अतिव्याप्तेर्वारणसम्भवेऽपि धर्मपदानुपादाने गुणत्ववैयधिकरण्यावच्छेदकत्वानुपपत्त्याऽतिव्याप्तिप्रदर्शनात्। तत्पदोपादानेऽपि तद्वैयधिकरण्यावच्छेदकत्वानुपपत्त्या सन्दर्भविरोधस्य दुर्वारत्वात्, द्रव्यवान् द्रव्यसमवायिगुणान्यतरत्वात् सत्तावत्त्वान्मेयत्वादित्यादावतिव्याप्तेर्दुर्वार-

त्वाच्च तत्र साध्यतावच्छेदकद्रव्यत्वसत्त्वादौ द्रव्यवृत्तिधर्मवैयधिकरण्यावच्छेदकत्वाप्रसक्तेर्द्रव्यावृत्तेर्गुणत्वादिवैयधिकरण्यशून्ये साध्यतावच्छेदकताघटकसमवायेन वृत्तेरप्रसिद्ध्या तद्वैयधिकरण्यावच्छेदकभेदकूटस्याप्रसिद्धत्वादिति चेन्न, तच्छून्यधर्मावृत्तित्वमित्यनेन स्वानधिकरणतच्छून्यधर्मसामान्यकत्वस्य तदाश्रयस्वाश्रयधर्मसामान्यकत्वस्य वा विवक्षितत्वात्। एतेन तदनधिकरणमात्रवृत्तित्वं साध्यतावच्छेदकसम्बन्धेन वाच्यम्, अन्यथा धूमादेः कालिकादिसम्बन्धेनायोगोलकवृत्तितया धूमत्वाद्यवच्छिन्नस्यायोगोलकत्वाद्यनधिकरणमात्रवृत्तित्वानुपपत्तेः। तथा च समवायेन प्रमेयत्वावच्छिन्नसाध्यके वाच्यत्वादिहेतावव्याप्तिः, तत्र व्यभिचारनिरूपकाधिकरणवृत्तिजातित्वाद्यनधिकरणमात्रसमवेतत्वशून्येऽभावादौ प्रमेयत्वादेर्वृत्त्याऽवच्छेदकत्वानुपपत्तेः। साध्यतावच्छेदकसम्बन्धेन सम्बद्धत्वरूपधर्मत्वनिवेशेऽपि तद्दोषतादवस्थ्यम्, जातित्वादौ समवायेन वृत्त्यप्रसिद्ध्या जातित्वादिवैयधिकरण्यशून्यसमवेतेनाप्रसिद्धेर्जातित्वादिवैयधिकरण्यावच्छेदकत्वस्य साध्यतावच्छेदके दुरुपपादत्वादित्यपि निरस्तम्। मेयत्वाश्रयीभूतसमवेतसामान्यस्य जातित्वाद्यनधिकरणमात्रसमवेतत्वरूपजातित्वादिवैयधिकरण्याश्रयतया मेयत्वादेस्तदवच्छेदकत्वानिर्वाहात्।

केचित्तु साध्यतावच्छेदकसम्बन्धेन यत्सम्बद्धत्वं यश्च तादृशसम्बन्धेन तदनधिकरणमात्रवृत्तित्वस्याभावस्तदुभयाभाववत्त्वाश्रयकत्वविवक्षणान्न दोषः। सम्बद्धत्वं सम्बन्धप्रतियोगित्वं न तु सम्बन्ध एवातो यत्र संयोगः साध्यतावच्छेदकसम्बन्धस्तत्रापि सम्बद्धत्वं स्वरूपसम्बन्धेनैव वर्तते न तु संयोगस्वरूप। तत्तद्दूषणमाह अत इत्यादि। 'अत' वैयधिकरण्याभावानुरोधात्, स्वरूपसम्बन्धावच्छिन्नाभावनिवेशे संयोगस्य तेन सम्बन्धेनावृत्त्या तदभावतादृशसाध्यतावच्छेदकसम्बद्धत्वोभयस्य स्वरूपसम्बन्धावच्छिन्नाभावः केवलान्वयीति तमादायावच्छेदकलक्षणातिव्याप्तिरिति निरस्तम्। न च सम्बद्धत्वस्य स्वरूपसम्बन्धेन वृत्तावपि स्वरूपाननुगमेनैकस्वरूपसम्बन्धेनोभयाभावस्य केवलान्वयितया तद्दोषतादवस्थ्यमिति वाच्यम्, स्वरूपाणामननुगमेऽप्यनतिप्रसक्तेन येन केनचिद्रूपेण तदनुगमसंभवात्, अन्यथा विषयादिभेदेन विभिन्नस्य प्रमाविषयत्वादेः प्रमेयत्वत्वादिनापि केवलान्वयित्वानुपपत्तिस्तद्घटकसम्बन्धाननुगमादित्याहुः।

अथ तदनधिकरणमात्रवृत्तित्वं तदधिकरणावृत्तित्वे सति तदनधिकरणवृत्तित्वं तत्र सत्यन्तनिवेशादेव सामञ्जस्ये विशेष्यदलवैयर्थ्यम्, तत्परित्यागे च सत्यन्तस्यावृत्तिसाधारणतया तच्छून्यत्वमात्रस्यैवावृत्तिव्यावृत्ततया धर्मत्वोपादानविरोधः। न च तदधिकरणावृत्तित्वमात्रनिवेशे 'प्रमेयत्वादे' इत्यादिमूलासङ्गतिरिति विशेष्यदलनिवेशनमावश्यकं तदधिकरणावृत्तित्वशून्यत्वादन्यस्यावृत्तिसाधारणस्य विशिष्टशून्यत्वस्याभावान्तरतया चानैयर्थ्यमिति वाच्यम्, वृत्त्यंशमात्रस्यैव विशेष्यविधया निवेशेनैवाभावान्तरस्य

घटकत्वात् तदनधिकरणत्वांशस्याव्यावर्तकस्य निवेशे व्यर्थविशेषणताया दुर्वारत्वात्, वैयर्थ्यभिया तदंशस्यैव परित्यागे प्रमेयत्वाद्यधिकरणावृत्तिवृत्तिमतोऽप्रसिद्ध्या 'प्रमेयत्वादेः' इति मूलसङ्गतावपि 'महानसादौ' इति मूलस्य वह्नित्वाद्यौ सम्बन्धान्तरावच्छिन्नात्यन्ताभावादिघटितवह्न्यादिरूपसाधनसमानाधिकरणधर्मवैयधिकरण्यावच्छेदकत्वोपपादनपरतया दीधितिकारव्याख्यानासङ्गतेर्दुर्वारत्वात्। एतेनावृत्तिव्यावृत्ततदधिकरणताव्यापकभेदप्रतियोगितानवच्छेदकत्वमेव तद्वैयधिकरण्यमित्यपि निरस्तम्। तत्रापि साधनसमानाधिकरणधर्मानधिकरणत्वाप्रवेशे दीधितिकारीयतन्मूलव्याख्यानासङ्गतिरिति चेन्न, तदनधिकरणमात्रवृत्तित्वमित्यनेन स्वव्यापकतदनधिकरणताकत्वस्य विवक्षिततया तन्मूलसङ्गतेर्धर्मपदसार्थक्यस्य चोपपत्तेः। न च तादृशमूलसङ्गमनस्य तदनधिकरणेतरावृत्तित्वनिवेशनेनापि सम्भवति निरुक्तवैयधिकरण्यं निवेश्य धर्मपदोपादानमयुक्तमिति वाच्यम्, तदनधिकरणेतरावृत्तित्वमित्यस्य तदनधिकरणेतरवृत्तित्वप्रतियोगिकाभावार्थकत्वे तादृशव्यक्तिविशेषाद्यभावस्य तत्समानाधिकरणसाधारणतया तच्छून्याप्रसिद्धेः, तादृशवृत्तित्वत्वावच्छिन्नाभावार्थकत्वे तादृशवृत्तित्वत्वस्य स्वसमानाधिकरणतदधिकरणवृत्तित्वत्वापेक्षया गुरुशरीरत्वेनाभावप्रतियोगितानवच्छेदकतया तादृशाभावाप्रसिद्ध्या तस्य तदर्थकत्वानुपपत्तेरिति तच्छून्यधर्मावृत्तित्वरूपावच्छेदकत्वनिवेश एकतराव्यभिचारिण्युभयसाध्यके विशेष्याव्यभिचारिणि विशिष्टसाध्यके च व्यभिचारिण्यतिप्रसङ्गस्याग्रे दर्शनीयतया कल्पान्तरमाह वस्तुतस्त्विति।

(दी०) वस्तुतस्तु तादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरणताकत्वं तदवच्छेदकत्वं वाच्यं तेन सत्ताद्रव्यत्वोभयवान् गुणान्यत्वविशिष्टसत्तावान् वा जातिमत्त्वादित्यादौ नातिप्रसङ्गः। सत्ताया गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽप्युभयत्वावच्छिन्नाधिकरणताया गुणत्वाभाववन्मात्रवृत्तित्वात्। प्रमेयत्वादेरिति। ननु व्यतिरेकित्वेन धर्मो विशेषणीयः, वस्तुतस्तु यावत्पदं तादृशस्य कस्यापि न वैयधिकरण्यावच्छेदकमेतावन्मात्रस्फोरणाय तथा च साधनसमानाधिकरणधर्मनिरूपितवैयधिकरण्यावच्छेदकं यद्यत्तद्भिन्नधर्मवत्ता यावत्तादृशावच्छेदकत्वशून्यधर्मवत्ता वा समं सामानाधिकरण्यमिति पर्यवसितमतो दोषान्तरमाह महानसादाविति। तथा च तदनधिकरणत्वं तदभावाधिकरणत्वं तद्भिन्नत्वं वा द्वयमपि दुष्टमित्यर्थः। एतेन तदधिकरणावृत्तित्वमत्र वैयधिकरण्यमिति निरस्तम्, समवायितया महानसवृत्तित्वं वह्नौ

नास्तीतिप्रतीतेर्वह्न्यादेरपि तादृशवैयधिकरण्याधिकरणत्वात्, सम्बन्धविशेषेण वैयधिकरण्यविवक्षाया तु नोक्त दोष इति ध्येयम्।

(गा०) यद्यप्यत्रापि तदनधिकरणमात्रवृत्तित्व स्वव्यापकतदनधिकरणताकत्वमेव न तु तदधिकरणावृत्तित्वे सति तदनधिकरणवृत्तित्व वृत्तिमत्त्वं वा तदभावप्रवेशेनोक्तरीत्या विशेष्यसार्थक्यस्योपपादयितुमशक्यत्वात्। न च तदधिकरणावृत्तित्वमात्र प्रवेश्यम्। तथा सति गगनादौ प्रमेयत्वादेस्तादृशवैयधिकरण्यसत्त्वेऽपि गगनत्वाद्यवच्छिन्नाधिकरणत्वाप्रसिद्ध्या गगनत्वादौ निरुच्यमानवैयधिकरण्यावच्छेदकत्वासम्भवेन 'प्रमेयत्वादे' इति मूलस्य वैयधिकरण्यावच्छेदकाप्रसिद्ध्यर्थकतया सङ्गमयितु शक्यत्वेऽप्युक्तक्रमेण दीधितिकारीयमूलव्याख्यानासङ्गतेर्दुर्वारत्वात्। तदनधिकरणमात्रवृत्तित्वावच्छिन्नकत्वनिवेशेनैवोपपत्तेरधिकरणतानिवेशो व्यर्थ। तदनधिकरणमात्रवृत्तित्वावच्छिन्नकत्वस्य स्वविशिष्टव्यापकतदनधिकरणताकत्वरूपतया गुणत्वाद्यनधिकरणसत्ताद्रव्यत्वोभयत्वविशिष्टसत्तात्वाश्रयसत्ताया सत्त्वेऽपि गुणत्वाद्यनधिकरणत्वेऽपि तादृशोभयत्वादिविशिष्टसत्तात्वावच्छिन्नव्यापकताया अनपायेन तादृशोभयत्वादौ तदनधिकरणमात्रवृत्तित्वावच्छिन्नकत्वरूपवैयधिकरण्यावच्छेदकत्वस्यापि निर्वाहात्। तथापि विशिष्टाधिकरणतागर्भविशिष्टनिरूपकव्यापकत्वालाभायैवाधिकरणतापदम्। वस्तुतो मूलोक्तदोषाणामनिष्कृष्टलक्षणे यथाकथञ्चित् सङ्गमनीयत्वेन निष्कृष्टलक्षणे तद्दोषासङ्गतावपि न क्षतिरिति निष्कृष्टलक्षणे तदधिकरणावृत्तित्वरूपवैयधिकरण्यमेव प्रवेश्य न तु स्वव्यापकतदनधिकरणताकत्वरूपमित्याशयेन करणतापदोपादानम्, तादृशवैयधिकरण्यांशे स्वविशिष्टाधिकरणत्वे तादृशवैयधिकरण्यमप्रवेश्य विशिष्टतद्विशेषणत्वोपगमे वक्ष्यमाणातिव्याप्तिरेव दुर्वारा गुणत्वाद्यनधिकरणे सत्ताया वृत्तावुभयत्वविशिष्टसत्तात्वाद्यवच्छिन्नायामपि तस्या तदधिकरणावृत्तित्वरूपतदनधिकरणमात्रवृत्तित्वस्योपपादयितुमशक्यत्वाद्वृत्तेर्व्याप्यवृत्तितया भिन्नरूपणापि तद्वृत्ति तदभावात्। एवमधिकरणतापदानुपादाने स्वविशिष्टं साध्यतावच्छेदकसम्बन्धेनैव तदधिकरणावृत्तित्वस्य निवेशनीयतया जातिमान् मेयत्वादित्यादौ जातित्वाद्यधिकरणे समवायादिना वृत्तेरप्रसिद्ध्या जातित्वादौ जातित्वादिवैयधिकरण्यावच्छेदकत्व दुरुपपादम्, अधिकरणतापदमधिकरणतासामान्यपरम्, अन्यथा द्रव्यगुणादिवृत्तित्वविशिष्टसत्तादिनिरूपिताधिकरणताविशेषैरेव तत्र तत्र शुद्धसत्तात्वाद्यवच्छिन्नसत्तानुबुद्ध्युपपत्ते। शुद्धसत्तात्वाद्यवच्छिन्ननिरूपिताखण्डाधिकरणतान्तरानुपगमेन यत्किञ्चिद्विशिष्टाधिकरणताया गुणत्वाद्यनधिकरणमात्रवृत्तितामादाय शुद्धसत्तात्वादेरपि गुणत्वादिवैयधिकरण्यावच्छेदकत्वापत्ति, एतच्च धूमादे कालिकसम्बन्धावच्छिन्नाधिकरणताया अयोगोलकादिवृत्तितया धूमत्वादेरयोगोलकत्वादिवैयधिकर

ण्यावच्छेदकत्वानुपपत्तिरिति साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधिकरणता विशेषणीया । न च तादात्म्यादिवृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः, सम्बन्धितायाः एव निवेश्यत्वात् । न च सम्बन्धितायाः सम्बन्धरूपतया संयोगेन दण्डादेः साध्यत्वे समवायेन दण्डसमवेतसंयोगादिहेतावतिव्याप्तिः स्वस्य स्वानधिकरणत्वेऽपि स्वसमानाधिकरणत्वसंयोगाधिकरणतायाः दण्डत्वाद्यवच्छिन्नसंयोगस्य साधनसमानाधिकरणतद्दण्डत्वाद्यधिकरणवृत्तित्वेन तद्वैयधिकरण्यावच्छेदकत्वानुपपत्तेरेवं समवायैक्यमते समवायेन साध्यतायाः सद्धेतौ साधनाधिकरणे सर्वत्र समवेतमात्रस्यैव समवायसत्त्वादवच्छेदकाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम्, सम्बन्धानुयोगितायाः एव सम्बन्धित्वरूपत्वात्सम्बन्धावच्छिन्नप्रतियोगिताकत्वविशिष्टसाध्यतावच्छेदकसम्बन्धानुयोगितायास्तदनधिकरणमात्रवृत्तित्वं तत्त्वमित्यर्थपर्यवसानेन सर्वसामञ्जस्यात् स्वप्रतियोगिकसंयोगस्य स्वस्मिन् सत्त्वेऽपि तदनुयोगितायाः असम्भवात्, अन्यथा संयोगेन स्वस्मिन् स्वविशिष्टबुद्धेः प्रमात्वापत्तेरेव समवायैक्यमते समवायानुयोगिताभेदस्यातिप्रसङ्गभङ्गायावश्यकत्वयोक्तानुपपत्त्यनवकाशात् । अथैवमपि महाकाले घटवान् महाकालपरिमाणादित्यादौ साधनसमानाधिकरणमहाकालवृत्तिधर्मवैयधिकरण्यावच्छेदकाप्रसिद्ध्याऽव्याप्तिरवृत्तिगगनत्वाद्यवच्छिन्नस्य कालिकादिसम्बन्धेन सम्बन्धित्वाप्रसिद्ध्या गगनादेः कालवृत्तितामते महाकालेऽपि तादृशसम्बन्धित्वसत्त्वाद्गगनत्वादेरपि तथात्वायोगात् साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतासामान्ये यद्विशिष्टप्रतियोगिकत्वतदनधिकरणमात्रवृत्तित्वाभावोभयाभावस्तत्त्वं तदित्युक्तौ गगनादेः कालावृत्तितामते गगनत्वादेरुक्तस्थलेऽवच्छेदकत्वोपपत्तावपि विषयितादिसम्बन्धेन घटादिसाध्यकनित्यज्ञानत्वादिहेतुके तदप्रसिद्धिर्दुर्वारैव वस्तुमात्रस्यैव नित्यज्ञानवृत्तिविषयिताप्रतियोगित्वाद् विषयितासामान्य उभयाभावस्य दुर्घटत्वात् । न च यद्यद्धर्मावच्छिन्ननिरूपितयद्यत्सम्बन्धावच्छिन्नाधिकरणता साधनसमानाधिकरणयत्किञ्चिद्धर्मानधिकरणमात्रवृत्तिस्तद्धर्मावच्छिन्नतत्सम्बन्धावच्छिन्नाधिकरणताभिन्नत्वं साध्यसामानाधिकरण्यघटकप्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतायां निवेश्य न तु साध्यतावच्छेदकेऽनवच्छेदकत्वमुक्तस्थले च समवायादिसम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकरणतानां तथाविधानां भेदस्य कालिकविषयितासम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकरणतायां सत्त्वाल्लक्षणसमन्वय इति वाच्यम्, उक्तयुक्त्या महानसीयवह्निविशिष्टसत्तात्वाद्यवच्छिन्नाधिकरणताभ्यः शुद्धवह्नित्वशुद्धसत्तात्वाद्यवच्छिन्नाधिकरणताया अनतिरिक्ततयोक्तरूपावच्छिन्नसाध्यकेऽव्याप्तेः । मैवम्, साधनसमानाधिकरणयत्किञ्चिद्धर्मानधिकरणमात्रवृत्तिता-

१ साधनसमानाधिकरणयत्किञ्चिद्धर्मानधिकरणेति पक्षधरमिश्रपाठस्त तद्धर्मविशेषाधिकरण

वच्छेदकं यादृशयादृशरूपावच्छिन्नयद्यत्सम्बन्धावच्छिन्नाधिकरणतात्वं तादृशरूपावच्छिन्नतत्सम्बन्धावच्छिन्नाधिकरणतात्वावच्छिन्नभेदकूटसमानाधिकरणं साध्यतावच्छेदकसम्बन्धावच्छिन्नयद्रूपावच्छिन्नाधिकरणतात्वं तद्रूपावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति विवक्षया सर्वानुपपत्तिपरिहारसम्भवाच्छुद्धवह्नित्वावच्छिन्नाधिकरणतात्वे प्रत्येकं महानसीयत्वपर्वतीयत्वादिविशिष्टवह्नित्वाद्यवच्छिन्ननिरूपिताधिकरणतात्वावच्छिन्नभेदकूटसमानाधिकरणत्वाद्व्यभिचारिणि साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणतात्वस्यापि व्यभिचारनिरूपकाधिकरणवृत्तितानवच्छेदकतया तदवच्छिन्नभेदस्य निरुक्तभेदकूटान्तर्गतत्वात् तादृशाधिकरणतात्वे च तद्भेदसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशादिति कृतं विस्तरेण।

पूर्वकल्पपरित्यागे बीजमाह तन्नेति। तदनधिकरणमात्रवृत्तिताशून्यधर्मावृत्तित्वस्थले तादृशधर्मपर्याप्तत्वनिवेशे सत्ताद्रव्यत्वोभयत्वादेस्तथाविधसत्तापर्याप्तत्वविरहेणावच्छेदकत्वमुपपद्यत इत्याशयेन विशिष्टसाध्यकानुसरणम्, 'सत्ताया गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽपि' इत्यनेन तद्वृत्तितयोभयत्वादेः पूर्वकल्पेऽवच्छेदकत्वासम्भवः सूचितः, 'महानसादौ' इत्यादिमूलं साधनाधिकरणे वह्नितद्वदत्यन्ताभावान्योन्याभावप्रदर्शकं सिंहगुहावलोकनन्यायेन पूर्वलक्षणद्वयदूषणपरतया साम्प्रदायिका व्याचक्षते, वयञ्च तेषामसामर्थ्यसूचनाय प्रकृतलक्षणपरतया तत्सङ्गमयिष्यन् तदाकाङ्क्षामुत्थापयितुं प्रमेयत्वादेरिति दूषणमुद्धरति नन्विति। 'व्यतिरेकित्वेन' साध्यतावच्छेदकसम्बन्धेन किञ्चिदधिकरणे वर्तमानो यो व्यतिरेकस्तत्प्रतियोगित्वेन, तेन समवायेन साध्यतायां साधनसमानाधिकरणस्य जात्यादिनिष्ठव्यतिरेकप्रतियोगिनः सत्तादेरनधिकरणमात्रे साध्यतावच्छेदकसम्बन्धेनाधिकरणत्वाप्रसिद्धावपि नाव्याप्तिः। एतेनाकाशादिरूपव्यतिरेकप्रतियोग्याकाशाभावाद्यनधिकरणाप्रसिद्धिभयेनान्योन्याभावप्रतियोगितावच्छेदकपरतया केषाञ्चिद्व्यतिरेकिपदव्याख्यानमश्रद्धेयम्। यद्यपि प्रमेयत्वादेरपि किञ्चित्सम्बन्धावच्छिन्नव्यतिरेकप्रतियोगित्वमक्षतमेव तथापि येन येन सम्बन्धेन यद्यत्साधनसमानाधिकरणं तेन तेन सम्बन्धेन तदनधिकरणमात्रवृत्तितानवच्छेदकत्वे विवक्षणीये स्वनिष्ठव्यतिरेकप्रतियोगितावच्छेदकत्वस्य येन सम्बन्धेनेत्यत्र सम्बन्धे विशेषणत्वोपगमान्न दोषः। अत्र चरमनिरुक्तस्यावच्छेदकत्वस्य स्वघटितगर्भतया तत्तद्व्यक्तिविश्रामादव्यभिचारिण्येकधर्मवैयधिकरण्यानवच्छेदकस्यापि साध्यतावच्छेदकस्य धर्मान्तरवैयधिकरण्यावच्छेदकत्वेन तत्तद्धर्मवैयधिकरण्यावच्छेदकानामेकैकभेदनिवेशासम्भव इति यावन्तो वैयधिकरण्यावच्छेदकधर्माः प्रातिस्विकरूपेण तावद्भेदकूटस्य निवेशनस्यावश्यकत्वे साधनसमानाधिकरणधर्मे यावत्त्वविशेषणमनर्थकं

नात्वावच्छिन्नभेदकूटसमानाधिकरणं साध्यतावच्छेदकसम्बन्धावच्छिन्नयद्रूपावच्छिन्नाधिकरणतात्वं तद्रूपावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पाठान्तरम्।

व्यभिचारिण्येकधर्मवैयधिकरण्यानवच्छेदकस्यापि साध्यतावच्छेदकस्य धर्मान्तरवैयधिकरण्यावच्छेदकत्वेनातिप्रसङ्गविरहादिति व्यतिरेकित्वस्य धर्मविशेषणत्वमन्तरेणैव सामञ्जस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धावपि येषां वैयधिकरण्यं प्रसिद्धं तदवच्छेदकभेदकूटमादाय सद्धेतौ लक्षणगमनसम्भवादित्याशयेन धर्मे यावत्त्वोत्कीर्तनं यावदवच्छेदकभेदकलाभार्थकतया व्याचष्टे वस्तुनास्त्वित । 'तादृशस्य' साधनसमानाधिकरणस्य 'कस्यापि न वैयधिकरण्यावच्छेदक' साध्यतावच्छेदकमिति शेष । एतावता लक्षणं कीदृशमित्याकाङ्क्षायामाह तथा चेति साधनसमानाधिकरणेति । तादृशयत्किञ्चिदेकधर्मवैयधिकरण्यावच्छेदकं यद्यदित्यर्थ, तेन साधनसमानाधिकरणधर्मत्वावच्छिन्नानधिकरणाप्रसिद्धावपि न क्षति । विशिष्टवह्नित्वादिरूपवैयधिकरण्यावच्छेदकधर्मभेदस्य शुद्धवह्नित्वादावसत्त्वादव्याप्तिरतोऽवच्छेदकानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशनपक्ष परित्यज्य यावदवच्छेदकताव्यक्तीनां तत्तद्व्यक्तित्वेनात्यन्ताभावकूटं निवेशयति यावतामित्यादि यद्वा अग्रतो यातं तादृशावच्छेदकत्व यद्यत्तच्छून्येत्यर्थ । विशेषणविशेष्यान्तर्भावेन वह्नित्वादौ पर्याप्तं यदवच्छेदकत्व तदभाव केवलविशेष्येऽक्षत एवेति भाव । न च यद्यद्धर्मावच्छिन्नाधिकरणता तादृशधर्मानधिकरणमात्रवृत्तिस्तद्रूपमवच्छेदकत्व विशिष्टवह्नित्वादौ विशिष्टवह्नित्वत्वादिरूपमेव यद्रूपदेन अतन्तद्रूपपदेन तद्रूपस्योपादानात् तच्चाव्यासज्यवृत्त्येवेति कथं तदभाव शुद्धवह्नित्वादाविति वाच्यम्, यद्रूपावच्छिन्नपर्याप्तावच्छेदकतानिरूपकाधिकरणतासामान्य तादृशानधिकरणमात्रवृत्ति तादृशधर्मवत्त्वरूपवैयधिकरण्यावच्छेदकतानिवेशान्महानसीयवह्नित्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वस्य महानसीयत्वादिसमुदाये व्यासज्यवृत्तितया तत्पर्याप्त्यवच्छेदकधर्मस्यापि तथात्वेनानुपपत्त्यभावात् । वस्तुतस्तु यादृशावच्छेदकतानिरूपकाधिकरणतासामान्यं तादृशधर्मानधिकरणमात्रवृत्ति तादृशावच्छेदकतारूपमेव वैयधिकरण्यावच्छेदकत्व निवेशनीय महानसीयवह्नित्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वञ्च महानसीयत्वादौ व्यासज्यवृत्तीति न दोष । तत्तदवच्छेदकतात्यन्ताभावापेक्षया तदवच्छेदकत्वावच्छिन्नभेदस्य धर्मिनिवेशाधिक्येन गुरुतया न तन्निवेश, तत्र विशिष्टस्यावच्छेदकत्वे शुद्धस्यानवच्छेदकत्वानुपपत्तिभयेन व्यासज्यवृत्तिधर्मावच्छिन्नात्यन्ताभावस्येव तादृशधर्मावच्छिन्नभेदस्यापि 'एको न द्वौ' इत्यादिप्रतीतिबलेन तद्धर्मवति स्वीकारात्, विशिष्टपर्याप्तावच्छेदकत्वावच्छिन्नभेदस्य शुद्धविशेष्येऽक्षतत्वान्महानसादौ वह्नितद्धेतोरत्यन्ताभावान्योन्याभावसत्त्वेन प्रकृतलक्षणक्षतिमाविष्करोति तथा चेति । 'तदनधिकरणत्व' वैयधिकरण्यघटकम् । द्वयमपि दुष्टमिति । साधनसमानाधिकरणस्य वह्नेरिव तादृशोभयविधतदनधिकरणवृत्तित्वघटितवैयधिकरण्यावच्छेदकत्वस्य वह्नित्वावच्छिन्ने सत्त्वादिति भाव । न ह्येव सर्वस्यैव वस्तुनो वह्न्यनधिकरणतया

मात्रपदव्यवच्छेद्याप्रसिद्ध्या वह्नि यावच्छिन्नस्य वैयधिकरण्यं दुरुपपादमिति वाच्यम्, स्वव्यापकतदनधिकरणतारूपतदनधिकरणमात्रवृत्तित्वस्य सूपपादत्वात् तदधिकरणावृत्तित्वरूपवैयधिकरण्यप्रवेशे 'प्रमेयत्वादे'र्यादि दूषणानवकाशात्तन्मूलन्यूनताभङ्गाय तत्पक्षेऽपि दूषणान्तरमाह एतनेति। सम्बन्धभेदेन वह्न्यादिवैयधिकरण्यस्य वह्नौ सत्त्वेनेत्यर्थः। तदेव स्फुटी करोति समवायितयति। एतच्च वृत्तिविशेषणम्। तादृशेति। यत्किञ्चित्सम्बन्धा वच्छिन्नवह्न्यधिकरणवृत्तित्वाभावरूपेत्यर्थः। तादृशधर्मवत्सम्बद्धत्वसामा न्याभावनिवेशे च क्वचिद्व्यभिचारिण्यतिव्याप्तिरवच्छेदकाप्रसिद्ध्या क्वचित्सद्धे तावव्याप्तिरपि द्रष्टव्या। सम्बन्धविशेषेणेति। साधनवति येन सम्बन्धेन यद्वर्तते तेन सम्बन्धेन तदधिकरणावृत्तिगर्भस्योभयत्र विशेषणताविशेषगर्भस्य वा वैय धिकरण्यस्य विवक्षायामित्यर्थः, 'नोक्तदोष' नोक्तोऽपि दोष।

केचित्तु 'उक्ते'तिविशेषणान्महाकालो घटवान् कालपरिमाणादित्यादाव वच्छेदकाप्रसिद्धिरूपदोषो दुर्वार एवेति सूचितमित्याहु। तन्न, तादृश दोषस्यापि पूर्वमुद्धृतत्वात्।

(चि०) अथानौपाधिकः सम्बन्धो व्याप्तिः, उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः, व्यापकत्वं तु तन्नि-ष्ठात्यन्ताभावाप्रतियोगित्वम्, व्यभिचारे चावश्यमुपाधिः, प्रतियोगित्वं न विरोधित्वं सहानवस्थाननियमलक्षणम्, गोत्वाश्वत्वयोरतथात्वादन्योन्याभावप्रतियोगित्वसत्त्वाच्च। किन्तु यथाधिकरणाभावयोः स्वरूपविशेषः सम्बन्धस्तथा प्रतियोगित्वमनुयोगित्वमपि, अभावविरहात्मत्वं वेति चेत्, यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो न, धूमादौ प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मस्य सिद्ध्यसिद्धिभ्यां न निषेद्धुं शक्यः, यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके च घटत्वादौ साध्यव्यापकत्वं निषिध्यत इति चेन्न, व्यधिकरणत्वात्।

(दी०) उपाधिपदस्य साध्यसमव्याप्तवचनतयाऽऽत्माश्रयप्रसङ्गादाह साध्यव्यापकेति। व्यापकत्वं व्याप्तिनिरूपकत्वमात्माश्रयादि-ग्रस्तमत आह तन्निष्ठेति। यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिर्वा तत्रापि व्याप्यवृत्तिरखण्डश्चान्ततस्तद्भिन्नत्वप्रकारकप्रमाविषयत्वाभावादिरेवास्ति, यदि च तस्यापि विशेषणान्तरविशिष्टस्य द्विरावृत्ति-

न्नस्य वा तद्भावसम्भवस्तदा साध्यसमानाधिकरणात्यन्ताभावप्रति-
योगितानवच्छेदकीभूतसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वं दलद्वयार्थो बोध्यः । अनवस्था निरसितुमाह प्रतियोगित्वमिति । सहेति । एकदेशकालावच्छेदेनेति पूरणीयम्, तेन नाव्याप्यवृत्तेरभावस्य प्रागभावादेश्च प्रतियोगितायामव्याप्तिः । अन्योन्येति । अत्र समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववति महानसादौ संयोगादिना वह्न्यादेर्वृत्तेर्येन सम्बन्धेनाभावस्तद्वति तेनावृत्तिर्वक्तव्या, इत्थञ्च तेन सम्बन्धेनासम्बद्धत्वोक्तौ नायं दोषः, अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकतया तद्वति तेन सम्बन्धेन प्रतियोगिनोऽसम्बद्धत्वात् परं तु समवायेन सत्ताया अभावस्य प्रतियोगितायामव्याप्तिस्तद्वति समवायेन वृत्तेरप्रसिद्धेः, तादृशस्वसम्बन्धाधिकरणावृत्तित्वोक्तत्वाभिधाने च व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगितायामव्याप्तिः, सिद्धान्तलक्षणवक्ष्यमाणरीत्या च खण्डशः प्रसिद्ध्या तत्परिहारोऽपीति ध्येयम् । अभावविरहात्मत्वमिति । न चान्योन्याभावप्रतियोगितत्वावच्छेदकयोरप्रसक्त्यतिप्रसक्ती प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्ष्यत्वे तु लक्षणेऽत्यन्तपदवैयर्थ्यं सर्वत्र नित्यस्य नित्यसाधारणरूपावच्छिन्नस्य चोपाधितासम्भवादितरथा तु भेदप्रतियोगितावारणाय संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यम्, विरहपदस्य तज्ज्ञानप्रतिबन्धकज्ञानविषयार्थकत्वात् । प्रतिबध्नाति हि तादात्म्येन प्रतियोगिज्ञानमन्योन्याभावबुद्धिम्, प्रतिबन्धकत्वञ्चात्रैककालावच्छेदेनैकत्रावर्तमानत्वमभावपदस्य च स्वाभावपरत्वात् । वस्तुतस्त्वेकसम्बन्धावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगिताया अनवच्छेदकमपि भवत्येव सम्बन्धान्तरावच्छिन्नायास्तस्या अवच्छेदकमतो यत्सम्बन्धावच्छिन्नायाः साध्यसमानाधिकरणाभावप्रतियोगिताया अनवच्छेदकं तत्सम्बन्धावच्छिन्नाया एव साधनसमानाधिकरणाभावप्रतियोगिताया अवच्छेदकं तद्वाच्यम् । तथा च संसर्गाभावत्वमनुपादेयमेव । वाशब्दोऽत्रास्वरसूचनाय । स च व्यधिकरणसम्बन्धेन सर्वस्य प्रतियोगिनस्तादृशत्वे मानाभावात् स्वाभावसम्बन्धित्वस्य स्वाभाव-

ज्ञानविषयत्वस्य वा लघोः सर्वत्र सम्भवित्वात् स्वाभावेत्यादौ षष्ठ्यर्थप्रतियोगितायाः प्रवेशात् तत्र स्वरूपसम्बन्धस्यैव शरणीकरणीयतया तस्यैवावश्यकत्वेन तथात्वौचित्यात् । अभावत्वप्रतिबन्धकत्वयोः प्रतियोगिघटितत्वात् तथाविधव्यवहारगोचरस्यापि विना प्रतियोगितां निर्वक्तुमशक्यत्वाच्च ।

(गा०) आत्माश्रयेति साध्यसमव्याप्तत्वघटकसाध्यनिरूपितोपाधिनिष्ठव्याप्तेरप्यनौपाधिकरूपतयाऽनौपाधिकत्वशरीरेऽनौपाधिकत्वनिवेशादिति भावः । यद्यप्यनौपाधिकत्वरूपव्याप्तेः प्रकृतसाधनघटिततया साधनभेदेन भेद आवश्यकस्तथा च साध्यसमव्याप्तोपाधिनिष्ठव्याप्तेः प्रकृतसाधननिष्ठव्याप्तिभिन्नत्वान्नात्माश्रयावकाशः, तथापि सिद्ध्यसिद्धिव्याघातपरिहाराय साध्यसमव्याप्तस्य व्यभिचारित्वसम्बन्धावच्छिन्नाभावो विवक्षणीयस्तत्र च प्रकृतसाधनाप्रवेशात्साधनभेदेन न व्याप्तिभेद इत्यभिप्रायेणेदम् । आत्माश्रयादीनि । यावत्साध्यव्यापकव्यापकत्वरूपानौपाधिकत्वे यावत्साध्यव्यापकान्तर्गतसाध्यसमव्याप्तिव्याप्तिनिरूपकत्वं यदि व्यापकत्वं तदा स्वनिष्ठव्याप्तिनिरूपकप्रकृतसाध्यकत्वघटितं तादृशानौपाधिकत्वं प्रकृतव्याप्तिघटितमित्यात्माश्रयः । यदि च यावत्साधनाव्यापकाव्यापकसाध्यसामानाधिकरण्यमनौपाधिकत्वं तदा प्रकृतसाध्यातिरिक्ते साधनव्यापकतां गृहीत्वापि घटादौ तद्व्यापकत्वग्रहसम्भवेन प्रकृतसाधननिष्ठप्रकृतसाध्यव्याप्तिग्रहस्यानौपाधिकत्वग्रहे नापेक्षेति नात्माश्रयोऽपि त्वनवस्थैवेत्यभिप्रायेणादिपदम् । ननु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वघटितोपाधिलक्षणस्यैतद्रूपत्वात् सत्त्वादिव्यादिस्थलीयैतत्संयोगाद्युपाधावव्याप्तिस्तेषामव्याप्यवृत्तितया साध्यवति तदभावसत्त्वादेवं नानाव्यक्तिकार्द्रेन्धनाद्युपाधावपि तद्व्यक्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वमादायाव्याप्तिरित्याशङ्क्य व्याप्तिलक्षणघटकनिरुक्तोपाधित्वस्य सकलोपाधिसाधारणत्वविरहेऽपि सर्वत्र व्यभिचारिणि किञ्चिदुपाधिसाधारण्येनैव व्याप्तिलक्षणानतिप्रसङ्ग इति तदव्याप्तिर्न दोषायेति परिहरति यत्रोपाधिरिति । तद्भिन्नेति । अव्याप्यवृत्तिनानाव्यक्तिकतत्तदुपाधिभिन्नेत्यर्थः । तद्वत्त्वप्रकारकप्रमाविषयत्वस्य विषयभेदेन भिन्नतया नाखण्डत्वसम्भव इति तदुपेक्षितम्, संयोगाद्युपाध्यभावप्रकारकप्रमाविषयत्वं केवलान्वयीति तदभावाप्रसिद्धिरतस्तदत्यन्ताभावमुपेक्ष्य तद्भेदानुसरणम्, तद्वद्भेदाभावस्य प्रतियोगितावच्छेदकात्मकतया स एव दोष इति प्रमाविषयत्वानुधावनम्, साध्यवत्यपि तद्वद्भेदभ्रमविषयतासम्भवाज्ज्ञानसामान्यमुपेक्ष्य प्रमानुधावनम्, आदिपदाद्व्यभिचारनिरूपकाधिकरणभेदादिपरिग्रहः । 'अस्ति' निरुक्तोपाधित्वाश्रय इति शेषः । तथा चैतावतैव तत्र नानोपाधिकत्वमिति भावः । ननु तादृशाखण्डोपाधेरपि किञ्चिद्देशकालवृत्तित्वविशिष्टस्य द्वित्वा

वच्छिन्नस्य चाभावः साध्यवत्यपि वर्तत इति तस्याप्युपाधित्वं न घटते, यदि चाप्रतियोगिपदं प्रतियोगितानवच्छेदकावच्छिन्नपरं तदा सद्धेतौ साधनाव्यापकस्य घटादेर्द्रव्यत्वमयत्वादिना साध्यव्यापकतामादायानौपाधिकत्वव्याघात इत्यत आह यदि चेति।

केचित्तु विशिष्टाभावस्य विशेष्यविशेषणसम्बन्धप्रतियोगिकत्वमेव स्वीकुर्वन्ति द्वित्वावच्छिन्नाभावञ्च नाङ्गीकुर्वन्ति अत एव मणिकारेणापि तादृशाभावानभ्युपगमादिति सिद्धान्तग्रन्थे वक्ष्यते इत्यत 'यदि सम्भव' इत्युक्तम्। दल नाव गान। तथा च सद्धेतौ घटत्वादिना साधनाव्यापकस्य घटादेः प्रमेयत्वादिना साध्यव्यापकत्वेऽपि साध्यव्यापकतावच्छेदकस्य साधनव्यापकतानवच्छेदकत्वासम्भवात् निरुक्तधर्मवत्त्वमिति न सोपाधितापत्तिरिति भावः। अत्र सम्बन्धादिविवक्षा स्वयमूह्या। सहानवस्थाननियमरूपविरोधितायाः प्रतियोगित्वस्वरूपत्वखण्डनस्य प्रकृतानुपयुक्तत्वशङ्काव्युदासाय तत्प्रयोजनं दर्शयति व्यवस्थामिति। सहानवस्थाननियमस्य व्याप्तिरूपतयाऽनौपाधिकत्वघटकोपाधिताशरीरनिविष्टप्रतियोगितायामनौपाधिकत्वान्तरस्य निवेशे तद्घटकप्रतियोगित्वान्तरे चानौपाधिकत्वस्येत्येव क्रमेण व्याप्तिविषयानवस्थामित्यर्थः। यद्यपि सहानवस्थाननियमस्तदधिकरणसामान्यावृत्तित्वं तच्च तदधिकरणवृत्तित्वत्वावच्छिन्नाभावरूपं न व्याप्तिघटितमिति नानवस्थावसरः। न च तदभावव्याप्यत्वरूपसहानवस्थाननियमपदार्थाभिप्रायेणानवस्थाप्रदर्शनमितिवाच्यम्, एवमप्यग्रे सत्ताभाववत्त्वमवेनत्वाप्रसिद्ध्या समवायेन सत्ताभावप्रतियोगितायामव्याप्तिप्रदर्शनस्यासङ्गत्यापत्तेः। तथापि तदधिकरणावृत्तित्वं यथाश्रुतम्। यदि च सहानवस्थान नियमपदार्थस्तदा विशिष्टसत्ताद्यभावप्रतियोगित्वासङ्ग्रहो विशिष्टस्यानतिरेकेण तत्र विशिष्टाभावाधिकरणावृत्तित्वस्य दुर्लभत्वादिति यदभाववन्निष्ठाधिकरणतासामान्ये यद्धर्मावच्छिन्ननिरूपितत्वाभावस्तद्वत्त्वमेव विवक्षणाय घटाभावादिमन्निष्ठान्यदीयाधिकरणताया घटादिनिरूपितत्वस्याभावसत्त्वादतिप्रसङ्गस्य वारणाय सामान्यपदोपादानम्। तदर्थश्च व्याप्तिरवेत्यभिप्रायेणेदम्, तादृशाधिकरणताया प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकतयाऽत्रऽप्रसिद्धिप्रदर्शनसङ्गतिः कपिसंयोगादेस्तदभावाधिकरणे भिन्नदेशावच्छेदेन घटादेश्च स्वध्वंसप्रागभावाधिकरणे द्रव्ये भिन्नकालावच्छेदेन वृत्त्याऽव्याप्तिमाशङ्क्य पूरयति एकेति। तथा चैकदेशावच्छिन्नं सदेककालावच्छिन्नं यदेकाधिकरणावस्थानं तदभाव इत्यर्थः। देशकालावच्छेद्यत्वयोरनुगमैकरूपेण निवेशस्तु न युक्तः कपिसंयोगादितदत्यन्ताभावयोरेककालावच्छेदेन संयोगतत्प्रागभावयोश्चैकदेशावच्छेदेनैकाधिकरणवृत्तितया तद्दोषतादवस्थ्यात्। यद्यप्येकदेशकालावच्छिन्नमित्यादेरभावावच्छेदकदेशावच्छिन्नं तदवच्छेदककालावच्छिन्नं यत्तदधिकरणनिष्ठाधिकरणत्वं तदनिरूपकत्वं तत्सामान्ये यन्निरूपितत्वाभावस्तत्त्वं वाऽर्थो न

सम्भवति वृक्षनिष्ठकपिसंयोगावच्छेदकशाखायामपि तादृशसंयोगानुत्पाददशायां तत्र तदभावावच्छेदकत्वात् तादृशसंयोगावच्छेदककालस्यापि मूलावच्छेदेन तदभाववृत्तौ तथात्वादव्याप्तेर्दुर्वारत्वात्, तथापि शाखावच्छेदेन कपिसंयोगसत्त्वदशायामपीदानीं शाखायां वृक्षो न कपिसंयोगीति प्रतीत्यापत्तिवारणाय तादृशप्रतीत्या कालविशेषावच्छिन्नस्यैव देशस्यावच्छेदकत्वमवगाह्यत इति स्वीकरणीयं तादृशदेशकालयोर्वृक्षेऽभाववृत्तौ पृथगवच्छेदकत्वसम्भवेऽपि तत्कालावच्छिन्नतद्देशस्यानवच्छेदकत्वान्नातिप्रसङ्गः। तथा च यत्कालावच्छिन्नयद्देशस्याभाववृत्ताववच्छेदकत्वं तत्कालावच्छिन्नतद्देशावच्छिन्नत्वमेकदेशकालावच्छेदेनेत्यस्यार्थ इति न कोऽपि दोषः, कालपदं क्षणपरम्, तेन दिवसात्मकस्थूलकालावच्छिन्नशाखादेः संयोगतदभावावच्छेदकत्वेऽपि न क्षतिः। देशपदमवच्छेदकदेशान्तरानवच्छिन्नदेशपरमतो विभिन्नभागावच्छिन्नस्थूलावयवस्य प्रतियोगितदभावोभयावच्छेदकत्वसम्भवेऽपि न क्षतिः। अथैवमपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमाद्घटत्वाभावप्रतियोगित्वासङ्ग्रहस्तदवच्छेदकस्यैवाप्रसिद्धेः। न चैकदेशकालावच्छेदेनेत्यस्यानवच्छिन्नत्वविशेषणे तात्पर्यान्न दोष इति वाच्यम्, संयोगाद्यभावस्यानवच्छिन्नाधिकरणतावति गुणादौ संयोगादेरवृत्त्या संयोगाद्यभावस्य प्रतियोगित्वसङ्ग्रहेऽपि संयोगादेरनवच्छिन्नाधिकरणत्वाप्रसिद्ध्या तत्प्रतियोगित्वासङ्ग्रहात्। न चाभावाधिकरणतायां न तद्विशेषणमपि तु तद्वन्निष्ठाधिकरणतायामेवेति नायं दोष इति वाच्यम्, एवमपि कपिसंयोगादेः स्वसमानाधिकरणगगनाद्यभावप्रतियोगितापत्तेर्दुर्वारत्वात्।

यत्तु व्याप्यवृत्तेरवच्छेदकानभ्युपगमे यदधिकरणनिष्ठाभावाधिकरणतायां यद्यत्क्षणावच्छिन्नयद्देशानवच्छेद्यत्वं तत्क्षणावच्छिन्नतद्देशानवच्छिन्नतदधिकरणनिष्ठाधिकरणत्वानिरूपकत्वे सति यदधिकरणनिष्ठस्याधिकरणतायां यद्यत्क्षणावच्छिन्नयद्देशानवच्छिन्नत्वं तत्क्षणावच्छिन्नतद्देशानवच्छिन्नतदधिकरणनिष्ठाधिकरणत्वानिरूपकतदभाववत्त्वस्य विवक्षणीयत्वादव्याप्यवृत्त्यभावप्रतियोगिन्यपि तस्याक्षतत्वात्। तथाहि पटादौ घटत्वाभावाधिकरणता यद्देशकालानवच्छिन्ना तदनवच्छिन्ना व्याप्यवृत्तिपटत्वाद्यधिकरणताप्रसिद्ध्या तदनिरूपकत्वादनवच्छिन्नस्याधिकरणताया घटादिनिष्ठतादृशपटत्वाभावाधिकरणत्वनिरूपकघटत्वाद्यभावकत्वाच्च व्याप्यवृत्तिघटत्वादेः स्वाभावप्रतियोगित्वनिर्वाहः, घटत्वादेरव्याप्यवृत्तिस्वसमानाधिकरणसंयोगादिप्रतियोगितावारणाय सत्यन्तम्, संयोगादेर्गगनाद्यभावप्रतियोगितावारणाय विशेष्यदलम्, विभिन्नक्षणावच्छिन्नस्य संयोगविशेषावच्छेदकमूलादेस्तदभावावच्छेदकत्वाद्वृक्षादिनिष्ठतदभावाधिकरणतायां न मूलानवच्छेद्यत्वं किं तु प्रतियोग्यनधिकरणघटाद्यवयवानवच्छेद्यत्वमेव तदनवच्छिन्ना च वृक्षादिनिष्ठसंयोगविशेषाधिकरणतापीति तत्राव्याप्तिरतः क्षणनिवेशः, तन्निवेशे च यत्क्षणावच्छिन्नस्य मूलादेः प्रतियोग्यवच्छेदकत्वं तत्क्षणावच्छिन्न-

तदनवच्छेद्यत्वमभावाधिकरणताया तादृशतदनवच्छेद्यत्वञ्च न प्रतियोग्यधिकरणतायामिति तथाविधाधिकरणत्वान्तरानिरूपकत्व प्रतियोगिन्यक्षतमेवेति नाव्याप्तिरिति। तदपि न। मूलाग्रादिरूपविभिन्नावच्छेदेन मध्यभागरूपैकावच्छेदेन च वृक्षादौ वर्तमानयोः संयोगयोरेकस्यापराभावप्रतियोगित्वापत्तेरेकसंयोगाभावाधिकरणतायास्तादृशमध्यभागाद्यनवच्छिन्नत्वादपरसंयोगाधिकरणतायास्तदनवच्छिन्नत्वेनापरसंयोगस्य तदनवच्छिन्नाधिकरणतान्तराप्रतियोगित्वेन सत्यन्तदलसत्त्वात्तत्र संयोगावच्छेदकाग्रादिभागस्यापरसंयोगाभावाधिकरणतावच्छेदकत्वेन विशेष्यदलसत्त्वात्। मैवम्, यादृशयादृशावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववन्निष्ठ यदभावाधिकरणत्वं तन्निष्ठ यत्तादृशावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववदधिकरणत्व तदनिरूपकत्वविवक्षया सामयस्याद्यगगनादे स्वाभावाभावत्व नोपेयत इति स्वाभावनिष्ठप्रतियोगित्वासङ्ग्रहो न दोषाय। अन्योन्याभावप्रतियोगिनि मूलोपदर्शितामव्याप्तिमुद्धरति अनतीति। वह्न्यादमूर्तोरात। सम्बन्धविशेषमनन्तर्भाव्याभावाधिकरणवृत्तित्वसामान्याभावनिवेशेऽव्याप्तिरिति शेष। यत्र सम्बन्धेनाभाव इति। य सम्बन्धो यदभावप्रतियोगितावच्छेदकतयाऽभिमत इत्यर्थ। एवमप्यन्योन्याभावप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन वृत्त्यप्रसिद्ध्या तत्र तेन सम्बन्धेन तदधिकरणावृत्तित्व दुर्घटमत आह तेन सम्बन्धेनासम्बद्धत्वोक्तावेवेति। स्वयं दूषणान्तरमाह परन्त्विति। तद्वति सामान्यादाविति शेष। 'समवायेन वृत्ते' प्रतियोगितावच्छेदकीभूतसमवायेन स्वसम्बद्धत्वस्य। तादृश इति। प्रतियोगितावच्छेदकसम्बन्धेन स्वसम्बद्धं यदधिकरणं तदवृत्तितद्भावकत्वाभिधाने चेत्यर्थ, तथा सति सत्तासमवायस्यवृत्तित्वस्य तदभावे सत्त्वेनोक्ताव्याप्तिपरिहारासम्भवादिति भाव। व्यधिकरणसम्बन्धेनेति। संयोगादिना गुणाद्यभावप्रतियोगिताया तेन सम्बन्धेन गुणादिसम्बद्धाधिकरणाप्रसिद्ध्याऽव्याप्तिरित्यर्थ। इदमुपलक्षणम्, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिमत्यपि काले कालिकादिसम्बन्धेनाभावस्य वृत्त्याऽनुयोगिताविशेषरूपाभावत्वावच्छेदकसम्बन्धेनावृत्तित्वस्य वाच्या, तथा च स्वरूपसम्बन्धेन सत्ताद्यभावस्य य सत्तादिरूपोऽभावस्तत्प्रतियोगित्वासङ्ग्रहोऽपि द्रव्य सत्ताद्यभावसम्बन्धाधिकरणे सामान्यादौ समवायादिरूपतादृशसम्बन्धेन वृत्तेरप्रसिद्धे। वक्ष्यमाणरागन। यादृशसम्बन्धसामान्य एकदेशकालावच्छिन्नयदभावाधिकरणानुयोगिकत्वस्य यद्रूपविशिष्टप्रतियोगिकत्वस्य च द्वयोर्व्यतिरेकस्तद्रूपवत्त्व तादृशसम्बन्धेन तदभावप्रतियोगित्वमितिरीत्येत्यर्थ। न च व्याप्यवृत्तेरवच्छेदकत्वानभ्युपगमे एकदेशकालावच्छिन्नाभावाधिकरणत्वाप्रसिद्ध्या तद्घटितोभयाभावाप्रसिद्धिरिति वाच्यम्, एकदेशकालानवच्छिन्नयदभावाधिकरणानुयोगिकत्वस्थले यद्यदधिकरणनिष्ठाभावाधिकरणताया यद्यद्देशकालानवच्छिन्नत्वावच्छिन्नत्वोभयाभावस्तत्र तत्तद्देशकालानवच्छिन्नत्वावच्छिन्नत्वोभयाभावस्तत्तदधिकरणानुयोगिकत्वद्वयं निवेश्य

तदुभयप्रतियोगिकत्वे तन्निरूपितत्वावच्छिन्नाभावनिवेशेन सामञ्जस्यात्। न चैवमपि समवायैक्यमते समवायेन द्रव्यत्वाभावप्रतियोगित्वासङ्ग्रहः प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाधिकरणताधर्मिकोभयाभावविवक्षयाऽधिकरणभेदेनाधिकरणताभेदं व्यवस्थाप्य तत्सङ्ग्रहे चान्योन्याभावप्रतियोगित्वव्याप्तिस्तादात्म्यसम्बन्धेनाधिकरणताया अप्रसिद्धेः सम्बन्धिना च सम्बन्ध एवेति तद्धर्मिकोभयाभावविवक्षणे पूर्वोक्त एव दोष इति वाच्यम्, प्रतियोगितावच्छेदकसम्बन्धनिरूपितानुयोगिताधर्मिकस्य यत्प्रतियोगिकत्वविशिष्टसम्बन्धप्रतियोगिकत्वनिरुक्तयदभावाधिकरणवृत्तित्वोभयाभावस्य विवक्षया समवायैक्यमतेऽतिप्रसङ्गवारणाय द्रव्यादिनिष्ठद्रव्यत्वादिप्रतियोगिकत्वविशिष्टसमवायप्रतियोगिकत्वविवक्षयानुयोगितातो गुणादिनिष्ठतदनुयोगिताभेदस्याभ्युपेयत्वेन प्रतीकारसम्भवादधिकमग्रे वक्ष्यामः। अवृत्तिगगनादेस्तदभावनिष्ठप्रतियोगित्वं नोपेयत एव तत्स्वीकारे च यस्य येन सम्बन्धेनाधिकरणे यस्य येन सम्बन्धेनावच्छिन्नैकावच्छिन्ना वा वृत्तिस्तत्तदुभयावृत्तिस्ववृत्ति यो धर्मः स्वभिन्नश्चेत् सति तद्धर्मवत्त्वमेव तत्सम्बन्धावच्छिन्नस्वनिष्ठानुयोगितानिरूपकं तत्सम्बन्धावच्छिन्नप्रतियोगित्वमिति विवक्षणीयं तादृशधर्मश्च घटतदभावान्यतरत्वादिकमेव, स्वभिन्नत्वनिवेशात् स्वस्य न स्वप्रतियोगित्वम्। अवृत्तिद्वयस्य परस्परप्रतियोगित्ववारणाय वृत्तिमन्निष्ठत्वेन धर्मो विशेषणीयः। एवमपि गोत्वादेरश्वत्वादिप्रतियोगिताप्रसङ्गवद् घटत्वादौ द्रव्यत्वाद्यभावप्रतियोगित्वप्रसङ्गनादवश्यमेव स्वाभावविरोधित्वनिवेशो वक्ष्यमाणमत इव स्वाभावेत्यत्र षष्ठ्यर्थप्रतियोगितानिवेशेनात्माश्रयः एव विरोधिताघटकोभयाभावाद्यपि प्रतियोगित्वान्तरप्रवेशादनवस्था चेत्यपि बोध्यम्। न च द्रव्यत्वाभावादेर्घटत्वादिप्रतियोगिकत्वमिष्टमेव द्रव्यत्वाद्यभाववति घटत्वं नास्तीत्यादिप्रत्ययस्य द्रव्यत्वाभावादिविषयकत्वे क्षतिविरहात् घटत्वं द्रव्यत्वाभावप्रतियोगीतिव्यवहारश्च समनियताभावैक्यमते द्रव्यत्वाभावद्रव्यसमवेतत्वविशिष्टाभावादीनामभेदवादिनामिवास्मन्मतेऽपीष्ट एव घटत्वत्वेन घटत्वं द्रव्यत्वाभावप्रतियोगीत्यादिव्यवहारोऽप्यधिकरणस्वरूपाभाववादिनां प्राभाकराणामिवास्माकमपीष्ट एव गोत्वादेरश्वत्वप्रतियोगिकत्वोपगमेऽपि क्षतिविरहोऽश्वादौ गोत्वादिकं नास्तीतिप्रतीतेरश्वत्वादिविषयताया इष्टत्वाद् गौरश्वत्वप्रतियोगीति व्यवहारो घटत्वं पटत्वप्रतियोगीत्यादिव्यवहारश्चाधिकरणवृत्त्यसाधारणधर्मस्वरूपाभाववादिभिरिष्यत एवेति वाच्यम्, एवं सति सर्वत्र विरुद्धधर्मेणैवाभावप्रत्ययोपपत्तावतिरिक्ताभावासिद्धिप्रसङ्गादेवं विरोधिताघटकोभयाभावेऽपि प्रतियोगितान्तरनिवेशादनवस्थेति ध्येयम्। तदवच्छेदकेति। प्रतियोगितावच्छेदकेत्यर्थः। अवच्छेदकमिति प्रतीकेति। घटाद्यन्योन्याभावाद्यभावस्य तत्प्रतियोगितावच्छेदकघटत्वादिमात्ररूपत्वादिति भावः। ननु नेदं प्रतियोगित्वपदमुख्यार्थनिर्वचनं किं तु व्याप्तिलक्षणप्रविष्टोपाधित्वघटकव्यापकतानिविष्टप्रतियोगि

तान्यरूपनिरूपणमेव तादृशप्रतियोगितायाः भेदप्रतियोगिसाधारण्यविरहेऽपि न क्षतिस्तावतापि व्याप्तिलक्षणस्य निर्दोषत्व'दित्यत आह अत्यन्तोपादानात् । अत्यन्तपदवैयर्थ्यमिति । धूमवान् वह्नेरित्यादौ चायोगोलकान्यत्वादिरूपोपाधेः साध्यवन्निष्ठभेदप्रतियोगितया व्यापकत्वानुपपत्तिरिति तद्वारणायैवात्यन्तपदोपादानम्, यदि चाभावाभाववत्त्वरूपमन्योन्याभावप्रतियोगिव्यावृत्तप्रतियोगित्वमुपाधित्वघटकव्यापकताशरीरे निवेश्यते तदा साध्यवन्निष्ठोपाधिभेदमादाय दोषस्यानवकाशात्तद्वैयर्थ्यमिति भावः । ननु साध्यवन्निष्ठध्वंसप्रागभावप्रतियोगिन आर्द्रेन्धनादेरुपाधितानिर्वाहायात्यन्तपदोपादानं तस्यापि तद्ध्वंसाद्यभावरूपत्वादित्यत आह व्यभिचारिणीति । व्यभिचारिणीति शेषः । 'नित्यस्य' व्यभिचारनिरूपकाधिकरणभेदादेः, द्वित्वाद्यवच्छिन्नाभावप्रतियोगितामादायासम्भववारणाय प्रतियोगितानवच्छेदकरूपानवच्छिन्नत्वविवक्षाया आवश्यकत्वेनार्द्रेन्धनादेरपि ध्वंसादिप्रतियोगितानवच्छेदकार्द्रेन्धनायोगोलकादिभेदान्यतरत्वादिनोपाधित्वसम्भव इत्याशयेनाह नित्यसाधारणात् । न च ध्वंसप्रागभावादीनां सामान्यधर्मो न प्रतियोगितावच्छेदक इति साध्यवन्निष्ठध्वंसप्रागभावादिरूपाभावप्रतियोगितावच्छेदकं नार्द्रेन्धनत्वमिति नित्यसाधारणधर्मपर्यन्तानुधावनमफलमिति वाच्यम्, स्वसमानाधिकरणार्द्रेन्धनध्वंसासमानकालीनतत्प्रागभावानां तादृशतत्प्रागभावासमानकालीनतद्ध्वंसानामार्द्रेन्धनत्वस्यैव प्रतियोगितावच्छेदकत्वादन्यथा ध्वंसप्रागभावयोरत्यन्ताभावविरुद्धत्वमते तादृशध्वंसप्रागभावाधिकरणेऽप्येदानीमार्द्रेन्धनं नास्तीत्यादिप्रत्ययानुपपत्तेः । वस्तुतस्तु एतद्धूमवान् वह्नेरित्यादावेतदार्द्रेन्धनादिव्यक्तीनां नोपाधिता सम्भवति तत्तद्व्यक्तित्वादेः साध्यवन्निष्ठध्वंसादिप्रतियोगितावच्छेदकत्वादित्याशङ्क्य 'नित्यस्य' इत्यनेन तत्तद्व्यक्तीनां व्याप्तिलक्षणाप्रवेशेऽपि न क्षतिरित्युक्त्वा तादृशोपाधीनामपि व्यापकरूपेणोपाधितया व्याप्तिलक्षणे प्रवेश एवेति 'नित्यसाधारणरूपावच्छिन्नस्य च' इत्यनेनाभिहितम्, नित्यसाधारण्यञ्च तद्देशनिष्ठध्वंसाद्यप्रतियोगिसाधारण्यात्मकं तेनार्द्रेन्धनत्वादेरपि सङ्ग्रहान्न न्यूनतेति ध्येयम् । उपाधित्वसम्भवादिति । तथा चार्द्रेन्धनत्वाद्यवच्छिन्नस्य प्रकृतोपाधित्वानुपपत्तावपि न व्याप्तिलक्षणातिव्याप्तिप्रसङ्ग इति भावः । 'इतरथा' भेदप्रतियोगितासाधारणरूपावच्छिन्नप्रतियोगिताया लक्षणघटकत्वे । भेदप्रतियोगितेति । अयोगोलकभेदादिभेदप्रतियोगितेत्यर्थः । अयोगोलकभेदादेः साध्यवन्निष्ठभेदप्रतियोगितयाऽनुपाधित्वेऽप्ययोगोलकभेदधूमवदन्यतरत्वाद्यवच्छिन्नस्योपाधितासम्भवाद् व्याप्तिलक्षणातिप्रसक्तिर्निर्वहति, न हि तादृशान्यतरत्वावच्छिन्ने धूमवति तत्तदवच्छिन्नभेदो वर्तते येन भेदप्रतियोगितामादाय तदवच्छिन्नस्योपाधित्वं व्याहन्येत । न चेदं जन्यं पृथिवीत्वादित्यादौ परमाणुभेदादेर्जन्यनिष्ठभेदप्रतियोगित्वेन साध्याव्यापकतया जन्यपरमाणुभेदान्यतरत्वावच्छिन्नस्य परमाणुसाधारण्येन साधनाव्यापकतयोपाधित्वं न सम्भवतीति तत्रानौपाधिकत्वव्यापकतयाऽ-

त्यन्तपदसार्थक्यमिति वाच्यम्, साधनाव्यापकतायामत्यन्ताभावत्वनिवेशस्य निष्प्रयोजनकतया तादृशान्यतरत्वावच्छिन्नस्य परमाणुभिन्नत्वावच्छिन्नस्य च साधनाधिकरणपरमाणुनिष्ठभेदप्रतियोगित्वेन साधनाव्यापकतयोपाधित्वसम्भवात्।

यत्तु घटाभावभिन्नं मेयत्वादित्यादौ घटाभावभिन्नत्वाद्यवच्छिन्नस्यापि साध्यवन्निष्ठघटाद्यभावस्वरूपघटाद्यभावनिष्ठस्वभेदप्रतियोगितया साध्यव्यापकत्वासम्भवेनानौपाधिकत्वापत्त्या तद्वारकतयाऽत्यन्तपदसार्थक्यं तत्पददाने घटाभावभिन्नादेरत्यन्ताभावत्वनिरूपकप्रतियोगित्वघटितसाधनाव्यापकत्वविरहेणानुपाधित्वेऽपि घटाभावभेदादेरेवोपाधित्वसम्भवादिति, तन्न, घटाभावभेदात्यन्ताभावस्यापि साध्यवन्निष्ठघटाभावमात्रवृत्तित्वेन तुल्ययुक्त्या घटाभावरूपतयाऽत्यन्तपदोपादानेऽपि तत्रोपाधेर्दुर्लभ्यात्। न चात्यन्तपददानादत्यन्ताभावत्वनिरूपकप्रतियोगित्वलाभादुक्तस्थले घटाभावभिन्नस्य घटाभावात्मकस्वभेदीयभेदत्वनिरूपकप्रतियोगित्वेऽप्यत्यन्ताभावत्वनिरूपकप्रतियोगित्वविरहादुपाधित्वं सम्भवत्येवेति वाच्यम्, घटाभावभिन्नं पटत्वादित्यादावुक्तक्रमेण साध्यव्यापकस्य घटाभावभिन्नस्य साधनसमानाधिकरणघटाभावरूपस्वभेदप्रतियोगितयोपाधितापत्त्या साधनाव्यापकत्वदलेऽप्यत्यन्ताभावत्वनिरूपकप्रतियोगित्वनिवेशस्यावश्यकत्वेनोक्तस्थले प्रमेयत्वादिरूपसाधनाव्यापकतया तस्योपाधित्वासम्भवात्, विवक्षान्तरेण घटाभावभिन्नभेदस्य घटाभावत्वस्वरूपतया तस्य साध्यासमानाधिकरणत्वान्नोपाधित्वहानिरिति भावः। घटाभावभेदस्योपाधित्वोपपादने घटाभावभिन्नस्यापि तदुपपादनसम्भवेनात्यन्तपदवैयर्थ्यस्यावश्यकत्वादिति चेन्न, अखण्डनित्यायोगोलकभेदरूपोपाधेः साध्यवति कथञ्चिदपि नात्यन्ताभावो विशिष्टाभावस्य विशेष्यविशेषणसम्बन्धप्रतियोगिकत्वमतावलम्बनादुक्तेः न स्त इत्यादिप्रतीतेश्च परम्परासम्बन्धेन द्वित्वाद्यभाव एव विषय इति मताश्रयणाच्च। व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं वा प्रतियोगितायां विशेषणं देयम्, तथा चाप्रतियोगित्वगर्भमेव व्यापकत्वं वाच्यं न तु प्रतियोगितानवच्छेदकावच्छिन्नत्वरूपम्, ग्रन्थकृतापि 'यदि च'इत्यनेनानवच्छेदकावच्छिन्नत्वनिवेशो प्रागनिर्भरो दर्शितः। एवञ्चायोगोलकभेदसाध्यवदन्यतरत्वाद्यवच्छिन्नस्योपाधित्वं दुरुपपादमेव तादृशस्य साध्यवतः साध्यवन्निष्ठात्यन्ताभावप्रतियोगित्वात्, अयोगोलकभेदादेश्च तादृशभेदप्रतियोगित्वादित्यत्यन्तपदसार्थक्यात्। नन्वेवमपि नित्यसंसर्गाभावत्वरूपात्यन्ताभावत्वघटकध्वंसादिवारकनित्यत्वांशस्यानतिप्रयोजनकत्वमेवेत्याशङ्कायां नित्यत्वांशो न निवेश्यत एव केवलं संसर्गाभावत्वलाभायैवात्यन्तपदमिति दर्शयति संसर्गाभावेति। 'तस्य' अत्यन्तपदस्य, अन्योन्याभावप्रतियोगिन्यव्याप्तिं परिहर्तुमाह विरहपदस्येति। तज्ज्ञानेति। तदन्वितमभावान्वितं यज्ज्ञानं तत्प्रतिबन्धकज्ञानविषयार्थकत्वादि·

त्यर्थः । अभावान्वय उपलक्षणं ज्ञानप्रभृतीनामेव विरहपदार्थघटकत्वं बोध्यम्, तेन नाभावपदवैयर्थ्यम् । एवञ्च तदभावग्रहप्रतिबन्धकग्रहविषयत्वमेव तदभावप्रतियोगित्वमिति फलितम् । एतच्चान्योन्याभावप्रतियोगिसाधारणमेवेत्याह प्रतिबध्नातीति । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिप्रकारकनिश्चयस्याभावधीप्रतिबन्धकत्वादिति भावः । प्रतिबन्धकत्वं यदि कारणीभूताभावप्रतियोगित्वं तदा प्रतियोगित्वान्तरप्रवेशादनवस्थेत्यतस्तदन्यथा निर्वक्ति प्रतिबन्धकत्वञ्चेति । 'अत्र' प्रतियोगितालक्षणे, अभावप्रतियोगिमत्ताज्ञानयोरपि भिन्नकालावच्छेदेनैकनात्मन्येकक्षणावच्छेदेन च भिन्नात्मनि वर्तमानत्वात् । एककालावच्छेदेन एकत्रेति । कालपदं क्षणपरम्, तेन स्थूलकालावच्छेदेन तयोरेकाधिकरणवृत्तित्वेऽपि न क्षतिः । अत्र 'एकत्र'इत्यनतिप्रयोजनकम् । अभावज्ञानाधिकरणक्षणावच्छेदेन तच्छून्यात्मनिष्ठप्रतियोगिज्ञानासङ्ग्रहेऽपि तज्ज्ञानाधिकरणक्षणावृत्तियत्किञ्चित्प्रतियोगिज्ञानव्यक्तिमादाय लक्षणगमनसम्भवात् । न च ज्ञानमात्रस्यैव परमेश्वरीयाभावज्ञानाधिकरणक्षणवृत्तितयाऽभावज्ञानाधिकरणक्षणावृत्तिज्ञानाप्रसिद्धिरिति वाच्यम्, अभावज्ञानावच्छेदकक्षणावच्छिन्नवृत्तिकान्यत्वरूपस्यैककालावच्छेदेनावर्तमानत्वस्य निवेशो नित्यस्य भगवज्ज्ञानस्य कालविशेषानवच्छिन्नतया सर्वत्र प्रतियोगिज्ञाने तादृशवृत्तिकत्वानियमात् । घटाद्यभावज्ञानाद्यवच्छेदकक्षणानवच्छिन्नपटादिज्ञानव्यक्तिमादायातिप्रसङ्गस्त्वेकक्षणावच्छेदेन घटाद्यभावज्ञानाधिकरणावृत्तिपटादिज्ञानस्यापि सत्त्वेनातिप्रसङ्गवदभावपदस्य स्वाभावपरतयैव वारणीय इत्यवधेयम् । न चैवं सत्येकक्षणावच्छिन्नत्वं परित्यज्यैकाधिकरणावृत्तित्वस्य निवेशेनापि निर्वाहसम्भव एकपुरुषीयघटाद्यभावज्ञानव्यधिकरणपुरुषान्तरीयघटादिज्ञानमादायैव घटादौ तदभावप्रतियोगित्वोपपत्तेरिति वाच्यम्, अभावज्ञानस्य हि घटाद्यभावज्ञानत्वेनेव निवेशो न तु तत्तद्व्यक्तित्वादिना तथा च घटाभावज्ञानाधिकरणावृत्तिघटज्ञानमेव दुर्घटं सर्वेषामेवात्मनां कदाचिद्घटाभावज्ञानवत्त्वादित्येकक्षणावच्छिन्नत्वनिवेशस्यावश्यकत्वात् । न च तदधिकरणावृत्तित्वशरीरे प्रतियोगितायां तदधिकरणवृत्तित्वत्वावच्छिन्नत्वनिवेशनमफलं तदधिकरणवृत्तित्वप्रतियोगिकाभावनिवेशेनाप्युपपत्तेर्घटाभावज्ञानवद्वृत्तिपटादिज्ञाने तद्वृत्तित्वप्रतियोगिकतद्विशेषाभावसत्त्वेऽपि स्वाभावस्य निवेशनीयतयाऽतिप्रसङ्गानवकाशात् तथा च घटादिज्ञाने घटाभावज्ञानाधिकरणवृत्तित्वसत्त्वेऽपि तत्प्रतियोगिताकाभावसौलभ्याद् घटादेः स्वाभावप्रतियोगित्वमुपपद्यत एवेति वाच्यम्, तदधिकरणवृत्तित्वनिष्ठप्रतियोगितायाः प्रकारतया निवेशने प्रतियोगित्वज्ञाने प्रतियोगित्वान्तरज्ञानापेक्षया दुर्ज्ञेयत्त्वापत्त्याऽभावे तादृशप्रतियोगितायाः सम्बन्धविधयैव निवेश्यतया प्रतियोगिताया यत्र प्रतियोगिसंसर्गतया प्रवेशस्तत्र प्रतियोगिप्रकारीभूतधर्मावच्छिन्नत्वमानस्यावश्यकतया तदधिकरणावृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्यैव प्रतिबन्धकतारूपत-

यैकक्षणावच्छिन्नत्वानिवेश उक्तानुपपत्तेरनुद्धारादित्यवधेयम्।

अन्योन्याभावप्रतियोगितावच्छेदकातिप्रसक्तिं निराकर्तुमाह अभाववद्वृत्ति चेति। स्वाभावपरत्वादिति। तथा च स्वीयो योऽभावः स्वनिष्ठतद्विरहत्वमेव स्वस्य तदभावप्रतियोगित्वम्, घटान्योन्याभावो न घटत्वाभाव इति घटत्वादिनिष्ठतद्विरहत्वं न तत्प्रतियोगित्वमिति भावः। घट एतदभावप्रतियोगीत्यादावभावपदं लक्षणया घटादिरूपसमभिव्याहृतपदार्थविशेषिताभावपरम्, प्रतियोगिपदं ज्ञानप्रतिबन्धकज्ञानविषयत्वावच्छिन्नार्थकम्, तदेकदेशज्ञाने चाभावविषयकत्वान्वय इति स्वत्वाननुगमेऽपि न प्रतियोगिपदस्य शक्त्यानन्त्यप्रसक्तो न वाऽभावपदार्थानन्वयापत्तिरिति ध्येयम्। सम्बन्धविशेषावच्छिन्नत्वस्य व्यापकताघटकप्रतियोगितायामवश्यं निवेशनीयतया भेदप्रतियोगितामादायोक्तदोषासंभवेन संसर्गाभावत्वनिवेशवैयर्थ्यमित्यन्तपदं सम्बन्धविशेषावच्छिन्नत्वलाभार्थकतयैव व्याख्येयं तथा च प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्षणत्वेऽपि न क्षतिरित्याह वस्तुतस्त्वित्यादिना। एतत्सम्बन्धावच्छिन्नाया इति। तथा च साध्यवन्निष्ठाभावप्रतियोगितासामान्यानवच्छेदकत्वनिवेशे प्रतियोगितावच्छेदकमात्रस्यैव साध्यवन्निष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकतया तादृशप्रतियोगितासामान्यानवच्छेदकसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकाप्रसिद्धिः। न चायोगोलकभेदत्वादिकमेव तथा धूमादिमति संयोगादिव्यधिकरणसम्बन्धावच्छिन्नायोगोलकभेदाभावसत्त्वेऽपि तत्प्रतियोगितायां लाघवेन शुद्धभेदत्वादेरवच्छेदकत्वोपगमादिति वाच्यम्, विषयतासम्बन्धेन कालिकसम्बन्धेन वाऽयोगोलकभेदाद्यभावप्रतियोगितायामेवायोगोलकभेदत्वादेरवच्छेदकतया तस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वासम्भवादयोगोलकभेदाविषयकभेदान्तरविषयकज्ञानं विषयितासम्बन्धेन भेदत्वरूपसामान्यधर्मावच्छिन्नाभावासम्भवेन तत्साधारणतादृशसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य भेदसामान्यानधिकरणदेशाप्रसिद्ध्या काले कालिकसम्बन्धावच्छिन्नभेदत्वावच्छिन्नाभावासम्भवेनायोगोलकभेदाद्यनधिकरणायोगोलकाद्यवच्छेदेन कालवृत्तेः कालिकसम्बन्धेनायोगोलकभेदाद्यभावस्य च प्रतियोगितायां शुद्धभेदत्वादेरवच्छेदकत्वायोगात्। यदि च यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं निवेश्यायोगोलकभेदत्वादेस्तथात्वमुपपाद्यते तदा वह्निमान् धूमादित्यादौ वह्न्यादिमन्निष्ठसंयोगसमवायदैशिकविशेषणतासम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकधूमादिमन्निष्ठसमवायसंयोगकालिकसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकवह्नित्वद्रव्यत्वत्वहृद्भेदत्वाद्यवच्छिन्नस्योपाधितापत्तिरिति भावः। तत्सम्बन्धावच्छिन्नाया इति। तथा च संयोगादिसम्बन्धावच्छिन्नवह्न्यादिमन्निष्ठाभावप्रतियोगितानवच्छेदकवह्नित्वादेः साधनवन्निष्ठतत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वासम्भवाद्धूमादिमन्निष्ठविशेषणताविशेषादिसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकायोगोलकभेदत्वादेर्वह्न्यादिमन्निष्ठ-

तादृशसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वाच्च न कश्चिद्दोष इति भावः। संसर्गाभावत्वमनुपादेयमेवेति। अयोगोलकमेदत्वादेर्धूमवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि विशेषणताविशेषसम्बन्धादिघटितनिरुक्तोपाधितावच्छेदकत्वस्य तत्राक्षतत्वादिति भावः। 'स च' अस्वरसश्च। व्यधिकरणसम्बन्धेनेति। तथा च यादृशव्यधिकरणसम्बन्धेन संयोगादिना यस्य रूपादेः क्वचिदपि कस्यचिद्भ्रमो न जातस्तस्य तादृशसम्बन्धावच्छिन्नप्रतियोगित्वानुपपत्तिः। प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिप्रकारकज्ञानस्याभावधीविरोधित्वात्तादृशाभावधीप्रतिबन्धकज्ञानस्यैवाप्रसिद्धेः। यद्यपि समानधर्मिकयोरेवाभावप्रतियोगिमत्ताज्ञानयोः प्रतिबध्यप्रतिबन्धकभाव इति समानाधिकरणसम्बन्धावच्छिन्नाभावस्थलेऽपि विरोधिनोरभावप्रतियोगिज्ञानयोरेकतरस्य भ्रमत्वनियम इति यादृशाभावस्य तत्प्रतियोगिनो वा भ्रमो न कदाचिदपि प्रसिद्धस्तदभावप्रतियोगित्वाव्याप्तिसम्भव, तथापि समानविशेष्यताप्रत्यासत्त्या प्रतिबध्यप्रतिबन्धकभावोपगमे भिन्नधर्मिकज्ञानस्यापि प्रतिबन्धकतावच्छेदकाक्रान्ततया तादृशभ्रमात्मकज्ञानमादाय लक्षणसमन्वयः सम्भवतीति व्यधिकरणसम्बन्धावच्छिन्नाभावानुधावनम्। ननु प्रतिबन्धकत्वं न कारणीभूताभावप्रतियोगित्वमपि त्वेककालावच्छेदेनैकत्रावर्तमानत्वमिति प्रागेवोक्तमेवञ्च यादृशव्यधिकरणसम्बन्धेन यस्य प्रतियोगिनो भ्रमोऽप्रसिद्धस्तादृशसम्बन्धावच्छिन्नतदभावज्ञानासमानकालीनतत्प्रतियोगिविषयकसम्बन्धान्तरावगाहिभ्रममादायैव लक्षणसङ्गतिः सम्भवतीत्यतो दूषणान्तरमाह स्वाभावेति। सम्बन्धित्वस्य नियमघटिततया गौरवादाह स्वाभावज्ञानेति। लघोरित्यस्य स्वाभावज्ञानप्रतिबन्धकज्ञानविषयत्वापेक्षयेत्यादिः। सर्वत्र सम्भविन्यादिति। सर्वत्र प्रतियोगितारूपत्वसम्भवादित्यर्थः। तदभावज्ञानविषयोदासीनेऽतिप्रसङ्गस्य स्वांशनिवेशेनैवायोगादिति भावः। ननु नथैवास्त्वित्यत आह स्वाभावेत्यनेति। 'स्वाभावेत्यादौ' इति पाठे यथाश्रुतविरहत्वनिवेशपक्षेऽभावविरहेत्यस्यादिना परिग्रहः। षष्ठ्यर्थप्रतियोगिताया इति। स्वस्याभावः स्वाभाव इतिषष्ठ्यर्थस्य प्रतियोगित्वातिरिक्तानतिप्रसक्तस्य दुर्वचत्वादिति भावः। तत्र स्वरूपसम्बन्धस्यैवेति। अन्यथा आत्माश्रयादिति भावः। यद्यपि 'स्वाभावे'त्यत्र प्रतियोगितायाः सम्बन्धविधया निवेशे सम्बन्धज्ञानस्य विशिष्टवैशिष्ट्यबुद्धहेतुतया 'स्वाभावे'त्यत्र स्वाभावाभावत्वरूपप्रतियोगितानिवेशेपि तज्ज्ञानात्पूर्वं न तज्ज्ञानापेक्षेति न दुर्ज्ञेयता तथापि विशिष्टसम्बन्धे सम्बन्धसम्बन्धस्यापि घटकतया सम्बन्धविधया भासमानस्य तस्य शरीरे तस्य सम्बन्धविधया भानं तादृशरीत्या भानान्तर्गतमपि सम्बन्धविधया तद्भानमिति विषयतानवस्था दुर्वारैव। 'तथा चौचित्यात्' प्रतियोगितात्वौचित्यात्। न च स्वाभावे स्वस्य सम्बन्धोऽनुयोगिता न तु प्रतियोगिता सा च स्वरूपसम्बन्धरूपेवास्तां प्रतियोगिता तु निरुक्तरूपेत्याशङ्क्यम्। अनुयोगितायाः स्वरूपसम्बन्धात्मकत्वेऽपि निरुक्तापेक्षया लघोस्तद्रूपकत्वस्यैव प्रतियोगितात्वौचित्यात्। प्रकारान्तरेण

प्रतियोगिताप्रवेशमाह अभावत्वेति । अभावत्वं द्रव्यादिषट्प्रतियोगिकभेदवत्त्वम्, 'प्रतिबन्धकत्वं' एकत्र वर्तमानत्वादिप्रतियोगिकाभाव इति भाव'। नन्वभावादिव्यवहारगोचरत्वमेवाभावत्वं न तु प्रतियोगिताघटितं निरुच रूपमित्यत आह तथाविधेति । विना प्रतियोगितामिति । प्रतियोगितान्तर्भावमन्तरेणेत्यर्थ । तथाविधव्यवहारगोचरत्वमभावादिशब्दप्रतिपाद्यत्वं तत्पदशक्तिविषयत्वरूपं चोभयथापि जन्यताघटितं प्रतिपाद्यत्वस्य तज्जन्यप्रतिपत्तिविषयत्वरूपत्वात्, तत्पदशक्तेश्च तत्पदजन्यबोधविषयत्वप्रकारकभगवदिच्छारूपत्वात्, जन्यता च व्याप्तिघटिता, तस्याश्च प्रतियोगिताघटितत्वादिति भाव । एवञ्च प्रतियोगिता स्वरूपसम्बन्धविशेष इति पूर्वमत एव मणिकारस्य निर्भर इति सूचितम् ।

इदं त्ववधेयम्, घटो नास्तीत्यभावबुद्धावभावादौ प्रतियोगिन एव प्रकारतया भानान्मण्यभावादे कारणत्वे प्रतियोगिनोऽवच्छेदकत्वाद्याभावनिष्ठप्रतियोगिनिरूपितोऽनुयोगितारूय स्वरूपसम्बन्धोऽवश्यमङ्गीकार्य प्रतियोगिन्यभावविशिष्टबुद्ध्यात्मकोऽभावीयो घट इत्यादिप्रत्ययस्तु नानुभवसिद्ध इत्यभावीयप्रतियोगिताख्यस्वरूपसम्बन्धे मानाभाव प्रतियोगिव्यवहारस्त्वनुयोगितानिरूपकत्वमेवावलम्बते ध्वंसस्य च प्रतियोगिनिष्ठप्रत्यासत्त्या प्रतियोगिजन्यत्वानुरोधेन तस्य प्रतियोगिनि सम्बन्धोपगम आवश्यक इति चेदस्तु तथा, तथाप्यभावान्तरस्य तादृशसम्बन्धो निष्प्रमाण एव। न च जन्यत्वस्य यत्र कार्यतावच्छेदकता तत्र प्रागभावादिनिष्ठानुयोगितानिरूपकत्वापेक्षया प्रतियोगितासम्बन्धेन प्रागभाववत्त्वस्य तथात्वे लाघवात् प्रागभावस्यापि तादृशसम्बन्ध सिद्ध्यतीति वाच्यम्, तत्र निरूपकतासम्बन्धेनानुयोगिताविशेषरूपप्रागभावत्वस्यैवावच्छेदकत्वोपगमात् । अन्यथा प्रागभावनिष्ठात्यन्ताभावादिभेदस्याधिकरणस्वरूपतामते जन्यत्वस्यात्यन्ताभावादिसाधारण्यापत्ते गौरवाच्चेति ॥

(चि०) यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न, सोपाधेरपि तथात्वात्, तथाहि साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनं तत्प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः ।

(दी०) यत्साध्यस्य यत्समानाधिकरणसाध्यस्य । तथाहीत्यादि । यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यावत् साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यावत् यत्समानाधिकरणात्य-

न्ताभावप्रतियोगितानवच्छेदकं तत्त्वमित्यर्थे तु नोक्तदोष इति ध्येयम् । प्रतियोगितयोश्चैकसम्बन्धावच्छिन्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा वक्तव्यम्, तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽप्येकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकस्य सम्बन्धान्तरावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः । व्यभिचारिणि तु यत्राधिकरणे व्यभिचारो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वं विशेषणताविशेषावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नातिप्रसङ्गः । वस्तुतस्तु हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावद्यद्धर्मावच्छिन्नयत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं साध्यसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावत्स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं तत्त्वं वा व्याप्तिरिति ध्येयम् ।

(गा०) 'यत्साध्यस्य' इत्यत्र कर्मधारयसमासे व्याप्तेर्हेतुनिष्ठत्वालाभ इति षष्ठीतत्पुरुषमवलम्ब्य व्याचष्टे यत्समानाधिकरणेति । तथाहीत्यादिना दर्शितोभयविधानौपाधिकत्वस्य सोपाधावतिप्रसङ्गमुद्धरति यत्समानाधिकरणात्यन्ताभावेत्यादिना । अत्यन्तपदानि मूले तत्पदमस्तीत्युपात्तानि न तु विवक्षितार्थकानि, सम्बन्धविशेषावच्छिन्नत्वेन प्रतियोगिताया अग्रे विशेषणीयतया व्यावृत्त्यभावात् । नोक्तदोष इति । आर्द्रेन्धनायोगोलकान्यत्वादीनां धूमादिसाध्यवन्निष्ठतत्तद्व्यक्तित्वोभयत्वाद्यवच्छिन्नप्रतियोगितावत्त्वेऽपि तत्त्वस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वात्तादृशधर्मस्य महानसीयवह्न्यादिरूपयत्किञ्चित्साधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेऽपि साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभाववत्त्वाभावादिति भावः । एकसम्बन्धावच्छिन्नत्वमिति । साधनसमानाधिकरणाभावीययद्यत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वं यस्य तस्य साध्यवन्निष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वं साध्यवन्निष्ठाभावीययद्यत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं यस्य तस्य साधनवन्निष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमित्येव विवक्षणीयमित्यर्थः । विशेषणताविशेषसम्बन्धमात्रनिवेशेनैव सामञ्जस्ये सम्बन्धान्तरनिवेशनमफलमित्याशयेनाह विशेषणतेति । प्रथमलक्षणे सम्बन्धविवक्षायाः फलमाह प्रतियोगितावच्छेदकमात्रस्यैवेति । मात्र-

पदं कृत्स्नार्थकम्, तथा च सुतरां साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकसामान्ये साध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमिति सम्बन्धाविवक्षणेऽतिव्याप्तिः स्यादिति भावः। लघुधर्मसमनियतगुरुधर्मस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वासम्भवाद्धर्ममात्रमुपेक्ष्य प्रतियोगितावच्छेदकधर्मानुसरणम्। यद्यपि कम्बुग्रीवादिमत्त्वादेरपि विषयितासम्बन्धावच्छिन्नतद्विशिष्टाभावप्रतियोगितावच्छेदकत्वं सम्भवति घटत्वादिविशिष्टविषयकेऽपि कम्बुग्रीवादिमत्त्वाप्रकारके ज्ञानादौ तद्विशिष्टस्य विषयितासम्बन्धावच्छिन्नाभावसत्त्वेन लघुघटत्वादेस्तत्प्रतियोगितावच्छेदकत्वासम्भवात् तथापि विषयिताया वृत्त्यनियामकत्वेनाभावप्रतियोगितावच्छेदकत्वं नास्तीत्यभिप्रायेणेदम्। अयोगोलकभेदत्वादेस्तु धूमादिमन्निष्ठकालिकादिसम्बन्धावच्छिन्नाभावप्रतियोगितायामवच्छेदकत्वमिति बोध्यम्। द्वितीयलक्षणे सम्बन्धविवक्षाफलं दर्शयति एतत्सम्बन्धेति। तथा च यदि यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यद्यत्तत्र साधनसमानाधिकरणाभावीयप्रतियोगितासामान्यावच्छेदकत्वाभावो विवक्षितस्तदाऽसम्भवः स्यादिति भावः। यदि साधनसमानाधिकरणाभावीययत्किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वाभावो निवेश्यत उभयदले प्रतियोगितासामान्यं वा तदा पुनरतिव्याप्तिरेवेति हृदयम्। उभयलक्षण एव सम्बन्धविवक्षणे व्यभिचारिण्यतिव्याप्तिवारणप्रकारं दर्शयति व्यभिचारिणि चेति। तन्निष्ठाभावप्रतियोगितावच्छेदकमिति। तथा च साधनवन्निष्ठाभावप्रतियोगितावच्छेदकेषु साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकेषु वा यावत्सु साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वान्तर्भावात्तत्र च साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसाधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वयोरभावाच्च लक्षणद्वयातिव्याप्तिरिति भावः। अत्यन्ताभावघटितयावत्साधनाव्यापकाव्यापकसाध्यसामानाधिकरण्ययावत्साध्यव्यापकव्यापकत्वयोरभावप्रतियोगितावच्छेदकसम्बन्धविशेषघटितत्वेन गुरुतया तदघटितमन्योन्याभावगर्भलक्षणद्वयमाह वस्तुत इति। यद्यप्यन्योन्याभावगर्भलक्षणेऽपि प्रतियोगितावच्छेदकतयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा निवेशनमावश्यकम्, अन्यथाऽयोगोलकान्यत्वादेरपि धूमाद्यात्मकसाध्यवन्निष्ठस्य विषयितादिसम्बन्धेन स्वावच्छिन्नभेदस्य प्रतियोगितावच्छेदकतयाऽतिप्रसङ्गादत्यन्ताभावघटितलक्षणे च तादृशसम्बन्धेनायोगोलकभेदत्वाद्यवच्छिन्नज्ञानादेर्याऽत्यन्ताभावस्तत्प्रतियोगितावच्छेदकतामादायातिप्रसङ्गो न सम्भवति विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगितायां शुद्धभेदत्वादेरेवावच्छेदकत्वसम्भवेन गुरोरयोगोलकभेदत्वादेरनवच्छेदकत्वादिति तत्र प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धनिवेशो नास्ति तथा चान्योन्याभावगर्भव्याप्तौ लाघवानवकाशः, तथापि गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमतेऽत्यन्ताभावगर्भलक्षणेऽपि प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धनिवेश

आवश्यकः। एवञ्च भेदत्वादेर्विषयितासम्बन्धेन प्रतियोगितावच्छेदकत्वेऽप्ययोगोलकभेदत्वादेर्न प्रतियोगितानवच्छेदकत्वनिर्वाहो विशेष्ये पर्याप्तस्यापि विशिष्टानुयोगिकाभावानभ्युपगमादिति तादृशधर्मस्य साध्यव्यापकतावच्छेदकत्वनिर्वाहाय द्वितीयेऽत्यन्ताभावघटितलक्षणे तन्निवेशनस्यावश्यकता 'सर्वथैव'इत्यभिप्रायेणेदम्। 'वस्तुतस्त्वित्यादिः' भ्रान्तकल्पितः पाठ इत्यपि वदन्ति।

(चि०) नापि साध्यं यावदव्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वम्। साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात्। तच्च दूषितम्। नापि कात्स्न्र्येन सम्बन्धो व्याप्तिः। एकव्यक्तिके तदभावात्। नानाव्यक्तिकेऽपि सकलधूमसम्बन्धस्य प्रत्येकवह्नावभावात्। अत एव न कात्स्न्र्येन साध्येन सम्बन्धो व्याप्तिः। विषमव्याप्ते तदभावाच्च। न च यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः। साधनाश्रयमहानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात्। नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यम्। यावद्धर्मसामानाधिकरण्यं हि यावत्तद्धर्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धं साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः। नापि स्वाभाविकः सम्बन्धो व्याप्तिः। स्वभावजन्यत्वे तदाश्रितत्वादौ वाऽव्याप्त्यतिव्याप्तेः। नाप्यविनाभावः केवलान्वयिन्यभावात्।

(दी०) साध्यमिति। यावतां तेषामित्यर्थः। दूषितं केवलान्वयिन्यव्याप्त्या। सा च यथोक्तलक्षणेऽपि गौरवं परमतिरिच्यत इति। कात्स्न्र्यं साधनस्य, साध्यस्य, साध्याश्रयस्य, साध्यसमानाधिकरणस्य वा। आद्ये कृत्स्नसाधनसामानाधिकरण्यं साध्ये, कृत्स्नेषु साधनेषु साध्यसामानाधिकरण्यं वार्थः। प्रथमे एकेति, नानेति च, व्याप्तेश्चाहेतुवृत्तित्वं पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तिश्च। अत एव नेतरः। अर्थाभिधानपूर्वकं द्वितीयं निरस्यति अत एवेति। 'अत एव' एकव्यक्तिसाध्यकाव्याप्तेरेव, विषमव्याप्ते समव्याप्तेऽपि च संख्यापरिमाणादावेकत्र साधने सकलसाध्यसम्बन्धस्या-

भावाद्भावाच्च शब्दवान् द्रव्यत्वादित्यादौ। तृतीये साध्याश्रययावद्वृत्तित्वम्, चतुर्थे साध्यसमानाधिकरणयावत्सामानाधिकरण्यमर्थः। तत्र च यथासम्भवमेकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धूमादावव्याप्तिरतिव्याप्तिश्च सत्तादौ। अर्थपरिष्कारपूर्वकं पञ्चमं निरस्यति न चेति। एकमात्रवृत्तिसाधने चाव्याप्तिश्च। तथैव षष्ठं निरस्यति नापीति। तादृशानां सर्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि सामानाधिकरण्यानि न कुत्रापि वह्नौ। अथ यद्धर्मावच्छिन्नसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्मावलीढसामानाधिकरण्यं विवक्षितमिति चेत्, इतोऽपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यमेव व्याप्तिरिति सिद्धान्तयिष्यते। अविनेति, साध्यं विना साध्याभाववति यो भावो वृत्तिस्तद्विरहः। साध्यं विनाऽभावः साध्याभावव्यापकीभावप्रतियोगित्वमिति वा।

(गा०) यावदव्यभिचारितदव्यभिचारीत्युभयत्रैव यद्बहुव्रीहिभ्रमनिरासाय व्याचष्टे यावतां तेषामिति। 'दूषितम्'इत्यत्र केन दोषेणेत्याकाङ्क्षायां हेतुं पूरयति केवलान्वयिन्यव्याप्त्येति। ननु साध्याव्यभिचरितत्वमात्रोक्तौ केवलान्वयिन्यव्याप्तिः प्रसज्यत इत्यत एव शेषसार्थक्यं भविष्यतीत्याशङ्कायामाह *सा चेति*। केवलान्वयिन्यव्याप्तिश्चेत्यर्थः। यथोक्तलक्षणे यावत्सां साध्यमव्यभिचारि तेषामव्यभिचारित्वरूपे, केवलान्वयिसाध्यं व्यतिरेकिणो व्यभिचार्यैव केवलान्वयिनश्च व्यभिचार एवाप्रसिद्ध इति तदव्यभिचारित्वमपि तथेति साध्यं यस्याव्यभिचारि तादृशवस्तुनोऽप्रसिद्धेरिति भावः। 'कार्त्स्न्येन सम्बन्धः, इत्यत्र साधनसाध्यसाधनाश्रयसाधनसमानाधिकरणधर्मेषु कार्त्स्न्यस्य विशेषणतापक्षा मूलकृता दूषिता न तु साध्याश्रयतत्समानाधिकरणयोस्तद्विशेषणत्वपक्षौ, अतो मूलन्यूनताभङ्गाय स्वयं तौ दूषयितुं तावदन्तर्भाव्य वितर्कयति कार्त्स्न्यमित्यादिना। 'साधनसमानाधिकरणस्य वा, विवक्षितमिति शेषः। *'सकलधूमसम्बन्धस्य प्रत्येकं वह्न्यादावभावात्'* इत्यभिधानेन साध्यानुयोगिककृत्स्नसाधनसम्बन्धस्य व्याप्तितापक्षदूषणे मूलस्य तात्पर्यं प्रतीयते तथा च कृत्स्नसाधनानुयोगिकसाध्यसम्बन्धत्वादूषणेन न्यूनतां परिहर्तुं तत्पक्षं दूषयिष्यन् साधनस्य कार्त्स्न्यमन्तर्भाव्य वितर्कयति आद्य इति। प्रथमपदे मूलोक्तं दूषणद्वयं सङ्गमय्याधिकं दोषद्वयमाह व्यामेवेति। पृथिवीति। पृथिवीवृत्तिघटत्वपटत्वसकलधर्माधिकरणाप्रसिद्ध्या सकलतत्सामानाधिकरण्याप्रसिद्धिरतः पृथिवीवृत्तित्वमुपेक्ष्य तत्त्वव्यापकत्वानुसरणम्, पृथिवीत्वव्यापकत्वं पृथिवीनिष्ठान्योन्याभावप्रतियोगितान-

वच्छेदकत्वमवृत्तिसाधारणमिति तेन रूपेण हेतुत्वेऽवृत्तेरपि सकलसाधनान्तर्गततया तदधिकरणाप्रसिद्ध्या नातिव्याप्तिरतो जातिपदं समवेतार्थकम्। 'अत एव' एकव्यक्तिसाधनकाव्याप्तिसहितदर्शितातिव्याप्तेरेव, 'इतरः' कृत्स्नसाधने साध्यसम्बन्धो व्याप्तिरिति पक्षः। 'द्वितीयं' साध्ये कार्त्स्न्यविशेषणपक्षम्। 'एकव्यक्तिके तदभावात्' इत्यत्र एकव्यक्तिकपदं तादृशसाधनपरम्, तस्य साधने कार्त्स्न्यविशेषणपक्षदूषणपरत्वात्। तथा च 'अत एव' इत्यस्य तादृशदूषणपरत्वासम्भवादेकव्यक्तिसाध्यकाव्याप्तिपरतया व्याचष्टे अत एवेति। न्यूनताभङ्गाय पूरयति मम व्याप्तेऽपि चेति। 'संख्यापरिमाणादौ' संख्यादिसाध्यकपरिमाणादौ। शब्दवानिति। रूपादेः साध्यत्वे सकलतदधिकरणाप्रसिद्ध्या नातिव्याप्तिरतः शब्दसाध्यकानुधावनम्, तत्र गगनस्यैव सकलशब्दाधिकरणत्वात्। तृतीयचतुर्थयोरर्थाभिधानपूर्वकं दूषणमाह तृतीये चेत्यादिना। एकमात्रवृत्तिसाध्यके यावत्साध्याश्रयाप्रसिद्धिदोषस्तृतीय एव न चतुर्थे, वह्निमान् सत्त्वादित्यादावतिव्याप्तिरपि तत्रैव, न चतुर्थे, यावत्साध्यसमानाधिकरणपर्वतत्वमहानसत्वाद्यधिकरणाप्रसिद्ध्या तदनवकाशादतो यथासम्भवमिति। धूमादावव्याप्तिरिति। सकले वह्निमति प्रत्येकधूमस्यावृत्तेः वह्निसमानाधिकरणयावद्धर्माधिकरणाप्रसिद्धेश्चेति भावः। 'सत्त्वादौ' इत्यत्र वह्न्यादौ साध्ये इत्यनुषज्यते' पञ्चमे यथाश्रुते यावत्साधनाश्रयसम्बन्धः साध्ये लभ्यते तावता व्याप्तेः साधननिष्ठत्वानिर्वाह इति तन्निर्वाहाय तादृशसाध्यसामानाधिकरण्यस्याधिकस्य प्रवेशनमेवार्थपरिष्कारः। स्वयमधिकं दूषणमाह एकमात्रवृत्तिसाधन इति। यावत्साधनाश्रयाप्रसिद्धेरिति भावः। 'तथैव' अर्थपरिष्कारपूर्वकमेव, अत्रापि यथाश्रुते कृत्स्नसाधनसमानाधिकरणसामानाधिकरण्यं साध्ये लभ्यत अतो व्याप्तेर्हेतुनिष्ठतासम्पादनाय तत्सामानाधिकरण्यस्याधिकस्य निवेशनमेव परिष्कार इति बोध्यम्। ननु साधनसमानाधिकरणानां मिथोविरुद्धानामेकाधिकरणाप्रसिद्धावपि तेषां प्रत्येकसामानाधिकरण्यमेव साध्ये निवेश्यमिति न मूलोक्तदोषावसर इत्यत आह तादृशानामिति। साधनसमानाधिकरणानामित्यर्थः। न कुत्रापि वह्नाविति। साध्यतावच्छेदके तत्तद्धर्मसमानाधिकरणवृत्तित्वं निवेश्य तद्दोषोद्धारेऽपि नानाधर्मावच्छिन्नसाध्यके दण्डिमान् दण्डिसंयोगादित्यादौ कुत्रापि दण्डादिव्यक्तौ साधनसमानाधिकरणानां सर्वेषां प्रत्येकसमानाधिकरणवृत्तित्वासम्भवेनाव्याप्तिर्बोध्या। साधनसमानाधिकरणाः सर्वे यादृशसाध्यसमानाधिकरणास्तादृशसामानाधिकरण्यमित्यर्थे न कोऽपि दोष इत्याशङ्कते अथेति। तत्तद्व्यक्तित्वादिना साध्यं चेद्व्यापकतावच्छेदककोटौ निवेश्यते तदा नानाव्यक्तिसाध्यकेऽव्याप्तिरतो यद्धर्मपदं प्रकृतसाध्यतावच्छेदकपरम्, विशिष्टसत्तावान् जातेरित्याद्यतिव्याप्तिवारणाय विशिष्टाधिकरणतागर्भसामानाधिकरण्यं प्रवेश्यमित्येतल्लाभायाश्रयपदमुपेक्ष्यावच्छिन्नपदम्, धूमादिसामानाधिकरण्यस्यापि प्रमेयत्वादिना वह्न्यादिसामानाधिकरण्यव्यापकतयाऽति-

प्रसङ्ग इति तादृशसामाधिकरण्यत्वस्य व्यापकतावच्छेदकत्वपर्यन्तानुधावनम्, साधनसामानाधिकरण्यव्यापकत्वं साधनतावच्छेदकावच्छिन्नसामानाधिकरण्यत्वावच्छिन्नं प्रति व्यापकत्वम्, तेन धूमसामानाधिकरण्यत्वेन तद्वह्न्यादिसामानाधिकरण्यत्वावच्छिन्नं प्रति व्यापकत्वेऽपि गुणत्वादिसाधारणं विशिष्टसत्तात्वाश्रयसामानाधिकरण्यत्वावच्छिन्नं प्रति द्रव्यत्वादिसामानाधिकरण्यत्वेनाव्यापकत्वेऽपि न क्षतिः। परिष्कारस्यावश्यापेक्षणीयत्वे एतदपेक्षया लघोः कृत्स्नसाधनाश्रयाश्रितसाध्यसम्बन्धस्य व्यापकत्वरूपकृत्स्नपदार्थमन्तर्भाव्य परिष्कार एवोचितः, स च सिद्धान्तग्रन्थ एव करिष्यत इत्याह इत्योऽपीति। तथा चेदानीं यथाश्रुतार्थदूषणपर एव मूलग्रन्थ इति नासङ्गतिरिति भावः। मूलोक्तसिद्धान्तलक्षणं त्वन्योन्याभावस्याव्याप्यवृत्तितानये द्रव्यनिष्ठसंयोगाभावोपि प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तिरिति संयोगी द्रव्यत्वादित्यादावव्याप्त्या दूषयित्वा साधनसमानाधिकरणधर्मिककात्स्न्यविशेषणपक्ष एव दीधितिकारेणाग्रेऽवलम्बनीयः। अभाववदर्थकं विनापदमत्र सप्तम्यन्तमित्याशयेन व्याचष्टे साध्याभाववतीत्यादिना। साध्याभाववदवृत्तित्वमिति। प्रथमलक्षणे साध्याभाववदवृत्तिभेदो विवक्षितोऽत्र तु तत्त्वात्यन्ताभाव इति भेद इति भावः। सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिरतोऽविनाभावमन्यथा व्याचष्टे साध्यं विनाऽभाव इति। तथा च नञ्व्यत्यासः कार्य इति भावः। तथा च विनाशब्दार्थोऽभाव एव न तु तद्वान् तस्य च निपातार्थतया प्रयुक्तत्वसम्बन्धेनाभावे साक्षादन्वयः, प्रयुक्तत्वञ्च व्यापकत्वमेवेत्याशयेनाह साध्याभावव्यापकेति।

(चि०) अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वाद्धूमादिव्याप्तिस्तु विशिष्यैव निर्वक्तव्येति, तन्न, लिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात्। न च सम्बन्धमात्रं तथा, तद्बोधादनुमित्यनुत्पत्तेः। नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदम्। सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात्।

केवलान्वयिनि केवलान्वयिधर्मसम्बन्धो व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिरेतयोरनुमितिविशेषजनकत्वमनुमितिमात्रे पक्षधर्मतैव प्रयोजिका। न चातिप्रसङ्गः, विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वनियमादिति केचित्, तदपि न, साध्यवदन्यावृत्तित्वस्य धूमेऽ-

सत्त्वाद्वह्निमत्पर्वतान्यस्मिन् धूमसत्त्वात्। न च सकलसाध्यवदन्यावृत्तित्वम्, वह्निमतां प्रत्येकं तथात्वात् सर्वत्र लक्षणे साध्यत्वसाधनत्वतदभिमतत्वानां व्याप्तिनिरूप्यत्वेनात्माश्रयः। साध्यत्वं हि न सिद्धिकर्मत्वं सिषाधयिषाविषयत्वं वा, महानसीयवह्नौ तदभावात्। न च सामान्यतो व्याप्त्यवगमोऽस्त्येव परस्य कथमन्यथा दूषणेनासाधकतां साधयेदिति वाच्यम्, स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति।

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ पूर्वपक्षः सम्पूर्णः।

(दी०) अथेति। 'सम्बन्धः' सामानाधिकरण्यम्। व्यभिचारिसम्बन्धस्येति केनचित् किञ्चिद्रूपावच्छिन्नेन। धूमादेरपि द्रव्यत्वादिना वह्निव्यापकत्वात्। तद् बोधादिति। न च व्यभिचारग्रहसहकृतस्तद्बोधस्तथा, व्यभिचारतद्व्यतिरेकयोरनुपस्थितावपि समानाधिकरणधर्मवत्ता ज्ञानमात्रादनुमित्युत्पादस्य सर्वानुभवसिद्धत्वात्। हेत्वन्तरे तत्रैव च रूपान्तरेण व्यभिचारग्रहे हेतुतावच्छेदकाग्रहेऽप्यनुमित्युत्पादाच्च। विवदन्ते च सामानाधिकरण्यज्ञानस्यैव हेतुतायाम्। व्यभिचारज्ञानाभावकारणत्वमपेक्ष्य कारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयतावच्छेदकत्वमुचितम्। न च व्यभिचारसंशयेऽनुमित्यनुत्पादादव्यभिचारनिश्चयत्वेन कारणत्वोक्तौ गौरवं व्यभिचारज्ञानस्य हि भ्रमत्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्य विरोधित्वं वाच्यम्, अव्यभिचारनिश्चयस्य च भ्रमत्वशङ्कायामप्यनुमित्यजनकतया भ्रमत्वेनागृह्यमाणस्यैव हेतुत्वमिति तत्रैव गौरवात्। नानाविधव्यभिचारज्ञानाभावानां नियतपूर्ववर्त्तित्वेन क्लृप्तानामपि हेतुत्वमपेक्ष्य वक्ष्यमाणैकविधाव्यभिचारज्ञानस्यैव हेतुत्वं युक्तमित्यप्याहुः। सामानाधिकरण्यविशिष्टपक्षधर्मत्वं तु पक्षे साध्यग्रहं विना दुर्ग्रहमिति। केवलान्वयित्वस्याग्रहे सामानाधिकरण्यमात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहोऽपि वाच्यः। तच्च वृत्तिमदत्यन्ताभावाप्रतियोगित्वादिकमन्योन्याभावप्रतियोगितानवच्छेदकत्वं

वा। तथा च सर्वसाधारण्याय लाघवात्साधनवतस्तद्वृत्तित्वस्य वा वृत्तेरन्योन्याभावस्य वा विशेषणत्वमुचितमिति सिद्धान्तरहस्यम्। शेषं केवलान्वयिखण्डने वक्ष्यामः।

इति श्रीरघुनाथशिरोमणिभट्टाचार्यविरचितायां तत्त्वचिन्तामणिदीधितौ पूर्वपक्षदीधितिः सम्पूर्णा।

(गा०) साध्यस्य संयोगादिसम्बन्धो न तदीयव्याप्तिरतो व्याचष्टे सामानाधिकरण्यमिति। मूले व्यभिचारिसम्बन्धस्येति तद्व्यभिचारिनिष्ठतदीयसम्बन्धस्येत्यर्थः, 'केनचित्सह व्याप्तित्वात्' इत्यत्रान्यदीयव्याप्तित्वं प्रतीयते तच्च न सम्भवतीति व्याचष्टे किञ्चिद्रूपेति। तथा च रूपान्तरावच्छिन्नतद्व्याप्तित्वादित्यर्थः, तदेव दर्शयति धूमादेरपीति। 'व्यापकत्वात्' व्याप्तिनिरूपकत्वात्, तथा च वह्न्यादौ धूमादिव्याप्तिरिष्टैवेति भावः। मूले तद्बोधादिति। केवलसाध्यसामानाधिकरण्यप्रकारकहेतुमत्ताज्ञानादित्यर्थः। अनुमित्यनुदयादिति। अनुमित्युदयोपगमासम्भवादित्यर्थः। तथा सति द्रव्यत्वादिहेतुना ह्रदादावप्यभ्रान्तानां वह्न्याद्यनुमानापत्तेरुदाहरणे वीप्सितयत्पदप्रयोगवैयर्थ्यापत्ते व्यभिचारस्य हेत्वाभासतानुपपत्तेः सर्वत्र मेयत्वादिना सत्प्रतिपक्षतापत्तेश्चेति भावः। ननु व्यभिचारज्ञानाभावः साक्षादेवानुमितिहेतुर्वाच्यस्तथा च साध्याभावव्यभिचारिमेयत्वादेर्न सत्प्रतिपक्षाधायकत्वप्रसङ्गो न वा व्यभिचारस्य हेत्वाभासतानुपपत्तिर्व्यभिचारशङ्कानिवर्तनेनैव चोदाहरणे वीप्सोपयोग इत्याशङ्कते दीधितौ न चेति। 'तद्बोधः' साध्यसामानाधिकरण्यप्रकारकहेतुमत्ताबोधः। सर्वानुभवसिद्धत्वादिति। तथा च तत्रानुमित्यापत्तिरिति भावः। एवञ्चैतन्मते कोटिद्वयसहचरितधर्मद्वयदर्शनादुभयत्र व्यभिचाराग्रहे संशयानुमितिप्रसङ्गोऽपि दुर्वारो विपरीतकोटिसमानाधिकरणधर्मवत्ताज्ञानस्य विशिष्टबुद्ध्यविरोधित्वादन्यथा साधारणधर्मदर्शनाधीनप्रत्यक्षसंशयस्याप्युच्छेदापत्तेः। व्यभिचारज्ञानाभावहेतुत्वं सम्भवदुक्तिकमपि नेत्याह हेत्वन्तरेति। द्रव्यत्वादौ वह्न्यादिव्यभिचारग्रहदशायां धूमादिलिङ्गकवह्न्यनुमितेरुत्पादादित्यर्थः। तथा च तत्साध्यकानुमितेस्तत्साध्यनिरूपितव्यभिचाराग्रहव्यभिचारित्वात्र तत्र तद्धेतुतासम्भव इति भावः। ननु तल्लिङ्गकतत्साध्यकानुमितित्वस्य तल्लिङ्गधर्मिकतत्साध्यव्यभिचारज्ञानाभावजन्यतावच्छेदकत्वोपगमे नायं व्यभिचार इत्यत आह तत्रैव वेति। हेताविति शेषः। रूपान्तरेणेति। द्रव्यत्वादिप्रकारेण व्यभिचारग्रहे धूमत्वाद्यवच्छिन्नतल्लिङ्गकानुमित्युत्पत्तेरित्यर्थः। ननु तद्धर्मावच्छिन्नतल्लिङ्गकानुमितित्वमेव तद्धर्मावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबध्यतावच्छेदकं वाच्यम्, तथा च नोक्तदोष इत्यत आह हेतुतावच्छेदकग्रहे इति। धूमत्वादिप्रकारेण पक्षधर्मताज्ञानं विनाप्ययमालोको धूमो वेति सन्देहदशायां वह्निव्याप्यवानयमितिव्या-

सिमात्रप्रकारेण पक्षधर्मताज्ञानादनुमित्युत्पत्तेरित्यर्थ । तथा च तादृशानुमितौ व्यभिचारग्रहप्रतिबध्यतावच्छेदकनिरुक्तधर्माना क्रान्तायामव्यभिचारग्रहस्य कारणताया आवश्यकत्वेन व्यभिचाराग्रहहेतुत्वं न कुत्रापि कल्पयितुमुचितम् । न चाव्यभिचारस्य केवलान्वयिस्थलेऽप्रसिद्ध्या व्यतिरेकिस्थलेऽपि केवलान्वयित्वग्रहदशायां दुर्ग्रहतया तत्र व्यभिचाराग्रहसहकृतसामानाधिकरण्यज्ञानादेवानुमितिरुपगन्तव्येति वाच्यम्, स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्वरूपस्य सिद्धान्तग्रन्थे निर्वाच्यस्याव्यभिचारस्य सर्वत्रैव सुग्रहत्वात् । साध्यस्य केवलान्वयित्वग्रहदशायामनुमितिमनङ्गीकुर्वाणैः साध्याभाववद्वृत्तित्वरूपाव्यभिचारज्ञानस्यानुमितिसामान्यहेतुत्वस्वीकारेऽपि बाधकाभावादिति भावः । ननु हेतुतावच्छेदकाग्रहस्थले व्यभिचारग्रहाभावसहितसाध्यसामानाधिकरण्यप्रकारकपक्षधर्मताज्ञानादेवानुमितिः सम्भवतीति तत्राव्यभिचारज्ञानहेतुत्वमसिद्धम् एवं स्वसमानाधिकरणेत्यादिसिद्धान्तग्रन्थे निर्वाच्यव्याप्तिज्ञानस्य हेतुतायां रासभादिव्यावर्तकतत्तद्धेतुतावच्छेदकस्य सामानाधिकरण्यधर्मितावच्छेदकविधया विषयताया अवश्यं निवेशनीयतया हेतुतावच्छेदकधर्मप्रकारकज्ञानं विनाऽनुमितिर्भवत्येव नेत्यत आह विवदन्ते चेति । केवलान्वय्यनुमानानभ्युपगन्तारो नव्या इतिशेषः । तथा च सामानाधिकरण्यज्ञानस्यापि हेतुता नाव्यभिचारज्ञानहेतुतायादिभिरुपगम्यते तन्मतापेक्षयाऽव्यभिचारज्ञानस्थले व्यभिचाराग्रहहेतुतां कल्पयतः सामानाधिकरण्यमात्रस्य व्याप्तित्वं मन्यमानस्य मते गौरवाभावेऽपि साध्याभाववद्वृत्तित्वरूपाव्यभिचारज्ञानहेतुतावादिनवीनमतापेक्षया कारणताद्वयकल्पने गौरवं दुर्वारमेवेति भावः । हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिज्ञानहेतुतावादिनां सिद्धान्तिनां मतेऽपि तन्मतापेक्षया लाघवमाह व्यभिचारज्ञानेति । सिद्धान्तिमतेऽव्यभिचारज्ञानसामानाधिकरण्यज्ञानयोः न कारणताद्वयमपि तु स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपाव्यभिचारविषयतानिरूपितत्वं साध्यसमानाधिकरण्यज्ञानहेतुतावच्छेदककोटिप्रविष्टसाध्यतावच्छेदकविषयतायां निवेश्यते तथा च कारणताया ऐक्याल्लाघवमक्षुण्णमेवेति भावः । इदमत्रावधेयम्, पक्षभेदेन साध्यसमानाधिकरणहेतुमत्ताज्ञानहेतुतानामानन्त्यात्तत्राव्यभिचारविषयतानिवेशोऽनन्तस्थलेऽवच्छेदकगौरवं निरुक्तसाध्यतावच्छेदकविषयतायां निरुक्ताव्यभिचारविषयतानिरूपितत्वं निरुक्ताव्यभिचारविषयतायां वा साध्यतावच्छेदकविषयतानिरूपितत्वं निवेश्यत इत्यत्र विनिगमनाविरहेणानन्तपक्षभेदेनानन्तकारणताधिक्यञ्चेति पक्षविशेषमनन्तर्भाव्य सामान्यतस्तल्लिङ्गकतत्साध्यकानुमितौ तल्लिङ्गधर्मिकतत्साध्यनिरूपितव्यभिचारज्ञानाभावत्वेनैककारणताकल्पनमेव सम्यक् ।

अत्र केचिद्व्यभिचारग्रहस्य शरीरनिष्ठप्रत्यासत्त्याऽऽत्मनिष्ठप्रत्यासत्त्या वा प्रतिबन्धकत्वं न सम्भवति परपुरप्रवेशस्थले तच्छरीरेऽभिमान्यस्य

व्यभिचारज्ञानसत्त्वेऽप्यभिभावकभूतादेरनुमित्युदयात् कायव्यूहस्थल एक-शरीरावच्छिन्न आत्मनि व्यभिचारग्रहसत्त्वेऽपि शरीरान्तरावच्छिन्ने तत्रा-नुमित्युदयाच्चेति शरीरविशेषावच्छिन्नत्वं निवेश्यात्मनिष्ठप्रत्यासत्त्या व्यभि-चारग्रहस्य प्रतिबन्धकता वाच्या, तथा च चैत्रनैशादिशरीरभेदेन तदभाव-स्यानन्तहेतुतापेक्षया सामानाधिकरण्यसमानावच्छेदकत्वोभयप्रत्यासत्त्याऽ-वश्यकल्प्यसामानाधिकरण्यज्ञानहेतुतायामव्यभिचारविषयकत्वनिवेश एव लघीयान्। न च समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य साध्यव्यभि-चाराग्रहस्य सामानाधिकरण्यसमानावच्छेदकत्वप्रत्यासत्तिभ्यां कारणतार-ल्पनेनैव सामञ्जस्यात्तद्धेतुतामतेऽपि शरीरभेदनिवेशनं नास्तीति वाच्यम्, तथा सति तच्छरीरावच्छेदेन तदात्मनि व्यभिचारधीसत्त्वेऽपि तदात्मनि तदभावस्यान्यावच्छेदेनान्यात्मनि तदभावस्य च तच्छरीरावच्छेदेन वृत्ते-स्तच्छरीरावच्छेदेन तदात्मन्यनुमित्यापत्तेर्दुर्वारत्वादुभयप्रत्यासत्त्यवच्छिन्न-कहेतुतास्थल एककारणव्यक्तेरुभयाधिकरणप्रत्यासत्तेरुभयाधिकरणप्रत्यास-त्त्यार्योत्पत्तिप्रयोजकतयाऽव्यभिचारविषयकसामानाधिकरण्यज्ञानं तत्र का-यव्यूहस्थले तदात्मनि शरीरान्तरावच्छेदेनैतच्छरीरावच्छेदेन परपुरप्रवेश-कर्त्तर्यात्मान्तरे तत्रैतच्छरीरावच्छेदेनैतदात्मन्यनुमित्यापत्त्यनवकाश आत्म-भेदेन ज्ञानव्यक्तिभेदादिति ज्ञानहेतुतायां शरीरभेदनिवेशमन्तरेणैवोपपत्ति-रधिकरणभेदेऽप्यभावव्यक्तिभेदाभावेन व्यभिचारज्ञानाभावहेतुतामते शरीर-भेदनिवेशनं विनाऽतिप्रसङ्गवारणोपपत्तेरयोगात्। न च यद्देशावच्छेदेन यदा यदधिकरणे कार्यं तदवच्छेदेन तदव्यवहितपूर्वक्षणे तदधिकरणे कारणमित्येतादृशावच्छेदकीभूतदेशघटितव्यापकताघटितं कारणत्वं व्यभि-चाराग्रहे स्वीक्रियते तादृशकारणताश्रयस्य च तद्देशावच्छेदेन तदधि-करणसत्त्वं तद्देशावच्छिन्नतदधिकरणनिष्ठकार्योत्पादे तन्त्रमिति तच्छ-रीरावच्छेदेन तदात्मनि व्यभिचारग्रहदशायां तदवच्छेदेन तदात्मनि तदग्रहस्य दुर्लभतया नोक्तातिप्रसङ्ग इति वाच्यम्, एवमपि यत्र महा-शरीरनाशे खण्डशरीरस्य चोत्पाददशायां व्यभिचारग्रहस्तत्र खण्ड-शरीरोत्पादद्वितीयक्षणे तदवच्छेदेनानुमित्यापत्तेर्व्यभिचाराग्रहहेतुतावादिनां दुर्वारत्वात्तच्छरीरस्य व्यभिचारग्रहपूर्वकालेऽसत्त्वेन व्यभिचारग्रहा-नवच्छेदकतया तदवच्छेदेन तदग्रहस्यात्मनि सत्त्वात्। न च तदा व्यभिचारग्रह एव न सम्भवति शरीररूपकारणविरहादित्याशङ्क्यम्, यतः शरीरावयवसाधारणचेष्टावत्त्वस्यैव ज्ञानजननोपयिकतया शरीरासत्त्वेऽपि तद-वयवावच्छेदेनैव ज्ञानोत्पत्तिसम्भवादित्याहुः।

व्यभिचाराग्रहस्यानुमितिहेतुतामतेऽनुमितिसामग्र्या अधिककारणता-घटिततया भिन्नविषयकप्रत्यक्षादौ तत्प्रतिबन्धकतायां गौरवमित्यन्ये। अव्य-भिचारग्रहहेतुतामते तत्र संशयान्यत्वप्रवेशप्रयुक्तगौरवमाशङ्कते अव्यभिचार निश्चयत्वेनेति। व्यभिचाराप्रकारकाव्यभिचारप्रकारकज्ञानत्वेनेत्यर्थः। गौरव-

मिति। व्यभिचाराग्रहहेतुतामते व्यभिचारसंशयस्यापि प्रतिबन्धकत्वेन तत्साधारणव्यभिचारग्रहत्वावच्छिन्नाभावहेतुतया व्यभिचारग्रहे संशयभेदानिवेशेन लाघवादिति भावः। व्यभिचारज्ञानप्रतिबन्धकतामते व्यभिचारज्ञाने निश्चयत्वानिवेशेऽपि तदुत्तेजकीभूतभ्रमत्वज्ञाने निश्चयत्वस्य निवेशनीयतया गौरवमिति समाधत्ते व्यभिचारेत्यादिना। 'भ्रमत्वनिश्चयदशायामेव' इत्येवकारेण तत्संशयदशायामनुमित्यविरोधित्वं व्यवच्छेदः, अप्रामाण्यशङ्कया निश्चितस्यापि विषयस्य संशयोत्पत्तेस्तच्छङ्काकलङ्कितस्य निश्चयकार्यकारित्वमानास्तीति तथाविधस्य व्यभिचारग्रहस्य तत्संशयान्तरवदनुमितिप्रतिबन्धकताधौव्यादिति भावः। 'भ्रमत्वेनानिश्चीयमानस्य' भ्रमत्वनिश्चयत्वावच्छिन्नाभावविशिष्टस्य, 'विरोधित्वं' 'वाच्यं' भवता वाच्यम्। भ्रमत्व---ज्ञायमानस्येति। वच्छङ्कास्कन्दितज्ञानस्य विरोध्यप्रकारकज्ञानस्यापि निश्चयकार्यासमर्थत्वादिति भावः। अपिकारात्तन्निश्चयदशासमुच्चयः। भ्रमत्वेनागृह्यमाणस्येति। भ्रमत्वज्ञानत्वावच्छिन्नाभावविशिष्टस्येत्यर्थः। एवकारेण तन्निश्चयत्वावच्छिन्नाभाववैशिष्ट्यस्य कारणतावच्छेदकत्वव्यवच्छेदः। तथैव। व्यभिचाराग्रहहेतुतावादिन एवेत्यर्थः। गौरवादिति। व्यभिचारवद्विशेष्यकत्वावच्छिन्नाव्यभिचारप्रकारकत्वज्ञानाभावविशिष्टव्यभिचारप्रकारकव्यभिचारज्ञानत्वापेक्षयाऽव्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वाभावाप्रकारकव्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वप्रकारकज्ञानत्वावच्छिन्नाभावविशिष्टव्यभिचारज्ञानत्वावच्छिन्नाभावत्वरूपकारणतावच्छेदकस्य गुरुशरीरत्वादिति भावः। न च भ्रमत्वज्ञानानास्कन्दितस्वविषयकभ्रमत्वज्ञानदशायामव्यभिचारज्ञानस्यानुमितिजनकतया तदवच्छेदकाभावप्रतियोगिनि भ्रमत्वज्ञाने भ्रमत्वान्तरग्रहाभावविशिष्टत्वं निवेश्य तादृशभ्रमत्वग्रहस्य च निश्चयत्वेनैवाभावो निवेश्यो भ्रमत्वशङ्कास्कन्दितस्यापि परामर्शीयभ्रमत्वग्रहस्य भ्रमत्वसंशयान्तरवदनुमित्यनुत्पादप्रयोजकत्वादित्यव्यभिचारग्रहहेतुतामते गौरवं व्यभिचारग्रहोत्तेजकीभूतभ्रमत्वनिश्चये भ्रमत्वान्तरग्रहस्य संशयसाधारणतज्ज्ञानत्वेनैवाभावनिवेशादिति वाच्यम्, अप्रामाण्यग्रहेऽप्रामाण्यान्तरग्रहाभावनिवेशे तत्राप्यप्रामाण्यान्तरग्रहाभावस्य निवेशनीयतया तत्र भवता निश्चयत्वनिवेशेन लाघवविरहात्। न चावच्छेदककोटिप्रविष्टाप्रामाण्यग्रहधारायाः एकैकं परित्यज्य निश्चयत्वनिवेशानमुभयमते समानमव्यभिचारग्रहहेतुतामते पुनरव्यभिचारग्रहे निश्चयत्वनिवेशनमधिकमिति वाच्यम्, अव्यभिचारविशिष्टवैशिष्ट्यज्ञानत्वेनैव हेतुतायाः वक्तव्यतया तत्संशये च तद्विशिष्टवैशिष्ट्यावगाहित्वानुपगमेनैवाव्यभिचारसंशयादनुमितिवारणसम्भवे तदंशे निश्चयत्वस्यानिवेशाद्व्यभिचारविषयकाप्रामाण्यग्रहेऽप्रामाण्यग्रहसत्त्वेऽप्यनुमित्यनुपगमेनाप्रामाण्यग्रहेऽप्रामाण्यान्तरग्रहाभावस्य न विशेषणत्वमन्यथा विशेषणानवस्थाप्रसङ्गादित्यपि वदन्ति।

गौरवान्तरेण व्यभिचारग्रहप्रतिबन्धकतामतं दूषयतामन्येषां मतमाह

नानाविधेति। हेतुनिष्ठसाध्याभाववद्वृत्तित्वसाध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणभावप्रतियोगितावच्छेदकत्वतादृशप्रतियोगितानिष्ठसाध्यतावच्छेदकावच्छिन्नत्वादिरूपबहुविधेत्यर्थः। यत्किञ्चिदेकविधव्यभिचारग्रहदशायामेवानुमित्यनुत्पादस्यानुभविकतया सर्वविधव्यभिचारज्ञानस्यैव पृथक्पृथक्प्रतिबन्धकताया आवश्यकत्वादिति भावः। नियतपूर्ववर्त्तित्वेन बहूनामनपातेः। अव्यभिचारज्ञानहेतुतामतेऽपि तद्धेतुभूतयावद्व्यभिचारज्ञानाभावानामनमितो नियतपूर्ववर्त्तित्वादिति भावः। एतेन बहुष्वनन्यथासिद्धिकल्पनमपेक्ष्यैकधर्मावच्छिन्ने नियतपूर्ववर्तितासहितत्तत्कल्पने लाघवमिति ध्वनितम्। वक्ष्यमाणैरवधति। केवलान्वयिखण्डनावसरे साध्याभाववद्वृत्तित्वरूपलघुशरीराव्यभिचारेत्यर्थः। तादृशाव्यभिचारज्ञानस्यापि सर्वविधव्यभिचारग्रहप्रतिबध्यतया तद्धेतुतयैव सकलव्यभिचारज्ञानदशायामनुमितिवारणसम्भवाद्व्यभिचारान्तरापेक्षया तच्छरीरलाघवस्यैव विनिगमकतया विनिगमनाविरहेण नानाविधव्यभिचारधियामेव कारणत्वमित्यस्यापि वक्तुमशक्यत्वादिति भावः। 'आहुः' इत्यस्वरसोद्भावनम्, तद्बीजं समानाकारतया व्यभिचारान्तरग्रहस्य साक्षादुक्ताव्यभिचारज्ञानाप्रतिबन्धकतया व्यभिचारान्तरधीदशायामुक्ताव्यभिचारज्ञानसत्त्वेऽनुमितिस्वीकारे गुरुशरीरव्यभिचारान्तरग्रहस्यानुमितिविरोधितया तावत्तेवोपेक्षितत्वात्, अस्माकमपि लघुशरीरसाध्याभाववद्वृत्तित्वरूपव्यभिचारग्रहाभाव एव हेतुरिति वक्तुं शक्यतयोक्तलाघवानवकाशाद् व्यभिचारान्तरग्रहदशायामुक्ताव्यभिचारग्रहसत्त्वेऽनुमित्यनुत्पादोऽनुभवसिद्ध इति चेत्, तर्हि, अव्यभिचारग्रहासत्त्व एव तदनुत्पादोऽनुभवसिद्ध इत्युक्तास्मदीययुक्तिरेव जागर्ति किमेतावता प्रयासेनेति। ननु केवलसामानाधिकरण्यस्य व्याप्तित्वे द्रव्यत्वादिना ह्रदादौ वह्न्याद्यनुमानापत्तिरेव बाधिका तद्वारणाय साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्यैवानुमितिहेतुत्वमुपेयतां किमव्यभिचारज्ञानहेतुतया ह्रदादौ वह्निशून्ये वह्निसामानाधिकरण्यविशिष्टवैशिष्ट्यासत्त्वाद्व्यभिचारिण्यपि साध्यसामानाधिकरण्यविशिष्टस्य साध्यवत्त्येव सत्त्वात् पक्षे विशिष्टवैशिष्ट्यग्रहे हेतौ व्यभिचारग्रहेऽप्यनुमितिरिष्टैव सामानाधिकरण्यविशिष्टवैशिष्ट्यस्याव्यभिचारविशिष्टवैशिष्ट्यतुल्यत्वादित्याशङ्कां परिहरति सामानाधिकरण्यविशिष्टपक्षधर्मत्वे त्विति। पक्षे साध्यसामानाधिकरण्यविशिष्टवैशिष्ट्यं त्वित्यर्थः। 'पक्षे साध्यग्रहं विना' साध्यनिश्चयं विना, 'दुर्घट' दुर्निश्चयं, पक्षे साध्यसन्देहदशायां साध्यसामानाधिकरण्यविशिष्टस्यापि सन्देह औत्सर्गिक स साध्यनिश्चयेनैव व्यावर्तकधर्मदर्शनविधया निवर्तनीय इति भावः। तथा चान्योन्याश्रयात्तत्सामानाधिकरण्यविशिष्टवैशिष्ट्यनिश्चयस्य तन्निश्चयहेतुता न सम्भवतीत्याशयः। अथ पर्वते वह्निसन्देहदशायां निश्चितसाध्यवन्महानसादिवृत्तितयाऽगृह्यमाणायां पर्वतीयधूमव्यक्तौ वह्निसामानाधिकरण्यसन्देह औत्सर्गिक इति तदानीं तत्सामानाधिकरण्योपलक्षितधूमवत्तानिश्चयो दुर्घट इति कथमव्यभिचरितसामानाधिकरण्य

प्रकारकहेतुमत्ताज्ञानहेतुतापक्ष एव प्रतीकार इति चेत्, महानसीयधूमादौ प्रत्यक्षतो वह्निसामानाधिकरण्ये निर्धार्यमाणे लाघवज्ञानाधीनाद्धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चयरूपविशेषदर्शनतस्तदवच्छेदेनैव तन्निर्णयाद्धूमत्वदर्शनविषयपर्क्षीयधूमेऽपि साध्यसामानाधिकरण्यसंशयायोगाद्धेतुव्यापकसाध्यसमानाधिकरणवृत्तित्वोपलक्षितधूमत्वस्य व्याप्तित्वपक्षे तत्प्रकारकहेतुमत्वस्य पक्षे साध्यसन्देहदशायामपि निश्चयस्य निष्प्रत्यूहतयाऽनुपपत्त्यनवकाशाच्च । साध्यस्य केवलान्वयित्वज्ञानकालीनायामनुमितौ केवलान्वयिसाध्यसामानाधिकरण्यज्ञानमन्यादृशयाश्च साध्यवदन्यावृत्तित्वज्ञानं हेतुरिति मते साध्यवद्व्यक्तिभिन्नाक्तिभिन्नवृत्तौ नानाधिकरणकसाध्यके हेतावव्याप्तिर्मूलोक्ता साध्यवदन्यत्वस्य साध्यतावच्छेदकविशिष्टावच्छिन्नभेदरूपत्वे तस्या अनवकाशात् स्वयं सिद्धान्तमतापेक्षया गौरवेण तन्निराकरोति केवलान्वयित्वेनि । साध्य इत्यादिः । अनुमित्यनुपपत्तेरिति । साध्यसामानाधिकरण्यमात्रग्रहस्य व्यभिचारग्रहाविरोधित्वादिति भावः । 'तद्ग्रहोऽपि' साध्ये केवलान्वयित्वग्रहोऽपि, 'हेतुर्वाच्य' यद्यपि स्वमतेऽवृत्तिगगनादेः स्वाभावाभावत्वविरहादत्यन्ताभावे वृत्तिमत्वमनिवेश्यैव तदभावसाधारणं केवलान्वयित्वं सुवचं तथापि सांप्रदायिकानुमततद्घटितकेवलान्वयित्वशरीरे वृत्तौ साधनजन्मात्रस्य विशेषणत्वोपगमेनैव व्यापकतापर्यवसानं भवति स्वमते च पुनरत्यन्ताभावांशे साधनवद्वृत्तित्वविशेषणप्रक्षेपेणैवेति सांप्रदायिकानुमतमेव केवलान्वयित्वं दर्शयति तच्च वृत्तिमदत्यन्तेति । आदिपदान्निष्कृष्टस्य तादृशाभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्य परिग्रहः । अन्योन्याभावघटितव्यापकतापर्यवसानाय तद्घटितमपि केवलान्वयित्वमाह अन्योन्याभावेति । गगनादेः स्वात्यन्ताभावप्रतियोगित्वानुरोधेन तदभावत्वस्वीकारेऽपि तद्वदन्योन्याभावत्वमप्रामाणिकमित्यन्योन्याभावे वृत्तिमत्त्वमव्यावर्त्तकतया नोपात्तम्, 'सर्वसाधारण्याय' साध्ये व्यतिरेकित्वग्रहकालीनानुमितिकारणीभूतज्ञानविषयत्वनिर्वाहाय, 'लाघवात्' साध्यवदन्यावृत्तित्वज्ञाने हेतुत्वान्तरकल्पनालाघवात् । साधनेति । साधनवतोऽत्यन्ताभावविशेषणीभूताया वृत्तेः, साधनवद्वृत्तिताया अन्योन्याभावस्य वा विशेषणत्वनुचितम्, तथा च 'उच्यते' इत्यादिना वक्ष्यमाणसिद्धान्त एव पर्यवसानम्, अन्यथा कार्यकारणभावद्वयकल्पनागौरवस्य प्रसङ्गादित्यर्थः । शेषमिति । साध्ये केवलान्वयित्वग्रहदशायां पक्षे साध्यस्याननुमितावपि न क्षतिः । तदानीं केवलान्वयित्वेन हेतुना साध्यपक्षवृत्तित्वानुमित्यैव पक्षे साध्यवत्तानिश्चयकार्यसम्भवात् । तथा च साध्यवदन्यावृत्तित्वमेवानुमित्यौपयिकं लघुशरीरत्वादित्यादिकमित्यर्थः ॥

इति श्रीगदाधरभट्टाचार्यविरचिता शिरोमणिकृत-
पूर्वपक्षव्याख्याया विवृतिः समाप्ता ॥

अनुमानगादाधर्याम्

सिद्धान्तलक्षणप्रकरणम् ।

(चि०) अत्रोच्यते । प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।

(दी०) प्रतियोग्यसमानाधिकरणेति । प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः ।

(गा०) प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीति यथाश्रुतमूलाद्यत्पदार्थे साध्ये प्रतियोगितावच्छेदकावच्छिन्नान्यत्वं प्रतीयते तथा च वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणमहानसीयवह्नित्वाद्यवच्छिन्नाभावमादाय दोषो दुर्वार, सर्वेषामेव वह्न्यादीनां तादृशाभावप्रतियोगितावच्छेदकविशिष्टतया तदन्यत्वासम्भवात् । यत्पदस्य यद्रूपावच्छिन्नपरतया यद्रूपावच्छिन्नस्य प्रतियोगितानवच्छेदका ये ये धर्माः प्रत्येकं तदवच्छिन्नान्यत्वमित्यर्थे साध्यतावच्छेदकस्य तत्तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यपर्यवसिते वह्न्यादिसाध्यकहेतौ वह्नित्वादेर्विभिन्नवह्न्यादिव्यक्त्यन्तर्भावेन महानसीयवह्नित्वाद्यवच्छिन्नभेदे प्रत्येकं सामानाधिकरण्यसत्त्वेऽप्येकव्यक्तिसत्तादिसाध्यके सत्तात्वादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नभेदसामानाधिकरण्यासत्त्वादव्याप्ति । यद्रूपावच्छिन्नं प्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषय इत्यर्थ उक्तदोषोद्धारेऽपि यद्रूपं प्रतियोगितावच्छेदकभिन्नं प्रतियोगितावच्छेदकाविषयप्रतीतिविषयो वा इत्यत एव सामञ्जस्ये प्रतियोगितावच्छेदकविशिष्टाविषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकविशिष्टे निवेशनमनुचितम्, एवं स्वरूपसम्बन्धरूपावच्छिन्नत्वस्य विवक्षया यद्रूपावच्छिन्नं प्रतियोगित्वमुक्ताभावप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थे शुद्धवह्नित्वरूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगित्वे महानसीयत्वादिविशिष्टवह्नित्वाद्यनवच्छेद्यत्वं सुलभमेव, यद्रूपावच्छिन्नं प्रतियोगित्वं तादृशप्रतियोगिताभिन्नमित्युक्तौ समवायादिना घटादौ साध्ये संयोगादिना घटादिहेतावति-

त्वस्य दुर्ग्रहतयाऽनुमित्यनुत्पादो व्यापकताज्ञानकारणतावादिनामिष्ट एव, तेन तेन रूपेणानवच्छेदकत्वग्रहात्तद्रूपावच्छिन्नविधेयतावच्छेदकताकानुमित्यनुपपत्तिश्च केवलान्वयिग्रन्थे ग्रन्थकृतैव वक्ष्यते । यत्त्वतरनेन हेतोर्निवेशो हेतुव्यक्तिभेदेन व्याप्तिर्भिद्येत, सा च नानुमित्युपयोगिनी पक्षीयधूमादिव्यक्तिव्यापकतायाः पूर्वं वह्न्यादावगृहीतत्वादिति 'यद्रूपविशिष्टे'त्युक्तम्, धूमत्वादिरूपहेतुतावच्छेदकधर्मेणैव विशिष्य निवेश्य तत्तद्रूपावच्छिन्नहेतुकानुमित्योपयिकव्याप्तिर्निर्वाच्या, तथाच महानसादौ धूमवह्न्यादिव्यभिचाराग्रहाद्वह्नित्वादिना तत्तद्धूमत्वाद्यवच्छिन्ननिरूपिताया इव पक्षीय-

अपि व्यापकताया ग्रहसम्भवेनानुमितिनिर्वाह इति भावः । न च

कभेदेन व्याप्तिभेद आवश्यक

एवेत्यनुगतरूपेण हेतुनिवेशो व्यर्थ इति वाच्यम्, हेतुव्यक्तिभेदेन व्याप्तिभेदेऽप्यनुगतरूपेण हेतुनिवेशे धूमव्यापकवह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यत्वादिना सामानाधिकरण्यव्यक्तीनामनुगमात् सामान्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि प्रथममनुगतसामानाधिकरण्यत्वरूपव्याप्तित्वेन ग्रहसम्भवेनानुमित्युपपत्तेस्तत्तद्व्यक्तित्वेन हेतुनिवेशेऽननुगमात् सामान्यप्रत्यासत्त्यापि पक्षीयहेतुनिष्ठव्याप्तेर्व्याप्तित्वेन दुर्ग्रहतयाऽनुमित्यनुपपत्तेः । हेतुतावच्छेदकाश्रयाधिकरणत्वमुपेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशप्रयोजनमग्रे वक्ष्यते । प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छेदकनिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रतियोगितानवच्छेदकत्वसमानाधिकरणधूमवानिति ज्ञानाद्वह्निमानित्यनुमितिः स्यात्, न चेष्टापत्तिसम्भवः, कदाचिद्वह्नित्वेन कदाचिद्द्रव्यत्वादिना वह्न्यनुमितिरिति नियमानुपपत्तेः । न चानवच्छेदकत्वेन तत्तद्धर्मावगाहित्वमेव व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतया तत्तद्धर्मभाननियामकमिति वाच्यम्, अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्यत्वादिभानस्यापि प्रायशः सम्भवादेवं तत्तत्साध्यतावच्छेदकावच्छिन्नव्यभिचारितया हेतुभानस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमात्रेण तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया विशिष्य साध्यतावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वाभासतानुपपत्तिश्चेति विशिष्य साध्यतावच्छेदकस्य व्याप्तिघटकतालाभाय प्रतियोगितानवच्छेदकावच्छिन्नेनेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो धर्मस्तदवच्छिन्नेनेत्युक्तम् । यत्र वह्नित्वत्वादिविशेषणावच्छिन्नस्य साध्यतावच्छेदकता तत्र तेन रूपेणैव तत्तद्धर्माणां व्याप्तिघटकता यत्र स्वरूपत एव वह्नित्वाद्यखण्डधर्माणां साध्यतावच्छेदकत्वं तत्रापि विशेषणावच्छिन्नतत्तद्धर्मघटिततत्तद्धर्मवदितरावृत्तित्वरूपवह्नित्वत्वादिना तन्निवेशो न तु स्वरूपत एव, अनवच्छेदकत्वरूपविशेषणपुरस्कारेण भाने निर्विशेषणकभानात्मकस्य स्वरूपतो भानस्यासम्भवाद्वह्न्यादीतरावृत्तित्वस्य वह्न्यादिमात्रवृत्तिध-

मन्तरसाधारण्येऽपि तन्मात्रपुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्यापि वह्नित्वाद्यवच्छिन्नविधेयकानुमितिहेतुत्वमुपेयते सकलवह्न्यादिवृत्तित्वविषयतानिवेशे गौरवात् सकलवह्न्यादिवृत्तित्वस्य वह्न्यादीतरवृत्तिसाधारणतया तन्मात्रपुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्य न हेतुतासम्भवस्तथा सतीन्धनादिहेतुनापि वह्नित्वाद्यवच्छिन्नानुमितिप्रसङ्गात् सकलवह्न्यादिवृत्तिद्रव्यत्वादाविन्धनादिव्यापकतावच्छेदकत्वस्य सत्त्वाद्वह्नित्वादिनिष्ठतद्व्यक्तित्वधूमजनकतावच्छेदकजातित्वादेर्वह्नित्वादिमात्रवृत्तित्वेऽपि तेन रूपेण व्यापकतावच्छेदकत्वग्रहाद्वह्निमानित्याद्यनुमितिरनुभवविरुद्धा येन रूपेणोपस्थिते वह्नित्वादौ वह्न्यादीतरसाधारण्यसंशयो न जायते तत्पुरस्कारेण व्यापकतावच्छेदकत्वग्रहादेवोक्तानुमित्युत्पादानुभवादत एव ज्ञानत्वत्वानुभवत्वव्यापकगुणत्वव्याप्यजातित्वयोरविशेषेण ज्ञानत्वत्वरूपेण व्यापकतावच्छेदकत्वग्रहाज्ज्ञानवानयमित्यनुमितिर्न भवितुमर्हतीति दीधितिकारवक्ष्यमाणदूषणं प्रत्युक्तम्, अधिकमग्रे वक्ष्याम.। तत्तद्व्यक्तिसामानाधिकरण्यं न तत्तद्व्यक्तिगमकताप्रयोजकं पर्वतीयधूमे महानसीयवह्निसामानाधिकरण्यग्रहेऽपि ततः पर्वते लाघवज्ञानादिवशान्महानसीयवह्न्यनुमितिरिति दर्शयति यत्र येनापीति यावन्निरूपितैत्याभ्याम्। तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरिति। तद्रूपावच्छिन्ननिष्ठा तद्धर्मावच्छिन्नयावद्व्यक्तिगमकताप्रयोजिका व्याप्तिरित्यर्थः। यथाश्रुत एकसाध्यव्यक्तिसामानाधिकरण्यस्यापरव्यक्तिप्रतियोगिकत्वासम्भवेनासङ्गते.।

यत्रैकैकसाध्यतावच्छेदकव्यक्तिर्न सकलहेतुमद्वृत्तितावच्छेदिका तत्रानुगतरूपावच्छिन्नेनापि तेन रूपेण न तादृशहेतुव्यापकतासम्भव. सकलसाध्यतावच्छेदकव्यक्तीनामेव चालनीन्यायेन हेतुसमानाधिकरणतत्तद्व्यक्त्यवच्छिन्नाभावप्रतियोगितावच्छेदकत्वादित्याशङ्कामिष्टापत्त्या परिहरति दण्डयादाविति ॥

(दी०) दण्डयादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमतो नाव्याप्तिः ।

(गा०) परम्परासम्बद्धमिति । स्वसमवायिसंयोगादिसम्बन्धेन साध्यसम्बद्धमित्यर्थः.। एतच्च साध्यावृत्तितया दण्डत्वादेर्न व्यापकतावच्छेदकत्वसम्भव इत्याशङ्कानिराकरणाय साध्यतावच्छेदकं दण्डिसंयोग वादिरूपनानाधिकरणवृत्तितावच्छेदकावच्छिन्नहेतुव्यापकतावच्छेदकमित्यर्थः । एव कारेण दण्डादिरूपप्रत्येकधर्मव्यवच्छेद., तथा च तत्र प्रतियोगितानवच्छेदकत्वस्य दुरुपपादत्वेऽपि न क्षति.। दण्डत्वादिनैव प्रकारेण तद्धेतुकदण्ड्याद्यनुमितेरुपगन्तव्यत्वात् । दण्डादौ व्यापकतावच्छेदकत्वभ्रमादेव दण्डादिप्रकारकदण्ड्यनुमितेरुपगमात् । स्वाश्रयघटितपरम्परासम्बन्धेन यद्धर्मे व्यापकतावच्छेदकत्वग्रहस्तद्विशिष्टधर्मिप्रकारेण सामानाधिकरण्य·

प्रतियोगितया साध्यावगाहिव्याप्तिग्रहस्यैव वा तद्धर्मविशिष्टदण्डादिरूपधर्मिणोऽनुमितिविधेयतावच्छेदकताप्रयोजकत्वोपगमेन दण्डिमानित्याद्याकारानुमितेर्भ्रमशून्यतादशायां निर्वाहात्वादिति भाव ।

अथ महानसीयत्वादिसहितवह्नित्वादेर्धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि शुद्धवह्नित्वादिरूपसाध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्ववत्तत्तादिविशिष्टदण्डस्य तादृशप्रतियोगितावच्छेदकत्वेऽपि शुद्धदण्डत्वाद्यवच्छिन्नस्य तादृशप्रतियोगितानवच्छेदकत्वस्य सुघटतया तस्य व्यापकतावच्छेदकत्वानुपगमो न सङ्गच्छते। न च तद्दण्डी नास्तीति बुद्धौ तत्त्वोपलक्षित एव दण्ड प्रतियोगितावच्छेदकतापर्याप्तिर्भासते न तु तत्तामन्तर्भाव्य तत्त्वोपलक्षितव्यक्तेरेवानतिप्रसक्ततया तत्ताशस्यावच्छेदकान्तर्भावे गौरवादतो विशेष्यस्यावच्छेदकतापर्याप्त्यधिकरणतया दण्डत्वविशिष्टस्यापि तस्यानवच्छेदकत्वं दुर्घटं महानसीयवह्न्यभावप्रतियोगिताया वह्नित्वादेरतिप्रसक्ततया तन्मात्रेऽवच्छेदकतापर्याप्त्यसंभवेन महानसीयत्वादेरवच्छेदकान्तर्भाव आवश्यक इति शुद्धवह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्व सुघटमिति वाच्यम्, स्वरूपतो भासमानस्यैव स्वरूपतोऽवच्छेदकताया सिद्धान्तसिद्धतया सखण्डपदार्थस्य दण्डादे स्वरूपतोऽवच्छेदकत्वासम्भवेन दण्डत्वादिविशिष्टस्यातिप्रसक्ततया तत्तादिरूपविशेषणमनन्तर्भाव्य तन्मात्रच्छेदकत्वपर्याप्तेरयोगात् । अभावप्रतियोगितावच्छेदकतया भासमान उपलक्षणीभूतधर्मान्तरस्य भानोपगम उपलक्षणतया दण्डत्वमात्रतत्तद्दण्डावच्छिन्नाभावप्रतियोगितावच्छेदकतया भासमानतत्तद्दण्डाशे विपर्यीकृत्य दण्डिमति दण्डी नास्तीति प्रत्ययस्य दुर्वारत्वाच्च ।

अत्र केचित् उक्तानुशयेनैव 'दण्ड्यादौ'इत्यादिपदोपादानम् । आदिपदाच्च पृथिवीत्वादिव्याप्यजातित्वादिनाऽनुगताकृतघटत्वपटत्वमृत्तिकात्वपाषाणत्वादिमत समवायादिना पृथिव्यादिहेतुकसाध्यस्य परिग्रह । समवायादिना हेतुभूतपृथिव्यादिमति तन्तुकपालादौ विशेषणानवच्छिन्नघटत्वपटत्वाद्यवच्छिन्नाभावस्य सत्त्वात्। सर्वास्वेव साध्यतावच्छेदकतादृशजातिषु तथाविधाभावप्रतियोगितावच्छेदकत्वपर्याप्तेस्तासा व्यापकतावच्छेदकत्वासम्भवेन तदनुगमकैकधर्मस्यैव परम्परासम्बन्धेन तथात्वोपगमस्यावश्यकत्वादित्याहु ।

अन्ये तु तद्दण्डवान्नास्तीत्यादौ प्रतियोगिविशेषणतया भासमानदण्डाविष्वेव प्रतियोगितावच्छेदकत्वपर्याप्तिर्भासते तद्विशेषणतत्त्वादौ तु तदवच्छेदकतावच्छेदकत्वमेव प्रतियोगिताद्यधिकरणस्य तदवच्छेदकत्वासंभवेन तदन्तर्भावेन तदवच्छेदकतापर्याप्त्यसम्भवात्। न चानवच्छिन्नावच्छेदकत्वरूपस्वरूपतोऽवच्छेदकत्वं निवेश्यमिति वाच्यम्, तत्तत्तद्दण्डसाध्यतावच्छेदककव्यभिचारित्वियात्याते । तथा च दण्डादेरनवच्छेदकत्व दुर्घटं महानसीयवह्निर्नास्तीत्यादौ च महानसीयत्वादे प्रतियोगिन्येव विशेषणतया भानात्तदन्त-

भावेनैव प्रतियोगितावच्छेदकत्वपर्याप्तिर्भासत इति विशेषः। अथ वह्नित्वाद्यंश एव सामानाधिकरण्यसम्बन्धेन विशेषणतया महानसीयत्वादिकमवगाहमाना महानसीयत्वविशिष्टवह्नित्ववान्नास्तीत्याकारिका या प्रतीतिस्तस्या उक्तयुक्त्या वह्नित्वादावेव प्रतियोगितावच्छेदकत्वपर्याप्तिविषयकतया वह्नित्वादेरप्यनवच्छेदकत्वं दुर्घटमेव स्यात्, यदि च वह्नित्वादेः समवायेन प्रतियोगितायां सामानाधिकरण्यसम्बन्धेन च महानसीयत्वादेस्तदवच्छेदकतायामवच्छेदकत्वे गौरवान्महानसीयत्वादिसहितस्य वह्नित्वादेः प्रतियोगितायामेवावच्छेदकत्वमुक्तप्रतीतिस्तु कम्बुग्रीवादिमान्नास्तीतिवदवच्छेदकत्वांशे भ्रमरूपैवेत्युच्यते, तदा यत्र सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशिष्टस्य वह्नित्वादेः साध्यतावच्छेदकता तत्स्थलीये व्यभिचारिणि धूमादिहेतावतिव्याप्तिरिति 'स्वविशिष्टसम्बन्धिनिष्ठे'त्यादिना निर्वाच्यं पारिभाषिकमेवावच्छेदकत्वं निवेशनीयं तच्च तल्लक्षणे यादृशस्य स्वपदार्थस्य निवेशस्तादृशत्वम्, एवञ्च महानसीयत्वादिविशिष्टस्य वह्नित्वादेस्तत्र स्वपदेनोपादानासम्भवाद्विशिष्टवह्नित्वादिकमेव पारिभाषिकमवच्छेदकत्वं तदवच्छिन्नभेदश्च शुद्धवह्नित्वादावपि दुर्घटः, तथा चावच्छेदकं यादृशं स्वं तादृशाविषयकप्रतीतिविषयत्वमेवानवच्छेदकत्वपदेन विवक्षणीयं तथा च सति सखण्डस्य दण्डादेः स्वरूपतोऽभानात्सत्त्वादिविशेषणविशिष्टस्यैवावच्छेदकलक्षणस्थस्वपदेनोपादेयतया तद्विशिष्टाविषयकप्रतीतिविषयत्वस्य दण्डत्वादिविशिष्टस्य सुवचत्वाद्व्यापकतावच्छेदकत्वमव्याहतमेवेति चेन्न, पारिभाषिकस्यावच्छेदकत्वस्य स्वत्वघटितत्वेनाननुगततयाभावकूटज्ञानासम्भवेन प्रतियोगितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वस्यागत्या गुरुधर्मसाधारण्यमङ्गीकृत्य व्याप्तिलक्षणे तदेव निवेशनीयम्, एवञ्च सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशेषणावच्छिन्नस्य वह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि महानसीयत्वादिविशिष्टनिरूपितसमवायादेरेव प्रतियोगितावच्छेदकताघटकसम्बन्धत्वं तन्नोच्यते शुद्धसमवायादिना वह्नित्वादेरतिप्रसक्तत्वात्, शुद्धसमवायादेस्तदवच्छेदकतावच्छेदकसम्बन्धत्वे महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वाद्यवच्छिन्नाभावात्तद्विशिष्टवह्नित्वाद्यवच्छिन्नाभावस्य वैलक्षण्यानुपपत्तेश्च। तथा च साध्यतावच्छेदकताघटकशुद्धसमवायादिनाऽखण्डवह्नित्वादेरनवच्छेदकत्वं न दुर्लभम्। न च महानसीयत्वादिसामानाधिकरण्यस्य यत्रोपलक्षणता तत्र तस्यावच्छेदककोटौ न प्रवेशो यत्र विशेषणत्वं तत्र तत्प्रवेश इत्यत एव वैलक्षण्यमिति वाच्यम्, उपलक्षणीभवत्तत्तद्धर्मावच्छिन्नप्रतियोगितावच्छेदकताकाभावबुद्धावपि तत्तद्रूपस्य प्रतियोगितावच्छेदकांशे प्रकारतया भानात्तदवच्छेदकत्वभानस्यावश्यकतयाऽवच्छेदकशरीराप्रवेशरूपोपलक्षणताया उपलक्षणविधयाऽवच्छेदके तत्रासम्भवात्। यदुपलक्षितनिरूपितसमवायादेरवच्छेदकताघटकसम्बन्धत्वं तस्योपलक्षणविधयाऽवच्छेदकत्वं

यद्विशिष्टनिरूपितसमवायादेरवच्छेदकताघटकसम्बन्धत्वं तस्य विशेषणविधयाऽवच्छेदकत्वमित्यस्यैव विशेषत्वात् । एवञ्चैकत्वप्रागभावविशिष्टघटादेः संयोगसम्बन्धेनाभावस्य प्रतियोगितायामप्रसिद्धतया विशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासम्भवेनागत्या विशेषणविधया प्रतियोगितावच्छेदकत्वस्याप्यन्यथैव वैलक्षण्यस्योपपादनीयतया शुद्धसमवायादेरेव विशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकसम्बन्धतया तादृशाभावस्य तादृशसम्बन्धेन प्रतियोगिसमानाधिकरणतया दीधितिकृतां प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्यपर्यन्तनिवेशव्यावृत्तिसङ्गतिः । माभूद्वा विशिष्टनिरूपितसमवायत्वादिना प्रतियोगितावच्छेदकताघटकसम्बन्धता तथापि महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वादेस्तद्विशिष्टवह्नित्वादेश्च प्रतियोगितावच्छेदकतयोर्भेदेन वैलक्षण्यम्, आद्या तद्धर्मावच्छिन्ना विशेष्यमात्रपर्याप्ता, अन्त्या च विशेष्यविशेषणभावापन्नयोर्धर्मधर्मिणोर्द्वयोः पर्याप्तैवंरीत्यैवोपपादनीयम्, तावताप्यखण्डस्य शुद्धवह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमुपपद्यते धर्मान्तरोपलक्षितवह्नित्वाद्यवच्छिन्नाभावस्य धूमादिमत्यवृत्तेर्विशिष्टवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकतायाश्च विशेष्यविशेषणान्तर्भावेनैव पर्याप्तेः । तत्त्वोपलक्षितदण्डावच्छिन्नप्रतियोगिताकहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकता च तत्तावच्छिन्ना शुद्धविशेष्य एव पर्याप्ता साध्यतावच्छेदकताघटकशुद्धसंयोगसम्बन्धावच्छिन्ना चेति तादृशसम्बन्धेन दण्डादेस्तादृशाभावप्रतियोगितानवच्छेदकत्वं दुरुपपादमिति वदन्ति ।

वस्तुतो गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे पारिभाषिकावच्छेदकत्वं निवेशनीयं तच्छरीरे यादृशं स्वं निविष्टं तादृशधर्मभेदनिवेशे वह्नित्वादौ विशिष्टवह्नित्वादिभेदासत्त्वेन तादृशधर्माविषयकप्रतीतिविषयत्वं निवेशनीयमिति गौरवमतः प्रतियोगितावच्छेदकं यादृशयादृशरूपं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वरूपं तत्तदतिरिक्तवृत्तित्वमेवानवच्छेदकान्तेन विवक्षणीयं तथा च सर्वासामेव दण्डादिव्यक्तीनां हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया कस्याश्चिदपि दण्डादिव्यक्तेर्न यावत्प्रतियोगितावच्छेदकातिरिक्तवृत्तित्वं स्वस्य स्वातिरिक्तवृत्तित्वविरहादित्यखण्डधर्मस्य व्यापकतानवच्छेदकतानुसरणम् । एतच्चैकोक्त्यभिप्रायेण यथाश्रुतमूललक्षणमुपपादयन्तां सार्वभौमप्रभृतिमतमनुसृत्य, एकोक्त्यनादरे त्वनुगतरूपेण नानाव्यक्तिविधेयतावच्छेदकानुमित्यौपयिकव्याप्तिर्यद्रूपावच्छिन्नमनवच्छेदकं यद्रूपं वा प्रतियोगितावच्छेदकतानवच्छेदकं तद्रूपविशिष्टावच्छिन्नसामानाधिकरण्यं तद्रूपविशिष्टावच्छिन्ननिरूपिता व्याप्तिरित्यादिरीत्या निर्वचनीया, तथा सति दण्डिसंयोगादिहेतुकापि दण्डिमानयमित्याकारिकाऽनुमितिर्विशेषदर्शिनामपि निर्वहति, एवमेकोक्त्या प्रतियोगिताधर्मिकोभयाभावघटिताया ग्रन्थकारेण स्वयमुपदर्शनीयाया व्याप्तेरपि दण्डत्वादिविशिष्ट-

दण्डाद्यवच्छिन्ननिरूपितत्वनिर्वाहः, हेतुसमानाधिकरणविशेषाभावप्रतियोगितायां दण्डत्वपृथिवीत्वव्याप्यजातित्वादिविशिष्टावच्छेद्यत्वाभावस्याव्याहतत्वाद् दण्डत्वादिसामान्याभावप्रतियोगितायामेव तद्धर्मविशिष्टनिरूपितविलक्षणावच्छेद्यत्वसत्त्वादिति ध्येयम् ॥

(दी०) इत्थञ्च इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वाद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादेर्नाव्याप्तिः । साधनस्य विशिष्टसत्तादेर्गुणादावद्वृत्तेः ।

(गा०) इत्थञ्चेति । हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यसाधारण्यमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्यनिवेशे चेत्यर्थः । नाव्याप्तिरिति । न विशिष्टसत्तात्वरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमित्यौपयिकव्याप्त्यनिर्वाह इत्यर्थः, तेन विशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ताज्ञानजन्यानुमित्यौपयिकव्याप्तौ तु तदुपलक्षितहेतुसामानाधिकरण्यमेव निविष्टमिति लभ्यते, अतो द्रव्यत्वाद्यभावे तादृशहेतुसामानाधिकरण्यसत्त्वात्तादृशे हेतौ न द्रव्यत्वादेर्व्याप्तिरित्यभ्रान्तानां गुणादौ विशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ताज्ञानसम्भवेऽपि न तत्र द्रव्यत्वाद्यनुमित्यापत्तिः । यत्र घटपटवृत्तिसंयोगत्वादिना हेतुता, घटपटाद्यन्यतरत्वं साध्यं तत्रोभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्या हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यगर्भव्याप्त्यन्तरमवश्यं स्वीकरणीयमन्यथा तद्धेतुकतत्साध्यकानुमित्युच्छेदप्रसङ्गात् । ईदृशव्याप्त्यन्तरानभ्युपगमे सादृश्यहेतुकानुमितिरप्युच्छिद्येत तद्भेदसामानाधिकरण्यसहिततद्वृत्तिधर्मत्वरूपसादृश्यत्वविशिष्टाधिकरणाप्रसिद्ध्या विशिष्टाधिकरणतागर्भव्याप्त्यसम्भवात् । अथैवं विशिष्टवैशिष्ट्यावगाहिज्ञाने विशिष्टनिरूपितसमवायस्य सम्बन्धतया तेन सम्बन्धेन व्याप्तिर्हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वस्याग्रे विवक्षणीयतयैव निर्वहतीति कथमत्र विशिष्टपदोपादानम् । न च विशिष्टवैशिष्ट्यबोधे विशिष्टनिरूपितसमवायत्वादिना न विशेषणसम्बन्धताऽपि तु शुद्ध एव समवायादिर्विशेषणसम्बन्धः स्वविशिष्टनिरूपितसमवायादिस्तु विशेषणतावच्छेदकसम्बन्ध इतिमताभिप्रायेणेदं तथा चोक्तस्थलेऽपि हेतुतावच्छेदकसम्बन्धः शुद्धसमवाय एवेति हेतुतावच्छेदकसम्बन्धमात्रविवक्षया न प्रतीकार इति वाच्यम्, हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाने हेतुतावच्छेदकस्य पक्षे परम्परासम्बन्धभाननियमे व्यापकताशरीरघटकाभावाधिकरणेऽपि तदीयतादृशसम्बन्धस्य निवेशितत्वात्तत एव हेतुतः पक्षे साध्यानुमितिनिर्वाहे विशिष्टत्वेन सत्तादेर्द्रव्यत्वादिव्याप्तिस्वीकारस्य निरर्थकतापातात् । न च दर्शितरीत्या विशिष्टव्यापकताग्रहस्य विशेषणव्यापकतावगाहित्वेऽपि विशिष्टे पक्षधर्मताग्रहस्य विशेषणे तदवगाहित्वेऽपि च विशिष्टहेतुकपरामर्शस्य विशेषणे साध्यसामानाधिकरण्यावगाहित्वानियमान्न विशेषणहेतुका-

नुमितिसामग्र्या विशिष्टहेतुकानुमितिपूर्वमावश्यकत्वेति वाच्यम्, साध्ये विशिष्टहेतोर्व्यापकताग्रहेऽपि विशिष्टहेतौ साध्यविरोधग्रहसत्त्वेऽनुमित्यनुत्पत्त्या विशिष्टहेतुकस्थले विशिष्टाधिकरणत्वघटितहेतुसाध्यसामानाधिकरण्यविषयकस्यैव परामर्शस्यानुमितिहेतुता वाच्या, अन्यथा विरोधस्य जनकज्ञानाविरोधितया हेत्वाभासत्वस्य दुर्घटत्वप्रसङ्गात्, तथा च साध्यवति विशिष्टहेत्वधिकरणत्वभाने विशेषणस्य परम्परासम्बन्धस्यापि तत्र भाननियमेन विशिष्टहेतुकपरामर्शस्य नियमतो विशेषणेऽपि साध्यसामानाधिकरण्यावगाहित्वात्। मैवम्, विशिष्टनिरूपितव्यापकताशरीरे विशेषणस्य धर्मिपारतन्त्र्येणैव विशिष्टाधिकरणे विशेषणतया प्रवेशो न तु स्वातन्त्र्येण तथा च तद्ग्रहे न विशेषणव्यापकतावगाहित्वनियमो निर्वहति विशेषणानिरूपितव्यापकतायास्तन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावघटितत्वात्, विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वरूपप्रतियोग्युपरागेणाभावभाने च विशिष्टवत्त्वान्तर्गतविशेष्यवत्त्वपरित्यागेन विशेषणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वे प्रतियोगितावच्छेदकत्वपर्याप्तिभानासम्भवादभावप्रतियोगिप्रकारघटकस्योपलक्षणतया भानानुपगमात्। न च परम्परासम्बन्धेन विशेषणनिष्ठव्याप्त्यवगाहिपरामर्शनिष्ठकारणताया उभयवादिसिद्धत्वाद्विशिष्टहेतुकपरामर्शान्तरकारणत्वाकल्पनप्रयुक्तलाघवानुरोधेन विशिष्टस्य व्याप्तिग्रहस्थलेऽधिकरणे स्वातन्त्र्येण विशेषणवत्त्वभानमुपगम्य विशेषणेऽपि व्याप्तिभानं कल्पनीयमिति वाच्यम्, शब्दाधीनविशिष्टवत्त्वगर्भव्याप्तिग्रहे स्वातन्त्र्येण विशेषणवत्त्वगर्भव्याप्तिभानानियमात्, तादृशव्याप्तिबोधकशब्दस्य स्वातन्त्र्येण विशेषणवत्त्वाभासकत्वात्। अथ तत्र तदुत्तरं विशेषणे मानसव्याप्तिग्रह एवानुमितेय कल्प्यते तत्कारणतायाः क्लृप्तत्वादिति चेत्, एवं सति दण्डाद्युपलक्षितधर्मिहेतुकानुमितेर्विलयप्रसङ्गात्, तद्धेतुकव्याप्तिग्रहस्थले परम्परासम्बन्धेनोपस्थितदण्डादौ व्याप्तिग्रहस्य कल्पनसम्भवात्। स्वातन्त्र्येण सकलपरम्परासम्बन्धघटितसकलविशेषणवत्त्वग्रहस्याप्रामाणिकतया विशेषणहेतुकपरामर्शस्य कारणतायाः क्लृप्तत्वानियमाच्च।

ननु वह्निसंयोगिसंयोगाद्यात्मकसाध्यसामानाधिकरण्यस्य व्याप्तित्वे 'एकैव हि सा व्याप्ति' इति मूलग्रन्थविरोध, महानसपर्वतादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगादेरैक्यासम्भवादित्यत आह सामानाधिकरण्यव्यक्तीनामिति।

(दी०) सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यम्। वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वाद्धूमत्वादिमति तादृशसामानाधिकरण्यं तद्वति धूमत्वादिकं वा व्याप्तिः।

(गा०) भेदेऽपीति। अधिकरणभेदेन धूमादिभेदेन चेत्यादि। 'निरूपक

तावच्छेदकं' वह्नित्वादिरूपसाध्यतावच्छेदकम्, 'अधिकरणतावच्छेदकं' धूमत्वादिरूपहेतुतावच्छेदकम्, 'ऐक्यात्' साध्यहेतुभेदेऽप्यभेदात्, तदभेदतात्पर्येणैक्यं भाक्त एकत्वव्यवहार इत्यर्थः। ननु लक्षणया तद्व्यवहारसमर्थनमसङ्गतं सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्वाहार्थं व्याप्त्यैक्यकथनात्, तन्निर्वाहस्य च सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादरैक्येऽपि पक्षीयधूमादिनिष्ठसामानाधिकरण्यस्य सामान्यप्रत्यासत्तिं विना पूर्वं ग्रहासम्भवेन तत्स्मरणासम्भवात् पक्षीयधूमे तदुपनयासम्भवेनायोगादतोऽतिप्रसङ्गेन च धूमादिव्यापकवह्न्यादिसामानाधिकरण्यमात्रस्य व्याप्तित्वासम्भवाद्धूमत्वादिरूपहेतुतावच्छेदकस्य द्विधा व्याप्तिशरीरे प्रवेशस्यावश्यकत्वं दर्शयन् व्याप्तेर्भेदमभेदञ्च दर्शयति वस्तुतस्त्वित्यादिना। प्रथमपक्षप्रदर्शनं तत्पक्षे धूमत्वत्वाद्यप्रवेशलाघवेन सामान्यप्रत्यासत्तिपक्षे तज्ज्ञानस्यैवानुमितिहेतुत्वमिति सूचनाय। रासभादिसाधारण्यादिति। तत्साधारण्ये च भ्रमं विनापि रासभादिलिङ्गकवह्न्याद्यनुमानापत्तिरिति भावः। अथ व्यापकताप्रविष्टहेतुतावच्छेदकधर्मिणावच्छेदकसामानाधिकरण्यप्रकारकज्ञानस्यैवानुमितिहेतुत्वोपगमान्नायमतिप्रसङ्गो धूमत्वादिप्रकारेण भासमाने रासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वाद्यंशे भ्रमत्वनियमाद्वक्ष्यमाणधूमत्वादिमद्विशिष्टवह्न्यादिसामानाधिकरण्यस्य व्याप्तित्वेऽपि तद्धर्मितावच्छेदकतापन्नहेतुतावच्छेदकविशिष्टवत्ताज्ञानस्य हेतुताया अवश्योपेयत्वादन्यथा विशिष्टसत्तादिव्यापकद्रव्यत्वादिनिरूपितविशिष्टसत्तादिनिष्ठसामानाधिकरण्योपलक्षितवत्ताज्ञानाद्गुणादिरूपपक्षेऽभ्रान्तस्य द्रव्यत्वाद्यनुमानापत्तेः। साध्यसामानाधिकरण्यविशिष्टवत्त्वस्य पक्षे साध्यनिश्चयं विना दुर्निश्चेयतया तदुपलक्षितवत्तानिश्चयस्याप्यनुमितिहेतुताया उपगन्तव्यत्वात्, केवलसामानाधिकरण्यप्रकारेण पक्षधर्मताज्ञानस्यानुमितिहेतुत्वे धूमाभाववान् पक्ष इत्यसिद्धिग्रहदशायामपि साध्ये धूमादिव्यापकताज्ञानादप्यनुमित्यापत्तेश्चासमानप्रकारकतया धूमाभाववान् पक्ष इत्यादिबुद्धेर्धूमवृत्तिसामानाधिकरण्यवद्वान् पक्ष इत्यादिज्ञानाविरोधित्वादिति चेत्। सत्यम्, 'धूमत्वादिमति सामानाधिकरण्यम्' इत्यस्य धूमत्वादिविशिष्टविशेषणतापन्नं सामानाधिकरण्यमित्यर्थः, न तु धूमादिवृत्तित्वविशेषितसामानाधिकरण्यमिति। तथा चोभयधर्मिविशेषणतापन्नधूमत्वादिरूपहेतुतावच्छेदकसामानाधिकरण्योभयं व्याप्तिरिति पर्यवसितम्, कारणञ्च धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्यादिरेव परामर्शस्तादृशस्यैव चोक्तोभयस्य हेतुविशेषणतयाऽनुमितिजनकज्ञानविषयत्वरूपव्याप्तित्वनिर्वाहः। द्वितीयपक्षे च धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववद्धूमवान् पक्ष इति ज्ञानं हेतुर्न तु स्वरूपतो धूमत्वाप्रकारकं तादृशधूमत्ववत्त्वान् पक्ष इत्याकारकं तादृशज्ञानस्य धूमाभाववान् पक्ष इत्याकारकधूमत्वत्वाद्यप्रकारकासिद्धिज्ञानाप्रतिबध्यत्वात्। एतन्मते च हेतुतावच्छेदकस्वरूपसाधारणधर्मावच्छिन्ने साध्यस-

मानाधिकरणावृत्तित्वमेव विरोधो न तु हेतुतावच्छेदकावच्छिन्ने साध्या सामानाधिकरण्यम्, उपदर्शितज्ञानस्य हेतुतावच्छेदकं धर्मितावच्छेदकी कृत्य सामानाधिकरण्यानवगाहितया तथाविधविरोधज्ञानाप्रतिबध्यत्वात्। यदि च विरोधस्यानुमितिं प्रति साक्षाद्विरोधितया हेत्वाभासत्वमुपपादयितुं शक्यते तदा समानाधिकरणवृत्तित्वादौ निर्द्धर्मितावच्छेदकमसमानाधिकरण वृत्तिमद्धूमवान् पर्वत इत्येतादृशमपि ज्ञानं हेतुरुपेयतेऽन्यथा धूमत्व त्वादिविषयिताया कारणतावच्छेदककुक्षौ प्रवेशे गौरवात्, सामानाधिकर ण्यप्रकारकत्वापेक्षया समानाधिकरणवृत्तिप्रकारकत्वस्य गुरुत्वेऽपि सामान्य स्याप्रत्यासत्तित्वे विशिष्टपरामर्शनिर्वाहानुरोधेन तेन रूपेण हेतुताया अगत्योपगमात्। 'आद्या' हेतुतावच्छेदकधर्मसहितसाध्यसामानाधिकरण्य रूपा। भिन्नेति। प्रतिधूमादिकमित्यादि। 'द्वितीया' साध्यसमानाधिकरण वृत्तिहेतुतावच्छेदकरूपा, 'अभिन्ना' सर्वधूमादिसाधारणी अनुगतरूपाव च्छिन्ना। नानाव्यक्तिदण्डादिविशिष्टहेतुकस्थलेऽपि परम्परासम्बद्धदण्डत्वा द्यखण्डधर्म एव हेतुतावच्छेदकतया उपगन्तव्य इति भाव। यद्यपि साध्य सामानाधिकरण्यावच्छेदकरूपवक्ष्यमाणव्याप्त्यभिप्रायेणापि 'एकैव हि सा व्याप्ति' इत्यादिग्रन्थ सङ्गच्छते, तथापि स्वय तत्र स्वरूपसम्बन्धरूपाव च्छेदकत्वप्रवेशस्य खण्डनीयतया स्वविशिष्टाधिकरणावृत्तियावत्साध्यास मानाधिकरणकत्वरूपपारिभाषिकावच्छेदकत्वस्यैव च विलक्षणीयतयैतद पेक्षया तादृशी व्याप्तिर्गुरुशरीरेति कथञ्चिदीदृशव्याप्तेरैक्योपपत्तिसम्भवेन तज्ज्ञानमनुमितिहेतुरित्येतादृशव्याप्तेरैक्यमुपपादितम्।

मिश्रादिमतमवलम्ब्य प्रतियोग्यसमानाधिकरणपदप्रयोजनमाह अत्र कपिसंयोगीति।

(दी०) अयं कपिसंयोग्येतद्वृक्षत्वादित्यादिसंग्रहायासमानाधि-करणान्तम्। यत्तु इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत्, संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन तत्सामान्याभाववृत्ता-वविरोधात्। तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात् परितः प्रतियोग्यु-पलब्धेर्दोषाद्वा वृक्षे न संयोग इति नाध्यक्षमिति। तन्न, द्रव्ये संयोग-सामान्याभावे मानाभावात्।

(गा०) अथैतद्वृक्षत्वादेरव्याप्यवृत्तिकपिसंयोगादिव्याप्यतोपगमे कपि संयोगाद्यनवच्छेदकमूलादे पक्षतावच्छेदकत्वे तदवच्छेदेनाप्येतद्वृक्षादौ कपिसंयोगादे सिद्धिप्रसङ्ग। न चेष्टापत्ति, सहिङ्गकपरामर्शस्य भ्रमानु मित्यजनकत्वनियमात्। न च तदवच्छेदेन हेतुमत्ताज्ञानस्य तदवच्छेदेन साध्यानुमितिहेतुत्वादेतद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतोश्च किञ्चिदवच्छेदेना वृत्तेर्नातिप्रसङ्ग इति वाच्यम्, यदि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहि-

प्रत्यक्षस्यैव सर्वदा तादृशसम्बन्धेन सत्त्वेनातिप्रसङ्गविरहात् । इदमापाततो द्रव्यरूपाधिकरणविषयकसंयोगाभावविषयकप्रत्यक्षस्य कदाचिदप्यनुदयेन तादृशप्रत्यक्षसामग्र्या एवाकल्पनेनापादकाभावादेवातिप्रसङ्गवारणसम्भवेन तादृशप्रतिबन्धकताकल्पनस्यायुक्तत्वात् । कथञ्चिदापत्तिसम्भवेऽपि लाघवात्तादात्म्यसम्बन्धेन द्रव्यत्वेनैव तादृशसम्बन्धेन संयोगाभावलौकिकप्रत्यक्षं प्रति प्रतिबन्धकत्वौचित्यात् । नानाभावादिति । लौकिकप्रत्यक्षस्य योग्यानुपलब्धिविरहेणासम्भवात्, उपनीतभानस्य संयोगाभावो वृक्षावृत्तिरित्याकारकविपरीतविषयकस्याप्युपनयवशेन सम्भवात्, विनिगमनाविरहेणैकतरस्य प्रामाण्यासिद्धेः, शब्दस्य चातोक्त्यासिद्ध्या तदव्यवस्थापकत्वादनुमानस्य च लिङ्गाभावेनासम्भवादिति भावः ।

ननु वृक्षादौ यावत्संयोगविशेषाभावानामुभयवादिसिद्धतया तत एव हेतोरन्यप्रत्यक्षस्यापि तत्सामान्याभावस्य सिद्धिर्निष्प्रत्यूहैवेतिशङ्कां निरस्यति न चेत्यादिना ।

(दी०) न च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानितिव्याप्तेर्योर्वृत्संयोगाभावा एव मानम् । यत्तदर्थयोरननुगमादेकावच्छेदेन तदीययावद्विशेषाभाववत्त्वस्योपाधित्वाच्च । एतेनायं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वादितिपरास्तम्, व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च । न च प्रतियोग्यनवच्छेदकत्वेनैव वृक्षत्वादेरभावावच्छेदकत्वम्, गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गात् । यथा च घटपूर्ववर्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति सम्प्रदायविदः ।

(गा०) यः संयोगीययावद्विशेषाभाववान् स संयोगसामान्याभाववानितिव्याप्तेरेवाग्रे व्यर्थविशेषणत्वाप्रयोजकत्वादिदोषेण निराकरणीयतया प्रथमतः सामान्यमुखीव्याप्तिमनुमानोपष्टम्भकतया दर्शयति यो यदीयेति । यद्धर्माश्रयस्य यावद्विशेषाभाववान् यः स तद्धर्मावच्छिन्नाभाववानित्यर्थः, संयोगत्वाश्रयस्य विशेषधर्मावच्छिन्नाभावकूटं वृक्षादौ वर्तत इति तयोर्व्याप्तेः संयोगत्वावच्छिन्नाभावसिद्धिः, प्रतियोगिनोर्यत्त्वतत्त्वेन निवेशे संयोगवृत्तिरूपसंयोगत्वादिरूपसामान्यधर्मावच्छिन्नाभावमादाय सिद्धसाधनं स्यादिति धर्मस्य यत्त्वतत्त्वेनोपादानम्, संयोगादिसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नाभावमादाय सिद्धसाधनवारणाय समवायसम्बन्धावच्छिन्नाभाव एव साधनीयः, अन्यसम्बन्धावच्छिन्नविशेषाभावकूटस्य तत्सम्बन्धाव-

च्छिन्नसामान्याभावस्य व्यभिचारित्वे समवायसम्बन्धावच्छिन्नविशेषाभाव कूटस्यापि तत्सम्बन्धावच्छिन्नसामान्याभावव्यभिचारित्वं तुल्यन्यायेन सम्भाव्येतेति प्रतियोगितावच्छेदकसम्बन्धानामपि यत्तत्त्वेन व्याप्तावन्त र्भाव । अत एव समवायसम्बन्धावच्छिन्नप्रतियोगिताकयावद्विशेषाभावेन हेतुना तत्सम्बन्धावच्छिन्नसंयोगसामान्याभावसिद्धि', यद्धर्माश्रयविशेषाभा वध्रौमयावृत्तियद्धर्मसमानाधिकरणधर्मावच्छिन्नाभाव, उभयावृत्तित्वञ्च स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरणोभयसम्बन्धेन भेदवदन्यत्वम् । अत संयोगत्वाद्यपेक्षया वृक्षवृत्तिसंयोगत्वादेर्विशेषधर्मत्वेऽपि संयोगसामान्या भावं वृक्षादावनभ्युपगच्छतोऽवयवविशेषरूपावच्छेदकदुर्भिक्षेण वृक्षवृत्ति संयोगत्वावच्छिन्नाभावस्य वृक्षादावनभ्युपगमेऽपि च न सन्दिग्धासिद्धि, वृक्षवृत्तिसंयोगत्वादीनामुभयवृत्तित्वेन तदवच्छिन्नाभावव्यावृत्तिः । न च हेतावुभयावृत्तित्वविशेषणस्यासिद्धिवारकत्वेपि व्यभिचारावारकतया वैयर्थ्य यावत्त्वविशेषस्य धीविशेषविषयत्वरूपस्य परिचायकमेव तादृशधर्मावच्छि न्नप्रतियोगिताकत्वं न तु हेतुप्रविष्टमिति तु न सत् तथा सति यत्तत्प दार्थस्य हेतुसाध्यशरीराप्रवेशेन सामान्यव्याप्तित्वानुपपत्तेरिति वाच्यम् यावत्पदस्य व्यापकत्वार्थकतया तद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छि न्नाभावत्वनिरूपिताया आधेयत्वसम्बन्धावच्छिन्नव्यापकताया एव हेतुतया विशेषधर्मव्यापकत्वाघटकाभावान्तरस्यैव च सामान्यधर्मव्यापकताघटक तया वैयर्थ्यानवकाशात् । न च तादृशाभावत्वव्यापकत्वं तादृशाभावत्व वन्निष्ठभेदप्रतियोगितायामाधेयतासम्बन्धेनावच्छेदकमधिकरणमप्रसिद्धमिति तदनवच्छेदकत्वरूपहेत्वप्रसिद्धिरिति वाच्यम्, आधेयतासम्बन्धावच्छिन्नाव च्छेदकतासम्बन्धेन प्रतियोगिताया अभावस्यैव प्रतियोगितानवच्छेदकत्व स्थाने निवेशनीयत्वात्, उक्तस्थले च व्यधिकरणतादृशसम्बन्धावच्छिन्ना भावनसिद्धिसौलभ्यात् । 'यद्धर्मसमानाधिकरणे' त्यत्र प्रतियोगितावच्छेदकत्वेन धर्मो विशेषणीय, तेन कम्बुग्रीवादिमत्तादिव्याप्यधर्मावच्छिन्नप्रतियोगिता कयावदभावयतत्तद्धर्मावच्छिन्नाभावाप्रसिद्ध्या तादृशाभाववत्त्वासम्भवेपि न क्षतिः । न च भेदप्रतियोगितावच्छेदकवाच्यत्वघटाद्यन्यतरत्वव्याप्यधर्मावच्छि न्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववत्तत्तद्धर्मावच्छिन्नप्रयो गिताकाभाववत्त्वासम्भवाद्व्यभिचारो वाच्यत्वादे · संयोगादिनाऽवृत्तित्वात्तेन सम्बन्धेन घटादेरेव तादृशाभावविरोधितया घटत्वादेरेव तत्प्रतियोगिता वच्छेदकत्वसम्भवेन गुरोरन्यतरत्वस्य तत्प्रतियोगितानवच्छेदकत्वादिति वाच्यम्, वाच्यत्वादिसाधारणान्यतरनिष्ठप्रतियोगित्वस्य न्यूनवृत्तिघटत्वादि नाऽनवच्छेदादगत्या गुरुणाऽन्यतरत्वादिनैव तदवच्छेदात् ।

वस्तुतो यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्यहेतुघटकता तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वेनैव सामान्यधर्मस्य विशेषणीय तयोक्तसामान्यधर्मस्य भेदप्रतियोगितावच्छेदकत्वेऽपि संयोगादिसम्बन्धा·

वच्छिन्नप्रतियोगितानवच्छेदकतया तत्सम्बन्धावच्छिन्नाभावाप्रसिद्धावपि न व्यभिचारः। अत एव भेदप्रतियोगितावच्छेदकजातित्वादिघटकनित्यत्वादेः समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकगर्भे निवेशस्य गौरवेणासंभवेऽपि जातित्वादिसामान्यधर्मघटितहेतौ व्यभिचारितया न जातित्वादिसामान्यव्याप्तिभङ्गः। वस्तुतस्तु यद्धर्मे प्रतियोगितावच्छेदकत्वविशेषणमनुपादेयमेव कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभाववन्निष्ठभेदप्रतियोगित्वस्य घटत्वादिघटिततादृशधर्मापेक्षया गुरुतया तदवच्छिन्नाभावस्याव्यापकत्वाप्रसिद्धेर्यद्धर्मेत्यनेन कम्बुग्रीवादिमत्त्वरूपगुरुधर्मोपादानस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षेऽसम्भवेन व्यभिचारावकाशात्। अभावे यावत्त्वादिविशेषणप्रवेशाद् यत्किञ्चिज्जात्यादिव्यक्त्यभाववति जात्यादिसामान्याभावासत्त्वेऽपि न सामान्यव्याप्तिभङ्गः। यद्यपि यत्तदर्थघटितसाध्यहेतूनामननुगमेन नैका व्याप्तिरिति संयोगसामान्याभावतदीयविशेषाभावकूटयोर्व्याप्तौ यावत्त्वादिविशेषणवैयर्थ्यमेव तथाप्येतद्दोषस्य स्वयमग्रे वाच्यतया तथाकथञ्चिच्छङ्कासंगतिः। अथ वृक्षादौ यावत्संयोगाभाववत्त्वमुभयवादिसिद्धं तत्र विभुसंयोगाभावावच्छेदकस्यावयवविशेषस्य दिग्विशेषस्य वा दुर्वचत्वाद् ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे कालविशेषावच्छेदेनापि तदभावासम्भवात् तयोस्तदविरोधितामते उभये संयोगादिसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन वृत्ताववरोधात्। न च मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्रमूलाद्यवच्छेदेनाभावः सुलभ इति वाच्यम्, तासां भेदस्याप्रामाणिकत्वात्। न च नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्तत्संयोगव्यक्तौ तत्तदवयवव्यक्तीनां तादात्म्यसम्बन्धेन कारणतायां व्यभिचार इत्यवच्छेदकभेदेन संयोगभेद आवश्यक आवश्यकश्चावच्छेदकव्यक्तीनां निविश्य स्वावच्छिन्नसंयोगव्यक्तिषु हेतुताभ्युपगमः, अन्यथा मूलादिमात्रावच्छिन्नमूर्तान्तरसंयोगानामग्राद्यवच्छेदेनैतद्वृक्षादिवृत्तिविभुसंयोगानाञ्च वृक्षान्तरावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य दुर्लभत्वापातादिति वाच्यम्, व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छेदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतुताविरहात् व्याप्यवृत्तेरवच्छेदकोपगमे तत्तदवच्छेदकस्वरूपवत्तानिष्ठावच्छेदकताव्यक्तीनामभेदेऽपि व्यभिचारानवकाशात्, अन्यथा मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तन्नावच्छेदकतासम्बन्धेन तत्तत्संयोगव्यक्तीनामुत्पत्तया मूलादेस्तत्र व्यभिचारस्य दुर्वारत्वात्। न च मूलाद्यवच्छिन्नसंयोगानामग्राद्यवच्छिन्नसंयोगादेरिव प्राच्याद्यवच्छिन्नसंयोगादेरपि भेदः स्वीकर्तुं शक्यते। मूले प्राच्यां शरीरवृक्षसंयोग इत्यादिप्रतीत्या एकसंयोगव्यक्तावेव मूलप्राच्याद्यवच्छिन्नत्वावगाहनात्। न चाग्रमूलयोः शरीरसंयोग इत्यस्या इव तादृशप्रतीतेरपि संयोगद्वयावगा-

हित्वमस्मदनुमतमिति वाच्यम्, यत्र मूलप्रतीचीमात्रावच्छिन्न एकशरीरेण संयोगोऽग्रप्राचीमात्रावच्छिन्नश्च शरीरान्तरसंयोगस्तत्र मूले प्राच्यां शरीर संयोग इति प्रत्ययापत्ते, शरीरतरुसंयोगव्यक्तीनामेकैकासामेव शरीरावय वेन वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि दर्शितसम्बन्धसंकोचम न्तरेण दुर्वारत्वाच्च। न हि तत्र शरीरावयवावच्छिन्नशरीरतरुसंयोगमूला वच्छिन्नतदुभयसंयोगयोर्भेदसम्भव तथा सति मूलावच्छिन्नवृक्षसंयोगस्य शरीरे चरणावच्छिन्नशरीरसंयोगस्य वृक्षे व्याप्यवृत्तितया तदभावासत्त्वप्र सङ्गात्, तत्तदवच्छेदकावच्छिन्ननानासंयोगसाधारणं तत्तदवच्छेदकाव च्छिन्नत्वमेव तत्तदवच्छेदकजन्यतावच्छेदकं न तु संयोगनिष्ठतत्तद्व्यक्तित्वम नन्तकार्यकारणभावप्रसङ्गात्। तथा चैकावच्छिन्नसंयोगस्यापरावच्छेद कावच्छिन्नत्वेऽपि तदवच्छिन्नत्वविशिष्टस्य नान्यत्रोत्पत्तिरिति न व्यभिचार- शङ्केत्यपि वदन्ति।

यत्तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धान्तानुरोधेन मूलाग्राद्यवच्छिन्न तरुविभुसंयोगादीनां भेदस्वीकार आवश्यक इति। तदपि न सम्यक्, तादृ- संयोगव्यक्तीनां गगनादौ दिग्विशेषरूपावच्छेदकनियमेनैव तादृशसिद्धा न्तसङ्गते.।

अत्र वदन्ति द्रव्यमात्र एव संयोगसामान्याभावस्याप्रामाणिकताया 'तत्र'इत्यादिनोक्ते 'न च' इत्यादिना गगनादेरेव संयोगसामान्याभावसाधक- मनुमानमाशङ्कितम्, विभुद्वयसंयोगानभ्युपगमेन तत्र यावत्संयोगव्यक्ती नामेव प्रतिनियतदिग्विशेषावच्छिन्नतया तत्तद्व्यक्तित्वेन तत्र तदभावसत्त्वेऽ विवादान्नासिद्ध्यवकाश, विभुमात्रे संयोगसामान्याभावसिद्धावपि 'संयोगि द्रव्यत्वाद्'इत्यादौ व्यावृत्तिसङ्गतेर्वृक्षादावेतद्व्याप्तिबलात्संयोगसामान्याभाव सिद्धावपि न क्षति। प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वनियम सत्त्वे वृक्षत्वावच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धे संभवेन तत्रापि तदभावं साधयतां तादृशनियमवादिनामशङ्कां 'न च प्रतियोग्यनवच्छेदक वृक्षत्वादेरभावावच्छेदकत्वम्' इत्यादिना निराकरिष्यति पूर्वमपि वृक्षत्वा वच्छेदेन संयोगसामान्याभाववृत्तिरविरोधमात्रेण प्रतियोग्यनवच्छेदकस्या भावावच्छेदकत्वनियमेन वा सेद्धुमर्हतीत्याशयेनैव वृक्षादौ संयोगतत्सा मान्याभावयोर्वृत्त्यवच्छेदकभेद उपपादितो वृक्षे न संयोग इति प्रत्यक्षञ्च वारितं न तु यो यदीत्यादिनियमस्य तत्साधकत्वाशयेनेति न सन्दर्भविरोध इति। यत्र यत्किञ्चिदवयवनाशान्महावृक्षनाशानन्तरं खण्डवृक्षोत्पत्तिस्तत्क्षणे पूर्वोत्पन्नक्रियातोऽवस्थितावयवात्तदवयवेगगनादिसंयोगानां विनाशो द्विती यक्षणे च खण्डवृक्षस्यापरावयवनाशस्तृतीयक्षणे च तन्नाशस्तत्र वृक्षे विभु संयोगानुत्पत्त्या यावद्विशेषाभावसोलभ्यम्, न चैवं तादृशवृक्षे मूर्तान्तरे णापि संयोगस्तदवयवसंयोगेस्तत्कर्मणा वा न सम्भवति तदवयवगगनादि- संयोगनाशककर्मणा मूर्तान्तरतदवयवसंयोगानामपि तदुत्पत्तिकाले विना

शात्, अवयवावयविनो संयोगानभ्युपगमेन तदवयवेष्वेवारम्भकसंयोगसत्त्वे तेन तन्निष्ठसंयोगजननासम्भवादुत्पत्तिकाले च द्रव्ये गुणवत्कर्मसत्त्वानुपपत्तेरिति संयोगसाध्यके द्रव्यत्वस्य सद्धेतुतैव न निर्वहतीति वाच्यम्, तादृशखण्डद्रव्ये तदवयवसंयोगजन्यस्य तत्कर्मजन्यस्य च संयोगस्यासम्भवेऽपि सर्वत्रैव सतां सदागतिशीलपवनादिपरमाणूनां कर्मभिस्तत्संयोगानुत्पत्तौ बाधकविरहेण द्रव्यस्य संयुक्तत्वनियमादित्यपि कश्चित् । यावत्स योगाभावा एव मानमिति । ज्ञायमानलिङ्गस्यानुमितिकरणत्वमताऽभिप्रायेण । यत्तद्-र्थयोरिति । साध्यहेतुघटकयत्तच्छब्दार्थयोः संयोगघटत्वाद्योरित्यर्थः । अननुगमादिति । एकरूपेण निवेशासम्भवादित्यर्थः । एकव्याप्तेर्निर्वाहयितुमशक्यत्वादिति शेषः । तथा च घटत्वाद्यवच्छिन्नाभाववद्घटादिविशेषाभावकूटयोर्व्याप्तेः संयोगसामान्याभावसिद्धावनुयोगित्वाद्यावत्संयोगविशेषाभावे संयोगसामान्याभावीयविशेषव्याप्तेश्चाग्रे निराकर्तव्यत्वान्नोक्तानुमानसम्भव इति भावः । ननु प्रकृतहेतौ प्रकृतसाध्यव्याप्तेरग्रहेऽपि यथा यो यत्र प्रवर्तते स कार्यतया तज्जानातीत्याकारात् स्तनपानादिप्रवृत्तितद्विषयककार्यताज्ञानयोर्व्याप्तिग्रहाद् घटानयनादिप्रवृत्तिलिङ्गेन घटानयनादिकार्यताज्ञानस्य सिद्धिस्तथा प्रकृते संयोगीययावद्विशेषाभावे तत्सामान्याभावव्याप्तेर्व्यर्थविशेषणत्वादिनाऽग्रहेपि घटादिविशेषाभावकूटे तत्सामान्याभावव्याप्तिग्रहादेव संयोगीययावद्विशेषाभावे पक्षधर्मताज्ञानाद्गगनादौ संयोगसामान्याभावसिद्धिर्दुर्वारैव व्यतिरेकिहेतुकानुमिताविव सामान्यव्याप्त्यधीनविशेषसिद्धौ व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य हेतुत्वानुपगमात् । न च विशेषाभावान्तरे सामान्याभावान्तरव्याप्तिग्रहात्संयोगविशेषाभावेन तत्सामान्याभावसिद्ध्युपगमे यावत्त्वाद्यविशेषितकपिसंयोगादिप्रतियोगिकाभावे कपिसंयोगादिसामान्याभावव्याप्तिग्रहादेव संयोगादिप्रतियोगिकाभावेन तत्सामान्याभावसिद्धिसम्भवाद्यावत्त्वादिविशेषणमनर्थकं प्रकृतहेतुतुल्यनिखिलहेत्वन्तरेषु प्रकृतसाध्यतुल्यसाध्यव्याप्तिग्रहापेक्षाया स्वीकर्तुमशक्यत्वात्तादृशसकलहेतुसाध्यानां युगसहस्रेणासर्वज्ञैर्ज्ञातुमशक्यत्वादिति वाच्यम्, उपस्थितयावत्तादृशहेतुषु तादृशतत्तत्साध्यव्याप्तिग्रहापेक्ष्या सामञ्जस्यात् तावन्मात्रापेक्षायाश्च तत्तत्साधनधर्मिकतत्तत्साध्यव्याप्तिग्रहाभावविशिष्टतत्तत्साध्यसाधनोपस्थितेरनुमितिप्रतिबन्धकतया सूपपादत्वात् । एवं सति यावत्त्वविशेषणानुपादाने जात्यादिविशेषवद्घटत्वाद्यभावे जात्यादिसामान्याभावव्यभिचारोपस्थितिदशायां संयोगादिसामान्याभावसाधनासम्भवेन तादृशविशेषणसार्थक्यात्, गगनाद्यवृत्तिस्वसमानाधिकरणनिरुक्तधर्मावच्छिन्नप्रतियोगिताकयत्किञ्चिदभावक यद्धत्त्वं तदन्यो यो धर्मः स तन्निष्ठाभावप्रतियोगितावच्छेदक इत्येतादृशोक्तसामान्यव्याप्तिस्थलाभिषिक्तव्याप्त्येव वा संयोगत्वादौ गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वं साधनीयं तत्र चाननुगमदोष इत्याशङ्क्य तत्रानुमाने उपाधिमाह एकावच्छेदेनेति । यन्नवच्छिन्नतदीययावद्विशेषाभावाधिकरणत्वस्यो-

पाधित्वादित्यर्थः। यथाश्रुते गुणादिनिष्ठाया यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तितयाऽवच्छेदकविरहेणोपाधेः साध्यव्यापकत्वानिर्वाहात्। न च गुणादिनिष्ठाया यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तित्वेऽपि गुणत्वाद्यवच्छिन्नत्वमावश्यकमन्यथाऽधिकरणतावच्छेदकमन्तराऽऽकारानासम्भवेन गुणादौ तदभावग्रहासम्भवादिति वाच्यम्, द्रव्यनिष्ठयावत्संयोगाभावाधिकरणताया अपि द्रव्यत्वादिरूपैकावच्छिन्नतयोपाधेः साधनाव्यापकतानिर्वाहात् एतन्निर्देश्यं यदव्याप्यवृत्तित्वनिर्वाहकं विलक्षणमवच्छेद्यत्वं तस्यैव विवक्षणीयतया गुणादिनिष्ठसंयोगाद्यभावाधिकरणतायां तादृशावच्छेद्यत्वविरहेण साध्यव्यापकताया यथाश्रुते दुरुपपादत्वात्। अथैवं कपिसंयोगादिसामान्यस्य मूलाद्यवच्छेदेनाभाववति कपिसंयोगादिमद्वृक्षादौ अनवच्छिन्नतदीययावद्विशेषाभाववत्त्वविरहेण साध्योपाध्योर्न सामान्यव्याप्तिनिर्वाहः।

अत्र केचिदवच्छिन्नत्वैकावच्छेदकानवच्छिन्नत्वोभयाभाववद्यावद्विशेषाभाववत्त्वमिष्टोपाधित्वेनाभिमतं गुणे यावद्विशेषाभाववत्त्वमवच्छिन्नत्वाभावेनोक्तोभयाभाववत् कपिसंयोगवति वृक्षे कपिसंयोगीययावद्विशेषाभाववत्त्वं मूलाद्यैकावच्छेदकावच्छिन्नमिति तदनवच्छिन्नत्वाभावादुभयाभाववद्विति नोक्तोपाधिसाध्ययोः सामान्यव्याप्तिभङ्गः। अथ वृक्षादिनिष्ठायां यावतामपि संयोगविशेषाभावाधिकरणतानां नैकावच्छेदकावच्छिन्नत्वं सम्भवति वृक्षाद्यवृत्तिकपिसंयोगादिव्यक्तीनां येऽभावास्तेषां वृक्षादौ व्याप्यवृत्तितया तन्निष्ठतदधिकरणतानामनवच्छिन्नत्वात्। न च व्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतयाऽन्यासां चैकावच्छेदकावच्छिन्नतया सर्वास्वेव तासूभयाभावोऽक्षत इति वाच्यम्, एवं सति पक्षनिष्ठसंयोगव्यक्तीनां दिग्देशविशेषावच्छिन्नानां यावन्तोऽभावाः पक्षनिष्ठतन्निरूपिताधिकरणतानां सर्वासामेकावच्छेदकविरहेऽपि द्वित्रादीनामवच्छेदकैक्यसम्भवेन सर्वास्वेव तादृशतादृशावच्छेदकमादायैकावच्छेदकावच्छिन्नत्वं सम्भवतीत्युभयाभाववत्त्वादुक्तोपाधेर्यावत्संयोगाभावरूपसाधनव्यापकतापत्तेः, स्वसमानाधिकरणयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वस्यैकावच्छेदकावच्छिन्नत्वरूपत्वे च वृक्षादिनिष्ठमूलाद्यवच्छिन्नकपिसंयोगाद्यभावाधिकरणतास्वपि न तथात्वसम्भवस्तत्समानाधिकरणव्याप्यवृत्तिकपिसंयोगाभावाधिकरणतानामपि तादृशयावदधिकरणतान्तर्गतत्वात्तदवच्छेदकस्य चाप्रसिद्धत्वादिति चेन्न, एकावच्छेदकावच्छिन्नत्वस्य स्वसमानाधिकरणकिञ्चिदवच्छिन्नयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वरूपस्य विवक्षितत्वेनानवच्छिन्नाधिकरणताभिः सहावच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासम्भवेऽपि क्षतिविरहात्। अथवा 'यावद्विशेषाभाववत्त्वम्' इत्यनेन यावत्तदीयविशेषाभाववत्त्वावच्छिन्ननिरूपितमेकाधिकरणत्वं विवक्षितं न तु तत्समुदायः, एकावच्छेदकावच्छिन्नत्वं चैकमानवृत्तिधर्मावच्छिन्नावच्छेदकावच्छिन्नत्वं न त्वभिन्नावच्छेदकत्वम्, वृक्षावृत्तिसंयोगानां वृक्षनिष्ठाभावा

यद्यपि व्याप्यवृत्तयस्तथाप्यव्याप्यवृत्तिसाधारणयावत्त्वेन तेषामव्याप्यवृत्तित्वात्तत्साधारणयावत्त्वावच्छिन्ननिरूपिताधिकरणतैकमात्रवृत्तितत्तन्मूलत्वाद्यवच्छिन्नतत्तन्मूलादिरूपानवच्छिन्नेति तत्रोभयाभावोऽक्षत इति न साध्योपाध्यो सामान्यव्याप्तिभङ्गः, पक्षनिष्ठसंयोगसामान्यीययावद्विशेषाभावाधिकरणता च न प्रत्येकावच्छेदकानवच्छिन्ना अस्यां दिशि अत्र देशे वा गगने न संयोग इत्यादिप्रतीतिविरहादपि तु यत्किञ्चिदनुगतरूपावच्छिन्नतदवच्छेदकावच्छिन्ना यावत्संयोगाभाववद्गगनमितिप्रत्ययात्, एकरूपावच्छिन्नस्य प्रतियोग्यभावाधिकरणतावच्छेदकत्वे विरोधादेकस्यापि विशेषरूपसामान्यरूपाभ्यामुभयावच्छेदकत्वोपगमात्, तथा च वृक्षनिष्ठसंयोगविशेषाभावानां यावत्त्वावच्छिन्ननिरूपिताधिकरणता न निरुक्तैकावच्छेदकावच्छिन्नत्ववतीति तस्या उक्तोभयवत्त्वादुपाधेः साधनाव्यापकत्वमिति वदन्ति। वस्तुतस्तु अनवच्छिन्नयावद्विशेषाभाववत्त्वमेवोपाधिस्तादृशोपाधिना साध्यस्य सामान्यव्याप्तिविरहेऽपि संयोगसामान्याभावरूपपर्यवसितसाध्यव्यापकतया तादृशोपाधेः सत्प्रतिपक्षोत्थापकत्वमव्याहतं तादात्म्येन साध्यवतोऽप्युपाधिव्याप्यतया तादृशोपाध्यभावेन संयोगसामान्याभावरूपसाध्यवद्भेदोऽन्यत्राप्रसिद्धोऽपि साधयितुं शक्यत एवाभावसाध्यकव्यतिरेकिणि प्रतियोगिमात्रप्रसिद्धेरपेक्षितत्वादुपाध्यभावेन साध्याभावसाधनं तु न सम्यक्, संयोगरूपस्य तस्य साधने सिद्धसाधनात्। पक्षावृत्त्युपाधिव्याप्यत्वेन साध्ये पक्षावृत्तित्वसाधनात्सत्प्रतिपक्षनिर्वाह इति केचित्। सिद्धसाधनादिति साध्याभावसाधनासम्भवेऽपि प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकतया गृह्यमाणोपाधितावच्छेदकावच्छिन्नाभाववत्त्वाज्ञानात् पक्षे साध्यानुमितिप्रतिरोध एवेति सारम्। अथवा प्रतियोग्यधिकरणत्वरूपपक्षधर्मावच्छिन्नसामान्याभावरूपसाध्यव्यापकतया 'एकावच्छेदेन' इत्यादेर्यथाश्रुतस्यैवोपाधितानिर्वाहः। यत्र प्रतियोगिमति यस्य सामान्याभावस्तत्रैकावच्छेदेन तस्य यावद्विशेषाभाववत्त्वमिति सामान्यव्याप्तेः कपिसंयोगादिमत कपिसंयोगादिसामान्याभावाधिकरणवृक्षादेरेकावच्छेदेन कपिसंयोगादिविशेषाभावकूटवत्त्वनियमेन सुग्रहत्वात्, गुणादावेकावच्छेदेन यावद्विशेषाभावासत्त्वेऽपि तत्र प्रतियोग्यसत्त्वेनावच्छिन्नसाध्यव्यापकत्वाक्षतेश्च। द्रव्ये च प्रतियोगिमत्त्वविशिष्टयावत्संयोगविशेषाभावाधिकरणैकावच्छेदेन तदीययावद्विशेषाभावासत्त्वात् प्रतियोगिमत्त्वरूपावच्छेदकविशिष्टसाधनाव्यापकत्वं तस्य, वृक्षादिवृत्तिकपिसंयोगादिविशेषाभावाधिकरणताकूटान्तर्गतकतिपयाभावाधिकरणतानामनवच्छिन्नत्वेऽपि तत्कूटस्यैकावच्छेदकावच्छिन्नत्वं पूर्ववदुपपादनीयम्।

अथैतादृशोपाधेर्व्यभिचारोन्नायकत्वं सत्प्रतिपक्षोत्थापकत्वं वा न सम्भवति प्रकृतसाध्यव्यापकस्यैकावच्छेदकावच्छिन्नसंयोगीययावद्विशे

पाभाववत्त्वस्याप्रसिद्धेर्द्रव्ये तदीययावद्विशेषाभाववत्त्वस्यावच्छिन्नत्वेऽप्येकावच्छेदकावच्छिन्नत्वाभावाद् गुणे च तस्यावच्छिन्नतायाः एवाभानात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगादिसामान्याभावव्यापकस्य तदीयैकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वस्य प्रसिद्धत्वेऽपि तदभावेन प्रकृतसाध्यवद्भेदसाधनं न सम्भवति प्रकृतसाध्याव्यापकत्वात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगादिसामान्याभाववद्भेदश्च कपिसंयोगादिरूपप्रतियोगिशून्ये हेतुमति साध्यमानो न कपिसंयोगादिसामान्याभाववद्भेदपर्यवसायी तत्र प्रतियोगिमद्भेदस्याबाधात् प्रतियोगिमति चैकावच्छेदकावच्छिन्नतदीययावद्विशेषाभाववत्त्वसत्त्वेन तद्वत्त्वाभावादिहेतोरसिद्धिरिति न व्यभिचारोन्नयनमिति चेत्, मैवम्, क्वचिद्द्रव्ये जलादिसंयोगवति तत्सामान्याभावस्य सत्त्व एकावच्छिन्नतदीययावद्विशेषाभावसत्त्वात्तदीयप्रतियोगिमत्त्वविशिष्टतत्सामान्याभावव्यापकमेकावच्छेदकावच्छिन्नतदीययावद्विशेषाभाववत्त्वं यत्र च द्रव्ये सर्वावयवावच्छेदेन भिन्नभिन्ना जलादिसंयोगा वर्तन्ते यावत्तद्विशेषाभावरूपहेतुमति तत्रैकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वरूपोपाध्यभावे प्रतियोगिमत्त्वविशिष्टतत्सामान्याभाववद्भेदस्य सिद्धौ बाधकाभावात्, प्रतियोगिमति तत्र विशेष्यवद्भेदपर्यवसानेन व्यभिचारसिद्ध्या सामान्यव्याप्तिभङ्गात् । संयोगत्वे गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वसाधकानुमानोपयिकदर्शितव्याप्तावप्येकावच्छेदकावच्छेद्यस्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणताशून्यगगनादिकं यच्च तदन्यत्वस्योपाधित्वं बोध्यम् । एतेनेति । अनवच्छिन्नयावद्विशेषाभाववत्त्वस्योपाधित्वेनेत्यर्थः । इति विशेषव्याप्त्युपष्टम्भमनुमानं परास्तम् दूषणान्तरमप्याह व्यर्थेति । तन्मते संयोगसामान्याभावस्य केवलान्वयितयाऽभाववत्त्वस्यैव तद्व्याप्यतावच्छेदकत्वेनेतरांशस्य व्यर्थत्वादित्यर्थः । ननु 'अभावात्'इत्येव हेतुरस्त्वित्यत आह अप्रयोजकत्वादिति । व्याप्तिग्राहकतर्कशून्यत्वादित्यर्थः । विशेषव्याप्तावुपाध्यन्तरमपि सुलभमित्याह निर्गुणत्वादेरिति । आदिना निष्परिमाणत्वादेः परिग्रहः । यद्यद्धर्माश्रयानवच्छेदकं तत्तद्धर्मावच्छिन्नाभावावच्छेदकमिति व्याप्त्युपष्टम्भं वृक्षत्वादेः संयोगसामान्याभावावच्छेदकत्वसाधकमनुमानमाशङ्क्य निराकुरुते न चेति । गुणाद्यनवच्छेदकेति । गुणत्वाश्रयानवच्छेदकेत्यर्थः । तदभावेनि । गुणत्वाद्यवच्छिन्नाभावेनेत्यर्थः । तथा च गुणत्वाद्यवच्छिन्नस्याप्यव्याप्यवृत्तिताप्रसङ्ग इति भावः । घटादौ द्रव्यत्वावच्छेदेन घटत्वाद्यभावप्रसक्तौ घटत्वादेर्व्याप्यवृत्तितया तदवच्छेदकाप्रसिद्ध्या तदनवच्छेदकत्वरूपापादकाप्रसिद्धेर्न सम्भवतीति नाभिहितः । गुणत्वाद्याश्रयस्य संयोगादेरवच्छेदकप्रसिद्ध्या न गुणत्वाद्यवच्छिन्नाभावावच्छेदकत्वापादकाप्रसिद्धिरिति भावः । ननु 'यद्धर्माश्रयानवच्छेदकम्' इत्यत्र यत्पदेनाव्याप्यवृत्त्यवृत्तिधर्मो विवक्षितो गुणत्वादेश्च व्याप्यवृत्तिरूपादिवृत्तितया तदाश्रयानवच्छेदकत्वस्य न तदवच्छिन्नाभावावच्छेदक-

कत्वापादकतेत्याशङ्क्य वृक्षत्वादौ संयोगत्वाश्रयानवच्छेदकत्वरूपसंयोगत्वावच्छिन्नाभावसाधकहेतोरसिद्धिमाह यथा चेति। दण्डनिष्ठघटकारणता घटकतद्व्यवहितपूर्वकालसम्बन्धस्येत्यर्थः। प्रतिदण्डं भिन्नत्वेऽपीति। दण्डत्वं तत्सामान्यावच्छेदकमित्यन्वयः। 'प्रतिदण्डं भिन्नत्वेऽपि'इत्यनेन दण्डत्वं प्रत्येकातिप्रसक्तमिति सूचितम्, एवमग्रेऽपि। तत्सामान्यात। घटपूर्ववर्तिता त्वावच्छिन्नस्येत्यर्थः। प्रत्येकातिप्रसक्तत्वेऽप्यवच्छेद्यतावच्छेदकानुगतरूपावच्छिन्नानतिप्रसक्ततया तस्यावच्छेदकत्वम्। अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येतेतिभावः। ननु दण्डत्वस्य घटनियतपूर्ववर्तितावच्छेदकत्वं न घटनियतपूर्ववर्तितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वमपि तु तद्व्यवहितपूर्वकालनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपपारिभाषिकमेव तच्चातिप्रसक्तेऽपि निराबाधमेव स्वरूपसम्बन्धरूपावच्छेदकताया एवावच्छेद्यानतिप्रसक्तत्वनियतत्वादिति प्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्यरूपावच्छिन्नावच्छेदकत्वे दृष्टान्तान्तरमाह वह्निसामानाधिकरण्यस्येति। 'प्रतिधूमं भिन्नत्वेऽपि' धूमत्वं तत्सामान्यावच्छेदकमित्यन्वयः। तत्पदेनात्र वह्निसामानाधिकरण्यपरामर्शः, धूमत्वस्य तदनवच्छेदकत्वे यस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्येत। न च व्याप्यतावच्छेदकत्वमपि स्वविशिष्टव्यापकसाध्यकत्वरूपं पारिभाषिकमेव तच्चातिप्रसक्तसाधारणमिति न दृष्टान्तसङ्गतिरिति वाच्यम्, साध्यसामानाधिकरण्यावच्छेदकरूपत्वस्य व्याप्तिस्तवावच्छेदकत्वं स्वरूपसम्बन्धविशेषः, अत एव यत्र व्यर्थविशेषणघटितनीलधूमत्वादिना हेतुता तत्र व्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैतदभिधानात्, अन्यथा पुनः स्वरूपसम्बन्धरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्मनिष्ठस्वरूपसम्बन्धरूपमवच्छेदकत्वं दृष्टान्तविधया बोध्यम्, व्यसंयोगसामान्यस्य संयोगत्वरूपावच्छेद्यतावच्छेदकरूपावच्छिन्नस्य सुवचत्वाच्चेति प्रत्येकसंयोगादिव्यक्त्यतिप्रसक्तस्यापि द्रव्यत्वादेस्तद्रूपावच्छिन्नानतिप्रसक्तत्वादिति भावः। यद्यप्येवमपि प्रमेयत्वादेः संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वाप्रसक्त्योक्तव्याप्तिबलात्तदवच्छेदेन संयोगसामान्याभावसिद्धिर्न शक्यते वारयितुं तथापि प्रतियोगिमत्सम्बद्धदेशकालयोरेव प्रतियोग्यनवच्छेदकयोरभावावच्छेदकत्वनियमस्तयोरेव तदनुभवात् न तु प्रतियोग्यनवच्छेदकमात्रस्य मानाभावादित्यत्र तात्पर्यम्। द्रव्ये संयोगसामान्याभावस्य कालभेदाद्यवच्छेदेन स्वयमनुपदं व्यवस्थापनीयतया 'सम्प्रदायविद'' इत्यनेनास्वरसो दर्शितः।

(दी०) नवीनास्तूत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्तते तथा धूमवत्यपि गिरौ दहनस्य इह पर्वते नितम्बे हुताशनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्याव्याप्यवृत्तित्वाद् वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्य-

वृत्तित्वस्यात्यन्तमसम्भावितत्वाच्च। एवं प्रतियोगिमतोरपि काल-देशयोर्देशकालभेदावच्छेदेन तदभावः। तथा च तत्तत्साध्यकाव्याप्ति-वारणाय तत्। नोपादेयं च सर्वथैव व्याप्यवृत्तिसाध्यके साध्यसाधन-भेदेन व्याप्तिभेदादित्यपि वदन्ति।

(गा०) 'गुणस्य' सामान्याभावो वर्तत इत्यन्वय। ध्वंसप्रागभावयोरत्य-न्ताभावविरोधिताया निराकृतत्वादिति भाव। एतेन तदवच्छेदेन संयोगादि-सामान्याभावोऽपि सुतरां वर्तते व्यापकधर्मावच्छिन्नाभाववति व्याप्यधर्मा-वच्छिन्नाभावसत्त्वनियमादिति सूचितम्। न चोत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रागभाव एव न तु तत्सामान्यात्यन्ताभावोऽपि मानाभावादिति वाच्यम्, तदा तत्र जन्यैकत्वहेतुभूतस्यैकत्वत्वावच्छिन्नाभावस्यावश्यकतया तस्यैव स्वसमनियतगुणत्वाद्यवच्छिन्नाभावरूपतया विवादायोगात्। संयो-गादिसाध्यकनित्यद्रव्यमात्रवृत्तिहेतुस्थले व्यावृत्तिदानायाह प्रलयेति। महा-प्रलयस्य जन्यभावानधिकरणतया तदानीं संयोगाद्यसत्त्वादितिभाव। तदा-नीञ्च गगनादौ नित्यैकत्वपरिमाणादिसत्त्वेन गुणसामान्याभावस्यासत्त्वात्तयो-गस्यत्युक्तम्। अत्र च प्रमाणं महाप्रलये गगनं न संयोग इत्यादिप्रामाणिक व्यवहार एव, तादृशव्यवहारस्य ध्वंसावगाहित्वेऽतिप्रसङ्गात्, व्यवहारा-नादरेऽतीन्द्रियगगनादौ गोत्वाद्यभावस्याप्रामाणिकतापत्ते प्रत्यक्षासम्भवाद-नुमानस्याप्रयोजकत्वात्। वह्निमान् धूमादित्यत्रापि व्यावृत्तिदानायाह तथेति। 'दहनस्य' दहनत्वावच्छिन्नस्य, 'प्रतीते' इत्यन्तं द्रव्यस्याव्याप्यवृत्ति-त्वादित्यत्र हेतु। प्रत्यक्षप्रमाणमुक्त्वा युक्तिमप्याह वृत्तेरिति। संयोगरूप सम्बन्धस्येत्यर्थ। 'वृत्तिमतो व्याप्यवृत्तित्वस्य' संयुक्तस्य तत्सम्बन्धेन व्याप्यवृत्तिताया। असम्भावितत्वादिति। अयमाशय सम्बन्धिसत्ताया सम्ब-न्धाधीनत्वाद्यदवच्छेदेन यदीयसम्बन्धो नास्ति तदवच्छेदेन तत्सम्बन्धा-वच्छिन्नतदभावसत्त्वमावश्यकं संयोगादे सम्बन्धस्य समवायस्य व्याप्य-वृत्तित्वेऽपि न संयोगादेर्व्याप्यवृत्तिता गुणादौ समवायसत्त्वेऽपि संयोगाद्य-सत्त्ववत्संयोगाद्यनवच्छेदकावच्छिन्ने संयोगादिमति तत्समवायसत्त्वेऽपि तदभावोपपत्तेरिति।

केचित्तु वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्ववद्वृत्तेर्व्याप्य-वृत्तित्वे वृत्तिमतोऽपि व्याप्यवृत्तित्वं युक्तितौल्यात्संयोगादिप्रतियोगिकत्व-विशिष्टसमवायोऽपि न व्याप्यवृत्तिरित्याहु।

वह्निमान् धूमादित्यादौ कालविशेषावच्छेदेन हेतुमति वर्तमानं साध्या-भावमादाय घटत्ववान् कालत्वादित्यादौ पटाद्यवच्छेदेन काले वर्तमानं कालिकसम्बन्धावच्छिन्नाभावमादाय च व्यावृत्तिदानायाह एवमिति। प्रति-योगिमतो देशस्य प्रतियोग्यनधिकरणकालावच्छेदेन प्रतियोगिमत कालस्य

च प्रतियोग्यनधिकरणदेशावच्छेदेनाभाववत्त्वमित्यर्थः । देशे कालस्येव इदानीमत्र घटो नास्तीत्यादिप्रत्यये देशनिष्ठाया कालावच्छिन्नाधारतायाः कालनिष्ठाया देशविशेषावच्छिन्नाधारताया वा विषयत्वमित्यत्र निगमनादुभयस्यैव विषयत्वादिति भावः । तन्मात्रेति । गुणत्वाद्यवच्छिन्नसाध्यकद्रव्यत्वाद्यव्याप्तिवारणायेत्यर्थः । 'तत्' असमानाधिकरणान्तम् । अव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तेरप्रसिद्ध्या तद्घटितैव व्याप्तिर्व्याप्यवृत्तिसाध्यके तु प्रतियोगिवैयधिकरण्यानुपस्थितिदशायामपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहादनुमित्युत्पत्त्या प्रतियोगिवैयधिकरण्याघटितापि व्याप्तिरस्ति प्रतियोगिवैयधिकरण्यघटितव्याप्तिरुभयत्रैव प्रसिद्धानुमितिप्रयोजिका चेत्याशयेन मूलकृतस्तदुपादानमित्याह नोपादेयमिति । व्याप्यवृत्तिसाध्यके सार्वत्रिकमुपादानं प्रतिक्षिप्तं न त्वनुपादानस्य सार्वत्रिकत्वमुक्तम्, व्याप्यवृत्तेरपि साध्यस्याव्याप्यवृत्तित्वग्रहदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमात्, व्याप्यवृत्तेरपि साध्यस्याव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमेऽपि व्याप्यवृत्तिसाध्यके सर्वत्र तादृशविशेषणोपादानानियमस्तदघटिताया अपि व्याप्तेः सर्वत्रानुमित्यौपयिकत्वात्, अव्याप्यवृत्तिसाध्यके तु सर्वत्र तदुपादाननियम एव तदघटितव्याप्तेरप्रसिद्धेरिति वार्थः । व्याप्यवृत्तिसाध्यकत्वञ्च स्वसमानाधिकरणाभावाप्रतियोगिसाध्यकत्वम्, सत्तावान् द्रव्यत्वात् कालिकसम्बन्धावच्छिन्नाकाशाभावाभाववान् आत्मत्वादित्यादिकञ्च न तथा, अतस्तत्र साध्यवति कालात्मादौ कालिकदैशिकविशेषणताभ्यां तदभावसत्त्वात् प्रतियोगिवैयधिकरण्याविशेषितहेतुसमानाधिकरणाभावप्रतियोगित्वस्य साध्येऽसत्त्वेन व्याप्तेः प्रतियोगिवैयधिकरण्याघटितत्वनियमेऽपि न दोषः ।

केचित्तु व्याप्यवृत्तिसाध्यकत्वं यथाश्रुतमेव हेतुमत्यभावस्य न दैशिकविशेषणतया वृत्तिर्विवक्षणीया, अतो हेतुमति कालादौ कालिकविशेषणतादिना साध्याभावसत्त्वेऽपि नाव्याप्तिर्भावस्याप्यभावत्वेन दैशिकविशेषणतया वृत्तिः प्रामाणिकी, अतो नाभावसाध्यकव्यभिचारिण्यतिव्याप्तिर्यादृशप्रतियोगितानिरूपकाभावत्वविशिष्टस्य दैशिकविशेषणतया हेतुमति वृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वविवक्षया कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् आत्मत्वादित्यादावव्याप्तेर्निरासस्तत्राकाशाभावस्याकाशाभावत्वेनैव दैशिकविशेषणतया आत्मनि वृत्तिर्न तु उक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन, आत्मनि तादृशाभावाभावो नास्तीत्यप्रतीतेः, अव्याप्यवृत्तिसाध्यकेऽपि संयोगाभाववान्नित्यगुणत्वादित्यादावनुमित्यौपयिकद्विविधव्याप्तेः सम्भवेन सर्वथैवेत्युक्तम्, तावताप्यव्याप्यवृत्तिसाध्यकेऽपि क्वचित्तदघटितव्याप्तेः सम्भव इति सूचितमित्याहुः ।

यत्तु 'व्याप्यवृत्तिसाध्यके' अव्याप्यवृत्तित्वग्रहाविषयसाध्यके, सर्वथैवासमानाधिकरणान्तस्यानुपादेयतया तत्र लाघवेन प्रतियोग्यसामानाधिकरण्याघटितव्याप्तेरेवानुमानाङ्गतास्वीकारादिति व्याख्यानम्, तदसत्, तत्रापि शब्दादिना प्रतियोग्यसामानाधिकरण्यघटितव्याप्तेरेव यदा ग्रहस्तदाऽनुमितेरुत्पादाय तादृशव्याप्तेरनुमानाङ्गत्वस्योपगन्तव्यत्वात्, अन्यथा यादृशव्यतिरेकिसाध्ये न केवलान्वयित्वभ्रमस्तादृशसाध्यके लाघवेन साध्याभाववद्वृत्तित्वमात्रस्यैव व्याप्तित्वोपगमप्रसङ्गात्। केवलान्वयिनो यस्य साध्यस्य न व्यतिरेकित्वभ्रमविषयता तत्साध्यके हेतुसामानाधिकरण्यविशेषणपरित्यागस्यापि प्रसङ्गाच्च।

यत्तु प्रतियोग्यसामानाधिकरण्येत्यत्र प्रतियोगिपदं स्वप्रतियोगिपरमतद्यं वाच्यम्, अन्यथा प्रतियोगित्वस्य सामान्यरूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः। तथा च स्वपदस्य तत्तद्भावपरतया तत्तदभावप्रतियोग्यसामानाधिकरण्यविशिष्टत्वेन हेतुमद्वृत्तीनां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानमनुमितिकारणं वाच्यं तादृशञ्च ज्ञानमसर्वज्ञस्य दुर्घटम्, अतः प्रतियोगिपदस्य प्रकृतसाध्यार्थकतया साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टः सन् हेतुमद्वृत्तिरभाव एवानुगतरूपेण निवेश्यः, सद्धेतौ सर्वेषामेव हेतुसमानाधिकरणाभावानां सर्वत्र हेत्वधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकरण्याभावविशिष्टस्य हेतुमद्वृत्तित्वं न प्रसिद्ध्यतीति साध्याभावनिष्ठत्वं साध्यसामानाधिकरण्ये विशेषणं सद्धेतौ सर्वत्र साध्याभावभिन्नाभावे तत्प्रसिद्धिसम्भवः। व्यभिचारिणि च व्यभिचारनिरूपकाधिकरण एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टतया हेतुमद्वृत्तित्वमिति साध्याभावस्यापि लक्षणघटकतया नातिव्याप्तिः। संयोगेन प्रमेयसाध्यकसद्धेतौ साध्याभावातिरिक्ताभावाप्रसिद्ध्या हेतुमति साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टाभावाप्रसिद्धिरिति साध्यतावच्छेदकावच्छिन्नाभावनिष्ठसाध्यसामानाधिकरण्यस्याभावो निवेशनीयः। एवञ्च व्याप्यवृत्तिसाध्यके साध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसामानाधिकरण्याप्रसिद्ध्या ईदृशव्याप्तिर्न प्रसिद्ध्यतीति तत्साध्यके प्रतियोग्यसामानाधिकरण्याघटितैव व्याप्तिरित्युक्तं नोपादेयं चेत्यादिनेति। तदपि न, साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यविशेषणीभूतसाध्याभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वनिवेशे प्रयोजनाभावाद् व्याप्यवृत्तिसाध्यकेऽपि सम्बन्धान्तरावच्छिन्नसाध्याभाव एव साध्यसामानाधिकरण्यप्रसिद्ध्या तत्राप्युक्तव्याप्तिप्रसिद्धेः।

परे तु ननु प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तेरनुमितिप्रयोजकत्वे प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायां तदसमानाधिकरण्याविनयकादेव हेतुसमानाधिकरणाभावाप्रतियोगित्वज्ञानादनुमितिरुदयेत इत्यनुपपन्नमत

आह नोपादेयञ्चेति। व्याप्यवृत्तिसाध्यकेऽनुमितिपूर्वमव्याप्यवृत्तित्वज्ञानाविषयसाध्यके सर्वत्र प्रतियोगिवैयधिकरण्यं नोपादेयम्, अनुमितिप्रयोजकव्याप्तिशरीरे न निवेशनीयम्। तत्र तद्घटितव्याप्तिज्ञानमेव हेतु'। 'सर्वथैव' इत्यनेन यत्साध्यके कदाचिदनुमितिपूर्वं साध्ये हेतुमत्यव्याप्यवृत्तित्वज्ञानं तत्र तदनुमितिनिर्वाहाय प्रतियोग्यसामानाधिकरण्यमुपादायापि व्याप्तेरनुमितिप्रयोजकत्वमुपेयं वक्ष्यमाणरीत्या व्याप्तेरनुगमात् व्यभिचार इति सूचितम्। 'साध्यभेदे'त्युपलक्षणं प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशाभेदेनैकसाध्यकेऽप्यनुमितिप्रयोजकव्याप्तिभेदोपगमोऽपि बोद्धव्य इति व्याचक्षुः।

व्याप्यवृत्तिसाध्यकस्थले द्विविधा व्याप्तिर्न त्वव्याप्यवृत्तिसाध्यक इति साध्यभेदेन व्याप्तिभेदाभावो न सम्भवतीत्यत आह साध्यादिभेदेनेति। साध्यतावच्छेदकादेर्विशिष्य व्याप्तिघटकतया तद्भेदे तद्भेदस्यावश्यकत्वादित्यर्थ'॥

यद्यपि जात्यादौ गुणकर्मान्यत्वादिसामानाधिकरण्योपलक्षितस्य सत्त्वादेर्व्याप्तिरस्त्येव गुणादौ तदुपलक्षितसत्त्वाद्यनुमितेः प्रमात्वात्, तथापि गुणादौ विशिष्टसत्त्वादिप्रतियोगिकवैशिष्ट्यावगाह्यनुमितेर्भ्रमत्वात्। तत्र तादृशानुमित्यौपयिकव्याप्तिस्वीकारे सल्लिङ्गकपरामर्शादपि भ्रम स्यादिति तादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृत्तिहेतौर्न स्वीकर्तुं शक्यतेऽतः साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तिशरीरे प्रतियोगितावच्छेदकविशिष्टवैयधिकरण्यपर्यन्तं निवेश्य तत्र तादृशातिव्याप्तिं वारयति प्रतियोग्यसामानाधिकरण्यञ्चेति॥

(दी०) प्रतियोग्यसामानाधिकरण्यञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेनायं गुणकर्मान्यत्वविशिष्टसत्त्वावान् जातेः भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ नातिप्रसङ्गः। न चोभयत्वमेकविशिष्टापरत्वं विशिष्टञ्च केवलादन्यदिति तदभावो मनसि सहजत एव प्रतियोग्यसमानाधिकरण इति वाच्यम्, उभयत्वं हि न विशिष्टत्वादनतिरिक्तं न वा तदवच्छिन्नाभावस्तदवच्छिन्नाभावात्। वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात्। न च तत्र व्याप्तिरेवोभयत्वाधिकरणमूर्तत्वस्य मनसि सत्त्वादिति वाच्यम्, तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वान्नात्रोभयमिति प्रतीतेर्दुर्वारत्वात्।

(गा०) न च तत्रापि व्याप्तिस्वीकारे क्षतिविरहो गुणो गुणान्यत्वविशिष्टसत्तावानित्यादौ तादृशव्याप्तिसत्त्वेऽपि बाधेनैव हेतोर्दुष्टत्वोपपत्तेर्व्यपक्षकनादृशसाध्यकजात्यादिहेतोश्च समीचीनतया पक्षोपगमे क्षतिविरहाद् बाधानवतारदशायाञ्च गुणादौ जात्यादिलिङ्गकविशिष्टवैशिष्ट्यानुमितिर्भ्र-

मरूपा प्रमात्मकसल्लिङ्गकपरामर्शादपि स्वीक्रियतेऽत एव गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ बाधानवतारदशायां प्रमात्मकपरामर्शाद्विशिष्टानुयोगिकवैशिष्ट्यावगाहिनी भ्रमानुमितिर्मणिकारेणोपगम्यत इति वाच्यम्, भ्रमानुमितिजनकपरामर्शस्य भ्रमत्वसम्भवे तदुपादानमावश्यकमित्याशयाद् गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ परामर्शस्य कथञ्चिदपि भ्रमत्वासम्भवेनागत्या तत्र प्रमात्मकपरामर्शाद् भ्रमानुमितिस्वीकाराद् गुणो विशिष्टसत्तावान् जातिमत्त्वादिति विशिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गन्धप्रागभाववान् घटो गन्धवानित्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थलमसिद्धिव्यभिचारासङ्कीर्णबाधोदाहरणत्वेनाभिहितवतो मणिकृतोऽप्युक्तस्थलेऽव्याप्तिर्नोक्तेत्याशय उन्नीयते। अथ विशिष्टनिरूपित एव समवायादिर्विशेष्याविरोधिनो विशिष्टाभावस्य प्रतियोगितावच्छेदकसम्बन्धः शुद्धसमवायादेस्तथात्वे दण्डाद्युपलक्षितपुरुषादिमत्त्वविरोधिताद्दशपुरुषाद्यभावात्तदविरोधिनद्विशिष्टपुरुषाद्यभाववैलक्षण्यानिर्वाहात्। न च तदुपलक्षितपुरुषाद्यभावस्य स धर्मो न प्रतियोगितावच्छेदकोऽपि तु प्रतियोगितासमानाधिकरण एव प्रतियोगितावच्छेदकस्यैव प्रतियोगिनि विशेषणत्वादताद्दशस्यैव चोपलक्षणत्वादिति ताद्दशाभावयोर्विशेष इति वाच्यम्, उपलक्षणेन दण्डादिना व्यावृत्तप्रतियोगिनिष्ठप्रतियोगितायां पुरुषत्वादेरतिप्रसक्ततया तन्मात्रे तदवच्छेदकतायाः पर्याप्त्यसम्भवेन दण्डादेरपि तदवच्छेदककोटावश्यमन्तर्भावात्। अत एव पुरुषादिमात्रेण दण्डाद्युपलक्षितपुरुषाद्यभावस्य न विरोधस्तदवच्छिन्नाभावस्यैव तद्विशिष्टाभावत्वे सत्तान्यपृथिवीसमवेतशून्यं वायुत्वादित्यादौ ग्रन्थकृतां कूटघटितलक्षणातिव्याप्तिदानमपि विरुध्येत पृथिवीसमवेतत्वविशिष्टाभावस्य वाय्वादौ सत्त्वेन वायुत्वादेस्तत्र साध्ये सद्धेतुत्वात्तथा च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्याविवक्षायामपि नातिव्याप्तिः प्रतियोगितावच्छेदकसम्बन्धेन गुणादेर्विशिष्टसत्तानधिकरणत्वादिति चेन्न, विशिष्टनिरूपितसम्बन्धस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं सर्वत्र न सम्भवतीति प्रागुक्तत्वात्, अगत्या विशिष्टाभावप्रतियोगिता विशेषणान्तर्भावेन पर्याप्ता, उपलक्षिताभावप्रतियोगिता तु दण्डादिरूपावच्छेदकोपलक्षितविशेष्य एव पर्याप्तेत्युपगम्य तयोर्विशेषस्योपपादनीयत्वात्। विशिष्टस्यातिरिक्तनामते विशिष्टसत्ताभावः सद्धेत एव प्रतियोग्यसमानाधिकरण इत्युभयसाध्यकानुसरणम्। नातिप्रसङ्ग इति। हेतुमति विशिष्टाभावादेः शुद्धप्रतियोगिसामानाधिकरण्येऽपि विशिष्टप्रतियोगिसामानाधिकरण्यविरहेण न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसङ्ग इत्यर्थः। व्याप्यवृत्तिसाध्यकेऽपि प्रतियोगिव्यधिकरणत्वावगाहिपरामर्शस्यानुमितिहेतुतयोक्तसाध्यस्य व्याप्यवृत्तित्वेऽपि नातिप्रसङ्गाप्रसक्तिः।

ननु मूर्तत्वादिहेतौ भूतत्वादिविशिष्टमूर्तत्वत्वादिरूपतदुभयत्वावच्छिन्न-

स्यैव व्याप्तिर्न तु तदुभयवृत्तिबुद्धिविशेषविषयत्वरूपतदुभयत्वावच्छिन्नस्य, तथा च विशिष्टसत्तातिरिक्ततामते विशिष्टसत्तादिसाध्यकजात्यादिहेताविवोत्तोभयसाध्यकमूर्तत्वादिहेतावपि यथाश्रुतप्रतियोग्यसामानाधिकरण्यनिवेशपक्षे नातिव्याप्तिप्रसक्तिरित्यभिमानं 'न च' इत्यादिना निराकरोति न चेति।

'सहजत एव' प्रतियोगिपदस्य तत्तावच्छेदकविशिष्टपरतां विनैव, 'उभयत्वम्' उभयव्यवहारविषयतावच्छेदकं, 'न विशिष्टत्वात्', एकविशिष्टापरत्वात्, 'अनतिरिक्तं' अभिन्नम्, अतिरिक्तमित्यनुक्त्वा नानतिरिक्तमित्यभिधानमुभयपदार्थतावच्छेदकत्वावच्छेदकत्वावच्छेदेनातिरिक्तत्वलाभाय, नञ्पदस्यानुयोगितावच्छेदकावच्छेदेनाभावबोधकत्वव्युत्पत्तेः, तावतैकविशिष्टापरत्वनुभयनिष्ठव्यासज्यवृत्तिधर्मस्योभयपदार्थतावच्छेदकमस्तु न तन्मात्रं वक्ष्यमाणानुपपत्तेः, प्रकृते च उभयत्वमेकविशिष्टापरत्वमेवेति शङ्काव्युदासः। अत्र हेतुः वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्य प्रत्यक्षसिद्धत्वादिति। घटत्वपटत्वयोः सामानाधिकरण्यविरहेऽपि तत्रोभयव्यवहारविषयतावच्छेदकस्य प्रत्यक्षसिद्धत्वादित्यर्थः। अन्यथा तत्रोभयव्यवहारानुपपत्तेरिति भावः। यद्यपि घटत्वपटत्वोभयमितिप्रतीतौ कालिकसम्बन्धघटितसामानाधिकरण्यरूपवैशिष्ट्यस्य विषयतासम्भवस्तथापि वाच्यत्वघटत्वोभयं समवेतमित्यादिप्रतीतिव्यवहारविरहेणोभयं समवेतमिति प्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्यविषयताया अभ्युपगन्तव्यतया घटत्वपटत्वोभयं समवेतमित्यादौ तादृशवैशिष्ट्याप्रसिद्ध्या व्यासज्यवृत्तिधर्म एव विषय इति भावः। तथा च तदनुरोधेन व्यासज्यवृत्तिधर्मविशेषस्योभयव्यवहारविषयताया आवश्यकत्व एकविशिष्टापरत्वस्य तथाव्यवहारविषयत्वमप्रामाणिकमिति न मूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादावेकविशिष्टापरत्वस्य साध्यतावच्छेदकत्वप्रसक्तिस्तथा सत्यनुमितेरुभयवानित्याकारकतानुपपत्तेरिति निर्व्यूढम्। ननु मूर्तत्वाधिकरणे मनसि भूतत्वमूर्तत्वोभयं नास्तीति बुद्धेरेकविशिष्टपराभावावलम्बनेनैवोपपत्तिर्मनसि प्रतियोगिसत्त्वेनोभयवृत्तिधर्मावच्छिन्नाभावासत्त्वादिति क्वचिदेकविशिष्टापरत्वस्याप्युभयव्यवहारविषयतावच्छेदकत्वमावश्यकमित्यत आह नवेति। 'तदवच्छिन्नाभावः' प्रत्येकाधिकरणवृत्तिरुभयव्यवहारविषयतावच्छेदकावच्छिन्नाभाव', 'तदवच्छिन्नाभावात्' एकविशिष्टापरत्वावच्छिन्नाभावात्। 'नानतिरिक्तः' इति विपरिणतेन सम्बन्धः, प्रतियोगितावच्छेदकविशिष्टेनैव प्रतियोगिनाऽभावस्य विरोधादेकस्याधिकरणेऽपि व्यासज्यवृत्तिधर्मावच्छिन्नाभावसत्त्वे बाधकाभावादिति भावः। एतेन मूर्तत्वस्य व्यासज्यवृत्त्युभयत्वावच्छिन्नव्यभिचारितापि व्यवस्थाऽपिता, आवश्यकत्वैकाधिकरणे व्यासज्यवृत्तिधर्मावच्छिन्नतदभावोऽन्यथा समवायघटितसामानाधिकरण्येन घटत्वादिविशिष्टपटत्वाद्यप्रसिद्ध्या घटादौ समवायेन घटत्वपटत्वोभयं नास्तीतिप्रतीतेरनुपपत्तेस्तत्र समवायिसमवेतत्वरूपवैशिष्ट्यावच्छिन्नाभावस्यैव विषयतायाः स्वीकरणीयत्वात्। अन्यथैककाली-

न्त्वादिरूपवैशिष्ट्यावच्छिन्नस्य घटत्वादेः समवायेन घटादौ सत्त्वेन तादृश प्रतीत्यनिर्वाहादादित्याह वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वेनाभावस्य प्रत्यक्षसिद्धत्वादिति। ननु तथापि व्यासज्यवृत्तिनिरुक्तोभयत्वेन साध्यत्वे न मूर्तत्वस्य व्यभिचारिता सम्भवत्येकप्रतियोगिमत्त्यप्यभावस्य प्रतियोगिसमानाधिकरणतया मूर्तत्वाधिकरणे मनस्युभयाभावस्य प्रतियोगिव्यधिकरणत्वाभावाद्धेतुमति प्रतियोगिव्यधिकरणस्यैव साध्याभावस्य व्यभिचारत्वाद् व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तस्यानिवेशादित्याशङ्कां निरस्यति न च तत्रेत्यादिना। 'व्याप्तिरेव' व्याप्तिरिष्टैव। तथा चेपीति। मूर्तत्वस्य मनसि सत्त्वेऽपीत्यर्थः। उभयत्वेनेति। उभयत्वविशिष्टवत्ताया मनस्यसत्त्वादित्यर्थः। तथा च तत्रोभयत्वविशिष्टवैशिष्ट्यविषयकानुमितेर्भ्रमतया तत्प्रयोजकहेतोर्न सद्धेतुत्वस्वीकारसम्भव। अत एव व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तमेव निवेश्यमिति भावः। एकाधिकरणे उभयत्वविशिष्टासत्त्वे मानमाह नात्रोभयमितीति। 'अत्रोभयम्' इति प्रतीत्यभावो न हेतुतयोक्तस्तदुभयत्वेनैकस्य सत्त्वोपगमेऽप्युभयनाधिकरणवृत्तितायास्तादृशप्रतीतिविषयतयैकस्मिन्नधिकरणवृत्तित्वाभावेन तादृशप्रतीतेर्भ्रमत्वस्यावश्यकत्वात्तादृशप्रमाविरहोपपत्तेः।

ननु प्रतियोग्यसामानाधिकरण्यस्याभावविशेषणत्वे लक्षणेऽत्यन्तपदवैयर्थ्यं धूमाद्यधिकरणनिष्ठवह्न्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वेनैव साध्यतावच्छेदकस्य तत्प्रतियोगितावच्छेदकताया अकिञ्चित्करत्वादित्याशङ्कया साम्प्रदायिकोपदर्शितमत्यन्तपदप्रयोजनमाह अत्यन्तपदञ्चेति।

(दी०) अत्यन्तपदञ्चात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्यात्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभाय, अन्यथा सर्वस्यैवाभावस्य स्वसामानाधिकरणाभावान्तरभिन्नत्वात्तद्भेदस्य च स्वस्वरूपानतिरिक्ततया प्रतियोग्यसामानाधिकरण्यस्यैव दुर्लभत्वापत्तेः। सर्वेषामेवाभावानां हेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणात्यन्ताभावान्तरात्मकस्य स्वभेदस्य प्रतियोगित्वादभावसाध्यकाव्याप्तेश्चेति सम्प्रदायविदः।

(गा०) अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्येति। 'लाभाय' इत्यग्रिमेणान्वयः। स्व यस्य प्रतियोगिनोऽत्यन्ताभावस्तादृशप्रतियोग्यसामानाधिकरण्यपर्यन्तस्याभावविशेषणत्वलाभायेत्यर्थः। अत्यन्ताभावत्वनिरूपकप्रतियोगितायाः इति। प्रतियोगितानवच्छेदकेऽन्यत्र या प्रतियोगिता निविष्टा तत्रात्यन्ताभावत्वरूपानुयोगितानिरूपकत्वविशेषणस्य लाभायेत्यर्थः। क्रमेण व्यावृत्तिमाह अन्यथेति। सर्वस्यैवाभावस्येति। हेतुसमानाधिकरणाभावत्वेनोपादेयस्य सर्वस्य गोत्वाद्यभावस्येत्यर्थः। 'स्वसमानाधिकरणाभावान्तरभिन्नत्वात्, स्वं

यस्य समानाधिकरणं तादृशघटत्वाभावभेदवत्त्वादित्यर्थः । स्वरूपानतिरिक्तत्वात्, गोत्वाद्यभावरूपाधिकरणस्वरूपत्वात्, अभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणीभूताभावस्वरूपतेति सिद्धान्तादिति भावः । प्रतियोग्यसमानाधिकरणाभावस्य दुर्लभत्वापत्तेरिति गोत्वाद्यभावानामत्यन्ताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेऽपि स्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वनियमादिति भावः । न च भावस्वरूपस्यैवाभावस्य तादृशत्वं सुलभमिति वाच्यम्, तस्यापि स्वसमानाधिकरणभेदभिन्नत्वेन तद्दोषतादवस्थ्यात्, भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपत्वाङ्गीकारात्। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशे सर्वत्र न तादृशाभावाप्रसिद्धिः किन्तु विशेषणताविशेषेण साध्यतास्थले तन्मतेऽभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिकत्वस्य निवेश्यत्वात् साध्यतावच्छेदकसम्बन्धस्य तत्र निवेशेऽपि तत्रैव तदप्रसिद्धिर्द्रष्टव्या। अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेऽपि सर्वेषामेवाभावानां किञ्चिद्विशिष्टस्वाभावादिरूपात्यन्ताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यनियमात्तदसमानाधिकरणाभावाप्रसिद्धेः । 'यादृशप्रतियोगिता'इत्यादिना वक्ष्यमाणरीतेरनुसरणे प्रतियोगिन्यत्यन्ताभावत्वनिरूपकत्वनिवेशवैयर्थ्यमत्रास्वरससबीजमेव । हेतुसमानाधिकरणेति । हेतुसमानाधिकरणस्य भेदत्वनिरूपकाभावान्तररूपप्रतियोगिसमानाधिकरणत्वेऽपि विवक्षितात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवान् गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्य तन्निष्ठस्वभेदात्मकस्य तस्य प्रतियोगित्वादित्यर्थः । अभावसाध्यकेति । घटत्वाभावादिसाध्यकघटत्वादिसाधनेत्यर्थः । अत्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशेऽपि सम्बन्धान्तरावच्छिन्नसाध्याभावप्रतियोगितावारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशध्रौव्ये एतद्विशेषणमनर्थकं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेश्य सम्बन्धान्तरावच्छिन्नाभाववारणेऽपि सर्वेष्वेवाभावेपूक्तरीत्याऽत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्यापि सत्त्वेन साध्यतावच्छेदकसम्बन्धेन प्रकृतप्रतियोगितावदसामानाधिकरण्यस्यैवाभावे निवेशनीयतया साध्यनिष्ठप्रतियोगिताश्रयासामानाधिकरण्यस्य सद्धेतवधिकरणवृत्तित्वविशिष्टाभावेऽसत्त्वेनाव्याप्त्यप्रसक्तिरित्यस्वरससबीजम् ॥

सम्प्रदायानुमतात्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशपक्षेऽतिव्याप्तिमाशङ्कते अथ यादिना।

(दी०) अथ यदा गोत्वं तदा गौरित्यत्रातिव्याप्तिः प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वात्। संसर्गाभावमात्रोक्तावपि यदा स्पन्दः तदा त्र्यणुकं यदाऽदृष्टं तदा जन्यं ज्ञानं दुःखं वा यदा तस्यादृष्टं तदा तदीयं ज्ञानमित्यादावतिव्याप्तिः। त्र्यणुकत्वादेस्त्र्यणुकादि-

शून्यखण्डप्रलयादिनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात्। न हि तयोः सामान्याभावत्वगादिमतेऽप्येकविशेषप्रागभावविशेषान्तरध्वंसवत्यपि समये तत्सामान्यानवच्छिन्नध्वंसप्रागभावयोः सम्भव इति चेन्न, प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्त्वेऽविरोधात्। अन्यथाऽत्यन्ताभावस्य कालमात्रावृत्तित्वप्रसङ्गात्। इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति देशे कालस्येव कालेऽपि देशस्यानवच्छेदकत्वात्। तच्छून्ये च काले तदभावस्य प्रतियोग्यसमानाधिकरणत्वात्।

(गा) यदा गोत्वमिति। कालिकसम्बन्धेन गोगोत्वयोर्हेतुसाध्यत्वलाभाय गोमानयं गोत्वादिति प्रसिद्धहेतू अनभिधाय कालिकसम्बन्धावच्छिन्नवृत्तिबोधकदाप्रत्ययघटितोदाहरणाभिधानम्, एवमग्रेऽपि। प्रत्ययस्येति। व्यभिचारनिरूपकहेत्वधिकरणस्येत्यादि'। 'ध्वंसवत्त्वेनात्यन्ताभावानधिकरणत्वात्' इति प्राचामनुमतं ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमादत्येतदेवाग्रे निराकृत्य समाधेयम्। अथ कालिकसम्बन्धेन ध्वंसादिमत्यपि कालेऽत्यन्ताभाववृत्तावविरोधो महाकालादौ समवायादिसम्बन्धेन रूपात्यन्ताभावस्य सर्वानुमतत्वात्। न च कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य तत्सम्बन्धावच्छिन्नगोध्वंसात्यन्ताभावरूपताया अत्यन्ताभावस्य त्रितयप्रतियोगिकत्वमङ्गीकुर्वाणे प्राचीनैरुपगमात् कालिकसम्बन्धरूपप्रतियोगितावच्छेदकसम्बन्धेन गोध्वंसवति तत्सम्बन्धावच्छिन्नगवात्यन्ताभाववृत्तिर्न तेषामनुमतेति वाच्यम्, एवमपि कालिकसम्बन्धेन प्रतियोगिमत्यपि तेन सम्बन्धेनात्यन्ताभावस्य कालिकसम्बन्धेन वृत्तावविरोधात्तेन सम्बन्धेन प्रलये वर्तमानमत्यन्ताभावमादायातिव्याप्तिवारणसम्भवादभावस्य सम्बन्धविशेषनिवेशे प्रयोजनाभावात्। न च प्रतियोग्यसामानाधिकरण्येनाघटिताऽपि व्याप्तिरनुमित्यौपयिकी तद्विशेषणानुपस्थितिदशायामप्यनुमितेरानुभाविकताया वक्ष्यमाणत्वात्तत्र चाभावस्य सम्बन्धविशेषोऽवश्यं प्रवेश्योऽन्यथा हेतुमति कालिकादिसम्बन्धेन वर्तमानं साध्याभावमादायाव्याप्तेरिति तादृशव्याप्तेरेवोक्तस्थले प्रमात्वप्रसङ्गपरोऽयं ग्रन्थ इति वाच्यम्, यत्र हेतुमति साध्याभावः कालिकसम्बन्धेन वर्तते तत्र प्रतियोग्यसामानाधिकरण्यघटितव्याप्त्यैव सद्धेतुतानिर्वाहात् प्रतियोग्यसामानाधिकरण्यागर्भव्याप्तिग्रहस्य तत्र भ्रमत्वोपगमे क्षतिविरहात्तादृशव्याप्तावप्यभावस्य सम्बन्धविशेषाप्रवेशात्। मैवम्, प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायां सत्तावान् द्रव्यत्वादित्यादावप्यभ्रान्तस्यानुमितिरनुभवसिद्धा तदनुरोधेन भावसाध्यके दैशिकविशेषणताविशेषेण हेतुमद्वृत्तित्वगर्भाया अपि व्याप्तेरनुमितिप्रयोजकता वाच्या तथा सति तादृशव्याप्तिभ्रममादायोक्तस्थलेऽनुमितिप्रसङ्ग-

परतयैतद्ग्रन्थस्य सामञ्जस्यात् । न च प्रतियोग्यसामानाधिकरण्यघटितव्याप्तावभावस्य सम्बन्धविशेषानिवेशादभावीयसम्बन्धविशेषागर्भप्रतियोग्यसामानाधिकरण्यगर्भव्यभिचारग्रहविरोधित्वेनैव प्रतियोग्यसामानाधिकरण्यगर्भतद्गर्भव्याप्ती अनुगमय्य तयोरेवानुमित्यौपयिकताया वक्तव्यतयाऽभावीयसम्बन्धविशेषघटितव्याप्तिग्रहस्य तादृशव्यभिचारग्रहाप्रतिबन्धकतया तादृशव्याप्तेर्नानुमित्युपयोगितानिर्वाह इति वाच्यम्, तादृशव्याप्तिसंग्रहायैवाभावीयसम्बन्धविशेषघटितप्रतियोग्यसामानाधिकरण्यघटितव्यभिचारग्रहविरोधित्वेन व्याप्तीनामनुगमनीयत्वात्तावताप्यभावीयसम्बन्धविशेषाघटितप्रतियोग्यसामानाधिकरण्याघटितव्याप्तेः संग्रहसम्भवादेवं सत्यव्यावर्तकाभावीयसम्बन्धघटितप्रतियोग्यसामानाधिकरण्यघटितव्याप्तिज्ञानादप्यनुमितिः स्यादिति चेत्, इष्टमेवैतत् । एवं सति प्रतियोग्यसामानाधिकरण्यगर्भाभावीयसम्बन्धविशेषघटितव्याप्तिप्रमातोऽप्युक्तस्थलेऽनुमितिप्रसङ्गो दुर्वार इति चेत्, का क्षतिरस्माकम् ।

वस्तुतस्तु दीधितिकृता स्वयं निष्कर्षणीयहेतुमति प्रतियोग्यनधिकरणत्वनिवेशकल्पे प्रतियोगिव्यधिकरणत्वघटितव्याप्तावभावीयसम्बन्धविशेषनिवेशस्य निष्प्रयोजनत्वेऽपि प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य हेतुमद्वृत्तितागर्भयथाश्रुतव्याप्तौ तदीयसम्बन्धविशेषनिवेशनमावश्यकम्, अन्यथा 'संयोगी द्रव्यत्वात्' इत्यादौ प्रतियोग्यनधिकरणगुणादिवृत्तित्वविशिष्टस्यापि संयोगाद्यभावस्य कालिकसम्बन्धेन हेत्वधिकरणकालवृत्तितयाऽव्याप्तिप्रसङ्गात्, एकसम्बन्धेनैकाधिकरणवृत्तित्वविशिष्टस्यान्यसम्बन्धेनाधिकरणान्तरवृत्तित्वात् प्रतियोगिसामानाधिकरण्याभावनिवेशकल्पेऽपि गुणादौ तद्विशिष्टस्य संयोगाद्यभावस्य कालिकसम्बन्धेन कालवृत्तित्वात् तत्कल्पेऽप्यव्याप्तेरावश्यकत्वात् । न च प्रतियोगिसामानाधिकरण्यविशिष्टस्य तस्य कालवृत्तित्वे प्रतियोगिसामानाधिकरण्याभावविशिष्टस्य न तद्वृत्तित्वसम्भवो भावाभावविशिष्टस्यैकाधिकरणवृत्तित्वे प्रतियोगिसामानाधिकरण्याभावविशिष्टसंयोगाद्यभावस्यैव दैशिकविशेषणतयाऽपि द्रव्यवृत्तित्वप्रसङ्गादिति वाच्यम्, विरोधिनोर्भावाभावयोः कालिकसम्बन्धेनैकाधिकरणवृत्तितावद्भावाभावविशिष्टस्यापि कालिकसम्बन्धेनैकत्र वृत्तौ विरोधाभावात् । यद्यप्यभावस्य दैशिकविशेषणतासम्बन्धनिवेशेऽभावसाध्यके व्यभिचारिणि भावस्य दैशिकविशेषणतानभ्युपगमेऽतिव्याप्त्या साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धनिवेशो समवायसम्बन्धावच्छिन्नजात्यभावसाध्यके जातित्वादिहेतावव्याप्तिर्जात्यादिरूपहेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः, तथापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धातिरिक्तसम्बन्धेन या साध्याभावस्य वृत्तिस्तदन्यहेतुमद्वृत्तेः प्रकृतप्रतियोगितानिरूपितानुयोगितावच्छेदकसम्बन्धेन हेतुमति वृत्तेर्वाऽभावविशेषणत्वोपगमान्न दोषः । उक्तस्थले हेतुमति काले कालविशेषवृत्तित्वविशिष्टनित्यस्यात्यन्ताभावस्य प्रसि-

द्व्यातिव्याप्तिसङ्गति । अत्यन्ताभावत्वघटकनित्यत्वांशं परित्यज्य ध्वंस साधारणसंसर्गाभावत्वनिवेशे महाप्रलये गोत्वरूपसामान्यधर्मावच्छिन्न प्रतियोगिताकध्वंसोपगन्तृमते ध्वंसमादायोक्तस्थलातिव्याप्ति शक्यते वार यितुमित्याशङ्क्याह संसर्गाभावेति। दैशिकविशेषणतयाऽपि ध्वंसस्य कालवृत्ति त्वमित्याशयेनोक्तशङ्कासङ्गति, अन्यथाऽभावस्य तादृशसम्बन्धेन वृत्तिनि वेशेऽत्यन्ताभावमिव ध्वंसमादायातिव्याप्तेर्दुर्वारत्वात् । न च 'प्रतियोग्यधि करणमहाकाले गोध्वंसस्य दैशिकविशेषणतासत्त्वेऽपि प्रतीयोग्यनधिकरण प्रलये तस्य तादृशसम्बन्धोऽप्रामाणिक' इति वाच्यम्, यदुपाधिविशिष्टस्य प्रतियोग्यधिकरणत्वं तदन्योपाधिविशिष्टस्यैव महाकालस्य तदभावाधिक रणतया महाकालस्य दैशिकविशेषणतया ध्वंसवत्त्वे प्रलयात्मकोपाधेरपि तादृशसम्बन्धेन तदाधारताया आवश्यकत्वाद्, अन्यथा प्रलये गौर्नास्तीति व्यवहारानुपपत्ते । अथवा निष्कर्षणीयप्रतियोगिवैयधिकरण्यकल्पाभिप्रायेणेदं तत्कल्पे प्रयोजनाभावादभावे वृत्तिविशेषानिवेशात् । न च 'अभावे वृत्तिविशे षानिवेशे कालिकसम्बन्धेन गवात्यन्ताभावस्यापि प्रलयवृत्ते संसर्गाभाव मात्रपरत्वोक्तिविरोध' इति वाच्यम्, प्रतियोगितावच्छेदककालिकसम्बन्धेन तत्प्रतियोगिनो ध्वंसस्य हेत्वधिकरणेऽबाधाद् गवात्यन्ताभावस्य प्रतियोगि व्यधिकरणत्वाभावाद् ध्वंसस्य तत्प्रतियोगिनोऽत्यन्ताभावस्य प्रतियोगिताव च्छेदकदैशिकविशेषणतासम्बन्धेन कालेऽसत्त्वात् प्रतियोगिवैयधिकरण्यम क्षतमेव । यदा स्पन्द इति । अत्र च व्यभिचारनिरूपकाधिकरणं खण्डप्रलयो जन्यद्रव्यानधिकरणे तस्मिन् द्व्यणुकासत्त्वात् पुनर्द्व्यणुकोत्पत्त्यनुरोधेन परमाणूनां स्पन्दस्वीकारस्यावश्यकत्वात्, तथा च हेत्वधिकरणे तत्र द्व्यणु कसामान्यध्वंसप्रागभावयोरसत्त्वादतिव्याप्तिरिति भाव । द्व्यणुकनाशानु गुणक्रियाया उत्तरसंयोगनाश्याया अधिकरणे चरमपरमाणुसंयोगनाशरूप महाप्रलयपूर्वतृतीयक्षणे द्व्यणुकसामान्यध्वंससत्त्वादत्राप्यतिव्याप्तिर्न विचा रसहेत्यतो यदादृष्टमिति । ज्ञानत्वमात्रेण साध्यतायां प्रलय ईश्वरीयज्ञान सत्त्वादयं सद्धेतुरेवेत्यतो जन्यमिति । नित्यसुखाभिव्यक्तिर्मुक्तिरिति मते खण्ड प्रलयेऽपि मुक्तात्मनि जन्यज्ञानसत्त्वात् सद्धेतुत्वं सम्भवतीति अतो दुःखेति । जन्यमात्रं प्रत्यदृष्टस्य हेतुतया महाप्रलयाव्यवहितप्राक्क्षणेऽपि तज्जनकी भूतादृष्टस्यावश्यकत्वमिति तदा जन्यज्ञानत्वसुखदुःखत्वाद्यवच्छिन्नध्वंस सत्त्वानोपदर्शितस्थलयोरतिव्याप्ति सम्भवतीत्यत स्थलान्तरमाह यदा तस्येति । यदात्मसमवेतादृष्ट न प्रलयजनकं स तत्पदेन विवक्षित । व्यभि चारश्चात्र खण्डप्रलये सुषुप्त्यादौ च बोध्य । खण्डप्रलयनिष्ठद्व्यणुकादि ध्वंसस्य द्व्यणुकत्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वासम्भव व्युत्पादयति नहीति । 'तयो' ध्वंसप्रागभावयो, 'सामान्याभावत्वमतेऽपि' सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमतेऽपि । ध्वंसप्रागभावयोरत्यन्ताभा वाविरोधित्वमते न तयोस्तथात्वमित्येतत्सूचयितुं मतेऽपीति । एवमित्यादि । एक

विशेषप्रागभाववति न सामान्यावच्छिन्नध्वंसस्य विशेषान्तरध्वंसवति न सामान्यधर्मावच्छिन्नप्रागभावस्य संभव इत्यर्थः। अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकतया तत्कालीनध्वंसादिप्रतियोगिताशून्यानागतादिपदार्थसाधारणस्य तादृशप्रतियोगितावच्छेदकत्वासंभवादिति भावः। यद्यप्येवं महाप्रलयवृत्तयोऽपि गोध्वंसाः प्रत्येकमेकैकगोव्यक्तिमात्रवृत्तिप्रतियोगिताका इति न कस्यापि ध्वंसस्य प्रतियोगितायाः समनियतं गोत्वम्, तथापि चरमध्वंसस्य यावद्गोप्रतियोगिकत्वोपगमे तत्प्रतियोगितावच्छेदकत्वं गोत्वस्य संभवतीत्यभिप्रायेण संसर्गाभावत्वनिवेशे पूर्वोक्तस्थलमुपेक्ष्य द्व्यणुकादिसाध्यकस्पन्दादिहेतुकस्थलेऽतिव्याप्तिरभिहिता।

वस्तुतस्तु ध्वंसप्रागभावयोर्व्यधिकरणप्रतियोगिकत्वविरहाच्चरमगोध्वंसस्यापि यावद्गोप्रतियोगिकत्वं न संभवतीति ध्येयम्। विरोधिनः प्रतियोगिनोऽधिकरणे काल एव चेदभावो वर्तते तदा सुतरां ध्वंसप्रागभाववति काले प्रलयादावसौ वर्तत इति सूचनाय 'प्रतियोगिमत इव' इति दृष्टान्तः। 'विरोधाभावात्' बाधकाभावात्, तथा च हेत्वधिकरणे प्रलयादौ गोत्वाद्यवच्छिन्नाभावसत्त्वान्नोक्तस्थलेऽतिव्याप्तिरिति भावः। न च 'प्रलये गोत्वाद्यवच्छिन्नाभावोऽप्रामाणिकः प्रत्यक्षायोगादनुमानस्याप्रयोजकत्वाद्' इति वाच्यम्, प्रलये गौर्नास्तीति शब्दस्यैव प्रमाणत्वात्, न हि तादृशवाक्यस्याप्रामाण्यं कश्चिदुपैति। न च 'ध्वंसादिरेव तत्र नञर्थो नात्यन्ताभाव' इति वाच्यम्, अन्वयितावच्छेदकसमानाधिकरणप्रतियोगिताकाभावमात्रस्य नञा प्रतिपादनेऽतिप्रसङ्गात्तदवच्छिन्नप्रतियोगिताकाभावबोधकताया एव तस्य व्युत्पन्नतयाऽत्यन्ताभावमात्रस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमते ध्वंसादेर्नञा प्रतिपादनासम्भवात्। 'अन्यथा' प्रतियोगिमति तद्ध्वंसप्रागभाववति च काले *कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्यात्यन्ताभावस्यावृत्तौ*, 'अत्यन्ताभावस्य' तादृशात्यन्ताभावस्य। कालमात्राद्वृत्तित्वेति। दैशिकविशेषणतयेत्यादिः। ननु ध्वंसप्रागभाववत्यत्यन्ताभाववृत्तौ तस्य तदविरोधितावत् प्रतियोगिमति तद्वृत्त्या तस्य प्रतियोग्यविरोधिताऽप्यापद्यताविशेषादित्यत आह स्यास्त्विति। 'एकस्य प्रतियोगिमतः कालस्य' 'देशभेदावच्छिन्नम्' प्रतियोग्यनवच्छेदकदेशावच्छिन्नम्, 'तथात्वम्' दैशिकविशेषणतासम्बन्धेन कालिकसम्बन्धावच्छिन्नात्यन्ताभाववत्त्वम्, तथा च प्रतियोग्यभावयोरेकावच्छेदेन एकत्रावर्तमानत्वरूपविरोधित्वं तावताप्यक्षतमेवेति भावः। 'अपरस्य' ध्वंसादिमतः, 'स्वरूपावच्छिन्नम्' ध्वंसाद्यधिकरणतावच्छेदकरूपावच्छिन्नम्, 'तथात्वम्' इत्यनुपज्यते। तथा चैकावच्छेदेनैकत्र वर्तमानतया ध्वंसाद्यविरोधित्वमत्यन्ताभावस्येति भावः। ननु काले वृत्तौ देशस्यावच्छेदकत्वे किं मानमत आह देशे कालस्येवेति। यथा देशे दैशिकसम्बन्धावच्छिन्नाभावस्य वृत्तौ कालस्यावच्छेदकत्वमिदानीमत्र गौर्नास्तीत्यादिप्रतीतिबलात् तथा कालिकसम्बन्धावच्छिन्नाभावस्य वृत्तावपि देशविशेषस्या-

वच्छेदकत्वं तथाविधप्रतीतिबलादेव तादृशप्रतीतेः कालावच्छेदेन देशवृत्तिः देशावच्छेदेन कालवृत्तिर्वा विषय इत्यत्र विनिगमकाभावादवच्छेदकत्वाधिकरणत्वयोरेव सप्तम्यर्थत्वादितिभावः। प्रतियोगिमत्यपि काले गवात्यन्ताभावस्य वृत्तौ तस्यासमानाधिकरणान्तेन वारणात् कथं तमादायोक्तातिव्याप्तिर्घटयत इत्यत आह तच्छून्येति। प्रतियोगिदान्ये प्रलयादावित्यर्थः, 'तदभावस्य' गवात्यन्ताभावस्य, 'प्रतियोगिव्यधिकरणत्वात्' प्रतियोगिसामानाधिकरण्याभाववत्त्वात्। सामानाधिकरण्यस्याव्याप्यवृत्तितामत एव प्रतियोगिसामानाधिकरण्याभावस्याभावविशेषणत्वादन्यथा संयोगी सत्त्वादित्यादावतिव्याप्तिः, तस्य व्याप्यवृत्तितापक्षे च प्रतियोग्यनधिकरणवृत्तित्वस्यैव निवेशनीयतया प्रलयादिवृत्तिगवात्यन्ताभावस्यान्यत्र प्रतियोगिसमानाधिकरणत्वेऽपि लक्षणघटकत्वाव्याघातादिति भावः।

संसर्गाभावत्वतद्घटितात्यन्ताभावत्वयोर्व्याप्तिघटितत्वेनानवस्थामाशङ्कते न चेति।

(दी०) न च संसर्गाभावविशेषोऽत्यन्ताभावः संसर्गाभावत्वञ्च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपं जन्यताघटकनियमघटितमिति वाच्यम्, तद्वदन्यावृत्तित्वरूपनियमस्य तत्र घटकत्वात्। एवं नियमान्तरस्यात्र प्रवेशेऽपि न क्षतिः। वक्ष्यते च नियमाघटितमपि संसर्गाभावादिलक्षणमनुपदमेव च विवेचयिष्यते संसर्गाभावत्वप्रवेशे प्रयोजनविरहोऽव्याप्तिश्च।

(गा०) संसर्गाभावविशेषः सदातनसंसर्गाभावः। 'संसर्गारोप' तादात्म्यातिरिक्तसम्बन्धेन प्रतियोग्यारोपः। तद्वदन्यावृत्तिवेति। स्वाव्यवहितपूर्वक्षणावच्छेदेन तद्वतोऽन्यस्मिन् वर्तते यत्तदन्यत्वेत्यर्थः। 'तत्र' जन्यत्वे। षष्ठ्यर्थे सप्तमी। 'नियमान्तरस्य' विशिष्टधीव्यावृत्तविशिष्टधीनियामकत्वरूपसम्बन्धघटकनियमस्य। 'अत्र' संसर्गाभावत्वशरीरे। न क्षतिरिति। तद्वदन्यावृत्तित्वरूपनियमस्यैव तत्र प्रवेशनीयत्वादितिभावः। स्वमते 'नियमान्तर्भावस्यानुपदं वक्ष्यमाणत्वात् 'आहुः' इत्युक्तम्। नियमाघटितमिति। आरोपस्याभावबुद्धिहेतुताया निर्युक्तिकत्वात्तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वस्यैव संसर्गाभावत्वरूपत्वादितिभावः। प्रयोजनविरह इति। साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य निवेशनीयतयाऽन्योन्याभावत्वादिनिरूपकप्रतियोगितामादाय दोषाप्रसक्तेरिति भावः। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरण्यनिवेशकल्पमभिप्रेत्याह अव्याप्तिश्चेति। तन्मते सम्बन्धान्तरावच्छिन्नसाध्याभावमादाय दोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया एव निवेशनीयतया तादा-

त्म्यसम्बन्धेन यत्र साध्यता तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नसंसर्गाभावप्रतियोगित्वाप्रसिद्धयाऽव्याप्तिरप्यापद्यत इत्यर्थः ।

(दी०) अथ ज्ञानवान् द्रव्यत्वाद् विशेषगुणवान् मनोऽन्यद्रव्यत्वाज्जातिमान् भावत्वादित्यादावतिव्याप्तिः साध्यशून्यानामपि हेतुमतां विषयत्वविशेषणत्वैकार्थसमवायैः साध्यवत्त्वादिति चेन् मैवम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं तत्सम्बन्धि वा तद्वृत्तित्वाभावस्योक्तत्वात् । भवति चैवमन्योन्याभावोऽपि प्रतियोग्यसमानाधिकरणस्तद्विशिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः । तद्वद्वृत्तिभिन्नत्वं तु नार्थः, अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसङ्गात् ।

(गा०) ननु विषयताया वृत्त्यनियामकत्वे प्रतियोगिवैयधिकरण्ये सम्बन्धित्वानिवेशपक्षे नातिव्याप्तिरित्यत आह विशेषेति । दिगुपाधीनां देशे वृत्तावच्छेदकत्वमेव न त्वधिकरणत्वमिति मते मनसो मूर्तत्वेऽपि न दैशिकविशेषणतयाऽधिकरणत्वमिति । द्रव्यत्वमात्रस्य हेतुत्वे मनोरूपहेत्वधिकरण एव साध्याभावः प्रतियोगिव्यधिकरण इति नातिव्याप्तिसम्भव इत्यतो मनोन्येति । दिक्कालौ नेश्वरादतिरिच्येते इति मते सद्धेतुरेवेत्यतः स्थलान्तरं वामाह जातीति । साध्यशून्यानामपीति । साध्यतावच्छेदकसम्बन्धेनेत्यादिः । 'एवम्' अधिकरणत्वस्थाने सम्बन्धित्वनिवेशे । अन्योन्याभावोऽपीति । तथा च न तादात्म्यसम्बन्धेन साध्यतायामव्याप्तिरिति भावः । 'तद्विशिष्टस्य' प्रतियोग्यसामानाधिकरण्यावच्छिन्नस्य । तेनेति । कपिसंयोगवान् एतद्वृक्षत्वादित्यादौ कपिसंयोगाभावरूपसाध्याभावस्य गुणादौ प्रतियोगिसामानाधिकरण्याभाववत्त्वेऽपि हेत्वधिकरणीभूतवृक्षादेर्न कपिसंयोगसामानाधिकरण्याभावविशिष्टकपिसंयोगाभाववत्त्वं यत्र सामानाधिकरण्यविशिष्टवत्त्वं तत्र तदभावविशिष्टाधिकरणत्वाप्रत्ययाद् अतः साध्याभावो न लक्षणघटक इति नाव्याप्तिरिति भावः । हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावनिवेशेनाव्याप्तिवारणस्य सुकरत्वेऽपि मूलोपात्तहेतुसामानाधिकरण्यांशानिवेशवैयर्थ्यभिया न तथा विवक्षितम् । सार्वभौमेनादृतं प्रतियोग्यसामानाधिकरण्यघटकीभूताधिकरणावच्छिन्नहेतुसामानाधिकरण्यस्याभावविशेषणत्वमुपेक्ष्योपाध्यायमते प्रतियोग्यसमानाधिकरणत्वरूपविशेषणवैशिष्ट्यावच्छेदेन हेतुसामानाधिकरण्यरूपविशेषणवैशिष्ट्यनिवेशन एव लाघवमित्यालोच्य तदनुयायिना दीधितिकारेण प्रतियोग्यसामानाधिकरण्यावच्छिन्नहेतुसामानाधिकरण्यं निवेशितं यथाश्रुतमूललभ्योऽयमेवार्थः, प्रतियोग्यसामानाधिकरण्यहेतुसामानाधिकरण्ययोरुद्देश्यतावच्छेदकविधेयभावस्य विवक्षितत्वादुद्देश्यता-

वच्छेदकधिधेययोरवच्छेद्यावच्छेदकभावलाभस्य च व्युत्पत्तिसिद्धत्वात्। प्रतियोग्यसामानाधिकरण्यस्य हेतुसामानाधिकरण्यावच्छेदकत्वे प्रतियोग्यसामानाधिकरण्यरूपहेतुतावच्छेदकावच्छिन्नसंयोगाभावादेः सत्त्वादिव्याप्यत्वप्रसंगः सत्त्वादिसामानाधिकरण्यावच्छेदकरूपवत्त्वस्य सत्त्वादिव्यापित्वादिति सार्वभौमोक्तदूषणमेतन्मते निरवकाशं तादृशव्याप्तावनेन पारिमापिकस्यैवावच्छेदकत्वस्य विवक्षितत्वात्, अन्यथा विषयितासम्बन्धेन घटत्वावच्छिन्नस्य ज्ञानत्वादिव्याप्यतया दुर्वारत्वात् तादृशसम्बन्धेन ज्ञानत्वादिसामानाधिकरण्ये ज्ञानविषयतारूपे घटत्वादेरवच्छेदकत्वात्। नन्वव्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय प्रतियोगिसमानाधिकरणभिन्नत्वरूपप्रतियोग्यसमानाधिकरणत्वमेव निवेश्यतां, किमुक्तविवक्षया गुणादौ प्रतियोगिसामानाधिकरण्याभाववतोऽपि कपिसंयोगाभावादेः प्रतियोगिसमानाधिकरणभिन्नत्वविरहाद् भेदस्याव्याप्यवृत्तित्वानुपगमादित्यत आह तद्वदवृत्तीति। प्रतियोगिमद्वृत्तीत्यर्थः।'नार्थः' न प्रतियोग्यसमानाधिकरणपदेन विवक्षितः। अव्याप्यवृत्तीति। कपिसंयोगी सत्त्वादित्यादावित्यर्थः। अतिप्रसङ्गादिति। कपिसंयोगाभावरूपसाध्याभावस्य द्रव्यादौ प्रतियोगिसमानाधिकरणतया तद्भिन्नत्वविरहेण लक्षणाघटकत्वादिति भावः। अत्र च सामानाधिकरण्यस्याव्याप्यवृत्तितायाः प्राक् स्वयं दूषितत्वात्प्रतियोगिसामानाधिकरण्याभावनिवेशपक्षेऽप्यतिव्याप्तिवारणमशक्यमित्येतादृशानुपपत्तिमेव 'यद्वा' इत्यादिकल्पान्तरानुसरणबीजतया व्याचष्टे अत्र चेति।

(दी०) अत्र च सामानाधिकरण्यवतो न तदभाववत्त्वं प्रतीतेरन्यथैवोपपादितत्वादित्यस्वरसात् प्रतियोगिवैयधिकरण्येत्यादि विशेषणं वक्ष्यति तच्च हेत्वधिकरणे बोध्यं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावेति पुनरभावान्तार्थनिष्कर्षः।

(गा०) असामानाधिकरण्यनिवेशकल्पे चेत्यर्थः। इत्यस्वरसादित्यनेनान्वयः। 'प्रतीते'रसंयोगाभावे गुणे न संयोगसामानाधिकरण्यमित्यादिप्रतीतेः। 'अन्यथा' गुणादिनिष्ठसामानाधिकरण्यावच्छेदकत्वाद्यभावविषयकतया। कपिसंयोगी एतत्त्वादित्यादावपि कपिसंयोगाभावादिरूपसाध्याभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकगुणादिवृत्तित्वावच्छिन्नतया लक्षणघटकतैवेत्यव्याप्तिरत आह तच्चेति। प्रतियोगिवैयधिकरण्यञ्चेत्यर्थः। 'हेत्वधिकरणे' हेत्वधिकरणनिरूपितम्, एतत्कल्पे च पृथग् हेतुसामानाधिकरण्यं न निवेश्यमेवेति भावः। एवञ्च हेत्वधिकरणनिरूपितप्रतियोग्यनधिकरणवृत्तित्वमेवाभावे विशेषणं देयं न तु तदवच्छेदकावच्छिन्नत्वमनतिप्रयोजनकत्वात्, वृत्तौ प्रतियोग्यनधिकरणनिरूपितत्वहेत्वधिकरणनिरूपितत्वयोर्निवेशापेक्षया तत्र हेत्वधिकरणनिरूपितत्वस्य निवेशे च लाघवमित्यालोच्य तथैव निष्कर्षयति

प्रतियोग्यनधिकरणीभूतेति। प्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः, तेन न दर्शितातिव्याप्तिः।

(दी०) ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् तत्सामान्यस्य वा प्रतियोगितावच्छेदकयत्किञ्चिदवच्छिन्नस्य वा अनधिकरणत्वमुक्तम्, आद्येऽव्याप्यवृत्तिसाध्यकाव्याप्तिरेकप्रतियोग्यधिकरणस्यापि तद्व्यक्त्यन्तरानधिकरणत्वात्। द्वितीये संयोगसामान्याभाववान् द्रव्यत्वाभाववान् वा सत्त्वादित्यादावतिव्याप्तिः साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगविशेषाभाववत्त्वान्नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वाच्च स्वाभावाभावात्मकस्य विशिष्टस्यापि द्रव्यत्वस्य द्रव्यत्वानतिरेकात्। तृतीये कपिसंयोगाभाववानात्मत्वादित्यत्राव्याप्तिः साध्याभावानां कपिसंयोगानां गुणानामधिकरण्यात्मनस्तत्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वात्। मैवम्, यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगिताऽनवच्छेदकत्वस्य विवक्षितत्वात्।

(गा०) 'यस्य कस्यचित्'इत्यादिषष्ठ्यन्तानामनधिकरणत्वमित्यनेनान्वयः। 'प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वम्' स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रतियोगिकभेदमात्रम्, 'तत्सामान्यस्यानधिकरणत्वम्' स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदः। प्रतियोगितावच्छेदकयत्किञ्चिदिति। प्रतियोगितावच्छेदकं तत्तद्व्यक्तित्वेन निवेश्य तदवच्छिन्नाधिकरणत्वावच्छिन्नभेदो वा विवक्षित इत्यर्थः। नव्यमते संयोगसामान्याभावस्य केवलान्वयितया तत्र साध्ये सत्तादिः सद्धेतुरेवेत्यतो द्रव्यत्वाभाववान् वेति। तत्प्रतियोगीति। संयोगरूपसाध्याभावप्रतियोगीत्यर्थः। तत्तत्संयोगत्वाद्यवच्छिन्नाभावाभावस्य तत्तत्संयोगादेः संयोगसामान्यानतिरिक्तत्वादिति भावः। द्रव्यत्वरूपाभावस्यैकव्यक्तिकतया व्यक्तिविशेषाभावरूपप्रतियोगिसामानाधिकरण्यं न घटत इत्यतस्तस्य किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमाह नित्यत्वादीति। आदिना जन्यत्वादिपरिग्रहः। ननु विशिष्टाभावो विशिष्टस्यैव द्रव्यत्वस्य प्रतियोगी न तु शुद्धस्य तस्येति कथं शुद्धद्रव्यत्वस्य प्रतियोगिवैयधिकरण्यानुपपत्तिरित्यत आह स्वाभावेति। न च 'सर्वस्यैवाभावस्य पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या नातिव्याप्तिः' इति वाच्यम्, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशपक्षेऽ-

सम्भवस्य साध्यतावच्छेदकसम्बन्धेन तद्वैयधिकरण्यनिवेशपक्षे च स्वरूपसम्बन्धावच्छिन्नसाध्यकस्थले साध्यतावच्छेदकसम्बन्धेन सर्वेषामेवाभावानां प्रतियोगिसमानाधिकरणत्वादव्याप्तिप्रसक्त्या यत्सम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तत्सम्बन्धावच्छिन्नतदभावीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नत्वोभयाभाव एव विवक्षणीयः, एवञ्चोक्तस्थले स्वरूपसम्बन्धेन प्रतियोग्यनधिकरणत्वाप्रसिद्धावपि संयोगादिसम्बन्धेन घटाद्यभावीयप्रतियोग्यनधिकरणीभूतहेतुमन्निष्ठघटाभावीयप्रतियोगितासु स्वरूपसम्बन्धावच्छिन्नत्वद्रव्यत्वाभावत्वाद्यवच्छिन्नत्वोभयाभावस्याक्षतत्वादतिव्याप्तिरित्यभिप्रायात्।

आत्मनि संयोगसामान्याभावस्य सर्वमतसिद्धत्वविरहात् क्वपीति। जन्यद्रव्यवृत्तिहेतुके हेत्वधिकरणजन्यद्रव्ये गुणसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन स्वमते सत्त्वात्तत्र तादृशप्रतियोगिवैयधिकरण्यं न घटतेऽत आत्मत्वहेत्वनुसरणम्। गुणसामान्याभावत्वस्य कपिसंयोगस्वरूपाभावप्रतियोगितावच्छेदकत्वं स्फुटीकर्तुं कपिसंयोगानां गुणत्वकीर्तनम्। तत्प्रतियोगितावच्छेदकेति। तथा च तादृशाभावा अपि यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणा एव तत्प्रतियोगितावच्छेदकत्वात् कपिसंयोगाभावत्वस्येत्यव्याप्तिरिति भावः। यादृशेति। यद्यत्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदवत्त्वमित्यर्थः। कपिसंयोग्येतत्त्वादित्यादौ कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणसामान्यभेदवत्त्वासम्भवात् स्वपदेन तादृशी प्रतियोगितोपादातुं न शक्यत इति नाव्याप्तिः। द्रव्यत्वाभाववान् सत्त्वादित्यादौ हेतुमतो द्रव्यादेः विशिष्टद्रव्यत्वाद्यभावरूपप्रतियोग्यधिकरणत्वेऽपि द्रव्यत्वाभावत्वावच्छिन्ना या प्रतियोगिता तदवच्छेदकावच्छिन्नानधिकरणत्वात् तस्य लक्षणघटकतेति नातिव्याप्तिः। कपिसंयोगाभाववानात्मत्वादित्यादौ च कपिसंयोगाभावत्वावच्छिन्ना या प्रतियोगिता तदवच्छेदकावच्छिन्नाधिकरणमेव हेतुमत् किन्तु गुणसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणमेव तदनवच्छेदकमेव साध्यतावच्छेदकमिति नाव्याप्तिरिति भाव। न चैवं घटत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं धूमवत्तादृशप्रतियोगितानवच्छेदकश्च वह्नित्वमित्याकारकस्याभावकूटावगाहिनः समूहालम्बनज्ञानस्यैवानुमितिहेतुतया विशिष्टपरामर्शस्यानुमितिहेतुत्वमनुपपन्नमभावकूटघटिततया व्याप्तेर्दुर्ज्ञेयत्वापत्तिश्चेति वाच्यम्, हेतुमन्निष्ठभेदप्रतियोगितायां स्वावच्छेदकावच्छिन्नवत्त्वसम्बन्धेनावच्छेदिका या प्रतियोगिता तदनवच्छेदकत्वस्यैकसामान्याभावरूपस्य निवेशो तात्पर्यात्। तादृशभेदप्रतियोगितायां स्वावच्छिन्नवत्त्वसम्बन्धेनानवच्छेदकत्वस्य साध्यतावच्छेदकविशेषणतयैव सामञ्जस्येऽपि यथासन्निवेशो न वैयर्थ्यम्। तथाविधसम्बन्धेन तादृशभेदप्रतियोगितानवच्छेदक-

साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पुनरन्योन्याभावघटितलक्षणनिष्कृष्टार्थो बोध्यः।

सम्बन्धसामान्येन हेतुमत्त्वनिवेशेऽव्याप्तेर्वक्ष्यमाणत्वात् सम्बन्धविशेषेण हेतुमत्त्वं प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे चासम्भवस्य वाच्यतया तत्र तच्च निवेशयति अत्र चेति।

(दी०) अत्र च ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्टस्तेनैव सम्बन्धेन यो हेतुमांस्तत्र वर्तमानत्वमभावस्य, साध्यस्य च यादृशः सम्बन्धः प्रविष्टस्तत्सम्बन्धावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं बोध्यम्, तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगिताया धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगिताया अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः॥

यद्वा साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वं हेतुमतो वक्तव्यम्। तथा च सम्बन्धभेदेन प्रतियोगिता न विशेषणीया। एवं स्थिते सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयं न त्वधिकरणत्वम्। तथाच धर्मिणोऽपि व्याप्यत्वं व्यापकत्वं च निर्वहति। तथाहि तादात्म्येन सम्बन्धेन धूमवतः सम्बन्धिनि महानसे वर्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसम्बन्धावच्छिन्ना या प्रतियोगिता तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमतस्तादात्म्येन सम्बन्धिनि महानसे धूमवतस्तादात्म्येन सम्बन्धित्वम्।

(गा०) 'ग्राह्यसामानाधिकरण्ये' अनुमितिकारणीभूतज्ञानविषयहेतुनिष्ठसाध्यसामानाधिकरण्यशरीरे। साध्यस्य चेति। अत्रापि ग्राह्यसामानाधिकरण्य इति प्रविष्ट इति चानुषज्यते। तथा च तत्सम्बन्धेन हेतुमति वर्तते योऽभावस्तदीयतत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदको यो धर्मस्तदवच्छिन्नस्य तेन साध्यतावच्छेदकसम्बन्धेनाधिकरणे तेन हेतुतावच्छेदकसम्बन्धेन वर्तमानत्वं तादृशसाध्यतावच्छेदकसम्बन्धेन साध्यानुमितिप्रयोजकमित्यर्थः। व्यापकताघटकसाध्यीयसम्बन्धेन साध्याधिकरणे तादृशसाधनीयसम्बन्धेन साधनस्यावर्तमानत्वग्रहदशायामनुमितिवारणाय सामानाधिकरण्यशरीरे सम्बन्धविशेषनिवेशनम्।

वस्तुतस्तु विरुद्धत्वेन ज्ञायमानधर्मवत्ताज्ञानस्यानुमितावेव प्रतिबन्धकताया वक्ष्यमाणतया सामानाधिकरण्यशरीरे सम्बन्धविशेषानिवेशेऽपि न क्षतिः। सामानाधिकरण्यावगाहिताया प्रयोजकत्वञ्च विशिष्टपरामर्शनिर्वा-

च्छायोपेयते पर्वतीयधूमव्यापको वह्निरिति व्यापकतापरामर्शस्य हेतुताया दूषितव्यत्वात्। न च स्वव्यापकसाध्यकहेतुमानित्याकारकः सामानाधिकरण्यानवगाहिविशिष्टपरामर्श एव हेतुरास्तामिति वाच्यम्, बहुव्रीह्यर्थस्य सामानाधिकरण्यपर्यवसितत्वादिति ध्येयम्। प्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकसम्बन्धस्थाने साध्यतावच्छेदकसम्बन्धनिवेशन एव साध्यतावच्छेदकसम्बन्धेन साध्यवद्वृत्त्यधिकरणनिष्ठसम्बन्धान्तरावच्छिन्नसाध्याभावमादाय दूषणस्यापि निराकरणसम्भवे प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशनमफलमित्याशयेनाह यद्वेत्यादि। तादात्म्यसम्बन्धेन व्यापकतानिर्वाहाय प्रतियोग्यनधिकरणत्वमनुक्त्वा प्रतियोग्यसम्बन्धित्वमभिहितम्। ननु प्रतियोगिवैयधिकरण्ये सम्बन्धित्वनिवेशेऽपि तादात्म्यसम्बन्धेन व्याप्तिर्न निर्वहति, तादृशसाध्यतावच्छेदकसम्बन्धेन साध्याधिकरणाप्रसिद्ध्या तद्घटितसामानाधिकरण्यस्याप्रसिद्धेरित्यत आह एवं स्थित इति। प्रतियोगिवैयधिकरण्यशरीरे सम्बन्धित्वनिवेशे सतीत्यर्थः। सम्बन्धित्वं निवेशनीयमिति। तथा च साध्यसामानाधिकरण्यं साध्यसम्बन्धित्वम्। अभावस्य हेतुसामानाधिकरण्यमपि हेतुसम्बन्धिसम्बन्धित्वमादिना ग्राह्यम्। 'धर्मिणः' धूमवदादेर्वह्निमदादेश्च। तदेव दर्शयति तथाहीति 'तादात्म्यसम्बन्धावच्छिन्ना' इति पूर्वकल्पाभिप्रायेण।

(दी०) एवं धर्मिणो धर्मव्याप्यत्वव्यापकत्वे बोध्ये। अत एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं संगच्छते। यथा च यादृशेन सम्बन्धेन हेतोर्व्याप्यता गृहीता तादृशेन सम्बन्धेन तस्य पक्षविशिष्टत्वज्ञाने यादृशेन सम्बन्धेन च साध्यस्य व्यापकत्वमवगतं तादृशेनैव साध्यपक्षयोर्विशिष्टानुमितिः। तेन न धूमावयवे संयोगेन न वा समवायेन पर्वते वह्निधीः। तथैवावगतव्यापकताघटकसम्बन्धेन व्यापकस्याऽभावग्रहे गृहीतव्याप्यताघटकसम्बन्धेनैव व्याप्यस्याभावः सिद्ध्यतीति। कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन, संयोगेन वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्तते, निवर्तते च संयोगेन वह्निविरहिणि स्वावयवे संयोगेनेति नियम उपपद्यते। तथाच तादात्म्यसम्बन्धेनैव जलादीनां व्याप्यत्वग्रहाद्व्यापकनिवृत्त्या तादात्म्येनैव तेषामभावः सिद्ध्यति, स एव चान्योन्याभावः। इत्थमेव च तादात्म्याद्वृक्षशिंशपयोर्व्याप्तिनिश्चय इति संगच्छते॥

(गा०) धूमवद्वह्निमतोर्व्याप्तिमुक्त्वा धर्मिणो धूमवदादेर्वह्न्यादिरूपधर्मव्याप्यत्वं वह्निमदादिरूपधर्मिणश्च धूमादिधर्मव्यापकत्वं चाह एवमिति। 'अत एव' तादात्म्यसम्बन्धेन व्याप्तिव्यवस्थापनादेव। तत्र तत्रोक्तमिति। पृथिवीत्वेनेतरभेदसाधनायेत्यादिः। सङ्गच्छते इति। अन्यथा जलादीनां संयोगादिना पृथिव्यादिवृत्तितया तेन सम्बन्धेन व्याप्तेर्जलादिभेदसाधनानुपयोगितया च तदुक्त्यसंगतेरिति भावः। पृथिवीत्वाभावस्य स्वरूपसम्बन्धावच्छिन्नाभावेन पृथिवीत्वस्वरूपेण जलादिभेदः सिद्ध्यति न तु तस्य कालिकसम्बन्धावच्छिन्नाभावेनेत्यत्र, पृथिवीत्वेन व्याप्यस्य जलादेरन्योन्याभाव एव सिद्ध्यति न त्वत्यन्ताभाव इत्यत्र वा किं नियामकमित्याशङ्कायां व्यतिरेकिणि तत्सम्बन्धघटितव्यापकत्वेन गृह्यमाणस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकादेवाभावाद्धेतोर्येन सम्बन्धेन यस्य व्याप्यता गृहीता तत्सम्बन्धावच्छिन्नप्रतियोगिताक एव तदभावः सिद्ध्यतीति समाधास्यन्नन्वयिनि व्याप्यताघटकसम्बन्धेन व्याप्यवत्ताज्ञानाद् व्यापकताघटकसम्बन्धेनैव व्यापकं सिद्ध्यतीति नियमं दृष्टान्तविधया दर्शयति यथा चेति। तादृशेनैव विशिष्टज्ञाने पक्षधर्मिकविशिष्टज्ञाने। विशिष्टानुमितिः, वैशिष्ट्यविषयकानुमितिः। 'व्याप्यताघटकसम्बन्धेनैव व्याप्यवत्ताज्ञानं हेतुः' इति नियमस्य व्यापकताघटकेनैव सम्बन्धेन व्यापकस्यानुमितिनियमस्य च क्रमेण प्रयोजनमाह तेनेति। अनवतीर्णबाधस्याभ्रान्तस्येति शेषः। धूमावयवे न वह्निधीरित्यन्वयः। तस्य समवायसम्बन्धेन वह्निव्याप्यधूमवत्त्वेऽपि व्याप्यताघटकेन संयोगेन तद्वत्त्वाभावादिति भावः। नवा समवायेनेति। पर्वतवृत्तिहेतुं प्रति समवायेन वह्निरव्यापकत्वादिति भावः। प्रकृतोपयुक्तनियमद्वयमाह तथैवेति। 'सम्बन्धेन' सम्बन्धेनैव। एतन्नियमद्वयस्य प्रयोजनान्तरानुरोधेनाप्यावश्यकत्वमिति दर्शयति कथमन्यथेति। 'अन्यथा' एतादृशनियमानभ्युपगमे। इति नियमः कथमुपपद्यत इत्यन्वयः। 'महानसे संयोगेन धूमो न निवर्तते' इत्यन्वयः। महानसधर्मिकसिद्धिविषयसंयोगसम्बन्धावच्छिन्ननिवृत्तिप्रतियोगी नेत्यर्थः। निवर्तते च धूम इत्यनुषज्यते। प्रकृतमाह तथा चेति। 'व्याप्यत्वग्रहात्' स्वरूपसम्बन्धावच्छिन्नपृथिवीत्वाभावनिष्ठव्यापकतानिरूपितव्याप्यताग्रहात् 'व्यापकनिवृत्त्या' स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकेनैव पृथिवीत्वाभावाभावेन, 'तेषाम्' जलादीनाम्। न चैतावताऽपि अत्यन्ताभावसिद्धिः कथं निराकृतेत्यत आह स एव चेति। स चान्योन्याभाव एवेति योजना। तादात्म्यसम्बन्धावच्छिन्नाभावश्चान्योन्याभाव एव न त्वत्यन्ताभाव इत्यर्थः, अतो नेतरात्यन्ताभावसिद्धिरिति भावः। तादात्म्यसम्बन्धेन व्याप्तौ प्राचां सम्मतिमाह इत्थमेव चेति। तादात्म्यसम्बन्धेन व्याप्तिस्वीकारेणैव। इति 'ग्रन्थः' सङ्गच्छते इत्यन्वयः।

(दी०) अत एव गोत्वत्वाद्यग्रहदशायां यत्र सास्नादिः सा

गौरिति तादात्म्येन गोर्व्यापकत्वग्रहे सास्नादिना तादात्म्येन गौः, गोर्व्यतिरेकाच्च सास्नादिव्यतिरेकः सिद्ध्यति । एवञ्च संयोगेन गगनादेरपि द्रव्यत्वव्याप्यत्वं वृत्त्यनियामकसंयोगमात्रस्याभाव-प्रतियोगितावच्छेदकत्वे साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धि-त्वाभिधाने वा पृथिवीत्वादिव्यापकत्वमपि । तदभाववतोऽपि पृथिव्यादेः संयोगेन तत्सम्बन्धित्वात् सिद्धिरपि तस्य तथैव, न तु वृत्तिनियामकसम्बन्धेन, तेनासम्बन्धित्वादव्यापकत्वाच्च । व्यक्ती-भविष्यति चैतदुपरिष्टात् !

(गा०) ननु तादात्म्यसम्बन्धेन व्याप्त्यनभ्युपगमे का क्षतिः जलादिभेदसिद्धेर्जलादिभेदाभावव्यापकीभूताभावप्रतियोगित्वेन पृथिवीत्व-ज्ञानादेव सम्भवात् पृथिव्येकदेशे जलादिभेदप्रसिद्ध्या तादृशव्याप्तिग्रह-सम्भवस्य व्यतिरेकिणि वक्ष्यमाणत्वात् । तादात्म्यसम्बन्धेन धर्मिणो-ऽनुमितेरप्यनुभवसिद्धत्वे धर्मितादात्म्यनिष्ठव्यापकताज्ञानस्यैव तद्धे-तुतायाः स्वीकरणीयत्वात्, असति प्रतिबन्धके तत्तादात्म्यादिविधेयकानु-मितौ तादात्म्यसम्बन्धेन तस्य विधेयत्वोपगमे क्षतिविरहादित्यत आह अत एवेति । तादात्म्यसम्बन्धेन व्याप्तिस्वीकारादेव । गोत्वत्वाग्रहदशायां गो-सिद्ध्यतीत्यन्वयः । अन्यथा तत्र गोत्वत्वरूपसाध्यतावच्छेदकानुपस्थित्या गोत्वसाध्यकानुमित्यौपयिकव्याप्तेर्दुर्ग्रहतया गोत्वसाध्यकानुमितेर्गोता-दात्म्यस्यापि गोत्वरूपतया तन्निष्ठव्यापकताया अपि गोत्वत्वोपस्थितिमन्तरेण दुर्ग्रहतया तादात्म्यधर्मिकव्यापकताज्ञानाधीनतादात्म्यसंसर्गकगवानुमितेश्चा-सम्भवेनायं गौरित्याकारकानुमितेरनुभवसिद्धाया अपलापप्रसङ्गादिति भावः । यद्यपि गोत्वांशे गोत्वत्वं धर्मितावच्छेदकीकृत्य व्यापकतावच्छेदकत्वावगाहि-ग्रह एव गोत्वेन गोसाध्यकानुमितावपि हेतुर्वाच्यो निर्धर्मितावच्छेदकव्या-पकतावच्छेदकत्वग्रहस्य व्यभिचारज्ञानाप्रतिबध्यतयाऽनुमित्यजनकत्वादिति तादात्म्येन गोत्वावच्छिन्नसाध्यकानुमितिरपि गोत्वत्वानुपस्थितिदशायां न सम्भवति, तथापि वक्ष्यमाणप्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रा-येणेदमभिहितं तन्मते स्वरूपतः साध्यतावच्छेदकप्रकारिकायामनुमितौ स्व-रूपतः साध्यतावच्छेदकप्रकारकस्य साधनवन्निष्ठाभावप्रतियोगित्वत्वावच्छेदेन साध्यतावच्छेदकरूपावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभया-भावावगाहिज्ञानस्य हेतुतया तत्र गोत्वत्वज्ञानानपेक्षणेनानुपपत्त्यभावात् । ईदृशयुक्त्या तादात्म्येन व्यापकतासिद्धिवद् गोत्वत्वाग्रहदशायां या गौस्तत्र सास्नादिरिति व्याप्तिग्रहाधीनगवादिहेतुकसास्नादिसिद्ध्यनुरोधात् तत्सम्ब-न्धेन व्याप्यतासिद्धिरपि द्रष्टव्या ।

केचित्तु तादात्म्यसम्बन्धेन व्यापकत्वानुपगमेऽपि गवान्यावृत्तित्वरूपव्याप्तिज्ञानाद् गोत्वादिविधेयकानुमितिर्निष्प्रत्यूहैव। तथा सत्ययं गौरित्याकारकताऽप्यनुमितेर्निर्वहति स्वरूपतो गोत्वानवगाहिनो गवान्यावृत्तित्वज्ञानात्स्वरूपत एव गोत्वविषयिण्यास्तस्याः सम्भवात्। न चानवच्छिन्नविधेयताया अक्लृप्तत्वात्तादात्म्येन गोरेव विधेयत्वमुचितमयं गौरित्याकारकइदन्त्वावच्छिन्नविशेष्यकगोत्वादिप्रकारकप्रत्यक्षे या गोत्वादिप्रकारता तस्या एव विधेयतात्वोपगमेऽनुमितौ तत्कल्पनेऽतिरिक्तविधेयताकल्पनाभावात्। अस्तु वा गवान्यावृत्तित्वरूपव्याप्तिज्ञानादेव तादात्म्येन गवानुमितिः किं तादात्म्येन व्यापकतयेत्याशङ्कानिराचिकीर्षयोक्तं गोत्वत्वाद्यग्रहदशायामिति। गवेतरावृत्तित्वस्य हेतुभूतसास्नादावग्रहदशायामित्यर्थ इत्याहुः, तन्न, गवेतरावृत्तित्वमात्रस्य गोत्वत्वशब्दार्थताविरहेणोद क्षरताया दुर्वारत्वात्। गोत्वत्वपदं तद्वृत्तिधर्मपरमिति तु न सम्यक्, गोत्वत्वस्य विशिष्टगोवृत्तित्वस्वरूपस्य स्वरूपतो भानासम्भवेन तज्ज्ञानदशायां तद्वृत्तिधर्मभानस्यावश्यकत्वात्।

अपरे तु गोत्वत्वाद्यग्रहदशायामपि गौः सिद्ध्यतीत्यन्वय। यदा गोत्वत्वमनुमितौ न भासते तदापि तत्र गौर्भासत इत्यर्थः स्वरूपतो गोत्वस्यैव सास्नादिलिङ्गकानुमितौ भानस्योपगन्तव्यतया विधेयतायाश्चावच्छिन्नत्वनियमेन स्वरूपतो गोत्वप्रकारकानुमितेरनुभवसिद्धाया अनुपपत्तिरित्युपष्टम्भसंगतिरिति प्राहुः।

यत्तु अनवच्छेदकांशे तादात्म्यसम्बन्धेन स्वरूपतः साध्यतावच्छेदकप्रकारकज्ञानादनवच्छेदकत्वांश आधेयतासम्बन्धेन स्वरूपतस्तत्प्रकारकज्ञानाद्वा स्वरूपतस्तत्प्रकारकानुमितिरित्युपगमेन गोत्वत्वाग्रहदशायामपि तादात्म्येन व्यापकताज्ञानादनुमितिर्निर्वहतीति नोक्तानुपपत्तिरिति, तदसत्, अयं गौरित्यादिज्ञानानुव्यवसाये स्वरूपतो गोत्वादिविशेषितप्रकारिताप्रकारेण ज्ञानभानात् समवायातिरिक्तेन निरूपितत्वसम्बन्धेन गोत्वादेः स्वरूपतः प्रकारताया आवश्यकत्वेऽपि समवायातिरिक्तेनापरसम्बन्धेन स्वरूपतः प्रकारताया अप्रामाणिकत्वात्, अन्यथा व्यापकताज्ञानहेतुतामते स्वरूपतो ज्ञानत्वादेर्विधेयतावच्छेदकत्वानुपपत्त्या केवलान्वयिग्रन्थे तज्ज्ञानस्याऽनुमितिहेतुताखण्डनं दीधितिकृतां विरुद्ध्येत उक्तक्रमेणैव तन्निर्वाहात्। न च तथा सति प्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायकतयाऽपि नैतद्ग्रन्थसंगतिरिति वाच्यम्, प्रकारित्वांश इवावच्छेदकत्वांशेऽपि निरूपितत्वसम्बन्धेन ज्ञाते स्वरूपतः प्रकारित्वाभिप्रायेणैतद्ग्रन्थसंगमनात्। तस्याप्रामाणिकत्वाभिप्रायेणाग्रिमव्यापकताज्ञानहेतुताखण्डनसंगतेः।

अपरे तु गोत्वत्वाद्यग्रहदशायामपि स्वरूपतो भासमानगोत्वावच्छिन्ने हेतुमन्निष्ठभेदप्रतियोगितानिरूपिततादात्म्यसम्बन्धावच्छिन्नावच्छेदकत्वाभा-

वरूपान्योन्याभावघटिततादात्म्यसम्बन्धावच्छिन्नव्यापकताज्ञानात्तादात्म्येन स्वरूपतो गोत्वप्रकारिकानुमितिः सम्भवत्येव। एकरूपेणावच्छेदकेऽप्यवच्छेदकतानवच्छेदकरूपेणावच्छेदकत्वाभावं स्वीकृत्यैवान्योन्याभावघटितलक्षणस्य ग्रन्थकृता 'यद्यद्रूपावच्छिन्नम्'इत्यादिना परिष्करणीयत्वात् तदभिप्रायेणैवैतत्संगते.। केवलान्वयिग्रन्थे च प्रतियोगिनि प्रतियोगितानवच्छेदकरूपेण तत्त्वाभावस्यैवावच्छेदकतानवच्छेदकरूपेणाऽवच्छेदकत्वाभावस्याप्रामाणिकतया व्यापकताज्ञाने साध्यतावच्छेदकस्य स्वरूपतो भानं न सम्भवतीत्यभिप्रायेण व्यापकताज्ञानहेतुतामते स्वरूपतो ज्ञानत्वप्रकारकानुमितेरनुपपत्तेर्वक्ष्यमाणतया न पूर्वापरग्रन्थविरोध इति प्राहुः।

तादात्म्येन गोर्व्यतिरेकाच्चेति। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकतादात्म्यसम्बन्धघटितव्यापकतावच्छेदकगोत्वावच्छिन्नस्य भेदरूपाभावादित्यर्थः। समवायसम्बन्धावच्छिन्नाभावस्य साधकत्वेऽपि तत्प्रतियोगितावच्छेदकगोत्वत्वाद्यग्रहदशायां तदभावस्य ज्ञानासम्भवेन ततः सास्नाभावसिद्ध्यसम्भवादिति भाव.। 'एवञ्च' अधिकरणत्वस्थाने सम्बन्धित्वनिवेशे च। गगनादेरपीति। तस्याधिकरणाप्रसिद्धावपि संयोगेन तत्सम्बन्धिवृत्तित्वस्याभावे तत्र च साध्यवत्सम्बन्धित्वस्य प्रसिद्ध्या यथोक्तव्याप्तिसत्त्वादिति भावः। वृत्त्यनियामकसंयोगव्यावृत्तरूपेण संयोगस्याभावप्रतियोगितावच्छेदकसम्बन्धत्वेन साध्यतावच्छेदकसम्बन्धस्य गगनीयसंयोगस्याभावप्रतियोगितानवच्छेदकतया प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशकल्पे तथाविधप्रतियोगित्वाप्रसिद्ध्या संयोगेन गगनस्य व्यापकता न निर्वहतीत्यत उक्तं वृत्त्यनियामकसंयोगमात्रस्येति। तादृशसंयोगसाधारणसंयोगत्वावच्छिन्नस्येत्यर्थः। 'यद्वा' इत्याद्युक्तकल्पे वृत्त्यनियामकसंयोगसाधारणरूपेण तादृशसम्बन्धत्वविरहेऽपि न क्षतिस्तन्मते प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशादित्याशयेनाह साध्यतावच्छेदकसम्बन्धेनेति। 'पृथिवीत्वादिव्यापकत्वमपि' इत्यत्र 'संयोगेन गगनादे.' इत्यनुषज्यते। ननु प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशे पृथिव्यादिनिष्ठसमवायादिसम्बन्धावच्छिन्नाभावप्रतियोगितया गगनादेर्न पृथिवीत्वादिव्यापकतासम्भव इत्यत आह तदभाववतोऽपीति। समवायादिना गगनाद्यभाववतोऽपीत्यर्थः। 'तत्सम्बन्धित्वात्' गगनादिसम्बन्धित्वात्। तथा च तादृशगगनाद्यभावो न साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमन्निष्ठ इत्यभावान्तरमादाय लक्षणसत्त्वं निष्प्रत्यूहमेवेति भावः। ननु संयोगेन गगनस्य व्यापकत्वे बाधानवतारदशायामभ्रान्तस्य वृत्तिनियामकसंयोगेनैव कथं न गगनानुमितिरित्यत आह सिद्धिरपीति। 'तथैव वृत्त्यनियामकसंयोगेनैव तेनासम्बन्धित्वादिति। तथा च तत्सम्बन्धावगाहनेऽनुमितेर्भ्रमतया तत्र भ्रमात्मकपरामर्शस्यापेक्षितत्वादिति भाव.। 'यद्रूपावच्छिन्नयत्सम्बन्धस्य व्यापकताघटकत्वं तद्रूपावच्छिन्नतत्सम्बन्धेनैवाऽनुमिति.' इति नियमाभिप्रायेण दोषान्तर-

माह अव्यापकत्वाच्चेति। वृत्त्यनियामकेन सम्बन्धेनैव गगनाद्यभावस्य प्रतियोगिसमानाधिकरणतया वृत्तिनियामकसंयोगेन प्रतियोगिव्यधिकरणाभावप्रतियोगिताया गगने सत्त्वेन तत्सम्बन्धस्य व्यापकत्वाघटकत्वादित्यर्थः। तथा च व्यापकत्वाघटकसम्बन्धस्यानुमितावभानान्न तेनाऽनुमितिप्रसङ्ग इति भावः। ननु वृत्तिनियामकसंयोगेन गगनादिसम्बन्धिनोऽप्रसिद्ध्या कथं तेन सम्बन्धेन गगनाद्यभावस्य प्रतियोगिवैयधिकरण्यमित्यत आह स्वाभावभिन्नेतीति। वक्ष्यमाणोभयाभावघटितप्रतियोगिवैयधिकरण्यं तत्रापि सुलभमिति भावः।

कालिकविशेषणतया घटादिसाध्यके महाकालत्वादिहेतौ अप्रसिद्धिनिबन्धनाव्याप्तिं शङ्कते नन्वित्यादिना।

(दी०) नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषणाव्याप्यवृत्ति किमपि व्यापकं न स्यात्। स्वावच्छेदकसम्बन्धेन प्रतियोगिनोऽसम्बन्धिनि काले वर्तमानस्याभावस्य प्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वस्य तेन सम्बन्धेन यत् प्रतियोगिसम्बन्धि तदन्यत्वस्य च कालेऽसम्भवात्॥

(गा०) खण्डकालवृत्त्येतत्कालत्वादिहेतुकस्थलेऽतीतानागतव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नतादृशसम्बन्धावच्छिन्नाभाव एव हेतुमति प्रतियोगिव्यधिकरणः प्रसिद्ध इति नाव्याप्तिरतोऽष्टद्रव्यातिरिक्तद्रव्यात्मकेति। जन्यमात्रस्य कालोपाधितामते द्रव्यात्मकस्यापि खण्डकालस्य सम्भवान्न महाकालपर्यन्तलाभ इत्यतोऽतिरिक्तान्तम्। यद्यपि गगनदिगात्ममनसां नित्यतया खण्डकालत्वासम्भवेन चतुर्द्रव्यातिरिक्तेत्युक्तावपि महाकाललाभस्तथापि यत्किञ्चिच्चतुर्द्रव्यातिरिक्तत्वस्य पृथिव्यादावपि सत्त्वात्पृथिव्यादिचतुष्टयातिरिक्तत्वस्य च विशिष्याभिधान एव तल्लाभः। तान्त्रिकैर्महाकालस्यैवाष्टद्रव्यातिरिक्तद्रव्यपदेनाभिधानात्तथाऽभिधाने विशिष्यानभिधानेऽपि नान्यपरत्वशङ्केति तथैवाभिहितम्। खण्डकालसाधारणमहाकालवृत्तेर्हेतुत्वे खण्डकालरूपहेत्वधिकरण एव लक्षणघटकोक्ताभावाप्रसिद्धिरिति 'कालमात्रवृत्तिः' इत्यत्र मात्रपदम्। समवायादिना कस्यचित् साध्यत्वे समवायादिना घटाद्यभाव एव महाकाले तेन सम्बन्धेन प्रतियोगिव्यधिकरणः प्रसिद्ध्यतीत्यतो विशेषणताविशेषेणेति। कालिकविशेषणतयेत्यर्थः। अव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यानुपादानेन केवलान्वयिवाच्यत्वादेर्व्यापकतासम्भव इत्यतोऽव्याप्यवृत्तीति। कालिकसम्बन्धेनाव्याप्यवृत्तित्वञ्च व्यतिरेकिमात्रस्यैव, केवलान्वयिनोऽप्यनित्यस्य विश्वविषयकजन्यज्ञानविषयत्वादेर्बोध्यम्। एतत्सर्वं वस्त्वभिप्रायेणाभिहितम्। महाकालान्यवृत्तिहेतुकेऽन्यसम्बन्धेन

साध्यतायाश्च हेतुमति सर्वत्र साध्यतावच्छेदकसम्बन्धेन वृत्तिमन्मात्र-स्यैव तेन सम्बन्धेन वृत्तित्वभ्रमदशायामनुमितिजनकज्ञानानुपपत्तिरपि द्रष्टव्या। एवं कालिकसम्बन्धेन व्याप्यवृत्तिसाध्यकेऽपि तेन सम्बन्धेन साध्यस्याव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटिताया प्रति-योगिवैयधिकरण्याघटितायाश्च व्यापकताया दुर्ग्रहत्वान्महाकालत्वादिहेतु कानुमित्यनुपपत्तिरपि। स्वावच्छेदकसम्बन्धेन स्वावच्छेदकविशिष्टानधि करणहेत्वधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिता निवेशकल्पे तादृशप्रतियोगित्वाप्रसिद्ध्यभिधानेनाव्याप्तिं स्फुटीकरोति स्वाव च्छेदकेति। 'स्वम्' प्रतियोगिता, 'काले' महाकाले, 'तत्सम्बन्धावच्छिन्नत्वस्य कालिकसम्बन्धावच्छिन्नत्वस्य, असम्भवादिति योजना। कालिकसम्बन्धेन वृत्तिमन्मात्रस्यैव महाकाले वृत्तेः, अवृत्तेश्च तेन सम्बन्धेन सम्बन्धिनोऽ-प्रसिद्ध्या कस्यापि कालिकसम्बन्धावच्छिन्नाभावस्य प्रतियोगितावच्छेदक-सम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमद्वृत्तित्वासम्भवेन समवायादिसम्बन्धाव च्छिन्नघटाद्यभावस्यैव तथात्वात्तत्प्रतियोगितायाश्च समवायादिसम्बन्धेनै वावच्छिन्नत्वादिति भाव। साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धि हेतुमद्वृत्त्यभावीयसम्बन्धावच्छिन्नत्वाविशेषितप्रतियोगितानिवेशकल्पे ताद शसम्बन्धेन *प्रतियोग्यसम्बन्धिहेतुमत एवाप्रसिद्ध्याऽव्याप्तिरित्याह* तेनेति। 'तेन सम्बन्धेन कालिकसम्बन्धेन। गगनाद्यभावप्रतियोगिनस्तेन सम्बन्धेन सम्बन्धिरूपप्रतियोग्यप्रसिद्ध्या तेन सम्बन्धेन प्रतियोग्यसम्बन्धित्वासिद्धिं स्फुटीकर्तुं 'प्रतियोग्यसम्बन्धित्वस्य' इत्यनभिधाय 'यत्प्रतियोगिसम्बन्धि तदन्यत्वस्य' इत्यसमासेनाभिधानम्।

अथ कालिकसम्बन्धेन महाकालान्यवृत्तित्वविशिष्टस्य घटस्य तत्सम्ब-न्धावच्छिन्नाभाव एव महाकाले प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यधि-करण- प्रसिद्धस्तमादायैव च लक्षणसमन्वयात् कथमव्याप्त्यभिधानम्' न हि महाकालान्यवृत्तित्वविशिष्टघटादिनिरूपित कालिकसम्बन्धोऽपि महा-काले सम्भवति तद्धर्मिवृत्तित्वविशिष्टनिरूपितसम्बन्धानुयोगितायास्तद्धर्मि-नियतत्वात्, अन्यथा सत्त्वादिमति गुणादौ द्रव्यादिवृत्तित्वविशिष्टसत्ताद भावप्रत्ययानुपपत्ते। न चैवं ह्रदादिवृत्तित्वविशिष्टवह्न्यभावादेर्विषयितया सम्बन्धित्वं ज्ञाने न स्याज्ज्ञानस्य ह्रदादिवृत्तित्वानिरूपकत्वादिति ह्रदो वह्नि मानित्यादौ तादृशविशिष्टस्य बाधादिरूपस्य हेत्वाभासत्वं न स्यात्, ज्ञान निष्ठं विषयितया यादृशविशिष्टवत्त्वमनुमितिप्रतिबन्धकतावच्छेदकं तादृश विशिष्टस्यैव तथात्वात्। यदि च तत्सम्बन्धेन तद्धर्मिसम्बन्धित्वविशिष्टनि-रूपितस्तादृशसम्बन्धो विशेषणकोटिप्रविष्टधर्मिनियत इति सम्बन्धान्तरेण ह्रदादिवृत्तित्वविशिष्टनिरूपितविषयितासम्बन्धो ज्ञाने सम्भवत्येवेत्युच्यते तदाऽपि इच्छादिविषयत्वविशिष्टघटादिनिरूपितविषयितासम्बन्धस्य ज्ञानेऽ-सम्भवादिच्छाविषयत्वाभावसाध्यकघटादिपक्षकस्थले तादृशविशिष्टस्य

बाधादिरूपस्य हेत्वाभासत्वानुपपत्तिर्दुर्वारैवेति वाच्यम्, विशिष्टनिरूपितविषयितातिरिक्तसम्बन्धस्यैव विशेषणीभूतसम्बन्धितानिरूपकाधिकरणत्वनियतत्वोपगमात्तद्धर्मविशिष्टतन्निरूपितविषयितायां तदंशे तद्धर्मप्रकारकत्वमात्रस्यापेक्षितत्वादिच्छाविषयो घट इत्यादिज्ञाने इच्छाविषयत्वविशिष्टघटादिनिरूपितविषयितासत्त्वेन बाधकाभावात् । न चैतदनुरोधेनैव विशिष्टवृत्तिताघटकसम्बन्धेन विशेषणविशेष्योभयाधिकरणेऽपि विशिष्टाधिकरणत्वं स्वीक्रियते प्रकृते चेच्छाविषयत्वतादृशघटयोर्द्वयोरपि विषयितासम्बन्धेन ज्ञाने सत्त्वात्तादृशविशिष्टाधिकरणत्वं ज्ञानेऽक्षतमेवेति नेच्छाविषयत्वविशिष्टघटादेर्हेत्वाभासत्वानुपपत्तिरित्थञ्च कालिकसम्बन्धेन महाकालान्यत्वस्य महाकाले सत्त्वाद्विशिष्टाधिकरणत्वं महाकाले वर्तत एवेति कथं विशिष्टाभावः प्रतियोगिव्यधिकरण इति वाच्यम्, विशेष्यसम्बन्धेनोभयाधिकरणेऽपि विशिष्टाधिकरणत्वाङ्गीकारे घटपटोभयसंयुक्तभूतले घटसमवायिकपालसंयुक्तत्वविशिष्टपटनिरूपिताधिकरणत्वप्रसङ्गात् । इच्छाविषयत्वं घटश्चेति समूहालम्बनेऽपि तादृशविशिष्टाधिकरणत्वसत्त्वापत्त्या प्रतिबन्धकतातिरिक्तवृत्तितया तस्य हेत्वाभासत्वानुपपत्तितादवस्थ्यादिति । न च महाकाले महाकालान्यवृत्तित्वविशिष्टघटाद्यधिकरणत्वानुपगमे तस्य विश्वाधारत्वव्याघात इति शङ्कनीयम्, तादृशविशिष्टनिरूपिताधिकरणताविशेषस्य महाकालेऽसत्त्वेऽपि घटादेर्घटत्वावच्छिन्ननिरूपिताधिकरणतासत्त्वेनैव सर्वाधारत्वोपपत्तेः ।

अत्र केचित्, कालिकसम्बन्धेनाधारता महाकालस्यैव न तु सूर्यक्रियादेः, इदानीं घटस्तदानीं घटइत्यादिप्रतीत्या क्रियादिरूपकालोपाधीनां महाकालनिष्ठाधारतावच्छेदकत्वस्यैवावगाहनात्, अत एव तेषां कालिकविशेषणतया कालोपाधित्वप्रवादः, तादृशप्रतीतेः क्रियादावेव घटाद्याधारत्वावगाहित्वोपगमे तादृशप्रतीतीनामनुगताधारतावगाहित्वानुभवविरोधात् कालत्वेनाखण्डोपाधिना सर्वेषां क्रियादीनामनुगमेन तादृशानुभवोपपादने महाकालस्यैवाप्रामाणिकतापत्तेरिति प्राचीनमताभिप्रायेणेयमव्याप्त्याशङ्का । तथा च सति कालिकसम्बन्धेन महाकालान्यवृत्तित्वस्यैवाऽप्रसिद्ध्या तद्विशिष्टघटाद्यभावमादाय लक्षणगमनासम्भवात् । न च क्रियादेः कालत्वानभ्युपगमाभिप्रायेण चेदयं ग्रन्थस्तदाऽष्टद्रव्यातिरिक्तद्रव्यात्मकताया अव्यावर्तकतयाऽभिधानासङ्गतिरिति वाच्यम्, तादृशद्रव्यात्मक एव काल इति मतविशेषसूचनार्थतया तत्सङ्गतेः । तन्मात्रवृत्तित्वञ्च हेतोर्लक्ष्यतासंपादकत्वेनाऽभिहितम्, इतरवृत्तेर्व्यभिचारित्वात् । अथवा भवतु कालोपाधिरपि कालिकसम्बन्धेनाऽधिकरणं तदधिकरणत्वसाधकश्चेदानीं घटस्तदानीं घटइत्यादिप्रत्ययो व्यवहारश्च तस्य चाननुगतोपाधिमात्रविषयकत्वेऽनुगताधारत्वावगाहित्वानुपपत्त्या क्रियादिरूपोपाधिविशिष्टमहाकालस्य घटाद्याधारतावगाहित्वमावश्यकम्, विशिष्टे घटाद्याधारत्वावगाहित्वे विशिष्टान्तर्गतविशेषणेऽपि तदवगाहित्वमावश्यक-

मिति खण्डकालस्य कालिकसम्बन्धेनाधारतासिद्धिः। एवञ्चेदानीं महाकालान्यत्वविशिष्टो घट इति प्रत्ययादिः खण्डकाले विशिष्टाधारतायां माने न त्वन्य इति तत्साधकप्रत्ययबलादेव महाकालान्यवृत्तित्वानिरूपकस्यापि महाकालस्य विशिष्टाधारत्वसिद्धिर्दुर्वारैव। तथा च महाकाले विशिष्टघटाभावोऽपि विशिष्टप्रतियोगिसमानाधिकरणस्तादृशप्रतीत्यनभ्युपगमे खण्डकाले न विशिष्टप्रतियोग्यधिकरणत्वप्रसिद्धिरित्युक्तस्थलेऽव्याप्तिवारणमशक्यमित्याहुः।

अन्ये तु कालिकसम्बन्धः स्वरूपादनतिरिक्तः, तथा च खण्डकालमहाकालानुयोगिकतादृशसम्बन्धानां तत्तत्स्वरूपाणामननुगमकतावच्छेदकाभावेन प्रत्येकमेव सम्बन्धता। तथा च महाकालस्वरूपसम्बन्धेनैव घटादेः महाकालत्वादिव्यापकता वाच्येति दुरुद्धरैवाव्याप्तिस्तादृशसम्बन्धेन महाकालान्यवृत्तित्वस्याऽप्रसिद्धेरिति वदन्ति। तदसत्, स्वरूपाणां प्रातिस्विकरूपेण सम्बन्धत्वे यत्किञ्चित्खण्डकालनिरूपितस्वरूपसम्बन्धेन साध्यतायां तादृशखण्डकालमात्रवृत्तिहेतुकेऽपि प्रतियोगिव्यधिकरणाभावाप्रसिद्धिसम्भवान्महाकालमात्रवृत्तिहेतुकानुधावनस्य निर्बीजत्वापातात्।

परे तु साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तावेव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिवैयधिकरण्यप्रवेशो न तु साध्यतावच्छेदकोपलक्षितसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तौ, अन्यथा महाकाले पृथिव्यादिवृत्तित्वोपलक्षितजात्यनुमानानुपपत्तेः। तादृशसाध्यतावच्छेदके प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणत्वविशिष्टाभावप्रतियोगितावच्छेदकत्वसत्त्वात्। इत्थञ्च यत्र साध्यतावच्छेदकोपलक्षितस्य यत्र साध्यता तत्रैवाऽव्याप्तिशङ्कापरोऽयं ग्रन्थः, तत्र यथाश्रुतप्रतियोगिवैयधिकरण्यस्यैव निवेशेन महाकालान्यवृत्तित्वविशिष्टघटाभावस्याऽपि लक्षणाघटकत्वादित्याहुः। तदपि न साधु, अग्रिमविशिष्टपदोपादानसद्व्यावृत्तिप्रदर्शनविरोधात्।

(दी०) न च तादृशसम्बन्धेन हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वमेव वक्तव्यम्। तथा चाऽवृत्तिगगनाद्यभावद्वारिकैव तत्सिद्धिः। सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामान्यस्य संयोगसामान्यस्य चाऽवृत्तेर्नाऽतिप्रसङ्गः। मूर्तत्वमूर्तत्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तादिकन्तु न मनोगुणादिवृत्ति, संयोगसामान्यं तु न किञ्चिद्द्रव्याऽवृत्तीति वाच्यम्। विशिष्टस्याऽनतिरिक्तत्वात्। समवायेन जातेः साध्यत्वे मेयत्वादावतिप्रसङ्गात्। जातिमद्भिन्नाभावप्रतियोगिताया जातित्वेनाऽनवच्छेदात्, जातिशून्ये च तादृशसम्बन्धेन

वृत्तेरप्रसिद्धेः । संयोगादिसाध्यकगुणकर्मान्यत्वादौ चाऽतिव्याप्तिः । अद्रव्ये हेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेर्द्रव्ये च संयोगादेरपि वृत्तेः ।

(गा०) 'तादृशसम्बन्धेन' प्रतियोगितावच्छेदकसम्बन्धेन साध्यतावच्छेदकसम्बन्धेन वा, 'वक्तव्यम्' अभावविशेषणतया अभावपूर्वप्रतीकेन विवक्षणीयम्। गगनाद्यभावव्यतिरिक्तेति। तत्प्रतियोगिनः कालिकसम्बन्धेनाऽधिकरणाप्रसिद्ध्या तदनधिकरणत्वाप्रसिद्धावपि वृत्तिमति प्रसिद्धायाः कालिकसम्बन्धेन महाकालवृत्तितायाः अभावस्य तत्र प्रसिद्धत्वादिति भावः।

ज्ञानवान् सत्त्वात् संयोगी सत्त्वादित्यादौ क्रमेण सम्बन्धविशेषनिवेशनयत्किञ्चित्पदोपादानयोर्व्यावृत्तिमाह समाधिकरणकर्मादाविति । सम्बन्धविशेषानुपादाने कर्मादौ समवायेन ज्ञानाभावप्रतियोगिनोऽवृत्तावपि विषयतासम्बन्धेन ज्ञानस्य वृत्तेस्तादृशाभावो न लक्षणघटकः स्यात्, कर्मादौ संयोगाभावप्रतियोगिनोऽसत्त्वेपि हेत्वधिकरणद्रव्यवृत्तितया हेत्वधिकरणवृत्तित्वसामान्याभाववत्त्वासम्भवात् सोऽपि न तथा स्यादित्यभावान्तरमादायाऽतिव्याप्तिप्रसक्तिरिति भावः। यद्यपि यत्किञ्चित्पदस्य व्यावृत्तिर्ज्ञानसाध्यकेऽपि सम्भवति ज्ञानस्य समवायसम्बन्धेनाऽव्याप्यवृत्तितया तत्साध्यकेऽपि प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकत्वात्, तथाऽपि प्रसिद्धाव्याप्यवृत्तिसाध्यके व्यभिचारिणि संयोगी सत्त्वादित्यादौ तदनुक्तौ तत्र व्यावृत्तिर्न सम्भवतीति शङ्का स्यात्तन्निरासाय तत्प्रदर्शनम्।

केचित्तु संयोगसाध्यके आदिपदग्राह्यगुणान्यत्वविशिष्टसत्ताहेतुके साध्यतावच्छेदकसम्बन्धस्यैव व्यावृत्तिप्रदर्शनपरं संयोगसामान्यस्य चेत्यपि। विषयताया वृत्त्यनियामकत्वे प्रतियोगिवैयधिकरण्ये सम्बन्धितानिवेशपक्षे पूर्वस्थलीयव्यावृत्त्यसङ्गतिरित्यस्वरसादेतदनुधावनम्, संयोगाभावस्य कालिकसम्बन्धेनैव सर्वत्र कर्मणि प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिप्रसक्तिरिति वदन्ति । तदसत्, उक्तास्वरसेन पूर्वमपि ज्ञानसाध्यकं परित्यज्य स्थलान्तरानुसरणादत्र निर्बीजतादृशस्थलपरित्यागे सन्दर्भाविरोधादादिपदेन हेतोः साध्यस्य च विशेषशब्देनोपादानस्याऽयुक्तत्वाच्च।

प्रतियोगितावच्छेदकविशिष्टत्वोपादानस्य पूर्वोक्तस्थले एव व्यावृत्तिं स्मारयति भूतत्वेति । यद्यपि पूर्वं विशिष्टसाध्यकेऽतिव्याप्तिप्रदर्शनोत्तरं विशिष्टस्यातिरिक्ततापक्षे तदसङ्गतिरित्यस्वरसादुभयसाध्यकातिव्याप्तिर्दर्शिता, तथाऽपि द्वन्द्वेऽल्पाक्षरस्य पूर्वनिपातनियमसत्त्व उभयत्वविशिष्टान्तस्य प्रागभिधानम्। अत्र पूर्वस्थले द्वित्वाद्यवच्छिन्नप्रतियोगिताया व्यासज्यवृत्तित्वोपगमेऽतिव्याप्तिर्न सम्भवतीत्यस्वरसेनैव द्वितीयस्थलातिव्याप्त्यवतरणं पूर्वाभिप्रायविरोधादनुपादेयम्। न मनोगुणादिवृत्तीनि। विशेष्ये शुद्धे

तद्वृत्तित्वसत्त्वेऽपि विशिष्टे तत्र तद्वृत्तित्वाभावोऽक्षत एव। एकरूपावच्छिन्न एव तत्तदभावयोर्विरोधेनावृत्तेरित्यभिमानः। न चैवं विशिष्टान्तानुपादानेऽपि सत्तादौ विशिष्टसत्तात्वादिना गुणाद्यवृत्तित्वसत्त्वेन विशिष्टसत्ताद्यभावस्य लक्षणघटकतयाऽतिव्याप्त्यप्रसक्तेर्न विशिष्टान्तव्यावृत्तिसम्भव इति वाच्यम्, प्रतियोगिनि किञ्चिद्रूपावच्छिन्ने हेत्वधिकरणयत्किञ्चिद्व्यक्तिवृत्तित्वाभावस्य लक्षणघटकत्वे सत्तावान् द्रव्यत्वादित्यादावपि सत्तात्वाद्यवच्छिन्नाभावस्य लक्षणघटकत्वापत्त्याऽव्याप्त्यापत्तेः, हेत्वधिकरणावृत्तित्वस्य तद्वृत्तिभिन्नत्वरूपस्यैव निवेशनीयतया विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताद्यभावस्य लक्षणघटकत्वानिर्वाहेणाऽतिव्याप्तिप्रसक्तेः। प्रतियोगितावच्छेदकविशिष्टत्वोपादाने प्रतियोगितावच्छेदकविशिष्टत्वावच्छेदेन हेत्वधिकरणवृत्तित्वात्यन्ताभावस्यैव निवेशनीयतया विशिष्टसत्ताद्यभावस्य लक्षणघटकतानिर्वाहेणाऽतिव्याप्तिवारणसम्भवाद्व्यावृत्तिसङ्गतेः। सामान्यपदप्रयोजनमाह संयोगसामान्यञ्चेति। संयोगी द्रव्यत्वादित्यादौ संयोगत्वावच्छिन्नाभावप्रतियोगिन्यां यत्किञ्चित्संयोगव्यक्तौ हेत्वधिकरणयत्किञ्चिद्घटादिव्यक्त्यवृत्तित्वसम्भवेऽपि तत्प्रतियोगिसामान्ये तदसत्त्वेन तादृशाभावस्य लक्षणाघटकतया नाऽव्याप्तिरित्यर्थः।

विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावोऽप्रामाणिक इत्याशयेन दूषयति विशिष्टस्याऽनतिरिक्तत्वादिति। तथा चोभयत्वादिविशिष्टस्य मूर्तत्वादेः शुद्धमूर्तत्वानतिरिक्ततया मूर्तत्वादिवृत्तेर्मनोवृत्तित्वादेरभावस्योभयत्वादिविशिष्टेऽपि तस्मिन्नसम्भवाद्भूतत्वमूर्तत्वोभयवान्मूर्तत्वादित्यादावतिव्याप्तिर्विशिष्टान्तोपादानेऽपि दुर्वारैवेति भावः। न च भूतत्वमूर्तत्वोभयं न मनसि गुणान्यत्वविशिष्टसत्ता न गुणे इत्यादिसर्वानुभवसिद्धप्रतीतिबलादुभयत्वविशिष्टसत्तात्वाद्यवच्छिन्ने मनोगुणादिवृत्तित्वाभावसिद्धेरावश्यकत्वान्नातिव्याप्तिरिति वाच्यम्, तादृशप्रतीत्या मनोगुणाद्यधिकरणकवृत्तित्वावच्छिन्नविशिष्टसत्तात्वावच्छिन्नाभावस्यैवाऽवगाहनाज्जातौ न किञ्चित्समवैतीति निश्चयदशायां जातौ न भूतत्वमूर्तत्वोभयं न वा विशिष्टसत्तेति प्रतीतिवत् मनसि गुणे न किञ्चित्समवैतीति भ्रमदशायामपि तादृशप्रतीतेरनुभविकतया मनोगुणादिसमवेतत्वाभावस्य तद्विषयत्वासम्भवेन मनोगुणाद्यधिकरणकाभावस्य तद्विषयताया आवश्यकत्वात्तादृशभ्रमाभावकालीनतथाकारकप्रतीतावपि तस्यैव विषयत्वौचित्यात्, अन्यथा कल्पनागौरवापत्तेः। भूतत्वमूर्तत्वोभयं न मनोवृत्ति गुणान्यत्वविशिष्टसत्ता न गुणवृत्तिरित्यादिप्रत्ययश्च तादृशोभयत्वविशिष्टसत्तात्वादौ मनोगुणादिवृत्तित्वावच्छेदकत्वाभावं तादृशवृत्तित्वे तादृशोभयत्वविशिष्टसत्तात्वावच्छेद्यत्वाभावं वाऽवगाहते तत्र तादृशाभावस्य क्लृप्तत्वात्। न च यत्किञ्चिद्धेत्वधिकरणवृत्तितानवच्छेदकस्य प्रतियोगितावच्छेदकत्वमेव विवक्षणीयमुभयत्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकोभयत्वादेश्च मनोगुणादिवृत्तितानवच्छेदकत्वात्तादृशाभावसंग्रहेण

नातिव्याप्तिरिति वाच्यम्, गुणान्यत्वविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकस्य वैशिष्ट्यसहितसत्तात्वस्य गुणादिवृत्तितावच्छेदकशुद्धसत्तात्वाद्यनतिरिक्ततया तदनवच्छेदकत्वासम्भवेनोक्तविवक्षयाऽपि तादृशाभावसङ्ग्रहासम्भवात्। यदभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकत्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तताविरहस्तादृशाभावनिवेशे दर्शितातिव्याप्तिपरिहारः स्यादित्याशङ्क्य दूषणान्तरमाह समवायेनेति। जातिमन्निष्ठतादृशाभावेनेति। जातिमन्निष्ठो यो घटत्वाद्यभावस्तस्यैव पटाद्यसमवेतप्रतियोगिकत्वेन तत्तत्प्रतियोगितायां जातित्वस्याऽनवच्छेदकत्वादिति भावः। जातिमद्वृत्तेर्जातित्वावच्छिन्नाभावस्य तादृशत्वं न सम्भवतीति स्फुटयति जातिशून्ये चेति। 'तादृशसम्बन्धेन' समवायसम्बन्धेन। अप्रसिद्धेरिति। तथा च जातिमद्वृत्तिर्योऽभावस्तत्प्रतियोगिसामान्ये हेतुमद्यत्किञ्चित्पदेन जातिशून्यमेवोपादायाऽवृत्तित्वान्तं घटनीयं तच्च न सम्भवति प्रतियोग्यप्रसिद्ध्या तदप्रसिद्धिरिति नाऽसौ लक्षणघटक इति भावः। जातेर्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यस्य प्रयोजनविरहेणाऽप्रवेशेनोक्तदोषानवकाश इत्यव्याप्यवृत्तिसाध्यके एवाऽतिव्याप्तिमाह संयोगादीति। अतिव्याप्तिरिति। संयोगत्वावच्छिन्नाभावस्य हेत्वधिकरणयत्किञ्चिद्व्यक्त्यसमवेतप्रतियोगिसामान्यकत्वाभावेन लक्षणाघटकत्वादिति। तदसम्भवमेव स्फुटयति अन्य इति। सामान्यादावित्यर्थः। अप्रसिद्धेरिति। तथाच 'यत्किञ्चिद्व्यक्तौ'त्यनेन न सामान्याद्युपादानसम्भव इति भावः। द्रव्ये च संयोगादेरपीति। तथा च द्रव्यमपि किञ्चित्पदेनोपादाय तादृशाभावस्य तथात्वं न शक्योपपादनमिति भावः॥

(दी०) मैवम्, साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाऽभावस्य विवक्षितत्वात्। धूमसंयोगे वह्न्यधिकरणायोगोलकानुयोगिकत्वस्य, चैत्रान्यत्वविशिष्टैतद्दण्डसंयोगे एतद्दण्डाधिकरणचैत्रानुयोगिकत्वस्य, गुणकर्मान्यत्वविशिष्टसत्तासमवाये च जात्यधिकरणगुणानुयोगिकत्वस्य विरहान्नातिप्रसङ्गः॥

(गा०) साध्यतावच्छेदकसम्बन्धसामान्ये उभयाभावस्य विवक्षितत्वादिति योजना। तथा च स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वमभावे, स्वप्रतियोगितावच्छेदकेत्यत्र स्वावच्छेदकत्वं प्रक्षिप्य तादृशोभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वं प्रतियोगितायां वा विशेषणं देयमिति भावः। जलादिसंयोगे वह्न्यादिप्रतियोगिकत्वधूमवदनुयोगिकत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धसामान्या-

न्तर्गततत्तद्धूमाऽधिकरणानुयोगिकवह्निसंयोगे वह्निप्रतियोगिकत्वतदधिकरणानुयोगिकत्वोभयाभावासत्त्वान्न वह्न्यभावस्य लक्षणघटकतेति घटाभावमादायैव वह्निमान्धूमादित्यादौ लक्षणसमन्वयः। घटवान्महाकालत्वादित्यादौ पुनरवृत्तिगगनादेरभाव एव लक्षणघटकः, कालिकसम्बन्धसामान्ये तत्तत्प्रतियोगिकत्वाभावेनोभयाभावसौलभ्यात्। यत्किञ्चिद्धेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वाभावनिवेशे जातिमान्मेयत्वादित्यादावुक्तातिव्याप्तिवारणमशक्यम्। सामान्यानुयोगिकसमवायाऽप्रसिद्ध्या जात्याश्रयानुयोगिकसमवाये च जात्यादिप्रतियोगिकत्वसत्त्वेन जातित्वावच्छिन्नाभावस्य प्रतियोगिव्यधिकरणत्वानुपपत्तेः। एवं निरुक्तप्रतियोगिप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये हेत्वधिकरणयत्किञ्चिद्द्रव्यत्वावच्छिन्नानुयोगिकत्वाभावनिवेशे घटवान्महाकालत्वादित्यादावव्याप्तिवारणमशक्यम्, गगनत्वविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धेर्गगनाभावस्यापि प्रतियोगिव्यधिकरणत्वानुपपत्तेरित्युभयाभावानुसरणम्। यत्किञ्चित्पदप्रयोजनमाह धूमसंयोगे इति। अयोगोलकानुयोगिकत्वस्येति। विरहान्नातिप्रसङ्ग इत्यनेनाऽन्वयः। साध्यावच्छेदकसम्बन्धसामान्यान्तर्गतधूमसंयोगे धूमप्रतियोगिकत्ववह्निमदनुयोगिकत्वोभयोरेव सत्त्वेन तत्सामान्ये उभयाभावस्य दुर्घटत्वाद्यत्किञ्चित्पदानुपादाने धूमवान्वह्नेरित्यादावतिव्याप्तिः स्यात्। हेत्वधिकरणस्य च हेतुमत्त्वेन न निवेशः किन्तु च तत्तद्व्यक्तित्वेन यत्किञ्चिदेकहेतुमद्व्यक्तेर्निवेश इत्येतल्लाभाय तदुपाने पुनर्हेत्वधिकरणायोगोलकानुयोगिकत्वस्य धूमसंयोगेऽभावादन्यसंयोगे च धूमप्रतियोगिकत्वस्याऽभावात् संयोगसामान्यस्यैवोभयाभाववत्त्वाद्धूमत्वावच्छिन्नाभावोऽपि लक्षणघटक इति नातिप्रसङ्ग इत्यर्थः। प्रतियोगितावच्छेदकविशिष्टार्थकनिरुक्तपदोपादानप्रयोजनं संयोगेन चैत्रान्यत्वविशिष्टैतद्दण्डत्वेनैव चैत्रादिनिष्ठैतद्दण्डसाध्यके एतद्दण्डहेतौ, समवायेन विशिष्टसत्तासाध्यके जातिरूपहेतौ चाऽतिव्याप्तिवारणरूपं दर्शयति चैत्रान्यत्वेति। निरुक्तपदानुपादाने संयोगसामान्यान्तर्गतचैत्रनिष्ठैतद्दण्डसंयोगे हेत्वधिकरणचैत्रानुयोगिकत्वचैत्रान्यत्वविशिष्टैतद्दण्डाभावप्रतियोग्येतद्दण्डप्रतियोगिकत्वयोः, समवायसामान्यान्तर्गतगुणानुयोगिकसत्तासमवाये च हेत्वधिकरणगुणानुयोगिकत्वविशिष्टसत्ताभावप्रतियोगिसत्ताप्रतियोगिकत्वयोर्द्वयोरेव सत्त्वेन तादृशाभावस्य लक्षणघटकता न स्यादिति प्रसक्तातिप्रसक्तेस्तदुपादानावकाशः। चैत्रे गुणादौ च संयोगेन समवायेन च विशिष्टदण्डविशिष्टसत्तावैशिष्ट्याभ्युपगमात्तदनुयोगिकसंयोगसमवाययोर्विशिष्टदण्डत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिकत्वानभ्युपगमेनाऽन्यानुयोगिकयोश्च तयोश्चैत्रगुणाद्यनुयोगिकत्वाभावेनोभयाभावस्याऽक्षततया विशिष्टसाध्याभावस्याऽपि लक्षणघटकत्वादित्यर्थः।

अथाऽत्र संयोगेन घटादौ साध्ये घटत्वादिहेतावतिव्याप्तिः संयोगसामान्यान्तर्गतघटादिसंयोगे घटाद्यनुयोगिकत्वघटादिप्रतियोगिकत्वोभयसत्त्वेन घटादिनिष्ठघटाद्यभावस्य लक्षणाघटकत्वात्। न च स्वस्मिन् संयोगेन स्वविशिष्टबुद्ध्यनुदयादन्यत्र विशिष्टबुद्धिनियामकघटसंयोगे घटप्रतियोगिकत्वमात्रम्, घटेऽन्यविशिष्टधीमात्रनियामकसंयोगे च तदनुयोगिकत्वमात्रमिति घटानुयोगिकत्वतत्प्रतियोगिकत्वोभयं न कुत्रापि संयोगेऽस्ति, न हि समवायेन संयोगाधिकरणत्वमेव संयोगानुयोगित्वं येन घटसमवेतसंयोगमात्रस्यैव घटानुयोगिकत्वं स्यात्, तथा सति तत्सम्बन्धानुयोगिताया एव तद्विशिष्टबुद्धिविषयताप्रयोजकत्वेन स्वस्मिन्नपि स्वविशिष्टबुद्ध्यापत्तेर्दुर्वारत्वात्, किन्तु सम्बन्धान्तरमेवेति वाच्यम्, येन सम्बन्धेन घटेऽन्यविशिष्टधीस्तेन सम्बन्धेनाऽन्यत्र कदाचिद्घटविशिष्टबुद्धिजननादेकस्यैव संयोगे घटानुयोगिकत्वघटप्रतियोगिकत्वयोरुभयोरेवावश्यकत्वात्। यस्मिन्सम्बन्धे यत्प्रतियोगिकत्वविशिष्टे यदनुयोगिकत्वं तत्सम्बन्धेन तस्यैव तद्विशिष्टप्रमितेः। स्वप्रतियोगिकत्वविशिष्टे च संयोगे स्वानुयोगिकत्वानुपगमेन स्वस्मिन् तेन सम्बन्धेन स्वविशिष्टप्रमापत्त्यनवकाशादिति चेन्न, संयोगेनाऽधिकरणांशे आधेयस्यैव विशिष्टबुद्धिर्जयन्ते नन्वाधेयांशे, आधारस्य च आधाराधेयभावानापन्नयोर्वृत्त्यनियामकसंयोगिनोश्च संयोगेन विशिष्टबुद्धेरप्रामाणिकत्वात्। आधेयत्वानुपस्थितिकालीने भूतले घट इत्यादिप्रत्यये घटांशे भूतलादेः प्रकारत्वेऽपि आधेयताया एव संसर्गतोपगमात्, न तु संयोगस्य। एवं सति वृत्त्यनियामकस्य गगनादिसंयोगस्य सम्बन्धत्वानुपपत्तिर्विशिष्टबुद्धिनियामकस्यैव तथात्वादिति चेत्, का क्षतिः। एवञ्च येन संयोगेनाऽन्यत्र घटादिविशिष्टबुद्धिर्जन्यते घटस्य तत्संयोगाश्रयानाधारत्वेन घटे न तेन सम्बन्धेनाऽन्यविशिष्टबुद्धिर्जन्यते इति संयोगमात्र एव तत्प्रतियोगिकत्वतदनुयोगिकत्वोभयाभावस्याऽक्षतत्वात्।

अथ यस्य घटस्याऽधःस्थितपटे येन संयोगेन घटविशिष्टबुद्धिर्जनिता तेनैव च संयोगेन पटेन समं परिवृत्य स्थापिते तद्घटे पटविशिष्टबुद्धिरपि जन्यते तत्र संयोगे घटप्रतियोगिकत्वघटानुयोगिकत्वोभयस्यावश्यकतया संयोगेन घटसाध्यके तद्घटतत्पटान्यतरत्वरूपेण हेतुतायामतिव्याप्तिर्दुर्वारैवेति चेत्, एवं सति साध्यतावच्छेदकसम्बन्धानुयोगितासामान्ये निरुक्तप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वहेत्वधिकरणाभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभाव एव विवक्षिणीयः। स्वस्मिन् स्वविशिष्टबुद्ध्यनुदयेन स्वप्रतियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगितायामसत्त्वात् संयोगीयानुयोगितासामान्ये घटप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वतद्घटनिष्ठत्वोभयाभावोऽक्षत एवेति। एवञ्च तदेतत्कल्पे समवायैक्यमतेऽतिव्याप्तिमुद्भावयिष्यति तद्यथाश्रुताभिप्रायेणेति ध्येयम्।

अथ द्रव्यत्वादिकं प्रति पर्याप्तिसम्बन्धेन द्वित्वादेर्व्यापकत्वापत्तिः। हेतुमत एकैकद्रव्यस्य पर्याप्तिसम्बन्धेन द्वित्वाद्यनधिकरणत्वेऽपि द्वित्वादिपर्याप्तौ हेत्वधिकरणतत्तद्व्यक्त्यनुयोगिकत्वाभावासत्त्वादिति द्रव्यत्वादिना पर्याप्तिसम्बन्धेन गगनादौ द्वित्वाद्यनुमानापत्तिः। न चेष्टापत्तिः, एकविशेष्यकपर्याप्तिसंसर्गकव्यासज्यवृत्तिधर्मप्रकारकबुद्धेर्भ्रमतया सल्लिङ्गकपरामर्शात्तादृशानुमित्युपगमासम्भवात्। न चैकमात्रवृत्तिधर्मावच्छेदेन द्वित्वादिपर्याप्तेरेकैकस्मिन्नसत्त्वेऽप्युभयादिवृत्तिधर्मावच्छेदेन तत्पर्याप्तिसत्त्वात्तेन सम्बन्धेन तद्वति तत्प्रकारकत्वरूपप्रमात्वं दुर्वारमिति वाच्यम्। तद्वत्तावृत्त-प्रमालक्षणस्याऽपि कथञ्चिन्निर्वचनसम्भवादिति चेत्, मैवम्, उद्देश्यतावच्छेदकानतिरिक्तवृत्तित्वाविशेषितपर्याप्तेः क्वचिदपि सम्बन्धत्वानभ्युपगमेन तादृशपर्याप्तिसंसर्गकानुमितेरापादनासम्भवात्। गगनत्वाद्यनतिरिक्तवृत्तित्वविशेषितपर्याप्तेर्द्वित्वादिप्रतियोगिकत्वाभावेन द्वित्वादिनिष्ठव्यापकत्वाघटकतया तादृशसम्बन्धेनापि तदनुमित्यात्यापत्त्यनवकाशात्।

यत्तु हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकस्थले हेतुमत्त्वपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मावच्छिन्नानुयोगिताकत्वं निवेश्यम्। द्वित्वादिपर्याप्तौ च द्रव्यत्वादिपर्याप्त्यवच्छेदकैकमात्रवृत्तिधर्मावच्छिन्नानुयोगिताकत्वविरहान्न तेन सम्बन्धेन द्वित्वादेर्द्रव्यत्वादिरूपप्रत्येकपर्याप्तधर्मव्यापकतापत्तिः। हेतुमद्वृत्तियत्किञ्चिद्धर्मावच्छिन्नानुयोगिताकत्वनिवेश इमे बहवस्त्रित्वादित्यादौ पर्याप्तिसम्बन्धेन हेतुसाध्याभावेऽव्याप्तिर्हेतुमदेकमात्रवृत्तिधर्मावच्छिन्नानुयोगिताकत्वस्य बहुत्वादिपर्याप्तावसत्त्वेन तादृशसाध्याभावे निरुक्तप्रतियोगिवैयधिकरण्यस्य दुर्वारत्वादतो हेतुपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मनिवेश इति, तन्न मनोरमम्। एतादृशरीत्योक्तकल्पपरिष्कारेऽपि प्रतियोगिमद्भेदे हेतुपर्याप्त्यवच्छेदकावच्छिन्नानुयोगिताकत्वस्याऽग्रिमकल्पे विवक्षणे आकाश आकाशघटोभयत्वादित्यादावव्याप्तेर्दुर्वारत्वादाकाशत्वाद्यवच्छिन्नभेदस्य दर्शितहेतुपर्याप्त्यवच्छेदकतदुभयवृत्तिधर्मावच्छिन्नेऽसत्त्वात्, प्रतियोगिवृत्तिधर्मस्य भेदाधिकरणतानवच्छेदकत्वात्। न च व्यासज्यवृत्तिधर्मसाध्यक ईदृशी रीतिरुपादेया नान्यत्रेति वाच्यम्, आकाशत्वादेराकाशघटादौ व्यासज्यवृत्तित्वभ्रमदशायां तदवच्छिन्नभेदस्य प्रत्येकं हेत्वधिकरणवृत्तित्वग्रहेऽप्याकाशघटोभयत्वादिहेतुनाऽऽकाशत्वाद्यनुमित्युत्पत्त्या तन्निर्वाहाय तत्रापि साधनपर्याप्त्यवच्छेदकावच्छिन्नाधिकरणताकप्रतियोगिमद्भेदघटितव्याप्तिज्ञानहेतुताया वाच्यतया तत्राप्यनुमित्यौपयिकव्याप्तिप्रसिद्ध्यापत्तेस्तस्माद्द्वित्वादिसाध्यकद्रव्यत्वाकाशत्वादिकं सद्धेतुरेव। इमे बहवस्त्रित्वादित्यादावव्याप्तिवारणाय च पर्याप्त्यतिरिक्तस्वरूपसम्बन्धेन प्रतियोग्यधिकरणत्वावच्छिन्नस्य भेद एव हेतुमति निवेशनीयो न तु प्रतियोग्यवच्छिन्नभेदः प्रतियोगिमद्वृत्तिधर्मत्वं वा, तेन प्रत्येकवृत्तिबहुत्वाद्यवच्छिन्नभेदमादाय न तदभावस्य प्रतियोगिवैयधिकरण्यमित्येव सारम्।

इदं तु बोध्यम्, साध्यतावच्छेदकावच्छिन्नाभावनिरूपितत्वविशिष्टसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वमेव 'प्रतियोगिव्यधिकरणहेतुसमानाधिकरणे'ति प्रतीकार्थः । महाकालो घटवान् महाकालत्वादौ च नैतादृशविशेषणाक्रान्ताभावाप्रसिद्धिः कालिकसम्बन्धावच्छिन्नपटाद्यभावस्यैव तथात्वात् । हेतुमन्निष्ठतदधिकरणतायाः साध्याभावाधिकरणताभिन्नत्वसत्त्वेन विशिष्टभेदसत्त्वादित्युभयाभावघटितप्रतियोगिवैयधिकरण्यामुधावनं दीधितिकृतामफलमेव । एवञ्च प्रतियोगिवैयधिकरण्यस्य 'यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः' इत्यादिक्रमेण निर्वचनेऽननुगमात्तत्तत्प्रतियोगितावच्छेदकत्वाभावकूटनिवेशने व्याप्तेर्दुर्ज्ञेयतेति दूषणान्तरमनवकाशमिति दिक् ॥

ननु गगनादेरपि कालिकसम्बन्धेन कालवृत्तित्वमावश्यकम्, अन्यथा तेषां परमार्थसत्त्वानुपपत्तिस्तस्य कालवृत्तित्वरूपत्वात्, एवं कारणत्वानुपपत्तिश्च तस्य पूर्वकालवृत्तित्वघटितत्वादवृत्तित्वप्रवादश्च तत्र कालिकातिरिक्तसम्बन्धेनाऽवृत्तित्वपरः । इत्थञ्च कालिकसम्बन्धसामान्ये गगनादिप्रतियोगिकत्वमहाकालानुयोगिकत्वोभयाभावोऽपि दुर्लभ इति तदभावेऽपि प्रतियोगिवैयधिकरण्यं दुर्घटम् । एवं स्वरूपसम्बन्धेन गगनादेरवृत्तित्वपक्षेऽपि विषयितया घटादिसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः, विषयितासम्बन्धेन पदार्थमात्रस्यैव हेत्वधिकरणनित्यज्ञानसम्बद्धत्वात्तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरित्यालोच्य कल्पान्तरमाह—स्वरूपेत्यादिना ।

अत्र केचित्, साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसाध्यप्रतियोगिकत्वैतत्त्रित्वावच्छिन्नाभावस्य विवक्षणान्न विषयितासम्बन्धेन घटादिसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः, पटाद्यभावस्यैव तेन सम्बन्धेन प्रतियोगिव्यधिकरणत्वात्, घटपटविषयित्वयोर्भिन्नत्वेन विषयितासम्बन्धसामान्ये तादृशत्रितयावच्छिन्नाभावस्य सत्त्वात् । न चैतत्त्रित्वावच्छिन्नाभावनिवेशे स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वेपि न घटादिसाध्यककालत्वादिहेतावव्याप्तिः, प्रतियोगिभेदेन कालिकसम्बन्धस्यापि विभिन्नतया गगनाद्यभावस्यैव तादृशप्रतियोगिव्यधिकरणत्वादिति वाच्यम्, कालिकसम्बन्धेन प्रमेयसामान्यसाध्यकस्थलेऽव्याप्तेः, तत्र सर्वस्यैव साध्यतया कालिकसम्बन्धसामान्य एवसाध्यप्रतियोगिकत्वसत्त्वेनोपदर्शितत्रित्वावच्छिन्नाभावस्यासत्त्वात् । प्रमेयसामान्यस्य व्याप्यवृत्तित्वेऽपि तस्याव्याप्यवृत्तित्वभ्रमदशायामनुमित्युपपत्त्यर्थं तत्र प्रतियोगिव्यधिकरणत्वघटितव्याप्त्युपपादनस्यावश्यकत्वात् । एतत्क्षणवृत्तित्वविशिष्टप्रमेयसामान्यसाध्यकमहाकालत्वादिहेतोरव्याप्यवृत्तिसाध्यकत्वेन तत्राव्याप्तेश्च । न च तथापि विषयि-

तासम्बन्धेन प्रमेयसामान्यसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तेः सम्भवात्कथं त्वदुक्तिसङ्गतिरिति वाच्यम्, 'साध्यप्रतियोगिकत्वे'त्यनेन साध्यतावच्छेदकविशिष्टप्रतियोगिकत्वस्य विवक्षणात् प्रमेयत्वविशिष्टघटविषयितातो घटत्वविशिष्टघटविषयिताया भिन्नत्वेन घटाद्यभावस्य प्रतियोगिव्यधिकरणत्वात्। न चेश्वरज्ञानीयप्रमेयत्वविशिष्टघटविषयितायां तादृशनित्वावच्छिन्नस्य सत्त्वेन कथं तत्र घटाद्यभावस्य प्रतियोगिवैयाधिकरण्यमिति वाच्यम्, निरुक्तप्रतियोगिप्रतियोगिकत्वेत्यनेन यदभावीयप्रतियोगितावच्छेदकपर्याप्तप्रतियोगितावच्छेदकताकत्वस्य विवक्षणादीश्वरज्ञानीयतादृशविषयितायां प्रमेयत्वस्याऽपि निरूपकतावच्छेदकत्वेन घटत्वपर्याप्तप्रतियोगितावच्छेदकताकत्वाभावेन घटाद्यभावस्य प्रतियोगिव्यधिकरणत्वात्। इत्थञ्च स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे कालिकसम्बन्धेन घटादिसाध्यकस्थलेऽप्यव्याप्तिः सम्भवति प्रमेयत्वादिविशिष्टघटनिरूपितकालिकविशेषणतातो घटत्वविशिष्टघटनिरूपितकालिकविशेषणताया अभिन्नत्वेन कालिकसम्बन्धसामान्ये घटत्वपर्याप्तावच्छेदकताकत्वाभावेन घटाद्यभावस्यापि प्रतियोगिव्यधिकरणतया तत्प्रतियोगितावच्छेदकत्वस्य घटत्वे सत्त्वादिदानीं प्रमेयघट इदानीं घट इत्यादिप्रत्ययानामेकेनैव कालिकविशेषणत्वेनोपपत्तेर्निरूपकतावच्छेदकभेदेन तादृशसम्बन्धभेदस्यानभ्युपगमादतः कल्पान्तरमनुसरति'स्वरूपसम्बन्धेन" इत्याहुस्तदसत्, तथा सति स्वरूपसम्बन्धेन गगनादेर्वृत्तित्वेऽपि विषयितासम्बन्धेन घटादिसाध्यके प्रमेयत्वविशिष्टघटादिमात्रविषयकज्ञानमात्रवृत्तिहेतावतिव्याप्तेः। स्वरूपसम्बन्धेन गगनादेरवृत्तित्वेऽपि नित्यज्ञानीयप्रमेयत्वादिविशिष्टघटनिरूपितविषयितातो नित्यज्ञानीयघटत्वविशिष्टनिरूपितविषयिताया अभिन्नत्वेऽपि क्षतिविरहेण विषयितासम्बन्धेन घटादिसाध्यके ईश्वरज्ञानमात्रवृत्तिहेतावव्याप्तेर्दुर्वारत्वाच्च।

एतेन साध्यतावच्छेदकविशिष्टप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तोभयाभावस्य विवक्षणान्न घटवाद्भित्यज्ञानत्वादित्यादावव्याप्तिः, तत्र घटत्वविशिष्टनिरूपितविषयितासामान्ये पटप्रतियोगिकत्वाभावेन पटाभावस्यापि प्रतियोगिव्यधिकरणत्वात्। स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु घटवान्महाकालत्वादित्यादावुक्तक्रमेण पर्याप्तिनिवेशस्यावश्यकतया घटाभावस्यापि प्रतियोगिव्यधिकरणतयाऽव्याप्तिरतः कल्पान्तरानुसरणमित्यपि परास्तम्। उक्तस्थले साध्यनिरूपितविषयितासम्बन्धसामान्यान्तर्गतप्रमेयत्वविशिष्टघटनिरूपितविषयितायां घटत्वपर्याप्तावच्छेदकताकत्वाभावेन शुद्धघटत्वविशिष्टनिरूपितविषयितायाश्च हेत्वधिकरणानुयोगिकत्वाभावेन साध्यनिरूपितविषयितासामान्य उभयाभावस्य सत्त्वादव्याप्तेः। तस्मात् प्राचीनमते वृत्त्यनियामकविषयितादिसम्बन्धेन व्याप्त्यनभ्युपगमादुक्तस्थलेऽव्याप्त्यसम्भवात्। कालिकसम्बन्धेन गगनादेरवृत्तित्वे तु घटवान् महाकालत्वादित्यादावव्याप्तिरतः कल्पान्तरमनुसरति॥

(दी०) स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम्। समवायसम्बन्धेन प्रमेयसामान्याभावस्य सामान्यादौ सत्त्वात्मेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम्।

(गा०) 'स्वरूपसम्बन्धेन' कालिकविशेषणतासम्बन्धेन। निरुक्तप्रतियोग्यनधिकरणेति। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः। एवञ्च स्वावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभाववत्तादृशप्रतियोगितासामान्यको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नविधेयकानुमित्यौपयिकी व्याप्तिरिति पर्यवसितम्। घटवान्महाकालत्वादित्यादौ समवायादिना घटाद्यभावीयप्रतियोगितैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिरूपिका प्रसिद्धा, तादृशप्रतियोगितासामान्ये कालिकसम्बन्धावच्छिन्नत्वाभावादेव निरुक्तोभयाभाववत्त्वमक्षतमिति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ संयोगादिना घटाद्यभावप्रतियोगितायां समवायादिना धूमाद्यभावप्रतियोगितायाञ्च धूमत्वाद्यवच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नाभावप्रतियोगिताया अपि निरुक्तप्रतियोगितासामान्यान्तर्गतत्वेन तत्रोभयाभावासत्त्वान्नातिव्याप्तिः। धूमादिसमानाधिकरणस्य समवायादिना वह्न्याद्यभावस्य संयोगादिना घटाद्यभावस्य च प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वतादृशसम्बन्धावच्छिन्नत्वयोरेकैकस्य सत्त्वेऽप्येकैकाभावेन द्वित्वावच्छिन्नाभावसत्त्वाल्लक्षणसमन्वयः।

यद्यपि तादृशाभावीयसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमात्रस्याभावनिवेशेऽपि सामञ्जस्यम्। इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वत्वावच्छिन्नभेदादिप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य विरहमादाय, प्रमेयसामान्यसाध्यके संयोगेन जन्यत्वविशिष्टघटादिहेतौ साध्यावच्छेदकावच्छिन्नभेदस्य, संयोगसमवायकालिकविशेषणतासम्बन्धावच्छिन्नाभावस्य च हेतुमत्यसम्भवेऽपि विषयितासम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य, ज्ञानमात्रवृत्तिहेतौ च संयोगसम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य तद्वति प्रसिद्ध्या तदीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायामुक्तसम्बन्धावच्छिन्नत्वस्य विरहमादाय लक्षणसमन्वयसम्भवः। तथाऽपि हेतुमपि सर्वैरेव सम्बन्धैः साध्यं वर्तते, न तु कस्यामपि तादृशाभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वमिति भ्रमदशायामप्यनुमितेरानुभविकतया तदानीं साध्यतावच्छेदकावच्छिन्नत्वेन

दकसम्बन्धसामान्यान्तर्गतगगनानुयोगिकसमवायादावुक्तोभयाभावासत्त्वेनातिव्याप्ति समवायभेदमतेऽपि दुर्वारा। साध्यतावच्छेदकसम्बन्धतावच्छेदकरूपविशिष्टनिरूपितानुयोगितासामान्ये निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावविवक्षणेन तादृशदोषवारणे च निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वस्थाने निरुक्तप्रतियोगिप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वनिवेशेन द्रव्यं जातेरित्यादावप्यतिव्याप्ति शक्यते वारयितुमिति।

इदं त्ववधेयम्, स्वसमवायिसंयोगादिसम्बन्धेन यत्र लौहित्यादेः साध्यता तत्र सद्धेतावेनत्स्फटिकत्वादावुभयाभावघटितप्रतियोगिवैयधिकरण्यनिवेशपक्षे स्फटिकाद्यनुयोगिकजपादिसंयोगे लौहित्यादिनिरूपितपरम्परासम्बन्धघटकसाक्षाल्लौहित्यप्रतियोगिकत्वाभावेन हेतुमन्निष्ठसाध्याभावे प्रतियोगिवैयधिकरण्यं दुर्वारम्। साक्षात्परम्परासम्बन्धघटकसाधारणं तत्प्रतियोगिकत्वं चानुगतं दुर्वचम्। तादृशस्य तस्य निवेशेऽयोगोलकाद्यनुयोगिकवह्निसंयोगादेरपि धूमादेः परम्परासम्बन्धघटकत्वसम्भवेन धूमादिप्रतियोगिकतया तन्निष्ठधूमाद्यभावेऽपि प्रतियोगिवैयधिकरण्यानुपपत्ति। न च तादृशसंयोगे संयोगत्वपुरस्कारेण साक्षाल्लौहित्यप्रतियोगिकत्वविरहेऽपि साध्यतावच्छेदकसम्बन्धतावच्छेदकस्वसमवायिसंयोगत्वपुरस्कारेण तत्प्रतियोगिकत्वं स्वीक्रियत इति वाच्यम्, मानाभावात् समवायस्य तत्प्रतियोगिकतयैव तद्घटितपरम्पराया सम्बन्धतोपपत्तेः। किञ्चिद्रूपेणाऽपि संयोगादेर्लौहित्यादिप्रतियोगिकत्वे संयोगादिना किञ्चित्समवायिनिरूपितत्वविशिष्टसंयोगादिना वा साक्षात्सम्बन्धात्मकेन स्फटिकादौ लौहित्यादिबुद्धेर्भ्रमत्वानुपपत्तेश्च। यादृशसम्बन्धे यत्प्रकारप्रतियोगिकत्वयद्विशेष्यानुयोगिकत्वोभयाभावस्तादृशसम्बन्धेन तत्प्रकारकतद्विशेष्यकज्ञानं भ्रम इति तल्लक्षणात्। स्वसमवायिसंयोगे चोभयसत्त्वेनोभयाभावासत्त्वात्। न च सम्बन्धभेदेन व्यापकताभेदात्स्वसमवायिसंयोगादिरूपपरम्परासम्बन्धेन यत्र साध्यता तत्र परम्पराघटकविशेष्यांशे स्वप्रतियोगिप्रतियोगिकत्वमुपेक्ष्य स्वप्रतियोगिप्रतियोगिकपरम्पराघटकविशेषणसमवायादिमत्प्रतियोगिकत्वस्यैवाभावो निवेशनीयः परम्परासम्बन्धावगाहिबुद्धावपि ईदृशरीत्योह्यमिति नानुपपत्तिरिति वाच्यम्, यत्र कालिकसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन घटादिकं साध्यं महाकालवृत्तित्वादिकं हेतुस्तत्र कालिकसम्बन्धेन गगनादेरवृत्तित्वपक्षे प्रतियोगिव्यधिकरणाभावाप्रसिद्धेर्दुर्वारत्वात्, गगनादिनिरूपितस्य तादृशसामानाधिकरण्यरूपपरम्परासम्बन्धघटकविशेषणांशस्य कालिकसम्बन्धस्याप्रसिद्धेः। विशेषणीभूतसम्बन्धं विशिष्यानिवेश्य निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धत्वेन सम्बन्धं निवेश्य तद्वत्प्रतियोगिकत्वनिवेशे कालिकविशेषणतावत्समवेतत्वरूपपरम्परासम्बन्धेन द्रव्यत्वादिसाध्यके द्रव्यवृत्तित्वादिहेतावतिव्याप्ति, तत्र साध्यतावच्छेदकपरम्परासम्बन्धघटकविशेष्यी-

पर्याप्ता, विशेषणं तु सम्बन्धविधयाऽवच्छेदकतायामवच्छेदकमेव, न तु तदन्तर्भावेण सम्बन्धविधया प्रतियोगितावच्छेदकत्वस्य पर्याप्तिः, ईदृशरीत्यैवाभाववैलक्षण्यनिर्वाहात् । तथा च परम्परासम्बन्धेन यत्र साध्यता तत्र परम्पराघटकयावद्वस्तुषु पर्याप्तावच्छेदकताकत्वरूपं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेशनीयम्, उक्तस्थले चाधिकरणविशेषणीभूतसमवायस्य प्रतियोगितावच्छेदकतायामेवावच्छेदकतया प्रतियोगितायां तदन्तर्भावेण पर्याप्तावच्छेदकताकत्वाभावादिति दिक् ।

अथैतल्लक्षणे विषयितादिवृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः, तादृशसम्बन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेन तत्सम्बन्धावच्छिन्नत्वस्याप्रसिद्धत्वात् । न च तादृशसम्बन्धस्य प्रतियोगितानवच्छेदकत्वेऽपि प्रतियोगितावच्छेदकतायामेव तत्सम्बन्धावच्छिन्नत्वप्रसिद्धिः प्रतियोगित्वतदवच्छेदकत्वनिष्ठावच्छेद्यत्वयोर्भिन्नत्वेऽपि एकजातीयतया तादृशानुगतरूपेण निवेशादिति वाच्यम्, तथा सति तादृशसम्बन्धेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः, प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावीयान्यसम्बन्धावच्छिन्नप्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वाभावेन तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्य चाप्रसिद्धत्वेन तादृशप्रतियोगितासामान्ये तदुभयाभावस्याक्षतत्वात् । मैवम्, वृत्त्यनियामकसम्बन्धेन व्यापकतास्वीकारे तादृशसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणकाभावप्रतियोगितावच्छेदकतासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वतादृशरूपावच्छिन्नत्वोभयाभावस्यैव विवक्षणीयतया सामञ्जस्यात् । तथा हि विषयितासम्बन्धेन साध्यतायां सद्धेतौ तत्सम्बन्धावच्छिन्नावच्छेदकताकसाध्यवदभावो न प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणहेत्वधिकरणकः, अतोऽन्यसम्बन्धेन साध्यादिमदभावस्तत्सम्बन्धेनान्यावच्छिन्नाभावो वा तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयाभावसत्त्वाल्लक्षणसमन्वयः । तत्सम्बन्धावच्छिन्नसाध्यके व्यभिचारिण्यपि तादृशसम्बन्धेन साध्यवदभावोऽपि तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयसत्त्वेन नातिव्याप्तिः । वह्निमान् धूमादित्यादौ संयोगादिना घटादिमदभावः समवायादिना वह्न्यादिमदभावश्च लक्षणघटकः । तत्प्रतियोगितावच्छेदकतायामुभयाभावसत्त्वाल्लक्षणसमन्वयः । धूमवान्वह्नेरित्यादौ साध्यतावच्छेदकसम्बन्धेन साध्यवतोऽभाव एव तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयस्यैव सत्त्वान्नातिव्याप्तिरिति ।

(दी०) अत एव समवायस्यैकत्वेन द्रव्यत्वप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयसत्त्वेऽपि द्रव्यं जातेरित्यादौ, वह्निधूमोभय-

वान्वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि च नाऽतिव्याप्तिरित्यपि वदन्ति ॥

(गा०) 'संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि' 'वह्निधूमोभयवान् वह्नेः' इत्यादौ नातिव्याप्तिरिति योजना । अयं भावः, प्रत्येकं संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेण वह्निधूमोभयवान् धूमादित्यत्र संयोगसम्बन्धसामान्ये वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणानुयोगिकत्वोभयाभाववत्त्वात् तादृशोभयत्वावच्छिन्नाभावोऽपि संयोगेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणतया लक्षणघटक इत्यव्याप्तिः स्यादतः संयोगेनोभयसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नत्वं परित्यज्य प्रतियोगिताश्रयप्रतियोगिकत्वमेव निवेशनीयं तथा च वह्निधूमोभयवान्वह्नेरित्यादावपि वह्निधूमोभयत्वावच्छिन्नाभावस्य लक्षणघटकतया पूर्वकल्पेऽतिव्याप्तिः स्यादिति ।

अथ साध्यतावच्छेदकभेदेन चेद्व्याप्तिपदार्थभेदस्तदैव प्रतियोगितावच्छेदकावच्छिन्नत्वपरित्यागः स्थलविशेषे सम्भवति तथा च साधनभेदेनापि तुल्ययुक्त्या तद्भेदाद् धूमरूपहेतुकवह्निधूमोभयात्मकसाध्यघटितव्याप्तिपदार्थप्रसिद्धिनिर्वाहाय तच्छरीरे प्रतियोगिताश्रयवैयधिकरण्यनिवेशनस्य वह्निहेतुके तदुभयसाध्यकस्थले कथमतिव्याप्तिप्रसञ्जकत्वमिति चेत्, यथा संयोगसामान्ये द्वित्वावच्छिन्नप्रतियोगिकत्वाभावनिश्चयदशायामपि धूमेन वह्निधूमोभयानुमितिर्भवतीति प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानं धूमलिङ्गकतादृशोभयानुमितिजनकमङ्गीक्रियते, तथा तादृशनिश्चयदशायां सकलवह्निमतामेव धूमवत्त्वमिति भ्रान्तानां वह्निहेतुकतदुभयानुमितिरप्यनुभवसिद्धा । तथापि प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानमेवानुमितिजनकं वाच्यम्, तथा च तद्धेतुकतत्साध्यकानुमितिजनकज्ञानस्य प्रमात्वप्रसङ्ग इत्येवातिव्याप्त्यर्थः । एवं यथा वह्निधूमोभयत्वेन उभयं धूमव्यापकमिति वाक्याद्योक्तनिश्चयदशायां शाब्दबोधो जायते तथा वह्निधूमोभयत्वेनोभयं वह्निव्यापकमित्यनाप्तोक्तवाक्यादपि योग्यताभ्रमाच्छाब्दबोधः सर्वानुभवसिद्ध इति प्रतियोगिताश्रयप्रतियोगिकत्वमेव तत्र शाब्दधीविषयः स्वीकरणीयः । तथा च तद्विषयधियः प्रमात्वेन तादृशवाक्यस्य प्रमाणतापत्तिरित्यपीति । वह्नेरित्यत्र धूमादिति नातिव्याप्तिरित्यनन्तरमव्याप्तिश्चेति पाठं केचित्कल्पयन्ति, यथासङ्ख्येन च स्थलद्वयेऽतिव्याप्त्यव्याप्ती योजयन्ति ।

इदमत्रावधेयम्, घटद्वयवद्भूतलमित्यादौ द्वित्वोपलक्षितघटादिवैशिष्ट्यं तद्विशिष्टवैशिष्ट्यं वा भासते । आद्ये एकघटादिमत्यपि तत्प्रसङ्गः । न च द्वित्वोपलक्षितस्यापि व्यक्तिद्वयस्यैव वैशिष्ट्यद्वयं तत्र भासत इति नातिप्रसङ्ग इति वाच्यम्, एकस्मिन्नपि भेदभ्रमेण द्वित्वभ्रमात्तत्प्रकारक-

प्रतीतावुभयभानानियमात् । तादृशबुद्धेर्द्वित्वविशिष्टाभावज्ञानविरोधितानुपपत्तिश्च विशिष्टवैशिष्ट्यज्ञानस्यैव विशिष्टाभावबुद्धिविरोधित्वात् । द्वितीये संयोगससर्गकतादृशज्ञानमात्रस्यैव भ्रमत्वापत्तिः, संयोगरूपवैशिष्ट्ये द्वित्वाद्विविशिष्टप्रतियोगिकत्वस्य बाधात्। तस्माद्द्वित्वादिविशिष्टप्रतीतौ संयोगमात्रं न सम्बन्धोऽपि तु द्वित्वावच्छिन्ननिरूपिता संयोगावच्छिन्नाधिकरणतैव। अधिकरणता च पदार्थान्तरं अधिकरणस्वरूपा वा, उभयथैव निरूपकभेदेऽपि निरूपकतावच्छेदकद्वित्वस्यैक्यात्तदैक्यमिति संयोगप्रतियोगितावच्छेदकत्वत्र तत्प्रतियोगितावच्छेदकताया द्वित्वेऽनुपपत्तिरित्युपेयम्। एवञ्च वह्निधूमोभयत्वावच्छिन्नसाध्यके संयोगावच्छिन्नाधिकरणताया एव साध्यतावच्छेदकसम्बन्धत्वात्तत्र चोभयत्वावच्छिन्नप्रतियोगिताकत्वसत्त्वान्नातिव्याप्तिप्रसक्तिः । अन्यथा द्वितीयकल्पेऽपि प्रतियोगितावच्छेदकावच्छिन्ननिरूपितप्रतियोगितावच्छेदकसम्बन्धानुयोगित्वनिवेशादुभयत्वावच्छिन्नप्रतियोगिकसंयोगाप्रसिद्ध्या संयोगेनोभयत्वावच्छिन्नसाध्यके व्यभिचारिणि तत्सम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताया लक्षणघटकत्वेनातिव्याप्तेर्वज्रलेपत्वात्।

वस्तुतस्तु पर्वतो वह्निमानित्यादावपि संयोगावच्छिन्नाधिकरणतैव सम्बन्धो न तु संयोगमात्रम्। अन्यथा पर्वतो वह्निमानित्यत्रेव पर्वते वह्निरित्यत्रापि संयोगमात्रस्यैव तथात्वापत्त्या अविशेषप्रसङ्गात्। तादृशप्रतीत्योर्विशेषाय प्रथमाया संयोगो द्वितीयायां तदवच्छिन्नाधेयता संसर्ग इत्युपेयते, किंवा प्रथमाया संयोगावच्छिन्नाधिकरणता द्वितीयाया संयोगस्तथेत्यत्र विनिगमकस्य दुर्लभत्वात्। न च तादृशप्रतीत्योः संसर्गांशेऽविलक्षणत्वेऽपि विशेष्यविशेषणभावभेदाद्वैलक्षण्योपपत्तिसम्भव इत्युभयत्रैव संयोगमात्रस्य सम्बन्धताऽस्त्विति वाच्यम्, तावतापि पर्वतो वह्निमान्, वह्नौ पर्वत इत्यनयोः, पर्वते वह्निः, पर्वतवान्वह्निरित्यनयोश्च प्रतीत्योर्विशेषानिर्वाहात् । न चैव रूपवानित्यादावपि समवायावच्छिन्नाधारतैव सम्बन्धः स्यान्न तु समवाय उक्तयुक्तेरविशेषादिति वाच्यम्, समवायातिरिक्ताया समवायावच्छिन्नाधारताया अनभ्युपगमात्।

अथ समवायावच्छिन्नाधारताया समवायरूपत्वे समवायावच्छिन्नाधेयताऽवश्यमतिरिक्ता स्वीकरणीया, अन्यथा रूपवान् घटो घटे रूपमिति प्रतीत्योः संसर्गवैलक्षण्यानुपपत्तेः । तथा च समवायावच्छिन्नाधेयता आधारता वाऽतिरिक्तेत्यत्र विनिगमकं दुर्लभमिति समवायातिरिक्तसमवायावच्छिन्नाधारतासिद्धिर्निष्प्रत्यूहैवेति चेन्न, घटानुयोगिकरूपप्रतियोगिकसम्बन्धो रूपानुयोगिकघटप्रतियोगिकसम्बन्धः परस्परं विलक्षण एव, अन्यथा दर्शितस्थले संसर्गवैलक्षण्यानिर्वाहादिति सत्यम्, तत्र चाधारानुयोगिकः सम्बन्ध एव समवाय इति परिभाषितो न त्वाधेयानुयोगिकः, स त्वाधेयतेत्येव परिभाष्यते तत्र को विनिगमकानुयोगः । न चैवं संयोगिन्यपि

संयोग एवाधारताऽस्तु स चाऽनुयोगितासम्बन्धेनाधारपदप्रवृत्तिनिमित्तमिति संयोगस्य द्विनिष्ठत्वेऽपि नाधेये तद्व्यवहार इति वाच्यम्, संयोगीयसमवाया‑तिरिक्ताया आधेयव्यावृत्तानुयोगिताया स्वीकारे तस्या एव संयोगिनिरूपिताधारतात्वोपगमेनातिरिक्ताधारताया निष्प्रत्यूहत्वात् । न चाधारताया संयोगिप्रतियोगिकत्वं कल्पनीयमिति गौरवम् । भवन्मतेऽपि संयोगे तत्समवेतत्वातिरिक्तस्य तत्प्रतियोगिकत्वस्य कल्पनीयतया साम्यात् । अन्यथा भूतलादे स्वसमवेतघटादिसंयोगानुयोगितया स्वाधारतापत्ते । एतेन संयोगिन्याधेयताऽपि संयोग एव । प्रतियोगितासम्बन्धेन तस्याधेयपदप्रवृत्तिनिमित्ततया नाधारे तद्व्यवहार इत्यपि निरस्तम् । आधेयनिष्ठाधारव्यावृत्तपदार्थान्तरकल्पनाया आवश्यकत्वात् । आधाराधेययो संयोगानुयोगित्वप्रतियोगित्वकल्पने विपरीतकल्पनायामपि बाधकाभावाच्चेति दिक् ।

एकानुयोगिकसंयोगद्वयप्रतियोगितयो प्रत्येकमुभयत्वावच्छिन्नत्वविरहेऽपि तदुभयत्वावच्छेदेनोभयत्वावच्छिन्नत्वोपगमान्न संयोगेनोभयसाध्यकेऽतिव्याप्तिरित्यप्याहु । प्रतियोगित्वावच्छेदकत्वादे स्वरूपसम्बन्धरूपतया सम्बन्धत्वेन तन्निवेशे सम्बन्धत्वस्य नियमघटिततयाऽनवस्थेत्याशङ्कां निरस्यति प्रतियोगित्वादिश्चेति ।

(दी०) प्रतियोगित्वादिश्च स्वरूपसम्बन्धविशेषो न सम्बन्ध‑त्वेन निविष्टः । सामानाधिकरण्येऽपि सम्बन्धः संयोगत्वादिनैव निवि‑शते । दर्शितञ्च नियमाघटितमपि सम्बन्धत्वम् ।

(गा०) सम्बन्धविशेषोऽपि न सम्बन्धत्वेन लक्षणघटकोऽपि तु प्रतियोगितात्वादिना, कुत्रचित्सम्बन्धविधया स्वरूपत एवेत्यर्थः ।

ननु तत्समानाधिकरण्यं तत्सम्बन्धिसम्बन्धित्वं तत्र च सम्बन्धत्वेनैव सम्बन्धनिवेश इत्याशङ्क्याह सामानाधिकरण्येऽपीति । संयोगत्वादिनैवेति । साधनतावच्छेदकादिभेदेनेव सम्बन्धादिभेदेनाऽपि व्याप्तिभेदस्येष्टत्वादिति भाव । साध्यसमानाधिकरण्यशरीरे साध्यवत्संयुक्तत्वादिरूपे हेतौ सम्बन्धस्य प्रकारतया तस्यैव संयोगत्वादिना निवेश, साध्यसम्बन्धस्य च धर्म्यंशे तत्संसर्गविधयैव लाघवेन निवेशात्तस्य स्वरूपत एव निवेश सम्भवति, जात्यतिरिक्तस्याऽपि संसर्गतया भाने स्वरूपतोऽपि तदुपगमादित्यवधेयम् । सम्बन्धत्वनिवेशेऽपि न क्षतिरित्याह दर्शितञ्चेति । नियमाघटितमिति । तत्प्रतियोगिकत्वविशेष एव तत्सम्बन्धत्वं न तु तद्विशिष्टबुद्धिनियामकत्वम्, अतीन्द्रियसम्बन्धे जनकत्वरूपनियामकत्वासम्भवात् । तत्प्रतीतिविषयत्वरूपनियामकत्वनिवेशे व्याप्तेरेवानन्तर्भावात् प्रमेयमात्रेऽतिप्रसङ्गाच्च । न च विशेष्यतान्यतत्प्रकारतानिरूपितविषयताया एव विवक्षणीयतया नातिप्रसङ्ग इति वाच्यम्, एवमपि संयोगादिना द्रव्यत्वादिभ्रमविषयतामादाय तस्यापि तत्सम्बन्धत्वापातात् । न च विषयताया प्रमाप्रतियोगिकत्वनिवेशान्नायमतिप्रसङ्ग इति वाच्यम्, प्रमात्वस्य तत्सम्बन्धानुयोगि

शेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपतया सम्बन्धघटितत्वात् । एवं तदनुयोगिकत्वविशेष एव तत्र सम्बन्धत्वमिति भावः । इत्थञ्च सामान्यतः सम्बन्धघटितं साध्यवत्सम्बद्धत्वरूपसाध्यसामानाधिकरण्यं साध्यवदनुयोगिकप्रतियोगित्वं प्रतियोगितासम्बन्धेन साध्यवदनुयोगिकवत्त्वं वा, तच्च संयोगत्वादिना तद्घटितात्साध्यवदनुयोगिकसंयोगप्रतियोगिकत्वरूपाल्लघुशरीरमिति तदेव व्याप्तिघटकं वाच्यम्, अतिप्रसङ्गस्य व्यापकतायां विशिष्य सम्बन्धनिवेशेनैव वारणसम्भवात् । हेतौ साध्यवदसंयुक्तत्वादिनिश्चयदशायां संयोगादिना पक्षे हेतुमत्तानिश्चयस्य साक्षादनुमितिप्रतिबन्धकताया अग्रे वक्तव्यतया तत्रानुमित्यापत्त्यनवकाशादिति सूचितम् ।

अभावत्वञ्चेदत्र भावभिन्नत्वं तदा प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वतादृशसम्बन्धावच्छिन्नत्वोभयाभावनिवेशपक्षे दैशिकविशेषणतया घटत्वाभावादिसाध्यके व्यभिचारिण्यतिप्रसङ्गः, तादृशसम्बन्धावच्छिन्नतद्भावस्य घटत्वादिरूपतया भावभिन्ननिरूपितप्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वघटत्वाभावत्वावच्छिन्नत्वोभयाभावस्याऽक्षतत्वादित्याशङ्कां निरस्यति अभावत्वञ्चेति ।

(दी०) अभावत्वञ्चेदमिह नास्ति, इदमिदं न भवतीति प्रतीतिनियामको भावाभावसाधारणः स्वरूपसम्बन्धविशेषः । अतो नाऽभावसाध्यकव्यभिचारिण्यतिप्रसङ्गः । तदपि वा नोपादेयं प्रयोजनविरहात् । विषयतात्वादिवत् प्रतियोगित्वाधिकरणत्वतत्त्वसम्बन्धत्वादयोऽप्यतिरिक्ता एव पदार्था इत्येकदेशिनः ॥

(गा०) इदमिह नाऽस्तीदमिदं न भवतीति द्विविधप्रतीतिकथनेनाभावत्वस्य संसर्गाभावान्योन्याभावोभयसाधारण्ये प्रमाणमुपदर्शितम्, तस्यान्योन्याभावसाधारण्यविरहेऽभावान्तरप्रतियोगितासामान्ये तादात्म्यसम्बन्धावच्छिन्नत्वविरहेण तेन सम्बन्धेन साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् । भावाभावसाधारण इति । भावेनापि घटे घटत्वाभावो नास्ति घटो न घटभिन्न इति प्रतीतेर्जननादिति भावः । तदवच्छिन्ने चाभावपदस्य रूढिशक्तिः परिभाषैव वा, अतो न भावोऽभाव इत्यवयवव्युत्पत्त्या तद्धर्मप्रत्ययेऽपि न क्षतिः । स्वरूपसम्बन्धविशेष इति । अभावे तत्प्रतियोगिस्वरूपनिरूपितानुयोगित्वनामा सम्बन्धविशेष इत्यर्थः । न चाभावत्वस्य स्वरूपसम्बन्धरूपत्वेऽननुगमादनुगतप्रत्ययानुपपत्तिः, तदनुगमकरूपान्तराभ्युपगमात् । पदार्थान्तरत्वेऽपि निरूपकभेदेन सम्बन्धान्तरवत्तद्भेदस्यावश्यकतयाऽनुगमकरूपान्तरापेक्षणात् ।

यत्तु प्रतियोगिनिरूपितसम्बन्धानामननुगमेऽपि प्रतियोगिधर्मितावच्छेदकस्य नञ्पदप्रवृत्तिनिमित्ताखण्डधर्मान्तरस्य सत्त्वाद्घटो नाऽस्ति पटो नास्तीत्याद्यनुगतप्रमितिनिर्वाह इति । तन्न सार्थीयः, घटादौ घटाभावादेः

कालिकादिसम्बन्धस्यापि स्वरूपतया तत्संसर्गकप्रतीतितो घटाभावो नास्तीत्याद्यनुयोगितासंसर्गकप्रतीतेर्वैलक्षण्याय संसर्गतावैलक्षण्यस्यावश्य कतया संसर्गतावच्छेदकधर्मविशेषस्वीकारस्य तन्निर्वाहकस्यावश्यकत्वात्, तेनानुगताखण्डानुयोगितया एव संसर्गतावद्धर्मितावच्छेदकताया अपि सम्भवेनाऽभावनिष्ठाखण्डधर्मान्तरे मानाभावात्। नञ्पदप्रवृत्तिनिमित्ततया अपि तस्यामेवोपगमात्।

अथ नास्तीत्यादावनुयोगितारूपसम्बन्धविशेषप्रकारेणाऽभावभानोपगमे तदंश एव स्वनिरूपितत्वसम्बन्धेन प्रतियोगिनः प्रकारत्वसम्भवादभावांशे तत्सम्बन्धेन प्रतियोगिनो भाने मानाभावादनुयोगितायाः सम्बन्धत्वमेव न सिध्येदिति चेत्, न। मण्याद्यभावस्य दाहादिहेतुतायां मण्यादिरूपप्रति योग्यवच्छिन्नानुयोगिताविशेषस्यावच्छेदकत्वापेक्षयाऽनुयोगितासम्बन्धेन म ण्यादेस्तथात्वे लाघवेन तत्सम्बन्धतासिद्धेः। न चोभयाभावादिवारणाय मणित्वाद्यवच्छिन्ननिरूपितानुयोगिता मण्यादेः सम्बन्धो वाच्यः, तथा च तादृशानुयोगितायाः स्वाश्रयतासम्बन्धेनावच्छेदकत्वेऽपि न गौरवमिति वाच्यम्, उभयत्वाद्यवच्छिन्ननिरूपितानुयोगिताया मणित्वादिविशिष्टसम्बन्ध ताविरहात्, शुद्धानुयोगितासम्बन्धेनैव मणित्वादिविशिष्टस्य उभयत्वाद्य वच्छिन्नाभावव्यावर्तकतासम्भवेन तादृशानुयोगितात्वेन सम्बन्धतानुपग मात्। न च तादृशस्य विशिष्टमणित्वाद्यवच्छिन्नाभावव्यावर्तकता न सम्भ वति, विशिष्टमणित्वाद्यवच्छिन्ननिरूपितानुयोगितायाम् 'अधिकं तु'इत्यादि- न्यायेन मणित्वादिविशिष्टनिरूपितत्वसत्त्वेन तस्या अपि तत्सम्बन्धत्वादिति वाच्यम्, कारणतावच्छेदकनापर्याप्त्यधिकरणपरिसमाप्तप्रतियोगिताकसम्ब न्धिन एव कारणतया मणिर्नास्तीत्याकारकशुद्धमणित्वाद्यवच्छिन्नप्रकारक प्रतीत्यविषयविशेषणान्तरसहितमणित्वाद्यवच्छिन्नाभावनिष्ठतादृशमणित्वाद्य- वच्छिन्ननिरूपितत्वसम्बन्धे च शुद्धमणित्वादिविशिष्टपरिसमाप्तप्रतियोगिता कत्वविरहेण तादृशाभावव्यावर्तनसम्भवात्।

एतेन विशिष्टमणित्वाद्यवच्छिन्नाभाववारणाय शुद्धमणित्वाद्यवच्छिन्न- प्रतियोगिताकत्वेन हेतुता वाच्या, शुद्धमणित्वाद्यवच्छिन्नत्वञ्च मणित्वान्य धर्मानवच्छिन्नत्वम्, तदपि यदि तादृशधर्मावच्छेद्यत्वत्वाद्यवच्छिन्नाभावस्तदा किञ्चिद्विशिष्टतादृशावच्छेद्यत्वत्वावच्छिन्नाभावमादायातिप्रसङ्ग इति शुद्ध- तादृशावच्छेद्यत्वत्वावच्छिन्नाभाव एव निवेशनीय। शुद्धतादृशावच्छेद्यत्व त्वाद्यवच्छेद्यत्वमपि तदतिरिक्तानवच्छिन्नत्वमिति विशेषणानवस्थाप्रसङ्ग इत्यपि निरस्तम्। इत्यलमप्रस्तुताधिकजल्पनया।

'तदपि' तादृशाभावत्वमपि। 'नोपादेयम्' हेतुसमानाधिकरण्यांशे विशे- षणतया न निवेशनीयम्। प्रयोजनाभावादिति। स्वावच्छेदकविशिष्टानधिकरण हेतुमन्निष्ठत्वमात्रपुरस्कारेणाभावं निवेश्य तदीयत्वेन प्रतियोगितानिवेशादेव सर्वसामञ्जस्यादिति भावः।

प्रसङ्गात् प्रतियोगित्वादीनामपि पदार्थान्तरत्वं व्यवस्थापयति विषयतेति। 'तत्त्वम्' विषयतात्वम्। प्राचीनैकदेशिभिर्विषयताया अतिरिक्तपदार्थत्वोपगमाद्दृष्टान्तत्वेन तदुपन्यासः। यथा विषयताया विषयरूपत्वे द्रव्यत्वावच्छिन्नघटविषयकज्ञानाद्घटत्वावच्छिन्नतद्विषयकज्ञानस्य विषयतावैलक्षण्यविरहादवैलक्षण्यापत्तिः। न च द्रव्यत्वघटत्वयोरपि तत्र विषयतया तद्वैलक्षण्यादेव वैलक्षण्यमिति वाच्यम्, तावताऽपि द्रव्यत्वेन घटविषयकाद्घटत्वेन च पटविषयकाज्ज्ञानाद्घटत्वेन घटं द्रव्यत्वेन पटमवगाहमानस्य ज्ञानस्य वैलक्षण्याद्युपपादनस्याशक्यत्वात्। ज्ञानस्वरूपत्वे घटपटावित्यादिसमूहालम्बनीयघटपटादिविषयतानामभिन्नतापत्त्या तादृशज्ञानस्य पटत्वाद्यवच्छिन्नघटपटादिनिष्ठविषयताशालितया भ्रमत्वापत्तिः। ज्ञानविषयोभयरूपत्वे च जातिमान् घट इत्यादिज्ञानीयघटत्वादिविषयताया द्वैविध्यानुपपत्तिर्ज्ञानविषयोरविशेषादिति जातिमानित्याद्याकारकैकविधघटत्वादिविषयताशालिज्ञानात्तादृशबुद्धेर्विलक्षणाकारता न स्यादित्यादियुक्त्या विषयविषयताया विषयादिभेदभिन्नविषयतानामननुगमकतया च विषयतात्वस्यातिरिक्ततासिद्धिः, तथा प्रतियोगितायाः प्रतियोगिस्वरूपत्वे घटादिनिष्ठानां घटत्वद्रव्यत्वादिरूपविभिन्नधर्मावच्छिन्नानां संयोगसमवायादिरूपविभिन्नसम्बन्धावच्छिन्नप्रतियोगितानामवैलक्षण्येनाभाववैलक्षण्यानुपपत्तिः। अभावस्वरूपत्वे घटाद्यभावीयघटत्वाद्यवच्छिन्नप्रतियोगित्व किञ्चिद्विशिष्टघटाभावाभावत्वाद्यवच्छिन्नप्रतियोगितानामवैलक्षण्यापत्तेः। घटत्वादेः प्रतियोगित्वन्यूनवृत्तितया तदवच्छेदकत्वानुपपत्तिः, घटाद्यभावस्य पटादिसाधारण्येन पटादेरपि तत्प्रतियोगितापत्तेश्चेत्यादियुक्त्या प्रतियोगित्वमप्यतिरिक्तं सिद्ध्यति। एवमधिकरणत्वं नाधिकरणस्वरूपमाधेयस्वरूपं वा, भूतले घटसंयोगदशायामिव परम्परासंयुक्तघटभूतलसत्त्वदशायामपीदानीं 'भूतलं घटवत्' इति प्रत्ययप्रसङ्गात्। संयोगरूपत्वे आधेयत्वस्यापि तुल्ययुक्त्या तद्रूपतया आधारत्वाधेयत्वयोरभेदप्रसङ्गेन वैपरीत्येनाधाराधेयभावप्रत्ययप्रसङ्गादिति तदप्यतिरिक्तः पदार्थः। सम्बन्धत्वमपि क्लृप्तपदार्थान्तर्भावेण दुर्वचमिति पदार्थान्तरमेवेति भावः। आदिपदादभावत्वादिपरिग्रहः।

इदं तु बोध्यम्, अभावत्वं प्रतियोगित्वान्नातिरिच्यते तदभावत्वस्य तत्प्रतियोगित्वनियमात्। न चैवं घटादेर्घटभेदाभावत्वापत्त्या घटादिमति भूतले घटभेदो नास्तीत्यादिप्रतीत्यापत्तिरिति वाच्यम्, संसर्गावच्छिन्नप्रतियोगिताया एवाभावत्वरूपतोपगमात्। घटादिभेदस्य घटत्वाद्यत्यन्ताभावसमनियतत्वेन तदभिन्नतया घटत्वादौ तदीयसंसर्गावच्छिन्नप्रतियोगितासत्त्वात्तथैव तदभावप्रत्यायनात्। न चैवमपि घटभेदादेर्घटाद्यभावत्वानुपपत्तिस्तदप्रतियोगित्वादिति वाच्यम्, अत्यन्ताभावत्वात्मकानुयोगिताविशेषस्यैव प्रतियोगितानतिरिक्तत्वोपगमादिति।

इति गदाधरभट्टाचार्यचक्रवर्त्तिविरचिता सिद्धान्तलक्षणविवृतिः समाप्ता।

अनुमानगादाधर्याम्

अवच्छेदकत्वनिरुक्तिप्रकरणम्

प्रतियोगितानवच्छेदकेत्यत्र पारिभाषिकावच्छेदकत्वं निवेशयितुमवच्छेदकपदस्य स्वरूपसम्बन्धरूपावच्छेदकत्वपरतामाक्षिपति नन्वित्यादिना ।

(दी०) नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः । सम्भवति लघौ धर्मे गुरौ तदभावात्, प्रमेयधूमत्वकम्बुग्रीवादिमत्त्वघ्राणग्राह्यगुणत्वादेरतथात्वेन तेन रूपेण साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् । नाप्यनतिरिक्तवृत्तित्वम् । प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात् ।

(गा०) 'इह' एतल्लक्षणे । घटकत्वं सप्तम्यर्थः । तथा च घटत्वेन घटोऽभावप्रतियोगीत्यादिप्रतीतिसाक्षिको यो घटादिनिष्ठप्रतियोगितया सह घटत्वादेरवच्छेदकभावरूपः स्वरूपानतिरिक्तः पदार्थान्तरात्मको वा सम्बन्धविशेषः स इह लक्षणे न शक्यनिवेशन इत्यर्थः । स्वरूपसम्बन्धविशेषात्मकावच्छेदकत्वाभावघटितं निरुक्तरूपं न व्याप्तिरूपमिति यावत् । 'तेन रूपेण साध्यतायां व्यभिचारिण्यतिव्याप्ते'रित्यग्रिममत्रैव हेतुः । प्रमेयधूमत्वाद्यवच्छिन्नसाध्यकव्यभिचारिसाधारणत्वादिति तदर्थः । प्रमेयधूमत्वेत्यादिकमतथात्वेनेत्यन्तं तत्र हेतुः । स्वसमानाधिकरणाभावप्रतियोगितानिरूपितताहशावच्छेदकत्वाभाववत् ताहशसाध्यतावच्छेदककत्वेनेति तदर्थः । सम्भवत्ताहशप्रतियोगितावच्छेदकताकधर्मापेक्षया गुरुत्वं प्रमेयधूमत्वादेस्ताहशप्रतियोगितावच्छेदकत्वाभावसाधकम् ।

तस्य तत्साधकत्वोपष्टम्भकव्याप्तिमाह सम्भवतीति । 'तस्मिन्' इति पूरणीयम् । तथा च लघुधर्मे ताहशावच्छेदकत्वस्य सम्भव इत्यर्थः । 'गुरौ तदभावात्' ताहशावच्छेदकत्वाभावनियमात् । तथा च सम्भवत्तदवच्छेदकताकधर्मापेक्षया यो गुरुः स न तदवच्छेदक इति व्याप्तिरिति पर्यवसितार्थः । सम्भवत्तदवच्छेदकताकत्वञ्च तदवच्छेदकत्वबाधकशून्यत्वम् । बाधकश्चावच्छेद्यप्रतियोगिन्यासमनियतत्वम् । तथा च तत्प्रतियोगित्वादिसामनैयत्यमेव सम्भवत्तदवच्छेदकताकत्वं पर्यवसितम् । सामनैयत्यघटकदलद्वयनिवेशाद् घटपटान्यतरत्वमहानसीयवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितायाः न्यूनवृत्तिघटत्वादेरतिरिक्तवृत्तिशुद्धवह्नित्वादेश्चावच्छेदकत्वासम्भवेन ताहशगुरुधर्मस्य नावच्छेदकत्वानुपपत्तिः । प्रतियोगितायाः सामनैय

त्वञ्च प्रतियोगितया अन्यूनवृत्तित्वे सति तन्निरूपकाभावविरोधितावच्छेदकत्वरूपमवच्छेदकतानिर्वाहकम्। अत सत्तात्वादेर्विशिष्टसत्ताद्यभावीयप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वेऽपि तदभावविरोधितानवच्छेदकत्वान्न तत्प्रतियोगितावच्छेदकत्वसम्भव ।

यत्तु स्वावच्छिन्नसमव्यापकतावच्छेदकधर्मापेक्षया गुरुत्वमेवाऽवच्छेदकत्वाभावसाधकतयाऽभिमतम्। स्वसमनियतसत्तात्वाद्यपेक्षया गुरोर्विशिष्टसत्तात्वादे प्रतियोगितावच्छेदकत्वनिर्वाहाय स्वसमनियतत्वमुपेक्ष्य स्वावच्छिन्नसमव्यापकतावच्छेदकत्वनिवेश इति। तन्न, घटप्रागभावत्वावच्छिन्नसमव्यापकतावच्छेदकघटत्वाद्यपेक्षया गुरोर्घटप्रागभावत्वादेरत्यन्ताभावप्रतियोगितावच्छेदकतया, जातित्वावच्छिन्नसमव्यापकतावच्छेदकतद्घटफसमवेतत्वापेक्षया गुरोर्जातित्वादेर्भेदप्रतियोगितावच्छेदकतया च व्यभिचारात्।

ननु प्रमेयधूमत्वं स्वावच्छिन्नधर्मिविशेषणतापन्नमेयत्वसहितधूमत्वम्, सामानाधिकरण्यसम्बन्धेन मेयत्वविशिष्टधूमत्व वा, उभयथैव तदवच्छिन्नसाध्यके नातिव्याप्तिप्रसक्ति, शुद्धधूमत्वस्यावच्छेदकत्वे तादृशानवच्छेदकतया विशिष्टधूमत्वे दुर्घटत्वात्। एकदेशपर्याप्तवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावस्य विशेष्यपर्याप्तवृत्तेर्विशेषणान्तरवैशिष्ट्यावच्छिन्नानुयोगिताकाभावस्य चानभ्युपगमात्। शुद्धवह्नित्वादौ धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वापर्याप्तेर्मेयवह्नित्वादौ तदनवच्छेदकत्वसौलभ्येन मेयवह्निमान् धूमादित्यादावव्याप्तिविरहादित्यरुचे कम्बुग्रीवादिमदनुधावनम्।

न चैव मेयधूमत्वावच्छिन्नसाध्यकेऽतिव्याप्त्यभिधानमत्यन्तासङ्गतमिति वाच्यम्, व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानुपगमेन नानाव्यक्तिदण्डाद्यवच्छिन्नस्य व्यापकतानिर्वाहाय प्रतियोगितावच्छेदकापर्याप्तविषयतापर्याप्तिरनवच्छेदकत्वान्तार्थं इत्याद्ययैव तदभिधानात्, कम्बुग्रीवादिमत्त्वञ्च घटत्वव्यञ्जकसंस्थानविशेष, घटत्वापेक्षया तस्य गौरवं संस्थानस्य विजातीयावयवसंयोगरूपस्यानन्तत्वात्, अनुगमकजातिविशेषसापेक्षत्वाच्च, घटत्वस्य चैकस्य जातिरूपस्य निर्विशेषणकस्यावच्छेदकत्वे लाघवादिति।

न च घटसामान्याभावप्रतियोगिताया संस्थानविशेषस्यानवच्छेदकत्वेऽपि तत्तत्संस्थानवदभावकूटप्रतियोगितासु प्रत्येकं तेषामवच्छेदकत्वमावश्यकम्, तत्रातिप्रसक्तघटत्वस्याऽवच्छेदकत्वासम्भवादित्यनुगतरूपावच्छिन्नेष्वपि तेष्वनवच्छेदकत्व दुर्घटमिति तदवच्छिन्नसाध्यके नातिव्याप्त्यवकाश इति वाच्यम्, तत्तत्संस्थानवत्तद्घटाभावप्रतियोगितायामपि घटनिष्ठतत्तद्व्यक्तित्वस्यैव साक्षात्सम्बन्धेनावच्छेदकत्वसम्भवात्परम्परासम्बन्धेन स्वसमवायिसमवेतत्वात्मकेन तत्तत्संयोगाना गौरवेणानवच्छेदक

तथा तादृशसम्बन्धेन संस्थानविशेषावच्छिन्नघटादिसाध्यके व्यभिचारिते तावतिव्याप्तेर्दुर्वारत्वात् ।

ननु मृत्पाषाणादिघटसाधारणं घटत्वं नैकम्, मृत्त्वपाषाणत्वादिना सङ्करप्रसङ्गादिति तत्तज्जातिव्याप्यं नानैव, तथा च तथाविधसकलघटानुगमकसंस्थानविशेषावच्छिन्नप्रतियोगिताकं न स्वरूपतो घटत्वस्यावच्छेदकतासम्भवः, न्यूनवृत्तित्वात् । नाप्यनुगतरूपान्तरावच्छिन्नस्य, तादृशरूपान्तरप्रवेशेन गौरवादित्यरुचेर्घ्राणग्राह्यगुणत्वानुधावनम् । घ्राणग्राह्यत्वं घ्राणग्रहणयोग्यता गुणत्वन्यूनवृत्तिघ्राणग्राह्यजातिरूपा, सा चातीन्द्रियेऽपि गन्धे इति न गन्धत्वस्य दर्शितरूपवत्सामान्याभावप्रतियोगितासामनैयत्यानुपपत्तिः । तादृशयोग्यतामात्रस्योपादाने गन्धत्वसुरभित्वादिरूपायास्तस्याः स्वरूपतो हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया तादृशजातित्वाद्यवच्छिन्नाया अप्यनवच्छेदकत्वं दुर्लभमिति तद्विशेष्यतया गुणत्वनिवेशनम् । द्रव्यत्वादिहेतुकस्थले च गुणत्वस्य शुद्धस्यापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वासम्भवाद्विशिष्टगुणत्वस्य गन्धत्वसमनियतस्य तादृशप्रतियोगितानवच्छेदकत्वमक्षतमेवेत्यतिव्याप्तिसङ्गतिः । अथवा घ्राणग्राह्यगुणत्वं स्वाश्रयगुणत्वव्याप्यजातिमत्त्वसम्बन्धेन घ्राणजन्यसाक्षात्कारविषयतावत्त्वमेव, गुणत्वव्याप्यजातिघटितसम्बन्धलाभाय गुणपदम्, न तु गुणत्वमपि विशेष्यतया विवक्षितम् ।

एतेन गुणत्वस्य निरुक्तजातित्वावच्छिन्नगन्धत्वादिविशेष्यतया विवक्षितत्वे स्वरूपतो गन्धत्वादेर्गुणत्वविशेषणतायामप्यतिप्रसङ्गात् तादृशजातित्वावच्छिन्नस्य विशेषणत्वानुधावनं निर्बीजमिति दूषणमनवकाशम् । घ्राणग्राह्यगुणत्वं यथाश्रुतमेव ग्राह्यगन्धत्वरूपलघुधर्मसमनियततया न प्रतियोगितावच्छेदकमित्यपि वदन्ति ।

यत्तु अनवच्छेदकत्वमवच्छेदकाविषयकप्रतीतिविषयत्वरूपम् । तथा चावच्छेदकताघटकसम्बन्धेन विशेष्यांशेऽवच्छेदकप्रकारकप्रतीतिभिन्ना साध्यतावच्छेदकताघटकसम्बन्धेन यादृशधर्मप्रकारिका प्रतीतिस्तादृशधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पर्यवसितम् । एवञ्च प्रमेयधूमत्वादिप्रकारकप्रतीतेर्धूमत्वादिप्रकारकतानियमात् प्रमेयधूमत्वाद्यवच्छिन्नसाध्यकेऽतिव्याप्तिपरिहारः सम्भवति न तु निरुक्तघ्राणग्राह्यगुणत्वाद्यवच्छिन्नसाध्यके, गन्धत्वादिकमविषयीकृत्यापि सुरभित्वादिकं, सुरभित्वादिकमविषयीकृत्यापि च गन्धत्वादिकं विषयीकृत्य तादृशसाध्यतावच्छेदकप्रकारकप्रतीतिसम्भवादिति । तन्न, तथा सत्युक्तरीत्या दण्डिमान् द्रव्यत्वादित्यादावतिव्याप्तेः । प्रत्येकं सकलदण्डमविषयीकृत्यैव दण्डत्वाद्यवच्छिन्नदण्डात्मकसाध्यतावच्छेदकप्रकारकप्रतीतेः सम्भवात् ।

अथ प्रतियोगितावच्छेदकीभूता ये ये धर्मास्तत्प्रकारकप्रतीतिभेदकूटस्य साध्यतावच्छेदकताघटकसम्बन्धेन साध्यतावच्छेदकप्रकारिकायामेकप्रती-

तावत्सत्वात्तथैव च लक्षणे विवक्षितत्वान्नेयमतिव्याप्तिरिति चेत्, तर्हि तादृशरीत्या निरुक्तघ्राणग्राह्यगुणत्वावच्छिन्नसाध्यकेऽपि नातिव्याप्त्यवकाश इति ।

'अनवात्वेन' प्रतियोगितानवच्छेदकत्वेन । अनतिरिक्तवृत्तित्वमिति । स्वव्यापकताकत्वमित्यर्थः । तच्छून्यावृत्तित्वविवक्षणे समवायेन प्रमेयसाध्यके व्यभिचारिण्यतिप्रसङ्गात् । प्रमेयसामान्याभावप्रतियोगिताशून्याप्रसिद्ध्या प्रमेयत्वादेस्तादृशावच्छेदकत्वानिर्वाहात् । महानसीयवह्नित्वाद्यवच्छिन्नसाध्यके धूमादौ वह्नित्वादेर्महानसीयवह्न्याद्यभावप्रतियोगिताशून्यवह्न्यन्तरवृत्तितया विशिष्टेऽपि तत्र तच्छून्यावृत्तित्वस्य दुर्घटतयाऽतिप्रसङ्गाच्च । स्वव्यापकताकत्वनिवेशने च विशिष्टस्याविशिष्टस्य वा यादृशस्यावच्छेदकत्वमभिमतं तादृशस्यैव स्वपदेनोपादेयतया विशिष्टवह्नित्वादिकं प्रति विशिष्ट वह्न्याद्यभावप्रतियोगिताया व्यापकत्वस्याक्षततत्वेन तादृशस्यावच्छेदकत्वोपपत्तेः । ईदृशं यद्यस्त्वं तत्त्वाभावकूटस्य च साध्यतावच्छेदकविशेषणता बोध्या, अत· स्वत्वाननुगमेनैकसामान्याभावनिवेशासम्भवात् यत्किञ्चिदेकावच्छेदकनिष्ठावच्छेदकत्वमादायातिप्रसङ्गानवकाशः ।

न च स्वपदस्य तत्तद्व्यक्तिपरतयाऽवच्छेदकनिष्ठं तत्तद्व्यक्तित्वमेव पर्यवसितमवच्छेदकत्वम्, तथा च विशेषणावच्छिन्ननिष्ठतत्तद्व्यक्तित्वस्यापि विशेष्यपर्याप्ततया विशिष्टवह्नित्वादेरवच्छेदकत्वे शुद्धस्यापि अनवच्छेदकतादुर्भिक्षमिति वाच्यम्, शुद्धस्य विशेषणान्तरसहितस्य वा यादृशस्याधिकरणता अभावप्रतियोगितानिष्ठव्यापकताशरीरे निविष्टा, तादृशरूपपर्याप्तावच्छेदकतापर्याप्त्यनधिकरणत्वस्य साध्यतावच्छेदकविशेषणत्वोपगमात् । मेयधूमत्वादिपर्याप्ताया अभावप्रतियोगितावच्छेदकताया अप्रसिद्धावपि तथाविधाया विषयतावच्छेदकताया· प्रसिद्ध्याऽतिव्याप्त्यनवकाशात् । महानसीयत्वादिसहितवह्नित्वादिपर्याप्तावच्छेदकताया· शुद्धवह्नित्वाद्यपर्याप्तत्वाद्विशिष्टवह्न्याद्यभावमादाय दोषानवकाशात् ।

अत्र यदि हेतुसमानाधिकरणाभावप्रतियोगितासामान्यानतिरिक्तवृत्तित्वं निवेश्यते तदा निखिलवह्न्यादेरेव धूमादिसमानाधिकरणविशेषाभावप्रतियोगितया वह्नित्वादेरपि स्वव्यापकताावच्छेदकतादृशप्रतियोगिताकत्वरूपतादृशप्रतियोगितासामान्यानतिरिक्तवृत्तित्वेन तथाविधप्रतियोगितानवच्छेदकत्वानुपपत्तिरिति तादृशयत्किञ्चित्प्रतियोगितानतिरिक्तवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकतादृशप्रतियोगिताकत्वरूपं निवेशनीयम् । तथा सति धूमवान् वह्नेरित्यादौ धूमत्वादेरपि तादृशावच्छेदकत्वं न स्यात्, धूमादिसामान्याभावप्रतियोगिताया अपि धूमादिस्वरूपतया प्रतिधूमादिकं भिन्नत्वेन प्रत्येकं धूमत्वादिसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वादिति तत्तद्धूमत्वादेरेव तथात्वादतिव्याप्तिरित्याह प्रतियोगिताया

इति। स्वरूपसम्बन्धाभिप्राया इति। प्रतिव्यक्तिभेदप्रयोजकहेतुगर्भविशेषणम्। अतिरिक्तपदार्थरूपप्रतियोगिताया सिद्धान्तविरुद्धत्वादिति भाव।

(दी०) न च तथाविधयत्किञ्चिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वं तत्। अत एवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि साधु सङ्गच्छत इति वाच्यम्। वह्निघटवृत्तिवह्नित्वताणतार्णदहनवृत्तिवह्नित्वाद्यनवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादावतिप्रसङ्गात्।

(गा०) तादृशप्रतियोगितासामान्यानतिरिक्तवृत्तित्वनिवेशेऽपि हेतुसमानाधिकरणाभावत्वेन तादृशाभावनिवेश एव पूर्वोक्तदोष, न तु तादृशाभावस्य प्रातिस्विकरूपेण निवेशने, तत्तद्विशेषाभावप्रतियोगितात्वस्य वह्नित्वादिव्यापकतानवच्छेदकत्वादि याशयेनाशङ्कते न चेति। तथाविधेति प्रतियोग्यनधिकरणहेतुमद्वृत्ती यर्थ। यत्किञ्चि पदं तत्तद्व्यक्तित्वेनाभावनिवेशलाभाय। प्रत्येकं निविष्टस्यापि तथाविधाभावस्य सकलस्य नेकतावच्छेदकताघटकता किन्तु एकस्यैवेति स्फोरणायैकपदम्। तादृशप्रतियोगितासामान्यशून्यावृत्ति वं स्वव्यापकतावच्छेदकतादृशप्रतियोगिनात्वकत्वम्, अतो न पूर्वोक्तदोष। 'अत एव' ईदृशावच्छेदकत्वस्य मूलाभिप्रेतत्वादेव। अतिरिक्तेति। सामान्याभावस्य विशेषाभावकूटातिरिक्तत्वानभ्युपगमे इत्यर्थ। धूमत्वादेरपीति। विशेषाभावकूटान्तर्गतमेकमभावमुपादाय धूमत्वादौ निरुक्तावच्छेदकत्वोपपादनसम्भवादिति भाव। तत्साधनमिति सामान्याभावस्यातिरिक्तत्वव्यवस्थापनमित्यर्थ। सङ्गच्छत इति। अन्यथा स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे विशेषाभावकूटातिरिक्तसामान्याभावानभ्युपगन्तृमतेऽपि विशेषाभावीयप्रतियोगिताकूटस्यैव सामान्यधर्मावच्छिन्नतया धूमत्वादावपि वह्न्यादिसमानाधिकरणधूमादिविशेषाभावप्रतियोगितावच्छेदकत्वेनाऽतिव्याप्त्यप्रसक्त्या सामान्याभावपार्थक्यव्यवस्थापनस्य एतल्लक्षणप्रस्तावेऽनुपयुक्त्वापत्तेरिति भाव।

न चातिरिक्तसामान्याभावाभावे उक्तरीत्याऽतिव्याप्तिविरहेऽपि य एव वह्न्यभावा ह्रदादौ वह्निर्नास्तीति बुद्धिं जनयन्ति प्रत्येकं धूमसमानाधिकरणाना तेषां प्रतियोगितावच्छेदकत्वं वह्नित्वेऽप्यस्तीत्यव्याप्तिर्दुर्वारैवेति तत्साधनसङ्गत्या उपष्टम्भसङ्गतिरिति वाच्यम्, हेत्वधिकरणवृत्तित्वावच्छेदेन तादृशधर्मावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वमतादृशत्वस्य साध्यतावच्छेदकविशेषणता स्वाकृत्य तादृशाव्याप्तेर्वारणसम्भवात्। न हि धूमाधिकरणवृत्तित्वावच्छिन्नविशेषाभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वम्, धूमवति वह्निर्नास्तीत्यप्रत्ययात्, अपि तु यावद्विशेषाभावाधिकरणह्रदादिवृत्तित्वावच्छिन्न एवेति।

इदमापाततः, तथाविधाभावीययत्किञ्चिदेकधर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तवृत्तित्वं निवेश्याऽनतिरिक्तवृत्तित्वरूपाच्छेदकताविवक्षापक्षेऽपि धूमत्वादेरवच्छेदकत्वस्य सामान्याभावानतिरिक्तत्वमते शक्योपपादनत्वात्। हेत्वधिकरणवृत्तित्वावच्छिन्ने यद्धर्मावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तवृत्तित्वविवक्षयाऽव्याप्तेरपि शक्यवारणत्वात्। वह्नित्वस्य वह्निघटोभयत्वावच्छिन्नाभावप्रतियोगितानतिरिक्तवृत्तित्वेऽपि तन्न्यूनवृत्तितया अन्यूनानतिरिक्तवृत्तित्वविवक्षया तादृशप्रतियोगितामादाय दूषणस्योद्धारः सम्भवतीति तार्णातार्णदहनोभयाभावप्रतियोगितानुसरणम्। 'अतिप्रसङ्गात्' धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रसङ्गात्।

(दी०) एतेनान्यूनवृत्तित्वविशेषितमपि परास्तम्। अत एव नानाप्रतियोगिवृत्त्येकप्रतियोगिताङ्गीकारेऽपि न निस्तारः। लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः, तादृशतदवच्छिन्नत्वाप्रसिद्धेरिति चेत्, न, प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात्।

(गा०) तार्णातार्णदहनोभयत्वावच्छिन्नाभावानुसरणप्रयोजनं स्वयमेव स्फुटयति एतेनेति। तार्णातार्णदहनोभयाभावप्रतियोगितामादायातिप्रसङ्गताद्वस्थ्येनेत्यर्थः। 'अन्यूनवृत्तित्वविशेषितमपि' अन्यूनवृत्तित्वविशेषितमनतिरिक्तवृत्तित्वमपि। 'अत एव' दर्शितोभयाभावमादाय वह्नित्वादावतिप्रसङ्गादेव। नानाप्रतियोगिवृत्त्येकप्रतियोगिताङ्गीकारेऽपीति। तथा सति यत्किञ्चिदेकाभावप्रतियोगितासामान्यपर्यन्ता निवेशेऽपि धूमत्वादेर्धूमादिसामान्याभावप्रतियोगितावच्छेदकत्वोपपादनसम्भवादिति भावः। उभयत्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगितायाः प्रत्येकमपि प्रतीतेर्व्यासज्यवृत्तितया स्वपर्याप्त्यधिकरणपर्याप्तत्वं प्रतियोगितायां निवेश्यापि वह्नित्वादावतिप्रसङ्गवारणासम्भव इति ध्येयम्।

प्रतियोगितावर्मिकोभयाभावघटितव्याप्तिपक्षे मेयधूमवान् वह्नेरित्याद्यावतिव्याप्तिर्न सम्भवति साध्यतावच्छेदकमेयधूमत्वादिरूपगुरुधर्मावच्छेद्यत्वस्य कुत्रापि प्रसिद्धविरहेण तद्घटितोभयाभावाप्रसिद्धेरिति तन्मते मेयवह्निमान् धूमादित्यादावव्याप्तिमाह लघुरूपेति। तादृशतदवच्छेद्यत्वाप्रसिद्धेरिति। तादृशसाध्यतावच्छेदकावच्छिन्नत्वस्याप्रसिद्धेरित्यर्थः। विषयितासम्बन्धस्य वृत्त्यनियामकत्वेनाभावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभावप्रतियोगितायां तत्प्रसिद्धिरित्यस्य वक्तुमशक्यत्वात्। अन्यथा मेयधूमवान् वह्नेरित्यादावतिव्याप्तेरेव तादवस्थ्यादिति भावः। प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्येति। तथा च धूमादिसामान्याभावप्रतियोगितायाः प्रतिधूमादिकं

भिन्नत्वेऽपि तत्प्रतियोगितावच्छेदकधूमत्वादेरैक्येन स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकतावत्त्वात्मकस्वव्यापकतत्कत्वरूपतदनतिरिक्तवृत्तित्वं धूमत्वादावक्षतमेवेति भावः ।

न च प्रतियोगितायाः प्रतियोगिस्वरूपतामते सामान्याभावप्रतियोगितायाः विशेषाभावप्रतियोगितातो न भेदः, प्रतियोगिनानाभेदात्, तथा च वह्निमान् धूमादित्यादावव्याप्तिर्दुर्वारा, धूमसमानाधिकरणविशेषाभावप्रतियोगिताकूटे वह्नित्वादेरवच्छेदकत्वात्तस्य च तदनतिरिक्तवृत्तित्वादिति वाच्यम्, सामान्याभावविशेषाभावयोः प्रतियोगित्वाभेदेऽपि सामान्याभावीयप्रतियोगितात्वेनैव सामान्यधर्मावच्छेद्यत्वाद्धेतुसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नावच्छेदकानतिरिक्तवृत्तित्वविवक्षणेनाऽव्याप्तिनिरासात् ।

'स्वव्यापकतत्कत्वम्' इत्यत्र स्वस्य व्याप्यता साध्यतावच्छेदकतावच्छेदकसम्बन्धेन, प्रतियोगितावच्छेदकस्य व्यापकता प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धेन च बोध्या, तेन सम्बन्धसामान्येन धूमत्वादिकं प्रति समवायादिना धूमत्वादेरव्यापकत्वेऽपि समवायादिना वह्नित्वादिकं प्रति कालिकादिसम्बन्धेन घटत्वादेर्व्यापकत्वेऽपि च न क्षतिः । दण्डिमान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकदण्डादौ दण्डान्तरसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेऽपि तत्तद्दण्डादौ तत्तद्दण्डादिसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वव्याप्ततया सर्वत्रैव दण्डादिव्यक्तौ प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमक्षतमेवेति नाव्याप्तिः । दण्डाद्यवच्छिन्नसाध्यकसद्धेतावपरीहारोत्याऽव्याप्तिरिति तु नाशङ्कनीयम् । दण्ड्यादौ साध्ये परम्परासम्बन्धेनाखण्डस्य दण्डत्वादेरेव साध्यतावच्छेदकतायाः स्वीकृतत्वात् ।

नन्वेवमपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्निघटोभयत्वानतिरिक्तवृत्तितया वह्नित्वादेरवच्छेदकत्वं दुर्वारमेव । न चोभयत्वादेरुभयादिपर्याप्ततया प्रत्येकं तदत्यन्ताभावस्तदवच्छिन्नभेदश्च वर्तते, अयमेको न द्वाविति सर्वजनसाधारणानुभवस्य दुरपह्नवत्वात् । तादृशप्रतीतेरेकत्वादौ द्वित्वाद्यवच्छेदकत्वाभावावगाहित्वोपगमे मूलावच्छिन्नो वृक्षो न कपिसंयोगी इत्यादिप्रतीतेरपि मूलादौ कपिसंयोगाद्यवच्छेदकत्वाभावावगाहित्वस्वीकारापत्तेः । यदि च तत्र बाधकाभावाद्वृक्षाद्यधिकरणककपिसंयोगाभावो विषयस्तदा प्रकृतेऽपि एकत्वाद्यवच्छिन्नाधिकरणकद्वित्वाभावादिविषयत्वं दुर्वारमेव । एकत्वावच्छिन्ने द्वित्वादिमत्त्वप्रत्ययानुदयेन बाधकस्य तुल्यत्वात् । प्रत्येकमुभयादौ द्वित्वाभावादिसत्त्वेऽपि द्वित्वाभावप्रतियोगितानवच्छेदकतया द्वौ न द्वाविति प्रतीतेर्दुरुपपादत्वात् । द्वित्वादिसामानाधिकरण्यमात्रेण तदभावप्रत्ययस्येष्टत्वात् । नञ्पदेनान्वयितावच्छेदकावच्छेदेनाभावबोधनाद्द्वित्वादिसामानाधिकरण्यमात्रावगाहिन्या प्रमाणप्रतीतेर्द्वौ न द्वावित्याकारकताविरहात् । तदाकारकप्रतीतेरेव चानुभवविरु-

द्वत्वात्। तथा च द्वित्वाद्यनतिरिक्तवृत्तिता कथं वह्नित्वादेरिति वाच्यम्, एवं सति वह्निघटोभयवान् धूमादित्यादौ साध्यतावच्छेदकद्वित्वादेरवच्छेदकतायाः दुरुपपादत्वात्। प्रतियोगितावच्छेदकरूपदेन तादृशद्वित्वादिकमुपादायैव तस्यावच्छेदकानतिरिक्तवृत्तित्वस्य सम्पाद्यत्वात्, तस्य चोक्तरीत्याऽसम्भवादिति स्वव्यापकतत्कत्वरूपतदनतिरिक्तवृत्तित्वघटकव्यापकतायाः प्रतियोगिताद्यधिकरणत्वस्य भेदे निवेशनीयतया उभयत्वादावपि वह्नित्वनिरूपितताद्दशव्यापकतायाः अक्षतत्वेन तदवच्छेदकताप्रसङ्गस्य दुर्वारत्वात्। न हि प्रत्येकवृत्तिरुभयत्वाद्यवच्छिन्नभेदप्रतियोगिताव्यधिकरणं। उभयत्वादव्यासज्यवृत्तित्वेऽपि तदवच्छिन्नप्रतियोगितायाः अव्यासज्यवृत्तितया प्रत्येकमुभयत्वाद्यनधिकरणरणतावत्तदवच्छिन्नभेदप्रतियोगितानधिकरणत्वस्याऽसम्भवादित्याशङ्क्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वघटकमवच्छेदकं स्वसमानवृत्तिकत्वेन विशेषयति स्वेति। तथा च वह्निघटोभयत्वादेर्वह्नित्वादिसमानवृत्तिकताविरहाद्द्वित्वादेस्तदनतिरिक्तवृत्तित्वेऽपि न पारिभाषिकावच्छेदकापत्तिरिति भावः।

(दी०) स्वसमानवृत्तिकश्चावच्छेदकं ग्राह्यम्। तत्त्वञ्च स्वपर्याप्त्यधिकरणपर्याप्तिवृत्तिकत्वम्। याबत्त्वादिकं तु न तथा। पर्याप्तिश्चायमेको घट इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष एव। त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतया नाव्याप्तिः। घटकश्चावच्छेदकत्वं स्वरूपसम्बन्धविशेषः। एवञ्च यद्धर्मावच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वक्तव्यम्, तेनोक्ताव्याप्तिनिरासः।

अत्र व्यापकताशरीरे स्वसमानाधिकरणत्वस्य स्वाधिकरणतावच्छेदकानवच्छिन्नाधिकरणताकत्वरूपस्याभावविशेषणत्वोपगमे तु द्वित्वाद्यधिकरणस्य प्रत्येकं द्वित्वाद्यवच्छिन्नभेदाद्यधिकरणत्वेऽपि द्वित्वादेर्द्वित्वादिव्यापकत्व भेदे प्रतियोगितावैयधिकरण्यमनिवेश्यैवोपपादयितुं शक्यमिति स्वसमानवृत्तिकत्वनिवेशनमयुक्तम्। न चाव्याप्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्याव्याप्यवृत्तितामते संयोगेन दण्डादेर्यत्र साध्यतावच्छेदकता तत्र व्यभिचारिणि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं दण्डादिकमादाय दण्डादिरूपसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्व व्यापकताशरीरे प्रतियोगितावैयधिकरण्याप्रवेशे न स्यादिति वाच्यम्, अव्याप्यवृत्तिदण्डादिकमादाय पारिभाषिकावच्छेदकत्वासम्भवेऽपि व्यभिचारनिरूपकाधिकरणयत्किञ्चिद्व्यक्त्यवृत्तित्वरूपहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य तथात्वोपपादनसम्भवात्। तद्वृत्तौ साध्ये तदवृत्तित्वावच्छिन्नभेदस्य कथमप्यसम्भवादिति तु चिन्तनीयम्।

ननु किमिदं समानवृत्तिकत्वम्? यद्यन्यूनानतिरिक्तवृत्तित्वं तदाऽन-तिरिक्तवृत्तित्वान्तनिवेशवैफल्यम्, स्यान्यूनवृत्ति यत्तदनतिरिक्तवृत्तित्वस्य स्वस्मिन्नियतत्वात्। तार्णतार्णदहनोभयत्वादिकमादाय दहनत्वादेरवच्छेदकत्वापत्तेश्च दुर्वारता। यदि चैकजातीयवृत्तिकत्वमेव तत्, तच्च स्वनिष्ठव्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपवत्त्वम्, द्वित्वादौ च वह्नित्वादेर्नैतादृशसमानवृत्तिकत्वं वह्नित्वादेरव्यासज्यवृत्तित्वादित्युच्यते तदाऽपि वह्निधूमोभयवान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्निधूमघटत्रित्वाद्यनतिरिक्तवृत्तितया साध्यतावच्छेदकस्य तथात्वापत्तेः। द्वित्वत्रित्वाद्योरुभयोरेव व्यासज्यवृत्तितया निरुक्तसमानवृत्तिकताया दुरपवादत्वादित्यत आह तादृशेति। स्वसमानवृत्तिकत्वश्चेत्यर्थः।

वह्निनिष्ठयावत्त्वतार्णातार्णोभयत्वादिकमादाय वह्नित्वादावतिप्रसङ्गाभावं स्फुटयति यावत्त्वादिकमिति। आदिना दर्शितद्वित्वादिपरिग्रहः। 'न तथा' न स्वपर्याप्त्यधिकरणपर्याप्तत्वरूपवह्नित्वादिनिरूपितसमानवृत्तिकत्ववत्। वह्नित्वादेः प्रत्येकवह्न्यादौ पर्याप्तत्वात्तस्य चाऽतथात्वादिति शेषः। तथा च यावत्त्वादेर्धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि वह्नित्वाद्यन्यूनानतिरिक्तवृत्तित्वेऽपि च न क्षतिरिति भावः।

ननु पर्याप्तिराश्रयत्वमेव वह्नित्वादिसमानाधिकरणयावत्त्वादेर्वह्नित्वादिपर्याप्त्यधिकरणपर्याप्तत्वमक्षतमेवेत्यत आह पर्याप्तश्चेति। अयमेको घट इत्यनेनाऽव्यासज्यवृत्तिघटत्वद्वित्वादीनां प्रत्येकमेव पर्याप्तिरिति दर्शितम्। इमौ द्वाविति प्रतीतिकथनेन व्यासज्यवृत्तिद्वित्वादीनां न प्रत्येकपर्याप्तिस्तथा सति अयमेको द्वावित्यादिप्रतीत्यापत्तेरिति दर्शितम्।

यद्यपि समुदायपर्याप्तत्वेऽपि तदेकदेशप्रत्येकपर्याप्तत्वमनपवादम्, समुदायस्यैकदेशानतिरिक्तत्वादिति यावत्त्वादेर्वह्नित्वादिपर्याप्त्यधिकरणप्रत्येकवह्निपर्याप्तत्वं दुर्वारम्। तथाऽपि स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिकत्वमत्र विवक्षितमिति न दोषः। व्यासज्याव्यासज्यवृत्त्योः समानजातीयवृत्तिकधर्मावच्छिन्नपर्याप्तयोरेकधर्मिणि पर्याप्तिसत्त्वेऽप्येकधर्मावच्छिन्नेऽपर्याप्तेः। अन्यथाऽयमेको वह्निरितिवदयमेको यावानिति प्रतीत्यापत्तेर्दुर्वारत्वात्।

अथ घटावित्यादौ यदि घटत्वादिसामानाधिकरण्यमात्रेण द्वित्वादिपर्याप्तिर्भासते तदा आकाशावित्याकारकप्रतीतेरपि प्रमात्वापत्तिः, आकाशत्वादिसामानाधिकरण्येनात्माकाशोभयत्वादेः पर्याप्तत्वादतस्तत्र धर्मितावच्छेदकघटत्वाद्यवच्छिन्नपर्याप्तेरेव विषयत्वमङ्गीकार्यम्। तथा चाव्यासज्यवृत्तेरपि द्वित्वावच्छेदकत्वमायातमिति व्यासज्यवृत्तेरव्यासज्यवृत्तिसमानवृत्तिकत्वं दुर्वारमेव, न चातिरिक्तवृत्तेरव्यासज्यवृत्तेरपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकत्वमास्तां तादृशधर्मस्य च नाव्यासज्यवृत्तिपर्याप्त्यवच्छे-

दकत्वं किं स्वैकैकमात्रवृत्तेरेवेति न व्यासज्यवृत्त्यव्यासज्यवृत्त्योरेकधर्मावच्छिन्नपर्याप्तत्वप्रसङ्ग इति वाच्यम्, घटो द्रव्यमित्यादिप्रतीत्या तथाविधघटत्वाद्यवच्छेदेन द्रव्यत्वादिपर्याप्त्यवगाहनादेकमात्रवृत्तेरेवाव्यासज्यवृत्तिपर्याप्त्यवच्छेदकत्वमित्युक्त्यसम्भवात्। तत्र घटत्वादिसामानाधिकरण्यमात्रेण द्रव्यत्वादिपर्याप्तिर्मासते न तु तदवच्छेदेनेत्युक्तावयमेको घट इत्यादावपि इदन्त्वादौ घटत्वादिपर्याप्त्यवच्छेदकताभाने विवादसम्भवेनाव्यासज्यवृत्तिधर्मपर्याप्तेरवच्छिन्नत्वस्यैवाप्रसिद्धिप्रसङ्गात्। धूमत्वादिपर्याप्त्यवच्छेदकाप्रसिद्ध्या तत्रावच्छेदकलक्षणाव्याप्तिप्रसङ्गात्। न च स्वपर्याप्त्यवच्छेदकताव्यापकपर्याप्त्यवच्छेदकताकत्वमेव विवक्षणीयम्, अव्यासज्यवृत्तिपर्याप्त्यवच्छेदकैकमात्रवृत्तिधर्मे व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताविरहान्न तस्या व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताव्यापकत्वमिति व्यासज्याव्यासज्यवृत्त्योर्न समानवृत्तिकताप्रसङ्ग इति वाच्यम्, एवं सति अनतिरिक्तवृत्तित्वनिवेशवैफल्यापत्तेः। न्यूनवृत्तिमहानसीयवह्नित्वादिपर्याप्त्यवच्छेदकताया वह्नित्वादिपर्याप्त्यवच्छेदकताव्यापकताविरहेणैव तादृशधर्ममुपादाय वह्नित्वादेरवच्छेदकतापत्त्यसम्भवादिति चेत्, न, अनेकवृत्तिघटत्वादेर्हि तत्तद्घटत्वादिरूपैकैकमात्रवृत्तिधर्मावच्छिन्नपर्याप्तिकूटस्य घटनिष्ठपर्याप्तित्वादिरूपानुगतधर्मावच्छिन्नस्यावच्छेदकत्वमेवोपेयते न तु घटत्वावच्छिन्ने द्रव्यत्वादेर्यावद्घटादिषु पर्याप्त्यन्तरम्, मानाभावात्। एवञ्चैकमात्रवृत्तिधर्मावच्छिन्नायाः पर्याप्तेरवच्छेदकत्वस्यैव विवक्षणीयतयाऽनुगतरूपावच्छिन्नपर्याप्तिकूटावच्छेदकानेकवृत्तिधर्मावच्छिन्नपर्याप्तिमादायव्यासज्यवृत्तेर्नाव्यासज्यवृत्तिसमानवृत्तिकतापत्तिरिति।

न च कालाकाशावित्यादिप्रतीत्या एकमात्रवृत्तिकालत्वादेरपि द्वित्वादिपर्याप्त्यवच्छेदकत्वावगाहनादेकमात्रवृत्तिधर्माणामपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकतया तस्याव्यासज्यवृत्तिधर्मसमानवृत्तिकत्वं दुर्वारमिति वाच्यम्, तादृशप्रतीत्या तथाविधधर्मद्वयादौ व्यासज्यवृत्तेरेव द्वित्वादिपर्याप्त्यवच्छेदकताया अवगाहनात्। प्रकृते चाव्यासज्यवृत्त्यवच्छेदकताया एव निवेशेनातिप्रसङ्गविरहात्।

अत्राहुरव्यासज्यवृत्तिघटत्वादीनां पर्याप्त्याख्यसम्बन्धान्तरे मानाभावः समवायादिसम्बन्धेनैवोपपत्तेः। न च समवायस्यैक्येन पटादावपि घटत्वादिविशिष्टबुद्धिप्रसङ्ग इति प्रतिनियतप्रतियोगिकपर्याप्तिसम्बन्धस्वीकार इति वाच्यम्, प्रतिनियतप्रतियोगिकैकविधसम्बन्धेनैवोपपत्तेर्द्विविधसम्बन्धसिद्धेः कथमप्यसम्भवात्। एवं द्वित्वादेरपि पर्याप्तिसमवायादिरूपसम्बन्धद्वयकल्पनमयुक्तम्, अनेकवृत्तिधर्मावच्छिन्नैकविधसम्बन्धेनैव निर्वाहात्।

न चायमेको द्वित्वसम्बन्धीति प्रतीतेरेकमात्रवृत्तिधर्मावच्छेदेनाऽपि

अथात्र दण्डादिनानाव्यक्तिसाध्यतावच्छेदकके व्यभिचारिविशेषेऽतिव्याप्तिः, निखिलानामेव दण्डादिव्यक्तीनां दण्डादिरूपसाध्यतावच्छेदकसमानाधिकरणभेदप्रतियोगितावच्छेदकतया हेतुसमानाधिकरणदण्डाद्यवच्छिन्नाभावप्रतियोगितायां तादृशभेदप्रतियोगितावच्छेदकावच्छिन्नत्वाभावसत्त्वात् । तादृशभेदप्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपं तद्रूपविशिष्टावच्छेद्यत्वाभावनिवेशे दण्ड्यादिमन्निष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकदण्डत्वादिविशिष्टावच्छेद्यत्वस्य दण्ड्यादिसामान्याभावप्रतियोगितायां सत्त्वेन तत्रातिव्याप्तिपरिहारेऽपि धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमाद्यभावप्रतियोगितायां लाघवेन स्वरूपत एव धूमत्वादेरवच्छेदकतया विशेषणान्तरविशिष्टधूमत्वाद्यवच्छेद्यत्वाभावसत्त्वात् । न च विशेषणान्तरविशिष्टधूमत्वाद्यवच्छेद्यत्वाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यम्; घटावृत्तिजातिमत्सामान्याभावप्रतियोगितायामेव तत्प्रसिद्धेरिति चेन्न; दण्डाद्यात्मकसाध्यतावच्छेदकस्य साध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वासम्भवेऽपि व्यभिचारनिरूपकाधिकरणं यत्तद्वृत्त्यन्यत्वस्याऽन्नण्डस्य तथात्वात्तदवच्छेद्यत्वाभावस्यापि हेतुसमानाधिकरणाभावप्रतियोगितासामान्येऽसत्त्वेन दण्ड्यादिसाध्यकेऽनतिप्रसङ्गात् ।

अथ वा साध्यतावच्छेदकवन्निष्ठभेदप्रतियोगितायां यादृशरूपावच्छिन्नत्वं नास्ति तादृशरूपावच्छिन्नत्वाभावस्य विवक्षणीयत्वाद् दण्डादिसाध्यतावच्छेदके व्यभिचारिणि दण्ड्यादिनिष्ठभेदप्रतियोगितायां तत्तद्विशिष्टदण्डाद्यवच्छिन्नायां दण्डत्वादिविशिष्टावच्छेद्यत्वाभावसत्त्वाद्दण्ड्यादिसामान्याभावप्रतियोगितायाञ्च तादृशाभावासत्त्वेनातिव्याप्त्यनवकाशात् । अवच्छेदकतयोरेकसम्बन्धावच्छिन्नत्वं निवेश्य सम्बन्धभेदनिबन्धनो दोषो निरस्यः ।

सत्तावान् जातेरित्यादौ सत्तात्वादेर्हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितयाऽव्याप्तिरिति प्रतियोगितावच्छेदकाव्यभिचारित्वरूपस्य स्वव्यापकतत्कत्वरूपस्य च तदनतिरिक्तवृत्तित्वस्य निवेशो न सम्भवतीति यद्धर्मविशिष्टस्य प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाव्यभिचारिता, प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नस्य वा यद्रूपवि-

शिष्टव्यापकता तत्स्वरूपं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव निवेशनीयम्, तावतैव च वह्निघटोभयत्वादिरूपप्रतियोगितावच्छेदकमादाय वह्नित्वादे पारिभाषिकावच्छेदकत्वनिरास सम्भवति, वह्नित्वादिविशिष्टस्य तादृशोभयत्वाद्यवच्छिन्नव्यभिचारित्वात्, तादृशोभयत्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकत्वाच्चेति प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्वविशेषणनिवेशं विनैव निर्वाहः, एवं यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नत्वाभावस्य प्रतियोगिताधर्मिकस्य व्याप्तिघटकतापक्षेऽपि तदन्यूनवृत्तित्वं यदि तद्व्यापकत्वं तदा सत्तात्वव्यापकविशिष्टसत्तात्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वादुक्तस्थल एवाऽव्याप्तिरिति तद्विशिष्टव्यापकतावच्छेदकत्वरूपं तदन्यूनवृत्तित्वमेव निवेश्यम्, तावतैव वह्निघटोभयत्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकतया धूमादिसमानाधिकरणाभावप्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेऽप्यव्याप्त्यनवकाशात्। यद्धर्मान्यूनवृत्तिधर्मे यद्धर्मसमानवृत्तिकत्वविशेषणप्रक्षेपमन्तरेणैव सामञ्जस्यमित्याशयेनाह— वस्तुतस्त्वित्यादि।

(दी०) वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसम्बद्धत्वविशिष्टसामान्यकत्वम्, स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यम्।

(गा०) तदवच्छिन्नेति। तत्पदमनतिरिक्तवृत्तित्वप्रतियोगिभूतहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणपरम्। स्वपदमनतिरिक्तवृत्तित्वेनाभिमतपरम्। धूमत्वाद्यवच्छिन्नाभाववति मेयधूमत्वादिविशिष्टस्यासम्बद्धतया मेयधूमत्वादेरवच्छेदकतानिर्वाह। धूमत्वाद्याश्रयमहानसीयधूमाद्यभाववति धूमत्वादिविशिष्टस्य सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या तद्धूमत्वादिरूपावच्छेदकभेदमादायातिव्याप्तिरिति तदाश्रयप्रतियोगिकत्वं परित्यज्य तदवच्छिन्नप्रतियोगिताकत्वमभावविशेषणमुपात्तम्। हेतुसमानाधिकरणाभावप्रतियोगितायां यस्य येन सम्बन्धेनावच्छेदकता तेन सम्बन्धेन तदवच्छिन्नत्वं निवेशनीयम्, तेन विषयितया धूमत्वाद्यवच्छिन्नस्य ज्ञानादेर

भाववति धूमत्वादिविशिष्टधूमादेः सम्बद्धत्वेऽपि न धूमत्वादेरव-च्छेदकत्वानुपपत्तिः। उत्पत्तिकालावच्छेदेन धूमत्वाद्यवच्छिन्नाभा-ववति धूमत्वादिविशिष्टस्य संयोगरूपसाध्यतावच्छेदकसम्बन्धेन स-म्बद्धतया तादृशं स्वं गुणत्वादिकमेवेति संयोगेन धूमादिसाध्यके व्यभिचारिण्यतिप्रसङ्गस्य वारणाय प्रतियोगिवैयधिकरण्यमभावे वि-शेषणं देयम्। धूमाद्यभावस्यापि ह्रदादौ प्रतियोगिव्यधिकरणतया त-दभाववारणासम्भवात्। साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिम-द्वृत्तियों यस्तद्भिन्नत्वनिवेशे संयोगेनावृत्तेर्गुणादेरेवाभावस्य प्रसि-द्धया तद्वति धूमत्वादिविशिष्टस्य संयोगेन सम्बद्धतया धूमत्वादेरव-च्छेदकत्वानुपपत्त्या पूर्ववद् गुणत्वादेरेवावच्छेदकत्वादतिव्याप्तिता-दवस्थ्यम्। स्वपदेनानुयोगिभूताभावोपादाने संयोगेन साध्यतायां प्रदेत्ता तादृशसम्बन्धेन गुणाभावप्रतियोगिनोऽधिकरणाप्रसिद्धया तादृशाभावाप्रसिद्धेरव्याप्तिरतः प्रतियोगिवैयधिकरण्यविशिष्टाभा-वाधिकरणासम्बद्धत्वं विवक्षणीयम्। द्रव्यं गुणादित्यादौ हेतु-समानाधिकरणाभावप्रतियोगितावच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्व-त्वाद्यवच्छिन्नाभावप्रतियोग्यनधिकरणगुणादौ द्रव्यत्वत्वादिवि-शिष्टस्यासम्बद्धतया द्रव्यत्वत्वादेरवच्छेदकत्वापत्तिरिति प्रतियो-गितावच्छेदकावच्छिन्नवैयधिकरण्यमेव प्रवेश्यम्। तद्धर्मस्य तद्धर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेनोपादानं शिरोवेष्टनेन नासिकास्पर्शमनुकरोतीति तद्धर्मावच्छिन्नवैयधिकरण्यविशिष्टत्व-मेव निवेशनीयम्। तद्धर्मावच्छिन्नानधिकरणासम्बद्धत्वविशिष्ट-सामान्यकत्वं तु फलितार्थः। तद्धर्मावच्छिन्नानधिकरणत्वं सा-ध्यतावच्छेदकसम्बन्धेन तदसम्बन्धित्वम्। तेन गुणवान् द्रव्य-त्वादित्यादौ हेतुसमानाधिकरणसमवायसम्बन्धावच्छिन्नाभावप्रति-योगितावच्छेदकगुणादिविषयकज्ञानत्वाद्यवच्छिन्नस्य विषयतया द्र-व्यादिसम्बद्धस्य सम्बन्धसामान्येनानधिकरणे नित्यगुणादौ गुण-त्वादिविशिष्टस्यासमवेतत्वेऽपि न गुणत्वादेरवच्छेदकताप्रसङ्गः। एवं च महाकालो घटवान् कालपरिमाणादित्यादौ उभयाभावघटि-तप्रतियोगिवैयधिकरण्यशालिहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकगग-नत्वादिविशिष्टस्य साध्यतावच्छेदकसम्बन्धेन सम्बन्धिनोऽप्रसि-द्धयाऽव्याप्तेर्वारणाय साध्यतावच्छेदकसम्बन्धसामान्ये तदवच्छि-

ष्ठप्रतियोगिकत्ववत्तदधिकरणानुयोगिकत्वोभयाभावस्तत्तदधिकरणासम्बद्धस्वविशिष्टसामान्यकत्वं विवक्षणीयम् । ईदृशं च स्वं तत्र गगनत्वादिकमेव प्रसिद्धमिति नाव्याप्तिः । तदसम्बद्धत्वं च तदनुयोगिकसाध्यतावच्छेदकसम्बन्धाप्रतियोगित्वं तेन संयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नाभाववति ज्ञाने कपालादौ विषयित्वसमवायादिना घटत्वादिविशिष्टस्य सम्बद्धत्वेऽपि वह्निमान् धूमादित्यादौ नावच्छेदकाप्रसिद्धिः । तादात्म्येन साध्यतायां साध्यतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिः स्यादित्यवृत्तित्वमुपेक्ष्यासम्बद्धत्वानुधावनम् । विशिष्टसत्तावान् जातेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाभाववति गुणादौ विशिष्टसत्तात्वाद्याश्रयसत्तादेः सम्बद्धतया विशिष्टसत्तात्वादेरवच्छेदकत्वानुपपत्तिरिति स्वाश्रयेऽसम्बद्धत्वमनिवेश्य स्वविशिष्टे सन्निवेशनम् ।

यद्यपि विशेष्यस्य तत्सम्बन्धित्वे विशिष्टे तदसम्बन्धित्वं दुर्घटम्, तथापि स्वविशिष्टप्रतियोगिकत्वाभाववत्तदवच्छिन्नाभाववदनुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्यकत्वस्य तदवच्छिन्नाभाववदनुयोगिकसाध्यतावच्छेदकसम्बन्धप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणापर्याप्तविषयतापर्याप्त्यधिकरणत्वस्य वा विवक्षणीयतया न दोषः । स्वविशिष्टप्रतियोगिकत्वानि च विशिष्योपादाय तदभावकूटमेव निवेशनीयम् । तेन मेयधूमत्वादिविशिष्टप्रतियोगिकत्वत्वावच्छिन्नाभावस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतामतेऽप्रसिद्धावपि न क्षतिः ।

वस्तुतो मेयधूमत्वादिविशिष्टप्रतियोगिकत्वाभावस्य शुद्धधूमत्वादिप्रकारकज्ञाननिष्ठविषयितासम्बन्धसाधारणत्वाद् धूमत्वादिविशिष्टप्रतियोगिकत्वत्वस्य लघुधर्मस्य न तत्प्रतियोगितावच्छेदकत्वसम्भव इति न मेयधूमत्वादिविशिष्टप्रतियोगिकत्वत्वावच्छिन्नाभावाप्रसिद्धिरिति सामान्यत एकाभावनिवेशोऽपि सम्भवतीति ध्येयम् ।

येन रूपेण यस्य यद्धर्मिसम्बन्धिता तदन्यरूपावच्छिन्ने तत्र तत्सम्बद्धत्वाभावसत्त्वमभ्युपेत्य वा एतल्लक्षणम् । द्वितीयलक्षणं च तदनभ्युपगमेन । धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नाद्यभाववति वह्नित्वादिवि-

शिष्टमहानसीयवह्न्यादेरसम्बद्धतया वह्नित्वादावतिप्रसङ्गवारणाय सामान्यपदम्।

अथ साध्यतावच्छेदकसंयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नाभाववति कालिकादिसम्बन्धेन घटत्वादिविशिष्टस्य पटादेः संयोगादिसम्बन्धेन सम्बद्धत्वादवच्छेदकाप्रसिद्धिः। साध्यतावच्छेदकताघटकसम्बन्धेन स्वविशिष्टत्वनिवेशेऽपि कालिकसम्बन्धेन घटत्वादिविशिष्टस्य कालिकसम्बन्धेन साध्यतायां महाकालपरिमाणादिहेतुकेऽवच्छेदकाप्रसिद्धिर्दुर्वारैव गगनत्वाद्यवच्छिन्नाभाववति काले कालिकसम्बन्धेन गगनत्वादिविशिष्टस्य स्पन्दादेः कालिकसम्बन्धेन सम्बद्धत्वात्। प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धेन वैशिष्ट्यनिवेशे घटत्वादिसमनियतासमवेतगुरुधर्मस्य यत्र साध्यतावच्छेदकता तत्र तादृशधर्मस्य घटत्वादिकमादायावच्छेदकत्वानुपपत्तिः। घटत्वादेः समवायेन घटाद्यभावप्रतियोगितावच्छेदकत्वात्तत्सम्बन्धेन च तद्धर्मविशिष्टाप्रसिद्धेरिति चेन्न। यत्किञ्चित्सम्बन्धेन स्वविशिष्टसामान्येऽसम्बद्धत्वनिवेशनेन सामञ्जस्यात्।

न चैवं वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नाभाववति विषयितासम्बन्धेन वह्नित्वविशिष्टस्य साध्यतावच्छेदकसंयोगेनाऽसम्बद्धत्वाद्वह्नित्वादेर्गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसविषयकत्वाद्यवच्छिन्नाभाववति घटादौ विषयितया गुणत्वादिविशिष्टस्याऽसमवेतत्वात् गुणत्वादेरवच्छेदकत्वापत्त्याऽव्याप्तिरिति वाच्यम्। साध्यतावच्छेदके तादृशपारिभाषिकावच्छेदकताशून्यत्वमनिवेश्य साध्यतावच्छेदकताघटकसम्बन्धेन साध्यतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वांशे साध्यसामानाधिकरण्यघटके पारिभाषिकावच्छेदकताघटकसम्बन्धेन तादृशावच्छेदकावच्छिन्नानिरूपितत्वस्य निवेशनीयतया विषयितया वह्नित्वादेरवच्छेदकत्वेऽपि समवायरूपसाध्यतावच्छेदकताघटकसम्बन्धेन वह्नित्वाद्यवच्छिन्ननिरूपितायामधिकरणतायां विषयितासम्बन्धेन वह्नित्वाद्यवच्छिन्ननिरूपितत्वाभावसत्त्वेन लक्षणसमन्वयात्। गुरुधर्मस्यापि प्रतीतिबलेनाधिकरणतानिरूपकतावच्छेदकत्वोपगमान्न गुरुधर्मावच्छिन्नसाध्यकस्थले साध्यतावच्छेदकावच्छिन्नाधिकरणत्वाप्रसिद्धिः।

अथ यावच्छेदकताघटकसम्बन्धेनावच्छेदकविशिष्टवृत्तिविषयिताकत्वं साध्यतावच्छेदकतावच्छेदकसम्बन्धेन साध्यतावच्छेदकविशिष्टविशेषणमङ्गीकार्यम् । समवायसम्बन्धेन वह्नित्वादिविशिष्टस्य या विषयता तस्याः सम्बन्धान्तरेण वह्नित्वादिविशिष्टनिष्ठविषयतान्यतया नाप्यास्त्यवकाशः । स्वरूपसम्बन्धरूपावच्छेदकताप्रवेशमतेऽपीदृशी रीतिरेवादरणीया, अन्यथा वह्नित्वादिधर्मिकानवच्छेदकत्वादिग्रहस्य वह्नित्वाद्यवच्छिन्नविधेयकानुमितिहेतुत्वे धर्मितावच्छेदकतया वह्नित्वत्वादिविषयताया हेतुतावच्छेदककोटौ निवेशाद् गौरवस्य वह्नित्वत्वाद्यनुपस्थितिदशायां वह्निमानित्याद्याकारकानुमित्यनुपपत्तेश्च दुर्वारत्वात् ।

अत्र च यत्किञ्चिद्धेत्वधिकरणासम्बद्धस्वविशिष्टसामान्यकत्वस्य लघोरवच्छेदकान्तार्थत्वसम्भवे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वस्य गुरुतरस्य निवेशनं मूलोपात्तप्रतियोगितान्तस्य यथाश्रुतार्थकत्वानुरोधेन । अन्यथाऽवच्छेदकान्तस-मुदायस्य पारिभाषिकैकपदतापत्तेः । यथा निरुक्तावच्छेदकनानिवेशेऽवच्छेदकपदस्यैवावच्छेदकावच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वे पारिभाषिकत्वं तद्वत् ।

अत्र च जातिमान् मेयत्वादित्यादौ जातित्वादेरवच्छेदकत्वानुपपत्तिः, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतयद्धर्मावच्छिन्नाभाववति साध्यतावच्छेदकसमवायसम्बन्धेन सम्बद्धत्वप्रसिद्धिस्तद्धर्मावच्छिन्नाभाववति जातित्वादिविशिष्टस्याऽपि समवेतत्वात् । जातित्वाद्यवच्छिन्नाभाववति च समवेतत्वस्यैवाप्रसिद्ध्या तदभाववदसमवेतत्वस्य जातित्वादिविशिष्टादौ दुर्निरूपत्वात् । एवं यथाश्रुते विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वादेरप्यवच्छेदकत्वानुपपत्तिरतोऽन्यथानतिरिक्तवृत्तित्वं निर्वक्ति । स्वविशिष्टेति । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकशुद्धधूमत्वादेर्मेयधूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतया मेयधूमत्वादेरवच्छेदकत्वोपपत्तिः । जातिमान् मेयत्वादित्यादौ मेयत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकजातित्वादेर्जातित्वविशिष्टसमवायिनिष्ठाभावप्रतियोगितानवच्छेदकतया तस्य तयात्वोपपत्तिः । विशिष्ट-

सत्तावान् जातेरित्यादौ द्रव्यत्वत्वविशिष्टसत्तात्वादेर्विशिष्टसत्तात्वाश्रयसम्बन्धिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि विशिष्टसत्तात्वादिविशिष्टसम्बन्धिद्रव्यादिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाद्विशिष्टसत्तात्वादेरवच्छेदकतानिर्वाहः। सम्बन्धित्वं साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन घटत्वादेर्विषयितादिसम्बन्धेन घटत्वादिविशिष्टसम्बन्धिज्ञानादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि नावच्छेदकामसिद्धिः।

अथैवं महाकालो घटवान् कालपरिमाणादित्यादावयवच्छेदकाप्रसिद्धिः। साध्यतावच्छेदकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनोऽप्रसिद्धया स्वपदेन गगनत्वाद्युपादानासम्भवात्।

न च सम्बन्धसामान्येन स्वविशिष्टसम्बन्धिनिष्ठः सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावो निवेश्यः। विषयितया गगनत्वादिविशिष्टसम्बन्धिनि तद्विषयकज्ञानादौ सम्बन्धसामान्येन प्रतियोगिव्यधिकरणस्य तादृशज्ञानासमानकालिकतत्तद्घटाभावादेः प्रतियोगितायां गगनत्वादेरनवच्छेदकत्वादुक्तस्थले गगनत्वादिकमवच्छेदकं प्रसिद्ध्यति, तादृशज्ञानादौ कालिकसम्बन्धेन गगनादेरभावसत्त्वेऽपि तस्य विषयितासम्बन्धेनैव प्रतियोगिसमानाधिकरणतया सम्बन्धसामान्येन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम्। वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकज्ञानत्वादेर्वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकतया वह्नित्वादेरवच्छेदकत्वापातात्। ज्ञानत्वाद्यवच्छिन्नाभावस्य विषयतासम्बन्धेन प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वात्।

न च तादात्म्यसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठभेदप्रतियोगितानवच्छेदकत्वं विवक्षणीयम्, कालो घटवान् कालपरिमाणादित्यादौ गगनत्वादिविशिष्टाभिन्ननिष्ठभेदप्रतियोगितानवच्छेदकत्वाद् गगनत्वादिकमवच्छेदकमिति वाच्यम्। सत्तावान् जातेरित्यादौ तादात्म्येन सत्तात्वादिविशिष्टसम्बन्धिनि सत्तादौ यो भेदस्तत्प्रतियोगितानवच्छेदकत्वस्य विशिष्टसत्तात्वादौ सत्त्वेन सत्तात्वादेरवच्छेदकत्वापातात्। तादात्म्यसाध्यतावच्छेदकान्यतरसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य निवेशेऽपि घटत्वाभाव-

वान् घटान्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वाभाववान्यवृत्तित्वविशिष्टघटत्वाभावत्वादेरन्यतरसम्बन्धेन घटत्वाभावत्वादेरन्यतरसम्बन्धेन घटत्वाभावत्वादिविशिष्टसम्बन्धिनिष्ठत्वान्यतरसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वादव्याप्त्यापत्तेः । घटत्वाभावत्वादिविशिष्टसम्बन्धिनि पटादौ घटत्वाभाववान्यवृत्तित्वविशिष्टघटत्वाभावत्वाद्यवच्छिन्नस्य साध्यतावच्छेदकसम्बन्धेन सत्त्वात्, घटत्वाभावे च तदवच्छिन्नस्य तादात्म्यसम्बन्धेन सत्त्वात्तद्विशिष्टतदभावस्याऽन्यतरसम्बन्धेन प्रतियोगिसमानाधिकरणत्वात् ।

एतेन यत्किञ्चित्सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठो यस्तेन सम्बन्धेन प्रतियोगिव्यधिकरणोऽभावस्तत्प्रतियोगितानवच्छेदकत्वविवक्षाऽपि निरस्ता । तादात्म्येन सत्तात्वाद्यवच्छिन्नं प्रति तत्सम्बन्धेन विशिष्टसत्तात्वाद्यवच्छिन्नस्य व्यापकतयोक्तस्थले सत्तात्वादेरवच्छेदकताया दुर्वारत्वात् । कालिकसम्बन्धेन वह्नित्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वाद्यवच्छिन्नस्य व्यापकतया वह्निमान् धूमादित्यादौ वह्नित्वादेरवच्छेदकत्वाभावाच्च ।

न च येन येन सम्बन्धेन यो यः स्वविशिष्टसम्बन्धी तेन तेन सम्बन्धेन प्रतियोगिव्यधिकरणो यस्तद्विशिष्टोऽभावस्तत्प्रतियोगितानवच्छेदकत्वं विवक्षणीयम्, संयोगसमवायादिना वह्नित्वसत्तात्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वविशिष्टसत्तात्वाद्यवच्छिन्नस्याव्यापकतया च नोक्तदोषावकाश इति वाच्यम् । एवं सति विषयितासम्बन्धेन कम्बुग्रीवादिमत्त्वादिविशिष्टसम्बन्धिनि तेन रूपेण घटादिविषयिणि घटत्वाद्यप्रकारकज्ञानादौ विषयितया घटत्वादिविशिष्टस्यासत्त्वेन घटत्वादेस्तेन सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावप्रतियोगितावच्छेदकतया घटत्वादिकमादाय कम्बुग्रीवादिमत्त्वादेरवच्छेदकत्वनिर्वाहासम्भवात् ।

न च हेतुसमानाधिकरणाभावीयसम्बन्धावच्छिन्नयत्किञ्चित्प्रतियोगितायां यदवच्छेदकं तेन सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वं तस्य वाच्यम्, घटवान् कालपरिमाणादित्यादौ तादृशत्वं वि

* २९२ पृष्ठात् परं ४०१ पृष्ठतो ग्रन्थारम्भो बोध्यः । मूलग्रन्थोऽत्र न खण्डितः ।

घयितां च तादृशसम्बन्धमादाय गगनत्वादेरवच्छेदकत्वं सङ्गमनीयम् । विशिष्टसत्तात्वादेर्गुणादिनिष्ठभेदप्रतियोगितायां गौरवेण नावच्छेदकत्वमपि तु शुद्धसत्तात्वादेरेवेति हेतुसमानाधिकरणतादृशभेदस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणत्वेन तदुपादानासम्भवात् । सत्तावान् जातेरित्यादौ यत्सम्बन्धेत्यनेन तादात्म्यसम्बन्धमुपादाय सत्तात्वादेर्नावच्छेदकताप्रसङ्गः । वह्निमान् धूमादित्यादौ संयोगरूपसाध्यतावच्छेदकसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यशालिन उत्पत्तिकालावच्छेदेन धूमाधिकरणवृत्तेः समवायसम्बन्धावच्छिन्नाभावस्य प्रतियोगितावच्छेदकं रूपत्वादिकं वह्नित्वादिविशिष्टसमवायिनिष्ठस्य समवायेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकमतो वह्नित्वादेरवच्छेदकत्वापत्तिरिति प्रतियोगितावच्छेदकसम्बन्धं परित्यज्य साध्यतावच्छेदकसम्बन्धः प्रतियोगिवैयधिकरण्यशरीरे निवेशितः । तथा च सति संयोगसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यशालिनो रूपत्वाद्यवच्छिन्नाभावस्य वह्नित्वादिविशिष्टसम्बन्धिनि सत्त्वान्नायं दोष इति वाच्यम् । वह्निद्व्यणुकत्वादेर्यत्र संयोगेन साध्यतायामवच्छेदकता तत्र तदवच्छिन्नसमवायितेजःपरमाणौ समवायसम्बन्धावच्छिन्नरूपत्वाद्यवच्छिन्नाभावासत्त्वेन तत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वस्य कालविशेषावच्छेदेन हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकरूपत्वादौ सत्त्वेन साध्यतावच्छेदकस्यावच्छेदकताप्रसङ्गात् ।

यत्तु स्वविशिष्टप्रतियोगिकत्वतदवच्छिन्नाभाववदनुयोगिकत्वोभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वस्य विवक्षणीयतया न कश्चिद्दोषः । जातिमान् मेयत्वादित्यादौ जातित्वावच्छिन्नाभाववत्समवेतत्वाप्रसिद्धावपि जातित्वादिविशिष्टप्रतियोगिकत्वतादृशाभाववदनुयोगिकत्वोभयाभावस्य समवायसामान्ये सत्त्वेन जातित्वादेरवच्छेदकत्वोपपत्तेः । कालो घटवान् कालपरिमाणादित्यादौ कालिकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्ध्यप्रसिद्धावपि तादृशसम्बन्धसामान्ये गगनत्वादिविशिष्टप्रतियोगिकत्वतदवच्छिन्नाभाववदनुयोगिकत्वोभयाभावसत्त्वेन गगनत्वादेरवच्छे-

दकतानिर्वाहादिति तन्न। तावता प्रथमलक्षणस्यैव परिष्कारेण द्वितीयलक्षणानुसरणानुपपत्तेः।

अत्र वदन्ति साध्यतावच्छेदकसम्बन्धेन यदवच्छेदकविशिष्ट सम्बन्धिन प्रसिद्धिर्यत्र तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्ट-सामान्यकत्वमेव तत्र तदवच्छेदकत्वम्, तेन घटवान् कालपरिमाणा दित्यादौ गगनत्वादावच्छेदकत्वमसिद्धि', यदवच्छेदकविशिष्टे तदवच्छिन्नाभाववति साध्यतावच्छेदकसम्बन्धेन सम्बद्धत्वाप्र सिद्धा तदभावो दुर्निरूप. तथावच्छेदकत्वं स्वविशिष्टेत्यादिरूपम्, तेन जातिमान् मेयत्वादित्यादौ जातित्वादेरवच्छेदकत्वोपपत्ति.। सर्वसाधारणस्यैकविधावच्छेदकत्वस्य दुर्वचत्वेऽपि न क्षतिर्वा-कारो व्यवस्थितविकल्पार्थक इति।

अत्रेदं चिन्त्यते। ईदृशावच्छेदकत्वयोरभावद्वयाविषयकज्ञानमनु-मितिहेतु', प्रत्येकाभावस्य वा वैकल्पिकी कारणता ? आद्ये, कालो घटवान् कालपरिमाणादित्यादौ भ्रमं विनानुमित्यनुपपत्ति, द्वि-तीयस्यावच्छेदकत्वस्याऽसिद्धे.। द्वितीये, जातिमान् मेयत्वादि-त्यादौ प्रथमनिरुक्तावच्छेदकत्वाभावस्य जातित्वेऽबाधितत्वात्तज्ज्ञा-नाक्रम विनैवानुमित्यापत्तिः।

न च साध्यसाधनभेदेन कार्यकारणभावभेदस्याऽऽवश्यकत्वात् कालिकसम्बन्धेन घटादिसाध्यककालपरिमाणादिहेतुकानुमितौ प्रथमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव, मेयत्वादिलिङ्गकजात्याद्यनु-मितौ च चरमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव हेतुतास्वीकारान्नो-क्तदूषणद्वयावकाश इति वाच्यम्। साध्यसाधनभेदेनानुमितिव्याप्ति-ज्ञानयोः कार्यकारणभावभेदेऽपि एकसाध्यसाधनस्थले यादृशज्ञाना दनुमितिस्तादृशज्ञानसत्त्वेऽन्यत्रानुमित्यनुत्पादस्यानुभवविरुद्धतया प्रथमनिरुक्तावच्छेदकत्वाभावज्ञानात्कालो घटवान् कालपरिमाणादि त्यत्राऽनुमितिस्वीकारे तादृशज्ञानान्मेयत्वादिलिङ्गकजात्याद्यनुमि-तेरवश्यस्वीकरणीयतापातात्। अन्यथा सद्धेतुकानुमितावतिव्या-प्तिवारणायोपात्तप्रतियोगितावच्छेदकावच्छिन्नत्वाद्यविषयकतज्ज्ञान-स्यैव लाघवेन हेतुत्वापत्तिः। मेयत्वादिलिङ्गकजात्याद्यनुमितौ चरमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव हेतुत्वे समवेतमात्रमेव स फलहेतुमति समवेतमिति भ्रमदशायामनुमित्युपपादनासम्भवाच्च।

तदानीं समवेतवृत्तितया गृहीतघटत्वादिविशिष्टव्यापकतावच्छेदके हेतुव्यापकतावच्छेदकत्वग्रहादसमवेतवृत्तितया गृहीतगगनत्वादिविशिष्टस्य च समवायेन सम्बन्धिताया दुर्ग्रहत्वात् स्वविशिष्टेत्यादिरूपावच्छेदकत्वस्य क्वचिदपि गृहीतुमशक्यत्वात् । वृत्तिमन्मात्रमेव महाकाले कालिकसम्बन्धेन वर्तते इति निश्चयदशायां महाकालत्वादिहेतुकघटाद्यनुमितेरिव तदानीं मेयत्वादिलिङ्गकजात्याद्यनुमितेर्दुरपह्नवत्वादिति ।

इदं तु तत्त्वम् । यद्रूपावच्छिन्नस्य येन सम्बन्धेन सम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं तेन सम्बन्धेन तद्रूपावच्छिन्नविशिष्टावृत्तिविषयतावान् यः साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नविशिष्टस्तद्वृत्तित्वं व्याप्तिः । धूमवान् वह्नेरित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं धूमत्वादिकं संयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नसम्बन्धिनिष्ठस्य तत्सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं साध्यतावच्छेदकीभूततादृशसम्बन्धेन धूमत्वाद्यवच्छिन्नविशिष्टनिष्ठविषयता च न तेन सम्बन्धेन धूमत्वाद्यात्मकतद्रूपावच्छिन्नविशिष्टावृत्तिरिति नातिप्रसङ्गः । महाकालो घटवान् कालपरिमाणादित्यादौ साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकं गगनत्वादिकमेव तादात्म्यादिना तद्विशिष्टसम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं तेन सम्बन्धेन तदवच्छिन्नविशिष्टावृत्तित्वं च कालिकसम्बन्धेन घटत्वाद्यवच्छिन्नविशिष्टनिष्ठविषयताया इति लक्षणसमन्वयः । धूमादिसमानाधिकरणस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितावच्छेदकं ज्ञानत्वादिकं वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं ज्ञानाद्यभावस्य विषयतासम्बन्धेन प्रतियोगिसमानाधिकरणत्वादिति वह्नित्वादेरवच्छेदकत्वप्रसङ्ग इत्यतस्तेन सम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशनम् । संयोगादिना वह्न्यादिमन्निष्ठो ज्ञानाद्यभा-

षष्ठ सयोगादिसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्याश्रय इति न दोष । साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशे काल सर्ववान् मयत्वादित्यादौ सर्वत्वस्यावच्छेदकत्वोपपत्तये उभयाभावघटितस्यैव प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया तादात्म्यादिना गगनादिसम्बन्धिगगनादिनिष्ठगगनाद्यभावस्य कालिकसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यशालितया कालो घटवान् महाकालत्वादित्यादाववच्छेदकाप्रसिद्धिप्रसङ्गादवश्यमिति तादृशसम्बन्धेन तन्निवेशितम् । सत्तावान् जातेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेः सत्तात्वादिविशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया सत्तात्वादेरवच्छेदकत्वापत्तिरतः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यमेव निवेशनीयम् ।

न च सर्वत्वावच्छिन्नस्य यत्र विषयितासम्बन्धेन साध्यता ज्ञानत्वादिकं हेतुस्तत्र सर्वत्वस्य पारिभाषिकावच्छेदकत्वानुपपत्तिर्घटत्वविशिष्टस्य विषयितासम्बन्धेन सम्बन्धिनि सर्वविषयकज्ञाने तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरिति वाच्यम् । घटत्वाद्यवच्छिन्नाविषयके सर्वत्वावच्छिन्नविषयकेऽस्मदादिज्ञाने घटत्वाद्यवच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकघटत्वावच्छिन्नव्यधिकरणतया सर्वत्वस्य तादृशाभावप्रतियोगितानवच्छेदकत्वेन सर्वत्वस्यावच्छेदकत्वोपपत्तेः ।

न चैवमपि यत्र नित्यत्वविशिष्टसर्वत्वं साध्यतावच्छेदकं तत्र जन्यज्ञानस्य साध्यतावच्छेदकीभूतस्वविशिष्टासम्बन्धित्वान्नित्यज्ञाने चाभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्याऽप्यसम्भवात्तादृशसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्वानुपपत्तिरिति वाच्यम् । नित्यत्वानधिकरणे नित्यत्वविशिष्टसर्वमिति ज्ञाने विषयितया नित्यत्वविशिष्टसम्बन्धिताया अनपायात् तत्र तदसत्त्वे तुल्ययुक्त्या जन्यत्वविशिष्टस्य घटादेरपि ईश्वरज्ञानासम्बन्धितया तादृशविशिष्टाभावस्यैव ईश्वरज्ञाने विशिष्टप्रतियोगिव्यधिकरणस्य सुलभत्वसम्भवात् । अन्यत् सर्वं पूर्ववद्बोध्यम् ।

यद्रूपावच्छिन्नस्य येन सम्बन्धेन सम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदक हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं तत्सम्बन्धिनिष्ठतद्रूपावच्छिन्नप्रतियोगिकत्वाभिन्नं यत्साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वं तद्वत्साध्यतावच्छेदकसम्बन्धिसम्बन्धो वा व्याप्तिः । प्रतियोगित्वाद्यन्तर्भावासहिष्णुतायां यद्रूपावच्छिन्नस्य यादृशसम्बन्धेनाऽसम्बन्धित्वं हेतुमत्सम्बन्धादृशसम्बन्धनिष्ठतद्रूपावच्छिन्नप्रतियोगिताकत्वाभिन्नत्वमेव साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वे निवेशनीयमिति दिक् ।

यथाश्रुतानतिरिक्तवृत्तित्वपदार्थपरित्यागप्रयोजनं स्वयमेव दर्शयति ।

(दी०) अत एव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपि सत्तात्वस्य न क्षतिः । एवं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यम् ।

(गा०) अत एवेति । ईदृशानतिरिक्तवृत्तित्वनिवेशादेवेत्यर्थः । विशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपीति । स्वव्यापकस्वपर्याप्त्यधिकरणपर्याप्तविशिष्टसत्तात्वकत्वेऽपीत्यर्थः । न क्षतिः । न सत्तात्वादेरवच्छेदकत्वापत्तिः । प्रतियोगिताघर्मिकोभयाभावघटितव्याप्तिपक्षे विशिष्टसत्तात्वादेः सत्तात्वाद्यन्यूनवृत्तितामादायाऽव्याप्तिवारणाय व्यापकत्वं परित्यज्याऽन्यादृशमन्यूनवृत्तित्वं निवेशयति । एवमिति । स्वविशिष्टेति । स्वपदं साध्यतावच्छेदकपरम्, तथा च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्यवृत्तितत्सम्बन्धावच्छेद्यत्वस्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वोभयाभावकत्वं तेन सम्बन्धेन व्यापकतावच्छेदकत्वं बोध्यमित्यर्थः । विशिष्टसत्तात्वादेर्विशिष्टसत्तात्वाश्रयसम्बन्धिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकतया तदनवच्छेदकसत्तात्वाद्यवच्छेद्यत्वाभावस्य जात्यादिसमानाधिकरणाभावप्रतियोगितायां सत्त्वेन विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरतः स्वविशिष्टेति । स्ववैशिष्ट्यं च साध्यतावच्छे-

दकताघटकसम्बन्धेन बोध्यम्, अन्यथा धूमवान् वह्नेरित्यादौ कालिकादिसम्बन्धेन धूमत्वादिविशिष्टवह्न्यादिसंयोगिनिष्ठाभावप्रतियोगितायां धूमत्वादेरवच्छेदकतया तदनवच्छेदकद्रव्यत्वाद्यवच्छेद्यत्वाभावस्य हेतुसमानाधिकरणाभावप्रतियोगितासामान्ये सत्त्वेनाऽतिव्याप्त्यापत्तेः। सम्बन्धित्वं साध्यतावच्छेदकसम्बन्धेनापि विवक्षणीयम्, अन्यथा कालिकादिसम्बन्धेन धूमादिमति संयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नाभावसत्त्वात् सम्बन्धसामान्येन धूमादिमन्निष्ठाभावीयसंयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशसम्बन्धावच्छिन्नप्रतियोगितासामान्यानवच्छेदकघटाभावत्वादिकमेव, अभावत्वादेः केवलस्यैव संयोगादिसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेन तादृशगुरुधर्मस्याऽन्यथात्वात्, भेदप्रतियोगितायां प्रसिद्धस्य तदवच्छेद्यत्वस्योभयाभावमादाय उक्तस्थले एवातिव्याप्तिः। संयोगेन धूमत्वाद्यवच्छिन्नाभावस्योत्पत्तिक्षणावच्छेदेन धूमत्वादिविशिष्टसम्बन्धिनिष्ठतया तादृशाभावप्रतियोगितानवच्छेदकघटाभावत्वाद्यवच्छेद्यत्वाभावमादाय तत्रैवातिव्याप्तिवारणाय प्रतियोगिव्यधिकरणत्वेनाऽप्यभावो विशेषणीयः। तत्र च प्रतियोगिपदं प्रतियोगितावच्छेदकावच्छिन्नपरमेव, अन्यथा सत्तावान् जातेरित्यादौ सत्तात्वविशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकविशिष्टसत्तात्वाद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वेनाव्याप्त्यापत्तेः। वह्न्यादिमन्निष्ठस्य घटाद्यभावस्य कालिकादिसम्बन्धेन प्रतियोगिसमानाधिकरणतया सम्बन्धसामान्येन प्रतियोगिव्यधिकरणतन्निष्ठाभावप्रतियोगितावच्छेदकं तदसमानकालीनघटादिव्यक्तिनिष्ठतद्व्यक्तित्वादिकमेवेति तदनवच्छेदकघटत्वाद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वादव्याप्तितः प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यं निवेश्यं न तु साध्यतावच्छेदकसम्बन्धेन, कालो घटवान् कालपरिमाणादित्यादौ कालिकसम्बन्धेन साध्यतावच्छेदकविशिष्टसम्बन्धिनि खण्डकाले तेन सम्बन्धेन प्रतियोगिव्यधिकरणस्याभावस्य सुलभत्वेऽपि सर्ववान् कालपरिमाणादित्यादौ महाकालस्यैव कालिकसम्बन्धेन सर्वत्वविशिष्टसम्बन्धितया तत्र तादृशसम्बन्धेन

प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्त्यापत्तेः । कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे प्रतियोगितावधर्मिकोभयाभावघटितलक्षणकरणात्तन्मते उभयाभावप्रवेशनयाऽपि गगनाद्यभावे कालिकसम्बन्धेन वैयधिकरण्यस्य निर्वाहयितुमशक्यत्वात् ।

न च साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमप्यभावप्रतियोगितायां निवेशयिष्यति, एवं च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशोऽपि सर्वत्वावच्छिन्नवाच्यके तदवच्छिन्नसम्बन्धिमहाकालनिष्ठस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धिः । कालिकातिरिक्तसम्बन्धावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणत्वात् तत्प्रतियोगितायां च कालिकसम्बन्धावच्छिन्नत्वविरहादित्यव्याप्तितादवस्थ्यमिति वाच्यम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणो यः स्वविशिष्टसम्बन्धिनिष्ठाभावस्तत्प्रतियोगितासामान्ये यद्यत्सम्बन्धावच्छिन्नत्वयद्यद्धर्मावच्छिन्नत्वोभयाभावस्तत्सम्बन्धावच्छिन्नत्वतद्धर्मावच्छिन्नत्वोभयाभाववत्ताद्दशहेतुसमानाधिकरणाभावप्रतियोगितासामान्यक यद्यत्त्वं तद्धर्मवत्त्व तेन सम्बन्धेन व्यापकत्वमिति विवक्षया सर्वसामञ्जस्यात् । सर्वत्वविशिष्टसम्बन्धिनि महाकाले समवायादिना प्रतियोगिव्यधिकरणस्य तत्सम्बन्धावच्छिन्नघटाद्यभावस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वसर्वत्वावच्छिन्नत्वोभयाभावस्य सत्त्वात् साधनसमानाधिकरणतथाविधघटाद्यभावप्रतियोगितायामपि तथाविधोभयाभावसत्वेन कालिकसम्बन्धेन सर्वत्वावच्छिन्नस्य कालपरिमाणादिव्यापकत्वोपपत्तेः ।

न चैव साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगित्वाविशेषणतया प्रतियोगित्व साध्यतावच्छेदकसम्बन्धेन" वाच्यमित्यग्रिमग्रन्थविरोध इति वाच्यम । ताद्दशग्रन्थस्याप्युक्तोभयाभाववविशेषणतायामेव तात्पर्यात् ।

वस्तुतस्तु साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषितप्रतियोगितासामान्ये प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्वविशिष्टसम्बन्धिनिष्ठाभावीयत्वयद्धर्मावच्छिन्नत्वोभयाभाव-

स्तादृशधर्म एवानवच्छेदकान्तार्थं इति नाग्रिमग्रन्थविरोधो न वा महाकालः सर्ववान् महाकालपरिमाणादित्यादावप्रसिद्धिः, प्रसिद्धायां कालिकसम्बन्धावच्छिन्नघटाद्यभावीयप्रतियोगितायां सर्वत्वविशिष्टसम्बन्धिमहाकालनिष्ठो यः समवायसम्बन्धेन प्रतियोगिव्यधिकरणस्तत्सम्बन्धावच्छिन्नघटाद्यभावस्तदीयत्वसर्वत्वावच्छिन्नत्वोभयाभावस्य सुलभत्वात्।

ननु स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं तादृशावच्छेदकत्वावच्छिन्नप्रतियोगिताको भेदः, यत्किञ्चित्प्रतियोगिकभेदस्य तादृशावच्छेदकयत्किञ्चिद्भिन्नतादृशावच्छेदकसाधारणत्वात्। तथा च लघुरूपसमनियतं यद् गुरु रूपं तद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य तादृशलघुरूपविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वात्मकस्वसमनियतधर्मापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया तादृशावच्छेदकत्वावच्छिन्नभेदाप्रसिद्ध्या द्वितीयावच्छेदकलक्षणस्य प्रमेयधूमत्वादौ प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिलक्षणस्य प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः, प्रतियोगिताधर्मिकोभयाभावघटितलक्षणेऽनवच्छेदकान्तेन स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितासामान्ये यद्रूपावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावस्तद्रूपविवक्षणे स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदाप्रवेशेऽपि सामान्यपदार्थघटकतया स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानिष्ठभेदप्रतियोगितावच्छेदकत्वावच्छिन्नभेदरूपस्य तादृशप्रतियोगितात्वव्यापकत्वस्योभयाभावविशेषणतया प्रवेशात् प्रमेयवह्नित्वाद्यवच्छिन्नसाध्यके तद्रूपविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानिष्ठभेदप्रतियोगितावच्छेदकत्वावच्छिन्नभेदाप्रसिद्धेरव्याप्तिः। साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासामान्ये स्वविशिष्टसम्बन्धिनिष्ठाभावीयत्वयद्रूपावच्छिन्नत्वोभयाभावस्तद्रूपस्यानवच्छेदकान्तार्थत्वे प्रमेयवह्नित्वविशिष्टसम्बन्धिनिष्ठाभावीयत्वघटितोभयत्वावच्छिन्नाभावाप्रसिद्धेरव्याप्तिरित्याशङ्क्याह।

(दी०) तादृशप्रतियोगिताश्च विशिष्योपादेयाः, नातो

गुरोरवच्छेदकत्वं विना दुर्वचत्वम् । प्रतियोगित्वं सम्बन्धित्वं च साध्यतावच्छेदकसम्बन्धेन बोध्यम्, अतो न सम्बन्धभेदमादाय दोषः । कालिकविशेषणताविशेषेण च साध्यतायां तादृशप्रतियोगितावच्छेदकत्वमतिप्रसक्तत्वक्तित्वे प्रसिद्धम् । अभावश्च प्रतियोगिन्यधिकरणो बोध्यः ।

(गा०) तादृशप्रतियोगिताश्चेति । स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितास्त्वित्यर्थः । विशिष्य । तत्तद्व्यक्तित्वेनैवेत्यर्थः । तथा च वस्तुगत्या या या स्वविशिष्टसम्बन्धिनिष्ठाभावनिरूपिता प्रतियोगितास्तत्तदवच्छेदकत्वावच्छिन्नभेदकूटवत्त्वमनवच्छेदकान्तार्थ इति गुरुधर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेऽपि न क्षतिः ।

यद्यपि घटत्वावच्छिन्नाभावीया या प्रतियोगिता तदवच्छेदकत्व घटत्वादिनिष्ठतत्तद्व्यक्तित्वादिसमनियतमिति तदपेक्षया गुरुत्वेन न प्रतियोगितावच्छेदकतामिति तादृशप्रतियोगिता विशिष्योपादायाऽनवच्छेदकत्वादिकं दुर्वचम् । तथाऽपि यत्र प्रतियोगितायां समशरीरनानाधर्मसमनैयत्यं तत्र नानाधर्माणामेवैकप्रतियोगितायामवच्छेदकतयावच्छेदकनिष्ठतत्तद्व्यक्तित्वानां लघुत्वेऽपि तत्प्रतियोगितावच्छेदकत्वन्यूनवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्वमव्याहतमवेति तादृशप्रतियोगितानां विशिष्य निवेशाभिप्रायको ऽयं ग्रन्थः, अन्यादृशप्रतियोगितावच्छेदकानां च तत्तद्व्यक्तित्वेनैव भेदो निवेश्यः ।

न चावच्छेदकभेदेन प्रतियोगिताभेदान्नानाधर्मावच्छिन्नैकप्रतियोगिताया असम्भव इति वाच्यम् । अवच्छेदकासमनैयत्यस्यैव प्रतियोगिताभेदकत्वात्, समनियतनानाधर्मावच्छिन्नप्रतियोगितैक्ये बाधकविरहात् । एव यत्रानुगतैकरूपावच्छिन्ननानाव्यक्तीनामेकप्रतियोगितावच्छेदकत्वं तत्राऽप्यवच्छेदकनिष्ठतत्तद्व्यक्तित्वानां न्यूनवृत्तितया तत्राऽपि तत्प्रतियोगितावच्छेदकत्वस्य* भेदप्रतियोगितावच्छेदकत्वमक्षतम् ।

न च तत्राऽपि तत्प्रतियोगितानिरूपितावच्छेदकत्वस्यानुगत-

रूपावच्छिन्नैकावच्छेदकतायास्तद्व्यक्तित्वेन भेदप्रतियोगितानवच्छेदकत्वसम्भवात् तत्प्रतियोगितावच्छेदकत्वविशिष्टावच्छिन्नभेदोऽप्रसिद्ध्या निवेशयितुमशक्य एवेति वाच्यम् । तादृशभेदनिवेशासम्भवेऽपि अवच्छेदकतासम्बन्धेन तत्प्रतियोगितावच्छिन्नभेदनिवेशाऽविरोधेन प्रतियोगितायां विशिष्य निवेशनोक्तक्षतेः । न हि आश्रयतासम्बन्धेन तद्व्यक्तित्वावच्छिन्नावच्छेदकताया अवच्छेदकत्वापेक्षयाऽवच्छेदकतासम्बन्धेन तद्व्यक्तित्वावच्छिन्नप्रतियोगिताया अवच्छेदकत्वे गौरवं येनोक्तभेदस्याप्रसिद्धिः स्यात् । एवं धूमत्वादेरपि धूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितायां महानसीयत्वादिसहितस्याऽवच्छेदकत्वाद्धर्मान्तरसहितरूपावच्छिन्नप्रतियोगितावच्छेदकानां तद्व्यक्तित्वेन भेदनिवेशो न सम्भवतीति धूमत्वादेर्धूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वानुपपत्तिः । विशेषणावच्छिन्नधूमत्वादिनिष्ठतद्व्यक्तित्वस्यापि विशेष्यीभूतधूमत्वादिपर्याप्ततया तदवच्छिन्नभेदस्य विशेष्यीभूतधूमत्वादावसम्भवादिति तत्प्रतियोगितावच्छेदकस्य तादृशावच्छेदकत्वावच्छिन्नभेद एव निवेश्यः । तथा सति तादृशप्रतियोगितावच्छेदकताया व्यासज्यवृत्तित्वेन धूमत्वादौ प्रत्येकं तदवच्छिन्नभेदसत्त्वेनोक्तानुपपत्त्यनवकाशात् ।

न च तत्रावच्छेदकताश्रयकेवलतद्व्यक्तित्वेन भेदप्रतियोगितावच्छेदकत्वं सम्भवतीति दर्शितरूपावच्छिन्नभेदाप्रसिद्धिरिति शङ्कास्पदमपि । महानसीयत्वधूमत्वादिनिष्ठावच्छेदकतानामवच्छेदकसम्बन्धादिभेदेन भिन्नतया तद्व्यक्तित्वेन तासामव्यासज्यवृत्तितया धूमत्वादिनिष्ठभेदप्रतियोगितावच्छेदकत्वासम्भवात्, तत्प्रतियोगितावच्छेदकतात्वेन च व्यासज्यवृत्तितया तेनैव रूपेण तादृशभेदप्रतियोगितावच्छेदकत्वात् । दुर्वचत्वमिति । पारिभाषिकावच्छेद्यावच्छेदकभावस्येति शेषः । प्रतियोगिधर्मिकोभयाभावघटितलक्षणे स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितायां यदि सम्बन्धविशेषावच्छिन्नत्वं न निवेश्यते तदा प्रतियोगितावच्छेदकमात्रस्यैव वह्नित्वादिविशिष्टसम्बन्धिनिष्ठकिञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् तादृशप्रतियोगितानवच्छेदकावच्छेद्यत्वाप्रसिद्ध्यासम्भवः, महानसादि-

निष्ठसमवायसम्बन्धावच्छिन्नवह्न्यभावस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसमानाधिकरणत्वेऽपि एतल्लक्षणे प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्यैव निवेशेन तादृशाभावाव्यावर्तनात् ।

न चाकाशाभावत्वादिकमेव तादृशाभावप्रतियोगितानवच्छेदकम्, संयोगसमवायादिसम्बन्धावच्छिन्नाकाशाभावादिनिष्ठप्रतियोगिताया शुद्धस्याभावत्वादेरेव लघोरवच्छेदकत्वात् । तादृशधर्मावच्छेद्यत्वं च स्वरूपसम्बन्धावच्छिन्नाकाशाभावाभावात्मकाकाशादिनिरूपितप्रतियोगिताया प्रसिद्धमिति वाच्यम् । आकाशाभावत्वादेरपि साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् । आकाशाभाववह्निमदन्यतरत्वादेर्वह्न्यादिमन्निष्ठभेदप्रतियोगितानवच्छेदकत्वेऽपि विषयितादिसम्बन्धावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकत्वं दुर्वारमेव तदुभयैकतरमात्रविषयकज्ञानादौ विषयितासम्बन्धेनान्यतरत्वावच्छिन्नाभावासत्त्वात्, अभावत्ववह्निमत्त्वाद्यवच्छिन्नाभावस्य च सत्त्वादभावत्ववह्निमत्त्वादेस्तादृशसम्बन्धावच्छिन्नान्यतराभावप्रतियोगितावच्छेदकत्वासम्भवात् । विषयित्वादेर्वृत्त्यनियामकतयाऽभावप्रतियोगितावच्छेदकसम्बन्धत्वानुपगमे तु धूमवान् वह्नेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितायामाकाशाभावधूमवदन्यतरत्वादिरूपधूमादिमन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नत्वस्योभयाभावमादायातिव्याप्तिरित्येतल्लक्षणे प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वम्, दर्शितप्रयोजनानुरोधेन द्वितीयावच्छेदकलक्षणे च साध्यतावच्छेदकसम्बन्धात्मकस्वविशिष्टसम्बन्धित्वं च निवेशयति । प्रतियोगित्वमित्यादिना । कालो घटवान् कालपरिमाणादित्यादौ घटत्वादिविशिष्टसम्बन्धिनि महाकाले प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणो योऽभावस्तदीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धावपि यथाश्रुतस्य प्रतियोगिताधर्मिकोभयाभावघटितलक्षणस्य न तत्राऽव्याप्तिप्रसक्तिः । खण्डकालस्यापि तद्विशिष्टसम्बन्धितया तन्निष्ठस्यातीतानागतघटव्यक्तीनामेव तादृशाभावस्य तथाविधप्रतियोगिताप्रसिद्धेरित्याह । कालिकेति । कहानय एवाऽभावे प्रतियोगिवैयधिकरण्यं निवेशयति । अभा-

घश्चेति । वोध्य इति । अन्यथाऽव्याप्यवृत्तिसाध्यके व्यभिचारिण्यतिव्याप्तेरिति शेषः ।

अव्याप्यवृत्तिसंयोगादिसाध्यकव्यभिचारिण्यतिव्याप्तिमवच्छेदकलक्षणघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणप्रक्षेपमन्तरेणाऽप्युद्धर्तुं तादृशविशेषणस्य तदसत्त्वे हेतुसमानाधिकरणाभावे तादृशविशेषणस्यापि दर्शितव्याप्त्यसङ्गतेस्तस्य चानुपादेयत्वमाशङ्कते । न चेत्यादिना ।

(दी०) न च मौलमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयम्, संयोगत्वावच्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभाववति चाऽवृत्तेरव्याप्त्यतिव्याप्त्योरनवकाशादिति वाच्यम् ।

(गा०) मौलम् । मूलस्थं हेतुसमानाधिकरणाभावे तद्विशेषणम् । मौलस्यानुपादेयत्वे हेतुभूताव्याप्त्यनवकाशे हेतुमाह । संयोगत्वावच्छिन्नाभाववतीति । द्रव्यादाविति शेषः । संयोगत्वादिविशिष्टस्य वृत्तेरिति । तथा च तदनुपादानेऽपि संयोगि द्रव्यत्वादित्यादौ संयोगित्वादिरूपसाध्यतावच्छेदके स्वरूपसम्बन्धरूपोक्तप्रतियोगितावच्छेदकत्वसत्त्वेऽपि निरुक्तोभयविधपारिभाषिकावच्छेदकत्वस्याऽसत्त्वादुक्तप्रतियोगितायां तद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभावस्य च सत्त्वान्नाऽव्याप्तिरिति भावः । इदमीयस्य तद्विशेषणस्याऽनुपादेयत्वे हेतुभूतातिव्याप्त्यनवकाशे हेतुमाह । गुणादीति । द्रव्यतरासमवेतत्वमात्रस्यैव द्रव्यत्वात्यन्ताभावविरोधितावच्छेदकतया तत्प्रतियोगितावच्छेदकत्वसम्भवात् सकलद्रव्यसमवेतत्वरूपाधिकांशघटितद्रव्यत्वत्वेनात्यन्ताभावप्रतियोगितावच्छेदकमित्यपरितोषाद् द्रव्यमात्रसमवेतत्वेति । अवृत्तेरिति । संयोगत्वादिविशिष्टस्येत्यनुषज्यते । तथा च तदनुपादानेऽपि संयोगि सत्त्वादित्यादौ नातिव्याप्तिः । अवच्छेदकलक्षणस्थतत्पदेन संयोगत्वाद्युपादानासम्भवेऽपि द्रव्यत्वत्वादिकमादायैव संयोगत्वादौ पारिभाषिकावच्छेदकत्वस्य सूपपाद-

त्वात् । संयोगत्वादौ संयोगत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रति-
योगितानवच्छेदकत्वविरहेऽपि तादृशप्रतियोगितानवच्छेदकद्रव्य-
त्वत्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां स-
त्त्वेन तत्र निरुक्तोभयाभावासत्त्वाच्चेति भावः । समवायादिनाऽव्या-
प्यवृत्तिसाध्यके तेन सम्बन्धेन साध्यतावच्छेदकविशिष्टव्यापक
तावच्छेदकस्य व्याप्यवृत्तितावच्छेदकधर्मान्तरस्य साधननिष्ठ
व्यभिचारनिरूपकतावच्छेदकस्य सम्भवेनातिव्याप्त्युद्धारेऽपि सं-
योगेनाव्याप्यवृत्ते साध्यतायामतिव्याप्तिदुर्वारैव संयोगेन किञ्चि
द्रूपावच्छिन्नस्य व्याप्यवृत्तिताविरहात् साधनवन्निष्ठसंयोगसम्ब-
न्धावच्छिन्नाभावप्रतियोगितावच्छेदकस्य साध्यवन्निष्ठतत्सम्बन्धा-
वच्छिन्नाभावप्रतियोगितावच्छेदकत्वनियमेन तत्सम्बन्धावच्छिन्न-
तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वस्यासंयुक्तमात्र
वृत्तिगुणत्वादावेव प्रसिद्धेरिति इदमीयप्रतियोगिवैयधिकरण्यवि-
शेषणोपादानमावश्यकम्, तदावश्यकत्वे च हेतुसमानाधिकर
णाभावे तद्विशेषणस्याप्यावश्यकताऽन्यथा संयोगि द्रव्यत्वादि-
त्यादावेवाऽव्याप्तेरिति समाधत्ते धूमवानिति ।

(दी०) धूमवान् वह्नेरित्यादावतिव्याप्तिः । न ह्युत्पत्तिकाला-
वच्छेदेनाऽपि महानसादौ संयोगेन किञ्चिद्वर्तते, येन वह्निमदयो-
गोलकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्य-
त्वाद्यवच्छिन्नाभाववद्वृत्तित्वं धूमत्वादिविशिष्टस्य सम्भाव्येत ।

(गा०) ननु धूमादिमत्यपि पर्वतादौ शिखरावच्छेदेन धूमत्वाद्यव
च्छिन्नाभावसत्त्वात्तेन रूपेण धूमादीनां व्याप्यवृत्तिताविरहेऽपि अयो
गोलकावृत्तिद्रव्यत्वादिना तेषां तथात्वमव्याहतमेव, शिखराद्यवच्छे
देनाऽपि तदवच्छिन्नद्रव्यान्तरसत्त्वादिति साधनाव्यापकतावच्छेद-
कतादृशधर्मावच्छिन्नाभाववत्त्वमयोगोलकादेरेव, धूमत्वादिविशिष्ट-
स्य तदसम्बद्धत्वान्नातिव्याप्तिरित्याशङ्कां निराकरोति । न हीति ।
उत्पत्तिकालेति । तथा च धूमवति किञ्चिद्देशावच्छेदेनायोगोलका-
वृत्तिद्रव्यत्वाद्यवच्छिन्नाभावासत्त्वेऽपि कालविशेषावच्छेदेन तद-
वच्छिन्नाभावस्य तत्र सत्त्वाद्धूमत्वादेरवच्छेदकत्वं दुर्घटमेवेति
भावः । द्वितीयकल्पेऽवच्छेदकाप्रसिद्ध्याऽतिव्याप्तिविरहेऽपि प्रथम

कल्पे प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे च धूमत्वादिवि-
शिष्टसम्बन्धिनिष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छे-
दकघटाभावत्वाद्यवच्छेद्यत्वसंयोगसम्बन्धावच्छिन्नत्वोभयाभावमाद-
याऽतिव्याप्तिर्बोध्या ।

वस्तुतो द्वितीयावच्छेदकलक्षणेऽपि प्रतियोगिवैयधिकरण्यप्र
वेशे संयोगेन साध्यताया सद्धेतौ तादृशावच्छेदकाप्रसिद्ध्याऽव्या
प्ति स्यादिति साध्यतावच्छेदके स्वविशिष्टसम्बन्धिनिष्ठाभावप्र
तियोगितानवच्छेदकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदक
यद्यत्तद्भेदस्थाने स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदक
तादृशप्रतियोगितावच्छेदकसामान्यकत्वं निवेश्यैव तादृशाव्याप्ति-
र्वारणीयेति तथैवाऽतिव्याप्तिरसद्धेतौ स्यादित्यत्र तात्पर्यम् ।

अथैवमपि प्रतियोगितानवच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तवि-
शेषणमकिञ्चित्करमेव हेतुसमानाधिकरणाभावे यथाश्रुतप्रतियो
गिवैयधिकरण्यनिवेशनेऽपि गुणान्यत्वविशिष्टसत्तावान् जाते-
रित्यादौ हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगिताव-
च्छेदकगुणासमवेतवायवनतिरिक्तवृत्तित्वस्य साध्यतावच्छेदके स
त्त्वेनाऽतिव्याप्त्यनवकाशात् । हेतुसमानाधिकरणाभावविशेषणप्रति
योगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे
द्रव्यं गुणादित्यादौ पृथिव्यन्यत्वविशिष्टद्रव्यत्वाद्यभावस्य प्रतियो-
गिताश्रयानधिकरणहेतुव्यधिकरणकत्वाभावेन लक्षणाघटकतया वि
शिष्टद्रव्यत्वत्वे द्रव्यत्वत्वविशिष्टसम्बन्धिनिष्ठस्वप्रतियोगिव्यधिकर-
णाभावप्रतियोगितानवच्छेदकत्वेऽपि अव्याप्त्यनवकाशेन इदानीं
प्रतियोगिवैयधिकरण्यशरीरेऽपि तन्निवेशनस्याऽऽवश्यकत्वसम्भवात् ।

यत्तु प्रतियोगितानवच्छेदकावच्छिन्नत्वानिवेशे च प्रतियोगिताश्र-
यानधिकरणत्वं हेतुमत इत्यादिक्रमेण व्याप्तिर्निर्वाच्या, तथा च
प्रतियोगितायाः प्रतियोगिस्वरूपत्वे वह्न्यादिव्यक्तिभेदेन तन्निष्ठप्र-
तियोगितानां भेदाद्वह्नित्वाद्यवच्छिन्नमहानसीयवह्न्यादिनिष्ठप्रतियो-
गिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्त्वाद्वह्निमान् धूमा-
दित्यादावव्याप्तिरिति । तदसत् । प्रतियोगितायाः प्रतियोगिस्व-
रूपत्वे महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगितायाः वह्नित्वाद्यवच्छि-
न्नमहानसीयवह्न्यादिनिष्ठप्रतियोगित्वाभिन्नतया प्रतियोगितावच्छे

दकावच्छिन्नानधिकरणत्वनिवेशेऽपि वह्नित्वाद्यवच्छिन्नप्रतियोगितावच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नानधिकरणत्वमादाय तद्दोषतादवस्थ्यात् । द्रव्यत्वादेरपि धूमादिस्वरूपधूमत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकत्वेन प्रतियोगितावच्छेदकसामान्यावच्छिन्नानधिकरणत्वनिवेशेऽयोगोलकादावपि धूमत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकसामान्यावच्छिन्नानधिकरणत्वस्य दुर्लभतया तथा विवक्षणासम्भवात् ।

यदि च यादृशरूपावच्छिन्नप्रतियोगिताया अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया महानसीयवह्नित्वादेर्वह्नित्वाद्यवच्छेद्यतावच्छेदकवह्निवृत्तिप्रतियोगित्वत्वावच्छिन्नानवच्छेदकत्वान्न दोष इत्युच्यते, तदा यद्रूपावच्छिन्नप्रतियोगिताश्रयानधिकरणत्वं हेतुमतस्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशेऽपि सामञ्जस्यात् ।

नैवम् । प्रतियोगितावच्छेदकावच्छिन्नत्वानुपादाने एतद्रूपान्यत्वविशिष्टसत्त्वावान् जातेरित्यादावतिव्याप्तेर्दुर्वारत्वात् । तत्र हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य एतद्रूपासमवेतत्वादेरेतद्रूपविजातीयरूपान्तरसाधारणमेतद्रूपान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नं प्रति समवायेन व्यापकतानवच्छेदकत्वात् ।

सम्बन्धभेदनिबन्धनदोषवारणाय हेतुसमानाधिकरणाभावप्रतियोगित्वतदवच्छेदकानतिरिक्तवृत्तित्वघटकप्रतियोगितयोर्यदि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्यते तदैव प्रतियोगिवैयधिकरण्यद्वयानुपादाने संयोगेन साध्यतायां व्यभिचारिणि दर्शितरीत्याऽतिव्याप्तिरापद्यते । यदि च तद्दोषवारणाय हेतुमन्निष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितायां यदवच्छेदकं तत्सम्बन्धावच्छिन्नतदवच्छिन्नाभाववद्सम्बद्धत्वविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकतत्कत्वं वा निवेश्यते, उभयत्र विशिष्य विशेषणताविशेषसम्बन्ध एव वा, तदा धूमवान् वह्नेरित्यादौ सम्बन्धान्तरेण विशेषणताविशेषेण वा प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतायामवच्छेदकस्य तत्सम्बन्धघटितहेत्वव्यापकतावच्छेदकायो-

गोलकभेदत्वादेः प्रसिद्ध्या धूमत्वादेरवच्छेदकत्वोपपत्तेरतिव्याप्त्यनवकाश इत्यालोच्य साध्यतावच्छेदकसम्बन्धानिवेशपक्षे प्रतियोगिवैयधिकरण्यद्वयस्याऽनुपादेयतामाह । प्रतियोगितयोरिति ।

(दी०) प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयम् ।

(गा०) यद्यपि वह्निधूमादिनिरूपितसंयोगसम्बन्धघटितव्यापकतां विशिष्य समवायादिसम्बन्धावच्छिन्नप्रतियोगिताद्वयघटितपारिभाषिकावच्छेदकत्वमन्तर्भाव्याऽपि निर्वक्तुं शक्यते तथा सत्यननुगमप्रसङ्गात् । तादृशहेतुसमानाधिकरणाभावीयसमवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकस्य वह्निविशिष्टसंयोगिनिष्ठतत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वं तदन्यत्वस्य तद्व्यापकतावच्छेदकसाधारण्याभावात् । यत्राऽधिकरणे तदवच्छिन्नस्य व्यभिचारस्तादृसमवेतत्वस्य हेतुमन्निष्ठसमवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकस्य संयोगेन तद्धर्मविशिष्टं प्रति समवायेन व्यापकतायामवच्छेदकतया तादृशधर्माणां पारिभाषिकावच्छेदकताध्रौव्यात् । तथापि विशेषणतादिघटितव्यापकतायां समवायादिसम्बन्धावच्छिन्नप्रतियोगिताद्वयघटितावच्छेदकत्वानिवेशे महानसभेदत्वादिविशिष्टस्य विशेषणताविशेषादिना यः सम्बन्धी सामान्यादिस्तन्निष्ठाभावीयसमवायादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वस्य वह्न्यादिसमानाधिकरणाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकेऽसम्भावितत्वान्महानसभेदत्वादेरपि वह्न्यादिव्यापकतावच्छेदकताप्रसङ्गात् । तत्र विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताद्वयघटितावच्छेदकत्वाभावरूपव्यापकतावच्छेदकत्वमेवाऽनुमित्यौपयिकं वाच्यम् । तथा च सर्वत्र तादृशावच्छेदकत्वाभावज्ञानस्यैवानुमितिहेतुत्वमुचितम्, प्रकृतातीयावच्छेदकत्वाभावसत्त्वानुरोधादित्याशयेनाह । विशेषणताविशेषेति । अनुपादेयमिति । तथा च साध्यतावच्छेदकसम्बन्धादिनिवेशाभिप्रायेण मूलकृता प्रतियोगिवैयधिकरण्यमुपात्तमिति भावः । अतिव्याप्तिवारणप्रकारं दर्शयति ।

(दी०) यत्राधिकरणे व्यभिचारस्तदन्यत्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वसाध्यवत्त्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाद्धेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात् । तथा च विशेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्सम्बन्धावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः । यत्र सद्धेतौ साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवेयं रीतिरुपादेयेत्यपि वदन्ति ॥

(गा०) यत्राधिकरण इति । साध्यतावच्छेदकस्यापि कालिकसम्बन्धेन साध्यवद्वृत्तेरभावस्य प्रतियोगितावच्छेदकतया येन सम्बन्धेन हेतुमद्वृत्तित्वमभावस्य तेन सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठत्वं वाच्यम्, उभयत्र विशेषणताविशेष एव वाभावस्य सम्बन्धः । एतत्कल्पे च घटभिन्न मेयत्वादित्यादौ घटादिभेदाभावस्य घटत्वादिरूपस्य तद्व्यक्तिभेदाभावस्य तदीयासाधारणधर्मरूपाद्यात्मकतद्व्यक्तित्वस्य च विशेषणताविशेषेणावृत्तेर्घटभेदत्वादेर्लक्षणघटकत्वासम्भवः । एतद्घटतद्घटान्यतरत्वाद्यवच्छिन्नभेदाभावस्य तादृशान्यतरत्वस्य भेदविशेषात्मकतया तादृशसम्बन्धेन वृत्तावपि तादृशभेदत्वानुसरणे प्रयासगौरवम् । गगनभिन्नं मेयत्वादित्यादौ व्यभिचारनिरूपकाधिकरणगगनभेदाभावस्य शब्दात्मकस्य गगननिष्ठान्त्यविशेषरूपस्य वा समवायेनैव गगनवृत्तेस्तद्भेदत्वस्य लक्षणघटकत्वासम्भवाद्व्यभिचारनिरूपकाधिकरणं यत्तदन्यत्वमादायाऽतिव्याप्तिनिराकरणायोगश्चेति तदन्यत्वप्रकारकप्रमाविषयत्वत्वानुधावनम् ।

यत्तु अयं घटो घटतद्भेदान्यतरत्वादित्यादौ व्यभिचारनिरूपकाधिकरणघटादिभेदस्य यो भेदस्तस्य भेदधारानवस्थाभयेनाऽधिकरणरूपस्य साध्यवति घटादौ न विशेषणतया वृत्तिर्द्व्या-

दिरूपाभावस्य विशेषणतानभ्युपगमादिति तदन्यत्वं न तत्सम्बन्धेन व्यापकतायामवच्छेदकमिति प्रमाविषयत्वस्यानुधावनमिति । तदसत् । घटादिरूपभेदस्य घटादौ वृत्तिनियामकसम्बन्धान्तराभावेन भेदस्वरूपेण वृत्तिनियामकस्वरूपसम्बन्धस्यावश्योपेयत्वात् ।

अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वत्वापेक्षया धूमादिप्रकारकप्रमाविषयत्वत्वे धूमादिव्यापकतावच्छेदकत्वमास्तु ग्राह्यमित्याशयेन तदेवानुसरति । साध्यवत्त्वप्रकारकेति । साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नप्रकारकेत्यर्थः । प्रतियोगिनेति । अभावीयविशेषणतासम्बन्धावच्छिन्नप्रतियोगिनेत्यर्थः । अतिव्याप्तिरिति । अवच्छेदकताघटकाभावे प्रतियोगिवैयधिकरण्यानिवेशेऽपि धूमवान् वह्नेरित्यादावित्यादिः । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वोक्तेरर्थतः स्वविशिष्टसामान्ये तदवच्छिन्नाभाववदसम्बन्धित्वं लभ्यते इति फलद्वये एवाऽतिव्याप्तिनिरासो लभ्यते ।

अथानवच्छेदकत्वघटितव्याप्तिलक्षणे यथाश्रुतप्रथमनिरुक्तावच्छेदकताया निवेशे जातिमान् मेयत्वादित्यादौ सामान्यादिसमवेतत्वाप्रसिद्ध्या जातित्वादेरवच्छेदकताया दुरुपपादत्वेनाऽतिव्याप्तिः । अवच्छेदकलक्षणे स्वविशिष्टप्रतियोगिकसाध्यतावच्छेदकसम्बन्धे तदवच्छिन्नाभाववदनुयोगिकत्वनिवेशने कालो घटवान् कालपरिमाणादित्यादौ अवच्छेदकाप्रसिद्धिः, गगनत्वादिविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धेः । एवं चरमनिरुक्तावच्छेदकतानिवेशपक्षेऽपि तत्रावच्छेदकाप्रसिद्धिः, साध्यतावच्छेदकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनोऽप्रसिद्धेर्दर्शितरीत्यनुसरणे च गौरवमिति कालिकसम्बन्धेन गगनादेरवृत्तित्वपक्षेऽपि प्रतियोगिताधर्मिकपारिभाषिकावच्छेद्यत्वाभावघटितव्याप्तिरेवाऽवलम्बनीया इत्याशयेन तत्पक्षमालम्ब्यैव निष्कृष्टार्थमाह । तथा चेति ।

प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशपक्षे तस्यावच्छेद्यत्वाभावानुयोगिविशेषणता न सम्भवति, स्वावच्छेद-

कसम्बन्धेन प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया दर्शितस्थलेऽप्रसिद्धेरिति तत्पक्षे प्रतियोगिदिशि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व निवेशयोरुभयाभावो निवेशित । विशेषणताविशेषरूपसम्बन्धनिवेशे च हेतुसमानाधिकरणकालभेदाद्यभावस्यैव तत्सम्बन्धावच्छिन्नप्रतियोगित्वप्रसिद्ध्या तत्सम्बन्धावच्छिन्नप्रतियोगिताधर्मिकतादृशावच्छेद्यत्वमात्राभावनिवेशोऽपि सम्भवतीत्युभयाभावोपेक्षा।

यद्यपि हेतुसमानाधिकरणाभावप्रतियोगितासामान्ये साध्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छेद्यत्वनिवेशेनैवोपपत्तावभावद्वयनिवेशनमनतिप्रयोजनकम् । तथापि तदनिवेशे प्रतियोगितायाः पारिभाषिकसाध्यतावच्छेदकावच्छेद्यत्वाभावस्य लक्षणाघटकतया लक्षणान्तरमेवेदं स्यान्न मूलोक्तलक्षणार्थं इति तदुपादानम्। यथासन्निवेशे चावैयर्थ्यम् । अन्यथा साधनसमानाधिकरणाभावप्रतियोगितासामान्ये साधनसमानाधिकरणसामान्ये वा यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयत्व यद्धर्मविशिष्टसम्बन्धिनिष्ठत्व वा तद्धर्मविशिष्टसामानाधिकरण्यस्यैव व्याप्तित्वसम्भवेन भागान्तरस्याप्यनुपादानापत्ते । वक्ष्यते च मूलमनुरुध्य स्वसमानाधिकरणाः सर्वे यद्धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्य व्याप्तिरिति व्याप्तिग्रहोपायशेषे दीधितिकृतव ।

केचित्तु सामान्यपदस्य व्यापकतार्थकतया हेतुसमानाधिकरणाभावप्रतियोगितानिष्ठाभावप्रतियोगितानवच्छेदक यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभावत्व, तादृशप्रतियोगितानिष्ठभेदप्रतियोगितानवच्छेदको वा यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभाव इत्यत्र फलितार्थे । तत्र चाऽभावद्वयानुपादाने तादृशप्रतियोगितानिष्ठाभावप्रतियोगितानवच्छेदक यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यतात्वमित्यर्थपर्यवसाने मेयधूमवान् वह्निरित्यादावतिव्याप्ति, मेयधूमत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यतात्वस्य गुरुतयाऽयोगोलकभेदाभावप्रतियोगितानिष्ठतादृशावच्छेदकावच्छेद्यत्वाभावप्रतियोगितायामप्यनवच्छेदकत्वा-

त्। विशिष्य तत्तत्प्रतियोगितावच्छेदकावच्छेद्यत्वत्वरूपेण च व्यापकत्वमशक्यनिवेशनम्, वह्न्यादिसमानाधिकरणह्रदत्वाद्यभावीया या प्रतियोगिता तत्तदवच्छेदकावच्छेद्यत्वरूपेण धूमादिसमानाधिकरणाभावान्तरप्रतियोगितासाधारणनिरुक्तप्रतियोगितात्वव्यापकत्वाभावादसम्भवापत्तेः। अभावद्वयोपादाने च तत्तत्प्रतियोगितावच्छेदकभेदकूटवन्तो ये ह्रदभेदत्वादयो धर्मास्तदवच्छेद्यत्वाभावानां प्रत्येकं तथाविधसकलाभावप्रतियोगितासाधारणतया तादृशावच्छेद्यत्वाभावकूटस्य प्रातिस्विकरूपेण व्यापकतानिवेशादतिव्याप्त्यनवकाश इत्याहुः।

अन्ये तु अभावद्वयानुपादाने प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते धूमवान् वह्नेरित्यादावतिव्याप्तिः वह्निसमानाधिकरणायोगोलकभेदाद्यभावप्रतियोगितामयोगोलकभेदादिरूपायां धूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकमहानसवृत्तित्वविशिष्टायोगोलकभेदत्वाद्यवच्छेद्यत्वसत्त्वात्। विशिष्टभेदत्वाद्यवच्छिन्नविशिष्टभेदरूपप्रतियोगितातः शुद्धायोगोलकभेदादिरूपप्रतियोगिताया अनतिरेकात्। अभावद्वयोपादाने चायोगोलकभेदत्वाद्यवच्छिन्नप्रतियोगिताया धूमत्वादिविशिष्टवन्निष्ठो योऽभावस्तन्निरूपितप्रतियोगितात्वावच्छिन्नानवच्छेदकशुद्धायोगोलकभेदत्वाद्यवच्छिन्नत्वाभावासत्त्वान्नातिव्याप्तिः।

न चैवं वह्निमान् धूमादित्यादौ धूमादिसमानाधिकरणपर्वतादिवृत्तित्वविशिष्टह्रदभेदाद्यभावीयविशिष्टह्रदभेदात्मकप्रतियोगितायां वह्न्यादिसमानाधिकरणाभावप्रतियोगितानवच्छेदकशुद्धह्रदभेदत्वाद्यवच्छिन्नत्वमप्यक्षतम्। शुद्धह्रदभेदादिरूपतदभावप्रतियोगितातो विशिष्टह्रदभेदादिरूपप्रतियोगिताया अनतिरेकादित्यव्याप्तिरसम्भवो वेति वाच्यम् ह्रदभेदाद्यात्मकप्रतियोगितायां शुद्धह्रदत्वावच्छिन्नत्वसत्त्वेऽपि विशेषणवैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभावोपगमादिति।

तदसत्। विशेषणवैशिष्ट्यावच्छेदेनावच्छेद्यत्वाभावोपगमे धूमवान् वह्नेरित्यादावतिव्याप्तिवारणस्याऽप्यशक्यत्वात्। अयोगोलकभेदादिरूपायां शुद्धायोगोलकभेदत्वाद्यवच्छिन्नायामपि प्रतियोगितायां किञ्चिद्विशेषणवैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभावसम्भवात्।

न च यादृशयादृशरूपेण प्रतियोगितानां हेतुसमानाधिकरणा-

भावीयत्वं तादृशतादृशरूपावच्छेदेन तथाविधावच्छेद्यत्वाभावाविवक्षणान्न दोष इति वाच्यम् । एवं सत्यभावद्वयानुपादानेऽपि सामञ्जस्यात् शुद्धे विशिष्टायोगोलकभेदत्वावच्छेद्यत्वासत्त्वात् । विशिष्टे तत्सत्त्वेनैव शुद्धे तत्सत्त्वे विशिष्टेऽयोगोलकभेदत्वाद्यवच्छेद्यत्वाभावसत्त्वात् शुद्धेऽप्ययोगोलकभेदादिरूपप्रतियोगित्वे तादृशाभावसत्ताया दुर्वारत्वादभावद्वयोपादानेऽप्यतिव्याप्तितादवस्थ्यात् । प्रतियोगिताधर्मिकावच्छेद्यत्वाभावघटितव्याप्तिपक्षे प्रमेयवह्निमान् धूमादित्यादौ साध्यतावच्छेदकनिरूपितस्वरूपसम्बन्धरूपावच्छेद्यत्वाप्रसिद्ध्या तत्र तदभावघटितलक्षणासम्भवात्, निरुक्तपारिभाषिकावच्छेद्यत्वाभावघटितलक्षणस्याऽऽदरणीयत्वेऽपि वह्निमान् धूमादित्यादौ लाघवात्स्वरूपसम्बन्धरूपावच्छेद्यत्वाभावघटितव्याप्तिरेवोचिता, साध्यतावच्छेदकभेदेन व्याप्तिभेदात् ।

न चैवमनवच्छेदकत्वघटितव्याप्तिपक्षेऽपि धूमवति क्वचिद्वह्न्यभावसत्त्वेऽपि प्रमेयवह्नित्वं गौरवाद्धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति भ्रमदशायामनुमितिवारणाय गुरुधर्मावच्छिन्नसाध्यकव्याप्तिशरीरे पारिभाषिकावच्छेदकत्वाभावस्यैव निवेशेऽपि वह्नित्वाद्यवच्छिन्नसाध्यकव्याप्तिशरीरे स्वरूपसम्बन्धरूपावच्छेदकत्वाभाव एव लाघवान्निवेशयितुमुचित इति वाच्यम् । धूमादिसमानाधिकरणाभावप्रतियोगितीयस्वरूपसम्बन्धरूपावच्छेदकत्वाभावस्य धूमादिव्यापकतानवच्छेदककम्बुग्रीवादिमत्त्वादिसाधारणतया व्यापकतावच्छेदकतात्मकत्वेन वह्नित्वादिधर्मिकानवच्छेदकत्वज्ञानस्याऽप्यहेतुत्वादिति केषाञ्चिन्मतमाह । यत्रेति । यद्रूपावच्छिन्नसाध्यके इत्यर्थः । प्रमेयवह्नित्वादौ गौरवप्रयुक्तानवच्छेदकत्वग्रहदशायां भ्रान्तानां द्रव्यत्वादिव्यभिचारिलिङ्गेन तद्रूपावच्छिन्नसाध्यकानुमितेरनुरोधेन॰ सल्लिङ्गकलघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकानुमितावप्यवच्छेद्यत्वाभावघटितव्याप्तिपक्षे पारिभाषिकावच्छेद्यत्वाभावज्ञानमेव यद्यपि हेतुस्तथाऽपि वास्तविकी व्याप्तिः सङ्केतावेवेत्यभिप्रायेण सङ्केतावित्युक्तम् ।

वदन्तीत्यस्वरसः सूचितः । तद्बीजं च यदि गुरुधर्मावच्छिन्नसाध्यकस्थले पारिभाषिकावच्छेद्यत्वाभावज्ञानादनुमितिस्तदा वह्नित्वावच्छिन्नसाध्यकस्थले तज्ज्ञानान्नानुमितिरित्युक्तेरनुभवविरोधे·

नाऽसम्भवात् । एकजातीयपरामर्शसत्त्वे विषयस्वभावात् क्वचि- देवानुमितिः क्वचिन्नेत्यननुभवात् । अन्यथा यत्र व्यतिरेकिणि के- वलान्वयित्वभ्रमदशायां नानुमितिस्तादृशव्यतिरेकिसाध्यके सा- ध्यवदन्यावृत्तित्वमेव व्याप्तिर्न तु व्यापकसामानाधिकरण्यं गौ- रवादित्युक्तिसम्भवेन मूलकृतो व्यापकसामानाधिकरण्यमाल- म्ब्य सिद्धान्तप्रणयनविरोधापातात् । एवं समवायेन भेदप्रति- योगितावच्छेदकजातित्वाद्यवच्छिन्नसाध्यकानुमितौ स्वरूपसम्बन्ध- रूपावच्छेद्यत्वाभावज्ञानस्य हेतुत्वे हेतुसमानाधिकरणात्यन्ताभा- वप्रतियोगितायां नियत्वादेर्वैयर्थ्येन समवेतत्वादिकमेवावच्छे- दकं न तु तद्घटितजातित्वादिकमिति ज्ञानदशायां हेतौ त- दवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकरण्यग्रहेऽपि व्यभिचारिहेतुनाऽभ्रान्तानां जातित्वाद्यवच्छिन्नसाध्यकानुमित्या- पत्तिः, भेदप्रतियोगितायां जातित्वाद्यवच्छेद्यत्वप्रसिद्ध्या तदभाव- ज्ञानस्य प्रमात्वात् । एवमभावप्रतियोगितावच्छेदकमहानसीयवह्नि- त्वादेर्वह्नित्वादिसमनैयत्यभ्रमेण गौरवप्रयुक्तानवच्छेदकत्वभ्रमदशायां हेतौ तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकर- ण्यग्रहेऽपि महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकानुमितिप्रसङ्ग इति तद्रूपावच्छिन्नसाध्यकानुमितावपि स्वरूपसम्बन्धरूपावच्छेद्यत्वा- भावज्ञानस्य हेतुत्वासम्भवः । वस्तुतो भेदप्रतियोगितायां प्रसिद्ध- स्य स्वरूपसम्बन्धरूपमहानसावृत्तिद्रव्यत्वाद्यवच्छिन्नत्वस्य संयो- गसम्बन्धावच्छिन्नत्वस्य च द्वयोर्व्यतिरेको धूमादिसमानाधिक- रणाभावप्रतियोगितासामान्ये वर्तते, संयोगादिसम्बन्धावच्छि- न्नप्रतियोगितायाः शुद्धमहानसावृत्तित्वादिनैवाऽवच्छेदादिति स्वावच्छेद्यत्वघटितोभयाभाववद्धूमादिसमानाधिकरणाभावप्रति- योगितासामान्यकत्व धूमादिव्यापकतानवच्छेदकमहानसावृत्ति- द्रव्यत्वादिसाधारणतया न व्यापकतावच्छेदकतास्वरूपमिति व- ह्नित्वादावपि तज्ज्ञानं नानुमितिजनकम् । अवच्छेदकत्वाभावघ- टितव्याप्तिपक्षेऽपि वह्नित्वाद्यवच्छिन्नसाध्यकस्थले स्वरूपसम्ब- न्धरूपावच्छेदकत्वाभावग्रहस्य हेतुताया एतादृशयुक्तेरेवाऽनवका- शात्—इत्यादिकं बोध्यम् ।

केचित्तु पारिभाषिकावच्छेद्यावच्छेदकभावघटितव्याप्त्युक्ति-

रीत्या प्रतियोगिवैयधिकरण्यानिवेशेन लाघवात् सर्वत्रैव तद्घटितव्याप्त्यादर उचित इत्यस्वरसबीजमाचक्षते ।

गुरुधर्मस्याऽपि स्वरूपसम्बन्धरूपमवच्छेदकत्वं व्यवस्थाप्य तद्घटितव्याप्तिं परिष्कुर्वतो मतमाह ।

(दी०) गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्नास्तीति प्रतीतिबलाद् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः । न चास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनम्, तथाविधयत्किञ्चिद्व्यक्तिसत्त्वे एव तादृशप्रतीतेरनुदयात् । अत एव एकघटवति भूतले कम्बुग्रीवादिमान्नास्तीति शब्दो न प्रमाणम्, प्रमाणं च घटसामान्यशून्ये ।

(गा०) गौरवप्रतिसन्धानदशायामिति । घटत्वाद्यपेक्षया कम्बुग्रीवादिमत्त्वादौ गुरुत्वज्ञानदशायामित्यर्थः । इति प्रतीतिबलादिति । इत्याकारिकायाः कम्बुग्रीवादिमत्त्वाद्यात्मकप्रतियोगिविशेषणांशे प्रतियोगितावच्छेदकत्वावगाहिन्याः प्रतीतेर्बलादित्यर्थः । भवति चेति शेषः । गौरवस्याऽवच्छेदकताव्यावर्तकत्वे गौरवज्ञानस्याऽवच्छेदकताग्रहविरोधिताप्रसङ्गेन तद्दशायां तादृशप्रतीत्यनुपपत्तेरिति भावः । उक्तप्रतीतेरवच्छेदकतांशे प्रमात्वस्य सविवादतया तादृशप्रतीतेरवच्छेदकतासाधकत्वमुपेक्ष्य गौरवज्ञानकालीनतादृशप्रतीत्यनुपपत्तिः साधकतयोपन्यस्तेति ध्येयम् ।

न च कम्बुग्रीवादिमान्नास्तीति प्रतीतावच्छेदकत्वं न प्रकारः, अपि तु संसर्ग एवेति तदंशे सम्बन्धविशेषावगाहित्वतत्प्रकारकत्वघटितभ्रमत्वमप्रसक्तमिति वाच्यम् । भ्रमत्ववत्प्रमात्वस्याऽपि प्रकारतादिघटितत्वेन प्रमात्वविवादानपायात् ।

वस्तुतस्तु कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वमभावे प्रतियोगिसम्बन्धः । कम्बुग्रीवादिमत्त्वावच्छिन्नत्वाप्रसिद्धिपक्षेऽपि विशेष्यविशेषणभावापन्नानां प्रतियोगित्वावच्छिन्नत्वकम्बुग्रीवादिमत्त्वानां सम्बन्धघटकता, एवं च तेषां परस्परसम्बन्धभानमप्यावश्यकम्, तेन विना विशेष्यविशेषणभावानिर्वाहात् । संसर्गसंसर्गो न विशिष्टधीविषय इति प्रवादस्य च संसर्गघटकत्वस्व-

न्तराविशेषणत्वेन यस्य संसर्गता तत्संसर्गो न भासते इत्यर्थः । तथा चोक्तप्रतीतेरवच्छिन्नत्वे कम्बुग्रीवादिमत्त्वभ्रमत्वं गुरुधर्मस्याऽनवच्छेदकत्ववादिनां निष्प्रत्यूहमेव, संसर्गताविशेषसाधारणसंसर्गविशेषावच्छिन्नविषयतात्वरूपेणैव प्रकारताया भ्रमत्वघटकत्वोपगमात् । प्रकारतात्वं पुनरखण्डधर्मान्तरं संसर्गताव्यावृत्तमेवातो न संसर्गविशेषभाने तज्ज्ञानापेक्षा, तादृशधर्मपुरस्कारेणैव विषयताविशेषस्य विशेषणज्ञानजन्यतावच्छेदकत्वात् । इत्थं च नोक्तप्रतीतेः प्रतियोगितायां गुरुधर्मावच्छिन्नत्वसाधकतेत्यवधेयम् ।

गौरवप्रतिसन्धानकालीनायां कम्बुग्रीवादिमान्नास्तीत्याकारिकायामपि प्रतीतौ कम्बुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं न भासते, अपि तु तत्सामानाधिकरण्यमात्रमित्याशङ्कते । न चेति । तत्प्रतियोगिकेति । कम्बुग्रीवादिमत्त्वाद्याश्रयप्रतियोगिकेत्यर्थः । अवलम्बनम् । विषयः । तथाविधेति । कम्बुग्रीवादिमत्त्वाश्रय इत्यर्थः । तादृशप्रतीतेरनुदयादिति । तथा च तत्तत्प्रतियोगिकाभावमात्रावलम्बनत्वे यत्किञ्चिद्घटादिमत्यपि तथाविधघटाद्यभावस्याबाधेन तादृशप्रतीतिः स्यादेवेति भावः । अत एवेति । यत एव कम्बुग्रीवादिमान्नास्तीत्यादिप्रतीतौ कम्बुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं नियमतो भासते, गुरुरपि च धर्मः प्रतियोगितावच्छेदकोऽत एवेत्यर्थः । एकघटवतीति । प्रतिपादकत्वं शब्दान्वयितया सप्तम्यर्थः । भूतले इति ज्ञानाकारान्तर्गतम् । एकघटवति, भूतले, इत्यनयोर्मिथोऽन्वये तदुत्तरमत्रेति ज्ञानाकारान्तर्गतं पूरणीयम् । न प्रमाणमिति । तादृशप्रतीतेरवच्छेदकत्वावगाहित्वानियमे एतादृशशब्दजन्यतादृशप्रतीतेः प्रमात्वस्याऽपि सम्भवेन प्रमाणमपि स्यादित्युपष्टम्भसङ्गतिः । प्रमाणं चेति । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे बाधितावच्छेदकत्वग्राहकतया तादृशशब्दोऽपि प्रमाणं न स्यादित्युपष्टम्भः ।

एतेन गुरुधर्मस्यावच्छेदकतायां युक्त्यन्तरमपि दर्शितम् । न च कम्बुग्रीवादिमान्नास्तीति प्रतीतौ कम्बुग्रीवादिमत्त्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमेव संसर्गतया भासते इत्युपेयम्, तथा च गुरोरनवच्छेदकत्वेऽपि नोक्तदोषावसर इति वाच्यम् । तत्तत्प्रतियोगितावच्छेदकभेदानामनन्तानां

सम्बन्धघटकत्वे मानाभावात्, गौरवाच्च । गुरुधर्मस्यानवच्छेदकत्वे द्रव्यं गुणाद् गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वस्य द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वरूपसमनियतधर्मापेक्षया गुरोः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिरपीत्याह । न चेदिति ।

(दी०) न चेदं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः, गुणादिगुणकर्मान्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितायाः लाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात् । तत्तदवच्छेदकत्वव्यक्तीनां च प्रातिस्विकरूपेणाभावानां युगसहस्रेणाऽपि ज्ञातुमशक्यत्वात् ।

(गा०) एवम् । गुरोरवच्छेदकत्वम् । लघुरूपेति । विशेषणानवच्छिन्नद्रव्यत्वादीत्यर्थः । अधिकगौरवप्रदर्शनाय विशिष्टसत्तारूपहेत्वनुसरणम् । लाघवेनेति । गुणत्वाद्यवच्छिन्नप्रकारेण हेतुसन्निवेशापेक्षया निर्विशेषणकद्रव्यत्वादिपुरस्कारेण तन्निवेशे लाघवादित्यर्थः ।

ननु हेतुसमानाधिकरणाभावप्रतियोगित्वावच्छेदकत्वानां तादृशावच्छेदकत्वत्वेन नाऽभावो व्याप्तौ निवेशनीयः किन्तु तत्तद्व्यक्तित्वेन सर्वेषामभावकूट एवेति तादृशावच्छेदकतात्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेऽपि न क्षतिरित्यत आह । तत्तदवच्छेदकत्वेति। प्रातिस्विकेति । तत्तद्व्यक्तित्वेनेत्यर्थः । ज्ञातुमशक्यत्वादिति । अनन्तानां तादृशावच्छेदकत्वरूपप्रतियोगिनां प्रतियोगितावच्छेदकतत्तद्व्यक्तित्वेन ज्ञानासम्भवादिति भावः । निर्विशेषणकस्यघटितधर्मापेक्षया विशिष्टस्वघटितस्य गौरवेणानवच्छेदकत्वनिबन्धनामप्यव्याप्तिमाह ।

(दी०) एवं द्रव्यत्वत्वादिविशिष्टद्रव्यत्वादेरव्याप्यताप्रसङ्गोऽनुसन्धेयः । उपदर्शितप्रकारस्यापि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् । अत एव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि सङ्गच्छते इत्यपि केचिदिति कृतं पल्लवितेन ॥

(गा०) एवमिति । रीत्येति शेषः । अव्याप्यत्वप्रसङ्गो ऽनुसन्धेय

इति। अतो गुरोरवच्छेदकत्वमावश्यकमेवेति शेषः। अत्रैव हेत्वन्तरमप्याह। उपदर्शितप्रकारस्याऽपीति। अपिर्दुर्ज्ञेयत्वादित्यनन्तरं योज्यः। उपदर्शितप्रकारस्य। मेयधूमवान् वह्नेरित्यादावतिव्याप्तिवारणायानुसृतस्य पारिभाषिकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य। स्वत्वादीत्यादिना प्रातिस्विकरूपावच्छिन्नतत्तत्प्रतियोगितापरिग्रह। दुर्ज्ञेयत्वादिति। तथा च गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे गुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यावृत्तःशक्यज्ञानकव्याप्तिनिर्वचनमप्यशक्यं स्यादिति भावः। उक्तस्थले हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतात्वस्य गुरुतया स्वरूपसम्बन्धरूपप्रतियोगितावच्छेदकत्वासम्भवेऽपि उक्तरीत्या पारिभाषिकतदीयप्रतियोगितावच्छेदकत्वस्यैव व्याप्तौ निवेशनीयतया न तदवच्छिन्नाभावाप्रसिद्धिनिबन्धनाव्याप्तिरित्याशङ्कया उपदर्शितेत्यादिग्रन्थावतरणं तु न सम्भवति। तादृशावच्छेदकत्वत्वनिष्ठतथाविधावच्छेदकतायां स्वपदेन तन्मात्रस्योपादानात्। तादृशावच्छेदकत्वत्वविशिष्टव्यापकमावच्छेदकावच्छिन्नाभावनिवेशस्य पर्यवसितत्वात्। व्यभिचारित्वमपि सङ्गच्छते इति। व्यभिचारस्य साध्यतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वरूपत्वाद् गुरुधर्मस्यानवच्छेदकत्वे घ्राणग्राह्यगुणत्वाद्यवच्छिन्नप्रतियोगिन्याप्रसिद्धा तदनुपपत्तेरिति भाव।

न च साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकरण्यमेव व्यभिचार इत्युक्तस्थले गन्धत्वाद्यवच्छिन्नाभावमादाय व्यभिचार उपपादनीय इति वाच्यम्। व्यापकतावच्छेदकताशरीरे साध्यतावच्छेदकविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानां विशिष्योपादेयतया तत्तत्प्रतियोगितावच्छेदकभेदकूटस्यान्तर्भावनीयत्वेन व्यभिचारज्ञानस्याऽशक्यतया ऽनुमितिविरोधित्वासम्भवेन व्यभिचारस्य हेत्वाभासतानुपपत्तेः।

एतेन व्यभिचारज्ञानाभावसहकृतसामानाधिकरण्यज्ञानस्य साक्षादनुमितिहेतुतामतावलम्बनासम्भवोऽपि दर्शितः। इदमुपलक्षणम्। जलं घ्राणग्राह्यगुणवत् उत्पत्तिकालावच्छिन्नो घटो घ्राणग्राह्यगुणवानित्यादौ बाधानुपपत्तिरपि द्रष्टव्या॥

इति अनुमानगादाधर्यामवच्छेदकत्वनिरुक्तिप्रकरणम्॥

अथ सामान्याभावप्रकरणम् ।

व्याप्तिलक्षणावसरे सामान्याभावपार्थक्यव्यवस्थापनमुक्तलक्षणाव्याप्त्यतिव्याप्तिशङ्कानिराकरणपरतया सङ्गमयति । नन्विति ।

(दी०) ननु ये एव मिलिता वह्न्यभावा जलह्रदादौ वह्निर्नास्तीति बुद्धिं जनयन्ति, त एव प्रत्येकं धूमवति महानसादौ वर्तन्ते, तत्र च तेषां स्वस्वानवच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यनिरूपिका याः प्रतियोगितास्तदवच्छेदकमेव वह्नित्वमतोऽव्याप्तिः ।

(गा०) अनुगतधर्मस्य वह्नित्वादेस्तदभावप्रतियोगितावच्छेदकताया आवश्यकत्वप्रदर्शनाय तादृशाभावानां वह्निर्नास्तीति धीविषयत्वकथनम् । तादृशप्रतीत्या प्रतियोगिविशेषणवह्नित्वांशे प्रतियोगितावच्छेदकत्वावगाहनात् । अन्यथा प्रतियोगितायामवच्छिन्नत्वस्यैवासिद्धेरिति भावः । विशेषाभावानां तादृशबुद्धिविषयत्वे एकविशेषवत्यपि महानसादौ विशेषान्तराभावमादाय तादृशधीप्रसङ्ग इत्याशङ्कावारणाय मिलिता इति । समुदिता इत्यर्थकम् । तथा च महानसादौ वह्निप्रतियोगिकयावदभाववत्त्वविरहान्नातिप्रसङ्ग इति भावः ।

अथ तथाविधयावदभावत्वेनाभावानां नोक्तप्रतीतिविषयतासम्भवः, यावत्त्वस्य बुद्धिविशेषविषयत्वरूपस्याऽनुपस्थितावपि तादृशप्रतीत्युदयात् । नापि वह्न्यभावत्वमात्रेण यावतां वह्न्यभावानाम्, प्रकारावैलक्षण्येन पर्वतीयवह्निर्नास्तीति प्रत्ययात्तद्वैलक्षण्यानुपपत्तेः । वह्न्यभावानवगाहिनस्तत्त्वेनाभावान्तरभ्रमस्य वह्निर्नास्तीत्याकारकतानुपपत्तेश्चेति चेन्न । वह्नित्वावच्छिन्नप्रतियोगिताकत्वेन तादृशसम्बन्धेन वह्निप्रकारेण वाऽभावानां तादृशप्रतीतिविषयत्वोपगमात् । न चैवं महानसे वह्निर्नास्तीत्याद्याकारिकाऽपि प्रतीतिरबाधितयत्किञ्चिद्विशेषाभावमवलम्बमाना प्रमा

स्यादिति वाच्यम् । ईदृशातिप्रसङ्गस्य ग्रन्थकृतैवाग्रे समाधास्यमानत्वात् । धूमवति महानसादाविति । यथाश्रुतमूललभ्यमभावे हेतुसामानाधिकरण्यमुपपादयितुमुक्तम् ।

ननु सामान्यधर्मस्य विशेषाभावप्रतियोगितावच्छेदकत्वे हेतुमतस्तदवच्छिन्नाधिकरणत्वनियमेन स्वावच्छेदकावच्छिन्नानाधिकरणहेत्वधिकरणकाभावीयत्वरूपविशेषणाक्रान्तत्वं न विशेषाभावप्रतियोगितानामिति कथं ता उपादायाव्याप्तिप्रसक्तिरित्याशङ्कायामाह । तत्र चेति । तत्र । धूमवति महानसादौ । वैयधिकरण्यान्वयिघटितत्वं सप्तम्यर्थः । तेषाम् । अभावानाम्, एतत् प्रतियोगिता इत्यत्र सम्बध्यते । स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यनिरूपिकाः । स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नानाधिकरणधूमाधिकरणिकाः । तथा च स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नानाधिकरणधूमाधिकरणवृत्तितत्तद्वन्ह्यभावीया याः प्रतियोगिता इति समुदितार्थः । स्वं प्रतियोगिता । सामान्याभावानतिरिक्तनामते तत्तद्वह्नित्वाद्यवच्छिन्नवन्द्वेदातिरिक्तस्य वह्नित्वादिसाधारणतत्तत्प्रतियोगितावच्छेदकत्वविशिष्टावच्छिन्नवन्द्वेदस्याभावात् प्रतियोगिवैयधिकरण्यशरीरे तादृशभेदानिवेशेऽपि तत्तद्वह्नित्वावच्छिन्नवन्द्वेदमादाय विशेषाभावेषु प्रतियोगिवैयधिकरण्यस्य शक्योपपादनत्वादिति भावः ।

एतच्च सामान्याभावस्य विशेषाभावकूटानतिरिक्तत्ववत् सामान्यधर्मावच्छिन्नप्रतियोगिताया अपि विशेषधर्मावच्छिन्नप्रतियोगिताकूटानतिरिक्तत्वमित्यभिप्रायेणाभिहितम् । यदि पुनरभाव एव नातिरिच्यते प्रतियोगिता त्वतिरिच्यत एव, अन्यथा सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तितामुपगम्यातिप्रसङ्गवारणसम्भवादिति मतम्, तदाऽपि तत्तद्वह्नित्वावच्छिन्नवन्द्वेदानभ्युपगमेन हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वरूपं प्रतियोगिवैयधिकरण्यनिरूपकत्वं सामान्यधर्मावच्छिन्नप्रतियोगितायामक्षतमेवेत्यव्याप्तिर्द्रष्टव्या । एतद्रूपवानेतद्रसादित्यादावेकवृत्तिसाध्यके लक्षणगमनायासम्भव उक्तः । नानाधिकरणवृत्त्येकव्यक्तिसत्त्वादिसाध्यकेऽपि सत्तात्वाद्यवच्छिन्नाभावस्य तत्तदधिकरणवृत्तित्वविशिष्टतदभावकूटानतिरिक्ततयाऽव्याप्तिर्द्रष्टव्या ।

अथ स्वावच्छेदकविशिष्टवन्द्वेदसमुदायवत्त्वरूपं स्वावच्छेदक-

स्वविशिष्टावच्छिन्नप्रतियोगितावच्छेदकनाकत्वविशिष्टप्रतियोगिताकत्वविशिष्टभेदवत्त्वं वाऽनधिकरणान्तार्थः प्रतियोगिवैयधिकरण्यशरीरे निवेश्यः। धूमवति महानसादौ च तादृशसमुदायान्तर्गतमहानसादिभेदस्यासत्त्वान्न तत्र वह्न्यभावस्य प्रतियोगिवैयधिकरण्यमित्याशङ्कते। न चैवमिति।

(दी०) न चैवं वह्नित्वावच्छिन्नस्य तद्वृत्तित्वान्न तथात्वम्। तथा सति ह्रदवृत्तिधूमाभावप्रतियोगितावच्छेदकह्रदावृत्तित्वावच्छिन्नस्य वह्निमदयोगोलकवृत्तित्वादतिव्याप्तेः।

(गा०) एवम्। वह्नित्वादेर्विशेषाभावप्रतियोगितावच्छेदकत्वे। तद्वृत्तित्वात्। महानसादिवृत्तित्वात्। न तथात्वम्। न विशेषाभावप्रतियोगितानां महानसादौ प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकत्वम्। तथा च नोक्ताव्याप्तिरिति भावः। तथा सतीति। तदधिकरणे स्वावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नसत्त्वे एव प्रतियोगितायास्तदधिकरणे स्वावच्छेदकावच्छिन्नवैयधिकरण्यानिरूपकत्वमित्यर्थः। ह्रदवृत्तीति धूमाभावान्वयि। तदुक्तिश्च ह्रदे ह्रदावृत्तिर्नास्तीति धीविषयह्रदनिष्ठह्रदावृत्तित्वस्य पदार्थविशेषाभावकूटस्य धूमाभावघटितत्वलाभाय, तावता ह्रदावृत्तित्वस्य तत्प्रतियोगितावच्छेदकत्वे कथन्तानिवृत्तिः। अतिव्याप्त्यापत्तेरिति। धूमवान् वह्नेरित्यत्रेत्यादिः। इदमपि विशेषधर्मावच्छिन्नप्रतियोगिताकूटस्यैव सामान्यधर्मावच्छिन्नत्वमित्यभिप्रायेण। अन्यथा ह्रदावृत्तित्वादेर्धूमत्वाद्यवच्छिन्नप्रतियोगितानवच्छेदकतया धूमत्वाद्यवच्छिन्नप्रतियोगितायाः स्वावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकत्वोपपत्तेः।

न च धूमाभावस्येव घटजलाद्यभावस्यापि घटजलादिनिष्ठह्रदपर्वताद्यवृत्तित्वं प्रतियोगितावच्छेदकमित्ययोगोलके प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावाप्रसिद्ध्या अतिव्याप्त्यसङ्गतिरिति वाच्यम्। संयोगेन गोत्वाभावादावेव उभयाभावघटितस्य साध्यतावच्छेदकसंयोगसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य प्रसिद्धेः।

न च गोत्वादेरपि ह्रदावृत्तितया ह्रदाद्यवृत्तित्वरूपतत्प्रतियोगितावच्छेदकावच्छिन्नस्य वह्न्यादेः संयोगेनायोगोलकवृत्तित्वान्न

संयोगेन प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमिति वाच्यम्। संयोगसम्बन्धावच्छिन्नप्रतियोगिताकस्य गोत्वाद्यभावस्य केवलान्वयितयाऽव्यावर्त्तकत्वेन तस्य ह्रदावृत्तिसामान्याभावप्रतीतिविषयताया निर्युक्तिकत्वात्। धूमाद्यभावशून्ये महानसादौ तादृशसामान्याभावप्रतीतेः प्रमात्ववारणाय संयोगेन वृत्तिमतां धूमादीनामेव तादृशसम्बन्धावच्छिन्नाभावानां तादृशसम्बन्धावच्छिन्नह्रदावृत्तिसामान्याभावघटकत्वोपगमात्।

केचित्तु वह्निमान् धूमादित्यादावप्युक्तक्रमेण प्रतियोगिव्यधिकरणाभावाप्रसिद्धिभयेन प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेतुमन्निष्ठाभावप्रतियोगिताधर्मिकसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नत्वोभयाभावघटितव्याप्तिरेवाऽऽदरणीया। तथा च येन सम्बन्धेन हेत्वधिकरणे पर्वतादौ किमपि वस्तु न वर्तते तादृशेन विषयितासम्बन्धेन, जन्यमात्रस्य कालोपाधित्वानभ्युपगमे कालिकसम्बन्धेन च घटाद्यभाव एव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणः प्रसिद्ध इति तत्प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाभावेन वह्निमान् धूमादित्यादाविव धूमवान् वह्नेरित्यादावपि लक्षणसङ्गमनं सम्भवतीत्याशयेन तदभिधानम्।

न चैवमनुगतरूपस्य विशेषाभावप्रतियोगितानवच्छेदकत्वे तस्याभावप्रतियोगितामात्रे एवानवच्छेदकतया तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यप्रेऽतिव्याप्त्यभिधानविरोधः, तद्रूपस्य प्रतियोगितासामान्यानवच्छेदकत्वे तद्रूपावच्छिन्नत्वस्याप्रसिद्ध्या प्रतियोगिताधर्मिकोभयाभावघटितलक्षणगमनासम्भवादिति वाच्यम्। अनुगतधर्मस्याभावप्रतियोगितानवच्छेदकत्वे तद्रूपावच्छिन्नत्वस्याप्रसिद्ध्या तदवच्छिन्नसाध्यकेऽव्याप्तिरिति तन्मते साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितमेव लक्षणमादरणीयम्, तन्मते वह्न्यादेः कथंचिदपि घटाद्यभावप्रतियोगितावच्छेदकावच्छिन्नत्वासम्भवेन घटाद्यभावस्यैव तदवच्छिन्नव्यधिकरणस्य प्रसिद्ध्या अव्याप्त्यनवकाशादित्याशयेनाग्रे तादृशातिव्याप्त्यभिधानादिति वदन्ति।

(चि०) सामान्यावच्छिन्नप्रतियोगिताकाभावः पृथगेव । अन्यथा सकलप्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्वे चाऽवगते वायौ रूपं न वा, वायू रूपवान्नवेति संशयो न स्यात् । विशेषाभावकूटस्य निश्चितत्वात् ॥

(दी०) अथानुगतं रूपं तत्तदभावप्रतियोगितानां नावच्छेदकम् । अनवच्छेदकमेव तदभावप्रतियोगितायाः, अभावान्तरे मानाभावात् । तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरत आह । सामान्येति । संशयान्यथानुपपत्तिं प्रमाणयति । अन्यथेति ।

(गा०) अथ वह्नित्वादेरनुगतधर्मस्य प्रत्येकं तत्तद्वह्न्यभावप्रतियोगिताकूटातिप्रसक्ततया तदवच्छेदकत्वं न सम्भवतीति नोक्तक्रमेण वह्निमान् धूमादित्यादावव्याप्तिरित्याशङ्कते–अथेति ।

अभावप्रतियोगितायाः । अभावप्रतियोगितासामान्यस्य । अभावान्तरे। तत्तद्विशेषाभावातिरिक्ताभावे । मानाभावादिति । वह्निर्नास्तीति बुद्धेर्वह्निप्रतियोगिकयावदभावत्वेन तत्तद्वह्न्यभावसमुदाय एव विषय इत्यभिमानः। तद्रूपावच्छिन्नसाध्यके । अनुगतरूपावच्छिन्नसाध्यके । उक्तसाध्ये प्रमाणमनुपन्यस्य तर्कमात्रप्रदर्शने न्यूनता स्यादिति कथमन्यथेत्यादिग्रन्थस्य सामान्याभावो यदि विशेषाभावेभ्यो नातिरिच्यते तदा विशेषाभावकूटनिश्चयदशायां सामान्यसंशयो न स्यादिति विपयपरिशोधकतर्कपरस्यापि प्रमाणसूचकतामाह । संशयान्यथानुपपत्तिमिति । संशयस्य । सामान्याभावरूपपक्षनिष्ठविशेषाभावकूटनिश्चयकालीनसामान्यधर्मावच्छिन्नकोटिकसंशयकोटित्वस्य । अन्यथानुपपत्तिम् । विशेषाभावपार्थक्याभाववति असत्त्वरूपां पार्थक्यसाधकव्याप्तिमित्यर्थः । प्रमाणयति । प्रमाणमाचष्टे । कृदन्तादाख्यानात् कृल्लुक् प्रकृतिप्रत्ययापत्तिः, प्रकृतिवच्च कारकमित्यत्र कृदन्तपदं भावकृदन्तपरमिति प्रकृते प्रमाणपदस्य करणकृदन्ततया कृल्लुक्प्रकृतिप्रत्ययापत्तिभ्यां प्रमापयतीत्येवं स्यादिति शङ्कानवकाशः । विपयपरिशोधकतर्क-

प्रदर्शनात्तत्प्रयोजकव्याप्तिलाभः । अन्यथानुपपत्तेर्न्यायमते पृथक् प्रमाणताविरहेऽपि तज्ज्ञानस्य व्याप्तिज्ञानरूपानुमानविधया प्रमाणत्वान्नासङ्गतिः । अनुपपत्तिपदस्य तज्ज्ञानपरत्वात् । अनुमानं च रूपत्वाद्यवच्छिन्नाभावो रूपत्वादिन्यूनवृत्तिधर्मावच्छिन्नाभावेभ्यस्तदवच्छिन्नन्यूनवृत्तिताअवच्छेदकधर्मावच्छिन्नाभावेभ्यो वा भिन्नः तादृशयावदभावनिश्चयकालीनतत्समानधर्मितावच्छेदकसमानाधिकरणसंशयकोटित्वात्, घटाद्यभाववदित्येतादृशं बोध्यम् । व्याप्तिश्च यत्सर्वा रूपत्वादिकमुपादाय सामान्यतो विशेषत एव वा, तथा सत्यपि घटाभावादिदृष्टान्तसौलभ्यात् । अत्र च सामान्याभावो विशेषाभावानतिरिक्तोऽपि तन्निश्चयकालीनसंशयकोटिः स्यादित्यप्रयोजकत्वशङ्काया नावकाशः । सामान्याभावबुद्धेर्विशेषाभावकूटविषयकत्ववादिना पूर्वपक्षिणा विशेषाभावेष्वेव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य स्वीकरणीयतया सामान्यधर्मावच्छिन्नाभावविषयकनिश्चयत्वरूपस्य तादृशयावदभावनिश्चयत्वरूपस्य वा सामान्यधर्मावच्छिन्नविशिष्टबुद्धिप्रतिबन्धकतावच्छेदकस्य वायौ रूपं नास्तीति बुद्धाविव वायौ पार्थिवादिरूपं नास्तीति बुद्धावपि तन्मते सत्त्वेन तादृशबुद्धेरिवेदृशबुद्धेरपि वायौ रूपं न वेत्यादिसंशयविरोधिताया दुर्वारत्वात् । वायौ पार्थिवरूपं नास्तीति निश्चयकालीनसंशयकोटिजलीयरूपाभावे व्यभिचारवारणाय हेतावभावे यावत्त्वविशेषणम् । सामान्याभावस्य पार्थक्येऽपि विशेषाभावकूटनिश्चयदशायां घटाभावत्वरूपसामान्याभावत्वादिना रूपविशेषाभावकोटिकसंशयोत्पत्तेश्च व्यभिचार इति व्यधिकरणधर्मानवच्छिन्नत्वेन कोटित्वं विशेषणीयम् । अथवा तादृशनिश्चयकालीनसंशयः स्वप्रतियोगितावच्छेदकावच्छिन्नकोटित्वेन विशेषणीयः । विशेषाभावनिश्चयकालीनस्य सामान्याभावत्वेन तद्विशेषाभावसंशयस्य सामान्यधर्मपुरस्कारेणैव प्रतियोगिकोटिकतया सामान्यधर्मस्य विशेषाभावप्रतियोगितानवच्छेदकतया विशेषाभावस्य स्वपदेनोपादानासम्भवान्न व्यभिचारः ।

एतेन विशेषाभावाधिकरणकसामान्याभावस्याधिकरणस्वरूपत्वे सामान्याभावत्वेन विशेषाभावनिष्ठकोटितायाः व्यधिकरणधर्मानवच्छिन्नतया तादृशकोटितामादाय व्यभिचारस्य पूर्वकल्पे

दुर्वारत्वेऽपि न क्षतिः । द्वितीयकल्पे स्वप्रतियोगितावच्छेदकेत्यनेन यद्रूपावच्छिन्नप्रतियोगिताकत्वेन स्वस्य स्वभिन्नवृत्तिता तद्रूपस्य विवक्षितत्वाद्रूपत्वस्य विशेषाभावात्मकतन्निष्ठसामान्याभावप्रतियोगितावच्छेदकत्वेऽपि निरुक्तरूपत्वाभावेन तत्कल्पे उक्तदोषाभावात् ।

न चाभावे स्वभिन्नाभावानुपगमे विशेषाभावाधिकरणकसामान्याभावानामपि पक्षतावच्छेदकाक्रान्ततया अंशतो बाध इति वाच्यम् । रूपसामान्याभावत्वेन स्वभिन्नवृत्तेरभावस्य पक्षतया सामान्याभावपार्थक्यमते विशेषाभावानां सामान्याभावत्वेन स्वास्मिन्नेव वृत्तेरपक्षत्वात् । सामानाधिकरण्यमात्रेण साध्यसिद्धेरुद्देश्यत्वे अंशतो बाधस्यादोषत्वाच्च । न चैवमपि सामान्याभावाधिकरणकविशेषाभावस्य तदात्मकतया सामान्याभावे विशेषाभावभेदो बाधित इति वाच्यम् । रूपवद्वृत्तिविशेषाभावानां भेदस्य साधनीयत्वात् । सामान्याभावात्मकविशेषाभावस्य च रूपवद्वृत्तित्वात् । रूपवद्वृत्तित्वं रूपविशिष्टवृत्तित्वम्, अतो रूपसामान्याभावस्य समयभेदावच्छेदेन रूपोपलक्षितधर्मिवृत्तित्वेऽपि न क्षतिः । न च स्वनिष्ठरूपसामान्याभावाभिन्नो द्रव्यत्वाद्यभावस्तत्तदधिकरणवृत्तित्वविशिष्टद्रव्यत्वाद्यभावकूटातिरिक्तो रूपसामान्याभावत्वेन स्वभिन्नवृत्तिरभ्युपगम्यतां तस्य च तावता स्वनिष्ठरूपसामान्याभावात्मकतया पक्षतावच्छेदकाक्रान्ततया रूपवन्निष्ठाभावभिन्नतया च अंशतोऽर्थान्तरमिति वाच्यम् । अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् । वायुवृत्तित्वस्य रूपोपलक्षितधर्मिवृत्तित्वस्य वा पक्षतावच्छेदकनिवेशेनापि तद्वारणसम्भवात् । घटाभावत्वादिना रूपविशेषाभावकूटनिश्चयकालीनसंशयकोटित्वमादाय विशेषाभावे व्यभिचारवारणाय भ्रमभिन्नत्वेन हेतुघटकनिश्चयो विशेषणीयः ।

वस्तुतोऽभावेऽनुयोगितासम्बन्धेन प्रतियोगिभ्रमोऽप्रामाणिक एवेत्याशयेनेदमनुमानम् । अन्यथा घटाभावत्वादिना रूपाभावनिश्चयदशायां रूपसंशयोपपादकरीत्यैव पार्थिवत्वादिना रूपाभावकूटनिश्चयदशायामपि रूपसामान्याभावसंशयोपपत्तेरप्रयोजकोऽयं हेतुः स्यात् । न च प्रमात्वेन प्रतिबन्धकत्वमादृत्य प्रमात्वघटितहेतोरप्रयोजकत्वं निरसनीयमिति वाच्यम् । तथा सति रूपाभावत्वेन घटाभावादिभ्रमस्य रूपसंशयाविरोधित्वप्रसङ्गात् । तथा च

निश्चये भ्रमाभिन्नत्वविशेषणमनुपादेयमेव । परं तु शुद्धाभावत्वादिना अभावकूटनिश्चयकालीनसंशयकोटितामादाय व्यभिचारवारणाय प्रतियोगिधर्मितावच्छेदकतापन्नाभावत्वप्रकारको निश्चयो निवेद्यः। तादृशयावद्विशेषाभावनिश्चयत्वेन सामान्यधर्मावच्छिन्नकोटिकसंशयविरोधितया नाप्रयोजकत्वशङ्कावसरः ।

अथैवं सिद्धान्तिमते पार्थिवं जलीयं तैजसं च रूपं वायौ नास्तीत्याकारकोऽनुयोगितासम्बन्धेनाऽभावांशे प्रतियोगिप्रकारकनिश्चयो न रूपत्वव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभावविषयकः, अभावविशेषणे प्रतियोगिनि प्रकारतया भासमानधर्मे प्रतियोगितावच्छेदकत्वभानस्याऽऽवश्यकतया तद्विषयस्य पार्थिवरूपत्वादिसामान्यधर्मावच्छिन्नाभावस्य तत्तद्रूपत्वाद्यवच्छिन्नाभावानात्मकत्वात् । प्रतियोगिविशेषितत्तद्व्यक्तित्वाद्यनन्तधर्मावच्छिन्नाभावकूटविषयकश्च प्रत्ययो नासर्वज्ञस्य सम्भवति, तावद्रूपेण प्रतियोगितानामनुपस्थितेः, सर्वज्ञस्य च न संशय इति हेतुरयमसिद्धः ।

न चैकैकशस्तत्तद्धर्मावच्छिन्नाभावनिश्चयकालीनसंशयकोटित्वेन तत्तद्धर्मावच्छिन्नाभावभेदः सामान्यधर्मावच्छिन्नाभावे साधनीयः । अवच्छेदकावच्छेदेन साध्यस्य साधनीयतया पूर्वपक्षिणां एकविशेषाभावात्मकसामान्याभावे अपरविशेषाभावभेदसत्त्वेनांशतः सिद्धसाधनं न दोषायेति वाच्यम् । सिद्धान्तिमते सकलविशेषाभावनिश्चयकाले सामान्यसंशयस्याप्रामाणिकतया यादृशविशेषाभावव्यक्तिनिश्चयकाले न सामान्यसंशयस्तद्भेदसाधकहेतोरप्रसिद्ध्या तद्भेदस्य सामान्याभावे साधनासम्भवात् । पूर्वपक्षिणा सामान्यसंशये रूपादिप्रतियोगिकयावदभावनिश्चयत्वेनैव प्रतिबन्धकता स्वीकर्तव्या, न तु रूपत्वादिसामान्यधर्मावच्छिन्नाभावनिश्चयत्वेनैव । तथा च सामान्याभावस्यापार्थक्येऽपि एकैकविशेषाभावनिश्चयकाले सामान्यसंशयोपपत्त्यैकैकाभावनिश्चयकालीनसंशयकोटित्वहेतोरप्रयोजकताया दुर्वारत्वाच्च ।

एतेन विशेषाभावं पक्षीकृत्य सामान्यसंशयाव्यवहितपूर्ववर्तितत्समानधर्मितावच्छेदकसमानाधिकरणनिश्चयप्रकारत्वेन हेतुना सामान्याभावभेदः साधनीयः, संशयानुपपत्तिमित्यनेनापि विशेषा-

भावस्य तादृशनिश्चयप्रकारत्वानुपपत्तिरेव विवक्षितेत्यपि प्रत्युक्तम् । उक्तयुक्त्या सामान्याभावभेदस्य विशेषाभावे सत्त्वेऽपि एकैकाभावप्रकारकनिश्चयमादाय तत्रोक्तहेतोरुपपत्तेरप्रयोजकत्वस्य दुर्वारत्वात् ।

यत्तु रूपत्वावच्छिन्नाभाव पक्षीकृत्य पार्थिवजलीयतैजसरूपत्वावच्छिन्नप्रतियोगिविशेषिताभावनिश्चयकालीनतत्समानधर्मितावच्छेदककसमानाधिकरणसंशयकोटित्वेन हेतुना रूपद्वयुभयावृत्तिधर्मावच्छिन्नाभावभेदः साधनीय । वायुः पार्थिवजलीयतैजसरूपाभाववानित्यादिनिश्चयकालीन नीलरूपवान् वा वायुरित्यादिसंशयमादाय नीलत्वाद्यवच्छिन्नाभावे व्यभिचारवारणाय उभयावृत्तित्वमेव धर्मे निवेशित न तु रूपत्वव्याप्यत्वमिति । तदपि न । उक्तनिश्चयकालीन तद्रूपवान् वा वायुरित्यादिसंशयमादाय तद्रूपत्वावच्छिन्नाभावे व्यभिचारस्य दुर्वारत्वात् ।

उच्यते । रूपत्वावच्छिन्नकोटिकसंशयाव्यवहितप्राक्कालीनतत्समानधर्मितावच्छेदककसमानाधिकरणनिश्चयत्वावच्छेदेन धर्मितावच्छेदकविशिष्टे प्रतियोगिविशेषितरूपत्वावच्छिन्नाभावाविषयकत्वं साधनीय हेतुश्च रूपत्वावच्छिन्नकोटिकसंशयाविरोधिनिश्चयत्वम् । तत्समानधर्मितावच्छेदककत्वं च तद्धर्मितावच्छेदकताव्याप्यधर्मितावच्छेदकताकत्व तेन वायू रूपवान् वेत्यादिसंशयपूर्वकालीने वायौ पार्थिवरूपं नास्ति गगने च रूप नास्तीति समूहालम्बननिश्चये न बाधासिद्धी । व्याप्तिश्च यत्तद्भ्यां सामान्यतो विशेषतश्च सुग्रहा । सामान्याभावपार्थक्यमन्तरेण उक्तपक्षतावच्छेदकाक्रान्तवायौ पार्थिवादिरूप नास्तीत्यादिनिश्चये तद्रूप नास्तीति निश्चये च रूपत्वावच्छिन्नाभावाविषयकत्वानिर्वाहादतिरिक्तसामान्याभावपर्यवसानम् । संशयान्यथानुपपत्तिमित्यस्य विशेषाभावकूटनिश्चयस्य सामान्यसंशयाविरोधित्वानुपपत्तिमित्यर्थः । अभावेप्यतिरिक्ताभावः स्वीक्रियते इत्यभिप्रायको मूलग्रन्थ इति विशेषाभावस्य स्वनिष्ठसामान्याभावरूपतया बाधस्यानवकाश. । अन्यथा सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वावगाहिताया सामान्यसंशयप्रतिबन्धकतानवच्छेदकत्वे सामान्याभावस्य पार्थक्येऽपि विशेषाभावस्यापि स्ववृत्तिसामान्याभावात्मकतया तन्निश्चये सामान्यसंशयानुपपत्तेर्दुर्वारत्वात् । तदवगाहिताया. सामान्यसंशयप्रतिबन्धकतावच्छेदकत्व च सामा-

न्याभावापार्थक्येऽपि संशयोपपत्तेर्वक्ष्यमाणत्वात् ।

न च सामान्याभावपार्थक्ये तदवगाहित्वमनिवेश्यापि रूपवद्वृत्तिरूपाभावनिश्चयत्वेन प्रतिबन्धकत्वोपगमे स्वनिष्ठसामान्याभावात्मकविशेषाभावनिश्चयस्य सामान्यसंशयविरोधित्वमुपपद्यते इति वाच्यम् । तादृशरूपेण प्रतिबन्धकत्वे विशेषाभावे धर्मिणि सामान्याभावत्वेन तन्निश्चयस्य सामान्यसंशयाविरोधित्वप्रसङ्गात् ।

अस्तु वा विशेषाभावस्य स्वनिष्ठसामान्याभावरूपता, तथापि रूपसामान्याभावत्वेन वायुवृत्तियोंऽभावस्तदविषयत्वस्य साध्यतया बाधवारणं सम्भवतीति । वस्तुतः पार्थिवादिरूपाभाववान् वायुरित्याकारकनिश्चयव्यक्तिं विशिष्योपादाय तदनन्तरोत्पन्नसंशयकोटित्वेन तन्निश्चयविषयाभावभेदः सामान्याभावे साधनीयः, भावकोटिरेव सुलभो दृष्टान्तः । यन्निश्चयव्यक्त्यनन्तरक्षणोत्पन्नसंशये विशेषाभावस्य न विषयता सैव व्यक्तिरुपादेया अतो न बाधः, न वा व्यभिचारः । सामान्यधर्मावच्छिन्नकोटिकसंशये यावद्विशेषाभावनिश्चयत्वादिना प्रतिबन्धकत्वे सामान्याभावस्य तन्निश्चयविषयत्वमन्तरेण रूपत्वावच्छिन्नकोटिकत्वनियतत्तदवच्छिन्नाभावकोटिकसंशयत्वानिर्वाहाद्यात्राप्रयोजकत्वशङ्कावकाश इति दिक् ।

(दी०) वायाविति । यद्यप्ययं संशयो न वायुविशेष्यकः, तस्य विशेषणत्वेनोल्लेखात् । न वा रूपविशेष्यकः, तथा सति रूपतदभावयोर्विरोधिनोरकोटितायां प्रकृतानुपयोगप्रसङ्गात् । तथाऽपि वायू रूपवान् तदभाववान् वेति रूपतदभावकोटिकसंशये तात्पर्यम् । अन्त्यस्तु रूपवत्तदन्योन्याभावकोटिक इति नाभेद इति सम्प्रदायविदः ।

(गा०) अयम् । संशयः । वायौ रूपं न वेत्याकारकः प्रथमोक्तसंशयः । वायुविशेष्यक इति । रूपतदभावात्मकविरोधिप्रकारद्वयावच्छिन्नवायुनिष्ठविशेष्यताक इत्यर्थः । तस्य । वायोः । विशेषणत्वेनोल्लेखादिति । रूपाद्यंशे परम्परया स्वविशेषणकबोधजनकेनैव शब्देनाभिलापादित्यर्थः । सप्तम्यन्तवायुपदेन रूपाद्यन्वितसप्तम्यर्थ-

धायोर्विशेषणतया प्रतिपादनादिति भावः । रूपविशेष्यक इति । वायुवृत्तित्वतदभावरूपप्रकारद्वयावच्छिन्नरूपविशेष्यताक इत्यर्थः । अकोटितायामिति । कोटितायाः प्रकारताविशेषरूपत्वादित्याशयः । प्रकृतानुपयोगः । अतिरिक्तसामान्याभावासाधकत्वम् । तत्साधको-क्तहेतौ रूपाभावनिश्चयप्रतिबध्यस्य रूपकोटिकसंशयस्यैव प्रवेशा-दिति भावः । मूलोक्तसंशयद्वयस्यैव वायुविशेष्यकत्वेनाभेदमा-शङ्क्य निराकुरुते । अन्यस्त्विति । रूपवसदन्योन्याभावेति । ताद-त्म्यविशेषणताभ्यामित्यादिः । अत एव मूले प्रसिद्धरूपवद्भेद-निश्चयोपदर्शनमपि सङ्गच्छते इति भावः ।

यथाश्रुतपरित्यागेनास्वरस सम्प्रदायविद् इत्यनेन दर्शितः । वायौ रूपं रूपाभावो वेति धर्मिविशेषणककोटिद्वयविशेष्यकसंश-य एवायम्, विधेयताया इव कोटिताया अपि प्रकारत्वानियतत्वा-त् । न चैवमस्य रूपविशिष्टबुद्ध्यनात्मकतया रूपाभावनिश्चया-प्रतिबध्यतया पूर्ववत्प्रकृतानुपयोगप्रसङ्ग इति वाच्यम् । धर्मिणि रूपविशिष्टबुद्धेरिव रूपांशे धर्मिविशिष्टबुद्धेरपि रूपाभावनिश्चयप्र-तिबध्यत्वात् । धर्मधर्मिसम्बन्धावगाहितया एव विपरीतज्ञानप्र-तिबध्यतायां बीजतया विशेष्यविशेषणभावविपर्यासेऽपि तादृश-बुद्धेरेकस्याः प्रतिबध्यता नान्यस्या इत्यत्र विनिगमकाभावात् ।

न च वायू रूपवानित्यत्र समवायो रूपसम्बन्धः, तदपेक्षया च गुरुशरीरसमवायप्रतियोगित्वरूपं समवेतत्वं वायौ रूपमित्यत्र वा-युसम्बन्ध इति विनिगमना सम्भवतीति वाच्यम् । अधि-कविषयतया अप्रतिबध्यत्वे तदभावनिश्चयापेक्षया अधिकविष-यकस्य तदभावव्याप्यवत्तानिश्चयादेस्तद्वत्ताग्रहाप्रतिबन्धकत्वापाता-त् । उभयत्रैव समवायस्य सम्बन्धतोपगमाच्च । एकत्रानुयो-गिता सम्बन्धतावच्छेदकसम्बन्धः, अन्यत्र तु प्रतियोगिते-त्यभ्युपगमेन रूपवान् वायुः वायौ रूपमिति प्रतीत्योर्विशेषात् ।

न च विशेषणे प्रकारतावच्छेदकसम्बन्धप्रतियोगिता-या विशेष्ये च तादृशसम्बन्धानुयोगितायाः वास्तवत्वमेव प्र-तीतेः प्रमात्वप्रयोजकम् । तथा च घटे रूपमित्यादौ समवायस्य संसर्गत्वे प्रमात्वानुपपत्तिः । रूपे घटप्रतियोगिकसमवायानुयोगित्वा-सत्त्वादिति वाच्यम् । यत्रानुयोगिता सम्बन्धतावच्छेदकसम्बन्ध-

स्तत्रैवोक्तस्य प्रमात्वनियामकताया यत्र च प्रतियोगिता तादृशसम्बन्धस्तत्र विपरीतस्य तन्नियामकतायाः स्वीकरणीयत्वात्। न चैवं सम्बन्धसम्बन्धो न विशिष्टधीविषय इति सिद्धान्तभङ्गप्रसङ्ग इति वाच्यम्। अनुयोगित्वप्रतियोगित्वयोरविषयत्वेऽपि सम्बन्धतावच्छेदकत्वसम्भवात्।

वस्तुतो धर्मिणि धर्मस्येव धर्मे धर्मिणः सम्बन्धान्तरमेव न तु धर्म्यनुयोगिको यः सम्बन्धस्तत्प्रतियोगित्वम्, एवं सति विपरीतस्यापि वक्तुं शक्यत्वात्। तथा चोभयत्र समशरीर एव सम्बन्ध, एवं सति विशिष्य सम्बन्धभेदनिवेशस्याऽऽवश्यकतया उपदर्शितोभयविधबुद्ध्योरेकरूपेण प्रतिबध्यत्वासम्भवेऽपि न क्षतिः। प्रतिबध्यप्रतिबन्धकभावद्वयस्यैवोपगन्तव्यत्वात्। एवं धर्मिणि तदभावप्रकारकस्येव तदंशे धर्मिप्रकारकस्यापि निश्चयस्य उक्तज्ञानविरोधिता बोध्या। एवं च दर्शितकोटिद्वयविशेष्यकज्ञानस्य स्वनिष्ठैककोटिविषयिताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदककोटिप्रविष्टापरकोटिविषयितावत्त्वरूपसंशयलक्षणमपि निष्प्रत्यूहमिति नवीनमतमाह। विरुद्धयोरिति।

(दी०) विरुद्धयोरेकधर्मिसंसर्गावगाहिज्ञानमेव संशयो न तु तदुभयप्रकारताऽपि नियता, तथा च रूपतदभावविशेष्यको वायुविशेषणकोऽसाविति तु नव्याः।

(गा०) विरुद्धोभयांशे एकधर्मिनिरूपितधर्मत्वावगाहित्वस्य, एकस्मिन् तादृशोभयनिरूपितधर्मितावगाहित्वस्य च द्वयोरेकतरसत्त्वमेव संशयत्वप्रयोजकमित्यर्थः। तदुभयेति। विरुद्धोभयेत्यर्थः। नियता। संशयत्वव्यापिका। असौ। प्रथमोक्तसंशयः।

न च कोटिद्वयविशेष्यकसंशये मानाभावः। प्रत्येककोटिद्वयविशेष्यकधर्मिविशेषणकज्ञानसामग्रीद्वयसमाजात्तादृशज्ञानोत्पत्तौ बाधकाभावात्। विरोधिद्वयनिश्चयस्य चैकदाऽनभ्युपगमेन तस्य संशयताया निष्प्रत्यूहत्वात्। न चैकसामग्र्या अपरकार्यप्रतिबन्धकत्वान्न तादृशज्ञानमिति वाच्यम्। तुल्यबलसामग्र्या अतथात्वात्।

अथैवमेककोटौ धर्मिविशेषणको धर्मिणि चापरकोटिप्रकारको वायौ रूपं रूपाभाववान्वायुरित्याकारकोऽपि संशयः स्यादिति चेत् ? स्यादेव । न चैवं आधेयतासम्बन्धेन एकधर्मिसाध्यककोटिद्वयपक्षकलिङ्गपरामर्शसंवलनदशायां कोटिद्वयविशेष्यकधर्मिविशेषणकानुमितेर्ग्राह्याभावव्याप्यवत्तानिश्चयप्रतिबन्धकतया वारणासम्भवेनानुमितिरपि संशयाकारा स्यादिति वाच्यम् । आधेयतासंसर्गकानुमित्यनभ्युपगमसम्भवेन तादृशपरामर्शघटितानुमितिसामग्र्या एवासिद्धेः । धर्मिणि विपरीतकोटिसम्बन्धनिश्चायकत्वाविशेषेण धर्मिणि विपरीतकोटिव्याप्यवत्तानिश्चयस्येव विपरीतकोटौ धर्मिव्याप्यवत्तानिश्चयस्यापि धर्मधर्मिभावावगाहिप्रत्यक्षविशेषादिविरोधितया फलसप्रतिबन्धकतयैव तादृशानुमितिवारणसम्भवाच्च ।

धर्मधर्मिभावसंसर्गकस्येव धर्मधर्मिभावप्रकारकस्यापि ज्ञानस्यानुभवबलेन धर्मिणि धर्माभावनिश्चयप्रतिबध्यतां व्यवस्थाप्य रूपधर्मिकवायुवृत्तित्वकोटिकसंशयस्य प्रकृतोपयोगित्वमुपपादयतामपरेषां मतमाह ।

(दी०) वायुवृत्तित्वतदभावकोटिको रूपधर्मिक एवायं संशयः, अधिकरणे तत्तदभावान्यतरनिश्चयस्यापि तत्राधिकरणवृत्तित्वसंशयविरोधित्वात् । अन्यथा भूतले घटतदभावान्यतरनिर्णयेऽपि घटो भूतलवृत्तिर्न वेति संशयप्रसङ्गादित्यपरे ।

(गा०) वायुवृत्तित्वेति । तत्तदभावान्यतरेति । तद्धर्मतद्धर्माभावान्यतरेत्यर्थः । तत्राधिकरणवृत्तित्वविशिष्टबुद्धौ अधिकरणे तदभावनिश्चयस्य विरोधित्वे तत्र अधिकरणवृत्तित्वाभावबुद्धावप्यधिकरणे तद्वत्तानिश्चयस्य प्रतिबन्धकता स्यादिति प्रतिबन्दिनिराकरणाय तत्र तत्प्रतिबन्धकतायामिष्टापत्तिं दर्शयितुमधिकरणे तद्वत्तानिश्चयस्य तत्राधिकरणवृत्तित्वसंशयविरोधित्वाभिधानमिति न तस्य प्रकृतानुपयोगिता । अपिकारोऽधिकरणवृत्तित्वादिनिश्चयस्य समुच्चयपरः । तत्प्रतिबन्धकतायाः प्रकृतानुपयोगित्वेऽपि अवधारणपरत्वशङ्कानिराकरणाय तच्छब्दोपादानम् । विरोधित्वात् । प्रतिबन्धकत्वात् । अन्यथा । तत्र तदविरोधित्वे ।

अपरे इत्यस्वरसूचनाय। तद्वीजं च तत्सम्बन्धसम्बन्धादिप्रकारक इव तत्सम्बन्धादिप्रकारकज्ञानेऽपि तदभावनिश्चयस्य स्वतो विरोधित्वे मानाभावः। विरोधिज्ञानान्तरसम्पादनद्वारैव तद्विरोधित्वोपगमादिति।

(दी०) अथैतावन्त्येव रूपाणीत्यनिर्णयाद्यावद्रूपाभावानिर्णये संशयो न विरुध्यते इति चेत्? यावद्रूपाभावानिर्णय इत्यस्य यावन्तो रूपाभावास्तेषाम्, यावत्त्वेन रूपेण तेषाम्, यावन्ति रूपाणि तावदभावानाम्, यावद्रूपत्वेन तदभावानां वा ऽनिर्णय इत्यर्थः? न प्रथमतृतीयौ, तथा निर्णीतत्वात्। नेतरौ, प्रतियोगितदभावयोर्यावत्त्वानुल्लेखेऽपि योग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चयमात्रादेव घटतदभावसंशयोच्छेददर्शनेन तस्याकिञ्चित्करत्वात्।

(गा०) एतावन्त्येव रूपाणीति। सर्वाणि रूपाणि आप्यतैजसपार्थिवरूपानतिरिक्तानीत्यर्थः। इत्यनिर्णयात्। संशयस्थलेऽतिरिक्तसम्भावनाविरोधिनस्तादृशनिश्चयस्यासत्त्वात्। यावद्रूपाभावानिर्णय इति। यावत्त्वेन रूपविषयके तदभावविषयके वा रूपाभावनिश्चये चासतीत्यर्थः। रूपे तत्तद्रूपातिरिक्तत्वसम्भावनायां वायुनिष्ठाभावप्रतियोगितायां रूपत्वव्यापकतायाः, रूपाभावे तद्भिन्नयाभावातिरिक्तत्वसम्भावनायां च वायुवृत्तित्वे रूपाभावत्वव्यापकताया दुर्निश्चेयत्वादिति भावः। संशयो न विरुध्यते इति। सामान्यधर्मावच्छिन्नवत्ताज्ञाने प्रतियोगिन्यभावे वा यावत्त्वावगाहिन एव विशेषाभावनिश्चयस्य प्रतिबन्धकत्वादिति भावः।

यावद्रूपाभावानिश्चय इत्यत्र यावत्त्वस्य उपलक्षणतायाः शङ्कितुरनभिप्रेतत्वेऽपि तस्योपलक्षणविशेषणभावभेदेन यावन्तोऽर्थाः सम्भवन्ति तावत एव विकल्प्य दूषयति। यावदिति। अभावे प्रतियोगिनि च यावत्पदार्थान्वयसम्भवात् प्रत्येकमुभयत्रैवोपलक्षणत्वस्य विशेषणत्वस्य च सम्भवात् विकल्पचतुष्टयम्। तेषां यायौ केनापि रूपेणानिर्णय इत्येकः पक्षः। यावत्त्वेन तेषां यायायनिर्णय

इति द्वितीयः । रूपाभाववत्त्वावच्छेदेन वायुवृत्तित्वानिश्चयस्तदर्थः । यावन्ति रूपाणि येन केनापि रूपेण विशेषितानां तेषां वायावभावनिश्चय इति तृतीयः । यावद्रूपत्वेन विशेषितानां तेषां वायावनिश्चय इति चतुर्थः । रूपत्वावच्छेदेन वायुवृत्त्यभावप्रतियोगित्वानिश्चयस्तदर्थः । तथा निर्णीतत्वादेवेति । पार्थिवरूपत्वावच्छिन्नाभावत्वादिना केनापि रूपेण सर्वेषां रूपाभावानां पार्थिवरूपत्वादिना केनचिद्रूपेण भासमानसकलरूपाणामभावानां च निश्चितत्वादेवेत्यर्थः । प्रतियोगीति । प्रतियोगिनि घटे तदभावे च यावत्त्वाभानेऽपीत्यर्थः । घटत्वावच्छेदेनाभावप्रतियोगिताया घटाभावत्वावच्छेदेन भूतलवृत्तितायाश्चानवगाहनेऽपीति यावत् । यावद्विशेषाभावलिङ्गकसामान्याभावानुमितिस्थले यावत्त्वावगाहिविशेषाभावकूटनिश्चयस्याऽऽवश्यकत्वात् । योग्यानुपलब्ध्येति । तस्य । पार्थिवादिरूपाभाववान् वायुरिति निश्चयेऽभावांशे यावत्त्वानवगाहनस्य । अकिञ्चित्करत्वात् । रूपसामान्यसंशयानुपपादकत्वात् ।

विशेषाभावकूटनिश्चयस्य सामान्यसंशयप्रतिबन्धकतायां अतिरिक्तसम्भावनाया उत्तेजकतया संशयोपपत्तिमाशङ्कते ।

(दी०) न चातिरिक्तसम्भावनाविरहसहकृत एव तद्बोधस्तथा। सम्भावना च रूपं पार्थिवादित्रितयभिन्नं न वेत्याकारा । निवर्तते चेयं रूपत्वावच्छेदेनैतत्त्रितयभिन्नत्वाभावनिश्चयादेवेति वाच्यम् । गौरवात् । विनाऽपि अतिरिक्तसम्भावनां विशेषाभावनिश्चये सामान्यसंशयदर्शनाच्च ।

(गा०) न चेति । सहकृतत्वं सामानाधिकरण्यसम्बन्धेन तद्विशिष्टत्वम् । तद्बोधः । यावद्रूपाभावनिश्चयः । तथा । रूपत्वावच्छिन्नकोटिकसंशयविरोधी । नन्वतिरिक्तरूपाप्रसिद्ध्या तद्विषयकसम्भावना न सम्भवतीति कथमतिरिक्तसम्भावनया संशयोपपादनमत आह । सम्भावना चेति । संशयोपपादिकेति शेषः । रूपमिति । तथा च पार्थिवादित्रितयभिन्नरूपाप्रसिद्धावपि प्रसिद्धरूपे रूपत्वेन स्पर्शादौ प्रसिद्धस्य पार्थिवादिभिन्नत्वस्य सम्भावना सम्भवत्येवेति भावः । ननु

प्रसिद्धरूपे पार्थिवाद्यनतिरिक्तत्वनिश्चयेन तद्धर्मिकातिरिक्तत्वसंशयो न युज्यते इत्यत आह । निवर्तते इति । इयम् । रूपत्वसामानाधिकरण्येनातिरिक्तत्वावगाहिनी सम्भावना । निश्चयादेवेत्येवकारेण रूपत्वसामानाधिकरण्यमात्रावगाह्यनतिरिक्तत्वनिश्चयव्यवच्छेदः । तथा च रूपत्वसामानाधिकरण्येन सकलप्रसिद्धरूपेऽप्यनतिरिक्तत्वनिश्चयेऽपि तत्सामानाधिकरण्यमात्रावगाहिन्या अतिरिक्तत्वसम्भावनायाः सम्भवात् प्रकृतसंशयोपपत्तिरिति भावः।

गौरवादिति । अतिरिक्तसामान्याभाववादिमते तन्निश्चयस्य सामान्यसंशयप्रतिबन्धकतायामतिरिक्तसम्भावनाविरहानिवेशात्तदनभ्युपगमे च विशेषाभावकूटनिश्चयस्य तत्प्रतिबन्धकतायां तादृशाभावनिवेशाधिक्यादिति भावः । अतिरिक्तसम्भावनाया उत्तेजकत्वेऽपि न संशयनिर्वाह इत्याह । विनापीति । सामान्यसंशयदर्शनात् । सामान्यसंशयस्याऽनुभविकत्वात् । इदमुपलक्षणम् । रूपसामान्यसंशयं प्रति तदभावनिश्चयप्रतिबन्धकतायां रूपे पार्थिवादित्रितयभिन्नत्वसम्भावनाया उत्तेजकत्वे वायौ रूपं नास्तीत्याकारकनिश्चयदशायामपि तादृशसम्भावनया वायौ रूपं न वेति संशयापत्तिश्चेत्यपि द्रष्टव्यम् ।

प्रकारान्तरेण संशयमुपपाद्य सामान्याभावपार्थक्यमाक्षिपति अथेत्यादिना ।

(दी०) अथाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चय एव तादृशसंशयविरोधी । अन्यथा तत्राप्यतिप्रसङ्गात् । स च न प्रकृते । अभावस्य च यावद्विशेषाभावाधिकरणवृत्तित्वेन विशिष्टस्य तदवच्छेदेन वा सामान्यावच्छिन्नप्रतियोगिताकत्वम् । सम्भवति चेदम्, तादृशाभावप्रतियोगिताया अतिरिक्तत्वात् । तेन नैकविशेषवतो विशेषान्तराभाववत्त्वेन सामान्याभाववत्त्वप्रसङ्गः ।

(गा०) अभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चय एवेति । रूपं नास्तीत्याद्याकारको धर्मिणि सामान्यावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रतियोगिविशेषिताभावावगाहिनिश्चय एवेत्यर्थः ।

प्रकारेण विशेषधर्मावच्छिन्नप्रतियोगिताकत्वविषयकनिश्चयत्वा- वच्छेदः । तादृशसंशयविरोधीति । सामान्यधर्मावच्छिन्नकोटिकसं- शयप्रतिबन्धक इत्यर्थः । तादृशनिश्चयत्वस्यैव तत्प्रतिबन्धकताव- च्छेदकत्वादिति भावः । अन्यथा । सामान्यधर्मावच्छिन्नप्रतियोगि- ताकत्वीयविषयताविशेषस्य प्रतिबन्धकतावच्छेदककुक्षावनिवेशे । तथापि । अतिरिक्तसामान्याभाववादिनोऽपि । अतिप्रसङ्गात् । तद्रूपा- भावत्वादिना रूपसामान्याभावावगाहिनो भ्रमाद्यात्मकनिश्चयस्य रू- पसामान्यसंशयविरोधिताप्रसङ्गात् । तस्यापि वास्तवरूपत्वावच्छि- न्नाभावविषयकत्वात् । स च । तादृशनिश्चयश्च । प्रकृते । प्रकृतसंशया- व्यवहितपूर्वकाले । तादृशस्य रूपं नास्तीत्याकारकनिश्चयस्य सत्त्वे रूपवन्न वेति संशयस्य केनाप्यनभ्युपगमात् । तथा च यावद्विशेषा- भावानां तादृशनिश्चयविषयतामतेऽपि नोक्तसंशयानुपपत्तिरिति किमतिरिक्तसामान्याभावेनेति भावः ।

ननु विशेषाभावानामेव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे पृथिव्यादावपि रूपविशेषाभावसत्त्वाद्रूपं नास्तीति प्रतीतिप्रसङ्गः । तादृशप्रतीतेरभावे यावत्त्वावगाहिताया निराकृतत्वात् पृथिव्यादौ यावद्रूपाभावासत्त्वस्याकिञ्चित्करत्वादित्यत आह । अभावस्य चेति । विशेषाभावस्य चेत्यर्थः । विशिष्टस्येति । सामान्यधर्मावच्छिन्नप्रति- योगिताकत्वमित्यग्रिमेणान्वितम् । तथा च तादृशविशेषणान्तर्भावे- णाभावे तादृशप्रतियोगिताकत्वपर्याप्तिरित्यर्थः । एवं च वायौ रूपं नास्तीत्यादिप्रत्ययो वाय्वादिवृत्तित्वविशिष्टाभावे रूपत्वावच्छिन्न- प्रतियोगिताकत्वपर्याप्तिमवगाहते पृथिव्यादिवृत्तित्वविशिष्टे च तत्प- र्याप्तेर्बाधान्न पृथिव्यां रूपं नास्तीत्यादिप्रत्ययः ।

ननु विशेषणांशे भावरूपं सामान्यावच्छिन्नप्रतियोगिताकत्वा- सत्त्वात्तदन्तर्भावेण तत्पर्याप्तिर्न सम्भवति । न चैवं दण्डी नास्ती- त्याद्यभावप्रतियोगिताव्यधिकरणदण्डत्वादेस्तदवच्छेदकत्वासम्भ- वात्तादृशविशेषणविशिष्टेऽवच्छेदकत्वपर्याप्तिर्न स्यादिति वाच्य- म् । इष्टत्वात् । तत्र दण्डत्वादिरूपविशेषणस्यावच्छेदकताया- मेवावच्छेदकत्वोपगमात् । एवमन्यत्रापि कुत्रचिद्विशिष्टे पर्या- प्तिर्नास्त्येवेत्याशयेनाह । तदवच्छेदेन चेति । तादृशाधिकरणवृत्ति- त्वावच्छेदेनेत्यर्थः । एवं च वायौ रूपं नास्तीत्यादौ प्रत्यये वाय्वादि-

वृत्तित्वावच्छिन्न रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्व भासते इति पृथि व्यादिवृत्तित्वस्य तदनवच्छेदकत्वान्न पृथिव्यां रूपं नास्तीत्यादि प्रतीतिरिति भाव ।

विशेषधर्मावच्छिन्नप्रतियोगिताकूटातिरिक्तसामान्यधर्मावच्छि न्नप्रतियोगितानभ्युपगमे विशेषधर्मावच्छिन्नप्रतियोगिताकत्वावच्छे दकपृथिव्यादिवृत्तित्वस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वान वच्छेदकत्व न सम्भवतीत्याशयेन सामान्यधर्मावच्छिन्नप्रतियो गितायास्तत्तत्प्रतियोगिताकूटातिरिक्तत्वमभ्युपेत्यैतदुपपादयति । सम्भवतीति । इदम् । एकविशेषाभाववृत्तित्वस्य सामान्यधर्मा वच्छिन्नप्रतियोगिताकत्वानवच्छेदकत्वम् । अतिरिक्तत्वात् । विशेष रूपावच्छिन्नप्रतियोगिताभ्यो भिन्नत्वोपगमात् । सामान्याभावस्याति रिक्तत्वेऽपि तथात्वस्याऽऽवश्यकत्वात् । अन्यथा सामान्याभावत्वस्य विशेषाभावसाधारण्यनातिप्रसङ्गस्य दुर्वारत्वादिति भाव । एक विशेषवत् । पृथिव्यादे । सामान्याभाववत्त्वप्रसङ्ग । वस्तुगत्या रूपत्वाद्यवच्छिन्नप्रतियोगिताकस्याभावस्याश्रयत्वेऽपि न रूप वाद्य वच्छिन्नप्रतियोगिताकत्वविशिष्टाभाववत्त्वाप्रसङ्ग । अतो न पृथिव्यां रूपं नास्तीत्यादिप्रत्ययप्रसङ्ग इति भाव ।

अयं चाभ्युपगमवाद । वस्तुत सामान्यधर्मावच्छिन्नत्वस्य विशेषधर्मावच्छिन्नप्रतियोगितासु स्वीकारेऽपि सामान्यधर्मावच्छि न्नत्वविशिष्टतादृशप्रतियोगितानिरूपकत्वे पृथिव्यादिवृत्तित्वस्या नवच्छेदकत्वसम्भवेनातिप्रसङ्गवारणसम्भवात् ।

सामान्याभावविशेषाभावप्रतियोगितावच्छेदकसामान्यधर्मवि शेषधर्मयोर्भेदात्तादृशाभावयोर्भेद इति मिश्रोक्तिमाशङ्कते । न चेति ।

(दी०) न च प्रतियोगितावच्छेदकभेदस्याभावभेदनिया मकतया भेदसिद्धि । प्रतियोगिभेदस्य सत्त्वे एकघटप्रतियोगि- कस्य प्रागभावादिचतुष्कस्याभेदप्रसङ्गात् । अवच्छेदक तु भिद्यत एव तत्र, क्वचित् तादात्म्यस्य क्वचित् संसर्गस्य क्वचि त्पूर्वापरकालीनतद्घटत्वादेश्च तथात्वादिति वाच्यम् । संसर्गप्रति योगिविशेषणसाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात्, पूर्वा

परकालीनत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वे मानाभावाच्च ।

(गा०) विशेषधर्मावच्छिन्नप्रतियोगिताकूटस्य सामान्यधर्मावच्छिन्नत्वोपगमे प्रतियोगिताभेदस्याभावभेदनियामकत्वेऽपि न समीहितसिद्धिरिति प्रतियोगितावच्छेदकभेदपर्यन्तानुधावनम् । न चैवं दण्डत्वाद्यननुगतरूपावच्छिन्ननानादण्डाद्यवच्छिन्नप्रतियोगिताकाभावस्यैक्यानुपपत्तिरिति वाच्यम् । अवच्छेदकताभेदस्यैव विवक्षितत्वात् तत्रानुगतरूपावच्छिन्नासु नानाव्यक्तिषु अवच्छेदकताया एकस्या एवोपगमात् । अत एव महानसीयवह्नित्वशुद्धवह्नित्वयोर्भेदेऽपि न तदवच्छिन्नाभावभेदाप्रसिद्धिप्रसङ्गः ।

अथ वाऽवच्छेदकभेदोऽवच्छेदकतापर्याप्त्यधिकरणवैलक्षण्यम् । तथा च यादृशधर्मे यदभावीयप्रतियोगितावच्छेदकता न पर्याप्ता सोऽभावस्तादृशधर्मपर्याप्तप्रतियोगितावच्छेदकताकाभावभिन्न इति पर्यवसितम् । संसर्गप्रतियोगिविशेषणसाधारणमवच्छेदकत्वमेकमेवातो नैकाभावस्य तदुभयावच्छिन्नप्रतियोगिताकत्वानुपपत्तिरित्यभिमानः ।

ननु प्रतियोगितावच्छेदकभेदो नाभावभेदकः,अपि तु प्रतियोगिभेद एव । विशेषाभावप्रतियोगिनामेव च सामान्याभावप्रतियोगित्वान्न तयोर्भेदः । न च प्रतियोगिभेदस्य तथात्वेऽपि एतद्रूपभिन्नरूपप्रतियोगिकतया विशेषान्तराभावस्येव सामान्याभावस्याप्येतद्रूपत्वावच्छिन्नाभावभेदसिद्धिर्दुर्वारैवेति वाच्यम् । रूपान्तरविशेषाभावस्यापि सामान्याभावतया सिद्धसाधनात् । रूपत्वावच्छिन्नाभावत्वावच्छेदेन च नैतद्रूपत्वावच्छिन्नाभावभेदसिद्धिसम्भवः, एतद्रूपत्वावच्छिन्नाभावस्यापि सामान्याभावत्वोपगमेन भागासिद्धिसन्देहादित्यत आह । प्रतियोगीति । अभेदप्रसङ्गादिति । भेदकविरहेण भेदानुपपत्तेरित्यर्थः । तत्र भेदकान्तरानुसरणे च तदपेक्षया सर्वत्रावच्छेदकभेदस्यैव भेदकत्वमुचितमिति भावः ।

प्रागभावादिचतुष्कस्य प्रतियोगितावच्छेदकभेदं व्यवस्थापयन् स्वमते तद्भेदमुपपादयति । अवच्छेदकं त्विति । तत्रेत्यत्रैव छेदः । क्वचित् । अन्योन्याभावप्रतियोगितायाम् । क्वचित् । अत्य-

न्ताभावादिप्रतियोगितायाम्। संसर्गस्य। संयोगादेः। क्वचित्। ध्वंसप्रागभावप्रतियोगितयोः। पूर्वापरेति। स्वपूर्वकालीनतद्घटत्वस्वोत्तरकालीनतद्घटत्वाद्योरित्यर्थः। यथासङ्ख्यमन्वयः। पूर्वापरकालीनघटादिसामान्यं न कस्यापि ध्वंसादेः प्रतियोगि अतस्तद्घटत्वानुधावनम्। प्रतियोगिनानाभेदस्य नियामकत्वं तु न निराकृतम्। अवच्छेदकभेदेन प्रतियोगिताभेदे तावताऽपि नानात्वाभावपार्थक्यसिद्धेः, अवच्छेदकभेदेन तदभेदेऽपि ध्वंसप्रागभावादिप्रतियोगिताया अप्यभेदसम्भवेन प्रतियोगिभेदपक्षोक्तदूषणप्रसरात्। दुर्वचत्वादिति। संयोगेन घटो नास्तीत्यादौ संयोगी घटो नास्तीत्यादौ विलक्षणप्रत्यये च संयोगादिनिष्ठविलक्षणावच्छेदकत्वयोरेव भानस्याऽऽनुभविकत्वादित्यर्थः। एवं च सङ्गतिनियमे एकविधावच्छेदकत्वान्तर्भावेऽन्यविधावच्छेदकभेदाद् भेदानुपपत्तिः। कथंचिदवच्छेदकताद्वयानुगमे एकाभावस्यापि संसर्गप्रतियोगिविशेषणरूपावच्छेदकयोर्भेदाद् भेदापत्तिरिति भावः।

अवच्छेदकतायां सजातीयावच्छेदकताभेदस्याभावभेदकत्वे नोक्तदोषावसर इत्यतो दोषान्तरमाह। पूर्वेति। नानाभावादिति। अव्यावर्तकत्वादिति भावः।

ननु ध्वंसप्रागभावयोर्भेदकमन्यदेवोभयसिद्धम्, सदातनाभावभेदकः प्रतियोगितावच्छेदकभेद एवोपगन्तव्यः। प्रतियोगिभेदस्य च न तथात्वसम्भवः, एकप्रतियोगिकान्योन्यात्यन्ताभावयोः संयोगसमवायादिनानासम्बन्धावच्छिन्नैकप्रतियोगिकात्यन्ताभावानां चाभेदापत्तेरित्यत आह। किञ्चेति।

(दी०) किञ्चावच्छेदकभेदस्याभावभेदनियामकत्वं न तज्जनकत्वम्, अत्यन्ताभावादिस्वरूपस्य तस्याजन्यत्वात्। नापि तद्व्याप्यत्वमपि, वैयधिकरण्यात्। अत एव न तद्व्यापकत्वमपि, अभेदेऽप्यविरोधाच्च।

(गा०) तज्जनकत्वम्। अभावभेदजनकत्वम्। अत्यन्ताभावादीत्यादिना प्रागभावान्योन्याभावयोः परिग्रहः। तस्य। अत्यन्ताभावादीनां परस्परभेदस्य। अजन्यत्वादिति। तथा च तज्जनकत्वमप्रसिद्धमिति भावः। वैयधिकरण्यादिति। अवच्छेदक-

निष्ठस्य मिथस्तद्भेदस्य व्यापकत्वाभिमताभावपरस्परभेदवैयधिकरण्यादित्यर्थः । यद्यपि अभावप्रतियोगितावच्छेदकयोरपि मिथो भिन्नतया प्रतियोगितावच्छेदकनिष्ठे अभावप्रतियोगितावच्छेदकभेदे नाभावनिष्ठाभावभेदवैयधिकरण्यम् । तथापि अभावान्तरप्रतियोगितावच्छेदकनिष्ठस्वप्रतियोगितावच्छेदकभेदस्य स्वभेदानधिकरणे स्वस्मिन्नपि सत्त्वेन व्यभिचारात् । साध्यानधिकरणवृत्तित्वरूपव्यभिचार एव चात्र वैयधिकरण्यपदेन विवक्षितः । प्रतियोगितावच्छेदकवृत्तित्वविशिष्टस्य भेदस्य व्याप्यत्वविवक्षणे च तादृशस्याभावावृत्तित्वेन तत्राभावभेदासाधकत्वं द्रष्टव्यम् । अत एव । वैयधिकरण्यादेव । अभावभेदस्य प्रतियोगितावच्छेदकभेदानधिकरणवृत्तित्वादेवेति यावत् ।

व्यापकतापक्षे दोषान्तरमाह । अभेदेऽपीति । सामान्याभावस्य विशेषाभावाभेदेऽपीत्यर्थः । अविरोधात् । प्रतियोगितावच्छेदकभेदाविरोधात् । व्यापकव्यभिचारस्यादोषत्वादिति भावः । तथा च तस्य व्यापकत्वानुरोधान्न सामान्याभावपार्थक्यमिति भावः ।

व्याप्यतापक्षमेव परिष्कृत्य शङ्कते । न चेति ।

(दी०) न च तदितरधर्मावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यम् । मानाभावात् । अत एव च समनियतसुखदुःखादितत्तत्संख्यापरिमाणव्यक्त्यादिनानाधर्मावच्छिन्नोऽप्यभिन्न एवाभावः । भेदसिद्धिस्तु भाववदभावस्यापि विरुद्धधर्माध्यासादेव ।

(गा०) तदितरधर्मावच्छिन्नप्रतियोगिताकत्वम् । तदवच्छेदकताभिन्नप्रतियोगितावच्छेदकताकत्वम् । तद्धर्मावच्छिन्नप्रतियोगिताकान्यत्वं च तदवच्छेदकतानिरूपकप्रतियोगिताकान्यत्वम् । सामान्याभावत्वावच्छेदेन च उक्तहेतुना विशेषाभावभेदः साधनीय । अतो विशेषाभावान्तरे सामान्याभावत्वेनाभ्युपगते विशेषाभावभेदसत्त्वेऽपि न दोषः । मानाभावात् । विपक्षबाधकतर्काभावात् । अत एवेति । प्रतियोगितावच्छेदकभेदस्याभावभेदाव्याप्यत्वादेवेत्यर्थः । संख्यादिसामान्यस्याभावप्रतियोगितावच्छेदकत्वं न सम्भवति

तत्समनियतस्य लघोर्द्रव्यत्वस्यैव तथात्वादिति तत्तत्संख्येत्युक्तम्। आत्मत्वजातेरीश्वरसाधारण्येन न सुखादिसमनैयत्यमिति सुखादिसामान्यस्य प्रतियोगितावच्छेदकत्वसम्भवः। वस्तुतोऽवच्छेदकतासम्बन्धेन सुखाद्यवच्छिन्नाभावो विवक्षितः, शरीरनिष्ठस्य च सुखादिसमनियतलघुधर्मान्तरस्यासम्भवात् तत्सामान्यस्य तथात्वमक्षतमिति सुखादिसामान्यमेवोपात्तम्। अभिन्न एवाभावः। स्वीक्रियते इति शेषः। अतः प्रतियोगितावच्छेदकभेदेनाभावभेदमते तादृशाभावानामपि भेदादुपष्टम्भासङ्गतिरिति दूषणमनवकाशम्।

ननु प्रतियोगितावच्छेदकभेदस्याभावभेदासाधकत्वे घटत्वपटत्वाद्यवच्छिन्नाभावानामपि भेदो न सिद्ध्येदित्यत आह। भेदसिद्धिस्त्विति। भाववदिति। भावस्य घटपटादेर्यथा घटत्वपटत्वादिविरुद्धधर्मसम्बन्धाद् भेदसिद्धिस्तथा घटपटाद्यभावानामपि एकदेशकालावच्छिन्नघटपटाद्यधिकरणवृत्तित्वतदभावादिरूपधर्मसम्बन्धान्मिथो भेदसिद्धिरित्यर्थः। घटाभावादेः घटाद्यधिकरणावृत्तित्वं च घटवति पटो नास्तीतिवद् घटो नास्तीत्यादिप्रतीतिविरहात् सिद्ध्यतीति भावः। सामान्यधर्मावच्छिन्नाभावस्य विशेषधर्माश्रययत्किञ्चिद्व्यक्त्यधिकरणवृत्तित्वेऽपि तत्र तादृशाभावप्रकारकप्रतीतिविरह इव पटादिमति पटाद्यभाववृत्तावपि पटाद्यभावप्रकारकप्रतीतिविरहस्तुल्यन्यायेन शक्योपपादन इति प्रतिबन्दिस्तु सिद्धान्तग्रन्थे स्वयमेव दर्शयिष्यते इति प्रतियोगितावच्छेदकभेदवद्विरोधो ऽप्यभावभेदाप्रयोजक इति दर्शयति। अत एव चेति।

(दी०) अत एव गगनादीनामवृत्तीनां समनियतानां वा धर्माणामेक एवात्यन्ताभावः। युगपदुत्पन्नविनष्टानां समानदेशानामसति बाधके एक एव ध्वंसः प्रागभावो वेति। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽपि चेदभावः प्रामाणिकस्तदा तस्यैकस्यैव प्रतियोगिताः सर्वैरेव व्यधिकरणैर्धर्मैः सर्वैश्च समानासमानाधिकरणैः सम्बन्धैरवच्छिद्यन्ताम्, आकाशाभाव एव वा तथाऽऽस्तामिति। मैवम्।

(गा०) गगनादीनाम्। गगनत्वाद्यवच्छिन्नानाम्। समनियतानाम्। परस्पराभावासमानाधिकरणानाम्, सख्यात्वपरिमाणत्वाद्यवच्छिन्नानाम्। एक एवेति। समनियतानामभावानामभेदे बाधकविरहादिति भावः। प्रतियोगिनामवृत्तित्वे समनैयत्ये वा नान्योन्याभावस्य समनैयत्यसम्भव इत्यत आह। अत्यन्तेति। अग्रे इवात्राप्यसति बाधके इति बोध्यम्। अग्रेतनमेव वा योज्यम्। तेनैतद्रूपरसाद्यभावानां भिन्नेन्द्रियग्राह्याणामभेदे एतद्रूप नास्तीत्यादिवदेतद्रसो नास्तीति चाक्षुषाद्यापत्तेर्बाधकतया तेषां भेद एवेति लभ्यते।

न चाभावानामभेदेऽपि रूपत्वरसत्वाद्यवच्छिन्नप्रतियोगिताकत्वानां प्रतिनियतेन्द्रियग्रहणयोग्यत्वोपगमान्नोक्तातिप्रसङ्ग। समनियतरूपरसादीनामभेदस्तु नैवमापादयितुं शक्यते, शुक्लत्वमधुरत्वादिजातीनां सङ्करापत्तेः। नापि रसगुरुत्वादीनाम्, समनैयत्यप्रसङ्गेन रसत्वगुरुत्वत्वादिजातीनामभेदप्रसङ्गादिति वाच्यम्। रसाद्यभावस्य चक्षुरादिग्रहणयोग्यत्वे तद्धर्मानुयोगिताविशेषादीनामपि तद्योग्यताया दुर्वारत्वात्। आश्रययोग्यताया एव तद्योग्यताप्रयोजकत्वात्। चाक्षुषादिविषयविशेषणतायां इन्द्रियप्रत्यासत्तिघटकीभूतायाः सत्त्वे चाक्षुषादिसामग्रीसत्त्वेन चक्षुराद्ययोग्यताया दुर्निर्वाहत्वाच्च।

एतेनाभावानामिव तन्निष्ठानुयोगिताविशेषादीनामपि प्रतियोगितावच्छेदकयोग्यताधीन योग्यत्वमिति निरस्तमिति केचित्।

वस्तुतस्तूक्ताभावानामभेदेऽपि न क्षतिः। भेदेऽपि रसाभावादेश्चक्षुःसंयुक्तविशेषणताबलाच्चाक्षुषादिवारणायाभावचाक्षुषप्रत्यक्षं प्रति चाक्षुषधर्मावच्छिन्नप्रतियोगिताया निरूपकत्वसम्बन्धेन हेतुताया आवश्यकत्वादनुयोगिताप्रत्यक्षेऽपि तद्धेतुतां स्वीकृत्यैव रसत्वाद्यवच्छिन्ननिरूपितानुयोगितानामपि चाक्षुषादिविषयत्ववारणसम्भवात्। रसादिसामान्याभावानां चक्षुरादियोग्याभावान्तरासमनियतत्वेन उभयमते चक्षुराद्ययोग्यतया अभावचाक्षुषादावुक्तहेतुताया उभयानुमतत्वेऽपि नानुयोगिताचाक्षुषादौ कारणान्तरकल्पनाधिक्यम्। अभावतदीयानुयोगित्वयोश्च प्रतियोगितानिरूपकत्वेनानुगमसम्भवेनाभावप्रत्यक्षस्थलीयकारणतयैव निर्वाहात्।

युगपदिति। युगपद्विनष्टानां समानदेशानामेको ध्वंसः, युग-

पदुत्पन्नानां समानदेशानामेकः प्रागभाव इति योजना। व्यधिकरणानामेकनाशाभ्युपगमे तदनधिकरणदेशान्तरेऽपि तन्नाशादिप्रत्ययप्रसङ्ग इत्यतः समानदेशत्वानुसरणम्। समानदेशत्वं च देशतः समनैयत्यम्। रूपद्वित्वादीनां समानाधिकरणानामपि एकनाशाभ्युपगमे तद्रूपाद्यनधिकरणतद्वित्वाद्यधिकरणव्यक्त्यन्तरे तद्रूपनाशप्रत्ययप्रसङ्गात्। विभिन्नावच्छेदकानवच्छिन्नत्वमपि समानदेशत्वघटकं बोध्यम्। तेन युगपद्विनष्टानामुत्पन्नानां च मूलाभावच्छिन्नशरीरमहीरुहादिसमवेतविभिन्नसंयोगविभागानां व्युदासः। तद्ध्वंसप्रागभावानामभेदे स्वानवच्छेदकावच्छेदेनापि स्वध्वंसादिप्रतीतिप्रसङ्गात्। तुल्यप्रागभावेतरसकलकारणानां पाकजरूपरसादीनां प्रागभावैक्ये सामग्रयभेदेन कार्यभेदानुपपत्तिरितस्तत्र प्रागभावभेदस्याऽऽवश्यकतया तद्व्यावर्तनायासति बाधके इति दर्शितबाधकाभावपरं न तु बाधकसामान्याभावपरम्। क्रमविनष्टक्रमोत्पन्नानां समानदेशानामपि ध्वंसाद्यैक्ये प्रत्ययातिप्रसङ्गरूपबाधकसत्त्वेन युगपद्विनष्टत्वादिरूपविशेषणवैयर्थ्यप्रसङ्गात्। एवं सति भवपवरूपरसाद्यात्मककारणभेदेनैव विभिन्नसामग्रीकानामपाकजरूपरसादीनां युगपदुत्पन्नानां प्रागभावैक्यमिति ध्येयम्।

अभावसमनैयत्ये प्रतियोगितावच्छेदकभेदादेर्भेदाप्रयोजकत्वे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकपटत्वघटत्वाद्यवच्छिन्नघटपटाभावादीनामपि न भेदः स्वीक्रियते इत्याह। व्यधिकरणेति। प्रतियोगिविशेषणतानापन्नस्य प्रतियोगितावच्छेदकत्वं नाभावबुद्धौ भासते इति नियमानभ्युपगमे एव व्यधिकरणधर्मावच्छिन्नाभावस्य प्रामाणिकतेति मनसि कृत्य चेत् प्रामाणिक इत्युक्तम्। प्रतियोगिताः। घटपटादिनिष्ठा विभिन्नप्रतियोगिताः। व्यधिकरणैः। पटत्वघटत्वादिधर्मैः। अवच्छिद्यन्तामित्यग्रेतनेनान्वयः। धर्मैरिति तु येन सम्बन्धेन यस्य प्रतियोग्यवृत्तित्वं तेन सम्बन्धेन तस्यावच्छेदकत्वलाभाय, न तु धर्मत्वं विवक्षितम्, गगनादीनामप्यवच्छेदकत्वोपगमात्। प्रतियोगितावच्छेदकसम्बन्धभेदेनापि न व्यधिकरणधर्मावच्छिन्नाभावभेद इत्याह। सर्वैश्चेति। समानासमानाधिकरणैः। प्रतियोगिनिरूपितैस्तदनिरूपितैः। सम्बन्धैः। व्यधिकरणधर्मावच्छिन्नाभावप्रति-

योगिता अवच्छिद्यन्ताम् । तथा च संयोगसमवायादिसम्बन्धाव-च्छिन्नघटत्वाद्यवच्छिन्नपटगुणाद्यभावोऽभिन्न एवेति फलितम् । व्यधिकरणसम्बन्धावच्छिन्नव्यधिकरणधर्मावच्छिन्नाभावयोरपि न भेद इत्याह । आकाशाभाव इति । समवायादिना आकाशत्वाद्य-वच्छिन्नाकाशाद्यभाव इत्यर्थः । तथा । व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकः । एवं च व्यधिकरणधर्मावच्छिन्नाभाववादिनां नाभावकल्पनाधिक्यम्, अपि तु प्रतियोगिताकल्पनाधिक्यमेवे-ति ध्येयम् ।

पूर्वपक्षिमुखेनैव समाधानं प्रकाशयितुं प्रथमतः प्रतिबन्दि-माह । एवं हीति ।

(दी०) एवं हि तत्तद्देशकालाद्यवच्छिन्नानवच्छिन्नतत्तद-धिकरणवृत्तित्वेन विशिष्टस्य तत्तदवच्छेदेन वा एकस्यैवाभाव-स्य घटपटगोत्वाश्वत्वादिप्रतियोगिकत्वसम्भवेन तत्तद्भेदोऽपि विलुप्येत । तत्तत्प्रतियोगिकत्वं तत्तत्स्वभावो न च तत्राधिकर-णविशेषवृत्तित्वस्यान्तर्भावोऽवच्छेदकत्वं चेति तु समानम् ।

(गा०) एवम् । सामान्याभावस्य विशेषाभावाभेदेऽपि । एकविशे-षाभाववत्यपरविशेषाधिकरणे सामान्याभावत्वविशिष्टवत्ताप्रत्यय-स्य कथितरीत्या वारणसम्भवेन तत्तदिति । यत्राधिकरणे यद्देशका-लावच्छेदेन न घटादिसत्वं तद्देशकालावच्छिन्नं यत्तदधिकरणवृ-त्तित्वं तद्विशिष्टे तदवच्छेदेन वा एकस्मिन्नेवाभावे देशतः कालत-श्चाव्याप्यवृत्तिघटपटादिप्रतियोगिकत्वस्य कल्पनया यत्राधिकर-णे न गोत्वाश्वत्वादिकं अवच्छेदकविशेषानवच्छिन्नतद्वृत्तित्वविशि-ष्टे तदवच्छेदेन वा तत्रैवाभावे व्याप्यवृत्तिगोत्वाश्वत्वादिप्रतियो-गिकत्वस्य कल्पनया घटादिमति तदवच्छेदकदेशकालाव-च्छिन्ने पटो नास्तीत्यादिप्रतीतिवद् घटो नास्तीत्यादिप्रतीतेः, गवादावश्वत्वं नास्तीतिवद्गोत्वं नास्तीत्यादिप्रतीतेश्च वारण-सम्भवेन अभावमात्रभेद एवोच्छिद्येतेत्यर्थः । अवच्छिन्नानवच्छि-न्नवृत्तिकत्वरूपाऽव्याप्यवृत्तित्वव्याप्यवृत्तित्वयोरेकस्मिन्नप्यभावे वि-भिन्नप्रतियोगिकत्वावच्छेदकविधया स्वीकारे विरोधविरहादिति

भावः । घटपटाद्यभावभेदव्यवस्थापकयुक्तेः प्रकृते तुल्यतामाह । तदिति । तत्प्रतियोगिकत्वमिति । अभावनिष्ठं घटादिप्रतियोगिकत्वमित्यर्थः । तत्तत्स्वभावः । तत्तदभावस्वरूपम् । अधिकरणविशेषवृत्तित्वस्य । तत्तद्देशकालावच्छिन्नानवच्छिन्नतद्देशवृत्तित्वस्य । अन्तर्भावः । स्वाश्रये विशेषणतया प्रवेशः । अवच्छेदकत्वं वा सम्भवतीति शेषः । अभावस्य विशेषणादिकमनन्तर्भाव्यैव स्वस्मिन्पर्याप्तेऽर्थ्याप्यवृत्तित्वाच्चेति भावः । प्रकृतेऽपीति । सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेऽपीत्यर्थः । समानमिति । तस्यापि अभावस्वरूपानतिरिक्तत्वादिति भावः । धर्मविशेषावच्छिन्नप्रतियोगिताकत्वस्य अभावस्वरूपानतिरिक्तत्वे सामान्याभावस्यानतिरिक्तत्वमते विशेषधर्मावच्छिन्नप्रतियोगिताकत्वेभ्यः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यातिरिक्ततया अप्यनिर्वाहेन एकविशेषवति विशेषान्तराभावत्वेनैव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेनाप्यभाववत्ताप्रत्ययप्रसङ्गो बोध्यः ।

यदि चाभावविशेषणस्यापि सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तत्त्वेनाधिकरणविशेषवृत्तित्वावच्छिन्नत्वं स्वीकृत्यातिप्रसङ्गो वारयितुं शक्यते । तदा घटपटादिप्रतियोगिकत्वस्यापि तत्त्वेन तथात्वमुपगम्यातिप्रसङ्गवारणसम्भवाद् घटपटाद्यभावानामपि भेदो न सिद्ध्येत्तस्माद् घटपटाभावभेदवादिनां सामान्याभावविशेषाभावभेद आवश्यक एवेति ।

सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वादिकमुपगम्य सामान्याभावपार्थक्यनिराकरणे उक्तप्रतिबन्दिर्दुरुद्धरतामालोक्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं यावद्विशेषाभावेषु व्यासज्यवृत्ति ये मन्यन्ते तन्मतमपि निराकरोति ।

(दी०) अत एव सामान्यावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि मत्युक्तम् । अव्यासज्यवृत्तेस्तत्स्वभावस्य तत्त्वानुपपत्तेः, अतिरिक्तकल्पने च किमपराद्धमतिरिक्ताभावेन ।

(गा०) अत एवेति । सामान्याभावत्वस्य धर्मिस्वरूपानतिरिक्तत्वादेवेत्यर्थः । व्यासज्यवृत्तीति । तथा च यत्किञ्चिद्विशेषवति या-

यदाश्रयसन्निकर्षविरहेण सामान्यधर्मावच्छिन्नाभावत्वग्राहकाभावान्न तेन रूपेणाभावग्रहप्रसङ्ग इति भावः । अव्यासज्यवृत्तेः प्रत्येकस्वरूपस्य प्रत्येकविश्रान्तत्वेनासम्भवद्व्यासज्यवृत्तिताकस्य तथात्वानुपपत्तेर्व्यासज्यवृत्तित्वस्वीकारायोगात् ।

ननु सामान्यावच्छिन्नप्रतियोगिताकत्वमतिरिक्तमेवोपगन्तव्यमतो न तद्व्यासज्यवृत्तित्वानुपपत्तिरित्यत आह । अतिरिक्तेति । अतिरिक्ताभावेनेति । अभावस्यातिरिक्तत्वे सामान्यावच्छिन्नप्रतियोगिताकत्वं तत्स्वरूपमेव न त्वतिरिक्तमिति हृदयम् ।

ननूक्तयुक्त्या सामान्यावच्छिन्नप्रतियोगिताकत्वमतिरिक्तसामान्याभाववादिनाऽप्यतिरिक्तमेवोपेयम्, तथा चालमतिरिक्ताभावेन, फलतविशेषाभावकूटे तादृशधर्मस्य व्यासज्यवृत्तितयैवोपपत्तेः । अभावविशेषणस्यापि गुणादिनिष्ठबुद्धिविशेषविषयतात्मकद्वित्वादिवत् कथञ्चिद् व्यासज्यवृत्तिनासम्भवश्चेत्यत आह । किञ्चेति ।

(दी०) किञ्च व्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवद् व्यधिकरणानामपि विशेषाभावानां युगपदिन्द्रियसन्निकर्षे सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोऽपि स्यात् ।

(गा०) व्यासज्यवृत्तिधर्मग्रहे एकाधिकरणघटितयावदाश्रयसन्निकर्षो यदि हेतुरुपेयते तदा वक्ष्यमाणातिप्रसङ्गानवकाशात्, तन्निराकरणाय व्यधिकरणयोरित्यादिदृष्टान्तप्रदर्शनम् । व्यधिकरणयोः । एकाश्रयघटितसन्निकर्षरहितयोः । व्यधिकरणानाम् । पृथिवीजलादिरूपनानाविशेषाधिकरणे सन्निकृष्टानाम् । सामान्यावच्छिन्नेति । रूपत्वाद्यवच्छिन्नेत्यर्थः ।

अथ रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वविशिष्टाभाववत्तानवगाहितत्प्रत्यक्षमलीकम्, पृथिव्यादौ च तद्विशिष्टवत्त्वविरहेण तदवगाहिप्रत्यक्षापादनासम्भव इति चेन्न । पृथिव्यादिघटितसन्निकर्षदशायां सामग्रीबलाद्रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वे विषयतया प्रत्यक्षसामान्यस्यान्यत्र प्रसिद्धस्याऽऽपत्तेर्दुर्वारत्वात् । यावद्विशेषाभावानां सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टानां विशेषाधिकरणव्यावृत्तविलक्षणाधिकरणतोपगमे अतिरिक्ताभावादिमतेऽप्यगौरवात् ।

नन्वभाववृत्तिधर्मग्रहे प्रत्यासत्त्यन्तरमिन्द्रियसंयुक्तविशेषणविशेषणतारूपं वाच्यम्, तत्र इन्द्रियसंयुक्तवृत्तितावच्छेदकत्वमेव प्रत्यासत्तिरपेक्ष्यते । रूपत्वाद्यवच्छिन्नानिरूपितानुयोगितायां च न पृथिव्यादिवृत्तितावच्छेदकत्वमिति यावद्विशेषाभावानामेकाश्रयघटितसन्निकर्षो व्यासज्यवृत्तितादृशधर्मप्रत्यक्षेऽप्यपेक्षित इत्यत आह । अपि चेति ।

(दी०) अपि च रूपान्तरेण सम्बन्धविधया वा व्यासज्यवृत्तिधर्मस्य ज्ञाने न यावदाश्रयसन्निकर्षापेक्षा, मानाभावात् । एवं चैकाभावसन्निकर्षेऽपि सामान्याभावबुद्धिप्रसङ्गः । यादृशे च तस्य ज्ञाने यावदाश्रयाणां सन्निकर्षोऽपेक्ष्यते तत्र तेषां तद्भेदस्य च ज्ञानमपि । तदज्ञाने तद्भेदज्ञाने च तदग्रहात्, आश्रयभेदभ्रमेण तद्भ्रमदर्शनाच्च । न चात्र यावद्विशेषाभावानां प्रथममुपस्थितिः सम्भवति, तत्प्रतियोगिनां विशेषतोऽनुपस्थितेरिति दिक् ।

(गा०) रूपान्तरेण । मेयत्वादिसामान्यप्रत्यासत्त्या । सम्बन्धविधया वेति । असन्निकृष्टस्यापि संयोगादेः संसर्गतया मानोपपत्तेरिति भावः । मानाभावादिति । सम्बन्धसामान्यप्रत्यासत्त्याद्युपनीतव्यावृत्तविलक्षणैव विषयता यावदाश्रयसन्निकर्षजन्यतावच्छेदिकेति शेषः । सामान्याभावबुद्धिप्रसङ्ग । सामान्यावच्छिन्नप्रतियोगिताकत्वसंसर्गकाभावसाक्षात्कारप्रसङ्ग ।

नन्वनुयोगिताविशेषसंसर्गकाभावलौकिकत्वस्य तादृशसंसर्गांशे उक्तसन्निकर्षविशेषजन्यतावच्छेदकलौकिकत्वनिरूपकविषयताविशेषशालित्वनियतत्वोपगमात्र तादृशसन्निकर्षं विना उक्तापत्तिरित्यत आह । यादृशेति । तस्य । व्यासज्यवृत्तिधर्मस्य । तेषाम् । यावदाश्रयाणाम् ।

यद्यपि तेषां परस्परं भेदज्ञानापेक्षयैव तज्ज्ञानापेक्षालाभः, तथाऽप्याश्रयाणां लौकिकप्रत्यक्षापेक्षालाभाय स्वातन्त्र्येण स्वाश्रयज्ञानापेक्षोक्ति. । ज्ञानमप्यपेक्ष्यते इत्यनुपङ्गेणान्वय । तदपेक्षायां प्रमाणमु·

तावन्वयव्यतिरेकावाह तदज्ञाने इत्यादिना। तदज्ञाने। यावदाश्रयसन्निकर्षसत्त्वेऽपि दोषादिवशात्तत्साक्षात्कारविरहदशायाम्। तदभेदज्ञाने। दूरत्वादिवशादाश्रयाणामभेदभ्रमे। तदग्रहात्। द्वित्वाद्यग्रहात्। आश्रयभेदभ्रमेण। एकस्मिन्नेव मध्यपिहितदीर्घदण्डादौ भेदभ्रमेण। एतावता प्रकृते किमायातमित्यत आह। न चात्रेति। विशिष्य। तत्तद्रूपत्वादिरूपप्रतियोगितावच्छेदकधर्मेण। अनुपस्थितेरिति। यावद्रूपादीनां युगपदसन्निकर्षादिति भाव। प्रतियोगितावच्छेदकावच्छिन्नानुपरागेणाभावसाक्षात्कारानुपगमादिति शेषः।

यद्यप्यनेनेदन्त्वादिनाप्यभावप्रत्यक्षमङ्गीकरिष्यते। तथाप्यनुभवानुरोधेन तमस एव तथा भान नाभावान्तरस्य। अस्तु वा इदन्त्वेन यावद्रूपाद्यभावज्ञानं तथापि प्रतियोगितावच्छेदकपुरस्कारेणानुपस्थितानामभावानां न भेदग्रहः। अनुभवविरोधादिति। तद्गतव्यासज्यवृत्तिधर्मग्रहोऽशक्य एवेति भावः। अत्र च द्वित्वादिप्रत्यक्षेऽनुभवानुरोधाद्यावदाश्रयप्रत्यक्षादेर्हेतुत्वेऽपि प्रकृते तद्धेतुत्वमप्रामाणिकम्। एकधर्माश्रयप्रत्यक्षादितोऽन्यस्याग्रहात् स्वाश्रयप्रत्यक्षादिहेतुत्वे ऽनुगतकार्यकारणभावासम्भवात्। सम्भवेऽप्यनेकसमवेतसङ्ख्याप्रत्यक्षत्वस्यैव तत्र जन्यतावच्छेदकत्वोपगमात्। एवमतीन्द्रियसामान्याभावस्य विशेषाभावभेदो निर्युक्तिक एव, तत्रोपदर्शिताभेदे बाधकानवकाशादित्यालोच्य दिगित्युक्तम्।

दिगर्थस्तु यथाऽनन्ताधिकरणेऽभावो नाधिकरणस्वरूपः, तत्राभावत्वकल्पनापेक्षया लाघवात्तदाश्रयैकाभावकल्पनमुचितम्। तथानन्तविशेषाभावे सामान्यावच्छिन्नप्रतियोगिताकत्वादिकल्पनापेक्षया लाघवात्तदाश्रयैकाभावकल्पनमुचितमिति। एवं रूपं नास्तीति प्रतीतिविषयतया सामान्यावच्छिन्नप्रतियोगिताकत्वेन यावद्विशेषाभावनिरूपितातिरिक्तैकाधिकरणताऽवश्यं कल्पनीया। अन्यथा रूपादिमति तादृशप्रतीतेः प्रमात्वापत्तेरिति किं लाघवम्।

न च रूपवति तत्तद्रूपाभावरूपविषयबाधेनैव तादृशप्रतीतेरप्रमात्वमिति वाच्यम्। घटवद्भूतलमित्यादौ घटत्वादिना या यद्घटादिभानानियमवदुक्तप्रत्ययेऽपि रूपाभावत्वादिना यावद्रूपाभावादिभानानियमात्। योग्यतादिवशाच्छब्दादिजन्यतादृशज्ञानेऽबाधिताभावमात्रभानसम्भवात्। न च शब्दविशेषादेर्यावदभाव-

गाहित्वं कार्यतावच्छेदकं कल्पयितुं शक्यते, येन नियमः स्यात् । तथा सति गौरवात् । सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे व्यासज्यवृत्तित्वकल्पनवैयर्थ्याच्च ।

अतिरिक्ताधिकरणतानभ्युपगमे प्रतिबन्धकसमवहितेऽपि प्रतिबन्धकतावच्छेदकधर्मावच्छिन्नाभावत्वरूपकारणतावच्छेदकावच्छिन्नविशेषाभावसम्बन्धस्य कार्योत्पत्तिप्रयोजकस्याक्षतत्वात्तदापत्तिरिति केचित् । तन्न । सामान्याभावपार्थक्येऽपि यावद्रूपाभावत्वावच्छिन्ननिरूपिताधिकरणताविशेषकल्पनमावश्यकम्, रूपवति यावत्ताद्दशाभावप्रतीतेरप्रमात्वात् । सैव चाधिकरणता सामान्यावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपिता न त्वतिरिक्तेति सामान्याभावपार्थक्यवादिभिरभ्युपगमात् । घटपटाद्यभावानामभेदे घटाभावत्वपटाभावत्वावच्छिन्नाधिकरणतानामतिरिक्तानां कल्पनमावश्यकम् । कलशाधिकरणतान्तर्भावेण निर्वाहासम्भवादिति दर्शितप्रतिबन्धानवकाशात् ।

वस्तुतः कारणतावच्छेदकोपलक्षितकारणसत्त्वं सर्वत्र कार्योत्पत्तौ तन्त्रं न तु विशिष्टसत्त्वं गौरवादिति परामर्शे स्वयं वक्ष्यते । एवं च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य विशेषाभावेष्वप्यभ्युपगमे तद्विशिष्टाधिकरणताया विलक्षणत्वेऽपि प्रतिबन्धकविशेषाभावात् कार्योत्पत्तिप्रसङ्गो दुर्वार एव इत्यादियुक्तिरेव दिगित्यनेन दर्शिता ।

सार्वभौममतमाह । केचित्त्विति ।

(दी०) केचित्तु अनन्तविशेषाभावानां सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तन्निष्ठासज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघवात् सामान्यावच्छिन्नप्रतियोगिताकत्वेनैक एवाभावः कल्प्यते । कल्पनीयशरीरस्योभयत्र तुल्यत्वेऽपि एतदपेक्ष्य तस्य गुरुत्वात् । विनिगमकाभावेऽपि च सामान्याभावसिद्धिरस्त्येव । धर्मकल्पनातो धर्मिकल्पनाया गुरुत्वं कल्पनीयानेकत्वप्रयुक्तम् ।

(गा०) ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टाभावस्यातिरिक्तस्य कल्पनापक्षेऽप्यतिरिक्तयोर्विशेष्यविशेषणयोः कल्पनी-

यतया कल्पनीयाशसाम्यमित्याशङ्क्याह । कल्पनीयेति । शरीरस्य । अंशस्य । एतदपेक्षया । अतिरिक्तसामान्याभाववादिमतापेक्षया । तस्य । तदनतिरिक्ताभाववादिमतस्य । गुरुत्वादिति । सामान्याभावत्वकल्पनाया धर्मिणामानन्त्यादिति भाव । अभ्युपेत्याह । विनिगमकेति । अप्रत्यूहैवेति । सिद्धिविरोधिनो गौरवस्यानवकाशादिति भाव ।

ननु धर्मकल्पनातो धर्मिकल्पना गरीयसीति प्रवादादतिरिक्ताभावरूपधर्मिकल्पनङ्गौरवपराहतमित्यत आह । धर्मेति । कल्पनीयानेकत्वेति । धर्मकल्पनापक्षे क्वचित्तन्मात्रकल्पना, धर्मिकल्पनापक्षे तु धर्मस्यापि कल्पनीयत्वात्तदुभयकल्पने कल्पनीयाधिक्यप्रयुक्तमेव, न तु धर्मिकल्पनामात्रप्रयुक्तमित्यर्थ । तथा च प्रकृते कल्पनीयाधिक्यविरहादतिरिक्तसामान्याभावपक्षे न गौरवमिति भाव ।

गौरवान्तरमाशङ्कते । न चेति ।

(दी०) न चातिरिक्ताभावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्यानन्तवाय्वाद्यधिकरणवृत्तित्वस्य च कल्पनापेक्ष्य क्लृप्तानन्तवाय्वाद्यधिकरणवृत्तित्वाना यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पनैव लघीयसीति वाच्यम् । एवं सत्यभावमात्रासिद्ध्यप्रसङ्गादित्याहुः ॥

(गा०) लघीयसीति । न च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेऽप्यनन्ताभाववृत्तित्वकल्पनासाम्यमिति वाच्यम् । विशेषाभावानामपि सामान्याभावाधिकरणतया सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे यावद्धर्मिवृत्तित्व कल्पनीय तदपेक्षयाऽतिरिक्तसामान्याभावे यद्वृत्तित्वकल्पना लेशा भूयस्त्वेन साम्यानवकाशात् । एव सतीति । एवम् । कल्पनीयेऽभावेऽनन्ताधिकरणवृत्तित्वकल्पनागौरवस्यातिरिक्ताभावसिद्धिविरोधित्वे । अभावमात्रेति । अधिकरणादावभावत्वकल्पनादेवोपपत्तेर्भावातिरिक्त कोऽप्यभावो न सिद्ध्येदित्यर्थ । अतिरिक्ताभावस्य तत्रानन्ताधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य अभावत्वस्यानन्ताधिकरणादिवृत्तित्वकल्पनाया लघु वादिनि भाव ॥

इति अनुमानगादाधर्यां सामान्याभावप्रकरण समाप्तम् ॥

अथ विशेषव्याप्तिप्रकरणम् ।

(चि०) यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यम् ।

(दी०) यद्वेत्यादि । अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः । न च तत्र रूपवत्त्वादिकमेव साध्यम्, तच्च परम्परासम्बन्धेन रूपत्वादिकमेव, तेन च सम्बन्धेन न तदभावः क्वापि पृथिव्यादाविति वाच्यम् । रूपादेरसाध्यतापत्तेः ।

(गा०) व्यधिकरणवह्निधूमयोर्व्याप्त्यनभ्युपगमेन वह्निमान् धूमादित्यादौ नत्तद्वह्नित्वाद्यभावमादाय दोषासंस्पर्शाद्विशेषलक्षणेऽन्यथाऽव्याप्तिमाशङ्कते । अथात्रेति ।

नानाव्यक्तिरूपादिसाध्यकेति । यद्यप्यवच्छेदकत्वाघटितप्रकृतलक्षणे यथा यावद्वैयधिकरणवृत्तिसाध्यैक्यविरहेण सकलसाध्यव्यक्तीनामेव हेतुसमानाधिकरणतत्तद्व्यक्तित्वाद्यवच्छिन्नाभावप्रतियोगितया हेतुसमानाधिकरणाभावाप्रतियोगिसाध्यदुर्भिक्षम् । तथा साध्यैक्येऽपि प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणहेतुमन्निष्ठत्वाद्यवच्छिन्नाभावप्रतियोगितायाः साध्येऽक्षततया ऽव्याप्तिर्दुर्वारैव । उभयाभावघटितप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशपक्षे च एतद्रूपवानेतद्रसादित्यादावपि, एतद्रूपतद्रूपोभयत्वाद्यवच्छिन्नाभावेऽपि तस्य सत्त्वेन लक्षणगमनाभावादसम्भव एव । तथापि यथाश्रुतप्रतियोगिवैयधिकरण्यनिवेशेपीत्यस्याऽऽदौ पूरणीयतया नासङ्गतिः ।

तन्निवेशाभिप्रायेणैवोपाध्यायस्यैतद्दोषोद्धरणप्रकारमाशङ्कते । न चेति । तत्र । पृथिवीत्वादिहेतुके । रूपवत्त्वादिकमेव साध्यमिति । तथा च रूपव्याप्तेस्तत्रानभ्युपगमान्नाव्याप्तिरिति भावः । ननु रूपवत्त्वं रूपसमवायः तस्य च समवायस्यैमत साध्यतानिर्वाहेऽपि तन्मते द्रव्यत्वादिनापि शक्यसाधनस्य याथ्वा-

दिसाधारणस्य तस्य सिद्धावपि रूपस्यासिद्धया तत्सिद्ध्यनुरोधेन पृथिवीत्वादौ रूपव्याप्तेरावश्यकतैवेत्यत आह । तत्रेति । तत्र । प्रकृतसाध्य रूपवत्त्वादिक च । परम्परासम्बन्धेन । साध्यमानमिति शेष । परम्परासम्बन्धेन स्वसमवायिरूपाद्यात्मकेन रूपत्वादे पक्षे सिद्धावेव रूपादेस्तत्र सिद्धिनिर्वाह इति भाव ।

ननु रूपत्वादेरपि समवायादिना हेतुमन्निष्ठाभावप्रतियोगित्वात् कथ व्यापकत्वनिर्वाह इत्यत आह । तेन चेति । तेन । स्वसमवायिरूपात्मकेन । न तदभाव इति । तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायास्तादृशसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य वा निवेशान्नानुपपत्तिरिति भाव । अनुमितेरिति । पृथिवीत्वादिलिङ्गकप्रमापरामर्शजन्यानुमितौ समवायादिना विधेयतानुपपत्तेरित्यर्थ । तथा चानुभविकतदुपपत्तय रूपादिव्याप्तेरावश्यकत्वाद्व्याप्तिघ्रुवैवेति भाव ।

नन्ववच्छेदकत्वघटितलक्षणपक्षेऽपि नानाव्यक्तिदण्डाद्यवच्छिन्नसाध्यकव्याप्त्यनिर्वाहेण प्रातिस्विकरूपावच्छिन्नसकलदण्डाद्यवच्छिन्नाव्यभिचारिहेतुकानुमितौ दण्डादेर्विधेयतावच्छेदकत्व यथाऽपलप्यते तथैतल्लक्षणपक्षेऽपि पृथिवीत्वादिलिङ्गकानुमितौ रूपादेर्विधेयताऽप्यपलपनीयेत्यत प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशावश्यकत्वाभिप्रायेण दोषान्तरमाह । द्रव्यान्यत्वादीति ।

(दी०) द्रव्यान्यत्वादिविशिष्टसत्ताद्यभावस्य द्रव्यादिवृत्तित्वात् सत्तादिसाध्यकद्रव्यत्वादावव्याप्तेश्च । अन्यथा विशिष्टतया सत्तादेः साध्यत्वे व्यभिचारिणि जातिमत्त्वादावतिप्रसङ्गात्। व्युत्पादयिष्यते च विशिष्टाभावस्य विशेष्यप्रतियोगिकत्वम् । द्वित्वाद्यवच्छिन्नसाध्याभावस्य तत्र सत्त्वाच्च ।

(गा०) सत्तादीत्यादिना गुणान्यत्वादिविशिष्टसत्तादिसाध्यकपरिग्रह । विशिष्टप्रतियोगिवैयधिकरण्यप्रवेशप्रयोजन प्रकाशयति। अन्यथेति । विशिष्टतया । द्रव्यान्यत्वादिविशिष्टतया । सत्त्वादे साध्यत्वे। व्यभिचारिणि । भ्रमविषयतयैव तत्साध्यके अतिप्रसङ्गात् । भ्रम विनाऽपि गुणत्वादिना गुणादाविव विशिष्टविशिष्ट्यसाधकताप्र

सङ्गात्। न च द्रव्यादौ द्रव्यान्यत्वादिविशिष्टसत्तादिसिद्धिर्बाधादेवा-
शङ्कयापादनेति वाच्यम् । बाधानवतारदशायामापत्तेर्दुर्वारत्वात् ।
अन्यथा सामानाधिकरण्यमात्रस्य व्याप्तित्वापत्तेः । बाधादेव
बाध्यादौ द्रव्यत्वादिना रूपाद्यनुमानोपपत्तेः।

ननु विशेष्यवति विशिष्टाभावप्रतीतिर्विशेषणाभावं सर्वत्र वि-
शेषणविशेष्योभयसम्बन्धाभावं वाऽवगाहते, न तु विशेष्यप्रति-
योगिकाभावम्, प्रतियोगिमति विरोधेनाभावासत्त्वात्तत्कथं वि-
शिष्टाभावमादाय सत्तादिसाध्यकेऽव्याप्तिः । न चैवं विशिष्टसत्ता-
दिसाध्यके जात्यादिहेतावतिव्याप्तिः, जातिमद्विशिष्टाभावप्रतियोगि-
तायाः सत्तात्मकसाध्येऽसत्त्वादिति वाच्यम् । गुणाद्यन्यत्वविशि-
ष्टत्वादिनाऽपि सत्तादेः साध्यत्वे जात्यादिहेतौ व्याप्यत्वोपगमात् ।
विशेषणविशेष्यसम्बन्धस्य साध्यतायामेव तादृशहेतोरलक्ष्यत्वो-
पगमादित्यत आह । व्युत्पादयिष्यत इति । विशिष्टाभावोऽतिरि-
क्तो विशेषणाद्यभावस्वरूपो वा भवतु तस्य विशेषणावच्छिन्न-
विशेष्यप्रतियोगिकत्वमावश्यकम्, विशेषणावच्छिन्नविशेष्यज्ञानं
विनाऽसम्भवन्त्यास्तत्प्रतीतेस्तादृशविशेष्यांशे तत्प्रतियोगितावग-
गाहितया दुरपह्नवत्वादिति भावः।

ननु विशिष्टस्यातिरिक्ततामते विशिष्टाभावमादाय न दूषणा-
वसर इति एकव्यक्तिसाध्यकेऽपि द्वित्वाद्यवच्छिन्नसाध्याभाव-
मादाय दूषणमाह । द्वित्वेति । तत्र । हेतुमति । न च विशिष्टस्याति-
रिक्तत्वे प्रतियोगितावच्छेदकावच्छिन्नत्वविशेषितप्रतियोग्यसा-
मानाधिकरण्यमेव निवेशनीयमिति नोभयाभावादिकमादायाव्याप्ति-
प्रसक्तिरिति वाच्यम्। सत्तागुणत्वोभयवान् द्रव्यत्वादित्यादावति-
व्याप्तिवारणाय विशिष्टस्यातिरिक्ततामतेऽपि प्रतियोगितावच्छेदका-
वच्छिन्नत्वनिवेशनस्याऽऽवश्यकत्वात् ।

न च द्रव्यत्वादौ सत्तादिव्याप्तिरिष्टैव, गुणत्वादेश्च तत्समा-
नाधिकरणप्रतियोगिव्यधिकरणाभावान्तरप्रतियोगित्वान्न तद्व्या-
पकतापत्तिरिति किं तद्विवक्षयेति वाच्यम् । गुणत्वस्य
तादृशाभावप्रतियोगित्वेऽपि सत्तागुणत्वोभयत्वसामानाधिकरण्येन
तादृशाभावप्रतियोगित्वाभावसत्त्वात् । भ्रमं विनैव द्रव्यत्वहेतुका-
या द्रव्यं सत्तागुणत्वोभयवदित्यनुमितेर्वारणायाभावे प्रतियोगि-

तावच्छेदकावच्छिन्नवैयधिकरण्यस्यावश्यं निवेशनीयत्वात्। वह्नि-त्वाद्यवच्छेदेन किञ्चिद्धूमादिव्यक्तिसमानाधिकरणाभावाप्रतियोगि-त्वासत्त्वेन विधेयतावच्छेदकसामानाधिकरण्येन तादृशाभावाप्र-तियोगित्वज्ञानस्यैवानुमितिहेतुतायाः प्रतियोगित्वाभावघटितल-क्षणवादिना स्वीकरणीयत्वात्।

अत्र यथा अवच्छेदकदेशकालावच्छिन्नपक्षकस्थलेऽपि शुद्धस-मवायादिना व्यापकताग्रहान्न तद्विशिष्टानुयोगिकवैशिष्ट्यानुमिति-रूपाध्यायैरङ्गीक्रियते । तथा विशेषणान्तरवैशिष्ट्यावच्छिन्नस-त्तादिसाध्यकेऽपि विशिष्टप्रतियोगिकसमवायादिना व्यापकताग्रह-मन्तरेण न, विशिष्टवैशिष्ट्यानुमितिस्तैरुपगन्तव्येति साध्यताव-च्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नाविशेषितप्रतियो-गिवैयधिकरण्यानिवेशेऽपि नातिप्रसङ्ग इति न विशिष्टाभावमा-दाय द्वित्वाद्यवच्छिन्नाभावमादाय वा सद्धेतावव्याप्तिः। साध्यता-वच्छेदकविशिष्टनिरूपितसमवायादिना प्रतियोग्यनधिकरणहेत्व-धिकरणस्य सद्धेतावप्रसिद्धावपि न क्षतिः, उभयाभावघटितप्रति-योगिवैयधिकरण्यस्य प्रवेशनीयत्वात् । विशिष्टवैशिष्ट्यसाध्यक-स्थले एव वा विशिष्टवैशिष्ट्यानुमितिरुपेयते।

न च विशिष्टप्रतियोग्यसामानाधिकरण्यानिवेशे द्रव्यं सत्ता-गुणत्वोभयवद् द्रव्यत्वादित्यादावतिप्रसङ्गो दुर्वार इति वाच्यम्। तत्रोभयत्वोपलक्षितवत्तानुमितेः प्रमारूपतया इष्टत्वात्। विशिष्ट-वैशिष्ट्यानुमितेश्चोक्तरीत्या वारणसम्भवादिति यथाश्रुतलक्षणपरि-ष्कारप्रकारो हेयः। तथापि धूमादिना पर्वतादौ अपूर्ववह्न्याद्यनुमाना-नुपपत्तेर्दुर्वारत्वात्। क्वचिदपि वह्नौ धूमसमानाधिकरणाभावाप्रति-योगित्वासत्त्वात्। पर्वतीयधूमसमानाधिकरणाभावाप्रतियोगित्वस्या-न्यवह्न्यावसत्त्वात्। पर्वतीयवह्नेरसन्निकर्षेण तत्र दुर्ग्रहत्वात्। महा-नसीयधूमसमानाधिकरणाभावाप्रतियोगित्वस्य तादृशवह्नौ गृहीत-त्वेऽपि तद्ग्रहस्य तादृशधूमे पक्षधर्मताग्रहविरहेणाकिञ्चित्करत्वात्।

न च व्याप्तिपदार्थनिर्वचनमिदं न त्वनुमित्यौपयिकव्याप्तिस्व-रूपकथनमिति वाच्यम्। अर्थान्तरप्रसङ्गात्। धूमो वह्निव्याप्य इत्यादौ तत्तद्धूमत्वादिप्रकारेण हेत्वनुपस्थितेः, तत्तद्धूमादिसमा-नाधिकरणाभावाप्रतियोगित्वस्य शब्देन बोधयितुमशक्यत्वाच्च।

'यत्तु सामानाधिकरण्यस्याव्याप्यवृत्तितामभ्युपेत्यैतल्लक्षणम्, तथा च साध्याभावनिष्ठं यत् साध्यसामानाधिकरण्यं हेतुमति तच्छून्योऽभावोऽभावान्तार्थः । केवलान्वयिसाध्यके द्वित्वाद्यवच्छिन्नसम्बन्धान्तराद्यवच्छिन्नप्रतियोगिताक एव साध्याभावः प्रसिद्धः । न च स्वरूपसम्बन्धेन प्रमेयमात्रसाध्यकस्थलेऽभावमात्रस्यैव साध्याभावतया साध्याभावनिष्ठसाध्यसामानाधिकरण्यशून्याभावाप्रसिद्धिरिति वाच्यम् । अभावप्रतियोगिसाध्यस्य वृत्तिमत्त्वेन विशेषणीयतया अवृत्तेरभावस्य तादृशस्य प्रसिद्धेः । तत्प्रतियोगिनोऽवृत्तेरननुमेयत्वाद्व्यापकताविरहे क्षतिविरहादिति । तदपि न । तादात्म्येन प्रमेयमात्रसाध्यकस्थले वस्तुमात्रे एव व्यापकताया उपपादनीयतया उक्तप्रसिद्धिप्रकारासम्भवात् ।

प्रगल्भसमाधानमाशङ्कते । अथेति ।

(दी०) अथाप्रतियोगित्वं प्रतियोगित्वाभावः, स च येन रूपेण तद्रूपावच्छिन्नव्याप्यत्वं हेतौ । अस्ति चायं रूपादौ, रूपत्वादिना न पृथिवीनिष्ठाभावप्रतियोगित्वमिति प्रत्ययादिति चेन्न ।

(गा०) प्रतियोगित्वस्याव्याप्यवृत्तित्वेऽपि प्रतियोगिनि तद्भेदस्य दुर्घटतया नञोऽत्यन्ताभावार्थकत्वमाह । अप्रतियोगित्वमिति । प्रतियोगिनि प्रतियोगित्वाभावस्वीकारे व्यभिचारिण्यतिव्याप्तिमाशङ्क्याह । स चेति । येन रूपेणेति । यद्रूपावच्छिन्नसाध्ये इत्यर्थः । तद्रूपावच्छिन्नव्याप्यत्वमिति । तथा च धूमत्वादिना वन्ह्यादिमन्निष्ठाभावप्रतियोगिनो धूमादेर्द्रव्यत्वादिना तत्त्वाभाववत्त्वेऽपि न वह्न्यादेर्धूमत्वाद्यवच्छिन्नव्याप्यतापत्तिः । द्रव्यत्वाद्यवच्छिन्नव्याप्यत्वं त्विष्टमेवेति भावः ।

ननु तत्तद्व्यक्तित्वादिना पृथिव्यादिनिष्ठाभावप्रतियोगिनि रूपादौ प्रतियोगितानवच्छेदकरूपत्वावच्छेदेन तदभाववत्त्वे मानाभाव इत्यत आह । अस्ति चेति । अयम् । पृथिव्यादिनिष्ठाभावप्रतियोगित्वाभावः । इति प्रत्ययात् । इत्याकारकप्रतियोगित्वाभावावगाहिप्रत्ययस्याऽऽनुभविकत्वात् ।

(दी०) तादृशप्रतीत्या हि रूपत्वादौ प्रतियोगिताया अ-

वच्छेदकत्वाभावो गृह्यते, न तु तदभावावच्छेदकत्वम्, सर्वत्रैव रूपे पृथिवीनिष्ठाभावप्रतियोगित्वं न तु कुत्रापि रूपे तदभाव इत्यबाधितप्रत्ययात् । अन्यथा यो यो धर्मो यस्य यस्य नावच्छेदकस्तत्तदवच्छेदेन तत्तदभावोऽप्युक्तरीत्या सिद्ध्येत् । प्रमेयधूमत्वेन न वह्निमन्निष्ठाभावप्रतियोगित्वमिति प्रत्ययात्तदवच्छेदेन तादृशप्रतियोगित्वाभावस्यापि सुवचत्वाच्च ।

(गा०) अग्रिमतत्पदस्य प्रतियोगितापरत्वं स्फुटयितुं प्रतियोगिताया इत्यसमासाभिधानम् । ननु शब्दव्युत्पत्तिबललभ्यं रूपत्वाद्यवच्छिन्नप्रतियोगित्वाभावं परित्यज्य रूपत्वादिनिष्ठतदवच्छेदकत्वाभावावगाहित्वं कुतः स्वीक्रियते इत्यत आह । सर्वत्रैवेति । तद्धर्मे स्वरूपसम्बन्धात्मकतदवच्छेदकतासिद्धौ तद्धर्मविरोधिसामानाधिकरण्यमात्रावगाहिप्रतीतेरबाधकतया रूपत्वे पृथिवीनिष्ठाभावप्रतियोगितात्वरूपानुगतरूपावच्छिन्नप्रतियोगितावच्छेदकत्वावगाहित्वसूचनाय सर्वत्रेत्युक्तम् ।

ननूक्तप्रतीत्या रूपत्वऽनतिरिक्तवृत्तित्वरूपं तादृशप्रतियोगितात्वावच्छिन्ननिरूपितावच्छेदकत्वमेवावगाह्यते, न तावतापि बाधकतानिर्वाहः । स्वरूपसम्बन्धरूपयोरेव विरोधिद्वयावच्छेदकत्वयोर्विरोधादतो बाधकप्रत्ययान्तरमाह । न त्विति । तादृशप्रतियोगित्वाभावो रूपसामान्यावृत्तिरित्यर्थः ।

ननु तादृशाभावे रूपावृत्तित्वप्रत्ययोऽसिद्धः, स्वयमेव संयोगान्योन्याभावे वृक्षावृत्तित्वप्रत्ययस्यासिद्धिमुद्भाव्यान्योन्याभावस्याव्याप्यवृत्तिताया व्यवस्थापनीयत्वात्, तत्प्रत्ययात् प्रकृतप्रत्ययस्याविशेषात् । न च रूपत्वेन न रूपे प्रतियोगित्वमिति शब्दाद् रूपत्वावच्छिन्नप्रतियोगित्वाभाव इव प्रतियोगितानिष्ठो रूपत्वावच्छिन्नत्वाभावोऽपि क्लृप्तव्युत्पत्तितः प्रतीयते, अवच्छिन्नत्वान्तस्य तृतीयान्तेनोपस्थितस्य नञर्थाभावेन प्रथमान्तपदार्थान्वितेन प्रतियोगितयाऽन्वयेऽविरोधात् । एवं च बाधकप्रत्ययस्य विवादग्रस्तत्वेऽपि प्रतियोगित्वे रूपत्वावच्छिन्नत्वाभाव एव उभयसिद्धत्वानुरोधादुक्तप्रत्ययविषयः स्वीकार्यः, न तु रूपे प्रतियोगित्वाभावोऽप्रसि-

त्वेन गौरवस्यैव बाधकत्वादिति वाच्यम् । एवं सति वृक्षे मूले न संयोग इति प्रत्ययस्यापि वृक्षवृत्तिसंयोगे सप्तम्यन्तार्थमूलावच्छिन्नत्वाभावावगाहितापत्त्या संयोगादेरव्याप्यवृत्तित्वानुपपत्तेः।

न च संयोगवत् प्रतियोगित्वस्याव्याप्यवृत्तित्वे वृक्षे मूले न संयोग इतिवद्रूपे रूपत्वे न रूपाभावप्रतियोगित्वमिति अवच्छेदकपदोत्तरसप्तम्युल्लिखितप्रत्ययापत्तिरिति वाच्यम् । प्रतियोगिताया अव्याप्यवृत्तिताविरहेऽपि रूपत्वादेस्तदवच्छेदकत्वेन रूपत्वे रूपाभावप्रतियोगित्वमिति प्रतीतिव्यवहारापत्तेर्देशकालादेर्विलक्षणमेवावच्छेदकत्वं सप्तम्यर्थो न त्ववच्छेदकत्वमात्रमिति समाधानस्यापि तुल्यत्वात् । तादृशावच्छेदकतानिरूपकमेवाव्याप्यवृत्तीति नियमस्याप्रामाणिकत्वात्।

युज्यते च साध्यतावच्छेदकावच्छेदेन साध्ये प्रतियोगित्वाभावावगाहिज्ञानस्यैवानुमितिहेतुत्वम्, न तु साध्यतावच्छेदकधर्मिकानवच्छेदकत्वग्रहस्य, धर्मितावच्छेदकतया साध्यतावच्छेदकानिष्ठवह्नित्वत्वादिविषयताया अवच्छेदककोटौ प्रवेशनीयतया गौरवात् । कदाचिद्वह्नित्वत्वादिना कदाचिच्च स्वरूपतो वह्नित्वादेर्विधेयतावच्छेदकतया भानमिति नियमस्य कष्टनिर्वाह्यत्वात् । दण्डिसंयोगादिहेतुकानुमितौ दण्डादेर्विधेयतावच्छेदकत्वानुपपत्तेः। एतन्मते च तत्तद्दण्डत्वादिविशिष्टावच्छिन्ने विशेषाभावप्रतियोगित्वसत्त्वेऽपि अवच्छेदकतावच्छेदकभेदेन एकावच्छेदेनापि विरुद्धद्वयसत्त्वोपगमाद्दण्डत्वादिविशिष्टावच्छिन्ने तदभावसत्त्वेऽविरोधेनैव तदुपपत्तेः सुकरत्वादित्याशङ्क्य प्रतियोगितानवच्छेदकरूपेण प्रतियोगित्वाभावोपगमे प्रतिबन्दिमाह। अन्यथेति। यस्य । कारणत्वकार्यत्वादेः। उक्तरीत्येति । दण्डे द्रव्यत्वेन न घटजनकत्वमिति प्रतीतिबलेनेत्यर्थः । अत्रापीष्टापत्तिसम्भवेन लक्षणे दूषणान्तरमाह । प्रमेयेति । इति प्रत्ययादिति । अतिप्रसक्ततया द्रव्यत्वादेरिव प्रमेयधूमत्वादेर्गुरुतया धूमाभावप्रतियोगितानवच्छेदकत्वेऽविशेषादिति भावः । सुवचत्वाच्चेति । तथा च प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तिरिति भावः ।

एतदतिव्याप्त्युद्धारमाशङ्कते। अथेति ।

(दी०) अथ प्रमेयधूमत्वं न गौरवेण सामानाधिकरण्यप्रतियोगितावच्छेदकम्, विवक्षितं चात्र तथेति चेत्? असमानाधिकरणधूमकव्यक्तिवृत्तितया वह्नित्वमपि न तदवच्छेदकम्, कम्बुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति वहुव्याकोपश्च। अत एव प्रमेयधूमत्वं गौरवेण प्रतियोगिताया इव तच्छून्यताया अपि नावच्छेदकमित्युक्तावपि न निस्तारः।

(गा०) अत्र। लक्षणे। तथा। साध्यतावच्छेदकस्य हेतुनिष्ठसामानाधिकरण्यप्रतियोगितावच्छेदकत्वम्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसामानाधिकरण्यस्यैव व्याप्तित्वोपगमादिति भावः। चेदित्यनन्तरं तर्हीति पूरणीयम्। असमानाधिकरणधूमकेति। असमानाधिकरणो धूमो यस्येति व्युत्पत्त्या धूमनिष्ठसामानाधिकरण्यप्रतियोगिताशून्येत्यर्थकम्। न तदवच्छेदकमिति। अनतिप्रसक्त एव स्वरूपसम्बन्धरूपावच्छेदकत्वोपगमादिति भावः। तथा च वह्निमान् धूमादित्यादावेवाव्याप्तिरिति भावः।

धूमनिष्ठसामानाधिकरण्यप्रतियोगितात्वावच्छिन्नातिप्रसक्तत्वेऽपि वह्निवृत्तिप्रतियोगितात्वावच्छिन्नानतिप्रसक्ततया तादृशप्रतियोगितावच्छेदकत्वं वह्नित्वादेर्दुर्वारमित्याशङ्क्याह। कम्बुग्रीवेति। इदं तु गुरुधर्मावच्छिन्नसाध्यके व्यभिचारिण्यतिप्रसङ्गवारणाय गुरुधर्मस्य सम्बन्धप्रतियोगितानवच्छेदकत्वमभ्युपगतमिति तन्मतमनुसृत्यैवाभिधानम्। वस्तुतः सम्बन्धप्रतियोगितावच्छेदकत्वं गुरोरपि, अत एव स्वविशिष्टसम्बन्धीत्यादिपारिभाषिकावच्छेदकत्वनिरुक्तिरपि सङ्गच्छते। अन्यथा स्वविशिष्टसम्बन्धस्य स्वावच्छिन्नप्रतियोगिकसम्बन्धरूपतया गुरुधर्मे तादृशावच्छेदकताया अप्यनिर्वाहादित्यवधेयम्। अत एव। कम्बुग्रीवादिमत्त्वादिना घटादेरसाध्यतापत्तेरेव। तच्छून्यताया अपीति। गौरवरूपबाधकासत्त्वे एव प्रतियोगितानवच्छेदकस्य तदभावावच्छेदकत्वनियमादिति भावः। इत्युक्तावपि। इत्युक्त्या उक्ताव्याप्तिविरहेऽपि। न निस्तारः। न लक्षणस्यादोषता।

(दी०) अत्र वदन्ति। अप्रतियोगित्वं प्रतियोगितानव-

च्छेदकधर्मवत्त्वम् । न चैवं पूर्वस्माद्भेदः, तत्र साध्यजातीयसमानाधिकरणसाधनजातीयत्वस्य, अत्र च साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्यात् । घटकयोस्तादृशप्रतियोगितावच्छेदकतत्त्वान्योन्यात्यन्ताभावयोर्भेदेन भेद इत्यपि कश्चित् ।

(गा०) साध्यजातीयेति । सजातीयत्वं साध्यतावच्छेदकसाधनतावच्छेदकाभ्याम्, तेन अनवच्छेदकवह्नित्वाद्यवच्छिन्नसमानाधिकरणवृत्तिधूमत्वादेरित्यर्थः । अत एव व्यधिकरणयोरपि सामान्यतो व्याप्तिनिर्वाहात् सामान्यलक्षणानुपगमेऽप्यनुमानोपपत्तिः । साध्यसाधनसामानाधिकरण्यस्य अनवच्छेदकरूपावच्छिन्नस्यसामानाधिकरण्यसाधनतावच्छेदकोभयस्य युक्त्यन्तरेण सामान्यप्रत्यासत्तौ व्यवस्थापितायां साध्यसाधनव्यक्तिभेदेन भिन्नानामपि व्याप्तीनां तथा युगपज्ज्ञानसम्भवेन सर्वसाधारणैकव्याप्त्यग्रहविरहादिति भावः ।

कश्चिदित्यस्वरसबीजम् । व्यधिकरणयोर्न व्याप्तिरिति ग्रन्थकृतैवात्राभिधानादुक्तरीत्या भेदस्याऽऽवश्यकत्वम् ।

(चि०) यत्समानाधिकरणान्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं तस्य सामानाधिकरण्यं वा, स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वत्कत्वं वा ।

अन्यवृत्तिवह्नितद्वतोरन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वाद् व्यधिकरणवह्निधूमयोर्न व्याप्तिः, किं तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना । न चैवं धूममात्रे न व्याप्तिरिति वाच्यम् । सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् । धूमसम्बन्धिवह्निस्तद्व्याप्य एव । युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव । कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः । यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणम् । कर्मणि

च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वम्। न चान्योन्याभावस्याव्याप्यवृत्तित्वम्, अभेदस्याबाधितप्रत्यभिज्ञानात्।

(दी०) अत्यन्ताभावगर्भवत्सामान्यविशेषभेदेनान्योन्याभावगर्भमपि व्याप्तिद्वयमाह यत्समानाधिकरणेत्यादिलक्षणद्वयेन।

(गा०) अन्योन्याभावगर्भव्याप्तिद्वयभेदमाशङ्क्याऽऽह। अत्यन्तेति। अत्यन्ताभावगर्भवदिति। अत्यन्ताभावगर्भव्याप्तिद्वयं यथा सामान्यविशेषभेदेनोक्तमित्यर्थः। एतेन सामान्यविशेषभेदेन भेदगर्भव्याप्तिद्वयानभिधाने न्यूनतेति सूचयित्वा उक्तरीत्यैव भेदे ग्रन्थकारस्वरस इति दर्शितम्।

नन्वत्यन्ताभावगर्भलक्षणयोः प्रतियोगितानवच्छेदकावच्छिन्नत्वाप्रतियोगित्वमात्राभिधानेन सामान्यविशेषभावः सूचित इत्यत्रापि तथा भेदेऽभिप्रेते तथाभिधीयेतेति शङ्कया अन्यथा भेदमाह। प्रथमे इति।

(दी०) प्रथमे एकस्य साध्याधिकरणा–श्रयाऽऽधिक्याद्द्वितीयलक्षणम्। अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले तत्तत्साध्यवतस्तत्तत्साध्यवत्त्वस्य च साधनसमानाधिकरणान्योन्याभावप्रतियोगित्वात्तदवच्छेदकत्वाच्चाव्याप्तिः। तथापि यद्रूपावच्छिन्नं तादृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्र तात्पर्यम्।

(गा०) आधिक्यादिति। यद्वत्त्वप्रतियोगित्वे तद्वद्वृत्तित्वरूपे प्रथमे साध्यवतोऽप्रतियोगितया सामानाधिकरण्यघटकतया च पृथङ्निवेशः। द्वितीये च अप्रतियोगिसाध्यवद्वृत्तित्वरूपे अप्रतियोगित्वविशेष्यतापन्नस्यैव वृत्तिविशेषणत्वमित्येकधैव तन्निवेश इत्याशयः। इदमुपलक्षणम्। प्रथमे विशिष्टपरामर्शानिर्वाहोऽपि द्रष्टव्यः।

अत्राप्यवच्छेदकत्वमन्तर्भावयितुं यथाश्रुतमाक्षिपति। अत्रेति। नानाव्यक्तिसाध्यकस्थले इति। नानासाधनाधिकरणे यत्र विभिन्न

साध्यं तत्रेत्यर्थः। प्रतियोगितयात्तदवच्छेदकत्वाद्येत्यस्य साध्यव-त्साध्यवत्त्वयोर्यथासंख्यमन्वयः । साध्येऽवच्छेदकभेदनिवेशेऽपि न निस्तार इति सूचनाय साध्ये प्रतियोगितावच्छेदकत्वाभिधानम् । अव्याप्तिरिति । यद्यपि एकाधिकरणसाध्यके एतद्रूपवानेतद्रसादित्यादावपि उभयत्वावच्छिन्नभेदप्रतियोगित्वमादायाप्रतियोगित्वघटितलक्षणे यथाश्रुतेऽसम्भव एव सम्भवति । तथापि प्रतियोग्यवृत्तित्वस्य भेदविशेषणत्वोपगमेन तत्र लक्षणसमन्वयः सम्भवतीत्याशयः । यद्रूपावच्छिन्नमिति । यत्पदं साध्यतावच्छेदकपरम् । अनवच्छेदकम् । अवच्छेदकत्वात्यन्ताभाववत् । तत्तद्वह्नित्वादिना विशेषान्योन्याभावप्रतियोगितावच्छेदकस्यापि चन्द्रादेरवच्छेदकानवच्छेदकसामान्यरूपावच्छेदेनावच्छेदकत्वात्यन्ताभाववत्त्वमित्याशयः ।

न चावच्छेद्यानवच्छेदकरूपावच्छिन्नेऽवच्छेद्याभावस्योपगमे यद्रूपविशिष्टावच्छिन्ने प्रतियोगित्वाभाव इति विवक्षया यथाश्रुतप्रतियोगित्वाभावघटितलक्षणमेव सुपरिष्करमिति कथं तदुपेक्षेति वाच्यम् । अवच्छेदकताया व्यासज्यवृत्तित्वस्य सिद्धान्तसिद्धतया तस्याः स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपमव्याप्यवृत्तित्वमपि सिद्धान्तसिद्धम् । अवच्छेदकैकदेशे पर्याप्तिसम्बन्धेन तदभावसत्त्वादित्यवच्छेदकतापर्याप्त्यनवच्छेदकरूपावच्छिन्नेऽप्यवच्छेदकत्वाभावः स्वीक्रियते इति । प्रतियोगिताया अव्याप्यवृत्तित्वं त्वपसिद्धान्त इत्याशयात् ।

ननु वह्निसंयोगवान् धूमादित्यादौ साध्यताघच्छेदकवह्न्याद्यवच्छिन्ने तत्तद्वह्निसंयोगादिमदन्योन्याभावप्रतियोगितावच्छेदकत्वसत्त्वादव्याप्तिः । न च तत्तद्वह्नित्वादिविशिष्टवह्न्याद्यवच्छिन्ने तत्सत्त्वेऽपि वह्नित्वविशिष्टवह्न्याद्यवच्छिन्ने तदभावः सुलभः । एकस्यापि विभिन्नविशेषणावच्छिन्नस्य विरोधिद्वयावच्छेदकत्वोपगमादिति वाच्यम् । एवं सति तद्वह्निसंयोगवान् धूमादित्यादावतिव्याप्तेः। तद्वारणायाविशेषितसाध्यतावच्छेदकावच्छिन्नेऽवच्छेदकत्वाभावस्य विवक्षणे उक्ताव्याप्तेर्दुर्वारत्वात् । साध्यतावच्छेदकतावच्छेदकविशिष्टावच्छिन्नस्यानवच्छेदकत्वविवक्षणे चानवच्छिन्नवह्नित्वादिसाध्यतावच्छेदककस्थलेऽव्याप्तिरित्यत आह । वह्न्यादाविति ।

(दी०) वह्न्यादौ तत्संयोगादौ तद्वदादौ वा साध्ये सर्वत्र साक्षात् परम्परया वा अनुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकम्, तदवच्छिन्नवत्त्वस्य च न तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति । यद्वा यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथायथं वक्तव्यम् । शब्दैक्यस्यानुपादेयत्वात् ।

(गा०) वह्न्यादिसाध्यकस्थले वह्नित्वादेः साक्षादवच्छेदकत्वाभिधानं दृष्टान्तविधया । वह्निसंयोगादौ साध्ये स्वाश्रयप्रतियोगिकत्वरूपपरम्परासम्बन्धो वह्नित्वादेः साध्यतावच्छेदकताघटकः, वह्निसंयोगवत्त्वानित्यादौ च स्वाश्रयप्रतियोगिकसंयोगवत्त्वादिरूप इति नानाविधपरम्परायास्तथात्वसूचनाय तद्वदादावित्युक्तम् । वह्नित्वादेरनुगमकत्वाभिधानेन च तस्य विशेषान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकत्वं तदवच्छिन्ने तादृशप्रतियोगितावच्छेदकत्वाभावोपपादकं दर्शितम् । तादृशेति । हेतुनिष्ठेत्यर्थः । अवच्छेदकत्वमितीति । अविशेषिततदवच्छिन्ने एव अवच्छेदकत्वाभावसौलभ्यमिति शेषः । वह्न्यादेर्विधेयतावच्छेदकतया अनुमितौ भानमनुरुध्य कल्पान्तरमाह । यदिति । एकव्यक्तिवह्नित्वादिसाध्यकस्थले पक्षाधिकरणकहेतुकस्थले च यदनवच्छेदकमिति वक्तव्यम् ।

न च वह्निर्द्रव्यत्वादित्यादौ जातित्वाद्यवच्छिन्नवह्नित्वादेरवच्छेदकत्वाभावमादाय यथाश्रुतेऽतिप्रसङ्गः । अविशेषितसाध्येऽनवच्छेदकत्वग्रहश्च निर्धर्मितावच्छेदककतया नानुमितिहेतुरिति वाच्यम् । यतोऽविशेषितस्यानवच्छेदकत्वमित्यस्यानवच्छिन्नोऽवच्छेदकत्वाभावोऽर्थः, तस्य च साध्यतावच्छेदकप्रकारेण भासनेऽपि ग्रहसम्भवः । वस्तुतो यदनवच्छेदकमित्यत्रावच्छेदकभेदस्यैव विवक्षणादोक्तातिव्याप्तिरिति तत्त्वम् । यद्रूपावच्छिन्नम् । यतद्रूपावच्छिन्नम् । अनवच्छेदकमिति । अनुगतरूपेण नानाव्यक्तिसाध्यके वह्निमान् धूमादित्यादौ वक्तव्यम् । साध्यतावच्छेदकेऽनवच्छिन्नत्वप्रवेशाज्जातित्वादिविशिष्टवह्नित्वाद्यवच्छिन्नस्यान-

घच्छेदकत्वमादाय वह्निमान् द्रव्यत्वादित्यादौ नातिप्रसङ्ग । म-हानसीयत्वादिसहितवह्नित्वादेर्यथावच्छेदकतायामनवच्छेदकता त-थापि तत्पर्याप्त्यनधिकरणकेवलवह्नित्वाद्यवच्छिन्नेऽवच्छेदकत्वा-भाववृत्तावविरोध इति नाव्याप्ति । यत्रानुगतैकरूपाविशिष्टनाना-व्यक्त्यवच्छिन्नानां साध्यता तत्र यद्रूपविशिष्टसाध्यतावच्छेदका-वच्छिन्नस्यानवच्छेदकत्व तद्रूपविशिष्टावच्छिन्न व्यापकम् । यत्र च साध्यतावच्छेदकविशेषणमप्यननुगत तद्विशेषण त्वनुगत तत्र यद्रूपावच्छिन्नविशिष्टावच्छिन्नस्यैवानवच्छेदकत्व तद्रूपावच्छि-न्नविशिष्टावच्छिन्न व्यापकमित्यादिक यादृशरूपेत्यादिना दर्शितम् । अत्रापि सर्वत्रानवच्छिन्नत्वेन यद्रूपं विशेषणीयम् । तेन नोक्त-दोषावकाशः । शब्दैक्यस्येति । साध्यसाधनभेदेन कार्यकार-णभावभेदस्याऽऽवश्यकतयेत्यादि । व्यधिकरणयोर्व्याप्यव्यापक-भावविरहे प्रतियोगित्वादित्यन्तहेत्वसङ्गतिमाशङ्कते । यद्यपीति ।

(दी०) अन्येत्यादि । यद्यप्युक्तरीत्या सर्वत्र तादृशप्रतियो-गितानवच्छेदकत्वपर्यन्तानुधावनस्याऽऽवश्यकत्वेनाकिञ्चित्कर-मेव तादृशाभावप्रतियोगित्वम् । तथापि विशिष्टसामानाधि-करण्यरूपाया व्याप्तेर्व्यधिकरणासम्भवित्वमात्रे तात्पर्यम् । व्याप्तिरेवेत्यस्य कालिकीत्यादिः ।

(गा०) उक्तरीत्येति । रूपादिनानाव्यक्तिसाध्यके पृथिवीत्वाद्ये-कव्यक्तिहेतुकव्याप्तिवारणानुरोधेनेत्यर्थः । सर्वत्र । लक्षणे । अकि-ञ्चित्करम् । व्यधिकरणयोर्व्याप्तिघटकसाध्यविशेषणदलविरहाप्रयो-जकम । विशिष्टेति । तादृशप्रतियोगितानवच्छेदकरूपाविशिष्टेत्य-र्थः । सामानाधिकरण्यरूपाया इत्यन्त हेतुगर्भविशेषणम । तथा च यतो न व्याप्ति' साध्यसमानाधिकरणवृत्तिधूमत्वादिरूपा अपि तु साध्यसामानाधिकरण्यरूपेव अतो व्यधिकरणपर्वतीयधूममहा-नसीयवह्न्योस्तदसम्भवः । सामानाधिकरण्यदलविरहादित्ये-तावन्मात्रे तात्पर्यम्, सामानाधिकरण्यविरहस्यैव प्रतियोगित्वा-दित्यन्तेन सूचनान्न तु साध्यविशेषणदलविरहस्य तत्र व्याप्ति-विरहप्रयोजकत्वमित्यर्थः ।

देशिकव्याप्तौ व्याप्यव्यापकयोरुत्पत्तिविनाशयोर्यौगपद्यमप्रयोजकमतः पूरयति । व्याप्तिरेवेत्यस्येति । एवं परस्परमित्यपि पूरणीयम् । व्यापकानन्तरमुत्पन्नस्य तत्सत्त्वं एव विनष्टस्यापि व्याप्यत्वादेकदिशि व्याप्यतायामुक्तस्याप्रयोजकत्वात् ।

भेदस्याव्याप्यवृत्तितानिराकरणं प्रकृते सङ्गमयति । अन्योन्याभावेति ।

(टी०) अन्योन्याभावगर्भलक्षणस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिं निरस्यति । न चेति । अभेदस्येति । तथा च मूले महीरुहो विहङ्गमसंयोगी नेति प्रतीतेरनुभूयमानविशिष्टभेदोल्लेखिन्या अपि शिखी विनष्ट इति प्रतीतिवद्विशेषणाभावविषयतामात्रं कल्प्यते, बाधकबलात् । यत्र च विशिष्टभेदे न बाधकं तत्र तथा प्रतीतिबलात्तत्सिद्धिरस्त्येवेति नातिप्रसङ्गः ।

(गा०) अव्याप्तिम् । हेतुसमानाधिकरणभेदे विशेषणान्तरासत्त्वे भेदाव्याप्यवृत्तित्वशङ्काधीनामव्याप्तिशङ्काम् । न्यूनताभङ्गायाव्याप्यवृत्तित्वसाधकतया पूर्वपक्षग्रन्थोपदर्शितां प्रतीतिमन्यथोपपादयति । तथा चेति । अनुभूयमानो विशिष्टभेदोल्लेखो विशिष्टभेदबोधकशब्दाभिलप्यमानविषयकत्वम्, वाक्यार्थज्ञानविधया तादृशवाक्यप्रयोजकत्वं वा यस्यास्तादृश्या इत्यर्थः । विशिष्टाभावोल्लेखिप्रत्ययस्य विशेषणाभावविषयकत्वे दृष्टान्तमाह । शिखीति । इत्यादिप्रतीतिवदिति । इत्याकारिकाया विशिष्टध्वंसोल्लेखिन्या विशेष्याविनाशप्रत्ययस्थलीयप्रतीतिस्तद्वदित्यर्थः । शिखी विनष्ट इत्यादिशब्दोल्लेखिप्रतीतेस्तच्छब्दमुख्यार्थविषयकत्वपरित्यागे बीजमाह । बाधकबलादिति । तत्तच्छब्दमुख्यार्थविरोधिविषयकप्रतीतिबलादित्यर्थः । अत एव गुणो न संयोगीत्यादिप्रतीतेर्विशेषणाभावविषयकत्वप्रतिबन्धनवकाश इत्याह । यत्रेति । यत्र यद्धर्मिकप्रतीतौ । विशिष्टभेदे । विशिष्टभेदविषयकत्वे । न बाधकम् । न प्रतीत्यन्तरविरोधः । तथा प्रतीतिबलात् । विशिष्टभेदोल्लेखिप्रतीतिबलात् । तत्सिद्धिः । विशिष्टभेदसिद्धिः । अत्रापि तत्रेत्यनुषञ्जनीयम् । नातिप्रसङ्ग । न गुणादौ विशिष्टभेदासिद्धिप्रसङ्ग ।

भेदस्याव्याप्यवृत्तित्वव्यवस्थापनाय मूलोक्तबाधकं निराकुरुते अत्रेत्यादिना ।

(दी०) अत्र वदन्ति । अभेदस्य भेदाभावस्य ज्ञानं न बाधकम्, भेदवत् तत्प्रतियोगितावच्छेदकस्य संयोगात्मनस्तदभावस्याव्याप्यवृत्तित्वेन तदुपपत्तेः । यथा हि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञाने तदत्यन्ताभावस्याग्रहादभावव्यवहाराच्च स एव तदभाव इति कल्प्यते, तथा प्रतियोगितावच्छेदकधर्मग्रहे तद्वदन्योन्याभावस्याग्रहादभावव्यवहाराच्च स एव तस्याभाव इति निर्णीयते । आधिक्येऽपि चाव्याप्यवृत्तित्वात् ।

(गा०) अभेदपदेन भेदात्यन्ताभावो भेदस्य वृक्षावृत्तित्वं भिन्नभेदो वा विवक्ष्यते ? तत्राद्यं दूषयति । अभेदस्येति । भेदवत् । भेदस्येव प्रतियोगिनो ऽव्याप्यवृत्तित्वे तदभावस्यापि तथात्वे संयोगादिरूपत्वे च न बाधकमिति सूचयितुमेतद्दृष्टान्ताभिधानं स्वमतेन । तदुपपत्तेः । उभयप्रतीत्योरविरोधोपपत्तेः । संयोगिभेदाभावस्य संयोगरूपत्वव्यवस्थापनामाह । यथा हीति । प्रतियोगिनोऽभावाभावत्वविरहेऽपि प्रतियोग्यभावज्ञानयोस्तत्तद्रूपेण परस्परप्रतिबध्यप्रतिबन्धकभावः सम्भवत्येव ग्राह्यभेदेन विपरीतज्ञानप्रतिबन्धकताभेदस्य स्वत्वाननुगमेनाऽऽवश्यकत्वादित्यरुचेराह । अभावव्यवहाराच्चेति । स एव । प्रतियोग्येव । स एव । प्रतियोगितावच्छेदकधर्म एव । अभावाभावस्यातिरिक्तत्वेऽपि प्रतियोग्यादिज्ञाने तेन हेतुना क्वचित् प्रत्यक्षतश्च तादृशाभावस्य ज्ञानसम्भवाद्भावव्यवहारोपपत्तेरभावमात्राभावस्यातिरिक्तत्वमपि सम्भवतीत्याशयेनाह । आधिक्येऽपिचेति । आधिक्ये संयोगिभेदाभावस्य संयोगातिरिक्तत्वे । अव्याप्यवृत्तित्वादिति । संयोगादिरूपप्रतियोगितावच्छेदकधर्मावच्छेदकमात्रावच्छिन्नवृत्तिकत्वोपगमादित्यर्थः ।

(दी०) अत एव न मूलावच्छेदेन कपिसंयोगिभेदाभावज्ञानं तथा । असम्भवादसिद्धेश्च । नापि कपिसंयोगिभेदस्य वृक्षावृत्तित्वज्ञानम् । असिद्धेः, तद्वृत्तित्वस्यैव ग्रहात् । नापि

कपिसंयोगिभिन्नभेदज्ञानम् । कपिसंयोगिभेदवत्तद्भेदस्याप्यव्याप्यवृत्तित्वेनाविरोधात् । नापि मूलावच्छेदेन तज्ज्ञानम् । असिद्धेः । तद्धर्मवद्भिन्नभेदस्य तद्धर्ममात्रपर्यवसिततया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वे विरोधाच्च । न हि घटभिन्नभेदो घटत्वादतिरिच्यते, अवश्यक्लृप्तघटत्वेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात् । अन्यथा सर्वत्राभावस्याभावो अतिरिक्त एव कल्प्येत ।

(गा०) अतएव । कपिसंयोगिभेदाभावस्य कपिसंयोगावच्छेदकमात्रावच्छिन्नकपिसंयोगादिरूपत्वादेव । न तथा । न एकावच्छेदेनाभावविषयकत्वेन बाधकतया वक्तुं शक्यम् । संयोगरूपत्वपक्षेऽसम्भवादिति । मूलावच्छेदेन कपिसंयोगस्यावृत्तेर्भवन्मतेऽपि तादृशज्ञानासम्भवादित्यर्थः । अतिरिक्ततामते आह । असिद्धेश्चेति । मयाऽनभ्युपगमादित्यर्थः । द्वितीयं दूषयति । नापीति । असिद्धिं विवृणोति । तद्वृत्तित्वस्येति । ग्रहात् । ग्रहोपगमात् । तृतीयं दूषयति । नापीति । अव्याप्यवृत्तित्वेन । अव्याप्यवृत्तित्वोपगमेन । अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्यैवास्माकमप्यव्याप्यवृत्तित्वादिति भावः ।

तज्ज्ञानम् । भिन्नभेदज्ञानम् । असिद्धेरिति । कपिसंयोगावच्छेदकमात्रावच्छेदेन तदुपगमादिति भावः । तस्य कपिसंयोगरूपतया भवतोऽपि मूलावच्छेदेन तज्ज्ञानासम्भव इत्याह । तद्धर्मेति । तद्धर्ममात्रपर्यवसिततया । तद्धर्मात्मकतानियमेन । एतच्च कपिसंयोगिभिन्नभेदकपिसंयोगयोस्तादात्म्ये हेतुः । मूलवृत्तित्वविरोधात् । मूलावच्छिन्नत्वविरहात् । उपदर्शितसामान्यनियममेव दृष्टान्तेन द्रढयति । न हीति । एतदेवासिद्धमित्यत आह । आवश्यकेति । भावेन कथमभावव्यवहाराद्युपपत्तिरित्याशङ्कामपनिनीषुराह । अन्यथेति । अत्यन्तान्योन्याभावयोरभावावपि प्रतियोगितत्वावच्छेदकाभ्यामतिरिच्येयातामित्यर्थः । तथा चाभावाभावस्यानतिरिक्ततावादिनां सिद्धान्तानुरोधिनामभावत्वं न भावभिन्नत्वं तन्नियतं वा, किं तु भावसाधारणः स्वरूपसम्बन्धविशेष एवेति भेदावच्छिन्नभेदस्य भेदप्रतियो-

गितावच्छेदकरूपत्वे न किञ्चिद्बाधकमिति भावः ।

भेदस्याव्याप्यवृत्तितां प्रकारान्तरेण निराकुर्वाणस्य यस्य कस्यचिन्मतमाशङ्क्य निराकरोति । अत एवेति ।

(दी०) अत एवात्यन्ताभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोः सामान्यत एव क्लृप्तो विरोधः । तत्र कपिसंयोगवत्यपि वृक्षे मूले न कपिसंयोग इति प्रतीतेरन्यथानुपपत्त्या तावदाद्ययोः स सङ्कोच्यताम्, न ह्यपा प्रतीतिः कपिसंयोगिभेदविषयत्वेनोपपादयितुं शक्या, नियमतः संयोगवत्त्वेन प्रतियोगिनोऽनुपस्थितेः, प्रतियोगिकोटौ तदनुल्लेखाच्च । मूले न कपिसंयोगीति प्रतीतिस्तु शिखी विनष्ट इतिवद्भासमानविशेषणस्याभावमात्रविषयत्वेनोपपन्नत्वान्नान्तिमयोरपीति परास्तम् ।

(गा०) अत एव । वक्ष्यमाणदूषणादेव । सामान्यतः । सकलात्यन्ताभावान्योन्याभावसाधारणरूपेण । तत्र । तयोर्विरोधयोर्मध्ये । अन्यथानुपपत्त्या । अन्यविषयकतयोपपादनासम्भवेन । आद्ययोः । अत्यन्ताभावप्रतियोगिनोः । स. । विरोधः । सङ्कोच्यताम् । संयोगाद्यभावव्यावर्त्तकविशेषमन्तर्भाव्येत्यादिः । एतेन संयोगात्यन्ताभावव्याप्यवृत्तित्वप्रतिबन्दिनिरासः कृतः । अन्यथोपपत्तिमाशङ्कते । न हीति । नियमत इति । तादृशप्रतीतिपूर्वमिति शेषः । संयोगवत्त्वेनेति । तथा चाभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकबुद्धेर्हेतुतया संयोगप्रकारकोपस्थितेः प्रागसत्त्वेन जायमानायास्तादृशप्रतीतेर्न तदवच्छिन्नभेदविषयकत्वसम्भव इति भावः । तस्योपस्थितिविरहदशायां तादृशप्रतीतेरपलापः सम्भवतीत्याशङ्क्य दूषणान्तरमाह । प्रतियोगिकोटावित्ति । तदनुल्लेखात् । संयोगवतोऽभानात् । तथा च न तदंशे अभावप्रतियोगित्वावगाहनं सम्भवतीति भावः । भासमानविशेषणस्येति । प्रतियोगिकोटौ भासमानस्य संयोगस्येत्यर्थः । भासमानेत्यनेन पूर्वतो विशेषो दर्शितः । अन्तिमयोरपि । अन्योन्याभावप्रतियोगितावच्छेदकयोर-

पि । न सङ्कोच्यतामित्यनुपपद्यते । तथा च बाधकप्रतीतिविरहे-ऽपि विरोधसङ्कोचे प्रथमावधारणस्य भ्रमत्वकल्पनमसङ्कररूपबाधकबलादेव दर्शितप्रतीतेर्विशेषणात्यन्ताभावविषयकत्वमिति न तद्बलादन्योन्याभावाव्याप्यवृत्तित्वमिति भावः ।

सामान्यतो विरोधस्य क्लृप्तत्वमेव निराकुरुते ।

(दी०) अन्योन्याभावान्तरस्य प्रतियोगितावच्छेदकान्तरसमानाधिकरणतया स्वस्वप्रतियोगितावच्छेदकासामानाधिकरण्यपर्यवसायिनो विरोधस्य तत्तद्घटितत्वेन विशेषे एव विश्रामात् । अत्यन्ताभावप्रतियोगिनोरिवान्योन्याभावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकरण्यानुभवेन प्रतिरुद्धतया तथाविधविरोधकल्पनाया अनवकाशाच्च ।

(गा०) अन्योन्याभावान्तरस्येति । एकस्यान्योन्याभावस्यान्यदीयप्रतियोगितावच्छेदकसमानाधिकरणतया तत्तदन्योन्याभावे तत्तत्प्रतियोगितावच्छेदकासामानाधिकरण्यरूप एव विरोधः क्लृप्तः । तथा च तत्तदभावत्वरूपाननुगतधर्माणामेव विरोधितावच्छेदकत्वम्, न तु घटभेदसंयोगिभेदादिसाधारणैकधर्मस्येत्यर्थः । तथा च न प्राथमिकनियमावधारणस्य भ्रमत्वप्रसङ्ग इति भावः ।

नन्ववच्छिन्नप्रतियोगिताकत्वविशिष्टसामानाधिकरण्यसम्बन्धेन धर्मविशिष्टान्यत्वमेव भेदस्य सामान्यतः प्रतियोगितावच्छेदकविरोधः सुवचः । न च सामानाधिकरण्यघटकसम्बन्धवृत्त्यनिवेशस्याऽऽवश्यकत्वादिदमपि न सर्वसाधारणमिति वाच्यम् । स्वनिरूपकत्वस्वावच्छेदकनाघटकसम्बन्धावच्छिन्नस्वावच्छेदकाधिकरणतावच्छेदकावच्छिन्ना या स्वावच्छेदकवत्ताग्रहविरोधितावच्छेदकसम्बन्धेन वृत्तिस्तदवच्छेदकत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यानुयोगितावत्त्वमेवानुगतं अन्योन्याभावनिष्ठ विरोधित्वम् । द्वित्वावच्छिन्नप्रतियोगितानिरूपितभेदनिष्ठानुयोगितायां द्वित्वावच्छिन्नप्रतियोगिताविशिष्टत्वसत्त्वाद्विरोधानुपपत्तिवारणाय स्वाधिकरणवृत्तिनावच्छेदकत्वमुपेक्ष्य स्वावच्छेदकाधिकरणतावच्छेदकत्वनिवेशः। गोत्वाभावाधिकरणकगोत्वाभावस्वरूपघटभेदस्य

धर्मवृत्तित्वाद्विरोधानुपपत्तिवारणायाभावे प्रतियोगितावच्छेदकाधिकरणवृत्तित्वमुपेक्ष्य अनुयोगितायां तदवच्छेदकत्वं निवेशितमित्यरुचेरविरोधानुभवप्रतिरोधेन सामान्यतो विरोधकल्पनैव न सम्भवतीत्याह । अत्यन्ताभावेति ।

बाधकसत्त्वमभ्युपेत्यापि दृष्टान्तवैधर्म्यं प्रदर्शयंश्च संयोगीति प्रतीतेर्विशेषणसंसर्गाभावविषयकत्वं निराकरोति । किञ्चेति ।

(दी०) किञ्च शिखी विनष्ट इति प्रतीतेर्विशिष्टध्वंसोल्लेखिन्या विशेष्ये तद्बाधादास्तां विशेषणध्वंसविषयता, न संयोगीति प्रतीतेर्विशिष्टभेदमवगाहमानायाः कथं विशेषणसंसर्गाभावविषयकत्वेनोपपत्तिः । न खलु सहस्रेणापि बाधकैरिदं रजतमिति प्रतीतेरङ्गत्वावलम्बनं व्यवस्थापयितुं शक्यते । न च विशेषणभेद एव तस्या विषयः । अग्रेऽपि न कपिसंयोगीति प्रतीत्यापत्तेः ।

(गा०) तद्बाधात् । ध्वंसप्रतियोगित्वबाधात् । आस्तां विशेषणध्वंसविषयतेति । तावतापि ध्वंसविषयकत्वमव्याहतमेवेति भावः । ननु तावतापि ध्वंसे विशिष्टधर्मिप्रतियोगिकत्वस्य बाधितस्यावगाहनात्तादृशप्रतीतेर्न प्रमात्वोपपत्तिः, तदवगाहित्वानुभवापलापे च मूले न संयोगीति प्रतीतिर्भेदावगाहित्वानुभवापलापः किं पाणिपिहित इत्यत आह । न खल्विति । इति प्रतीतेः । इत्याकारिकाया रङ्गविषयकप्रतीतेः । शक्यते इति । अपि तु तस्यां भ्रमत्वमेव कल्प्यते इति शेषः ।

अयं भावः । यादृशप्रतीतेर्यादृशव्यवहारजनकत्वं तस्या एव तदाकारता रङ्गत्वविषयकप्रतीतितश्च न रजतमिदमिति व्यवहारः, अपि त्विदं रङ्गमित्येव, अतो रङ्गे इदं रजतमिति प्रतीते रजतत्वावगाहितामन्तरेण इदं रजतमिति व्यवहारजनकत्वासम्भवात् तस्यास्तदवगाहित्ववद् वृक्षो न कपिसंयोगीति व्यवहारजनकप्रतीतेस्तादृशवाक्यप्रतिपाद्यसंयोगिभेदविषयकत्वमावश्यकम् । तादृशवाक्यस्यानुयोगिवाचकपदोत्तरसप्तम्यविरहेण संयोगसंसर्गाभावाबोधकत्वात्, संयोगिभेदावगाहनमन्तरेण प्रतीतेः संयोगिभेदबोधक-

वाक्यप्रयोजकत्वासम्भवात् । शिखी विनष्ट इत्यादिशब्दाच्च शिखायामपि नाशप्रतियोगित्वस्य मत्वर्थीयार्थविवक्षयान्वयोपपादनस्य शक्यतया तदाकारकप्रतीतेः शिखाप्रतियोगिकनाशविषयकत्वसम्भवः। विशेषणसंसर्गाभावविषयकत्वासम्भवेऽपि शिखी विनष्ट इत्यादिप्रतीतेर्विशेषणनाशविषयकत्ववत् प्रकृतप्रतीतेर्विशेषणभेदविषयकत्वं सम्भवति बाधकबलादिति न विशिष्टभेदस्याव्याप्यवृत्तितासिद्धिस्तत्रेति शङ्कते । न चेति ।

प्रत्यक्षादिप्रतीतेरपि तन्मूलकव्यवहारबलेन विषयव्यवस्थापकतेत्यालोच्य व्यवहारबलेनैवान्योन्याभावस्याव्याप्यवृत्तितां साधयितुमुपक्रमते । युज्यते चेति ।

(दी०) युज्यते चान्योन्याभावोऽव्याप्यवृत्तिः, कथमन्यथा पक्वतादशायां घटादावयं न श्यामो, दण्डादिविनाशसमये चैत्रादौ नायं तद्दण्डवानित्यादयो व्यवहाराः । न च तत्र विशेषणसंसर्गाभाव एव प्रतीयते, अनुयोगिनि सप्तमीं विना तदनुपपत्तेः । न खलु भूतलं न घट इत्यादीनि वाक्यानि कदाचिदपि घटसंसर्गाभावं बोधयन्ति । तथात्वे वा घटो न घट इत्यादेरपि प्रसङ्गात् ।

(गा०) पक्वतादशायामित्यादिसप्तमीद्वयं व्यवहारान्वयिविषयत्वार्थकं न त्वधिकरणत्वार्थकम्, अन्यकालीनतथाविधव्यवहाराणामपि प्रकृतसाधकत्वात् । एवं च व्यवहाराकारे उभयत्रावच्छेदककालबोधकपदं पूरणीयम् । इत्यादय इत्यादिपदादेशिकाव्याप्यवृत्तित्वसाधकानां मूले नायं कपिसंयोगीत्यादिव्यवहाराणां परिग्रहः । इदानीमयं न श्याम इत्यादौ इदानीं यः श्यामस्तद्भेदः प्रतीयते इत्युक्तिसम्भवात् स्थलान्तरानुधावनम् । तद्दण्डनाशसमये च तद्दण्डवतोऽप्रसिध्या तत्र नायं प्रकारः सम्भवतीति भावः । अत एव च तद्दण्डपरित्यागमुपेक्ष्य तन्नाशानुधावनं तद्दण्डपर्यन्तानुसरणं च । अनुयोगिनीति । अनुयोगिबोधकपदे इत्यर्थः । तदनुपपत्तेः । संसर्गाभावप्रतीत्यनुपपत्तेः । नञ्पदजन्यत-

दनुयोगिकसंसर्गाभावबोधे तेन समं संसर्गाभावस्याऽऽधाराधेयभावः प्रकारतयैव भासते इति नियमेन तदुपस्थापकविभक्तेरपेक्षितत्वादिति भावः ।

ननु नञर्थसंसर्गाभावे आधाराधेयत्वस्य प्रकारतानियमस्यासिद्धा सप्तमीं विनापि प्रकृते श्यामरूपादिसंसर्गाभावस्य घटादौ सम्बन्ध संसर्गमर्यादया ऽवगाह्य प्रत्ययः स्यादेवेत्यत आह । न चाखिरति । तथा च तादृशनियमानङ्गीकारे भूतल न घट इत्यादितोऽपि आधाराधेयभावसंसर्गकाभावबोधः स्यादिति भाव. । न च तादृशनियमस्वीकारे ऽपि न कथमियमापत्ति, सामग्रीसत्त्वे नियमभङ्गभयस्य कार्योत्पत्तिविरोधित्वासम्भवादिति वाच्यम् । तादृशनियमवादिनां फलाभावेन नञ्समभिव्याहारज्ञानघटितायास्तादृशबोधसामग्र्या एवाक्लृप्तत्वात् । उक्तस्थले विशेषणसंसर्गाभावप्रतीतिमङ्गीकुर्वतैव नञ्पदघटितसामग्र्यास्तादृशबोधोत्पत्तिप्रयोजकताया वाच्यत्वात् ।

ननु प्रामाणिकैर्भूतल न घट इत्यादिवाक्यं प्रयुज्यते एव, ततश्च तात्पर्यसत्त्वे संसर्गाभावप्रतीतिरिष्टैवेत्यत आह । तथात्वे चेति । तथात्वे । तत्र संसर्गाभावबोधकत्वोपगमे । प्रसङ्गात् । प्रामाणिकप्रयोगप्रसङ्गात् । घटादौ घटादिसंसर्गाभावस्याबाधितत्वात्तस्य च भवतामुक्तवाक्येन बोधसम्भवादिति भावः ।

ननु आधाराधेयभावसंसर्गकसंसर्गाभावबोधने इतरविशेषणतया स्वार्थान्वयपरपदजन्यप्रतियोग्युपस्थितिरपेक्ष्यते, भूतल न घट इत्यादौ च तदभावान्नापत्ति. । न चैवमपि नायं तद्दण्डवानित्यादौ धर्मिणोऽनन्वयेन तद्विशेषणतया स्वार्थान्वयबोधपरत्वं प्रतियोगिवाचकपदस्य न सम्भवतीति कथं प्रकृतोपपत्तिरिति वाच्यम् । तत्र तद्दण्डवानयमिदानीं तद्दण्डाभाववानित्येव बोधोपगमेन धर्मिणोऽपि प्रवेशात् । यत्र धर्मिणि तद्दण्डवत्त्वं न कदापि तत्र विशिष्टभेदबोधस्यैव स्वीकारात् तावता अन्योन्याभावस्याव्याप्यवृत्तित्वासिद्धिरित्याशङ्क्याह । अपि चेति ।

(दी०) अपि च विशिष्टवाचकदण्ड्यादिपदेभ्यो धर्म्युपसर्जनतयोपस्थितस्य दण्डादेः कथं प्रतियोगित्वेनाभावेऽन्वयः ? इ-

त्तरविशेषणतयोपस्थापितस्य निराकाङ्क्षतयाऽन्यत्र विशेषणत्वे-नान्वयायोगात् ।

(गा०) विशिष्टेति । विशिष्टपरदण्ड्यादिपदान्तर्गतदण्डादिपदेभ्यो धर्मिविशेषणतया स्वार्थान्वयपरेभ्य उपस्थितस्येत्यर्थः । एतेन पदार्थोपस्थितौ पदार्थस्य प्राधान्येन भानेऽपि नासङ्गतिः । प्रतियोगित्वेन प्रतियोगिविषया । अनुयोगितासम्बन्धेन विशेषणविधयेति यावत् । इतरविशेषणतयोपस्थापितस्य । एकपदार्थविशेषणतया स्वार्थान्वयपरपदाभिन्नपदानुपस्थापितस्य । अन्यत्र । तत्पदानुपस्थितांशे । विशेषणतयाऽन्वयस्य निराकाङ्क्षतयाऽयोगादित्यर्थः ।

अथैतादृशव्युत्पत्तिकल्पनं निरर्थकम् । न च दण्डिनो रूपमित्यादौ सम्बन्धिविशेषणतया भासमानदण्डादेर्विभक्त्यर्थविशेषणतया भानवारणाय उक्तव्युत्पत्तिकल्पनमावश्यकमिति वाच्यम् । प्रकृत्यर्थैकदेशे न प्रत्ययार्थस्यान्वय इति व्युत्पत्त्यन्तरविरोधेन तादृशातिप्रसङ्गस्याप्यनवकाशात् । दण्डिनावित्यादौ दण्डादेर्द्वित्वाद्यन्वयवारणाय तादृशव्युत्पत्तेरावश्यकत्वात् । न च तदकल्पने वह्निमान्नास्तीत्यादौ वह्न्यादेरभावविशेषणतया ऽन्वयापत्तिरिति वाच्यम् । प्रतियोगिपदादन्यत्र यदन्यत्कारकादपि । वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते । इति व्युत्पत्त्यन्तरविरोधेनैव तादृशान्वयबोधाप्रसक्तेः । समासस्येव तद्धितान्तस्यापि वृत्तिशब्दत्वात् । पर्वतस्य वह्निमानित्यादौ पर्वतसम्बन्धादेर्वह्न्यादावन्वयवारणाय तादृशव्युत्पत्त्यन्तरकल्पनस्याऽऽवश्यकत्वादिति चेत् ? राज्ञः पुत्रधनमित्यादौ धनांशविशेषणपुत्रादिविशेषणतया विवक्षितस्य राजसम्बन्धादेर्धनादिविशेषणतयाऽन्वयवारणायोक्तव्युत्पत्तिकल्पनमावश्यकम् । एवं राजपुरुषादिपदानां यत्र द्वन्द्वस्तत्र समासघटकपूर्वपदार्थेऽपि प्रत्ययार्थान्वयात् प्रकृतित्वघटकमव्यवधानं प्रत्ययान्तरव्यवधानाभावरूपं वाच्यम् । तथा च तत्पुरुषस्थपूर्वपदोपस्थाप्येऽपि समुदायोत्तरषष्ठ्यर्थस्यान्वयवारणाय तदावश्यकत्वम् । न च प्रतियोगिपदादित्यादिव्युत्पत्तिविरोधेनैव न तदन्वयप्रसक्तिरिति वाच्यम् । समस्यमानपदार्थान्वये एकदेशान्वयित्वविरहात् । अन्यथा द्वन्द्वोपस्थापितसकलपदार्थानां विभक्त्यर्थान्वयानुपपत्तेरिति भावः ।

अथ घटपटावित्यादौ घटादिविशेषणतया स्वार्थान्वयपरद्विवचनाद्युपस्थाप्यसंख्यादेः, चैत्रस्य घटपटावित्यादौ तथाविधचैत्रसम्बन्धादेश्च पटादौ विशेषणतयाऽन्वयो निर्विवाद इति कथमुक्तव्युत्पत्तिकल्पनम् ? न च स्वविशेषणविशेषणतयोपस्थापितस्य साक्षात्स्वविशेषणतयाऽनन्वय इत्येव व्युत्पत्तिः । अत्राप्युपस्थापितान्तार्थः पूर्ववन्निष्कर्षणीयः । इत्थं च चैत्रस्य घटपटौ पश्यतीत्यादौ कर्मत्वादिविशेषणतया भासमानघटादिविशेषणस्य द्वित्वचैत्रसम्बन्धादेः पटादिविशेषणत्वे न बाधक घटादेः पटाद्यविशेषणत्वात्प्राथमिकविशेषणत्वं साक्षात्परम्परासाधारणमिति वाच्यम् । एवं सति नाय तद्दण्डवानित्यादौ अभावांशे दण्डिनो विशेषणत्वानुपगमे दण्डस्य तद्विशेषणतया अन्वये बाधकविरहाद्दर्शितव्युत्पत्तेः प्रकृतानुपयोगप्रसङ्ग इति चेत् । न । एकविशेषणतया स्वार्थबोधकपदमन्यत्र पृथग् विशेषणतया न तद्बोधकमित्येव व्युत्पत्त्यङ्गीकारात् । घटपटावित्यादौ विभक्त्यर्थद्वित्वादेरेकधर्मावच्छिन्नबोधयादिविशेषणतया भानेनाविरोधात् । राज्ञः पुत्रधनमित्यादौ तत्पुरुषे च पुत्रधनयोरेकधा राजसम्बन्धादेर्नान्वयबोधप्रसङ्गः । तादृशान्वयबोधे तयोरेकांशे अपरविशेषणकबोधपरत्वग्रहस्य विरोधित्वादिति । आकाङ्क्षा जिज्ञासारूपा ऽन्वयबोधाङ्गम्, तत्र च पदविशेषजन्योपस्थितिः कारणमिति मतानुसारेण निराकाङ्क्षत्वेत्यभिहितम् । आनुपूर्वीविशेषस्याऽऽकाङ्क्षात्वपक्षे तु निरुक्तपदभिन्नपदजन्योपस्थितिरूपकारणविरहो हेतुर्बोध्यः ।

यत्तु न दण्ड इत्यानुपूर्वीविरह एव तत्र निराकाङ्क्षतेति । तदसत् । तथा सतीतरविशेषणतयोपस्थितिकथनस्यानुपयोगितापत्तेः । तादृशानुपूर्व्या दण्डादिसंसर्गाभावबोधाप्रयोजकत्वे दण्डादिपदस्य मत्वर्थाविवक्षया दण्डादिपरत्वेऽपि दण्डादिसंसर्गाभावबोधानिर्वाहेणाग्रिमशङ्कानुपस्थितेः ।

दण्डपदादिपदस्य विशेषणमात्रपरत्वे आधाराधेयभावस्य प्रकारतानुरोधेन सप्तम्यपेक्षामनवदधानः शङ्कते । न चेति ।

(दी०) न चात्र विशिष्टोपस्थापकं पदं विशेषणमात्रपरम् । तथा सति चैत्रो न दण्डो घटो न श्यामं रूपमित्यादावपि दण्डा-

धर्म्यं चेति। श्यामादिवैधर्म्यं चेत्यर्थः। रक्तत्वादिकमेवेति। रक्तत्वादेः श्यामरूपाद्युपलक्षितवृत्तित्वेऽपि तद्विशिष्टावृत्तित्वादिति भावः। न च श्यामरूपविशिष्टावृत्तित्वं श्यामरूपावच्छिन्नाधिकरणताकत्वाभाववत्त्वं तल्लाभश्च न न श्याम इत्यतः सम्भवति, पदार्थैकदेशस्य धर्म्युपसर्जनतया च उपस्थितस्य श्यामरूपस्याधिकरणत्वे विशेषणतया अन्वयासम्भवादिति वाच्यम्। धर्मिणः श्यामरूपावच्छिन्नत्वसम्बन्धेनान्वयोपगमादेव तल्लाभसम्भवात्।

एतस्मिन् विशिष्टवैधर्म्यमाचार्याणामनुमतमित्याह। यदाहुरिति। एवं च मूले न कपिसयोगी वृक्ष इत्यादिप्रतीतेरपि संयोगादिविशिष्टवैधर्म्यमेव विषयः तच्च कपिसंयोगाद्यभाव एव तस्य कपिसंयोगाद्यवच्छिन्नावृत्तित्वात्। विभिन्नकालावच्छेदेनेव विभिन्नदेशावच्छेदेनापि वर्तमानयोरेकाधिकरणतायामपरस्यानवच्छेदकत्वादिति नोक्तप्रतीतिबलाद्दैशिकमव्याप्यवृत्तित्वं भेदस्येत्यवधेयम्।

(चि०) व्याप्यव्यापकभावाज्ञानेऽपि वस्तुसतस्तथात्वेनाज्ञायमानस्य सम्बन्धत्वेनैव भानस्य षष्ठ्यर्थत्वम्। न चैवमननुगमो दोषाय, कस्य का व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात्। अथ धूमवति वह्निह्रदौ न स्तः, धूमवान् वह्निमद्ध्रदौ न भवतीति प्रतीतेर्व्यासज्यवृत्तिप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योन्याभावौ धूमवति विद्येते इति कथमेते लक्षणे इति चेन्न। तादृशाभावानभ्युपगमात्। अभ्युपगमे वा तत्र तदुभयं प्रतियोगि न वह्निर्वह्निमन्तौ।

(गा०) मूले व्याप्यव्यापकभावाज्ञानेऽपीति। निरुक्तव्याप्तित्वव्यापकत्वाभ्यां व्याप्तिव्यापकत्वयोरज्ञानेऽपीत्यर्थः। वस्तुसतः। वस्तुगत्या यो व्याप्यव्यापकभावस्तस्य। तथात्वेन। व्याप्तित्वादिना। अज्ञायमानस्य। अविशेषितस्य। षष्ठ्यर्थत्वम्। समासाविरलवाक्यस्थषष्ठ्या प्रतिपत्तिः। सम्भवतीति शेषः। व्याप्यव्यापकभावस्य विशेषणानवच्छिन्नस्य शब्दात् प्रतिपत्तिः सम्भवत्यत आह।

सम्बन्धत्वेनैवेति। भातस्य। अवच्छिन्नस्य। अतो निरुक्तव्याति-त्वादिना व्याप्त्यादिज्ञाने तेन रूपेण तज्ज्ञानापेक्षाविरहाञ्जात्माश्रया-दिरिति भावः।

सम्बन्धत्वस्य नियमघटितत्वमाशङ्क्याऽऽह। निरूपितेति।

(दी०) सम्बन्धत्वेनेति। निरूपितत्वमेतत्। कस्येति। इत्थं चाननुगताया अपि व्याप्तेर्ज्ञानं यथाऽनुमितिहेतुस्तथा वक्ष्यते। एते। अन्योन्याभावात्यन्ताभावगर्भे।

(गा०) सम्बन्धत्वं विशेष्यत्वादिभिन्नविषयतारूपं पदार्थान्तरं वा तच्च नियमाघटितमेवेति भावः। तत्त्वमस्य निरूपितमित्यर्थः। मूले न चैवमननुगम इति। एवम्। साध्यादिविशेषघटितनिरुक्तधर्मस्य व्याप्तिलक्षणत्वे। अननुगमः। प्रत्येकं सकलव्याप्तिसाधारण्यविरहः। दोषाय। अव्याप्त्यै। कस्य। साध्यादेः। का व्याप्तिरिति प्रश्ने। अननु-गतस्यैव। तत्तत्साध्यादिनिरूपितव्याप्तित्वरूपाननुगतलक्ष्यतावच्छेद-कावच्छिन्नस्यैव। लक्ष्यत्वात्। निरुक्ताननुगतलक्षणवत्त्वेन प्रतिपाद-नीयत्वात्। तथा च लक्ष्यतावच्छेदकैक्याभावान्नाव्याप्तिरिति भाव।

ननु लक्ष्याननुगमान्माभूल्लक्षणाव्याप्तिर्दोषः, तथाप्यनुमितौ व्या-प्तिज्ञानहेतुताया अननुगतव्याप्तिघटितरूपावच्छिन्नाया व्यभिचार-वारणासम्भव इत्याशङ्कायां दीधितिकृदाह। इत्थं चेति। इत्थम्। साध्यादिविशेषघटितत्वेन। अननुगतायाः। अनति-प्रसक्तैकरूपेण कारणतावच्छेदककोटौ निवेशयितुमशक्या-याः। तथा वक्ष्यते इति। सामान्यतोऽनुमितित्वावच्छिन्नं प्रति व्या-प्तिज्ञानत्वेन न हेतुता अपि तु अभावज्ञानत्वेन ज्ञानत्वेन वा हेतुता विशेषसामग्र्यैवानतिप्रसङ्गात्। तत्तत्साध्यादिविषयकतत्त-ल्लिङ्गकानुमितित्वमेवाननुगततत्तत्साध्यलिङ्गादिघटितव्याप्तिज्ञानज-न्यतावच्छेदकमतो न व्यभिचार इत्याशयः। अश्रूयमाणावच्छेद-कत्वांशे लक्षणद्वये एवाऽऽक्षेपसङ्गतेरेते लक्षणे इत्यस्याव्यवहिता-न्योन्याभावगर्भलक्षणद्वयपरताभ्रमं निराकुरुते। एते इति। अत्य-न्तान्योन्येति। अन्योन्याभावगर्भत्वेन लक्षणयोरैक्यमिति द्विवचन-सङ्गतिरिति भावः।

तादृशाभावानभ्युपगमादिति समाधानस्याभिप्रायवितर्केण विचारासहत्वं प्रदर्श्याभ्युपगमे वेत्यादिसमाधानमवतारयति । नन्वित्यादिना ।

(दी०) तादृशेति । ननु किं द्वित्वादिकं प्रतियोगितावच्छेदकमेव न भवति, किं वा भवत्येव, परं तु क्लृप्तानामेव स्वसमानाधिकरणतद्धर्मावच्छिन्नप्रतियोगिताकानामभावानां लाघवादित्यभिप्रायः ? नाद्यः, एकैकाभावप्रतीतितो द्वौ न स्त इति प्रतीतेर्विलक्षणत्वात् । शब्दादिना द्वौ न स्त इति निश्चयेऽप्येकैकाभावसंशयाच्च । विषयानुगमं विना अनुगताकारप्रत्ययायोगात् ।

(गा०) क्लृप्तानामेवेति । घटो नास्ति पटो नास्तीत्याद्यनन्यथासिद्धप्रतीतिविषयाणामित्यर्थः । इत्यभिप्राय इति । समाधातुरभिप्रायः । एकैकाभावप्रतीतितः । घटो नास्तीत्यादिप्रतीतितः । द्वौ न स्त इतीति । तत्र घटपटौ न स्त इतीत्यर्थः । एवमग्रेऽपि । विलक्षणत्वादिति । तथा च तादृशप्रतीतिवैलक्षण्यानुरोधेन घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वं न तद्विषयः, अपि तु घटपटोभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वमेवेति स्वीकरणीयमिति भावः ।

ननु घटो नास्ति पटो नास्तीत्यत्रेव घटपटौ न स्त इत्यत्रापि घटपटत्वाद्यवच्छिन्नप्रतियोगिताकत्वेनाभावद्वयं भासते । घटपटांशेऽपि अधिकस्य द्वित्वस्योपलक्षणतया भानेनैव प्रतीतिवैलक्षण्यमित्यत आह । शब्दादिनेत्यादि । प्रत्यक्षे घटपटौ न स्त इति निश्चयस्थले घटादिशून्ये प्रत्येकघटत्वाद्यवच्छिन्नाभावस्यापि निश्चयसम्भवात् प्रत्येकाभावे संशयो न भवत्येवेत्यत आह। शब्दादिनेति। एकैकाभावसंशयात्। अत्र घटो न वेत्यादिसंशयात्।उक्तप्रत्ययस्योक्तरूपेण प्रत्येकाभावविषयकत्वे तस्य एतादृशसंशयप्रतिबन्धकत्वापत्तिरिति भावः । नत्र तादृशसंशयानुत्पादे कदाचिदिष्टापत्तिः सम्भवतीत्यतो दूषणान्तरमप्याह । विषयानुगमं विनेति । अभावद्वयरूपविषयस्यानुगतरूपेण भानं विनेत्यर्थः ।

अभावद्वयमनुगतरूपेणैव भासते इति शङ्कते । न चेति ।

(दी०) न चाभावस्य द्वित्वाधिकरणप्रतियोगिकत्वमात्रं द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं वा द्वयं नास्तीति प्रतीतेर्विषयः । तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि तथाविधोभयशालिनि तादृशौ द्वौ न स्त इत्यप्रत्ययात् । द्वित्वसामानाधिकरण्याभानेऽपि प्रतीतेरनुगताकारत्वाच्च ।

(गा०) प्रतियोगिकत्वमात्रमित्यनेन विशिष्य घटत्वादेः प्रतियोगितावच्छेदकत्वविषयत्वव्यवच्छेदः । एतावतोक्तसंशयानुपपत्तिरपि परिहृता । तदवच्छिन्नकोटिकसंशये तदंशे प्रतियोगितावच्छेदकत्वावगाहिन एवाभावनिश्चयस्य प्रतिबन्धकत्वात् । द्वित्वसमानाधिकरणेति । द्वित्वसामानाधिकरण्योपलक्षितेत्यर्थः । तेन प्रत्येकाभावप्रतियोगितावच्छेदकघटत्वादौ द्वित्वसामानाधिकरण्यस्य विशेषणत्वविरहेऽपि न क्षतिः । प्रतियोगिताप्रकारकज्ञाने च उपलक्षणस्यापि प्रतियोगितावच्छेदकादौ प्रकारत्वोपगमात् ।

यद्यपि द्वित्वसामानाधिकरण्यं घटपटद्वित्वसामानाधिकरण्यं च तद्घटत्वादिसाधारणमिति तदवच्छिन्नाभावमादाय घटपटोभयवत्यपि घटपटौ न स्त इति प्रत्ययापत्तिरेतत्कल्पेऽपि यथाश्रुते ऽवतरति । तथापि घटपटद्वित्वसामानाधिकरण्यं तत्सामान्यनिष्ठसामानाधिकरण्यप्रतियोगित्वं वा विवक्षितम् । प्रथमपक्षे दोषमाह । तादृशेति । तादृशो घटपटादिरूपो यो द्वित्वाधिकरणव्यक्तिविशेषस्तद्विरहिणि तथाविधोभयशालिनि घटपटाद्युभयवति घटपटादिरूपौ द्वौ न स्त इत्यप्रत्ययात्, तथा च तादृशप्रत्ययापत्तिरिति भावः । द्वितीये दोषमाह । द्वित्वसामानाधिकरण्येति । द्वित्वसामानाधिकरण्येन रूपेण घटत्वाग्रहदशायामपि घटपटौ न स्त इत्याद्याकारकानुगतप्रतीत्युदयादित्यर्थः ।

(दी०) अत एव न तादृशप्रतीतेर्घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयकत्वम् । अन्यतरत्वानुल्लेखेऽपि घटपटौ न स्त इत्यनुगतप्रत्ययाच्च । न च परम्परासम्बन्धेन तादृशद्वित्व-

सामान्याभाव एव द्वौ न स्त इति प्रतीतेर्विषयः । द्वित्वाधिकरणयोरेव प्रतियोगित्वोल्लेखात् । द्वित्वादेर्घटादिवृत्तित्वानुपस्थितावपि अन्ततः शब्देनापि घटपटौ न स्त इत्यादिप्रत्ययाच्च ।

(गा०) अत एव । वक्ष्यमाणतादृशदोषादेव । अन्यतरावच्छिन्नेति । अन्यतरत्वोपलक्षितावच्छिन्नेत्यर्थः । अभावविषयकत्वमित्यन्तस्य तादृशाभावत्वप्रकारकमित्यर्थः । अन्यतरत्वानुल्लेखेऽपि । अन्यतरत्वाग्रहदशायामपि । परम्परासम्बन्धेन । स्वावच्छिन्नाश्रयत्वसम्बन्धेन । द्वित्वसामान्याभावः । घटपटवृत्तिद्वित्वत्वावच्छिन्नाभावः । द्वौ न स्त इतीति । घटपटौ न स्त इतीत्यर्थः । द्वित्वाधिकरणयोः । घटपटयोः । प्रतियोगित्वोल्लेखात् । प्रतियोगित्वबोधकशब्देन विषयाभिलापात् ।

ननु घटपटौ न स्त इत्यादिवाक्यतो विशेषणीभूतद्वित्वस्यापि प्रतियोगित्वप्रत्ययः शिखी विनष्ट इत्यादौ शिखादेरिव कथंचित्सम्भवतीत्यत आह । द्वित्वादेरिति ।

(दी०) अत एवैकविशिष्टापराभावोऽपि न तदालम्बनम् । विरुद्धयोरपि जलत्वपृथिवीत्वयोर्द्वित्वेनाभावप्रत्यय इत्युक्तत्वाच्च । नान्त्यः, तथात्वेऽपि साध्यतद्धेत्वोस्तादृशाभावप्रतियोगित्वानपायात् ।

(गा०) अत एव । एकविशिष्टापरत्वेनानुपस्थितावपि तादृशप्रत्ययस्याऽऽनुभविकत्वादेव । वैशिष्ट्याग्रहस्थले प्रतीत्यनुपपत्तिमुक्त्वा वैशिष्ट्याभावस्थले तामाह । विरुद्धयोरपीति । उक्तत्वाच्चेति । मयेत्यादिः ।

इदमत्रावधेयम् । घटपटौ न स्त इत्यादिप्रतीत्या घटत्वपटत्वयोस्तदवच्छिन्नधर्मिविशेषणतापन्नद्वित्वे च प्रतियोगितावच्छेदकत्वपर्याप्तिरवगाह्यते न तु द्वित्वमात्रे केवलघटत्वादौ च, यत्किंचिदुभयवति प्रत्येकघटादिमति च तादृशप्रतीतेरनुदयापातात् । नापि घटपटवृत्तित्वविशिष्टद्वित्वेऽपि, तादृशविशिष्टानुपस्थितावपि तथाप्रत्ययात् । न च निरुक्तधर्मत्रयस्यैकत्र प्रतियोगित्वाधिकरणे वृत्तेः कथमवच्छेदकतापर्याप्तिसम्भवः, अवच्छेद्याधिकरण-

वृत्तिर्यादृशसमुदायस्तत्रैव तन्नियमादिति वाच्यम् । प्रतीतिबलेन व्यधिकरणानामपि व्यासज्यवृत्त्यवच्छेदकान्तरधर्मितावच्छेदकतापन्नानामवच्छेदकत्वोपगमात् ।

न च प्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणसमुदायवत्तैवाभावस्य विरोधात्, व्यधिकरणधर्मावच्छिन्नाभाववादिना विरुद्धधर्मद्वयावच्छिन्नाभावस्येव घटपटोभयत्वावच्छिन्नाभावस्यापि केवलान्वयित्वापत्तिरिति वाच्यम् । स्वप्रतियोगितावच्छेदकतापर्याप्तियादृशे तादृशपर्याप्तप्रतियोगितावच्छेदकताकाधिकरणतया सममभावस्य विरोधाद् घटपटावत्रेति प्रतीतिसाक्षिकद्वित्वतद्धर्मितावच्छेदकतापन्नघटत्वपटत्वसमुदायपर्याप्तप्रतियोगितावच्छेदकताकाधिकरणतावति अत्र घटपटौ न स्त इति प्रतीतिसिद्धतादृशसमुदायपर्याप्तप्रतियोगितावच्छेदकताकाभावासत्त्वान्नानुपपत्तिः । द्वित्वविशेष्यतावच्छेकतापन्नघटत्वपटत्वपर्याप्तप्रतियोगितावच्छेदकताकमधिकरणत्वं न कुत्रापि प्रतीयते इति घटत्वपटत्वाभ्यां किमपि नास्तीति प्रतीतिसिद्धतादृशघटत्वपटत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावस्य केवलान्वयित्वमव्याहतमेवेति भावः । तथात्वेऽपीति । द्वित्वादेः प्रत्येकाभावप्रतियोगितावच्छेदकत्वेऽपीत्यर्थः । तादृशाभावेति । वह्निह्रदोभयत्ववह्निमद्ध्रदोभयत्वावच्छिन्नप्रतियोगिताकह्रदास्यन्ताम्योन्याभावेत्यर्थः । प्रतियोगित्वानपायादिति । पर्वते वह्निह्रदौ न स्त इत्याद्याकारकह्रदाद्यभावविषयकप्रतीत्या वह्न्यादिसाधारणप्रतियोगिताया द्वित्वाद्यवच्छिन्नत्वेनावगाहनादिति भावः ।

अभ्युपेत्यातिरिक्तद्वित्वाद्यवच्छिन्नाभावं व्यवस्थापयति । अन्तरेण चेति ।

(दी०) अन्तरेण चाभावान्तरमेकैकघटवति जायमानाया यत्किञ्चिद्घटद्वयवति चानुत्पद्यमानाया घटौ न स्त इति प्रतीतेरुपपादयितुमशक्यत्वादित्यत आह । *अभ्युपगमे चेति* । तदुभयत्वमेव प्रतियोगितावच्छेदकं न तु साध्यतावच्छेदकं साध्यवत्त्वं चेत्यर्थः । अश्रूयमाणावच्छेदकत्वांशे ऽपि लक्षणे तथैव विवक्षितमिति भावः ।

(गा०) एकैकघटप्रति जायमानाया इत्यनेन घटत्वावच्छिन्ना-भावावगाहिता निराकृता। अनुत्पद्यमानाया इत्यन्तेन च घटप्रति-योगिकाभावमात्रावगाहित्वनिराकरणम्। तत्र तदुभयं प्रतियोगीत्या-दिग्रन्थो यथाश्रुतो न सङ्गच्छते उभयस्य प्रतियोगित्वे प्रत्येकमप्रति-योगित्वस्य दुर्घटत्वादतो व्याचष्टे। तदुभयत्वमेवेत्यादिना। नन्वेव-मप्यवच्छेदकत्वाघटितलक्षणस्यैवाऽऽक्षिप्ततया ऽनुपपत्तिस्तदवस्थैवे-त्यत आह। अश्रूयमाणेति।

यावत्साधनाव्यापकमव्यापकं यत्समानाधिकरणसाध्यस्य तत्त्व-मनौपाधिकत्वमाशङ्क्य स्वयं पूर्वपक्षग्रन्थे सोपाधावतिव्याप्त्या दूषि-तम्, तच्च दूषणं प्रतियोगितावच्छेदकधर्मघटिताव्यापकत्वनिवेशे न सम्भवतीति तादृशमेव निवेश्य तदनौपाधिकत्वं मूलकृत् प्रथमं परिष्करोति। यावत्स्वसमानाधिकरणेति।

(चि०) अथवाऽनौपाधिकत्वं व्याप्तिः। तच्च या-वत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेद-कावच्छिन्नं यत् तत्प्रतियोगिकात्यन्ताभावसमाना-धिकरणं यत् तेन समं सामानाधिकरण्यम्। न ह्येवं सोपाधिः, तत्र साधनसमानाधिकरणात्यन्ताभाव-प्रतियोगिन आर्द्रेन्धनवत्त्वादेरुपाधेर्योऽत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात्, उपा-धेः साध्यव्यापकत्वात्।

(दी०) तच्चेति। स्वम्, साधनत्वाभिमतम्। तथा च साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदका याव-न्तो धर्मा यद्धर्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगि-तावच्छेदकास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः।

(गा०) अत्र च स्वपदस्य साध्यपरत्वे यत्पदस्य च साधनप-रत्वे यावत्साध्याव्यापकं यत् साधनाव्यापकमित्यर्थकतया अव्या-प्त्यतिव्याप्ती भवत इति तयोस्तत्परत्वभ्रमं दीधितिकृन्निराकुरुते। स्व-

मिति स्वम्। स्वपदार्थः। साधनत्वाभिमतमिति। यद्रूपावच्छिन्नस्य व्याप्यत्वमभिमतं तद्रूपावच्छिन्नमित्यर्थः । यथाश्रुतमूलार्थस्याग्रे दूषणीयतया प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकाभावसमानाधिकरणं यत् साध्यमिति यथाश्रुतमूललभ्यं विशेषणविशेष्यभावं परित्यज्य तद्विपरीतमवलम्ब्य व्याचष्टे । तथा चेति। ईदृशमनौपाधिकत्वं पूर्वपक्षे स्वयमपि निर्दोषतया दर्शितम् ।

(दी०) एतेन सर्वत्र तादृशैर्यावद्भिरवच्छिन्नस्य, तादृशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसञ्जकात् यावत्त्वाद्यवच्छिन्नप्रतियोगिताकादतिरिक्तस्याभावस्य अप्रसिद्धिः। तादृशावच्छिन्नप्रतियोगिताकानां यावदभावानामधिकरणस्य प्रायशस्तथा, रूपादिसाध्यकपृथिवीत्वादावव्याप्तिश्च । क्वापि रूपादिव्यक्तौ तादृशयावदभावसामानाधिकरण्यासम्भवादिति प्रत्युक्तम् ।

(गा०) सर्वत्रेति। अप्रसिद्धिरित्यनेन सम्बध्यते। अवच्छिन्नस्येत्यन्तमपि । तादृशैः । साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वपटत्वादिभिः। अवच्छिन्नस्य । विशिष्टस्य । प्रत्येकं तदवच्छिन्नप्रतियोगिकाभावसामानाधिकरण्यनिवेशेऽपि न निस्तारः। साध्यव्यापकतावच्छेदकविशिष्टस्यापि द्वित्वादिना ऽभावेन साध्यसामानाधिकरण्यसत्त्वादतिव्याप्त्यापत्तेः। अवच्छेदकावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यनिवेशेऽपि वक्ष्यमाणरूपादिसाध्यकपृथिवीत्वादावव्याप्तिरिति द्रष्टव्यम्।

अवच्छिन्ने धर्मिणि यावत्त्वस्य विशेषणतामाक्षिपति । तादृशावच्छिन्नेति । यावत्प्रतियोगिकस्याभावस्येत्यन्वयः । प्रमेयमात्रस्यैव तथात्वाद्यावत्प्रमेयप्रतियोगिकत्वस्य च क्वचिदप्यभावे ऽसत्त्वात्तथाविधाभावाप्रसिद्धिः । ननु तादृशो व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताक एव तत्तत्क्षणविरुद्धक्षणवैशिष्ट्यावच्छिन्नप्रतियोगिताको यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकश्चाभावः प्रसिद्ध एवेत्यत आह । अतिप्रसञ्जकादिति । तादृशाभावसाधारणरूपेणाभावनिवेशे तादृशाभावसामानाधिकरण्यमादाय व्यभिचारिण्यतिव्याप्तिरिति तादृशधर्मानवच्छिन्नसम्बन्धसामान्यावच्छि-

प्रतियोगिताक एवाभावो विवक्षणीयः, तादृशस्याप्रसिद्धिरित्यर्थः।

द्वितीयाभावे यावत्त्वस्य विशेषणतां मूलस्थसमासान्तर्गतयावत्पदादलाभेऽप्युक्तिसम्भवमात्रेण प्रसक्तां तां निराकुरुते। तादृशेति। अवच्छेदकविशिष्टत्वस्य न प्रतियोगिविशेषणत्वं धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकह्रदवृत्तित्वादिविशिष्टद्रव्यत्वत्वादिनाभावस्यापि यावदभावान्तर्गततया तत्र वह्न्यादिसामानाधिकरण्याभावेनाव्याप्तिरिति प्रतियोगितायां तदवच्छिन्नत्वस्य तथात्वं निवेशितम्। प्रायशः। अनेकाधिकरणकहेतुके। तथा। अप्रसिद्धिः। वह्निमत्पर्वतादीनां धूमवन्महानसादिनिष्ठाभावप्रतियोगितावच्छेदकपर्वतत्वत्वमहानसावृत्ति-वायवच्छिन्नाभावानधिकरणत्वादिति भावः। एकवृत्तिहेतुके तद्धेत्वधिकरणस्यैव तादृशयावदभाववत्त्वात्प्रायश इत्युक्तम्।

यावतामभावानां प्रत्येकनिरूपितसामानाधिकरण्यनिवेशे ऽपि न निस्तार इत्याह। रूपादीति। अत्रातौ हेतुमाह। कापीति। असम्भवादिति। घटीयरूपादौ तादृशघटत्वाद्यभावासामानाधिकरण्यादिति भावः। साध्यतावच्छेदके तत्तदभावसामानाधिकरण्यावच्छेदकत्वनिवेशो नानाव्यक्तिसाध्यतावच्छेदककस्थले ऽव्याप्तिदृष्ट्या।

ननु आर्द्रेन्धनाद्युपाधेस्तत्तदार्द्रेन्धनत्वादिना धूमादिमन्निष्ठाभावप्रतियोगित्वेऽपि अयोगोलकान्यत्वादेरुपाधेरतथात्वादवच्छेदकानुसरणं व्यर्थमित्यत आह। सर्वत्रेति।

(दी०) सर्वत्र सोपाधौ एकव्यक्तिकस्य सम्भवतोऽप्युपाधेर्धर्मान्तरविशिष्टत्वादिना अभावो भवत्येव साध्यसमानाधिकरण इत्यवच्छेदकानुसरणम्।

(गा०) धर्मान्तरम्। ह्रदवृत्तित्वादिकम्। आदिना द्वित्वादिपरिग्रहः। अभावसमानाधिकरणं यत् इत्यत्र अभावाः समानाधिकरणा यस्य साध्यस्येति बहुव्रीहिमवलम्ब्य द्वितीयाभावे यावत्त्वस्य विशेषणत्वमुपगम्य उक्तावैशिष्टयविशेष्यभावव्यत्ययं विनैव मूले घर्णयतामन्येषां मतमाह साधनेति।

(दी०) साधनसमानाधिकरणात्यन्ताभावप्रतियोगिताव-

च्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावा यद्धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः । अभावश्चात्र भावभिन्नो ग्राह्यः । तेन इदं जलं स्नेहवत्त्वादित्यादौ स्नेहवत्त्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानां सकलरूपाणां जलत्वसामानाधिकरण्यविरहेऽपि नाव्याप्तिः ।

-(गा०) उक्तयावदभावानां प्रायशोऽधिकरणाप्रसिद्धावपि तेषु साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यसौलभ्याद् घटत्वपटत्वाद्यभावसमुदाये रूपत्वावच्छिन्नसामानाधिकरण्यसौलभ्याच्च मूलोक्तदूषणयोरत्रानवकाशः । न च यावदभावानामेकाधिकरणाप्रसिद्धिवद्यावदभावानुयोगिकस्य एकसाध्यसामानाधिकरण्यस्याप्रसिद्ध्या नोक्तदूषणोद्धारस्सम्भवतीति वाच्यम् । यावत्पदस्य व्यापकत्वार्थकतया साध्यसामानाधिकरण्यव्यक्तीनां प्रातिस्विकरूपेण तत्साध्यव्यक्तिसामानाधिकरण्यत्वादिना च तादृशाभावत्वव्यापकताविरहेऽपि साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यत्वेन व्यापकत्वविवक्षया प्रतीकारात् । तत्पुरुषपक्षे च तादृशाभावत्वव्यापकप्रतियोगिताकसामानाधिकरण्यपर्यवसितयावदभावसामानाधिकरण्ये प्रतियोगितात्वेन व्यापकत्वविवक्षणे व्यभिचारिण्यतिप्रसङ्गः । साध्यनिष्ठसामानाधिकरण्यप्रतियोगितात्वेन व्यापकत्वं च तेन रूपेण समभिव्याहृतपदानुपस्थित्या दुर्लभम् । साध्यसामानाधिकरण्यत्वेन व्यापकत्वापेक्षया गुरु चेत्यसावुपेक्षितः ।

नाव्याप्तिरिति । रूपात्मकाभावानां भावत्वेन लक्षणाघटकत्वादिति भावः । प्रथमाभावे अनवच्छिन्नवृत्तिकत्वनिवेशे धूमादिसमानाधिकरणजन्यरूपात्मककालविशेषावच्छिन्नवृत्तिकाभावस्य लक्षणाघटकत्वाद्रूपत्वावच्छिन्नाभावरूपं हेतुमन्निष्ठाभावप्रतियोगिनमादाय वह्निमान् धूमादित्यादावव्याप्तेरनवकाशाज्जलत्वादिसाध्यकस्नेहादिहेत्वनुसरणम् । स्नेहवति जलपरमाणौ नित्यस्य रूपस्यानवच्छिन्नवृत्तिकस्याद्युक्तविवक्षया तत्राप्रतीकारात् । 'समवेतत्वाद्यवच्छिन्नाभावमादाय च तत्राऽप्यव्याप्तेर्दुर्वारत्वं बोध्यम्,'

तस्य धूमादिमत्यप्यनवच्छिन्नवृत्तिकद्रव्यत्वादिरूपाभावप्रतियोगित्वात्। यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वविशिष्टवत्त्वं हेतुमतस्तद्रूपावच्छिन्नाभावे साध्यसामानाधिकरण्यविवक्षया हेतुसमानाधिकरणतेजस्त्वाभावप्रतियोगितावच्छेदकजलत्वाभावतेजस्त्वाभावोभयाभावत्वावच्छिन्नप्रतियोगिताके जलत्वाभावे जलत्वसामानाधिकरण्यविरहेऽपि न क्षतिः। तज्जलावृत्तित्वाद्यवच्छिन्नाभावाभावस्तज्जलत्वाभाव एव न तु तज्जलावृत्तिर्जलत्वाभावादिरपि, तज्जलत्वाभावेऽपि तथात्वस्यावश्यकतया तत एवाजले तादृशाभावप्रत्ययोपपत्तेरिति हेतुसमानाधिकरणतज्जलावृत्तिस्वरूपाभावमादाय नाव्याप्तिः। एवं तज्जलत्वाभावजलत्वाभावान्यतराभावत्वाद्यवच्छिन्नाभावोऽपि तज्जलत्वाद्यभाव एव। एवं भूतत्वाभावमूर्तत्वाभावान्यतराभावत्वावच्छिन्नाभावोऽपि न भूतत्वाभावमूर्तत्वाभावौ किं त्वतिरिक्त एको भूतत्वविशिष्टमूर्तत्वाद्यभाव एव इति मूर्ते मनस्त्वादित्यादौ मनोनिष्ठभूतत्वाद्यभावमादाय शुद्धमूर्तत्वाद्यभावो न लक्षणघटक इति।

यद्यपि भावभिन्नत्वविशेषणेऽपि स्नेहसमानाधिकरणाभावप्रतियोगितावच्छेदकरूपत्वावच्छिन्नाभावत्वावच्छिन्नप्रतियोगिताकानां निखिलरूपध्वंसप्रागभावानां जलत्वासमानाधिकरणतयाऽव्याप्तिर्दुर्वारैव। तथापि सदातनत्वेनाप्यभावस्य विशेषणीयतया न दोषः।

न च स्नेहसमानाधिकरणजलान्यत्वविशिष्टसत्ताभावप्रतियोगितावच्छेदकं यज्जलान्यत्वविशिष्टसत्ताभावतेजोन्यत्वादिविशिष्टसत्ताभावान्यतराभावत्वं तदवच्छिन्नप्रतियोगिताके तेजोन्यत्वविशिष्टसत्ताभावे जलत्वसामानाधिकरण्यविरहादव्याप्तिरभावे भावभिन्नत्वं निवेश्यापि न शक्यते वारयितुमिति प्रतियोगितायां भाववृत्तित्वमेव निवेश्यम्। अभावश्चेत्यादिफक्किकाऽपि कथञ्चित् तत्परतया व्याख्येया। एवं चाभावांशे सदातनत्वविशेषणमनर्थकमिति वाच्यम्। प्रतियोगितायां भाववृत्तित्वनिवेशेऽपि स्नेहसमानाधिकरणपार्थिवादितत्तद्रूपात्यन्ताभावप्रतियोगितावच्छेदकतत्तद्रूपत्वावच्छिन्नप्रतियोगिताकतत्तद्रूपप्रागभावध्वंसेषु जलत्वसामानाधिकरण्यविरहेणाभावे सदातनत्वनिवेशस्यावश्यकत्वात्।

जलान्यत्वविशिष्टसत्ताभावतेजोन्यत्वविशिष्टसत्ताभावान्यतराभावोऽपि जलतेजोन्यतरान्यत्वविशिष्टसत्तैव तदभाव एव तादृशान्यतराभावाभावो न तु जलान्यत्वविशिष्टसत्ताभावादिरिति प्रतियोगितायां भाववृत्तित्वनिवेशमन्तरेणापि उपपत्तेरुदक्षरतयोक्तग्रन्थस्य तस्य तत्परत्वाभावाच्च । भावभिन्नत्वं च प्रथमाभावे न विशेषणम्, तत्र तस्य विशेषणत्वेऽपि द्वितीयाभावे तस्यातथात्वे हेतुसमानाधिकरणरूपप्रागभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकनिखिलरूपेषु साध्यसामानाधिकरण्यविरहाद्व्याप्तेर्द्वितीयाभावे तद्विशेषणस्यावश्यकतया तत्र तद्विशेषणस्य निष्प्रयोजनकत्वात्।

न च प्रथमाभावे सदातनत्वनिवेशे प्रागभावस्य चातथात्वान्नेयमव्याप्तिरिति वाच्यम्। प्रथमाभावे सदातनत्वनिवेशेऽपि द्वितीयस्यातथात्वे हेतुसमानाधिकरणतत्तद्रूपात्यन्ताभावमादाय दर्शितदोषस्य दुर्वारतया द्वितीयेतद्विशेषणस्यावश्यकत्वे प्रथमे तद्विशेषणस्य प्रयोजनान्तरविरहेणानुपादानात्। द्वितीयाभावे सदातनत्वविशेषणेन जन्यरूपव्यावर्त्तनेऽपि तेजःपरमाणुरूपेषु जलत्वसामानाधिकरण्यविरहेण उक्ताव्याप्तेस्तत्र भावभिन्नत्वविशेषणेनैव वारणीयत्वादिति।

केचित्तु हेतुसमानाधिकरणैतज्जलत्वरूपाभावप्रतियोगितावच्छेदकैतज्जलत्वजलत्वाभावान्यतराभावत्वावच्छिन्नप्रतियोगिताकजलत्वाभावे जलत्वसामानाधिकरण्यविरहेणाव्याप्तेर्वारणाय प्रथमाभावे हेतुमन्निष्ठतेजस्त्वाभावप्रतियोगितावच्छेदकैतत्तेजस्त्वतेजस्त्वाभावान्यतराभावत्वावच्छिन्नप्रतियोगिताकैतत्तेजस्त्वरूपाभावे जलत्वसामानाधिकरण्यविरहादव्याप्तेर्वारणाय द्वितीयाभावेऽपि भावभिन्नत्वविशेषणमित्याहुः । तन्न । एतज्जलत्वजलत्वाभावान्यतराभाव एतज्जलान्यजलत्वमेवेति तदवच्छिन्नाभावस्यैतज्जलान्यजलत्वाभावरूपत्वादेतज्जलत्वस्यातथात्वात्।

वस्तुत उक्तदोषवारणार्थं द्वितीयाभावे इव प्रथमाभावेऽपि सदातनत्वविशेषणमावश्यकम्। अन्यथा जलनिष्ठरूपप्रागभावप्रतियोगितावच्छेदकरूपत्वावच्छिन्नात्यन्ताभावे जलत्वसामानाधिकरण्यविरहेणाव्याप्तिवारणासम्भवात्।

न च प्रागभावस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविरहात्तत्प्रतियोगितावच्छेदकतद्रूपत्वावच्छिन्नात्यन्ताभावस्य च साध्यसामानाधिकरण्यान्नाव्याप्तिप्रसक्तिरिति वाच्यम्। ध्वंसप्रागभावयोरत्यन्ताभावविरोधितामते द्रव्योत्पत्तिकाले तत्र रूपं नास्तीति सामान्याभावबुद्धेः प्रागभावविषयकतया तत्रापि सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यावश्योपेयत्वात् । अन्तरादयागे रक्तं रूपं नास्तीतिवत् पूर्वापररक्तिमध्वंसप्रागभाववति रक्तेऽपि तादृशप्रतीतेः कालविशेषावच्छिन्नत्वस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे क्वचित् स्वीकारेण वारणसम्भवात्। एवं च समुपदर्शितदोषवारणाय द्वितीयेऽपि तद्विशेषणमावश्यकम् । एवं च हेतुसमानाधिकरणजलपरमाणुरूपात्मकाभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताक तेज-परमाणुरूपमादायाव्याप्तिवारणाय भावभिन्नत्व प्रथमे द्वितीये वाऽभावे विशेषणमिति।

ननु घटध्वंसो ध्वंसत्वादित्यादावतिव्याप्तिः, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटध्वंसत्वत्वाद्यवच्छिन्नप्रतियोगिताकाभावानां गोत्वाद्यभावाधिकरणकानां अभावाधिकरणकाभावधर्मप्रतियोगिकतयाऽधिकरणीभूततत्तदभावात्मकानां साध्यसामानाधिकरण्याद् भावेषु तदभावत्वेन क्लृप्तगोत्वाभावादिभिरेव घटध्वंसत्व नास्तीति बुद्ध्युपपत्तेस्तत्राप्यतिरिक्ततदभावाकल्पनात्, घटध्वंसादिनिष्ठतदभावस्य घटध्वंसादिरूपत्वेऽपि सदातनत्वाभावेन घटध्वंसादेर्लक्षणाघटकत्वात्। भाववृत्तिघटध्वंसत्वाभावस्य गोत्वाभावाद्यतिरिक्तत्वेऽपि वह्निमान् धूमादित्यादौ साध्यासमानाधिकरणद्रव्यत्वाभावरूपतदधिकरणध्वंसत्वाद्यभावे साध्यसामानाधिकरण्यविरहेणाव्याप्तेः। एवं जलान्यत्वविशिष्टसत्ताभावतेजोन्यत्वविशिष्टसत्ताभावान्यतराभावाभावस्य तेजोन्यत्वविशिष्टसत्ताभावादिरूपत्वे अभावे भावभिन्नत्वविशेषणत्वप्रक्षेपेऽप्यगतेस्तत् परित्यज्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकयावदनुयोगितास्वेव स्वाश्रयघटितपरम्परासम्बन्धेन साध्यवद्वृत्तित्वस्य विवक्षणीयतया प्रतियोगितावच्छेदकैक्ये अभावव्यक्तिभेदेनानुयोगिताभेदानभ्युपगमेन भावादिवृत्त्यभावानां साध्यासामानाधिकरण्येऽपि घटध्वंसत्वत्वाद्यवच्छिन्ननिरूपितानां यावदनुयोगिता-

नामुकसम्बन्धेन साध्यसामानाधिकरण्यस्याक्षतत्वात् । घटध्वंसान्यत्वतत्प्रकारकप्रमाविषयत्वाद्यभावश्च स्वाधिकरणघटध्वंसादिरूपोऽसदातनतया लक्षणाघटकः ।

न च यावत्त्वस्यानुयोगिताविशेषणत्वे ऽनुयोगितायां सदातनवृत्तित्वविशेषणमफलम्, हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतत्तद्रूपत्वावच्छिन्ननिरूपितध्वंसत्वरूपानुयोगितायां सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वस्य निष्प्रमाणकतया सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वविशेषणेनैव वारणात् । ध्वंसादिसाधारणसम्बन्धविशेषावच्छिन्नतत्तद्रूपत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववृत्तितया उक्ताव्याप्त्यनवकाशात् । तथा च घटध्वंसान्यत्वाभावमादायैवातिव्याप्तिवारणसम्भव इति वाच्यम् । अभावप्रतियोगितामात्रस्यैव किञ्चिद्धर्मावच्छिन्नत्वनियमवत्सम्बन्धावच्छिन्नत्वनियमः सिद्धान्तसिद्ध इति तद्रूपनिरूपितध्वंसादिरूपानुयोगितामादायाव्याप्तेर्दुर्वारतया यावदनुयोगितानिवेशमतेऽपि सदातनवृत्तित्वस्य अवश्यं निवेशनीयत्वात् इत्यत आह । घटध्वंस इति ।

(दी०) घटध्वंसो ध्वंसत्वादित्यादौ च घटध्वंसत्वादेस्तत्प्रकारकप्रमाविशेष्यत्वादेर्वा भावाभाववृत्तिरतिरिक्तोऽभावस्तादृशो न घटध्वंसत्वादिसमानाधिकरण इति नातिव्याप्तिरित्यपि वदन्ति।

(गा०) भावाभाववृत्तिरित्यतिरिक्तत्वे हेतुगर्भविशेषणम् । तथा चाभाववृत्तिप्रतियोगिकाभावाधिकरणकाभावत्वं नाधिकरणस्वरूपत्वे तन्त्रमपि तु अभावमात्राधिकरणकत्वमेवेति भावः । अधिकरणीभूताभावान्तरादतिरिक्तत्वं व्यवस्थाप्य तदेव साध्यासामानाधिकरण्यप्रयोजकतयोपदर्शयति । तादृश इति ।

यद्यपि घटध्वंसत्वाद्यभावस्य गोत्वाद्यभावरूपत्वेऽपि घटध्वंसान्यत्वविशिष्टाभावत्वाद्यभावस्य गोत्वाभाववृत्तितया गोत्वाभावानात्मकस्य साध्यासमानाधिकरणतयैव नातिव्याप्त्यवकाशस्तथापि समाधिसौकर्येण साध्याभावस्यातिरिक्तत्वं व्यवस्थाप्य तमादायातिव्याप्तिर्वारिता ।

केचित्तु अभावाभावत्वं यन्मते प्रतियोगित्वं तन्मते तज्जलत्वाभावजलत्वाभावान्यतराद्यभावाभावो जलत्वाभावादिरपि, अन्य-

था तस्य सामान्यतस्तत्प्रतियोगित्वानुपपत्ते' । तथा चाभावे भावभिन्नत्वनिवेशेऽपि दर्शिताव्याप्तिर्दुर्वारैवेति अनुयोगिताया-मुभयावृत्तित्वमेव तन्मते विशेषण प्रक्षिप्य तादृशानुयोगितावद्या-वदभावे साध्यसामानाधिकरण्य निवेदयमिति दर्शितविशिष्टाभावो लक्षणघटक इत्यभिप्रायकतया फक्किकामेतां सङ्गमयन्ति ।

परे तु नन्वयमभावो ध्वंसत्वादित्यादौ हेतुसमानाधिकरणा-भावप्रतियोगितावच्छेदकं ध्वसान्यत्वविशिष्टाभावत्वं तदव-च्छिन्नप्रतियोगिताको ध्वसवृत्तिरभावो ऽभावाधिरणकाभाववृत्ति-धर्मप्रतियोगिकाभावतयाऽधिकरणीभूतध्वसरूप इति भाववृत्ति-त्वाद्यभावत्वाभाव एव । तत्र च निरुक्तयावदभावान्तर्गते साध्य-सामानाधिकरण्यविरहादव्याप्तिरिति सदातनत्वमभावविशेषणं प-रित्यज्यानुयोगितायामेव' कादाचित्कावृत्तित्वं निवेद्य तादृशानु-योगितावद्यावदभावे सध्यसामानाधिकरण्य विवक्षणीयम् । उक्त-विशिष्टनिरूपिता च ध्वससाधारणी एकैवानुयोगितेति नाव्याप्तिः ।

वस्तुतस्तु प्रथमाभावे स्वभिन्नहेतुमन्निष्ठत्वमेव प्रवेश्य दर्शि-ताव्याप्तिर्वारणीया उक्तस्यानुयोगिताविशेषस्य निवेशेऽयमभा-वोऽत्यन्ताभावत्वादित्यादौ घटात्यन्ताभावभेदविशिष्टाभावत्वाभा-वमादायोक्तरीत्या ऽव्याप्तेर्दुर्वारत्वात् । एव च घटध्वंसो ध्वंस-त्वादित्यादावतिव्याप्तिः, हेतुसमानाधिकरणस्याभाववृत्तिधर्माभा-वस्य तदधिकरणस्वरूपत्वेन लक्षणाघटकत्वात् । अभावावृत्तिध-र्माभावस्य च साध्यसमानाधिकरणत्वादित्याशङ्कायां घटध्वंस इ-त्यादिफक्किकामवतारयन्ति ।

(चि०) एतदेव यावत्स्वव्यभिचारिव्यभिचारि-साध्यसामानाधिकरण्यमनौपाधिकत्वं गीयते ।

यद्वा यावद्यत्समानाधिकरणात्यन्ताभावाप्रतियो-गिप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वम् । सोपाधौ तु साध्यवन्नि-ष्ठात्यन्ताभावाप्रतियोगिन उपाधेर्योऽत्यन्ताभावस्तेन

समं हेतोः सामानाधिकरण्यम् । उपाधेः साधनाव्यापकत्वात् ।

(दी०) यावदिति स्वं व्यभिचारि येषां तेषां यावतां व्यभिचारिणा साध्येन सामानाधिकरण्यमित्यर्थः ।

(गा०) यावत्स्वव्यभिचारीत्यादिलक्षणे स्वस्य व्यभिचारीति तत्पुरुषे विषमव्याप्ते हेतुव्यभिचारिसाध्यादेः साध्याव्यभिचारित्वादव्याप्तिः, साध्यव्यापके व्यभिचारिण्यतिव्याप्तिश्च । व्यापकव्यभिचारिणां यावतां व्याप्यव्यभिचारित्वात् अतो बहुव्रीहिमवलम्बते । स्वमिति । यावन्तः स्वव्यभिचारिणो व्यभिचारिणा यस्येति बहुव्रीहौ धूमाद्यव्यापकमहानसत्वादीनां वह्न्याद्यव्यभिचारितया वह्निमान् धूमादित्यादावव्याप्तिरिति व्यभिचारिव्यभिचारीत्यत्र तत्पुरुषमाश्रयते । तेषामिति । यावत्त्वं स्वस्मिन् साध्ये वा न विशेषणमिति स्फुटयति । यावतामिति । एवं च निरुक्तयावत्साधनाव्यापकाव्यापकसाध्यसामानाधिकरण्यं पर्यवस्यतीति भावः ।

यत्समानाधिकरणेत्यत्र यत्पदस्य साधनपरत्वे यस्येति यत्पदस्य च साध्यपरत्वे साध्यस्य यावत्साधनव्यापकव्याप्यत्वं लभ्यते तच्च विषमव्याप्तसद्धेत्वादावव्याप्तिकवलितमिति प्रथमयत्पदस्य साध्यपरतामाह । यत्पदमिति ।

(दी०) यावदिति । यत्पदं साध्यत्वाभिमतपरम् । सोपाधिवारणाय यावदिति लुप्तसप्तमीकस्य द्वितीयात्यन्ताभावस्य विशेषणम् । तथा च साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वव्यापकस्वसामानाधिकरण्यसामान्याभावकत्वमर्थः । केवलान्वयिस्थले त्वाकाशादिरेव तथाविधोऽभावः प्रसिद्ध इति सम्प्रदायः ।

(गा०) एतेनैवाग्रिमयत्पदस्य साधनपरतालाभाच्च सा वर्णिता । तदेवानौपाधिकत्वमिति मूले तदेवेत्यनन्तरं तत्साध्यानिरूपितमिति पूरणीयम् । प्रथमाभावादो यावत्त्वविशेषणे यावदभावप्रतियोग्यप्रसिद्ध्यासम्भवः । यावतां प्रत्येकप्रतियोगित्वनिवेशने ऽपि

साध्यव्यापकयत्किञ्चिद्धर्मेऽव्याप्यत्वमादाय व्यभिचारिण्यतिव्याप्तितो द्वितीयाभावे तस्य विशेषणतामाह लुप्तेति। अभावस्यासामानाधिकरण्यनिवेशे केवलान्वयिनि साध्यव्यापकाभावस्य गगनादेः सामानाधिकरण्याप्रसिद्ध्याऽव्याप्तिरतोऽभावे यस्यासामानाधिकरण्यमित्यर्थं स्पष्टयितुं लुप्तसप्तमीकस्येति। अप्रतियोगिप्रतियोगिकस्य यथाश्रुतस्याप्रसिद्ध्यादिग्रस्ततया तस्य प्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगिताकार्थकतां दर्शयन् यावत्पदार्थव्यापकतामन्तर्भाव्य व्याप्तेर्विशिष्टैकार्थरूपतामुपपादयति। तथा चेति। गगनादेर्गगनाद्यभावाभावत्वं स्वय निराकरिष्यति अतः सम्प्रदाय इति।

(दी०) केचित्तु तादृशयावदभावशून्यत्वं यदधिकरणताया व्यापकं तत्त्वमर्थः। न च तादृशप्रतियोगितानवच्छेदकवत्तमेव यावत्त्वेन विशिष्य यावत्तादृशाश्रयत्वं यदधिकरणताया व्यापकं तत्त्वमित्यर्थलाभादेव सामञ्जस्ये ऽभावद्वयोपादानमनतिप्रयोजनकमिति वाच्यम्। यावतां तादृशानामिन्धनादीनामेकाधिकरण्यस्याप्रसिद्धेः। न चावच्छेदकांशमपहाय अप्रतियोग्येव यावत्त्वेन विशिष्यताम्। साध्यव्यापकस्यापि रूपान्तरेण साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः।

(गा०) तादृशयावदभावशून्यत्वमिति। साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावा प्रत्येकं तच्छून्यत्वमित्यर्थः। तेन धूमवान् वह्नेरित्यादौ सर्वत्र वह्न्याद्यधिकरणे धूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नाभावाभावेन यावत्त्वावच्छिन्नतावदभावाभावसत्त्वेऽपि न क्षतिः। यावत्तादृशाश्रयत्वमिति। यद्यत्सम्बन्धघटितव्यापकतावच्छेदक यद्यत् तेन सम्बन्धेन तदाश्रयत्वमित्यर्थः। साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकाश्रयत्वानां यावत्त्वावच्छिन्ननिरूपित साध्यतावच्छेदकसम्बन्धेनाश्रयत्वमिति वार्थः। यथा सन्निवेशो ऽवैयर्थ्यादनतिप्रयोजनकमिति। तादृशानाम्। व्यापकतावच्छेदकरूपवताम्। ऐकाधिकरण्याप्रसिद्धेरिति। तथा

च न तावतामेकं प्रति व्यापकत्वप्रसिद्धिरिति । अप्रतियोग्येवेति । तथा च इन्धनादीनां न तथात्व अपि त्वसण्डजलत्वाभावादीनामेव विशेषणताविशेषसम्बन्धेनैव व्यापकत्वस्य विवक्षणात् तेन सम्बन्धेनैव चाश्रयत्वविवक्षया यावत्तादृशाश्रयत्वमेकस्यापीति नाप्रसिद्धिरिति भावः । रूपान्तरेण । द्वित्वादिना । प्रतियोगित्वेनैतदन्वयः । साध्यव्यापकतावच्छेदकावच्छिन्नाभावान् प्रातिस्विकरूपेणोपादाय तदभावत्वेन हेतुव्यापकत्वनिवेशापेक्षया यावद्व्यापकतावच्छेदकधर्मान् विशिष्योपादाय तेन रूपेण व्यापकतानिवेशनमेवोचितमिति एतन्मते ऽस्वरसबीजं बोध्यम् ।

(चिं०) यद्वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः । तथा हि धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकम्, धूममात्रस्य वह्निसम्बन्धित्वात् । वह्नेस्तु धूमसम्बन्धे न वह्नित्वमवच्छेदकं धूमासम्बन्धिनि गतत्वात् । न ह्यतिप्रसक्तमवच्छेदकम्; संयोगादौ तथात्वादर्शनात् । किं तु वह्नावार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं तादृशं च व्याप्यमेव ।

अथवा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यम् । वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना ।

(दी०) अवच्छिन्नं सामानाधिकरण्यं सामानाधिकरण्यावच्छेदकरूपं वा व्याप्तिः । इत्थं च धूमत्वद्रव्यत्वत्वादेर्व्याप्यतावच्छेदकत्वं दण्डत्वादेर्नियतपूर्ववर्तितावच्छेदकधर्मात्मककारणतावच्छेदकत्ववद्भेदे ऽपि उपहितानुपहितभेदाद्वा समर्थनीयम् । तत्र आद्यमभिप्रेत्याह । यत्सम्बन्धितेति ।

(गा०) यत्सम्बन्धितेत्यादिलक्षणयोर्भेदं स्फुटीचिकीर्षुः प्रागेव

निष्कृष्टं तदुभयार्थं दर्शयति । अवच्छिन्नमित्यादिना । अवच्छिन्नम् । तत्तद्धर्मावच्छिन्नम् । साध्यस्य सामानाधिकरण्यं साध्यसामानाधिकरण्यावच्छेदकतत्तद्धर्मवत्त्वं वा तेन रूपेण व्याप्तिः ।

ननु साध्यसामानाधिकरण्यावच्छेदकधर्मस्य व्याप्तित्वे धूमत्वद्रव्यत्वत्वादेर्वह्निसत्तादिव्याप्यतावच्छेदकत्वानुपपत्तिः, आत्माश्रयप्रसङ्गेन स्वस्य स्वानवच्छेदकत्वादित्यत आह । इत्थं चेति । इत्थम् । सामानाधिकरण्यावच्छेदकस्य व्याप्तित्वे । नियतपूर्ववर्तितावच्छेदकधर्मात्मकेति । स्वरूपयोग्यतारूपकारणतायाः पूर्ववर्तिताशून्यदण्डादिव्यक्तिसाधारणतया पूर्ववर्तितानात्मकत्वादिति भावः । अभेदेऽपीति । अन्यूनानतिप्रसक्तस्यैव तत्र तत्रावच्छेदकव्यवहारविषयत्वात् स्वरूपसम्बन्धरूपस्वावच्छेदकत्वस्यैव च स्वस्मिन्ननभ्युपगमादिति व्याप्त्यादिघटकसामानाधिकरण्यादिभागावच्छेदकतामादायैव तादृशव्यवहारसमर्थनादिति वा भावः । अभ्युपेत्य स्वात्मकयथोक्तव्याप्त्यादेरपि स्वरूपसम्बन्धरूपावच्छेदकत्वं स्वस्मिन् सम्भवतीत्याह । उपहितेति । साध्यसामानाधिकरण्यावच्छेदकत्वरूपविशेषणावच्छिन्नत्वतदनवच्छिन्नत्वरूपवैलक्षण्यादेवावच्छेद्यावच्छेदकभाव उपपादनीय इत्यर्थः । एकरूपेणैव स्वस्य स्वावच्छेदकत्वानभ्युपगमाद्विशेषणविशेषाघच्छिन्ने स्वस्मिन् स्वरूपतः स्वस्यावच्छेदकत्वे बाधकाभावादिति भावः । आद्यम् । सामानाधिकरण्यव्याप्तिपक्षम् । सेत्यनेनावच्छेदकरूपपरामर्शासम्भवान्न वैपरीत्यमिति ध्येयम् ।

सम्बन्धितापदस्य सम्बन्धसामान्यार्थकत्वे जनकतादिसम्बन्धमादाय वह्नित्वाद्यवच्छिन्नस्य धूमादिव्याप्यतापत्तिरतो विशेषपरत्वाभिप्रायेण व्याचष्टे । सामानाधिकरण्येति ।

(दी०) सा । सम्बन्धिता । सामानाधिकरण्यरूपा, जनकत्वादिव्यावृत्ता । अत्र च विशिष्टसत्तात्वाद्यवच्छिन्नगुणादिसामानाधिकरण्याधिकरणसत्त्वादेः कर्मादौ परामर्शाद् गुणाद्यनुमित्यापत्तेः । साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शस्तु पक्षे साध्यनिर्णयात्, प्रागसम्भवीत्यनुशयेन द्वितीयम् । अयमा-

लोको धूमो वेत्यादौ विशिष्य सन्देहेऽपि सामान्यतोऽवच्छेदकरूपवत्त्वनिर्णयः सम्भवत्येवेति हृदयम् ।

(गा०) विशेषानुसरणस्य फलं स्वयमेवाह । अनेकत्वादीति । व्यावृत्ता । भिन्ना । तथा च तदादाय नातिप्रसङ्ग इति भावः । प्रथमेऽनुपपत्तेः सत्त्वात् तामेव पक्षान्तरानुसरणबीजतया दर्शयति । अत्र चेति । परामर्शात् । गुणकर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नसामानाधिकरण्यप्रकारेण प्रमारूपादेव ज्ञानात् । न चेष्टापत्तिः शङ्क्या । परामर्शभ्रमं विना भ्रमानुमितेरनुभवविरुद्धत्वात् । एतत्प्रदर्शनायैव परामर्शस्य प्रमात्वसम्पादकं सत्त्वादिहेतौ तादृशव्याप्तिसत्त्वमभिहितम् । सामानाधिकरण्यावच्छेदकरूपस्य व्याप्तितापक्षे च तद्विशिष्टस्य पक्षेऽसत्त्वात्तद्विशिष्टवैशिष्ट्यावगाहिपरामर्शो भ्रम एवेति नातिप्रसङ्ग इति भावः ।

ननु गुणादौ विशिष्टसत्तात्वादिविशिष्टस्यैव गुणादिसामानाधिकरण्यविशिष्टस्याप्यसत्त्वात् प्रथमपक्षेऽपि नातिप्रसङ्ग इत्याशङ्कां निरस्यति । साध्येति । असम्भवीति । तथा च सामानाधिकरण्यव्याप्तिपक्षे व्याप्त्युपलक्षितहेतुवैशिष्ट्यस्यैव ज्ञानं कारणं वाच्यम्, गुणादिसामानाधिकरण्योपलक्षितसत्तादिवैशिष्ट्यं च कर्मादावपीत्यतिप्रसङ्गो दुर्वार एवेति भावः । न च सामानाधिकरण्यव्याप्तिपक्षे तद्धर्मितावच्छेदकतापन्नतदवच्छेदकतद्धर्मविशिष्टवैशिष्ट्यज्ञानस्य हेतुतयाऽतिप्रसङ्गवारणं सम्भवतीति वाच्यम् । गौरवात् । एतत्कल्पे पक्षवृत्त्यधिकरणतानिरूपकतावच्छेदकावच्छिन्नं सामानाधिकरण्यमिति ज्ञानस्यैव कारणत्वे तु न कोऽपि दोषः ।

ननु साध्यसामानाधिकरण्यावच्छेदकधूमत्वादेर्व्याप्तित्वे यत्र पक्षवृत्तौ धूमत्वालोकत्वयोर्विशिष्य संशयो व्यर्थविशेषणतया साध्यसम्बन्धितानवच्छेदकस्य धूमालोकान्यतरत्वस्यैव वाऽवधारणं तत्रानुभवसिद्धाया अनुमितेरनुपपत्तिः । तत्र विशेषणसन्देहेन धूमत्वादिरूपव्याप्तिविशिष्टस्यापि पक्षे सन्दिग्धत्वात् । धर्मिवृत्तौ यस्य विशेषणस्य निश्चयस्तद्विशेषणवत्त्ववृत्तिकत्वरूपतद्विशिष्टाभावव्यावर्तकधर्मस्यापि धर्मिणि निश्चयसम्भवात् विशिष्टसंशयो न सम्भवतीति धर्मिवृत्तौ विशेषणनिश्चयविघटकत-

या तत्र विशेषणसंशयस्य धर्मिणि विशिष्टसंशयनियामकत्वादि- त्यत आह। अयमिति। अयम्। पक्षवृत्तिः। इत्यादौ। इत्यादिस- शयस्थले। विशिष्य। धूमत्वादिना। सन्देहेऽपि। सामा- न्यतः। साध्यसामानाधिकरण्यावच्छेदकत्वरूपसामान्यधर्मपुरस्का- रेण। अवच्छेदकरूपत्वनिर्णय। अवच्छेदकप्रकारकः पक्षे हेतुनिश्चयः। सम्भवत्येवेति। इदं च स्वरूपसम्बन्धरूपावच्छे- दकत्वं प्रविष्टमित्यभिप्रायेण। वक्ष्यमाणानतिरिक्तवृत्तित्वरूपावच्छे- दकत्वस्य स्वत्वघटिततया धूमत्वालोकत्वादिसाधारणसामान्य- धर्मत्वासम्भवात् तन्निवेशनासङ्गते। तन्मते च धूमालोका- न्यतरत्वादेरेवावच्छेदकतया तत्प्रकारकनिश्चयादेवानुमित्युप- पत्तिर्द्रष्टव्या।

अवच्छिन्नसामानाधिकरण्यादेर्व्याप्तित्वेऽपि अतिप्रसङ्गवारणा- य सामानाधिकरण्यधर्मितावच्छेदकतापन्नसामानाधिकरण्यावच्छे- दकतत्तद्धर्मप्रकारकहेतुमत्तानिश्चयस्य हेतुतयाऽन्यतरत्वादिप्रकार- कहेतुमत्तानिश्चयादेवोक्तस्थलेऽनुमितेरुपपाद्यत्वात्।

न चानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशपक्षे नीलधूमत्वा- दिवारणाय स्वसमानाधिकरणतादृशधर्मान्तराघटितत्वं यदि नि वेश्यते तदा धूमत्वादिघटितधूमालोकान्यतरत्वस्यावच्छेदकत्वा- सम्भवात् कथं तत्प्रकारकज्ञानादनुमितिरिति वाच्यम्। तन्मतेऽपि धूमत्वालोकत्वान्यतरत्वादिशरीरे ऽवच्छेदकताघटकसमवायेन धूमत्वादेरप्रवेशात्तस्यावच्छेदकत्वसम्भवेन तत्प्रकारकपक्षधर्मता- ज्ञानादेवानुमित्युपपत्तेः।

(टी०) अत्रावच्छेदकत्वं नान्यूनवृत्तित्वम्, अन्यूनान- तिरिक्तवृत्तित्वं वा। वह्न्यादौ साध्ये मेयत्वादावतिप्रसङ्गात्, धूमत्वादावप्रसङ्गाच्च। किं तु अनतिरिक्तवृत्तित्वम्। तच्च यद्यपि न तदभाववदवृत्तित्वम्। गुणवान् सत्त्वादित्यत्र सत्तात्वेऽति- प्रसङ्गात्। न च कर्मादिवृत्तित्वावच्छेदेन गुणसामानाधिकर- ण्याभाववत्त्यां सत्तायां वर्तमानत्वात्र तथा। तथा सति विशि- ष्टसत्त्वे प्रागुक्तदिशा च धूमत्वादावव्याप्तिप्रसङ्गात्।

(गा०) अन्यूनवृत्तित्वमित्यादिपक्षयोराद्ये दोषमाह । वह्न्यादाविति । उभयत्र तमाह । धूमत्वादाविति । अत्रापि वह्न्यादौ साध्ये इत्यनुपज्यते । अप्रसङ्गादिति । तस्य वह्न्यादिसामानाधिकरण्यन्यूनवृत्तित्वादिति भावः । सत्तात्वेऽतिप्रसङ्गादिति । सत्तायां गुणसामानाधिकरण्याभावविरहादिति भावः । सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षमालम्ब्य शङ्कते । न चेति । न तथा । न उक्तस्थले सत्तात्वेऽतिप्रसङ्गः । तथा सति । सामानाधिकरण्यस्याव्याप्यवृत्तित्वे सति । प्रागुक्तदिशा । स्वावयवावच्छेदेन धूमादावपि वह्निसामानाधिकरण्याभावसत्त्वेन । अव्याप्तिप्रसङ्गात् । गुणादिवह्न्यादिसामानाधिकरण्यानवच्छेदकत्वप्रसङ्गात् ।

(दी०) तथापि अतिरिक्ते यद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वं न वर्तते तत्त्वम् । साध्यासमानाधिकरणावृत्तित्वविशिष्टाधिकरणवृत्तित्वसामान्यकत्वम्, स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्वमिति तु फलितार्थः । सत्तात्वविशिष्टसत्ताधिकरणकर्मादिवृत्तित्वस्य साध्यासमानाधिकरणे कर्मत्वादौ सत्त्वान्नातिप्रसङ्गः । कर्मान्यत्वविशिष्टसत्ताश्रयश्च न कर्मादिरिति नाप्रसङ्गः । एवं च मेयत्वादेरपि केवलान्वयिसामानाधिकरण्यावच्छेदकत्वोपपत्तिः ।

(गा०) अतिरिक्ते । साध्यासमानाधिकरणे । न वर्तते इत्यनेनान्वयः । तथा च यद्धर्मविशिष्टाधिकरणवृत्तित्वं साध्यासमानाधिकरणावृत्तीत्यर्थः । यद्धर्मवत्त्वमुपेक्ष्य यद्धर्मविशिष्टत्वस्य निवेशाद् गुणवद् विशिष्टसत्त्वादित्यादौ नाव्याप्तिरित्यग्रे स्वयमेव वक्ष्यते । सम्बन्धविशेषलाभाय हेतुपदम् । साध्यसमानाधिकरणवृत्तिहेतुसामानाधिकरण्यव्यक्तिविशेष साध्यासमानाधिकरणावृत्तित्वमादायातिप्रसङ्गवारणाय सामानाधिकरण्यसामान्यमन्तर्भाव्य एतल्लक्षणार्थमेव समासघटितैकवाक्येनाह । साध्यासमानाधिकरणेति ।

अत्रैकवृत्तेरधिकाया निवेशादितो लघुलक्षणान्तरमाह । स्वविशिष्टेति । गुणवत् सत्त्वादित्यत्र सत्तात्वे लक्षणत्रयस्यैवातिप्रस-

ङ्गमुद्धरति। सत्त्वाद्वेति। इदं चाऽयं मेयादित्यादौ वाच्यत्वादिसामानाधिकरण्यशून्ये हेतुतावच्छेदकसम्बन्धेनावृत्तौ मेयत्वादेर्हेतुत्वे अतिप्रसक्ततया तस्य सामानाधिकरण्यावच्छेदकत्वानुपपत्तिरिति दूषणस्यापि यथोक्तानतिरिक्तवृत्तित्वविवक्षया नावकाश इत्याह। एवं चेति। केवलान्वयीति। हेतुतावच्छेदकसम्बन्धेन किञ्चिद्वस्तुनोऽधिकरणे वर्तमानस्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताशून्यत्वमेव केवलान्वयित्वं तेन समवायादिना द्रव्यत्वसत्त्वादिसाध्यकस्य संयोगादिना हेतोर्मेयत्वाद्यवच्छिन्नस्य व्याप्यतोपपत्तेरपि संग्रहः। उपपत्तिरिति। साध्यासमानाधिकरणमात्रस्यैव मेयत्वादिविशिष्टासमानाधिकरणत्वादिति भावः।

(दी०) यत्तु वृत्तिमत्त्वादिकमेव तत्र व्याप्तिः, तद्ग्रहश्च मेयत्वादिनेति। तन्न। व्याप्तिविरहिवृत्तितया गृह्यमाणेन रूपेण व्याप्तिग्रहासम्भवात्। अन्यथा अतिप्रसङ्गात्।

(गा०) वृत्तिमत्त्वादिकमिति। वृत्तिमत्त्वं हेतुतावच्छेदकसम्बन्धेन बोध्यम्, केवलस्य हेतुतावच्छेदकसम्बन्धघटितसाध्यसामानाधिकरण्यातिप्रसक्तत्वात्। आदिपदात् संयोगेन मेयत्वाद्यवच्छिन्नहेतुकस्थले द्रव्यत्वस्य परिग्रहः। तत्र व्याप्तिरिति। तथा च मेयत्वादेरतिप्रसक्तत्वं न क्षतिमावहतीति भावः।

ननु धूमवान्वह्नेरित्यादिप्रयोगविरहात् पञ्चम्याः प्रकृत्यर्थतावच्छेदकावच्छेदेन गमकताबोधकत्वं व्युत्पन्नम्। गमकतावच्छेदकं च व्याप्यतावच्छेदकरूपम्, सामानाधिकरण्यावच्छेदकरूपस्य व्याप्तित्वमते तदेव रूपं तथा, अभेदेऽप्यवच्छेद्यावच्छेदकभावसमर्थनात्। व्यापकसामानाधिकरण्यरूपव्याप्तिपक्षे व्यापकतानिरूपकतावच्छेदकम्। एवं चोक्तस्थले मेयत्वादेर्गमकतानवच्छेदकतया मेयादिति हेतुप्रयोगानुपपत्तिरित्यत आह। तद्ग्रहश्चेति। तद्ग्रहः। तादृशावच्छेदकवृत्तिमत्त्वादिरूपव्याप्तिग्रहः। मेयत्वादिना। धर्मितावच्छेदकमेयत्वादिप्रकारेण। अनुमितिहेतुरिति शेषः। अयमाशयः। व्याप्यता यदि गमकतात्मकः पञ्चम्यर्थः स्यात्तदा व्याप्यतावच्छेदकत्वमेव गमकतावच्छेदकत्वम्, तदेव च न, तथा सति पञ्चम्येव

हेतौ व्याप्यताबोधनादुदाहरणाकाङ्क्षानिवृत्तेः । अपि तु साध्यानुमित्यौपयिकव्याप्तिपक्षधर्मताज्ञानविषयता साधगमकता पञ्चम्यर्थः । तदवच्छेदकं च रूपं यद्वावच्छिन्ने धर्मिणि व्याप्त्यादिग्रहः, तादृशं च रूपं व्यापकसामानाधिकरण्यस्य व्याप्तित्वे व्यापकत्वनिरूपकतावच्छेदकधर्म एव । धूमव्यापकवह्निसमानाधिकरणद्रव्यवानित्यादिज्ञानादनुमित्यनुत्पत्त्या तद्रूपावच्छिन्ने व्यापकसामानाधिकरण्यग्रहस्यैवानुमितिहेतुत्वोपगमात् । साध्यसम्बन्धितावच्छेदकरूपव्याप्तिपक्षे साध्यसम्बन्धितावच्छेदकवत्त्वानित्याकारकनिर्धर्मितावच्छेदककव्याप्तिज्ञानादनुमित्यनुत्पत्त्या मेयत्वाद्यवच्छिन्नधर्मिकतादृशज्ञानस्याप्यनुमित्युत्पादकतया मेयत्वादेरपि वाच्यत्वादिगमकतावच्छेदकत्वमिति । तद्धर्मविशिष्टबोधकपदोत्तरपञ्चम्या च तद्धर्मावच्छिन्ने निरुक्तं गमकत्वं प्रत्याय्यताम्, तद्धर्मावच्छिन्नविषयकव्याप्त्यादिप्रमाधीनानुमितिविधेयत्वरूपं गम्यत्वं वा साध्ये प्रत्याय्यतामित्यन्यदेतत् ।

धर्मितावच्छेदकावच्छेदेन तत्सामानाधिकरण्यमात्रेण वा व्याप्तिधीरनुमितिहेतुः? तत्र न प्रथमः, तथा सति मेयत्वादेर्वाच्यत्वादिगमकतावच्छेदकत्वानुपपत्तिरित्याह । व्याप्तिविरहेति । गृह्यमाणेन रूपेण । गृह्यमाणरूपावच्छेदेन । व्याप्तिग्रहासम्भवादिति । तादृशमेयत्वादिरूपधर्मावच्छेदेन व्याप्तिग्रहस्य प्रमात्मकत्वग्रहासम्भवादित्यर्थः । तथा च विशेषदर्शिनस्तद्रूपेण गमकतावच्छेदकत्वग्रहासम्भवेन प्रमेयादिति हेतुवाक्यार्थबोधानुपपत्तिरिति भावः । न द्वितीयः । तथा सति वह्नित्वादेरपि धूमादिगमकतावच्छेदकत्वप्रसङ्गात् । सामानाधिकरण्येन धूमादिसम्बन्धितावच्छेदकार्द्रेन्धनप्रभववह्नित्वादिप्रमासम्भवादित्याशयेनाह । अन्यथेति ।

अधिकरणे साध्यस्य सम्बन्धविशेषानिवेशने अयमात्मा आत्ममहाकालान्यतरत्वादित्यादावतिव्याप्तिः । कालस्य कालिकसम्बन्धेन साध्यवत्त्वात् साधनसमानाधिकरणत्वस्य साध्यसामानाधिकरण्यनियतत्वात् । एवं हेतौ सम्बन्धविशेषानिवेशे वह्निमान् धूमादित्यादौ साध्यासमानाधिकरणधूमावयवत्वादे समवायादिना धूमादिमति वृत्तेरव्याप्तिः । साध्यवति सम्बन्धसामान्येनावृत्तित्वनिवेशे द्रव्यसत्त्वादित्यादौ वृत्तिमन्मात्रस्यैव साध्यवति काले वृत्तेरवृत्तेश्च हे-

स्वसमानाधिकरणत्वनियमादित्यतः सम्बन्धविशेषं निवेशयति । साध्यतेति ।

(दी०) साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणे येन येन सम्बन्धेन अवर्तमानत्वं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणेऽपि तेन तेन तथात्वं बोध्यम् ।

(गा०) नन्वनतिप्रसक्तत्वरूपावच्छेदकत्वविवक्षणे व्यर्थविशेषणघटितनीलधूमत्वादावपि तस्याक्षतत्वात्तदवच्छिन्नस्यापि व्याप्यतया व्याप्यत्वासिद्धिरूपहेत्वाभासविरहेण नीलधूमादिति वाक्यप्रयोक्ता न निगृह्येतेत्यत आह । नीलेति ।

(दी०) नीलधूमत्वादेर्वारणीयत्वे तु स्वसमानाधिकरणताद्दशधर्मान्तराघटितत्वेन विशेषणीयम् । सामानाधिकरण्योपादानाद् धूमप्रागभावत्वादिसङ्ग्रहः । तदघटितत्वं च तद्विषयकप्रतीत्यविषयत्वम् ।

(गा०) वारणीयत्वे त्वित्यनेन तद्वारणेऽपि न क्षतिः । तत्र हेत्वाभासविरहेऽपि आधिक्येन निग्रहोपपत्तेरिति हेत्वाभासे वक्ष्यमाणं सूचितम् । स्वेति । स्वम्, अवच्छेदकत्वेनाभिमतम् । तादृशं रूपं विशिष्टमविशिष्टं वा स्वसमानाधिकरणं यत्तादृशं साध्यसम्बन्धितानतिरिक्तवृत्ति धर्मान्तरं तदघटितत्वेनेत्यर्थः । विशेषणीयम् । सामानाधिकरण्यानतिरिक्तवृत्तित्वमिति शेषः । नीलधूमत्वादेर्वह्न्यादिसामानाधिकरण्यानतिप्रसक्तत्वरूपविशेष्यदलघटकेऽपि तस्य तथाविधधूमत्वादिघटितत्वाद्विशेषणदलेन तन्निरास इति भावः ।

स्वस्य स्वाविषयकप्रतीतिविषयत्वरूपस्वाघटितत्वासत्त्वाद्धर्मान्तरेति । तदर्थश्च न स्वभिन्नं धूमत्वादेर्नीलधूमत्वाद्यभिन्नत्वात्, किं तु स्वाविषयकप्रतीतिविषयत्व. स्वावृत्तिविषयताश्रयत्वपर्यवसितम् । शुद्धधूमत्वपर्याप्तविषयतायाः नीलादिसहितधूमत्वादिपर्याप्तविषयताभिन्नत्वेनादोषात् ।

सामानाधिकरण्यपदप्रयोजनमाह । सामानाधिकरण्येति । धूमप्रागभावत्वादेर्धूमत्वादिरूपसामानाधिकरण्यावच्छेदकधर्मान्तरघटितस्यापि सङ्ग्रह इत्यर्थः । तत्सङ्ग्राहकत्वं च धर्मिभेदे न वैयर्थ्यमिति

प्रवादानुरोधेन । अवच्छेदकताघटकसम्बन्धेन स्वाधिकरणे तेन सम्बन्धेन वृत्तिः स्वसामानाधिकरण्यम्, तेन धूमत्वधूमप्रागभावत्वयोः स्वाश्रयप्रतियोगिकत्वस्वाश्रयप्रतियोगित्वाभ्यां प्रागभावधूमयोर्वर्तमानत्वेऽपि च क्षतिः । येन सम्बन्धेन यस्य धर्मान्तरस्यावच्छेदकत्वं तेन सम्बन्धेन तद्घटितत्वं तेन सम्बन्धेन तत्प्रकारकत्वशून्यप्रतीतौ स्वीयावच्छेदकताघटकसम्बन्धेन प्रकारत्वपर्यवसितं विवक्षणीयम्, तेन संयोगादिना वह्न्यादौ साध्ये न तत्सम्बन्धावच्छिन्नवह्न्यभाववत्त्वप्रमाविषयत्वाभावाद्यवच्छिन्नस्य तादात्म्येन व्याप्यताऽनिर्वाहः । तादृशाभावादिप्रकारकप्रतीतौ वह्निमत्तादात्म्येन व्याप्यतायां संयोगादिना अवच्छेदकस्य वह्न्यादेः संयोगादिना प्रकारकत्वानियमात् ।

अथैतादृशविशेषणप्रवेशे वह्नित्वादिरूपसाध्यतावच्छेदकघटितवह्निमदन्यावृत्तित्वाद्यवच्छिन्नस्य वह्न्यादिव्याप्यत्वानुपपत्तिः । तत्र चाधिकांशस्य प्रकाशकत्वाद्वैयर्थ्येन इष्टापत्तेरयोगात् । न च धर्मान्तरस्य विशेष्यविधया घटकत्वविवक्षा सम्भवति । धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्तेः । सामानाधिकरण्यस्थाने व्यापकत्वं निवेश्यामित्यपि न युज्यते । धूमालोकान्यतरत्वादेर्व्याप्यतावच्छेदकत्वापातात्, तद्घटकधूमत्वादेस्तद्व्यापकत्वादिति । मैवम् । स्वघटकसाध्यसम्बन्धिताघच्छेदकधर्मान्तरत्वेन यादृशधर्मं प्रति व्यापकता अतादृशत्वस्य तादृशधर्मापर्याप्तविषयतापर्याप्तिपर्यवसितस्य विवक्षया प्रतीकारात् ।

घटितत्वं तदविषयकप्रतीत्यविषयत्वरूपं तदभावस्य तादृशप्रतीतिविषयत्वरूपस्य तदभावत्वेन निवेशोऽनघटन्यायादनुचित इत्याशयेनाह । तदघटितत्वमिति । °

मिश्रादिमतमाह । स्वरूपसम्बन्धविशेष इति ।

(दी०) स्वरूपसम्बन्धविशेष एवावच्छेदकत्वम् । अत एव न ह्यतिप्रसक्तमवच्छेदकमित्यादिकमपि सङ्गच्छते । अन्यथाऽतिप्रसक्ते ऽनतिप्रसक्तत्वस्याप्रसक्तत्वेन तन्निराकरणायोगात् । विरुद्धयोश्च भावाभावयोरधिकरणे एकस्यैकेन सम्बन्धेन वृत्तिर्विरुध्यते, अतस्तत्रावच्छेदकभेदापेक्षा ।

(गा०) अन्यथा। अनतिप्रसक्तत्वस्य विवक्षणे। अतिप्रसक्ते। अतिप्रसक्तत्वेनोपस्थिते। अप्रसक्तत्वेन। शङ्कानास्पदत्वेन। निराकरणायोगात्। निराकरणवैयर्थ्यप्रसङ्गात्। सत्तात्वादेर्गुणादिसामानाधिकरण्यावच्छेदकत्वं निराकुरुते। विरुद्धयोश्चेति। चस्त्वर्थः। भावाभावयोरिति स्वरूपकीर्तनम्। एकस्य। एकरूपावच्छिन्नस्य। वृत्तिर्विरुध्यते इति। तत्सामानाधिकरण्यावच्छेदकं न तद्विरुद्धसामानाधिकरण्यावच्छेदकमिति नियम इति पर्यवसितसमुदायार्थः।

यद्यपि धूमत्वादेर्वह्न्यादिसामानाधिकरण्यावच्छेदकत्वे विरुद्धपर्वतत्वपर्वतत्वाभावादिसामानाधिकरण्यावच्छेदकत्वमवर्जनीयम्, पर्वतत्वादिसामानाधिकरण्यस्य तदभावसामानाधिकरण्यस्य च वह्न्यादिसामानाधिकरण्यरूपत्वादिति दर्शितनियमो न सम्भवति। तथापि तत्सामानाधिकरण्यत्वतद्विरुद्धसामानाधिकरण्यत्वावच्छिन्नयोर्नैकावच्छेद्यत्वमिति नियमोपगमान्न दोषः। वह्न्यादिसामानाधिकरण्यत्वरूपेणैव पर्वतत्वतदभावसामानाधिकरण्यस्य धूमत्वाद्यवच्छेद्यत्वात्, लक्षणे ऽपि साध्यसामानाधिकरण्यत्वावच्छिन्ननिरूपितमवच्छेदकत्वं निविष्टम्। अन्यथा द्रव्यसामानाधिकरण्यत्वादिना धूमादिसामानाधिकरण्यस्य वह्नित्वाद्यवच्छिन्नतया व्यभिचारित्वातिप्रसङ्गात्। अत उक्तनियमबलेन सत्तात्वादेर्गुणादिसामानाधिकरण्यत्वावच्छिन्नानवच्छेदकत्वासिद्ध्यैव समीहितसिद्धिः। अत इति। तत्र। तत्तद्विरुद्धसामानाधिकरण्ययोः। अवच्छेदकभेदापेक्षा। विभिन्नधर्मावच्छिन्नत्वस्यावश्यकता। सामानाधिकरण्यस्यावच्छिन्नत्वनियमादिति भावः।

(दी०) अत एव व्यभिचारिणि साध्यतदभावसामानाधिकरण्ययोर्विरुद्धयोरुपपादनायोपाधितदभावावच्छेदकावनुमन्यन्ते न्यायाचार्याः। सत्तात्वं तु गुणाद्यभावस्येव गुणस्यापि न सामानाधिकरण्यावच्छेदकम्। विरोधात्। अव्याप्यवृत्तेश्च कपिसंयोगादेरधिकरणे वृक्षादौ तदभावस्य संयोगेन च वह्नेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताकतदभावस्य सत्त्वेनाविरुद्धत्वात्, वह्निमति च संयोगेन वर्तमानस्य

धूमादेर्वृक्षाद्यभाववति स्वावयवे संयोगेनावर्तमानत्वाच्च तद्वृक्षत्वत्वधूमत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोधः ।

(गा०) अत एव । विरुद्धसामानाधिकरण्ययोर्विभिन्नावच्छेद्यत्वस्यावश्यकत्वादेव । व्यभिचारिणि । सपक्षविपक्षवृत्तिहेतौ । विरुद्धयोः । असम्भवदेकावच्छेद्यताकयोः । उपपादनाय । अवच्छिन्नत्वनियमनिर्वाहाय । अवच्छेदको । यथा क्रमेणावच्छेदककोटिप्रविष्टौ । अनुमन्यन्ते । स्वीकुर्वन्ति । एतावता किमायातमित्यत आह । सत्तात्वं त्विति । विरोधात् । तत्सामानाधिकरण्यावच्छेदकत्वस्येव तदभावसामानाधिकरण्यावच्छेदकत्वस्यापि प्रसङ्गात्, विनिगमकस्य दुर्लभत्वादित्याशयः । एवं च सत्तात्वं न गुणसामानाधिकरण्यावच्छेदकं तद्विरोधिसामानाधिकरण्यानतिप्रसक्तत्वात् इत्यनुमानेनानवच्छेदकत्वसिद्धिर्द्रष्टव्या, तादृशानुमाने च दर्शितप्रतिबन्दिरेव विपक्षबाधिका । उक्तनियमे भावत्वाभावत्वमेव विवक्ष्यतां किं विरुद्धत्वनिवेशेनेत्याकाङ्क्षायां तत्प्रयोजनमाह । अव्याप्यवृत्तेश्चेति । कपिसंयोगादेरधिकरणे तदभावस्य सत्त्वेनाविरुद्धत्वादेतद्वृक्षत्वत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोध इत्यन्वयः । विरुद्धत्वं तदनधिकरणवृत्तित्वविशिष्टत्वम् । तादृशश्च विरोधः कपिसंयोगाभावादौ कपिसंयोगादेर्गुणादौ, अतस्तादृशविरोधाविशिष्टतदभावाधिकरणगुणादिवृत्तित्ववत्यां सत्तायां संयोगसामानाधिकरण्यस्यावच्छेदकं न सत्तात्वं विरोधादिति नातिप्रसङ्गः । अथ वा संयोगतदभावयोरविरोधेऽपि द्रव्यत्वाद्यभावस्य संयोगविरुद्धतया सत्तात्वस्य संयोगसामानाधिकरण्यावच्छेदकत्वे द्रव्यत्वाद्यभावसामानाधिकरण्यावच्छेदकत्वस्यापि प्रसक्त्योक्तविरोधेन तदुभयसामानाधिकरण्यावच्छेदकत्वासम्भवान्न कस्यापि सामानाधिकरण्यस्यावच्छेदकं तदिति नातिप्रसङ्गः ।

द्रव्ये संयोगाद्यभावस्याव्याप्यवृत्तितया व्याप्यवृत्त्यभावमन्तर्भाव्यापत्तिवारणसम्भवाद्विरोधनिवेशस्य प्रयोजनान्तरमाह । संयोगेन चेति । तदभावस्य । वृक्षाद्यभावस्य । सत्त्वेनाविरुद्धत्वात् धूमत्वादेर्नावच्छेदकत्वविरोध इत्यन्वयः । तत्सम्बन्धेन तद्वति वृत्ते-

स्तत्सम्बन्धेन तद्वत्त्वविरोध्यधिकरणवृत्तित्वेनैव समं विरोधित्वाद्धूमसमवायिवृत्तिधूमनिष्ठवह्निसंयोगिवृत्तित्वस्य धूमत्वावच्छिन्नत्वाविरोध इत्यर्थः।

एकेन सम्बन्धेनेत्यस्य प्रयोजनमाह। वह्निमति च संयोगेनेति। संयोगेनावर्तमानत्वात्। विरुद्धस्य संयुक्तत्वस्यासत्त्वात्। तत्र समेवतत्त्वस्य च विरुद्धत्वादिति शेषः। अत्रापि धूमत्वादेर्न वह्निमत्संयुक्तत्वावच्छेदकत्वविरोध इत्यन्वयः।

नन्वेवं साध्यानधिकरणवृत्तित्वादिरूपव्यभिचारस्य हेत्वाभासतानुपपत्तिर्ग्राह्याभावाद्यनवगाहित्वेन तज्ज्ञानस्येदृशव्याप्तिज्ञानाविरोधित्वादित्यत आह। व्यभिचारधीरिति।

(दी०) व्यभिचारधीरप्येतद्व्याप्तिबुद्धौ विरोधिन्येव। तद्धर्मविशिष्टस्य साध्यानधिकरणवृत्तित्वग्रहे तदवच्छेदेन साध्याधिकरणवृत्तित्वग्रहायोगात्। अस्तु वा एतन्मते हेतुवृत्तिधर्मस्य साध्यसामानाधिकरण्यानवच्छेदकत्वमेव व्यभिचारः। तद्धीरेव साक्षाद्विरोधिनी, व्यभिचारान्तरधीस्तु परम्परयेति।

(गा०) व्यभिचारधीः। साध्यानधिकरणवृत्तित्वधीः। ग्रहायोगात्। ग्रहानुत्पत्तेरानुभविकत्वात्। यद्धर्मविशिष्टस्य तदनधिकरणवृत्तित्वं तत्त्वस्य तद्वद्वृत्तितावच्छेदकताविरुद्धत्वेन विषयविरोधादिति भावः। वस्तुतो विरुद्धस्यापि विरुद्धत्वानवगाहिधियोऽविरोधित्वादाह। अस्तु वेति। हेतुवृत्तिधर्मस्य। हेतुतावच्छेदकतया अभिमतस्य। व्यभिचारः। व्यभिचाररूपहेत्वाभासः। सधर्मितावच्छेदकक एवावच्छेदकत्वग्रहो हेतुरित्याशयेनेदम्।

ननु तथाप्यनुमितिजनकज्ञाने व्यभिचारान्तरधियोऽनुभवसिद्धं विरोधित्वं भज्येतैवेत्यत आह। तद्धीरेवेति। तद्धीः। हेतुवृत्तिधर्मे तादृशानवच्छेदकत्वरूपव्यभिचारधीः। परम्परया। उक्तव्यभिचारधीद्वारा।

एतन्मते नीलधूमत्वादिवारणाय विशेषणान्तरमपि न प्रवेशयमित्याह। नीलेति।

(दी०) नीलधूमत्वादिकं तु गौरवान्नावच्छेदकम् । एवं च लघुघटत्वादिकमेव सामानाधिकरण्यावच्छेदकं व्याप्तिः, न तु तत्सहचरितकम्बुग्रीवादिमत्त्वादिकम् । तेन च गुरुणाऽपि रूपेण व्याप्तिग्रहे कथायां हेतोरुपन्यासे वाऽनुयोगः प्रकारान्तरव्याप्तित्वादिनामपि समानः

(गा०) गौरवात् । सम्भवदवच्छेदकताकधूमत्वाद्यपेक्षया गुरुशरीरत्वात् । अवच्छेदकम् । वह्न्यादिसामानाधिकरण्यनिरूपितस्वरूपसम्बन्धात्मकावच्छेदकत्ववत् ।

नन्वेवं तादृशधर्मान्तराघटितघटत्वादिसमनियतकम्बुग्रीवादिमत्त्वाद्यवच्छिन्नस्यापि व्याप्यत्वानुपपत्तिरित्यत आह । एव चेति ।

ननु द्रव्यवान् कम्बुग्रीवादिमत इत्यादौ घटत्वादेर्व्याप्तित्वेऽपि सामानाधिकरण्ये इव तदवच्छेदकघटत्वादिरूपव्याप्तावपि गौरवेण कम्बुग्रीवादिमत्त्वादेरनवच्छेदकतया तदवच्छेदेन व्याप्तिग्रहानुपपत्तिः, तथा च सति तस्य गमकतानवच्छेदकतया तद्विशिष्टबोधकपदेन हेतूपन्यासानुपपत्तिश्च । न च तस्यानतिरिक्तवृत्तित्वरूपव्याप्यवच्छेदकतयैवोभयोपपत्तिरिति वाच्यम् । एवं सति नीलधूमत्वादेरपि अवच्छेदकधूमत्वादिरूपव्याप्त्यनतिरिक्तवृत्तितया नीलधूमत्वाद्यवच्छेदेनापि व्याप्तिग्रहसम्भवान्नीलधूमादित्यपि प्रयुज्येतेत्यत आह । तेन चेति । अनुयोगः । कथन्ता । प्रकारान्तरव्याप्तित्वादिनाम् । धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तित्वादिनाम् । समान इति । तन्मतेऽपि नीलधूमादित्यादिप्रयोगवारणाय स्वरूपसम्बन्धरूपावच्छेदकत्वग्रहविषयताया एव गमकतावच्छेदकतानिर्वाहकत्वस्योपेयत्वादिति भावः । तथा प्रयोगोऽपि नेष्यते एव यदुपस्थितिनियता स्वस्योपस्थितिस्तदपेक्षया गौरवमेव व्याप्त्याद्यवच्छेदकत्वविरोधीति समाधानमपि तुल्यमेवेति द्रष्टव्यम् ।

व्यक्तिबाहुल्यकृतगौरवेण रूपत्वरसत्वादीनां द्रव्यत्वादिसाध्यसामानाधिकरण्यावच्छेदकत्वमेव न स्यादित्यत्रापीष्टापत्तिमाह । एषामिति ।

(दी०) एवं द्रव्यं रूपात् रसादित्यादौ सकलगुणसाधारणस्य गुणत्वस्य द्रव्यत्वादिसाधारणस्य गुणासमवेतत्वे सति द्रव्यसमवेतत्वस्य वैकस्यावच्छेदकत्वसम्भवे बहुनां रूपत्वादीनां न तत्त्वम् । विरुद्धधर्मद्वयाधिकरणयोश्च एकस्यैकेन सम्बन्धेन वृत्तौ कथं विरोधः ? कथं वा द्रव्यत्वादौ साध्ये हेतुत्वेन विशिष्य रूपादेः प्रयोगः ? तथा परामर्शाद्वा अनुमितिरिति विभावनीयम् ।

(गा०) द्रव्यादीति । जन्यद्रव्यादीत्यर्थः । आदिपदात् कर्मद्रव्यत्वादिपरिग्रहः । द्रव्यसमवेतेत्यत्र कर्मत्वादिवारणाय द्रव्यपदम् । अत्र कल्पेऽस्वरस प्रकाशयति । विरुद्धधर्मद्वयेति । कथ विरोध । किंप्रमाणको विरोधः । विशिष्य । रूपत्वादिविशिष्टबोधकपदेन । तथा परामर्शात् । विशिष्य रूपादिमत्तापरामर्शात् । अनुमितिरिति । कथमित्यनुपज्यते ।

न च प्रकारान्तरव्याप्तिवादिनामप्ययमनुयोगः समान इति प्रागेवोक्तमिति वाच्यम् । व्याप्त्यन्तरवादिमते पक्षधर्मताग्रहप्रकारीभूतधर्मे तदवच्छेदकत्वभानस्यानपेक्षितत्वात्, नीलधूमादिति प्रयोक्तुरधिकेनैव निग्रहात् । एतन्मते तन्मार्गानुसरणे स्वरूपसम्बन्धरूपावच्छेदकत्वस्य लघुत्वेऽपि सविवादतया निवेशनानौचित्यात् ।

न च कारणतादेरिवाऽऽधेयत्वादेरपि स्वरूपसम्बन्धरूपमवच्छेदकत्वं प्रतीतिसिद्धतया दुरपह्नवमिति वाच्यम् । वह्निमति धूम इति प्रतीत्या धूमत्वे वह्निसामानाधिकरण्यावच्छेदकत्वावगाहनवत् धूमवति वह्निरिति प्रतीत्यातिप्रसक्तेऽपि वह्नित्वे धूमसामानाधिकरण्यावच्छेदकत्वभानस्याविशेषेण सिद्धेरित्यभिप्रायः ।

सार्वभौममतमाह । अपरे त्विति ।

(दी०) अपरे तु यद्धर्मविशिष्टहेत्वधिकरणत्वं साध्याधिकरणताया अवच्छेदकं स धर्मो व्याप्तिः । ग्रन्थस्तु धूमस्य धूमवतः, धूमत्वम्, धूमवत्त्वं वह्नेस्तु वह्निमतस्त्वित्यादिप्रकारेण

व्याख्येयः । अत्र चावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः । विरुद्धदिक्कालावच्छिन्नवृत्तिकस्य न्यूनदेशकालवृत्तिकादेश्चाधिकरणतायां तदसम्भवात्, तुल्यवृत्तिकधर्मद्वयाधिकरणत्वयोर्मिथोऽवच्छेद्यावच्छेदकभावस्य च नियन्तुमशक्यत्वात् । नाप्यन्यूनवृत्तिकत्वम् । न्यूनवृत्तिकधूमादेरव्याप्यतापत्तेः । किं त्वनतिरिक्तवृत्तित्वम्, स्वान्यूनवृत्तितत्कत्वमिति यावत् । अतो न केवलान्वयिन्यव्याप्तिः । अत्र च यदन्यूनवृत्ति साध्यं तत्त्वं स्वव्यापकसाध्यसम्बन्धित्वपर्यवसन्नमपेक्ष्य गौरवं परमवशिष्यते । तच्च ग्रन्थकार एवाग्रे विवेचयिष्यते इत्याहुः ।

(गा०) यद्धर्मविशिष्टेति । गुणवत् सत्त्वादित्यादौ सत्तात्वादिविशिष्टसत्ताद्यधिकरणत्वं गुणादावतिप्रसक्तत्वेन न साध्याधिकरणतावच्छेदकमिति नातिप्रसङ्ग इति । एतत्कल्पे झटितिस्फूर्तिकं धूमस्य वह्निसम्बन्धे इत्यादिमूलविरोधमवच्छेदकत्वमनिरुच्यैवोद्धरति । ग्रन्थस्त्विति । विरुद्धेति । एकस्मिन्नेव गृहादौ प्राचीप्रतीच्यवच्छेदेन वर्तमानस्य व्यक्तिद्वयस्य एकस्मिन्नेव घटादौ स्थित्युत्पत्तिक्षणावच्छिन्नगन्धतत्प्रागभावादेश्च एकस्मिन् साध्ये हेतुभूतस्यापरस्येत्यर्थः । न्यूनदेशकालेति । वह्न्यादौ साध्ये धूमादेरित्यर्थः । तदसम्भवात् । तादृशावच्छेदकत्वासम्भवात् । तत्र तदप्रत्ययादिति भावः । तुल्यवृत्तिकेति । तद्रूपतद्रसादेरित्यर्थः । नियन्तुमशक्यत्वादिति । तथा च विनिगमनाविरहेण द्वयोरेव परस्परावच्छेदकत्वेन अन्योन्याश्रयादुभयोरेवानवच्छेदकत्वमिति भावः । एवं च लक्षणेऽसम्भव इति द्रष्टव्यम् । केवलान्वयिसाध्यके साध्याधिकरणताशून्यावृत्तित्वरूपतदनतिरिक्तवृत्तित्वाप्रसिद्ध्या तत्सङ्ग्रहायाह । स्वान्यूनवृत्तीति । स्वव्यापकसाध्याधिकरणताकत्वमित्यर्थः । नन्वत्रानतिप्रयोजनकाधिकरणताद्वयप्रवेशेन गौरवम्, तत्परित्यागे च प्राथमिकसिद्धान्तलक्षणाभेद इत्यत आह । अत्र चेति । अग्रे । उक्तव्याप्तीत्यादौ । अग्रेदक्षरत्वमस्वरसबीजम् ।

(दी०) उपाधिनेति। विशेषणतामापन्नेनोपाध्यनुप्रवेशेनेति यावत्। वह्नावार्द्रेन्धनप्रभववह्नित्वेन रासभार्द्रेन्धनादौ च तथाविधवह्निविशिष्टत्वेन धूमसम्बन्धेऽवच्छिद्यमाने तथाविधवह्नेरप्यनुप्रवेशात्। रासभत्वादिकं तु निविशते न वेत्यन्यदेतत्।

(गा०) ननु सोपाधिहेतावव्रृत्तिना उपाधिना तन्निष्ठसाध्यसम्बन्धितायाः अवच्छेदासम्भवादुपाधिनेत्यसङ्गतमत आह। विशेषणतेति। अवच्छेदकविशेषणतापन्नेनेत्यर्थः। तथा चावच्छेदकविशेषणतानापन्नीभूयावच्छेदकत्वे यथावच्छेद्यसामानाधिकरण्यं तन्त्रमिति उपाधिवैशिष्ट्यावच्छिन्नसाध्यतावच्छेदकादिना साध्यसम्बन्धेऽवच्छिद्यमानेऽवच्छेदकविशेषणकोटिप्रविष्टतया साधनावृत्तेरप्युपाधेरवच्छेदकत्वं दुरपवादमिति भावः।

ननु धूमवान् वह्नेरित्यादावार्द्रेन्धनप्रभववह्नित्वं सामानाधिकरण्यावच्छेदकं तथार्द्रेन्धनप्रभवत्वावशिष्टवह्नित्वं तत्र च वैशिष्ट्यघटकतयैवार्द्रेन्धनप्रभववह्नेः प्रवेशो न तु विशेषणतयेत्यत आह। उपाध्यनुप्रवेशेनेति। उपाधिघटितधर्मेणेत्यर्थः। विशेषणवत् सम्बन्धस्यापि घटकत्वान्न दोष इति भावः। सम्बन्धविधया विशेषणविधया च घटकत्वं स्थलभेदेन दर्शयति। वह्नाविति। ननु वह्निहेतुके यथा साधनतावच्छेदकस्यावच्छेदकघटकत्वं न तथा रासभार्द्रेन्धनहेतुके इत्यत आह। रासभत्वादीति। अन्यदेतदिति। तदनिवेशेऽप्युपाध्यनुप्रवेशस्याक्षतत्वाद् उपाध्यनुप्रवेशे साधनतावच्छेदकस्यावच्छेदकतया अविवक्षणादिति भावः।

सोपाधौ तु उपाधिनेत्यत्रैवकारपूरणेन नियमपरतया केषांचिद्व्याख्यानं नियमासम्भवेन दूषयति। अत्र चेति।

(दी०) अत्र चेदं स्नेहवत् निःस्नेहं वा स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं शीतत्वेन शीतान्यत्वेन वा साध्यासमानाधिकरणतया साधनव्यापकतया वा स्वयमनुपाधिना केवलेन विशेषणीभूय वा शीतान्यस्पर्शत्वेन चोपाधिना स्वत एव स्पर्शे साध्यसम्बन्धोऽवच्छिद्यते इत्युपाधिनैवेति नियमे न तात्पर्यम्

परं तु शुद्धस्य साधनतावच्छेदकस्यानवच्छेदकतामात्रे ।

(गा०) नियमे न तात्पर्यमित्यग्रिमेणान्वयः । स्नेहवत् स्पर्शादित्यत्र विनाप्युपाधिप्रवेशेन साध्यासमानाधिकरणतया स्वयमनुपाधिना शीतत्वेन केवलेन स्पर्शे साध्यसम्बन्धोऽवच्छिद्यते इत्यर्थः । सर्वत्र शीतपदं शीतस्पर्शपरम् । केवलेन । किञ्चिदवच्छेदकविशेषणतानापन्नेन । एतेन उपाधिपदस्योपाधिघटितपरत्वलभ्ये सोपाधिनिष्ठसाध्यसम्बन्धितायां उपाधिघटितधर्म एव स्वतोऽवच्छेदक इति नियमे तस्य पदस्य यथाश्रुतार्थपरत्वलभ्ये तादृशसाध्यसम्बन्ध उपाधिरेव स्वतोऽवच्छेदक इति नियमे च व्यभिचारो दर्शितः । अवच्छिद्यते इत्यस्य विशेषणतयाऽवच्छेदकत्वपरतालभ्ये उपाधिभिन्नस्य तदघटितस्य च तादृशावच्छेदकत्वाभावनियमे व्यभिचारं दर्शयति । निःस्नेहमित्यादिना । निःस्नेहं स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं साधनव्यापकतया स्वयमनुपाधिना शीतान्यत्वेन विशेषणीभूय स्पर्शे साध्यसम्बन्धोऽवच्छिद्यते इत्यन्वयः । विशेषणीभूय । अवच्छेदकीभूते स्पर्शत्वे सामानाधिकरण्यसम्बन्धेन विशेषणीभूय । व्यभिचारप्रदर्शितनियमे प्रकृतानुपयोगोऽपि बोध्यः । विशेषणतापन्नेनैवेति पूरणलभ्ये उपाधेः स्वतोऽनवच्छेदकत्वनियमे व्यभिचारं दर्शयति । शीतान्यस्पर्शत्वेन चेति । अस्य च शुद्धनिःस्नेहत्वाव्यापकत्वेऽपि पक्षधर्मजलोष्णस्पर्शान्यतरत्वावच्छिन्नसाध्यव्यापकतयोपाधित्वम् । अत्रापि नियमे प्रकृतानुपयोगो द्रष्टव्यः ।

ननु नियमस्यानभिप्रेतत्वे प्रकृतानुपयोगिनेत्याशङ्कां परिहरति । परं त्विति । अनवच्छेदकतामात्रे इति । वह्न्यादिपदस्य साध्यादिसामान्यपरतया पूर्वोक्तस्य साधनतावच्छेदके साध्यसम्बन्धितावच्छेदकत्वस्य सोपाधौ तुकारेण व्यवच्छेदादिति भावः ।

उपाधिपदस्य साधनतावच्छेदकातिरिक्तपरतया तुकारस्य चैवकारार्थतया उपाधिनैवेति नियमपरत्वमपि सम्भवतीत्यपि केचित् ।

इति अनुमानगादाधर्यां विशेषव्याप्तिप्रकरणम् ॥

अत एवचतुष्टयप्रकरणम् ।

(चि०) अत एव साधनतावच्छेदकाभिन्नेन येन साधनताभिमते साध्यसम्बन्धोऽवच्छिद्यते स एव तत्र साधने विशेषणमुपाधिरिति वदन्ति ।

(दी०) यत एव सोपाधौ साधनतावच्छेदकातिरिक्तं नियतमवच्छेदकं अत एव तद्विशेषस्तत्रोपाधिरिति वदन्तीत्याह । अत एवेत्यादि ।

(गा०) सोपाधौ साधनतावच्छेदकस्यानवच्छेदकत्वोक्तेरर्थतः साधनतावच्छेदकातिरिक्तस्य नियमतोऽवच्छेदकत्वं लभ्यते इति तदुपष्टम्भेनात एवेत्यादिकं व्याचष्टे । यत एवेति ।

तद्विशेषः । साधनतावच्छेदकातिरिक्तविशेषणीभूतसाध्यसम्बन्धितावच्छेदकधर्मः । उपाधिरित्यस्य नियमेनेत्यादिः । साधनतावच्छेदकातिरिक्तसाध्यसम्बन्धितावच्छेदकस्य सोपाधावनियतत्वे यत्र न तत्सत्त्वं तत्रोपाधेः साधनतावच्छेदकातिरिक्तसाध्यसम्बन्धितावच्छेदकविशेषत्वनियमभङ्गेनोपष्टम्भसङ्गतिः । वदन्तीत्यस्य प्राभाकरा इत्यादिः ।

यद्यप्युपाधिलक्षणघटक साध्यसम्बन्धितावच्छेदकत्वमन्यूनवृत्तित्वरूपं साध्यविशिष्टसाधनव्यापकत्वपर्यवसितमनुपद निर्वक्ष्यते, साधनतावच्छेदकस्यानतिरिक्तवृत्तित्वरूप स्वरूपसम्बन्धात्मक वाऽवच्छेदकत्वमेव च सोपाधौ, तूपाधिनेति ग्रन्थलभ्यम्, तादृशावच्छेदकताया एवोक्तव्याप्तिघटकतया साधनतावच्छेदके प्रतिक्षेपात् । तथा च एतादृशव्याप्तिघटकावच्छेदकताश्रयंसाधनतावच्छेदकातिरिक्तधर्मान्तरानियमेऽपि उक्तान्यूनवृत्तित्वरूप-साध्यसम्बन्धितावच्छेदकत्वनियमस्योपाधेः सम्भवेनोपष्टम्भासङ्गतिः । तथापि यत एव सर्वत्र सोपाधौ साधनतावच्छेदकाति-

रिक्तं नियतमवच्छेदकं साधनतावच्छेदकं नावच्छेदकं साध्याभावविशिष्टसाधनवृत्तीति यावत्, अत एव तद्विशेषणविशेषणीभूतसाध्यसम्बन्धिनावच्छेदकधर्म एव उपाधिरिति प्राचामुक्तिः सङ्गच्छते। क्वचित्सोपाधौ साधनतावच्छेदकस्य साध्याभावविशिष्टावृत्तित्वे उपाधेः साध्याभावविशिष्टसाधनवद्वृत्तित्वरूपनिर्वक्ष्यमाणविशेषणत्वनियमभङ्गेन तदसङ्गतिप्रसङ्गादित्यभिप्रायान्नासङ्गति ।

उपाधेः प्रायशः साधनावृत्तितया तन्निष्ठसाध्यसम्बन्धितायां आश्रयतासम्बन्धेन नावच्छेदकत्वसम्भव इत्यत आह। अवच्छेदकत्वमिति।

(दी०) अत्रावच्छेदकत्वं सामानाधिकरण्येन, तत्त्वञ्चान्यूनवृत्तित्वम्, व्यापकत्वमिति यावत्। तच्चाधिकरणान्तर्भावेण। तेन साध्यविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनवत्त्वव्यापकाधिकरणताकत्वं पर्यवस्यति। निरुक्तविशिष्टसाधनव्यापकत्वमिति तु निष्कर्षः। इत्थं च सत्ताद्येकव्यक्तिकहेतुनिष्ठद्रव्यत्वादिसामानाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगिनि घटत्वादौ नातिप्रसङ्गः, न वा द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ द्रव्यत्वविशिष्टसत्ताद्यव्यापके स्पर्शवत्त्वादावप्रसङ्गः।

(गा०) अन्यूनवृत्तित्वघटकसामानाधिकरण्यांशं परित्यज्य निष्कृष्टमर्थमाह। व्यापकत्वमिति। सामानाधिकरण्यसम्बन्धस्य व्यापकताघटकत्वविरहे व्यापकीभूतसामानाधिकरण्यप्रतियोगित्वमेव विवक्षणीयम्। द्रव्यं सत्त्वादित्यादौ घटत्वादावतिव्याप्तिवारणायाह। तच्चेति। अधिकरणान्तर्भावेणेति। यत्र यत्राधिकरणे हेतोः साध्यसामानाधिकरण्यं तत्र यत्सामानाधिकरण्यं तत्त्वरूपमित्यर्थः। एतावता सामानाधिकरण्यनिरूपकाधिकरणताव्याप्तिरेव पर्यवसितेत्याशयेनाह। तेनेति। साध्येति। साध्यतावच्छेदकावच्छिन्नेत्यर्थः। व्याप्यादिशि साधनप्रवेशे व्यापकादिशि वैयर्थ्येन, न तस्य प्रवेशनम्। उभयदिश्यनतिप्रयोजनकतया अधिकरणतांशमपि परित्यजति। निरुक्तेति।

साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः । विशिष्टेति । साधनताव-च्छेदकविशिष्टेत्यर्थः । साधनतावच्छेदकविशिष्टत्वनिवेशप्रयोजन-माह । न वेति । गुणाद्यन्यत्वविशिष्टसत्तावान् जातेरित्यादौ शु-द्धसत्ताविशिष्टजात्यव्यापकद्रव्यत्वादेः सद्भावाय साध्यतावच्छेदक-विशिष्टत्वनिवेशनम् ।

विशेषणत्वनिवेशप्रयोजनमाह । निःस्नेहमिति ।

(दी०) निःस्नेहं स्पर्शाद् द्रव्यं सत्त्वादित्यादौ शीतस्प-र्शान्यत्वरूपान्यत्वादेर्वारणाय तत्रेत्यादि । तत्र । साध्यविशिष्टे साधने । विशेषणम् । साध्याभावविशिष्टात् साधनात् सामाना-धिकरण्येन व्यावर्तकम्, साध्याभावविशिष्टनिरुक्तसाधनवद-वृत्तीति यावत् ।

(गा०) यत्किञ्चित्साधनवदवृत्तित्वं निवेश्यापि प्रथमे शी-तस्पर्शान्यत्ववारणसम्भवाद्विशेषणघटकसाधनवदंशे साध्याभाव-विशिष्टत्वविशेषणस्य वक्ष्यमाणस्य व्यावृत्तिमाह । द्रव्यमिति । द्रव्यं सत्त्वादित्यत्र रूपान्यत्व विरोधाभञ्जकत्वान्न गुरुमते उपा-धिरिति भावः । तत्रेत्यस्य व्याख्या साध्यविशिष्टे साधने इति । तादृशसाधनविशेषणत्वसमुदित निर्वक्ति । साध्याभावविशिष्टेत्यादि । व्यावर्तकत्वं भेदानुमितियोग्यत्वम् । योग्यता च प्रकृते व्याप्तिरेव न तु पक्षधर्मताया अपि प्रवेशः, साध्यविशिष्टसाधननिष्ठसामाना-धिकरण्याप्रतियोगिनः साधननिष्ठसाध्यसम्बन्धितावच्छेदकत्वविर हेणैवानतिप्रसङ्गेन तादृशसाधनरूपपक्षस्यैव समुदितार्थे निवेशात् । अत्र यथाश्रुते एकव्यक्तिसाधनके साध्याभावविशिष्टस्यापि साधनस्य साध्यवत्युपाधिसमानाधिकरणतया सामानाधिकरण्यस-म्बन्धेन नोपाधेः साध्याभावविशिष्टसाधनभेदव्याप्यत्वमिति वक्ष्य-माणानुपपत्तेर्निष्कृष्टमर्थमाह । साध्याभावविशिष्टनिरुक्तसाधनेति ।

न चायोगोलकादावप्याईन्धनप्रभववह्न्यादेः कालिकादिसम्ब-न्धेन वृत्तेराधाराधेयभावघटकसम्बन्धेनावृत्तित्वं विवक्षणीयम् । तथा च जातिमान् मेयत्वादित्यादौ 'सत्ताद्युपाधावव्याप्तिः', सामान्या-दौ समवायेन वृत्तेरप्रसिद्धेः । एवं विशिष्टस्यानतिरिक्ततया

द्रव्यं जातेरित्यादौ गुणकर्मान्यत्वविशिष्टसत्ताद्युपाधौ गुणादिवृत्तित्वादव्याप्तिरिति वाच्यम् । साध्याभावविशिष्टनिरुक्तसाधनव्यापकाभावप्रतियोगितावच्छेदकरूपवत्त्वस्य विवक्षितत्वात् ।

(दी०) एवं च द्रव्यं सत्त्वादित्यत्र सत्ताया अभेदे ऽपि गुणकर्मान्यत्वे नाव्याप्तिः । नापि द्रव्यं कर्मान्यत्वे सति सत्त्वादित्यत्र गुणान्यत्वादौ । इत्थं च साधनतावच्छेदकस्यानवच्छेदकत्वद्योतनाय परं तद्भिन्नत्वमुक्तम्, न तु विवक्षितमेव तत्, वैयर्थ्यात् । इदं दधि जन्यं वा दध्न इत्यादौ दधित्वाद्यव्याप्तेश्च ।

(गा०) एवं च । ईदृशपर्यवसितार्थविवक्षणे च । साधनतावच्छेदकविशिष्टार्थकनिरुक्तपदव्यावृत्तिमाह । नापीति । इत्थं च । विशेषणपदार्थस्य साध्याभावविशिष्टसाधनघटितत्वे च । परम् । केवलम् । विवक्षितम्, उपाधिलक्षणे । वैयर्थ्यादिति । साध्यविशिष्टहेतुव्यापकस्य सद्धेतावुपाधित्वस्य तत्र साध्याभावविशिष्टसाधनाप्रसिद्ध्या विशेषणत्वासम्भवेनैव वारणादिति भावः । विवक्षायां विरुद्धफलकत्वमपि दर्शयति । इदमिति । साध्यं च नोपाधिरिति प्रवादेन दधित्वमाध्यके तस्यानुपाधित्वोपगमसम्भवात् जन्यत्वसाध्यकानुसरणम्, तत्र च साधनावच्छिन्नसाध्यव्यापकतया दधित्वस्योपाधित्वे दध्नो हेतुना समवायेनेति दध्यारम्भकपरमाणौ व्यभिचारो बोध्यः ।

भिन्नान्तं सार्थकयितुं कल्पान्तरमाह । यद्वेति ।

(दी०) यद्वा प्रकृतसाधनतावच्छेदकानवच्छेद्यप्रकृतसाधनानिष्ठसाध्यसम्बन्धितावच्छेदकत्वं पूर्वदलार्थः । अनवच्छेदकत्वं च तस्य साध्याभावविशिष्टसाधनवृत्तितया तद्विशिष्टसाधनस्य साध्याभाववद्वृत्तित्वेन साध्याभाववतस्तद्विशिष्टसाधनवत्त्वेनेति यावत् ।

(गा०) स्वातन्त्र्येण साध्यसम्बन्धितावच्छेदकार्थकस्य भिन्नेत्यन्तस्यावधारणपरतया साध्यसम्बन्धितायां साधनतावच्छेद-

कानवच्छेद्यत्वलाभः । तद्विवक्षणं च सद्धेतौ साध्यसामान्यादेर्वारणाय, निर्वक्ष्यमाणविशेषणत्वस्य तत्रापि सत्त्वादिति भावः । प्रमेयमात्रस्य साधनतावच्छेदकत्वे तदनवच्छेद्यत्वाप्रसिद्ध्याऽव्याप्तेर्वक्ष्यमाणत्वात् साधननिष्ठसाध्यसम्बन्धितावच्छेदकत्वदलप्रविष्टसाधनतावच्छेदके साध्यसम्बन्धितानवच्छेदकत्वस्यैव निवेशनीयतया तस्य च स्वरूपसम्बन्धरूपतदवच्छेदकत्वाभावरूपत्वे गुरुधर्मावच्छिन्नहेतुकस्थले अतिप्रसङ्गस्य वक्ष्यमाणत्वात् तच्छून्यवृत्तित्वरूपत्वे द्रव्य सत्त्वादित्याद्येकव्यक्तिहेतुकस्थलीयोपाध्यव्यापनादन्यादृशं तन्निर्वक्ति । अनवच्छेदकत्वं चेति । तस्य । साधनतावच्छेदकस्य । साधनवृत्तितयेत्यादौ तृतीया अभेदे ।

अत्र कल्पे गुणवद् गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ सत्त्वादेरभेदेन विशिष्टसत्तात्वादेः साध्याभावविशिष्टसाधनवृत्तितया द्रव्यत्वादावतिव्याप्तिरतः कल्पान्तरमाह । तद्विशिष्टेति । साधनतावच्छेदकविशिष्टसाधनस्येत्यर्थः । विशिष्टस्यानतिरेके विशेष्यस्य साध्याभाववद्वृत्तित्वे विशिष्टस्य न तथात्वमिति न शक्यते वक्तुमित्याशङ्क्या निष्कृष्टमर्थमाह । साध्याभाववत इति । स्वविशिष्टसाधनाधिकरणसाध्याभाववत्त्वेनेत्यर्थः । विशिष्टनिरूपितविलक्षणाधिकरणताया निवेशान्नोक्तदोषः । साधनतावच्छेदकसम्बन्धनिवेशसूचनाय साधनपदम् ।

(दी०) एतेन धूमवान् मेयत्व इत्यादौ मेयानवच्छेद्यसाध्यसम्बन्धाप्रसिद्धिः । गुणवद् गुणकर्मान्यत्वे सति जातिमत्त्वादित्यादौ जातित्वघटकानित्यत्वादेर्वैयर्थ्येन विशिष्टस्यानवच्छेदकतया गुणकर्मान्यत्वादेरुपाधितापत्तिश्चेति निरस्तम् । अवच्छेदकत्वं च सामानाधिकरण्येन । तथा च साध्यविशिष्टस्य साध्यसम्बन्धितानवच्छेदकसाधनतावच्छेदकावच्छिन्नसाधनस्य व्यापकत्वमर्थः पर्यवस्यति ।

(गा०) जातित्वघटकेति । यद्यपि गुणकर्मान्यत्ववैशिष्ट्यमात्रस्यैवावच्छेदकत्वसम्भवेन समुदितस्य जातित्वस्यैव वैयर्थ्यम् । तथापि तद्घटकसमवेतत्वस्य वैशिष्ट्यघटकतयैव निवे-

दाभावव्याप्तिशिष्य नित्यत्वादेर्वैयर्थ्याभिधानम् । अवच्छिद्यते इत्यत्रावच्छेदकत्वमेतत्कल्पेऽपि पूर्वनिरुक्तमेव ग्राह्यमित्याह । अव च्छेदकत्वं चेति । समुदितनिष्कृष्टार्थमाह । तथा चेति । साध नतावच्छेदकेऽनवच्छेदकत्वनिवेशसार्थक्याय विशेषणत्वमन्यथा व्या र्थ्यापत्तेः तद्विशेषणस्य पूर्वोक्तमेव प्रयोजनमाह । उपदर्शितेति ।

(दी०) उपदर्शितशीतस्पर्शान्यत्वादिवारणाय तत्रेत्या- दि । तत्र । साधनतावच्छेदकविशिष्टे साधने । विशेषणम् । साध्यशून्यावृत्त्यौपयिकम् । यत्सामानाधिकरण्यविशिष्टप्रकृ- तसाधनवत्त्वं साध्याभाववति न वर्तते इति यावत् । साध्या भावविशिष्टप्रकृतसाधनाधिकरणसामान्यात् साध्यविशिष्टप्रकृत- साधनाधिकरणसामान्यस्य व्यावर्तकमिति समुदायार्थनि- ष्कर्ष इत्याहुः ।

(गा०) द्रव्यकर्मान्यत्वे सति सत्त्वादित्यादौ गुणान्यत्वादि सङ्ग्रहाय साधनतावच्छेदकविशिष्टेति । साध्यशून्यावृत्त्यौपाय कत्वम्, साध्यशून्यावृत्तित्वानुमापकसामानाधिकरण्यप्रतियोगित्व म् । एकव्यक्तिकव्यभिचारिहेतौ साध्यशून्यावृत्तित्वस्य बाधे- नानुमेयत्वासम्भवात् तत्रत्योपाध्यावव्याप्तिमाशङ्क्य निष्कर्षार्थमाह । यदिति । प्रकृतसाधनवत्त्वम् । साधनत्वावच्छेदकविशिष्टसाधना- धिकरणत्वसामान्यम् । तेन शीतस्पर्शान्यत्वादिसामानाधिकरण्य- विशिष्टस्पर्शान्यत्वावच्छिन्नशीतस्पर्शावृत्तिनिरूपितयत्किञ्चिदधिकरण तायाः निःस्नेहत्वशून्यजलाद्यवृत्तित्वेऽपि नोक्तस्थलेऽतिप्रसङ्गः । लाघवाय वल्लक्षणनिष्कृष्टार्थमाह । साध्याभावेति । साध्याभाववत्प्र कृतसाधनाधिकरणसामान्यभेदव्याप्यत्वे सति साध्यवत्प्रकृतसा धनाधिकरणसामान्यवृत्तित्वमित्यर्थः । तादृशाधिकरणभेदव्या- प्यत्वं च तादृशाधिकरणावृत्तित्व तद्व्यावृत्तिः स्फुटैव ।

विरोधभञ्जनाक्षमदर्शितशीतस्पर्शान्यत्वव्यावृत्तमेवावच्छेदक- त्वमवच्छिद्यते इत्यनेन विवक्षितम् । विशेषणपदोपादानं तु सामा- नाधिकरण्यप्रत्यासत्त्या ऽवच्छेदकपरतालाभमात्रफलकमिति सार्व- भौममतमुपन्यस्यति । केचित्त्विति ।

(दी०) केचित्तु विशेषणं सामानाधिकरण्यम् । तथा च सामानाधिकरण्यप्रत्यासत्त्या येनावच्छिद्यते अवच्छेदकीभूतसामानाधिकरण्यप्रतियोगीति यावत् । अवच्छेदकत्वं चेदमन्यूनानतिरिक्तवृत्तित्वम् । गुरोरप्युपाधिसामानाधिकरण्यस्याक्षतमेव ।

(गा०) निर्वाच्यावच्छेदकत्वघटकमन्यूनवृत्तित्वं व्यापकत्वपर्यवसितम् । तत्र यदि सामानाधिकरण्यस्य वृत्त्यनियामकतया न व्यापकताघटकत्वं तदा तेन सम्बन्धेनावच्छेदकत्वमसम्भवीत्याशयेनाह । अवच्छेदकीभूतेति । शीतस्पर्शान्यत्वादिसामानाधिकरण्यस्यापि हेतुनिष्ठसाध्यसामानाधिकरण्यान्यूनवृत्तितया तत्रातिप्रसङ्गवारणायानतिरिक्तवृत्तित्वमवच्छेदकत्वेऽन्तर्भावयति । अवच्छेदकत्वं चेदमिति । निःस्नेहत्वादिसामानाधिकरण्यशून्ये शीतस्पर्शादौ शीतस्पर्शान्यत्वादिसामानाधिकरण्यसत्त्वान्न तस्यानतिरिक्तवृत्तित्वमिति भावः । धूमवान्वह्नेरित्यादौ महानसत्वादेर्धारणायान्यूनवृत्तित्वनिवेशनम् । स्वरूपसम्बन्धरूपावच्छेदकत्वपरित्यागफलं दर्शयति । गुरोरपीति ।

(दी०) यद्यपि प्रत्यक्ष उद्भूतरूपवत्त्वादित्यत्र महान् अनित्यद्रव्यत्वादित्यत्र महत्त्वस्य अनित्यद्रव्यसमवेतत्वस्य च वक्ष्यमाणलक्षणाक्रान्तस्योपाधेः सामानाधिकरण्यं साध्यसामानाधिकरण्यन्यूनातिरिक्तवृत्ति । तथापि हेतुनिष्ठसाध्यसामानाधिकरण्यस्य हेतुनिष्ठं यत्सामानाधिकरण्यमन्यूनानतिरिक्तवृत्ति तत्त्वं विवक्षितम् ।

(गा०) रूपमात्रस्य हेतुत्वे प्रत्यक्षत्वाभावविशिष्टरूपवति पिशाचादौ महत्त्वस्य वर्तमानत्वाद्वक्ष्यमाणलक्षणाक्रान्तता न स्यादत उद्भूतपदम् । ननु प्रत्यक्ष उद्भूतरूपवत्त्वादित्यत्रापि महत्त्वं नोपाधिः सामग्रीविरहेणाप्रत्यक्षघटादावुद्भूतरूपवति वर्तमानत्वेन वक्ष्यमाणलक्षणानाक्रान्तत्वादितस्तदसङ्गतो न दोषायेत्यत आह । महानित्यादि । अत्रापि द्रव्यत्वमात्रस्य हेतुत्वे साध्यविशिष्टसाधनाव्यापकत्वादनित्यसमवेतत्वस्य वक्ष्यमाणलक्षणाक्रान्तता न

स्यादित्यनित्यपदम् । महत्त्वस्येत्यादिद्वयमुक्तस्थलयोर्यथासङ्ख्यमन्वेति । लक्ष्यतां द्रढयितुं वक्ष्यमाणलक्षणक्रान्तस्येति । न्यूनातिरिक्तवृत्तीति । महत्त्वसामानाधिकरण्यस्य गुणत्वादावृत्तेः प्रत्यक्षत्वसामानाधिकरण्यन्यूनवृत्तित्वं शब्दादौ वृत्तेस्तदतिरिक्तवृत्तित्वम् । अनित्यद्रव्यसमवेतत्वसामानाधिकरण्यस्य शब्दादावृत्तेर्महत्त्वसामानाधिकरण्यन्यूनवृत्तित्वं गुणत्वादौ वृत्तेस्तदतिरिक्तवृत्तित्वं बोध्यम् ।

हेतुनिष्ठेति । हेतुतावच्छेदकावच्छिन्ननिष्ठत्वार्थकम् । तेन द्रव्यं जन्यत्वे सति सत्त्वादित्यत्र शुद्धसत्तानिष्ठसाध्यसामानाधिकरण्यावच्छेदकगगनाद्यवच्छिन्नवृत्तिकाभावप्रतियोगित्वेऽपि स्पर्शसामानाधिकरण्यस्य, द्रव्यं गुणान्यत्वे सति सत्त्वादित्यत्र शुद्धसत्तानिष्ठसाध्यसामानाधिकरण्याभावावच्छेदकगुणावच्छिन्नवृत्तिकत्वेऽपि कर्मान्यत्वसामानाधिकरण्यस्य नाव्याप्तिः । तादृशविशेषणस्य चान्यूनवृत्तित्वानुयोगितावच्छेदकतया ऽनतिरिक्तवृत्तित्वप्रतियोगितावच्छेदकतया च न प्रवेशः व्यापकसङ्कोचे प्रयोजनाभावादित्यवधेयम् ।

तन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपान्यूनवृत्तित्वस्य तद्वदन्यावृत्तित्वरूपानतिरिक्तवृत्तित्वस्य च द्रव्यं सत्त्वादित्याद्येकवृत्तिहेतुके कर्मान्यत्वपृथिवीत्वयोः सामानाधिकरण्येऽक्षतत्वात्तयोरतिव्याप्तिमाशङ्कयाह । सत्त्वनिष्ठेति ।

(दी०) सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यस्य च तन्निष्ठकर्मान्यत्वसामानाधिकरण्यमतिरिक्तवृत्ति, गुणे तदभावावच्छेदकावच्छिन्नवृत्तिकत्वात् । पृथिवीत्वादिसामानाधिकरण्यं तु न्यूनवृत्ति, जलादौ तदवच्छेदकावच्छिन्नवृत्त्यभावप्रतियोगित्वात् । साध्यव्यापकानां सद्धेतौ उपाधित्ववारणाय साधनतावच्छेदकाभिन्नेनेति तदनवच्छेद्यार्थकमित्याहुः ।

(गा०) गुणे तदभावावच्छेदकावच्छिन्नवृत्तिकत्वादिति । तथा च तदभावावच्छेदकावच्छिन्नवृत्तिकान्यमेव तदनतिरिक्तवृत्तित्वं वाच्यम्, नोक्तरूपमिति भावः । एतच्च सामानाधिकरण्यस्याव्याप्यवृत्तित्वाभि-

प्रायेण । तदभाववदवृत्तित्वमात्रनिवेशे गुणवत्त्वाद्युपाधेरव्यसङ्ग्रहः । अन्यावच्छेदेन साध्यसामानाधिकरण्याभाववति सत्त्वेऽन्यावच्छेदेन तत्सामानाधिकरण्यसत्त्वादित्यवच्छेदकावच्छिन्नत्वोपादानम् । जलादावित्यादि । तथा च तदवच्छेदकावच्छिन्नवृत्तिकात्यन्ताभावप्रतियोगित्वमेव तदन्यूनवृत्तित्वं न तूक्तरूपमिति भावः । गुणवत्त्वादिसामानाधिकरण्यस्यापि साध्यसामानाधिकरण्यवति सत्त्वेऽन्यावच्छेदेनाभावसत्त्वात्तदवच्छेदकावच्छिन्नवृत्तिकत्वपर्यन्तमभावे विशेषणम् । विशेषणपदस्य समानाधिकरणत्वार्थकत्वे उदक्षरत्वादिकमेवैतत्कल्पेऽस्वरसबीजम् ।

(चि०) अत एव च तत्र साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवम् । व्यभिचारिणि साधने एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयसम्बन्धाभावादवश्यं साध्यसम्बन्धितावच्छेदकमस्ति । तदेव च साधनावच्छिन्नसाध्यव्यापकं साधनाव्यापकं तत्रोपाधिः ।

(दी०) ननु सर्वत्र सोपाधौ सर्वेणोपाधिना साध्यसम्बन्धोऽवच्छिद्यते इति न नियमः । अयं प्रत्यक्षो मूर्त्तत्वादित्यादावुद्भूतरूपवत्त्वादेस्तदसम्भवादित्यत आह । अत एव च तत्रेति । यत एव उद्भूतरूपवत्त्वादेर्न तथात्वसम्भवः, अत एव तत्र तादृशनियमवादिमते इदं लक्षणमिति । साधनाव्यापकत्वमिह साध्याभावविशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वं तादृशसाधनासामानाधिकरण्यमिह पर्यवसितम् । तेनोपदर्शितोद्भूतरूपवत्त्वव्युदासः ।

(गा०) पक्षव्यक्तिविपक्षके सर्वेषामेवोपाधीनां साध्यसम्बन्धितावच्छेदकाविशेषणत्वस्याक्षतत्वात् सर्वत्रेति । वक्ष्यमाणस्थलेऽपि महत्त्वविशिष्टोद्भूतरूपाद्युपाधेस्तथात्वात् सर्वेणेति । अवच्छिद्यते इत्यस्य विशेषणीभूयेत्यादिः । अतो वक्ष्यमाणस्थले उद्भूत-

रूपसामानाधिकरण्यस्यान्यूनवृत्तित्वरूपसाध्यसामानाधिकरण्यावच्छेदकताया अक्षतत्वेऽपि नासङ्गतिः, तथापि साध्यशून्यहेतुमति परमाणौ तत्सत्त्वेन विशेषणत्वासम्भवात् । तदसम्भवात् । स्वावच्छेदकत्वे सति विशेषणत्वासम्भवात् । अत एवेत्यवैतत्पदस्य परामर्शनीयं व्याचष्टे । यत एवेति । एवकारः सम्पातायातः। अत इत्येतत्परामर्शनीयमध्ये ऽवधारणानुपयोगात् । न तथात्व सम्भव इति । तथात्वासम्भवेन । तस्योपाधित्वानुपगमेन । उपाधित्वस्य तथात्वनैयत्यमित्यर्थः । अतो नात इत्यस्य प्रक्रान्तवाचित्वानुपपत्तिः शङ्कानुद्धारो वा । तत्रेत्यस्य व्याख्या तादृशनियमवादिमते इति । लक्षणमित्यन्तस्यानुकरणम् इदं लक्षणमिति ।

उक्तस्य उपाधित्वे लक्षणस्य तद्व्यावृत्ततया लक्षणं सदोषं स्यादित्युद्दम्भसङ्गमनाय लक्षणघटकसाधनाव्यापकत्वदलं तद्व्यावृत्तं निर्वक्ति । साधनेति । असम्भववारणाय साध्याभावविशिष्टेति । तादृशसाधनवन्निष्ठत्वमुद्भूतरूपाभावादेरपीति अभावे व्यापकत्वनिवेशनम् । लाघवायाह । तादृशेति । साध्याभावविशिष्टार्थकम् ।

यद्यप्युपाधिताघटकसम्बन्धेनासामानाधिकरण्यनिवेशाद्भोग्याव्याप्तिमान्मेयत्वादित्यादौ तादृशसाधनाधिकरणजात्यादौ समवायेन वृत्त्यप्रसिद्ध्या समवायेनोपाधेः सत्त्वादेर्न सङ्ग्रहो यथाश्रुते । तथापि तादृशसाधनस्य सामानाधिकरण्यसम्बन्धावच्छिन्नाभावोऽत्र विवक्षित इति न दोषः । साध्यसाधनत्वभेदेनोपाधित्वभेदाद् यादृशसाध्यशून्ययादृशसाधनवति येन सम्बन्धेन वृत्तिरप्रसिद्धा तेन सम्बन्धेन तत्साध्यकतत्साधनकोपाधित्वे एतद्दलानिवेश एव नास्तीति वाऽभिप्रायः । तेन । यथाश्रुतसाधनाव्यापकत्वपरित्यागेन ।

विशेष्यदलस्य तदन्तर्गतसाधनावच्छिन्नत्वविशेषणदलस्य च फलं दर्शयति । अथेत्यादिना ।

(दी०) अथ मन्यक्षो द्रव्यत्वादित्यादौ घटत्वादावतिव्याप्तिः । साध्यव्यापकत्वेन विशेषणे च स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादावव्याप्तिरत उक्तं साधनावच्छिन्नेत्यादि ।

(गा०) उपदर्शितस्थले उद्भूतरूपादीनां व्यभिचारोन्नयनसमर्था-

नामपि यतो ऽनुपाधित्वं तद्बीजप्रदर्शनपरतया व्यभिचारिणीत्यादिग्रन्थस्य प्रकृतोपयोगितां दर्शयति । साध्याभावेति ।

(दी०) साध्याभावसम्बन्धिनि विरुद्धस्य साध्यसम्बन्धस्यावच्छेदकभेदं विनाऽनुपपद्यमानस्यावच्छेदकीभूयोपपादनमुपाधिफलम्, तदसमर्थानां चोपदर्शितोद्भूतरूपत्वत्वादीनां नोपाधिभावः सम्भवतीत्याह । व्यभिचारिणीति । व्यभिचारः सपक्षविपक्षवृत्तित्वम् ।

(गा०) सम्बन्धः । सामानाधिकरण्यम् । विरुद्धस्य । साध्याभावसम्बन्धविरुद्धस्य । विरोधश्चैकावच्छेदेनैकत्रावर्तमानत्वम् । तदसमर्थानामिति । मूर्तत्वादौ साध्यसामानाधिकरण्यानवच्छेदकापर्वावयवच्छेदेनो द्भूतरूपादिसामानाधिकरण्यसत्त्वेनातिप्रसक्ततया न तस्य साध्यसामानाधिकरण्यावच्छेदकत्वमित्याशयः । विपक्षगामित्वरूपव्यभिचारवति विरुद्धे साध्यसम्बन्धाभावेन साध्यसम्बन्धितावच्छेदकस्यावच्छेदकत्वावश्यकत्वासम्भव इत्यतो व्यभिचारिणीत्यत्र व्यभिचारं व्याचष्टे । व्यभिचार इति ।

(चि०) अत एव व्यभिचारे चावश्यमुपाधिरिति सङ्गच्छते । अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारेण न तदनुमानम्, अप्रयोजकत्वात् ।

(दी०) अथ विपक्षगामित्वरूपव्यभिचारोन्नयनमेवोपाधिफलम् । तच्चोद्भूतरूपादीनामप्यस्तीत्यत आह । अत एवेति ।

(गा०) सपक्षगामित्वज्ञानस्यानुमानाविरोधितया तद्घटितव्यभिचारस्योपाधिनानुमानमफलमित्याशयेनाह । विपक्षगामित्वरूपेति । अस्तीति । तत्कुतस्तस्यानुपाधित्वमिति शेषः । आहेत्यस्य व्यभिचारोन्नयनस्योपाधिफलत्वे प्राचीनप्रवादासङ्गतिमित्यादिः । एवं चात एवेति मूलस्य विरोधभञ्जनमात्रस्योपाधिफलत्वादेवेत्यर्थः । अन्यथा । व्यभिचारोन्नयनस्य तत्फलत्वे । व्यभिचारादेव । उपाध्यनुमापकत्वेनाभिमताद्व्यभिचारज्ञानादेव । तत्र । व्यभिचारिणि हेतौ । अगमकत्वे । अननुमापकत्वनिर्वाहे । व्यभिचारेण न तदनुमानम् ।

उपाध्यनुमानम् । उपयुज्यते इति शेषः । अप्रयोजकत्वात् । निष्फलत्वात् । तथा च उपाध्यनुमापकतानिर्वाहकस्य व्यभिचारे उपाधिनियमस्य प्रदर्शनपरोक्तमवादोऽसङ्गतः स्यादेवेति मूलाशय इति दीधित्यनुसारेण मूलव्याख्या ।

गुरुमतोपष्टम्भेनातएवत्रय व्याख्यायाचार्यमतोपष्टम्भेन चतुर्थमतएवेत्यादि व्याचष्टे । यत एवेत्यादिना ।

(चि०) अत एव च तस्य साध्यसम्बन्धितावच्छेदकरूपलक्षणा व्याप्तिः साधनताभिमते चकास्तीति स्फटिके जपाकुसुमवदुपाधिरसावुच्यते । लक्षणं तु साध्यसाधनसम्बन्धव्यापकत्वे सति साधनाव्यापकत्वम् । विषमव्यासस्तु नोपाधिपदवाच्यः । प्रवृत्तिनिमित्ताभावात् । दूषकता च तस्य व्यभिचारोन्नायकतया । न च व्यभिचारोन्नायकत्वमेवोपाधित्वम् । अप्रयोजकसाध्यव्यापकव्यभिचारिणोऽप्युपाधित्वापत्तेरिति ॥

(दी०) यत एव साध्यसम्बन्धितावच्छेदकं रूपं व्याप्तिः, सोपाधौ तु स्वाभाविकं हेतुतावच्छेदकं न साध्यसम्बन्धितावच्छेदकम् । यत एव स्वसमीपवर्तिनि स्वसमानाधिकरणे व्यभिचारिणि हेतौ स्वनिष्ठसाध्यसम्बन्धितावच्छेदकरूपलक्षणव्याप्तिसङ्क्रामकतया साध्यव्याप्यस्यैवोपाधित्वमाचार्यैरनुमन्यते इत्याह । अत एवेति ।

(गा०) स्वाभाविकम् । शुद्धम् । न साध्यसम्बन्धितावच्छेदकमिति । इति न तन्निष्ठव्याप्तिरिति शेषः । स्वसमीपवर्तिनीत्याद्युपपदार्थविवरणम् । स्वनिष्ठेत्यादिकमादधातीत्यर्थः । सङ्क्रामकतया । आरोपजनकतया । साध्यव्याप्यस्यैवेति । विषमव्यापकस्य स्वनिष्ठव्याप्त्यप्रसिद्ध्या उक्तयोगिकप्रवृत्तिनिमित्तानाक्रान्तत्वादिति भावः । एवं च मूले अ-

साविरयस्य समव्याप्त एवेत्यर्थः । सोपाधावपि साधनतावच्छेदकस्य साध्यसम्बन्धितावच्छेदकत्वे तत्रापि उक्तव्याप्तिप्रसक्त्या आरोपानुपपत्त्या उपाधिपदस्य यौगिकत्वानुपपत्तेरुपष्टम्भसङ्गतिः।

यद्यपि शुद्धस्य साधनतावच्छेदकवह्नित्वादेः साध्यसम्बन्धितानवच्छेदकत्वेऽपि विशेषणान्तरावच्छिन्नस्यातथात्वाद्व्यभिचारिण्यपि साधने साध्यसम्बन्धितावच्छेदकरूपलक्षणाव्याप्तिरस्तीति तत्सङ्क्रामकत्वमौपाधेः । न च शुद्धसाधनतावच्छेदके स्वनिष्ठव्याप्यभेदसङ्क्रामकतासम्भवान्नानुपपत्तिः शुद्धवह्नित्वादौ विशिष्टवह्नित्वाद्यवच्छिन्नभेदविरहेऽपि विशेषणान्तर्भावेण वह्नित्वादिपर्याप्तायाः साध्यसम्बन्धितावच्छेदकताया व्यासज्यवृत्तित्वेन तदवच्छिन्नभेदस्य तादृशसाधनतावच्छेदके सत्त्वात्तत्र तादृशावच्छेदकत्वरूपव्याप्तित्वावच्छिन्नाभेदग्रहस्यारोपत्वादिति वाच्यम् । तादृशीं व्याप्तिसङ्क्रामकतामादाय स्फटिके लोहिते जपाकुसुममुपाधिरितिवत् प्रकृते वह्नित्वे धूमव्याप्तावयमुपाधिरित्यस्यैव व्यवहारस्य सम्भवात्, न तु वह्नौ व्याप्येऽयमुपाधिरित्यादेः । एवं येन सम्बन्धेन यत्सम्बन्धिनस्तेन सम्बन्धेनान्यत्रारोपः स एव तत्रोपाधिरिति व्यवह्रियते । स्फटिकादौ जपाधारदेशादिसंयुक्तजपादिरूपलोहितपदार्थाभेदारोपमादाय तथाव्यवहारविरहात् । न च जपाधिकरणदेशे न तादृशारोपजनकत्वं अपि तु जपाया एवेति सम्बन्धैक्यानपेक्षायामपि नैष दोष इति वाच्यम् । एवमपि चक्षुःसंयुक्तजपारूपलोहितपदार्थाभेदारोपमादाय चक्षुषोऽप्युपाधिव्यवहारस्य दुर्वारतया सम्बन्धैक्यस्यापेक्षणीयत्वात् तत् कथमुपाधिभिन्ने तन्निष्ठव्याप्यभेदारोपमादायोपाधिव्यवहार इति । तथापि व्याप्तिबोधकपदसमभिव्याहृतोपाधिपदस्य स्वनिष्ठसाध्यसम्बन्धितावच्छेदकरूपव्याप्तेर्यो स्वभिन्नसमभिव्याहृतपदोपस्थाप्यतावच्छेदकवह्नित्वादिसम्बन्धेन सङ्क्रामकता तत्प्रत्यायकत्वमेव स्वीक्रियते तथाविधसम्बन्धेन च वह्न्यादौ तथाविधव्याप्त्यबाधान्नानुपपत्तिः । तेन सम्बन्धेन तस्या उपाधिनिष्ठत्वविरहेऽपि न क्षतिः । व्याप्तिबोधकसमभिव्याहारस्थले सम्बन्धैक्यस्यानपेक्षितत्वादिति ।

अथ स्फटिकलौहित्यं जपाकुसुममुपाधिरित्यादौ स्वसमीपवर्तिस्फटिकादौ स्वधर्मलौहित्यादिसङ्क्रामकत्वं जपाकुसुमादेः प्रती-

यते तत् कथं उपपाद्यताम् ? विशिष्य लौहित्यस्फटिकाद्यन्तर्भावेण शक्तिकल्पने शक्त्यानन्त्यात्। उपपदार्थे समीपवर्तिनि स्फटिकादेरा-धानघटकस्वधर्मे लौहित्यस्याप्यभेदान्वयबलाच्चादृशप्रतीतिरित्यपि न। समानविभक्तिकपदोपस्थाप्ये एव नामार्थस्याभेदान्वयव्युत्पत्तेः। स्फटिकादेरितरविशेषणतयोपस्थितत्वेन समीपवर्तिनि विशेषणतया अन्वयासम्भवात्। समासघटकविशेषणपदस्य पदान्तरसापेक्षत्वे-ऽसामर्थ्येन समासानुपपत्तेश्च। यत्तु स्वधर्मान्वय्यभेदो लौहित्यादि-पदोत्तरसप्तम्यर्थ इति तदपि न। अभेदे सप्तम्या अननुशिष्टत्वात्। एवं लौहित्यादौ स्फटिकादेरन्वयेऽयोग्यत्वम्, अनन्वये चासामर्थ्येन समासानुपपत्तिः।

अत्राहुः। स्फटिकस्य लौहित्यमिति षष्ठीसमासे स्वविशेष्यता-निरूपितप्रकारतारूपसम्बन्ध एव षष्ठ्यर्थः। ज्ञानसमभिव्याहा-रस्थले ज्ञानविषयितासम्बन्धबोधकत्वस्य षष्ठ्या व्युत्पन्नत्वात्। लौहित्यादिपदोत्तरसप्तम्या निरूपितत्वमर्थः। निरूपकस्याप्या-धारत्वात्, अन्यथा पृथिव्यां रूपगन्धयोः सामानाधिकरण्यमित्या-दौ सप्तम्यनुपपत्तेः। निरूपितत्वस्य चाधानघटकस्वधर्मप्रकारि-तायामन्वयः। निरूपकप्रकारभेदे च प्रकारिताभेदस्यावश्यकत्वात्, स्वधर्मनिरूपितप्रकारिताया लौहित्यादिनिरूपितत्वस्य स्वधर्मलौहि-त्याद्योरभेदनिर्वाह्यतया अर्थतस्तदभेदलाभः, न तु साक्षाच्छब्दतः। सप्तम्यर्थः प्रकारिता तस्याः स्वधर्मप्रकारकभ्रमेऽन्वय इति न साधीयः। स्वधर्मलौहित्ययोर्भेदेऽपि उभयप्रकारकसमूहालम्बन-प्रतीतिसम्भवात्। प्रतीत्यभेदस्य प्रकाराभेदानाक्षेपकत्वात्।

न च स्वधर्मलौहित्ययोरभेदज्ञानं मानसमेव स्वीकार्यम्, तत्र चाऽनुपपत्तेर्नोपयोग इति वाच्यम्। मानसज्ञाने उपस्थितविपरी-तकोटेरपि भानसम्भवेन निर्णयनियमानुपपत्तेः। एवं स्वधर्मप्रतीतौ लौहित्यप्रकारकत्वोपगमे यत्र स्फटिकद्वये एकस्मिन्नेव वा अंशभेदेन जपापराजिताभ्यां लौहित्यनीलिम्नोर्युगपत् सङ्क्रान्तिस्तत्र स्फटि-कलौहित्येऽपराजितोपाधिरिति प्रयोगापत्तेर्दुर्वारत्वाच्च।

न चैवमपि स्फटिकादिसमीपवर्तिनोरभेदाक्षेपकाभावेन त-ल्लाभो दुर्घटः। एवं यत्र स्फटिकव्यक्तौ सिन्दूराद्युपाधिसमवधा-नादेव शुक्लत्वाभावादिभ्रमस्तद्व्यक्तावप्येतदनुफलत्वे जपोपाधिरिति

व्यवहारापत्तिः । जपाया अपि तदंशे प्रकारताश्रयस्ववृत्तिगुरुत्वा-भावस्य अन्यत्र स्वसमीपवर्तिनि सङ्क्रामकत्वादिति वाच्यम् । समीपवर्तिविशेष्यकत्वावच्छिन्नायां स्वधर्मप्रकारितायां स्फटि-कादिरूपविशेष्यनिरूपितप्रकारताविशिष्टलौहित्यादेर्निरूपकत्वेन अ-न्वयोपगमाद् विशेषणीभवन्त्यां प्रकारतायामपि तादृशप्रका-रितानिरूपकत्वलाभात्तद्विशेष्यांशे प्रकारताया एव च तद्विशेष्यक-त्वावच्छिन्नप्रकारितानिरूपकत्वेन अर्थत एव समीपवर्तिनि स्फटि-काद्यभेदलाभात् । लोहितैः स्फटिके जपोपाधिरित्यादौ अभेदेन लोहितसङ्क्रामकत्वं प्रतीयते स्फटिकादिपद लक्षणया स्फटिकादि-विशेष्यकप्रतीतिप्रकारपरम्, तस्य च अभेदेन लोहितादिपदार्थे-ऽन्वय इति दिक् ।

उपाधिपदस्य केवलयौगिकत्वे साध्यन्यूनवृत्तावपि स्वनिष्ठ-व्याप्तिसङ्क्रामकत्वसत्त्वादुपाधिव्यवहारापत्तिरिति शङ्कानिराकर-णपरत्वेन लक्षणं त्वित्यादिमूलं प्रकृते सङ्गमयति । साध्येति ।

(दी०) साध्यन्यूनवृत्तावुपाधिव्यवहार दूषणौपयिकरूप-स्यावश्यं वाच्यतयोपाधिपदस्य योगरूढित्वव्यवस्थापनेन नि-राकुरुते । लक्षणं त्विति । लक्षणम् । लक्षणौपयिकं रूपम् । साध्येति । अत्र साध्यव्यापकत्वमात्रं विवक्षितं तावतैव साधन-वद्वृत्तितद्व्यतिरेकेण साध्यव्यतिरेकानुमानसम्भवात् । साधनवति व्यापकानिवृत्त्या साध्यसाधनसम्बन्धनिवृत्तिसिद्धावर्थात्साध्य-निवृत्तिः सिद्ध्यति इति प्रकारान्तरप्रदर्शनाय परं तथाविधो-क्तिः । रूढ्या न्यूनवृत्तावुपाधित्वव्यवहारं निरस्य योगेनाधिक-वृत्तौ तन्निरस्यति । विषमेति । प्रवृत्तिनिमित्तम् । यौगिकम् । व्यभिचारोन्नायकत्वमेवेत्येवकारेण योगार्थानादरं सूचयति । उपाधित्वम् । उपाधिपदप्रवृत्तिनिमित्तम् । उपाधिता । उपाधि-पदवाच्यता । योगादरे तु लाघवात्साध्यव्यापकतामात्रे रू-ढिरिति भावः ॥

इति व्याप्तिवादः समाप्तः ॥

(गा०) वाच्यतया । रूढ्यर्थतावच्छेदकतया । विषमव्याप्तेऽतिप्रसक्त्या नास्य लक्षणत्वमिति लक्षणपदं व्याचष्टे । लक्षणमिति । सम्बन्धव्यापकत्वपर्यन्तं साध्यव्यभिचारानुमापकतायामनुपयुक्तमिति तस्याविवक्षितत्वमाह । अत्रेति । ननु तस्याविवक्षायां तदभिधानमयुक्तमत आह । साधनवतीति । प्रकारान्तरप्रदर्शनाय । व्यभिचारानुमानसम्भवप्रदर्शनाय । योगेन । अवयवार्थान्वयेन । अधिकवृत्तावपि दूषणौपयिकरूपात्मकप्रवृत्तिनिमित्तसत्त्वात् प्रवृत्तिनिमित्ताभावादित्यसङ्गतमत आह । प्रवृत्तिनिमित्तमिति । यौगिकम् । योगलभ्यतावच्छेदकम् । व्यभिचारोन्नायकत्वमेवेत्येवकारस्यैकरूपे रूढ्यर्थतावच्छेदकत्वव्यवच्छेदमात्रपरत्वेऽप्रयोजकत्वाद्युपाधिव्यवहारापादनमसङ्गतं स्यात् तत्र योगलभ्यस्वनिष्ठव्याप्तिसङ्क्रामकत्वाभावादित्यतश्च स्वनिष्ठव्याप्तिसङ्क्रामकत्वस्य प्रवृत्तिनिमित्तत्वव्यवच्छेदपरतापि तस्येत्याह । व्यभिचारोन्नायकत्वमेवेतीति । उपाधित्वमित्यस्यार्थो यदि व्यभिचारोन्नायकत्वं तदा अभेदेन व्यभिचारोन्नायकत्वे तदन्वयानुपपत्तिरतो व्याचष्टे । उपाधित्वमिति । उपाधितापत्तेरित्यत्र उपाधिता यदि व्यभिचारोन्नायकता तदेष्टापत्तिरतो व्याचष्टे । उपाधितेति ।

नन्वेतदतिप्रसङ्गवारणाय योगादरोऽप्यस्तु रूढिस्तु व्यभिचारोन्नायकताविशिष्टे पचास्तामत आह । योगादरे इति । लाघवादित्यस्य व्यभिचारोन्नायकतापेक्षयेत्यादिः । साध्यव्यापकतामात्रे इति । मात्रपदेन दूषणौपयिकरूपान्तर्गतसाधनाव्यापकत्वांशव्यवच्छेदः । व्यभिचारिसाधनव्यापकस्य साध्याव्याप्यत्वनियमेन स्वनिष्ठव्याप्तिसङ्क्रामकत्वाभावादेवानतिप्रसङ्गादिति ।

इति अनुमानगादाधर्यामत पचचतुष्टयप्रकरणम् ॥

इति व्याप्तिवादः समाप्तः ॥

अथ व्याप्तिग्रहोपायप्रकरणम् ॥

(चि०) सेयं व्याप्तिर्न भूयोदर्शनगम्या, दर्शनानां प्रत्येकमहेतुत्वात्, आशुविनाशिनां क्रमिकाणां मेलकाभावात्।

(दी०) व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्वकं स्वमतेन तद्ग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति। सेयमित्यादिना। दर्शनानां प्रत्येकं वा हेतुत्वं मिलितानां वा? मिलनमपि स्वरूपतो व्यापारतो वा? आद्ये दर्शनानामिति। द्वितीये आशिवति। क्रमिकाणामपि स्थिराणामस्थिराणामपि सहोत्पन्नानां मिलनमस्तीत्युभयमुपात्तम्।

(गा०) उपायाभावाद्व्याप्तिनिश्चयासम्भवेनानुमानप्रामाण्यं न सम्भवतीति चार्वाकपूर्वपक्षे भूयःसाध्यसाधनसहचारदर्शनं व्याप्तिग्राहकमिति जरन्नैयायिकसिद्धान्तः। व्याप्तिर्न भूयोदर्शनगम्या, अपि तु सकृद्दर्शनगम्येति तु प्राभाकरमतं तदेव मतमादावुपन्यस्तं मूले सेयमित्यादिना। तत्र प्रथमं साध्यसाधनसम्बन्धग्राहकातिरिक्तानपेक्षग्रहकत्वरूपस्य सकृद्दर्शनगम्यत्वसाधकहेतोः सिद्ध्यर्थं भूयोदर्शनस्य व्याप्तिग्राहकतानिराकरणम्।

यद्यपि व्याप्तिस्वरूपस्य मेयत्वादिना ज्ञाने न भूयोदर्शनापेक्षा, अपि तु व्याप्तित्वेन तज्ज्ञाने एव। तथा च तेन रूपेण ज्ञाने तदपेक्षायामपि उपाध्यभावरूपव्याप्तेरधिकरणादिरूपतामुपगम्याधिकरणतावच्छेदकादिरूपेण सकृद्दर्शनग्राह्यत्वे व्यवस्थापनीये न किञ्चिद्बाधकमिति भूयोदर्शनस्य व्याप्तिग्राहकताखण्डनमनुपयुक्तम्।

न च परमतनिराकरणायैव तत्खण्डनं न तु सकृद्दर्शनग्राह्यत्वसाधकहेतोः परिशेषस्य सिद्ध्यर्थमिति वाच्यम्। तथा सति भूयोदर्शनादीनां व्याप्तिग्राहकतां निराकृत्य तस्मात्परिशेषेणेत्याद्यु-

भूयोदर्शनगम्यत्वं च भूयःसहचारदर्शनापेक्षग्रहकत्वम् । एवं तर्काद्यपेक्षग्रहकत्वमप्यग्रे निराकरणीयमिति साध्यसाधनसम्बन्धग्राहकातिरिक्तयावद्विशेषापेक्षग्रहकत्वाभावकूटसिद्ध्या तदतिरिक्तापेक्षग्रहकत्वसामान्याभावरूपपरिशेषसिद्धः । तदपेक्षग्रहकत्वं च तदभावप्रयोज्यस्वग्रहत्वावच्छिन्नाभावकत्वम् । विशिष्टबुद्धौ विशेषणज्ञानहेतुताया गुरुणानङ्गीकारेऽपि सहचारविशिष्टवैशिष्ट्यबोधे सहचाररूपविशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुतायास्तेनोपगमात् तादृशवैशिष्ट्ये एव तत्प्रसिद्धिः । तद्ग्रहे च भूयस्त्वविशिष्टसहचारदर्शनत्वेनाहेतुत्वेऽपि तद्ग्रहजनकतावच्छेदकसहचारप्रकारकज्ञानत्वावच्छिन्नप्रतियोगिताकस्य भूयःसहचारदर्शनप्रतियोगिकाभावस्य तद्ग्रहत्वावच्छिन्नाभावप्रयोजकत्वात् । व्याप्तिविशिष्टवैशिष्ट्यबोधस्य सहचारविशिष्टवैशिष्ट्यबोधतया तत्र सहचारप्रकारकज्ञानहेतुत्वेऽपि तद्विशिष्टवैशिष्ट्यबोधानात्मकतद्ग्रहसाधारणग्रहत्वावच्छिन्नाभावो न सहचारज्ञानविरहप्रयुक्त इति नाभावसाधने बाधः ।

यदि च विशेषसामग्र्यभावकूटस्य सामान्यकार्याभावप्रयोजकतया व्याप्तिविशिष्टवैशिष्ट्यबोधसामग्र्यभावकूटस्यापि व्याप्तिग्रहत्वरूपसामान्यधर्मावच्छिन्नाभावप्रयोजकत्वं सम्भाव्यते तदा व्याप्यवृत्तिधर्मानवच्छिन्नप्रयोजकत्वं निवेशनीयम् । हेतुमुख्यविशेष्यकव्याप्तिग्रहरूपविशेषसामग्र्यभावसंवलितस्यैव व्याप्तिविशिष्टवैशिष्ट्यबोधसामग्र्यभावस्य व्याप्तिग्रहत्वरूपसामान्यधर्मावच्छिन्नाभावप्रयोजकतया नोक्तदोषः । व्यापकधर्मावच्छिन्नसामग्र्यभावस्य व्याप्यधर्मावच्छिन्नाभावप्रयोजकतया व्यापकताग्रहत्वस्य भूयोदर्शनजन्यतावच्छेदकत्ववादिनां भूयोदर्शनाभावस्य व्याप्तिग्रहत्वावच्छिन्नाभावप्रयोजकत्वमक्षतमेवेति न सिद्धसाधनावकाशः । सहचारविषयकसमूहालम्बनरूपहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वज्ञानस्य प्रतियोगिज्ञानमुद्रया विशेषणतावच्छेदकप्रकारकज्ञानमुद्रया वा व्यापकताग्राहकस्य यत्तादृशावच्छेदकत्वज्ञानत्वेन रूपेणाभावस्तस्य व्याप्तिग्रहत्वावच्छिन्नाभावप्रयोजकतया बाधवारणाय सहचारज्ञानमात्रप्रतियोगिकोऽभावो निवेशनीयः ।

अथ यदि विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानहेतुतापि न गुरुसिद्धान्तस्तदा तन्मते निरुक्तभूयोदर्शनापेक्षग्रहकत्वाप्रसिद्धिः ।

न च सहचारविषयकत्वनियतव्याप्तिज्ञाननिष्ठकारणताकानुमितिविषयसाध्यवत्पक्षादौ तत्प्रसिद्धिसौलभ्यम् । व्याप्तिज्ञानाभावस्य साध्यवत्पक्षविषयकानुमितित्वावच्छिन्नाभावं प्रत्येव प्रयोजकतया तस्य प्रत्यक्षसाधारणतद्विषयकग्रहत्वावच्छिन्नाभावेऽवश्यं विवक्षणीये तत्प्रत्यक्षत्वावच्छिन्नाभावे वा प्रयोजकत्वादिति चेत् ? तर्हि भूयःसम्बन्धग्रहानपेक्षग्रहकत्वमेव तैः समर्थनीयं न तु तदपेक्षग्रहकत्वाभावः, तदनपेक्षग्रहकत्वं च तदभावाप्रयोज्यस्वग्रहत्वावच्छिन्नाभावकत्वम् । सहचारग्रहाभावप्रयोज्यत्वप्रसिद्धिरनुमित्यभावे एव सुलभा, परिशेषेऽपि साध्यसाधनसम्बन्धग्राहकातिरिक्तसामान्यानपेक्षग्रहकत्वरूप एवोक्तरीत्या निर्वाच्यः ।

एतेन सामानाधिकरण्यविशिष्टवैशिष्ट्यबोधे सामानाधिकरण्यप्रकारकज्ञानहेतुतायाः उभयसिद्धत्वेऽपि प्रमेयत्वेन तद्विशिष्टवैशिष्ट्यग्रहे सहचारग्रहस्याहेतुतया सहचारविशिष्टवैशिष्ट्येऽपि सहचारग्रहाभावप्रयोज्यस्वग्रहत्वावच्छिन्नाभावकत्वाप्रसिद्धिरित्यनुपपत्तिरपि समाहिता ।

यद्यपि व्यापकसामानाधिकरण्यरूपमणिकाराभिमतव्याप्तेरपि केवलसाध्यसामानाधिकरण्यत्वादिना ग्रहे भूयोदर्शनापेक्षा नास्तीति निरुक्तभूयोदर्शनाग्राह्यत्वं तत्र सिद्धमेव तथापि तन्मतेऽनौपाधिकत्वमेतन्मते व्यापकत्वं येनानतिप्रसक्तरूपेण सङ्ग्रहीतुं शक्यते तादृशस्य पक्षतावच्छेदकत्वान्न दोषः ।

न च व्यापकताया अन्यभावत्वादिमात्रेण ग्रहे सहचारदर्शनापेक्षाविरहेण सिद्धसाधनं दुर्वारमेवेति वाच्यम् । निरुक्तभूयोदर्शनाग्राह्यत्वे लौकिकग्रहस्यैव प्रवेशनीयत्वात् नैयायिकैर्व्यापकतारूपाभावस्य केनापि रूपेण लौकिकज्ञानस्य विना भूयोदर्शनमनभ्युपगमात् ।

न च तर्हि न्यायमते व्यापकताया योग्यानुपलब्ध्यभावेनातीन्द्रियतया लौकिकप्रत्यक्षगम्यत्वमात्रसाधनेनैव नैयायिकमतस्य चार्वाकमतस्य च निराकरणात्सहृद्दर्शनगम्यत्वतत्साधकभूयोदर्श-

नाग्राह्यत्वसाधनमनुपयुक्तमिति वाच्यम् । प्राचीनैर्व्यापकताया अपि लौकिकप्रत्यक्षोपगमाद् दीधितिकृतैव च तदतीन्द्रियतायाः स्वीकाराद् भूयोदर्शनादेव तल्लौकिकप्रत्यक्षमस्त्विति अर्थान्तरस्य लौकिकप्रत्यक्षगम्यत्वमात्रसाधने दुर्वारत्वाच्च ।

व्याप्तिग्रहोपाये प्राभाकरमतस्य प्रथमोपन्यासबीजं सङ्गतिं सूचयन् प्रदर्शयति । व्याप्तीति । निरूप्येति । तथा च व्याप्तिनिरूपणस्य सिद्धतया प्रतिबन्धिकाया व्याप्तेरज्ञात्वा तद्ग्रहोपायज्ञानासम्भवेन प्रथममुत्पन्नायास्तत्स्वरूपजिज्ञासाया विगमादवसर एव सङ्गतिरिति भावः । परमतेति । तथा च स्वानभिमतनिराकरणस्याप्युद्देश्यतया प्राचीननैयायिकाभिमतां भूयोदर्शनस्य व्याप्तिग्राहकतां निराकुर्वाणस्य गुरोर्मतमुपन्यस्य तद्व्यवस्थापिताया व्याप्तेः सकृद्दर्शनगम्यताया निराकरणेन स्वानभिमतमुभयमेव निराकृतं भवतीति गुरुमतमाश्रित्य प्रथमं प्राचीननैयायिकमतनिराकरणमारब्धमिति भावः । व्याप्तिग्रहाभावस्य भूयोदर्शनाभावप्रयोज्यता नैव सम्भवति यदि सहचारदर्शनं व्याप्तिग्रहजनकं भवेत् तदकारणविरहस्य तदभावाप्रयोजकत्वादतः सहचारदर्शनस्य व्याप्तिग्रहजनकत्वं परमतमवलम्ब्य मूलकारो निराचकार दर्शनानामित्यादिना । तत्र नैयायिकानुमतदर्शनानां दर्शनान्तरनैरपेक्ष्येण फलानुत्पादकत्वमभिधायान्वयव्यभिचारात्सहचारदर्शनहेतुता न सम्भवतीति प्रथममभिदधौ ।

न चान्वयव्यभिचारस्य कारणताघटककार्यनिष्ठकारणव्याप्त्यविघटकतया न कारणताविघटकत्वमिति वाच्यम् । सहचारदर्शनसत्त्वेऽपि फलानुत्पादेन तत्प्रयोजकाभावप्रतियोगिकारणान्तरमवश्यमङ्गीकार्यम् । तथा सति तेनैव सहचारदर्शनान्यथासिद्धिरित्याशयात् ।

दर्शनानां भूयस्त्वेन कारणतापक्षे एकैकदर्शनस्य फलानुपधायकत्वमकिञ्चित्करम् । कारणतावच्छेदकावच्छिन्नसमवधानदशायां फलानुत्पाद एवान्वयव्यभिचारात् । सहचारदर्शनत्वेन हेतुनामते च दर्शनानां मिलनासम्भवोऽकिञ्चित्करः । व्याप्तिग्रहपूर्वं तदवच्छिन्नस्य यत्किञ्चिद्दर्शनस्य सत्त्वे एव व्यतिरेकव्यभिचारानवकाशादतो दोषद्वयसङ्गमनाय वितर्कयति । दर्शनानामिति । प्रत्येकं हेतुत्वम् । एकैकस्यैव फलोत्पादप्रयोजकत्वम् । मिलितानां

या हेतुत्वम्।युगपत्प्रत्यासत्त्या फलोत्पादप्रयोजकत्वम्। व्यापारद्वारा मिलनस्य प्रयोजकत्वे वक्ष्यमाणमिलनासम्भवस्याकिञ्चित्करत्वात्तादृशदोषसङ्क्रमणाय मिलनं वितर्कयति। मिलनमपीति। स्वरूपतो मिलनम्। कालिकप्रत्यासत्त्या एकक्षणवृत्तित्वम्। व्यापारतो मिलनम्। व्यापारप्रत्यासत्त्या तथात्वम्, एकक्षणावस्थायिव्यापारकत्वमिति यावत्।

एतेन पक्षत्रयमाशङ्कितं वेदितव्यम्। तत्र प्रथमपक्षनिराकरणे सहचारदर्शनत्वस्य कारणतावच्छेदकत्वखण्डनम्, द्वितीयपक्षनिराकरणे भूयोदर्शनत्वस्य साक्षात्कारणतावच्छेदकत्वखण्डनम्। तृतीयमतखण्डनेन तस्य व्यापारद्वारा कारणताया अवच्छेदकताखण्डनं पर्यवस्यतीति भूयोदर्शनस्य व्याप्तिग्राहकत्वाभावे साध्ये व्याप्तिग्राहकतावच्छेदकरूपाभावरूपहेतुर्लभ्यते इति ध्येयम्। आद्ये इति। दर्शनानामितिपक्षे दोषमाहेति शेषः। एवमुत्तरत्रापि। मूलार्थः, एकैकदर्शनस्य फलानुपहितत्वात्प्रथमदर्शनादिसत्त्वेऽपि फलानुत्पादादिति यावत्। द्वितीये इति। एवं च मेलकाभावादिति मूलस्य स्वरूपतो मिलनासम्भवादित्यर्थः। तथा च स्वरूपतो मिलनस्य फलोपधानाप्रयोजकत्वे व्यासज्यवृत्तिना भूयस्त्वेन न साक्षात्कारणतासम्भवः। फलोपधानप्रयोजकसामग्रीघटकतावच्छेदकस्यैव स्वरूपतो योग्यतावच्छेदकत्वात्। स्थिराणाम्। क्षणत्रयान्यूनवृत्तीनाम्। अस्थिराणाम्। तृतीयक्षणवृत्तिध्वंसप्रतियोगिनाम्। उभयमेवाशुविनाशित्वकमोत्पन्नत्वरूपविशेषणद्वयं मिलनासम्भवप्रयोजकतयोक्तम्।

न्यूनताभङ्गाय व्यापारतो मिलनस्य फलोत्पादप्रयोजकतापक्षनिराकरणपरतया न चेत्यादिग्रन्थं व्याचष्टे। तृतीयमिति।

(चि०) न च तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकृता व्याप्तिधीहेतवः। प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादिति वाच्यम्। समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारो हेतुरनः कथं संस्कारेण व्याप्तिज्ञानं जन्येत। अन्यथा अतिप्रसङ्गः।

(दी०) तृतीयमाशङ्क्य निराकुरुते । न चेति । व्यापकसाध्यसामानाधिकरण्याप्तिरूपायां व्याप्तौ साध्यसामानाधिकरण्यांशस्य प्रथममेव गृहीतत्वादगृहीतव्यापकत्वांशग्रहे सहचारदर्शनजन्यसंस्काराणां हेतुत्वं वाच्यं तच्च न सम्भवति भिन्नविषयकत्वादित्याह । समानेति । भ्रमस्त्वगृहीतभेदं ज्ञानद्वयं न तु वैशिष्ट्यावगाहीति भावः ।

(गा०) तथा च भूयोदर्शनजसंस्कारस्यापि हेतुत्वकथनं मूले संस्कारद्वारा भूयोदर्शनस्य हेतुतालाभायैव । एवं च भूयोदर्शनस्य व्याप्तिग्राहकताप्रवादस्याप्यभङ्ग इति भावः । व्याप्तिप्रत्यक्षे एव भूयोदर्शनं हेतुरिति लाभाय इन्द्रियसहकृतेति । प्रत्यक्षात्मकज्ञाने संस्कारो न हेतुरिति नियमखण्डनाय प्रत्यभिज्ञायामिति । समानविषयकमेव ज्ञानं संस्कारजन्यमिति नियमाद्भिन्नविषयकव्याप्तिज्ञानं प्रति सहचारविषयकसंस्कारस्य हेतुत्वं न सम्भवतीति समानविषयक इति मूलार्थः । तत्र च यदि संस्कारजन्यज्ञानमवश्यं स्वजनकसंस्कारविषयाविषयकमिति कथितनियमार्थस्तदा प्रत्यभिज्ञाजनकसंस्काराविषयेदन्त्वस्य प्रत्यभिज्ञाविषयतया व्यभिचारात् ।

न चोपनीतभानानङ्गीकर्तृगुरोस्तत्तास्मरणेदन्त्वविशिष्टानुभवरूपज्ञानद्वयमेव प्रत्यभिज्ञा, न तु विशिष्टविषयकं ज्ञानं तत्र चानुभवस्य संस्काराजन्यत्वात् स्मरणस्य च संस्कारविषयमात्रविषयकत्वान्न व्यभिचारावकाश इति वाच्यम् । प्रत्यभिज्ञायाः स्थैर्यसाधकत्वान्यथानुपपत्त्या विशिष्टज्ञानत्वमभ्युपेत्यैवैतल्लिखनात् । अन्यथा समानविषयके स्मरणे इत्यनेनैव गतार्थत्वात्प्रत्यभिज्ञायां संस्कारहेतुतायाः पृथक्कथनासङ्गतेः ।

यदि च संस्कारजन्यं ज्ञानं स्वजनकसंस्कारविषयाविषयकं तादृशसंस्कारविषयविशेष्यकं वा नियमार्थस्तदा हेतुधर्मिकसहचारप्रकारकसंस्काराद्व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानं हेतुविशेष्यकं व्याप्तिविशेष्यकं वा भवतु उभयथापि तादृशसंस्कारविषयविशेष्यकमेवेति कथं तादृशनियमबलात्तथाविधसंस्कारस्य

व्याप्तिग्राहकताप्रतिक्षेपसङ्गतिरित्यतः संस्कारेऽपगीततत्साविशिष्टस्य प्रत्यभिज्ञाने मुख्यविशेष्यतैव न तु तद्विषयांशे क्वचित् प्रकारता-पीति संस्कारजन्यं यज्ज्ञानं तत् स्वजनकसंस्कारविषयमुख्यविशेष्य-कमेवेति नियमाभिप्रायकतया मूलं सङ्गमयितुं व्याचष्टे । व्याप-केति । प्रथममेव गृहीतत्वात् । तादृशसंस्कारं विनैव गृहीत-त्वात् । व्यापकत्वांशस्य ग्रहे इत्यवधारणार्थः । तथा च साध्यधर्मि-कव्यापकताग्रहत्वमेव तादृशसंस्कारजन्यतावच्छेदकं न तु हेतुध-र्मिकव्याप्तिग्रहत्वम्, तथा च सति तादृशसंस्कारं विना व्यापकता-ग्रहस्य दुर्वारत्वात्, तादृशसंस्कारं विना केवलव्यापकताग्रहोऽ-निष्ट एव तदानीं व्यापकता न गृह्यते इत्यस्यैव तद्घटिताया व्या-प्तेर्ग्रहे बीजत्वात् तद्घितरांशस्य तदानीमपि ग्रहादिति भावः । तत्र । तद्रूपावच्छिन्नहेतुत्वं च । भिन्नविषयकत्वात् । तद्रूपा-क्रान्तस्य व्यापकताविशेष्यकप्रत्यक्षस्य भिन्नमात्रविषयकत्वात् । तादृशसंस्कारविषयाविशेष्यकत्वादिति यावत् ।

न च व्यापकताप्रकारकप्रत्यक्षत्वस्य जन्यतावच्छेदकत्वाद्व्यापक-ताप्रकारकज्ञानस्य च तादृशसंस्कारविषयसाध्यविशेष्यकत्वान्न ताद-शसंस्कारस्य व्यापकताग्राहकनामतेऽपि नियमानुपपत्तिः । संस्कार-जन्यज्ञाने तादृशमुख्यविशेष्यविशेष्यकत्वनियमस्य घटवद्भूतलादि-विषयकसंस्कारेणापि भूतलाद्यनुद्बोधकदशायां घटादिमुख्यविशे-ष्यकस्मरणजननेन कल्पयितुमशक्यत्वात् । साध्यमुख्यविशेष्य-कसाधनसहचारज्ञानजन्यतादृशसंस्कारस्य व्यापकताग्राहकत्वोप-गमेनापि तत्र तादृशनियमस्य सत्त्वाचेति वाच्यम् । साध्यव्या-पकताविशेष्यकप्रत्यक्षस्य सकृद्दर्शनादितो धारणानुरोधात्तद्विशे-ष्यकतत्प्रकारकप्रत्यक्षसाधारणधर्मस्यैव जन्यतावच्छेदकत्वध्रौ-व्यमित्याशयात् ।

रजतादिगोचरसंस्कारजन्यस्य शुक्त्यादौ रजतादिभ्रमस्य ता-दृशसंस्कारविषयविशेष्यकत्वाभावादुक्तनियमे व्यभिचार इत्या-शङ्कां निराकरोति । भ्रमस्त्विति । अगृहीतभेदम् । भेदाग्रह-सहितम् । ज्ञानद्वयम् । रजतादिस्मरणशुक्त्याद्यनुभवरूपम् । तै-रन्यथाख्यात्यनभ्युपगमादिति भावः । एव च तत्र शुक्त्याद्यनुभव-स्य संस्काराजन्यत्वात्संस्कारजन्यरजतादिस्मरणे च संस्काराधि-

पयरजतादिविशेष्यकत्वसत्त्वात्तोक्तानुपपत्तिरित्यभिप्रायः ।

अथ संस्काराणां स्वाविषयपदार्थविषयताघटितधर्मावच्छिन्नजन्यत्वानिरूपकत्वनियमेऽपि व्याप्तिग्रहत्वस्यापि भूयोदर्शनजसंस्कारजन्यतावच्छेदकत्वं न सम्भवति व्याप्तिविषयतानिवेशात्, तादृशसंस्काराविषयव्यापकत्वविषयताया अपि तज्जन्यतावच्छेदकगर्भे निवेशादतस्तादृशनियमपरतया यथाश्रुतस्य सङ्गतेर्भूयोदर्शनजन्यसंस्कारस्य व्याप्तिग्राहकतावादिमते व्यापकताग्रहत्वस्य तज्जन्यतावच्छेदकताया आवश्यकत्वं व्यवस्थाप्य तदसम्भवपरतया मूलव्याख्यानमनुचितम् । एवं भ्रमस्य विशिष्टज्ञानत्वेऽपि रजतादिभ्रमनिरूपितशुक्त्यादिविषयताया रजतादिगोचरसंस्कारजन्यतावच्छेदकाघटकत्वादुक्तनियमस्याव्याहतत्वादन्यथाख्यातिप्रतिक्षेपोऽप्यनुपयुक्त इति चेन्न । संस्कारस्य व्याप्तिग्राहकतामते व्यापकताग्रहत्वस्योक्तयुक्त्या तज्जन्यतावच्छेदकत्वं वास्तवम् । एवं भ्रमस्य ज्ञानद्वयात्मकत्वमपि गुरुमते तथेति तदभिप्रायेण यथाश्रुतनियमपरतयैवोपपत्तेरीदृशनियमपर्यन्तपरताया मूलस्यायुक्तत्वात् ।

केचित्तु संस्कारस्य तदंशे तद्धर्मवैशिष्ट्यावगाहित्व एव तदंशे तद्धर्मभासकत्वनियमो गुरूणामभिमतः । अत एव तेषां न पक्षधर्मादौ व्याप्तिज्ञानसम्भव इति ज्ञानद्वयस्यानुमितिहेतुता । तादृशस्य च नियमस्यान्यथाख्यातिवादिनां मते ऽसम्भवदुक्तिकतेत्यन्यथाख्यात्यनभ्युपगमस्य स्फुटीकरणम् । सहचारदर्शनजन्यसंस्कारस्य व्याप्तिघटकसहचारमात्रग्राहकत्वे तादृशनियमाविरोधाद् व्यापकतांशग्राहकत्वं तस्य प्रागुपदर्शितमित्याहुः । तच्चिन्त्यम् । संस्कारस्य स्वाविषयभानाप्रयोजकत्वनियमेनैव प्रकृतोपपत्तेर्धर्मिघटितोक्तनियमे व्यभिचाराशङ्कया भ्रमस्थित्वत्यादिनियमस्य कथनायुक्तत्वात् ।

(चि०) किं च सम्बन्धभूयोदर्शनं भूयःसु स्थालेषु दर्शनं भूयसां वा दर्शनं भूयांसि वा दर्शनानि न तथा ? एकत्र रूपरसयोर्द्रव्यत्वघटत्वयोश्च व्याप्तिग्रहात् । एकत्रैव धारावाहिके तद्वीप्रसङ्गात्, भूयस्त्वस्य त्रिचतुरादित्वेनाननुगमाच्च । अपि च पार्थि-

धत्वलौहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात्। तर्कसहकृतं तथेति चेत्? तर्हि सहचारदर्शनव्यभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु आवश्यकत्वात्, किं भूयोदर्शनेन? न च तेन विना तर्क एव नावतरति। प्रथमदर्शने व्युत्पन्नस्य तर्कसम्भवात्।

(दी०) न तथा। न व्याप्तिग्राहकम्। व्यभिचारादर्शनं व्यापारतया सहकारीति व्यभिचारादर्शनसहचारदर्शनसहकृतस्तर्क एव व्याप्तिग्राहकः। भूयोदर्शनं तु क्वचित् तर्कप्रवृत्तावुपयुज्यते इति निर्गलितम्

(गा०) न तथेत्यस्य न भूयोदर्शनपदार्थ इत्यर्थकत्वं न सम्भवतीति व्याप्तिग्राहकत्वाभावार्थकतया व्याचष्टे। न तथेति। तथा च भूयोधिकरणनिरूपितसाध्यसाधनसहचारदर्शनरूपो भूय साध्यसाधनसहचारदर्शनरूपः साध्यसाधनसहचारविषयकभूयोदर्शनरूपो वा सम्बन्धभूयोदर्शनपदार्थो न व्याप्तिग्राहक इति किं चेत्यादिमूलार्थः।

ननु व्यभिचारादर्शनस्य हेतुत्वेनान्यथासिद्धतया व्यभिचारज्ञानविरोधिनस्तर्कस्यान्यथासिद्धिरिति भूयोदर्शनसहकृतस्य तर्कस्य व्याप्तिग्राहकत्वापादनासङ्गतिरित्यत आह। व्यभिचारादर्शनमिति। व्यापारतयेति। तत्प्रयोज्यत्वे सति तज्जन्यजनकत्वमेव तद्व्यापारत्वम्। प्रयोज्यत्वं च प्रतिबन्धकसत्त्वात्कार्याभाव इति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषो नित्यस्यापि व्यभिचारज्ञानाभावस्येति तस्य तर्कव्यापारतेति। तेन तर्को नान्यथासिद्धो व्यापारेण व्यापारिणस्तथात्वाभावादिति भावः।

न च तर्कस्य हेतुत्वे साक्षादपि तस्य तथात्वसम्भवेन किं व्यभिचारज्ञानाभावस्य तद्व्यापारतया? न हि तर्कस्य हेतुत्वे व्याप्तिप्रत्यक्षे संशयसाधारणव्यभिचारज्ञानप्रतिबन्धकतायां किमपि प्रमाणमस्तीति वाच्यम्। तर्काद् व्यभिचारज्ञाननिवृत्तौ सत्यां तर्कविनाशेऽपि व्याप्तिग्रह इति तदाशयात्।

ननु भूयोदर्शननिरपेक्षतर्कस्य व्याप्तिग्राहकत्वे भूयोदर्शनस्य व्याप्तिग्राहकताप्रवादव्याघात इति कथं न चैवमेवास्त्वित्यादिनेष्टापत्त्याशङ्क्यत आह । व्यभिचारादर्शनेति । क्वचित्तर्कप्रवृत्ताविति । तत्र प्रथमद्वितीयदर्शनदशायां धूमे वह्निसमवहिताजन्यत्वं न गृहीतं अपि तु भूयोदर्शनोत्तरमेव तत्र भूयोदर्शनात् कार्यकारणभावनिश्चयेन व्याप्तिग्राहकतर्कप्रवृत्तेरिति भावः । तथा च भूयोदर्शनस्य व्याप्तिग्राहकताप्रवादः क्वाचित्कव्याप्तिग्रहोपयोगितापर इति तस्य व्याप्तिग्रहकारणत्वविरहेऽपि न नैयायिकानां स्वमतपरित्याग इति भावः ।

(चि०) न चैवमेवास्तु । तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानात् । जातमात्रस्य प्रवृत्तिनिवृत्तिहेत्वनुमितिजनकव्याप्तिज्ञानं तर्कं विनैवातो नानवस्थेति चेत् ? तर्हि व्यभिचारात् सोऽपि न व्याप्तिग्रहे हेतुः। न चैतद्द्वावन्तरजातिरस्ति । सामान्यप्रत्यासत्त्या सर्वोपसंहारादविनाभावग्रहः सामान्यरूपता च न सकृद्दर्शनगम्येति भूयोदर्शनापेक्षेति चेन्न । सामान्यस्य हि प्रत्यासत्तित्वं लाघवान्न तु सामान्यतया ज्ञातस्य, तदनभ्युपगमाच्च । न च काकतालीयत्वादिशङ्काव्युदासार्थं द्वितीयादिदर्शनापेक्षेति वाच्यम् । द्वितीयादिदर्शनेऽपि शङ्कातादवस्थ्यात् । न त्वनौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुः । तद्देशकालतत्रावस्थितघटादीनामुपाधित्वशङ्कानिरासः कस्यचित् साधनव्यापकत्वज्ञानेन कस्यचित् साध्याव्यापकत्वज्ञानेन स्यात्, तच्च भूयोदर्शनं विना नावतरतीति चेन्न । अयोग्योपाधिव्यतिरेकस्यानुमानाधीनज्ञानत्वेनानवस्थापातात् ।

(दी०) नैयायिकमतमाशङ्क्य निराचष्टे । न चैवमिति ।

जातमात्रस्येति । तथा च तन्मूलको व्याप्त्यन्तरग्राहकतर्कावतार इति भावः । तर्हीति । न च व्याप्तिप्रत्यक्षं प्रति तर्को हेतुस्तत्तु स्मरणमिति न व्यभिचारावकाशः, विनानुभवं स्मरणस्यायोगात् । न च जन्मान्तरीणः सः । जन्मान्तरेऽपि पर्यनुयोगतादवस्थ्यात् । अनादित्वेन च परिहारः परतो विचारयिष्यते । न चेति । मानाभावात्, तर्कस्य च हेतुत्वासिद्धेः । यदि चागृहीतस्यागृहीतपुरोवर्तिसंसर्गस्य वा प्रत्यासत्तित्वेऽतिप्रसङ्गस्तदा पुरोवर्तिनि तद्ग्रहो मृग्यतां न तु सामान्यत्वेनेत्याह । न त्विति ।

(गा०) ननु जातमात्रस्य प्रवृत्त्यादिजनककृतिसाध्यत्वानुमित्यौपयिकव्याप्तिग्रहस्य तर्कं विनोत्पत्तावपि वह्निधूमादिव्याप्तिग्राहकतर्कमूलव्याप्तितन्मूलापरव्याप्तिपरम्परान्तर्गतानां सकलव्याप्तीनां तर्काधीनग्रहसामान्यकत्वोपगमेऽपि तादृशव्याप्तिग्रहसामान्ये उक्तानिष्टप्रदर्शनस्य दुर्वारत्वमित्याशङ्कां परिहरति दीधितौ । तथा चेति । तन्मूलक इति । तदेव मूलं यस्येति व्युत्पत्त्या तत्तुल्यतर्कानपेक्षकाचिरकव्याप्तिग्रहमूलक इत्यर्थो यज्ञपतिप्रभृतिव्याख्यानुसारेणैव कर्तव्यः । सः । जातमात्रबालकीयव्याप्तिस्मरणमूलभूतोऽनुभवः । पर्यनुयोगेति । तादृशानुभव एव तर्कापेक्षयानवस्थासत्त्वादिति भावः ।

नन्वियमनवस्था न दोषाय जन्मप्रवाहस्यानादितया सर्वत्रैव जन्मनि स्वस्वपूर्वजाततर्कापेक्षव्याप्तिप्रत्यक्षमूलकस्मरणस्य प्रथममव्यवहितप्राक्काले तर्कं विनापि सम्भवेन कार्यतस्तो विरोधाभावात्, अन्यथा बीजाङ्कुरस्थलीयानवस्थाया अपि दोषत्वापत्तेरित्यत आह । अनादित्वेनेति । जन्मप्रवाहस्येत्यादिः । परतः । सिद्धान्तग्रन्थे । न चैतद्बुद्धाववान्तरजातिरस्तीति मूले हेत्वनुक्तेर्हेतुं पूरयति । मानाभावादिति ।

ननु तर्कजन्यतावच्छेदकतयैव जातिः सेत्स्यतीत्यत आह । तर्कस्येति । असिद्धेरिति । तर्कस्य विजातीयव्याप्तिबुद्धौ हेतुत्वे तं विनापि

व्यभिचारग्रहदशायां व्याप्तिग्रहसामान्यापत्तेर्दुर्वारत्वात् तत्र व्यभिचारज्ञानाभावहेतुताया आवश्यकत्वे तर्कहेतुताया युक्त्यभावादिति भावः । सामान्यत्वेन ज्ञातं सामान्यं प्रत्यासत्तिरित्यभिमानेन सामानाधिकरण्यस्य व्याप्तित्वमते ऽनुमित्यौपयिकयावद्धूमधर्मिकव्याप्तिग्रहे असन्निकृष्टाया व्याप्तेर्मानमनेकसामानाधिकरण्यवृत्तित्वेन सामानाधिकरण्यत्वज्ञानादेव भविष्यतीत्यनेकसामानाधिकरण्यज्ञानमपेक्षितं तदेव सम्बन्धभूयोदर्शनमित्याशङ्कते मूलकृत् । सामान्येति । सामान्यस्य हि प्रत्यासत्तित्व इत्यतः स्वरूपसत एव सामान्यस्य प्रत्यासत्तित्वं लभ्यते । तथा च यत्र सामान्यस्य ज्ञानमेव नास्ति किं वा ज्ञानमस्ति न त्विन्द्रियसम्बद्धव्यक्तौ तत्रापि तत्प्रत्यासत्त्या यावत्तदाश्रयप्रत्यक्षापत्तिरित्याशङ्कावतार इत्यतस्तन्निरासाय भावं पूरयति । यदि चेति । सामान्यत्वेन । अनेकव्यक्तिवृत्तित्वेन । न तद्ग्रहो गृह्यतामित्यन्वयः । सामान्यत्वप्रकारकत्वस्य ज्ञानविशेषणत्वोपगमेऽपीन्द्रियसम्बद्धविशेष्यकत्वनिवेशस्यावश्यकत्वात्तादृशविशेषणोपादानानर्थक्यादिति भावः ।

मूले काकतालीयत्वशङ्केति । धूमवत्तो वह्निसम्बन्धे काकगमनकालस्य तालपतनसम्बन्धतुल्यत्वशङ्केत्यर्थः, तुल्यत्वं चानियतत्वेन । तथा च वह्नौ धूमाधिकरणव्यक्त्यन्तरनिष्ठाभावप्रतियोगित्वशङ्कापर्यवसायिन्यास्तादृशशङ्काया व्यभिचारशङ्काविधया विरोधित्वात्तद्विधूननार्थं धूमाधिकरणव्यक्त्यन्तरे वह्निसम्बन्धदर्शनमपेक्षितमिति भावः । द्वितीयादिदर्शनेऽपीति । व्यक्त्यन्तरे वह्निसम्बन्धदर्शनेऽपि अपरापरव्यक्त्यन्तर्भावेण तादृशशङ्कोत्पादे बाधकाभावादिति भावः ।

(चि०) अथ साध्यसाधनसहचरितधर्मान्तराणामुपाधित्वसंशये न व्याप्तिग्रहोऽतस्तेषामनुपाधित्वज्ञानं भूयोदर्शनार्थिनसाध्याव्यापकत्वज्ञाने सतीत्येतदर्थं भूयोदर्शनापेक्षा । अत एव यावता दर्शनेन तन्निश्चयस्तावद् भूयोदर्शनं हेतुरिति न वारसङ्ख्यानियमो न वाऽननुगमः । यद्यपि चान्यस्य साध्यव्यापक-

त्वसाधनव्यापकत्वसंशयो नान्यव्याप्तिग्रहप्रतिबन्धकस्तथापि तदाहितव्यभिचारसंशयः प्रतिबन्धक इति तद्विधूननमावश्यकमिति चेन्न ।

(दी०) साध्याव्यापकत्वं साध्यसमानाधिकरणाभावप्रतियोगित्वं तद्ग्रहश्च साध्याधिकरणैकव्यक्तिवृत्तितया गृह्यमाणस्य तादृशव्यक्त्यन्तरग्रहं विना न सम्भवतीति भूयोदर्शनापेक्षा ।

(गा०) साध्यव्यापकत्वग्रहे भूयोदर्शनोपयोगितामुपपादयति दीधितौ । साध्याव्यापकत्वमिति । तच्छून्यसाध्याधिकरणव्यक्त्यन्तरस्यैव तन्निष्ठव्यापकताघटकत्वादिति भावः । भूयोदर्शनापेक्षेति । तथा च भूयोदर्शनस्य व्याप्तिग्राहकत्वप्रवादोऽनेकसाध्याधिकरणदर्शनस्य तथात्वपर इति भावः ।

मूलस्थतद्व्यापारपदस्य बहिरिन्द्रियव्यापारार्थकत्वे बहिरिन्द्रियस्य व्यभिचारेण व्याप्तिग्राहकत्वासम्भवाद् भूयोदर्शनाहितसंस्कारस्य तत्सहकारिता न सम्भवतीति लभ्यते तच्च नोपपद्यते चाक्षुषत्वादेश्चक्षुरादिजन्यतावच्छेदकतया मानसव्याप्तिग्रहे तद्व्यभिचारानवकाशात् । भूयोदर्शनव्यापारार्थकत्वे तादृशसंस्कारं विना भूयोदर्शनकारणतावादिना मानसस्यापि व्याप्तिग्रहस्यानुपगमेनासङ्गतिः । स्वतःसिद्धशङ्काविरहस्थले सकृद्दर्शनादपि व्याप्तिग्रहोपगमे ईदृशव्यभिचारेण मनःसहकारिताया अप्यसम्भवेन तादृशसंस्कारस्य प्रमाणान्तरतापरतया मनःसहकारिताप्रतिक्षेपपरस्य नापीत्यादेरनुपस्थितिरित्यन्यथा व्याख्यातुं वितर्कयति । तदाहित इति ।

(चि०) अयोग्योपाधिसंशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात् । स च न भूयोदर्शनान्नाप्यनुमानादित्युक्तम् । अपि च भूयोदर्शनाहितसंस्कारो न बहिरिन्द्रियसहकारी तद्व्यापारं विनापि च सहचारादिज्ञानवतो व्याप्तिग्रहात् । नापि मनसः,इन्द्रिया-

दिवद् भूयोदर्शनजन्यसंस्कारस्य तज्जन्यस्मरणस्य वा प्रमाणान्तरत्वापत्तेः ।

(दी०) तदाहितः संस्कारो बहिरिन्द्रियमात्रस्य सहकारी मनसोऽपि वा ? आद्ये तद्व्यापारं विनेति । द्वितीये नापीति ।

(गा०) सकलेन्द्रियसहकारित्वेऽपि वक्ष्यमाणप्रमाणान्तरतापत्तिसत्त्वाद्विशिष्य मनोमात्रोपादानमयुक्तमित्याशयेनापिकारमन्तर्भाव्य वितर्कयति । मनसोऽपीति । आद्ये इति । बहिरिन्द्रियव्यापारं विनापि व्याप्तिग्रहे तत्साधारणधर्मस्यैव तादृशसंस्कारजन्यतावच्छेदकत्वमुपेयम्, अन्यथा तादृशसंस्कारं विनापि तत्स्थलीयसामग्रीबलाद्व्याप्तिप्रत्यक्षापत्तेः । एवं च बहिरिन्द्रियेतरस्य मनसोऽपि सहकारित्वमव्याहतमेवेति तन्मात्रसहकारित्वानुपपत्तिरिति मूलाभिप्राय इति भावः ।

(चि०) तस्मात् परिशेषात् सकृद्दर्शनगम्या सा। तथा हि उपाध्यभावो व्याप्तिः । अभावश्च केवलाधिकरणं तत्कालसम्बन्धो वा स्वप्रकाशरूपं तज्ज्ञानं वा ? तच्च प्रथमदर्शनेनावगतमेव चक्षुरादिना । न चाधिकस्तदभावोऽस्ति । न च प्रतियोगिज्ञानमधिकरणादिज्ञानजनकं येनोपाधिज्ञानं विना तन्न स्यात् । एवमुपाध्यभावे ज्ञाते किंचिन्न ज्ञातुमवशिष्यते । उपाध्यभावव्यवहारस्तु तद्द्वियमपेक्षते, दीर्घत्वादिव्यवहार इवावधिज्ञानम् । न चैवं रासभसम्बन्धतुल्यवह्निधूमसम्बन्धज्ञानादेवानुमितिः स्यादिति वाच्यम् । उपाधिस्मरणे सति उपाधितद्व्याप्येतरसकलतदुपलम्भकसमवधाने चोपाध्यनुपलम्भसहितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वात्तद्व्यवहारहेतुत्वाच्च ।

(दी०) परिशेषात् । साध्यसाधनसम्बन्धग्राहकातिरिक्तान-

पेक्षग्रहकत्वात् । उपाध्यभावग्राहकस्यापेक्षणीयत्वादसिद्धिं निरस्यति । तथा हीति । उपाधिस्मरणे इत्यादि ।

(गा०) ननु स्वाग्राहकभूयोदर्शनकत्वे सति ग्राह्यत्वं परिशेष, तच्च घटादौ निर्धक्ष्यमाणसकृद्दर्शनग्राह्यत्वव्यभिचारीति कथं हेतुतेत्यत आह । परिशेषादिति । साध्यसाधनसम्बन्धेति । ननु साध्यसाधनसामानाधिकरण्यग्राहकातिरिक्ताजन्यग्रहविषयत्वं घटादेरपि, तादृशसामानाधिकरण्यविषयकघटादिविषयकसमूहालम्बनग्रहस्य तत्सामानाधिकरण्यग्रहाजनकाजन्यत्वात् । साध्यसाधनसम्बन्धग्राहकातिरिक्तजन्यग्रहाविषयत्वस्य साध्यसाधनसम्बन्धाविषयकग्रहाविषयत्वपर्यवसितस्य तदर्थत्वे च साधननिष्ठतत्स्वरूपोपाध्यभावरूपायां व्याप्तावसिद्धिः । साधनस्वरूपस्य साध्यसाधनसम्बन्धाविषयके ज्ञानेऽपि कदाचिद्भानादुपाध्यभावविशिष्टसाध्यसाधनसामानाधिकरण्यस्य व्याप्तित्वेऽपि साध्यादेरेव दर्शितव्याप्तौ दृष्टान्ततया तदसिद्धितादवस्थ्यमेव । एवं साध्यसाधनसम्बन्धघटितपदार्थान्तरे व्यभिचारोऽपि दुर्वार इति । एतेन साध्यसाधनसम्बन्धविषयितावच्छिन्नजन्यत्वानिरूपकहेतुत्वादिनिरूपितजन्यतानवच्छेदकविषयिताकत्वस्य साध्यसाधनसम्बन्धविषयितानवच्छिन्नजन्यतानवच्छेदकविषयिताकत्वस्य वा विवक्षितत्वेऽपि न निस्तारः । साधनादिविषयिताया अपि तादृशजन्यताविशेषावच्छेदकत्वादिति चेन्न ।

साध्यसाधनसम्बन्धग्रहत्वावच्छिन्नाभावाप्रयोजकाप्रयुक्तग्रहत्वावच्छिन्नाभावकत्वस्य साध्यसाधनसम्बन्धविषयितावच्छिन्नजन्यतासामान्यावच्छेदकविषयिताकत्वस्य वा विवक्षितत्वात् साध्यसाधनग्रहत्वावच्छिन्नाभावप्रयोजकस्तद्ग्राहकसामग्र्यभावश्च न साध्यसाधनसम्बन्धग्रहत्वावच्छिन्नाभावाप्रयोजकः, व्यापकधर्मावच्छिन्नाभावप्रयोजकस्य व्यापकधर्मावच्छिन्नसामग्र्यभावस्य व्याप्यधर्मावच्छिन्नानुत्पादप्रयोजकत्वनियमादित्यत प्रथमस्य, साध्यसाधनसामानाधिकरण्यविषयितान्तःपातिन्या साध्यादिविषयितायास्तादृशसकलजन्यतावच्छेदकत्वाच्च द्वितीयस्य नासिद्धिः ।

वस्तुतस्तु ग्रहपदस्य विषयितार्थकतया साध्यसाधनसम्ब

न्धविषयित्वाप्रयोजकानधीनविषयिताकत्वमेव साध्यसाधनेत्यादिहेतुभागार्थः। एकदेशभानं विना विशिष्टभानानिर्वाहात् साध्यादिविषयिताप्रयोजकस्य साध्यसाधनसम्बन्धविषयिताप्रयोजकत्वनियमाच्च दृष्टान्ताद्यसिद्धिः। साध्यसाधनसम्बन्धावगाहिज्ञानजनकातिरिक्ताजन्ये समूहालम्बने घटादेर्विषयत्वेऽपि तद्विषयकत्वस्य साध्यसाधनसम्बन्धभानाप्रयोजकघटेन्द्रियसन्निकर्षादिप्रयोज्यत्वाच्च व्यभिचारः। प्रयोज्यप्रयोजकभावश्च प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष एवेति सर्वमनाकुलम्।

साध्यसाधनसम्बन्धग्राहकताव्यापकग्राहकताकत्वं सकृद्दर्शनगम्यत्वं बोध्यम्।

अनुमितिजनकतावच्छेदकहेतुविषयतानिरूपितप्रकारताश्रयत्वेन पक्षता मतो व्यापकसामानाधिकरण्यरूपव्याप्तेः पक्षत्वे बाधासिद्धी तथा हीत्यादिग्रन्थविरोधश्च, उपाध्यभावरूपव्याप्तेः पक्षत्वे यादृशव्याप्तेर्भूयोदर्शनग्राह्यता नैयायिकानामभिमता तस्याः सकृद्दर्शनग्राह्यतासाधनासम्भवेनार्थान्तरप्रसङ्ग इति दूषणमनवकाशम्। तादृशप्रकारताश्रयो भूयोदर्शनग्राह्यः सकृद्दर्शनग्राह्यो वेति विवादेन तादृशरूपावच्छिन्ने सकृद्दर्शनग्राह्यत्वस्याकाङ्क्षितत्वात्। तादृशरूपावच्छिन्नं च नैयायिकानां मते व्यापकसामानाधिकरण्यं एतन्मते तु उपाध्यभाव इत्यन्यदेतत्।

सकृद्दर्शनानन्तरमनुमित्यापत्तिवारणप्रस्तावे व्यवहारसामग्रीकथनस्यानाकाङ्क्षितत्वात्तद्व्यवहारहेतुत्वादिति मूलासङ्गतिशङ्कानिरासायोपाधियोग्यानुपलम्भस्यानुमितिहेतुत्वे अतीन्द्रियासन्निकृष्टहेतुकानुमित्यनुपपत्तेस्तत्रोपाध्यभावव्यवहारस्यानुपपत्त्या समं समानसमाधानतालाभाय तत्र तद्व्यवहारानुपपत्तिसूचकं व्यवहारे योग्यानुपलब्धेर्हेतुताभिधानमिति सूचयितुं तद्ग्रन्थमवतारयति। नन्वेवमिति।

(दी०) नन्वेवमसन्निकृष्टादिहेतुकानुमितिर्न स्यात्, उपाधियोग्यानुपलम्भविरहादत आह। तद्व्यवहारेति। तथा च तद्व्यवहारस्य हेतुरेवानुमितिहेतुः। तच्चोपाध्यभावत्वेन ज्ञानम्। उपाधिस्मरणे इत्यादि तु तत्कारणप्रदर्शनपरम्। अभा-

वत्त्वञ्चेदमिह नास्तीति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषोऽतिरिक्तः पदार्थो वेत्यन्यदेतत् । एवं चोपाध्यभाववत्त्वेन ज्ञानेऽधिकापेक्षा न वारयाम इति भावः ।

(गा०) तादृशसमाधानस्फुटीकरणाय भावं व्याचष्टे । तथा चेत्यादिना भाव इत्यन्तेन । तथा च । व्यवहारस्याप्यनुपपत्तिसत्त्वेन तत्रान्यस्य कारणत्वे च । हेतुः । कारणम् । स एवेत्येवकारेण उपाधियोग्यानुपलम्भस्य कारणत्वव्यवच्छेदः ।

नन्वेवमुपाधियोग्यानुपलम्भस्यानुमितावभावव्यवहारे च हेतुत्वाभिधानमसङ्गतमित्यत आह । उपाधिस्मरणे इत्यादि । तत्कारणेति । प्रत्यक्षात्मकोपाध्यभावत्वप्रकारकज्ञानकारणेत्यर्थः । तथा च तत्र हेतुपदं योग्यसन्निकृष्टहेतुकानुमित्यादिविशेषप्रयोजकपरमिति नासङ्गतिरिति भावः ।

अभावत्वस्य भावभिन्नत्वातिरिक्तस्य दुर्निर्वचतया तेन प्रकारेणाधिकरणस्वरूपाभाववादिनामभावज्ञानहेतुता न सम्भवति भावभिन्नत्वस्य तन्मतेऽप्रसिद्धेरतोऽभावत्वं निर्वक्ति । अभावत्वं चेति । प्रतीतिसाक्षिक इति । तादृशप्रतीतौ प्रतियोग्यतिरिक्तस्य नञ्पदनिर्देश्यतावच्छेदकस्य वस्तुनोऽभावांशे प्रकारतया अनुभवादिति भावः । स्वरूपविशेषत्वेऽनुगतप्रतीत्युपपादकत्वायोग इत्याशयेनाह । पदार्थान्तरं वेति । उपाध्यभावत्वप्रकारकव्याप्तिज्ञाने योग्यानुपलम्भहेतुत्वे साध्यसाधनसम्बन्धग्राहकातिरिक्तानपेक्षग्रहकत्वस्य व्याप्तावसिद्धिरित्याशङ्कापरिहाराय स्वयं व्याचष्टे । एवं चेति । न वारयाम इति । तावताप्यधिकरणतावच्छेदकधूमत्वादिप्रकारेण तद्ग्रहेऽधिकापेक्षाविरहेणासिद्धिशङ्कानवकाशादिति भावः ।

(चि०) नन्वेवं प्रथमदर्शनेन व्याप्तिनिश्चयादिशेषदर्शने सति रासभादिसंशयवत् तत्संशयो न स्यादिति चेत् ? व्याप्तिज्ञानानन्तरं किं विद्यमान एवोपाधिर्मयोपाधित्वेन न ज्ञात इति शङ्कया गृहीतव्याप्तावपि संशयः । अतस्तत्र भूयोदर्शनेनोपाधिनिरासद्वारा व्याप्त्यभावशङ्काऽपनीयते ।

(दी०) व्याप्तिस्वरूपे संशयाभाव आपद्यते निरुपाधिसम्बन्धस्वरूपव्याप्तित्वेन वा ? आद्ये इष्टापत्तिः, द्वितीयमपि किमुपाधिस्मरणादिकं विना तत्समवधाने सति वा सम्बन्धग्रहे ? आद्ये किं विद्यमान इति । तथा च तद्ग्रहमात्रं न तु तदभावत्वेनापि ग्रह इति समानप्रकारकनिश्चयाभावात्तत्संशयो नानुपपन्न इति भावः ।

(गा०) उपाध्यभावविशिष्टसाध्यसामानाधिकरण्यरूपव्याप्तेस्तत्स्वरूपवृत्तिसाध्यसामानाधिकरण्यत्वप्रकारेण संशयाभावापत्तौ समानाकारकनिश्चयाभावेन संशयो नानुपपन्न इति किं विद्यमान इत्यादिग्रन्थलभ्यसमाधानस्यासङ्गतिः, तत्प्रकारकनिश्चयस्य प्रथमतो वृत्तत्वात् अतस्तादृशानुपपत्तिं स्वयं समाधातुं अन्यादृशसंशयाभावापत्तौ च मूलोक्तसमाधानं योजयितुं वितर्कयति । व्याप्तिस्वरूप इति । तत्स्वरूपवृत्तिसाध्यसामानाधिकरण्यत्वाद्यवच्छिन्ने इत्यर्थः । निरुपाधिसम्बन्धस्वरूपेति । उपाध्यभावत्वाद्यवच्छिन्नविशिष्टसाध्यसामानाधिकरण्यस्वरूपेत्यर्थः । उपाधिस्मरणानन्तरोत्पन्नप्रथमदर्शनोत्तरं संशयाभावापत्तौ मूलोक्तप्रथमसमाधानासङ्गतिः । तत्र योग्यानुपलम्भसत्त्वेन निरुपाधिसम्बन्धत्वप्रकारकस्यापि निश्चयस्य सम्भवात् तदसमवधानानन्तरोत्पन्नदर्शनोत्तरं तदापत्तौ च विरोधिनिश्चयकालीनार्थसंशये एव प्रामाण्यसंशयस्योपयोगितया तदानीं च निरुपाधिसम्बन्धत्वप्रकारकनिश्चयेऽनुत्पत्त्या यद्वेत्यादिना प्रामाण्यसंशयं कल्पयित्वा तत्प्रकारकसंशयोपपादनमकिञ्चित्करमिति द्वितीयपक्षं पुनर्वितर्क्य समाधानद्वयं योजयति । द्वितीयमपीति । आपादनमिति शेषः । उपाधिस्मरणादिकं विना सम्बन्धग्रहे इत्यन्वयः । यादृशसम्बन्धग्रहपूर्वमुपाध्यभावत्वप्रकारकज्ञानजनकोपाधिस्मरणादिघटितो योग्यानुपलम्भो नासीत्तदुत्तरमित्यर्थः ।

तत्समवधाने इति । तादृशयोग्यानुपलम्भसमवधानोत्तरजातसम्बन्धदर्शनोत्तर वेत्यर्थः । यथात्र हेतावुपाधित्वेनानुपलभ्यमान उपाधिरत्र विद्यमानो न वेति संशयाद्व्याप्तिसंशय इति यथाश्रुतमूलार्थो न सङ्गच्छते, उपाधिनिष्ठस्य प्रकृतहेतुवर्तमानत्वाभावस्याप्युपाधिरू-

पधर्मिस्वरूपतया निश्चितत्वेन संशयायोगात् । हेतावुपाध्यभावनिश्चयस्यापि तादृशसंशयविरोधित्वात् । अप्रामाण्यसंशयातिरिक्तसंशयस्य विपरीतनिश्चयप्रतिबन्धकतायामुत्तेजकत्वे मानाभावाच्च । समानाकारकनिश्चयाभावादेव संशयोपपत्तेस्तमनुसृत्य प्रकारान्तरानुसरणे न्यूनतानुद्धाराच्चेति । विद्यमाने । ज्ञायमाने हेतौ । उपाधित्वेनोपाधिरेव न ज्ञात इति मूले योजनीयमित्यभिसन्धिना तादृशमूलस्य फलितार्थमाह । तथा चेति । तद्ग्रहमात्रम् । उपाध्यनुपलम्भमात्रम् । उपाध्यनुपलम्भयोग्यत्वमिह मात्रपदव्यवच्छेद्यम् । तद्व्यवच्छेदलभ्यमाह । न त्विति । तदभावत्वेन । उपाध्यभावत्वेन । ग्रह इति । तादृशग्रहप्रयोजकस्योपाधियोग्यानुपलम्भस्याभावादिति भावः । तावतैव कथं संशय इत्यत आह । समानेति ।

(चि०) यद्वा ज्ञानप्रमाण्यसंशयाद्व्याप्तिसंशयः, यथा घटज्ञानसामग्र्यां सत्यां घटज्ञाने सति तत्प्रामाण्यसंशयाहितस्तत्संशयो न त्वग्रिमसंशयानुरोधेन तत्र घटज्ञानमेव न वृत्तमिति कल्प्यते । तथेहाप्युपाध्यभावस्य व्याप्तित्वात्तस्य च केवलाधिकरणरूपस्य प्रथमदर्शनेऽपि निश्चितत्वाद् व्याप्तिग्राहकान्तरस्याभावाच्च परिशेषेण सकृद्दर्शनस्य व्याप्तिग्राहकत्वात्तन्निश्चये प्रामाण्यसंशयादेव तत्संशयः । न चैवं रासभेऽपि प्रथमं व्याप्तिपरिच्छेदः स्यादिति वाच्यम् । तत्र व्याप्तेरभावात् प्रत्यक्षज्ञाने विषयस्य हेतुत्वात् क्वचिदसंसर्गाग्रहात् तथा व्यवहारो दोषमाहात्म्यात् । न चात्रापि तथा, आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमात् ।

(दी०) द्वितीये ज्ञानप्रामाण्येति । प्रथमेति । सत्युपाधिस्मरणादावित्यादिः । न चात्रापीति । सर्वत्र रासभादावित्यर्थः ।

(गा०) ननु प्रथमदर्शनेऽपि निश्चितस्याप्रामाण्यसंशयादेव

तत्संशय इति मूलमसङ्गत प्रथमदर्शने उपाध्यभावत्वेन व्याप्तेर्भानात् प्रामाण्यसंशयस्य तदुत्तरसंशयेऽनुपयोगादित्यतः पूरयति । सत्युपाधीति । तथा चोपाध्यभावत्वप्रकारकज्ञानजनकस्योपाधियोग्यानुपलम्भस्य सत्त्वेन प्रथममुपाध्यभावत्वेन ज्ञान सम्भवतीति प्रामाण्यसंशयोपयोग इति भावः । एवं च निश्चितत्वादिति मूलस्य उपाध्यभावत्वेनेत्यादिः । ननु उपाध्यभावत्वेन ज्ञाने उपाधियोग्यानुपलम्भवत् प्रथमदर्शनदशायां दुर्घटमन्यदपि किञ्चित्कारण कल्प्यता तत एव तत्रोपाध्यभावत्वप्रकारकज्ञानाभावोपपत्तौ किं ज्ञानप्रामाण्यसंशयकल्पनयेत्यत आह मूले । व्याप्तिग्राहकान्तरेति । भूयोदर्शनादेर्व्याप्तिग्राहकत्वासम्भवादित्यर्थः । सकृद्दर्शनस्य । उपाधियोग्यानुपलम्भमात्रसहकृतस्याधिकरणज्ञानरूपस्य । ग्राहकत्वात् । उपाध्यभावत्वेन व्याप्तिनिश्चायकत्वात् । तन्निश्चये । तादृशनिश्चयावश्यम्भावे । न चात्रापीत्यत्रात्रेत्यस्य रासभे इत्यर्थकत्वे ऽसङ्गतिः क्वचिद्रासभे व्याप्यत्वग्रहस्येष्टत्वाद् अतो दीधितिकृद्व्याचष्टे । सर्वत्र रासभादावित्यर्थ इति ।

अधिकरणादिस्वरूपातिरिक्तत्वमभावस्याभ्युपेत्यापि उपाधिसामान्याभावस्यातीन्द्रियत्वाशयेन व्यापकसामानाधिकरण्यरूपव्याप्तिमवलम्ब्य तस्यास्तादृशव्याप्तित्वेन सहचारदर्शनसामग्रीजन्यलौकिकप्रत्यक्षविषयत्वरूपसकृद्दर्शनग्राह्यत्वं व्यवस्थापयतामेकदेशिनां मतमुपन्यस्यति मूले । केचित्त्विति ।

(चि०) केचित्तु साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्, साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं वा व्याप्तिस्तदुभयमपि योग्यं प्रत्यक्षेण वह्निधूमसम्बन्धानुभवेन प्रथममवगतमेव । *महानसे योऽत्यन्ताभावोऽन्योन्याभावो* वाऽवगतस्तस्य प्रतियोगी न वह्निर्न वा वह्निमानित्यनुभवात् । रासभे तथाऽवगमेऽप्यग्रे स बाध्यते इति तन्न । एवं हि तद्वह्नितद्धूमयोरेव व्याप्तिः स्यान्न तु

धूमत्ववह्नित्यावच्छेदेन न च तदनुमानोपयोगिवह्नित्वं वह्निमत्त्वं वा न प्रतियोगितावच्छेदकमिति प्रथमतो ज्ञातुमशक्यमेवेति । मैवम् ।

(दी०) अवगत इति । स्वरूपकथनमात्रम् । महानसे इत्यस्य । अस्मिन्नित्यादिः । महति वायौ योग्यायोग्योद्भूतरूपसामान्यतद्वतोरिव योग्ये वह्नौ तादृशप्रतियोगित्वसामान्यतद्वतोरप्यत्यन्तान्योन्याभावयोर्योग्यत्वादिति भावः । न प्रतियोगितावच्छेदकमिति । न धूमसामान्यसमानाधिकरणतादृशाभावप्रतियोगितासामान्यावच्छेदकमित्यर्थः ।

(गा०) नन्ववगतत्वस्य व्यापकत्वाघटकत्वाद्व्यापकताज्ञानाकारमध्येऽवगत इति कीर्तनमकिञ्चित्करमित्यत आह दीधितौ । अवगत इतीति । धूमसामान्यसमानाधिकरणाभावप्रतियोगित्वाभाववन्महानससामान्यनिष्ठाभावप्रतियोगित्वाभावोऽपि न योग्यः । विप्रकृष्टमहानसनिष्ठाभावप्रतियोगित्वसत्त्वेऽपि अनुपलम्भसम्भवादित्यतः पूरयति । महानसे इत्यस्येति । अवगतत्वस्य विवक्षितत्वे महानसान्तरेऽभावान्तरस्यानवगतत्वदशायां महानसादाववगताभावप्रतियोगितावच्छेदकत्वाभावस्य ग्रहसम्भवादस्मिन्निति पूरणमप्रयोजकमतोऽवगतत्वांशपरित्यागात्पूर्वं नैतत्पूरितम् ।

ननु तादृशाभावप्रतियोगित्वस्यापि पिशाचादिनिष्ठस्यायोग्यत्वात्तत्साधारणतादृशप्रतियोगित्वत्वावच्छिन्नात्यन्ताभावतद्भेदयो कथं योग्यतेत्यत आह । महतीति । तथा च योग्यमात्रप्रतियोगिकत्वं नाभावयोग्यतानियामकं अपि तु योग्यानुलम्भः, महति वायौ पक्षवृत्तिमहत्त्वविशेषणविशिष्टोद्भूतरूपवत्त्वं आपादकीकृत्य उद्भूतरूपोपलम्भस्यैव योग्ये वह्नौ योग्यताविशिष्टतादृशप्रतियोगित्वमापादकीकृत्य तदुपलम्भापादनस्य सम्भवात्पक्षावृत्तिविशेषणाविशेषितप्रतियोगित्वापादककापत्तेर्योग्यप्रतियोगित्वप्रतियोग्युपलम्भाभावरूपयोग्यानुपलम्भोऽक्षत एवेति तादृशप्रतियोगित्वतद्वतोरत्यन्तान्योन्याभावौ

नायोग्याविति भावः । महत्त्वविशेषिणस्यैवोद्भूतरूपस्य तदुपलम्भव्याप्यतया वायवीयाणौ नोद्भूतरूपतद्वतोरत्यन्तान्योन्याभावौ योग्यौ महत्त्वरूपविशेषणस्य तादृशपक्षावृत्तित्वादतो महतीत्युक्तम् । अत्र वाय्वंशेऽलौकिकं वायुविशेषणकमेवोद्भूतरूपाभावविशेष्यकं प्रत्यक्षं न तु वायुविशेष्यकं तस्यायोग्यत्वादित्यवधेयम् । चक्षुरादौ व्यभिचारेण महत्त्वविशेषणविशिष्टरूपसत्त्वस्य रूपोपलम्भाव्याप्यत्वाद् रूपसामान्याभावो न प्रत्यक्ष इत्येतल्लाभाय उद्भूतेति ।

न च पक्षवृत्त्यनुद्भूतरूपसामान्याभावविशिष्टतादृशरूपोपलम्भाव्याप्यत्वाद्रूपसामान्याभावोऽपि प्रत्यक्षः स्यात् प्रतियोगिग्राहकातिरिक्तविशेषणाविशेषितत्वस्य प्रतियोगिसत्त्वविशेषणत्वेऽपि नैतद्दोषोद्धारो रूपसहितानुद्भूतरूपसामान्याभावस्य प्रतियोगिग्राहकत्वादिति वाच्यम् । यतो रूपसहितानुद्भूतरूपाभावो न प्रत्यक्षकारणं अपि तु अनुद्भूतरूपभेदकूटविशिष्टमुद्भूतत्वरूपजातिविशेषविशिष्टं वा रूपमिति मतावलम्बनेनैतदभिधानात् । वह्निमणुके भर्जनकपालस्थवह्नौ च तादृशप्रतियोगित्वाभावतद्भेदौ च न योग्यौ तद्वद्वृत्तियोग्यताविशिष्टस्यैव तादृशप्रतियोगित्वस्य स्वोपलम्भापादकत्वादतो योग्ये वह्नावित्युक्तम् । इदं तु विशेषणतावच्छेदकत्वाभावाघटितेत्यभिमानेन तत्प्रतियोगी न वह्निरिति मूलीयव्यापकताज्ञानाकारप्रदर्शनमनुरुध्य वह्नौ प्रतियोगित्वाभावस्य योग्यत्वोपपादनम् ।

वह्नित्वादौ प्रतियोगितासामान्यानवच्छेदकत्वस्य व्याप्यघटकत्वाद्वह्नावित्युक्तम् । वह्नित्वादिकं न प्रतियोगितावच्छेदकमित्याकारकज्ञानस्य प्रथमतो ऽशक्यत्वं न सामान्यव्याप्तेः सकृद्दर्शनग्राह्यत्वाभावोपपादकं अतः प्रतियोगितापदं प्रतियोगिताविशेषपरतया व्याकुरुते । न धूमेति । धूमव्यापकविशेषसमानाधिकरणाभावप्रतियोगितासामान्यावच्छेदकत्वाभावस्य सुग्रहत्वाद्धूमसामान्येति । तादृशाभावप्रतियोगिताविशेषावच्छेदकत्वाभावस्य सुग्रहत्वात्प्रतियोगितासामान्येति । आद्यन्तयोः सामान्यपदोपादानादभावपदस्यापि तत्सामान्यपरतालाभः, अतस्तादृशाभावविशेषप्रतियोगितावच्छेदकत्वाभावस्य सुग्रहत्वेऽपि न क्षतिः ।

(चिं०) प्रकृतसाध्यव्यापकसाधनाव्यापको वा साधनत्वाभिमतेन समं प्रकृतसाध्यसम्बन्धितावच्छेदकं विशेषणं सोपाधिः । उभयथापि तदभावो न व्याप्तिः । सिद्ध्यसिद्धिभ्यां तन्निषेधानुपपत्तेः । किं तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वम् । तस्य च प्रथमं ज्ञातुमशक्यत्वात् । किं च न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः किन्तु व्याप्तित्वेन तच्चोपाध्यभावत्वम् । न चोपाधेरज्ञाने तदभावत्वेन ज्ञानं सम्भवति, विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य । न च नियमतः प्रथममुपाधिधीरस्ति । यच्चोक्तं प्रतियोगिज्ञानं व्यवहारहेतुर्नाभावज्ञाने इति । अस्तु तावदेवम् । तथापि तदभावो मा व्यवहारि । उपाध्यभावज्ञानाधीनानुमितिः स्यादेव उपाधिज्ञानं विनापि । न चैवम् । वस्तुतस्तु विशेषादर्शने सहचारादिसाधारणधर्मदर्शनाद्व्यभिचारसंशयात्प्रथमदर्शनेन न व्याप्तिनिश्चयः ।

(दी०) अथ साधनाव्यापकव्याप्यत्वाभावः साध्येऽधिकरणस्वरूपमेव, एवं साधननिष्ठसाध्यसम्बन्धे साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावोऽपीत्यनुशयानो येन रूपेण ज्ञाता व्याप्तिरनुमित्यङ्गं तद्रूपविशिष्टा न सकृद्दर्शनगम्या, सामानाधिकरण्यमात्रस्य च तथाभावं न वारयाम इत्याशयेनाह । किञ्चेति । विशेषणज्ञानसाध्यत्वात् तत्सामग्रीसाध्यत्वाद्वा । न चेति । उपलक्षणमेतत् । उपाधेरयोग्यस्यापि सम्भवादुपाधिसामान्यतद्वतोर्मूर्तत्वादिसामान्यतद्वतोरिवात्यन्तान्योन्याभावयोरयोग्यतया प्रत्यक्षेण गृहीतुमशक्यत्वात् । न च योग्यो-

पाधिव्यतिरेकग्रह एवानुमानाङ्गम्, अयोग्योपाधिग्रहेऽप्यनुमितिप्रसङ्गात् । यथाश्रुतं दूषयति । यच्चोक्तमित्यादिना ।

(गा०) तस्य च प्रथमं ज्ञातुमशक्यत्वादिति मूले यद्यपि यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यस्य व्याप्तित्वेऽपि साध्यसामानाधिकरण्यत्वेन सकृद्दर्शनग्राह्यत्वं तस्याः सुघटम् । व्याप्तित्वेन ग्राह्यत्वासम्भवस्तु यथाश्रुतोपाध्यभावरूपव्याप्तित्वपक्षेऽपि किं चेत्यादिना वाच्य इति पारिभाषिकानौपाधिकत्वस्य व्याप्तित्वं स्वीकार्यं सकृद्दर्शनग्राह्यतानिराकरणं न सङ्गच्छते । तथापि साध्यसाधनसामानाधिकरण्यभागस्य तथात्वे ऽविवादात्साध्यसाधनसामानाधिकरण्यविषयतान्तर्भावितविषयतानिरूपितानुमितिजनकतावच्छेदकप्रकारताश्रयस्य येन केनापि रूपेण सकृद्दर्शनग्राह्यत्वं गुरोर्मतमित्याशयेन सङ्गतिर्दीधितौ साधनाव्यापकव्याप्यत्वाभाव इति ।

स्वावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाधनतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदककत्वाभाव इत्यर्थः । साध्ये साध्यतावच्छेदके । साधनव्यापकतानवच्छेदका यावन्तो धर्माः प्रत्येकं तत्तदवच्छिन्नाभाववद्वृत्तितानवच्छेदकत्वतद्व्यवच्छेदकत्वोभयाभाववद्वत्त्वं साध्यतावच्छेदके इत्यर्थ इत्यप्याहुः । अधिकरणस्वरूपमेवेति । तथा च तादृशाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यात्मकानौपाधिकत्वसम्बन्धरूपव्याप्तेः सकृद्दर्शनगम्यत्वमव्याहतमेवेति भावः । साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपोपाधिलक्षणानुसारेणानौपाधिकत्वं निरुच्य साध्यसम्बन्धितावच्छेदकविशेषणरूपोपाधिलक्षणानुसारेण तन्निर्वक्ति । एवमिति । साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावोऽपीति । अधिकरणस्वरूप एवेत्यनुपपद्यते ।

यद्यपि धूमादिनिष्ठवह्निसामानाधिकरण्येऽपि प्रकृतसाधनतावच्छेदकीभूतधूमत्वाद्यतिरिक्ततत्तद्व्यक्तित्वावच्छेद्यत्वमक्षतम् । तथापि साधनतावच्छेदकातिरिक्तमात्रावच्छेद्यत्वमत्र विवक्षितम् । यत्र प्रमेयसामान्यमेव साधनतावच्छेदकं तत्र तदतिरिक्ताप्रसिद्धावपि न क्षतिः । साधनतावच्छेदकानवच्छेद्यत्वविशिष्टावच्छेद्यत्वस्यैवावच्छेद्यत्वान्तार्थतया साधनतावच्छेदकातिरिक्तांशस्यानिवेशात् ।

प्रमेयसामान्यस्य साधनतावच्छेदकता यत्र तत्रावच्छेद्यमात्रस्य साधनतावच्छेदकयत्किञ्चिन्मेयावच्छेद्यत्वनियमेऽपि साधनतावच्छेदकतापर्याप्त्यधिकरणमेयत्वविशिष्टानवच्छेद्यत्वसहितमवच्छेद्यत्वं रूपान्तरेण स्वरूपतो वा मेयावच्छेद्ये वस्तुनि प्रसिद्धमेव । महानसीयवह्न्यादिसामानाधिकरण्यस्य वह्न्यादिसामानाधिकरण्यत्वेन धूमत्वावच्छेद्यत्वेऽपि महानसीयवह्निमान् धूमादित्यादौ नातिव्याप्तिः । साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यत्वे साधनतावच्छेदकधर्मावच्छेद्यतावच्छेदकताविरहविशिष्टावच्छेद्यतावच्छेदकत्वाभावस्यैव विवक्षितत्वात् । अभावस्य भावप्रतियोगिकतयाऽधिकरणस्वरूपतानिर्वाहाय प्रतियोगिकोटौ विशेष्यदलम् ।

वस्तुतः स्वरूपसम्बन्धरूपावच्छेद्यावच्छेदकभावस्य दूषितत्वात्पारिभाषिकमवच्छेदकत्वं निवेश्य तथा च साधनतावच्छेदकावच्छिन्नसमानाधिकरणनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वं स्वविशिष्टनिरूपकाधिकरणवृत्तितावच्छेदकसाधनतावच्छेदकत्वं वा साधनतावच्छेदकावच्छेद्यतानवच्छेदकत्वं तदभाव एव साध्यसामानाधिकरण्यत्वे निवेशनीय इति ।

व्याप्तित्वेन व्याप्तेः प्रथमदर्शनावेद्यत्वेऽपि साध्यसामानाधिकरण्यत्वेन तथात्वानपायात् गुरूणामभिमतं सेत्स्यतीति शङ्काया किञ्चेत्यादिदूषणोपरि सत्त्वात्तां निराकर्तुमाशयं पूरयति । येनेत्यादिना । सामानाधिकरण्यमात्रस्य । केवलसाध्यसामानाधिकरण्यत्वावच्छिन्नस्य । तथाभावम् । सकृद्दर्शनगम्यत्वम् । न धारयाम इति । अनुमितिजनकज्ञानोपायमधिकृत्यैव विचारात्तद्विषयस्य रूपान्तरेण ग्रहोपायस्याप्रकृतत्वादिति भावः । गुरूणां विशिष्टबुद्धौ विशेषणज्ञानहेतुत्वानभ्युपगमाद्विशेषणज्ञानसाध्यत्वादिति हेतुः स्वमत एव सङ्गच्छतेऽतस्तन्मते हेतुं पूरयति । तत्सामग्रीसाध्यत्वादिति । उपलक्षणमेतदिति । उपाधिधीरित्यत्रापि उपाधिसामग्रीत्यपि बोध्यम् । अयोग्यस्यापि सम्भवादिति । तथा च तत्सामान्यात्यन्ताभावत्वादिना तादृशाभावादिग्राहकयोग्यानुपलम्भो न सम्भवतीति भावः । उपाधिसामान्यतद्वतोरिति । अत्यन्तान्योन्याभावयोरित्यत्र यथासंख्यमन्वेति । इदं च साधनाव्यापकरूपस्योपाधिपदार्थस्य व्याप्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावस्तत्सम्बन्धेन तद्वतोऽन्यो

न्याभावो वा साध्यनिष्ठो व्याप्तिघटक इत्याशयेन । योग्योपाधि-व्यतिरेकग्रह इति । तादृशव्यतिरेकस्य योग्यतया सुग्रहत्वादिति भावः । अनुमानाङ्गम् । अनुमितिहेतुः । अनुमितिप्रसङ्गादिति । तदानीमपि योग्योपाधिव्यतिरेकस्य सुग्रहत्वादिति भावः ।

ननु यद्योक्तमित्यादिना उपाध्यभावस्वरूपज्ञाने उपाधिज्ञानानपेक्षामतमुद्भाव्य उपाधिज्ञानशून्यकाले अनुमित्यापादनेन तन्निराकरणं मूलकृतो न सङ्गच्छते तादृशापत्तेरुपाधियोग्यानुपलम्भहेतुत्वाभिधानेन प्रागेव निराकृतत्वात् । न चासन्निकृष्टहेतुकस्थले व्यभिचाराद्योग्यानुपलम्भस्य हेतुता न सम्भवतीति तदसहकृतस्यैवोपाधिज्ञानानपेक्षव्याप्तिज्ञानस्य हेतुत्वं गुरुणा वक्तव्यमित्याशयेनैतद्दूषणमिति वाच्यम् । व्यवहार इवानुमितावप्युपाध्यभावत्वप्रकारकज्ञानस्यैव कारणताया उपाधिस्मरण इत्यादिग्रन्थाभिप्रेतत्वेन स्वयं व्याख्यानादित्याशङ्कां निराचिकीर्षुर्योग्यानुपलम्भसहकृतमाधिकरणतावच्छेदकप्रकारेणैवाधिकरणस्वरूपोपाध्यभावज्ञानं हेतुरिति यथाश्रुतपूर्वग्रन्थार्थपर्यवेोक्तदोषेण योग्यानुपलम्भकारणत्वं न सम्भवतीत्याशयेन दूषणमिदमिति मूले सङ्गमयति । यथाश्रुतमिति । उपाध्यभावत्वेन तज्ज्ञानं हेतुरिति निष्कृष्टमते तु तेन रूपेण सकृद्दर्शनग्राह्यत्वासम्भवादुद्देश्यासिद्धिरित्युक्तदूषणस्यैव दुर्वारत्वादिति भावः ।

(चि०) अथ व्यभिचारसंशयो नाव्यभिचारनिश्चयप्रतिबन्धकः, ग्राह्यसंशयस्य निश्चयाप्रतिबन्धकत्वात् । अन्यथा संशयोत्तरं क्वापि निश्चयो न स्याद् इति चेत् ? न व्यभिचारसंशयः प्रतिबन्धक इति ब्रूमः । किन्तु विशेषादर्शने सति सहचारादिसाधारणधर्मदर्शनात् संशयः स्यान्न तु संशयसामग्रीतो निश्चयः । किं च यद्वीसामग्री यत्र प्रतिबन्धिका विशेषादर्शने तत्र तद्धीरपीति व्यभिचारसंशयोऽपि प्रतिबन्धकः । एवं भूयोदर्शनमपि संशायकं तर्कस्त्वन-

पस्थाग्रस्त एवेति कथं व्याप्तिग्रहः ।

अत्रोच्यते । व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम् । ज्ञानं निश्चयः शङ्का च । सा च क्वचिदुपाधिसन्देहात् क्वचिद् विशेषादर्शनसहितसाधारणधर्मदर्शनात् । तद्विरहश्च क्वचिद् विपक्षबाधकतर्कात् क्वचित् स्वतः सिद्ध एव ॥

(दी०) व्यभिचारेत्यादि । अत्र प्रत्यक्षे ग्राह्यसंशयस्यापि प्रतिबन्धकत्वमादृत्य व्यभिचारशङ्कायास्तथात्वाभिधानम् । अन्यथा पुनरसाधारणतत्कारणमेलकरूपा सामग्री प्रतिबन्धिका बोध्या । विवेचितश्चेदं प्रत्यक्षमणिदीधितौ । वक्ष्यते चाधिकमुपरिष्टात् ।

(गा०) ननु ग्राह्यसंशयस्याविरोधितया मूलकृतैवाभिधानात् ज्ञानं निश्चयः शङ्का चेत्यनेन व्यभिचारशङ्काया अव्यभिचाररूपव्याप्तिग्रहप्रतिबन्धकत्वाभिधानं तस्य विरुध्यते इत्यत आह । अत्रेति । अत्र । ग्रन्थे । प्रत्यक्षे । प्रत्यक्षनिश्चये । धारावाहिकसंशयोत्पत्त्या संशये संशयप्रतिबन्धकताया असम्भवाद् ग्राह्यसंशयस्येति । विशेषादर्शनसहकृतस्येत्यादिः । आदृत्येत्यनेनास्य विचारासहत्वं सूचितम् । तद्बीजं तु संशयोत्पत्तिकाले निश्चयापत्तिवारणाय संशयसामान्यास्तत्प्रतिबन्धकत्वस्यावश्यकत्वाद्विशेषादर्शनसहितसंशयकालेऽपि संशयसामग्रीसत्त्वेन तत्प्रतिबन्धादेव तदुत्तरमपि निश्चयासम्भवात्संशयस्य प्रतिबन्धकत्वे मानाभावः । कथंचित्संशयसामग्रीविगमे च संशयोत्तरमपीष्यत एव निश्चयः, भवतोऽपि क्षणव्याजेन तत्र तदुत्पत्तेः । यद्वीसामग्रीत्यादिनियमश्चाप्रयोजकः ।

न च संशयोत्पत्तिदशायां निश्चयवारणाय संशयाभाव एव कार्यसहवर्ती हेतुरस्त्विति वाच्यम् । संशयोत्पत्तिकाले तद्विषयकाप्रामाण्यग्रहसत्त्वे निश्चयापत्तेः संशयप्रतिबन्धकतया वारयितुमशक्यत्वादिति । एतन्मतमेवानुसृत्याह । अन्यथा पुनरिति ।

ग्राह्यसंशयस्याप्रतिबन्धकत्वे इत्यर्थः । कालादिसाधारणकारणान्तर्भावस्य निष्प्रयोजनकत्वादाह । असाधारणेति । तत्तत्कारणेति । विपरीतकोट्युपस्थितिधर्मिज्ञानविशेषादर्शनादिरूपेत्यर्थः । तेषां संशयकारणत्वेन प्रतिबन्धकतावच्छेदकमध्ये न निवेशो यावत्कारणव्यक्तीनां एकदाऽसम्भवात्, अपि तु संशयकारणतावच्छेदकीभूततत्तद्धर्मपुरस्कारेणेति सूचयितुं तत्तदित्युक्तम् । प्रत्येककारणस्याप्रतिबन्धकत्वान्मेलकेति समुदायार्थकम् । सामग्री । व्यभिचारज्ञानसामग्री । विवेचितं चेदमिति । यत एव निश्चयत्वादेः कार्यतावच्छेदकत्वमत एव तुल्यबलविरोधिज्ञानसामग्र्यास्तदवच्छिन्नं प्रति कारणीभूताभावप्रतियोगित्वरूपं प्रतिबन्धकत्वम । निश्चयत्वस्यार्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वमिति निष्कृष्टमते च तादृशसामग्र्या न तथाविधप्रतिबन्धकत्वमपि तु फलानुत्पादप्रयोजकत्वमेव परं तु तद्विशिष्टबुद्धौ बलवत्यास्तद्विपरीतकोटिभानसामग्र्या एव कारणीभूताभावप्रतियोगित्वं बलवती च सामग्री दोषविशेषाद्युपबृंहितेति विवेचितमित्यर्थः । उपरिष्टात् । सत्प्रतिपक्षग्रन्थे ।

(दी०) अत्र च यद्यपि साधनगोचरसाध्याभाववद्वृत्तित्वग्रहाभावो हेतुरिति न युक्तम् । केवलान्वयिनि ग्राह्याप्रसिद्ध्या ग्रहाप्रसिद्धेः । खण्डशः प्रसिद्ध्या क्वचित्तादृशभ्रमसम्भवेऽपि सर्वत्र तथा भ्रमे मानाभावात्

(गा०) साधनगोचरेति । प्रकृतसाधनतावच्छेदकावच्छिन्नधर्मिकस्य साध्याभाववद्वृत्तित्वग्रहस्याभाव इत्यर्थः । केवलान्वयिनि । केवलान्वयिसाध्यके । ग्राह्याप्रसिद्ध्येति । साध्याभाववद्वृत्तित्वाप्रसिद्ध्या तद्ग्रहाप्रसिद्धेरित्यर्थः । एवं च प्रतियोग्यप्रसिद्ध्या तादृशग्रहाभावस्याप्रसिद्धेस्तत्स्थलीयव्याप्तिज्ञाने व्यभिचाराग्रहस्य हेतुत्वासम्भव इति भावः, इत्यादिदूषणं च सर्वत्रैव व्यभिचाराग्रहस्य व्याप्तिग्राहकत्वं मूलाभिप्रेतमित्यभिमानेन । अभिमानश्च वस्तुतस्त्वित्यादिनाऽग्रे निराकरिष्यते ।

ननु व्यभिचारज्ञानेत्यनेन व्यभिचारघटकपदार्थानां परस्परो-

पश्लेषावगाहिज्ञानमेव विवक्षितं केवलान्वयिसाध्यस्याभावाप्रसिद्धावपि अन्यदीयाभावे साध्यीयत्वभ्रमसम्भवाद् भ्रमरूपस्तथाविधो ग्रहः प्रसिध्यतीति तदभावहेतुतासम्भव इत्यत आह । खण्डशः प्रसिद्धेति । विशिष्टाप्रसिद्धावपि साध्यादिप्रत्येकपदार्थस्य प्रसिद्धेत्यर्थः । तादृशभ्रमसम्भवेऽपीति । तावत्पदार्थानां परस्परोपश्लेषावगाहिभ्रमप्रसिद्धावपि । सर्वत्रेति । तथा च यत्र न तादृशो भ्रमस्तादृशकेवलान्वयिसाध्यकव्याप्तिग्रहे व्यभिचाराग्रहस्य हेतुत्वासम्भव इति भावः ।

ननु केवलान्वयिनि साध्याभाववद्वृत्तित्वरूपव्यभिचाराप्रसिद्धावपि साध्यतावच्छेदकधर्मिकसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वरूपव्यभिचारग्रहाभावः प्रसिद्ध एवेत्यत आह । अत एवेति ।

(दी०) अत एव साध्यतावच्छेदकगोचरसाधननिष्ठाभावप्रतियोगितावच्छेदकत्वग्रहोऽपि प्रत्युक्तः । सकलसाध्यतावच्छेदके तादृशग्रहे मानाभावात् । तथापि साध्यतावच्छेदके तत्पुरुषीयतादृशावच्छेदकत्वग्रहस्य विषयतयाऽभावस्तद्विषयत्वाभावो वा तत्पुरुषीयव्याप्तिग्रहे हेतुः ।

(गा०) अत एव । सर्वत्र भ्रमे मानाभावादेव । तादृशग्रहे मानाभावादिति । सद्धेतुस्थले साध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्वनियमात्तत्र तादृशावच्छेदकत्वग्रहस्य भ्रमत्वनियमादिति भावः । तथा च यादृशसाध्यतावच्छेदके न तद्भ्रमस्तद्रूपावच्छिन्नसाध्यकव्याप्तिग्रहे व्यभिचाराग्रहहेतुत्वासम्भव इति सकलव्याप्तीनां व्यभिचाराग्रहग्राह्यत्वं नोपपद्यते इति पर्यवसितपूर्वपक्षः । साध्यतावच्छेदके इति । अभाव इत्यनेन सम्बध्यते । एवं च तादृशप्रतियोगितावच्छेदकीभूतयत्किञ्चिद्धर्मधर्मिकस्य तदवच्छेदकत्वग्रहस्य प्रसिद्ध्या सर्वत्रैव साध्यतावच्छेदकनिष्ठो विषयतासम्बन्धावच्छिन्नप्रतियोगिताकतादृशग्रहाभावः प्रसिद्ध एवेति नोक्तानुपपत्तिरिति भावः । अत्र प्रकृतसाध्यतावच्छेदकधर्मिकतादृश-

प्रतियोगितावच्छेदकत्वग्रहत्वमेव कार्यतावच्छेदकं न तु व्याप्तिग्रहत्वं गौरवात् । तत्पुरुषीयत्वनिवेशादेकपुरुषीयताहशावच्छेदकत्वग्रहदशायां नान्यस्य पुंसस्तत्समानधर्मिकताहशावच्छेदकत्वाभावग्रहस्यानुपपत्तिः । तद्धर्मप्रकारतानिरूपितविषयतैव तद्धर्मप्रकारकत्वविशिष्टस्य सम्बन्धः, अतो वह्नित्वे प्रमेयत्वादिकं घटत्वादौ च ताहशावच्छेदकत्वमवगाहमानाया धियो वह्नित्वे ताहशावच्छेदकत्वप्रकारकत्वविशिष्टाया विषयतासम्बन्धावच्छिन्नप्रतियोगिताकोऽभावः सुलभ एवेति ताहशावच्छेदकत्वप्रकारतानिरूपितविशेष्यतात्वेन सम्बन्धताविरहेऽपि न क्षतिः। विषयतासम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितावच्छेदकसम्बन्धत्वे विवादात् कल्पान्तरमाह । तद्विषयत्वाभावो वेति । ज्ञानविशिष्टायास्ताहशावच्छेदकत्वप्रकारतानिरूपितविषयताया अभावो वेत्यर्थः । ज्ञानशून्यकाले ज्ञानविषयतायाः सत्त्वेऽपि ज्ञानविशिष्टतदभावो विशेषणाभावप्रयुक्तोऽक्षत एव । उक्तसमूहालम्बनीयधर्मान्तरप्रकारतानिरूपितविषयताव्यावर्तनाय निरूपितान्तम् । उभयकल्पे एव साध्यतावच्छेदकनिष्ठत्वमभावविशेषणं न तूपलक्षणम्, अतः साध्यतावच्छेदकधर्मिकताहशावच्छेदकत्वग्रहदशायामपि कालान्तरे तत्र धर्मिणि वर्तमानस्य ताहशग्रहाभावस्य सत्त्वेऽपि नातिप्रसङ्गः । कालिकप्रत्यासत्त्यैव कार्यकारणभावो न स्वात्मनिष्ठप्रत्यासत्त्या अतो वह्नित्वादिवृत्तित्वविशिष्टस्याभावस्यात्मन्यसत्त्वेऽपि न क्षतिः ।

नन्वेवमपि येन पुंसा याहशसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वं कचिदपि न गृहीतं तस्य ताहशावच्छेदकत्वग्रहाप्रसिद्ध्या तदीयताहशसाधननिष्ठव्याप्तिग्रहे व्यभिचारज्ञानाभावस्य हेतुत्वासम्भवः । अथ यस्य पुंसो व्यभिचारधीः प्रसिध्यति तस्यैव व्याप्तिग्रहे ऽतिप्रसङ्गनिराकरणाय ताहशतदभावस्य हेतुत्वमुपेयते अन्यत्र तदहेतुत्वेऽपि क्षतिविरहः, सम्भवस्थलाभिप्रायेणैव मूलसङ्गतेरिति चेत् ? तदा यत्साध्यकयत्साधनकव्याप्तिग्रहविरोधिनी व्यभिचारधीः प्रसिद्ध्यति तत्साध्यकतत्साधनकव्याप्तिबुद्धावेव तदभावस्य हेतुता कल्प्यते नान्यत्रेति समाधानस्यैव सुलभतया व्यभिचारग्रहाप्रसिद्धिस्थले दर्शितरीत्या प्रसिद्धाया अन्यधर्मिकव्यभिचारधियो ऽभावस्य निर्युक्तिककारणताकल्पनमश्चितम् । त-

त्प्रसिद्धिस्थलीयव्याप्तिग्रहेऽपि पुरुषनिष्ठप्रत्यासत्त्यैव हेतुत्वकल्पन-मुचितं न तु विषयनिष्ठस्याभावस्य कालिकप्रत्यासत्त्या, तत्तत्पुरुषी-यत्वनिवेशेन पुरुषभेदात् कार्यकारणभावभेदापत्तेरित्याशयेन त-थैव समाधत्ते । वस्तुत इति ।

(दी०) वस्तुतो व्याप्तेः साध्यसाधनभेदभिन्नतया वि-शिष्यैव कार्यकारणभावः । तथा च यत्र साधनं साध्याभा-ववद्वृत्ति साध्यतावच्छेदकं साधनवन्निष्ठाभावप्रतियोगिताव-च्छेदकमेकविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धं तत्र यथा-योगं तदभावः पुरुषनिष्ठो व्याप्तिग्रहहेतुः । अत एवैकविधव्यभि-चारज्ञानविरहे ऽन्यविधव्यभिचारग्रहाद्व्याप्तिधीविरोधः । एवं च क्वचिद्व्यभिचारज्ञानस्याप्रसिद्ध्या तदभावस्याहेतुत्वे ऽपि न क्ष-तिः । प्रसिद्धायाः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादि-बुद्धेः समानविषयतया तदभावबोधविरोधित्वानुरोधेन तु तथा-भावं न वयं वारयामः, यदि तत्तत्प्रकारादिविशेषनिवेशेन विशेषे न पर्यवस्येदिति दिक् ।

(गा०) विशिष्यैवेति । तत्साध्यकतत्साधनकव्याप्तिग्रहत्वत-त्साधनादिधर्मिकतत्साध्याभाववद्वृत्तित्वादिग्रहाभावत्वादिरूपवि-शेषधर्मावच्छेदेनेत्यर्थः । सर्वसाधारणव्याप्तिग्रहत्वव्यभिचारग्रह-त्वयोर्दुर्वचत्वादेकत्र साधने एकस्य साध्यस्य व्यभिचारग्रहदशा-यामप्यपरस्मिन्नपरस्य व्याप्तिग्रहोत्पत्तेः सर्वसाधारणैककार्यकारण-भावासम्भवादिति भावः । यथायोगमिति । यत्र यावद्विधव्यभिचा-रधीः प्रसिद्धेति तत्र तावद्विधतदभावः समवायसम्बन्धावच्छिन्न-प्रतियोगिताक आत्मनिष्ठप्रत्यासत्त्या हेतुरित्यर्थः । अत एव ।

प्रसिद्धाशेषव्यभिचारग्रहत्वावच्छिन्नप्रतियोगिताकाभावस्यहेतुत्वा-देव । अत्र च यद्यत्साध्यतावच्छेदकधर्मिकसाधनवन्निष्ठाभावप्रतियो-गितावच्छेदकत्ववत्त्वज्ञानं प्रसिद्धं तत्तद्धर्मिकतादृशावच्छेदकत्वग्रहस्य तत्तद्धर्मिकतत्तदभावग्रहप्रतिबन्धकत्वे कल्पनीये विशेष्यविशेषण-निवेशस्य समानविशेष्यताप्रत्यासत्त्या प्रतिबन्धकताकल्पनमेवोचितम्,

अन्यथा विशेष्यीभूततत्तद्धर्मिभेदेनानन्तप्रतिबन्धकताप्रसङ्गात् । एवं च यद्धर्मधर्मिकयादृशावच्छेदकत्वग्रहोऽप्रसिद्धस्तद्धर्मिकतदभावग्रहेऽपि विषयनिष्ठस्य व्यभिचाराग्रहस्य हेतुत्वमायातमिति मिश्राणां सकलव्याप्तिग्रहे एव तद्धेतुत्वोपपादनप्रकारमाक्षिपति । प्रसिद्धाया इति । तथाभावम् । सकलव्याप्तिग्रहे व्यभिचाराग्रहहेतुभावम् । प्रकारादिविशेषणनिवेशेनेति । वह्नित्वत्वादिरूपतादृशावच्छेदकत्वत्वादिरूपविशेष्यताप्रकारतावच्छेदकादिनिवेशेनेत्यर्थः । आदिपदात् सम्बन्धविशेषपरिग्रहः । विशेषे न पर्यवस्येदिति । तद्भेदेन कारणता न भिद्येतेत्यर्थः ।

वस्तुनोऽसमानप्रकारकस्य सम्बन्धान्तरावगाहिनश्चावच्छेदकत्वज्ञानस्यानवच्छेदकत्वज्ञानविरोधितावारणाय विशिष्य तन्निवेशनस्यावश्यकतया विशेष्यनिवेशस्य चात्मनिष्ठप्रत्यासत्तिकल्पेऽप्यभावात् । समानविशेष्यताप्रत्यासत्त्यादरस्तु तत्पुरुषीयत्वनिवेशनप्रयुक्तगौरवायैव, न वा तावतापि व्यभिचाराग्रहहेतुतायाः सर्वसाधारण्यनिर्वाहः, यद्धर्मं धर्मितावच्छेदकीकृत्य यत्साधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य ताद्रूप्येण स्वरूपसम्बन्धावगाहिज्ञानं यस्य पुंसो ऽप्रसिद्धं तद्धर्मावच्छिन्नविशेष्यकतत्साधनव्यापकतावच्छेदकत्वावगाहितत्पुरुषीयग्रहे व्यभिचाराग्रहहेतुत्वासिद्धेरिति भावः । समानधर्मितावच्छेदकत्वप्रत्यासत्त्या प्रतिबध्यप्रतिबन्धकभावस्वीकारेऽपि यस्य पुंसो यत्साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावगाहिसधर्मितावच्छेदककबोधोऽप्रसिद्धस्तदीयतत्साधनव्यापकताग्रहे व्यभिचाराग्रहहेतुत्वमशक्योपपादनमेवेति ध्येयम् ।

व्याप्तिग्रहे सहचारग्रहस्य स्वातन्त्र्येण हेतुताया निर्युक्तिकतया विशेषणविधयैव तस्य कारणत्वं व्यवस्थापनीयम्, सहचारस्य च विशेषणविधया व्याप्तिघटकत्वे एव तदुपपद्यते अन्यथा व्याप्तिविशेष्यकप्रत्यक्षे हेतुत्वानिर्वाहात् अतस्तस्य तथा व्याप्तिघटकत्वं स्फुटीकर्तुं व्याप्तिरूपमाह । *व्याप्तिश्चेति ।*

(दी०) व्याप्तिश्च धूमादिव्यापकवह्निसमानाधिकरणधूमत्वादिकम् । तादृशसामानाधिकरण्यमात्रस्य रासभादि-

साधारणत्वात् । अत्र च व्यापकत्वांशग्रहे व्यभिचाराग्रहः समानाधिकरणवृत्तित्वांशग्रहे च तद्विशेषणतया सामानाधिकरण्यस्य ग्रहो हेतुरिति वक्तव्यम् । साध्यसम्बन्धितावच्छेदकरूपवत्त्वलक्षणव्याप्तिग्रहे विशेषणतया सम्बन्धस्य ग्रहो हेतुरित्यपि केचित् ।

(गा०) रासभादिसाधारण्यादिति । तथा च तावन्मात्रस्य व्याप्तित्वेऽभ्रान्तस्यापि रासभादिलिङ्गकवह्न्याद्यनुमितिप्रसङ्ग इति भावः । इदं च दूषणं केवलव्याप्तिप्रकारकहेतुमत्ताज्ञानस्य यद्यनुमितिहेतुता तदैव, यदि च तद्धर्मावच्छिन्नव्यापकसामानाधिकरण्यतद्धर्मोभयावच्छिन्नहेतुमत्ताज्ञानस्य तथात्वमुपेयते तदा नैतद्दोषावकाशः, तादृशसाध्यसमानाधिकरणवृत्तितद्धर्मावच्छिन्नप्रकारकमानहेतुतापेक्षया लाघवं च, तथापि सामान्यप्रत्यासत्त्यनभ्युपगमपक्षे विशिष्टपरामर्शानुपपत्त्या समानाधिकरणवृत्तिहेतुतावच्छेदकस्य व्याप्तित्वमावश्यकम् ।

अथ सामानाधिकरण्यव्याप्तितापक्षेऽपि स्वाश्रयनिष्ठधूमत्वादिमत्त्वरूपपरम्परासम्बन्धेन तत्प्रकारकज्ञानस्यानुमितिहेतुत्वोपगमात् पक्षनिष्ठधूमादौ तादृशसम्बन्धे महानसीयवह्न्यादिसामानाधिकरण्यस्य सत्त्वाद्विशिष्टपरामर्शनिर्वाह इति किं समानाधिकरणवृत्तिधूमत्वस्य व्याप्तित्वेनेति चेत् ? तर्हि स्वाश्रयसमानाधिकरणवृत्ति धूमत्वादिसम्बन्धेन व्यापकताज्ञानस्यैव हेतुता किं नोपेयते । तादृशपरम्परायाः सम्बन्धत्वे मानाभाव इति चेत् ? तुल्यं प्रकृतेऽपि । व्याप्ति· सर्वांशभाने सामानाधिकरण्यज्ञानस्योपयोगिताविरहो प्रयोजकः, व्यभिचारग्रहस्याप्यतथात्वादिति सूचयितुं व्यभिचाराग्रहस्य व्यापकतांशमात्रग्राहकतामाह । अत्रेति । ईदृशव्याप्तौ चेत्यर्थः । अत्रान्यपि घटकत्वं सप्तम्यर्थः । व्यापकत्वांशग्रहे इति । साध्यतावच्छेदकधर्मिकव्यापकतावच्छेदकत्वावगाहिग्रहत्वावच्छिन्ने । इतरांशग्रहे व्यभिचारग्रहस्याविरोधित्वादिति भाव. । व्यभिचाराग्रहः । साध्यतावच्छेदकधर्मिकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहाद्यभावः । विरोधिविषयकज्ञानाभावमुद्रयेत्यादिः ।

समानाधिकरणवृत्तित्वांशग्रहे इति । यद्यपि समानाधिकरणांशग्रहे एव सामानाधिकरण्यज्ञानस्य विशेषणज्ञानविधया हेतुत्वं सम्भवति तथापि तदंशमात्रभाने हेतुधर्मिकसहचारग्रहपर्यन्तानपेक्षणात्तदुपयोगितानिर्वाहाय समानाधिकरणवृत्तित्वांशानुधावनम्। तदंशग्रहस्य सामानाधिकरण्यविशिष्टहेतुवैशिष्ट्यावगाहितया तत्र हेतौ साध्यसहचारप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानमुद्रयापेक्षितत्वात् विशेष्ये विशेषणमिति रीत्या तदंशस्यापि ग्रहे तादृशसहचारग्रहापेक्षाविरहेऽपि न क्षतिः। विशिष्टवैशिष्ट्यावगाहिग्रहस्यैवानुमित्युपयोगितयाऽन्यादृशव्याप्तिग्रहस्यानथार्त्वात्, अनुमित्युपयोगिव्याप्तिग्रहोपायस्यैव प्रकृतत्वादिति। विशेषणतयेत्यपि सामानाधिकरण्यस्येत्यनेन सम्बध्यते ।

अन्येषां मतमाह। साध्यसम्बन्धितेति। अत्रास्वरसबीजं पारिभाषिकावच्छेदकत्वघटिततादृशव्याप्तेर्गुरुशरीरतया ऽनुमित्यनुपयोगित्वम्। अत एव मणिकृताप्यन्योन्याभावगर्भव्याप्तिरेवानुमितिहेतुरिति वक्ष्यते।

मिश्रास्तु विशेषणज्ञानमुद्रया सहचारग्रहस्य व्याप्तिग्राहकत्वं यदि मूलकृतोऽभिप्रेतं तदा व्यभिचारादेरपि विशेषणतया तज्ज्ञानस्य तथात्वाकथनेन विरोध इत्यालोच्य सहचारज्ञानस्य स्वातन्त्र्येणैव व्यापकताग्राहकत्वं व्यवस्थापितवन्तस्तन्मतं दूषयितुमुपन्यस्यति। यत्त्विति।

(दी०) यत्तु विरुद्धे सहचारभ्रमेण व्यापकत्वभ्रमात् सामान्यत एव सहचारज्ञानं हेतुरिति तन्न। असिद्धत्वात्। विरुद्धेऽपि हि व्यापकत्वसामानाधिकरण्ययोर्ग्राहकसामग्रीक्रमयौगपद्याधीनं ग्रहणक्रमयौगपद्यं न तु मिथः कार्यकारणभाव इति।

(गा०) सहचारभ्रमेण व्यापकत्वभ्रमादिति। व्यापकताभ्रमस्य सहचारभ्रमान्वयव्यतिरेकानुविधायितया अनुभवसिद्धत्वादिति भावः। सामान्यत एव। भ्रमप्रमासाधारणसहचारज्ञानत्वेनैव। हेतुः। भ्रमप्रमासाधारणव्यापकताज्ञानत्वावच्छिन्नहेतुः। कार्य-

कारणभावावच्छेदककोटौ भ्रमत्वनिवेशे गौरवादिति भावः । न चैकधर्मावच्छिन्नधर्मिणि सहचारग्रहस्यान्यधर्मावच्छिन्नविशेष्यकव्यापकताग्रहाजनकतया धर्मितावच्छेदकविशेषनियन्त्रितकार्यकारणभावकल्पनाया आवश्यकत्वाद्वह्नित्वावच्छिन्नधर्मिकधूमादिव्यापकताग्रहे सहचारग्रहहेतुता नोक्तयुक्त्या सिद्ध्यतीति वाच्यम् । धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या साध्यधर्मिकहेतुसहचारज्ञानस्य व्यापकताग्राहकत्वमित्यभिप्रायात् ।

यदि व्यापकताभ्रममात्रे एव सहचारभ्रमस्य हेतुत्वमविवादं स्यात्तदैवोक्तयुक्त्या व्यापकताग्रहसामान्ये सहचारग्रहस्य हेतुता स्यात्तदेव नेत्याह । असिद्धत्वादिति । नन्वनुभवसिद्धान्वयव्यतिरेकाभ्यां व्यापकताभ्रमे सहचारभ्रमहेतुतासिद्धिरित्याशङ्कामपनेतुं नियतान्वयव्यतिरेकानुविधायित्वमेवासिद्धमित्याह । विरुद्धेऽपीति । क्रमयौगपद्याधीनमिति । क्रमयौगपद्यमित्यत्र यथासंख्यमन्वयो बोध्यः । कार्यकारणभाव इति । नियतपौर्वापर्यमित्यर्थः । न च सहचारस्य व्यापकत्वसहचरिततया तज्ज्ञानस्य दोषविधया व्यापकताभ्रमं प्रति चाकचक्यादिज्ञानस्य रजतत्वादिभ्रमं प्रतीव हेतुत्वं सर्वमतसिद्धमेवेति वाच्यम् । क्वचिद्व्यापकताभ्रमे दोषविधया तद्धेतुत्वादेव तद्भ्रमसामान्ये तज्ज्ञानसामान्ये वा तद्धेतुतासिद्धौ सहचारभ्रमं प्रत्यपि उक्तक्रमेण दोषविधया क्वचिद्व्यापकताज्ञानहेतुतायाः सुवचतया विपरीतस्यापि वक्तुं शक्यत्वादिति भावः ।

प्रसङ्गाद् धूमसामान्यादौ वह्निसामान्यव्याप्तेरतीन्द्रियत्वं व्यवस्थापयति । इदं पुनरिति ।

(दी०) इदं पुनरवधेयम् । यथा विद्यमानमपि वह्नित्वे व्यवहितविप्रकृष्टरासभादिदेशनिष्ठाभावप्रतियोगितावच्छेदकत्वं न गृह्यते अभावदेशविप्रकर्षादिना ग्राहकाभावात् । तथा धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य सत्त्वेऽप्यग्रहसम्भवात् । नानुपलब्धेः प्रतियोगिसत्त्वविरोधित्वादिलक्षणा योग्यतेति न तत्सामान्याभावो लौकिकप्रत्यक्षगम्यः परं तु क-

र्यचिद् विरोधस्फुरणादिवशाद् धूमत्वादौ गृहीतो धूमवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाभावो वह्नित्वादावुपनयमर्यादया गृह्यते ।

(गा०) व्यवहितेति । मध्यवर्तिभित्त्यादिप्रयुक्तमिन्द्रियसन्निकर्षशून्यत्वं व्यवहितत्वम् । विप्रकृष्टत्वं दूरत्वप्रयुक्तं तथात्वम् । रासभादिदेशेति । रासभाद्यधिकरणदेशेत्यर्थः । न गृह्यते इति । तद्रूप्येण नोपलभ्यते इत्यर्थः । एतेन वह्नित्वादिनिष्ठताद्दशप्रतियोगितावच्छेदकत्वस्य स्वरूपानतिरिक्तत्वेऽपि नासङ्गतिः । अभावदेशेति । अभावाधिकरणदेशेत्यर्थः । विप्रकर्षादिनेति । आदिना व्यवधानपरिग्रहः । ग्राहकाभावादिति । तादृशाभावाधिकरणतद्देशग्राहकसामग्रीघटितायास्तन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नग्राहकसामग्र्या अभावादित्यर्थः । सत्त्वेऽप्यग्रहसम्भवादिति । इन्द्रियसन्निकर्षादिमति घटत्वादौ तत्सत्त्वेऽपि घटादिशून्यधूमाधिकरणविप्रकर्षादिनानुपलम्भसम्भवादित्यर्थः ।

अनुपलब्धेरिति । तादृशावच्छेदकत्वरूपप्रतियोग्युपलम्भाभावस्येत्यर्थः । प्रतियोगिसत्त्वविरोधित्वलक्षणेति । प्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वरूपेत्यर्थः । पक्षावृत्तिविशेषणाविशेषितस्य तादृशावच्छेदकत्वरूपप्रतियोगिनस्तदुपलम्भाव्याप्यतया मूलशैथिल्येनानुपलब्धिप्रतियोग्यनापादकत्वादिति भावः । तत्सामान्याभाव इति । धूमाधिकरणसन्निकृष्टतद्देशनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावग्राहकयोग्यानुपलम्भसम्भवात्सामान्यपदम् । उपनीतभाने योग्यानुपलब्ध्यनपेक्षणात् लौकिकेति ।

अथैवमीदृशी व्याप्तिर्न गृह्येतैव लौकिकप्रत्यक्षासम्भवेन ज्ञानान्तरसापेक्षस्योपनीतभानानुमानादेरप्यसम्भवात् । न च तादृशावच्छेदकत्वस्य लौकिकसन्निकर्षात्सामान्याभावस्य वा अभावत्वादिसामान्यप्रत्यासत्तितो भाने तादृशावच्छेदकत्वीयत्वेन तत्सामान्याभावस्योपनीतभानसम्भव इति वाच्यम् । एवमपि सामान्यप्रत्यासत्तेः स्वयं निराकरणीयतया तदनभ्युपगमपक्षे तद्ग्रहानुपपत्तेर्दुर्वारत्वादित्याशङ्कामपनिनीषुराह । परं त्विति । विरोधस्फुरणादिवशादिति । धूमत्वाद्यवच्छिन्नाभावे धूमादिविरोधग्रहादिवशादित्य

र्थः। गृहीतः । धूमविरुद्धाभावप्रतियोगितावच्छेदकत्वादिरूपव्यतिरेकिहेतुनानुमितः । उक्तविरोधग्रहस्य चेतादृशहेतुमत्ताग्रहसम्पादकतयैवोपयोगिना बोध्या । साध्यप्रसिद्धिं विनाप्यभावसाध्यकव्यतिरेकिप्रवृत्तेर्न साध्यप्रसिद्ध्यपेक्षा, धूमाभावादौ धूमवद्वृत्तित्वसामान्याभावरूपस्य विरोधस्याप्युक्तदिशा लौकिकप्रत्यक्षासम्भवेन धूमत्वादिरूपपक्षे उक्तहेतुग्रहोऽपि दुर्घटः । एवं तादृशाभावस्याप्युक्तदिशा लौकिकप्रत्यक्षासम्भवेन व्यतिरेकसहचारग्रहोऽपि तथेत्यत उक्तं कथंचिदिति । साध्यप्रसिद्धेरनपेक्षणात्किञ्चिल्लिङ्गकव्यतिरेक्यनुमानाद्धूमवद्वृत्तित्वमभावप्रतियोगि एतद्वृत्त्यवृत्तित्वादित्याद्यनुमानेन पक्षतावच्छेदकावच्छेदेनाभावप्रतियोगित्वं सेत्स्यति । पक्षधर्मताबलेन धूमवद्वृत्तित्वसामान्याभावरूपविरोधभाने तादृशोपनायकज्ञानबलाद्धूमाभावादौ धूमविरोधग्रहसम्भवेन तत्पक्षे उक्तहेतुमत्त्वग्रहः सम्भवति । एवमप्रसिद्धसाध्यकानुमानाद् धूमविरुद्धाभावप्रतियोगितावच्छेदकत्वमभावप्रतियोगि घटत्वावृत्तित्वादित्याद्यनुमानेनोक्तरीत्या तादृशावच्छेदकत्वसामान्याभावभानोपनायकज्ञानबलादपि व्यतिरेकदृष्टान्ते उक्तहेतुव्यतिरेकग्रहसम्भव इति भावः ।

यद्यप्युक्तरीत्याऽभावप्रतियोगित्वसाध्यकानुमाने धर्मिणमन्तरेणोपस्थितस्यापि धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावस्य वह्नित्वादावुपनतभानसम्भवः । तथापि यत्किञ्चिद्धर्मिविशेष्यकमप्युपनायकज्ञानं भवतीति व्युत्पादनायाप्रसिद्धसाध्यकानुमानमभिहितम् । न च व्याप्तिग्रहेऽनुमानान्तरापेक्षायामनवस्थितिरिति वाच्यम् । चिरानुमितव्यापकतावच्छेदकत्वस्मरणादिनापि प्रकृतानुमित्युपधायकतदुपनीतभानसम्भवेनानवस्थिताविरलव्याप्तिज्ञानानुमितिधारानपेक्षणेन दोषानवकाशात् । वह्न्यभावे धूमविरोधस्याभानदशायां तदुभयसामानाधिकरण्यस्यापि भानसम्भवादगृहीतधूमवह्निव्याप्तिकस्य वह्न्यभावे धूमविरोधनिश्चयो दुर्घटः । स्वाभावे चोपस्थितिमात्रेणैव स्वविरोधः सुनिश्चयः । अव्याप्यवृत्तित्वग्रहं विना स्वस्मिन् स्वाभावसामानाधिकरण्याग्रहादिति वह्नित्वादावित्यनभिधाय धूमत्वादावित्युक्तम् ।

केचित्तु विरोधस्फुरणवशाद् धूमत्वादौ धूमवन्निष्ठाभावप्रति-

योगितावच्छेदकत्वाभावरूपं यत् साध्य तदभावव्यापकीभूताभाव-प्रतियोगित्वरूपविरोधस्फुरणवशाद् धूमत्वादौ गृहीतो धूमत्वं धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभाववद् धूमत्वत्वादित्याद्यनुमितिविषयः । तथा च तादृशविरोधस्फुरणस्य एतदनुमितौ व्यतिरेकव्याप्तिज्ञानविधयोपयोगित्वं निरुक्तसाध्याभावविरोधस्य साध्यव्यतिरेकव्याप्तित्वात् । कथञ्चिदित्यस्य प्रयोजनं निरुक्तप्रायम् । न चैवं वह्नित्वादावुक्तक्रमेण तदनुमितिसम्भवाद् धूमत्वपर्यन्तानुधावनं व्यर्थमिति वाच्यम् । प्रत्यक्षत एव प्रथमतस्तद्ग्रहार्थं तदनुसरणादिति वदन्ति ।

(दी०) अत एवानुमानादिना व्यभिचारग्रहे ऽपि न व्याप्तिधीः । निर्णयात्मनि साधारणे वा दोषविशेषाजन्योपनीतभाने संशयादिसाधारणस्य निश्चयात्मना वा विपरीतज्ञानमात्रस्यैव प्रतिबन्धकत्वात् तत्तद्धूमादौ देशान्तरवृत्तित्वसम्भावनाविरहादिवशाद् गृह्यमाणो वह्न्याद्यभाववद्वृत्तित्वाभावो धूमत्वाद्यवच्छेदेन गृह्यते लाघवादित्यपि वदन्ति ॥

(गा०) अत एवेति । व्याप्तेर्लौकिकप्रत्यक्षासम्भवादेव । व्याप्तेर्लौकिकप्रत्यक्षोपगमे आनुमानिकादिविपरीतज्ञानस्य लौकिकप्रत्यक्षाविरोधितया आनुमानिकव्यभिचारग्रहदशायामपि लौकिकव्याप्तिज्ञानमुपेयेतत्युपष्टम्भसङ्गतिः । उपनीतभाने पुनरानुमानिकादिव्यभिचारज्ञानमपि विरोधीति दर्शयति । निर्णयात्मनीति । निर्णयात्मनि । दोषविशेषाजन्योपनीतभाने । संशयादिसाधारणस्य विपरीतज्ञानमात्रस्यैव प्रतिबन्धकत्वादिति योजना । एतच्च ग्राह्यसंशयस्य प्रत्यक्षनिश्चयप्रतिबन्धकतामाश्रित्योक्तम् । संशयस्य संशयाप्रतिबध्यत्वनिर्वाहाय निर्णयात्मनीति । मण्डूकवसाञ्जनादिरूपदोषविशेषजन्यस्योरगत्वोपनीतभानस्यानुमानिकोरगत्वाभावज्ञानाप्रतिबध्यत्वादजन्यान्तम् । लौकिकसन्निकर्षजन्यनिर्णयस्यानुमानिकादिविपरीतज्ञानाप्रतिबध्यतया उपनीतभाने इति । लौकिकसन्निकर्षाद्यजन्यप्रत्यक्षे इत्यर्थः । प्रत्यक्षत्वनिवेशादनुमितेः संशयाप्रतिबध्यत्वनिर्वाहः । संशयादिसाधारण-

स्येत्यनेन प्रतिबन्धकतावच्छेदककोटौ संशयान्यत्वरूपानिर्णयत्वा-निवेशः सूचितः। एतन्मते संशयेऽनुमित्यादौ च विपरीतनिर्णयस्य प्रतिबन्धकत्वान्तरं बोध्यम्। विवेचितं चेदमधस्तात्।

ग्राह्यसंशयस्याप्रतिबन्धकत्ववादिनां मतमाह। साधारणे चेति। साधारणे दोषविशेषाजन्योपनीतभाने निश्चयात्मनो विपरीतज्ञानमात्रस्यैव प्रतिबन्धकत्वादित्यन्वयः। साधारणे। संशयनिश्चयसाधारणे। तथा च पूर्ववत् संशयान्यत्वेन प्रतिबध्यतावच्छेदकमिति भावः। उपनीतभानत्वमत्र कल्पे लौकिकसन्निकर्षजन्यनिर्णयान्यज्ञानत्वम्, अत आनुमानिकादेरपि विपरीतनिर्णयस्य लौकिकसन्निकर्षजन्यमपि संशयं प्रति विरोधिता। प्रत्यक्षत्वानिवेशादनुमित्यादौ न प्रतिबन्धकत्वान्तरकल्पनम्। संशयस्य संशयाप्रतिबन्धकत्वमुपपादयितुं निर्णयात्मन इति। ज्ञानमात्रस्येति। मात्रस्येति कृत्स्नार्थकम्।

तदभाववदवृत्तित्वरूपव्याप्तेर्लौकिकप्रत्यक्षमुपपादयतां मतमाह। तत्तद्धूमादाविति। देशान्तरेति। व्यवहितविप्रकृष्टदेशेत्यर्थः। ईदृशासम्भावनाविरहो देशान्तरावृत्तिरयं धूमो यदि वह्न्यभाववद्वृत्तिः स्यात्तदा तत्त्वेनोपलभ्येतेति योग्यानुपलब्धिघटकापत्तिनिर्वाहकपक्षतावच्छेदकनिश्चये उपयुज्यते। पक्षतावच्छेदकातिरिक्तविशेषणाविशेषितप्रतियोगिसत्त्वापादककापत्तेरेव योग्यानुपलब्धिघटकतया देशान्तरवृत्तौ व्यभिचारवारणाय देशान्तरवृत्तित्वस्यापादकविशेषणतया आवश्यकत्वेन तस्य पक्षविशेषणत्वमप्यावश्यकमिति हृदयम्। धूमान्तरे व्यभिचारसंशयसत्त्वेन पक्षे व्याप्यवत्तानिश्चयोपयोगी व्याप्तौ धूमत्वावच्छिन्नत्वनिश्चयो न सम्भवतीत्याशङ्कानिराकरणार्थमाह। लाघवादिति। व्यभिचारसंशयप्रतिबन्धकतायां लाघवज्ञानस्योत्तेजकत्वादिति भावः। प्रतियोगिग्राहकातिरिक्तविशेषणानवच्छिन्नत्वस्यापादकविशेषणताया आवश्यकत्वाद्देशान्तरावृत्तित्वस्य च प्रतियोग्यग्राहकत्वेन तदवच्छिन्नापादककापत्तेर्न योग्यानुलम्भनिर्वाहकतेत्यादिरस्वरसो वदन्तीत्यनेन सूचितः।

इति अनुमानगादाधर्यां व्याप्तिग्रहोपायप्रकरणम्॥

अथ तर्कप्रकरणम् ।

(चि०) तर्कस्य व्याप्तिग्रहमूलकत्वेना(१)नवस्थेति चेत् ? न । यावदाशङ्कं तर्कानुसरणात् । यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः ।

(गा०) तर्को यत्रानुमित्यौपयिकव्याप्तिनिश्चयविरोधिशङ्कानिवृत्तिरूपेयते तत्र तर्ककारणीभूतस्यापादकनिष्ठापाद्यव्याप्त्यापाद्यव्यतिरेकपक्षतावच्छेदकादीनां निश्चयस्य विरोधिनी या शङ्का तन्निवृत्त्यर्थमपि तर्कात् पूर्वं तर्कान्तरमुपेयं तत्पूर्वमपि तज्जनकनिश्चयविरोधिशङ्कान्तरनिवृत्त्यर्थं तर्कान्तरमित्यनवस्थिततर्कधारास्वीकारप्रसङ्ग इत्याशङ्कते मूले । तर्कस्येति । व्याप्तिग्रहमूलकत्वेन । व्याप्त्यादिनिश्चयजन्यत्वेन । यावदाशङ्कमिति । यत्र यत्राशङ्कायास्तर्कान्यतोऽनिवृत्तिस्तत्रैव शङ्कानिवृत्त्यर्थं तर्कस्वीकारादित्यर्थः । यत्र । यादृशतर्के उत्पत्स्यमाने इति शेषः । यादृशतर्कात्पूर्वमित्यर्थः । व्याघातेन शङ्कैव नावतरतीति । प्रवृत्तिव्याघातेन शङ्कानवतारः कारणान्तराभावप्रयुक्तः सिध्यतीत्यर्थः । केचित्तु व्याघातेनैव तद्विरोधिनी शङ्का नावतरति, तर्कान्यस्य विरोधितयैव तादृशशङ्काविरह इति यावदिति वर्णयन्ति । तर्कं विनैव । तर्कान्तरं विनैव । तर्ककारणव्याप्त्यादिनिश्चयसम्भवो यत इत्यर्थः । तथा च तत्रैव विच्छेदान्नानवस्थितिरिति भावः ।

कीदृशतर्कविरोधिनीनां कीदृशशङ्कानां तर्कान्यस्य कस्य प्रतिबन्धकतया निवृत्तिरित्याकाङ्क्षायां तर्कविशेषविरोधिशङ्काविशेषेषु अन्यप्रतिबन्धकताव्यवस्थापकं तेषां दुरपह्नवप्रवृत्तिविशेषानिर्वाहप्रसञ्जकत्वं दर्शयन्नुपादानस्य तत्प्रतिबन्धकत्वमभिधत्ते । तथाहीत्यादिना तस्मात्तदुपादानमेव शङ्काप्रतिबन्धकमित्यन्तेन ।

(चि०) तथा हि । धूमो यदि वह्न्यसमवहितताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तोत्पन्नः

(१) व्याप्तिमूलकत्वेनेति पाठान्तरम् ।

स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति ? क्वचिद् वह्निं विनापि भविष्यति ? अहेतुक एव चोत्पत्स्यते ? इति शङ्का स्यात्, सर्वत्र स्वक्रियाव्याघातः स्यात्। यदि हि गृहीतान्वयव्यतिरेकं हेतुं विनापि कार्योत्पत्तिं शङ्केत, तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् ? तेन विनापि तत्सम्भवात। तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्।

(दी०) हुताशनरासभादिपदार्थसार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानोऽवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे किमेतानि सर्वाण्येव कारणानि ? किं वा कानिचित्तथा कानिचिच्च नेति ?। तत्र च यस्य व्यतिरेकेऽपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्तिमुपलभते तस्याहेतुत्वमेवावधारयति यथा रासभादेः। यस्य च व्यतिरेके तादृशापरसकलान्वयेऽपि धूमानुत्पत्तिं पश्यति तस्य कारणत्वमेव निश्चिनुते यथा वह्नेः। तत्र चाकारणत्वसन्देहो विरोधितामामादपान्निवर्तते येन तर्केण तमाह । धूम इत्यादि।

(गा०) धूमो यदीत्यादितर्कस्य प्रकृतव्याप्तिग्रहानुपयोगित्वे तत्पूर्वं तर्कान्तरानपेक्षाव्युत्पादनस्यानवस्थयानुमित्यौपयिकव्याप्तिग्रहासम्भवाक्षेपोद्धारानुपयोगितेत्याशङ्कां परिजिहीर्षुर्दीधितिकारो व्याप्तिग्रहोपयोगिनमन्वयव्यतिरेकेण कार्यकारणभावग्रहं प्रत्युपयोगितया मूलोक्ततर्कस्य प्रकृतव्याप्तिग्रहोपयोगितां घटयिष्यन् वह्निधूमकारणताग्राहकान्वयव्यतिरेकं(१) प्रदर्शयति। हुताशनेत्यादिना । अन्वयव्यतिरेकग्रहविषयसमुदायमध्येऽकारणरासभादिकमनन्तर्भाव्य कारणमात्रघटितसमुदायस्यान्वयव्यतिरेकग्रहसम्भवेऽपि तादृशसमुदायत्वसामानाधिकरण्यमात्रेण प्रथमं कारण-

(१) अन्वयव्यतिरेकग्रहमिति पुस्तकान्तरे।

त्रसन्देहेऽपि तत्समुदायान्तर्गतस्य कस्यापि व्यभिचारज्ञानास-म्भवेनैतत्समुदायव्यभिचारिधूमाकल्पने लाघवमिति प्रतिसन्धा-नेन च तद्घटितसमुदायत्वावच्छेदेन कारणतानिश्चयात्तर्कवैयर्थ्यं स्यादिति तदन्तर्भावस्यावश्यकत्वमाविष्कर्तुं रासभपदोपादानं बोध्यम् । यद्यप्यकारणघटितसमुदायत्वावच्छेदेनापि कदाचि-त्कारणत्वनिश्चयसम्भवात्तर्कवैफल्यं सम्भवति । तथापि विशे-षदर्शिनां न तर्कवैयर्थ्यमित्याविष्कर्तुं रासभपदोपादानं बोध्यम् ।

वस्तुतस्तु तादृशान्वयव्यतिरेकग्रहदशायामकारणेऽपि कारणत्व-ग्रहसम्भवाद्धूमसमवधानकाले तादृशयत्किञ्चिद्व्यक्त्यसत्त्वदशायां वन्ह्यसमवधानकालीनवह्नितत्समवधानेतरयावत्कारणकत्वनिश्चया-सम्भवात्तर्क एवानुपपन्न इत्याशङ्कापरोऽयमवधार्य सन्दिग्धे इत्य-न्तग्रन्थः । यस्य च व्यतिरेकेऽपीत्यादिग्रन्थेनाकारणे कारणत्वा-भावनिश्चयं सम्पाद्य तर्कसम्भवो दर्शितः । तथा च रासभादिरू-पाकारणेऽकारणताग्रहसम्भवाय रासभादिघटितसमुदाये व्यतिरेक-व्यभिचारो दर्शित इति ध्येयम् । अवश्यमेतेषामिति । धूमसामग्री एतत्समुदायान्तर्गतैवेत्यवधार्येत्यर्थः । एतदवधारणं च धूमे वह्न्यस-मवधानकालीनवह्नितत्समवधानेतरयावत्कारणकत्वस्यापाद्यव्यतिरे-करूपस्य निश्चये उपयुज्यते । तदनिश्चये वह्नितत्समवधानेतरयाव-द्धूमकारणवति वन्ह्यसमवधानकाले तादृशयावद्धूमकारणव-त्त्वस्य दुर्निश्चेयत्वात्तत्समुदायानन्तर्गतेष्वपि वस्तुषु धूमकारणत्वसं-शयसम्भवात् ।

केचित्तु । अवश्यमेतेषामिति । धूमो हुताशनरासभाद्यन्यत-मकारणक इति निश्चित्येत्यर्थः । सामान्यरूपेण कारणतावगाही ए-तादृशनिश्चय अहेतुक एवोत्पत्स्यते इत्येतादृशशङ्कानिवर्तकतया धूमस्य वह्निकारणकत्वनिश्चायकतर्कसम्पादक इत्याहुः । तच्चि-न्त्यम् । कादाचित्कतया सकारणकत्वनिश्चयादेवाहेतुकत्वशङ्का-निवृत्तिसम्भवादुक्तसमुदायान्तर्गतकारणकत्वनिश्चयपर्यन्तानपेक्षणा-त् । सन्दिग्धे इति । अग्रिमेण इतीत्यनेनान्वयः । किमेतानीति । धू-मकारणत्वरूपभावकोटिकसमुदायत्वावच्छेदेन भानलाभाय सर्वा-णीति । सामानाधिकरण्यमात्रेण कोटिद्वयावगाहने संशयत्वायोगात्,

सामानाधिकरण्येन कारणत्वस्यावधारितत्वादवच्छेदकावच्छेदेन विपरीतकोटिभानं न सम्भवतीति सामानाधिकरण्यमात्रेण तदवगाहितालाभाय कानिचिन्नेत्युक्तम् । सामानाधिकरण्येन विपरीतकोटिभाने सामानाधिकरण्येन भावकोटेर्निश्चितत्वमविरोधीत्येनल्लाभाय कानिचित्तथेत्यनेन भावकोटिसामानाधिकरण्यसंवलनेन विपरीतकोटिसामानाधिकरण्योल्लेखः ।

केचित्तु । किमेतानीति । धूमकारणत्वं हुताशनरासभाद्यन्यतमत्वव्यापकं तन्न्यूनवृत्ति वेत्यर्थः । अयं च संशयो विशिष्य धूमकारणतानिश्चये तर्कोपयोगितानिर्वाहकस्य वह्निर्धूमजनको न वेति संशयस्य सम्पादकः । अन्यतमत्वावच्छेदेन कारणतानिश्चये तादृशसंशयासम्भवादिति प्रदर्शित इत्याहुः ।

नन्वेवं क्रमेण समूहान्तर्गतस्य वह्नेरिव रासभादेरपि कथं धूमत्वावच्छिन्नं प्रति कारणतानिश्चयः । धूमशक्तिविशेषे वह्न्यसमवहिताजन्यत्वस्येव रासभाद्यसमवहिताजन्यत्वस्यापि सुनिश्चेयतया धूमत्वसामानाधिकरण्येन वह्निजन्यताया इव रासभादिजन्यताया अपि ग्राहकस्य तर्कस्य सम्भवात् । धूमत्वसामानाधिकरण्येन वह्निजन्यत्वे गृह्यमाणे वक्ष्यमाणरीत्या तदवच्छेदेन वह्निजन्यताया इव धूमत्वसामानाधिकरण्येन रासभादिजन्यत्वे गृह्यमाणे तदवच्छेदेन रासभादिजन्यताया अपि सुग्रहत्वात् । धूमत्वावच्छेदेन च वह्न्यसमवहिताजन्यत्वस्यापि दुर्निश्चेयतया वह्निजन्यताग्राहकस्यापि धूमसामान्यपक्षकतर्कस्यासम्भवात् । यदि च वह्न्यसमवधानकालीनवह्नितद्व्यापारेतरयावत्कारणकत्ववद् रासभाद्यसमवधानकालीनतत्तद्व्यापारेतरयावत्कारणकत्वस्य रासभाद्यसमवहिताजन्ये धूमे सत्त्वान्न तत्र रासभादिजन्यताग्राहकतर्कोऽन्नान्तानामवतरति । अत एव तद्धूमत्वावच्छिन्नं प्रत्यपि न तेषां हेतुताग्रह इत्युच्यते तदापि वह्नितत्समवधानेतरयावद्धूमकारणानां वह्न्यसमवधानकालीनत्वग्रहदशायां तत्र रासभासत्त्वे रासभस्य धूमकारणत्वसन्देहे धूमे पारिभाषिकवक्ष्यमाणजन्यत्वनिश्चयो न सम्भवति रासभस्यापि तथाविधयावत्कारणान्तर्गतत्वेन सन्दिग्धतया तस्य वह्न्यसमवधानकालीनत्वादर्शनेन धूमे विशि-

एसंशयादित्याशङ्कानिराकरणार्थोक्तलाघवेनोक्तसमुदायत्वावच्छेदेन धूमकारणतानिश्चयासम्भवप्रदर्शनाय च व्यभिचारनिर्णयेन रासभत्वाद्यवच्छिन्नस्य कारणताविरहो निश्चीयते इत्याह । तत्र चेति ।

यद्यपि धूमान्तरे रासभादेर्व्यभिचारदर्शनेऽपि तद्धूमत्वावच्छिन्नं प्रति रासभादेः कारणतासन्देहो नापैति । तथापि यत्सामान्ये यत्सामान्यस्य कारणत्वमसति बाधके तद्विशेषस्यैवेत्यादिनियमात् सामान्यकारणताविरहावधारणादेव विशेषकारणताविरहावधारणमित्यवधेयम् । धूमत्वावच्छिन्नं प्रति महानसीयवह्नित्वेन कारणताग्राहकतर्कावतारसम्भवेऽपि व्यभिचारनिश्चयादेव न तद्ग्रहः । यावद् व्यभिचारो न निश्चीयते वक्ष्यमाणतर्कश्चावतरति तद्धूमत्वापेक्षया धूमत्वस्य जन्यतावच्छेदकत्वे लाघवं च प्रतिसन्धत्ते तावद्धूमत्वावच्छिन्नं प्रति तद्व्यापकतानवच्छेदकरूपावच्छिन्नस्यापि कारणतां निश्चिनोत्येव, उत्तरकालं च व्यभिचारं प्रत्यक्षतो निश्चिते तादृशकारणतानिश्चये भ्रमत्वं गृह्यते इति भावः ।

यस्य चेति । यद्व्यतिरेकविशिष्टतद्व्यापारभिन्नसकलधूमकारणसमवधानक्षणे तदधिकरणनिष्ठधूमोत्पत्त्यव्यवहितपूर्वत्वाभावं पश्यतीत्यर्थः । तस्य कारणत्वमेवेति । धूमे स्वाधिकरणदेशावच्छिन्नतदभाववत्त्वाव्यवहितप्राक्क्षणकत्वाभावरूपवह्न्यसमवहितजन्यत्वविशिष्टतदसमवधानकालीनतद्व्यापारेतरयावत्स्वकारणकत्वरूपतत्कारणकत्वव्याप्यधर्मनिश्चयेन तत्कारणकत्वाभावमापादकीकृत्य निश्चिनतादृशधर्माभावापादनसम्भवादिति भावः । ईदृशक्रमेण कार्यकारणभावग्रहे तर्कस्य हेतुत्वे मानाभावात् प्रतिबन्धकशङ्काविघटनद्वारा तत्र तर्कोपयोगिता दर्शयति । तत्र चेति । धूमे वह्निकारणकत्वनिश्चये चेत्यर्थः । अकारणत्वसन्देहः । धूमे वह्निकारणकत्वाभावसन्देहः । विरोधिताम् । एकत्रैककालावच्छेदेनानुत्पद्यमानताम् । निवर्तते इति । तथा च ग्राह्यसंशयस्य प्रत्यक्षनिश्चयप्रतिबन्धकत्वमतमवलम्ब्यैतदभिहितम् । तदप्रतिबन्धकत्वमते संशयसामग्रीविघटनेन तदभावज्ञानप्रतिबन्धकस्य तदभावापादकतर्कस्य तन्निश्चयोपयोगितेति भावः ।

अथ तर्कहेतुयावद्व्यतिरेकनिश्चय एवापादककोटिकशङ्कां नि-

वर्तयिष्यति, आपादकस्यापाद्यव्याप्यतया आपाद्यव्यतिरेकस्यापादकव्यतिरेकव्याप्यतया तन्निश्चयस्य विशेषदर्शनत्वादिति किं तर्केण ? न चापाद्यव्यतिरेकस्यापादकव्यतिरेकव्याप्यत्वेऽपि तादृशव्याप्तिप्रतिसन्धानानियमेन तर्कस्योपयोग इति वाच्यम् । आपाद्ये आपादकव्यापकतानिश्चयस्य तर्ककारणतया तादृशकारणज्ञाननियमेनापाद्याभावे आपादकाभावव्याप्तिज्ञानाभावस्याकिञ्चित्करत्वात् । पुरुषत्वाभावे करामावव्याप्यग्रहेऽपि करादिव्यापकत्वेन पुरुषत्वादिग्रहसहितपुरुषत्वाद्यभावग्रहस्य करादिसंशयनिवर्तकत्वादिति चेन्न । तर्ककारणीभूतज्ञाननाशेऽपि तर्कसत्त्वे शङ्कानुत्पत्त्यनुरोधेन तर्कस्योपयोगित्वात् ।

न च पूर्वजातव्यापाद्यव्यतिरेकनिश्चयस्य नाशेऽपि तन्मूलकानुमानसत्तादृशज्ञानादापादकव्यापकताज्ञानाद्योत्तरकालमपि शङ्कानुत्पादनिर्वाहात्तर्कस्याकिञ्चित्करतेति वाच्यम् । कुतश्चित्प्रतिबन्धकात्तादृशज्ञानानुत्पादेऽपि तर्केण शङ्काप्रतिबन्धात् ।

आहार्यशङ्काया विशेषदर्शनानिवर्तनीयतया तादृशशङ्काया अप्रतिबन्धकत्वेऽपि तत्सामग्रीसत्त्वे निश्चयोत्पत्त्यसम्भवात्तत्सामग्रीविघटनाय तर्कापेक्षेति मिश्राः ।

ननु कार्यकारणभावग्रहस्यैव का प्रकृतोपयोगिता यदर्थं तद्ग्राहकतर्कविरोधिशङ्कायां व्याघात उपदर्श्यते इत्यत आह ।

(दी०) अनुसन्धेयश्चावश्यं कार्यकारणभावग्रहः, तदधीनत्वाद्व्याप्तिबुद्धेः । सामानाधिकरण्येनान्वयव्यतिरेकग्रहाज्जायमानस्य तथैव हेतुहेतुमद्भावं गृह्णतस्तस्यैव वा व्याप्तिपरिच्छेदकत्वात् । विपर्यये तत्कोटिमात्रपर्यवसायिनश्च तर्कस्य तदभावकोटिकशङ्कानिवर्तकत्वम् । अन्यथा धूमो यदि वह्निजन्यजन्यान्यतरो न स्यादित्यादेरपि तथात्वापत्तेः । तथा पर्यवसायिता च क्वचिद् विशेषतो व्याप्त्या सामान्यतोऽपि क्वचित्पक्षधर्मताबलात् तत्सम्पत्तये चात्र वह्न्यसमवहितजन्यत्वेन पक्षो विशेष्यः । विशेषणवत्त्वेनोपस्थिते विशिष्टाभावबुद्धेर्विशे-

व्याप्तिभावप्रत्यवलम्बितत्वात् तयोपस्थितिनिरोधि चावन्हेरित्यादि शङ्काद्वयमग्रे निरसनीयम् ।

(गा०) अनुसन्धेयश्चेति । व्याप्तिग्रहार्थमपेक्षणीय इत्यर्थः । तदधीनत्वादिति । कार्यत्वस्य व्यभिचारविरोधित्वेन कार्यतानिश्चयस्य विशेषदर्शनतया स्वत आपाद्यव्यतिरेकानिश्चयमुद्रया, धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्येतादृशतर्कोत्थापकतया च व्यभिचारशङ्कानिवर्तकत्वादिति भावः । न च कार्यताया व्याप्तिघटितत्वात् कार्यताज्ञानमेव व्याप्तिज्ञानं न तु तदधीनमिति वाच्यम् । कार्यताघटकव्याप्तेः कार्याव्यवहितप्राक्क्षणावच्छिन्नकार्याधिकरणवृत्त्यभावाप्रतियोगित्वरूपव्यापकताघटिततया प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावाप्रतियोगित्वरूपव्यापकताघटितानुमित्यौपयिकव्याप्तेस्ततोऽन्यत्वात् । कार्यकारणभावग्रहे कार्यताघटकतयानुमित्यौपयिकव्याप्तेरभानेऽपि कार्यतायास्तादृशव्याप्तिनियततया कार्यताग्रहकालेऽपि व्यभिचारशङ्का नोत्पद्यते विशेषदर्शनाभावस्य कार्यसहवर्तितया हेतुत्वादिति ।

ग्राह्यसंशयस्याप्रतिबन्धकतामते प्राग् व्यभिचारसंशयसत्त्वेऽपि समूहालम्बनव्याप्तिनिश्चयात्मक एव कार्यकारणभावनिश्चयः सम्भवतीत्यतोऽपि कार्यकारणभावग्राहकतर्कविरोधिशङ्काविरहोपपादनं प्रकृतोपयोगितामासादयनीत्याशयेनाह । सामानाधिकरण्येनेति । एकदेशवृत्तित्वघटितो योऽन्वयो यत्राधिकरणे यदा कार्यसत्त्वं तत्र तदव्यवहितपूर्वक्षणे कारणसत्त्वरूपो यश्च तादृशव्यतिरेको यत्राधिकरणे यदा कारणाभावस्तत्र तदग्रिमक्षणे कार्याभावरूपस्तद्ग्रहाज्ज्ञायमानस्य । तथैव हेतुहेतुमद्भावम् । एकदेशनिष्ठोभयसंयोगादिरूपसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नकार्यकारणभावम् । गृह्णतः । विपर्ययीकुर्वतः । तस्यैव । कार्यकारणभावग्रहस्यैव । व्याप्तिपरिच्छेदकत्वात् । व्याप्तिनिश्चयरूपत्वादित्यर्थः । यदा कार्यं तदव्यवहितप्राक्क्षणे कारणम्, यदा कारणाभावस्तदग्रिमक्षणे च कार्याभाव इत्येतादृशान्वयव्यतिरेकग्रहग्राह्यस्य कालिकप्रत्यासत्त्यवच्छिन्नकार्यत्वस्य व्याप्तिविरोधिव्यभिचाराव्यावर्तकतया कार्यकारणभावस्य सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वोत्कीर्तनम् ।

वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहिताजन्यत्वमापादकम्, जन्यत्वाभाव आपाद्यः। वह्न्यसमवहिताजन्यत्वविशिष्टधूमत्वं पक्षतावच्छेदकम्। घटादौ व्यभिचारवारणाय वन्ह्यसमवहिताजन्यत्वरूपमापादकविशेषणमुपात्तम्। तादृशविशेषणाभावमादाय विपर्ययपर्यवसानवारणाय तस्य पक्षविशेषणतयोपादानम्। अतो ऽवह्नेरेवेत्यादिशङ्काद्वयनिराकरणमप्युपपद्यते। तदुभयस्यापाद्यव्यतिरेकानिश्चयाविरोधित्वेऽपि विशिष्टपक्षग्रहविरोधितया तर्कविरोधित्वादित्युपाध्यायप्रभृतयो व्याचक्षते। तत्र वन्ह्यसमवहितजन्यत्वसाधारणविशिष्टाभावत्वप्रकारेण वह्निसमवहितजन्यत्वरूपस्यापादकाभावस्य जन्यतारूपेणापाद्याभावेन सिद्धावपि न क्षतिः। तादृशसिद्धेरसमानप्रकारकतया वह्निसमवहितजन्यत्वत्वेन वह्निसमवहितजन्यत्वाभावकोटिकशङ्काविरोधित्वविरहेऽपि तदवच्छिन्नापादकाभावस्तदवच्छिन्नप्रकारकज्ञानविरोधित्वेन वह्निसमवहितजन्यत्वाभावत्वावच्छिन्नापादककस्य प्रकृततर्कस्य तादृशशङ्काविघटनद्वारा वह्निसमवहितजन्यत्वत्वावच्छिन्ननिश्चायकतासम्भवादिति दर्शितपक्षविशेषणमनर्थकम्। यदि च शुद्धतद्धर्मावच्छिन्नापादककतर्कस्यैव तद्रूपावच्छिन्नविशिष्टज्ञानप्रतिबन्धकता, अन्यथा यदि रूपं गुणान्यत्वविशिष्टसत्तावत् स्यात्तर्हि गुणो न स्यादित्यादितर्कावतारदशायां रूपं सत्तावदिति ज्ञानानुदयप्रसङ्गादिति नोक्तविशिष्टापादककतर्कस्य वह्निसमवहिताजन्यत्वकोटिकशङ्काविरोधितेति मन्यते, तदा तादृशपक्षविशेषणोपादानेऽपि न तस्य तादृशशङ्काविरोधिता निर्वहतीत्यलं तादृशपक्षविशेषणोपादानेनेत्याशङ्कां निराकृत्य तादृशविशेषणोपादानं सार्थकयति। विपर्यये तत्कोटिमात्रपर्यवसायिन इति। तत्कोटितावच्छेदकावच्छिन्नसाधकविपर्ययप्रतियोगितावच्छेदकावच्छिन्नापाद्यकस्येत्यर्थः।

तदभावशङ्केति। तदवच्छिन्नाभावशङ्केत्यर्थः। तेन धूमजनकतेजस्वी न स्यान्निर्धूमः स्यादित्याद्यापत्तेर्धूमजनकतेजस्त्वादिना वह्निमात्रपर्यवसायित्वेऽपि न वह्निमान्न वेति शङ्काविरोधित्वम्। विपर्ययानुमानादनाहार्यतादृशशङ्काया निवृत्तिस्तर्कादप्याहार्यसाधारण्यात्तादृश्या एवेति तु पर्यवसितार्थः। न तु विशेषिताविशेषितसाधारणतद्धर्मावच्छिन्नापादककतर्कस्यैव तदवच्छिन्नकोटिकशङ्काविरो-

धित्वं तथा सति उक्तातिप्रसङ्गापातात् । नापि शुद्धतद्धर्मावच्छिन्नापादकक्तत्कर्ममात्रस्य तथात्वम्, गुणकर्मभिन्नं सामान्यं यदि गुणकर्मान्यत्वविशिष्टसत्तावत् स्याद् द्रव्यं स्यादित्येतादृशतर्कस्य शुद्धसत्तात्वावच्छिन्नापादककत्वविरहेऽपि सत्तात्वावच्छिन्नविशिष्टधीविरोधित्वानुभवादित्यवधारणतात्पर्यार्थः ।

मात्रपदप्रयोजनमाह । अन्यथेति । येन केनापि रूपेण तत्कोटिपर्यवसायिनस्तर्कस्यैव तदभावशङ्कानिवर्तकत्वे इत्यर्थः । व्यापकतानवच्छेदकप्रकारेणानुमितौ साध्यभानानभ्युपगन्तृप्राचीनमतानुसारे पुनस्तत्कोटिमात्रपर्यवसायित्वं तद्धर्माश्रयमात्रवृत्तिविधेयताप्रयोजकापाद्याभावकत्वं तदवच्छिन्नाभावशङ्काविरोधित्वप्रयोजकमिति यथाश्रुत एव विपर्यय इत्यादेरर्थः । तन्मते समानविषयकत्वेनैव विरोधिज्ञानस्य प्रतिबन्धकतया विशेषणवत्तानिश्चयकालीनविशिष्टाभावानुमितेर्विशेष्याभावमात्रविधेयकत्वनिर्वाहः, तथा च सत्यन्यथेत्यस्यापि तत्कोटितदितरकोटिपर्यवसायिनोऽपि तर्कस्य तदभावशङ्काविरोधित्वे इत्येवार्थः ।

वह्नितच्छून्येति । वह्निजन्यतदसमवहितजन्यान्यतरो न स्यादित्यर्थः । आपाद्यप्रतियोगि जन्यत्वं चाग्रे निर्वक्ष्यमाणं पारिभाषिकमेव ग्राह्यं तेन वह्निसमवहितजन्यघटादौ न व्यभिचारः । वह्निपदं वा वह्निसमवहितपरम्, अन्यतरत्वञ्च नातिरिक्तो भेदो येन वन्हिजन्यत्वपर्यवसायिना न स्यात् किं तु स्वप्रतियोगितावच्छेदकीभूततच्छेदप्रतियोगितावच्छेदकतत्तद्धर्मस्वरूपमेवत्याशयेनेदम् । अत एव धूमालोकान्यतरत्वस्य धूमत्वालोकत्वरूपतापक्षे तेन हेतुना वह्निव्याप्यत्वानुमाने धर्मिभेदविरहेण वैयर्थ्यं सम्भवतीत्याशङ्क्य धूमत्वत्वाद्यप्रवेशेन परामर्शग्रन्थे दीधितिकृत् समाधास्यति ।

न च वह्निपदस्य वह्निसमवहितपरत्वपक्षे वह्निसमवहितजन्यभेदविशिष्टवह्न्यसमवहितजन्यभेदस्याजन्यत्वसमनियततया ततो गुरुतया च प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नभेदरूपान्यतरत्वाप्रसिद्धिरिति वाच्यम् । एकभेदविशिष्टपरभेदात्यन्ताभावस्यैवान्यतरत्वस्यात्र विवक्षितत्वात् तुल्ययुक्त्या तस्यापि वह्निसमवहितजन्यतादिरूपानतिरिक्तत्वात् । स्वसमानाधिकरणवह्निमत्क्षणान-

न्तरोत्पन्नत्वरूपवह्निसमवहितजन्यत्वस्वाधिकरणदेशावच्छिन्नवह्न्य-भाववत्क्षणाव्यवहितक्षणोत्पन्नत्वरूपतदसमवहितजन्यत्वसाधारणस्यो-भयानुगतस्याभावेन(१) न तादृशान्यतरत्त्वत्वावच्छिन्नतद-त्यन्ताभावरूपापादकाप्रसिद्धिः।

वह्निवच्छून्यान्यतरजन्यो न स्यादिति पाठे तु तच्छून्यपदं वह्नित्व-शून्यपरम्। वह्निवह्नित्वशून्यान्यतरत्वं च वह्निवृत्ति सद् वह्नित्वशू-न्यावृत्ति यत्तच्छून्यत्वं न तु तद्भिन्नभिन्नत्वम्, वह्निभिन्नत्वे सति वह्नि-त्वशून्यभिन्नत्वस्याप्रसिद्धेः। गुरुधर्मस्याभावप्रतियोगितावच्छेदक-त्वोपगमात् तदन्यतरजन्यतात्वस्य जन्यतात्वसमनियतत्वेऽपि न तदवच्छिन्नाभावाप्रसिद्धिः। आदिपदात् किञ्चिज्जन्यो न स्यादुत्पन्नो न स्यादित्यादितर्कपरिग्रहः। तथात्वापत्तेः। वह्निजन्यत्वाभावशङ्कानिव-र्तकत्वापत्तेः। वह्निपदस्य वह्निसमवहितपरत्वपक्षे वह्निसमवहितजन्य-त्वाभावशङ्कानिवर्तकत्वापत्तेरित्यर्थः। अस्यापि तर्कस्य वह्न्यसमव-हितजन्यत्वसाधारणरूपेण वह्निजन्यत्वपर्यवसायित्वादिति भावः।

तथा पर्यवसायिता तु। निरुक्ततत्कोटिमात्रपर्यवसायिता तु। विशेषतो व्याप्त्या। आपाद्याभावनिष्ठया तद्रूपावच्छिन्ननिरूपितया तद्रूपवन्मात्रवृत्तिधर्मावच्छिन्ननिरूपितया वा व्याप्त्येत्यर्थः। निर्वह-तीति शेषः। सामान्यत इति। व्याप्त्येत्यनुषज्यते इति। तथा च ता-दृश्या तद्धर्मव्यापकधर्मावच्छिन्ननिरूपितया व्याप्त्यापि क्वचिन्निर्वह-तीत्यर्थः। पक्षधर्मताबलात्। प्रकृतपक्षे तद्रूपावच्छिन्नेतरव्यापकताव-च्छेदकरूपाक्रान्तस्य बाधबलात्। इतरबाधादिसहकृतपरामर्शस्य व्यापकतानवच्छेदकेनापि विशेषरूपेण साध्यानुमितिजनकत्वादिति भावः। तत्सम्पत्तये। जन्यत्वव्यापकतावच्छेदकीभूतविशिष्टा-भावत्वाक्रान्तस्य वह्न्यसमवहितजन्यत्वरूपविशेषणाभावस्य धूम-त्वावच्छिन्ने बाधनिश्चयसम्पत्तये। पक्षः। धूमत्वावच्छिन्नः। विशे-षणीय इति। अन्यथा जन्यत्वस्य वह्निसमवहितजन्यत्वत्वावच्छि-न्नासाधकत्वेन प्रकृततर्कस्य तद्धर्मावच्छिन्नाभावशङ्कानिवर्तकत्वा-नुपपत्तिः। उपस्थिते। निश्चिते। विशिष्टाभावबुद्धेः। विशिष्टाभा-वत्वावच्छिन्नसाध्यकानुमितेः। विशेष्याभावमात्रावलम्बितत्वात्।

(१) अभावेऽपीति पाठान्तरम्।

विशेष्याभावमात्रवृत्तिधर्मावच्छिन्नप्रकारकत्वानियमात् । तादृशधर्माश्रयमात्रविधेयकत्वानियमाद्वा, विशेषणवत्तानिश्चयस्यैव विशिष्टाभावत्वाक्रान्तविशेषणाभावरूपैकविशेष्यबाधरूपत्वादिति भावः ।

न च तर्कस्य तादृशशङ्कानिवर्तकत्वे विपर्ययानुमितिफलोपधानमतन्त्रम्, यत्किञ्चित्कारणविरहेण तदनुपधानस्थलेऽपि तस्य तथात्वात् अत आपाद्याभावस्य तद्रूपावच्छिन्नासिद्धियोग्यतैव तर्कस्य तद्रूपावच्छिन्नाभावशङ्कानिवर्तकत्वोपयोगिनी वाच्या । तथा चैतादृशेतरबाधनिश्चयशून्यकालेऽपि योग्यताया अव्याहतत्वात् तर्कस्य पक्षे तादृशनिश्चयसम्पादकविशेषणदानमप्रयोजकमिति वाच्यम् । पर्वतो निर्वह्निः स्यान्निर्धूमः स्यादित्यादितर्कस्याभौमवह्निबाधानवतारदशायां भौमवह्नित्वावच्छिन्नाभावशङ्कानपनायकत्वात् प्रकृततर्कौपयिकव्याप्त्यवगाहिप्रकृतपक्षतावच्छेदकावच्छिन्नधर्मिकयद्रूपावच्छिन्नाभाववत्ताज्ञानाधीनापादकाभावानुमितेरसति प्रतिबन्धके यत्कोटिनावच्छेदकावच्छिन्नप्रकारतानियमस्तद्रूपावच्छिन्नापाद्यविषयकत्वस्यैव तर्के तत्कोटितावच्छेदकावच्छिन्नाभावशङ्काविरोधित्वप्रयोजकत्वात् पक्षतावच्छेदके वह्न्युपसमवहिताजन्यत्वप्रवेशनस्यावश्यकत्वात् ।

धूमादिलिङ्गकद्रव्यत्वावच्छिन्नसाध्यकानुमितौ वह्नित्वावच्छिन्नप्रकारताकत्वविरहादुक्तनियमासम्भव इति प्रकृततर्कप्रयोजकव्याप्त्यवगाहित्वमापाद्याभावज्ञानविशेषणम् । यत्र धूमस्तत्र वह्निरित्युक्ततर्कप्रयोजकव्यतिरेकव्याप्तिज्ञानजन्यायां वह्न्यभावलिङ्गकधूमाभावानुमितौ वह्नित्वावच्छिन्नप्रकारताविरहादुक्तनियमासम्भव इति प्रकृतापाद्याभाववत्तावगाहित्वं व्याप्तिज्ञानविशेषणम् । शुद्धपर्वतत्वावच्छिन्नपक्षकस्य पर्वतो निर्वह्निः स्यादित्यादितर्कस्याप्यभौमवह्निशून्यः पर्वत इत्याद्याकारकस्वतन्त्रनिश्चयदशायां पर्वतो भौमवह्निमान्न वेत्यादिसंशयनिवर्तकत्वे पुनरसति प्रतिबन्धके यादृशनिश्चयसहकृतयद्रूपावच्छिन्नाभाववत्ताज्ञानजन्यापादकाभावानुमितेस्तत्कोटितावच्छेदकावच्छिन्नप्रकारतानियमस्तादृशनिश्चयविशिष्टत्वे सति तद्रूपावच्छिन्नापाद्यविषयकत्वमेव तादृशशङ्काविरोधित्वप्रयोजकं वाच्यम् । पक्षतावच्छेदके वह्न्युपसमवहिताजन्यत्वविशेषणप्रवेशनं च तादृशनिश्चयवैशिष्ट्य-

निर्वाहायैव । स्वतन्त्रतादृशनिश्चयविशिष्टः शुद्धधूमत्वावच्छिन्नपक्षकतर्कोऽपि शङ्कानिवर्तक इति ध्येयम् ।

[(१)धूमत्वसामानाधिकरण्यमात्रेण वह्न्यसमवहितजन्यत्वाभावनिश्चयसहकृताच्छुद्धधूमत्वावच्छिन्नपक्षकाविशिष्टाभावव्याप्यवत्ताज्ञानान्न तादृशपक्षे वह्निसमवहितजन्यत्वत्वावच्छिन्नप्रकारताकानुमितिः, पक्षतावच्छेदकावच्छेदेनेतरबाधनिश्चयस्यैवापरविशेषप्रकारताप्रयोजकत्वात्, अन्यथा पृथिवीत्वसामानाधिकरण्येन नीलरूपबाधबलात् पृथिवीत्वावच्छेदेन नीलेतररूपानुमितिप्रसङ्गादिति तु न साधु। सामानाधिकरण्यमात्रावगाह्यनुमितौ तादृशविशेषबाधबलादपि अपरविशेषप्रकारकत्वेऽविरोधात् ।]

अत्र पक्षे विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्यामतिरिक्तत्वान्नोक्ततर्कस्येतरबाधबलादपि विशेष्याभावमात्रपर्यवसायिता निर्वहति,इतरबाधस्य व्यापकतावच्छेदकानाक्रान्तधर्माभासकत्वात्, अनतिरिक्तत्वेऽपि वह्निसमवहितजन्यत्वत्वेन विशिष्टाभावपर्यवसानं प्रकृते दुर्घटम् । वह्निसमवहितजन्यतात्वविरोधितद्रूपावच्छिन्नभिन्नविशिष्टाभावत्वावच्छिन्नबाधाग्रहात्। न हि सौरभेतरगन्धवृत्तिजातिविशेषावच्छिन्नबाधग्रहदशायां गन्धत्वावच्छिन्नसाध्यकानुमितौ सौरभत्वेन गन्धो भासते, अपि तु तादृशगन्धभिन्नगन्धत्वेनैवातोऽत्र वन्ह्यसमवहितजन्यत्वभिन्नाविशिष्टाभावत्वेनैव पर्यवसानं भवेत् ।

न च वह्निसमवहितजन्यत्वत्वेन विपर्ययपर्यवसानाय वह्निसमवहितजन्यत्वभिन्नत्वविशिष्टविशिष्टाभावत्वावच्छिन्नाभावत्वेन पक्षो विशेषणीय इति वाच्यम् वह्निसमवहितजन्यत्वभिन्नत्वविशिष्टविशिष्टाभावत्वस्य वन्ह्यसमवहितजन्यतात्वसमनियततया गौरवेण तादृशविशिष्टाभावत्वस्य प्रतियोगितानवच्छेदकतया तदवच्छिन्नाभावाप्रसिद्धेरित्यस्वरसात् सत्यन्तमापाद्यप्रतियोगिकोटौ निवेशयितुमुपक्रमते । वस्तुत इति । तत्र वन्हिसमवहितजन्यपदस्य यथाश्रुतार्थपरतां प्राचीनैरनिराकृतां प्रथमतो निराकरोति । वह्न्यजन्यमपीति ।

(दी०) वस्तुतो वन्ह्यजन्यमपि वह्निसमवहितजन्यं व-

---

(१) पुस्तकान्तरयोर्नास्त्ययं [ ] पाठः ।

न्ह्यसमवहिताजन्यं च सम्भवतीति वन्हिजन्यत्वपर्यवसितं व-ह्निसमवहितजन्यत्वं वाच्यम् । तथा च घटादौ व्यभिचारवार-णाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं(१) मन्नन्तम् । अजन्ये जन्ये च नान्तरीयकवह्निके व्यभिचारवारणाय जन्य इति । तदर्थस्तु वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरयावत्का-रणजन्यत्वम्, तथाविधयावत्कारणकत्वमिति यावत् । तथा च वन्ह्यसमवहिताजन्यत्वे सति वन्ह्यसमवधानकालीनवह्नि-तत्समवधानेतरयावत्कारणको न स्यादिति पर्यवसितोऽर्थः ।

(गा०) नान्तरीयकवन्हिके घटादौ स्वसमानाधिकरणव-ह्निमत्क्षणवृत्तिसामग्रीजन्यत्वरूपस्य तादृशक्षणाव्यवहितोत्तरक्षणो-त्पन्नत्वपर्यवसितस्य वह्निसमवहितजन्यत्वपदार्थस्य वन्ह्यसमव-हिताजन्यत्वस्य च सत्त्वादिति भाव । वह्निजन्यत्वपर्यवसितम् । वह्निजन्यत्वस्वरूपम् । वह्निसमवहितजन्यत्वं वाच्यम । वह्निस-मवहितजन्यपदार्थतावच्छेदकं वाच्यम् । अन्यथा यथाश्रुतवह्नि-समवहितजन्यत्वस्य शुद्धस्य वह्न्यसमवहिताजन्यत्वाविशेषितस्य च वह्निजन्यत्वाव्याप्यत्वेन प्रकृततर्काद्वह्न्यसमवहिताजन्यत्ववि-विशिष्टवह्निसमवहितजन्यत्वनिश्चयेऽपि तादृशनिश्चयस्य तत्स-म्पादकतर्कस्य च वह्निजन्यत्वाभावशङ्कायामविरोधितया तादृश-शङ्कायां बाधकविरहेण वह्निधूमयोः कार्यकारणभावनिश्चयानुपपत्तेः ।

न च वह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वनियततया तन्नि-श्चयादेव व्याप्तिनिश्चयनिर्वाहात् कार्यकारणभावग्रहोऽकिञ्चित्कर इति वाच्यम् । स्वाव्यवहितपूर्वक्षणावच्छिन्नवह्निमति तादृशवह्नि-शून्ये च यदुत्पत्तिस्तत्साधारण्येन वह्निसमवहितजन्यत्वस्य वह्नि-व्याप्त्यव्याप्यत्वात् ।

न च वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यत्वस्य व-वह्निव्याप्यत्वनियततया तन्निश्चयादेव व्याप्तिनिश्चय इति वाच्यम् ।

(१) आपाद्यकोटिप्रतियोगिविशेषणमित्यपि पाठान्तरमिति ज्ञायते व्याख्यानुरोधात् ।

तादृशविशेषणविशिष्टस्य केवलजन्यत्वस्यापि वह्निव्याप्यत्वनियततया वह्निसमवहितजन्यत्वनिश्चायकतर्कवैफल्यात्। एवं धूमत्वावच्छेदेन जन्यत्वरूपापाद्यव्यतिरेकनिश्चयासम्भवादुक्ततर्कतो धूमसामान्ये वह्निसमवहितजन्यत्वनिश्चयासम्भवेन व्यक्तिविशेषेष्वेवैतत्तर्कस्य वह्निसमवहितजन्यत्वनिश्चायकतया तादृशनिश्चयस्य च तर्कं विनापि वह्न्यसमवहिताजन्यत्वनिश्चयवत् सम्भवेन तर्कवैफल्यात्।

आपाद्यकोटिप्रतियोगिविशेषणमिति। आपाद्यकोटिप्रतियोगिविशेषणार्थकमित्यर्थः। तथा च घटादिसाधारणस्य केवलवह्निजन्यत्वाभावस्यापादकत्वेऽपि तत्र वह्न्यसमवहिताजन्यत्वरूपविशेषणाभावात्तद्विशिष्टजन्यत्वाभावरूपापाद्यस्य सत्त्वेन न व्यभिचारः। एवं च पक्षे वह्न्यसमवहिताजन्यत्वविशेषणान्तर्भावं विनापि विशिष्टाभावस्य चानतिरिक्तत्वेऽपि च वह्निजन्यत्वमात्रपर्यवसायिता निर्वहतीति भावः। वह्न्यसमवहितजन्यत्वं च वह्न्यसमवहितस्वजनकसामग्रीकत्वम्। वह्न्यसमवहितत्वं च स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणवृत्तित्वम्। एवं च स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्स्वाव्यवहितपूर्वक्षणकत्वमेव पर्यवसितं वह्न्यसमवहितजन्यत्वम्, तदभावस्तद्भिन्नत्वं वा सत्यन्तार्थः। स्वाधिकरणदेशावच्छिन्नत्वस्याभावे निवेशाज्जन्यमात्रस्यैव किञ्चिद्देशावच्छिन्नवह्न्यभाववत्स्वाव्यवहितपूर्वक्षणकत्वेन विशिष्टाभावस्यापाद्यत्वे प्रतियोग्यप्रसिद्धिः, सत्यन्तार्थजन्यत्वयोरुभयाभावस्यापाद्यत्वे चेष्टापत्तिः, धूमे सत्यन्तार्थाभावेनोभयाभावस्याक्षतत्वादित्येतादृशानुपपत्तेर्नावकाशः।

केचित्तु स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकं यद्यत्तदन्यत्वमेव वह्न्यसमवहिताजन्यत्वम्, वह्नौ स्वसमानाधिकरणत्वनिवेशाद्घटाद्यव्यवहितप्राक्क्षणस्यापि देशान्तरवृत्तिवह्निमत्त्वेऽपि न तत्र व्यभिचारः। एवं च यादृशघटादिव्यक्तेरधिकरणे कदाचिदपि वह्निर्नास्ति तत्र सत्यन्तदलसत्त्वेऽपि विशेष्यदलस्य स्वसमानाधिकरणवह्निमदन्यकालवृत्तिवह्नितत्समवधानेतरयावत्कारणकत्वरूपस्य तत्रासत्त्वादेव विशिष्टाभावनिर्वाहान्न व्यभिचार इत्याहुः। तदसत्। तथा सति विवक्षणीयविशेष्यदलार्थनिवेशस्य वह्न्यधिकरणघटादिकमुपेक्ष्य नान्तरी

यकवह्निके व्यभिचारवारणरूपप्रयोजनप्रदर्शनेन न्यूनतापातात् ।

अजन्ये व्यभिचारस्य यथाश्रुतजन्यत्वनिवेशेनैव वारणात् पारिभाषिकतदर्थविवक्षायाः प्रयोजनमाह । जन्ये च नान्तरीयकवह्निके इति । नान्तरीयकः स्वोत्पत्त्यर्थमनपेक्षितोऽपि दैवात् स्वाव्यवहितप्राक्क्षणे स्वाश्रयवृत्तिर्वह्निर्यस्य स तथा । व्यभिचारवारणायेति । तत्र वह्निजन्यत्वाभावस्यापादकस्य वह्न्यसमवहिताजन्यत्वस्य च सत्त्वादिति भावः । वह्न्यसमवधानकालीनेति । वह्न्यसमवधानकालीनानि स्वाधिकरणदेशावच्छिन्नवह्न्यभावतत्क्षणवृत्तीनि वह्नितत्समवधानेतराणि यावन्ति स्वकारणानि तज्जन्यत्वमित्यर्थः । एतत्प्रसिद्धिश्च वह्निजन्ये धूमादौ द्रष्टव्या । अत्र यावत्त्वविशिष्टेषु वह्नितत्समवधानेतरस्वकारणेषु वह्न्यसमवधानकालीनत्वं विधेयम्, तेन नान्तरीयवह्निके घटादौ यावन्ति वह्न्यसमवधानकालीनानि स्वकारणानि तज्जन्यत्वस्याक्षतत्वेऽपि न क्षतिः । यावत्तु वह्नितत्समवधानेतरतादृशघटादिकारणेषु वह्न्यसमवधानकालीनत्वाभावात् वह्निलम्बेन वह्निसमवधानोत्पत्तिक्षणे तत्पूर्वं वा तादृशघटादेरनुत्पादो वह्निसमवधानकालीनस्य तादृशकारणस्यापि यावत्तादृशकारणान्तर्गतत्वात् । ईदृशामिमतोद्देश्यविधेयभावं स्फुटयितुं व्युत्पत्तिसिद्धपूर्वपदार्थविधेयकान्वयबोधजनकबहुव्रीहिणोक्तमेवार्थं विवृणोति । तथाविधेति ।

केचित्तु जन्यत्वानिवेशप्रयुक्तलाघवमनुसृत्याह । तथाविधेतीति व्याचक्रुस्तन्न शोभनम् । एतन्मतेऽपि बहुव्रीह्यर्थस्य सम्बन्धस्य जन्यत्वरूपत्वात् तादृशं यद्यत्त्वं तत्त्वाभावकूटस्य तत्तद्भेदकूटस्य वा विशिष्यैवापादनीयतया आपाद्यकोटौ तादृशयावत्कारणजन्यत्वादेरनिवेशेन लाघवगौरवविचारानवकाशाच्च । नान्तरीयवह्निकस्यापि घटादेर्यत्किञ्चित्कारणस्य तत्प्रागभावादेर्वह्न्यसमवधानकालीनत्वासंभवादेतादृवश्यमतो यावदिति ।

ननु यादृशघटस्य यत्कारणविलम्बेन पूर्वं नोत्पादस्तादृशचरमसंयोगादिरूपं कारणं वह्निसमवधाननाशकालपर्यन्तमासीत्तत्र व्यभिचार ईदृशविवक्षायामपि दुर्वार एव । न च वह्न्यसमवधानकालीनत्वं वह्निसमवधानप्रागभावकालीनत्वम्, ता-

दशाचरमसंयोगादीनां चातथात्वान्न तद्घटादौ व्यभिचार इति वाच्यम् । तद्वह्निसमवधाननाशकालस्यापि भाविवह्न्यन्तरसमवधानप्रागभावकालतया तेषामपि तथात्वादिति चेन्न । स्वीययावत्कारणत्वावच्छेदेन स्वाधिकरणदेशावच्छिन्नवह्निसमवधानाभाववत्क्षणवृत्तित्वस्य विवक्षणीयत्वात् । उक्तस्थले यावत्कारणानां प्रत्येकं तथाविधक्षणवृत्तित्वेऽपि मिलितानां न तादृशक्षणवृत्तित्वं वह्निसमवधाननाशक्षणानां तथाविधघटादियावत्कारणान्तर्गततत्प्रागभावानधिकरणत्वात् वह्निसमवधानप्रागभावक्षणानां च तदन्तर्गततच्चरमसंयोगाद्यनधिकरणत्वादिति तदीयकारणनिष्ठयावत्त्वस्य तादृशेन केनचिदपि क्षणेन निरूपितायां वृत्तावनवच्छेदकत्वविरहेण तादृशघटादौ विशेष्यदलाभावस्याक्षतत्वात् ।

तत्तद्वह्न्यसमवहिताजन्यत्वविशिष्टस्य तत्तद्वह्निसमवधानप्रागभावकालीनवह्नितत्समवधानेतरयावत्कारणकत्वस्याभाव आपादनीय इत्यतो न व्यभिचार इत्यपि कश्चित् ।

अत्र धूमादिजननयोग्यसमुदायस्यासमानकालीनेन्धनादिव्यक्तिघटितस्य यावत्त्वेन न कुत्रापि क्षणे वृत्तिरिति आपाद्याप्रसिद्धिरतः कारणपदं फलोपहितकारणपरं बोध्यम् । यावद्धूमकारणसमुदायान्तर्गतवह्नितत्समवधानयोर्वह्न्यसमवधानकालीनत्वाभावाद् धूमेऽपि नैतद्दलप्रसिद्धिसम्भव इत्यतो वह्नितत्समवधानेतरत्वं कारणविशेषणमुपात्तम् ।

अथ वह्नेर्वह्निसमवधानाभाववत्स्वोत्पत्तिक्षणवृत्तित्वाद्वह्निभेदस्य कारणविशेषणत्वमनर्थकम् । न च वह्निसंयोगाभावो न वह्न्यसमवधानपदार्थः किं तु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभाव एव, वह्न्युत्पत्तिक्षणश्च न तादृशः, तस्य कालिकसम्बन्धेन वह्निमत्त्वादिति वह्नेर्न वह्न्यसमवधानकालीनत्वं निर्वहतीति वह्निभेदनिवेशनमावश्यकमिति वाच्यम् । वह्निमतोऽपि वह्न्युत्पत्तिक्षणस्य देशविशेषावच्छिन्नतदभाववत्त्वात् ।

न च वह्निसमवहितजन्यघटादिसामग्र्यधिकरणक्षणस्यापि देशान्तरावच्छिन्नवह्न्यभाववत्तया स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्त्वस्य विवक्षितत्वाद् वह्न्युत्पत्तिक्षणस्य च धूमाधिकरणावच्छेदेन वह्न्यभाववत्त्वविरहाद्वह्नेर्न वह्न्यसमवधानकालीनत्वमिति

वाच्यम् । यदा यत्र यस्याधिकरणतानियामकः संयोगादिस्त-द्धिकरणमेव तदानीं तद्वृत्तावच्छेदकमन्यथा देशान्तरवृत्तौ दिनान्तरे चात्रानेष्यमाणे घटादाविहाय स घट इत्यादिप्रतीति-प्रसङ्गात् । एवं च वह्न्यादेः स्वोत्पत्तिक्षणवृत्तौ तत्कालीनसम्बन्ध-घतः स्वावयवस्यैवावच्छेदकत्वं न तु स्वसंयोगिनोऽपि धूमवत-स्तदा तत्र तत्संयोगाभावादिति, तत्र च धूमवदवच्छेदेन वह्न्यभाव-वत्त्वस्याक्षतत्वाद् वह्नेरपि तदसमवधानकालीनत्वस्य दुर्वार-त्वात् । मैवम् । यत्र वह्निसमवधानदशायां महाघटनाशस्तदुत्त-रक्षणे च वह्निसमवधानप्राक्कालीनैरेवावयवसंयोगादिभिर्वह्निमति खण्डघटो जनितस्तादृशस्य खण्डघटस्य यावतां द्रव्याभावसंयो-गादिरूपकारणानां वह्निसमवधानप्राक्कालीनतया तत्र वह्न्यसमव-धानकालीनयावत्कारणकत्वमेवेति व्यभिचारः ।

न च महाघटोत्पत्तिदशायामेव तादृशखण्डघटोत्पत्तिवारणाय महाघटनाशव्यक्तेरपि तद्घटहेतुताया आवश्यकत्वात् तद्घटित-कारणसमुदायस्य च वह्न्यसमवधानकालीनत्वविरहान्न व्यभिचार इति वाच्यम् । यत्र महाघटसामग्रीसमवधानोत्तरं महाघटाधिकरण-कपालसंयुक्तकपालान्तरमन्तर्भाव्य महाघटारम्भककपालेषु खण्ड-घटोत्पत्तिस्तत्र पूर्वं तत्संयोगव्यक्तिरूपकारणविरहादेव तद्घटोत्प-त्तिवारणसम्भवेन महाघटनाशव्यक्तिहेतुतायां मानाभावात् ।

न च तत्संयोगतन्नाशव्यक्त्योः कस्य हेतुत्वमित्यत्र विनिगम-नाविरह इति वाच्यम् । सामान्यरूपेण क्लृप्तहेतुताकस्यैव सं-योगव्यक्तिहेतुत्वे विनिगमकत्वात् । एवं चैतादृशव्यभिचारवा-रणाय स्वोत्पत्तिप्रयोजकप्रत्यासत्तिविशिष्टानां कारणानां वह्न्य-समवधानक्षणवृत्तित्वं विवक्षणीयम् । तथा च सति तादृशघट-जनकस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यरूपप्रतिबन्ध-काभावस्य तद्घटोत्पत्तिप्रयोजकतत्कपालप्रत्यासत्तिविशिष्टस्य महाघटाधिकरणकालेऽसत्त्वेन व्यभिचारवारणसम्भवात् । एवं च स्वोत्पत्तिक्षणे धूमोत्पादप्रयोजकसंयोगरूपप्रत्यासत्तिविशिष्टस्य वह्ने-रसत्त्वात्तस्य न वह्न्यसमवधानकालीनतेति वह्निमदनिवेशनमर्थवत् ।

यदि चागन्तुककपालसम्बन्धस्यापि तादृशप्रत्यासत्तितया त-द्विशिष्टद्रव्याभावस्य तादृशक्षणेऽनपाय इति मन्यते तदा स्वाधि-

करणदेशावच्छेदेन वह्न्यभाववान् यः क्षणस्तदवच्छिन्नस्वप्रयोजकवह्नितत्समवधानेतरकारणाधिकरणतासमुदायकत्वमेव विवक्षणीयम् । तादृशसमुदायान्तर्गतायाः पूर्वघटारम्भककपालनिष्ठद्रव्याभावाधिकरणतायास्तथाविधक्षणानवच्छिन्नत्वेन न व्यभिचारः । एवं च धूमोत्पत्तिप्रयोजककारणाधिकरणतासमुदायान्तर्गतस्य संयोगसम्बन्धावच्छिन्नवह्न्यधिकरणत्वस्य वह्न्युत्पत्तिक्षणानवच्छिन्नतया तादृशक्षणमादाय स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणावच्छिन्नतत्समवधानेतरकारणाधिकरणतासमुदायकत्वस्य धूमे प्रसिद्ध्यसम्भवेन वह्निपदवैयर्थ्याभावात् ।

यद्वा यद्यत्कारणं यद्यदधिकरणप्रत्यासन्नं सत् स्वोत्पत्तिप्रयोजकं तत्तदधिकरणवृत्तित्वविशिष्टतत्तत्कारणसमुदायवद्वह्न्यसमवधानक्षणकत्वविवक्षणात् सामञ्जस्यम् ।

यत्तु वह्न्यसमवधानकालीनत्वं स्वसमानाधिकरणवह्निमदन्यक्षणवृत्तित्वमेव विवक्षितम् । तथा च वह्न्युत्पत्तिक्षणस्यापि धूमसमानाधिकरणवह्निमत्तया वह्निपदसार्थक्यमिति केचिदाहुस्तदसत् । स्वाधिकरणवृत्तित्वविशिष्टवह्निमदन्यत्वस्य वह्न्युत्पत्तिक्षणसाधारणतया तन्निवेशे वह्नीतरत्वनिवेशनं विनाप्युपपत्तेः स्वाधिकरणवृत्तित्वोपलक्षितवह्निमदन्यत्वं निवेश्य वह्नीतरत्वनिवेशनस्यायुक्तत्वात् । एवं स्वसमानाधिकरणवह्निमदन्यक्षणवृत्तित्वं यदि वह्न्यसमवधानकालीनत्वं तदा स्वसमानाधिकरणवह्निमत्त्वाव्यवहितप्राक्क्षणकत्वरूपस्य वह्निसमवहितजन्यत्वस्य विशेषणतयैव सामञ्जस्ये वह्न्यसमवहिताजन्यत्वरूपनिषेधद्वयघटितसत्यन्तानुसरणमनर्थकम् । स्वाधिकरणदेशावच्छिन्नवह्निसमवधानाभाववत्क्षणवृत्तित्वं यदि पुनर्वह्न्यसमवधानकालीनत्वं तदा एकस्या एव घटव्यक्तेर्यत्र स्वाव्यवहितप्राक्कालावच्छिन्नवह्निसमवधानवति तत्समवधानाभाववति चोत्पत्तिस्तादृशघटव्यक्तेर्वह्निसमवहितजन्यतया यत्किञ्चिद्देशावच्छिन्नवह्न्यभाववत्क्षणवृत्तिसामग्रीजन्यतया च तत्र व्यभिचारः स्यादिति सत्यन्तनिषेधद्वयोपादानसार्थक्यमिति ।

वह्निसमवहितजन्यपदस्य वह्निजन्यार्थकत्वे जन्यपदस्य यथाश्रुतार्थपरतामभ्युपेत्यापि नान्तरीयकवह्निके प्रकारान्तरेण व्यभिचारं वारयतां मतं दूषयितुमुपन्यस्यति । यद्वेति ।

(दी०) यत्तु नान्तरीयकवह्निके व्यभिचारवारणाय आपादककोटावेव विशेषणं सत्यन्तार्थः । स च वह्न्यघटितसामग्र्यजन्यत्वमिति । तन्न । प्राक् तदसिद्धेः ।

(गा०) आपादककोटावेवेत्येवकारेणापाद्यप्रतियोगिविशेषणत्वव्यवच्छेदः । विपर्ययपर्यवसायितानिर्वाहाय पक्षांशेऽपि तस्य विशेषणत्वमावश्यकमेवेति ध्येयम् । वह्न्यघटितसामग्र्यजन्यत्वमिति । वह्निसमवहितजन्यघटादौ च न तादृशसामग्र्यजन्यत्वं वह्नेस्तदकारणतया तदुत्पत्तिप्रयोजककारणसमूहात्मकतत्सामग्र्यघटकत्वादिति न व्यभिचार इति भावः ।

प्रागिति । वह्नौ धूमजनकतानिश्चयात् पूर्वमित्यर्थः । तदसिद्धेः । धूमे वह्न्यघटितसामग्र्यजन्यत्वानिश्चयाद्वह्नौ धूमजनकत्वसन्देहे धूमसामग्र्यां वह्न्यघटितत्वस्यापि संशयादिति भावः ।

ननु वह्न्यसमवहिताजन्यत्वस्यापाद्यप्रतियोगिकोटिविशेषणत्वेऽप्युक्तैव भविष्यतीत्यादिशङ्काद्वयस्य कथं तर्कविरोधिता, एतन्मते तस्य पक्षाविशेषणतया तादृशशङ्कायाः पूर्वमते इव विशिष्टपक्षग्रहविरोधित्वासम्भवादित्यत आह ।

(दी०) अत्र आद्या द्वयी शङ्का इष्टापत्तिपर्यवसायिनी(१)। तृतीया पुनरापादकाप्रसिद्धिपर्यवसायिनी। अवह्नेः,वह्निशून्यात् ।

(गा०) अत्रेति । एतन्मते इत्यर्थः । इष्टापत्तिपर्यवसितेति । आपाद्यस्य विशिष्टाभावस्य इष्टतापर्यवसितेरित्यर्थः । इष्टत्वं च पक्षेऽबाधितत्वम्, पक्षे सत्त्वमिति यावत् । तज्ज्ञानजनकत्वमत्र तत्पर्यवसानं बोध्यम्, धूमे वह्न्यसमवहितजन्यत्वस्य सन्देहे तद्व्यापकस्य तदभावविशिष्टजन्यत्वाभावस्यापि संशयादिति भावः । इष्टापत्तिशङ्कायाश्च कारणीभूतापाद्यव्यतिरेकनिश्चयविघटकतया तर्कविघटकत्वं बोध्यम् ।

नन्वेवमप्यहेतुक एवोत्पत्स्यते इति तृतीयशङ्काया एतन्मते कथं तर्कविरोधिता ? तथा हि सम्प्रदायमते उत्पन्नत्वरूपजन्यत्वाभावस्यापाद्यतयोत्पन्नत्वरूपतदभाववति अहेतुकत्वशङ्का मूलशैथिल्य-

(१) पर्यवसितेति पाठान्तरम् ।

शङ्कापर्यवसायिनी, यतस्तस्यां सत्यां नत्र वह्न्यसमवहितनाहेतुकत्वसहितवह्निमवहितनाहेतुकत्वरूपापादककोटिकशङ्का जायते । तद्विरोधिनो यद्ययं वह्न्यसमवहितनाहेतुकत्वे सति वह्निसमवहितहेतुकः स्यात्तदा ऽहेतुकः स्याद्वह्न्यसमवहितात्तत्समवहितातिरिक्तस्याप्रसिद्धेरित्येतादृशतर्कस्य इष्टापत्त्या असम्भवात् सा च मूलशैथिल्यशङ्कैव, व्यापकाभिमताभाववति व्याप्याभिमतसत्ताया व्यभिचारत्वादिति । एतन्मते चोत्पन्नत्वं नापाद्यव्यतिरेकः, अपि तु वह्न्यसमवधानकालीनोत्पत्त्यावच्छिन्नकारणकत्वम्, तद्विशिष्टे चाकारणकत्वशङ्का नावतरत्येवेति नोक्तदिशाऽहेतुकत्वशङ्कायां मूलशैथिल्यशङ्कापर्यवसानम् ।

न चापाद्यव्यतिरेकवत्तया निश्चिते धूमे ऽहेतुकत्वशङ्का व्याप्यसंशयविषया आपादकीभूतवह्न्यहेतुकत्वशङ्कामादधती मूलशैथिल्यशङ्कायां पर्यवस्यति, एकस्मिन् धर्मिणि आपाद्याभावनिश्चयसहिताया आपादकशङ्काया आपादके आपाद्यव्यभिचारशङ्कारूपत्वात् । पक्षे आपाद्याभावनिश्चयस्य च तर्कपूर्वमवश्यमुपेयत्वात् । यदि चाहेतुकत्वशङ्कायां सत्यां धूमे सकारणकत्वघटितापाद्याभावनिश्चय एव न सम्भवतीत्युच्यते तदा आपाद्यव्यतिरेकनिश्चयविघटकतया धूमेऽहेतुकत्वशङ्का इष्टापत्तिशङ्कैवेति वाच्यम् । यतो धूमत्वविशिष्टे ऽहेतुकत्वशङ्कातस्तद्विशिष्टे एव वह्न्यहेतुकत्वशङ्का भविष्यति तदानीं तद्विशिष्टे आपाद्यव्यतिरेकनिश्चयसत्त्वेऽपि तच्छङ्कातादृशापाद्यव्यतिरेकनिश्चययोरापाद्याभावापादकौ(१) परस्परोपरागेणाविषया(२)विति न व्यभिचारग्रहरूपता, तादृशाभाववत्त्वविशिष्टे तादृशापादकसंशये च तेन रूपेण व्याप्यसंशय एव हेतुर्न तु रूपान्तरेण, भिन्नधर्मितावच्छेदककत्वात्तादृशनिश्चयो न सम्भवतीति प्रागेवोपपादितम् । एवं धूमत्वादिरूपेण पक्षे वह्न्यहेतुकत्वसंशयो विनैवाहेतुकत्वशङ्कां सुलभ एव तामेवोच्छेत्तुं तर्कानुसरणात् सा चेत्तर्कमुच्छिन्द्यात्तर्हि अलमहेतुकत्वशङ्कानिराकरणायासेन ।

---

(१) आपाद्याभावापादकत्वेनेति पाठान्तरम् ।

(२) विषयाविति पाठान्तरम् ।

यच्च शङ्कितं धूमेऽहेतुकत्वशङ्का आपाद्यव्यतिरेकानिश्चयविघटकतया इष्टापत्तिशङ्कारूपेति तदपि न । यत उत्पन्नतया निश्चितेऽपि धूमे यद्यहेतुकत्वशङ्का स्यात्तदा उत्पन्नमात्रे एव सा स्यादिति सहेतुकत्वस्य न कुत्रापि प्रसिद्धिरिति तदभावशङ्काया एवासम्भव इत्यत आह । तृतीया पुनरिति । पुनः शब्देनेष्टापत्तिपर्यवसायित्वव्यवच्छेदः । आपाद्याप्रसिद्धिस्थले इष्टापत्तेरयोगात् सा च व्यक्तीभविष्यत्यग्रे । आपादकेति । आपादकमिह वह्न्यजन्यत्वं वह्निकारणकत्वाभावरूपम् । तदप्रसिद्धिपर्यवसानम् । तत्स्वरूपज्ञानविरोधः । उत्पन्नमात्रेऽहेतुकत्वसंशये क्वचिदपि सहेतुकत्वघटितवह्निहेतुकत्वरूपप्रतियोगिनोऽनिश्चयेन तदभावज्ञानासम्भवात् ।

न चाभावबुद्धौ प्रतियोगिनः कुत्रचिन्निर्णयो नापेक्ष्यते अपि तु प्रतियोगिनि प्रतियोगितावच्छेदकप्रकारकनिश्चय एवेति वाच्यम् । सर्वत्राहेतुकत्वशङ्कादशायां हेतुतायां वह्न्यादिवृत्तित्वनिश्चयासम्भवेन प्रतियोगितावच्छेदकप्रकारकनिश्चयस्यापि प्रकृते दुर्लभत्वात् । अहेतुकत्वसंशयश्च तदीयनियतपूर्ववर्तिसामान्ये तं प्रत्यनन्यथासिद्धत्वसंशयः, तं प्रति अनन्यथासिद्धसामान्ये च तदीयनियतपूर्ववर्तितासंशयः । अतः प्रतियोग्यप्रसिद्ध्या ऽहेतुकत्वशङ्कानुपपत्तिर्नाशङ्कनीया । आदिपदादापाद्यपरिग्रहः । आपाद्यप्रतियोगिनश्च सहेतुकत्वघटितस्य वह्न्यसमवधानकालीनोत्पादकारणकत्वस्य सहेतुकत्वाप्रसिद्ध्याऽप्रसिद्धिरिति भावः ।

अथ कार्यान्तरे सहेतुकत्वप्रसिद्धिदशायां धूमधर्मिकाहेतुकत्वशङ्काया व्याप्यसंशयविधया धूमे तादृशयावत्कारणकत्वाभावरूपापाद्याभावकोटिक(१)संशयसम्पादकत्वादिष्टापत्तिशङ्कापर्यवसानं सम्भवति, तत्कथमहेतुक एवोत्पत्स्यते इति शङ्काया धूमपदानुपग्रहेण धूममात्रधर्मिकत्वमुपगम्येष्टापत्तिपर्यवसायिता न व्याख्यातेति चेन्न । उत्पत्तिमत्तयाऽवधृतेऽपि धूमे यद्यहेतुकत्वसंशयस्तदा कार्यान्तरेऽपि तत्सम्भवेन सहेतुकत्वप्रसिद्धेर्दुर्लभत्वात्, न ह्युत्पत्तिमत्त्वादन्यत्तादृशशङ्काविरोधिरूपं सम्भवतीति ।

अवह्नेरित्यत्र मूलेऽवह्निपदस्य वह्निभिन्नार्थकत्वे वह्निभिन्नजन्य-

(१) आपाद्यकोटिकेति पाठान्तरम् ।

एवं तन्मात्रजन्यत्वं वा कोटिः स्यात् तत्कोटिकशङ्कयोश्च न प्रकृते विरोधिता सम्भवति प्रथमे पक्षसाधारण्याद् द्वितीये च वह्न्यजन्यत्वशङ्कापर्यवसायिन्यास्तच्छङ्कायास्तर्कात् पूर्वं दुरुच्छेदत्वात् तदभावस्यापाद्यप्रतियोगिकोटौ निवेशासम्भवादतस्तद्व्याचष्टे । अवह्नेरिति । वह्निशून्यात् । वह्न्यसमवहितात् । तथा च वह्न्यसमवहितजन्यत्वकोटिकत्वं शङ्कायां लब्धं तादृश्याश्चापाद्यप्रतियोगिकोटिप्रविष्टवह्न्यसमवहिताजन्यत्वाविरोधिविषयकत्वात्तर्काविरोधितोपपत्तिः ।

मूले । इत्यत्र । इत्यादितर्के । उपत्स्यमाने इति शेषः । इति शङ्का स्यात् । इत्यादिशङ्का जायेत । सम्भावनायां लिङ् । सर्वत्र । शङ्कायाम् । स्वक्रियाव्याघातः । धूमादौ गृहीतवह्न्याद्यन्वयव्यतिरेकानुविधानस्य पुंसो धूमाद्यर्थितया वह्न्यादौ प्रवृत्तेर्विरोधः, तदभावापादकत्वमिति यावत् । आपादनाकारमेवाह । यदीति । गृहीतान्वयव्यतिरेको यो हेतुर्वह्निस्तं विना । कार्योत्पत्तिम् । धूमे तदसमवहितजन्यत्वं कार्यसामान्ये ऽहेतुकत्वं वेति शेषः । उपादानं कथं कुर्यात् । वह्न्याद्यसमवधाने न प्रवर्तेतेति यावत् । तेन विनापि तत्सम्भवादिति । तदसमवहितादपि तत् सम्भवतीत्यादिज्ञानस्य प्रवर्तककारणताग्रहविरोधिनः सत्त्वादित्यर्थः । तस्मात् । तादृशप्रवृत्तिनिर्वाहानुरोधात् । तदुपादानम् । वह्न्युपादानम् । शङ्काप्रतिबन्धकम् । आस्थीयते इति शेषः । अत्रोपादानपदस्य भावव्युत्पत्त्या प्रवृत्त्यादिपरत्वं न सम्भवति प्रवृत्त्यादेः शङ्काप्रतिबन्धकत्वविरहादतो व्याचष्टे दीधितौ । तदुपादानमितीति ।

(दी०) तदुपादानमिति करणव्युत्पत्त्या तदीयकार्यप्रयोजकताज्ञानपरम्, तादृशान्वयव्यतिरेकानुविधानबोधपरं वा । अग्रेतनमपि स्वक्रियापदं तत्परमेव । कृत्यादेः शङ्काप्रतिबन्धकत्वे मानाभावात्, कारणताग्रहोत्तरकालीनत्वाच्च ।

(गा०) करणव्युत्पत्त्येत्युपलक्षणम् । तस्य उपादानं यस्मादिति बहुव्रीहिसमासाद्राह्यत्यापि बोध्यम् । तदीयकार्येति । वह्न्यादिकार्यधूमादीत्यर्थः । वह्न्यादौ धूमादिप्रयोजकताज्ञानस्य धूमादौ वह्न्यादिप्रयोज्यत्वरूपवह्न्यसमवहितजन्यत्वव्यावर्तकधर्मविषयकतया तच्छङ्काप्रतिबन्धकत्वोपपत्तिः । एवं तृप्त्यादिकार्ये अन्यतन्य-

यागादिभोजनादौ तन्नियतपूर्ववर्तित्वाभावव्याप्यनैकत्वप्रयोजकत्वज्ञानस्य कार्यसामान्ये ऽहेतुकत्वशङ्कानिवर्तकत्वम् । प्रयोजकत्वं च कारणत्वादन्यदेव सम्बन्धविशेषः कारणाकारणसाधारण इति पूर्वं तन्निश्चयेऽपि न कारणताग्राहकतर्कवैयर्थ्यम् ।

नन्‍ु कारणत्वस्येव प्रयोजकत्वस्यापि प्रथमं दुर्निश्चेयतया कथं तन्निश्चयाच्छङ्काप्रतिबन्ध इत्याशङ्कायां प्रकारान्तरमनुसरति । तादृशान्वयेति । धूमादिधर्मिकवह्न्याद्यन्वयव्यतिरेकानुविधायित्वान्वयव्यतिरेकवत्त्वनिश्चयपरं वेत्यर्थः । तदन्वयव्यतिरेकानुविधायित्वनिश्चयश्च तर्कात् पूर्वमपि सम्भवति, प्रत्यक्षतो यत्र न वह्निस्तत्र न धूम इति निश्चये विरोधिशङ्कानवकाशात् तादृशनिश्चयो न वह्न्यजन्यत्वशङ्काविरोधी तदन्वयव्यतिरेकानुविधायित्वस्य नान्तरीयकतदकारणकसाधारणतया तदजन्यत्वाव्यावर्तकत्वादिति न तर्कवैयर्थ्यमिति भावः । अग्रेतनमपीत्यत्रापिकारः स्वक्रियापदमित्यनन्तरं योज्यः । उक्तरीत्या स्वक्रियाव्याघात इति प्राक्तनस्वक्रियापदस्य प्रवृत्तिपरतया एव सम्भवादग्रेतनमिति ।

केचित्तु स्वक्रियाव्याघात इति ग्रन्थस्य प्रवृत्त्यभावप्रसञ्जनपरत्वे, मिश्रास्त्वित्यादिना वक्ष्यमाणमताभेदः स्यादिति ग्रन्थकारमते तादृशग्रन्थस्य सकलशङ्कानां स्वक्रियया प्रतिबन्ध इत्येवार्थः । स्वक्रियायाः शङ्काप्रतिबन्धकत्वे प्रमाणाकाङ्क्षया यदि हीत्यादिना स्वक्रियायाः शङ्कायामप्रतिबन्धकत्वे प्रवृत्त्यनुपपत्तेरभिधानं तस्मात्तदुपादानमिति ग्रन्थेन स्वक्रियायाः शङ्काप्रतिबन्धकत्वोपसंहारः, एवकारः प्रतिबन्धकमित्यनन्तरं योज्यः । इत्थं चाग्रेतनमपीत्यपिकारो यथास्थानस्थ एव प्राक्तनस्वक्रियापदसमुच्चायक इत्याहुः । तन्न । मिश्रमते तादृशग्रन्थस्य परार्थानुमानस्थलाभिप्रायकतया एतन्मते च स्वार्थानुमानस्थलपरतया विशेषात् स्वक्रियापदस्य यथाश्रुतार्थपरत्वपरित्यागानौचित्यात् । तत्परमेवेति । तदुपादानपदं तत्परं तत्परमेवेत्यर्थः । तदुपादानपदस्य प्रवृत्त्यादिपरत्वपरित्यागे बीजं स्वयमेवाह । इत्यादेति । आदिपदाच्छङ्कादिरूपव्याघातपरिग्रहः । मानाभावादिति । विरोधिनिश्चयस्यैव तथात्वादिति भावः ।

नन्‍ु तत्तत्फलसाधनताज्ञानजन्या कृतिरपि तत्तत्फलसाधनताविषयिकैव स्वीकरणीया तृप्तये भोजनं करोमीत्याकारकतदनुभ-

मात्रेण वा व्यतिरेकमवगाहतामिति वाच्यम् । विरोधिविषयकस्यैव निश्चयस्य तर्कहेतुत्वोपगमात् । तथा च तद्व्यतिरेकमात्रस्य तत्सामानाधिकरण्याविरोधित्वात् तद्व्यतिरेकावच्छेदकत्वस्यैव च तथात्वात् । अत एव तर्कस्याहार्यारोपरूपता । अत एव च प्रमेयत्वादिसामानाधिकरण्येन गुणवत्त्वादिव्यतिरेकनिश्चयेऽपि द्रव्यत्वादिना तत्सामानाधिकरण्येन न गुणवत्त्वाद्यापत्तिरुदेति । तथा चांशत इष्टापत्तिशङ्कानुच्छेदाद् धूमत्वसामानाधिकरण्येन वह्न्यजन्यत्वशङ्कानिवर्तकतर्कानुदयेन सामान्यतः कार्यकारणभावानिश्चयेन वह्नित्वे धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहाविरोधितादृशावच्छेदकत्वरूपव्यभिचारशङ्कायाः कथं निवृत्ति, धूमत्वसमानाधिकरणजन्यताप्रतियोगिकजनकतायाः सामानाधिकरण्यस्यावच्छेदकत्वस्य वा तादृशप्रतियोगितावच्छेदकत्वाविरोधित्वादित्याशङ्कते । यद्यपीति ।

(दी०) यद्यपि चैतावता धूमत्वावच्छिन्नं प्रति वह्नेर्जनकत्वं नायाति । तृणारणिमणिन्यायेन वैकल्पिककारणतायामपि तथात्वसम्भवात् । तथापि विशेषाणां कार्यकारणभावग्रहस्तर्केण तद्विरोधिशङ्कायामपनीतायां जायमानः सामान्यव्यभिचारानिर्णयानुगतागुरुविशेषरूपान्तरानुपस्थितिलाघवप्रतिसन्धानादिवशात् सामान्यत एव तं परिच्छिनत्ति । प्रामाणिकौ च तथैवान्वयव्यतिरेकौ । फलबलेन लाघवादिज्ञानशून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्प्यते ।

(गा०) नायाति । न सिद्ध्यति । ननु धूमत्वसमानाधिकरणजन्यतायां धूमत्वान्यधर्मावच्छिन्नत्वबाधसहकृतावच्छिन्नत्वग्राहकजन्यतात्वादिहेतोर्धूमत्वावच्छिन्नत्वं सेत्स्यतीत्यत आह । तृणारणीति । यथा तृणादीनां वह्नित्वसमानाधिकरणजन्यताकत्वेऽपि न तदवच्छिन्नजन्यताकत्वम्, अपि तु तदवान्तरधर्मावच्छिन्नजन्यताकत्वमेव तथा प्रकृतेऽपि अवान्तरधर्मस्यावच्छेदकत्वेऽपि जन्यताया धूमत्वसामानाधिकरण्योपपत्तेरित्यर्थः । तथा चावान्तरधर्मस्यावच्छेदकत्व-

सम्भावनया न जन्यतायां धूमत्वाग्यधर्मावच्छिन्नत्वबाध इति भाव.। विशेषाणा कार्यकारणभावग्रह इति । विशेषधर्मावच्छेदेनान्वयव्यतिरेकग्रहाज्जायमान. सामान्यधर्मसामानाधिकरण्येन कार्यत्वकारणत्वग्रह इत्यर्थ । 'सामान्यत एव' सामान्यधर्मावच्छेदेनैव । तं कार्यकारणभावम् । परिच्छिन्नेति । विषयीकरोतीत्यग्रिमेणान्वयः। एवकारेण विशेषधर्माणामवच्छेदकत्वावगाहित्वव्यवच्छेद् ।

ननु विरोधिशङ्कासत्त्वे सामान्यधर्मसामानाधिकरण्येनापि कार्यकारणभावग्राहकसामग्री न सम्भवतीत्यत आह । तर्केणेति । उक्ततर्केणेत्यर्थ । 'तद्विरोधिशङ्कायां' तादृशकार्यकारणभावग्रहविरोधिन्यां सामान्यधर्मावच्छेदेन कार्यकारणभावाभावशङ्कायाम्। अपनीतायां निवर्तिताया सत्यां जायमान ।

न चैवं कस्यचित्सामान्यधर्मस्योपस्थितौ तदवान्तरधर्मावच्छेदेन क्वचिदपि कार्यकारणभावग्रहो न स्यादपि तु सामान्यधर्मावच्छेदेनैवेत्यादिशङ्कामपनिनीषु सामान्यधर्मसामानाधिकरण्येन कार्यकारणभावग्राहकसामग्र्यास्तन्मात्रावच्छेदेन तद्ग्रहजननेऽपेक्षणीयान्तरमाह । सामान्यव्यभिचारानिर्णयेति । सामान्यधर्मावच्छिन्नविशेष्यताकप्रकृतकार्यत्वाभावानिश्चयेत्यर्थ ।

एतेन वह्नित्वाद्यवच्छेदेन तृणादे संयोगविभागादिविशेषसाधारणगुणत्वाद्यवच्छेदेन च कर्मादेर्जन्यताग्रहप्रसङ्गो वारित.। तृणादिकं विनापि वह्न्याद्युत्पत्तिदर्शनेन वह्नित्वादिसामानाधिकरण्येन तृणाद्यजन्यत्वनिश्चयात् प्रत्येकं तृणाद्यन्वयव्यतिरेकानुविधायिषु यावद्वह्निषु अनुगतागुरुविशेषान्तरस्य जातिरूपस्य प्रागसिद्धे.। क्रियान्वयव्यतिरेकानुविधायिसंयोगविभागादिषु संयोगत्वादिना सङ्करप्रसङ्गेनानुगतजातेरसम्भवाच्च तत्र द्वितीयप्रयोजकसत्त्वमव्याहतमेवेति ध्येयम् । प्रकृते सामान्यधर्मधूमवत्सामानाधिकरण्येन वह्न्यजन्यत्वस्य संशयसत्त्वान्निश्चयानुधावनम् । तस्य च यात्र निश्चयाभावरूपस्य कारणत्वेनैवोपयोगिता बोध्या।

न च गन्धप्रागभावसामानाधिकरण्येन गन्धवत्तानिश्चयेऽपि तदवच्छेदेन गन्धा यन्ताभावग्रहाद्गमितावच्छेदकादेरनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामेव विशिष्टबुद्धौ तत्सामानाधिकरण्यमात्रावगाहिबाधनिश्चयो विरोधी न तु स्वरूपसम्बन्धरूप-

तद्वगाहिन्यामिति वह्नित्वादौ स्वरूपसम्बन्धरूपतृणादिजन्यतावच्छेदकत्वग्रहे कथं तत्सामानाधिकरण्यमात्रेण तृणाद्यजन्यत्वनिश्चयो विरोधीति वाच्यम् । अनुभवानुरोधेनान्यूनानतिप्रसक्तत्वनियतविलक्षणस्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामपि बुद्धौ सामानाधिकरण्यावगाहिग्राह्याभावनिश्चयस्य प्रतिबन्धकत्वोपगमात् । गन्धप्रागभावादेस्त्ववच्छेदकत्वमन्यादृशमेव ।

कश्चित्तु व्यभिचारानिर्णयपदमवच्छेद्यावच्छेदकभावविरहानिश्चयपरतया व्याकुरुते । तन्न, अवच्छेद्यावच्छेदकभावस्य संसर्गविधया भाने तद्विरहनिश्चयस्याविरोधित्वात् ।

न च वह्नित्वादिधर्मिकावच्छेदकतासम्बन्धावच्छिन्नजन्यत्वाभावानिश्चयपरमेव तदास्तामिति वाच्यम्, वह्नित्वाद्यवच्छेदेन जन्यतावगाहिनः स्वरूपतो वह्नित्वाद्यात्मकधर्मितावच्छेदकावगाहिज्ञानस्य तादृशाभावग्रहधर्मितावच्छेदकप्रकारेण वह्नित्वत्वाद्यविषयकतया तत्प्रतिबध्यत्वासम्भवात् । अनुगतागुरुविशेषान्तरानुपस्थितीति । यावत्स्वान्वयव्यतिरेकानुविधायित्वं गृहीतं तावत्साधारणस्य सामान्यधर्मापेक्षयाऽगुरोस्तन्न्यूनवृत्तिधर्मस्यानुपस्थितीत्यर्थः ।

एतेन विशिष्टानुभवत्वाद्युपस्थितिदशायां तद्व्यापकविशिष्टज्ञानत्वावच्छेदेन विशेषणज्ञानादिजन्यताग्रहो निरस्तः । न हि तत्र स्मरणे व्यभिचारनिश्चयः सम्भवति, प्रत्यक्षस्येव स्मरणस्यापि निर्विकल्पकरूपस्य सम्भवात् । प्रकृते धूमनिष्ठसत्ताया यावत्सु वह्न्यन्वयव्यतिरेकानुविधायित्वग्रहस्तावद्धूमान्यतमत्वस्य द्रव्यत्वादेर्धोपस्थितिसम्भवात्तदुपस्थितिसत्त्वेऽपि तद्ग्रहोपपत्तये विशेषणत्रयानुसरणम् । तादृशधर्मोपस्थितिसत्त्वे च न तदपेक्षयाऽधिकदेशवृत्तिधर्मस्यावच्छेदकत्वग्रहः सम्भवति, सामान्यधर्मस्यावच्छेदकत्वग्रहेऽवच्छेद्यजन्यतायास्तदधिकरणीभूताधिकदेशवृत्तित्वकल्पने गौरवम्, विशेषधर्मस्य तथात्वे तु तदकल्पनेन लाघवमिति प्रतिसन्धानेन प्रतिबन्धादिति तादृशधर्मोपस्थितिविरहापेक्षा । एतादृशलाघवज्ञान एव धर्मान्तरस्य न्यूनवृत्तित्वमुपयुज्यत इति तदभिहितम् । एवं धर्मान्तरस्य शरीरगौरवे तद्घटकनानावस्तुष्ववच्छेदकतायाः कल्पनीयतया गृहीतान्य-

यन्व्यतिरेककार्यान्तरावृत्तित्वे च कार्यान्तरेऽन्यधर्मावच्छेदेन कार्यत्वान्तरस्य कल्पनीयतया नोक्तलाघवावकाश इत्यतोऽनुगतात्वागुरुशरीरत्वेऽपि तादृशलाघवज्ञान उपयुज्येते इति ध्येयम्।

लाघवप्रतिसन्धानेति। तत्तद्धूमत्वतत्तद्वह्नित्वादीनां कार्यकारणभावावच्छेदकत्वे नानाकार्यकारणभावकल्पने गौरवम्, धूमत्ववह्नित्वयोस्तदवच्छेदकत्वे पुनस्तदैक्येन लाघवमित्यादिप्रतिसन्धानेत्यर्थः। ईदृशं च प्रतिसन्धानमेवकारलभ्यविशेषधर्मावच्छेदेन कार्यकारणभावाग्रह उपयुज्यते। आदिपदात् समनियतधर्मान्तरापेक्षया गौरवप्रतिसन्धानाभावपरिग्रहः, तेन धूमत्वाद्यपेक्षया गुरुणा धूमत्वादिसमनियतधूमत्वादिप्रकारकप्रमाविशेष्यत्वादिरूपेण वह्न्यादिजन्यत्वग्रहनिरासः।

ननु सामान्यधर्मसामानाधिकरण्यमात्रेणान्वयव्यतिरेकग्रहस्य सामान्यव्यभिचारानिर्णयादिसहकारेण सामान्यधर्मावच्छेदेन कार्यकारणभावग्राहकत्वमसिद्धमित्यत आह। प्रामाणिकौ चेति। अनुभवसिद्धावेवेत्यर्थः। तथैव सामान्यधर्मावच्छिन्नकार्यकारणभावग्राहकतयैव। अन्वयव्यतिरेकाविति। विशेषाणामिति शेषः। ननूक्तजन्यत्वाभावशङ्कारूपप्रतिबन्धकसत्त्वान्नोक्तसामग्रीतः सामान्यधर्मावच्छेदेन कार्यकारणभावग्रहः सम्भवतीत्यत आह। फलबलेनेति। अनुभवसिद्धफलान्यथानुपपत्त्येत्यर्थः। लाघवज्ञानादिशून्याया इति। कस्यचिद् धूमस्य वह्न्यजन्यत्वे धूमत्वापेक्षया गुरुशरीरः कश्चन धर्मो नानाविशेषधर्मा वा जन्यतावच्छेदकाः स्युरिति गौरवम्। धूमत्वावच्छेदेन तज्जन्यत्वे च न तथेति लाघवमित्यादिलाघवज्ञानाद्यभावविशिष्टाया इत्यर्थः। आदिपदाद्विशेषदर्शनपरिग्रहः। सामान्यव्यभिचारशङ्काया धूमत्वादिसामानाधिकरण्येन वह्न्याद्यजन्यत्वशङ्कायाः। प्रतिबन्धकत्वमित्यस्य धूमत्वाद्यवच्छेदेन वह्न्यादिजन्यत्वग्रह इत्यादिः।

न चैवं लाघवज्ञानसत्त्वे ग्राह्याभावनिश्चयदशायामपि प्रत्यक्षनिश्चयापत्तिः, संशयविपरीतनिश्चयसाधारणविपरीतज्ञानत्वेनैव प्रतिबन्धकतया तस्य प्रतिबन्धकत्वान्तराभावादिति वाच्यम्। विपरीतनिश्चयानन्तरं संशयादिवारणाय संशयादिसाधारणज्ञानत्वावच्छिन्नं प्रति विपरीतनिश्चयत्वेन स्वतन्त्रप्रतिबन्धकताकल्प-

नस्यावश्यकतया तत्र च लाघवज्ञानाद्यभाववैशिष्ट्यानिवेशात् तादृशप्रतिबन्धकतावच्छेदकावच्छिन्नसत्त्वेनोक्तापत्त्यनवकाशात् । भ्रमोत्तरं विशेषदर्शने जातेऽपि भ्रमनाशानन्तरमेव प्रत्यक्षनिश्चयोपगमेन निश्चयप्रतिबध्यतावच्छेदककोटौ प्रत्यक्षनिश्चयभेदानिवेशात् । इदं च प्रत्यक्षनिश्चये ग्राह्यसंशयस्य प्रतिबन्धकतामभ्युपेत्याभिहितम् । स्वमते तु विशेषदर्शनवल्लाघवज्ञानस्यापि विपरीतकोटिभाननिवर्तकत्वेन निश्चयोपयोगिता बोध्या ।

इदमत्रावधेयम् । यत्रोपदर्शिततर्कावतारपूर्वमेव धूमत्वसामानाधिकरण्येन वह्न्यसमवहितजन्यत्वशङ्काजनकसाधारणधर्मदर्शनात्मकदोषादिसमवधानं दैववशाद्भवति तत्र तादृशशङ्काविरहप्रयोजकस्य दुर्लभतया धूमत्वावच्छेदेनाप्यन्वयव्यतिरेकनिश्चयासम्भवात् सामानाधिकरण्यमात्रावगाहितर्कं नावतरितुमीष्ट इति तादृशस्थलाभिप्रायकोऽयं सामान्यधर्मावच्छेदेन जन्यताग्रहोपायप्रयासः । यत्र च तर्कात् पूर्वं दोषादिविरहात्तादृशशङ्कानुदयस्तत्र धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चयात्तत्सामानाधिकरण्यमात्रेणापादकयत्वाज्ञानसहितात्सामानाधिकरण्यमात्रेणापत्तिः सुलभेति तत एव सामान्यकार्यकारणभावः सुग्रहः । तदभिप्रायेणैव कश्चिद्वह्निं विनापि भविष्यतीत्याकारिकाया अंशतः इष्टापत्तिशङ्कायास्तर्कविरोधित्वाभिधानसङ्गतिः । अन्यथा पक्षतावच्छेदकावच्छेदेनापत्तौ तादृशशङ्काया अविरोधित्वात्तदसङ्गतिरापद्येत । न चैवमन्वयव्यतिरेकाविधायित्वज्ञानस्योपादानपदार्थस्य तादृशशङ्काविरोधित्वाभिधानसङ्गतमेव, तादृशशङ्काविरोधिनोऽवच्छेदकावच्छेदेनान्वयव्यतिरेकग्रहस्याशक्यत्वादिति वाच्यम् । उपादानपदेनान्वयव्यतिरेकग्रहवत् शङ्काविरहप्रयोजककारणान्तराभावस्यापि विवक्षितत्वादिति सर्वं समञ्जसम् ।

वस्तुतस्तु, कश्चिद्वह्निं विनापि भविष्यतीति शङ्काऽपि धूमत्वावच्छेदेन वह्न्यसमवहितजन्यत्वकोटिविषयिण्येव । पूर्वशङ्कायां स्वाव्यवहितप्राक्कालावच्छिन्नवह्न्यभाववन्मात्रोत्पत्तिकत्वं द्वितीयायां च मात्रार्थानन्तर्भावेण तादृशाभाववदुत्पत्तिकत्वं कोटिरित्यत एव शङ्कयोर्भेदसम्भवादिति ।

उपाध्यायास्तु सत्यप्यन्वयव्यतिरेकदर्शनेऽतीतानागतधूमे व-

ह्न्यसमवहितजन्यत्वशङ्कासम्भवात् धूमत्वावच्छेदेन तज्जन्यत्वनिश्चय सम्भवतीति न सामानाधिकरण्येनापादकशङ्काविरोधिनी सामानाधिकरण्येनापत्तिः सम्भवतीत्याशङ्क्य धूमत्वावच्छेदेन तन्निश्चयमुपपाद्य सामानाधिकरण्येनापत्तिमुपपादयितुं प्रकारान्तरेण तादृशशङ्काविरहमुपपादितवन्त। तत्र च वह्न्यसमवहिताजन्यत्वस्य पक्षविशेषणत्वे धूमत्वावच्छेदेन तन्निश्चयेऽपि नोक्ततर्कात् शुद्धधूमत्वसामानाधिकरण्येन वह्न्यजन्यत्वशङ्कानिरास सम्भवति शुद्धधूमत्वावच्छिन्नपक्षकतर्कस्यैव तन्निवर्तकत्वादिति प्रयासवैयर्थ्यमतस्तदभ्युपगतमपि वह्न्यसमवहिताजन्यत्वस्यापादकविशेषणत्वमुपेक्ष्यापाद्यप्रतियोगिकोटौ तद्विशेषणनिवेशनं वह्निसमवहितजन्यादिपदस्य वह्निजन्यादिपरतया च तदेव मतं परिष्कृत्य दर्शयति। अपरे त्विति

(दी०) अपरे तु धूमत्वावच्छिन्नस्य वह्न्यजन्यत्वेन जन्यत्वविशिष्टस्य यथाश्रुतवह्न्यसमवहिताजन्यत्वस्य व्यतिरेक एवापादनीयः। तत्रोक्तन्यायेन तादृशवह्नियुक्तकारणकलापजन्यत्वग्रहेण तद्व्यतिरेकजन्यत्वशङ्कानिरासाद् वह्निविरहेऽपि निरतिशयस्यैव तादृशसमूहस्य धूमजनकत्वसन्देहस्य च तथाविधाद् धूमानुत्पाददर्शनेनैवायोगात् तादृशस्यैव क्वचिद्वह्निं क्वचिच्चेतरदासाद्य जनकत्वसम्भावनायाश्च[1] क्वचिद् धूमानुत्पादप्रयोजकत्वेनावधृतस्य वह्निविरहस्यैव तथाविधसमूहसत्त्वे धूमानुत्पत्तिसामान्यं प्रति लाघवात् प्रयोजकत्वनिर्णयेनापनेयात्मत्वमेव सुग्रहम्। वह्नेः, वह्निसमवहितस्योपादानम्। अत्र च नियमव्यवच्छेद्यस्य च वह्न्यसमवहितानुपादानस्य प्रयोजके तदजन्यत्वज्ञाने परम्परया वह्निसमवहितोपादानस्य वा प्रयोजके तत्र तात्पर्यम्।

(गा०) धूमत्वावच्छिन्नस्य वह्न्यसमवहिताजन्यत्वस्येत्यन्वयः।

---

१ जनकत्वसम्भावनायाश्चेत्य प पाठो नास्त्यनुरोधाद।

तथा च धूमत्वावच्छेदेन निश्चितस्य वह्न्यसमवहिताजन्यत्वस्य व्यतिरेको धूमत्वसामानाधिकरण्येनापादनीय इत्यर्थः। तथा चोक्तप्रयासमन्तरेणैव तादृशतर्काद् धूमत्वावच्छेदेन वह्निजन्यत्वं सुनिश्चेयमिति भावः, न तु धूमत्वावच्छिन्नस्य वह्न्यजन्यत्वेनेत्यन्वयाद् धूमत्वावच्छेदेन निश्चितेन वह्न्यजन्यत्वेनापादनीय इति, धूमत्वावच्छिन्नस्यापादनीय इत्यन्वयेन वा धूमत्वावच्छेदेनापादनीय इत्यर्थः। तद्धर्मावच्छेदेनापत्तेस्तत्सामानाधिकरण्यमात्रविषयकापादकसंशयाविरोधितायाः प्राग् व्यवस्थापनेन तादृशापत्तेरकिञ्चित्करत्वात्। जन्यत्वविशिष्टस्येति। तेनाजन्ये न व्यभिचार इति भावः। नान्तरीयवह्निके व्यभिचारवारणाय वह्निसमवहिताजन्यपदस्य वह्न्यघटितसामान्यजन्यत्वार्थकता नाभ्युपेया, अपि तु जन्यत्वमेव प्राग्वत्पारिभाषिकं निर्वचनीयमित्येतत्सूचयितुं वह्न्यसमवहिताजन्यत्वस्य यथाश्रुतत्वमभिहितम्। अग्रेतनस्य तच्चेत्यस्य वह्न्यसमवहिताजन्यत्वपरामर्शकतामाविष्कर्तुं तदत्र विशेष्यविधया प्रवेशितम्, विशेषणविशेष्यभावविपर्यये क्षतिविरहात्।

विरोधिशङ्कानिराकरणप्रकारं प्रदर्शयन् धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चयस्य सुघटतामाह। तच्चेति। मनसैव सुग्रहमित्यनेनान्वयः। मनसैवेत्यस्योपनयसहकृतेनेत्यादिः। एतावता वह्न्यसमवहितजन्यत्वसामान्याभावस्यायोग्यपिशाचादिजन्यत्वप्रतियोगिकतया प्रत्यक्षासम्भव इति सार्वभौमाभिहितदूषणमुद्धृतम्। उक्तन्यायेनेति। हुताशनरासभादीत्याद्युक्तप्रणाल्येत्यर्थः। वह्नियुक्तकारणकलापजन्यत्वग्रहेण धूमोत्पादकसामग्र्यां वह्निसमवधाननियतत्वरूपवह्निसमवहितत्वग्रहेण तद्व्यतिरेकजन्यत्वशङ्कानिरासादिति धूमसामग्रीत्वावच्छेदेन वह्न्यसमवहितत्वशङ्काया अनुत्पादादित्यर्थः। तथा च तादृशशङ्काधीनाया धूमत्वावच्छेदेन वह्न्यसमवहितसामग्रीकत्वशङ्काया अनवकाशात्तदवच्छेदेन तादृशसामग्रीकान्यत्वनिश्चयात् स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्त्वाव्यवहितप्राक्क्षणकत्वशङ्कानिवृत्तौ तादृशप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वनिश्चयः सम्भवतीति भावः।

ननु तथापि धूमसामग्रीत्वसामानाधिकरण्येन वह्न्यसमवहित-

त्वशङ्कासम्भवात्तदधीना धूमत्वसामानाधिकरण्येन वह्न्यसमवहित-सामग्रीकत्वशङ्का स्यादेवेति कथं धूमत्वावच्छेदेन वह्न्यसमवहिता-जन्यत्वनिश्चयः? न चेन्धनत्वाद्यवच्छिन्नसमूहे धूमोत्पादकसामग्री-त्वस्यान्वयव्यतिरेकेण निश्चयदशायां तादृशसमूहस्य वह्न्यसम-वहितस्य धूमोत्पादकत्वसंशयाद् धूमोत्पादकसामग्रीत्वरूपेण व-ह्न्यसमवहितत्वसंशयो भविष्यति स च वह्निविरहे तथाविधाद् धूमा-नुत्पाददर्शनेन वह्न्यसमवहिततादृशसमूहे धूमोत्पत्त्यप्रयोजकत्वनि-श्चयादेव निवर्तत इत्युपाध्यायोक्तं सम्यगिति वाच्यम्। क्वचिद्वह्निं विना तथाविधसमूहाद् धूमानुत्पाददर्शनेऽपि वह्निसमवहितादिव क्वचित्सहकार्यन्तरसमवहितात्तादृशसमूहाद् धूमो भविष्यतीति श-ङ्कानपायेन तादृशसमूहत्वरूपसामान्यधर्मावच्छेदेन धूमोत्पत्त्यप्रयो-जकत्वनिश्चयस्य दुर्निश्चयत्वादित्याशङ्क्य वह्न्यसमवहिततादृशसमू-हत्वरूपसामान्यधर्मावच्छेदेन धूमोत्पत्त्यप्रयोजकत्वनिश्चयस्य स-म्पादक इतरानपेक्षया धूमोत्पादकत्वाभावस्येतरानपेक्षया तथा त्वाभावस्य च मिलित्वा धूमोत्पादकत्वसामान्याभावव्याप्यस्य निश्चये विरोधिन्या. शङ्काया निवृत्तिप्रकारमाह। वह्निविरहे-ऽपीति। तादृशसमूहस्येत्यनेनान्वितम्। वह्न्यसमवहिततादृश-समूहस्येत्यर्थः। निरतिशयस्यैव धूमजनकत्वसन्देहस्यायोगादि-त्यन्वयः। अतिशयः सहकार्यन्तरसमवधानरूपो विशेषः। तथा-च सहकार्यन्तराघटिततादृशसमूहे धूमोत्पत्तिप्रयोजकतायाः सन्देह-स्यानुदयादिति पर्यवसितार्थः। तथाविधाद् वह्न्यसमवहिततादृश-समूहात्। धूमानुत्पाददर्शनेनेति। तथाविधसमूहे धूमानुत्पादाव्य-वहितप्राक्क्षणावच्छेदेन तदधिकरणसत्त्वस्य दर्शनेनेत्यर्थः। तस्ये-तरानपेक्षया धूमोत्पादकत्वव्यावर्तकत्वादिति भावः। तादृशस्यैव इन्धनादिसमूहस्यैव। आसाद्य सहकारीकृत्य। जनकत्वस्य उत्पत्तिप्रयोजकत्वस्य, इतरघटिततादृशसमूहे धूमोत्पादकत्वस्येति यावत्। क्त्वार्थस्य जनधात्वर्थेऽन्वयो न तु सम्भावनायामिति स्फुटार्कर्तुमसमासेन लिखनम्। सम्भावनाया अपनयादित्यन्वयः। क्वचिदिति। यत्र वह्निं विनेन्धनादिसमूहाद् धूमानुत्पादो दृष्टस्तत्रे-त्यर्थः। अवधृतस्य निश्चितस्य। एतेन वह्निविरहस्य तादृशसमूह-कालीनधूमानुत्पादप्रयोजकत्वं क्लृप्तमितरविरहस्य च तथात्वम-

फलतमिति तद्कल्पनरूपं लाघवबीजं स्फुटीकृतम्।

वह्निविरहस्यैवे त्यादि। तादृशसमवधानानन्तरं धूमसामान्यानुत्पादस्य वह्नित्वावच्छिन्नविरहमानप्रयोज्यत्वनिर्णयेनेत्यर्थः। तत्तद्धूमत्वावच्छिन्नानुत्पादे तदवच्छिन्नहेतुतावच्छेदकतत्तदिन्धनत्वाद्यवच्छिन्नाभावस्यापि प्रयोजकत्वात् सामान्यपदोपादानम्। इत्थं चेतरसहकारेण धूमोत्पादकताया व्यावर्तकस्येतराप्रयोज्यस्वसमवधानकालीनधूमानुत्पादकत्वदर्शनान्नोक्तशङ्का शङ्कास्पदमपीति भावः।

अत्र तदुपादानपदेन वह्निसमवहितमात्रोपादानं विवक्षणीयम्, तच्च तदा वह्निसमवहितपरामर्शकृत्य एव सम्भवति तदर्थं वह्नेरुपादानमित्यत्र वह्निपदं वह्निसमवहितपरतया व्याचष्टे। वह्नेरिति। उपादाने नियमतः कथं कुर्यादिति मूले वह्निसमवहितनिरूपितनियमार्थकान्नियमशब्दाद्विशेषणे तृतीयार्थकृतसिलप्रत्ययेन वह्निसमवहितनियतकृतिमान् कथं भवेदित्यर्थकम्। नियतत्वं विषयताविशेषसम्बन्धेन व्याप्यत्वं वह्निसमवहितेतरविषयकत्वस्याभावरूपम्।

ननु तदुपादानमेव शङ्काप्रतिबन्धकमित्यत्रोपादानपदमेतन्मतेऽपि करणव्युत्पत्त्या प्रवृत्तिप्रयोजकपरं प्रवृत्तेः शङ्कायामविरोधित्वात्, तथापि चासङ्गतिः, वह्निसमवहितोपादाने वह्निसमवहितजन्यत्वज्ञानस्यैव वह्निसमवहितात्मकोपाये धूमरूपफलजनकत्वावगाहनेन जनकत्वात्, तथा च वह्न्यसमवहितजन्यत्वशङ्काविरोधित्वानुपपत्तिः। तत्समवहितजन्यत्वतदसमवहितजन्यत्वयोरविरोधादित्याशङ्कामपनेतुं तदुपादानपदं वह्न्यसमवहिताजन्यत्वनिश्चयपरतया व्याचष्टे। अत्र चेति। नियमश्चावच्छेदस्येति। तस्यैव वह्निसमवहितस्यैवोपादानं यस्मादिति लुप्तपदबहुव्रीहेराश्रयणीयतया एवकारलभ्यव्यवच्छेदरूपस्येत्यर्थः। वह्न्यसमवहितानुपादानस्य वह्न्यसमवहितगोचरधूमार्थिप्रवृत्त्यभावस्य। प्रयोजक इति। तादृशप्रवृत्तिजनकवह्न्यसमवहितधर्मिकधूमजनकताग्रहं विघटय्य निर्वाहक इत्यर्थः। तद्जन्यत्वग्रहे धूमे वह्न्यसमवहिताजन्यत्वज्ञाने, वह्न्यसमवहितधर्मिकधूमानुत्पादकत्वनिश्चय इति यावत्। एतेन वह्न्यसमवहितजन्यत्वशङ्कानिवृत्तिस्तर्ककारणवह्न्यसमवहिताजन्यत्वनिश्चयार्थमपेक्ष्यते न तु साक्षादेव तर्कं, तादृशशङ्कानिवृत्तिश्च यदि तादृशनिश्चयमपेक्ष्यते तदा-

ऽन्योन्याश्रयः, एवं तद्योक्तन्यायेनेत्यादावन्यस्यैव शङ्कानिवर्तकत्वाभिधानात्सन्दर्भविरोधश्चेति दूषणमनवकाशं वेदितव्यम्। तर्ककारणीभूते धूमधर्मिकवह्न्यसमवहितसामग्रीकान्यत्वनिश्चयेऽपेक्षितायां शङ्कानिवृत्तौ ततोऽन्यस्यैव वह्न्यसमवहितधर्मिकधूमसामग्रीत्वविरहनिश्चयस्यापेक्षितत्वाभिधानात्। प्रागप्येतन्निश्चयस्यैव शङ्कानिवर्तकत्वमभिहितमिति सन्दर्भविरोधविरहाच्च।

एवकारान्तर्भावमन्तरेणापि विवक्षितार्थलाभः सम्भवतीत्याह। परम्परयेति। कारणतानिश्चायकतर्कसम्पादनद्वारेत्यर्थः। तत्र। निरुक्तवह्न्यसमवहिताजन्यत्वज्ञाने।

एतन्मतमालम्ब्य मिथ्याभ्युपगतमन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्कानिवर्तकत्वमाक्षेप्तुमुपन्यस्यति। यत्त्विति।

(दी०) यत्तु अन्वयव्यतिरेकानुविधायित्वस्य ज्ञानमेव विशेषदर्शनतया शङ्काप्रतिबन्धकं तदेव तर्कघटकं तदिदमुक्तं यदि गृहीतान्वयव्यतिरेकं हेतुमितीति। तन्न। यादृच्छिकस्य तदनुविधानस्य व्यभिचारित्वान्नियतस्य चोक्ताभेदसम्पादकत्वादिति वदन्ति। तच्चिन्त्यम्।

(गा०) अन्वयव्यतिरेकानुविधायित्वस्य। यत्क्षणे वह्निस्तदग्रिमक्षण उत्पन्नत्वे सति उत्पन्नत्वे सत्येव वा पूर्वक्षणे वह्निव्यतिरेकेऽनुत्पद्यमानत्वस्येत्यर्थः। सत्यन्तनिवेशादनुत्पन्नगगनादौ न व्यभिचारः। ज्ञानं धूमधर्मिकनिश्चयः। विशेषदर्शनतया ग्राह्याभावव्याप्यदर्शनविधया। शङ्काप्रतिबन्धकं धूमधर्मिकवह्न्यसमवहितजन्यत्वशङ्काप्रतिबन्धकम्। वह्न्यन्वयव्यतिरेकानुविधायित्वस्य वह्न्यसमवहितजन्यत्वाभावव्याप्यत्वादिति भावः।

नन्वेवं वह्न्यन्वयव्यतिरेकानुविधायित्वनिश्चय एव धूमे वह्न्यजन्यत्वशङ्कामपि विशेषदर्शनतया निवर्तयिष्यति किं तर्कस्य प्रतिबन्धकत्वकल्पनेनेत्यत आह। तदेवेति। एवकारोऽप्यर्थे। अन्वयव्यतिरेकानुविधानमपीत्यर्थः। तर्कघटकं तर्कप्रयोजकीभूतज्ञानविषयतया तर्कनिर्वाहकम्। तथा च तर्कात्मके मानसज्ञाने प्रागुपस्थितपदार्थान्तराणामुपनयमर्यादया भाने बाधकाभावात्तदप्यन्वयव्यतिरेकाद्य-

नुविधानज्ञानात्मकमिति तर्कस्य स्वातन्त्र्येण शङ्काप्रतिबन्धकत्वविरहेऽपि विशेषदर्शनविधयैव तथात्वस्याक्षततया तर्कस्य शङ्कानिवर्तकत्वाभिप्रायेण मूले तदुपन्यासस्य नासङ्गतिः । तत्र स्वातन्त्र्येण शङ्कानिवर्तकत्वे तात्पर्यानुपगमादित्याशयः ।

एतच्च तर्कस्यैवान्वयव्यतिरेकानुविधानज्ञानत्वादित्यादिमिश्रसमाधानमनुसृत्य तदन्वयाद्यनुविधानज्ञानस्य तदजन्यत्वशङ्काप्रतिबन्धकत्वाभ्युपगमेनाभिहितम् । वस्तुतस्तु तदन्वयव्यतिरेकानुविधानस्य नान्तरीयकवह्निकसाधारणस्य तदजन्यत्वाव्यावर्तकत्वात्तज्ज्ञानस्य तदजन्यत्वशङ्कानिवर्तकत्वमप्रसक्तमेवेति परमार्थः ।

केचित्तु दर्शितमिश्रग्रन्थे तर्कपदं तर्कमूलीभूतज्ञानपरतया व्याख्याय तर्ककारणीभूतान्वयाद्यनुविधायित्वज्ञानस्यापि तर्कत्वोपचार इति हरिदासभट्टाचार्येण मिश्राभिप्रायवर्णनमनुसृत्य तदेव तर्कघटकमिति ग्रन्थमन्वयाद्यनुविधानज्ञानमेव शङ्काविघटनद्वारा तर्कसम्पादकमित्यर्थपरतया व्याख्याय दीधितिकृतामपि तादृशमेवाभिप्रायं वर्णयन्ति । तदसत् । तर्कवैयर्थ्याशङ्कायां तर्कोत्पत्तौ बाधकविरहाभिधानस्यानुपयुक्तत्वात् ।

न च तत्र सामग्रीबलात्तर्कोत्पत्तेरभिधाने सम्भेदे नान्यतरवैयर्थ्यमिति न्यायेन तर्कस्य सार्थकत्वं लभ्यत इति वाच्यम् । अन्वयाद्यनुविधानग्रहस्थले तर्कस्याशङ्कानिवर्तकताया क्लृप्तत्व एव तादृशन्यायावकाशात् । तादृशस्थले च तर्कानुत्पत्त्या तत्र तस्य तथात्वकल्पनानवकाशात् ।

न च तर्कपूर्वमन्वयव्यतिरेकानुविधानग्रहस्यावश्यकत्वेऽपि तर्कदशायां तत्सत्त्वानियमात्तत्प्रतिबन्धकतया सर्वत्र तर्कानन्तरं शङ्कावारणासम्भवात् तर्कस्यापि प्रतिबन्धकत्वकल्पनमावश्यकमिति वाच्यम् । एवं सति मूलस्यैव तादृशशङ्कास्थले शङ्कानिवृत्त्युपयोगित्वाभिप्रायकतासम्भवात्तदुपरि तर्कवैयर्थ्यशङ्काया एवानवतारात् । यत्र च कारणान्तरविरहाच्छङ्कानवतारस्तस्य स्वत सिद्धशङ्काविरहस्थलतया मूलस्य तदन्यस्थल एव तर्कस्य शङ्कानिवर्तकत्वपरतया उभयसम्भेदस्थले तर्कसार्थक्यप्रदर्शनस्यात्यन्तासङ्गतत्वाच्च । एवं च मिश्रग्रन्थस्यापि दर्शितदिशा यथाश्रुतार्थपरत्वमेव सम्यगित्यवधेयम् ।

अन्वयव्यतिरेकानुविधानबोधस्य शङ्काविरोधित्वे मूलस्यापि

स्वरस इत्याह । तदुक्तमिति । यदि हीत्यादेस्तादृशबोधस्य शङ्का विरोधित्वपरत्वाभावे गृहीतान्वयव्यतिरेकत्वाभिधानवैयर्थ्यादिति भाव । वह्निव्यतिरेकानुविधायित्वं तद्व्यतिरेकसमानाधिकरणव्यतिरेकप्रतियोगित्वं तद्व्यतिरेकव्यापकव्यतिरेकप्रतियोगित्वं वा तत्र धूमत्वावच्छिन्नाभावे वह्न्यभावसामानाधिकरण्यस्य प्रत्यक्षसम्भवनाद्यं धूमत्वावच्छेदेन सुग्रहमपि घटादिसाधारणतया वह्न्यसमवहितजन्यत्वाव्यावर्तकमिति तन्निश्चयस्य न तच्छङ्कानिवर्तकत्वमित्याह । यत्किञ्चिदिति । नियमागर्भस्य यत्किञ्चिदधिकरणे तदन्वयव्यतिरेकानुविधानस्येत्यर्थः । व्यभिचारित्वाद् वह्न्यसमवहिताजन्यत्वव्यभिचारित्वात् । द्वितीय घटादिव्यावृत्तत्वेन वह्न्यसमवहितजन्यत्वविरोध्यपि धूमत्वावच्छेदेन दुर्ग्रहम्, धूमत्वसामानाधिकरण्येन वह्निव्यभिचारसन्देहदशायां धूमत्वावच्छिन्नाभावे वह्न्यभावव्यापकत्वग्रहासम्भवात् । लाघवज्ञानादिवशात् कथञ्चित्तन्निश्चये तूक्तजन्यताग्राहकतर्कवैयर्थ्यम् । नियतान्वयव्यतिरेकानुविधायित्वस्यैव जन्यतात्मकतया प्रागेव तन्निश्चयात् ।

न चान्यथासिद्ध्यनिरूपकत्वसहितमेव तज्जन्यतात्मकं तत्तु प्रागनिश्चितमिति तन्निश्चायकतया तर्कसार्थक्यमिति वाच्यम् । अन्यथासिद्ध्यनिरूपकत्वाविशेषितस्यापि नियतान्वयव्यतिरेकानुविधायित्वस्य व्यभिचारव्यावर्तकतया तन्निश्चयस्यैव व्याप्तिनिश्चयसम्पादकत्वेन तादृशविशेषणघटितजन्यतापदार्थनिर्णयस्य प्रकृतेऽकिञ्चित्करत्वादित्याशयवानाह । नियतस्य त्विति । नियमगर्भस्य त्वित्यर्थः । उक्ताभेदसम्पादकत्वादिति । प्रकृतोपयुक्तजन्यताशाभिन्नत्वादित्यर्थः । अन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काविघटनद्वारा धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चायकतावादिनामिदं दूषणमित्यवधेयम् । दीधितिकारमते तु तत्तद्धूमत्वावच्छिन्ने वह्न्यसमवहिताजन्यत्वनिश्चयविरोधिशङ्कानिवर्तकं तज्ज्ञानम्, तन्निवर्तकत्वं च धूमत्वावच्छेदेनान्वयव्यतिरेकानुविधायित्वरूपग्राहिणोऽपि तत्तद्धूमत्वावच्छिन्नविशेष्यकतज्ज्ञानस्याक्षतम् । तत्तद्धूमत्वावच्छिन्नाभावे च वह्न्यभावव्यापकतायाः सुग्रहत्वेन तत्तद्धूमत्वावच्छिन्ने नियतान्वयव्यतिरेकानुविधायित्वं सुग्रहमेव । तादृशग्रहेण जन्यताग्राहकतर्कवैयर्थ्यमित्यपि ना-

शङ्कनीयम, तर्कं विना धूमत्वावच्छेदेन व्याप्तिनिश्चयसम्पादकस्य धूमत्वावच्छेदेन जन्यतानिश्चयस्यानिर्वाहात्।

न च तद्धूमत्वावच्छिन्नधर्मिकान्वयव्यतिरेकानुविधानबोधमूलकतर्कस्य लाघवज्ञानसहकारादेव धूमत्वावच्छेदेन जन्यताग्राहकत्वम्। एवं च धूमत्वसामानाधिकरण्येन तदन्वयव्यतिरेकानुविधानरूपजन्यतांशनिश्चायकप्रमाणेनापि लाघवज्ञानसहकाराद् धूमत्वावच्छेदेन तन्निश्चयजननसम्भवात्तत एव च धूमत्वावच्छेदेन व्याप्तिनिश्चयोपपत्तेस्तर्कवैयर्थ्यं दुर्वारमेवेति वाच्यम्। यतस्तत्तद्धूमत्वावच्छेदेन वह्निजन्यत्वकल्पनापेक्षया धूमत्वावच्छेदेन तत्कल्पने लाघवमिति लाघवज्ञानमुक्ततर्केण धूमत्वावच्छिन्नस्य वह्निजन्यत्वग्रहे सहकारि तादृशं च लाघवज्ञानमनन्यथासिद्धत्वघटितकार्यकारणभावकल्पनायामेवोपपद्यते, न तु नियतपौर्वापर्यमात्रकल्पने, तत्तद्धूमत्वरूपविशेषधर्माणां नियतान्वयव्यतिरेकानुविधायितावच्छेदकत्वस्योभयमतसिद्धत्वादिति। नचिचन्त्यमिति। धूमत्वाद्यवच्छेदेनापाद्यव्यतिरेकनिश्चये लाघवज्ञानापेक्षाया आवश्यकत्वे धूमत्वसामानाधिकरण्येनापाद्यव्यतिरेकज्ञानमूलकादेव तर्काल्लाघवज्ञानदर्शनेन सामान्यधर्मावच्छेदेन जन्यताग्रहोऽस्तु किमुक्तप्रयासेनेति चिन्ताबीजं बोध्यम्।

केचित्तु पादानपदं यथाश्रुतप्रवृत्तिपरमेव। न च प्रवृत्तेः कार्यकारणभावनिश्चयसापेक्षतया तदधीनशङ्कानिवृत्तेः कार्यकारणभावनिश्चयापेक्षणीयत्वेनान्योन्याश्रयः कार्यकारणभावनिश्चयस्य शङ्कानिवृत्त्यधीनतर्कमूलत्वादित्याशङ्कनीयम्। अन्वयव्यतिरेकदर्शनेन विनापि तर्कं कार्यकारणभावनिश्चयसम्भवात् तद्विरोधिशङ्काया अन्वयव्यतिरेकनिश्चयेनापि निवर्तनसम्भवात्।

न चान्यथासिद्धत्वशङ्कां नान्वयव्यतिरेकयोर्निवर्तयितुं प्रभवतीति तन्निवृत्तिस्तर्कमपेक्षत एवेति वाच्यम्। तर्कं विनापि कारणान्तरविरहेण कदाचिदन्यथासिद्धत्वशङ्काविरहसम्भवात्।

एतेन धूमत्वावच्छेदेनान्वयाद्यनुविधानस्य निश्चेतुमशक्यतया तत्सामानाधिकरण्येन वह्निजन्यत्वशङ्का नियमत एव जायते, तत्कथं धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चय इत्यपि परास्तम्। कोट्युपस्थित्यादिविरहेण लाघवज्ञानेन वा तादृशशङ्काया अपि निवृत्तिसम्भवात्।

अथ तर्कं विनैव कार्यकारणभावनिश्चयस्य तर्कविरोधिशङ्का-निवृत्त्यर्थमुपगमे तर्कवैयर्थ्यं तन्निश्चयार्थमेव तर्कानुसरणादिति चेन्न। कार्यकारणभावे निश्चितेऽपि संयोगघटितसामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यत्वनिश्चयं विना यत्र संयोगेन धूमस्तत्र संयोगेन वह्निरिति व्याप्तिनिश्चयासम्भवः। सामान्यतो वह्निजन्यत्वस्य वह्निसमवेतरूपादिसाधारणस्य वह्न्यभाववद्वृत्तित्वरूपव्यभिचाराव्यावर्तकत्वादिति सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यत्वनिश्चयार्थं दर्शिततर्कस्यापेक्षितत्वात्। प्रत्यासत्तिविशेषावच्छिन्नत्वाविशेषितस्यैव तादृशप्रत्यासत्त्यवच्छिन्नत्वविशेषितस्यापि जन्यत्वस्य प्रकारान्तरेण निश्चयसम्भवेऽपि यत्र धूमत्वावच्छेदेन तन्निश्चये विरोधिशङ्काविरहप्रयोजकान्तरसमवधानं नास्ति तत्रैवोक्ततर्कस्य सार्थक्यसम्भवात्। एवं च वह्निसमवहितपदमप्यर्थवत्। वह्न्यसमवहिताजन्यपदं च सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या वह्न्यजन्यपरम्, जन्यो न स्यादित्यस्य च वह्निजन्यो न स्यादित्यर्थः। अवह्नेरेवेत्यस्य च वह्निभिन्नादेवेत्यर्थः। तथा च तादृशशङ्का द्वितीयशङ्का च वह्न्यजन्यत्वकोटिकैव, तस्याः प्रकृततर्के इष्टापत्तिशङ्काविषया विरोधित्वम्। शङ्कयोर्भेदः पूर्ववत्। तत्र च कार्यकारणभावनिश्चयस्य ग्राह्याभावनिश्चयमुद्रयैव विरोधित्वात्तादृशनिश्चयात्कार्यकारणभावविषयकप्रवृत्तेरपि तद्विरोधित्वम्।

न च कार्यकारणभावनिश्चयाधीनप्रवृत्तेः शङ्कानिवर्तकत्वकथनमसङ्गतं कार्यकारणभावनिश्चयार्थमेवान्वयव्यतिरेकदर्शनादितः शङ्कानिवृत्तेरावश्यकत्वादिति वाच्यम्। यत्रान्वयव्यतिरेकदर्शनाद्यधीनशङ्कानिवृत्तिं सम्पाद्य कार्यकारणभावनिश्चयव्यक्त्या सहकार्यन्तरविरहात्र तर्को जनितस्तदधीनप्रवृत्त्युत्तरमेव सहकार्यन्तरसमवधानं तदव्यवहितप्राक्क्षणे चान्वयव्यतिरेकदर्शनादिकं नासीत्तत्र पूर्वोत्पन्नकार्यकारणभावनिश्चयाधीनप्रवृत्तेः शङ्कानिवृत्तिमन्तरेण न पुनः[1] कार्यकारणभावनिश्चयः सम्भवतीति न तर्कानुपपत्तिरिति तादृशस्थलाभिप्रायेण कार्यकारणभावनिश्चयाधीनप्रवृत्तेः

१. शङ्कानिवृत्तिसम्भवेन पुनरिति पाठान्तरम्।

शङ्काविरोधितशभिधानसङ्गतेरिति सर्वसामञ्जस्यमित्याहुः, तेषां मतमुपन्यस्यति । केचित्त्विति ।

(दी०) केचित्तु कार्यकारणभावग्रहानन्तरं व्याप्तिग्रहाय व्यधिकरणस्य जनकत्वशङ्कानिरासार्थमयं तर्कः । तथा च धूमो यदि सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या वह्न्यजन्यत्वे सति सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्याद्वह्निजन्यो न स्यात् । अप्रत्यासन्नस्याजनकत्वात् । तादृशाजन्यत्वं च प्रत्यासत्त्यन्तरशालिवह्निसत्त्वेऽपि धूमानुत्पादादिना ग्राह्यमिति ।

(गा०) यत्त्वेतन्मतेऽप्युपादानपदमन्वयव्यतिरेकानुविधानज्ञानपरमेव, तदधीनशङ्कानिवृत्तिमूलकः कार्यकारणभावनिर्णयस्तु शङ्कानिवृत्त्यर्थकतया नाभिहितः, अपि त्वापाद्यव्यतिरेकनिश्चयविधया साक्षात्तर्कोपयोगित्वेनैव, ईदृशश्च प्रयासः समवहितपदसार्थक्यायैव, आपाद्यदिशि जन्यपदस्य पूर्वोक्तार्थपरत्वापेक्षया वह्निजन्यत्वपरत्वौचित्याच्चेति । तदसत् । सार्वभौमेन उपादानपदस्य प्रवृत्तिपरत्वे कार्यकारणभावनिश्चयस्य तर्कपूर्वमवश्यमपेक्षणीयतया तर्कवैयर्थ्यमित्याक्षेपे एतन्मतस्य प्रवृत्तिपरत्वोपपादकतयोपन्यस्तत्वादेतन्मतस्य तदुपपादकत्वविरहे दीधितिकृतोऽपि तर्कव्याख्यानावसरे एतन्मतमनुपन्यस्य तदुपादानमेवेति ग्रन्थव्याख्यावसरे एतदुपन्यासस्य निर्बीजत्वापाताच्च । व्याप्तिग्रहायेति । यत्र संयोगेन धूमस्तत्र संयोगेन वह्निरिति व्याप्तिनिश्चयार्थमित्यर्थः । व्यधिकरणस्य जनकत्वशङ्कानिरासार्थमिति । व्यधिकरणोऽपि वह्निर्धूमं जनयिष्यतीति शङ्काधीनाया धूमे सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नवह्निजन्यत्वाभावशङ्कायाः प्रतिबन्धार्थमित्यर्थः । स्तोकं पाक इतिवत् क्रियाविशेषणत्वाद् द्वितीया ।

सामानाधिकरण्यातिरिक्तेति । संयोगान्यसम्बन्धावच्छिन्नवह्निनिष्ठजनकत्वानिरूपकत्वे सति, वह्निनिरूपितसंयोगान्यसम्बन्धावच्छिन्नजन्यताशून्यत्वे च सति, संयोगसम्बन्धावच्छिन्नवह्निनिष्ठजनकताप्रतियोगिकसंयोगसम्बन्धावच्छिन्नजन्यताशून्यः स्याद्वह्निजन्यो न स्यादित्यर्थः । सत्यन्तं चापादककोटावापाद्यप्रतियोगि-

कोटावेव वा निवेशनीयम्। संयोगातिरिक्तसम्बन्धेन धूमं प्रत्येव संयोगेन वह्निः कारणं संयोगेन धूमं प्रति संयोगातिरिक्तसम्बन्धेन वा वह्निः कारणमित्येतादृशशङ्कादशायां संयोगेन धूमं प्रति संयोगेन वह्नेर्व्यापकत्वनिश्चयायोगाद्विशेष्यदले जन्यतायां जनकतायां च संयोगसम्बन्धावच्छिन्नत्वविशेषणम्। तादृशजन्यताप्रसिद्धिर्वह्निजन्यालोकादौ। संयोगसम्बन्धावच्छिन्नवह्निनिष्ठजनकतानिरूपितसंयोगावच्छिन्नजन्यताशून्यस्यापि वह्निसमवेतरूपादेः पाकजपार्थिवरूपादेश्च वह्निजन्यत्वाद्व्यभिचार इति चरमसत्यन्तोपादानम्। वह्निनिष्ठतादृशजनकतानिरूपिततादृशजन्यताशून्यस्यापि संयोगान्यसम्बन्धावच्छिन्नवह्निनिरूपितजन्यताशून्यस्यापि च धूमस्यान्यसम्बन्धावच्छिन्नवह्निनिष्ठजनकतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्निजन्यता निवर्हतीत्यप्रयोजकत्वशङ्कानिरासाय प्रथमसत्यन्तम्।

न चैवमपि वास्तवव्यभिचारावारकतया तस्य वैयर्थ्यं दुष्परिहरमेवेति वाच्यम्। तथात्वेऽपि व्याप्तिग्रहौपयिकतया तस्य सार्थक्यात्। अत एवासाधारण्यवारकस्य मिश्रमते सार्थक्यम्।

वस्तुतो व्यर्थविशेषणतास्थले व्याप्तिसत्त्वेन परार्थानुमानस्थल एव तस्याधिक्यरूपनिग्रहस्थानसम्पादकतया दोषत्वं न तु स्वार्थानुमान इत्यकिञ्चित्करमेतत्। अस्तु वा संयोगान्यसम्बन्धावच्छिन्नवह्निनिष्ठजनकत्वाप्रतियोगिकत्वसंयोगान्यसम्बन्धानवच्छिन्नत्वोभयाभाववद्वह्निजन्यताशून्यत्वमेव सत्यन्तार्थः। अखण्डस्योभयाभावस्य निवेशान्न वैयर्थ्यसम्भावना। वह्निजन्यो न स्यादित्यन्तरमिति पर्यवसिततर्कावतार इति पूरणीयम्। सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या सामानाधिकरण्यप्रत्यासत्त्या च वह्निजन्यत्वाभावेऽपि वह्निजन्यत्वसामान्याभावो न वर्तत इत्यप्रयोजकत्वशङ्कासम्भवात्कथमयं तर्क इत्यत आह। अप्रत्यासन्नस्येति। तथा च जन्यजनकभावस्य प्रत्यासत्त्यवच्छिन्नत्वनियमावधारणेन मिलितोक्तविशेषाभावद्वये सामान्याभावव्याप्तिनिश्चयः सुघट एवेति भावः।

ननु धूमे सत्यन्तस्य दुर्निश्चेयतया नायं तर्कः सम्भवतीत्यत आह। प्रत्यासत्त्यन्तरशालिवह्निमत्त्व इति। तादात्म्यादिना वह्निसम्बन्धिनीत्यर्थः। धूमानुत्पादादिनेति। धूमानुत्पादादिद-

र्शनेनेत्यर्थः। आदिपदेन सम्बन्धान्तरघटितव्यतिरेकव्यभिचारपरिग्रहः।

(दी०) इदमेव च वाचोभङ्ग्या परे परिष्कुर्वन्ति। धूमो यदि वह्न्यनधिकरणदेशानुत्पत्तिकत्वे सति वह्न्यधिकरणदेशोत्पत्तिको न स्यात् जन्यो न स्यात्। तादृशानुत्पत्तिकत्वग्रहश्च धूमानुत्पत्तिं प्रति वह्निसम्बन्धाभावस्य प्रयोजकत्वे ग्राह्ये उपस्थितत्वाल्लाघवाच्च तादृशसम्बन्धाभावस्यैव तथात्वावधारणादिति। तच्चिन्त्यम्।

(गा०) सार्वभौममतमाक्षिपति इदमेव चेति। अन्यवदितमवनेचेत्यर्थः। वाचोभङ्ग्येति। तथा चेदृशादिशैव कार्यकारणभावस्य तर्कात्पूर्वं निश्चितत्वेऽपि तर्कस्यावैयर्थ्यमुपपादितवन्तो न तु स्वातन्त्र्येणेत्याक्षेपः। एतन्मतेऽपि यथाश्रुतोपादानपदार्थः कार्यकारणभावनिश्चयाधीना प्रवृत्तिरेव शङ्काविरोधिनी कार्यकारणभावनिश्चयः पूर्वमत इवान्वयव्यतिरेकनिश्चयाधीन एव न तु तर्कमपेक्षते, अतो नान्योन्याश्रयः। अवह्नेरेव भविष्यतीति शङ्काद्वयं वह्न्यनधिकरणदेशोत्पत्तिकत्वकोटिकं वह्न्यनधिकरणदेशानुत्पत्तिकत्वरूपसत्यन्तदलनिश्चयविघटनेन तर्कविरोधि। तत्र च कार्यकारणभावविषयिणी प्रवृत्तिर्धूमानुत्पत्तिवह्न्याधारताविरहयोः प्रयोज्यप्रयोजकभावनिश्चयं सम्पाद्य विरोधिनी वह्न्याधारताविरहप्रयोज्यानुत्पत्तिकत्वस्य वह्न्यनाधारोत्पत्तिकत्वव्यावर्तकतया तन्निश्चयस्य तत्संशयविरोधित्वात्। तत्कारणकत्वस्य च तत्समवधानविरहाप्रयोज्यानुत्पत्तिकत्वव्यावर्तकतया संशयान्यतद्विषयकस्य तच्छङ्काविघटकतया प्रयोज्यप्रयोजकभावनिश्चायकत्वात्। एवं प्रयोज्यप्रयोजकभावनिश्चयविरोधितया किञ्चिदप्रयोज्याभावप्रतियोग्युत्पत्तिकत्वरूपाहेतुकत्वकोटिकतृतीयशङ्काऽपि तर्कस्य विरोधिनी।

न च वह्न्यनधिकरणानुत्पत्तिकत्वनिश्चयस्यैवोत्पत्त्याश्रयवृत्तित्वविशिष्ट उत्पत्तिविशेषसम्बन्धेन शुद्धे वा धूमे वह्निव्यभिचारसंशयविघटकतया व्याप्तिनिश्चायकत्वसम्भवेन तर्कवैयर्थ्यमिति वाच्यम्। व्यभिचारशङ्कानिवृत्तावपि धूमे वह्न्यधिकरणदेशानुत्पत्तिकत्वसन्दे-

ह्यानिवृत्त्या उत्पत्त्याश्रयवृत्तित्वविशिष्टे, उत्पत्तिविशेषसम्बन्धेन शुद्धे वा धूमसामान्ये वह्निसामानाधिकरण्यनिश्चयासम्भवेन तादृशवह्निसामानाधिकरण्यघटितव्याप्तेर्दुर्निश्चेयतया वह्न्यधिकरणदेशानुत्पत्तिकत्वसंशयनिवर्तकप्रकृततर्कस्य तादृशव्याप्तिनिश्चयोपयोगित्वात्। न ह्युक्ततर्कं विना धूमान्तरे वह्न्यधिकरणदेशानुत्पत्तिकत्वसंशयस्यान्यतो निवृत्तिः सम्भवति, नित्यानित्यसाधारणस्य वह्न्यनधिकरणदेशानुत्पत्तिकत्वादेस्तद्व्याप्तकत्वात्तत्सहितस्योत्पन्नत्वस्य तद्विरोधित्वेऽपि विशिष्टस्य धूमेऽग्रहदशाया तर्कसार्थक्यात्।

न चापाद्यव्यतिरेकनिश्चयविधया धूमे विशिष्टोत्पत्तिमत्त्वग्रहस्य तर्ककारणतया तदावश्यकतेति वाच्यम्। सत्यन्तदलस्यापादकविशेषणतापक्षे विशिष्टाभावस्यानापाद्यतया विशिष्टनिश्चयस्यानावश्यकत्वात्। आपाद्यव्यतिरेकनिश्चयस्य शङ्काविरोधितया तर्कवैयर्थ्यस्य विशिष्टाभावापाद्यतावादिनां दीधितिकृतां मत एव दुरुद्धरत्वात्।

न च सत्यन्तस्यापादकविशेषणतापक्षे विपर्ययपर्यवसायितानिर्वाहाय तस्य पक्षविशेषणताया आवश्यकतया पक्षे तत्सहितोत्पन्नत्वस्य निश्चय आवश्यक इति वाच्यम्। तावता पक्षे उभयनिश्चयध्रौव्येऽपि विरोधितावच्छेदकैक्यविशिष्टापरत्वेन निश्चयस्यातथात्वात्। एवमेतन्मते विशिष्टे वह्न्यधिकरणदेशानुत्पत्तिकत्वविरोधग्रहस्यानावश्यकतया तद्ग्रहदशायामपि तर्कसार्थक्यमवगन्तव्यम्। वह्न्यधिकरणेति। उभयत्राधिकरणत्वमुत्पत्तिश्च संयोगेन। प्रयाजनं स्वयमूह्यम्।

ननु वह्निकारणकत्वं सामान्यतो वह्निसमवधानविरहप्रयोज्यानुत्पत्तिकत्वस्य व्याप्य, न तु संयोगरूपतत्समवधानविरहप्रयोज्यानुत्पत्तिकत्वस्यापि वह्निसमवेतरूपादिसाधारणत्वादिति कथं तद्विषयिणी प्रवृत्तिर्वह्निसंयोगविरहप्रयोज्यानुत्पत्तिकत्वं संयोगेन वह्न्यनधिकरणदेशोत्पत्तिकत्वव्यावर्तकं निश्चाययिष्यति?

न च संयोगघटितसामानाधिकरण्यप्रत्यासत्त्या वह्निकारणकत्वं संयोगेन वह्न्यधिकरणताविरहप्रयोज्यानुत्पत्तिकत्वनियतमिति तद्विषयकमुपादानमेव तन्निश्चाययेदिति वाच्यम्। संयोगघटितसामानाधिकरण्यप्रत्यासत्त्या वह्निकारणकत्वस्य प्राङ्निश्चये तस्यैव विशे-

पदर्शनतया संयोगेन वह्न्यधिकरणदेशोत्पत्तिकत्वनिश्चायकतास-म्भवेन प्रकृततर्कवैयर्थ्यप्रसङ्गेन यत्र सम्बन्धविशेषमनन्तर्भाव्यैव स्वरूपसम्बन्धविशेषरूपकार्यकारणभावः प्रागवगतस्तत्रैव तर्को पयोगितायाः स्वीकरणीयतया वह्निसंयोगविरहप्रयोज्यानुत्पत्तिक-त्वस्य च तत्र दुर्निश्चयत्वेन प्रकृततर्कानुपपत्तेस्तत्राशङ्क्यसमाधा नत्वादित्यत आह । तादृशानुत्पत्तिकेति । संयोगेन वह्न्यन-धिकरणदेशानुत्पत्तिकत्वनिश्चयस्त्वित्यर्थः । 'वह्निसम्बन्धाभावस्य' वह्निसम्बन्धप्रतियोगिकाभावस्य । 'ग्राह्ये' वह्निधूमयोर्हेतु हेतुमद्भावनिश्चयबलाद् गृह्यमाणे । 'लाघवात्' परम्परासम्बन्धा पेक्षया लघुशरीरत्वात् । 'तादृशसम्बन्धाभावस्य' संयोगरूपसम्ब-न्धाभावस्य । तथात्वावधारणात् प्रयोजकत्वनिश्चयात् । अत्र चोपादानपदस्य यथाश्रुतार्थपरतोपपत्त्यर्थमेवैतावान् प्रयासः । अन्यथा, उक्तरीत्या धूमत्वावच्छेदेन व्याप्तिनिश्चयविरोधिन्या धूम-त्वसामानाधिकरण्येन व्यभिचारशङ्कया विरोधिनो धूमत्वाव-च्छेदेन वह्निजन्यतानिश्चयस्य जननेनैवोक्ततर्कसार्थक्यसम्भवे तदुपेक्षाया अनुचितत्वात्, सैव च न सङ्गच्छते प्रवृत्तेः श-ङ्काविरोधित्वस्याभिप्रेतत्वे यदि हीत्यादिना उपादानं कथं कुर्यादि-त्यन्तेन शङ्कासम्भावनया तत्सत्त्वे प्रवृत्त्यनुत्पादप्रसञ्जनस्यासङ्गत्या-पत्तेः। न हि कार्यसत्त्वं प्रतिबन्धकानुत्पादप्रयोजकम् । कार्यकारण-भावनिश्चयघटितप्रवृत्तिसामग्रीसत्त्वे यदुत्पत्तौ बाधकाभावात् ।

न च कार्योत्पत्तिपूर्वं प्रतिबन्धकाभावस्यावश्यकतया शङ्को-त्पत्त्या तत्पूर्वमुपादानरूपतत्प्रतिबन्धकाभावस्य शक्यापादनतया त-दापत्तिपरतया तद्ग्रन्थसङ्गतिरिति वाच्यम् । एवमप्युपादानस्य शङ्काप्रतिबन्धकतासिद्धिमन्तरेण तादृशापत्त्ययोगात्, ईदृशापत्त्या शङ्काविरहं प्रसाध्य तन्निर्वाहकतयोपादानस्य शङ्काप्रतिबन्ध-कत्वव्यवस्थापनपरतया तस्मात्तदुपादानमेवेत्यस्य दुस्सङ्गम त्वात् । एवं धूमत्वावच्छेदेन वह्निमदुत्पत्तिकत्वनिश्चयोऽप्यकि-ञ्चित्करः, हेतुतावच्छेदकावच्छेदेन साध्यसामानाधिकरण्यज्ञानस्या-नुमितावनपेक्षितत्वात्, तदपेक्षायामवृत्तिसाधारणद्रव्यत्वावच्छि-न्नलिङ्गकानुमितिविलोपप्रसङ्गात् । धूमत्वसामानाधिकरण्येन वह्नि-मदुत्पत्तिकत्वं च प्रागेव निश्चितम् । अन्वयव्यतिरेकग्रहस्य तद्वि-

पयकत्वादिति तर्कवैयर्थ्यं दुर्वारमेव। एवं प्रवृत्तेः शङ्काविरोधित्वमपि प्राग् दूषितमित्यादि चिन्ताबीजं बोध्यम्।

(चि०) शङ्कायां न नियतोपादानं नियतोपादाने च न शङ्का। तदिदमुक्तं तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति। न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते तत्कारणं तन्नेत्याशङ्कयते चेति। एतेन व्याघातो विरोधः स च सहानवस्थाननियम इति तत्राप्यनवस्थेति निरस्तम्। स्वक्रियाया एव शङ्काप्रतिबन्धकत्वात्।

मिश्रास्तु उपादानपदस्य यथाश्रुतार्थकत्वोपपादनायैवं वर्णयन्ति। तर्कस्य व्याप्तिमूलकत्वेनानवस्थेति शङ्का न स्वार्थानुमानस्थलाभिप्रायिका, क्वचित्कोट्युपस्थित्यादिरूपशङ्काकारणविरहेणापि मूलशैथिल्यादिशङ्काविरहसम्भवेन सर्वत्र तर्कानपेक्षया ऽनवस्थानिवृत्तेर्व्याघातोपदर्शनवैयर्थ्यादपि तु परार्थस्थले धूमादिना कार्येण वह्न्यादिसाधनावसरे प्रतिवादिनाऽनुमानाप्रामाण्यवादिना चार्वाकेण व्यभिचारशङ्कया व्याप्तिग्रहो मम न जायत इत्युक्ते तं प्रति व्याप्तिग्रहं स्वीकारयितुं वादिना शङ्कानिवर्तकस्योद्भावने मम तर्कविरोधिमूलशैथिल्येष्टापत्त्यादिशङ्कासत्त्वात्तर्क एव नावतरतीति परेणोत्तरयितव्यम्। तच्छङ्काविरोधितर्कान्तरोपन्यासेऽपि तत्तर्कविरोधिशङ्कान्तरं परेणोद्भावनीयमिति सर्वत्रैव शङ्कोद्भावनसम्भवात्तर्कोपन्यासानवस्थया परार्थानुमानोच्छेद इत्येवं तर्कस्येत्यादिशङ्कार्थः।

इत्थं च यावदाशङ्कमित्यादेरनवस्थासमाधानपरमूलस्य यावत् परस्य तर्कादिविरोधिन्याः शङ्काया उद्भावनं निरवधि तावदेव तर्कोपन्यासः, यत्र शङ्कासत्त्वे परस्यैव प्रवृत्तिव्याघातस्तत्र व्याघातोपदर्शनेनैव शङ्कोद्भावनान्न तर्कोपन्यास इति न तदुपन्यासानवस्थेत्यत्र तात्पर्यम्। एवं च तर्कानुसरणादित्यस्य तर्कोपन्यासादित्यर्थः। व्याघातेनेति। प्रतिवादिनश्चार्वाकस्यैव प्रवृत्तेर्व्याघातो-

पन्यासेनेत्यर्थः । शङ्कैव नावतरतीति । परेण स्वशङ्कोद्भावनं न सम्भवतीत्यर्थकम् । तर्कं विनैव व्याप्तिग्रह इति तर्कान्तरमनुपन्यस्यापि परं प्रति व्याप्तिस्वीकारणसम्भव इत्यर्थकम्, न तु व्याघातेनेत्यादेर्व्याप्तिग्रह इत्यन्तस्य यत्र प्रमाणसिद्धप्रवृत्त्यन्यथानुपपत्त्या प्रवृत्तिमतः कारणान्तराभावाधीनशङ्कानवतारसिद्धिस्तत्र तर्कानुपयोगेन तं विनैव व्याप्तिग्रहसम्भवान्न तर्कव्याप्तिग्रहधारानवस्थेत्यर्थः। व्याप्तिग्रहमूलकीदृशतर्कोपन्यासानन्तरं तद्विरोधिकीदृशशङ्कायाः प्रवृत्तिव्याघातेनोद्भावनासम्भव इत्याशङ्कायां तथा हीत्यादिग्रन्थः। इत्यत्रेति। शङ्का स्यादिति। तर्के उत्पत्स्यमान इति मम शङ्का भवतीति परेणोद्भावनीयमित्यर्थकम्। सर्वत्र शङ्कायां स्वक्रियाव्याघातः। स्वक्रियाव्याघातकत्वं स्वक्रियाविरहप्रयोजकत्वमिति यावत्। यदि हीत्यादिना तादृशस्वक्रियाव्याघातस्फुटीकरणम्। तेन विनापि तत्सम्भवादिति। उक्तशङ्काविरोधेन वह्निधूमादीनां हेतुहेतुमद्भावनिश्चायकतर्कानवतारेण वह्न्यादिकं विनापि धूमादिसम्भवादिति शङ्कोदयादित्यर्थः। धूमादौ वह्न्याद्यजन्यत्वशङ्कायाश्चानिराकरणादिति यावत्। तस्मात् शङ्काया प्रवृत्तिविरोधित्वात्। तदुपादानमेव धूमाद्यर्थिनः परस्य प्रवृत्तिरेव। शङ्काप्रतिबन्धकं मूलशैथिल्यादिशङ्कया कथं तर्कोऽवतरेदिति परशङ्काविरोधि। प्रवर्तमानस्य स्वप्रवृत्तिव्याघातकशङ्कासत्त्वादिशङ्कनस्य निग्रहप्रयोजकत्वादिति भावः। तदेव व्याशङ्क्यत इति। विचारदशायामित्यादिः। यस्मिन्नाशङ्क्यमाने इति। आशङ्क्यमानस्य यस्य सत्त्वे इत्यर्थः। स्वक्रियाव्याघातः स्वप्रवृत्त्यनुपपत्तिः। तदेव द्रढयति। न हि सम्भवतीति। तत्कारणं तस्य धूमादेः कारणम्। तत् वह्न्यादिकम्। इत्याशङ्क्यते चेति। तर्कविरोधिशङ्कासत्त्वेन कारणतानिश्चायकतर्कानवतारादेतादृशी शङ्का जायत इति विचारदशायां शङ्क्यत इत्यर्थः। उक्तशङ्कायां शङ्काप्रवृत्त्योर्विरोधज्ञानं प्रतिबन्धकमित्येव व्याघातेनेत्यादिनोक्तमित्यभिमानिनां मतमुपन्यस्यति। एतेनेति। तनाप्यनवस्थेति। शङ्कानिवृत्त्यर्थं तन्निश्चयापेक्षायामप्यनवस्थेत्यर्थः। नियमघटितविरोधनिश्चयार्थमपि तद्विरोधिशङ्कानिवर्तकतर्कापेक्षणादिति भावः। स्वक्रियाया एवेति। प्रतिवादिप्रवृत्तेरेव शङ्काप्रतिबन्धकत्वात्प्रतिवादिनः शङ्कोद्भावनप्रतिबन्धकत्वेनाभिधानात्, न तु श-

ङ्कायां विरोधग्रहस्येत्यर्थः । एतदेव मतमुपन्यस्यति । मिश्रास्त्विति ।

(दी०) मिश्रास्तु परं प्रति व्याप्तिग्रहोपाये प्रदर्श्यमाने व्यभिचारशङ्कानिरासहेतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघातोऽयमुपदर्श्यते, मैवं शङ्किष्ठाः, तथा सति तत्तत्कार्यार्थितया तत्र तत्र कारणे तवैव प्रवृत्तयो व्याहन्येरन् । यदाह, न हि सम्भवति स्वयं वह्न्यादिकमितीति प्राहुः ।

(गा०) परं प्रतीति । व्यभिचारशङ्कया व्याप्तिग्रहोपायाभावेन मम व्याप्तिग्रहो न सम्भवतीति वादिनं प्रतीत्यर्थः । व्यभिचारशङ्कानिरासहेतुत्वेनेति । परोद्भावितायास्तदीयव्यभिचारशङ्काया निरसनकरत्वेनेत्यर्थः । तं प्रति परं प्रति । परेण मूलशैथिल्यादिशङ्कोद्भावनस्य निवृत्तये इति यावत् । व्याघातोऽयमुपदर्श्यत इति । सर्वत्र स्वक्रियाव्याघात इत्यादिनेति शेषः । व्याघातोपदर्शनाकारमेवाह । मैवं शङ्किष्ठा इति । 'शङ्किष्ठाः' शङ्कामुद्भावयेथाः । 'व्याहन्येरन्' नोत्पद्येरन् । शङ्कया तर्कानवतारेण तवापि कारणतानिश्चयासम्भवादिति भावः । न हि सम्भवतीत्यादिनापि शङ्कासत्त्वे चार्वाकप्रवृत्त्यसम्भव एव उक्त इत्याह । यदाहेति । यदिति व्याघातक्रियापरामर्शकम् । प्राहुरिति प्रशब्देनास्वरसाभावो दर्शितः ।

मूले स्वक्रियाया एवेति । यद्यपि क्रियापदस्यान्वयव्यतिरेकानुविधानबोधपरतया तस्य च विशेषदर्शनविधयैव विरोधित्वेन व्याप्तिग्रहापेक्षातादवस्थ्यमेव तथापि कालान्तरगृहीतव्याप्यवच्छेदकधर्मप्रकारेण व्याप्यदर्शनस्यापि शङ्काविरोधितयाऽविच्छिन्नतर्कव्याप्तिग्रहधाराभ्युपगमस्य नावश्यकतेति ध्येयम् । एवकारेण व्याघातबोधव्यवच्छेदः ।

(चि०) अत एव 'व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः' इति खण्डनकारमतमप्यपास्तम् ।

न हि व्याघातः शङ्काश्रितः, किं तु स्वक्रियैव शङ्काप्रतिबन्धिकेति। न वा विशेषदर्शनात् क्वचिच्छङ्कानिवृत्तिरेवं स्यात्। न चैतादृशतर्कावनाशे भूयोदर्शनं विनेति भूयोदर्शनादरः। न तु स स्वत एव प्रयोजकः। अत एव न तदाहितसंस्कारो न मानान्तरम्। तर्कस्याप्रमात्वात्।

(गा०) "शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः' इति कारिकया शङ्कायाः क्वचिद्व्याघातप्रयोज्यानुत्पत्तिकत्वमभिहितमाचार्यैरित्यभिमानेन तदुपरि खण्डनकृतां शङ्कानिष्ठप्रवृत्तिप्रतियोगिकविरोधरूपव्याघातस्य स्वसम्बन्धेन शङ्काप्रत्यासन्नीभूय तत्प्रतिबन्धक इत्यनुमतं तन्न सम्भवति व्याघातस्य शङ्काश्रितत्वेन शङ्कोत्पत्तावेव तत्र व्याघातस्य प्रतिबन्धकत्वम्भवेन तदुत्पत्तेरावश्यकतया व्याघातस्य तत्प्रतिबन्धकत्वव्याघातादित्याक्षेपमनुपन्यस्य निराकरोति। न हि इति।

व्याघातो यदीति। शङ्काप्रत्यासन्नतया स्वक्रियत इति शेषः। शङ्कास्तीति। तदा शङ्कोत्पादोऽवश्यमङ्गीकार्य इत्यर्थः न चेदिति। शङ्काप्रत्यासन्नो व्याघातश्चेन्नास्ति तदा प्रतिबन्धकसमवधानाभावाच्छङ्का जायतैवेत्यर्थः। अतो व्याघातावधिर्व्याघातप्रयोज्यानुत्पत्तिका आशङ्का इति कुतः, तर्कः शङ्कावधिः शङ्कानुत्पादप्रयोजक इति वा कुतः, तर्कविरोधिशङ्काया व्याघातानिवर्त्यत्वेनानवस्थया तर्कस्यैवानवतारादित्यर्थः।

अथ वा तर्कः शङ्कावधिः शङ्कावध्यवधिकः, यत्र व्याघाताच्छङ्काविच्छेदस्तत्र तर्कान्तरानुपयोगात्तर्कधाराया अपि विरह इति यावत्, एतावता नानवस्थावकाश इति कुत इत्यर्थः। न हि व्याघातः शङ्काश्रितः प्रतिबन्धकविधया शङ्कानुत्पादप्रयोजक इत्युच्यते इति शेषः। किं तु स्वक्रियैवेति। आचार्यकारिकायां व्याघातावधिराशङ्केत्यस्य यत्र शङ्कोत्पत्तौ प्रमाणसिद्धप्रवृत्त्यनुपपत्तिरूपो व्याघातस्तदवधिका शङ्केत्यर्थः। तादृशस्थले स्वक्रियाप्रतिबन्धेनैव शङ्काया अनुत्पाद इति यावत्, न तु तर्कार्थ इति भावः।

केचित्तु व्याघाताविधिराशङ्केत्यत्र व्याघातपदं न शङ्कानिष्ठप्रवृत्तिविरोधपरम्, अपि तु स्वक्रियानिष्ठशङ्काप्रतिबन्धकतावच्छेदकधर्मवत्त्वपरं व्याघातस्य शङ्कावधित्वं शङ्कानुत्पादप्रयोजकत्वरूपमाचार्याभिप्रेतं तत्तदव्यवहितपूर्वकाले प्रतिबन्धकस्यैवाऽव्यवहितप्राक्कालीननिष्ठप्रतिबन्धकतावच्छेदकधर्मवत्त्वस्यापि कार्यानुत्पादप्रयोजकत्वादिति नानवस्था शङ्कास्पदमिति भाव इत्याहुः।

ननु स्वक्रियाया अपि शङ्कानिवर्तकत्वं विचारासहं तस्याः शङ्काविरोधित्व एव तन्निवर्तकतासम्भवात् तत्र च शङ्काप्रतियोगिकविरोधसत्त्वे विरोधघटकशङ्कासत्त्वस्यावश्यकतया शङ्कानिवर्तकताया एव व्याघातादित्यत आह। न वेति। क्वचिदपि विरोधिज्ञानात्[1] शङ्कानिवृत्तिरेव न स्यात् सर्वत्रैवेदृशवितर्कसम्भवादित्यर्थः। तथा च सर्वानुभवसिद्धं करादिदर्शनस्य स्थाणुत्वादिशङ्कानिवर्तकत्वमपि भज्येत। यदि च विरोधप्रतियोगिनः कस्यचित् क्वचित् सत्त्वे एव तत्प्रतियोगिकविरोधस्तन्निवर्तकस्य निर्वहति न तु यदा यत्र निवृत्तिरभिमता तदा तत्र विरोधप्रतियोगिसत्त्वमपेक्ष्यत इत्युच्यते तदा तुल्यं प्रकृतेऽपीति भावः।

ननु व्यभिचारादर्शनसहकृतस्य सहचारदर्शनमात्रस्य व्याप्तिग्राहकत्वोपगमे भूयोदर्शनस्य व्याप्तिग्राहकताप्रवादो भज्येतेत्यत आह। न चैतान्येति। तदादरो भूयोदर्शनस्य तर्कसम्पादनद्वारा व्याप्तिग्रहोपयोगितेत्यर्थः। यद्यप्यापाद्यव्याप्तिज्ञानादिसत्त्वे प्रथमदर्शनेऽप्येतादृशतर्कप्रवृत्तिः सम्भवतीति तर्केऽपि साध्यसाधनभूयःसहचारदर्शनमकिञ्चित्करं तथापि यत्र महानसे प्रथमं सहचारदर्शनेऽपि गोष्ठे वह्निं विनापि धूम उत्पत्स्यत इति शङ्का जाता गोष्ठे वह्निधूमयोः सहचारदर्शने च तन्निवृत्त्या कोट्युपस्थित्यादिविरहेण चान्याधिकरणान्तर्भावेण शङ्कानुदयेन तर्कावतारस्तत्र द्वितीयदर्शनस्यैव क्रमेण तृतीयादिदर्शनस्यापि क्वचिदपेक्षासम्भव इति नासङ्गतिः।

न चाधिकरणान्तरान्तर्भावेण तथा शङ्कायामपि महानसीयधूमे वह्नयसमवहिताजन्यत्वनिश्चयसम्भवेन धूमत्वावच्छेदेनापत्तिः

---

१ विरोधदर्शनादिति पुस्तकान्तरे पाठः।

सम्भवत्येवेति द्वितीयादिदर्शनमकिञ्चित्करमेवेति वाच्यम् । एवमपि क्वचिद् धूमत्वसामानाधिकरण्येनापत्तिनिर्वाहकतया लाघवज्ञानासमवधानस्थले धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चये द्वितीयादिदर्शनस्योपयोगित्वात् ।

न तु स स्वत एव प्रयोजक इति । स भूय सहचारग्रह । स्वत एव तर्कमद्वारीकृत्यैव, न व्याप्तिग्रहोपयोगीत्यर्थ । अत एव न तदा हितति । तर्कमद्वारीकृत्य तस्य व्याप्तिग्रहोपयोगित्वस्वीकारे एव तज्जन्यसस्कारस्य व्याप्तिग्रहजनकताया आवश्यकत्वात् प्रमाणान्तरत्व स्यात्, तर्क द्वारीकृत्य तस्य व्याप्तिग्रहोपयोगित्वस्वीकारे तु तज्जन्य सस्कारस्य व्याप्तिग्रहजनकताया मानाभावेन न तत्र प्रमाणान्तरता प्रसक्ति प्रकापादकाभावादित्यर्थ । तर्कस्यापि शङ्कानिवृत्तिद्वारैव व्याप्तिग्रहोपयोगितया व्याप्तिग्रहकारणत्वाभावान्न मानान्तरताप्रसक्तिरिति भाव । भूयोदर्शनजन्यसस्कारस्य तर्ककारणतया तर्कोपयोगितेत्यभिमानेन तादृशसस्कारस्य प्रमाणान्तरत्वप्रसक्ति ता दृशसंस्कारस्य तर्ककारणत्वमभ्युपेत्यैव निराकरोति । तत्स्यति । यत्रापाद्यमबाधितं बाधभ्रमाद्व्याप्तिस्तत्रापि जनकज्ञानविपयापाद्यव्यतिरेकावगाहित्व स्वीकृत्याप्रमात्वमुपपादनीयमिति भाव ।

(चि०) तच्च प्रत्यक्षव्याप्तिज्ञाने हेतुः, तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात् ननु सहचारदर्शनव्यभिचारादर्शनवद् व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेन्न। स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात्। सत्तर्काद् व्याप्तिप्रमा तदाभासात्तदप्रमा विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव ।

(दी०) तच्चेति। तद् व्यभिचारादर्शनम्, व्यभिचारज्ञानसामान्याभावः । योग्यतादिसन्देहेऽपि शब्दादिनाऽर्थनिश्चयात्। तत् तर्कस्वरूपमिति केचित्।

(गा०) तच्चेत्यादिमूलग्रन्थे तत्पदं यदि सहचारदर्शनपरं तदाऽसङ्गतिः सहचारज्ञानस्य विशेषणज्ञानविधया प्रत्यक्ष इव शब्दानुमानजन्येऽपि व्याप्तिज्ञाने हेतुत्वादतो व्यभिचारज्ञानविरहेत्यनेन पूर्वोक्तव्यभिचारादर्शनपरतया तद्व्याचष्टे दीधितौ। तदिति। व्यभिचारादर्शनं यदि व्यभिचारानिश्चयस्तदाप्यसङ्गतिर्ग्राह्याभावनिश्चयाभावस्य शाब्दादिबुद्धावपि हेतुत्वादतो व्यभिचारादर्शनस्य संशयसाधारणव्यभिचारज्ञानाभावरूपतां ज्ञानं निश्चय इत्यादिना मूलकृतैव सूचितां स्मारयितुं व्याचष्टे। व्यभिचारज्ञानसामान्याभाव इति। व्याप्तिग्रहविशेषोपादानबीजप्रदर्शनपरं व्यभिचारज्ञानाभावाभावेऽपीत्यर्थकं तदभावेऽपीति मूलं यदि व्यभिचारनिश्चयस्थलपरं तदाऽसङ्गतिस्तत्र व्याप्तिज्ञानमात्रानुत्पादात्। अतः संशयदशापरतयाऽधृत्वेव तद् व्याचष्टे। योग्यतादीति। आदिना साध्यपरिग्रहः। शब्दादिनेति। आदिनाऽनुमानपरिग्रहः। यद्यपि संशयप्रतिबन्धकतायां व्याप्यदर्शनस्योत्तेजकतया व्याप्यदर्शनरूपानुमानेन तन्निश्चये न व्यभिचारावकाशः। तथापि सामान्यव्याप्यवत्ताज्ञानजन्यायां लाघवज्ञानादिवशाद्विशेषप्रकारिकायां तादृशसंशयोत्तरानुमितौ व्यभिचारो बोध्यः। तच्चेति तत्पदं तर्कपरतया वर्णयतस्तथा सत्यपि नपुंसकलिङ्गतां कथंचिदुपपादयतो मतमाह। तादति। अत्रास्वरसबीजन्तानाच्छङ्काविरहस्थले व्यभिचारेण तर्कस्याहेतुत्वात्। हेतुपदस्य शङ्काविरहद्वारोपयोगितापरत्वे तदपेक्षया तत्पदस्य शङ्काविरहपरताया एवोचितत्वाद् बोध्यः।

परार्थस्थले व्यभिचारशङ्कानुकूलतर्कविरहयोरुद्भावनान् तज्ज्ञानं विरोधीति तदभावयोर्ज्ञानमेव व्याप्तिग्राहकं व्यभिचारनिश्चयाभावश्च स्वरूपसंस्तथेत्यभिमानेनाशङ्कते मूले। नन्विति। व्यभिचारादर्शनवत्। व्यभिचारानिश्चयवत्। 'व्यभिचारिसाधारणम्'[1] व्यभिचारसन्देहकालीनसाधारणम्। न ततो व्याप्तिनिश्चयः सम्भवतीति शेषः। संशयनिवर्तकस्यैव निश्चायकत्वादिति भावः। स्वरूपसतोरिति। तथा च तथाविधयोः संशयविरोधितया संशयदशाव्या-

---

१ व्यभिचारसाधारणमित्यपि पाठः।

वर्तकतया व्याप्तिनिश्चायकस्य सम्भवत्येवेति भाव । एवं च परार्थ स्थले प्रतिवादिनं स्वव्यभिचारसन्देहोद्भावन तदुद्भावने व्यभिचारा व्यभिचारसहचरितव्यभिचारज्ञानविषयत्वज्ञानान्मध्यस्थस्य व्यभिचारस देहो भविष्यति, न तु व्याप्तिनिश्चय इत्यभिसन्धायेव, न तु व्यभिचारसन्देहज्ञाने तदभावज्ञानासम्भवेन कारणाभावाद् व्याप्ति निश्चयो मा भूदित्याशयेन, अनुकूलतर्कविरहोद्भावनमपि स्वकीय व्यभिचारसशयज्ञापनायेव न त्वनुकूलतर्कज्ञानविघटनायेति न व्यभिचारज्ञानाभावानुकूलतर्कयोर्ज्ञानहेतुता प्रामाणिकीत्याशय ।

नयोत्तरीत्यानुकूलतर्कविरहोद्भावन सङ्कच्छता स्वरूपसत परानुकूलतर्कस्यापादकशङ्कानिवर्तकतया तदभावनिश्चायकत्वेन साध्यतद्व्याप्त्यादिनिश्चयाय वादिनोऽनुकूलतर्कावतारजनकस्तच्छङ्काजनकस्तदुपन्यास कथमुपपद्यतामिति चेदित्थम्। यत्र निर्वह्नि स्यान्निर्धूम स्यादित्याकारेण तर्कोपन्यास क्रियते तत्र निर्वह्निनि र्धूमपदसमभिव्याहृतभवनार्थकास्धातुभ्या निर्वह्निनिर्धूमयोरस धारणधर्मरूपो भाव प्रत्याय्यते सम्भावनार्थकस्यदितदाभ्या हेतु हेतुमद्भावापन्नतदारोपविषयताबोध, आख्यातपदाभ्या च तद न्वितमाश्रितत्वरूप कर्तृत्व प्रथमान्तपदार्थ बोध्यते, व्ययार्थद्वा रापि क्रियान्वितस्य स्वार्थस्याख्यातेन बोधने व्युत्पत्तिविरोध विरहात् । अत एव गुरुमते 'न कलञ्जं भक्षयेदित्यत्र कलञ्ज भक्षणाभावविषयक कार्यमिति बोध । न्यायमते तु कलञ्जभक्षण बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभाववदिति । तत्र धात्व र्थाख्यातार्थयोरन्तरा नञर्थस्य भानात्। तथा च निर्वह्नित्वा रोपविषयताश्रयोऽय तदारोपविषयताप्रयोज्यनिर्धूमत्वारोपविषय ताश्रया इति बोध । निर्वह्नित्वारोपस्तर्ककारणमाहार्यज्ञान निर्धू मत्वारोपश्च तर्क एव तयोरारोपत्वेनेव भावमुपेयते न तु ज्ञानत्वे नातो हृदादावाहार्यवह्न्यभावप्रमया धूमभ्रमभ्रमद्वकारेण धूमाभावा पत्तिजननेऽपि तत्तात्पर्यकस्य हृदोऽय निर्वह्नि स्यान्निर्धूम स्या दिति वाक्यस्याप्रामाण्यमतादृशस्य तर्कबोधकतात्पर्यस्य तज्ज्ञ य शाब्दबोधस्य च साक्षात् परकीयतर्कोत्पत्तिमज्ञानजनकत्वेऽप्या पाद्यापादकयोर्व्याप्यव्यापकभावप्रयोजकव्याप्त्याकाङ्क्षासम्पादनद्वारा साक्षात्तर्ककारणव्याप्तिबोधजनकत्वादुदरणप्रयोजकतया परकीयतर्क

सम्पत्त्युपयोग । अनुमानस्थले साध्यहेत्वोर्व्याप्यव्यापकभावबोधक हेत्वन्तभागस्यानुमित्युपयोगवत् ।

न चोदाहरणवाक्याद्व्याप्तिबोधेऽपि तर्ककारणाहार्यापादक-व्याप्तिज्ञानस्य वाक्येन जननासम्भवात्परकीयतर्कसम्पादनासम्भव इति वाच्यम् । 'पर्वतो न वह्निमानि'त्यादिप्रतिज्ञादिवाक्याद्वादिना साध्य-निर्देशेन वह्निमात्संशयात्परस्य तज्जन्यदुष्प्रमाणेत्तात्वात्कया एकको टिनिश्चयेच्छात एव पर मध्यस्थस्याहार्यापादकव्याप्तिज्ञानसम्भवेन व्याप्तिमुद्रायैव वादिना तस्य तर्कसम्पादनसम्भवात् ।

(दी०) ननु वस्तुतो व्याप्तिमत्त्वे तर्काभासात् प्रमाभ्रमया-रुत्पादानुत्पादाभ्यां व्यभिचार इत्यत आह । विशेषदर्श-नेति । तथा च यथा तस्य बोध्यतदभावतद्विषयत्वे सत्य-त्वासत्यत्वे तथा तर्कस्यापीति । अत्र च सत्यत्वादिसम्पादके धर्मिणो बोध्यादिमत्त्वे बोध्यादिमद्धर्मिसन्निकर्षे वा तात्पर्यं लाघवात्, तर्कस्य व्यभिचारेणाहेतुताया स्वयमेव दर्शितत्वाच्च ।

(गा०) ननु तर्कस्य सत्यत्व न प्रमात्व तर्कस्याप्रमात्वनियमात् । नापि प्रमात्मकापाद्यव्यतिरेकनिश्चयजन्यत्व व्याप्तिप्रमाजन्यत्व वा, धूमस्याद्रव्यत्वभ्रमदशायामुत्पन्नोऽयं भ्रमो यदि वह्निव्यभिचारी स्याद् द्रव्यं न स्यादि'त्यादितर्कोद्व्याप्तिप्रमाया उत्पादस्य व्याप्तिभ्रमानुत्पा-दस्य चानिर्वाहादित्याशङ्कानिराकरणपरतया समाधिसाम्यसूचकं विशेषदर्शनेत्यादिमूलोक्तदृष्टान्त सङ्गमयति । नन्विति

प्रमेति । प्रमाया उत्पादात् भ्रमस्यानुत्पत्तरित्यर्थः । व्यभि चारः । व्याप्तिप्रमाया सत्तर्कस्य व्यतिरेकव्यभिचार । तर्कभ्रमे तर्काभासस्य चान्वयव्यभिचार इत्यर्थः । यथायोग हेत्वोर्वय । समाधान स्फुटीकरोति । बोध्यति । 'बोध्यत्व' प्रकृतनिश्चयविषय त्वम् । सत्यत्वासत्यत्वे इति न तु प्रमात्वभ्रमत्वे इति शेष । पुरुषे पुरुषत्वव्याप्यतया शाखाग्निभ्रमात्पुरुषत्वप्रमाया उत्पादात्तद्भ्रमस्य चानुत्पादादिति भाव । तर्कस्यापीति सत्यत्वासत्यत्वे इत्यन्तमनुष ज्यते, न तु व्याप्त्याद्यप्रमाजन्यत्वतदभावरूपे इति शेष । यथा श्रुतेऽस्वरसस्य वक्ष्यमाणत्वात्तात्पर्यार्थमाह । अत्र चेति । 'धर्मिण'

विशेष्यस्य । बोध्यादित्यादिपदाद्बोध्याभावस्य फलीभूतज्ञानाप्रमात्वप्रयोजकस्य परिग्रह । तथा च विशेष्यतासम्बन्धेन तत्संसर्गकतत्प्रकारकप्रमाभ्रमौ प्रति तत्संसर्गकविशेषणताविशेषाभ्यां तद्धर्मे तत्संसर्गावच्छिन्नतदभावो हेतू अतो न तदभाववति तत्प्रमायास्तद्वति च भ्रमस्य प्रसङ्ग इति भाव । विशेष्यविशेषणादिकमन्तर्भाव्य कालिकादिप्रत्यासत्त्या कार्यकारणभावो ह्येय । विशेष्यतयाऽपुरुषादौ पुरुषत्वप्रमादेरनुत्पादस्य कारणाभावनिर्वाह्यत्वासम्भवात् ।

अथापुरुषे पुरुषत्वप्रकारकत्वविशिष्टप्रमादेर्विशेष्यतयाऽऽपादनं पुरुषत्वप्रकारतानिरूपितपुरुषादिनिष्ठविशेष्यतापादनपर्यवसितं तच्च न सम्भवति, पुरुषान्तरे एतत्पुरुषनिष्ठाया पुरुषत्वप्रकारतानिरूपितविशेष्यताया अभावे एतद्व्यक्तित्वाभावस्यैव कारणतावच्छेदकसम्बन्धावच्छिन्नकारणाभावात्मकस्यापि समवायादिना पुरुषत्वाद्यभावस्य प्रयोजकत्वादिति चेन्न । एवं सत्युक्तकार्यकारणभावकल्पनाया अपि निष्फलत्वात् । तत्कारणायातिप्रसङ्गान्तराभसत्त्वे-स्तादृशकार्यकारणभावकल्पनमप्रामाणिकमिति ध्येयम् ।

नन्वनित्यविशेषणस्य तत्तत्सम्बन्धावगाहिप्रमाया विशेषणस्य तत्सम्बन्धस्य वा हेतुता न सम्भवति तस्याविद्यमानतादशायामपि प्रमारूपतदुपनीतभानोदयात्, एवमनित्यप्रतियोगिकाभावस्य तत्संसर्गकभ्रमे स्वाव्यवहितपूर्वकालावृत्तिप्रतियोगिरूपतत्संसर्गकबोध्याभावस्य तत्संसर्गस्य वा न हेतुत्वसम्भव ।

न ह्यनित्यस्य घटादेर्भूतलादिवृत्तित्वेऽपि तदभावस्य तत्र सत्त्वान्न भ्रमसम्भव इति वाच्यम् । स्वविषयघटाद्यनधिकरणकालमात्रस्थायिज्ञानादौ विषयितासम्बन्धावच्छिन्नघटाद्यभावस्य तेन सम्बन्धेन तद्वतो भेदस्य चासत्त्वात्तत्र तद्भ्रमसम्भवेन तादृशभ्रम एव बोध्याभावादिहेतुत्वानुपपत्तेरिति तन्नाप्यन्यत्कारणमाह । बोध्यादिमदिति । वाकारो व्यवस्थितविकल्पपर । नित्यप्रमाया लाघवेन विशेषणस्यैव हेतुत्वौचित्यात्, प्रमात्वस्य विशेषणभेदेन भिन्नतया तद्भेदेन कार्यकारणभावभेदस्यावश्यकत्वात् । सन्निकर्षस्य तद्वृत्तित्वविशिष्टत्वेनैव हेतुता सामान्यत, आश्रयत्वं तदवच्छेदकसम्बन्धोऽस्तु सन्निकर्षत्वस्याननुगतस्य दुर्वचत्वेऽपि न क्षति । ज्ञानरूपप्रत्यासत्तेर्विषयानाश्रितत्वेऽपि न क्षति । तद्विषयत्वस्यै

वोक्तरूपेण हेतुत्वोपगमात् । धर्मंग्येव धर्मिणामप्युपलक्षणतया कारणतावच्छेदकत्वे वृत्तिरेव विशेषणमतो नाविद्यमानधर्मिविशेष्यकप्रमानुपपत्तिर्न चातिप्रसङ्ग. ।

ननु तद्वद्वृत्तिविषयतासम्बन्धेन तर्कत्वेन हेतुत्वे न द्वितीयकल्पापेक्षया गौरवं तर्कत्वं च मानसत्वव्याप्यजातिविशेष. । जातेरनाशिकत्वेऽपि साध्यरूपविषयमात्रोपरागेणानुमितित्वस्येव लौकिकसन्निकर्षवलभावविषयमात्रोपरागेण साक्षात्कारत्वस्येव चापाद्यमात्रोपरागेण तर्कत्वस्यापि ग्रहनिर्वाहादित्यत आह । स्वयमिति ।

उक्तव्यभिचारगौरवयो. परिहारमाशङ्कते । अथेति ।

(दी०) अथ विपरीतज्ञानोत्तरप्रत्यक्षे तन्निवर्तकत्वेन विशेषदर्शनस्य हेतुत्वं तच्च तर्कस्यापीति चेत् ? अस्तु, तावदापाततस्तथा, तथाप्यन्यत्र क्लृप्तप्रामाण्यादिप्रयोजकादेव तत्र प्रामाण्याद्युपपत्तौ न तस्यापि विशेषतः कारणत्वं गौरवात् । उक्तं च विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वमते सर्वत्र विशेष्यसम्बन्धासम्बन्धविशेषणज्ञानमेव प्रमाभ्रमप्रयोजकमिति वदन्ति ।

(गा०) 'तन्निवर्तकत्वेन' विपरीतज्ञाननिवर्तकत्वेन । 'तच्च' विपरीतज्ञाननिवर्तकत्वं च । 'तर्कस्य' विपरीतापादकतर्कस्य । तथा च क्लृप्तकारणतयैव निर्वाह इति भाव. स्वयं विशेषदर्शनहेतुत्वानुपगमादाह । आपातत इति । तथा च विशेषदर्शनसाधारणरूपेण तर्कस्य भ्रमप्रमासाधारणनिश्चयविशेषहेतुत्वम् । 'अन्यत्र' विपरीतज्ञानानुत्तरप्रत्यक्षस्थले । 'तत्र' विपरीतज्ञानोत्तरप्रत्यक्षे । 'तस्यापि' तर्कस्यापि । अपिकारो विशेषदर्शनसमुच्चायकः । 'विशेषत.' वोध्यादिमद्विशेष्यकत्वविशिष्टेन विपरीतज्ञानविरोधित्वेन विशेषधर्मेण । 'कारणत्वम्' विपरीतज्ञानोत्तरप्रमादिरूपप्रत्यक्षनिश्चयत्वावच्छिन्नकारणत्वम् । 'गौरवादिति' । प्रमाभ्रमसामान्यप्रत्यक्षप्रयोजकसमाजादेव प्रमादिरूपप्रत्यक्षनिश्चयनिर्वाहादिति भावः ।

ननु किं प्रमादिसामान्यप्रयोजकम् ? न तावद्धर्मिणि विशेषणादिमत्त्वम् । अनित्यप्रमादिसाधारण्याभावस्योक्तत्वात् । नापि वोध्यादिमद्धर्मिसन्निकर्षः, अनुमित्यादौ तदहेतुत्वात् । न च तादृशध-

र्मवद्वृत्तित्वेनैव तद्धेतुताया उक्तत्वादनुमित्यादिसाधारण्यसम्भव इति वाच्यम्। सर्वेन कार्योत्पत्तौ कारणतावच्छेदकोपलक्षितप्राक्सत्ताया प्रयोजकत्वमतेऽतिप्रसङ्गात्। न च वृत्तिमत्त्वेन तस्य हेतुता वोध्यादिमद्वृत्त्याश्रयत्वं प्रत्यासत्तिरिति वाच्यम्। वृत्तिमत्त्वस्यैताद्दशसम्बन्धेन नियतपूर्ववर्तिताया अवच्छेदक यदभावत्वविषयत्वत्वादिरूपधर्मान्तरं तद्व्यापकत्वेनान्यथासिद्धिनिरूपकत्वादित्यत आह। उक्तं चेति। कारणत्वमत इति। कारणत्ववादिनां नैयायिकानां मत इत्यर्थः। तेन वक्ष्यमाणकारणताया निर्विकल्पकनित्यज्ञानानभ्युपगन्तृमीमांसकमतेऽसम्भवेऽपि न क्षति, ते प्रमात्वस्य कार्यतावच्छेदकत्वानुपगमादिति ध्वनितम्। विशेष्यसम्बन्धेति। विशेष्यनिष्ठेन स्वविषयतत्तद्विशेषणवत्त्वतत्तद्विशेषणवदन्यत्वरूपसम्बन्धेन ज्ञानत्वावच्छिन्नमेवेत्यर्थः। प्रमाभ्रमेति। विशेष्यतासम्बन्धेन प्रमात्वभ्रमत्वावच्छिन्नं प्रति हेतुरित्यर्थः। तद्वद्वृत्तितद्वदन्यवृत्तिविषयतासम्बन्धेनापि भ्रमप्रमाज्ञानसाधारणेन ज्ञानत्वेन हेतुतासम्भव इति विशेष्यविषयकस्यापि भ्रमप्रमाज्ञानस्य नियमतः प्राक् सत्त्वादित्यवधेयम्। तद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपस्य तत्प्रमात्वस्यार्थसमाजग्रस्तत्वेऽपि तद्वद्वृत्तिविशेष्यतासम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति तादृशसम्बन्धेन स्वविषयतद्वत्त्वसम्बन्धेन वा ज्ञानत्वेन हेतुताकल्पनमावश्यकम्, अन्यथा दोषसमवधानं विनापि तद्वत इव तदभाववतस्तत्प्रकारकज्ञानविषयतापत्तेर्दुर्वारत्वात्। प्रमास्थले विशेषसामग्र्यन्तराभावेन तद्वतस्तत्प्रकारकज्ञानविषयत्वे यत्प्रयोजकं सन्निकर्षादि तस्य प्रकृतसाधारण्यात्।

न चैवमप्यनेकवृत्तिघटत्वादिप्रमायां घटत्वादिज्ञानस्योक्तप्रत्यासत्त्या कारणत्वकल्पनमफलम्, तत्तद्व्यक्तिवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तादृशसम्बन्धेन स्वविषयतत्तद्व्यक्तित्वसम्बन्धेन वा ज्ञानत्वेनावश्यकल्पनीयहेतुतयैव पटादौ घटत्वादिप्रमातिप्रसङ्गवारणसम्भवादिति वाच्यम्। तादृशसम्बन्धावच्छिन्नप्रतियोगिताकानामनन्ताभावानां पटादौ घटत्वादिप्रमाभावप्रयोजकत्वापेक्षया पर्यैक[1]घटादिवृत्तिविषयतासामान्यसम्बन्धावच्छिन्नज्ञा-

१ एकदेशमिति पुस्तकान्तर पाठः।

नाद्यभावानां स्वविषयघटत्वादिसम्बन्धावच्छिन्नाभावानां वा तथात्वे लाघवेन तादृशसम्बन्धेन विशेषणज्ञानहेतुतासिद्धिरित्यलं पल्लवितेन।

(चि०) अपरे तु यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा, यत्र तु व्याप्तिस्मरणं हेतुस्तत्र न तर्कान्तरापेक्षेति नानवस्था। अस्ति च जातमात्राणामिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्त्यनुभावकाभावात्। तन्मूलानुभवमूला चाग्रेऽपि व्याप्तिस्मरणपरम्परेति। यत्तु अनादिसिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति। तन्न। तत्र प्रमाणानुयोगेऽनुमाने एव पर्यवसानात्। न च व्याप्तिग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम्। अनुपपत्तेरप्यनुमानत्वात्।

(दी०) तत्र प्रमाणेति। इदमनादिसिद्धत्वज्ञानस्य प्रयोजकत्वमभिप्रेत्य, परार्थाभिप्रायेण वा। अनुमानत्वात्। व्याप्तिग्रहाधीनप्रवृत्तिकत्वात्।

(गा०) मूले न तर्कान्तरापेक्षेति। न तर्कमूलीभूतव्याप्त्यादिग्रहाय तर्कान्तरापेक्षेत्यर्थः। पूर्वपक्षे दर्शितं तर्कानपेक्षजातमात्रबालकीयव्याप्तिज्ञाने तर्कस्य व्यभिचारमुद्धरति। अस्ति चेति। सम्भवतीत्यर्थः। व्याप्तिस्मरणं तर्कं विनैवेति शेषः। तस्य तर्कजन्यतावच्छेदकतयोपेतप्रत्यक्षत्वशून्यत्वादिति भावः।

ननु तदपि ज्ञानं प्रत्यक्षमूलकमेवानुभवं विना स्मरणायोगादित्यत आह। तदानीमिति। अनुभावकस्य सहचारादर्शनादेरभावात्। तथा चागत्या जन्मान्तरानुभवजनितसंस्कारोद्बोधकं कल्पयित्वा स्मरणमुपपाद्यमिति भावः।

ननु जातमात्रीयव्याप्तिज्ञाने तर्कापेक्षाविरहेऽपि न विस्तारः, तदुत्तरं सुषुप्त्यादिना प्रवाहविच्छेदे तर्कावतारासम्भवेन वह्न्यादि-

व्याप्तिप्रत्यक्षासम्भवादित्यत आह। तन्मूलेति। अनुभवमूला चेति। एतद्भवानुभवमूला[१] चेत्यर्थः। अमेऽपीति। तर्क विनैवेति शेषः।

अनादिसिद्धेति। अनादिप्रसिद्धिप्रवाहविषयेत्यर्थः। कार्यकारणभावो धूमवह्न्यादिव्याप्तिग्राहके तर्के मूलम्, विरोधश्च भेदाभेदयोस्तादात्म्यादिना वृक्षशिंशपादिव्याप्तिग्राहके शिंशपा यदि वृक्षान्यतादात्म्या स्याद् वृक्षतादात्म्या न स्यात्, भेदाभेदयोर्विरोधादित्यादितर्केऽनादिसिद्धत्वस्य स्वरूपतः शङ्काविरोधित्वे तज्ज्ञापकप्रमाणानुयोगासम्भव इत्यतो दीधिताविदमिति। 'अनादिसिद्धत्वज्ञानस्य' वह्न्यादावनादिसिद्धकारणताकत्वनिश्चयस्य। 'प्रयोजकत्वम्' विशेषदर्शनतया वह्न्यादिधार्मिकधूमकारणत्वादिविरहशङ्काविरहनिर्वाहकत्वम्।

ननु ग्राह्याभावनिश्चयतयोक्तनिश्चयेन वह्न्यादौ कारणताप्रकारकानादिप्रसिद्धिविशेष्यत्वस्यैवावगाहनं तु कारणतायाः परार्थाभिप्रायकत्वे स्वरूपसद्विरोधित्वेऽपि भासद्गति', अनादिसिद्धत्वसाधकान्तराभावेऽनुमानप्रामाण्ये विवदमानं प्रति शङ्काविरोधितया तस्योपन्यासानर्हंत्यादित्याशयेनाह। परेति। चाकारोऽनास्थायाम्। स्वरूपसद्विरोधिताया अप्रामाणिकत्वादन्वयव्यतिरेकमगृहीतवतो वह्न्यादौ धूमकारणत्वसन्देहस्य दुरपहवतयाऽसम्भवाच्च। वस्तुतस्तु स्वरूपसद्विरोधित्वं विचारसहं भवतु वा मा वा, मूलं तु परार्थाभिप्रायकमेव, व्याघातेनानुमानप्रामाण्यस्य तदोपयिकव्याप्तेर्निश्चयविषयतयाश्यावश्यकत्वात्तदन्यथानुपपत्त्यैव कार्यकारणभावादेरनादिसिद्धत्वसिद्धिरित्यग्रिमशङ्काया अन्यथाऽसङ्गतेरिति ध्येयम्। मूले तर्कस्येति। 'तर्कविषयस्य' वह्न्यादेः। 'अनादिसिद्धव्याप्तिकत्वज्ञानम्' तादृशकारणताकत्वनिश्चयः। अर्थापत्तेः पार्थक्येऽपि व्याप्तिग्रहापेक्षयाऽनवस्थाया दुरुद्धरतयाऽनुमानान्तर्भावावलम्बनमनुचितमित्याशयेन दीधितौ व्याचष्टे। अनुमानत्वादिति। 'प्रवृत्ति.' फलोपधानम्।

(चि०) अन्ये तु विपक्षबाधकतर्कादनौपाधिकत्वग्रह इति तदधीनो व्याप्तिग्रह इति। तदपि न। तर्क-

१. एतद्भवप्रभवानुभवमूलेति पाठान्तरम्।

स्याप्रमाणत्वात् । व्यभिचारादिशङ्कानिरासद्वारा प्र-
त्यक्षादिसहकारी स इति चेन्न । अनवस्थाभयेन तर्कं

मात्रेण व्याप्तिग्रहं वदन्ति, तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहेऽनुमानमात्रमुच्छिद्येत । अनुमानमात्रोच्छेदकत्वादेव पक्षेतरो नोपाधिरिति चेत् ? भ्रान्ताऽसि, न हि वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे, साध्यव्यापकत्वेन तद्व्यतिरेकात् पक्षे साध्यव्यावर्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य वज्रलेपत्वाच्च । अपि च करवह्निसंयोगः शक्त्यतिरिक्तातीन्द्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वान्न साधकम् । तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम । तस्माद्विपक्षबाधकतर्काभावान्न तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति ।

(दी०) अनुमानमात्रेति । अनिश्चितसाध्यपक्षके सर्वत्र सम्भावितत्वात् पक्षे साध्यनिर्णयेऽनुमानवैयर्थ्यादुपाधित्वेन स्वव्यभिचारेण व्यभिचारोन्नायकत्वेनानुमानमात्रोच्छेदकताज्ञानमेव साध्यव्यापकताबुद्धिं निरुन्ध्यादित्याशङ्क्याह । अपि चेति । करवह्नीति । परमतेनेदम् । स्वमते तु वाय्वादौ स्पर्शादिना रूपादिसाधने शक्त्यतिरिक्तविशेषणाप्रक्षेपेण वा तद् बोध्यम् ॥

(गा०) अनुमानमात्रोच्छेदे हेतुं पूरयति दीधितौ अनिश्चितेति । पक्षे साध्यनिश्चये व्यभिचारनिश्चयेन तदितरत्वेन साध्यव्यापकताग्रहः सम्भवतीत्यतोऽनिश्चितसाध्यकानुसरणम् । सम्भावितत्वादिति । पक्षेतरत्व उपाधित्वग्रहस्येत्यादिः ।

नन्वेवमपि नानुमानमात्रोच्छेदः, निश्चितसाध्या एव सिषाधयिषया तत्सम्भवादित्यत आह पक्षे इति । तथा च सकलानुमानप्रामाण्योच्छेद इति मूलार्थ इति भावः । सत्प्रतिपक्षोत्थापकस्वरूपोपाधित्वेन दूषकतायाः किन्त्वित्यादिना स्वयमपि वक्ष्यमाणतया न हि वयमुपाधित्वेनेति ग्रन्थासङ्गतिरित्यतो व्याचष्टे । उ-

पाधित्वेनेति । स्वव्यभिचारेणेत्यादि । साध्यव्यभिचारानुमापकव्यभिचारप्रतियोगित्वेनेत्यर्थः। एवं च शङ्कास्थले नोपाधिरित्यत्राप्येतदेवोपाधित्वं बोध्यम्। मूले साध्यव्यापकत्वेन तद्व्यतिरेकादिति। साध्यव्यापकत्वेन निश्चीयमानस्य तस्य पक्षे व्यतिरेकनिश्चयादित्यर्थः। साध्यव्यावर्तकतया । साध्यबुद्ध्यनुत्पादप्रयोजकतया । तादृशनिश्चयस्य किंविधया विरोधित्वमित्याशङ्कायामाह व्यापकेति । 'वज्रलेपत्वात्' आवश्यकत्वात् । तथा च व्यापकव्यतिरेकनिश्चयस्य तदभावव्याप्यवत्ताज्ञानमुद्रयैव तद्वत्ताग्रहविरोधित्वमिति भावः। अनुमानमात्रोच्छेदकताज्ञानं पक्षेतरत्वपक्षकसाध्यव्यापकत्वापादककतर्करूपम् । परमतेनेति । नैयायिकनये शक्तेरप्रसिद्ध्या तदतिरिक्तत्वघटितसाध्याप्रसिद्धेरिति भावः। 'तत्' अप्रयोजकत्वम्॥

इति अनुमानगादाधर्यां तर्कप्रकरणम्॥

अथ व्याप्त्यनुगमप्रकरणम्

(चि०) उक्तव्याप्तिप्रकारेष्वन्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुर्लाघवात् । अतो नाननुगमः । अनौपाधिकत्वं तल्लक्षणम् । नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन व्यभिचारवद्धेत्वाभासान्तरं स्यान्न तु व्याप्त्यभावत्वेनासिद्धिरिति चेत् ? तज्ज्ञानमुपजीव्यमपि न स्वतो दूषकम् । नान्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यस्य साध्यव्याप्तिज्ञाने प्रतिबन्धकम्, अतिप्रसक्तेः । व्यभिचाराज्ञानस्य तद्धेतुत्वात्तद्बुद्धिस्तथा, न चानौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुरित्युक्तम् । तथा च व्यभिचारज्ञानद्वारा स दूषकः । एवं च परमुखनिरीक्षकतया सिद्धसाधनवन्न पृथक् । न चैवमव्यभिचारस्य व्याप्तित्वे व्यभिचारस्तदभावत्वेनासिद्धिः स्यादिति वाच्यम् । साध्याभाववद्वृत्तित्वं हि व्यभिचारस्तदभावश्च नाव्यभिचारः, केवलान्वयिन्यभावात् । किं तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यम् । न चानयोः परस्परविरहत्वमिति ॥

(दी०) उक्तव्याप्तीति । प्रतियोग्यसामानाधिकरण्यादिविशेषणविरहेण लाघवात् । अथ संयोगभावस्येव संयोगवच्छेदस्यापि हेतुसामानाधिकरण्यग्रहेऽप्यनुमितिदर्शनात्तत्रापि तदवश्यं निवेशनीयमिति क्व लाघवम् ?

(गा०) लाघवादित्यस्य हेतुं पूरयति । प्रतियोगीति । आदिपदात् प्र-

तियोगिवैयधिकरण्यपरिग्रहः । विशेषणविरहेणेति । अत्यन्ताभावगर्भव्याप्तिघटकीभूतात्यन्ताभावविशेषणस्यात्राप्रवेशेनेत्यर्थः । भेदस्याव्याप्यवृत्तितानिराकरणेन दर्शितात्यन्ताभावविशेषणस्यलीयस्य प्रतियोग्यसामानाधिकरण्यादेरनिवेशादिति भावः । 'हेतुसामानाधिकरण्यग्रहे' किञ्चिदवच्छिन्नहेतुमद्वृत्तित्वग्रहे । तादृशग्रहश्चात्यन्ताभावे प्रमारूपो, भेदे तु भ्रम इत्यन्यदेतत् । 'तत्रापि' भेदेऽपि । 'तत्' विशेषणान्तरम् । अवश्यं प्रवेशनीयमिति । अन्यथा साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्ते हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकत्वग्रहसत्त्वेन तदा तत्र तादृशावच्छेदकत्वसामान्याभावाग्रहेणानुमितिर्न स्याद्विशेषणान्तरप्रवेशे तु हेतुमन्निष्ठभेदविशेषप्रतियोगितावच्छेदकत्वाभावग्रहे तादृशावच्छेदकत्वग्रहस्यैव विरोधितया नानुपपत्तिरिति भावः । क लाघवम् ? अधिकविशेषणाप्रवेशप्रयुक्तमिति शेषः ।

(दी०) नन्वेवं प्रतियोग्यसामानाधिकरण्याद्यनुपस्थितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहेऽप्यनुमितिर्न स्यात् । न च प्रतियोगिसमानाधिकरणत्वेनाज्ञायमाना यावन्तो हेतुसमानाधिकरणा अभावास्तत्प्रतियोगितावच्छेदकत्वाभावग्रहो हेतुरिति वाच्यम् ।

(गा०) प्रतियोग्यसामानाधिकरण्यादिघटितव्याप्तिज्ञानहेतुतायां तटस्थः शङ्कते । नन्विति ।

अनुमितिर्न स्यादिति । प्रतियोग्यनुपस्थित्या तदा प्रतियोग्यसामानाधिकरण्यस्याभावे दुर्ग्रहतया तद्घटितव्याप्तेर्दुर्ग्रहत्वादिति भावः ।

अत्रोपाध्यायसमाधानमाशङ्कते । न चेति । प्रतियोगिसमानाधिकरणत्वेनाज्ञायमाना इति । तथा च प्रतियोगिसामानाधिकरण्याद्यनुपस्थितिकालीनस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहस्यापि सङ्ग्रहः । तादृशसामान्याभावस्यापि प्रतियोगिसमानाधिकरणत्वेनाज्ञायमाना ये ये हेतुमन्निष्ठाभावास्तत्तत्प्रतियोगितावच्छेदकत्वप्रतियोगिकत्वा-

दिति भावः। अज्ञायमानत्वं तत्कालावच्छिन्नतज्ज्ञानविषयत्वाभावत्त्वं न तु तत्कालीनतज्ज्ञानस्याविषयत्वम्, प्रतियोगिसामानाधिकरण्याद्यनुपस्थितिदशायां तत्कालीनतज्ज्ञानप्रसिद्ध्याऽनुमित्यनुपपत्तेः।

न च ज्ञानांशे तत्पुरुषीयत्वस्यावश्यं निवेशनीयतया यादृशशरीरावच्छिन्नस्य पुंसः कदाचिदपि क्वचिदप्यभावे प्रतियोगिसामानाधिकरण्यग्रहो न जातस्तस्यानुमित्यनुपपत्तिः, तदीयतज्ज्ञानाप्रसिद्धेरिति वाच्यम्, शरीरविशेषमनन्तर्भाव्य तत्तदात्मसमवेतत्वरूपतत्पुरुषीयत्वस्यैव निवेशनीयतयाऽप्रसिद्ध्यनवकाशात्। तत्कालावच्छिन्नो यः स्वविषयकप्रतियोगिसामानाधिकरण्यग्रहविरहस्तद्वत्तत्पुरुषकत्वस्य तत्कालावच्छिन्नतत्पुरुषीयत्वस्वविषयकत्वोभयाभाववत्प्रतियोगिसामानाधिकरण्यप्रकारकज्ञानसामान्यकत्वस्य तत्कालावच्छिन्नतत्पुरुषीयज्ञाननिरूपितत्वस्ववृत्तित्वोभयाभाववत्प्रतियोगिसामानाधिकरण्यप्रकारतानिरूपितविशेष्यतासामान्यकत्वस्य वाऽभावविशेषणत्वोपगमात्।

एतेन यस्मिन्नभावे कस्यापि प्रतियोगिसामानाधिकरण्यभ्रमो नासीत्तद्विषयकतज्ज्ञानस्याप्रसिद्धावपि न साध्यतावच्छेदके हेतुमन्निष्ठतत्प्रतियोगितावच्छेदकत्वज्ञानदशायामनुमित्यापत्तिः। व्यभिचारज्ञानदशायामपि तथाविधयत्किञ्चिदभावप्रतियोगितावच्छेदकत्वाभावस्य ग्रहादनुमित्यापत्तिरतो यावदिति।

यद्यप्यत्र कालपुरुषाणां विशिष्य निवेशेनाननुगमो दुर्वारः। एवं संयोगी सत्त्वादित्यादौ द्रव्ये प्रतियोगिसमानाधिकरणत्वेन ज्ञायमानसंयोगाद्यभावभिन्नाभावसामान्यप्रतियोगितानवच्छेदकत्वस्य स्वयोगत्वादौ सुग्रहत्वादतिप्रसङ्गः। हेत्वधिकरणसामान्ये प्रतियोगिसमानाधिकरणत्वेन ज्ञायमानान्यत्वनिवेशे कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगाद्यात्मकाभावेऽपि तस्याक्षतत्वादनुमित्यनुपपत्तिरतो यद्धेत्वधिकरणे प्रतियोगिसमानाधिकरणत्वेन ज्ञायमानो यस्तद्धेत्वधिकरणनिष्ठतदीयाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणतानिरूपकाभावप्रतियोगितानवच्छेदकत्वग्रहो हेतुर्वाच्यः, तथा च यत्त्वतत्त्वाननुगमादप्यननुगमः। स्वप्रतियोग्यधिकरणत्वेनाज्ञायमानहेत्वधिकरणवृत्तित्व

मभावविशेषणं तु यद्वेत्यादिकल्पानुसारेणैव सङ्गच्छते। तथापि स्फुटत्वात्तमुपेक्ष्यान्यदोषमाह । तादृशाभावेत्यादिना ।

(दी०) तादृशाभावग्रहो हि न हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वेन रूपेण, प्रतियोगिसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहे तदसम्भवात् । नापि प्रातिस्विकरूपेण, जन्मसहस्रेणाप्यसम्भवात् । नापि रूपान्तरेण, वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य धूमसामानाधिकरण्यभ्रमेऽपि वह्नित्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणनिखिलाभावप्रतियोगितानवच्छेदकं वह्नित्वमिति ज्ञानादप्यनुमितिप्रसङ्गात् ।

(गा०) 'तादृशाभावग्रहः' तादृशहेतुसमानाधिकरणयावदभावप्रतियोगितावच्छेदकत्वाभावग्रहः । 'अवच्छेदकत्वत्वेन रूपेण' प्रतियोग्यवगाही अनुमितिहेतुरिति शेषः । तादृशावच्छेदकत्वत्वेन प्रतियोग्यवगाहित्वं च तद्धर्मपर्याप्तं प्रतियोगितावच्छेदकतावगाहित्वम्, अतो न हेतुमन्निष्ठघटाभावप्रतियोगितानवच्छेदकमित्यादिज्ञानादनुमितिप्रसङ्गः । तदसम्भवात् । तादृशस्य ग्रहस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावावगाहित्वेनासम्भवात् । सामान्याभावग्रहे सामान्यघटितविशेषरूपावच्छिन्नवत्तानिश्चयस्य विरोधित्वादिति भावः । तथा चैतावान् प्रयासो विफल एवेति भावः ।

'प्रातिस्विकरूपेण' तत्तदभावप्रतियोगितावच्छेदकत्वत्वेन प्रतियोगिविषयकोऽभावकूटग्रह एव हेतुरिति शेषः । असम्भवादिति । तादृशग्रहस्यैवासम्भवादित्यर्थः । तत्तदभावत्वेन तावदभावानां युगपदनुपस्थितेरिति भावः । रूपान्तरेण येन केनापि रूपेण तावदभावप्रतियोगितावच्छेदकत्वप्रतियोगिकाभावग्रहो हेतुरिति शेषः । तथा च विशिष्य प्रतियोगितावच्छेदकं न निवेश्यमिति भावः ।

यद्यप्येवमपि साध्याभावे प्रतियोगिसामानाधिकरण्यग्रहकालीनानुमित्युत्पादकस्य प्रतियोग्यसमानाधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावमात्रग्रहस्यासङ्ग्रहः, तादृशप्रतियोगिता-

वच्छेदकत्वाभावस्य प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानो यो वस्तुगत्या प्रतियोगिसमानाधिकरणो हेतुमन्निष्ठः कश्चिदन्योऽभावस्त-त्प्रतियोगितावच्छेदकत्वाभावस्य चाविरहात् तथापि प्रतियोगिस-मानाधिकरणत्वेनाज्ञायमानप्रतियोगिसमानाधिकरणाभावान्तरप्रतियो-गितावच्छेदकत्वस्यापि साध्याभावान्याभावप्रतियोगितावच्छेदक-त्वत्वादिनाऽभावावगाहिनः प्रतियोग्यसमानाधिकरणहेतुसमाना-धिकरणाभावप्रतियोगितानवच्छेदकत्वज्ञानादेव तदनुमितिरवगन्त-व्येत्यभिमानः ।

तादृशज्ञानस्य प्रतियोग्यसामानाधिकरण्यघटितव्यभिचारज्ञा-नाविरोधितया व्यभिचारधीदशायामतिप्रसङ्गं पुनः स्वयमाह । वह्निनेति । भ्रमेऽपीत्येतेनानुमिताविष्टापत्तिशङ्काव्युदासाय व्यभिचारज्ञानसत्त्वं दर्शितम् । इति ज्ञानादिति एतादृश-ज्ञानस्य विशेषाभावावगाहित्वेन दर्शितव्यभिचारग्रहाविरो-धित्वेन तद्दशायामुत्पत्तौ बाधकाभावादिति भावः । अनुमिति-प्रसङ्गादिति । वह्नित्वावच्छिन्नाभावस्य हेत्वसमानाधिकरणतया उक्तग्रहविषयस्याप्यभावस्य हेतुसमानाधिकरणयावदभावप्रतियो-गितावच्छेदकत्वप्रतियोगिकत्वादिति भावः ।

(दी०) न च हेतुसमानाधिकरणत्वेन ज्ञायमाना इति वाच्यम् । वह्नित्वे धूमसमानाधिकरणरासभाद्यभावप्रतियोगिता-वच्छेदकत्वभ्रमेऽप्युक्तरूपेण तथा ग्रहसम्भवात् । धूमाधिकर-णान्तरानुपस्थितौ वह्नित्वे रासभत्वादौ च तादृशप्रमोत्पादेऽपि रासभादेरिव वह्नेरप्यननुमानाच्च । एवं वह्नित्वावच्छेदेन शुक्ल-त्वाभावभ्रमदशायां शुक्लप्रतियोगिका वह्नीतरप्रतियोगिकाश्च ये धूमसमानाधिकरणाभावास्तत्प्रतियोगितानवच्छेदकं वह्नित्व-मिति ग्रहेऽपि ।

(गा०) हेतुसमानाधिकरणत्वेन ज्ञायमाना इति । तथा चोक्त-व्यभिचारज्ञानदशायां हेतुसमानाधिकरणत्वशून्यस्यापि वह्नित्वा-वच्छिन्नाभावस्य तेन रूपेण ज्ञायमानत्वाद्वह्नित्वस्य तत्प्रतियो-गितावच्छेदकत्वात्तत्प्रतियोगितावच्छेदकत्वाभावानवगाहिन उक्त-

ज्ञानाज्ञानुमित्यापत्तिरिति भावः । 'उक्तरूपेण' हेतुमन्निष्ठवह्नित्वानवच्छिन्नाभावप्रतियोगितावच्छेदकत्वत्वेन । 'तथा ग्रहसम्भवात्' तादृशहेतुसमानाधिकरणत्वेन ज्ञायमानप्रतियोगिसमानाधिकरणत्वेनाज्ञायमानयावदभावप्रतियोगितावच्छेदकत्वाभावग्रहसम्भवात् । व्यभिचारग्रहे वास्तववह्नित्वावच्छिन्नाभावाभानेन हेतुमद्वृत्तित्वेन ज्ञायमानसकलाभावानां वह्नित्वानवच्छिन्नाभावत्वेन भानादिति भाव. । तथा च तत्रानुमित्यापत्तिरिति भाव. ।

वास्तवहेतुसामानाधिकरण्यनिवेशपक्षे यत्र नातिप्रसङ्गस्तत्रापि तेन रूपेण ज्ञायमानत्वनिवेशपक्षेऽतिप्रसङ्ग इत्याह । धूमाधिकरणेति । 'तादृशप्रमोत्पादेऽपि' एतद्धूमाधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वत्वेन निरुक्तयावदभावप्रतियोगितावच्छेदकत्वाभावप्रमोत्पादेऽपि । धूमाधिकरणान्तरानुपस्थित्या एतद्धूमसमानाधिकरणाभावानामेव हेतुसमानाधिकरणत्वेन ज्ञायमानत्वादिति भावः । प्रमात्वकथनेन रासभादेरननुमानं दृढीकृतम् । बाधितार्थविषयकलाघवज्ञानादिरूपदोषं विना अभ्रान्तस्य व्यभिचारिलिङ्गकानुमित्यनुदयात् । रासभादेरिवेति दृष्टान्तेन च तदा वह्न्यनुमिताविष्टापत्तिशङ्का निरस्ता । अनुमितिप्रयोजकाविशेषे कस्यचिन्नानुमितिः कस्यचिच्चानुमितिरिति वक्तुमशक्यत्वात् ।

हेतुसमानाधिकरणाभावत्वमात्रेण रासभाद्यभावावगाहितत्प्रतियोगितावच्छेदकत्वग्रहेऽपि हेतुसमानाधिकरणवह्नित्वानवच्छिन्नाभावत्वादिना तादृशाभावविषयकतत्प्रतियोगितानवच्छेदकग्रहादिव वास्तववह्नित्वावच्छिन्नाभावत्वेन तादृशाभावविषयकव्यभिचारज्ञानदशायामपि रूपान्तरेण तादृशाभावविषयकतत्प्रतियोगितानवच्छेदकत्वग्रहादनुमित्यापत्तिः सम्भवतीति न्यूनताभङ्गाय तामपि दर्शयति । वह्नित्वावच्छेदेनेति । वह्नौ शुक्लत्वग्रहे हेत्वधिकरणे वह्नित्वावच्छिन्नाभावे गृह्यमाणे हेतुमन्निष्ठशुक्लाभावप्रतियोगितावच्छेदकत्वस्यापि वह्नित्वे ग्रहसम्भवाद्वक्ष्यमाणग्रहासम्भव इति वह्नित्वावच्छेदेन शुक्लत्वाभावभ्रमदशानुसरणम् । सति च हेतुमति वह्नित्वावच्छिन्नाभावभ्रम इति पूरणीयम् । प्रकृतग्रहस्य हेतुसमानाधिकरणत्वेन ज्ञायमानयावदभावान्तर्गतवह्नित्वावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वावगाहितानिर्वाहाय शुक्लप्रतियोगिका इति । अभावे हेतुसामानाधिकर-

ण्यावगाहित्वविशेषणेनाप्यस्याव्यावर्त्यतोपपत्तये । धूमसमानाधिकरणेति । 'तत्प्रतियोगितानवच्छेदकम्' तदन्यतरप्रतियोगितानवच्छेदकम् । ग्रहेऽपि । अननुमानादित्यनुपज्यते । तथा च तत्र तत्रानुमित्यापत्तिरिति भावः ।

(दी०) मैवम् । प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधिग्रहविषयत्वेन तेषां तादृशावच्छेदकत्वग्रहविरोधित्वेन तद्बुद्धीनां वानुगमात् ।

(गा०) नन्वित्यादि पूर्वपक्षे समाधत्ते । मैवमिति । तेषाम् । साध्यतावच्छेदकविशेषणतयानुमितिजनकग्रहविषयाणामभावानाम् । विरोधिग्रहविषयत्वं यद्रूपविशिष्टविषयकग्रहत्वावच्छेदेन विरोधिता तद्रूपविशिष्टत्वम् । अतस्तादृशग्रहविषयत्वस्य यथाश्रुतस्य केवलान्वयित्वेऽपि नातिप्रसङ्गः । अत्र यत्त्वतत्त्वनिवेशेनाननुगमाद् विरोधिग्रहविषयविषयकज्ञानत्वेन विरोधिज्ञानहेतुत्वस्य च शिरोवेष्टनेनेत्यादिन्यायेनायुक्तत्वाद्विरोधित्वेनैव जनकज्ञानमनुगमयति । तादृशेति । यद्यप्युक्तव्यभिचारावगाहिसमूहालम्बनधीविरोधित्वमतिप्रसक्तं तथापि तादृशग्रहसामान्यप्रतिबन्धकत्वस्य विवक्षितत्वान्न दोषः । तच्च तादृशालौकिकग्रहत्वव्यापकप्रतिबध्यताकत्वम् । तादृशावच्छेदकत्वविषयितावच्छिन्नप्रतिबध्यताकत्वविवक्षयाऽतिप्रसङ्गवारणमनुपादेयम् । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणवह्न्यभावेतराभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नविषयकग्रहत्वावच्छिन्ननिरूपितां प्रतिबन्धकतामादायातिप्रसङ्गस्य दुर्वारत्वात् । तादृशावच्छेदकत्वत्वावच्छिन्नविषयितासामान्यावच्छिन्नप्रतिबध्यतानिवेशे गौरवात् । तादृशावच्छेदकत्वग्रहत्वपर्याप्तप्रतिबध्यतावच्छेदकतानिवेशेऽपि पर्याप्तिपदार्थविवेचनायां गौरवात् । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहस्य प्रतियोगिवैयधिकरण्यानवगाहिज्ञानेऽपि विरोधितया प्रतियोगिवैयधिकरण्यविषयिताघटितधर्मस्य तत्प्रतिबध्यतावच्छेदकत्वायोगात्तादृशज्ञानासङ्ग्रहाच्च । प्रतिबन्धकत्वं च प्रतिबन्धकतावच्छेदकीभूता या साध्य-

तावच्छेदकविषयतानिरूपिताभावविषयतानिरूपितानुयोगित्वविषयतातद्धटत्वमतो न तादृशावच्छेदकत्वाभावव्याप्यवत्ताज्ञानसाधारण्यम् । तादृशावच्छेदकत्वाभावव्याप्यवह्न्यभावान्याभावप्रतियोगितावच्छेदकत्वाभाव वादिमकारेण व्याप्यवत्ताज्ञानीयव्याप्तिधर्मितावच्छेदकविषयितान्तर्गतानुयोगित्वविषयितायाः व्यभिचारज्ञानप्रतिबन्धकतावच्छेदककोटौ प्रयोजनविरहेणानिवेशात् ।

[न च निरुक्तप्रतियोगितावच्छेदकभेदतत्त्वाभावयोरिव तद्व्याप्यधर्मस्यापि साध्यतावच्छेदकविशेष्यकज्ञानादनुमितिस्वीकारसम्भवति व्यभिचारज्ञानविरोधितायाः अविशेषादिति वाच्यम्, व्यभिचारज्ञानविरोधिनोऽभावप्रतियोगितावच्छेदकत्वादिज्ञानादनुमित्युत्पादसम्भावनायां यदि चेत्यादिना ग्रन्थकृताऽग्रे दर्शनीयतद्वारणप्रकारस्यैवोक्तज्ञानादनुमित्यनुत्पादे एतद्वारणप्रकारस्याप्यनुसरणीयत्वात् । व्यापकतावच्छेदकत्वज्ञानस्य व्यभिचारज्ञानप्रतिबध्यत्वप्रतिबन्धकत्वोभयवत्त्वेन तज्ज्ञानस्य तदप्रतिबध्यत्वेनापि विरोधात् । व्यभिचारनिश्चयाप्रतिबध्यस्यानुमितिहेतुत्वे व्यभिचारनिश्चयद्वितीयक्षणे तादृशज्ञानोत्पत्त्या तत्तृतीयक्षणेऽनुमितिप्रसङ्गात् ।][1]

अथ व्यापकसामानाधिकरण्यरूपतदभावव्याप्तिज्ञानप्रतिबन्धकतायां व्याप्तिधर्मितावच्छेदकधर्मविशेषविषयितानिवेशनमावश्यकम् । व्यापकत्वनिरूपकतावच्छेदकतया भासमानधर्मावच्छिन्नस्य एव तादृशसामानाधिकरण्यावगाहितायाः प्रतिबन्धकतायां तन्त्रत्वात् । एवं च तादृशव्याप्त्यवगाहिनो दर्शितज्ञानादप्यनुमितिप्रसङ्गो दुर्वार । एवमुक्तावच्छेदकत्वव्यापकाभाववत्ताज्ञानस्यापि प्रतिबन्धकतावच्छेदकीभूतकथितानुयोगित्वविषयतावत्त्वात् ततोऽप्यनुमितिप्रसङ्ग ।

न चानुयोगित्वविषयितायामवच्छेदकत्वत्वावच्छिन्नविषयितानिरूपितत्वनिवेशान्न व्यापकाभाववत्ताज्ञानादनुमितिप्रसङ्ग इति वाच्यम् । तादृशावच्छेदकत्वव्यापकवह्न्यभावातिरिक्ताभावप्रतियोगितावच्छेदकत्वाभाववद्वह्निस्वमिति ज्ञानीयानुयोगित्वविषयितायामवच्छेदकत्वत्वावच्छिन्नविषयितानिरूपितत्वस्याप्यक्षतत्वात् ।

---

१ [ ] पुस्तकान्तरे बाह्यकान्तर्गत पाठोऽयं नोपलभ्यते ।

यद्यपि तत्समानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्यापकताविशिष्टधर्मान्तरावच्छिन्नधर्म्यभाववत्ताग्रहो न तद्वत्ताग्रहविरोधी धूमव्यापकतावच्छेदकधर्मवन्महानसीयवह्निर्नास्तीति बुद्धावपि धूमवत्ताज्ञानोदयात्। तथापि तद्विशिष्टभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वग्रहधर्मितावच्छेदकपर्याप्तप्रतियोगितावच्छेदकताकाभावग्रहस्यैव तादृशव्यापकत्वसहिततद्धर्मितावच्छेदकधर्मान्तरावच्छिन्नाभावग्रहस्य तद्वत्ताग्रहविरोधित्वमनुभवसिद्धमेव।

न च तादृशतद्व्यापकताग्रहविशिष्टतद्धर्मितावच्छेदकावच्छिन्नाभाववत्ताज्ञानप्रतिवन्धकतयैवोपपत्तेर्व्यापकत्वविशिष्टतद्धर्मितावच्छेदकावच्छिन्नाभावज्ञानस्य पृथक् प्रतिवन्धकत्वं न कल्प्यते, व्यापकताविषयकज्ञानान्तरविशिष्टज्ञानप्रतिवन्धकतामादाय च नातिप्रसङ्गः, ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिवन्धकताया एव विवक्षणीयत्वात्। एवं व्यापकसामानाधिकरण्यरूपतदभावव्याप्त्यवगाहिपूर्वोक्तज्ञानादपि नानुमितिप्रसङ्गः। ग्राह्याभावे यद्धर्मव्यापकता गृह्यते स्यतन्त्रतद्वत्ताज्ञानस्यापि प्रतिवन्धकतया तत्प्रतिवन्धकतावच्छेदकग्राह्याभावधर्मिकतद्धर्मव्यापकताग्रहविशिष्टतद्धर्मवत्ताज्ञानत्वस्य व्यापकसामानाधिकरण्यरूपतदभावव्याप्तिविशिष्टवत्ताज्ञानसाधारण्येनेदृशविशिष्टज्ञानस्य पृथक् प्रतिवन्धकत्वाभावात्। ज्ञानद्वयसाधारणप्रतिवन्धकतया उक्तविशेषणेनैव वारणादिति वाच्यम्, यद्रूपावच्छिन्ने निरुक्तव्यापकत्वं गृहीतं विशेषणान्तरविशिष्टतद्रूपावच्छिन्नाभावग्रहवारणाय तद्धर्मनिष्ठप्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहित्वस्य तद्धर्मपर्याप्तप्रकारताविशेषावच्छेदकताकत्वस्य वा निवेशनीयतया व्यापकताविशिष्टतद्धर्मितावच्छेदकविशेषावच्छिन्नाभावग्रहस्य पृथक् प्रतिवन्धकताया आवश्यकत्वात्।

अस्तु वा ज्ञानद्वयदर्शितविशिष्टज्ञानयोरनतिप्रसक्तेन येन केनचिद्रूपेणैकमेव प्रतिवन्धकत्वं तथापि कथितानुयोगित्वविषयितायामवच्छेदकत्वत्वावच्छिन्नविषयितानिरूपितत्वनिवेशे वक्ष्यमाणावच्छेदकभेदासङ्ग्रहः। एवं शुद्धतदभावव्याप्तिविशिष्टज्ञानतद-

१ धर्मान्तरावच्छिन्नेति पुस्तकान्तरे नास्ति।

भावव्याप्तिविशिष्टावच्छेदकताविशेषाभावत्वादिना विशिष्टज्ञानसाधारणस्य निश्चयत्वादेः प्रकारतावच्छेदकतापर्याप्त्यधिकरणतत्तद्धर्मविशेषाननिवेश्य दुर्निर्वचतया तान्निवेश्य पृथक् प्रतिबन्धकताकल्पनस्यावश्यकतया तादृशावच्छेदकत्वाभावव्याप्यावच्छेदकताविशेषाभावाज्ञानीयसाध्यतावच्छेदकविषयतानिरूपिताभावविषयतानिरूपितानुयोगित्वाविषयताया अपि निरुक्तज्ञानप्रतिबन्धकतावच्छेदककोटिप्रवेशोऽक्षत एवेति तादृशज्ञानादनुमितिप्रसङ्गो दुर्वार एव।

अत्राहुः। तादृशावच्छेदकत्वग्रहत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकविषयित्वावच्छिन्नत्वेन तादृशग्रहप्रतिबन्धकताया विशेषणीयतया न तादृशावच्छेदकत्वाभावव्याप्यवत्तादिज्ञानसाधारण्यं तदभावव्याप्यवत्ताज्ञानीयविषयितायास्तद्वत्ताज्ञानप्रतिबध्यतानवच्छेदकत्वात्। न चैवं तादृशप्रतिबध्यताशालिज्ञानत्वेनैव हेतुताऽस्तु किं प्रतिबन्धकतानिवेशेनेति वाच्यम्। प्रतिबन्धकत्वानिवेशे संशयात्मकतादृशप्रतीतोगितानवच्छेदकत्वग्रहादप्यनुमित्यापत्तेः। दर्शितोभयविधज्ञानसाधारणस्य निश्चयत्वस्य दुर्निर्वचतया तन्निवेश्य संशयवारणासम्भवात्।

न च तादृशप्रतिबन्धकताशालिज्ञानत्वेन हेतुत्वे तादृशप्रतियोगितानवच्छेदकं वह्नित्वमित्याकारकात् साध्यसमानाधिकरणहेतुमत्पक्षज्ञानवगाहिनः स्वातन्त्र्येण तदवगाहिसमूहालम्बनाच्च ज्ञानादनुमित्यापत्तिः, तद्वारणायैव पक्षविशेष्यतानिरूपितहेतुविषयतानिरूपितसामानाधिकरण्यविषयतानिरूपितसाध्यविषयतानिरूपिता या तादृशप्रतिबन्धकतावच्छेदकीभूतसाध्यतावच्छेदकविषयता तच्छालिज्ञानत्वेनैव हेतुता वाच्या। तथा च तादृशसंशयवारणमशक्यमेव। संशयस्याप्रतिबन्धकत्वेऽपि प्रतिबन्धकतावच्छेदकविषयिताशालित्वादिति वाच्यम्। स्वावच्छेदकतादृशसाध्यतावच्छेदकविषयितावत्त्वविशेषणताविशेषोभयसम्बन्धेनैव तथाविधप्रतिबन्धकतावत्त्वेनैव हेतुतायाः स्वीकरणीयतया संशयादितोऽनुमित्यापत्तिवारणसम्भवात्। तदभावव्याप्यवत्तानिश्चयप्रतिबन्धकतावच्छेदकगर्भे व्याप्तेर्घर्मितावच्छेदकीयविषयतानिवेशाविरहसम्भवे तु तादृशसाध्यतावच्छेदकनिष्ठविषयतानिरूपिताभावविषयतानिरूपित

स्वावच्छेदकीभूतावच्छेदकत्वत्वातिरिक्तप्रकारत्वानिरूपितावच्छेदकत्व विषयतावत्त्वघटितोभयसम्बन्धेनैव[1] तादृशग्रहप्रतिबन्धकताया कारणतावच्छेदकत्वं स्वीकरणीयं प्रतिबध्यता तु न निवेशनीया। अव च्छेदकभेदग्रहे चावच्छेदकत्वमपि पारतन्त्र्येण स्वावच्छिन्नप्रतियोगितात्वसम्बन्धेन भेदांशे प्रकारतया भासते। तथा च तादृशभेदात्मकाभावविषयतानिरूपितप्रतियोगितावच्छेदकत्वत्वातिरिक्तप्रकार त्वानिरूपिता या प्रतिबन्धकतावच्छेदकीभूतावच्छेदकत्वविषयता तद्वत्त्वमक्षतमेव।

अथ वा स्वावच्छेदकीभूतावच्छेदकत्वविषयताया तादृशाभावविषयतानिरूपितविषयतानिरूपितत्वमेव निवेश्यम्, न तु तादृशाभावविषयतानिरूपितत्वम्, अवच्छेदकत्वात्यन्ताभावग्रहे तादृशाभावविषयतानिरूपितानुयोगितात्मकसम्बन्धनिष्ठसांसर्गिकविषयता निरूपितत्वमवच्छेदकत्वविषयतायामक्षतमेवेति न तादृशग्रहासङ्ग्रह। ज्ञानद्वयसाधारणप्रतिबन्धकताविशेषणा वारणं पूर्ववत्।

(दी०) विरुणद्धि च सामान्याभावबोधोऽपि सामान्यघटितविशेषवत्ताबुद्धिम्। सत्यां हि घटो नास्तीति बुद्धौ जात्वपि नीलो घटोऽस्तीति बोधानुदयात्। तत् कस्य हेतोः? तद्विशिष्टप्रतियोगिमत्ताबुद्धिं प्रति तदवच्छिन्नप्रतियोगिताकाभावबुद्धेर्विरोधित्वात्। अवगाहते च नीलघटवत्ताबुद्धिरपि घटत्वविशिष्टितद्वत्ताम्। अत एवावच्छेदकतत्त्वयोरन्योन्यात्यन्ताभावयोरुपसङ्ग्रहः। हेत्वाभासे च वक्ष्यमाणरीतिरिहाप्यनुसन्धेया।

(गा०) ननु प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्याकारकज्ञानस्य प्रतियोगिवैयधिकरण्याविषयकतादृशज्ञानस्य च प्रतियोग्यनधिकरणत्वप्रकारताभिन्ना या हेतुप्रकारताभिन्नप्रकारता तदनिरूपिता या हेतुप्रकारतानिरूपिताधिकरणविषयता तदतिरिक्तप्रकारत्वानिरूपिता या अधिकरणप्र-

---

[1] स्वावच्छेदकीभूतावच्छेदकत्वविषयतावत्त्वघटितोभयसम्बन्धेनैवेति पाठान्तरम्।

कारतानिरूपिता आधेयत्वविषयता तद्व्यतिरिक्तप्रकारत्वानिरूपिता आधेयताप्रकारतानिरूपिता या अभावत्वावच्छिन्नविषयतेत्येवं क्रमेण विषयताकूटं निवेश्यानुगमः सम्भवति, उभयसाधारणनिश्चयत्वस्यापि कथंचिन्निर्वक्तुं शक्यत्वादिति किं प्रतिबन्धकताघटितनिरुक्तरूपेण हेतुतयेत्याशङ्क्य तादृशरूपेण हेतुतायाः प्रयोजनान्तरमाह। अत एवेति । अन्यथावच्छेदकत्वविषयतानिरूपितात्यन्ताभावविषयतायाः कारणतावच्छेदकत्वेऽवच्छेदकभेदग्रहस्यावच्छेदकत्वावच्छिन्नविषयतानिरूपितभेदविषयतायास्तथात्वेऽवच्छेदकत्वात्यन्ताभावग्रहस्यासङ्ग्रहप्रसङ्गात् ।

न चावच्छेदकत्वविषयतानिरूपिता या विषयता तन्निरूपिताभावविषयताशालिज्ञानत्वेन द्वयोरनुगमः सम्भवति, अवच्छेदकत्वात्यन्ताभावग्रहस्याप्यवच्छेदकत्वविषयतानिरूपिता या सांसर्गिकविषयता तन्निरूपिताभावविषयताशालित्वादिति वाच्यम् । तथा सत्यवच्छेदकत्वभेदाद्यवगाहिज्ञानमादायातिप्रसङ्गादिति भावः ।

ननु साध्यतावच्छेदकधर्मिकतादृशप्रतियोगितावच्छेदकत्वग्रहविरोधित्वेनानुगमे हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वादिसाध्यतावच्छेदककस्थले तादृशसाध्यतावच्छेदकधर्मिकतादृशप्रतियोगितावच्छेदकत्वप्रकारकज्ञानस्य नियमत आहार्यरूपतया तत्प्रतिबन्धकताया अप्रसिद्ध्या कारणतावच्छेदकाप्रसिद्धिरत आह। हेत्वाभासे चेति । तथा च प्रकृतसाध्यतावच्छेदकधर्मिकतादृशप्रतियोगितावच्छेदकत्वप्रकारकग्रहत्वं प्रति यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नप्रकारितात्वेन व्यापकता तद्रूपावच्छिन्नांशे तद्रूपावच्छिन्नप्रकारकग्रहप्रतिबन्धकतावच्छेदकीभूता या अभावविषयतानिरूपितप्रकृतसाध्यतावच्छेदकविषयता तस्याः कारणतावच्छेदकत्वमुपगन्तव्यम् , प्रकृते च शुद्धवह्नित्वत्वावच्छिन्नविशेष्यताकतादृशप्रतियोगितावच्छेदकत्वप्रकारकोऽनाहार्यग्रहोऽपि तादृशस्तत्प्रतिबन्धकश्च तादृशविशिष्टवह्नित्वविशेष्यकव्यापकतावच्छेदकत्वग्रह इति न दोषः। शुद्धवह्नित्वत्वावच्छिन्नविशेष्यकव्यापकतावच्छेदकत्वग्रहस्य तादृशग्रहप्रतिबन्धकत्वेऽपि न तादृशप्रतिबन्धकतावच्छेदकीभूततादृशानवच्छेदकत्वविशिष्टवह्नित्वरूपसाध्यतावच्छेदकविषयताशालित्वमिति । न तादृशज्ञानाद्विशिष्टवह्नित्वावच्छि-

ह्यविधेयताकानुमितिप्रसङ्गः ।

अत्र च यादृशप्रकृतसाध्यतावच्छेदकविषयताशालिनिश्चयाव्यवहितोत्तरोत्पन्नानाहार्यमाणससामान्ये प्रकृतसाध्यतावच्छेदके तादृशावच्छेदकत्ववैशिष्ट्यावगाहित्वाभावस्तादृशविषयताशालिनिश्चयत्वेन हेतुतेति रीतिर्न सम्भवति । तथा सति तादृशविशिष्टवह्नित्वावच्छिन्नसाध्यकस्थले साध्यतावच्छेदकधर्मिकमेयत्वादिनिश्चयस्यापि कारणत्वप्रसङ्गात् । दर्शितरीतावपि यद्रूपावच्छिन्नप्रकारितात्वेनैव व्यापकत्वेत्यन्तं परिचायकमात्रम् , विशिष्यवह्नित्वत्वाद्यवच्छिन्नविशेष्यकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकग्रहत्वेन प्रतिवन्धीभूतज्ञानस्य कारणतावच्छेदककोटौ निवेशः साध्यतावच्छेदकादिभेदेन कार्यकारणभावभेदस्यावश्यकतया शब्दैक्यस्याकिञ्चित्करत्वादित्यवधेयम् ।

[1][अथैवमपि यत्र हेतुव्यापकतावच्छेदकत्वमात्रेणैव वह्नित्वादेः साध्यतावच्छेदकता न तु तद्विशिष्टवह्नित्वत्वादिना तत्र व्यापकतावच्छेदकत्वांशपरित्यागे निर्धर्मितावच्छेदककमेव व्यापकतावच्छेदकत्वज्ञानं भवेत् तस्य च व्यापकतावच्छेदकत्वज्ञानाप्रतिवध्यतया नोक्तरीत्या प्रतियोगिवैयधिकरण्याघटिततद्घटितव्यापकताज्ञानयोरनुगमसम्भव । न च शुद्धेन हेतुव्यापकतावच्छेदकत्वेन विशिष्टस्य वह्नित्वादेर्यत्र साध्यतावच्छेदकता तत्र व्यवच्छिन्ने व्यापकतावच्छेदकत्वान्तरानवगाहिनोऽपि शुद्धतदवच्छिन्नविशिष्टसमानाधिकरणहेतुमत्ताज्ञानादनुमितिस्वीकारेण नोक्तरीत्या व्यापकताद्वयज्ञानानुगमापेक्षेति वाच्यम् , वह्नित्वत्वाद्यसहितेन व्यापकतावच्छेदकत्वेन साध्यतावच्छेदकावगाहिनो ज्ञानस्य व्यापकतावच्छेदकत्वान्तरानवगाहिनोऽपि तेन रूपेण वह्नित्वादिप्रकारकानुमितिजनकत्वे वह्नित्वत्वादिसहितेन तेन रूपेण वह्नित्वादिविषयकस्य व्यापकतावच्छेदकत्वान्तरानवगाहिनस्तेन रूपेण तद्विषयकानुमित्यजनकताप्रयुक्तफलवैषम्यस्याधिकं त्वित्यादिन्यायेनानुचितत्वाद् व्यापकतावच्छेदकत्वविशेषितवह्नित्वाद्यप्रकारकतत्प्रकारकानुमितिविलयप्रसङ्गादिति चेन्न । यत्र शुद्धव्यापकतावच्छे-

---

१. पुस्तकान्तरे नास्त्ययं कोष्ठकान्तर्गतः पाठः ।

दकत्वेन साध्यतावच्छेदकता तथापि विशेष्यतया तत्प्रविष्टम-भावमवच्छेदकत्वरूपप्रतियोग्यविशेषितं धर्मितावच्छेदकीकृत्याव-च्छेदकावच्छेदेन व्यापकतानवच्छेदकत्वावगाहिनोऽनाहार्यज्ञानस्य सम्भवेन तद्विरोधित्वेनैव व्यापकतावच्छेदकत्वावच्छिन्नधर्मिकद्वि-विधव्यापकताज्ञानस्यानुगमसम्भवात् ।]

ननूक्तरूपेणानुमितिहेतुत्वे वह्नित्वमभावप्रतियोगितानवच्छेदकं वह्नित्वं प्रतियोगितानवच्छेदकमित्यादिज्ञानादनुमित्यापत्तिः, तादृ-शज्ञानानामपि सामान्याभावावगाहितया प्रतियोग्यसमानाधिकरण-हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वरूपविशेषधर्मप्रकारक-ग्रहविरोधित्वादित्यत आह । यदि चेति ।

(दी०) यदि च साध्यतावच्छेदकस्याभावप्रतियोगिता-नवच्छेदकत्वादिग्रहान्नानुमितिस्तदा तादृशावच्छेदकत्वग्रहाविरो-धित्वेन विशेषणीयम् । अन्योन्याभावस्याव्याप्यवृत्तित्वपक्षे तु सुतरां विशेषणदानमिति । सत्यम् । तथाप्यन्योन्याभावे प्रतियोग्यवृत्तित्वस्यैव विशेषणत्वम्, न वा प्रतियोगितावच्छेदक-सम्बन्धभेदानुधावनमतो लाघवमिति यथाश्रुतग्रन्थानुरोधिनः ।

(गा०) तादृशज्ञानानामपि व्यभिचारज्ञानविरोधितया तेभ्यो-ऽनुमित्यभ्युपगमे क्षतिविरहाद् यदि चेत्युक्तम् । अनवच्छेदकत्वा-दीत्यादिपदात्प्रतियोगितावच्छेदकत्वसामान्याभावावच्छेदकत्वसामा-न्याभावयो समानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्या-भावस्य च परिग्रहः ।

तादृशावच्छेदकत्वादीति । अभावप्रतियोगितावच्छेदकत्वादी-त्यर्थः । आदिपदात्केवलप्रतियोगितावच्छेदकत्वादिपरिग्रहः । तद्-विरोधित्व तादृशग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छे-दकत्वम् । निवेशनीयमित्यस्य निरुक्तव्यभिचारज्ञानप्रतिबन्ध-कतावच्छेदकविषयितायामित्यादिः । तादृशप्रतिबन्धकतान्त्य-त्वस्य ज्ञानविशेषणत्वेऽभावप्रतियोगितानवच्छेदकं हेतुसमाना-धिकरणाभावप्रतियोगितानवच्छेदकं च वह्नित्वमित्यादिसमूहाल-म्बनासद्ग्रहप्रसङ्गात् तादृशप्रतिबन्धकतानवच्छेदकत्वस्य विषयि-

ताविशेषणत्वपर्यन्तानुसरणम्। अभावप्रतियोगितावच्छेदकं वह्नित्वमित्यादिज्ञाननिष्ठप्रतिबध्यता च लौकिकसन्निकर्षाजन्यवह्नित्वत्वावच्छिन्नविशेष्यकसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रकारकग्रहत्वव्यापकप्रतिबध्यतात्वेन निवेशनीया, न तु तादृशग्रहत्वावच्छिन्नप्रतिबध्यतात्वेन, भेदकूटनिवेशापत्त्या गौरवात्। अभावप्रतियोगितावच्छेदकत्वप्रकारकतादृशग्रहत्वव्यापकप्रतिबध्यतात्वेन निवेशे तुल्ययुक्त्याऽनुमित्यनुत्पादकात्सामानाधिकरण्यांशे साधनीयत्वानवगाहिनः समानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यादिज्ञानादनुमित्यापत्तिरतोऽभावांशे सामानाधिकरण्यावगाहिज्ञानपर्यन्तनिवेशनम्। प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहत्वाद्यवच्छिन्नप्रतिबध्यतानामपि समानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकतादृशग्रह एव वर्तमानतयाऽप्रसिद्धिरतस्तादृशग्रहनिष्ठत्वमपहाय तादृशग्रहत्वव्यापकत्वस्य प्रतिबध्यतायां निवेशः।

वस्तुतस्तु तादृशग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकत्वस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितायां निवेशापेक्षया लाघवात्तादृशप्रतिबध्यतायामेव तादृशग्रहत्वाव्यापकत्वं निवेशनीयं तावतैवाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यादिज्ञानवारणसम्भवात् तदीयप्रतिबध्यतायास्तथाविधग्रहत्वव्यापकत्वादित्यवधेयम्।

एतावत्पर्यन्तेनान्योन्याभावघटितव्याप्तेरत्यन्ताभावघटितव्याप्तेश्च ज्ञानस्य कारणतावच्छेदककोटौ प्रतियोगिवैयधिकरण्यविषयतानिवेशसाध्यव्यवस्थापनेनान्योन्याभावघटितव्याप्तिज्ञानहेतुतायां लाघवं निराकृत्य वास्तवतादृशव्याप्तिशरीरलाघवमपि स्वमतमाश्रित्य निराकरोति। अन्योन्याभावस्येति। सुतरां विशेषणदानमिति। व्याप्तिशरीरेऽपि प्रतियोग्यसामानाधिकरण्यविशेषणप्रवेशावश्यकत्वमित्यर्थः।

अत्रेदं तत्त्वम्। प्रतियोगिवैयधिकरण्यावगाहितदनवगाहिज्ञानयोः पृथगेव हेतुता। अन्यलिङ्गकाद्यनुमितौ व्यभिचारवारणाय कारणवैशिष्ट्यस्यावश्यं निवेशनीयतया परस्परं व्यभिचारानवकाशात्।

न च पृथक्कारणताकल्पनापेक्षयोक्तानुगतरूपेण हेतुताकल्पनमु चितमिति वाच्यम् । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभा वप्रतियोगितावच्छेदकत्ववति तादृशावच्छेदकत्वाभावप्रकारकं हेतु समानाधिकरणाभावप्रतियोगितावच्छेदकत्ववति तादृशावच्छेद कत्वाभावप्रकारकमित्याकारकयोरप्रामाण्यज्ञानयो पृथगभाववेदि ष्वनिवेशानुरोधेन कारणताद्वयकल्पनाया आवश्यकत्वात् ।

न चाप्रामाण्यग्रहास्कन्दितज्ञानस्य व्यभिचारज्ञानाप्रतिबन्धक तयैव ततोऽनुमित्यापत्तिवारणसम्भवादप्रामाण्यज्ञानानास्कन्दित त्वस्य निवेश एव नास्तीति वाच्यम्, अप्रामाण्यज्ञानविशिष्टस्यापि ज्ञानस्य तदभावदशायां अप्रामाण्यग्रहाभावविशिष्टत्वेन व्य भिचारज्ञानप्रतिबन्धकत्वात् कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य किञ्चित्कालावच्छिन्नत्वविरहेण कारणताव च्छेदकविशिष्टप्रागसत्ताया फलोपधानं तन्त्रत्वोपगमेनाप्यनि स्तारात् । न च व्यभिचारग्रहप्रतिबन्धकतावच्छेदकतापर्या प्त्यधिकरणधर्मविशिष्टत्वेन हेतुत्वोपगमादेव नाप्रामाण्यग्रहवि शिष्टज्ञानादनुमित्यापत्तिरिति वाच्यम्, अवच्छेदकताया व्यास ज्यवृत्तित्वस्य दूषितत्वात् प्रतिबन्धकतावच्छेदकघटकज्ञानत्वादे रपि तत्पर्याप्त्यधिकरणतयाऽप्रामाण्यादिग्रहकालेऽनुमित्यापत्तेर्वज्र लेपत्वात् । एवं प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रति योगितानवच्छेदकाभाववति साध्ये तादृशप्रतियोगितानवच्छेदक प्रकारकं हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकाभाववति तादृशप्रतियोगितानवच्छेदकप्रकारकमित्याकारकाप्रामाण्यग्रहकालीन ज्ञानस्याप्युक्तव्यभिचारज्ञानप्रतिबन्धकतया ततोऽनुमित्यापत्ति वारणाय तादृशाप्रामाण्यग्रहाभावयो पृथक् पृथगेव निवेशनी यतया नानुगम इति ।

अथ प्रतियोगिवैयधिकरण्यविषयकव्याप्तिज्ञानस्य हेतुत्वं न विचारसहम् । तथा हि प्रतियोगिवैयधिकरण्यशरीरे प्रतियोग्य धिकरणत्वावच्छिन्नसामान्यभेदो निवेशयितुमशक्य:, सर्वेषामेव यत्किञ्चिदभावीयप्रतियोग्यधिकरणतया तादृशभेदाप्रसिद्धे । संयोगसम्बन्धेन प्रतियोग्यधिकरणसामान्यभेदस्य गुणादौ प्रसिद्ध त्वेऽपि धूमादिरूपहेत्वधिकरणे तदसत्त्वात्प्रमात्मकतादृशज्ञानस्य

क्वचिदप्यसम्भवात्।

न च तादृशज्ञानं भ्रमात्मकमेव सर्वत्रानुमितिहेतुरिति वाच्यम्, तथा सत्यव्याप्यवृत्तिसाध्यकस्थले प्रमात्मकपरामर्शजन्यानुमितिविलयप्रसङ्गात्। यत्किञ्चित्प्रतियोग्यनधिकरणत्वं चाव्यावर्तकम्, स्वप्रतियोग्यधिकरणसामान्यभेदनिवेशे च स्वपदस्याभावसामान्यपरत्वे दर्शितासिद्धितादवस्थ्यं यत्किञ्चिदभावपरत्वे च व्यभिचारिस्थलेऽपि यत्किञ्चिदभावीयप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्तत्रापि विशेषदर्शिनामनुमित्यापत्तिरतस्तत्तदभावीयप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तितत्तदभावप्रतियोगितावच्छेदकत्वाभावग्रह एव हेतुर्वाच्य। तत्र च तत्तदभावप्रतियोगितावच्छेदकत्वानां येन केनापि रूपेणाभावग्रहस्य हेतुत्वे धूमसमानाधिकरणवह्नित्वानवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यादिज्ञानादप्यनुमित्यापत्ति, तत्तदभावप्रतियोगितावच्छेदकत्वत्वेन तदभावग्रहस्य हेतुत्वे तत्तदभावत्वेन तादृशसकलाभावानां जन्मसहस्रेणापि ज्ञानं न सम्भवतीति उपाध्यायमतदूषणग्रास.।

एवं यादृशयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्यैव सिद्धान्तलक्षणे व्याप्तिशरीरघटकतया विवक्षितत्वात् तत्तत्प्रतियोगितावच्छेदकत्वाना येन केनापि रूपेण तत्तत्प्रतियोगितावच्छेदकत्वत्वेन वाऽभावज्ञानस्य हेतुत्वेऽपि सुतरामुक्तदोषप्रसङ्ग इति। मैवम्। स्वावच्छेदकावच्छिन्नानधिकरणत्वसम्बन्धेन हेत्वधिकरणनिष्ठप्रतियोगितावच्छेदकत्वत्वावच्छिन्नसामान्याभाव एव व्याप्तिघटकस्तज्ज्ञानमेवानुमितिहेतु, स्वपद परिचायकमात्रं न तु तदर्थस्यापि निवेश, अन्यदीयावच्छेदकावच्छिन्नानधिकरणत्वस्यान्यदीयवृत्तिनियामकसम्बन्धताविरहाच्च संयोगादिनिष्ठप्रतियोगितायास्तादृशसम्बन्धेन हेत्वधिकरणवृत्तितामादायाव्याप्त्यवकाश इति न स्वपदार्थस्य तत्तद्व्यक्तित्वेन तत्तत्प्रतियोगितात्वेन वा निवेश इति विकल्पावसर।

अथ वा हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वरूपमनुगतं प्रतियोगिवैयधिकरण्यनिरूपकत्व भेदस्याव्याप्य-

वृत्तित्वानभ्युपगन्तृमते प्रतियोगिताविशेषणं देयम्, स्वनिरूपकानुयोगिताविशिष्टनिरूपितत्वस्वावच्छेदकविशिष्टवदनुयोगिकत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यत्वं हेतुमन्निष्ठाभावाधिकरणताविशेषणं भेदस्याव्याप्यवृत्तितामतेऽपि सम्यगिति दिक्।

अथेत्यादिपूर्वपक्षे समाधत्ते। सत्यं तथापीति। प्रतियोग्यवृत्तित्वस्यैवेत्येवकारेण प्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वस्य विशेषणत्वव्यवच्छेदः। तथा चात्यन्ताभावघटितव्याप्तावत्रच्छेदकावच्छिन्नांशनिवेशाधिक्याद्गौरवमिति भावः। अत्र च प्रतियोगिभिन्नत्वं हेत्वधिकरणे निवेशयितुं न शक्यतेऽन्योन्याभावस्याव्याप्यवृत्तित्वे संयोगी द्रव्यत्वादित्यादौ हेतुमति संयोगिभेदप्रतियोगिनः सयोगिनो द्रव्यत्वादित्यादौ हेतुमति संयोगिभेदप्रतियोगिनः संयोगिनो भिन्नत्वस्याक्षततयाऽव्याप्तेरशक्यवारणत्वात्तस्य व्याप्यवृत्तित्वेऽपि तस्याव्याप्यवृत्तित्वभ्रमदशायां संयोगिभेदप्रतियोगिभिन्नहेत्वधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य संयोगे ग्रहादनुमित्यपलापापत्तेश्चेत्यभिप्रेत्य प्रतियोग्यवृत्तित्वस्य विशेषणत्वमुक्तम्।

न चैवं संयोगी सत्त्वादित्यादावतिव्याप्त्यापत्तिरिति वाच्यम्, सामानाधिकरण्यस्याव्याप्यवृत्तित्वाभ्युपगमेन गुणावच्छेदेन संयोगिभेदे प्रतियोगिवृत्तित्वाभावसत्त्वाद्धेत्वधिकरणावच्छेदेन तद्वत्त्वस्य विवक्षणीयतयाऽव्याप्तेरनवकाशात्।

सामानाधिकरण्यस्याव्याप्यवृत्तित्वं प्रागेव दूषितमित्यभिप्रायेण चेदमत्रावधेयमित्यादिना प्रतियोग्यवृत्तित्वघटितव्याप्तिलक्षणस्य स्वयमेव दूषणीयत्वान्निरवच्छिन्नहेत्वधिकरणवृत्तित्वमेवाभावविशेषणं देयं न तु प्रतियोग्यसामानाधिकरण्यमिति नोक्तलाघवावकाश इत्यभिप्रेत्य लाघवान्तरमाह। न चेति। न वेत्यर्थः। अत्यन्ताभावघटितव्याप्तौ प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यस्य निवेशे सम्बन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादायासम्भववारणायात्यन्ताभावप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयतया गौरवादिति भावः।

'यथाश्रुतग्रन्थानुरोधिनः' इत्यस्वरससूचनाय। स चात्यन्ताभावप्रतियोगितायामिवान्योन्याभावप्रतियोगितावच्छेदकतायामपि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशेन लाघवविरहात्, अन्यथा

समवायादिना वह्न्यादिमतो भेदमादायासम्भवप्रसङ्गात् ।

न चात्यन्ताभावघटितव्याप्तावपि प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया तदंशे साम्यम्, अन्यथा विषयितासम्बन्धेन वह्नित्ववज्ज्ञानात्यन्ताभावमादाय दोषादिति वाच्यम्, यतोऽन्योन्याभावघटितव्याप्तावपि साध्यतावच्छेदके प्रतियोगितावच्छेदकतानवच्छेदकत्वं विवक्षणीयम्, तादृशावच्छेदकतावच्छेदकत्वं च साध्यतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नत्वेन विशेषणीयम्। साध्यतावच्छेदकविशिष्टे प्रतियोगितानवच्छेदकत्वपर्यन्तनिवेशने नानाव्यक्तिसाध्यके हेतुमन्निष्ठतत्तत्साध्यव्यक्तिमद्भेदमादायाव्याप्तेः, अवच्छेदकरूपविशिष्टे[1]ऽवच्छेदकेऽनवच्छेदकत्वस्याप्रामाणिकत्वात्। अन्यथा प्रतियोगितावच्छेदकविशिष्टे प्रतियोगिन्यपि अप्रतियोगित्वस्य सुवचतयाऽत्यन्ताभावघटितव्याप्तावपि प्रतियोगितानवच्छेदकत्वपर्यन्तनिवेशनानर्थक्यप्रसङ्गात्। अवच्छेदकतावच्छेदकतायां सम्बन्धभेदानिवेशे गुणवद् द्रव्यत्वादित्यादौ विषयितासम्बन्धेन गुणत्वविशिष्टावच्छिन्नभेदमादायाव्याप्तेः ।

न चैकव्यक्तिसाध्यकस्थलेऽन्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकत्वानिवेशात्तत्साध्यकानुमितिकारणतायां लाघवमक्षुण्णमेवेति वाच्यम्, नानाव्यक्तिसाध्यकस्थल एकावच्छेदकत्वांशानिवेशादत्यन्ताभावघटितव्याप्तिज्ञानहेतुतायामपि लाघवसम्भवेन तत्स्थलविशेषीयलाघवस्याकिञ्चित्करत्वात् ।

अथैवमपि प्रतियोग्यसामानाधिकरण्यनिवेशापेक्षया प्रतियोग्यवृत्तित्वनिवेशने लाघवमक्षतमेव। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानाग्मत्वादित्यादावव्याप्तिप्रसङ्गेन प्रतियोग्यसामानाधिकरण्यं परित्यज्य निरवच्छिन्नवृत्तिकत्वस्य निवेशयितुमशक्यत्वाद् भवता प्रतियोग्यसामानाधिकरण्यस्यावश्यं निवेशनीयत्वात् ।

न चात्यन्ताभावघटितव्याप्तौ हेत्वधिकरणे प्रतियोग्यनधिकरणत्वं निवेशनीयं न त्वभावे तदधिकरणावृत्तित्वं तथा चान्योन्याभावविशे-

१. अवच्छेदकतानवच्छेदकरूपविशिष्टे इति २ पु० पाठः ।

षणप्रतियोग्यवृत्तित्वस्य न प्रतियोग्यनधिकरणत्वापेक्षया लघुशरीरतेति वाच्यम्, प्रतियोग्यनधिकरणत्वमित्यत्र प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्यैव विवक्षणीयतया तदपेक्षया प्रतियोग्यवृत्तित्वस्य लघुत्वात्। एतन्मते प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशात्। अन्योन्याभावस्याव्याप्यवृत्तित्वे वक्ष्यमाणदोषेण प्रतियोग्यनधिकरणत्वनिवेशासम्भवात्। सामानाधिकरण्यस्याव्याप्यवृत्तित्वमभ्युपेत्य प्रतियोग्यधिकरणावृत्तित्वस्यैवात्यन्ताभावे निवेशनीयत्वादिति चेन्न। अत्यन्ताभावप्रतियोगिताघटितलक्षणे स्वावच्छेदकविशिष्टवद्वृत्तित्वाभावावच्छेदकहेत्वधिकरणकत्वं प्रतियोगितायां विशेषणं देयम्। अन्योन्याभावीयप्रतियोगिताघटितलक्षणे च स्वाधिकरणवृत्तित्वाभावावच्छेदकहेत्वधिकरणकत्वं प्रतियोगिताविशेषणमित्येव निष्कर्षः। तत्र चावच्छेदकविशिष्टांशनिवेशाधिक्यमस्त्वत्यन्ताभावीयप्रतियोगिताघटितव्याप्तौ तथापि चरमव्याप्तौ तादृशप्रतियोगितानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकतानिरूपितसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वाभावो विशेषणं साध्यतावच्छेदके, प्रथमव्याप्तौ च तादृशप्रतियोगितानिरूपितसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वाभावो विशेषणम्, तत्र चरमव्याप्तौ साध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वांशस्याधिकस्य निवेशाद्विपरीतगौरवम् अवच्छेदकविशिष्टांशापेक्षया एतदंशस्य गुरुत्वात्।

न च प्रतितोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्य भवतोप्यावश्यकत्वादवच्छेदकत्वनिरूपितत्वांशस्यैवैतन्मत आधिक्यमिति वाच्यम्, स्वावच्छेदकविशिष्टस्य सम्बन्धितया साध्यतावच्छेदकसम्बन्धनिवेशादेवोपपत्तौ प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य मयाऽनिवेशनीयत्वात्।

न चैवमपि साध्यतावच्छेदकसम्बन्धनिवेश उभयमत एवेति वाच्यम्, तथाप्यवच्छिन्नावच्छेदकतानिरूपितत्वस्य तन्मते निवेशाधिक्येन लाघवानवकाशादिति दिक्।

(दी०) अपरे त्वन्योन्यात्यन्ताभावगर्भव्याप्त्योरेकतरा-

ग्रहेऽन्यतरज्ञानादनुमितेरानुभविकतया तदुभयज्ञानमेव हेतुः। इन्द्रियसंयोगादिवच्च विशिष्यैव कार्यकारणभावान्न व्यभिचारः।

(गा०) इन्द्रियसंयोगादिवच्चेति। यथा द्रव्यप्रत्यक्षत्वतत्समवेतप्रत्यक्षत्वावच्छिन्नं प्रति इन्द्रियसंयोगत्वतत्संयुक्तसमवायत्वादिना सन्निकर्षहेतुतायां कारणतावच्छेदकाननुगमेऽपि कार्यतावच्छेदकाननुगमान्न व्यभिचारः। तथात्र कारणतावच्छेदकाननुगमेऽपि तत्तद्व्याप्तिज्ञानाव्यवहितोत्तरोत्पन्नानुमितित्वरूपविशेषधर्माणामेव तत्तद्व्याप्तिज्ञानजन्यतावच्छेदकत्वोपगमेन कार्यतावच्छेदकाननुगमान्न व्यभिचार इत्यर्थः।

(दी०) यत्तु यद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थितोऽभावो धर्मिणि गृह्यमाणः साध्यवत्ताबुद्धिं विरुणद्धि तद्रूपावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यावगाहिनो ग्रहस्य विरोधित्वेन व्याप्तिबुद्ध्योऽनुगमनीयाः। प्रतिबध्नीतश्च साध्यतद्वदत्यन्ताभावान्योन्याभावग्रहौ साध्यवत्ताबुद्धिम्। केवलान्वयिस्थले च भ्रमरूपस्यैव तद्ग्रहस्य कथञ्चित् प्रसिद्धिरिति। तच्चिन्त्यम्।

(गा०) केचित्तु अत्यन्ताभावान्योन्याभावगर्भव्यभिचारज्ञानेऽनुगमस्य तद्विरोधित्वरूपानुगतधर्मेणोभयविधव्याप्तिज्ञानहेतुतां स्वीकुर्वन्ति तेषां मतमुपन्यस्य परे दूषयन्ति। यत्त्विति। यद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थित इति। यद्रूपावच्छिन्नप्रतियोगिताकत्वनिष्ठविषयतानिरूपितविषयताश्रयः। धर्मिणि गृह्यमाण इति। धर्मिविषयतानिरूपितविषयताश्रयः। साध्यवत्ताबुद्धिं विरुणद्धीति। साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयताश्रयः। तथा च स्वावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नयद्धर्मनिष्ठप्रकारतानिरूपिता या धर्मिविषयतानिरूपिताभावविषयता साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदिका स्वावच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नतद्धर्मप्रकारतानिरूपिताभावप्रकारतानि-

रूपितसामानाधिकरण्यविषयताशालिग्रहविरोधित्वेन व्याप्तिज्ञानानुगम इति पर्यवसितार्थः । प्रतियोगितायां यत्सम्बन्धावच्छिन्नत्वतत्सम्बन्धावच्छिन्नत्वयोः प्रकारतायां यद्रूपनिष्ठत्वतद्रूपनिष्ठत्वयोर्निवेशाद्वह्नित्वावच्छिन्नभेदवह्निमत्त्वावच्छिन्नात्यन्ताभावसामानाधिकरण्यग्रहविरोधिनो हेतुसमानाधिकरणभेदप्रतियोगितानवच्छेदकं वह्नित्वं हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं वह्निमत्त्वमित्यादिज्ञानान्न वह्न्याद्यनुमित्यापत्तिः । वह्निभेदादिधर्मितावच्छेदककवह्न्यादिमत्ताज्ञानं प्रति तद्भेदादिधर्मितावच्छेदककसंयोगसम्बन्धावच्छिन्नवह्न्यभाववत्ताज्ञानप्रतिबन्धकतायां वह्न्यादिभेदनिष्ठविषयताया अपि निवेशादुक्तज्ञानात्पुनर्वह्न्यनुमानापत्तिरतो धर्मिविषयतानिरूपितेति । विधेयस्य धर्मितावच्छेदकतापर्याप्त्याश्रयो यादृशो धर्मस्तद्विशिष्टविशेष्यतानिरूपितेत्यर्थकम्, धर्मितावच्छेदकतानात्मिकेति तु फलितार्थः । प्रतिबन्धकत्वं च तदभावव्याप्यवत्ताज्ञानादिप्रतिबन्धकताविलक्षणमुपादेयम्, अतो नातिप्रसङ्गः । पक्षधर्मत्वाद्यविषयकव्यापकताज्ञानवारणाय पूर्ववत्प्रतिबन्धकतावच्छेदिका या पक्षविशेषणतावच्छेदकसामानाधिकरण्यविशेषणीभवत्साध्यविषयतानिरूपिता साध्यतावच्छेदकविषयता तद्वत्त्वमेव विरोधित्वपदेन विवक्षणीयम् । साध्याभाववदवृत्तित्वादिधीश्च नानुमितिहेतुरतस्तदसङ्ग्रहो न दोषाय । तादृशी च साध्यतावच्छेदकविषयता अत्यन्ताभावघटितव्याप्त्यवगाहिनि परामर्शे प्रतियोगितावच्छेदकत्वाभावस्य विशेष्यविधयाऽन्योन्याभावघटितव्याप्त्यवगाहिनि च परामर्शे विशेषणतावच्छेदकविधया विषयतैव ।

वस्तुतस्तु साध्यतावच्छेदकांशे प्रतियोगितावच्छेदकतानवच्छेदकत्वमेव भेदघटितव्याप्तौ निविष्टमिति उभयत्रावच्छेदकत्वाभावविशेष्यतया साध्यतावच्छेदकविषयतैव व्यभिचारधीप्रतिबन्धकतावच्छेदिका, अतः प्रतिबन्धकतावच्छेदकीभूतदर्शितसाध्यतावच्छेदकविषयतावत्त्वेन हेतुत्वे वह्नित्वादिना पदार्थान्तरेऽत्यन्ताभावप्रतियोगितावच्छेदकत्वाभावावगाहिभ्रमासङ्ग्रहः । तादृशविषयतायां साध्यतावच्छेदकीयत्वमनिवेश्य तत्सङ्ग्रहे च भेदप्रतियोगितानवच्छेदकवह्निमत्समानाधिकरणहेतुमानिति ज्ञानस्यापि सामानाधिकरण्यविशेषणविषयतानिरूपितव्यभिचारधीप्रतिबन्धक-

तावच्छेदकसाध्यविषयताशालित्वात्ततोऽनुमित्यापत्तिः, वह्नित्वत्वाद्यवच्छिन्नविषयतात्वेन भ्रमविषयतासाधारणेन प्रतिबन्धकतावच्छेदकविषयतानिवेशे च स्वरूपतो वह्नित्वाद्यवगाहिभेदप्रतियोगितानवच्छेदकवह्निसमानाधिकरणहेतुमानिति ज्ञानासङ्ग्रह इति दूषणमनवकाशम् । साध्यतावच्छेदकांशेऽवच्छेदकतावच्छेदकत्वाभावावगाहिन एव भेदघटितत्तद्व्याप्तिज्ञानस्यानुमितिहेतुतया तस्य च वह्नित्वत्वावच्छिन्नविषयतावत्त्वनियमात्तादृशविषयतात्वेनैव प्रतिबन्धकतावच्छेदकविषयतानिवेशात् ।

ननु केवलान्वयिनि साध्यतावच्छेदकावच्छिन्नात्यन्ताभावस्याप्रसिद्धेस्तत्सामानाधिकरण्यधीरप्रसिद्धेति कथं तद्विरोधित्वेनानुगम इत्यत आह । केवलान्वयीति । भ्रमरूपस्यैवेति । तद्रूपावच्छिन्नप्रतियोगिविषयतानिरूपिताभावविषयताया एव निवेशितत्वाद्वास्तवसाध्याभावाप्रसिद्धावपि इतराभावांशे प्रतियोगितया साध्यप्रकारकस्य व्याप्तिधीप्रतिबध्यज्ञानस्य प्रसिद्ध्यैवानुगमनिर्वाह इति भावः ।

तच्चिन्त्यमिति । अत्र यत्स्वतत्त्वनिवेशादननुगमो दुर्वारः । साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकाभावविषयतात्वेन च व्यभिचारज्ञानीयात्यन्तान्योन्याभावविषयतयोर्नानुगमसम्भवः, व्यभिचारधियोऽभावांशे निर्धर्मितावच्छेदकतया तदीयाभावविषयतायाः साध्यधीप्रतिबन्धकतावच्छेदकत्वविरहात् । साध्याभावांशे सधर्मितावच्छेदकं साध्याभाववन्महानसवृत्तिहेतुरित्याकारकज्ञानं प्रति हेतुमन्महानसनिष्ठाभावप्रतियोगितानवच्छेदकं साध्यतावच्छेदकमित्यादिज्ञानस्यापि विरोधितयाऽभावांशे सधर्मितावच्छेदककज्ञानविरोधित्वेनानुगमे ततोऽप्यनुमितिप्रसङ्गात् ।

एवं दर्शितव्यभिचारज्ञानस्य प्रतियोगितांशे साध्यतावच्छेदकाद्यवच्छिन्नत्वावगाहित्वेऽपि साध्यतावच्छेदकांशे प्रतियोगितावच्छेदकत्वावगाहित्वानियमात्साध्यतावच्छेदकांशेऽवच्छेदकत्वाभावग्रहस्य कथं तद्विरोधिता ग्राह्याभावानवगाहित्वात् । मणिमन्त्रादिन्यायेन ग्राह्याभावानवगाहिनोऽपि विरोधित्वोपगमे एकाभावघटितव्याप्तिग्रहस्याप्यभावान्तरघटितव्यभिचारधीप्रतिबन्धकत्वोपगमसम्भवात्किं व्यभिचारज्ञानानुगमेन ।

एवमुक्तानुगतरूपावच्छिन्नव्यभिचारज्ञानसामान्यविरोधित्वं नियताभावघटितव्याप्तिधीविरोधितामते न कुत्रापि व्याप्तिबुद्धौ, यत्किञ्चिद्विरोधित्वं च समूहालम्बनव्यभिचारधियमादाय घटाभावप्रतियोगितानवच्छेदकं वह्नित्वमिति ग्रहे महानसवृत्तित्वविशिष्टघटथभावादिसामानाधिकरण्यग्रहमादाय च हेतुसमानाधिकरणमहानसवृत्त्यभावप्रतियोगितानवच्छेदकं वह्नित्वमिति ज्ञानेऽतिप्रसक्तमित्यादि चिन्ताबीजमवसेयम्।

व्यभिचारज्ञानानुगममन्तरेणापि प्रातिस्विकरूपेण व्यभिचारद्वयमुपादाय तद्विषयकज्ञानविरोधित्वेन व्याप्तिज्ञानानुगमसम्भवात्किं व्यभिचारज्ञानानुगमेनेति पूर्वमतमेवाक्षेप्तुं समूहालम्बनज्ञानविरोधित्वेन व्याप्तिज्ञानमनुगमयति। साध्यतावच्छेदक इति।

(दी०) साध्यतावच्छेदके साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वावगाही साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वावगाही यो ग्रहस्तद्विरोधित्वं साध्याभाववद्वृत्तित्वसाध्यवदन्यवृत्तित्वोभयावगाहिग्रहविरोधित्वादिकं वानुगमकं वाच्यम्। प्रसिद्धिः पूर्ववत्। अधिकं हेत्वाभासे वक्ष्यमाणरीत्या बोध्यम्। ग्रन्थस्तूपलक्षणपरोऽनौपाधिकत्वमात्रव्यवच्छेदाय। यद्वक्ष्यति अनौपाधिकत्वं तु तल्लक्षणमितीति वदन्ति।

(गा०) तद्विरोधित्वमिति। तादृशग्रहसामान्यविरोधित्वमित्यर्थः। तेन घटाभावप्रतियोगितावच्छेदकत्वावगाहिसमूहालम्बनव्यभिचारज्ञानविरोधितामादाय नातिप्रसङ्गः। अत्यन्ताभावादिघटितव्यापकताज्ञानस्य साध्याभाववद्वृत्तित्वादिरूपव्यभिचारज्ञानविरोधित्वे साधनधर्मिकतादृशव्यभिचारद्वयग्रहविरोधित्वरूपलघुधर्मेणैवानुगम उचित इत्याशयेनाह। साध्याभावेति। पूर्ववदिति। भ्रममादायेत्यर्थः।

यन आह। अधिकमिति। तत्रैवात्राप्येकदेशविषयकज्ञानविरोधि-

ता निवेशनीयेति भावः।

न चात्यन्ताभावघटितव्याप्तिज्ञानस्यापि हेतुत्वेऽन्योन्याभावगर्भैवेति मूलविरोध इत्यत आह—अन्यस्त्विति। उपलक्षणपरः। अजहत्स्वार्थलक्षणयाऽत्यन्ताऽन्योन्याभावगर्भव्यापकताघटितव्याप्तिद्वयसाधारणरूपावच्छिन्नपर इत्यर्थः।

नन्वेवं व्यवच्छेद्याप्रसिद्धिरत आह। अनौपाधिकत्वेति। मात्रपदेनात्यन्ताभावगर्भव्याप्त्यव्यवच्छेदलाभः। अत्राग्रिममूलस्वरसमाह—यद्वक्ष्यतीति। अत्यन्ताभावगर्भव्याप्तेरनुमित्यहेतुत्वेऽनौपाधिकत्ववत्तस्यापि अनुमित्यौपयिकव्याप्त्यनुमापकत्वमभिदध्यादिति भावः।

व्यभिचारस्योपाधेश्चाभासत्वानाभासत्वप्रयोजकविशेषदर्शनपरमूलस्य समुदिततात्पर्यार्थमधृत्वैव व्याचष्टे। व्यभिचाराज्ञानस्येत्यादिना।

(दी०) व्यभिचाराज्ञानस्य व्याप्तिधीहेतुत्वाद् व्याप्तिग्रहप्रतिबन्धकग्रहविषयत्वेन व्यभिचारस्याभासत्वम्। सोपाधित्वज्ञानं तु न साक्षाद्व्याप्तिधीविरोधि विरोध्यविषयकत्वात्, किं तु व्यभिचारधीद्वारा। वक्ष्यते चानुमितेस्तत्कारणज्ञानस्य साक्षाद्विरोधिन एवाभासत्वम्। निरुपाधित्वस्य ज्ञानं तु न व्याप्तिधीहेतुः, मानाभावत्। तथात्वेऽप्युपाधेराभासत्वायोगाच्चेति।

(गा०) 'व्यभिचाराज्ञानस्य'। व्यभिचारज्ञानविरहस्य। व्याप्तिधीहेतुत्वादिति। विरोधिविषयकज्ञानाभावतयेत्यादिः। साध्यधर्मिकसाधनाव्यापकव्याप्यत्वज्ञानस्य तद्धर्मिकसाधनव्यापकताज्ञानसमानधर्मिकतया मूलोक्तमुपाधिज्ञानाप्रतिबन्धकत्वबीजं भिन्नधर्मिकत्वं सुपरिहरमतो बीजान्तरमाह। विरोध्यविषयकत्वादिति। ग्राह्याभावत्वादिविशिष्टाविषयकत्वादित्यर्थः। साक्षादविरोधित्वेऽपि विरोधितामात्रेणैव न कथमाभासतेत्यत आह। वक्ष्यत चेति। साक्षाद्विरोधिन एवेति। कारणीभूताभावप्रतियोगिज्ञानविषयस्यैवेत्यर्थः।

अनुमितिप्रयोजकज्ञानविरोधित्वेन हेत्वाभासतेत्यभिमानमूला-

माशङ्कां निराकर्तुं मूलकृताऽनौपाधिकत्वज्ञानस्य व्याप्तिज्ञानाहेतुत्वमेवोक्तं तदनुवदंस्तत्र हेतुमाह। निरुपाधीत्यादिना। तद्धेतुत्वमभ्युपेत्यापि स्वयमभिमानं निराकुर्वाणः समाधत्ते। तथाप्यपीति। आभासत्वायोगादिति। प्रयोजकज्ञाने साक्षाद्विरोधित्वेऽपि जनकज्ञानेऽतथात्वात्, जनकज्ञाने साक्षाद्विरोधिन एवाभासत्वादिति भावः।

मूले। परमुखनिरीक्षकतयेति। अनुमितौ तद्धेतुज्ञाने वा साक्षादविरोधितयेत्यर्थः। सिद्धसाधनवदिति। सिद्धेः सिषाधयिषारूपपक्षताविघटनद्वारैवानुमितिविरोधिता न तु स्वत इति मतमालम्ब्येदमभिहितं तस्य स्वतोऽनुमितिविरोधित्वे परमुखनिरीक्षकत्वासम्भवेन दृष्टान्तताविरहाद्बाधग्रन्थे तु स्फुटतरमेवैतदभिधास्यति।

(दी०) इदं पुनरिहावधेयम्। यदन्योन्याभावस्याव्याप्यवृत्तित्वे प्रतियोग्यवृत्तित्वविशेषिततद्घटितलक्षणस्य संयोगादिसाध्यकव्यभिचारिण्यतिव्याप्तिः। संयोग्यन्योन्याभावस्य केवलान्वयित्वात्।

(गा०) अन्योन्याभावस्याव्याप्यवृत्तित्वे मणिकारोक्तव्याप्तिद्वयं दूषयितुमुपक्रमते। इदं पुनरिति। प्रतियोग्यवृत्तित्वविशेषिततद्घटितेति। प्रतियोग्यवृत्तित्वविशेषितान्योन्याभावघटितेत्यर्थः। केवलान्वयित्वादिति। प्रतियोगिवृत्तेर्लक्षणाघटकत्वादिति शेषः। इदं च संयोगिभेदप्रतियोगिताया अव्याप्यवृत्तित्वाभिमानेन। वस्तुतस्तु प्रतियोगिताया[1] प्रतियोगिस्वरूपत्वेऽव्याप्यवृत्तित्वासम्भवादतिरिक्तत्वेऽपि च तस्यास्तथात्वे मानाभावात्। मूले न संयोगीति प्रतीतिवन्नायं संयोगिभेदप्रतियोगीति प्रतीतेरानुभविकत्वविरहात्। प्रतियोगितावच्छेदकरूपत्वेऽपि संयोगादिरूपाया अपि तस्याः प्रतियोगित्वेनाव्याप्यवृत्तित्वे मानाभावात्। एवं च स्वप्रतियोगितात्वविशिष्टावच्छिन्नभिन्नहेत्वधिकरणनिष्ठभेदघटितलक्षणं सम्यगेव।

न चैवमपि स्वत्वाननुगमो दुर्वार एवेति वाच्यम्, हेतुमन्नि-

---

१. प्रतियोगितात्वेनेति साधुः।

भेदप्रतियोगितावच्छेदकभेदप्रतियोगितानवच्छेदकत्वस्यैव साध्य वत्त्वे निवेशनीयत्वादित्यवधेयम् ।

(दी०) अथ व्याप्यवृत्तिसाध्यके स्वव्यापकसाध्यसामानाधिकरण्यमेव व्याप्तिः । अव्याप्यवृत्तिसंयोगादिसाध्यके तु स्वव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकात्यन्ताभावेन तादृशरूपविशिष्टावच्छिन्नप्रतियोगिताकान्योन्याभावेन वा समसामानाधिकरण्यमिति चेत् ? स्मृतिसंस्कारजन्यज्ञानविषयत्वादिकेवलान्वयिसाध्यकेषु का गतिः ।

(गा०) स्वव्यापकेति । अत्र व्यापकता प्रतियोग्यवृत्ति वाविशेषितान्योन्याभावघटितैव बोध्या, अतो नोक्तदोषः । स्वव्यापकतावच्छेदकेन । स्व साध्यम् , व्यापकतापि पूर्ववत् संयोगादिव्यावृत्ता, अत स्संयोगादेर्द्रव्यत्वादेर्वा यत्र साध्यता तत्रत्यसद्धेतौ संयोगत्वावच्छिन्नाभावेन संयोगत्वावच्छिन्नवद्भेदेन च सामानाधिकरण्येऽपि नाव्याप्तिः । व्याप्यवृत्तितावच्छेदकद्रव्यत्वत्वादेरेव साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावादिना हेतौ सामानाधिकरण्यविरहात् । यत्र द्रव्यत्वावच्छिन्नस्य संयोगेन साध्यता तेनैव च सम्बन्धेन कस्यचिद्धेतुता तत्र साध्यव्यापकतावच्छेदकावच्छिन्नाभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धावपि न क्षतिः स्वाधिकरणावृत्तितादृशाभावकत्वस्य विवक्षणीयत्वात् , अत संयोगी गुणकर्मान्यत्वे सति सत्त्वादित्यादावपि नाव्याप्तिः । विशिष्टस्यानतिरिक्ततया विशिष्टेऽपि हेतौ द्रव्यत्वाभावासामानाधिकरण्यस्य दुर्घटत्वेऽपि द्रव्यत्वाद्यभावे विशिष्टहेत्वसामानाधिकरण्यस्याक्षतत्वात् ।

अव्याप्यवृत्तिकेवलान्वयिसाध्यके प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदक व्याप्यवृत्तितावच्छेदक केवलान्वयितावच्छेदकरूपमेव तदवच्छिन्नाभावादेश्चाप्रसिद्धिरित्याह । स्मृतीति । संयोगाभावादिसाध्यके गुणत्वादौ व्याप्यवृत्तिसाध्यकस्थलोक्तस्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तेरक्षतत्वात् द्रव्यत्वादिरूपहेतुविशेषानुसरणप्रसङ्ग इति यादृशसाध्यकहेतुमात्र एवाव्याप्तिस्तादृशस्मृतिविषयत्वरूपसाध्यकानुसरणम् । स्मृतिविषयत्वादे स्मृति

विषयवस्तुन्येव स्वविषयकस्मरणाभावदशावच्छेदेनाभावसत्त्वात् कालिकमव्याप्यवृत्तित्वम् । ईश्वरज्ञानविषयत्वस्य व्याप्यवृत्तितया ज्ञानविषयतात्वेन ज्ञानविषयत्वाभावो न क्वापीति तदुपेक्ष्य स्मृतिविषयत्वत्वेन साध्यत्वमनुसृतम् ।

ननु विश्वेषां स्मृतिविषयत्वमप्रामाणिकम् , सामान्यलक्षणप्रत्यासत्त्या विश्वविषयकानुभवसम्भवेऽपि स्मृतेरुद्बोधकाधीनतयोद्बोधकस्य च फलोन्नेयतया यादृशवस्तुस्मृतौ प्रमाणान्तरविरहस्तत्रोद्बोधकस्याप्रामाणिकत्वेन स्मृतिविषयताया अपि तथात्वात् । तथा च स्मृतिविषयत्वस्य न केवलान्वयितेत्याशयेन संस्कारविषयत्वानुधावनम् ।

ननु यत्र स्मृतेरप्रामाणिकता तत्र संस्कारोऽप्यप्रामाणिकस्तस्य फलैकप्रमाणकत्वात् । न च तद्विषयकस्मृतेरप्रामाणिकत्वेऽपि तद्विषयकानुभवघटितसामग्री तद्विषयकसंस्कारे प्रमाणमिति वाच्यम् , संस्कारे प्रमाणान्तरविरहे तादृशसामग्र्या एवाकल्पनादित्यनुशयेन जन्यज्ञानविषयत्वेति ।

(दी०) अथ स्वाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वम् , यद्धर्मविशिष्टयत्किञ्चिदधिकरणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वे सति तद्धर्मविशिष्टत्वं वा सेति चेत् ? अत्र किं यथा कथञ्चित्सम्बन्धेन तदधिकरणवृत्तित्वं विवक्षितं साध्यतावच्छेदकसम्बन्धेन वा ? आद्ये गुणः स्पन्दत्वादित्यत्रातिव्याप्तिः, गुणत्वस्य स्वरूपसम्बन्धेन स्पन्दवृत्तितया तद्वत्त्वस्य स्पन्दनिष्ठतादृशान्योन्याभावप्रतियोगितानवच्छेदकत्वात् । द्वितीये समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तिः, जातिमन्मेयव्यक्तिनिष्ठतादृशान्योन्याभावप्रतियोगिताया जातिमत्त्वेनानवच्छेदाज्जातिशून्यमेयव्यक्तौ समवायेन वर्तमानस्याप्रसिद्धत्वात् ।

(गा०) स्वाधिकरणेति । इदं संयोगि द्रव्यत्वादित्यादौ हेतुमन्निष्ठस्य संयोगाद्यवच्छिन्नान्योन्याभावस्य न हेत्वधिकरणयत्किञ्चिद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वं यतः संयोगवत्त्वादिरूपतत्तत्प्रतियोगितावच्छेदकस्य सकलहेत्वधिकरणे सत्त्वेन तादृशं न किञ्चिद्धेत्वधिकरणं यद्वृत्तिधर्मानवच्छिन्ना तदीयप्रतियोगिता स्यादिति लक्षणसमन्वयः । संयोगि सत्त्वादित्यादौ हेत्वधिकरणगुणादिव्यक्तिवृत्तिधर्मानवच्छिन्नैव साध्यवत्त्वावच्छिन्नभेदप्रतियोगितेति नातिप्रसङ्गः । तथैव साध्यवत्त्वावच्छिन्नभेदप्रतियोगितायां द्रव्यादिवृत्तिधर्मावच्छिन्नायां न हेत्वधिकरणवृत्तिधर्मावच्छिन्नत्वसामान्याभाव इत्यतिव्याप्तेर्वारणाय यत्किञ्चिदिति । स्वपदं हेतुतावच्छेदकविशिष्टपरम्, अतो न द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः । यादृशधर्मस्य हेत्वधिकरणवृत्तित्वं तादृशधर्मपर्याप्तावच्छेदकताकान्यत्वं प्रतियोगितायां विशेषणीयमतो विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तावद्भेदस्य प्रतियोगिताया गुणादिवृत्तिसत्तावच्छिन्नाया अपि सत्तात्वविशिष्टपर्याप्तावच्छेदकताकान्यत्वान्नातिव्याप्तिः ।

अत्र च तादृशधर्मानवच्छिन्नप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वमेव विवक्षितम्, अन्यथा प्रतियोगिताया द्विधा निवेशेनान्योन्याभावस्य चाधिकस्य निवेशेन गौरवादित्यवधेयम् । तादृशप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वं च तादृशप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकविशिष्टं तत्सामानाधिकरण्यम् । एवं च विशिष्टसत्तावद्द्रव्यनिष्ठधर्मानवच्छिन्नप्रतियोगितानवच्छेदकगुणत्वादिविशिष्टसामानाधिकरण्यरूपव्याप्त्युपलक्षितसत्तावत्ताज्ञानात् कर्मादौ गुणाद्यनुमित्यापत्तिरतस्तादृशसामानाधिकरण्यसहितहेतुतावच्छेदकस्य व्याप्तित्वमाह—तद्धर्मेति । हेतुतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमनुमितिहेतुरिति सूचनाय तद्धर्मविशिष्टत्वमित्यत्र विशिष्टपदोपादानम् । सामानाधिकरण्यस्य विशेषणत्वासम्भवश्च प्रागेव दर्शितः । 'स्वरूपसम्बन्धेन' कालिकसम्बन्धेन । 'तद्वत्त्वस्य' गुणत्ववत्त्वस्य । तादृशान्योन्याभावेति । यत्किञ्चित्स्पन्दवृत्तिधर्मानवच्छिन्नप्रतियोगिताकघटादिमदन्योन्याभावेत्यर्थः । अत्र चातिव्याप्तिव्यापकतालक्षणस्य न तु सामानाधिकरण्यघटि-

व्याप्तिलक्षणस्य तस्यातिव्याप्तिश्च एतत्स्पन्दभिन्नः स्पन्दत्वा-दित्यादौ बोध्या । जातिमत्त्वमेकव्यक्तिनिष्ठत्वेन तादृशव्यक्ति-वृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वरूपं तादृशत्वं घटाद्यन्योन्याभाव-स्य सम्पादितम् ।

ननु जातिमद्भेद एव न कथं तादृश इत्यत आह नैक-व्येते । अप्रसिद्धेरिति । तथा च हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्ति-पदेन जातिशून्यस्योपादानात्तन्मात्राजातिमद्भेदो न हेत्वधिकरणी-भूतयत्किञ्चिद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताक इत्यर्थः ।

(दी०) एतेन ग्रहो व्याख्यातः । एवं तथात्वेऽत्यन्ता-भावगर्भमपि दुर्वचम् । तथा हि, प्रतियोग्यनधिकरणीभूत-हेत्वधिकरणनिष्ठात्यन्ताभावेत्यादिकमव्यापकमेव संयोगादि-साध्यकद्रव्यत्वादौ, स्वाधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्तिप्रतियो-गिकात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्न-समानाधिकरणहेतुत्वमित्यत्रापि पूर्ववद् गुणः स्पन्दत्वा-ज्जातिमान् मेयत्वादित्यत्रातिव्याप्तिः । एवं स्वप्रतियोगिनिष्ठा-धेयत्वानिरूपकहेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेद-कसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुत्वमित्यत्रापि उ-त्पत्तिकालावच्छेदेन जन्यानां द्रव्याणामजन्यानां च प्रलया-वच्छेदेन वा संयोगनिष्ठाधेयत्वानिरूपकत्वोपगमे संयोगनाशक-द्रव्यत्वे कालपरिमाणे वा हेतावव्याप्तिरिति कृतं पल्लवितेन ।

(गा०) एतेनेति । असम्भवातिव्याप्त्यादिप्रसङ्गकथनेनेत्यर्थः । 'ग्रहः' अनुमितिजनकीभूतो ग्रहः । 'व्याख्यातः' अप्रसङ्गादिप्रसङ्गेन तथा व्याख्यातः । 'तथात्वे' भेदस्याव्याप्यवृत्तित्वे । अव्यापकमेवेति । द्रव्य-स्याप्युत्पत्तिकालावच्छेदेन संयोगाभावप्रतियोगिसंयोगवद्भेदवत्तया संयोगाभावस्यापि प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वादिति भावः । यत्किञ्चिद्व्यक्त्यवृत्तिप्रतियोगिकेति । यत्किञ्चिद्व्यक्त्यवृत्तिप्र-तियोगिसामान्यकेत्यर्थः । यत्किञ्चिद्व्यक्तिवृत्त्यप्रतियोगिकेति यावत् ।

तेन वह्न्यादिसामान्याभावस्यापि महानसावृत्तियत्किञ्चित्प्रतियोगिकत्वेऽपि न क्षतिः।

न च विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिः, प्रतियोगिपदस्य प्रतियोगितावच्छेदकविशिष्टपरत्वेऽपि विशिष्टस्यानतिरिक्ततया दुर्वारैवेति वाच्यम्, तादृशप्रतियोगितावच्छेदकस्य विशेषणतया यत्किञ्चिद्धेतुमन्निष्ठाधिकरणतानिरूपकतानवच्छेदकत्वस्य विवक्षणीयत्वात्। तथाविधाधिकरणतानिरूपकतानवच्छेदकधर्मावच्छिन्नप्रतियोगितासामान्यानवच्छेदकत्वं साध्यतावच्छेदकविशेषणमिति तु निष्कर्षः। पूर्ववदिति। यथा कथञ्चित्सम्बन्धेन साध्यतावच्छेदकसम्बन्धेन वा हेत्वधिकरणवृत्तित्वविवक्षण इत्यर्थः। स्वप्रतियोगिनिष्ठेति। स्वप्रतियोगितावच्छेदकावच्छिन्नेत्यर्थः। अत्रापि स्वावच्छेदकावच्छिन्नाधेयत्वानिरूपकहेत्वधिकरणकप्रतियोगितायाः अनवच्छेदकत्वं साध्यतावच्छेदकविशेषणमिति परमार्थः। आधेयत्वानिरूपकत्वोपगम इति। आधेयत्वानिरूपकत्वस्याधिकरणतासमशीलतयाऽव्याप्यवृत्तिसंयोगादेरधिकरणतावत्तन्निष्ठाधेयतानिरूपकत्वस्याप्यव्याप्यवृत्तित्वौचित्यादिति भावः। अजन्यानां प्रलयावच्छेदेन संयोगनिष्ठाधेयत्वानिरूपकत्वं कालपरिमाणाव्याप्तिप्रयोजकम्।

यद्यपि भेदस्याव्याप्यवृत्तित्वेन हेत्वधिकरणद्रव्यादौ संयोगाभावप्रतियोग्यनधिकरणसत्त्वेऽपि समवायादिरूपसाध्यतावच्छेदकसम्बन्धे संयोगादिप्रतियोगिकत्वद्रव्यानुयोगिकत्वोभयाभावस्यासत्त्वादुभयाभावघटितप्रतियोगिवैयधिकरण्यविवक्षणे संयोगाद्यभावस्य न द्रव्ये प्रतियोगिवैयधिकरण्यमिति न संयोगादिसाध्यकाव्याप्तिः। तथापि कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे न तादृशविवक्षासम्भव इत्यभिप्रायेण प्रतियोगिवैयधिकरण्याघटितनिरुक्तपारिभाषिकानौपाधिकत्वमेव व्याप्तिरिति सिद्धान्तयति—अत्र वदन्तीति।

(दी०) अत्र वदन्ति। साध्यसमानाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वव्यापकस्वसमानाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वकत्वम्, स्वस-

मानाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्व-व्यापकसाध्यसमानाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगिता-वच्छेदकत्वकत्वं वा । स्वसमानाधिकरणाः सर्वे यद्धर्माव-च्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यम् । सा-ध्यसामानाधिकरण्याभावव्यापकतावच्छेदकस्वसामानाधिकरण्यसा मान्याभावत्वकत्वं वा व्याप्तिः । अत्र च साध्यताव-च्छेदकसम्बन्धेन साध्याधिकरणं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं तद्वृत्तिद्वयं चैकेन सम्बन्धेन विशेषणताविशे-षेण वा बोध्यमिति ॥

(गा०) प्रथमं यावत्साध्यव्यापकतावच्छेदकव्यापकतावच्छेदक-कत्वरूपां व्याप्तिमुक्त्वाऽवच्छेदकत्वाभावद्वयाप्रवेशेन लघीयसीं या-वत्स्वव्यापकतानवच्छेदकसाध्यव्यापकतानवच्छेदकत्वरूपां तामुक्त-वान् । न च सामानाधिकरणेत्यादिना संबन्धभेदनिबन्धनदोषवारणाय प्रथमे व्यापकताद्वयं द्वितीये चाव्यापकताद्वयमेकसम्बन्धेन निवे-शितं साध्यतावच्छेदकसम्बन्धेन तन्निवेशे यत्र संयोगेन साध्यता तत्र तेन सम्बन्धेन व्यापकताया अप्रसिद्ध्यापत्तेः । द्वितीये च तेन सम्बन्धेन वस्तुमात्रस्यैव साध्यव्यापकतया तादृशव्यभिचारिण्यति-प्रसङ्गादिना तन्निवेशः स्वसमानाधिकरणाभावप्रतियोगितावच्छेद-कत्वप्रविष्टसामानाधिकरण्यांशमात्रस्य व्याप्यव्यापकभावनिवेशेनै-वोपपत्तौ तावद्दूरपर्यन्तनिवेशनमफलमित्याशयेनाह—स्वसमाना धिकरणा इति । स्वसामानाधिकरण्यव्यापकतावच्छेदकसाध्यता वच्छेदकविशिष्टसाध्यसामानाधिकरण्यत्वकत्वमित्यर्थः । सामाना-धिकरण्यस्याव्याप्यवृत्तित्वानुपगमान्न तस्य व्यापकतानुपपत्तिः । एतत्कल्पेऽपि साध्यसामानाधिकरण्याव्याप्यवृत्तित्वभ्रमदशायां तत्र व्यापकताग्रहासम्भावादनुमित्यनुपपत्तिमालोच्य लक्षणान्तरमाह— साध्येति । अत्र साध्यसामानाधिकरण्याभाववति हेतुसामाना-धिकरण्याभावस्याव्याप्यवृत्तित्वभ्रमस्तादृशहेतुसामानाधिकरण्यभ्रम पर्यवसितस्तत्सत्वे चानुमितिरनुभवविरुद्धैव हेतोः साध्याभाव-सामानाधिकरण्यग्रहवत् साध्यविरोधिसामानाधिकरण्यग्रहस्यापि

अनुमितिविरोधित्वादिति तादृशभ्रमकाले हेतुसामानाधिकरण्याभावत्वे साध्यसामानाधिकरण्याभावव्यापकतावच्छेदकताया दुर्ग्रहत्वेऽपि न क्षतिः। व्यापकतावच्छेदकत्वमत्रात्यन्ताभावप्रतियोगितानवच्छेदकत्वगर्भं न तु भेदप्रतियोगितावच्छेदकतानवच्छेदकत्वगर्भं तथा सति धर्मिणि तत्समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वनिवेशेनैव सामञ्जस्ये धर्मे व्यापकतावच्छेदकत्वपर्यन्तनिवेशविरोधादिति दिक् ॥

इति अनुमानगादाधर्यां व्याप्त्यनुगमप्रकरणम् ॥

अथ सामान्यलक्षणाप्रकरणम्

(चि०) व्याप्तिग्रहश्च सामान्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयकः । कथमन्यथा पर्वतीयधूमे व्याप्त्यग्रहे तस्मादनुमितिः ? सा चेन्द्रियसम्बद्धविशेषणता, अतिरिक्तैव वा । तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेनानागतादौ संयोगादेरभावादिति वदन्ति । तदपरे न मन्यते ।

(दी०) प्रसङ्गात् सामान्यलक्षणां व्यवस्थापयितुमाह । व्याप्तिग्रहश्चेति । केचित्तु समानाधिकरणयोरेव व्याप्तिरिति पक्षे पर्वतीयधूमे वह्निव्याप्तिविशिष्टधीर्न पर्वतीयवह्निव्याप्तिग्रहं विना, स च न सामान्यलक्षणां विनेति कथितव्याप्तिविशिष्टेत्यादिलक्षणोपोद्घातोऽपीत्याहुः ।

(गा०) व्याप्तिग्रहश्चेत्यादिमूलेन व्याप्तिग्रहस्य सकलधूमविषयकतायाः पर्वतीयधूमज्ञानजन्यानुमित्यन्यथानुपपत्त्या व्यवस्थापनं कुत्रोपयोगीत्याकाङ्क्षायां तस्य सामान्यलक्षणप्रत्यासत्तिव्यवस्थापनोपयोगितां सामान्यलक्षणप्रत्यासत्तिनिरूपणप्रयोजकसङ्गतिं च दर्शयति—प्रसङ्गादिति । सामान्यप्रत्यासत्त्या सर्वोपसंहारादित्यादिना ग्रन्थेनाशङ्कितनयेदानीं स्मृतत्वादित्यर्थः । सामान्यलक्षणामिति । प्रत्यासत्तिमिति शेषः । 'व्यवस्थापयितुम्' प्रमाणवत्तया निरूपयितुम् । व्याप्तिग्रहश्चेत्याद्यभिधानं चाकाङ्क्षोत्थापनेन सामान्यप्रत्यासत्तिव्यवस्थापनोपयोगीति ध्येयम् ।

यद्यपि सामान्यलक्षणप्रत्यासत्तिं विनानुपपद्यमानं व्याप्तिग्रहस्य सकलधूमादिविषयकत्वमेव तत्प्रत्यासत्तित्वे मानमिति व्याप्तिग्रहश्च सामान्यलक्षणप्रत्यासत्त्या सकलधूमविषयक इति

वाक्यमेव तत्प्रत्यासत्तिव्यवस्थापकमिति व्यवस्थापयतीत्येव वक्तुं युक्तं तथापि कथितमपि सकलधूमविषयकत्वं युक्तिमन्तरेणा- वधारयितुं न शक्यते, कथमन्यथेत्यादिना वक्ष्यमाणा च युक्तिः पूर्वपक्षिणा दूषयिष्यते, उच्यत इत्यादिग्रन्थेन व्यभिचारसंश- यान्यथानुपपत्तिकथनमेव तद्व्यवस्थापकमिति युक्त्या तस्मिन् सा- धित एव तदन्यथानुपपत्त्या प्रत्यासत्तिव्यवस्थितिर्निर्वहतीति व्यव- स्थापयितुमित्युक्तम् ।

मूले सकलधूमविषयक इत्यस्य धूमनिष्ठसकलव्याप्तिविषयक इत्यर्थः । पूर्वं पर्वतीयधूमग्रहेऽपि तन्निष्ठव्याप्त्यग्रहे तत्र व्याप्त्यवगा- हिन्माया अबाधितव्याप्त्युपनायकविरहेणासम्भवात् । तन्निष्ठ- व्याप्तिग्रहे पूर्वं तदग्रहेऽपि लौकिकसन्निकर्षादिबलात्तस्मिन् भास- मान उपनायकसत्त्वेन तत्र व्याप्त्युपनीतमानसम्भवात्, सकलधूम- विषयकत्वस्याकिञ्चित्करत्वात्, उपोद्घातसङ्गत्या सामान्यप्रत्यासत्ति- व्यवस्थापनमिति वदतां मतमाह दीधितौ—केचित्त्विति । सकल- धूमसाधारणैकव्याप्तिमते विनापि सामान्यप्रत्यासत्तिं विशिष्टपरा- मर्शनिर्वाहस्याग्रे वाच्यत्वात् समानाधिकरणयोरेवेति । 'पक्षे' मते । 'व्याप्तिविशिष्टधीः' व्याप्तिभ्रमालक्षणोपोद्घातः । लक्षणघटक- स्यानुमितिकारणतायां व्याप्तिविशिष्टवैशिष्ट्यनिश्चयत्वावच्छिन्नत्व स्योपपादकत्वं सामान्यप्रत्यासत्तेरिति शेषः । अनुमितिपूर्वं नि- यमतो विशिष्टपरामर्शानिर्वाहे तत्त्वेनानुमितिहेतुताया व्यभिचारा दिनाऽसम्भवाद् गृह्यमाणव्याप्त्यवच्छेदकताकधर्मप्रकारकपक्षधर्म- ताज्ञानत्वेनैवानुमितिहेतुताया अगत्या वाच्यत्वादिति भावः । अपिना प्रसङ्गसम्भवोऽपि दर्शितः ।

एकव्यक्तिहेतुकस्थले विशिष्टपरामर्शत्वेन हेतुताया नि- ष्प्रत्यूहत्वात्तादृशकारणताघटितमेव जातिघटितलक्षणं निर्दोष- मिति न कथितलक्षणोपोद्घातावसर इत्यस्वरससूचनाय के चित्त्विति । लक्षणानुपपादकत्वेऽपि सामान्यलक्षणानुपगमे विशिष्टपरामर्शत्वेन हेतुत्वानुपपत्तौ व्याप्यतावच्छेदकानवगा- हिशाब्दपरामर्शादनुमित्यनुपपत्त्या दर्शितज्ञानद्वयसाधारणरूपेण च हेतुत्वासम्भवाद् धूमादिज्ञानस्य प्रामाण्यमेव नोपपद्यत इत्यनुमान- प्रामाण्योपोद्घातोऽव्याहत एव ।

न च नानाव्यक्तिकहेतुज्ञानस्यानुमितिहेतुत्वासम्भवेऽपि एकव्यक्तिकहेतुज्ञानस्य तथात्वसम्भवात्तेनैवानुमानप्रामाण्यं निराबाधमिति न तदुपपादकत्वमपि सामान्यप्रत्यासत्तेरिति वाच्यम्, धूमादिदर्शनानन्तरमनुमित्यसम्भवे तत्र तथा प्रवर्तकज्ञाननिर्वाहस्तथैव सर्वत्र तन्निर्वाहेणानुमितेरेव विलोपापत्त्याऽनुमानप्रामाण्यानिर्वाहात्। एवं व्याप्तिविशिष्टेत्यादिलक्षणवाक्यस्य वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नकारणताघटितलक्षणपरत्वे तदुपोद्घातोऽपि दुर्वार एवेति ध्येयम्।

विकल्पेन प्रत्यासत्तितया स्वीकार्यस्य ज्ञायमानसामान्यस्य सामान्यज्ञानस्य च सामान्यलक्षणापदार्थत्वं व्युत्पादयति—अत्र चेति।

(दी०) अत्र च सामान्यं लक्षणं स्वरूपं यस्या इत्यर्थे सामान्यमेव प्रत्यासत्तिः। सामान्यं लक्षणं निरूपकं यस्या इत्यर्थे तु तज्ज्ञानम्। तत्राद्यमाह। सा चेन्द्रियेति। इन्द्रियेण सम्बद्धं धूमादि तस्य विशेषणं तद्विशेष्यकज्ञानप्रकारीभूतो धूमत्वादिरित्यर्थः। विशेषणतेत्यत्र भावार्थो न विवक्षितः। तत्र विशेषणत्वं यस्या इति बहुव्रीहिर्वा। सम्बद्धपदस्यैव वा परम्परासम्बद्धस्तत्सम्बद्धविशेष्यकज्ञानप्रकारोऽर्थः। तथा च सैव विशेषणतेत्यर्थः।

(गा०) तज्ज्ञानमिति। सामान्यज्ञानमित्यर्थ। ज्ञानस्य विषयनिरूप्यत्वादिति भाव। सा चेन्द्रियसम्बद्धविशेषणतेति ग्रन्थस्य सामान्यलक्षणाया इन्द्रियसम्बद्धविशेषणतारूपाभावग्राहकप्रत्यासत्त्यन्तर्भावपरत्वं न सम्भवति, इन्द्रियसम्बद्धानुयोगिकविशेषणताया अभावग्राहकत्वात्, प्रकृते चेन्द्रियसम्बद्धधूमत्वादिप्रतियोगिकविशेषणतायास्तद्वैशिष्ट्यरूपाया यावद्धूमादिप्रत्यासन्नाया यावद्धूमादिभासकताया स्वीकरणीयत्वात्, शब्दसाम्यस्याकिञ्चित्करत्वात्।

न चेन्द्रियसम्बद्धानुयोगिकसामान्यनिरूपितविशेषणतैव सामान्याश्रयाणां प्रत्यासत्तिरिति प्रत्यासत्त्योरेकविधत्वमिति वाच्यम्, अभावे ग्राह्यप्रतियोगिकविशेषणताया अत्र च ग्राह्यनिष्ठधू

मत्यादिप्रतियोगिकविशेषणताया ग्राहकत्वेन विशेषात् । सम्बन्धमात्रस्य विशेषणतापदार्थत्व इन्द्रियसम्बद्धानुयोगिककालिकसम्बन्धस्याप्यभावग्राहकतोपपत्तेः । अभावीयविलक्षणसम्बन्धपरत्वे प्रकृतासंग्रहात् ।

एतेनेन्द्रियसम्बद्धसामान्ये धर्मिणो विशेषणतासामान्यलक्षणेत्यपि परास्तम् । अत इन्द्रियसम्बद्धविशेषणतापदं ज्ञायमानसामान्यपरतया व्याचिकीर्षुराह तत्रायमिति । विशेषणपदस्य वैशिष्ट्यप्रतियोग्यर्थकत्वे दोषस्य वाच्यतया तदर्थमाह तद्विशेष्यकेति । तन्निष्ठविशेष्यतानिरूपितज्ञानप्रकारताश्रय इत्यर्थः । तेनेन्द्रियसम्बद्धांशेऽप्यप्रकारकात्तदसम्बद्धांशे धूमत्वप्रकारकाद् धूमकालीनाऽयमित्यादिज्ञानाच्च यावद्धूमादिग्रहप्रसङ्गः ।

ननु विशेषणपदोत्तरभावप्रत्ययलभ्यप्रकारताया एव प्रत्यासत्तित्वमेतावता लभ्यते न तु धूमत्वादेरित्यत आह—विशेषणतेत्यन्तेति ।

ननु देवतेतिवत्स्वार्थे तल्प्रत्ययानुशासनाभावाद्भावार्थाविवक्षायां तल्प्रत्ययस्यासाधुतापत्तिरित्यतः प्रकारान्तरमनुसरति । तत्रेति । 'तत्र' इन्द्रियसम्बद्धे । विशेषणत्वं पूर्वनिरुक्तमेव । व्यधिकरणबहुव्रीहावसहिष्णुतातः प्रकारान्तरमालम्बते । सम्बद्धपदस्यैव वेति । परम्परासम्बद्धं विवृणोति—तत्सम्बद्धेति । एवं सति विशेषणादिपदेन सप्तमीतत्पुरुषाद्यसम्भवाद् विशेषणतापदेन कर्मधारयमवलम्ब्य व्याचष्टे—तथा चेति । विशेषणतेति । इन्द्रियसम्बन्धात्मिकेत्यर्थः । एतदभिधानं च सामान्यस्य प्रत्यासत्तित्वप्रवादरक्षणाय ।

यद्यपि धूमत्वादिसामान्यस्येन्द्रियप्रतियोगिकत्वविरहात् स्वतस्तत्प्रत्यासत्तित्वमनुपपन्नं तथापि विशिष्टघटकसंयोगादेस्तत्प्रतियोगिकत्वाद्विशिष्टस्य तत्प्रत्यासत्तिता, व्यापारस्तु संयोग एव, तस्य न तु सामान्यं तदजन्यत्वादित्यवधेयम् ।

(दी०) अत्र च बहिरिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तदिन्द्रियजन्यत्वञ्च नियामकम् । एवं चाणुत्वेन यत्किञ्चिद्रूपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदन्ति ।

(गा०) अत्रेति । सामान्यप्रत्यासत्तिहेतुतायामित्यर्थः । अवच्छेदकमित्यर्थकेन नियामकमित्यनेनास्याभिसम्बन्धः । लौ-

किंसम्बन्ध इति । साक्षात्करोमीतिप्रतीतिनियामकविषयतायाः प्रयोजकः संयोगादिसम्बन्ध इत्यर्थः । तदिन्द्रियजन्यत्वं तदिन्द्रियजन्यतावच्छेदकीभूतजातिविशेषः, तथा च धूमत्वादिप्रकारतानिरूपितलौकिकान्यमुख्यविशेष्यतासम्बन्धेन चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगादिमद्धर्मिनिष्ठविशेष्यतानिरूपितचाक्षुषादिप्रकारतावद्धूमत्वत्वादिना हेतुता द्रव्यत्वादिसामान्यलक्षणाजन्यज्ञाने व्यभिचारवारणाय धूमत्वादिप्रकारतानिरूपितत्वं विशेष्यताविशेषणं द्रव्यत्वादिसामान्यलक्षणाजन्ययावद्द्रव्यभाने स्मरणाद्युपनीतधूमत्वादेर्लौकिकसन्निकर्षशून्ये धूमादौ न प्रकारतया भानमुपेयते, अतो न तत्रोक्तप्रकारताविशिष्टधूमत्वादेर्व्यभिचारः । ज्ञानलक्षणया धूमत्वाद्युपनीतभानजनने विशेष्यभासकसामग्र्याः सहकारित्वे कल्पनीये विशेष्यलौकिकप्रत्यक्षतदीयविशेष्यान्तरभासकलौकिकसन्निकर्षादिघटिततदुपनीतभानसामग्र्योरेव सहकारिता कल्प्यते न तु द्रव्यत्वादिसामान्यघटिततद्भासकसामग्र्या अतो न तत्रोपनायकज्ञानबलाद् द्रव्यत्वादिना मुख्यविशेष्यतया भासमानधूमाद्यंशे धूमत्वादिभानम् ।

केचित्तु तत्रानुपस्थितासन्निकृष्टधूमाद्यंशे धूमत्वाभानेऽपि न क्षतिः, धूमत्वान्यसामान्यप्रकारत्वानिरूपितमुख्यविशेष्यताया एव तादृशधूमत्वजन्यतावच्छेदकत्वोपगमात्, उक्तस्थले च धूमत्वद्रव्यत्वोभयप्रकारकैकविषयताया एवोपगमात् । उभयसामान्यज्ञानं च समूहालम्बनरूपमुपेयते । तत्र च प्रकारताभेदेन विषयताभेद इति द्रव्यत्वाद्यप्रकारिकैव च धूमत्वप्रकारकविषयतेति न तदसङ्ग्रह इत्याहुः ।

लौकिकविषयतान्यत्वस्य विशेष्यताविशेषणत्वात् प्राथमिकधूमत्वादिप्रकारकलौकिकप्रत्यक्षे न व्यभिचारः, मुख्यविशेष्यतापर्यन्तनिवेशाद् धूमत्वादिना धूमाद्युपनीतभाने न व्यभिचारः । यावद्धूमविषयकत्वस्य जन्यतावच्छेदकत्वानुपगमेऽपि यावत्सु धूमेषु कारणसत्त्वेन तत्र विषयतासम्बन्धेन ज्ञानोत्पत्त्यैवार्थतो यावद्रूपविषयकत्वनिर्वाहः । बहिरिन्द्रियस्येत्यनेन मानसस्थले मनसो लौकिकसम्बन्धस्य ज्ञानस्य मानसताया एवापेक्षणीयत्वं प्रदर्शितं तत्प्रयोजनमाह—एव चेति । तद्व्यक्तित्वादिनाऽणूपस्थितौ सकलाणुप्रत्यक्षानुदयः, द्रव्यत्वादिना यत्किञ्चिदणूपस्थितिस्थले च तेन रूपेण याव-

जेन पक्षे व्याप्तिविशिष्टवैशिष्ट्यग्रहसम्भवात्।

न च पूर्वं यत्र धर्मिणि यद् गृहीतं तत्रैव तदुपनय इति मते धूलिपटलमात्रे गृहीताया अपि व्याप्तेरिन्द्रियसन्निकृष्टे धूम उपनयासम्भवेन परामर्शासम्भव इति वाच्यम्, विशिष्टवह्निमद्वृत्तित्वरूपाया व्याप्तेः पर्वतरूपधर्मिवृत्तित्वांशस्य लौकिकसन्निकर्षादेव भानात्, पर्वते वह्निमत्त्वपर्यन्तस्यैवोपनयतया पूर्वं धूमाग्रहेऽपि वह्निमत्त्वसामान्यलक्षणया वह्निमत्त्वप्रकारेण पर्वतस्यापि ग्रहात्, तदुपनयसम्भवेनानुपपत्त्यभावात्।

यत्र धूमे लौकिकसन्निकर्षो नास्ति तत्र पूर्वं धूमाग्रहे पक्षे धूमोपनयासम्भवेन नानुमितिनिर्वाह इत्येतत्परतापि न सम्भवति, एवं सति धूमाग्रहस्यैव वक्तुमुचिततया व्याप्त्यग्रहाभिधानविरोधात्। धूलिपटले धूमत्वग्रहस्थले[1] धूमत्वसामान्यलक्षणया धूमग्रहासम्भवेऽपि संयोगित्वादिसामान्यलक्षणया धूमग्रहस्य दुर्वारत्वाच्च।

एतेन यत्र पर्वते धूमे च लौकिकसन्निकर्षो वर्त्तते न तु तदुभयसंयोगग्राहकविलक्षणसन्निकर्षः, असन्निकृष्टस्यापि संयोगस्य संसर्गविधया भानोपगमेन पक्षधर्मताज्ञाननिर्वाहः, तत्र पूर्वं धूमे व्याप्त्यग्रह उक्तनियमसत्त्वे लौकिकसन्निकर्षवत्यपि धूमवह्निमत्संयोगात्मकव्याप्तिग्रहासम्भवात्तत्र तस्योपनीतभानस्यैव स्वीकरणीयत्वात्।

न च धूलिपटले धूमत्वभ्रमदशायां पक्षीयधूमभानेऽपि तद्विशेषणतया व्याप्तिभानमुपनयाधीनमेव मुख्यविशेष्यताया एव सामान्यप्रत्यासत्तिप्रयोज्यत्वात्। तथा चोक्तनियमसत्त्वे प्रागपि पक्षीयधूमे व्याप्त्यग्रहाज्ज्ञानघटितविशेषणताया निवेशेऽपि नोक्तस्थले विशिष्टपरामर्शनिर्वाह इति वाच्यम्, संयोगित्वसामान्यलक्षणयैवोक्तसंयोगरूपव्याप्तिप्रकारेण धूमभानस्योक्तस्थले सम्भवेनोक्तनियमसत्त्वेऽपि ज्ञाननिवेशे विशिष्टपरामर्शनिर्वाहादित्यपि निरस्तम्।

संयोगित्वसामान्यलक्षणया दर्शितस्थले तेन रूपेण धूमभानोपगमे धूलिपटले धूमत्वासत्त्वस्याकिञ्चित्करतया धूलिपटल इत्यादिफक्किकाया दुःसङ्गमत्वात्। तस्माद् धूमत्वग्रहप्रतिबन्धकदोषादिसमवधानदशायां धूमत्वेन धूमप्रत्यक्षापत्तिवारणमेव ज्ञानघटित-

---

१. व्याप्तिग्रहकाले इति २ पु० पाठः।

विशेषणतानिवेशफलमित्यवधेयम् ।

धर्मिणीति । नयनसन्निकृष्टधूमादावित्यर्थः । अस्य चागृह्यमाणेनेत्यनेन स्मरणप्रकारीभवतेत्यनेन गृह्यमाणेत्यनेन च सम्बन्धः । धूमेन्द्रियसन्निकर्षोत्पत्तिक्षणे पूर्वसन्निकर्षविरहेण सामान्यस्य नयनागृह्यमाणतासम्भवेऽपि तदुत्तरसामान्यप्रकारकलौकिकचाक्षुषोत्पत्त्या तस्य यावत्सामान्याश्रयविषयकत्वे इष्टापत्तिसम्भवाद्दोषवशादित्युक्तम् । दोषसमवधानस्थले च प्रत्यासत्त्यन्तरेण सामान्यप्रकारकज्ञानाजननात् प्रत्यासत्त्यन्तराधीनसामान्यप्रकारकज्ञाने जायमान एव सामान्येन यावत्सामान्याश्रयज्ञानोत्पत्तेरानुभविकतया नेष्टापत्तिसम्भव इति ध्येयम् ।

इन्द्रियसम्बद्धे सामान्यस्य ज्ञायमानत्वरक्षायै स्मरणप्रकारीभवतेति । सामान्येन चाक्षुषज्ञानापत्तिरित्यन्वयः । यत्र सामान्यप्रकारकचाक्षुषोत्पत्तिकाले दोषसमवधानं तत्र तदुत्तरसामान्यजचाक्षुषापत्तिश्च सामान्याश्रयचाक्षुष[1]जनकालोकसंयोगनाशोत्तरं वक्ष्यमाणसामान्यजन्यचाक्षुषापत्तिरिव दोष एवैतन्मते । गृह्यमाणेनेत्यत्र नयनेनेत्यनुषज्यते । सामान्येनेति च लौकिकसन्निकर्षविगमे सामान्यजप्रत्यक्षोत्पत्तिबीजं पूर्वोक्तं बोध्यम् । चक्षुःसंयोगादेश्च विशेषणतया कारणतावच्छेदकत्वं नोपलक्षणतया, अतः कारणतावच्छेदकविशिष्टस्यान्यवहितपूर्वकालसत्तायाः प्रकृते कार्योत्पत्तिप्रयोजकतया कालान्तरीयचक्षुःसंयोगादिकमादाय नातिप्रसङ्गः ।

नन्विन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभवतः सामान्यस्य प्रत्यासत्तित्वे वह्न्यादिरूपसामान्यप्रत्यासत्त्या यावतां वह्न्यादिमतां प्रत्यक्षानुपपत्तिः, इन्द्रियसम्बद्धे गृह्यमाणवह्न्यादिव्यक्तेर्यावति वह्न्यादिमत्यसत्त्वादिति महानसीयधूमे व्याप्तिग्रहदशायां पर्वतीयधूमादौ व्याप्तिग्रहानुपपत्तिः, वह्न्यादिमत्त्वेन पर्वतादिग्रहासम्भवात् ।

यदि च तदानीं वह्निमत्त्वेन पर्वताग्रहेण पर्वतीयधूमे व्याप्त्यग्रहेऽपि वह्नित्वसामान्यलक्षणया पर्वतीयवह्निग्रहेण पर्वतसन्निकर्षदशायां स्मरणोपनीतपर्वतीयवह्निप्रकारेण पर्वतादौ लौकिक एव पर्वतीयधूमे वह्निमद्वृत्तित्वरूपव्याप्तिग्रहः सम्भवतीति मन्यते, तदापि यत्र वह्न्यादिमत एव साध्यता तत्र वह्न्यादिमत्त्वसामान्यप्रत्यासत्त्या

१. सामान्यचाक्षुषेति पाठान्तरम् ।

यावद्वह्निमतामभानेनासन्निकृष्टाया अपूर्वव्यक्तेरनुमानानुपपत्तिस्त-द्व्यक्तित्यासेरग्रहादित्यत आह— सामान्यं चेति ।

(दी०) सामान्यं च सखण्डाखण्डभेदेन द्वेधा । सखण्डे चाखण्डमेव परम्परया सम्बद्धं प्रत्यासत्तिः । येन सम्बन्धेन चेन्द्रियसम्बद्धे सामान्यं ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिरिति ।

(गा०) सखण्डेति । यावतामाश्रयाणां भानमुपपाद्यं तावदवृत्ति-त्वे सति तावद्वृत्तितावच्छेदकधर्मवत्त्वमेव सखण्डत्वं यथा वह्नि-त्वाद्यवच्छिन्नस्य, तावद्व्यक्तिवृत्तित्वमखण्डत्वं यथा वह्नित्वादेः । 'सखण्डे' सखण्डसामान्याश्रये वह्न्यादिमति । 'अखण्डम्' वह्नित्वा-दिकम् । परम्परासम्बद्धं प्रत्यासत्तिरिति । स्वाश्रयघटितपरम्परा-सम्बन्धेनेन्द्रियसम्बद्धे भासमानं सत्तेन सम्बन्धेनाश्रयज्ञाने हेतु-रित्यर्थः । वह्न्यादिप्रकारेणाश्रयविषयकयावद्वह्न्याद्याश्रयभासकज्ञाने च फलानुरोधात् स्वाश्रयवह्न्यादिमत्त्वसम्बन्धेन वह्न्याद्याश्रये वह्नि-त्वादेरपि नियमतः प्रकारत्वमुपेयत इति भावः ।

यदि च परम्परासम्बन्धेन वह्नित्वादिप्रकारकज्ञानं विनापि व-ह्न्यादिप्रकारेण यावतां वह्न्यादिमतां भानमानुभविकं तदा तादृश-प्रत्यक्ष इन्द्रियसम्बद्धविशेषणतावच्छेदकवह्नित्वादेः परम्परासम्ब-न्धेन हेतुता वाच्या ।

न चैवं तादृशविशेषणतावच्छेदकवह्नित्वादिना वह्न्यादेरेव न कथं साक्षात्सम्बन्धेन हेतुत्वमुपेयत इति वाच्यम्, तथा सत्यती-तानागतवह्न्यादेराश्रयस्य प्रत्यक्षानुपपत्तेः ।

दीधितिकारस्तु परम्परासम्बन्धेन प्रकारीभवतो वह्नित्वादेः प्र-त्यासत्तिताया आवश्यकत्वात्तत एवोपपत्तेः साक्षात्सम्बन्धावच्छि-न्नप्रकारतायामवच्छेदकीभवतो वह्नित्वादेः प्रत्यासत्तित्वकल्पनम-युक्तमित्यालोच्य नैवमङ्गीचकार ।

न च परम्परासम्बन्धेन वह्नित्वादिप्रकारकज्ञानेऽपि वह्न्यादेः प्रकारत्वोपगमसम्भवात् प्रकारतावच्छेदकीभवतो वह्नित्वादेरपि सर्वत्र प्रत्यासत्तितासम्भवेन विनिगमनाविरह इति वाच्यम्, यत्र वह्नित्वादिकमेवोपस्थितं न तु वह्न्यादिस्तत्र परम्परासम्बन्धेन

वह्नित्वादिप्रकारकज्ञाने विशेषणज्ञानविरहेण वह्नित्वाद्यवच्छिन्नस्य प्रकारत्वासम्भवेन प्रकारतावच्छेदकवह्नित्वादिप्रत्यासत्त्या यावद्वह्न्याद्याश्रयभानानिर्वाहात्।

ननु यदि सामान्यं येन केनापि सम्बन्धेन स्वाश्रयमात्रभासकं तदा धूमत्वादिसामान्यलक्षणया धूमादिमात्रभानदशायां जगदेव भासतां जगत एव स्ववृत्तिप्रमेयत्ववत्त्वादिसम्बन्धेन धूमत्वादिमत्त्वादित्यत आह — यन चेति। तत्सम्बन्धावच्छिन्नायां सामान्यहेतुतायां तत्सम्बन्धेनेन्द्रियसम्बद्धांशे प्रकारत्वमवच्छेदकमुपेयमित्यर्थः। एवं च समवायेन तत्प्रकारीभवतो धूमत्वादेः समवायेनैव हेतुतया समवायेन धूमत्वादिप्रकारकज्ञानान्न धूमत्वाद्यसमवायिनः प्रत्यक्षप्रसङ्ग इति भावः।

(टी०) ननु यत्र नानाधिकरणप्रत्यासन्न एकव्यक्तिर्घटादिस्तत्तत्प्रागभावादिर्वाऽनित्यः, प्रत्यासत्तिस्तत्र तदभावदशायां तथा प्रत्यासत्त्या तज्ज्ञानानुदयप्रसङ्ग इति चेन्न। तत्रापि तद्व्यक्तिद्वारा प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वात्। एतदस्वरसेनैव वा द्वितीयं पक्षमाह। अतिरिक्तैव वेति। अतिरिक्ता इन्द्रियसम्बद्धतादृशसामान्यज्ञानात्मिका अतीताद्यनुरोधात् सामान्यज्ञानं प्रत्यासत्तिः।

(गा०) अखण्डमपि यदनित्यं सामान्यं तस्यातीतत्वानागतत्वदशायां स्वाश्रयभासकता न सम्भवतीत्याशङ्कते—नन्विति। एकव्यक्तेर्नानाधिकरणप्रत्यासन्नता यत्र तत्रानुगततद्वृत्तिधर्मस्य प्रत्यासत्तितायाः उक्तत्वाच्छङ्कानास्कन्द इत्यतो नानेति। नित्यस्य नाभावदशा सम्भवतीति तत्सम्भवप्रयोजकविशेषणमाह—अनि य इति। तद्व्यक्तिद्वारेति। तादृशघटतद्घटप्रागभावादिव्यक्तिघटितसम्बन्धेनेत्यर्थः। स च सम्बन्धः स्वाश्रयाश्रयत्वं स्वाश्रयप्रतियोगिकप्रागभावादिमत्त्वं च, ईदृशपरम्पराविशेषव्युत्पादनार्थंवाक्षेपे स्वातन्त्र्येण प्रागभावाद्युपादानं स्वाश्रयप्रतियोगिप्रागभावादिमति स्वाश्रयाश्रयत्वसम्भवेऽपि घटादिमत्त्वेनाश्रयज्ञान एव स्वाश्रयघटादिमत्त्वस्य घटत्वादिसम्बन्धतया

भाननियमो न तु घटप्रागभावादिमत्त्वेनाश्रयज्ञाने तत्र प्रागभावादिघटितस्यैव तत्सम्बन्धतानियमादित्याशयेन प्रागभावादिघटितसम्बन्धेन घटत्वादेः प्रागभावाश्रयभासकत्वाभिधानम् ।

अत्र कल्पे परम्परासम्बन्धेन घटत्वादिना स्वाश्रयभानं विनापि तद्घटादिमत्त्वज्ञानाद्यावत्तदाश्रयप्रत्यक्षस्यानुभविकत्वेन निर्वाह इतीममेव दोषं द्वितीयकल्पानुसरणबीजतया व्याचष्टे। एतदिति । अतिरिक्तपदस्य क्लृप्तपदार्थातिरिक्तपरता न सम्भवतीति सामान्यातिरिक्तज्ञानपरतामाह—अतिरिक्तेति । इन्द्रियेति । तदिन्द्रियसम्बद्धविशेष्यकतदिन्द्रियजन्यसामान्यप्रकारकज्ञानरूपेत्यर्थः । इन्द्रियसम्बन्धाद्यनिवेशेऽपीन्द्रियसम्बन्धादिशून्यकालेऽतिप्रसङ्गवारणवर्त्मनो दर्शनीयतया स्वयं तादृशविशेषणानि परित्यज्य निष्कृष्टमतमाह—अतीतेति । 'सामान्यज्ञानमेव' सामान्यज्ञानत्वावच्छिन्नमेव । प्रत्यासत्तिः । सामान्यविषयकज्ञानत्वमेव प्रत्यासत्तितावच्छेदकमिति यावत् । एवकारेणेन्द्रियसम्बद्धविशेष्यकत्ववदिन्द्रियजन्यत्वसम्बन्धविशेषावगाहित्वानां कारणतावच्छेदकत्वव्यवच्छेदः । इन्द्रियसम्बन्धादिशून्यकालोत्तरमिव सामान्यविषयकज्ञानशून्यकालोत्तरमपि सामान्यप्रकारकज्ञानसामग्र्या अपेक्षयैव सामान्यजप्रत्यक्षवारणसम्भवात् स्वरूपसत एव सामान्यस्य प्रत्यासत्तित्वं किं नोपेयत इत्याकाङ्क्षायामुक्तमतीताद्यनुरोधादिति । आदिपदादनागतपरिग्रहः ।

यद्यपि सामान्यस्येन्द्रियकारणताघटकप्रत्यासत्तित्वे तस्य कार्यकालपूर्वसत्त्वमनपेक्षितं तथापि प्रत्यक्षस्येन्द्रियसन्निकर्षजन्यत्वनियमानुरोधेन सामान्यप्रत्यासत्तेः कारणत्वमावश्यकमित्यभिप्रायेणेदम् ।

न च सामान्यप्रत्यासत्त्यधीनज्ञानस्य यत्किञ्चिद्विषयांशे लौकिकत्वनियमात् तन्निष्ठलौकिकसन्निकर्षजन्यत्वमादायैव तन्नियमोपपत्तेः सामान्यप्रत्यासत्तेर्हेतुत्वमकिञ्चित्करं सर्वांशेऽलौकिकसामान्यजमानसस्यापि किञ्चिद्विषयनिष्ठज्ञानसन्निकर्षजन्यतया तादृशनियमस्याव्याहतत्वादिति वाच्यम्, प्रत्यक्षविषयताया इन्द्रियसन्निकर्षरूपकारणप्रयोज्यत्वनियमानुरोधेन सामान्यप्रत्यासत्तिहेतुताया आवश्यकत्वात्, [स्वजन्यज्ञानविषयतत्तत्सामान्यत्वसम्बन्धे-

नेन्द्रियत्वेन मनस्त्वेन वा कारणत्वमपेक्ष्य स्वविषयतत्सामान्यस्वसम्बन्धेन ज्ञानत्वेन हेतुतायां लाघवाच्च ।

मिश्रास्तु संयोगादेरिव सामान्यलक्षणप्रत्यासत्तेरपीन्द्रियसामान्यस्य मनस एव वा कारणतावच्छेदकसम्बन्धत्वमिति स्वीकुर्वन्ति । तथैव तस्या बहिरिन्द्रियप्रत्यासत्तिता मनोमात्रप्रत्यासत्तिता वेति मतभेदेन चेदं लक्षणव्याख्याने लिखनं तेषामुपपद्यत इत्यवधेयम् ।

यद्यपि सामान्यभेदेन कार्यकारणभावभेद आवश्यक एतन्मतेऽपि, अन्यथा घटत्वादिप्रकारकप्रत्यक्षसामग्रीसहकारेण घटत्वादिसामान्यलक्षणयेव तत्सहकारेण द्रव्यत्वादिप्रकारकप्रत्यक्षसामग्रीं विनैव द्रव्यत्वादिसामान्यलक्षणया यावद्द्रव्यादिप्रत्यक्षजननप्रसङ्गात् । एवं च नित्यघटत्वादिसामान्यस्य स्वरूपसतोऽपि हेतुतासम्भवस्तथापि घटत्वादिहेतुतायामतिगुरुशरीरं घटत्वत्वादिकमेवावच्छेदकं वाच्यं तदपेक्षया निर्विशेषणकघटत्वादिघटिततज्ज्ञानत्वेन तद्धेतुतायां लाघवाच्चापि ज्ञानस्य प्रत्यासत्तितोपेयते ।

न च घटत्वादिज्ञानस्य विषयघटत्वादिकेनैव कारणतावच्छेदकप्रत्यासत्तिर्वाच्या तत्र च घटत्वत्वादेः सम्बन्धतावच्छेदकतया निवेशनमावश्यकम्, स्वविषयत्वस्यातिप्रसक्ततया तन्मात्रस्य तथात्वासम्भवात् । तथा च क्व लाघवमिति वाच्यम्, ज्ञानस्यात्मनिष्ठप्रत्यासत्त्यैव हेतुताया उपेयत्वात्, घटादिविषयकत्वस्य कार्यतावच्छेदकतयैवाविशेषेण सकलघटादिमानस्य घटत्वादिसामान्यलक्षणातो निर्वाहात् ।

यदि च आत्मनिष्ठप्रत्यासत्त्या हेतुतामते द्रव्यत्वादिसामान्यजघटादिप्रत्यक्षे घटत्वादिज्ञानस्य व्यभिचारवारणाय घटत्वादिप्रकारकत्वमप्यधिकं कार्यतावच्छेदकगर्भे प्रवेश्यम् । एवं च घटविषयकत्वादिना तस्य विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवमिति विभाव्यते । तदास्तु घटत्वादिमद्वृत्तिविषयतासम्बन्धेन प्रत्यक्षं प्रति भगवज्ज्ञानसाधारणेन ज्ञानत्वेन हेतुतायामाधेयतासम्बन्धेन निर्विशेषणकघटत्वादिव्यावृत्तविषयतापुरस्कारेण घटत्वादेः प्रत्यासत्तिता तत्र च नोक्तगौरवावकाशः ।

(दी०) अपेक्षणीयं च तदिन्द्रियकरणकतद्धर्मवत्त्वबोधसामग्र्यन्तरम् । अत एवान्धतमसे सौदामनीसम्पातजनितेऽपि द्रव्यप्रत्यक्षे चरमे न चाक्षुषो निखिलद्रव्यसाक्षात्कारसन्तान इति तु नव्याः ।

(गा०) घटेन्द्रियसन्निकर्षादिशून्यकाले घटत्वादिसामान्यजप्रत्यक्षं वारयितुमाह—अपेक्षणीयं चेति । घटत्वादिसामान्यप्रत्यासत्त्या समवायादिना घटत्वाद्याश्रयचाक्षुषे जननीये समवायादिसंसर्गकघटत्वादिप्रकारकचाक्षुषादेः प्रत्यासत्त्यन्तरघटितसामग्रीसहकारिणीत्यर्थः । घटचक्षुःसंयोगाद्यसत्त्वे तत्सत्त्वेऽपि च घटादौ घटत्वादिग्रहप्रतिबन्धकदोषसमवधाने तादृशसहकारिविरहादेव नातिप्रसङ्ग इति भावः । एतन्मते तु घटत्वादिरूपविशेषणस्य स्मरणाद्यात्मकं निर्विकल्पकरूपं सम्बन्धान्तरावगाहिसविकल्पकरूपं वा यज्ज्ञानं ततो जायमानं प्राथमिकं समवायादिना घटत्वादिप्रकारकं किञ्चिद्धटांशे लौकिकचाक्षुषादिकमेव निखिलघटादिविषयकं न तु क्षणविलम्बादिकल्पनेत्यपि सौष्ठवम् । स्पार्शनादिसामग्रीसहकृतघटत्वादिज्ञानेन घटादिविषयकचाक्षुषाद्यजननात्तदिन्द्रियकरणकेति बोधविशेषणम् । चाक्षुषत्वादिप्रयोजिकालौकिकत्वप्रयोजकचक्षुःसंयोगादिमात्ररूपा सामग्र्येव न तु तत्र सामान्यप्रत्यासत्त्यन्तर्भावः सामान्यप्रत्यासत्तिघटितचक्षुःसंयोगादिसमुदायश्च निखिलघटादिभानप्रयोजक इत्यवधेयम् ।

घटत्वादिप्रकारकस्य कालिकसम्बन्धेन घटत्वादिप्रकारकस्य च लौकिकस्य चाक्षुषादेर्या घटादिसन्निकर्षघटितसामग्री तत्सहकारेण घटत्वादिज्ञानस्य घटादिचाक्षुषजनकतावारणाय तत्सम्बन्धेन तत्प्रकारकत्वं बोधविशेषणं चक्षुःसंयोगादिरूपसामग्र्याश्च लौकिकप्रत्यक्षे हेतुतायाः क्लृप्तत्वात् । सामान्यप्रत्यासत्तिजन्यचाक्षुषादेश्च तत्तत्स्थलीयकार्यतावच्छेदकाक्रान्ततया न तत्र तस्याः स्वातन्त्र्येण हेतुता तदकल्पनेऽपि सहकारित्वोपपत्तेः ।

केचित्तु सामान्यसामग्र्या यावद्विशेषसामग्र्यन्यतमानपेक्षणे तदभावदशायां सामान्यसत्ताया यावद्विशेषाभावविरोधित्वानु-

रोधाद् यत्किञ्चिद्विशेषधर्माक्रान्तस्यैव सामान्यकार्यस्य स्वीकरणीयतया तत्र विशेषसामग्र्या व्यभिचारः, विशेषसामग्र्या सामान्यसामग्र्यनपेक्षणे च तदसत्त्वे विशेषस्य सामान्याभावेन विरोधो व्याहन्येत इति सामान्यात्मकस्यैव विशेषकार्यस्य स्वीकरणीयतया सामान्यसामग्र्या व्यभिचार इति सामान्यविशेषसामग्र्योः परस्परापेक्षया फलोपधानम्, सामान्यलक्षणया लौकिकसामग्र्यनपेक्षणेऽपि च लौकिकत्वशून्ये तदनपेक्ष्य सामान्यप्रत्यासत्तिजन्यकार्ये लौकिकत्वप्रयोजकसामग्र्या न व्यभिचारप्रसक्तिरिति कथं तया साऽपेक्ष्यतामित्यनुयोगसमाधानाय तत्सम्बन्धावच्छिन्नसामान्यप्रकारतानिरूपितलौकिकविषयताशालित्वे सति तत्सम्बन्धेन सामान्याश्रयप्रत्यक्षत्वं सामान्यप्रत्यासत्तिजन्यतावच्छेदकं मानसस्थले च कार्यकारणभावान्तरमित्याहुः ।

अथ चक्षुःसंयोगादेर्घटचक्षुःसंयोगत्वादिना न घटत्वसामान्यलक्षणासहकारितासम्भवः । तेन रूपेण तस्य लौकिकप्रत्यक्षं प्रत्यहेतुत्वात् । सामान्यतो द्रव्यचाक्षुषत्वावच्छिन्नं प्रति विषयनिष्ठप्रत्यासत्त्या चक्षुःसंयोगत्वादिनैव हेतुत्वात्तेन रूपेण सहकारित्वोपगमे च घटादौ घटत्वादिग्रहप्रतिबन्धकदोषासत्त्वेऽपि घटादिचक्षुःसंयोगसहकारेणेव पटादौ घटत्वादिभ्रमजनकदोषासत्त्वे पटादिचक्षुःसंयोगसहकारेणापि घटत्वादिसामान्यप्रत्यासत्त्या चाक्षुषजननप्रसङ्ग इति चेन्न । प्रत्यक्षं प्रति विषयस्य तत्तद्व्यक्तित्वेनापि हेतुत्वात् एकाधिकरणप्रत्यासन्नतत्तद्घटत्वचक्षुःसंयोगत्वदोषविशेषाभावत्वाद्यवच्छिन्नसमुदायादिरूपायास्तत्तद्घटत्वचक्षुःसंयोगत्वदोषविशेषाभावत्वाद्यवच्छिन्नसमुदायादिरूपायाश्च सामग्र्या घटत्वसामान्यलक्षणप्रत्यासत्तिसहकारिता कल्प्यते, उक्तस्थले च तादृशी कापि न सामग्री घटचक्षुःसंयोगस्य घटरूपविषयाप्रत्यासन्नत्वात् दोषासमवहितत्वाच्च । तादृशरीत्यैव घटत्वादिप्रकारकलौकिकचाक्षुषत्वाद्यवच्छिन्नोत्पत्तिनियमोऽपि निर्वाहणीय इति कृतमधिकेन ।

तदिन्द्रियकरणकतद्धर्मप्रकारकज्ञानसामग्र्या अनपेक्षणे इन्द्रियसम्बन्धादिनिवेशोऽप्यतिप्रसङ्ग इति दर्शयति । अत एवेति' अन्यतमस इत्यनेन इष्टापत्तिशङ्कानिरासाय चक्षुःसन्निकर्षसत्त्वेऽपि द्रव्यत्वादिप्रकारकलौकिकचाक्षुषसामग्रीविरहो दर्शितः । सौदाम-

नीत्यादिना प्राचीनमतसिद्धचाक्षुषज्ञानरूपकारणं सम्पादितम्। सौदामनीति। चक्षुःसंयोगविगमपूर्वावगतालोकसंयोगमात्रोपलक्षकम्। 'चरमम्' तादृशचाक्षुषजनकसौदामन्यालोकविगमोत्तरम्। तादृशालोकविगमश्चान्यतमसनिर्वाहकतयाऽभिहितः। नदानीमपि तमःप्रत्यक्षप्रयोजकचक्षुर्मनोयोगादिविगमे मानसद्रव्यसाक्षात्कारस्येष्टत्वात् चाक्षुष इति। तत्तमोविशेष्यकतत्तद्देशावस्थितकिञ्चिद्द्रव्योपनीतभानस्य तमश्चाक्षुषदशायामिष्टत्वान्निखिलेति। सौदामनीसम्पातजचाक्षुषसन्निहितद्रव्यैकसाक्षात्कारस्वीकारेऽनुभवविरोधविरहात् सन्तान इति। चाक्षुषधारापत्तिश्च चक्षुःसंयुक्तनिष्ठलौकिकसाधारणविषयतामात्रनिवेशाभिप्रायेण बोध्या। लौकिकत्वनियामकविलक्षणविषयतानिवेशे तु आलोकविगमोत्तरस्वीकृतप्रत्यक्षे तादृशविषयत्वासम्भवान्न धारापन्नसाक्षात्कारापत्त्यवकाश इति ध्येयम्।

(दी०) इयं च धर्मविषयकं ज्ञानं धर्मिणां प्रत्यासत्तिरितरा तु यद्विषयकं ज्ञानं तस्य। अत एव सुरभि चन्दनमित्यादौ सौरभत्वादेरपि भानमिति।

(गा०) ननु सामान्यलक्षणाया अपि ज्ञानत्वेन प्रत्यासत्तित्वे ज्ञानलक्षणप्रत्यासत्तितोऽस्याः को भेदः? प्रत्यासत्तेः प्रत्यासत्तितावच्छेदकरूपस्य चाभेदादित्यत आह—इयं चेति। 'इयम्' सामान्यलक्षणा। 'धर्मविषयकम्' घटत्वादिविषयकम्। 'धर्मिणाम्' घटादीनाम्। 'प्रत्यासत्तिः' भानप्रयोजकसम्बन्धः। 'इतरा' ज्ञानलक्षणा। तस्य प्रत्यासत्तिरित्यनुषङ्गेणान्वयः। एवं च घटादिज्ञानस्य घटादिप्रत्यक्षत्वावच्छिन्नं प्रति सामान्यप्रत्यासत्तिविधया कारणत्वस्य घटत्वादिप्रत्यक्षत्वावच्छिन्नं प्रति ज्ञानप्रत्यासत्तिविधया यत्कारणत्वं ततः कार्यतावच्छेदकभेदेन भिन्नत्वात्तत्प्रत्यासत्तिभेदव्यवहार इति भावः।

ननु ज्ञानलक्षणायाः प्रत्यासत्तित्वे किं मानम्? सुरभि चन्दनमित्यादिचाक्षुषे सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्रीविरहेण सौरभत्वसामान्यलक्षणया सौरभभानानिर्वाहेऽपि सौरभत्वसामान्य-

लक्षणात एव सौरभमानसम्भवात्, तत्कार्यतावच्छेदकशरीरे सौरभरूपसामान्यप्रकारतानिवेशात् सौरभप्रकारकलौकिकप्रत्यक्षसामग्र्याः सौरभसामान्यलक्षणासहकारिण्याश्च तत्र सत्त्वात्।

अथ सामान्यज्ञानस्येश्वरज्ञानसाधारणभानत्वेन स्वविषयतत्तत्सामान्यघत्वसम्बन्धेन हेतुत्वे तत्तत्सामान्यप्रकारकत्वं न तज्जन्यतावच्छेदकघटकमन्यप्रकारकतत्तत्सामान्याश्रयप्रत्यक्षे व्यभिचारानवकाशात्, तत्तत्सामान्यानाश्रयविषयकप्रत्यक्षे व्यभिचारस्य च तत्तत्सामान्याश्रयविषयकत्वस्य निवेशेनैव वारणात्। तदनिवेशतत्तत्सामान्यप्रकारकत्वनिवेशेऽपि तत्तत्सामान्यप्रकारकभ्रमे व्यभिचारस्य दुर्वारतया तन्निवेशस्यावश्यकत्वात्। तथा च सौरभादि सामान्यलक्षणया न दर्शितस्थले सौरभादिभाननिर्वाह इति चेत्? अस्तु, तर्हि सुरभि चन्दनमित्यादिप्रत्यक्षं मानसमेव न तु चाक्षुषादिरूप तत्र च सौरभत्वादिसामान्यलक्षणयापि सौरभादिज्ञान निर्वहति मानसस्थले सामान्यप्रकारकलौकिकप्रत्यक्षसामग्रीविरहेऽपि सामान्यलक्षणातः सामान्याश्रयभानात्। न हि सुरभित्वेन चन्दनं पश्यामीत्यनुव्यवसायः प्रामाणिको यद्बलादुक्ताकारं चाक्षुषादिकं तत्र च सौरभादिभानार्थं ज्ञानलक्षणप्रत्यासत्तिश्च सिद्ध्येत्, चन्दनचक्षुःसंयोगदशायामपि चक्षुर्मनोयोगादिविगमं कल्पयित्वा मानसज्ञानकल्पनं सम्भवति।

वस्तुतः सौरभत्वसामान्यलक्षणात एव सुरभि चन्दनमित्यादौ चाक्षुषादिप्रत्यक्षेऽपि सौरभादिभानं निर्वहति सौरभत्वादिप्रकारकलौकिकप्रत्यक्षसौरभत्वाद्यवच्छिन्नसौरभादिप्रकारकताशालिप्रत्यक्षान्यतरसामग्रीसहकारेणैव सौरभत्वादिसामान्यलक्षणायाः सौरभादिप्रत्यक्षोत्पादकत्वस्योपगन्तव्यत्वादतः प्रकृते द्वितीयसामग्र्या एव सहकारिण्याः सत्त्वात्।

न चैवं सौरभत्वादिप्रकारकलौकिकविषयताशालिप्रत्यक्ष द्वयोःकस्थलेऽपि यावत्सौरभादिभानापत्तिः, यावत्स्वेव सौरभादिषु विषयतानियामिकायाः सामान्यज्ञानरूपप्रत्यासत्तेः सत्त्वात्। न चेष्टापत्तिः, सुरभि चन्दनं सौरभमित्याकारकज्ञानसौरभमुख्यविशेष्यकज्ञानस्य तदा अनुभवविरुद्धत्वात्। अन्यथान्धतमसे सौदामनीसम्पातजचाक्षुषानन्तरमन्धकारविशेषणतया यत्किञ्चिद्द्रव्योपनीतमानेऽपि यावद्द्रव्यामानस्वीकारसम्भवेन निखिलद्रव्य-

साक्षात्कारापत्त्यसङ्गतेरिति वाच्यम्। अज्ञातसौरभेषु प्रकारतासम्बन्धेन ज्ञानोत्पत्तिनियामकस्य विषयतासम्बन्धेन हेतुभूतविशेषणज्ञानस्य तेन सम्बन्धेनाभावात् सहकारिविरहेण सामान्यज्ञानस्य तेषु विषयत्वानापादकत्वात्। लौकिकसामग्र्यास्तदानीं किञ्चिद्विषय एव सत्त्वापेक्षोपगमाल्लौकिकसन्निकर्षोचनाश्रयेऽप्यज्ञाते लौकिकसामग्रीदशायां सामान्यजप्रत्यक्षविषयतोपपद्यते। विशेषणज्ञानरूपसहकारिणश्च सामान्यलक्षणाप्रयोज्यविषयताश्रयेषु यावत्सु विषयतया सत्त्वं कार्योत्पत्तौ प्रयोजकमभ्युपेयते फलानुरोधात्।

न च विशेषणज्ञानस्य विषयभासकत्वोपगमे ज्ञानलक्षणप्रत्यासत्तौ को विवादः सिद्धान्तिनापि विशेषणज्ञानविधया हेतुभूतज्ञानस्यैव ज्ञानप्रत्यासत्तित्वोपगमादिति वाच्यम्, प्रत्यक्षासाधारणहेतोस्तद्विषयताप्रयोजकस्यैव प्रत्यासत्तितया विशिष्टानुभवसामान्यनिरूपिताया विशेषणज्ञानहेतुतायाः प्रत्यासत्तित्वानिर्वाहकत्वेनोपनीतमानमात्रे ज्ञानप्रत्यासत्तेर्हेतुतायाः सिद्धान्तिभिरङ्गीकरणीयतया सामान्यलक्षणात एव उक्तरीत्योपपत्तौ तादृशहेतुतायां प्रमाणस्य दुर्लभत्वात् प्रत्यासत्त्यन्तरासिद्धेः।

ननु माभूत् सुरभि चन्दनमित्यत्र सौरभभानानुरोधेन प्रत्यासत्त्यन्तरसिद्धिस्तथापि मुख्यविशेष्यतया मानसे सौरभादिभानानुरोधेन ज्ञानप्रत्यासत्तेः पृथक् कारणत्वमप्यावश्यकम्।

न च सौरभत्वादिसामान्यलक्षणात एव तद्भाननिर्वाहान्न तदावश्यकमिति वाच्यम्, सौरभत्वादिसामान्यलक्षणया सौरभादिमानसज्ञाने जननीये प्रत्यासत्त्यन्तरघटितविशेष्यभासकसामग्रीसहकारिताया अवश्यमुपगन्तव्यत्वात्। अन्यथा किञ्चिद्रूपेण सौरभत्वादिविशेष्यकज्ञानाद्यद्विशेष्यभासकतज्ज्ञानाद्यसत्त्वेऽपि केवलसामान्यलक्षणया सौरभत्वादिविशिष्टगोचरमानसापत्तेः। सौरभादिरूपविशेष्यभासकप्रत्यासत्त्यन्तरं च तत्र ज्ञानभिन्नमसम्भावितमेव। तस्य च तत्र विशेषणज्ञानतया न हेतुत्वमिति चेन्न। प्रत्यासत्त्यन्तरेण यस्य मानं तद्भासकत्वेऽपि ज्ञानस्य न प्रत्यासत्तिव्यवहारनिर्वाहः। तथा सति लौकिकप्रत्यक्षे हेतुभूतालोकसंयोगादावपि तद्व्यवहारप्रसङ्गात्। इन्द्रियाप्रतियोगिकतया न तेषामिन्द्रियप्रत्यासत्तित्वमिति यदि तदा ज्ञानस्यापि न तथात्वं स्यात्। तथा

च दर्शितस्थले सौरभादिभाने सामान्यलक्षणायाः प्रयोजकत्व-सम्भवे तत्सहकारिसौरभादिज्ञानस्य प्रत्यासत्तिव्यवहारभाजनत्वमनुपपन्नमेवेत्यत आह। अत एवेति। 'अत एव' ज्ञानप्रत्यासत्तित एव। सौरभत्वादेरपीति। स्वरूपेणैव भासमानस्येत्यादिः। तथा च तद्भासकप्रत्यासत्त्यन्तराभावाज्ज्ञानप्रत्यासत्तित एव तद्भानमिति समुदायार्थः। न हि सौरभत्वादौ तल्लौकिकप्रत्यक्षयोग्ये चक्षुरादेर्लौकिकप्रत्यासत्तिसम्भवः। न वा सामान्यप्रत्यासत्तेस्तद्भासकता सम्भवति। अन्यदीयजातित्वादिसामान्यज्ञानस्य स्वविषयसामान्याश्रयत्वसम्बन्धेन तत्र सत्त्वेऽपि तादृशसामान्य-

साक्षात्कारापत्त्यसङ्गतेरिति वाच्यम्। अज्ञातसौरभेषु प्रकारतासम्बन्धेन ज्ञानोत्पत्तिनियामकस्य विषयतासम्बन्धेन हेतुभूतविशेषणज्ञानस्य तेन सम्बन्धेनाभावात् सहकारिविरहेण सामान्यज्ञानस्य तेषु विषयत्वानापादकत्वात्। लौकिकसामग्र्यास्तदानीं किञ्चिद्विषय एव सत्त्वापेक्षोपगमाल्लौकिकसन्निकर्षाघनाश्रयेऽप्यज्ञाते लौकिकसामग्रीदशायां सामान्यजप्रत्यक्षविषयतोपपद्यते। विशेषणज्ञानरूपसहकारिणश्च सामान्यलक्षणाप्रयोज्यविषयताश्रयेषु यावत्सु विषयतया [illegible]।

न च विशेषणज्ञानस्य विषयभासकत्वोपगमे ज्ञानलक्षणप्रत्यासत्तौ को विवादः सिद्धान्तिनापि विशेषणज्ञानविधया हेतुभूतज्ञानस्यैव ज्ञानप्रत्यासत्तित्वोपगमादिति वाच्यम्, प्रत्यक्षासाधारणहेतोस्तद्विषयताप्रयोजकस्यैव प्रत्यासत्तितया विशिष्टानुभवसामान्यनिरूपिताया विशेषणज्ञानहेतुतायाः प्रत्यासत्तित्वानिर्वाहकत्वेनोपनीतमानमात्रे ज्ञानप्रत्यासत्तेर्हेतुतायाः सिद्धान्तिभिरङ्गीकरणीयतया सामान्यलक्षणात एव उक्तरीत्योपपत्तौ तादृशहेतुतायां प्रमाणस्य दुर्लभत्वात् प्रत्यासत्त्यन्तरासिद्धेः।

ननु माभूत् सुरभि चन्दनमित्यत्र सौरभभानानुरोधेन प्रत्यासत्त्यन्तरसिद्धिस्तथापि मुख्यविशेष्यतया मानसे सौरभादिभानानुरोधेन ज्ञानप्रत्यासत्तेः पृथक् कारणत्वमप्यावश्यकम्।

न च सौरभत्वादिसामान्यलक्षणात एव तद्भाननिर्वाहात् न तदावश्यकमिति वाच्यम्, सौरभत्वादिसामान्यलक्षणया सौरभादिमानसज्ञाने जननीये प्रत्यासत्त्यन्तरघटितविशेष्यभासकसाम-

लक्षणप्रत्यासत्तिघटितसामग्रीसत्त्वेन सौरभविषयकत्वोपगमात् ।

न च चाक्षुषज्ञाने सौरभभानासम्भवः, स्वयोग्यमुख्यविशेष्यकज्ञानस्य बहिरिन्द्रियेणाजननादिति वाच्यम्, उपनीतं विशेषणतयैव भासत इति नियमानुरोधेन ज्ञानप्रत्यासत्त्यैव बहिरिन्द्रियस्य तादृशज्ञानाजनकत्वात्, सामान्यप्रत्यासत्त्या तु तस्य तज्जनकत्वोपगमात् । अत एव वेदार्थस्य प्रमेयत्वादिसामान्यलक्षणया प्रत्यासन्नबहिरिन्द्रियरूपासाधारणकरणजन्यप्रमितिविषयतया वेदलक्षणासम्भवो विशेषणान्तरप्रवेशेन मिश्रैर्वारितः ।

यत्तु रजतत्वादिप्रकारकप्रमुष्टतत्ताकशुक्त्यादिस्मरणजन्यतादृशतन्मानसोपनीतभाने शुक्त्यादिभानार्थं ज्ञानप्रत्यासत्तेरावश्यकता तत्र शुक्तिवृत्तिधर्माज्ञानेन सामान्यलक्षणातस्तद्भानानिर्वाहादिति, तन्न । तत्र तादृशस्मरणमूलीभूतभ्रमात्मकप्रत्यक्षे सामान्यलक्षणया रजतस्यापि भानात्तस्यापि स्मरणसम्भवेन स्मरणाजन्यमानसेऽपि तस्यैव भानोपगमेन शुक्तिभानस्याप्रामाणिकत्वाच्छुक्तिवृत्तिधर्मस्मरणस्थल एव शुक्तिभानोपगमादिति ।

अथोक्तसामान्यप्रत्यासत्तिहेतुत्वे किं प्रमाणम् ? सामान्यधर्मज्ञानस्यान्तत ईश्वरीयस्यैवोक्तप्रत्यासत्त्या सर्वदा सर्वत्र सत्त्वेनान्वयव्यतिरेकविरहात् ।

न च स्वविषयघटत्वादिमत्त्वसम्बन्धेन पटादौ ज्ञानविरहात् तत्र घटवृत्तिविषयतासम्बन्धेन प्रत्यक्षव्यतिरेक इति तत्कारणत्वमावश्यकम्, अन्यथा तत्र तादृशव्यतिरेकप्रयोजकस्य दुर्वचत्वादिति वाच्यम्, घटवृत्तिविषयतात्वादिना विषयतायाः प्रतियोगितावच्छेदकसम्बन्धताया अप्रामाणिकत्वात्, तादृशसम्बन्धावच्छिन्नव्यतिरेकस्यैवाप्रसिद्धेः ।

न चैवमसन्निकृष्टघटादौ घटत्वादिप्रकारकप्रत्यक्षादिविषयतायाः किञ्चित्कारणजन्यतानवच्छेदकत्वात्तस्या न सामग्रीप्रयोज्यतानिर्वाह इति वाच्यम्, घटादिविषयकप्रत्यक्षेच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्यभावस्यैव तादृशघटादिविषयकत्वघटितधर्मावच्छिन्नहेतुतया घटत्वादिप्रकारकलौकिकप्रत्यक्षसामग्रीसहकृततादृशस्यैव तादृशघटादिविषयताप्रयोजकत्वसम्भवात् । मैवम् ।

घटादिलौकिकप्रत्यक्षेच्छावलाच्चलौकिकसन्निकर्षं विनोपनीत-

प्रत्यक्षवारणायोपनीतमानस्थलीयप्रतिबन्धकतायां लौकिकत्वाप्रकारकेच्छाया एवोत्तेजकताया उपगन्तव्यत्वात् तल्लौकिकप्रत्यक्षेच्छाविरहविशिष्टसामग्रीविशेषाभावस्य तल्लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति हेतुत्वान्तरमावश्यकम् । उपनीतभानेच्छाधीनोपनीतभाने व्यभिचारवारणाय च तत्र लौकिकत्वनिवेशनम् । एवं च सामान्यजप्रत्यक्षस्य किञ्चिद्देशे लौकिकत्वनियमात्तस्यापि सामग्रीविशेषदशायामापत्तेरुक्तकारणतयैव वारणात् । सामान्यप्रत्यासत्तिप्रयोज्यविषयतासाधारणघटादिविषयतासामान्यं जन्यतावच्छेदककोटौ निवेश्य सामान्यभावहेतुताकल्पनस्य निष्प्रामाणिकतया सामान्यप्रत्यासत्तेरेवातीतादिभानप्रयोजकत्वात् ।

न च तथापि मनोयोगस्यैव घटादिप्रत्यक्षत्वं जन्यतावच्छेदकमास्तां, स एव घटत्वादिप्रकारकलौकिकप्रत्यक्षसामग्रीसहकृतो यावद्घटादिभानप्रयोजको भवत्विति वाच्यम्, हेतुत्वान्तरकल्पनस्यावश्यकत्वेऽप्यन्ततो विनिगमनाविरहेणापि सामान्यहेतुताया निष्प्रत्यूहत्वात् । वस्तुतो घटादिवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति स्वविषयघटत्वादिमत्त्वसम्बन्धेन ज्ञानहेतुत्वमावश्यकमन्यथा दोषसत्त्वेऽपि घटादौ चक्षुःसंयोगादिघटितयादृशसामग्रीबलाद्घटत्वादिप्रकारकज्ञानं घटादिवृत्तिविषयतासम्बन्धेनोत्पद्यते तद्बलात् तादृशसम्बन्धेन पटादौ तदापत्तेर्दुर्वारत्वापातात् तद्घटादिवृत्तिविषयतासम्बन्धेन प्रत्यक्षहेतुभूततद्घटादिरूपविषयभेदकूटस्य तादृशसम्बन्धेन ज्ञानानुत्पादप्रयोजकत्वे गौरवात् । स्वविषयघटत्वादिमत्त्वसम्बन्धावच्छिन्नप्रतियोगिताकस्यैकैकस्य ज्ञानाभावस्य तथात्वे लाघवात् । अन्यथा तत्तत्कार्यव्यक्त्युत्पादप्रयोजकविशेषसामग्र्यैव सर्वत्रातिप्रसङ्गवारणसम्भवे सामान्यकारणविलोपप्रसङ्गात् ।

न चैवमुक्तापत्तिवारणाय घटादिप्रत्यक्षे घटत्वादिनैव तादात्म्यप्रत्यासत्त्या हेतुत्वमास्तामिति वाच्यम्, तथा सति घटत्वादिप्रकारकप्रत्यक्षेऽतीतानागतघटादिविषयभासककारणान्तरकल्पनाया गौरवादित्यलमतिनिबन्धेन ।

(चि०) तथा हि धूमत्वावच्छिन्ना व्याप्तिः सन्निकृष्टधूमविषये धूमत्वेन प्रत्यक्षेण ज्ञायते ततः स्मृता

सा तृतीयलिङ्गपरामर्शे पक्षनिष्ठधूमवृत्तितया ज्ञायते, ततोऽनुमितिः । तदनभ्युपगमेऽपि सन्निकृष्टधूमविषये धूमत्वेन धूमो वह्निव्याप्य इत्यनुभवस्तथैव व्याप्तिस्मरणं ततो धूमवानयमिति व्याप्तिस्मृतिप्रकारेण धूमत्वेन पक्षवृत्तिधूमज्ञानादनुमितिः, व्याप्त्यनुभवतत्स्मरणपक्षधर्मताज्ञानानामेकप्रकारकत्वेनानुमितिहेतुत्वात् ।

(दी०) ततः स्मृता सेति । धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणवृत्तिधूमत्वम्, वह्निमदन्यावृत्तित्वम्, वह्निसम्बन्धितावच्छेदकरूपवत्त्वं वा व्याप्तिः । एकैव च सा सर्वधूमसाधारणीति भावः । व्याप्तिनानात्वे तु पर्वतीयवह्नेरसन्निकर्षे तत्सामानाधिकरण्यग्रहायोगः, अन्यदीयवह्निसामानाधिकरण्यस्य तत्र भानाङ्गीकारे भ्रमत्वापत्तिरिति द्रष्टव्यम् ।

(गा०) व्याप्तेः सामानाधिकरण्यरूपत्वे हेतुभेदेन भेदात् सामान्यप्रत्यासत्त्यनुपगमे विशिष्टपरामर्शानिर्वाहस्य दर्शयिष्यमाणत्वात् सर्वसाधारणीं व्याप्तिं दर्शयति । धूमेति । धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वत्वेन व्याप्तिप्रकारकज्ञानहेतुत्वे गुरुशरीरधूमत्वत्वविषयतायाः कारणतावच्छेदकघटकतया गौरवमिति तादृशवह्निसामानाधिकरण्यत्वेन सामानाधिकरण्यप्रकारकविशेषणान्तरविशेषितधूमत्वावच्छिन्नविषयकज्ञानहेतुत्वं लाघवात् सेत्स्यति तथा च, सामान्यलक्षणायाः प्रत्यासत्तित्वं निरपवादमतो लघुशरीरमसर्वसाधारणव्याप्त्यन्तरमाह । वह्निमदिति । मीमांसकैः केवलान्वय्यनुमानानभ्युपगमादीदृशव्याप्तेः केवलान्वयिन्यव्याप्तिस्तेषां न दोषायेति भावः ।

यद्यपि गुरुमते अभावस्याधिकरणरूपतया वह्निमदन्यवृत्तित्वाभावस्यैकस्य न सर्वधूमसाधारण्यं तथापि नायं ग्रन्थो गुरुमतनिर्वाहपरः, उपनीतमानमनभ्युपगम्य गुरुणा विशिष्टपरामर्शहेतुताया

एवानभ्युपगमात् । अत एव तन्मते अनुपपत्त्यनवकाशं भिन्नधर्मिकव्याप्तिपक्षधर्मताज्ञानहेतुतां प्रदर्शयन्नग्रे व्यक्तीकरिष्यति, किन्त्वयं ग्रन्थो मिश्रादिमताभिप्रायक इति नासङ्गतिः ।

केवलान्वयिसाध्यकसाधारणीमप्यभिन्नां व्याप्तिमाह । वह्निसम्बन्धितेति । दण्डादेः सखण्डधर्मस्य यत्र हेतुतावच्छेदकता तत्रापि साध्यसामानाधिकरण्यस्य परम्परासम्बन्धेनावच्छेदकस्तेन सम्बन्धेन हेतुवृत्तिश्च दण्डत्वाद्यखण्डधर्म एव व्याप्तिरिति पूर्वगृहीतसाध्यसमानाधिकरणावृत्तिपक्षवृत्तिदण्डादावपूर्वसाध्यसामानाधिकरण्यावच्छेदकत्वग्रहानुरोधेन सामान्यप्रत्यासत्तेर्नावश्यकतेति भावः । व्याप्त्यैक्याभिप्रायवर्णनप्रयोजनं दर्शयितुं तन्नानात्वमाक्षिपति । व्याप्तीति । तत्सामानाधिकरण्यग्रहायोग इति । तद्वह्निव्यक्त्युपरागेण पर्वतीयधूमे तत्सामानाधिकरण्यप्रत्यक्षसम्भवः, तद्वह्नेः पूर्वमगृहीतत्वेन उपनीततज्ज्ञानस्याप्ययोगादित्यर्थः।

ननु मा भूत्तत्र पर्वतीयवह्निसामानाधिकरण्यभानं पूर्वगृहीतमहानसीयवह्निसामानाधिकरण्यविषयक एव विशिष्टपरामर्शः सम्भविष्यतीत्यत आह—अन्यदीयेति । 'तत्र' पर्वतीयधूमे । भ्रमत्वापत्तिरिति । तथा चाभ्रान्तस्यानुमितिविलोपप्रसङ्ग इति भावः । नत्वन्यथाख्यातिस्वीकारापत्तिरित्यर्थः । तद्ग्रन्थस्योपनीतमानाङ्गीकर्तृमिश्रादिमताभिप्रायकत्वादन्यथाख्यातेश्चोपनीतभानानङ्गीकर्तृगुरोरेवासंमतत्वात् ।

(चि०) गवादिपदेष्वपि शक्त्यनुभवतत्स्मरणवाक्यार्थानुभवानामेकप्रकारकत्वेन हेतुहेतुमद्भाव इत्यपूर्वे वक्ष्यते । तत्र योग्यतादिबलादपूर्वव्यक्तिलाभोऽनुमाने तु पक्षधर्मताबलाद् धूमो वह्निव्याप्य इत्यनुभवे न तु सर्वो धूमो वह्निव्याप्य इति येन सर्वभानात्तत्स्वीकारः ।

(गा०) ननु सामान्यप्रत्यासत्त्यनभ्युपगमेऽपूर्वगवादेर्गवादिपदाच्छाब्दबोधानुपपत्तिः, शक्तिधियः पदार्थस्मृतेश्च तद्विषयकत्वानुप

पत्तेः । अन्यविषयकशक्तिग्रहपदार्थस्मरणयोरन्यविषयकशाब्दबोध जनकत्वे सत्यतिप्रसङ्गादित्यत आह मूले—गवादिपदेष्वपीति । तत्स्मरणेति । तत्पदं पदार्थपरम्, न तु प्रकान्तशक्तिपरम्। पदार्थ स्मृतेः समानविषयकत्वेन हेतुताया अप्रतिक्षेपेण न्यूनताप्रसङ्गात्।

न च शक्तिस्मृतेस्तदप्रतिक्षेपेणापि न्यूनत्वं समानमिति वाच्यम्, शक्तिस्मृतिं विनापि गृहीतशक्तिकपदज्ञानरूपोद्बोधकाधीनपदार्थस्मृतितः शाब्दबोधोत्पत्त्या शक्तिस्मृतेः शाब्दबोधानुपयोगित्वात्।

न च वृत्तिज्ञानजन्यपदार्थोपस्थितेः शाब्दबोधहेतुतया प्राचीनशक्त्यनुभवस्य च पदार्थस्मृत्यहेतुतया शक्तिस्मृतिजन्यैव पदार्थोपस्थितिस्तद्धेतुर्वाच्या तथा च शक्तिस्मृतेरप्युपयोगित्वं दुर्वारमिति वाच्यम्, स्वविषयगृहीतवृत्तिकपदज्ञानजन्यपदार्थोपस्थितेरेव शाब्दबोधहेतुत्वोपगमात्। विस्मृतशक्तिकपदज्ञानेन च पदार्थस्मृतेरेवाजननेनानतिप्रसङ्गात्।

यदि च गृहीतविस्मृतवृत्तिकादगृहीतसम्बन्धान्तरात् पदात् पदार्थोपस्थितिदशायामतिप्रसङ्ग इत्युच्यते तदा वृत्तिग्रहाधीनत्वमुपस्थितौ विशेषणं देयम्। अन्तरा शक्त्यस्मृतावपि प्राचीनशक्त्यनुभवाधीनतया पदार्थोपस्थितेः शाब्दजनकत्वमव्याहतमेव। अत एवापूर्ववादे पदार्थस्मृतिरेव स्फुटमभिहिता दीधितिकृतापि शक्त्यनुभवशक्त्यस्मरण इत्यत्र पदार्थमेव शक्यपदेनोपादाय विवृतं शाब्दबोधे शक्तिस्मरणापेक्षायामपि शक्त्यनुभवस्य तद्द्वाराऽपेक्षितस्य समानविषयकत्वापेक्षाप्रतिक्षेपेणैवार्थतस्तस्य समानविषयतापेक्षाप्रतिक्षेपसिद्धेर्न्यूनतानवकाशाच्च।

पदार्थस्मरणे शक्त्यनुभवस्य समानविषयताया मीमांसकमते अनपेक्षितत्वेऽपि तत्प्रतिक्षेपः प्रकृतेऽनुपयुक्तः, तत्र तदपेक्षायामपि समानप्रकारकान्यविषयकस्मरणादपूर्वगवादिबोधोपपत्तेः। शक्त्यनुभवतत्स्मरणयोर्हेतुहेतुमद्भावोऽपि न मूलतः प्रतीयते युगपत् पदत्रयस्य द्वन्द्वे समसङ्ख्यत्वाविरहेण यथाक्रमं हेतुत्वहेतुमत्त्वयोरन्वयासम्भवेन प्रत्येकत्रितयपर्वोभयान्वयापत्त्या परम्परहेतुहेतुमद्भावालाभात्। शक्त्यनुभवतत्स्मरणयोर्द्वन्द्वं कृत्वा तद्गर्भद्वन्द्वान्तरेण सम सङ्ख्यत्वोपपादने शक्त्यनुभवतत्स्मरणयोर्हेतुता वाक्यार्थानुभवस्य

हेतुमत्ताया एतन्मात्रलाभात्, अतो वाक्यार्थानुभवं प्रत्युक्तहेतुता-मात्रपरत्वं दीधितिकारो विवृणोति । शक्त्यनुभवेति ।

(दी०) गवादिपदेष्वपीति । शक्त्यनुभवशक्यस्मरणे हेतू हेतुमान् वाक्यार्थबोधः । न चैवं जातिशक्तिवादविरोधः । जातौ व्यक्तौ च शक्तिः परं तु जातिविषयत्वेनैव ज्ञाता शक्तिर्व्यक्तिं स्मारयति । अनुभावयति चेति । तदर्थादिति वक्ष्यमाणत्वात् । अतद्गुणसंविज्ञानबहुव्रीहिणा पश्वादिलिङ्गादिपदाभिप्रायेण परीत्या वेत्यपि कश्चित् ।

(गा०) अत्र हेतुपदं प्रयोजकत्वार्थकं तच्च कारणतावच्छेदकेऽप्यक्षतमिति शक्त्यनुभवस्य शाब्दधीकारणताविरहेऽपि नाशङ्कितः ।

यद्यपि शाब्दबुद्धौ शक्तिज्ञानादीनां समानविषयकत्वेनोपयोगित्वेऽप्यनुमितौ समानप्रकारकतामात्रेण परामर्शस्य हेतुतया व्यवहाराधीनशक्त्यनुमितावुपस्थितानामनुपस्थितानामपि सकलगवादिव्यक्तीनां भानसम्भवात् तत एवापूर्वव्यक्तीनां पदार्थस्मरणेऽपि भानसम्भवान्न किञ्चिदनुपपन्नम् । तथापि वस्तुगतिमनुरुध्येदम् ।

ननु जातिशक्तिवादिनां परेषां गौर्गोपदशक्तेति शक्त्यंशे शाब्दधीप्रकारप्रकारकज्ञानं न शाब्दधीहेतुः, व्यक्तौ शक्तिविरहेणान्यथाख्यातिस्वीकारापत्तेः । किं तु गोत्वं गोपदशक्यमित्याकारकं शाब्दबोधप्रकारविशेष्यकमेवेति शक्तिज्ञानस्य समानप्रकारकत्वेन न शाब्दधीहेतुताकथनविरोधः ।

न च गोत्वशक्तं गोपदमित्याकारकज्ञानमेव तन्मते शाब्दहेतुतयोपेयं तच्च शक्त्यंश एव शाब्दप्रकारगोत्वादिप्रकारकमिति न विरोध इति वाच्यम्, अपूर्ववादे लिङ्पदशक्तिग्रहस्य प्रकृततया तादृशशक्तिग्रहस्य च कार्यत्वप्रकारेण घटादिरूपकार्यविषयकस्य शक्त्यंशे शाब्दधीप्रकारकत्वविरहेण शक्त्यंशे तत्प्रकारकताया एव समानप्रकारकतेत्यनेन विवक्षितत्वादन्यादृशसमानप्रकारकत्वविवक्षणे इत्यपूर्वे वक्ष्यते इत्यनेन विरोधादिति शङ्कते । न चैवमिति । कुब्जशक्तिमते व्यक्तावपि शक्तिसत्त्वेन न व्यक्ति-

विशेष्यकशक्तिधियोऽन्यथाख्यातित्वमिति समाधत्ते । ज्ञाताविति ।

नन्वेवमपि विरोध एव, तथा हि कुब्जशक्तिमते व्यक्तौ शक्तिर्विद्यत एव शक्यज्ञानविषयत्वात् । किं तु तदंशे शक्तिः स्वरूपसती हेतुर्जातावेव ज्ञातोपयुज्यत इति व्यक्तौ शक्तिसत्त्वेऽपि न तस्या वाच्यता, अपि तु जातेरेवेति मतम्, एतन्मते व्यक्तावपि शक्तिज्ञानापेक्षायां न्यायमते व्यक्तिरपि पदार्थो न तु तन्मत इति विशेषानुपपत्तेरित्याशङ्क्यान्यथा विशेषमुपपादयति । परं त्विति । ज्ञाता व्यक्तिं स्मारयतीत्यत्र ज्ञानस्य विशेषणतया विशेष्यशक्ताविव तत्रापि स्मरणाद्युपयोगित्वान्वयः । तथा च तदन्वयिन्यामुपयोगितायां जातिविषयकत्वेनैवेत्यर्थस्य जातिमात्रविषयकत्वावच्छिन्नत्वस्यान्वयः । एवं च जातिमात्रविषयकत्वं व्यक्तिस्मरणाद्युपयोगितावच्छेदकम्, न तु व्यक्तिविषयकत्वमिति पर्यवसितार्थः । तथा च व्यक्तौ शक्तिज्ञानापेक्षायामपि फलीभूतबोधविषयव्यक्तौ तदनपेक्षया व्यक्त्यंशे शक्तेः कुब्जता यद्विषयकत्वेन शक्तिज्ञानस्य बोधोपयोगिता तदेव वाच्यम्, व्यक्तेश्चातथात्वान्न वाच्यता । समानविषयकत्वतन्त्रतावादिनां च गोत्वादिविशिष्टतद्व्यादिविषयकशाब्दबुद्धौ विशिष्य गोत्वादिविशिष्टतत्तद्व्यादिधर्मिकशक्तिज्ञानत्वेन हेतुत्वाद्विशिष्टस्य वाच्यतेति विशेष इति भावः ।

यद्यपि गौर्गोपदशक्येत्याकारकस्य गोशक्तं गोपदमित्याकारकस्य वा शक्तिज्ञानस्य हेतुत्वे गोत्वावच्छिन्नविषयतात्वेन व्यक्तिविषयकत्वमप्यवच्छेदकमावश्यकं, तथापि व्यक्त्युपरागेण तद्विषयिता नावच्छेदिकेति न तस्याः पदार्थत्वम् ।

यद्यप्येतन्मतापेक्षया गोत्वशक्तिप्रकारकपदज्ञानहेतुतैव युक्ता, व्यक्तिशक्तिज्ञानहेतुतामते व्यक्तिविषयताया व्यक्त्यनुयोगिकजातिसम्बन्धविषयतायाश्च निवेशाधिक्येन गौरवात् । सम्बन्धविषयत्वानिवेशे कालिकादिसम्बन्धेन गोत्वादिप्रकारकशक्तिग्रहादपि समवायेन तत्प्रकारकशाब्दबोधापत्तेर्दुर्वारत्वात् । एवमर्थविशेष्यकस्य पदविशेष्यकस्य च शक्तिज्ञानस्य विनिगमनाविरहेण हेतुतायाः कल्पनीयतयापि गौरवात् । जातिशक्तिप्रकारकज्ञानहेतुत्वे च जातिविशेष्यकपदशक्तिज्ञानहेतुताया न विनिगमनाविरहेण प्रसक्तिः, विपरीतज्ञानाप्रतिबध्यस्य निर्धर्मितावच्छेदककशक्तिग्रहस्य हेतुत्वे

अनुभवविरोधात्। जातित्वादिनोपस्थितिदशायां जातौ शक्तिग्रहात् शाब्दबोधधारणाय च गोत्वत्वाद्यवच्छिन्नविशेष्यकत्वेनैव जातिविशेष्यकधियो हेतुताया वाच्यतया तदपेक्षयाऽनवच्छिन्नगोत्वादिविशेषितशक्तिप्रकारकपदविशेष्यकज्ञानस्य हेतुत्वे लाघवाच्छक्तिज्ञानस्य जातिसम्बन्धाविषयकत्वेऽपि समवायरूपतत्सम्बन्धस्य ततो भानं व्यक्तिभानवन्निष्प्रत्यूहमेव। जातिशक्तिज्ञानजन्यतायां समवायेन जातिप्रकारकव्यक्तिविषयताया अवच्छेदकत्वात् सम्बन्धान्तरभानप्रसङ्गस्य च तद्विषयतायाः शक्तिज्ञानजन्यतावच्छेदकत्वानभ्युपगमेन नावकाशः। शक्तिभ्रमेण गवादिपदादपि कालिकादिसम्बन्धेन गोत्वादिप्रकारकधीरनुभूयत इति चेत्? अस्तु, तर्हि तेन सम्बन्धेन गोत्वादौ व्यक्तिशक्यतावच्छेदकताया भ्रमस्य तेन सम्बन्धेन तत्प्रकारकत्वं कार्यतावच्छेदकं तादृशभ्रमरूपकारणाभावादेव नाभ्रान्तस्य जातिशक्तिज्ञानात्तादृशबोधापत्तिः। भ्रमस्तु विशिष्टज्ञानं ज्ञानद्वयं वेत्यन्यदेतत्।

वस्तुतो गुरूणां व्याप्त्यादिभ्रमस्थले यथा नानुमितिः, किं त्वसंसर्गाग्रहमात्रे तथा शक्तिभ्रमस्थलेऽपि न शाब्दानुभवः, अपि तूपस्थितपदार्थानामसंसर्गाग्रहमात्रम्। सम्बन्धाविषयकशक्तिज्ञानात् कालिकादिसम्बन्धस्य न भानं तादृशादपि समवायस्य भानमित्यनुभवविरोधः। सम्बन्धानामविशेषेण तादृशविशेषबीजविरहादिति तु न शङ्क्यम्, समवायरूपसम्बन्धांशे कुब्जा शक्तिर्न तु सम्बन्धान्तर इत्यत एव विशेषात्। शक्तिज्ञानाविषयत्वाविशेषेऽपि गोपदाद्घटादिर्न भासते, अपि तु गौरित्यत्रापि स्वरूपसच्छक्तिनद्विरहकृतविशेषस्यैव बीजत्वात्। कुब्जशक्त्यनुपगमे तु स्वसमवायिव्यक्तिं विना अभानं जातेः स्वभावो न तु सम्बन्धान्तरेण स्वाश्रयं स्वासमवायिनमन्तरेण न भानमिति विशेषाद्यथा व्यक्तिभाननियमस्तथा सम्बन्धभाननियमोऽपीति। तथापि समवायातिरिक्तसम्बन्धेन जातेः स्वरूपतः प्रकारत्वमप्रामाणिकमिति शक्त्यंशे गोत्वत्वेन गोत्वप्रकारकमेव ज्ञानं व्यक्तिशक्त्यनवगाहिज्ञानकारणतावादिना कारणं वाच्यम्। समानप्रकारकज्ञानकारणतामते च स्वरूपतो गोत्वप्रकारकव्यक्तिशक्तिज्ञानमिति लाघवमित्याशयेनेदृशः कुब्जशक्तिमतनिष्कर्षः कृतः। अत

एव तेषां जातेर्व्यक्तिग्रहमात्रवेद्यतासिद्धान्तोऽपि सङ्गच्छते ; अन्यथा व्यक्तिं विना शक्तिज्ञान एव जातिभानात्ताद्दशनियमस्यात्यन्तमसम्भावितत्वात् ।

न च गां जानातीत्यादिविशिष्टवैशिष्ट्यबोधे ज्ञानांशेऽपि स्वावच्छिन्नविषयताकत्वसम्बन्धेन गोत्वादेः स्वरूपतः पारतन्त्र्येण प्रकारत्वात् समवायेनैव जातेः स्वरूपतः प्रकारत्वनियमोऽसम्भावित इति वाच्यम् ; स्वातन्त्र्येण प्रकारतामादायैव तथा नियमात् । एवम् एकसम्बन्धिज्ञानस्य सम्बन्धग्रहप्रकारीभूतधर्मप्रकारेणैवापरसम्बन्धिस्मारकत्वं क्लृप्तं न तु स्वरूपतः, तथा च गोत्वसम्बन्धिपदज्ञानात् स्वरूपतो गोत्वस्मरणानुरोधेन सम्बन्धिज्ञानस्याधिककारणत्वं कल्प्यमित्यादिकमपि यथाश्रुततन्मतोपेक्षाबीजमवधेयम् । अधिकमन्यत्र प्रपञ्चितम् ।

प्रकारान्तरेणाविरोधमुपपादयतो मतमाह—अनद्गुणेति । गवादीत्यत्र गोपदं आदिर्यस्य पश्वादिपदस्येति अन्यपदार्थमात्रपरबहुव्रीहिणेत्यर्थः । पश्वादिपदेति । पशुत्वं हि लोमादिमत्त्वरूपोपाधिनं तु जातिः, तैजसोच्चैःश्रवशरीरादिवृत्तित्वेन पृथिवीत्वादिना सङ्करात् , अतः पश्वादिपदस्य धर्मिण्यपि शक्तिर्लोमादिरूपधर्मस्याश्रयविनिर्मोकेणापि मानाभावान्मात्रशक्तेस्तन्निष्ठकिञ्चित्पदलक्षणाया इव धर्मिभासकत्वासम्भवादतस्तत्र समानप्रकारकत्वेन शक्तिज्ञानस्य शाब्दबोधहेतुत्वमविरुद्धमेवेति भावः । घटत्वादिवत् पशुत्वादेरपि नानात्वे जातिसङ्करानवकाशेन जातिरूपता सम्भवतीत्याशयेनाह—लिङ्गादीति । लिङ्गादिपदस्य कार्यत्वेनोपाधिनाऽपूर्वरूपधर्मिवाचकत्वात्तत्सिद्धान्तत्वादिति भावः । समानविषयकत्वेन शक्तिज्ञानपदार्थस्मरणहेतुत्वमादाय गवादिपदमधिकृत्याप्याक्षेपावतारादनद्गुणसंविज्ञानबहुव्रीहिणा समाधानग्रन्थस्य पदान्तरपरत्वे परिहारन्यूनतेति व्यक्तिशक्त्यभ्युपगमवादेन तादृशग्रन्थस्य पदसामान्यपरतामेवोपपादयति—परेत्या वेति । 'परे' नैयायिकाः ।

(चि०) अथ वह्निमानयमित्यनुमितिर्विशेषणज्ञानसाध्या विशिष्टज्ञानत्वादिति पर्वतीयवह्निभानार्थं तत्कल्पने धूमेऽपि तथा क्वचिद् धूमस्यापि व्यापक-

त्वादिति चेन्न। विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्यावश्यकत्वेन हेतुत्वात्, तच्च वृत्तमेव न तु विशेषणज्ञानमपि तथा, गौरवात्। गौरयमिति विशिष्टज्ञाने युगपद्विशेष्ये विशेषणे सन्निकर्ष एव कारणं, न तु निर्विकल्पकं, मानाभावात्। विशिष्टज्ञानत्वमेव मानमिति चेन्न। दृष्टान्ताभावात्, दण्डी पुरुष इत्यत्र विशेषणधीजन्यत्वानुपगमात्। विशिष्टवैशिष्ट्यज्ञानत्वात्। अपि च प्रमेयत्वेन व्याप्तिं परिच्छिन्दन् सर्वज्ञः स्यात् तथा च परकीयज्ञानविषये घटत्वं न वेति संशयो न स्यात् प्रमेयत्वेन तदन्यतरनिश्चयात्। प्रमेयत्वेन घटं जानात्येव घटत्वं तस्य न जानाति इति चेन्न। तत् किं घटत्वं न प्रमेयं येन तन्न जानीयात्। सकलघटवृत्तिधर्मस्य प्रमेयत्वेन तदज्ञानासम्भवात्।

(दी०) विशेषणज्ञानसाध्येति। न च पक्षतावच्छेदकज्ञानजन्यतया सिद्धसाधनम्, यद्विशिष्टज्ञानं तद्वद्धीसाध्यमिति सामान्यव्याप्त्यादरादभावत्वप्रतियोगित्वयोरप्यनुपस्थितयोरप्रकारत्वात्।

(गा०) विशेषणज्ञानसाध्येति। मूले विशेषणपदस्य स्वप्रकारीभूतधर्मसामान्यपरतामाक्षिपति—न चेत्यादिना। पक्षतावच्छेदकेति। साध्यतावच्छेदकवह्नित्वादेरप्युपलक्षकम्। सिद्धसाधनमिति। अनुमितौ स्वप्रकारपर्वतत्वादिविषयकपरामर्शस्य हेतुतायाः सामान्यमत्यामत्तिमनङ्गीकुर्वतापि स्वीकारात् पर्वतीयवह्निज्ञानजन्यत्वपर्यन्तासिद्धेरुद्देश्यतया उक्तानुमानेनासम्भव इत्यर्थः।

यत्तदूभ्यां सामान्यतो व्याप्त्या पक्षधर्मताबलादसिद्धविशेषसिद्धिरिति प्राचीनमतमालम्ब्य समाधत्ते—यदिति। तथा च विशे-

यणपदं पर्वतीयवह्निपरं विशिष्टज्ञानपदमपि तद्विशिष्टज्ञानपरमिति न सिद्धसाधनमिति भावः।

ननु अभावसन्निकर्षे प्रतियोगिज्ञानमात्रादेव घटप्रतियोगिकाभावत्वादिनाऽभावप्रत्यक्षमुत्पद्यते न तु अभावत्वादिज्ञानमपि तत्रापेक्षितं तदुक्तमभावप्रतीतौ प्रतियोगित्वाभावत्वयोरिवेति, तथा च अभावत्वादिप्रकारके तादृशप्रत्यक्षे अभावत्वादिज्ञानजन्यत्वाभावेन व्यभिचारान्नोक्तसामान्यव्याप्तिसम्भव इत्यतः—अभाव वेति। 'अप्रकारत्वात्' प्रकारत्वानुपगमात्। घटो नास्तीत्यादिविशिष्टबुद्धिपूर्वमभावत्वस्यापि निर्विकल्पकोपगमात्। प्रतियोगितायाः संसर्गतयैव तत्र भानादिति भावः।

यत्त्वतत्त्वाननुगमादुक्तरीतिर्न विचारसहेति विशेषतो व्याप्तिमेवावलम्ब्यते। वह्नीति।

(दी०) वह्निविशिष्टज्ञानत्वेन तद्वह्निविशिष्टज्ञानत्वेन वा तज्ज्ञानजन्यत्वसाधनाद्वा विशिष्टवैशिष्ट्येत्याद्यभ्युपगमवादः। वस्तुतो विशेषणतावच्छेदकादीनां युगपदिन्द्रियसन्निकर्षात्तादृशप्रत्यक्षम्, अनुमित्यादेस्तु ताद्रूप्येण व्याप्त्यादिग्रहात्। अत एवानेकव्यक्तिकद्रव्यादिविशेषणतावच्छेदककानुमित्या तद्भानार्थं[1] न सामान्यलक्षणादरः।

(गा०) वह्निज्ञानजन्यतात्वेन साध्यतायामपि प्रसिद्धवह्निज्ञानजन्यत्वेन सिद्धसाधनं दुर्वारमेव इत्यतः—तद्वह्नीति। विशेषतो व्याप्त्यैवेति पूरणीयम्। अत्र च तद्वह्निविषयकज्ञानत्वावच्छिन्नकारणताया उभयमते कुत्राप्यसत्त्वेऽपि साध्याप्रसिद्धिर्नाशङ्कनीया; तद्विषयकज्ञानसाध्यत्वमिदानीं साध्यमित्याशयात्। तादृशसाध्यस्यैव विशेषणतावच्छेदकीभूतवह्नित्वप्रकारकज्ञानत्वादिना यत्र तद्वह्निज्ञानस्य हेतुता तादृशविशिष्टवैशिष्ट्यबोधादावेव प्रसिद्धत्वात्। साध्यार्थं चान्यवह्नितोत्तरत्वं नात ईश्वरीयज्ञानमादायार्थान्तरं परेषां व्यर्थविशेषणत्वं न दोषायेति ध्येयम्।

उक्तानुमानमप्रयोजकीकर्तुं विशिष्टबुद्धित्वेन विशेषणज्ञानस्याव-

१. तज्ज्ञानार्थमिति पाठान्तरम्।

च्छिन्नजन्यतां खण्डयितुमुपक्रमते मूले—विशिष्टवैशिष्ट्येत्यादिना। ननु विशिष्टविशेषणकविशिष्टबुद्धेर्विशेषणतावच्छेदकप्रकारकज्ञानरूपहेतुना निर्वाहेऽपि तादृशज्ञानाहेतुकनिर्विकल्पकविशेषणधीहेतुकगौरयमित्यादिनिर्विशेषणकविशेषणावगाहिबुद्ध्यनुरोधेन विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानत्वेन हेतुताकल्पनमावश्यकमित्यत आह—गौरयमिति। मानाभावादिति। तादृशविशिष्टबुद्धेरपि विशेषणधीत्वावच्छिन्नहेतुकत्वे मानाभावादित्यर्थः। दृष्टान्ताभावादिति। कश्चिद्रूपावच्छिन्नविशेषणधीहेतुकत्वसाधने गौरवमित्यनुमित्यादेः परामर्शत्वादिना विशेषणविषयकपरामर्शादिहेतुकस्य दृष्टान्तत्वसम्भवेऽपि विशेषणज्ञानत्वावच्छिन्नहेतुकत्वसाधने दृष्टान्ताभावादित्यर्थः। तथा च साध्याप्रसिद्ध्या नानुमानसम्भव इति भावः। एवं चोक्तकार्यकारणभावाभावे तद्धङ्गप्रसङ्गानवकाशात्। पर्वतीयवह्निज्ञानं विनापि तत्प्रकारकानुमितिर्निष्प्रत्यूहैव तमविषयीकृत्यापि महानसीयवह्न्यादिविषयकस्यैव परामर्शस्य सम्भवेन परामर्शत्वावच्छिन्नकारणताया अक्षतेरिति किं सामान्यलक्षणयेति समुदिततात्पर्यार्थः। विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वेऽपि सामान्यप्रत्यासत्त्यावश्यकताया वक्ष्यमाणत्वात् तत्रापि मूलकृतोऽनिर्भरं दर्शयति दीधितौ—विशेष्येति। अभ्युपगमवादः। आपाततः परमताभ्युपगमेनोक्तिः। तर्हि किं वास्तवं विशिष्टवैशिष्ट्यबोधकारणमित्यत आह—वस्तुत इति। 'अत एव' विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यबोधे हेतुत्वादेव। 'तज्ज्ञानार्थम्' विशेषणतावच्छेदकीभूतापूर्वदण्डादिप्रकारकज्ञानार्थम्।

ननु तद्धर्मादीनामिन्द्रियसन्निकर्षादिसत्त्वेऽपि तद्धर्मप्रकारकज्ञानानन्तरमेव तद्विशिष्टविलक्षणप्रकारताशालिज्ञानं जायते न त्वन्यदा इत्यनुभवानुरोधाद्विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वमावश्यकम्। अत एवासंसर्गाग्रहदशायामपि कदाचिद्दण्डपुरुषावित्यादिसमूहालम्बनं विशिष्टवैशिष्ट्यबोधात्मकमनुभूयते। विशिष्टज्ञानसत्त्वे चासंसर्गाग्रहादिदशायामेव तादृशज्ञानमुपेयते।

यदि च विशिष्टज्ञानासंसर्गाग्रहादिसत्त्वेऽपि न कदाचित् तादृश-

ज्ञानमात्रानुभविकं तदा तज्ज्ञानस्यैव विशिष्टवैशिष्ट्यबोधप्रतियोग्यधर्मत्वं वाच्यम् । एवं कदाचित् संयोगेनैव दण्डादिविशिष्टस्य प्रकारता कदाचित्सम्बन्धान्तरेणेव तद्विशिष्टस्येत्यत्रानुगतनियामककल्पनमपेक्ष्य तत्तत्सम्बन्धेन तत्तद्विशिष्टविषयकज्ञानस्य तादृशविशिष्टप्रकारकज्ञानहेतुत्वकल्पनमुचितम् । एवं च किञ्चिद्विशिष्टविषयकज्ञानादिकल्पनागौरवं फलमुखतया न दोषायेत्यत आह यत्तु वेति ।

(दी०) अस्तु वा दण्डीत्यादिप्रत्यक्षे दण्डत्वादिना दण्डसंयोगत्वानित्यादौ च दण्डसंयोगत्वादिना यत्किञ्चिद्व्यक्तिज्ञानं कारणम् । दृष्टान्ताभावादिति । विशेषणज्ञानत्वेन हेतुत्वस्य विशेष्यज्ञानादेरपि कारणत्वापत्त्या मानाभावेन च निरस्तत्वादिति ।

(रा०) दण्डीत्यादौ दण्डत्वादिना यत्किञ्चिद्व्यक्तिज्ञानं कारणं न तु फलीभूतप्रत्यक्षविशेषणव्यक्तिज्ञानपर्यन्तम् एतच्च दृष्टान्तविषयोक्तम् । नानाव्यक्तिविशेषणतावच्छेदकदण्डसंयोगवानित्यादौ अपूर्वदण्डादिज्ञानानपेक्षाया एव प्रकृतत्वात् । दण्डसंयोगत्वादिनेति । दण्डत्वसंयोगत्वादिनेत्यर्थः । तेन दण्डत्वादिना फलीभूतप्रत्यक्षविशेषणतावच्छेदकदण्डादिव्यक्तिज्ञानानपेक्षालाभः । यथाश्रुते फलीभूतज्ञानविशेषणसंयोगादिव्यक्तिज्ञानानपेक्षामात्रलाभेनातिप्रसङ्गात् । संयोगत्वादिना यत्किञ्चिज्ज्ञानकारणत्वाभिधानं तु पूर्ववत् दृष्टान्तविधया विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां तद्विशेषणविषयकत्वनिवेशे वह्निमानित्याद्यनुमितौ अपूर्ववह्न्यादिरूपविशेषणभानाधिमत्र सामान्यप्रत्यासत्त्यावश्यकतया तत्रनिवेशस्य प्रागेव व्यवस्थापितत्वादिदानीं दृष्टान्तता ।

मूल विशिष्टवैशिष्ट्यज्ञानत्वादिति । विशिष्टप्रकारकज्ञानत्वादित्यर्थः । विशेषणान्तरविशेष्यताशून्यप्रकारकज्ञानत्वादिति यावत् । अतो दण्डत्वादिविशिष्टप्रतियोगिकत्वानवच्छिन्नवैशिष्ट्यविषयताशालिनो दण्डी पुरुष इति ज्ञानस्यापि सङ्ग्रहः । तदसङ्ग्रहे तादृशज्ञाने विशेषणज्ञानजन्यत्वानभ्युपगमात् हेत्वनभिधाने न्यूनतापातात् । न च तत्र विशेषणज्ञानजन्यत्वानभ्युपगमोऽपि न विवक्षित इति

धारूपम् । तथा सति तादृशबुद्धेर्दृष्टान्तत्वाप्रतिक्षेपात् ।

यद्यपि विशिष्टवैशिष्ट्यज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानजन्यत्वमेव विशेषणज्ञानजन्यत्वानभ्युपगमे बीजं विशेषणतावच्छेदकप्रकारकज्ञानस्य च विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिन्यामेव बुद्धौ हेतुता न तु विशिष्टविशेषणकज्ञानमात्रे । मणिकृता अवान्तरवाक्यार्थज्ञानं विनापि युगपत् सकलपदार्थसंसर्गावगाहिरक्तदण्डवान् पुरुष इत्यादिशाब्दबोधस्योपगमात् । स्वप्रकाशग्रन्थे ज्ञानत्वनिर्विकल्पकानन्तरं व्यवसायतृतीयक्षणे विशेष्ये विशेषणमित्यादिरीत्या जानामीत्याकारकविशिष्टज्ञानविशेषणकानुव्यवसायस्योपगतत्वाच्च । काञ्चनमयत्वादिविशिष्टवह्निप्रसिद्धिं विनापि काञ्चनमयवह्निमानित्यादिबुद्धेर्विशेष्ये विशेषणमित्यादिन्यायेन सम्भवस्य दीधितिकृता हेत्वाभासे वक्तव्यत्वात् । विशिष्टव्याप्तिज्ञानं विनापि विशिष्टपरामर्शोत्पादस्य मिश्रप्रभृतिभिः परामर्शग्रन्थे कथनात् । लाघवोपनीतयदर्थविशिष्टसाध्यप्रसिद्धिं विनापि तद्विशिष्टसाध्यविशेषणकानुमितेरुपगमाच्च । तथापि प्राचीनैर्विशिष्टोपस्थितिं विना विशिष्टप्रतियोगिकवैशिष्ट्यविषयकमपि विशिष्टविशेषणकज्ञानं नोपेयते मणिकृता विशिष्टाप्रसिद्ध्यैव काञ्चनमयत्वविशिष्टवह्न्यनुमित्यसम्भवस्य हेत्वाभासे कथनादिति नासङ्गतिः । अत एव साध्याप्रसिद्धिस्थले साध्यविशेष्यिकैवानुमितिरुपेयते न तु विशेष्ये विशेषणमित्यादिन्यायेनापि साध्यप्रकारिकेति ।

ननु तद्विशिष्टज्ञानत्वेन तज्ज्ञानत्वावच्छिन्नहेतुकत्वानुमाने मूलोक्तदृष्टान्ताभावो ज्ञानप्रत्यासत्तिस्वीकर्तृमते न सङ्गच्छते उपनीतभानस्यैव दृष्टान्ततासम्भवात् अतः स्वयं तत्र दूषणान्तरमाह । विशेषणेति । हेतुत्वस्येति । निरस्तत्वादित्यग्रिमेणान्वयः । कारणत्वापत्येति । तद्विशेषणकबुद्धित्वस्यैव तद्विशेष्यकबुद्धित्वादेरपि तद्विशेष्यकोपनीतभाने तज्ज्ञानत्वावच्छिन्नहेतुकत्वसहचरितत्वाल्लौकिकविशिष्टबुद्धिपूर्वं विशेषणगोचरस्येव विशेष्यगोचरस्यापि निर्विकल्पकस्य नैयायिकसंमततया व्यभिचारनिर्णयाविषयत्वाच्च तज्ज्ञानत्वावच्छिन्नजनकत्वानुमापकत्वसम्भवादिति भावः ।

प्रतिबन्देरनुत्तरतया दोषान्तरमाह । मानाभावेन चेति । विशिष्टज्ञानत्वे विशेषणज्ञानजन्यत्वानुमापकतौपाधिकत्वाभावेन

चेत्यर्थः । मानाभावपर्यन्तानुसरणबीजं प्रतिवन्देरकिञ्चित्करत्व-
मित्याशयवानाह-एतेनास्त्विति ।

(दी०) एतेनास्तु विशेष्यज्ञानमपि कारणम्, जन्यतां निर्विकल्पकमपि सामान्यलक्षणया सर्वज्ञत्वापत्त्या तस्यास्तदजनकत्वे तु तत एव बाधकान्न तत् कारणमिति निरस्तम् ।

(गा०) एतेनेति । ननु विशेष्यज्ञानत्वेन हेतुत्वे सामान्यलक्षणातोऽपि निर्विकल्पकस्वीकारप्रसङ्गः अज्ञातातीतानागतघटादिव्यक्तीनां प्रथमतो विशेष्यतया भानासम्भवादित्यत आपाद्यापत्तिमाह । जन्यता चेति । सामान्यलक्षणायाः सामान्यप्रकारकसामान्याश्रयविषयकप्रत्यक्षत्वं जन्यतावच्छेदकं न तु सामान्यप्रकारतानिरूपितसामान्याश्रयविषयताकप्रत्यक्षत्वमतो ज्ञातधर्म्यंशे सामान्यप्रकारकप्राथमिकसामान्यजज्ञानीयाज्ञातसामान्याश्रयनिष्प्रकारस्य विशेष्यतात्मकविषयताया अपि सामान्यप्रत्यासत्तिनियम्यतेति भावः । एतन्मते च संसर्गतानिरूपकतदीयविषयताशालिज्ञानत्वमेव तज्ज्ञानस्य जन्यतावच्छेदकं न तु तद्विशेष्यकज्ञानत्वतत्प्रकारकज्ञानत्वे कार्यकारणभावद्वयापत्तेः । संसर्गतानिरूपकत्वस्य प्रकारताविशेष्यतासाधारणत्वेनोक्तधर्मेणाभयसङ्ग्रहः । सौरभाद्यप्रकारकतन्मानसानुरोधेनापि ज्ञानप्रत्यासत्तेः स्वतन्त्रकारणत्वमेतन्मते नास्ति ईदृशकारणतयैवोपपत्तेः ।

न च विशेष्यज्ञानाहेतुतामतेऽपि तत्र सामान्यलक्षणया सौरभमानसम्भवात्तदनुरोधेन न ज्ञानप्रत्यासत्तिहेतुतेति वाच्यम् । यत्र नित्यत्वादिना सौरभत्वादिकमेवोपस्थितं न तु सौरभादिकमपि तत्र किञ्चिद्विशेष्यभासकप्रत्यासत्त्यन्तराभावेन सामान्यप्रत्यासत्त्यापि मानससौरभमानाजननात् सौरभत्वादिसामान्यलक्षणया-मानसज्ञाने जननीये यत्किञ्चित्सौरभादिज्ञानसहकारिताया आवश्यकत्वात् तदनुरोधेनैव ज्ञानप्रत्यासत्तेरेतन्मते हेत्वन्तरस्यावश्यकत्वादित्यवधेयम् ।

ननु सामान्यलक्षणया निर्विकल्पकजननोपगमे जातित्वादिसामान्यलक्षणया अज्ञातनिखिलजातिनिर्विकल्पकं जनयित्वा स्वरूपत-

स्तत्त्वादिप्रकारकज्ञानं जनयिष्यते स्वरूपतस्तद्विशिष्टबुद्धिहेतुभूतस्य स्वरूपतस्तज्ज्ञानस्य सत्त्वात् । तादृशं च ज्ञानमवश्यानुभवसिद्धमत आह । सार्वज्ञापत्त्येति । यावत्प्रमेयभासकप्रमेयत्वादिसामान्यज्ञानतृतीयक्षणजातसंशयधर्मितावच्छेदकतत्तादिविशिष्टधर्मिज्ञानानन्तरं यत्र घटत्वादिरूपकोट्युपस्थितिस्तदुत्तरं स घटो न वेत्यादिसंशयः तत्र धर्मिज्ञाने सामान्यलक्षणाजन्यघटत्वादिनिर्विकल्पकात् घटत्वाद्यंशेऽन्याप्रकारकात् स्वरूपतोऽपि धर्मितावच्छेदकतत्तादिविशिष्टे घटत्वादिभानसम्भवेन समानप्रकारकनिश्चयसत्त्वेन स घटो न वेत्यादिसंशयानुपपत्त्येत्यर्थ इति सम्प्रदायः ।

अत्रेदं चिन्त्यते । सामान्यलक्षणया निर्विकल्पकाजननेऽपि यत्र धर्मिज्ञानात् पूर्वं स्वरूपतो घटत्वादिप्रकारिका उपस्थितिस्तत्ताविशिष्टधर्मिधीरेव वा इदन्त्वादिविशिष्टे घटत्वाद्यंशे अन्याप्रकारकतत्प्रकारकसमूहालम्बनरूपा तत्रापि धर्मिज्ञानानन्तरं घटभेदापूर्वान्यया स घटो न वेत्यादिसंशयः कदाचिदनुभूयते तदनुपपत्तिर्दुर्वारैव तत्ताविशिष्टेऽपि तत्र घटत्वादेः स्वरूपतो भाने बाधकाभावात् ।

यदि च दूरत्वादिरूपसंशयजनकदोषात्तत्र तत्ताविशिष्टे स्वरूपतो घटत्वादेर्न विशिष्टधीरित्युच्यते तदा सामान्यलक्षणया निर्विकल्पकजननेऽपि तत एव तत्ताविशिष्टे घटत्वादेरभानान्न स घटो न वेति संशयानुपपत्तिः ।

वस्तुतस्तूपनीतभाने दूरत्वादिदोषो न प्रतिबन्धकः तथा सति दूरस्थे धर्मिणि घटत्वादिसंशयस्याप्यनुपपत्तेः । न हि निश्चयत्वं दोषप्रतिबध्यतावच्छेदकं तस्य कार्यतानवच्छेदकत्वात् । तथा च दर्शितस्थले तत्ताविशिष्टे घटत्वादेरुपनीतभानात्मकनिश्चये बाधकाभावः ।

न च धर्मिज्ञानस्य संशयहेतुतायाः संशयत्वस्य कार्यतावच्छेदकत्वानभ्युपगन्तृभिरनभ्युपगमादुक्तधर्मिज्ञानमेव संशयरूपं भविष्यतीति न संशयानुपपत्तिरिति वाच्यम् । विपरीतकोट्युपस्थितेः प्रागसत्त्वेन प्रथमं संशयासम्भवात् । तस्माद्धर्मिविशेषे स्वरूपतो घटत्वाद्युपनीतभाने अननुगततत्तदुपनायकज्ञानव्यक्तीनामेव हेतुत्वं स्वीकरणीयमिति सामान्यलक्षणया निर्विकल्पकजननेऽपि तस्य

स्वरूपतो घटत्वाद्युपनायकतानभ्युपगमात्रोक्तसंशयानुपपत्तिरिति तस्मात् सार्वज्ञापत्त्यस्य प्रमेयत्वादिसामान्यज्ञानतृतीयक्षणे घटत्वादिरूपयावदखण्डधर्माणां स्वरूपतः प्रकारतया भानापत्त्यित्यर्थः । येन पुंसा लौकिकसन्निकर्षेण घटत्वादिकं कदापि न गृहीतं घट इत्याद्याकारकतदीयज्ञानस्यानुभवविरुद्धतया इष्टापत्तेरयोगात् ।

न च उपनायकज्ञानस्योक्तयुक्त्या अननुगतरूपेण हेतुत्वे अस्या अव्याप्तेर्नावकाशः । स्वरूपतो विशेषणविषयकधीसहकृतज्ञानप्रत्यासत्तिबलादेव तादृशज्ञानस्यापादनीयत्वात् । सामान्यलक्षणाघटितायाः सामग्र्याः सामान्याश्रयप्रकारताप्रयोजकत्वानभ्युपगमात् ज्ञातसामान्याश्रयप्रकारकज्ञानस्य ज्ञानप्रत्यासत्तित एव सर्वत्र निर्वाहात् कथञ्चिदुक्तापत्तिसम्भवे संशयानुपपत्तेरपि दुर्वारत्वादिति वाच्यम् । यतो धर्मिज्ञानात् पूर्वं यत्राविशेषितघटत्वादिकमेवोपस्थितं तादृशोक्तस्थले संशयधर्मितावच्छेदकतत्वाविशिष्टे निर्विशेषणकघटत्वाद्युपनीतभानवारणाय सधर्मितावच्छेदकक एव तादृशोपनीतभाने उपनायकज्ञानस्यानुगतरूपेण हेतुता स्वीक्रियते न तु निर्धर्मितावच्छेदकके तत्रानुगतसामग्रीस्वीकारे संशयानुपपत्त्यादिरूपानिष्टप्रसङ्गविरहात् । तथा च सामान्यलक्षणाया निर्विकल्पकजनकत्वमते निर्धर्मितावच्छेदककोक्तज्ञानापत्तिर्दुर्वारैव ।

न च निर्धर्मितावच्छेदककोपनीतभानसामग्र्या अपि नानुगमसम्भवस्तथा सत्युपस्थितानां वस्तूनां सन्निकृष्टयावद्वस्तुष्वेव उपनीतभानापत्त्या उपनीतभानमात्रस्यैव भ्रमत्वप्रसङ्गादिति वाच्यम् । एतादृशातिप्रसङ्गवारणाय यत्र यस्य बाधितत्वं तत्र तदुपनीतभानसामग्र्या अनुगमासम्भवेऽपि तदाश्रयधर्मिकतदुपनीतभानसामग्र्या अनुगमोपगमे बाधकाभावात् ।

एतेन लौकिकप्रत्यक्षे स्वरूपतो घटत्वादिभासकं तदाश्रकसन्निकर्षविशेषादिकमेव केवलजातिमानित्याकारकघटत्वादिलौकिकप्रत्यक्षानुपगमात् । अन्यथा जातिमत्त्वाद्युपस्थितिसत्त्वे प्रहरावधि निरीक्ष्यमाणेऽपि घटे अयं घटो न वेति संशयविच्छेदानुपपत्तेः । उपनीतभानसामग्री चाननुगतैवेति घट इत्याकारकोपनीतभाने अनियम इति स्वरूपतस्तत्प्रकारकबुद्धौ स्वरूपतस्तज्ज्ञान-

हेतुत्वं तदेकयुक्तिकं निर्विकल्पकं च विलीयेतेति निरस्तम् । बाधितस्थलेऽननुगतत्वेऽपि अबाधितस्थले तस्यानुगतत्वात् । एवं च स्वरूपतस्तत्प्रकारकोपनीतभाने स्वरूपतस्तद्विषयकज्ञानहेतुत्वे सिद्धे तत्रैव लाघवाल्लौकिकान्यत्वमनिवेश्य स्वरूपतस्तत्प्रकारकज्ञानत्वावच्छिन्नं प्रति स्वरूपतस्तद्विषयकज्ञानत्वेन हेतुत्वं कल्प्यते प्रथमतो जातित्वाद्युपस्थितिस्थले लौकिकसामग्रीतो जातित्वेन घटत्वप्रत्यक्षेऽपि निर्विकल्पकीयघटत्वविषयत्वोपगमे बाधकाभावात् तन्मूलिकैवायं घट इति धीः स्वरूपतस्तद्विषयकज्ञानत्वावच्छिन्नं प्रति स्वरूपतस्तद्विषयकज्ञानत्वेन हेतुत्वे निर्विकल्पकास्वीकारे प्राथमिकविशिष्टबुद्धौ व्यभिचारः, निर्विकल्पकस्वीकारे च तत्रैव व्यभिचार इति स्वरूपतस्तत्प्रकारकत्वमेव कार्यतावच्छेदकमिति ।

तस्याः । सामान्यलक्षणायाः । तदजनकत्वे । तन्निर्विकल्पकाजनकत्वे । तत एव बाधकात् । सामान्यप्रत्यासत्तिजप्राथमिकाज्ञातविशेष्यकप्रत्यक्षे व्यभिचारात् । तत् । विशेष्यज्ञानम् । न कारणम् । न सम्भवत्कारणताकम् । तथा च तावतैव प्रतिबन्द्युद्धार इति विशेषणज्ञानहेतुत्वं निष्प्रत्यूहमिति भावः ।

निरस्तमिति । यद्यपि विशेषणज्ञानहेतुत्वे ज्ञानलक्षणायाः स्वतन्त्रकारणता नास्तीति लाघवं तन्मुख्यविशेष्यकमानसतदुपनीतभानेऽपि नियमतः स्वांशे तादात्म्यसम्बन्धेन तत्प्रकारकत्वोपगमात् । तत्प्रकारकत्वे लौकिकविषयतान्यतद्विषयताया एव ज्ञानलक्षणाजन्यतावच्छेदकत्वावश्यकत्वात् । सामान्यस्य प्रत्यासत्तित्वमते सामान्यप्रत्यासत्तिज्ञातत्तद्विशेष्यकमानसे व्यभिचारेण ज्ञानप्रत्यासत्तिहेतुताया एवासम्भवात् । तथापि विशिष्टप्रत्यक्षत्वस्यैव विशेषणज्ञानजन्यतावच्छेदकत्वसम्भवेन विशिष्टबुद्धित्वस्यानुमित्यादिसाधारणस्य तज्जन्यतावच्छेदकत्वमप्रामाणिकमित्यनुमित्यादावपूर्वभानानुरोधेन न सामान्यप्रत्यासत्त्यादर इत्यवधेयम् । ननु प्रसिद्धधूमेऽव्यभिचारनिश्चयसत्त्वेन तत्र व्यभिचारसंशयायोगात् धूमान्तरधर्मिक एव व्यभिचारसंशयो वाच्यः । तादृशस्य च धर्मिणो भानं न सामान्यप्रत्यासत्तिमन्तरेणेति मूलसिद्धान्तो धर्मिज्ञानस्य संशयहेतुतायामेवोपपद्यते सैव मीमांसकानां नानुमता अत एव तेषां स्वतःप्रामाण्यवादिनामप्यज्ञात एव ज्ञानरूपे धर्मिणि प्रामाण्य संशयनिर्वाहः ।

न च तुरगादौ वेगेन गच्छन् इन्द्रियसन्निकर्षादिशालिनामनन्तधर्मिणां क्वचिदेव धर्मिणि संशयो न सर्वत्रेति नियमानुरोधात्तत्तद्धर्मिकसंशये तत्र धर्मिज्ञानहेतुत्वमावश्यकमिति वाच्यम् । इन्द्रियसन्निकर्षादिसत्त्वे कस्यचिदेव धर्मिणो ज्ञानमित्यत्र नियामकस्य दुर्वचतया धर्मिज्ञानहेतुतयापि उक्तस्थले संशये धर्मिणि नियमस्योपपादयितुमशक्यत्वात् ।

न च तत्तत्सन्निकर्षादिव्यक्तीनां तत्तद्धर्मिज्ञाने विशिष्य हेतुताकल्पनाद्धर्मिणां संशयजनकज्ञानविषयतानियम इति वाच्यम् । तथा सति संशयीयधर्मिविषयताया अपि तत एव नियमोपपत्तेर्धर्मिज्ञानहेतुत्वासिद्धेः ।

न च संशयात्मकधर्मिज्ञाने अननुगततत्तत्सन्निकर्षादिव्यक्तीनां हेतुतापेक्षया लाघवेन तत्रानुगतधर्मिज्ञानहेतुत्वे सिद्धे तद्बलाच्च संशयपूर्वं तद्विषयधर्मिविषयकज्ञानान्तरसिद्धौ तत्र संशयाविषयधर्मिविषयतावारणाय तत्र तत्तत्सन्निकर्षादिव्यक्तीनां हेतुताकल्पने गौरवं फलमुखतया न दूषणमिति वाच्यम् । सन्निकृष्टेष्वनेकधर्मिषु यत्र न संशयः तादृशधर्मिणां कियतामपि भानस्यानुभविकतया अनुगतधर्मिज्ञानहेतुतया संशये धर्मिविषयतानियमानुपपत्तेः ।

अथ साधारणादिधर्मवद्धर्मिज्ञानं संशये धर्मिविषयतानियामकं साधारणधर्मवत्त्वेन धर्मिभाने च नियामकान्तरमुभयसिद्धमेव अत एव ज्ञातेष्वपि धर्मिषु क्वचिदेव धर्मिणि कस्यचिदेव धर्मस्य संशय इति नियमोऽप्युपपद्यते तत्तदभावसहचरितधर्मवत्ताज्ञानविषयतायास्तत्संशयविषयताप्रयोजकत्वात् ।

एतेन न तत्तद्विशेष्यकत्वविशिष्टबुद्धित्वावच्छिन्नोत्पत्तौ तत्तद्विशेष्यभासकसामग्रीणां चाक्षुषस्पार्शनादिभेदेनाननुगतानां गुरुशरीराणां च प्रयोजकत्वमपेक्ष्य तत्तद्विशेष्यविषयकज्ञानाव्यवहितप्राक्क्षणवृत्तित्वविशिष्टस्यानुगतरूपेण हेतुतां कल्पयित्वा प्रयोजकत्वकल्पनमेव तद्धेतोरेवेति न्यायात् लाघवादुचितमिति तत एव संशये विशेष्यभाननियम इति मिश्रानुसारेण धर्मिज्ञानहेतुताखण्डनमप्यपास्तम् । तावता साधारणधर्मदर्शनाद्यविषये ज्ञायमाने धर्मिणि संशयाविषयत्वानिर्वाहात् ।

न च तद्धर्मिकसाधारणधर्मवत्ताज्ञानसामग्रीत्वेनैव तद्धर्मिकसं-

वायहेतुत्वमास्तामिति वाच्यम् । तादृशज्ञानसामग्रीत्वापेक्षया तादृशज्ञानत्वस्यातिलघुत्वात् ।

न चैतादृशसामग्रीत्वस्य गुरुशरीरत्वेऽपि तदवच्छिन्नस्य नियतपूर्ववर्तितायाः फलबलात्तदनन्यथासिद्धत्वमात्रं कल्पनीयमिति लाघवं तादृशज्ञानस्य तु उभयमेव कल्पनीयमिति सामग्रीहेतुत्वमेवोचितमिति वाच्यम् । साधारणधर्मदर्शनादिविशिष्टसंशयत्वरूपतत्कार्यतावच्छेदकाभिमतधर्मावच्छिन्नं प्रति तादृशज्ञाननियतपूर्ववर्तिताया अप्युभयवादिसिद्धत्वात् ।

न च संशये साधारणधर्मादिज्ञानस्य हेतुत्वेऽपि उक्तस्थले सन्निकर्षादिशालिसकलधर्मिषु प्रत्येकं तत्तत्कोटिविशिष्टबुद्ध्युपपत्तिर्दुर्वारैवेति तत्तद्धर्मिकतत्तद्धर्मविशिष्टबुद्धौ अननुगतनियामककल्पनमावश्यकं तत एव च तत्तद्धर्मिकसंशयस्यापि नियमनिर्वाहात् संशयसाधारणधर्मवत्ताज्ञानहेतुताकल्पनमयुक्तम् । अत एव संशयत्वस्य सामग्रीसमाजनियम्यतया न कार्यतावच्छेदकत्वमिति नवीनमतनिर्वाह इति वाच्यम् । संशयत्वावच्छिन्नं प्रति साधारणादिधर्मवत्ताज्ञानस्याहेतुत्वेऽपि आरोपसाधारणतत्तद्धर्मिकतत्तत्कोटिविशिष्टबुद्धौ तत्तत्कोटिसहचरितधर्मादिमत्तत्तद्धर्मिज्ञानस्य हेतुतया आरोपे धर्मिभाननियमावश्यंकल्पनीयतया तत एव संशये धर्मिज्ञानस्यापेक्षणीयत्वात् । नैवम् । संशये धर्मितावच्छेदकभाननियमाय तत्तद्धर्मावच्छिन्नधर्मिकसंशये तत्तद्धर्मावच्छिन्नधर्मिकसाधारणादिधर्मज्ञानस्य हेतुताया आवश्यकत्वात् यादृशधर्मावच्छिन्ने क्वचिद्धर्मिणि साधारणादिधर्मदर्शनं तत्तद्धर्मा···सन्निकर्षादिशालिसकलधर्मिणामेव तेन रूपेण संशयतावच्छेदकत्व···तद्धर्मिविषयकत्वमन्तर्भाव्य साधारणादिधर्मिज्ञानजन्यतावच्छेदकत्व···कल्पनात् ।

सामान्यप्रत्यासत्त्य···
अपसरत्वेन तत्र ···
···रसंशयो वा··· उच्यते । यदि सामान्यलक्षणा नास्ति
तद···विमन्तरेणो···सन्निकर्षादिकं विना धूमादौ व्यभिचारसंशयो नैव सोपात् । प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य ज्ञानाभावेनाज्ञानात् ।

सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषा-दर्शनेन संशयो युज्यते ।

(दी०) प्रसिद्धधूम इत्यादि । धर्मिज्ञानस्य संशयहेतुत्वान-ङ्गीकारेऽपि संशये एव धर्मिभानार्थं सा स्वीकार्या धर्मिताव-च्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वाभ्युपगमे त्वविवादात् । तद्धर्मप्रकारकज्ञानस्य तद्धर्माश्रयप्रत्यासत्तित्वोपगमात् ।

(गा०) समानधर्मिकसाधारणादिधर्मज्ञानाद्यनुरोधेन सामान्य-प्रत्यासत्तिसिद्धेरयोगात् धूमत्वादिना प्रसिद्धधूमादिषु साधारणा-दिधर्मज्ञानादेवाप्रसिद्धधूमादौ धूमत्वादिना व्यभिचारसंशयोपपत्ते-रित्यालोच्य धर्मिज्ञानहेतुत्वेऽपि सामान्यप्रत्यासत्तेरावश्यकतामाह । धर्मिज्ञानस्येति । सा । सामान्यप्रत्यासत्तिः । स्वीकार्येति । संश-यस्यापि प्रत्यक्षतया तत्राप्रत्यासन्नस्य भानासम्भवादिति भावः ।

ननु विशिष्टानुयोगिकवैशिष्ट्यबोधे विशेष्यतावच्छेदकप्रका-रकज्ञानहेतुत्वमावश्यक तत्र च सधर्मितावच्छेदकत्वयुक्तित्वमेव का-र्यतावच्छेदकमुपेयते लाघवात् । एवं च सामान्यप्रत्यासत्त्यनभ्यु-पगमेऽपि न क्षतिः । धर्मितावच्छेदकप्रकारकज्ञानजन्यतावच्छेद-कगर्भे एव तत्तद्धर्मावच्छिन्नधर्मिविषयतानिवेशात्तज्ज्ञानस्यैव धर्मि-भासकप्रत्यासत्तित्वसम्भवादत आह । धर्मितावच्छेदकेति । त-द्विवादमेव स्फुटयति । तद्धर्मेति ।

न चैवमपि संशयान्यव्यतिरेके यावद्धूमादिविषयकत्वं न सिध्यतीति वाच्यम् । धूमत्वप्रकारकज्ञानस्य धूमभासकतायां वि-परीतकोटिभानसामग्र्याः प्रयोजकत्वाकल्पनेन निश्चयेऽपि तद्बलात् सकलधूमभाने बाधकाभावात् विपरीतनिश्चयस्य धर्मितावच्छेद-कसामानाधिकरण्यमात्रावगाहिविशिष्टधीप्रतिबन्धकतायां तत्समा-नविषयकत्वमात्रं तद्धर्मितावच्छेदकघटितधर्मावच्छेदेन विरोधि-विषयकत्वविशिष्टं तत्समानविषयकत्वं वा न प्रयोजकं अपि तु शुद्धधर्मितावच्छेदकावच्छेदेन विरोध्यवगाहित्वमेवेति व्यवस्था-पयन् संशयानुपपत्तिरूपमुख्योक्तसामान्यप्रत्यासत्तियुक्तिं दूषयितुमुप-क्रमते । यत्र यद्यन्तीति ।

(दी०) अत्र वदन्ति । प्रसिद्धधूमे धूमत्वेन व्याप्तिज्ञानमेतद्धूमत्वेन वा ? आद्ये संशयोऽसिद्धः । द्वितीये धूमत्वावच्छेदेन व्याप्तिग्रहस्यैव तद्विरोधितया संशयो नानुपपन्नः । कथमन्यथा पृथिव्यादिरूपे वायुत्वाभावव्याप्यतानिर्णयेऽपि रूपं वायुत्वाभावव्यभिचारि न वेत्यादिसंशयः । न चातिरिक्तसम्भावनया तथा, विशेषतश्चोपस्थितानामातिरिक्तानां विशेषदर्शनाक्रान्ततया अतिरिक्तान्तरोपस्थितये अवश्यं सा स्वीकरणीयेति वाच्यम् ।

(गा०) धूमत्वेन । शुद्धधूमत्वावच्छेदेन । एतद्धूमत्वेन । महानसीयधूमत्वावच्छेदेन । व्याप्तिज्ञानमिति । प्रसिद्धधूमधर्मिकव्यभिचारसंशयविरोधितया अभिमतमिति शेषः । आद्य । प्रसिद्धधर्मिकव्याप्ति(१)निश्चयकाले । संशयोऽसिद्ध इति । तादृशनिश्चयस्य वा यद्धूमविषयकत्वे समानविषयकत्वमात्रेण विरोधितामतेऽपि एतादृशधूमरूपधर्मिणो दुर्लभतया संशयाप्रसक्तेः । प्रसिद्धधूममात्रविषयकत्वेऽपि धूमत्वव्यापकताया विरोधिन्या अवगाहनेन धूमत्वपुरस्कारेण स्वाविषयधूमधर्मिकमपि संशयं प्रति तस्य विरोधित्वौचित्यात् । यथा एकधर्मिणि विरोधिद्वयसत्त्वे विरोधभङ्गप्रसङ्गस्तत्र समानधर्मिकविरोधिज्ञानप्रतिबन्धकतायां बीजम् । तथा तत्समानाधिकरणधर्मं प्रति तद्विरोधिनो व्यापकत्वेऽपि विरोधभङ्गप्रसङ्गस्य उक्तज्ञानप्रतिबन्धकताबीजत्वादिति भावः ।

धूमत्वावच्छेदेन । शुद्धधूमत्वव्यापकत्वेन । एवकारेण तादृशव्यापकतानवगाहिसमानविषयकज्ञानव्यवच्छेदः । तद्विरोधितया । धूमत्वसामानाधिकरण्यमात्रेण व्यभिचारविषयकसंशयविरोधितया । स नानुपपन्नः । संशयो नानुपपन्नः ।

ननु दर्शितबीजेनोक्तव्यापकतानवगाहिनोऽपि समानविषयकज्ञानस्य विरोधित्वमावश्यकम्, प्रतिबध्यप्रतिबन्धकतयाभिमतधियोर्विषयविरोधभङ्गप्रसङ्गेऽपि प्रतिबध्यप्रतिबन्धकभावानुपगमे धर्मिता-

---

(१) प्रथमोक्तव्याप्तीति २ पु० पाठः ।

वच्छेदकव्यापकतावगाह्यपि भिन्नधर्मिकं ज्ञानमविरोधि तदनवगाह्यपि समानधर्मिकं ज्ञानं विरोधीति विपरीतमेव कुतो न स्यात् । व्यापकतावगाहित्वेन विरोधित्वे अवच्छेदकावच्छेदेन विशिष्टबुद्धौ तत्सामानाधिकरण्यमात्रेण विरोधिनिश्चयस्य प्रतिबन्धकत्वान्तरस्य कल्पनया गौरवं चेत्याशङ्कयाह । कथमन्यथेति । अन्यथा । समानविषयतामात्रेण निश्चयस्य संशयविरोधित्वे । पृथिव्यादिरूप इति । सर्वत्र पार्थिवरूपत्वादिनेति शेषः । कथं संशय इत्यन्वयः । प्रसिद्धरूपातिरिक्तस्य रूपस्याप्रसिद्ध्या प्रसिद्धरूपाणां च विपरीतनिश्चयविषयतया संशयधर्मिणः सामान्यप्रत्यासत्तिमतेऽपि दुर्लभत्वादिति भावः । अतिरिक्तसम्भावनया । प्रसिद्धरूपातिरिक्ते रूपत्वसम्भावनया । तथा । विशेषरूपेण सर्वत्र व्याप्तिनिश्चयेऽपि सामान्यरूपेण संशयः । विशेषधर्मपुरस्कारेण निश्चयस्य सामान्यधर्मपुरस्कारेण संशयं प्रति प्रतिबन्धकतायां तद्विशेषधर्मशून्ये सामान्यधर्मसम्भावनाया उत्तेजकत्वोपगमादिति भावः । सम्भावनायाश्च निश्चयसाधारणेन ज्ञानत्वेनैवोत्तेजकत्वात् पार्थिवाद्यतिरिक्तमपि रूपमस्तीति भ्रमेऽपि रूपं वायुत्वाभावव्यभिचारि न वेति संशयस्योक्तनिश्चयदशायामुत्पत्तेः ।

नन्वेवं सामान्यस्याप्रत्यासत्तित्वेऽपि व्याप्तिनिश्चयविषयप्रसिद्धधूम एव अतिरिक्तसम्भावनया व्यभिचारसंशयोपपत्तेः प्रकृतासिद्धिरियत आह । विशेषतश्चेति । लौकिकसन्निकर्षायितः । उपस्थितानाम् । प्रसिद्धधूमरूपातिरिक्तानाम् । घटगुणादिद्रव्यरसादीनाम् । विशेषतः । विशेषधर्मघटत्वादिपुरस्कारेण । विशेषदर्शनाक्रान्ततया । धूमत्वरूपत्वाद्यभावनिश्चयविषयतया तेषु धूमत्वरूपत्वादिसम्भावनाया असम्भवात् । प्रसिद्धधूमाद्यतिरिक्तत्वेन रूपेण विशेषदर्शनाविषयतया अनुपस्थितवस्त्वन्तरमेवातिरिक्तसम्भावनायां धर्मितया विषयो वाच्यः । तादृशातिरिक्तोपस्थितिश्च सामान्यलक्षणां विना नेति तदर्थमेव तस्याः प्रत्यासत्तित्वं स्वीकार्यमित्यर्थः ।

अतिरिक्तसम्भावनापदार्थं यथासम्भवं विकल्प्य दूषयति । यत इति ।

(दी०) यतो रूपेषु नातिरिक्तत्वसम्भावना तेषु वि-

शेषदर्शनात् । नाप्यतिरिक्ते रूपत्वसम्भावना रूपान्यत्र रूपं द्रव्यादयो रसादयश्च न रूपं प्रसिद्धरूपभिन्नं यद्रूपभिन्नं द्रव्यं रसादि वा तत् सर्वं न रूपं रूपत्वाभाववच्चेत्यादिविशेषदर्शनेन तस्या अप्ययोगात् । तदानीञ्चोक्तसंशयस्य सर्वजनानुभवसिद्धत्वात् अतिरिक्तसम्भावनाया गौरवेणाप्रयोजकत्वाच्च । तस्मात्तत्रैव धूमे रूपे वा धूमत्वेन रूपत्वावच्छेदेन व्याप्तेरग्रहात् व्यभिचारसंशयो नायुक्तः ।

(गा०) अतिरिक्तत्वसम्भावना । प्रसिद्धरूपातिरिक्तत्वकोटिकसम्भावना । प्रकृते उत्तेजिका भवितुमर्हतीति शेषः । तेषु । सर्वेषु रूपेषु । विशेषदर्शनात् । विशेषतोऽनतिरिक्तत्वनिश्चयात् । समानविषयकत्वमात्रेण विरोधितामते रूपधर्मिकसम्भावनाया एवोत्पादासम्भवादिति शेषः । न रूपमित्यन्तस्य इत्यादीत्यस्येति पदेन प्रत्येकं सम्बध्यते । रूपान्यरूपमित्यादिविशेषदर्शने सामान्यप्रत्यासत्तिपदे तद्बलात् सर्वेषामेवातिरिक्तानां धर्मितया रूपत्वसम्भावनाधर्मिणो दुर्लभतया तस्या अयोगादित्यर्थः । रूपभिन्ने रूपभिन्नत्वेन सामान्यतो विशेषदर्शनमुक्त्वा विशेषतो द्रव्यत्वादिनापि तदुक्तुं द्रव्यादय इति । समानविशेष्यकत्वेन विरोधितामतेऽपि समानप्रकारकत्वस्य तन्त्रत्वे प्रसिद्धरूपातिरिक्तत्वेन प्रकारेणातिरिक्तधर्मिकसम्भावनायां केवलरूपान्यत्वादिप्रकारेणातिरिक्तधर्मिकविशेषदर्शनस्याविरोधित्वसम्भवात् । सामान्यतो विशेषतश्च विशेषदर्शने प्रसिद्धरूपभिन्नत्वमपि धर्मितावच्छेदके अन्तर्भावयति । प्रसिद्धेति । प्रसिद्धरूपभिन्नं सर्वं न रूपमिति विशेषदर्शने प्रसिद्धरूपेषु सर्वत्र वायुत्वाभावव्याप्तिनिश्चये च सति रूपे तद्व्यभिचारसंशयाभावस्यानुभविकतया तदानीं तादृशसम्भावनाविरह इष्ट एवेति रूपभिन्नत्वमपि सामान्यतो विशेषतश्च विशेषदर्शनस्य धर्मितावच्छेदकेऽन्तर्भावितम् । सर्वमिति च सर्वेषां विशेषदर्शनविषयत्वलाभाय न तु तस्य व्यापकतावगाहित्वलाभाय एतन्मते तदवगाहिताया अकिञ्चित्करत्वात् । रूपभेदनिश्चयस्य यदि तादात्म्येन रूपकोटिकमेव संशयं प्रति विरोधिता न तु समवा-

येन रूपत्वकोटिकं तदभिप्रायेण रूपत्वाभावनिश्चयोऽपि दर्शितः । तादृशविशेषदर्शनदशायां संशयोऽप्यपलपनीय इत्यत आह । तदानीं चेति । उक्तसंशयस्य । रूपं वायुत्वाभावव्यभिचारि न वेति संशयस्य । रूपं वायुत्वाभावव्यभिचारि न वेति संशयस्य अनुभवे विषयमानं गौरवेण निराकरोति । अतिरिक्तेति । गौरवेण । प्रतिबन्धकतावच्छेदक-गौरवेण । तत्तद्विशेषधर्मपुरस्कारेण निश्चयत्वेन प्रतिबन्धकतायां तत्त-द्विशेषधर्मशून्ये सामान्यधर्मसम्भावनाया विशिष्य छेत्तकतया प्र-तिबन्धकताधिन्येन वा । अप्रयोजकत्वात् । अनुत्तेजकत्वात् । तथा च तद्धर्मसामानाधिकरण्येन विशेषणावगाहिज्ञाने शुद्धतद्धर्मावच्छे-देन तद्धर्मावच्छेदेन विशेषणाग्रहे च तद्धर्मसामानाधिकरण्येन वि-परीतनिश्चयो विरोधी न तु तद्धर्मसामानाधिकरण्यमात्रेण विशेषण-ग्रहे तद्धर्मसामानाधिकरण्यमात्रेण विपरीतनिश्चय इति भावः । उप-संहरति । तस्मादिति । नायुक्त इति । तथा च नोक्तयुक्त्या सामा-न्यप्रत्यासत्तिसिद्धिरिति भावः ।

सामान्यप्रत्यासत्तौ युक्त्यन्तरं निराकर्तुमुपन्यस्यति । यत्त्विति ।

(दी०) यत्तु सामान्याभावभानार्थं सा स्वीकार्या तां विना सकलतत्प्रतियोगिज्ञानासम्भवादिति । तन्न । न हि अभा-वस्य ज्ञानमात्रे लौकिकप्रत्यक्षे वा प्रतियोगिज्ञानं कारणं तत्र सामान्यलक्षणया इदन्त्वादिना च भाने व्यभिचारान्मा-नाभावाच्च ।

(गा०) सामान्याभावभानार्थम् । घटादिसामान्याभावभानार्थम् । घटादिसामान्याभावभासकसकलघटादिभानार्थम् । सा । सामान्यप्र-त्यासत्तिः । सकलप्रतियोगीति । घटादिसामान्याभावीयसकलप्रति-योगीत्यर्थः । इदं च सकलप्रतियोगिज्ञानत्वेनाभावधीहेतुता तत्तद्घ-टादिव्यक्तिप्रतियोगिकाभावबुद्धौ तत्तद्घटादिव्यक्तिज्ञानत्वेन वा हे-तुतेत्यभिमानेन स चाग्रे निराकरणीयः । प्रथमतः प्रतियोगिज्ञानस्य स्वातन्त्र्येणाभावधीहेतुतामेव खण्डयति । न हीति । ज्ञानमात्र इति । लौकिकालौकिकसाधारणप्रत्यक्ष इत्यर्थः । अभावप्रत्यक्षत्वं अभाव-लौकिकप्रत्यक्षत्वं वा प्रतियोगिज्ञानजन्यतावच्छेदकमित्युभयमपि

नेति फलितम् । इत्थमने सामान्यप्रत्यासत्त्यभावेन तज्जन्याभावप्रत्यक्षे व्यभिचारोऽसम्भवदुक्तिक इत्यतस्तथेति । सामान्यलक्षणयेति । अग्रिमेण भाने व्यभिचारादित्यनेन सम्बध्यते ।

द्वितीयपक्षेऽभावत्वादिसामान्यज्ञप्रतियोगिज्ञाननिरपेक्षाभावप्रत्यक्षे लौकिकत्वविरहेण व्यभिचारानवकाशात् पक्षद्वये दोषमाह । इदन्त्वादिनेति । तेजोरूपप्रतियोगिज्ञानशून्यकालीने इदं नीलमिति तमःप्रत्यक्षे इत्यर्थः । प्रतियोगिविशेषिताभावविषयकप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वोपगमे उक्तव्यभिचारानवकाशात्तन्मते दोषान्तरमाह । मानाभावादिति । प्रतियोगिज्ञानशून्यकाले प्रतियोग्यविशेषिताभावविषयकस्य नेत्याकारकाभावप्रत्यक्षस्य सर्वानुभवविरुद्धस्य वारणायैव प्रतियोगिज्ञानहेतुतास्वीकारेऽपि प्रतियोग्युपरागावगाहित्वस्य प्रतियोगिज्ञानजन्यतावच्छेदकत्वोपगमे च प्रतियोग्यनुपरक्ताभावप्रत्यक्षापत्तौ प्रतियोगिज्ञानविरहस्याकिञ्चित्करतया प्रकारान्तरेणैव तस्य वारणीयतया प्रतियोगिज्ञानहेतुतायां मानाभावादित्यर्थः ।

ननूलप्रतीतिविषयस्तमोनिष्ठमिदन्त्वं तेजोभावत्वमेव तेन रूपेण ज्ञानं च तेजोज्ञानं विना न कस्याप्यनुमतमिति प्रतियोगिप्रकारकत्वस्य प्रतियोगिज्ञानजन्यतावच्छेदककोटावनिवेशेऽपि न व्यभिचार इत्यत आह ।

(दी०) अत एवेदन्त्वादिनोपस्थिते तमसि भावत्वाभावत्वसंशयः तेजोभावत्वेनोपस्थिते तदयोगात् । प्रतियोगिविशेषिततज्ज्ञानं तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते, सकलप्रतियोगिविषयत्वं तु तस्यासिद्धम्, प्रतियोगिज्ञानस्य हेतुत्वेऽपि प्रतियोगितावच्छेदकविशिष्टयत्किञ्चित्प्रतियोगिज्ञानादेव तत्सम्भवात् यावत्प्रतियोगिज्ञानत्वेन गौरवेणाहेतुत्वात् ।

(गा०) अत एवेति । तेजोज्ञानं विनापि तेजोभावत्वानात्मकेन इदन्त्वेन तमःप्रत्यक्षोत्पत्तेरेवेत्यर्थः । इदन्त्वादिनोपस्थिते । इदन्त्वादिरूपधर्मितावच्छेदकप्रकारेण प्रत्यक्षतः प्रतीते । तेजोभावत्वेनोपस्थिते । तेजोभावत्वरूपधर्मितावच्छेदकविशिष्टे । तदयो-

गात् । भावत्वसंशयायोगाच् । तद्व्याप्यैकधर्मस्य, तात्त्विकधर्मिता-वच्छेदकताया अनुभवविरुद्धत्वादिति भावः ।

ननु प्रतियोगिज्ञानहेतुतामते तज्जन्यतावच्छेदके प्रतियोगिप्रकारतानिवेशे प्रतियोगिज्ञानशून्यकाले न प्रतियोग्यनुपरक्ताभावप्रत्यक्षापत्तिः, तादृशाभावलौकिकप्रत्यक्षस्याप्रसिद्धेः प्रतियोगिज्ञानकारणत्वानुपगमे च प्रतियोगिज्ञानशून्यकाले प्रतियोगिज्ञानदशाप्रसिद्धस्यैवाभावप्रत्यक्षस्यापत्तिरिति तत्कारणत्वमावश्यकमित्यत आह । प्रतियोगिविशेषितेति । तज्ज्ञानम् । अभावभानम् । विशिष्टवैशिष्ट्ययोग्यमर्यादाम् । प्रतियोगितावच्छेदकविशिष्टवैशिष्ट्यावगाहिनाम् । नातिशेते । नातिक्रामति । तच्छून्य न भवतीति यावत् । तथा च तत्र विशेषणतावच्छेदकप्रकारकज्ञानविधयैव प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानमपेक्षितं किं तत्र स्वतन्त्रप्रतियोगिज्ञानहेतुतयेति भावः ।

ननु मा भूदभावबुद्धौ स्वातन्त्र्येण प्रतियोगिधीः कारणं तथापि सामान्याभावबुद्धौ प्रत्यासत्त्यन्तराभावेन सकलप्रतियोगिभानमनुपपन्नमिति तदुपपत्तये सा स्वीकार्येत्यत आह । सकलेति । तस्य । सामान्याभावप्रत्यक्षस्य । असिद्धत्वादिति । घटो नास्तीति सामान्याभावबुद्धौ घटत्वादिसामान्यधर्मे प्रतियोगितावच्छेदकत्वपर्याप्तिमान्नीलघटो नास्तीति बुद्धौ च तत्र तदभावादेव तयोर्वैलक्षण्योपपत्तेरिति भावः । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य स्वतन्त्रहेतुतामभ्युपेत्यापि पूर्वोपदर्शितामिमानं निराकृत्य सामान्यप्रत्यासत्तिं खण्डयति । प्रतियोगिज्ञानस्येति ।

(दी०) न च तदभावबुद्धौ तज्ज्ञानहेतुत्वात् यावत्प्रतियोगिज्ञानस्य हेतुत्वमर्यादासम् । मानाभावात्, ध्वंसप्रागभावात्यन्ताभावाश्च प्रतियोग्यादिभिन्नत्रयप्रतियोगिकाः द्रव्यग्रहेऽप्येकग्रहादेव गृह्यन्ते इत्यभ्युपगमाच्च । अन्यथाऽस्तु तेजोविशेषसामान्याभावो नाभावसमुदायः यावत्तदभावानामेकत्रासम्भवात् अननुगमात् गौरवात्तेजोविशेषत्वादिज्ञानस्य तेजःसामान्याभावश्च विरहेऽपि तेजोविशेषात्यन्ताभावप्रागभावानां प्रत्यक्षानभ्युपगमाच्च प्राग-

भावप्रत्ययोऽपि च प्रतियोगिवृत्तिघटत्वादिप्रकारकज्ञानसाध्यो न प्रतियोगिज्ञानमपेक्षते ।

(गा०) न चेत्यनन्तरं यावत्तस्य कारणतावच्छेदककोटावप्रवेशोऽपीति पूरणीयम् । तदभावबुद्धौ । तत्तद्व्यक्तिप्रतियोगिकाभावबुद्धौ । तज्ज्ञानत्वेन हेतुत्वात् । तत्तद्व्यक्तिज्ञानत्वेन हेतुत्वात् तत्तदभावप्रत्यक्षे तत्तदभावीयप्रतियोगिज्ञानत्वेन हेतुत्वे यावदभावानां प्रतियोगिकानामपि सम्बन्धविशेषेण ज्ञानत्वेन प्रतियोग्यपेक्षया बहुतरतया कार्यकारणभावबाहुल्यमिति भावः । मानाभावादिति । एकधर्मप्रकारकप्रतियोगिज्ञानादन्यधर्मावच्छिन्नाभावप्रत्यक्षवारणाय तत्तद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तत्तद्धर्मप्रकारकज्ञानत्वेन हेतुताया आवश्यकत्वे उक्तकार्यकारणभावे मानाभावादित्यर्थः ।

ननु ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वाभावात् घटो ध्वस्त इत्यादिप्रत्यक्षानुरोधेन तत्तद्घटादिव्यक्तिप्रतियोगिकाभावप्रत्यक्षे तत्तद्व्यक्तिज्ञानत्वेन कारणत्वमावश्यकमित्यत आह । ध्वंसेति । घटध्वंसस्य घटात्यन्ताभावविरोधितया स एव घटात्यन्ताभावस्यात्यन्ताभावः प्रागभावध्वंसस्य प्रतियोगितद्ध्वंसस्वरूपतया स घटप्रागभावस्य ध्वंसोऽपीति घटतदत्यन्ताभावतत्प्रागभावत्रय प्रतियोगिकः । एवं घटप्रागभावो घटात्यन्ताभावस्यात्यन्ताभावः घटध्वंसस्य प्रागभावश्च ध्वंसप्रागभावस्य प्रतियोगितत्प्रागभावात्मकत्वादिति सोऽपि घटादित्रयप्रतियोगिकः । घटात्यन्ताभावोऽपि तद्ध्वंसतत्प्रागभावात्यन्ताभावसमनियततया तदभिन्न इति घटादित्रयप्रतियोगिकः अथ चैकैकप्रतियोगिज्ञानादेव गृह्यते इत्यभ्युपगमेन तत्प्रत्यक्षे परापरप्रतियोगिज्ञानस्य व्यभिचारादित्यर्थः । स्वमते समनियतसङ्ख्यापरिमाणाद्यभावस्याभिन्नतया संख्यादिज्ञानजन्ये तदभावप्रत्यक्षे परिमाणादिज्ञानस्य व्यभिचारोऽपि बोध्यः । तथा चागत्या प्रतियोगिज्ञानहेतुतामते तदभावप्रत्यक्षे तत्तदभावीयप्रतियोगिज्ञानत्वेनैव हेतुता वाच्येति न सामान्याभावप्रत्यक्षे यावत्प्रतियोगिज्ञानापेक्षेति भावः ।

यथाभावाभेदेऽपि प्रतियोगितावच्छेदकादिभेदेनानुयोगिताभेदात् तत्तद्व्यक्तिनिरूपितानुयोगिताप्रत्यक्षत्वस्य तत्तद्व्यक्तिज्ञानजन्यता-

चच्छेदकत्वाच्च व्यभिचारः । अत एवेदन्त्वादिनानुयोगिताविशेषाधियकतमःप्रत्यक्षेऽपि न व्यभिचारः । एवं च सामान्याभावीयघटत्वादिसामान्यधर्मावच्छिन्नसकलप्रतियोगिनिरूपितानुयोगितायाः ऐक्यात् तत्प्रत्यक्षानुरोधेन यावद्घटादिज्ञानमावश्यकमिति चेन्न । तत्तद्व्यक्तिनिरूपितानुयोगिताप्रत्यक्षे तत्तद्व्यक्तिज्ञानहेतुत्वेऽनन्तप्रतियोगिभेदादनन्तकार्यकारणताप्रसङ्गेन विषयतया अनुयोगिताप्रत्यक्षं प्रति स्वविषयनिरूपितत्वसम्बन्धेन ज्ञानत्वेनैव हेतुताया ध्वंसादिप्रत्यक्षानुरोधेन कल्पनीयत्वात् यत्किञ्चिद्घटादिज्ञानादेव सामान्यधर्मावच्छिन्ननिरूपितानुयोगिताप्रत्यक्षोपपत्तेः ।

उद्भूतानभिभूतरूपवत्तेजःसामान्याभावो नान्धकारपदार्थः तेजोध्वंसप्रागभावाधिकरणे तत्सामान्याभावासत्त्वेन तमःप्रतीत्यनुपपत्तेः । किं तु तादृशतत्तत्तेजोव्यक्तीनां विशेषाभावसमुदाय एव, स च प्रतियोगिज्ञानहेतुतामते यावत्तादृशतेजोज्ञानग्राह्य इति सामान्यप्रत्यासत्त्याऽत्र इति मिश्रमत दूषयति । अन्धकारश्चेति । तेजोविशेषेति । उद्भूतानभिभूतरूपवत्तत्र इत्यर्थः । अभावः संयोगसम्बन्धेन ग्राह्यः तेन सम्बन्धान्तरावच्छिन्नाभावमादाय नातिप्रसङ्गः । न वा सम्बन्धसामान्येनाभावविवक्षाधीनोऽसम्भवः । न चैवमालोकसमवधानेऽपि रूपादौ तमःप्रत्ययापत्तिः । संयोगसम्बन्धावच्छिन्नतेजोभावस्य तत्र सर्वदा सत्त्वादिति वाच्यम् । तत्र तेजोविशेषसामान्याभावग्रहस्य सर्वसंमतत्वात् । रूपे तम इति व्यवहारापत्तेश्च तमःप्रभृतिपदसमभिव्याहारे सप्तम्यर्थादेर्द्रव्यानुयोगिकविशेषणतावच्छिन्नाधेयतायां व्युत्पन्नत्वादसम्भवात् ।

यत्तु तेजःसामान्याभावविशिष्टद्रव्यत्वमेवान्धकार इति । तन्न । तथा सत्यालोकं विनान्धकारप्रत्यक्षं न स्यात् द्रव्यत्वलौकिकप्रत्यक्षेऽपि तस्य हेतुत्वात् । इदं तु ध्वंसादेः सामान्याभावाविरोधित्वाभिप्रायेण ।–

अत्र च तादृशसमुदायस्य एकैकप्रतियोगिकयावत्तादृशतेजोभावत्वेन तमःप्रतीतिविषयता एकैकव्यक्तिप्रतियोगिकत्वनिवेशाच्च सामान्याभावस्य यावत्तदन्तर्गतत्वम् । अभावे यावत्त्वानिवेशाच्च ता-

दृष्टतेजस्यपि देशे यत्किञ्चित्तेजोऽभावमादायातिप्रसङ्गः । किं वा यावतीनां तादृशतेजोव्यक्तीनां तत्तद्व्यक्तित्वेनाभावानां तत्तद्व्यक्त्यभावत्वेन(१) तमःप्रतीतिविषयता प्रतियोगिनि यावत्त्वनिवेशात् तेजोविशेषाधिकरणे तमःप्रत्ययः तत्तेजोव्यक्तेरेव तदभावासत्त्वात्। व्यासज्यवृत्तिधर्मावच्छिन्नस्य किञ्चिद्विशेषणविशिष्टस्य च तेजसस्तेजस्विन्यप्यभावस्याक्षतत्वादतिप्रसङ्ग इति तत्तद्व्यक्तित्वेनेति ।

ध्वंसप्रागभावप्रतियोगितायां प्रतियोगिवृत्तिधर्मविशेषावच्छिन्नत्वस्याप्रामाणिकत्वे तत्सङ्ग्रहाय न तद्व्यक्तित्वान्यधर्मानवच्छिन्नत्वमेव प्रतियोगितायां निवेशनीयं सम्बन्धान्तरावच्छिन्नाभावमादायाऽतिप्रसङ्गस्य वारणाय संयोगसम्बन्धावच्छिन्नत्वं संयोगान्यसम्बन्धानवच्छिन्नत्वं वा प्रतियोगितायां निवेश्यम्, अनयोः प्रथमं पक्षं दूषयति । यावत्तदभावानामिति । एकत्रासम्भवादिति । ध्वंसप्रागभावयोः प्रतियोगिदेशे एव सत्त्वेन व्यधिकरणतेजसो ध्वंसद्वयस्य प्रागभावद्वयस्य चैकाधिकरण्यासम्भवादिति भावः ।

ननु स्ववृत्तिसमानकालीनयावदभावस्य स्वाधिकरणकतमःप्रत्ययविषयत्वोपगमे नोक्तदोषः समानकालीनत्वनिवेशात्स्ववृत्त्यतीतानागतप्रागभावध्वंसघटितसमुदायस्य स्वस्मिन्नेकदाऽसत्त्वेऽपि न क्षतिरित्यत आह । अननुगमादिति । तथा च नानाधिकरणे एकाकारतमःप्रत्ययानुपपत्तिर्विषयाननुगमादिति भावः । ध्वंसप्रागभावादिघटिताभावसमुदायस्य एकत्रासम्भवेऽपि यत्किञ्चिदेकैकैकाभावघटितसमुदायस्य सर्वत्र तमःप्रत्यक्षदशायामक्षतत्वाद्वितीयपक्षे नोक्तदोष इत्यतः पक्षद्वये दोषमाह । गौरवादिति । अनन्तानामभावानां तमःप्रतीतिविषयताकल्पने इत्यादिः । दोषान्तरमाह । तेजोविशेषेति । सामान्यप्रत्यासत्त्याप्यनुपपद्यमानं स्वप्रतियोगितावच्छेदकतेजोनिष्ठतत्तद्व्यक्तित्वप्रकारकज्ञानमन्तरेण तत्तद्व्यक्तित्वावच्छिन्नतेजोऽत्यन्ताभावस्य प्रतियोगिसामग्रीव्यंग्यतया तेजःसामग्रीविरहे तत्प्रागभावस्य च प्रत्यक्षानभ्युपगमादित्यर्थः । तथा च तदानीमप्यनुभूयमानस्य तमःप्रत्यक्षस्य तेजोभावकूटविषयकत्वासम्भव इति भावः ।

---

(१) तत्तद्व्यक्तित्वेनेति–२ पु० पा० ।

ननु सामान्याभावप्रत्यक्षस्य यत्किञ्चित्प्रतियोगिज्ञानात् सम्भवेन तदनुरोधात् सामान्यप्रत्यासत्तेरनावश्यकत्वेऽपि प्रागभावप्रत्यक्षजनकतत्प्रतियोग्यनागतव्यक्तिज्ञानार्थं तदावश्यकतेति युक्तिं प्रतियोगिज्ञानहेतुतामनङ्गीकुर्वन् दूषयति । प्रागभावप्रत्ययोऽपीति । प्रतियोगिविशेषितप्रागभावप्रत्ययोऽपीत्यर्थः । घटत्वादेः सामान्यधर्मस्य प्रागभावादिप्रतियोगितानवच्छेदकत्वात् प्रतियोगिवृत्तीत्युक्तम् । घटत्वादिप्रकारकज्ञानस्य तद्विशिष्टघटाद्युपरक्तप्रागभावप्रत्यक्षेऽपि विशिष्टविशेषणकधियो हेतुत्वनापेक्षा तज्जन्यतावच्छेदककोटौ घटत्वादिप्रकारतानिरूपितावशेष्यतावच्छिन्नघटादिनिष्ठप्रकारताशालिबुद्धित्वस्य विशेष्ये विशेषणमिति रीत्या ज्ञानसाधारणस्य तद्व्याप्तस्य घटत्वावच्छिन्नप्रकारताकत्वरूपघटत्वविशिष्टप्रकारताकत्वस्य घटत्वघटोभयपर्याप्तप्रकारताकत्वरूपघटत्वविशिष्टपर्याप्तप्रकारताकत्वस्य वा निवेशात् न तु तदवच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गकत्वरूपतद्विशिष्टप्रतियोगिकवैशिष्ट्यावगाहित्वस्य येन घटत्वादेरतिप्रसक्तत्वया ध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वेन तत्प्रतीतौ प्रतियोग्यंशे उपलक्षणतयैव भानेन तस्या घटत्वविशिष्टप्रतियोगिकवैशिष्ट्यानवगाहित्वेनासङ्ग्रहः स्यादिति ध्येयम् ।

यद्यपि विशिष्टप्रतियोगिकत्वेन वैशिष्ट्यानवगाहिविशेषणान्तरविशेष्यताप्रकारकेऽपि ज्ञाने न विशिष्टविशेषणज्ञानत्वेन हेतुता दीधितिकारसम्मता पक्षत्वविशिष्टकर्म्यादिज्ञानं विनापि विशिष्टप्रकारककर्म्याद्यनुमितेस्तेनोपगमात्तथापि प्रत्यक्षे विशिष्टप्रकारके एव विशिष्टविशेषणज्ञानं पूर्वोक्तयुक्त्या हेतुः विशिष्टप्रतियोगिकत्वेन वैशिष्ट्यावगाहिता क्वचिद्विशिष्टप्रकारकज्ञानेन सर्वत्रान्यत्र नियामकं बाधविरहाभावादिकमेवेत्यभिप्रायेणेदम् ।

केचित्तु विशेषणान्तरप्रकारतानिरूपितविशेष्यतावच्छिन्नप्रकारता न विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदिका अत एव वाशविशिष्टकर्म्यादिज्ञानं विनापि लाघवोपनीतैकत्वादिविशेष्यताप्रकर्म्यादिप्रकारिकानुमितिज्ञानत्वादिनिर्विकल्पकात्तद्विशेष्यतापन्नानादिप्रकारकानुव्यवसायश्चोत्पद्यते नापि विशिष्टप्रतियोगिकत्वेन वैशिष्ट्यावगाहित्वं तथा घटत्वादिनिर्विकल्पकादुपलक्षणीभूतघट

त्यादिविशेष्यतापन्नप्रतियोग्युपरागेण ध्वंसप्रागभाव(१)प्रत्यक्षाप-त्तेः। किं तु विशिष्टप्रकारकत्वं तथा विशिष्टप्रकारकत्वं च विशेषण-विशेष्योभयपर्याप्तप्रकारताकत्वं विशेषणनिरूपितावच्छेद्यतात्यस-म्बन्धघटप्रकारकत्वं वा घटत्वाद्युपलक्षितघटादिप्रतियोगिकानुयो-गिताविशेषरूपवैशिष्ट्यावगाहिन्यपि प्रागभावादिप्रत्यक्षे ताहश्येव घटत्वादिप्रकारिणोपेयते अतो न घटादिनिर्विकल्पकात्ताहश-प्रागभावप्रत्यक्षमित्याहुः। तच्चिन्त्यम्। तद्धर्मविशिष्टविशेषण-ज्ञानपूर्वकतद्धर्मोपलक्षितवैशिष्ट्यावगाहिज्ञाने तद्धर्मनिर्विकल्प-कानन्तरजातघटवद्भूतलमित्यादिज्ञाने ऽपर्त्तमानाया व्यासज्य वृत्त्यादिप्रकारताया आनुभविकत्वविरहेणाप्रामाणिकत्वात्। ज्ञा-नवैलक्षण्यानुभवविरहे कार्यतावच्छेदकत्वेनातिरिक्तविषयतास्वी-कारेऽपसिद्धान्तात्।

अत एव पद्साध्यकानुमानव्याख्यावसरे संवादिप्रवृत्ति-त्वावच्छिन्ननिरूपितजनकतारूपहेतुग्रहः तादृशजनकतावच्छेद-कप्रमात्वग्रहं विना न सम्भवतीत्याक्षिप्य द्वयी संवादित्ववि-शिष्टप्रवृत्तिविशेषितजनकताग्रहसामग्री एका विशिष्टविशेषणज्ञान घटिता अपरा तदघटिता जनकत्वरूपविशेष्ये प्रवृत्तिं प्रवृत्तौ चोपल-क्षणतया संवादित्वमवगाहमानाया धियः सामग्री तत्राद्यसामग्रीज-न्यज्ञाने जनकतायां संवादित्वविशिष्टप्रवृत्तिप्रतियोगिकनिरूपितत्व-रूपवैशिष्ट्यविषयकत्वेन प्रमात्वावच्छिन्नजनकताया एव विषयतया प्रमात्वाग्रहात्तदसम्भवेऽपि तद्ग्रहं विनापि संवादित्वोपलक्षितप्र-वृत्तिनिरूपितसामान्यजनकताविषयको हेतुग्रहः सम्भवतीति मि-श्राणां समाधानमपि सङ्गच्छते संवादित्वोपलक्षितप्रवृत्तिवै-शिष्ट्यावगाहिग्रहेऽपि विशिष्टविशेषणज्ञानजन्यतावच्छेदकप्रका-रतोपगमे तादृशज्ञानसामग्र्या अपि विशिष्टविशेषणज्ञानघटित-तया विशिष्टज्ञानघटितसामग्र्याः प्रामाण्यरूपावच्छेदकाग्रहप्रयुका-सम्भवाभिधानासङ्गतेः।

अभावबुद्धौ प्रतियोगिज्ञानस्य स्वातन्त्र्येणाहेतुत्वेऽपि प्रति-योगिविशेषितप्रागभावप्रत्यक्षे प्रतियोग्युपनायकतज्ज्ञानापेक्षादुर्वा-

---

(१) स्वप्रागभावेति-२ पु० पा०।

रैव तथा चानागतप्रतियोगिभानार्थं सामान्यप्रत्यासत्त्यादर इत्याशङ्कते । अथेति ।

(दी०) अथ घटो भविष्यतीति प्रत्यक्षं प्रतियोगिविशेषितं प्रागभावमवगाहते, न च प्राचीनास्तत्प्रतियोगिनस्तत्प्रतियोगित्वावगाहने च भ्रमत्वम्, न चानागते घटे प्रत्यासत्त्यन्तरमस्ति अतः सामान्यप्रत्यासत्त्या घटत्वेनानुभूतं स्मृतश्च तं तदालम्बते । नं च चरमकारणरूपसामग्रीध्वंस्यः प्रागभावो वाच्यः अन्यदा तदप्रत्ययापत्तेः स्वरूपसत्याः स्वरूपेण वा ज्ञातायास्तथात्वेऽतिप्रसङ्गात् व्याप्यत्वेन गृहीतायास्तथात्वं वाच्यम् तथा च तद्धेतुका प्रागभावस्यानुमितिरेव तावत्कालं प्रागभावस्यासत्त्वेन प्रत्यक्षायोगाच्चेति वाच्यम् ।

(गा०) घटो भविष्यतीति प्रत्यक्षमिति । घटो भविष्यतीति व्यवहारप्रयोजकं प्रागभावप्रत्यक्षमित्यर्थः । तच्च इदानीमत्र घटो नास्ति इदानीमत्र घटप्रागभाव इत्याकारकं तावतैवोपनीतानागतघटस्य प्रकारतासम्भवात् तस्य तथाविधव्यवहारप्रयोजकता यथाकथञ्चिद्वर्त्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वविषयकतया तथाविधप्रत्यक्षस्योक्तव्यवहारापेक्षणीयत्वाभिधानं चापलापनिराकरणायेत्यवधेयम् । प्राचीनाः । प्रत्यक्षपूर्वकालीनाः । तत्प्रतियोगिनः । तत्प्रत्यक्षविषयवर्त्तमानप्रागभावप्रतियोगिनः । येन लौकिकसन्निकर्षेण तज्ज्ञानसम्भवात्तत्सामान्यप्रत्यासत्तिःस्यात् ।

ननु प्राचीनानामप्रतियोगित्वेऽपि प्रतियोगितया तेषामेव भानमङ्गीकार्यं न त्वनागतानामित्याशङ्कायामाह । तत्प्रतियोगिकत्वेति । भ्रमत्वमिति । नियमेन प्रागभावप्रत्यक्षस्येत्यादिः । स्यादिति शेषः । प्रत्यासत्त्यन्तरादेवानागतप्रतियोगिज्ञानं भविष्यतीत्यत आह । न चेति । सामान्यप्रत्यासत्त्या घटत्वेनेति । घटत्वरूपसामान्यलक्षणप्रत्यासत्त्येत्यर्थः । प्रागभावप्रत्यक्षे सामान्यप्रत्यासत्त्याप्यज्ञातप्रतियोगिनः प्रकारतया भानासम्भवादनुभूतमिति । अनुभवोपनीतमित्यर्थः । प्रत्यासत्त्येत्यस्यानुभवेनान्वयः । घटान्तरेणापि सन्निकर्षविरहे घटत्वसा-

मान्यलक्षणया अनागतघटज्ञानासम्भवात् सर्वत्र प्रागभावप्रत्यक्षे अनुभवोपनीतानागतप्रतियोगिभानासम्भवात् । स्मृत चेति । क्वचित्सामान्यप्रत्यासत्तिजप्राचीनानुभवमूलकस्मरणोपनीतमर्पत्यर्थतम् । अनागतघटम् । तत् । प्रागभावप्रत्यक्षम् । आलम्बते । अवगाहते ।

प्रागभावप्रत्यक्षमेव न भवतीत्याशङ्कते । न चेति । चरमकारणरूपेति । विलक्षणकपालसंयोगादिरूपेत्यर्थः । अन्यदा । तादृशसामग्र्यसमवधानदशायाम् । तत्प्रत्ययात् । अत्र घटो भविष्यतीत्याद्यनिश्चयात् । स्वरूपसत्या । स्वज्ञानानपेक्षाया । स्वरूपेण ज्ञाताया । कारणताव च्छेदकविलक्षणसंयोगत्वादिप्रकारकज्ञानमात्रापेक्षाया । तथात्वे । प्रागभावव्यञ्जकत्वे । अतिप्रसङ्गात् । तादृशसामग्र्या कार्योत्पत्तेः प्रागभावस्य वा व्यभिचारस्य धर्म्यवृत्तित्वस्य वा ग्रहदशायामपि प्रागभावप्रत्ययप्रसङ्गात् । तत्र चेह घटो भविष्यति न वेत्यादिसंशयस्यानुभविकतया प्रागभावप्रत्यक्ष नेष्टापत्तिसम्भव इति भाव । व्याप्यत्वेन प्रागभावव्याप्यत्वेन । धर्मिवृत्तित्वेन चत्वपि द्रष्टव्यम् । तद्धेतुका । सामग्रीहेतुका । अनुमितिरेव सम्भवति । व्याप्यवत्ताज्ञानघटितत्सामग्रीसत्त्वादिति शेष । तथा च किं तत्प्रत्यक्षोपगमेन अनुमितौ चानागतभान पक्षधर्मतावलादेवेति न सामान्यप्रत्यासत्तिसिद्धिरिति भाव ।

अनुमितिसम्भवेऽपि साक्षात्करोमीत्यनुव्यवसायानुरोधेन तत्प्रत्यक्षमवश्यमङ्गीकर्तव्यमित्याशङ्क्याह । तावदिति । तावत्कालम् । सामग्रीज्ञानपर्यन्तम् । प्रागभावस्यासत्त्वेनेति । प्रागभावस्य प्रतियोगिकाले असत्त्वनियमात् सामग्रीसमवधानोत्तर तज्ज्ञानोत्पत्तिसमय प्रतियोग्युत्पत्त्यावश्यकतया तत्प्रागभावावस्थानासम्भवेनेत्यर्थ । प्रत्यक्षायोगादिति । विषयस्य प्रत्यक्षहेतुत्वादिति भाव ।

प्रागभावव्याप्यत्वेन सामग्रीज्ञान न व्यञ्जक येन प्रागभावानुमितिसामग्री नियता स्यात् अपि तु कार्योत्पादव्याप्यत्वेनैव न हि कार्योत्पत्तिव्याप्यवत्तानिश्चये इह घटो भविष्यति न वेत्यादिसंशय आनुभविको येन तादृशनिश्चयदशायामपि प्रागभावव्याप्यवत्तानिश्चय विनापि प्रागभावप्रत्यक्षस्वीकारो न सम्भवेत् ।

न च कार्योत्पादव्याप्यवत्तानिश्चये भिन्नविषयकानुमितिसामग्री

सत्त्वाच्च प्रागभावप्रत्यक्षसम्भव इति वाच्यम् । येन रूपेण व्याप्तिर्गृहीता तेन रूपेण धर्मिवृत्तिताज्ञानस्यैव व्यञ्जकत्वोपगमात्तादृशव्यञ्जकसमवधानस्य च ज्ञानद्वयदशायामपि सत्त्वेन तदानीमेव प्रागभावप्रत्यक्षसम्भवात् व्याप्तिविशिष्टवत्ताज्ञानस्यैवानुमितिसामग्रीत्वात् ।

न चैवं प्रागभावव्याप्यत्वेन गृहीताया एव सामग्र्या प्रागभावव्यञ्जकता किमोपयते इति वाच्यम् । स्वतन्त्रप्रागभावव्याप्तिज्ञानधर्मिवृत्तिताज्ञानापेक्षायामपि क्षणकल्पनाजन्य विशिष्टज्ञानात्परतया प्रागभावानुमितिसम्भवेन तत्प्रत्यक्षापलापसम्भवात् सामग्र्या ज्ञानमात्रे हेतुर्न तु लौकिकप्रत्यक्षमेव अत सामग्रीपूर्वं सामग्रीक्षणे च उपनीतभानादिरूपतज्ज्ञानसम्भवात् न सामग्रीज्ञानपर्यन्तप्रागभावानवस्थानरूपोक्तदोषावसरः सामग्रीपूर्वं सामग्रीक्षणेऽपि उत्तव्यञ्जकबलात् प्रागभावप्रत्यक्षमिष्टमेव अन्यथा पुन स्वरूपसत्या अपि सामग्र्या उक्तव्यञ्जकसहकारिता वाच्येति समाधत्ते । यादृशेति ।

(टी०) यादृशकारणकलापानन्तरं कार्योत्पादो दृष्टस्तद्बुद्धेरेव व्यञ्जकत्वाभ्युपगमात् । अनुयोगिताविशेषरूपप्रागभावत्वादेः क्वचिदप्रतीतौ तद्रूपेणानुमानासम्भवाच्चेति चेत् ?

(गा०) यादृशकारणकलापानन्तरम् । यद्रूपावच्छिन्नकारणकलापानन्तरक्षणे । दृष्ट इत्यस्य नियमेनेत्यादि । अनन्तरमित्यत्यन्तसंयोगार्थकद्वितीयावलादेव वा नियमलाभ । तद्बुद्धे । तद्रूपावच्छिन्नबुद्धे ।

ननु सामग्र्याः कार्योत्पत्तिव्याप्यत्ववत्प्रागभावव्याप्यत्वमपि सुग्रहमिति प्रागभावप्रतीतिपूर्वं प्रागभावव्याप्तिज्ञानकल्पना सम्भवतीति किं प्रागभावप्रत्यक्षोपगमेनेत्यत आह । अनुयोगितेति । प्रागभावस्यानीन्द्रियत्वे प्रागभावत्वस्य क्वचिदप्रतीत्या तेन रूपेण व्यापकताग्रहासम्भवेन तद्रूपावच्छिन्नस्यानुमानासम्भवादित्यर्थ । अत्यन्ताभावादावभावत्वं घटादौ च विनाशित्वं प्रतीत्य विनाश्यभावत्वरूप प्रागभावत्व सामान्यप्रत्यासत्त्या प्रतीयमाने तदनभ्युपगमे कथंचिदनुमानेनोपस्थिते प्रागभावे प्रत्येतुं शक्यते इति अनुयोगिताविशेषपदेनयुक्तम् । विनाश्यभावत्व न प्रागभावत्व घटादेर्घटात्यन्ताभावाद्यभावत्वात् विनाशित्वाच्च घटा-

त्यन्ताभावादिप्रागभावत्वापत्तेः, किं तु प्रागभावत्वमनुयोगिताविशेष एवेति भावः। प्रमेयत्वादिसामान्यलक्षणया प्रागभावत्वादिप्रतीतिसम्भवेऽपि प्रमेयत्वाद्यनवच्छिन्नतत्प्रकारकविलक्षणप्रतीतिर्दुरुपपादेति ध्येयम्।

घटो भविष्यतीत्यादिव्यवहारविषयकं प्रागभावप्रत्यक्षं न सम्भवति तादृशव्यवहारविषयस्यातीन्द्रियत्वात् किं त्वनुमित्यादिरूपमेव तज्ज्ञानम्, आनुमानिकादिज्ञाने चाज्ञातस्यापि पक्षधर्मताबलाज्ज्ञानसम्भव इति न दर्शितव्यवहारमूलभूतज्ञानेऽनागतमानानुरोधेन सामान्यप्रत्यासत्तिरिति दूषयितुं वर्तमानप्रागभावप्रतियोगित्वमात्रस्य तद्व्यवहारविषयतां निराकरोति। भविष्यत्वं हीति।

(दी०) भविष्यत्त्वं हि न वर्तमानप्रागभावप्रतियोगित्वं श्वोभाविन्यद्य भविष्यतीति प्रत्ययप्रसङ्गात्, किं तूत्पत्स्यते भविष्यतीत्यादेः समानार्थकत्वाद्वर्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं वर्तमानकालोत्तरकालोत्पत्तिकत्वं वा तत्त्वम्, न चेदमध्यक्षम्, उत्पत्तेरतीन्द्रियत्वात्। इहाद्य घटो भविष्यतीत्यादौ च तादृशोत्पत्तेर्देशविशेषः कालविशेषश्चाधिकरणत्वेन प्रतीयते न तु प्रागभावस्योत्पत्तिमतो वा।

(गा०) अद्य भविष्यतीति प्रत्ययप्रसङ्गादिति। एतन्मते च प्रागभाव एवाद्यादिकालान्वयस्योपगन्तव्यत्वात् श्वोभाविनः प्रागभावेऽप्यद्यतनत्वस्याबाधितत्वादिति भावः। इदमुपलक्षणम्, उपदर्शितभविष्यत्त्वस्याख्यातार्थस्य धात्वर्थे एवान्वयस्य व्युत्पन्नतया घटादौ नामार्थे तदनन्वयप्रसङ्गोऽपि द्रष्टव्यः।

न च कालसम्बन्धरूपसत्ता भूधातोरर्थः तत्रैव वर्तमानप्रागभावप्रतियोगित्वरूपानागतत्वस्यान्वयः स्वीक्रियते तथा च वर्तमानप्रागभावप्रतियोगिसत्ताकत्वमेव भविष्यत्वं तादृशसत्तायामेवाद्यादिकालान्वयः। श्वोभाविनः सत्तायां चाद्यतनत्वस्य बाधान्नोक्तातिप्रसङ्ग इति वाच्यम्। एवं सत्यपि श्वोभाविनि परश्वःस्थायिनि घटादौ परश्वो भविष्यतीति प्रयोगस्य दुर्वारत्वात्

परत्व कालसम्बन्धस्य वर्त्तमानप्रागभावप्रतियोगिनः परत्वस्वत्वात् कालसम्बन्धत्वावच्छेदेन कालान्वयोपगमे च तादृशघटादौ इयो भविष्यतीति प्रयोगानुपपत्ति । तदीयकालसम्बन्धसामान्ये परत्वः कालवृत्तित्वस्यैव ध्वस्तनत्वस्यापि बाधात् । समानार्थकत्वादिति । तथा च उत्पत्स्यमानत्व भविष्यत्वं तच्चानागतोत्पत्तिकत्वं लृट्प्रत्ययेन घटत्वधौत्पत्त्यावनागतत्वप्रत्यायनादिति भविष्यत्वमपि तथा, अनागतत्वं च प्रागभावस्य प्रामाणिकत्वे वर्त्तमानप्रागभावप्रतियोगित्व नदप्रामाणिकत्वे वर्तमानकालध्वसाधिकरणकालीनत्वाभात तदुत्पत्तिकत्वमेव भविष्यत्वमिति भावः । प्रागभावे वर्त्तमानत्वं तत्तच्छब्दप्रयोगाधिकरणक्षणवृत्तित्व काले वर्त्तमानत्वं च तत्तच्छब्दप्रयोगाधिकरणत्वमेव प्रागभावाघटितानागतत्वे उत्तरकालः क्षणरूपो ग्राह्यस्तेनातीतानुत्पत्तेरपि वर्तमानकालध्वसाधिकरणमहाकालादिवृत्तितया अतिप्रसङ्गस्य नावकाशः ध्वंसस्यापि कालोपाधितया वर्तमानकालध्वंसवृत्तित्वमेव वा विवक्षणीयम् ।

उत्पत्तेरतीन्द्रियत्वादिति । तद्घटकस्वाधिकरणकालध्वंसाधिकरणत्वसामान्याभावस्यातीन्द्रियस्यापि स्वाधिकरणकालस्य सम्भवेनातीन्द्रियतद्धसप्रतियोगिकत्वेनायोग्यत्वादिति भावः

अथातीन्द्रियतया भविष्यत्वस्य लौकिकप्रत्यक्षासम्भवेऽपि घटो भविष्यतीति व्यवहारप्रयोजकमानसादिज्ञानेऽनागतघटादिभानार्थं सामान्यप्रत्यासत्तेरावश्यकता । न चोत्पत्तिशरीरे उत्पत्तिमतः स्वपदार्थस्य तत्तद्व्यक्तित्वेन प्रविष्टतया अनागतव्यक्तीनां च विशिष्य तेन रूपेण ज्ञानस्य सामान्यलक्षणासहस्रेणाप्यसम्भवादुत्पत्तिघटितभविष्यत्वस्य मानसादिज्ञानमपि न सम्भवतीति वाच्यम् । सामान्यलक्षणया प्रमेयत्वादिप्रकारेण यावद्वस्तुज्ञानजन्यसंस्कारात्प्रमेयत्वादिमोपदशायां स्वरूपतस्तत्तद्व्यक्तित्वादिना अनागतस्यापि भानमङ्गीकृत्य तन्मूलकमानसादिज्ञानस्यावश्यमुपपादनीयत्वात् अन्यथा व्यवहारविलोपप्रसङ्गादिति चेन्न । विशिष्टप्रकारकसंस्काराद्विशेषणमोपवशेन स्वरूपतस्तत्प्रकारकस्मरणस्योपनीतभानस्य चोपगमे सामान्यलक्षणानुपगमेऽपि प्रमेयत्वादिनाऽनागतयावद्वस्तुप्रकारकानुमित्यादिजन्यसंस्कारान् स्वरूपतस्तद्व्यक्तित्वादिप्रकारकस्मरणसम्भवेनानागतघटादिज्ञानस्य च सम्भवेन व्य-

घटाद्यजनकविशिष्टगोचरमानसादिज्ञानोपपत्तेः । भविष्यत्त्वस्योत्पत्तिघटितत्वे पूर्वोक्तं श्वोभाविन्यद्य भविष्यतीति प्रयोगातिप्रसङ्गं वारयति । इहाद्य इति । तादृशोत्पत्तेरिति । देशविशेषः कालविशेषश्च तादृशोत्पत्तेरधिकरणत्वेन प्रतीयते इत्यन्वयः देशविशेषोपादानं दृष्टान्तार्थं उत्पत्तौ तदन्वयस्योक्तातिप्रसङ्गवारणानुपयुक्तत्वात् । न तु प्रागभावस्येति । येनोक्तातिप्रसङ्गः स्यादिति शेषः । घटादौ देशकालान्वयेऽपि उक्तातिप्रसङ्गवारणसम्भवादुत्पत्तिघटनानर्थक्यमित्याशङ्क्य तदपि निराकरोति । उत्पत्तिमतो वेति ।

दृष्टान्तदार्ष्टान्तीय प्रागभावे देशान्वये अतिप्रसङ्गं प्रथमतो दर्शयति । कपालनाशेति ।

(दी०) अत एव कपालनाशजन्यघटनाशस्य घटाद्यात्मकतत्प्रागभाववत्यपि तत्र कपाले नेह घटध्वंसो भविष्यतीति बुद्धिः, न वा भवने श्वः समुत्पद्य प्राङ्गणे परश्वो गमिष्यति मैत्रे प्राङ्गणे परश्वो भविष्यतीति धीः ।

(गा०) तत्कपालसत्त्वे घटनाशे तत्र कपाले घटध्वंसो भविष्यतीति प्रयोगस्येष्टत्वात् कपालनाशजन्येति । प्रागभावप्रतियोगिनि घटादौ देशकालान्वये अतिप्रसङ्गं दर्शयति । न वेति । प्राङ्गण इति । तादृशमैत्रे प्राङ्गणवृत्तित्वस्य परश्वःकालवृत्तित्वस्य चाबाधात् अतिप्रसङ्गः, उत्पत्तौ देशकालान्वयोपगमे तत्र तत्तद्देशकालान्वयबाधान्नातिप्रसङ्गः ।

न च प्रागभावे तत्प्रतियोगिनि चोभयत्र कालाद्यन्वयस्वीकाराच्च कोऽप्यतिप्रसङ्गः अद्यतनत्वस्य श्वोभाविनि विनष्टकपालवृत्तित्वस्य तन्नाशजन्यघटध्वंसे परश्वस्तनत्वप्राङ्गणवृत्तित्वयोर्दर्शितमैत्रप्रागभावेऽसत्त्वादिति किमुत्पत्त्यन्तर्भावेणेति वाच्यम् । कालस्योभयत्रान्वयोपगमे दर्शाद्यक्षणे भविष्यतो मैत्रस्य प्रागभावे दर्शवृत्तित्वबाधेन दर्शे मैत्रो भविष्यतीति प्रयोगानुपपत्त्या उत्पत्त्यन्तर्भावस्यावश्यकत्वात् उभयत्र देशान्वयापेक्षया लाघवेनोत्पत्तिमात्रे देशान्वयस्याप्युचितत्वात् निरुक्तभविष्यत्त्वस्य भविष्यदर्थकलृट्प्रत्ययार्थत्वे धातुवैयर्थ्यं उत्पत्तेः प्रत्ययार्थे एवान्तर्भावात्तदुत्पत्तावुत्पत्तिमानो-

पगमे चानुभवविरोध इत्युत्पत्तिघटितभविष्यतायाः प्रकृतिप्रत्ययोमयलभ्यतामाह । अत्र चेति

(दी०) अत्र च धातुनोत्पत्तिः प्रत्याय्यते प्रत्ययेन च धात्वर्थनिष्ठं तादृशप्रतियोगित्वं तादृशकालीनत्वं वा नङ्क्ष्यति नश्यति नष्ट इत्यादौ च प्रत्ययेन यथायथमनागता वर्तमानातीता चोत्पत्तिः तस्यामेव च कालविशेषादिर्विशेषणत्वेनान्वेति ।

(गा०) अत्र । निरुक्तभविष्यत्वे । घटकत्वं सप्तम्यर्थः । तादृशप्रतियोगित्वम् । वर्त्तमानप्रागभावप्रतियोगित्वम् । तादृशकालीनत्वम् । वर्त्तमानकालोत्तरकालीनत्वम् । उत्पत्तिघटितमपि भविष्यत्त्वं क्वचित् प्रत्ययार्थ इति दर्शयति । नङ्क्ष्यतीति । कालान्तरविहितलडादेरुत्पत्तिघटितार्थकत्वं च दृष्टान्तत्वेनोक्तम् । अतीता । वर्त्तमानध्वंसप्रतियोगिनी । तस्यामेवेत्येवकारेण नाशादिक्रियाव्यवच्छेदः । तद्व्यवच्छेदप्रयोजनं दर्शयति । एतेनेत्यादिना परास्तमित्यन्तेन ।

(दी०) एतेन श्वोभाविनाशके परश्वो नङ्क्ष्यतीति नष्टे च नश्यतीति च व्यवहारः स्यात् न स्याच्च नाशस्य विद्यमानत्वात् नष्ट इत्यादिव्यवहारः । न च तत्रातीतकालसम्बन्धित्वं वर्त्तमानत्वं वा निष्ठादेरर्थः, चिरविनष्टेऽपि पूर्वेद्युर्नष्टोऽधुना वेति व्यवहारप्रसङ्गादिति परास्तम् ।

(गा०) व्यवहारः स्यादिति । श्वोभाविनोऽपि नाशस्य परश्वस्तनत्वात् अतीतोत्पत्तिकनाशस्यापि वर्तमानत्वादिति भावः । न स्यादित्यत्रापि नष्ट इत्यनुषज्यते । तथा च नष्टेऽपि नष्ट इति व्यवहारो न स्यात् नाशोऽतीतत्वस्य बाधादित्यर्थः । एतदनुपपत्तेरुद्धारमाशङ्कते । न च तत्रेति । तत्र । नष्ट इत्यादौ । अतीतकालसम्बन्धित्वं वर्तमानध्वंसप्रतियोगिकालवृत्तित्वम् । लाघवादाह । वर्तमानत्वं वेति । नाशोत्पत्तिक्षणेऽपि नष्ट इति व्यवहारस्येष्टत्वात् इति हृदयम् ।

व्यवहारप्रसङ्गादिति । उत्पत्त्यनन्तर्भावे उक्तनिष्ठार्थस्यैव काल-

रूपाधिकरणस्यापि नाश एवान्वयस्योपगन्तव्यत्वात्। विद्यतीतोत्प त्तिकेऽपि च विनाशे पूर्वदिनवृत्तित्वस्य अद्यतनत्वान्वैयाबाधा- दिति भाव। देशस्य नाशान्वये गृहान्तरप्रागभावनाशात्मकघटा दिमति प्राङ्गणे घटप्रागभावो नष्ट इतीति प्रयोगापत्तिर्बोध्या। परा स्तमिति। उत्पत्तौ कालान्वयोपगमे इदानीन्तनोत्पत्तिकनाशादौ पर- इदानीन्तनात्वाच्चित्कत्वादेवाधन नाशस्य विद्यमानत्वेऽपि तदुत्पत्तेरतो तत्वेनोक्तातिप्रसङ्गाप्रसङ्गयोरनवकाशादिति भाव ।

यद्यपि कारकविभक्त्यर्थस्यान्यत्र क्रियायामेवान्वयो दृष्टस्तथा पि अगत्या व्युत्पत्तिवैचित्र्येणात्र क्रियान्वितप्रत्ययार्थेऽपि तदन्वय उपेयते इद च नाशत्वमनुयोगितावच्छेदकरूपं नशधातुवाच्यमिति। शयेनाभिहितम्। नशधातावुत्पत्तिमद्भावत्वरूपनाशत्वावच्छिन्नश चकत्वे तु अनागतत्वादिकमेव नङ्क्ष्यतीत्यादावपि प्रत्ययार्थ, तस्य कालविशेषदेशविशेषयोश्चोत्पत्तिरूपधात्वर्थैकदेशान्वयेनैव सामञ्ज स्यात्, किं तु दर्शान्त्यक्षणावुत्पन्नप्रतिपदादिपर्यन्तस्थायिस्पन्दा- दिकमादाय प्रतिपदि गमिष्यतीत्यादिव्यवहारस्याप्रामाणिकत्वे त दतिप्रसङ्गवारणाय तदुत्पत्तिघटित भविष्यत्त्वादिक लृडादिप्रत्य यार्थो वाच्य इत्यवधेयम्।

ननु भविष्यति नङ्क्ष्यतीत्यादौ प्रत्ययार्थस्यानागतत्वादेरनागतानु त्पत्तेर्वा धात्वर्थविशेषणत्वेनान्वये धात्वर्थस्योत्पत्तेराश्रयतासम्बन्ध न नाशस्य च प्रतियोगितासम्बन्धेन साक्षादेव नामार्थे स्वाश्रय प्रतियोगिनि चान्वयो वाच्य स चायुक्त नामार्थधात्वर्थयोर्भेदे नान्वयस्याव्युत्पन्नत्वात् प्रतियोगितासम्बन्धस्याभावप्रतियोगि- तानवच्छेदकतया न नङ्क्ष्यति इत्यादावगतिश्चेत्यत आह । कर्त्तरि विहितेन चेति।

(दी०) कर्त्तरि विहितेनाख्यातेन कृता वा यथायथ- माश्रयत्वप्रतियोगित्वलक्षणं कर्तृत्वं आश्रयप्रतियोगिरूपश्च कर्त्ता- ऽभिधीयते। कार्यानुत्पाददशाया चाभावधीः सामयिकात्यन्ता- भावमवगाहते । न च प्रतियोगिसमवायिनि समयावच्छेदेना- त्यन्ताभावदृत्तौ मानाभावः, भाविनि नष्टे वा घट इह कपाले

घटो नास्तीति प्रत्ययात् । न ह्ययं घटप्रतियोगिकमभावमात्रम-वगाहते, यत्किञ्चिद्घटवत्यपि तादृशप्रत्ययप्रसङ्गात् । परं तु घटत्वावच्छिन्नप्रतियोगिताकम्, न च ध्वंसप्रागभावौ तथा सम्भवतो वा न तत्र कपाले ततः पूर्वं परतश्च बहूनां घटानां नष्टत्वादुत्पत्स्यमानत्वाच्च ।

(गा०) आख्यातेन भविष्यतीत्यादावाश्रयत्वरूपं नङ्क्ष्यतीत्यादौ प्रतियोगित्वरूपं भाक्तकर्तृत्वं कर्तरिकृता भविष्यन्नित्यादौ आश्रयरूपः कर्त्ता नङ्क्ष्यन्नित्यादौ प्रतियोगिरूपः कर्त्ता ऽभिधीयते इत्यर्थः । तथा च धात्वर्थविशेषितनादृशप्रत्ययार्थयोरेव साक्षाद्भेदाभेदाभ्यां नामार्थे ऽन्वयान्नोक्तव्युत्पत्तिविरोध इति भावः ।

ननु माभूद्भविष्यतीत्यादिव्यवहारप्रयोजक लौकिकप्रत्यक्षं तथा-पि कार्यानुत्पाददशायां कपालादौ घटो नास्तीदानीमित्यादिलौ-किकप्रत्यक्षे प्रागभावविषयके ध्वंसप्रागभावयत्यन्ताभावानां स्व-नियमेनासम्भवद्घटत्वाद्यवच्छिन्नसामान्याभावविषयताकानागत-प्रतियोगिभानार्थं सामान्यप्रत्यासत्तेरावश्यकतेत्याशङ्कां ध्वंसप्राग-भावयोरत्यन्ताभावाविरोधितां व्यवस्थापयन्निराकुरुते । कार्यानुत्पा-देत्यादिना । सामयिकेति । समयविशेषावच्छेदेन प्रतियोगिमद्वृत्ती-त्यर्थकम् । अत्यन्ताभावमवगाहते इति । प्रतियोगिमत्यत्यन्ताभावस्य विरोधनोऽपि ध्वंसादिमत्समयविशेषावच्छिन्नवृत्तौ बाधकाभा-वादिति भावः । तथा च प्राचीनघटादिरेव तत्र प्रतियोगितया भासते तेषामपि घटादिसामान्याभावप्रतियोगित्वादिति नानागत-भानानुरोधेन सामान्यप्रत्यासत्तिसिद्धिरित्याशयः

साधकविरह एव बाधक इति शङ्कां निराकुरुते । न चेति । अभाव-म् । ध्वंसादिरूपम् । तादृशप्रत्ययप्रसङ्गादिति । ध्वंसादिकमादाय घटो नास्तीति प्रत्ययप्रसङ्गात् । घटत्वावच्छिन्नप्रतियोगिताकं अभावम-वगाहते इत्यनुषङ्गेणान्वयः । न च । न हि । तथा च घटत्वावच्छिन्नप्र-तियोगिताकौ ध्वंसप्रागभावप्रतियोगितायामतिप्रसक्तस्य सामान्य-धर्मस्यानवच्छेदकत्वात् । प्रत्येकं ध्वंसादिप्रतियोगितायां अतिप्रस-क्तस्यापि घटत्वादेरनुगतकिञ्चिद्रूपावच्छिन्नातिप्रसक्ततया अव-

च्छेदकत्वसम्भवः प्रतीतिबलेनातिप्रसक्तेऽपि स्वरूपसम्बन्धरूपाव-च्छेदकत्वकल्पना सम्भवत्येवेत्यत आह । सम्भवतो वेति । तत्र कपाले इति । तथा ध्वंसप्रागभावावित्यनुषञ्जनीयम् । कुत इत्याका-ङ्क्षायामाह तत इति । अत्रापि तत्रेत्यनुषञ्जनीयम् ।

नष्टत्वादुत्पत्स्यमानत्वाच्चेति । ध्वंसप्रागभावयोः सामान्याभा-वत्ववादिनापि समानाधिकरणसामान्यधर्मावच्छिन्नसमानकाली-ने ध्वंसादौ सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं नाभ्युपगम्यते तथा सति तमादाय घटादिसत्त्वदशायामपि घटो नास्तीति प्रत्ययापत्तेरिति भावः ।

नन्वस्मन्मते प्रतियोग्यत्यन्ताभावस्य ध्वंसादिविरोधित्वेन ध्वंसा-त्यन्ताभावत्वात् तस्यैव ध्वंसो नास्तीत्यादिबुद्धिविषयत्वं भवन्मते तस्य तदविरोधित्वात् कपालादौ घटध्वंसो नास्तीत्यादिबुद्धेः को विषयः ? न हि तदविरोधिन्यपि तदत्यन्ताभावत्वं स्वीकर्तुं शक्यते अतिप्रसङ्गात् ध्वंसप्रतियोगिकाभावस्वीकारे चाभावप्रतियोगिको-ऽतिरिक्ताभावो नाङ्गीक्रियते इति सिद्धान्तभङ्गप्रसङ्ग इत्याशङ्क्य ते । अथेति ।

(दी०) अथैवं कपालादौ कथं घटध्वंसादिशून्यताबुद्धिः, अत्यन्ताभावस्य ध्वंसाद्यविरोधित्वादिति चेत् ? तत्तदधिकरण-स्वरूपादतिरिक्तादेवानुगतादभावाद्वा इहेदानीं घटप्रागभाव इति च प्रत्ययो न लोकानाम् ।

(गा०) एवम् । ध्वंसादिविशिष्टेऽप्यत्यन्ताभावोपगमे । ध्वंसाद्यविरो-धित्वात् । भवन्मते ध्वंसाद्यविरोधित्वेन तदभावप्रत्ययविषयत्वास-म्भवात् । अनवस्थाप्रसङ्गेनाभावाभावो(१) नातिरिक्त इति सिद्धान्त-मनुरुध्य समाधत्ते । तत्तदधिकरणस्वरूपादिति । लाघवमनुरुध्याह । अतिरिक्तादेवेति । अनुगतादित्यनेन पूर्वमते ऽननुगतभूयोधिकर-णे ऽभावत्वकल्पनायां गौरवमिति सूचितम् ।

नन्वत्यन्ताभावप्रतीतिविलक्षणे इहेदानीं घटप्रागभाव इति प्र-त्यये प्रतियोगिभानार्थं सामान्यप्रत्यासत्तेरावश्यकता तादृशप्रत्यये

(१) ध्वंसात्यन्ताभाव इति–२ पु० पा० ।

प्रसिद्धस्य प्रतियोगितया भानासम्भवादित्यत आह । इहेदानीमिति । प्रत्ययः । अत्यन्ताभावप्रतीतिविलक्षण । एतावता प्रागभावस्य कथञ्चिदपि न लौकिकप्रत्यक्षमिति पर्यवसिते प्रागभावे युक्तिप्रदर्शनासमर्थः प्रागभावस्य प्रत्यक्षतामेव स्वीकरिष्यतीत्यभिसन्धिना प्राग भावस्याप्रत्यक्षत्वे तस्याप्रामाणिकत्वं प्रसञ्जयति । अथेति ।

(दी०) अथैवं जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्यादिविलक्षणप्रत्ययबलेन नाशोऽतिरिच्यतां न तु प्रागभावः, पूर्वत्वतत्पूर्वत्वादिव्यवहारश्चातीतकालवृत्तित्वतदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वादिविषयक एवास्तु दुःखात्यन्ताभावस्य स्वस्मिन्नुत्तरकालानुवृत्तिं दुःखसाधनध्वंसं वा समुद्दिश्य क्रियाविशेषे प्रवृत्तिरस्तु मानान्तरसिद्धं हि प्रयोजनमुद्दिश्य पुमांसः प्रवर्तन्ते न तु प्रवृत्त्यैव तत्सिद्धिः, उत्पन्नस्य पुनरुत्पादप्रसङ्गश्च लाघवात् कार्यादेः प्रतिबन्धकत्वेनापि निरसनीयः ।

(गा०) प्रागभावो नातिरिच्यतामित्यनेनान्ययः प्रमाणान्तरस्याप्रेक्षणीयत्वादिति भावः । ननु कार्यानुत्पाददशायामिव कार्योत्तरमपि तदधिकरणेऽभावप्रत्ययस्य सामयिकात्यन्ताभावविषयकत्वसम्भवादतिरिक्तसंसर्गाभावखण्डनमेव सम्भवति किं तु ध्वंसप्रागभावान्यतरं विना उत्तरत्वपूर्वत्वादिकं न शक्यते निर्वक्तुमिति अन्यतरस्वीकार आवश्यकस्तथा च विनिगमनाविरहादुभयमेव सेत्स्यतीति शङ्काव्युदासाय ध्वंसस्यातिरिक्तत्वमन्तरा व्यवस्थापयति । जात इति । उत्पत्त्यंशे उपनीतभानात्मकादपि प्रत्ययाद्यथा उत्पत्तिविशिष्टो घटादिः सिद्ध्यति तथा तादृशप्रत्ययादुत्पत्तिविशिष्टोऽभावः सेत्स्यति एतावतैवातिरिक्तध्वंसः सिद्धः अत्यन्ताभावस्यानुत्पन्नत्वात् न च सामयिकात्यन्ताभाव एवोत्पादविनाशशील इति मतमवलम्बनीयम्, प्रतियोग्युत्तरकालीनस्याभावस्याविनाशित्वे बाधकाभावात्तस्य विनाशकल्पनायां गौरवादविनाशिजन्याभावसिद्धावेव सम्मीहितनिर्वाहात्तस्यात्यन्ताभावत्वे नास्त्येव विवाद इत्यर्थः प्रागभावो नष्ट इत्यादिप्रत्ययश्चासिद्ध इत्याशयः । पूर्वत्वतत्पूर्वत्वतदुत्तरत्वव्य-

घहारस्य प्रागभावकालीनत्वतत्प्रागभावकालीनत्वतत्कालीनप्रागभावप्रतियोगित्वाविषयकत्वेन शब्द एवानिरुक्तप्रागभावे मानमिति शङ्कया ध्वंसमन्तभाव्यं तन्निर्वक्ति । पूर्वत्वेति । अयं पूर्व इति सामान्यतोऽवधिविनिर्मुक्तव्यवहारस्य ध्वंसप्रतियोगिकालवृत्तित्वं चरमध्वंसव्यावृत्तं विषयः, तद्वृत्तित्वं तदनुयोगिकसम्बन्धप्रतियोगित्वं स च सम्बन्धः कालिको ग्राह्यः, अन्यथा ध्वंसप्रतियोगित्वविषयकज्ञानरूपकालनिष्ठविषयितासम्बन्धप्रतियोगिनि चरमध्वंसे ऽतिप्रसङ्गः एतल्लाभायैव कालपदम् । प्रतियोगित्वं ध्वंसत्वनिरूपकं ग्राह्यम् । अन्यथा ध्वंसरूपकालस्यापि प्रागभावध्वंसात्मकप्रतियोगिरूपप्रागभावप्रतियोगितया ऽतिप्रसङ्गात् प्रागभावास्वीकारेऽपि ध्वंसस्य स्वभेदात्मकघटादिध्वंसप्रतियोगित्वेनातिप्रसङ्गात् घटात् पूर्व इत्यादिव्यवहारस्य च घटाद्युत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वं विषयः स्वस्य स्वोत्तरोत्पन्नस्यापि वस्यचित्स्वसमानकालीनध्वंसप्रतियोगिस्वोत्पत्तिक्षणादिवृत्तित्वादतिप्रसङ्ग इत्युत्पत्तिनिवेशनम् । स्वोत्पत्तिक्षणादेरपि स्वोत्पत्त्यधिकरणमहाकालादिवृत्तिध्वंसप्रतियोगित्वादुत्पत्तिकालपदेन उत्पत्त्यधिकरणक्षणो विवक्षणीयः ।

वस्तुतस्तु महाप्रलयानङ्गीकारे तदधिकरणकालध्वंसानधिकरणकालः तदङ्गीकारे तद्वृत्तिस्वनिष्ठध्वंसप्रतियोगिकालवृत्तित्वाभावकः कालस्तदुत्पत्तिकालस्तदुत्पत्तिद्वितीयक्षणपर्यन्तस्यापि स्थूलकालादेस्तु न तथा तथाविधकाले तदधिकरणाद्यक्षणध्वंसस्य सत्त्वाचादृशकालवृत्तिध्वंसप्रतियोग्याद्यक्षणादिवृत्तितद्घटादौ तद्घटादिपूर्वत्वव्यवहारप्रसङ्ग इति क्षणत्वमनुपादेयमेव ।

(१)[तदधिकरणकालध्वंसानाधिकरणत्वं तद्वृत्तिस्वनिष्ठध्वंसप्रतियोगिवृत्तित्वाभावकत्वमेव वा कालशतसमुदायाधध्वंसस्य कालतया तदाद्यक्षणादिध्वंसेऽपि तदधिकरणकालध्वंसस्य वृत्तेस्तादृशध्वंसे न तथाविधतदुत्पत्तिकालीनताप्रसङ्गः ।]

अत्र स्वोत्पत्तिकालीनत्वस्य पृथगेव पूर्वपदार्थत्वमतोऽवधिविनिर्मुक्तव्यवहारस्य न तद्विषयकत्वं उत्पत्तिप्रतियोगितो

(१) [ ]पाठोऽयं पुस्तकान्तरयोर्नास्ति ।

घटादेः स्वशब्ददेव लाभ इति तद्विनिर्मोकेणैव शक्तिः कल्प्या पञ्चम्यर्थप्रतियोगित्वस्य घटादिविशेषितस्य नियतोत्पत्तिकालघटकवृत्तावन्वयः । अथ वा ध्वंसप्रतियोगिकालवृत्तित्वमेव पूर्वपदार्थः, उत्पत्तिकालीनत्वं पूर्वपदयोगानुशिष्टपञ्चम्या पयार्थ इति बोध्यम् । आदिपदाभ्यां तदुत्तरत्वव्यवहारस्य ध्वंसाधिकरणकालवृत्तित्वतदधिकरणकालध्वंसाधिकरणकालोत्पत्तिकत्वविषयकत्वस्य च परिग्रहः ।

ननु प्रागभावानङ्गीकारे प्रायश्चित्तवैफल्यप्रसङ्गः । तथा च तत्प्रवृत्त्यनुपपत्त्या दुःखप्रागभावसिद्धिः । पापध्वंसस्य सुखदुःखाभावान्यत्वेन स्वतःप्रयोजनतायास्तद्साधनतया गौणप्रयोजनतायाश्चासम्भवात् अतो दुःखानुत्पादस्य तत्प्रागभावरूपस्यैव प्रायश्चित्तफलत्वमावश्यकं(१) अत एव दुःखं मे मा भूत् इति कामनयैव तदाचरणं न तु पापं नश्यत्विति कामनया ।

न च दुःखात्यन्ताभाव एव दुःखानुत्पादः स च सिद्धोऽप्यग्रिमकालसम्बन्धरूपासिद्धविशेषणविशिष्टः प्रागभाववत् प्रयोजनीभवितुमिष्टे अत एवासिद्धस्वत्वाद्युपरागेण सिद्धग्रामादाविच्छेति वाच्यम् । तदात्मनि दुःखस्यातीततया प्रायश्चित्तानन्तरं पुनर्निषिद्धाचरणस्थले दुःखस्योत्पत्स्यमानतया च तदत्यन्ताभावासम्भवादिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधितावादिनां प्राचां प्रागभावयुक्तिं प्रतियोग्यधिकरणेऽपि समयभेदेनात्यन्ताभावसत्त्वाविरोधः, अन्यथा प्रतियोग्युत्पादपूर्वकाले तद्वत्त्यभावप्रत्ययबलेनैव प्रागभावसिद्धा युक्त्यन्तरानुसरणवैयर्थ्यात् इत्याद्ग्रन्थेन तदविरोधितामतमवलम्ब्य दूषयति । दुःखात्यन्ताभावस्येति । स्वस्मिन्नुत्तरकालानुवृत्तिम् । स्वाभावच्छेदेनोत्तरकालसम्बन्धम् । इदं च दुःखाभावप्रत्ततस्सम्बन्धस्यापि स्वतःप्रयोजनत्वमित्यभिप्रायेण, स्वस्मिन् उत्तरकालानुवर्त्तमानदुःखाभावमित्येव वार्थः दुःखाभावस्य तत्स्वरूपतत्सम्बन्धस्य वा नित्यत्वेऽपि प्रायश्चित्ते क्षेमसाधारणतत्साधनत्वमव्याहतमेवेति भावः । आत्मतत्त्वविवेककृतकार्यां स्वयं क्षेमसाधारणफलसाधनताज्ञानस्य प्रवर्तकतां निराकृत्य दुःखसाधनगोचरद्वेषान्निष्फलेऽपि तदभावे इच्छा सम्भवति शत्रुवधादौ का-

(१) प्रायश्चित्तफलत्वात्-इति २ पु० पा० ।

मनाया दुरपह्नवत्वात् इति युक्त्या पापध्वंसस्यापि प्रयोजनताया व्यवस्थापितत्वात् तन्मतमनुवर्त्तमान आह ।—दुःखसाधनेति । प्रवर्त्तनक्रियया समानकर्तृकतया उद्दिश्येति क्त्वाप्रत्ययः प्रायश्चित्तफले तत्प्रवृत्त्यनुपपत्ते प्रागभावसिद्धिरन्योन्याश्रयादसम्भवदुक्तिकैचेत्याह । मानान्तरेति । प्रवृत्तौ सत्यामेव तदनुपपत्तिर्मानान्तरा प्रवृत्तिश्च प्रयोजनसिद्ध्यधीना प्रमाणान्तरात् प्रयोजनसिद्धावेव सम्भवतीति प्रयोजनमन्तरेणानुपपद्यमानापि सा न प्रयोजनकल्पनायामुपयुज्यते अन्योन्याश्रयादित्यर्थः ।

न चान्यदीयप्रवृत्तिमवगत्य तदन्यथानुपपत्त्या प्रयोजनं परिकल्प्यान्यः प्रवर्त्तते इति नान्योन्याश्रय इति वाच्यम् । तथाप्यनवस्थाया दुर्वारत्वात् अन्यस्य प्रायश्चित्तप्रवृत्तिमजानतोऽपि तत्प्रवृत्तेश्च । इदन्त्वापातत', प्रयोजनासिद्धौ प्रवृत्त्युदयेऽपि विधितः प्रायश्चित्त प्रवृत्तिसाध्यतामवगत्य तदन्यथानुपपत्त्या प्रयोजनकल्पनाया निराबाधत्वात् अन्यथा पापस्याप्रामाणिकत्वापत्ते निषिद्धकर्मणः स्वध्वंसद्वारापि दुःखसाधनत्वसम्भवेन प्रायश्चित्तफलध्वंसप्रतियोगितयैव तत्सिद्धेः किं तु दुःखात्यन्ताभावादेः फलत्वसम्भवेन प्रागभावरूपफलापर्यवसाने एव निर्भरः ।

न चैवमपि पापध्वंसस्य फलत्वपक्षे पापे युक्त्यन्तराभावेन पापं कल्पयित्वा तद्ध्वंसस्य फलत्वमुपेयते दुःखप्रागभावं कल्पयित्वा तस्य नेत्यत्र विनिगमनाविरहात् प्रागभावसिद्धिरिति वाच्यम् । यतो दुःखप्रागभावानुवृत्तेः फलत्वेऽपि पापध्वंसस्य तन्निर्वाहकस्य फलत्वमावश्यकं पापसत्त्वे दुःखोत्पत्तेरावश्यकतया तदनिर्वाहादिति पापध्वंसफलत्वपक्षेऽपि किं प्रागभावेन पापध्वंसस्यैवेष्टान्तरसाधनत्वेऽप्येतोपपत्तेर्दर्शितत्वात् । एवं प्रायश्चित्तोत्तरं निषिद्धानाचरणस्थले प्रागभावोऽपि न सम्भवति प्रतियोगिनो दुःखस्यानुत्पत्स्यमानत्वात् । न चान्यभोग्यपत्स्यमानं दुःखं प्रतियोगि, प्रागभावस्य प्रतियोगिसमानदेशवृत्तित्वादित्याहुः तत्त्वम् ।

ननु प्रागभावानङ्गीकारे जातेऽपि घटज्ञानशब्दादिरूपकार्ये तदुत्पत्त्यादिप्रयोजकतत्सामग्र्या अक्षतत्वात् पुनस्तत्कार्योत्पत्तेस्तत्कार्यस्यैव वा आपत्तिरिति तदानीं सामग्र्यभावनिर्वाहकव्यतिरेकप्रतियोगिन प्रागभावरूपकारणस्य कल्पनमावश्यकमिति युक्ति

दूषयति । उत्पन्नपुनरुत्पादेति । तत्र कार्ये तदुत्पत्त्यनन्तरोत्पादापत्तिरित्यर्थः । आपाद्यप्रसिद्धिश्च कार्यान्तरे । प्रसङ्गाकारस्तु अयं घटो यदि तदुत्पत्तिक्षणवृत्तिसामग्रीकः स्यात् तदा तत्क्षणानन्तरमुत्पद्येतेति ।

न चोत्पत्तेः स्वत्वघटितत्वेनाननुगततया आपादकानुगमे मूले शैथिल्यं आपादकस्य स्वसामग्रीघटितत्वेन अननुगमे च दृष्टान्तासिद्धिस्वरूपासिद्ध्योरन्यतरप्रसङ्ग इति वाच्यम् । एतत्क्षणावृत्तिस्वसामग्रीकं यद्यत्तद्भेदकूटेनानुगतेन एतत्क्षणानुत्तरस्वोत्पत्तिकं यद्यत्तद्भेदकूटस्यापादनीयत्वात् ।

केचित्तु उत्पन्नस्य कार्यस्य द्वितीयादिक्षणे उत्पादप्रसङ्ग उत्पन्नपुनरुत्पादप्रसङ्गः । आपादनाकारश्च एतद्घटाद्युत्पत्तिर्द्वितीयादिक्षणो यद्येतदुत्पत्तिप्रयोजकसामग्र्युत्तरः स्यात् एतदुत्पादाधिकरणं स्यात् प्रथमक्षण एव चापाद्यप्रसिद्धिरित्याहुः । कार्यादेः प्रतिबन्धकत्वेन कार्याभावादेर्हेतुत्वोपगमेन घटादिरूपकार्यस्य सामान्यतः कार्यत्वेन प्रतिबन्धकत्वमसम्भवि तत्पूर्वं तदधिकरणे संयोगादिरूपकार्यस्यावश्यकत्वात् अपि तु समवायेन जन्यद्रव्यत्वावच्छिन्नं प्रति द्रव्यत्वादिना ज्ञानादिरूपकार्यं प्रति च ज्ञानत्वादिना अनुगतरूपेण प्रतिबन्धकत्वासम्भवादगत्या तत्तद्व्यक्तित्वेनैव प्रतिबन्धकता वाच्या घटादिनाशोत्तरं तदधिकरणे खण्डघटाद्युत्पाददशायां तदुत्पादापत्तेः कार्यप्रतिबन्धकताया दुर्वारत्वात् तत्तद्घटादिव्यक्तिनाशस्यापि प्रतिबन्धकत्वं वक्तव्यमिति कार्यध्वंसपरिग्रहाद्यादेरित्युक्तम् ।

न च यत्संयोगादिव्यक्तिनाशात् महाघटादिव्यक्तिनाशस्तद्व्यक्तेरपि तद्घटव्यक्तिहेतुतया तदभावादेव, न पुनस्तदुत्पादप्रसङ्ग इति किं तत्र नाशप्रतिबन्धकतयेति वाच्यम् । तत्संयोगादिव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वस्य सर्वत्रासिद्धेस्तस्य प्रामाणिकत्वेऽपि धारावहनस्थले माध्यमिकनिर्विकल्पकस्य चतुर्थादिक्षणे आपत्तिवारणाय तत्र कार्यध्वंसस्य प्रतिबन्धकताया आवश्यकत्वादिति ।

न चैवमनन्तप्रतिबन्धकताकल्पनापेक्षया प्रागभावहेतुत्वे लाघवात् तत्सिद्धिरिति वाच्यम् । तत्कार्ये उत्पन्नेऽपि कार्यान्तरप्रागभावसत्त्वात् तत्कार्योत्पादवारणाय तत्कार्यं प्रति तत्कार्यप्रागभा-

पादेन प्रागभावस्वीकारेऽपि अनन्तकारणतानामनन्तप्रागभावानां च कल्पनीयत्वात् ।

न च तादात्म्यसम्बन्धेन कार्यसामान्यं प्रति प्रतियोगितासम्बन्धेन प्रागभावत्वेन एकहेतुतयैव सर्वत्रोत्पन्नपुनरुत्पादवारणसम्भवात् उत्पन्नप्रतियोगिकप्रागभावस्य विनाशादुत्पन्नकार्ये प्रतियोगितया प्रागभावस्यासत्त्वादिति वाच्यम् । उत्पन्नव्यक्तौ प्रतियोगितया प्रागभावासत्त्वेऽपि तस्याः समवायिदेशे पुनरनुत्पादप्रयोजकस्य दुर्वारत्वात्तदुत्पादप्रयोजकसामग्र्यास्तत्प्रागभावविनाशेऽप्यक्षतत्वात् ।

न च समवायेन कार्योत्पत्तौ सम्बन्धान्तरेण कार्योत्पादकसामग्रीसमवधानमप्यपेक्षितमिति तादात्म्येन कार्योत्पादकसामग्र्यभावान्नानुपपत्तिरिति वाच्यम् । तादृशसामग्रीसमवधानस्याव्यवहितप्राक्क्षणे एवापेक्षितत्वात् तदा च कार्यान्तरप्रागभावस्यैव सत्त्वात् इति ।

ननूत्पत्तिराद्यक्षणसम्बन्धः आद्यत्वं च स्वाधिकरणक्षणवृत्तेः स्ववृत्तेर्वा प्रागभावस्य प्रतियोगित्वमिति प्रागभावघटितोत्पत्तिप्रत्यय एव तत्साधक इत्याशङ्क्य प्रागभावमन्तरेणोत्पत्तिं निर्वक्ति । तदुत्पत्तिश्चेति ।

(दी०) तदुत्पत्तिश्च महाप्रलयमनङ्गीकुर्वतां मते स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धः, तदुक्तम् 'अध्वस्तक्षणयोगस्य क्षणयोगो जनिर्मतेति' । क्षणः समयः ।

(गा०) महाप्रलयाङ्गीकारे चरमध्वंसरूपतदुत्पत्त्यव्याप्तिः स्वाधिकरणसमयस्य महाकालस्य ध्वंसस्य च ध्वंसाप्रसिद्धेरिति तदनङ्गीकारपक्षावलम्बनम् । स्वाधिकरणेति । स्वमुत्पत्तिमत्त्वेनाभिमतम् । द्वितीयादिक्षणस्य स्वाधिकरणाद्यक्षणध्वंसाधिकरणतया न तत्सम्बन्ध उत्पत्तिः तदधिकरणसमयस्य तत्प्रकारेणैव निवेशो न तु तदीयाधिकरणताप्रकारेण गौरवात् । एवं च स्वविषयकातीतज्ञानस्य स्वानधिकरणत्वेऽपि विषयितासम्बन्धेन स्वावच्छिन्नतया तद्ध्वंसमादायासम्भवस्य संयोगादिना घटादिमतो यो ध्वंसस्तदवच्छिन्नभेदस्य द्वितीयक्षणादावपि सत्त्वेनातिव्याप्ते-

वारणाय कालिकसम्बन्धः स्वसम्बन्धतया प्रवेशनीयः तल्लाभायैव प्रथमं समयपदम् ध्वंसानधिकरणत्वं च कालिकसम्बन्धेन ध्वंसावच्छिन्नभिन्नत्वं कालिकसम्बन्धाप्रवेशे द्वितीयादिक्षणस्यापि विषयितासम्बन्धेन स्वाधिकरणसमयध्वंसावच्छिन्नज्ञानादिभिन्नतया अतिप्रसङ्गादिति तन्निवेशलाभाय द्वितीयं समयपदम् । स्वपूर्वोत्पन्नस्य विषयकज्ञानादिनिष्ठस्वीयविषयितादिसम्बन्धस्यानुत्पत्तितया तादृशसमयसम्बन्धोऽपि कालिको ग्राह्यः तल्लाभोऽपि द्वितीयसमयपदादेव ।

एतादृशोत्पत्तिपदार्थ आचार्याणामप्यनुमत इत्याह । तदुक्तमिति । अवच्छतेति । अवच्छतः यत्क्षणेऽविनष्टःक्षणयोगः क्षणनिष्ठतत्स्वरूपसम्बन्धो यस्य यदीयक्षणयोगध्वंसानाधिकरणं यत्क्षण इति यावत् तस्य तादृशतत्सम्बन्धो जनिरुत्पत्तिरित्यर्थः । यदीयक्षणयोगे यत्क्षणनिष्ठध्वंसाप्रतियोगित्वं तस्य तत्क्षणयोग इति यथाश्रुतार्थो नादरणीयः । तदीयद्वितीयादिक्षणयोगस्य द्वितीयादिक्षणवृत्तिध्वंसाप्रतियोगितया द्वितीयादिक्षणसम्बन्धेऽतिव्याप्तेः यदीयक्षणयोगत्वावच्छेदेन यत्क्षणवृत्तिध्वंसाप्रतियोगित्वविवक्षयाऽतिप्रसङ्गवारणे गौरवात् महाप्रलयानङ्गीकारे स्वीयक्षणयोगध्वंसाधिकरणत्वसामान्याभावस्यैव लाघवेन लक्षणे निवेशौचित्यात् तदङ्गीकारे तदुत्पत्त्यप्रसिद्धिनिबन्धनाव्याप्तेर्वारणाय यथाश्रुतार्थविवक्षयैव क्वचिदपीत्यादिलक्षणं वक्ष्यते । आद्यक्षणे स्वाधिकरणक्षणध्वंसानधिकरणत्वस्यैव स्वीयकालसम्बन्धध्वंसाधिकरणत्वसामान्याभावस्यापि सत्त्वात् द्वितीयादिक्षणे स्वीयाद्यक्षणसम्बन्धध्वंसवति स्वीयकालसम्बन्धध्वंसाधिकरणत्वसामान्याभावस्यासत्त्वात्प्रथमक्षणस्य द्वितीयक्षणपर्यन्तावस्थायिस्थूलकालस्य स्वीयकालसम्बन्धध्वंसाधिकरणत्वात् प्रथमक्षणपर्यन्तावस्थायिस्थूलकालस्य चान्त्यक्षणावच्छिन्न एव सम्बन्धत्वेन तत्सम्बन्धस्योत्पत्तित्वव्यवहारस्येष्टत्वात् द्वितीयस्यापि क्षणस्य क्षणत्वप्रवेशो वृथेत्याशयेनाह । क्षणः समय इति ।

न च तादृशस्थूलकालसम्बन्धस्योत्पत्तित्वे तस्य तादृशकालस्वरूपस्य स्वपूर्वक्षणेऽपि सत्त्वात्तस्मिन्स्वपूर्वक्षणोत्पन्नत्वव्यवहारप्रसङ्गः घटादेः कालसम्बन्धस्य घटादिस्वरूपत्वे च द्वितीयादि-

क्षणेऽपि तत्स्वरूपाद्यक्षणसम्बन्धसत्त्वेन तत्र तद्द्वितीयक्षणाद्युत्पत्तिव्यवहारप्रसङ्गः। द्वितीयक्षणादेस्तदीयकालसम्बन्धध्वंसाधिकरणत्वानुपपत्त्या आद्यस्तत्क्षणयोगस्येत्यनेन द्वितीयक्षणसम्बन्धव्यावर्तनायोगाच्चेति वाच्यम्। तदीयकालसम्बन्धस्य तत्तदधिकरणकालोभयस्वरूपत्वात् अन्यथा स्वानधिकरणकाले स्वाधिकरणकालान्तरीयसम्बन्धसत्त्वेन स्वस्मिन् स्वानधिकरणकालवृत्तित्वप्रसङ्गस्य भवतोऽपि दुर्वारत्वात्।

अथोत्पत्त्यर्थकपदस्योत्पत्तिमत्तत्तत्पदार्थान्तर्भावेण शक्त्युपगमे शक्त्यानन्त्यप्रसङ्गः अपूर्वपदार्थोत्पत्तौ प्राक्शक्तिग्रहेण तत्प्रतीत्यनुपपत्तिश्च। न च तत्पदार्थानन्तर्भावेणैव शक्तिः तत्तत्पदार्थाधिकरणसमयध्वंसानधिकरणत्वलाभश्च तत्तत्पदसमभिव्याहारादिति वाच्यम्। घट उत्पद्यते इत्यादौ धात्वर्थैकदेशसमयविशेषणतया नामार्थघटादीनामन्वये आकाङ्क्षावैचित्र्येण तदन्वयोपगमेऽपि घटत्वादिनैव तस्यान्वयो वाच्यो न तु तत्तद्व्यक्तित्वेन तेन तेन रूपेण घटादिपदादनुपस्थितेः तथा च तत्र सामान्यतो घटादिमत्समयध्वंसानधिकरणत्वं समये प्रत्येतव्यं तथा च बाधः समयमात्रस्यैव पूर्वपूर्वघटादिमत्समयध्वंसवत्त्वात्।

एतेन समभिव्याहृतपदार्थतावच्छेदकरूपोपलक्षितधर्मवदधिकरणसमयध्वंसानधिकरणसमयसम्बन्धत्वेन सर्वनामवदेकशक्तिस्वीकारेऽपि न निस्तार इति चेत्? सत्यम्। स्वप्रतियोगिवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकध्वंसाभावविशिष्टस्वप्रतियोगिकसमयसम्बन्धोऽनुगत एवोत्पत्तिपदार्थः द्वितीयादिक्षणोत्पत्तिकध्वंसप्रतियोगिनि काले स्वस्य वृत्तेः द्वितीयादिक्षणे न स्वस्य तादृशसम्बन्धावच्छिन्नध्वंससामान्याभावविशिष्टत्वमिति तादृशाभावविशिष्टस्वप्रतियोगिकसम्बन्ध आद्यक्षण एवेति नातिप्रसङ्गः प्रतियोगी च उपलक्षणविधया सम्बन्धघटक इति ध्वंसकाले तत्प्रतियोग्यसत्त्वेऽपि न तद्घटितसम्बन्धावच्छिन्नध्वंसाभावो द्वितीयक्षणे।

न च ध्वंसकाले तत्प्रतियोगिसमयवृत्तित्वस्याप्यसत्त्वात् कथं तत्सम्बन्धावच्छिन्नाभावदौर्लभ्यं तत्सम्बन्धासत्त्वे सम्बन्धावच्छिन्नाभावस्याप्यावश्यकत्वात् कालान्तरीणसम्बन्धाश्रयेऽप्यवर्तमानस्योपलक्षणीभूतसम्बन्धावच्छिन्नाभावस्य प्रामाणिकत्वादिति वा-

ष्यम् । स्वप्रतियोगिवृत्तितादात्म्यस्य सम्बन्धतास्वीकारेणानुपपत्त्यनवकाशात् स्वतादात्म्यस्य स्वस्मिन्सर्वदैव सत्त्वात् ।

(टी०) तदङ्गीकारे तु क्वचिदपि यदीयसमयसम्बन्धे यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य तत्समयसम्बन्धः, तदधिकरणक्षणावृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं वा । क्षणत्वं च स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयत्वं स्ववृत्तियावद्ध्वंसविशिष्टसमयत्वं स्ववृत्तियावदभावविशिष्टसमयत्वं स्वस्वपूर्ववर्तियावत्पदार्थविशिष्टसमयत्वं वा ।

(गा०) तदङ्गीकारे तु । महाप्रलयाङ्गीकारे तु । क्वचिदपीति । यदीयसमयसम्बन्धसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वाभाव इत्यर्थः । स्ववृत्तिध्वंसाप्रतियोगितदीयसमयसम्बन्धसामान्यकसमयानुयोगिकस्तत्सम्बन्ध उत्पत्तिरिति समुदायार्थः । तदीयसमयसम्बन्धस्य कस्याप्याद्यक्षणे ध्वंसासत्त्वात्तत्सम्बन्धसामान्यस्याद्यक्षणवृत्तिध्वंसाप्रतियोगितया आद्यक्षण एव तादृश स्वमिति तत्सम्बन्ध उत्पत्तिः । चरमध्वंसीयसमयसम्बन्धस्याप्रसिद्धावपि तदीयसम्बन्धसामान्ये प्रलयवृत्तिध्वंसाप्रतियोगित्वसत्त्वात्प्रलयसम्बन्ध एव तदुत्पत्ति द्वितीयादिक्षणसम्बन्धस्य द्वितीयादिक्षणवृत्तिध्वंसाप्रतियोगितया तत्सम्बन्धेऽतिप्रसङ्गवारणाय सामान्यपदं तदुपादाने च सामान्यान्तर्गतप्रथमक्षणसम्बन्धस्य द्वितीयादिक्षणवृत्तिध्वंसाप्रतियोगित्वविरहान्न द्वितीयक्षणादि तादृश स्वमिति नातिप्रसङ्गः । तदीयसमयसम्बन्धाप्रतियोगिकस्ववृत्तिध्वंससामान्यकसमयानुयोगिकस्तत्सम्बन्ध उत्पत्तिरित्यपि लक्षणं सम्भवति सामान्यपदमनन्तर्भाव्य स्ववृत्तिध्वंसप्रतियोगिसम्बन्धाप्रतियोगितत्कसमयानुयोगिकस्तत्सम्बन्धस्तथेत्यपि शक्यते वक्तुं उत्पत्तिनिर्वचनोपयोगितयैव क्षणलक्षणमवतारयितुं गुरुशरीरामपि क्षणघटितामुत्पत्तिं निर्वक्ति । तदधिकरणेति । व्याप्यत्वं स्वव्यापकतत्कत्वं तथा च स्ववृत्तिध्वंसप्रतियोगिनाव्यापकतदधिकरणक्षणवृत्तित्वा-

भावकसमये तत्सम्बन्ध उत्पत्तिरित्यर्थः । तदीयाद्यक्षणवृत्तित्वं-सप्रतियोगिमात्रस्यैव तदधिकरणक्षणे असत्त्वस्तरसम्बन्धसङ्कटः। द्वितीयादिक्षणोत्पत्तिकध्वंसप्रतियोगिनस्तदधिकरणाद्यक्षणादौ इत्येतातिप्रसङ्गः द्वितीयादिक्षणवृत्तिकध्वंसप्रतियोगिनश्चिरविनष्टस्य तदधिकरणक्षणावृत्तितया अतिप्रसङ्गवारणाय ध्वंसप्रतियोगिवृत्तित्वमनुपेक्ष्य ध्वंसप्रतियोगिताव्यापकत्वमभावविशेषणमुपात्तं प्रतियोगितायां तदधिकरणक्षणवृत्त्यवृत्तित्वरूपताहशक्षणावृत्तित्वव्याप्तिनिवेशे चिरविनष्टनिष्ठद्वितीयादिक्षणवृत्तिध्वंसप्रतियोगितायां तत्सत्त्वेनातिप्रसङ्गः ताहशप्रतियोगितासामान्ये तथाविधव्याप्तिनिवेशे सामान्यपदार्थस्य व्यापकताघटिततया गौरवमिति स्वव्यापकत्वरूपव्याप्तेरेव निवेशः।

न च यादृशक्षणद्वयात्मककालमध्ये न कस्यापि विनाशो जातस्तत्रातिव्याप्तिरिति वाच्यम्। प्रतिक्षणं कस्यचिदुत्पत्तिः कस्यचिद्विनाश इति नियमात् आद्यक्षणवृत्तिध्वंसप्रतियोगिनोऽपि तदधिकरणस्थूलकालवृत्तितया असम्भवादित्यतः क्षणनिवेशनम्। तदधिकरणक्षणावृत्तित्वस्थले कालिकसम्बन्धेन तद्वृत्तित्वनिवेशेनाप्युपपत्तौ उक्तयुक्त्या क्षणघटनानुरोधेन गुरुतरारम्भः।

नन्वत्र क्षणत्वं स्ववृत्तिप्रागभावप्रतियोग्यनधिकरणत्वं स्ववृत्तिप्रतियोगिकप्रागभावानाधारत्वं वा प्रागभावघटितमेवेत्यत आह। क्षणत्वं चेति। स्ववृत्तीति। ध्वंसतत्प्रतियोगिनोरेकक्षणावृत्त्योरधिकरणं स्थूल एव कालो न तु क्षण इति स्ववृत्तिध्वंसप्रतियोग्यनधिकरणत्वं तस्य सुघटम्। न च क्षणिकपदार्थानङ्गीकारे कर्मादेरेव यादृशविशेषणविशिष्टस्य क्षणमात्रस्थायिता तादृशविशेषणविशिष्टस्य क्षणतयोक्तलक्षणासम्भवः कालमात्रस्यैव स्ववृत्तिध्वंसप्रतियोग्याधारत्वादिति वाच्यम्। प्रतियोग्यनधिकरणत्वं हि न प्रतियोग्याधारभिन्नत्वं किं तु प्रतियोग्याधारताविरहः प्रतियोगिविरह एव वा तथा चान्त्यादिक्षणावच्छेदेन स्ववृत्तिध्वंसप्रतियोग्यधिकरणस्यापि कर्मादेरन्त्यक्षणावच्छिन्नस्य तादृशाभावविशिष्टत्वान्न दोषः तदधिकरणक्षणावृत्तित्वेत्यादिलक्षणे च तदधिकरणतावच्छेदकस्ववृत्तिध्वंसप्रतियोग्याधारताविरहवैशिष्ट्यरूपक्षणत्वावच्छिन्नावृत्तित्वमेव विवक्षितं तेन घटाद्यधिकरणस्थलकाले उक्तविशेषणावच्छिन्नतया क्षणा-

रूपे तदीयाद्यक्षणवृत्तिध्वंसप्रतियोगिनां वृत्तावपि नासम्भवः स्वप्रतियोगिकध्वंसवत्तादात्म्यसम्बन्धावच्छिन्नप्रतियोग्यभावविशिष्टत्वमनुगतं क्षणत्वं सम्बन्धमध्ये स्वपदार्थनिवेशे क्षतिविरहादित्यवधेयम् । अत्र यथाश्रुते स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं यदि तादृशाधारताप्रतियोगिकविरहो विवक्षितस्तदा स्ववृत्तिध्वंसप्रतियोगिपूर्वविनष्टपदार्थाधारताविशेषविरहविशिष्टत्वं कर्मादीनां सर्वदैवेत्यतिप्रसङ्गात्तादृशाधारतात्वावच्छिन्नाभावस्तादृशप्रतियोगित्वावच्छिन्नाभावो वा विवक्षणीयः तथा च महाप्रलयात्मकक्षणेऽव्याप्तिः तद्वृत्तिध्वंसप्रतियोग्याधारतात्वादेः स्वसमनियतध्वंसप्रतियोग्याधारतात्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्धेः । न च महाप्रलयस्य क्षणत्वाभाव इष्ट एवेति वाच्यम् । तथा सति चरमध्वंसाधिकरणक्षणाप्रसिद्धेस्तदुत्पत्त्याद्युक्तलक्षणाव्याप्तिरिति स्ववृत्तिध्वंसप्रतियोगित्वाद्यवच्छिन्नाभावमुपेक्ष्य तादृशप्रतियोगिकाभावकूटं निवेश्य लक्षणान्तरमाह । स्ववृत्तीति । अभावकूटान्तर्गतध्वंसभिन्नाभावनिवेशे प्रयोजनाभावः प्रागभावस्य प्रामाणिकत्वमते प्रागभावादिघटितकूटनिवेशेऽसम्भवात् सर्वमतसाधारण्यानुरोधाच्च यावन्तो ध्वंसा एव निवेशिताः स्ववृत्तिध्वंसप्रतियोगिपूर्वविनष्टप्रतियोगिकध्वंसवैशिष्ट्यस्य कर्मादौ सर्वदा सत्त्वाद्यावत्त्वं ध्वंसविशेषणम् । यावद्ध्वंसवैशिष्ट्यं प्रलयान्यक्षणमात्राव्याप्तमतः स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकत्व यावत्त्वविशेष्यतावच्छेदकतया निवेशितं यावद्ध्वंसविषयकज्ञानादेर्विषयितालक्षणवैशिष्ट्यं द्विक्षणावच्छिन्नस्येति कालिकसम्बन्धात्मकवैशिष्ट्यनिवेशलाभाय समयपदम् । वस्तुतः स्ववृत्तिध्वंसप्रतियोगिशब्दादिप्रतियोगिकया ध्वंसविशिष्टत्वं गगनादेरपि महाप्रलये न च तस्य क्षणत्वं कालत्वविरहादिति तद्वारणाय समयपदम् ।

न च कालिकसम्बन्धेन स्ववृत्तित्वनिवेशादेव न गगनाद्यतिप्रसङ्गः तत्र कालिकसम्बन्धानिवेशात् तन्निवेशलाभस्यैव वा समयपदप्रयोजनत्वात् ।

एतेन पापध्वंसविषयकत्वस्य ज्ञानादौ द्विक्षणावच्छिन्ने सत्त्वेऽपि अन्त्यक्षणोत्पन्नध्वंसस्य प्राक्क्षणेऽसत्त्वेनोपलक्षणतया यावद्ध्वंसरूपविशेषणावच्छिन्नस्य क्षणिकत्वमेवेति पूर्वोक्तव्याख्यासङ्गतावपि

तदानीं मिथः संयुक्तेषु । उत्पादवारणायेति । तत्तन्तुत्वेन तत्पटत्वावच्छिन्नं प्रत्यहेतुत्वे प्रागभावासत्त्वे सामान्यसामग्रीशालिनि तन्त्वन्तरे, तद्व्यक्त्यनुत्पादप्रयोजकस्य दुर्वचत्वात् कार्यानुत्पत्तौ कारणतावच्छेदकावच्छिन्नाभावस्यैव प्रयोजकत्वादिति भावः । तत्पटजनकत्वम् । तादात्म्यसम्बन्धेन तत्पटत्वावच्छिन्नजनकत्वं

न च तत्पटत्वावच्छिन्नस्य तत्तत्तन्तुत्वावच्छिन्नव्यभिचारिणः तज्जन्यतेति वाच्यम् । तत्तन्तुसमवेतत्वविशिष्टस्य तत्तन्तुत्वाव्यभिचारितया तादृशविशेषणावच्छिन्नस्य तज्जन्यत्वे बाधकाभावात् । तत्तन्तुत्वविशिष्टसमवायः कार्यतावच्छेदकसम्बन्धः तेन च सम्बन्धेन तत्पटस्य तत्तन्तुत्वाव्यभिचारितैवेत्यप्याहुः ।

तच्च विशेषरूपेण समवायादेः सम्बन्धतायाः प्रामाणिकत्व एवोपपद्यते । न च तत्तन्तुत्वेन तत्पटहेतुत्वे स्वाधिकरणतन्त्वन्तर एव तत्पटानुत्पादापत्तिः, तत्प्रयोजककारणतावच्छेदकावच्छिन्नाभावसत्त्वात् न हि यावत्कारणतावच्छेदकावच्छिन्नाभावसत्त्वमेव कार्यानुत्पत्तिप्रयोजकं दण्डादिमति चक्रादिविरहिणि घटाद्यनुत्पादानुपपत्तेः किंतु किञ्चित्कारणतावच्छेदकावच्छिन्नाभाव एवेति वाच्यम् । यत्तत्सम्बन्धेन तद्धर्मावच्छिन्नानुत्पादे तत्सम्बन्धेन तद्धर्मावच्छिन्ननिरूपितकिञ्चित्कारणतावच्छेदकावच्छिन्नाभाव एव प्रयोजकः स्वाधिकरणतन्त्वन्तरे तत्तत्तन्तुसमवेतत्वविशिष्टतत्पटत्वावच्छिन्नस्य तत्तन्तुवृत्तित्वविशिष्टसमवायेन तत्पटत्वावच्छिन्नस्य वा ऽनुत्पाद इष्ट एव । एवं सामान्यधर्मावच्छिन्नकार्यव्यतिरेके सामान्यसम्बन्धावच्छिन्नतद्व्यतिरेके च विशेषधर्मावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नतत्तन्तुवृत्तिव्यतिरेकनिकरो विशेषसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नव्यतिरेकनिकरश्च प्रयोजकः स्वाधिकरणतन्त्वन्तरे चैतत्तन्तुभेदसत्त्वेऽपि तत्तन्तुसमवेतत्वविशिष्टपटत्वावच्छिन्नजनकतावच्छेदकावच्छिन्नस्य तत्तन्तुवृत्तिसमवायसम्बन्धावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकावच्छिन्नस्य वा व्यतिरेकासत्त्वान्न तत्र सामान्यतः समवायेन तत्पटत्वावच्छिन्नानुत्पादः विशिष्टतत्पटत्वतत्पटत्वयोरभेदेऽपि कथञ्चित्सामान्यविशेषभावः समर्थनीयः ।

अथ तद्धर्मावच्छिन्नोत्पत्तौ तद्धर्मावच्छिन्नसामग्री-तद्व्यतिरेके च तद्धर्मावच्छिन्नसामग्र्यव्यतिरेकः प्रयोजकः यत्किञ्चित्कारणतावच्छेदकावच्छिन्नाभावस्य च सामग्रीविरहनिर्वाहकतयैव कार्यानुत्पादप्रयोजकत्वं तद्धर्मावच्छिन्नसामग्री च तद्धर्माश्रययत्किञ्चिद्व्यक्तिनिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नसमुदायः तत्समुदायविरहश्च; प्रकृते केवलान्वयीति स्फुटतरोऽनिर्वाहः यत्किञ्चिदेकधर्मावच्छिन्ननिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नसमुदायश्च न सामग्री सामान्यविशेषसामग्र्योः परस्परापेक्षानुपपत्तेरिति चेत्? न तत्तन्तुवृत्तित्वविशिष्टसमवायस्य तत्तन्तुजन्यतावच्छेदकसम्बन्धत्वमते समवायस्यानुयोगिभेदेन भेदोपगमे च न काप्यनुपपत्तिः। तद्धर्मवद्यत्किञ्चिदेकव्यक्तिनिष्ठयत्किञ्चिदेकतादृशसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नस्तोमस्यैव तादृशतद्रूपावच्छिन्नसम्बन्धेन तद्धर्मावच्छिन्नोत्पादकसामग्रीत्वात् तादृश्याः समवायेन तत्पटत्वावच्छिन्नोत्पादप्रयोजकसामग्र्याः प्रत्येकं तत्समवायिसकलतन्तुष्वेव सत्त्वात् समवायेन तदनुत्पत्तौ प्रयोजकस्य तादृशसामग्रीविरहकूटस्यान्यत्रैव सत्त्वात्। विशिष्टतत्पटत्वस्य तत्तन्तुजन्यतावच्छेदकत्वमते च समवायस्यानुयोगिभेदेन भेदेऽपि समवायत्वेनैकतन्तुनिष्ठसमवायस्याप्यपरतन्तुनिरूपितकार्यतावच्छेदकसम्बन्धत्वादेकसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकयावद्धर्मेषु तत्पटारम्भकसकलतन्तुनिष्ठतत्तद्व्यक्तित्वानां चान्तर्भावात् तदवच्छिन्नसमुदायव्यतिरेकः सर्वत्रैवेति दर्शितदोषस्य दुर्वारतया तद्धर्मवद्यत्किञ्चिदेकव्यक्तिनिरूपिततत्सम्बन्धावच्छिन्नयत्किञ्चिदेकाधिकरणताघटिता यावत्यः कारणतास्तत्र तदवच्छेदकावच्छिन्नसमुदायस्यैव तेन सम्बन्धेन तद्धर्मावच्छिन्नोत्पादकसामग्रीत्वमुपेयं तत्तत्तन्तुत्वावच्छिन्नजनकताघटकोत्पत्तिशरीरे तत्तद्व्यक्तिसमवेतत्वविशिष्टनिरूपिता कार्याधिकरणतैव निवेश्यते अन्यथा व्यभिचारेण तादृशव्यापकत्वानिर्वाहात् समवायिभेदभिन्नानां तादृशाधिकरणतानां च एकैकाधिकरणतामुपादाय निरुक्तसामग्रीसमवधानं तत्पटारम्भकतत्तत्तन्तुषु सुघटमेव। विजातीयसंयोगादिरूपसामान्यकारणनिरूपितकार्यताशरीरेऽपि जन्यद्रव्यत्वादिरूपसामान्यधर्मावच्छिन्नाधिकरणता-

त्वेन दर्शितविशिष्टाधिकरणतानामस्त्येव निवेशः । विशेषधर्मावच्छिन्नाधिकरणताभ्यः सामान्यधर्मावच्छिन्नाधिकरणताया अतिरिक्ताया अनभ्युपगमात् फलताधिकरणताकूट एव सामान्यधर्मावच्छिन्ननिरूपितत्वोपगमादिति तत्तत्तन्तुरूपविशेषसामग्र्या पटजनने उक्तसामान्यसामग्र्यपेक्षा तत्तत्कारणताया अपि तत्तन्तुसमवेतत्वविशिष्टाधिकरणताघटितयावत्कारणतान्तर्गतत्वादित्यलं विस्तरेण ।

यत्किञ्चिदधिकरणतामन्तर्भाव्य दर्शितरीत्या सामग्रीनिर्वचने च शुद्धं तत्पटत्वमेव कार्यतावच्छेदकं शुद्ध एव समवायः कार्यतावच्छेदकसम्बन्धः ।

न चोक्तव्यभिचारात् तत्सम्बन्धेन तद्रूपेण कार्यत्वानिर्वाह इति वाच्यम् । यत्र कार्यतावच्छेदकं तत्र स्वावच्छिन्नाव्यवहितपूर्ववर्त्तिनः कारणतावच्छेदकावच्छिन्नस्य सामानाधिकरण्यमिति नियमस्यैव कार्यकारणभावघटकतोपगमेन तादृशनियममखण्डयत उक्तव्यभिचारस्याकिञ्चित्करत्वादित्यप्याहुः । लाघवात्सहस्रादिकारणत्वकल्पनमपेक्ष्य तत्पटकारणत्वेन एकतत्प्रागभावकल्पने लाघवात् । कल्प्यत इति । कारणत्वेनेत्यादिः । तथापि कुतो नातिप्रसङ्ग इत्यत आह । स चेति । स्वाश्रय एव प्रतियोगिजनक इति । सामानाधिकरण्यप्रत्यासत्त्यैव तस्य प्रतियोगिहेतुत्वादिति भावः ।

नन्क्तयुक्त्या द्वितन्तुकपटादेः प्रागभावो न सिद्ध्यति अप्रातिरिक्तप्रागभावस्य तत्रानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोश्च कल्पनामपेक्ष्य फलतस्य फलतनियतपूर्ववर्त्तित्वकस्य तन्तुद्वयादेरनन्यथासिद्धत्वमात्रकल्पने लाघवात् तत्र एकस्याः संयोगव्यक्तेरेव वा देशानियमाय हेतुताकल्पनादित्यत आह । इत्थं चेति । प्रतियोगिजनकत्वात् ।'जन्यत्वावच्छिन्नप्रतियोगिजनकत्वात् । येषां विशेषरूपेण कार्यकारणभावस्तेषां सामान्यरूपेणापीति नियमानुरोधादिति भावः ।

न चोक्तयुक्त्या सिद्धस्य पदार्थस्य विनाशित्वे सप्रतियोगिकत्वे च मानभाव इति वाच्यम् । तत्तत्पटादिनाशानन्तरं तदाश्रयतत्तत्तन्तुषु पटान्तरोत्पत्तिसमये पूर्वपटव्यक्तेरापत्तिवारणानुरोधेन तस्य विनाशिताया आवश्यकत्वात् अन्यथा तादृशकारणस्य सामान्यसामग्रीसहितस्य सत्त्वेन तदापत्तेः तत्पटादिव्यक्तिध्वंसस्य

प्रतिबन्धकतामन्तरेण दुर्वारत्वात्, एवं च सप्रतियोगिकत्वमप्यावश्यकं अन्यथा अनुगतप्रागभावनाशकस्य दुर्वचत्वात् सप्रतियोगिकत्वे च स्ववृत्तिप्रतियोगिकत्वसम्बन्धेन कालत्वेनैव सामान्यतः प्रागभावनाशकतासम्भवात् ।

न चैवं प्रतियोगिपूर्वमेव कथं प्रागभावो न नश्येत् प्रतियोग्यधिकरणस्थूलकालस्य सर्वदैव सम्भवादिति वाच्यम् । स्वप्रतियोग्यधिकरणत्वस्ववृत्तिप्रतियोगिकध्वंसवत्त्वोभयसम्बन्धेन ध्वंसवदन्यत्वस्य कालविशेषणत्वोपगमात् द्विक्षणमात्रावस्थायिन एव कालस्य तथात्वात् क्षणत्रयावस्थायिनस्तादृशोभयसम्बन्धेन द्वितीयादिक्षणोत्पन्नध्वंसवत्त्वात् ।

प्रागभावहेतुत्वेऽपि तावत्तन्तूनां कारणत्वमावश्यकं अन्यथाऽतिप्रसङ्गादिति प्रागभावकल्पनमनर्थकमित्याह । त्रिचतुरेष्वेवेति ।

(दी०) त्रिचतुरेष्वेव तन्तुषूत्पन्नेषु संयुक्तेषु च तत्पटोत्पत्तिप्रसङ्गः । तावत्तन्तुवृत्तेः पटस्य कतिपयविरहे कथमुत्पत्तिरिति चेन्न । कार्यानुत्पादस्य विनाकारणविरहमनभ्युपगमात्, सामग्रीसत्त्वेऽग्रिमक्षणे कार्यसत्त्वस्यावश्यकत्वाच्च ।

(गा०) असमवायिकारणसमवधानाय संयुक्तेष्विति ।

न च चरमतन्तुकारणतयैवायमतिप्रसङ्गो वार्यतां किं सकलतन्तुहेतुतया ? एकप्रागभावहेतुतयैव च देशनियम उपपद्यतामिति वाच्यम् । प्रथमोत्पन्नतन्तुद्वयसंयोगोत्तर यत्रापरसकलतन्तूनां चरमारम्भकतत्संयोगानां वा एकदा उत्पादस्तत्र विनिगमनाविरहेण तावतां तन्तूनां तत्संयोगानां वा कारणताया आवश्यकत्वात् प्रागभावादिकल्पनामपेक्ष्य प्राथमिकस्य तन्तुद्वयस्य तत्संयोगस्य वा देशनियमाय हेतुताया एवोचितत्वात् ।

यद्यप्येवमपि यत्र क्रमेणैव सहस्रादितन्तूनां तत्संयोगानां वोत्पत्तिस्तत्र चरमव्यक्तिहेतुतया पूर्वं पटोत्पादवारणसम्भवे सर्वव्यक्तीनां हेतुत्वमनावश्यकमिति प्रागभावस्यैकहेतुताकल्पनमेव दैशिकातिप्रसङ्गवारणायोचितम् । एवं यत्र युगपदेव सकलतन्तूनां संयोगानां वोत्पत्त्या पटोत्पादस्तत्रापि तावतां तन्तूनां संयोगानां

धा विशिष्य कारणत्वं नावश्यकमिति तत्रापि प्रागभावकारणत्वं निष्प्रत्यूहम् । तथापि तत्र नावहृत्तिसंख्याविशेषहेतुतयैवातिप्रसङ्गवारणं सम्भवतीति किं प्रागभावेनेति पश्चाद्व्यक्तीभविष्यति ।

अथ यत्र क्रमेण तन्तूनां संयोगोत्पत्त्या सहस्रादितन्तुकपटोत्पत्तिस्तत्र कतिपयसंयोगानन्तरमेव तत्पटोत्पत्तिवारणाय तत्पटं प्रति तावतां संयोगानां हेतुत्वेऽपि तदानीं पटसामान्योत्पत्तिर्दुर्वारैव सामान्यसामग्र्या अक्षततत्वात् ।

न च तदानीं द्वितन्तुकादिपटोत्पाद इष्ट एवेति वाच्यम् । तथा सति द्रव्यवति द्रव्यान्तरानुत्पत्त्या सहस्रतन्तुकपटोत्पादानुपपत्तेः सहस्रतन्तुकपटपूर्वं द्वितन्तुकादिपटनाशकसामग्रीसमवधानानियमात् ।

न च तत्तत्पटव्यक्त्यतिरिक्तपटसामान्यासिद्धेस्तत्र च प्रसिद्धपटव्यक्तीनां सामग्रीविरहेण न पटसामान्यापत्तिस्सहस्रतन्तुकपटनाशे सत्युत्पत्स्यमानद्वितन्तुकादिखण्डपटस्य समवायिकारणासमवायिकारणयोः सत्त्वेऽपि सहस्रतन्तुकपटनाशरूपतन्निमित्तकारणासत्त्वेन तत्सामग्र्या महापटपूर्वमसत्त्वात् महापटनाशस्य प्रतिबन्धकसंसर्गाभावमुद्रया सामान्यहेतुतावत् खण्डपटादिव्यक्तिं प्रति विशिष्य तत्पटनाशत्वेनापि हेतुताया अपि पूर्वं तदापत्तिवारणानुरोधेन कल्पनीयत्वादिति वाच्यम् । तत्तद्व्यक्तिसामग्रीबाधेन सामान्यकार्यवारणसम्भवेन सामान्यकार्यकारणतोच्छेदापत्तेरिति चेत् ? यत्र सामान्यकार्यकारणभावकल्पनया अतिप्रसङ्गवारणसम्भवस्तत्र तत्तद्व्यक्तिसामग्रीविरहकूटस्य सामान्यकार्यानुत्पादप्रयोजकता नोपेयते गत्यन्तरविरहे च तादृशविशेषसामग्रीविरहकूटस्यापि तथात्वकल्पनं निराबाधमेव । अत एव स्मृतावुद्बोधकविशेषाणामननुगमेऽसम्भवेन तत्तद्व्यक्तित्वेनैव हेतुत्वेऽपि तदभावात् स्मृतिसामान्यानुत्पादः । एवं चागत्योक्तस्थले तत्तत्पटसामग्रीविरहकूटस्यैव सामान्यकार्यानुत्पादप्रयोजकत्वमुपगन्तव्यमिति नातिप्रसङ्गः ।

अस्तु वा तत्तन्महापटसामग्रीपूर्वकालावच्छिन्नतत्तत्पटारम्भकसंयोगरूपप्रतिबन्धकाभाव एव पटसामान्यसामग्री घटकत्वं च प्रागभावाघटितमेव निरुक्तरूपं ग्राह्यमिति दिक् ।

तावत्तन्तुवृत्तेः पटस्य तावत्तन्तुविरहदशायामुत्पत्तौ तस्य तावत्त-

न्तुवृत्तित्वानुपपत्तिरित्यत एव न तदापत्तिरिति शङ्कते । तावदिति । आपत्तौ बाधोऽनुगुण एवेत्याशयेनाह । कार्यानुत्पादस्येति । कारणविरहम् । कारणतावच्छेदकावच्छिन्नाभावम् । अनभ्युपगमादिति । तदभ्युपगमे कार्यानुत्पादे कारणतावच्छेदकावच्छिन्नाभावाधीनत्वनियमभङ्गापत्तिरिति भावः । उक्तापत्तिमूलीभूतव्याप्तिमाह । सामग्रीति ।

आपत्तिवारणं पुनः शङ्कते । तत्पटेति ।

(दी०) तत्पटप्रागभावाश्रययावत्तन्तुत्वेन तत्पटजनकत्वमिति चेत् ? अवच्छेदककोटौ प्रागभावस्य प्रवेशाप्रवेशयोः कारणत्वे प्रमाणाभावः । परस्परासंयुक्तेषु कतिपयतन्तुषु तत्पटो जायेत । न च तत्पटप्रागभावव्याप्ययावत्संयोगानामपि जनकत्वं कतिपयतन्तुसंयोगेष्वतीतेषु अनागतेषु वा तत्पटानुत्पत्तिप्रसङ्गात् । तत्पटप्रागभावमपेक्ष्य स एव पटो लघीयान्, यावत्त्वानिरुक्तेश्च । एतेन त्रित्वाद्युत्पत्तिर्व्याख्यातेति ।

(गा०) तावत्तन्तूनामनेन रूपेण हेतुत्वे तावतैव दैशिकातिप्रसङ्गवारणसम्भवेन प्रागभावहेतुताया अप्रामाणिकत्वेऽपि तादृशकारणतावच्छेदकतयैव प्रागभावः सेत्स्यतीत्यभिमानः । अवच्छेदकतया सिद्धस्य प्रतियोग्यजनकत्वे *प्रतियोगिजनकाभावलक्षणः प्रागभावोऽसिद्ध* एवेत्याशयेनाह । प्रवेशाप्रवेशयोरिति । यावत्त्वविशेषस्य तादृप्येणावच्छेदकत्वे प्रागभावाप्रवेशोऽपि सम्भवतीत्याशयेन प्रागभावप्रवेशेऽनास्था सूचिता । उक्तहेतुतयापि न कालिकातिप्रसङ्गवारणं सम्भवतीत्याह । परस्परेति । तावत्तन्तुषु । उत्पन्नेष्वपीत्यादिः । तत्पटो जायेतेति । उक्तयावत्तन्तुरूपकारणसत्त्वादिति भावः ।

न चेति । विनष्टानामनागतानां च तन्त्वन्तरसंयोगानामुदासीनतन्तुसंयोगानां च तत्पटपूर्वमसत्त्वेन तत्साधारणयावत्त्वस्य कारणतावच्छेदकता न सम्भवतीति व्याप्यान्तम् । व्याप्यत्वनिवेशोऽपि तत्पटारम्भकतन्तुमात्रसमवेतानामपि तत्पटानारम्भकसंयोगानां

तत्पटपूर्वसत्त्वानियमेन उक्तरूपेण हेतुत्वासम्भव इत्याशयेनाह । कतिपयेति । तत्पटसमानकालवृत्तित्वे सति तत्पटप्रागभावकालीनत्वस्यापि संयोगविशेषणत्वे नोक्तदोषावसर इत्यत आह । तत्पटेति । स एव पट इति । तथा चोक्तविशेषणसहितं तत्पटव्याप्यत्वमेव निवेश्यतां किं तत्पटप्रागभावव्याप्यत्वनिवेशनेन ।

ननु तत्पटव्याप्यत्वेन संयोगनिवेशेऽन्यत्र तत्पटोत्पत्त्यनन्तरं तन्तुसंयोगानामपि तत्पटव्याप्यत्वसम्भवेन तन्त्वन्तरमन्तर्भाव्य तत्पटोत्पत्त्यापत्तेर्दुर्वारत्वमिति चेत् ? प्रागभावव्याप्यत्वेन संयोगनिवेशेऽपि स्वारम्भककतिपयसंयोगपूर्वं तत्पटोत्पत्तौ तत्संयोगानां तत्पटप्रागभावकालीनत्वविशेषणाक्रान्तत्वानुपपत्तेः । पूर्वं निरुक्तकारणासत्त्वं कार्यानुत्पादाधीनमेवेति पूर्वं तत्पटोत्पादोऽपि दुर्वार एवेति भावः ।

ननु तावत्तन्तूनां तावत्संयोगानां वा यावत्त्वेन कारणत्वं न देशिकातिप्रसङ्गवारकं यावत्त्वावच्छिन्नस्य एकदेशे क्वचिदप्यप्रत्यासन्नतया कालिकातिप्रसङ्गवारणाय यावत्त्वावच्छिन्नस्य हेतुत्वोपगमात् देशिकातिप्रसङ्गभङ्गाय च प्रागभावहेतुत्वमावश्यकमित्यत आह । यावत्त्वेति ।

न चापेक्षाबुद्धिविशेषविषयतापर्याप्त्याश्रयत्वम् । तद्विशेषपदार्थस्य दुर्निरूपत्वात् । तत्पटप्रागभावव्याप्यनिरुक्तसंयोगत्वव्यापकविषयताकत्वं विशेषपदार्थ इति चेत् ? तथाविधयत्किञ्चित्संयोगविषयकबुद्धिविषयताया अपि बुद्धिविषयतात्वादिना तथाविधसंयोगत्वं व्यापकत्वाद्यत्किञ्चित्संयोगानन्तरं तत्पटोत्पत्त्यापत्तेर्दुर्वारत्वात् तादृशयावत्संयोगविषयकबुद्धिविशेषं तद्व्यक्तित्वेनोपादाय तद्विषयतात्वेन तद्व्यापकत्वनिवेशे तद्विषयतापर्याप्त्याश्रयत्वमेव यावत्त्वं किमिति न रोचयेः ? न वा तदपि साधीयः, तावत्तन्तुसंयोगविषयकबुद्धीनां पुरुषादिभेदेन भिन्नानां सर्वासामेव तत्तद्व्यक्तित्वेन विनिगमनाभावान्निवेशनीयतया तदपेक्षया यावत्तन्तुसंयोगानां तत्तद्व्यक्तित्वेन हेतुताया एव देशकालनियमाय कल्पयितुं युक्तत्वात् ।

इत्यादिदेशनियमाय प्रागभावसिद्धिरित्यपि दूषयति । एतेनेति । कस्यचित्समवायिकारणस्यासमवायिकारणस्य वा अनुत्पाद-

दशायामेव द्वित्वाद्युत्पत्तिवारणाय यावतां समवायिनां तदेकरूपाणां वा कारणतया आवश्यकत्वे तत एव तदुत्पत्तिदेशनियम इति भावः ।

प्रागभावस्य प्रत्यक्षत्वाभिमानेन तत्कारणत्वं क्वचिदुत्पन्नस्य पुनरुत्पादप्रसङ्गवारकतया व्यवस्थापयतां मतमाह । परे पुनरिति ।

(दी०) परे पुनरिहेदानीं घटध्वंस इतिवदिहेदानीं घट-प्रागभाव इति साधारणमेव लोकानां प्रत्यक्षं कल्पयन्तस्तद्बलात् प्रागभावं सामान्यलक्षणां च व्यवस्थापयन्तो वर्णयन्ति ।

अन्यथाप्यवृत्तेः कार्यस्य द्वितीयक्षणे धारावाहिकस्थले च प्राथमिकनिर्विकल्पकस्य चतुर्थक्षणे उत्पत्तिवारणाय एकावच्छेदादिना कार्याभावस्य च कारणत्वं वाच्यं तथा च लाघवात् प्रागभावस्य तत्त्वं कल्प्यते स्वभावाधीनत्वाच्च तस्मादेशिकत्वात्मदेशनियमः संयोगादीनामिति ।

(गा०) तद्बलात् । तादृशप्रत्यक्षबलात् । सामान्यलक्षणां चेति । तां विना प्रतियोगिभासकाभावेन तादृशप्रत्यक्षानुपपत्तेरिति भावः । प्रागभावस्य वर्णनीयार्थमाह । अन्यथेति । कार्यस्य संयोगादेर्द्वितीयक्षणे उत्पत्तिवारणायेत्यग्रिमेणान्वयः । उत्पन्नेऽपि तस्मिंस्तदत्यन्ताभावस्यान्यावच्छेदेन सत्त्वात्कार्यात्यन्ताभावहेतुतया पुनस्तदुत्पादवारणासम्भवादिति भावः । संयोगं प्रति क्रियाया विभागं प्रति च संयोगस्य कार्यसहभावेन हेतुत्वेन कर्मजसंयोगस्य संयोगजविभागस्य च स्वजनकक्रियासंयोगनाशोत्पत्त्यधिकरणद्वितीयक्षणे आपत्तिवारणसम्भवेऽपि संयोगजसंयोगस्य द्वितीयक्षणादावुत्पादप्रसङ्गो दुर्वारः ।

यदि सामग्र्यनन्तरक्षणे कार्यमित्येव नियमः न तु कार्योत्पत्त्यधिकरणत्वमित्यपि सामग्रीबलादाद्यक्षणे कार्याधिकरणत्वनिर्वाहेणैवानुगतकार्योत्पत्तिनिर्वाहात् । एवं च द्वितीयक्षणे कार्यवत्त्वमिष्टमेव कार्योत्पत्त्यापादकविरह इत्युच्यते-तदापि न निर्वाह इति दर्शयति । धारेति । अन्तरा निर्विकल्पकोत्पादकचक्षुःसंयोगादिव्य

क्तिविगमे तत्पूर्वं चक्षुःसंयोगादिव्यक्त्यन्तरात्तद्धीर्विकल्पकापत्तिवारणाय कल्पनीयहेतुना कृतचक्षुःसंयोगादिव्यक्तिविरहादेव न चतुर्थक्षणे तदुत्पादसम्भव इति प्राथमिकचक्षुःसंयोगादिव्यक्तीनां तावत्पर्यन्तस्थायिताऽलाभाय धारावहनानुसरणं तत्तद्विशेषणज्ञानव्यक्तिविनाशेन तत्तद्विशिष्टबुद्धिव्यक्तीनां चतुर्थक्षणे नापत्तिसम्भव इत्यतो निर्विकल्पकानुसरणम्। कार्यस्य प्रतिबन्धकतया तृतीयक्षणे उत्पादवारणसम्भवात् चतुर्थक्षणानुसरणम्।

प्रथमातिप्रसङ्गवारकमाह। एकावच्छेदादिनेति। तृतीयार्थो वैशिष्ट्यं तथा च तत्तत्कार्यावच्छेदकावच्छिन्नत्वादिविशिष्टतत्तत्कार्याभावस्येत्यर्थः। आदिपदात्सम्बन्धविशेषावच्छिन्नत्वपरिग्रहः। उत्पन्नस्य संयोगादेरन्यावच्छेदेनाभावसत्त्वेऽपि तदवच्छेदकावच्छिन्नत्वविशिष्टतदभावासत्त्वादतिप्रसङ्गवारणासम्भवो बोध्यः। द्वितीयातिप्रसङ्गवारकमाह। उत्तरज्ञानाभावस्येति। अत्र तज्ज्ञानध्वंसाभाव एव तात्पर्यं तत्र चैकज्ञाननाशेऽपि पञ्चमादिक्षणे प्राथमिकनिर्विकल्पकाद्यापत्तिवारणाय उत्तरज्ञानस्य तज्ज्ञानध्वंसविशिष्टज्ञानत्वेनैव प्रतिबन्धकतायाः वक्तव्यत्वात् तदपेक्षया तज्ज्ञानध्वंसाभावस्य लघुत्वात्। चकारेण विशिष्टस्य कार्याभावस्यापि निर्विकल्पकरूपव्याप्यवृत्तिकार्यहेतुतासमुच्चयः। तेन सामान्यानन्तर्यस्य कार्याधिकरणत्वमात्रनियतत्वेऽपि न तृतीयक्षणे तदापत्तिः।

लाघवादिति। कारणतावच्छेदकस्य तत्प्रागभावत्वस्य एकावच्छेदकावच्छिन्नत्वविशिष्टतदत्यन्ताभावत्वापेक्षया शरीरलाघवात् कारणताद्वयकल्पनापेक्षया एककारणताकल्पने च लाघवादित्यर्थः। प्रागभावस्य प्रमाणान्तरासिद्धत्वे च प्रागभावरूपातिरिक्तधर्मिणस्तत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोश्च कल्पनामपेक्ष्य संयोगादौ गुरोरपि नियतपूर्ववर्तित्वेन क्लृप्तस्य तदीयावच्छेदकावच्छिन्नत्वादिविशिष्टतदभावस्यानन्यथासिद्धत्वमात्रकल्पने निर्विकल्पकस्थले नियतपूर्ववर्तितया क्लृप्तयोस्तादृशकार्याभावोत्तरज्ञानाभावयोरनन्यथासिद्धत्वमात्रकल्पने च लाघवमिति प्रत्यक्षतः प्रागभावसिद्धिः प्रागभिहिता।

ननु संयोगादेरवच्छेदकतानियमाय तत्तदवच्छेदकावच्छिन्नसंयोगं प्रति तत्तदवच्छेदकावच्छिन्नत्वविशिष्टतदभावस्य हेतुत्वमा-

यद्यकमित्यत आह । स्वभावाधीनत्वाच्चेति । इतरानधीनत्वरूपं स्वभावाधीनत्वं प्रागभावप्रादेशिकत्वविशेषणं प्रागभावस्य देशविशेषावच्छिन्नत्व एव किं नियामकमित्यनुयोगसमाधानाय प्रदर्शितम्। अजन्यस्याधिकरणत्वमिवावच्छेदकत्वमपीतरानधीनमित्यभिप्रायः। प्रदेशनियमः । अवच्छेदकतानियमः । एकैकसंयोगावच्छेदकनानाप्रदेशान्निवेश्य उक्तरूपेणात्यन्ताभावहेतुतामपेक्ष्य समानावच्छेदकत्वसामानाधिकरण्यप्रत्यासत्त्या प्रागभावस्य हेतुत्वमेवोचितमिति तदवच्छेदकत्वमेव प्रतियोग्यवच्छेदकत्वनियामकमिति समुदायार्थः।

" न च कारणप्रादेशिकत्वस्य कार्यप्रादेशिकत्वनियामकत्वेऽसमवायिकारणकपालद्वयसंयोगस्य प्रादेशिकत्वाद् घटस्य प्रादेशिकत्वप्रसङ्ग इति वाच्यम् । यादृशकारणतावच्छेदकताप्रत्यासत्तिघटिता तत्कारणप्रादेशिकत्वस्यैव कार्यप्रादेशिकत्वनियामकत्वात् कपालद्वयसंयोगस्य समवायमात्रघटितेति न दोषः । अत्र अत्यन्ताभावप्रत्यय इव विलक्षणप्रागभावप्रत्यय एव सिद्ध इत्यस्वरसवीजम् । एवं निर्विकल्पकं प्रति तत्तद्व्यक्तिप्रागभावत्वेन नानाकारणताकल्पनमपेक्ष्य तत्र विशेषणज्ञानत्वेनैकप्रतिबन्धकत्वकल्पनमेवोचितं प्रतिवध्यतावच्छेदकं च निष्प्रकारकज्ञानत्वं संसर्गानवच्छिन्नविषयताशालिज्ञानत्वं वेत्यन्यदेतत् ।

... न च संयोगादीनामवच्छेदकत्वनियमाय प्रागभावस्य समानावच्छेदकत्वप्रत्यासत्त्या हेतुत्वमेवोचितमिति प्रागभावसिद्धिः,एकैकसंयोगस्यैवानेकावयवावच्छिन्नतया एकैकव्यक्तिं प्रति अनेकेषामवच्छेदकानां तत्तद्व्यक्तित्वेन हेतुत्वे महागौरवादिति वाच्यम् । तावदवच्छेदकवृत्तिसंस्थाविशेषहेतुतयैवावच्छेदकनियमोपपत्तेरित्यादिकमपि बोध्यम् ।

आथर्वणां क्रमोत्पादस्थले कतिपयतन्तुपूरणेष्वेव पटादेर्वारणाय तावत्तन्त्वादिव्यक्तीनां तत्संयोगादिव्यक्तीनां वा विशिष्य कारणत्वकल्पनमावश्यकमित्युक्त्वा पटाद्युत्पादनियामकतया प्रागभावसिद्धिः पूर्वं निराकृता तावता युगपदुत्पन्ननानाश्रयसमवेतकार्योत्पादनियामकतया प्रागभावसिद्धिर्न निराकर्त्तुं शक्यते इत्याशयेन प्रागभावं व्यवस्थापयतां मतमुपन्यस्यति । अन्ये त्विति ।'

(दी०) अन्ये तु सर्वत्र तत्तत्संख्याविशेषाणां विशिष्य हेतुत्वोपगमेनैव तत्तद्द्रव्योत्पादानियमसम्भवेऽपि युगपदुत्पन्नेषु नित्येषु च त्रित्वाद्युत्पत्तिनियामकत्वेन प्रागभावः कल्प्यते इत्याहुः ।

(गा०) तत्र घटादिस्थलमुपेक्ष्य संख्यास्थलपर्यन्तानुधावनबीजं प्रथमतो दर्शयति । सर्वत्रेति । सर्वत्र । युगपदुत्पन्नाश्रयकद्रव्यस्थले । संख्याविशेषाणाम् । स्वसमनियतसहस्रत्र्यादिसंख्यानाम । हेतुत्वोपगमेनेति । कारणत्वस्य समवायिकारणतावच्छेदकत्वस्य वा उपगमेनेत्यर्थः ।

एतेन समनियतसंख्याव्यक्तीनां कारणत्वं कल्प्यते इत्यत्र विनिगमनाविरहात् प्रागभावसिद्धिः गगनादौ असमवायिविलक्षणसंयोगाविरहेण द्रव्यारम्भकतावच्छेदकस्पर्शवत्त्वादिविरहेण च द्रव्योत्पादापत्तिविरहेण तत्साधारणसंख्याहेतुतयापि घटादेर्देशनियम उपपद्यते इति निरस्तम् । कारणतावच्छेदकत्वकल्पे व्यापकसंख्याया अन्यथासिद्धिनिरूपकत्वेन विनिगमनाविरहानवकाशात् ।

(१) (क्रमिकनानावस्तुसमवेतकार्यसमवायिनामसमवायिनां वा तत्तद्व्यक्तित्वेन हेतुतायाः प्राग्व्यवस्थापिततया देशानियामकत्वेऽपि अतथाभूतवस्तुसमवेतकार्योत्पत्तेर्देशानियामकतया प्रागभावसिद्धिर्निष्प्रत्यूहैवेत्यन्येषां मतमुपन्यस्यति । अन्येति । क्रमोत्पन्नद्रव्यस्थल एतदुक्तप्रकारा इति विशेषं प्रथमतो दर्शयति । सर्वत्रेति । तत्तत्संख्याविशेषाणामिति । तत्तद्घटारम्भकपरमाण्वनुसमवेतसहस्रादिसंख्यानामित्यर्थः) ।

न चानेकाश्रितसंख्याया अपेक्षाबुद्ध्यधीनतया यत्र द्रव्योत्पादपूर्वं तदवयवेषु संख्या न जाता तत्र का गतिरिति वाच्यम् । न्यायमते ईश्वरापेक्षाबुद्धिजन्यसंख्यायाः सर्वत्र सम्भवात् । मीमांसकमते चापेक्षाबुद्धेः *संख्यान्यञ्जकतया तामनपेक्ष्यैव संख्योत्पत्तेर्द्रव्योत्पत्तिपूर्वं* तदाश्रयसंख्याविशेषविरहस्य दुर्घटत्वात् । न चारम्भस्वरूपयोग्यगगनादिसाधारणव्यापकसंख्यानामपि हेतुत्वं विनिगमनाविरहेणापद्येतेति प्रागभावकल्पनमेवोचितमिति वाच्यम । संख्याविशेषाणां

(१) ( ) एतदन्तर्गतः पाठः पुस्तकान्तरे नास्ति ।

समवायिकारणतावच्छेदकतया एवोपगमात् गगनादिसाधारणसंख्यानां व्यापकधर्मत्वेनान्यथासिद्धिनिरूपकतया विनिगमनाविरहानवकाशात्।

न च व्यासज्यवृत्तिसंख्याविशेषावच्छिन्नानां प्रत्येकं न क्वचिदपि समवायिनि प्रत्यासन्नतेति कथं तदवच्छिन्नस्य कारणत्वं देशनियामकमिति वाच्यम्। तादृशधर्मस्योपलक्षणतया कारणतावच्छेदकत्वात् प्रत्येकं तद्विशिष्टनिरूपिततादात्म्यस्य सत्त्वेऽपि तदुपलक्षिततादात्म्यस्याक्षततया तस्यैव देशनियामकत्वासम्भवात्।

यत्तु एते द्वावित्यादिप्रतीतेर्व्यवहारस्य चोपपत्तये शक्त्यादिपर्याप्त्याश्रय प्रत्येकमपि तद्विशिष्टनिरूपिततादात्म्यमवश्यमेवोपगन्तव्यमिति संख्याविशेषस्य विशेषणतयाप्यवच्छेदकत्वसम्भवः। एवं च क्रमोत्पन्नवृत्तिकार्यस्थले कतिपयसमवाय्यनुत्पादसमये आपत्तिवारणमपीदृशकारणबलात्सम्भवतीति तन्न प्रत्येकस्मिन् संख्याविशेषविशिष्टभेदशालिनि कार्यद्रव्यपर्याप्त्यनुपपत्तेः।

(१)(युगपदिति। युगपदुत्पन्नेषु च समवेतं यत्त्रित्वादिकं तस्योत्पाददेशनियमायेत्यर्थः। यस्याः संख्याया एकं द्वयं वा समवायिद्रव्यमासीत् अनन्तरं च युगपदेव समवायिनामुत्पत्तिः तेषामनुत्पाददशायामेव तत्तत्संख्योत्पादवारणाय चरमोत्पन्नसमवायिनां तत्र विशिष्य हेतुताया आवश्यकत्वात् देशनियमायातिरिक्तप्रागभावतद्धेतुत्वकल्पनापेक्षया पूर्वावस्थितस्यैकस्योभयस्य वा समवायिनो हेतुत्वे लाघवात् तत्प्रागभावासिद्धेरिति तादृशसंख्यातिरिक्तत्रित्वादिसंख्याया एवोपलक्षणमेतत्। तेन यत्र क्रमश एव सर्वसमवायिनामुत्पत्तिस्तत्समवेतचतुष्ट्वादौ कालनियमाय चरमसमवायिना देशनियमाय च पूर्वोत्पन्नत्रिचतुरादिसमवायिनां हेतुतामपेक्ष्य प्रागभावस्य तद्धेतुताकल्पने गौरवाभावात् प्रागभावसिद्धेर्निष्प्रत्यूहतया यत्र वा युगपदेव त्रिचतुरादिसमवायिनां प्रागुत्पत्तिरनन्तरं चापरस्य तत्रापि प्रागुत्पन्नानां कारणतापेक्षया प्रागभावस्य तद्धेतुताकल्पने गौरवाभावात् तत्सिद्धेरावश्यकतया तस्य लेऽनुपदर्शनान्न्यूनताया अनवकाशः। क्रमोत्पन्नेषु यत्त्रित्वादिकं तत्र समवायिनामसमवायिकारणानां वा पूर्वोक्तयुक्त्या विशिष्य हेतुताया आवश्यकत्वात्तत एव तेषां देशनियमोपपत्तिसम्भवात् युगपदु-

त्पन्नेष्वित्युक्तम् । स्वपूर्ववर्त्तिद्रव्यमन्तर्भाव्य युगपदुत्पन्नानि यानि द्व्यादिद्रव्याणि स्वोत्तरोत्पन्नद्रव्यान्तरमनन्तर्भाव्य प्रकृतसंख्यामुत्पादयन्ति तदन्यद्व्यादिद्रव्याण्यूनवृत्तिसंख्याया नित्यत्रयसमवेतत्रित्वादेश्च उत्पाददेशानियमार्थेत्यर्थः ।

एतेन यत्र प्रथमत एकं द्वयं वा द्रव्यमासीदनन्तरं च द्रव्यत्रयं युगपदुत्पन्नं तावत्सु चतुष्ट्वं पञ्चत्वं वा जातं तत्र तेषां त्रयाणां विशिष्य कारणताया आवश्यकत्वात्तत्र प्रागभावासिद्धावपि न क्षतिः यत्र पूर्वावस्थितद्रव्यमिव स्वोत्तरोत्पन्नद्रव्यान्तरं चान्तर्भाव्य युगपदुत्पन्नानि त्रिचतुराणि संख्यामुत्पादयन्ति तत्र चरमद्रव्यहेतुतयैव कालनियमेऽपि देशानियामकतया प्रागभावसिद्धेरावश्यकतया तादृशस्थलसङ्ग्रहाय स्वोत्तरद्रव्यान्तरानन्तर्भावो भेदप्रतियोगिको वा युक्तः । द्वित्वस्थले फलसनियतपूर्ववर्तिताकसमवायिद्वयानन्यथासिद्धत्वकल्पनेयातिरिक्तप्रागभावरूपधर्मितन्नियतपूर्ववर्तितानन्यथासिद्धत्वकल्पनापेक्षया लघीयसीति त्रित्वाद्यनुसरणम् ।

न च द्वित्वस्थले समवायिनोस्तद्देकत्वयोश्च विशिष्य कारणत्वं विनिगमनाविरहात्कल्पनीयमिति तत्रापि प्रागभावकल्पने लाघवमिति वाच्यम् । द्वित्वादेरसमवायिकारणानुपगमे एकत्वस्य सामान्यरूपेण द्वित्वाद्यहेतुतया समवायिनः फलतसामान्यरूपावच्छिन्नहेतुताकस्यैव विशिष्य हेतुतायां विनिगमकत्वात् त्रित्वस्थले कल्पनीयसाम्येऽपि विनिगमनाविरहात् प्रागभावसिद्धिः चतुष्ट्वादिस्थले तु प्रागभावहेतुतापक्ष एव लाघवं बोध्यम् ।

न च तत्तदपेक्षाबुद्धिव्यक्तेर्विषयतासम्बन्धेनैतत्रित्वादिव्यक्तिहेतुतयैव तदुत्पादनियमसम्भवे किं प्रागभावकल्पनयेति वाच्यम् । द्रव्यान्तरमन्तर्भाव्य चतुष्ट्वादिजनकबुद्धेरपि न्यूनवृत्तित्रित्वादिसंख्याजनकतया अतिरिक्तायास्तद्बुद्धिविषयतायास्तज्जन्यत्रित्वादिव्यक्त्युत्पादनियामकत्वासम्भवान्नानापुरुषीयापेक्षाबुद्धिभिरेकदैव संख्याजनने तत्रापेक्षाबुद्धिव्यक्तेस्तत्संख्याव्यक्तिहेतुत्वं विनिगमनाविरहान्नानाव्यक्तीनामेव तत्तद्व्यक्तित्वेन हेतुतायाः कल्पनीयतया तद्धेतुतया एकैकप्रागभावकल्पनाया एव उचितत्वाच्च ईदृशयुक्त्या सिद्धस्य वस्तुनो ऽभावत्वे सप्रतियोगिकत्वे विनाशित्वे वा मानाभाव

(१) ()एतदन्तर्गतः पाठः पुस्तकान्तरे नास्ति ।

इत्यस्वरससूचनायाहुरिति ।

सामान्यप्रत्यासत्तौ युक्त्यन्तरमुपन्यस्यति । यदित्विति । ज्ञानेच्छेति । इच्छां प्रति ज्ञानस्य कृतिं प्रति इच्छायाश्च कारणत्वग्रह इत्यर्थः । तदुपस्थितिमिति । तत्कार्योपधायकज्ञानेच्छाव्यक्त्युपस्थितिमित्यर्थः । विनेति । सम्भवतीति शेषः । अन्वयसहचारनिरूपककारणव्यक्तिग्रहं विना तद्घटितान्वयव्यतिरेकग्रहस्य ज्ञानसत्त्वे तदधिकरणे तदग्रिमक्षणे इच्छा न तेन विनेत्याकारकस्यासम्भवादिति भावः । सामान्यप्रत्यासत्तिं विना च नेच्छाद्युपधायकज्ञानादिव्यक्तिप्रत्यक्षमिति दर्शयितुमिच्छाद्युत्पत्तिकाले तल्लौकिकप्रत्यक्षं निराकुरुते । न चेच्छेति ।

यत्र त्रित्वाश्रयस्य क्रमेणोत्पादस्तत्र कतिपयाश्रयोत्पत्त्यनन्तरमेव तत्तत्त्रित्वादेरुत्पादवारणाय तदाश्रयव्यक्तीनां समवायिकारणानामसमवायिकारणानां तत्तदेकत्वव्यक्तीनां वा कारणताकल्पनमावश्यकमिति तत्कारणतयैव देशनियमोपपत्तिरन्यत्र तादृशकारणविरहादित्यतो युगपदुत्पन्नेषु नित्येषु चेति । तत्रोक्तातिप्रसङ्गविरहेणाश्रयादिव्यक्तीनां विशिष्य कारणताया अनावश्यकतया देशनियामकैकप्रागभावैकैकत्वकारणताकल्पनस्यैवोचितत्वादिति भावः ।

यद्यपि क्रमोत्पन्नेऽपि द्व्यादिव्यक्तीनां द्व्यादिकारणतापेक्षया चरमोत्पन्नव्यक्तेः कालनियमाय एकैकप्रागभावव्यक्तेश्च देशनियमाय कारणताकल्पने न गौरवं तथापि यत्र एको व्याश्रयव्यक्तिः प्रथममुत्पन्नाऽनन्तरं च युगपदपरसकलाश्रयोत्पत्तिरीदृशक्रमोत्पादस्थले चरमोत्पन्नसकलव्यक्तीनां विनिगमनाविरहेण विशिष्य कारणताया आवश्यकत्वादतिरिक्तप्रागभाव-

[illegible]

रिक्तस्य प्रागभावस्य तत्रानन्यथासिद्धत्वानियतपूर्ववृत्तित्वयोश्च कल्पने गौरवमिति द्वित्वोपेक्षा । त्रित्वस्थले व्यक्तित्रयस्यानन्यथासिद्धत्वकल्पने एकस्य प्रागभावस्य तत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोश्च कल्पनं यद्यपि तुल्यं तथापि विनिगमनाविरहेणापि प्राग-

भावसिद्धिर्दुर्धारैव चतुष्टादिस्थले च प्रागभाववादिमते लाघवमित्याशयः। उत्पादनियामकत्वेन। उत्पादस्य देशिकनियमनिर्वाहकत्वेन। अन्ये त्वाहुरित्यस्वरसमूचनाय, स चैतादृशयुक्त्या सिद्धस्य पदार्थस्याभावत्वे सप्रतियोगिकत्वे विनाशित्वे च मानाभावे ज्ञेयः।

मिश्रमतं दूषयितुमुपन्यस्यति। यत्त्विति।

(दी०) यत्तु ज्ञानेच्छाकृतीनां कार्यकारणभावग्रहो न तदुपस्थितिं विनेति, न चेच्छाकृतिकाले ज्ञानेच्छासाक्षात्कारौ, योग्यविशेषगुणयौगपद्यस्यात्मनि निषेधात् अतो ज्ञानाद्यन्तरसाक्षात्कार एव ज्ञानत्वादिनेच्छाजनकज्ञानादिकं गृह्णातीत्यभ्युपेयमिति। तन्न।

(गा०) तदुपस्थितिं विना। इच्छोपधायकज्ञानकृत्युपधायकेच्छाव्यक्तीनामुपस्थितिं विना। ज्ञानसत्त्वे तदुत्तरक्षणे इच्छा ज्ञानं विना नेत्यन्वयव्यतिरेकग्रहस्य कार्यकारणभावग्राहकतया तत्र च फलोपधायकव्यक्तिमादायैवान्वयांशस्य ग्राह्यतया तदुपस्थितेरपेक्षणीयत्वादिति भावः।

न चेच्छाकृतिकाले ज्ञानेच्छासाक्षात्काराविति। इच्छोत्पादकाले तज्जनकज्ञानस्य कृत्युत्पादकाले च तज्जनकेच्छायाः साक्षात्कारो न सम्भवतीत्यर्थः। योग्यविशेषगुणेति। एकयोग्यविशेषगुणोत्पत्तिक्षणे तद्वदात्मनि योग्यविशेषगुणान्तरानुत्पादनियमादित्यर्थः। अदृष्टसंस्कारोत्पादकाले ज्ञानादेर्ज्ञानाद्युत्पादकाले च अदृष्टादेरुत्पादमादाय व्यभिचारवारणायोभयत्र योग्यतानिवेशः। योग्यत्वं च न लौकिकसाक्षात्कारविषयत्वं तथा सति निर्विकल्पकेन समं विशेषगुणान्तरयौगपद्यानिराकरणासम्भवात् किं तु लौकिकसाक्षात्कारविषयसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं तथा चात्मनि संयोगद्वित्वादेर्युगपदुत्पादाद्व्यभिचार इति विशेषगुणोपादानम्। चक्षुरादिना वेगे गृह्यमाणायां संस्कारत्वजातेर्भावनायां सत्त्वात्तद्व्यावृत्तिर्न स्यादिति संस्कारत्वान्यत्वनिवेशनम्।

न च लौकिकमानसविषयजातिमत्त्वमेव निवेश्यतां संयोगत्वादेश्चाक्षुषादिविषयत्वेऽपि लौकिकमानसाविषयत्वान्नोक्तव्यभिचार इति

किं विशेषगुणविशेषणेनेति वाच्यम् । मनोयोग्यजातिमत्त्वनिवेशे आत्मैकत्वप्रत्यक्षत्वमते सङ्ख्यात्वस्य मनोयोग्यतया तद्वतां द्वित्वादीनामात्मनि युगपदुत्पादेन विशेषगुणान्तर्भावं विना व्यभिचारानुद्धारात् ।

न च योग्यजातिमत्त्वनिवेशे जीवनयोनिकृतेरपि यत्नत्वादिरूपयोग्यजातिमत्त्वाज्ज्ञानादिना समं तस्य युगपदुत्पादानुपपत्तिरिति वाच्यम् । गुणत्वव्याप्यत्वस्थाने जीवनयोनिकृत्यवृत्तित्वस्यैव जातिविशेषणतया निवेशयत्वात् प्रवृत्तित्वादिजातिमादायैव तदितरकृतेर्योग्यतानिर्वाहात् । विशेषगुणत्वं चात्रानेकावृत्तित्वमेव आत्मपरिमाणादेरुत्पादविरहेण तत्साधारण्यस्य व्यभिचाराप्रसञ्जकत्वात् । रूपरसादेः शब्दादेश्चैकत्र युगपदुत्पादादात्मनीति । योग्यत्वस्य मनोयोग्यगुणत्वव्याप्यजातिमत्त्वरूपत्वे तदनुपादेयमेव । अतः । उक्तकार्यकारणभावग्रहानुरोधात् । ज्ञानाद्यन्तरेति । इच्छाद्यनुपधायकज्ञानादीत्यर्थः । ज्ञानत्वादिनेति । सामान्यप्रत्यासत्त्येति शेषः । इच्छादिजनकम् । इच्छाद्युपधायकम् । गृह्णाति । अवगाहते ।

(दी०) पौर्वापर्यापरिचये धर्मिस्वरूपग्रहेऽपि कारणत्वग्रहासम्भवात् । इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारेऽपि तु ज्ञानेच्छासामान्यव्यतिरेकनियतेच्छाकृतिव्यतिरेकग्रहे मनसा कार्यकारणभावग्रहस्यावश्याभ्युपेयत्वात् । कृत्यनुत्पादस्थले ज्ञानेच्छयोः कृत्यनन्तरमिच्छाकृत्योः समूहालम्बने साक्षात्कारस्य स्मरणेन च ज्ञानानुमानस्य च सम्भवात्, विंशत्यङ्गुलयवच्छेदेन युगपद्विंशतिमयत्नोत्पादवदिच्छाकृतिकाले ज्ञानोत्पादस्याविरोधाच्च ।

(गा०) पौर्वापर्यापरिचय इति । तत्तज्ज्ञानतच्चादिच्छाव्यक्त्योरव्यवहितपूर्वापरभावाग्रह इत्यर्थः । तद्ग्रहश्च न सामान्यलक्षणयापि तत्तद्व्यक्तिनाशाधिकरणसमयध्वंसानधिकरणत्वरूपाव्यवधानशरीरे तत्तद्व्यक्तित्वेन कारणव्यक्तीनां निवेशात्ताहशरूपेण व्यक्तीनां ग्रहस्य सामान्यलक्षणयाप्यनिर्वाहादिति भावः ।

कारणत्वग्रहासम्भवादित्यस्यान्वयांशग्रहस्य कारणताग्राहकत्वो- पगम इत्यादिः । इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारादिति यथासंख्यमन्वयो बोध्यः । एतच्च ज्ञानत्वेच्छात्वावच्छिन्नाभावग्रहे हेतुः । व्यतिरेके । व्यतिरेकग्रहस्थले । नियतेच्छाकृतिव्यतिरेकग्रहे । इच्छाकृतिव्यतिरेकस्य नियमतो ग्रहे सति ।

एतेन व्यभिचारग्रहाभावः सम्पादितः । मनसेति । अन्वयांशग्रहनिरपेक्षेणैवेत्यादिः । कार्यकारणभावग्रहस्य । उपनीतभानरूपस्य । ज्ञानेच्छयोरेकदा लौकिकप्रत्यक्षासम्भवेन तत्कार्यकारणभावस्यापि तदसम्भवात् । तथा चालं सामान्यप्रत्यासत्त्येति भावः ।

अभ्युपेत्य फलोपधायकज्ञानेच्छयोरपि प्रत्यक्षमुपपादयति । कृत्यनुत्पादस्थल इति । ज्ञानेच्छयोः समूहालम्बनसाक्षात्कारस्येत्यनेनान्वयः । विनश्यदवस्थस्यापि विषयस्य हेतुत्वोपगमादिच्छोत्पत्त्यनन्तरक्षणे ज्ञानस्य विनाशेऽपि न क्षतिरित्याशयः । तादृशश्च साक्षात्कारो जनकज्ञानस्य ज्ञानत्वावगाहित्वे ज्ञानत्वविशिष्टधीरूपः तस्य तदविषयकत्वे ज्ञानत्वांशे निर्विकल्पकरूपः, तदुत्तरमेव चापनीतमानरूपो ज्ञानत्वविशिष्टतज्ज्ञानग्रह इति बोध्यम् । एवमग्रेऽपि । विषयस्य कार्यसद्भावेन हेतुत्वेऽपि इच्छोपधायकज्ञानग्रहमुपपादयति । स्मरणेनेति । इच्छाकालोत्पन्नसंस्काराधीनकालान्तरीणस्मरणरूपकार्यलिङ्गेनेत्यर्थः । अनुमाने चाहं पूर्वकालीनेतद्विषयज्ञानुभववान् एतद्विषयकवर्तमानस्मृतिमत्त्वादित्याकारकं व्याप्तिः सामान्यतो ग्राह्या । नानावयवेषु युगपन्नानाजातीयचेष्टास्थले तन्नियामकनानाजातीयनानाकृतीनां युगपदुत्पादस्य नानार्थमतवादे मणिकारादिभिः स्वीकारात्तद्दृष्टान्तेन ज्ञानेच्छादियौगपद्यमभ्युपेत्य, इच्छाद्युत्पादकाले तज्जनकज्ञानेच्छासाक्षात्कारमुपपादयति । विंशतीति ।

अथ विंशत्यङ्गुल्यवच्छिन्नादेकस्मादपि प्रयत्नाद्विंशत्यङ्गुलीषु विंशतेश्चेष्टानामुत्पादसम्भवात्किमर्थं कृतिभेदोपगमः ?

न चैकजातीयचेष्टास्थले प्रयत्नैक्यसम्भवेऽपि यत्र विंशत्यङ्गुलीषु मिथो विलक्षणविंशतिचेष्टोत्पत्तिर्युगपदेव तत्र प्रयत्नवैजात्यस्याऽऽवश्यकतया प्रयत्नभेद आवश्यकः, एकस्य प्रयत्नस्य नानाजातीयचेष्टोत्पादकत्वेन सर्वाङ्गुलीषु प्रत्येकं सर्वजातीयचेष्टोत्पादप्रसङ्गादिति वाच्यम् । प्रयत्ने वैजात्यस्वीकारेऽपि एकस्यां यज्जातीयः

प्रयत्न उत्पद्यते अन्याङ्गुल्यां तदनुत्पादनियामकस्य दुर्वचतया सर्वत्र सर्वजातीयचेष्टोत्पादस्य दुर्वारत्वात् ।

न च चिकीर्षावैजात्यात् कृतिवैजात्यनियमः कृतिवच्चिकीर्षाणामपि यौगपद्यस्वीकारादिति वाच्यम् । विजातीयनानाकृतिस्थले तज्जनकनानाचिकीर्षाणां परस्परविलक्षणानां स्वीकारेऽपि तासां प्रत्यासत्तेः सर्वाङ्गुलीषु तुल्यतया एकजातीयप्रयत्नावच्छेदकाङ्गुलावन्यजातीयप्रयत्नस्यावच्छेदकतासम्बन्धेनानुत्पत्तौ प्रयोजकाभावात् ।

न च तत्तज्जातीयकृत्युत्पादनियामकं तत्तदङ्गुलीनिष्ठविजातीयचिकीर्षावच्छेदकत्वं प्रतिनियतमेवोपेयत इति नातिप्रसङ्ग इति वाच्यम् । तादृशावच्छेदकताया नियामकस्य दुर्वचत्वात् विजातीयकृत्याद्यवच्छेदकत्वेऽननुगततत्तच्चिकीर्षातत्तदङ्गुलीनां नियामकत्वे तत्तज्जातीयचेष्टासमवाय एव तत्तत्कृतिसहिततत्तदङ्गुल्या नियामत्वसम्भवेन कृतिभेदस्य निर्युक्तिकत्वापातात् ।

न च चेष्टागोचरकृतिसाध्यत्वप्रकारकेच्छाधीना कृतिः चेष्टाजननी कृतेश्चोपादाननिष्ठविलक्षणविषयतायां तत्तदङ्गुल्यां विजातीयचेष्टां कृत्या साधयामीत्याकारकचिकीर्षायास्तत्तदङ्गुल्यादिनिष्ठविलक्षणविषयता नियामिका । एवं च पुरुषान्तरीयावयवव्यावृत्तमवच्छेदकतासहितं तादृशेच्छाविषयत्वं विजातीयचेष्टाजनकविजातीयकृत्यवच्छेदकत्वनियामकं सम्भवति तत एवानुगततत्तज्जातीयचेष्टानियमः सम्भवतीति वाच्यम् । एवं सति तत्तज्जातीयचेष्टानिष्ठसाध्यतानिरूपितोपदर्शितविशिष्टावच्छेदकतासम्बन्धेन एकस्या एव कृतेः समवायेन तत्तज्जातीयचेष्टां प्रति हेतुतया तत्तज्जातीयचेष्टोत्पादनियमसम्भवेन कृतिभेदं विनाप्युपपत्तेरिति । मैवम् । उपदर्शितोपादानताविशिष्टावच्छेदकतासम्बन्धेन एकस्या एव कृतेर्विजातीयचेष्टां प्रति हेतुत्वे सम्बन्धगौरवाल्लाघवेन शुद्धावच्छेदकतासम्बन्धेन विजातीयकृतिहेतुतौचित्यात् कृतिवैजात्यस्य तद्भेदस्य च सिद्धेर्निष्प्रत्यूहत्वात् अवच्छेदकतासम्बन्धेन विजातीयकृतिं प्रति विजातीयचेष्टाविषयकचिकीर्षाया विजातीयचेष्टोत्पत्तिनिष्ठविशेष्यतानिरूपिताधेयतासम्बन्धावच्छिन्नप्रकारताविशिष्टावच्छेदकतासम्बन्धेन हेतुता वाच्या, परकीयाङ्गुल्यादिसाधारणोपादानताविशेषसम्बन्धेन कृतित्वावच्छिन्नं प्रत्यवच्छेदक-

तामनन्तर्भाव्य हेतुताया अतिरिक्तायाः कल्पनेनैतन्मते गौरवं तु फलमुखतया न दूषणावहमिति सङ्क्षेप ।

गोत्वादिहेतुकानुमाने गोत्वत्वादिकमेव हेतुतावच्छेदकं तच्च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपं तच्च सकलगवादिव्यक्तिविषयकज्ञानाविषय इति सकलगवादिज्ञानार्थं सामान्यलक्षणादर इति प्रगल्भयुक्तिं दूषयति । गोत्वे चेति ।

(दी०) गोत्वे च गोनिष्ठात्यन्ताभावाप्रतियोगित्वेन समवेतत्वेन च विशेषितमविशेषितं वा गवेतरासमवेतत्वं व्याप्यतावच्छेदकं न तु सकलगोवृत्तित्वविशेषितं सामान्यलक्षणयापि ग्रहीतुमशक्यत्वात् न तु समानविषयकत्वेनापीति ।

(गा०) सास्नावत्त्वादौ साध्ये गवेतरासमवेतत्वमविशेषितमेव व्याप्यतावच्छेदकं गोपदप्रवृत्तिनिमित्तत्वे साध्ये तादात्म्येन गोत्वे हेतौ असमवेते व्यभिचारवारणाय समवेतत्वं विशेषणीयं गोनिष्ठरूपादौ व्यभिचारवारणाय गोनिष्ठाभावाप्रतियोगित्वेन च तद्विशेषणीयम् ।

न चैवं सति समवेतत्वांशवैयर्थ्यं असमवेतस्य गोनिष्ठाभावप्रतियोगित्वेनैव वारणादिति वाच्यम् । द्वित्वाद्यवच्छिन्नगोत्वाभाववारणाय प्रतियोगिव्यधिकरणत्वेनाभावस्य विशेषणीयतया गगनाभावस्य प्रतियोग्यधिकरणाप्रसिद्ध्या प्रतियोगिवैयधिकरण्यासम्भवेन गगनादेरपि प्रतियोगिव्यधिकरणाभावाप्रतियोगितया तद्वारकतया समवेतत्वांशसार्थक्यादिति ।

न च स्वप्रतियोगिसमानाधिकरणो यो यस्तदन्यत्वेनाभावं विशेष्य द्वित्वाद्यवच्छिन्नगोत्वाद्यभाववारणसम्भवात् गगनाभावस्य चासङ्ग्रहात्समवेतत्वविशेषणमनर्थकमिति वाच्यम् । प्रतियोग्यधिकरणवृत्तिभिन्नस्याभावविशेषणत्वापेक्षया गवि प्रतियोग्यनधिकरणत्वस्य गवेतरासमवेते समवेतत्वस्य च निवेशे गौरवाभावात् ।

(दी०) स्यादेतत् समानप्रकारतामात्रस्य प्रयोजकत्वे क्वचिदेव रजतत्वप्रकारिकेच्छा क्वचिन्नेति नियमो न स्यात् तादृशप्रकाराश्रये एव तदुत्पादोपगमे कथमरजते रजतत्वप्रका-

रिकेच्छा अनुपस्थिते चासंसर्गाग्रहोऽपि न नियामकः । वस्तुतोऽसंसर्गाग्रहमपेक्ष्य लघीयसस्तद्विषयतामात्रस्यैव नियामकत्वमुचितं सामान्यतश्च तादिच्छायां व्यवस्थितहेतुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छेदकं कल्प्यते लाघवात् ।

(गा०) क्वचिदेवेति । रजतत्वादिना रजतादिज्ञानाद्रजतत्वादिना रजतादिविशेषविषयिण्येवेच्छा जायते न तु तेन रूपेण प्रमेयमात्रविषयिणीति नियमो न स्यादित्यर्थः, ज्ञानस्य भवन्मते प्रकारतामात्रनियामकत्वादिति भाव ।

ननु तत्तद्धर्मप्रकारकस्य ज्ञानस्य तत्तद्धर्माश्रयविषयकतत्तद्धर्मप्रकारकेच्छात्वं कार्यतावच्छेदकमिति रजतत्वादिना रजतादिज्ञानाच्च घटादिविषयकेच्छाप्रसङ्ग इत्यत आह । तादृशेति । तादृशप्रकाराश्रये । जनकज्ञानप्रकारीभूतरजतत्वादिरूपधर्माश्रये । कथमरजत इति । रजतत्वभ्रम इत्यादिः । भ्रमश्च विशिष्टज्ञानं ज्ञानद्वयं चेत्यन्यदेतत् ।

ननु रजतत्वाद्यसंसर्गग्रहविषयव्यावृत्तस्तदग्रहविषयस्वाभाव एव रजतत्वादिप्रकारकेच्छाविषयत्वनियामकस्तस्यैव विशेषणतासम्बन्धेन तादृशेच्छां प्रति हेतुत्वोपगमात् रजतत्वादिज्ञानमपि तत्सहकारि कल्प्यते अतो नानुपस्थितरजतत्वाद्यसंसर्गाग्रहात् तत्प्रकारकेच्छाप्रसङ्ग इत्यत आह । अनुपस्थित चेति । अनुपस्थितविषयनिष्ठो रजतत्वाद्यसंसर्गाग्रहो न तत्प्रकारकेच्छाविषयताप्रयोजकः सम्भवति किं तु उपस्थितिविषयतासहकृत एव स तथा वाच्यः अन्यथा असंसर्गाग्रहस्यानुपस्थितयावद्वस्तुसाधारणतया तादृशयावद्वस्तूनामेव रजतत्वादिप्रकारकेच्छाविषयतापत्तेरित्यनागतेच्छाविषयोपस्थित्यर्थं सामान्यप्रत्यासत्तेरावश्यकतेति समुदिततात्पर्यार्थः । स्वसिद्धान्तसिद्धं विशिष्टज्ञानस्य हेतुत्वमपि व्यवस्थापयति । वस्तुत इति । लघीयसः । अतिलघुशरीरस्य । तद्विषयतामात्रस्य । रजतत्वादिप्रकारकज्ञानविषयतामात्रस्य । नियामकत्वम् । तत्प्रका-

हेतुत्वमुचितं न तु समानविषयकविशिष्टज्ञानस्येत्याशङ्कां निराकरोति । सामान्यतश्चेति । असंसर्गग्रहाविषयानुपस्थितवस्तुनोऽच्छावारणायेत्यादिः । सामान्यतः । सामान्यरूपेण । तद्विषयकज्ञानत्वेनेति यावत् । तदिच्छायाम् । तद्विषयकेच्छायाम् । व्यवस्थितहेतुभावस्य । असंसर्गाग्रहहेतुत्ववादिनापि कल्पनीयकारणताकस्य । तत्प्रकारकत्वम् । फलीभूतेच्छाप्रकाररजतत्वादिप्रकारकत्वम् । अवच्छेदकमित्यस्य कारणतायामित्यादिः । लाघवादिति । कारणतान्तरकल्पनामपेक्ष्य फलप्रकारणतायामवच्छेदकाभिवृद्धौ लाघवादित्यर्थः ।

नन्वनुपस्थितस्याप्यसंसर्गग्रहाविषयस्येच्छाविषयत्वमिष्टमेव, नेष्यते परमसंसर्गग्रहविषयस्येति तद्विषयविषयकेच्छायां तद्विषयकत्वेन ज्ञानस्य हेतुत्वं नोभयसिद्धं कुत्रावच्छेदकाभिवृद्धिरित्यत आह । अस्तु वेति ।

(दी०) अस्तु वा समानप्रकारकत्वेन व्यवस्थिते कार्यकारणभावेऽतिप्रसङ्गभङ्गाय सामानाधिकरण्यमिव समानविषयत्वमपि प्रत्यासत्तिः । असंसर्गाग्रहादेः कारणतामपेक्ष्य समानविषयत्वस्यावच्छेदककोटिनिवेशोऽपि लघीयान् कारणयथार्थत्वायथार्थत्वाधीनस्तु कार्यस्य तथाविधो विशेषः ।

(गा०) व्यवस्थिते । उभयवादिसिद्धे । अन्यथानुपस्थित रजतत्वादेरपीच्छाप्रकारतापत्तेरिति भावः । अतिप्रसङ्गभङ्गायेति । यथा एकस्य पुंसो रजतत्वादिप्रकारकज्ञानादन्यस्य तादृशेच्छावारणाय एकार्थसमवायरूपसामानाधिकरण्यं कार्यकारणभावघटकप्रत्यासत्तिरपेयते तथा एकविषयनिष्ठविषयताद्वयरूपं समानविशेष्यत्वमपि तादृशप्रत्यासत्तिरित्युपेयत इत्यर्थः । तावतैवासंसर्गग्रहविषय इच्छावारणसम्भवेनासंसर्गाग्रहस्य कारणत्वान्तरं न कल्प्यते तदपेक्षया प्रत्यासत्तिवृद्धौ लाघवात् ।

न च प्रत्यासत्तिभेदात्कारणताभेदः, आवश्यकताद्वयघटिताया एककारणताया अपि सम्भवात् । अन्यत्र यथा सामानाधिकरण्यं प्रत्यासत्तिस्तथा प्रकृते समानविशेष्यकत्वमेव प्रत्यासत्तिरिति तु नार्थः, प्रकृते सामानाधिकरण्यप्रत्यासत्त्यनादरे समवायेनोत्पत्तिनि-

यमाय तत्पुरुषीयत्वस्यावश्यं निवेशनीयतया पुरुषभेदेनानन्तकारणताप्रसङ्गात् सामानाधिकरण्यप्रत्यासत्त्यैव कारणतायाः फलप्रत्यासत्त्याऽऽश्रयप्रत्यासत्तिपरित्यागासम्भवाच्च ।

न च प्रत्यासत्तिद्वयादेरपि विभिन्नपुरुषयोर्विभिन्नधर्मिकज्ञानदशायां वैपरीत्येन प्रत्येकमुभयधर्मिविषयकेच्छाप्रसङ्ग । उभयप्रत्यासत्तिघटितैककारणताश्रयस्य एकस्य उभयकारणतावच्छेदकप्रत्यासत्त्या उभयदेशे प्रत्यासन्नीभूय कार्यतावच्छेदकसम्बन्धेन तदुभयदेशप्रत्यासन्नैककार्योत्पादकत्वस्याभाव्यात् । तत्तदात्मसमवेतज्ञानाविषये तदात्मसमवेतेच्छाया विषयतया उत्पत्त्यसम्भवात् ।

न चास्तूभयप्रत्यासत्त्यैक कारणत्वं तथापि विषयनिष्ठप्रत्यासत्त्या व्यापकत्वं ज्ञानस्य कल्पनीयम्, असंसर्गाग्रहस्य तु तत् फलत्तमिति न लाघवमिति वाच्यम् । गुरुधर्मावच्छिन्ने असंसर्गाग्रहे अनन्यथासिद्धत्वकल्पनामपेक्ष्य लघुरूपावच्छिन्ने अनन्यथासिद्धज्ञाने उक्तव्यापकताकल्पने लाघवस्य दुर्वारत्वात् विषयप्रत्यासत्त्याऽसंसर्गाग्रहप्रतियोगिनि तत्तत्पुरुषीयत्वस्यावश्यं निवेशनीयतया असंसर्गाग्रहनिष्ठावच्छेदकस्यानन्त्याच्च । समानविषयकत्वस्यावच्छेदककोटिनिवेशेऽपि सन्निहितसिद्धेः समानविशेष्यकत्वस्य प्रत्यासत्तित्वेऽतिनिर्बन्धोऽप्ययुक्त इत्याशयेन समानविषयकत्वेन हेतुतायामपि लाघवं दर्शयति । असंसर्गाग्रहादेरिति । आदिना रजतभेदाग्रहरजतत्वासंसर्गादिव्याप्यतदवच्छेदकनानाधर्माग्रहपरिग्रहः । लघीयानिति ।

यद्यपि समानविशेष्यकत्वस्य कारणतावच्छेदककोटौ विशेषणतया प्रवेशे विशेष्यतत्तद्व्यक्तिभेदेन कारणताभेदस्तथापि रजतत्वादिविशिष्टबुद्धिविरोधिदर्शितनानाविधज्ञानाभावानां पुरुषभेदेन भिन्नकारणताकल्पनापेक्षया लाघवमक्षुण्णमेवेति बोध्यम् ।

नन्विच्छायाः संवादित्वविसंवादित्वयोर्धर्मिण्यविद्यमानविद्यमानासंसर्गग्रहविरहोऽवश्यं प्रयोजको वाच्य इत्यसंसर्गाग्रहकारणत्वमावश्यकमित्याशङ्कां निरस्यति । कारणेति । कारणीभूतरजतत्वादिप्रकारकज्ञानस्य यथार्थत्व फलीभूतेच्छाया याथार्थ्ये तस्यायाथार्थ्ये च तस्या अयाथार्थ्ये प्रयोजकं तेनैव रूपेण ज्ञानेच्छयोर्विशेषकार्यकारणभावाश्रोक्तासंसर्गाग्रहविशेषस्य तत्प्रयोजकत्वमिति भावः ।

(दी०) एतेन रजतत्वप्रकारकेच्छायां तत्प्रकारकज्ञानं संवादिन्यां तस्यां दोषाभावसहितम्, विसंवादिन्यां तूपस्थितरजतगतभेदाग्रहसहितं हेतुरिति परास्तम् । त्वद्दिशापि च संवादिन्यामुपस्थितरजतभेदाग्रहस्यैव हेतुत्वौचित्यात् । दोषाणां रजतभेदग्रहप्रतिबन्धकानामभावमपेक्ष्य लघुत्वात् ।

(गा०) एतेनेति । लघीयसोः समानविशेष्यकज्ञानयाथार्थ्यायाथार्थ्ययोरिच्छासंवादविसंवादप्रयोजकत्वसम्भवेनेत्यर्थः । इति परास्तमित्यग्रेतनेनान्वयः । तत्प्रकारक ज्ञानमिति । समानविषयकत्वविशेषणानवच्छिन्नमिति शेषः । हेतुरित्यग्रेतनेनान्वयः । दोषाभावसहितमिति । अरजते रजतत्वभ्रमजनकदोषाभावसहितमित्यर्थः । तथा च संवादीच्छायां तादृशदोषाभावो विशेषसामग्रीति समानविषयकज्ञानाभावात्र तादृशभ्रमस्थले संवादीच्छाविरहोऽपि तु तादृशदोषाद्वेति संवादीच्छायामनागतभानानुरोधेन नानागतज्ञानापेक्षा, यदा यत्र रजते रजतभेदभ्रमः तदापि रजतत्वेन रजतान्तरज्ञाने रजतत्वेन तद्रजतेच्छा स्वीक्रियते रजतान्तरे रजतत्वग्रहाविरोधिनो विपरीतज्ञानस्य तद्रजतेऽपि तद्ग्रहाविरोधितया व्यवस्थापितत्वात् तत्र समानविषयकत्वविशिष्टज्ञानस्यापि सम्भवेन भवतोऽपि तदावश्यकत्वादिति भावः । उपस्थितरजतेति । उपस्थितं यद्रजतं तन्निष्ठरजतभेदाग्रहसहितमित्यर्थः । अनुपस्थितवस्तुमात्रे रजतत्वप्रकारकेच्छाप्रसङ्गस्य पूर्वोपदर्शितस्यैव वारणायोपस्थितेति । न चैतावता सामान्यप्रत्यासत्तिसिद्धिः, विसंवादीच्छायां सिद्धस्यैवारजतस्य विषयत्वोपगमादित्याशयः । रजते विसंवादिरजतत्वप्रकारकेच्छावारणायारजतेति । अन्यथात्यातिमनङ्गीकुर्वतां अरजते रजतत्वविशिष्टज्ञानाप्रसिद्धेस्तत्कार्यकारिभेदाग्रहानुसरणम् । भेदाग्रहश्च दोषप्रयोज्यो विवक्षणीयः अतो रङ्गरजतेइति(१) समूहालम्बनस्मरणादिकाले भेदाग्रहसत्त्वेऽपि नाभ्रान्तस्य विसंवादीच्छा, भेदाग्रहपदेन भेदग्रहविरोधिदोष एव वा विवक्षितः । उपस्थितरजतेति ।

(१) अन्यथा रङ्गरजतेइति-पु० पा० ।

उपस्थितरजतनिष्ठरजतभेदाग्रहस्येत्यर्थः । रजतभेदग्रहप्रतिबन्धकानाम् । रजतभेदग्रहप्रतिबन्धकत्वेनानुगतानाम् । लघुत्वादिति । उक्तप्रतिबन्धकत्वापेक्षया भेदग्रहत्वरूपप्रतियोगितावच्छेदकस्य लघुशरीरत्वादिति भावः । लाघवमुपलक्षणम् । दोषाभावस्य हेतुत्वे प्रमाभ्रमोभयरूपज्ञानात्संवादीच्छानुपपत्तेस्तदनुरोधोऽपि द्रष्टव्यः । तथा च संवादीच्छायामनागतविषयकत्वनिर्वाहकतदुपस्थित्यर्थं सामान्यप्रत्यासत्तेरावश्यकतेति भाव ।

न चात्रोपस्थितिर्नापेक्ष्यत इति वाच्यम्। तथा सति संवादिभिन्नाया इच्छाया भेदाग्रहदशायामनुपपत्तेः संवादीच्छासामग्र्या नियतत्वात् उपस्थित्यपेक्षायां रजतानुपस्थितिदशायामेव भ्रमात्ताहशेच्छोत्पत्तेः । एतच्चापाततः, संवादीच्छायां स्वप्रकारीभूतरजतत्वावच्छिन्नसम्बन्धेन रजतत्वज्ञानत्वेन हेतुताया एवोपस्थितरजतनिष्ठरजतभेदाग्रहहेतुतापेक्षया लाघवात्कल्पयितुमुचितत्वमिति । सिद्धरजतज्ञानादेवानागतरजतगोचरसंवादीच्छोपपत्तेः सामान्यप्रत्यासत्त्यसिद्धेः ।

किं तु इदमत्र तत्त्वम्, संवादीच्छात्वादिकं न कस्यचित्कार्यतावच्छेदकं प्रमात्वादिवदर्थसमाजग्रस्तत्वादतः संवादिविसंवादिसाधारणरजतत्वादिप्रकारकेच्छां प्रति तत्प्रकारकज्ञानत्वेन सामान्यतः एकहेतुतैव कल्प्यते अत्र च प्रमात्मकज्ञानाद्विसंवादीच्छाया रङ्गादिविषयकज्ञानाच्छुक्त्यादिगोचरेच्छायाश्च वारणाय समानविशेष्यत्वं प्रत्यासत्तिरुपेयते अतो ऽनागतगोचरेच्छानुरोधेन सामान्यप्रत्यासत्त्यादरः । समानविषयकत्वं च न विशेषणमुपेयते विषयभेदेन कारणतावाहुल्यप्रसङ्गादिति समानविषयकत्वविशेषणस्य तत्तद्व्यक्तिविषयकत्वपर्यवसानेन भ्रमप्रमाभेदेन कारणताभेदस्यावश्यकत्वात् भ्रमस्यैव तत्तद्व्यक्तिविषयकत्वात् भ्रमस्यैव तत्तद्व्यक्तिविषयकत्वेन तदवच्छिन्नेच्छाहेतुत्वमुपेयते प्रमाया तु सामान्यतो रजतत्वज्ञानत्वेनैव रजतविषयकेच्छात्वावच्छिन्नं प्रति हेतुतेति न सामान्यप्रत्यासत्त्यवकाश इति पूर्वपक्षानवकाश ।

न च समानविशेष्यत्वं समानप्रकारकत्वं वा प्रत्यासत्तिरित्यत्र विनिगमनाविरह इति वाच्यम्। विनिगमनाविरहेणोभयप्रत्यासत्त्या

ज्ञानहेतुत्वेऽपि सामान्यप्रत्यासत्तेरावश्यकत्वादितीच्छायां समानविषयकज्ञानापेक्षामङ्गीकृत्यैव सामान्यप्रत्यासत्तिं स्वयं प्रकारान्तरेण खण्डयितुमुपक्रमते अत्राहुरिति।

(दी०) अत्राहुः सिद्धे एव सुखे सुखत्वेन रूपेणेच्छा लाघवात्तत्प्रकारकेच्छायां तत्प्रकारावच्छेदेन सिद्धत्वज्ञानमेव हि विरोधि न च तत् प्रकृते, तत्सत्त्वे इच्छोत्पत्तेस्त्वयाऽप्यनङ्गीकारात्। कथमन्यथा चिरप्रोषितस्याज्ञातकान्तामरणस्य तत्कान्तावलोकनादाविच्छा, जातावलोकनादीनां सिद्धत्वज्ञानात् अतिरिक्तस्य चासत्त्वादित्यादि बहुतरमूहनीयम्।

(गा०) सिद्ध एवेत्येवकारेण अनागतव्यवच्छेदः अतो न तज्ज्ञानानुरोधेन सामान्यप्रत्यासत्तिरिति भावः।

ननु सिद्धत्वज्ञानरूपप्रतिबन्धकसत्त्वेन सिद्धसुखे नेच्छासम्भव इत्याशङ्क्याह। लाघवादिति। सिद्धत्वज्ञानमेवेत्येवकारेण सुखत्वादिसामानाधिकरण्यमात्रावगाहिसिद्धत्वबुद्धेः सुखत्वादिप्रकारकेच्छाप्रतिबन्धकत्वव्यवच्छेदः। तत्सुखत्वादिप्रकारावच्छेदेन सिद्धत्वज्ञान प्रकृते सुखत्वादिप्रकारकेच्छापूर्वकाले कुत इत्याकाङ्क्षायामाह। तदिति। तत्सत्त्वे। तादृशसिद्धत्वज्ञानसत्त्वे। अनङ्गीकारादिति। अनुभवविरोधेनेत्यादिः। समानविषयकसिद्धत्वज्ञानमात्रस्य विरोधित्वे बाधकमाह। कथमन्यथेति। ज्ञातकान्तामरणस्य तत्कान्तावलोकनत्वावच्छेदेनापि सिद्धत्वज्ञानसम्भवाच्च तत्कान्तावलोकने इच्छा कस्यचिदप्यनुमता इत्यज्ञातकान्तामरणस्येति। प्रोषितस्येति। कान्तामरणाज्ञाने हेतुः।

न च कान्तामरणज्ञाने कान्तावलोकनेच्छानुत्पत्तौ विनष्टपुत्रशोकार्तस्य पुत्रदर्शनेच्छोत्पत्त्यभिधानं मिथ्याणां विरुध्येतेति वाच्यम्। तदभिधानस्य पुत्रो दर्शनविषयो भवत्वित्याकारकदर्शनत्वावच्छिन्नविषयकेच्छापरत्वात् तादृशेच्छायां च दर्शनत्वावच्छेदेनैव सिद्धत्वज्ञानस्य विरोधितया तत्पुत्रदर्शनत्वावच्छेदेन सिद्धत्वज्ञानसत्त्वेऽपि बाधबुद्धेरिच्छायामविरोधित्वे तदुत्पादे बाधकाभावात्। अतिरिक्तस्य। सिद्धत्वज्ञानाविषयतत्कान्तावलोकनादेः। असत्त्वात्। अप्रसि-

द्धत्वात् । तथा च सामान्यलक्षणोपगमेऽपि नेच्छानिर्वाह इति भावः । न च तत्कान्ताविषयकत्वेनान्यावलोकनविषयिण्येवेच्छा भविष्यतीति वाच्यम् । तेन रूपेण तद्विषयकभ्रम विना तदनुपपत्तेः ।

(दी०) अथ सिद्धत्वनिश्चयाभावापेक्षया लाघवादसिद्धत्वज्ञानमेव हेतुः । न च सिद्धत्वेन ज्ञाते तत् सम्भवतीत्यसिद्धत्वज्ञानार्थं सामान्यलक्षणेति चेन्न । विशेषरूपावच्छेदेन सिद्धत्वेन ज्ञाते एव सामान्यरूपेणासिद्धत्वग्रहसम्भवात्, तदेकं ज्ञानं ज्ञानद्वयं वेत्यन्यदेतत्, सामान्यलक्षणासहस्रेणाप्यसिद्धत्वस्य ज्ञातुमशक्यत्वाच्च ।

(गा०) लाघवादिति । निश्चयत्वानिवेशात् वर्त्तमानप्रागभावाप्रतियोगित्वरूपाद् वर्त्तमानकालध्वंसानुत्पत्तिकत्वरूपाद्वा, सिद्धत्वात् तत्प्रतियोगिनोऽसिद्धत्वस्य लघुशरीरत्वाच्चेति भावः । तदसिद्धत्वज्ञानं सम्भवतीति । विपरीतज्ञानस्य विरोधिनः सत्त्वादिति भावः । असिद्धत्वज्ञानार्थम् । असिद्धत्वज्ञाने विशेष्यीभूतासिद्धव्यक्तिभानार्थम् ।

यद्यप्यसिद्धत्वज्ञानस्य हेतुत्वे अप्रामाण्यनिश्चयाभावस्यावच्छेदकतायां वाच्यत्वात् सिद्धत्वज्ञानप्रतिबन्धकत्वे चाप्रामाण्यज्ञानाभावस्यैव तथात्वात् तत्प्रतिबन्धकत्वमेव कल्पयितुमुचितमिति तथाप्यसिद्धत्वज्ञानहेतुत्वाभ्युपगमेनैव सामान्यप्रत्यासत्तिं खण्डयति । विशेषेति । विशेषरूपम् । तत्तत्सुखत्वादिकम् । सामान्यरूपम् । सुखत्वादिकम् । असिद्धत्वग्रहसम्भवादिति । तथा च सिद्धसुख एवासिद्धत्वभानादिच्छाप्रवृत्तिनिर्वाहान्न सामान्यलक्षणादर इति भावः ।

नन्वन्यथाख्यातिमनङ्गीकुर्वतां गुरूणां मते सिद्धेऽसिद्धत्वज्ञानं न सम्भवतीत्यसिद्ध एव तत् ज्ञानमङ्गीकार्यमित्यत आह । तदेकमिति । एकज्ञानम् । अन्यथाख्यातिरूपम् । ज्ञानद्वयम् । ज्ञानान्तरविषयधर्मिसाकाङ्क्षासिद्धत्वज्ञानं न तु ज्ञायमानधर्म्यगृहीतासंसर्गकासिद्धत्वविषयकं ज्ञानान्तरं सिद्धत्वज्ञानाभावहेतुतायामेव पर्यवसानप्रसङ्गात् । साकाङ्क्षा च धर्मधर्मिणोर्विशेष्यविशेषणभावः स च

न्यायमते एकधीविषययोरेव, गुरुमते च भ्रमस्थले विभिन्नज्ञानविषययोरपि धर्मधर्मिणोरित्येव विशेषः न पुनः स्वरूपसम्बन्धविशेषः पदार्थान्तरं चेत्यन्यदेतत्। तस्य च ज्ञानेनापि समं निरूप्यनिरूपकभावः सम्बन्धो न्यायमतसाधारण एव अतो असंसर्गाग्रहकालीनधर्मधर्मिविषयकज्ञानयोरपि वस्तुगत्या विशेष्यविशेषणभाववद्धर्मधर्मिविषयकतया ततो ऽपीच्छाद्यापत्तिरिति परास्तम्। धर्मधर्मिणोः परस्पराकाङ्क्षानिरूपकज्ञानस्यैव विशिष्टज्ञानकार्यकारित्वोपगमात् असंसर्गग्रहकालीनज्ञानयोर्धर्मधर्मिसाकाङ्क्षत्वानिरूपकत्वात् इत्यन्यत्र विस्तरः।

नन्वेवमभ्रान्तस्येच्छानुपपत्तिरिति सामान्यप्रत्यासत्तेरावश्यकतेत्यत आह। सामान्येति। अशक्यत्वादिति। सामान्यलक्षणायाः सुखत्वादिसामान्यप्रकारेणैवासिद्धभानप्रयोजकत्वान्न स्वसिद्धत्वेनेति भावः।

ननु सामान्यप्रत्यासत्त्या भासमानेऽसिद्धसुखे सामान्यलक्षणाजन्यज्ञानोपनीतानामसिद्धत्वघटकपदार्थानां विशेष्ये विशेषणमित्यादिरीत्या भानेनैवासिद्धत्वप्रकारकासिद्धज्ञाननिर्वाहः।

न च इच्छालक्षणक्षणस्य तल्लक्षणत्वेन वर्तमानत्वघटितासिद्धत्वघटकत्वादिच्छापूर्वं च तेन रूपेण तस्य कथञ्चिदपि ज्ञानसम्भवतीति वाच्यम्। तथा सतीच्छाक्षणापेक्षायां सिद्धत्वस्यापि प्राग् दुर्ग्रहतया तज्ज्ञानस्य प्रतिबन्धकताया अप्यसम्भवित्वापातात्। क्रियादिरूपतादृशक्षणस्य प्रागपि सत्त्वेन तत्तद्व्यक्तित्वेन तदंशे लौकिकस्य तद्वृत्तिप्रतियोगिकप्रागभावाधारत्वाभाववत्स्वरूपतदीयक्षणत्ववैशिष्ट्यांशे प्रत्येकपदार्थोपस्थितिमूलकोपनीतभानात्मकासिद्धत्वज्ञानस्य कथञ्चित्सम्भवे स्वसिद्धत्वज्ञानस्यापि तथा सम्भवादित्याशङ्क्य विनापि सामान्यलक्षणामनुमानेनासिद्धविषयकासिद्धत्वज्ञानमुपपादयति। वस्तुतस्त्वित्यादि।

(दी०) वस्तुतस्तु सामान्यलक्षणां विनाऽप्ययं कालः सुखप्रागभाववान् सुखोत्पादकालीनध्वंसप्रतियोगी वा कालत्वादेतादृशकालत्वाद्वेत्यनुमानादसिद्धसुखस्य तदसिद्धत्वस्य

च ज्ञानं सुलभमेव, निपुणतरमुपपादयिष्यते चेदं शब्दमणिदीधिताविति कृतं पल्लवितेन ।

(गा०) अयं काल इति ।, अयं क्षण इत्यर्थः । तेन वर्तमानस्थूलकालवृत्तिप्रागभावप्रतियोगित्वस्य सिद्धसाधारण्येऽपि न क्षतिः । सुखप्रागभाववानिति । प्रागभावमभ्युपेत्य । तावतापि सामान्यप्रत्यासत्त्यसिद्धेरवश्यं स्वीकरणीयत्वात् ।

न चानागतस्यैतादृशानुमानादेव सिद्धावीदृशानुमानपूर्वं साध्याप्रसिद्धिरेव दुर्लभा, प्रतियोगिभासकाभावेन सुखप्रागभावस्य प्रत्यक्षासम्भवादिति वाच्यम् । अभावत्व विनाशिवृत्ति पदार्थविभाजकोपाधिरवाङ्घ्राघ्नवदित्यनुमानाद्विनाशित्वसमानाधिकरणाभाववृत्तित्वरूपप्रागभावत्वसिद्धौ सुखं प्रागभावप्रतियोगि उत्पत्तिमत्त्वादित्यनुमानेन सुखप्रागभावरूपसाध्यप्रसिद्धेः ।

न चानुमाने तुल्यवित्तिवेद्यतया भानस्य निर्युक्तिकत्वादुक्तप्रयासेनापि न साध्यतावच्छेदकावच्छिन्नप्रसिद्धिनिर्वाह इति वाच्यम् । उक्तानुमानाद्विपरीतविशेष्यविशेषणभावापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नघटकपदार्थानां सिद्धौ विपरीतशङ्कोत्पत्त्यसम्भवे ज्ञानप्रत्यासत्तिसहितमनसैव प्रकृतज्ञानजननसम्भवात् तादृशरीत्यैव प्रकृतानुमाननाप्यासिद्धत्वधीनिर्वाहो बोध्यः । प्रागभावानङ्गीकारपक्षे स्वीकार्यप्रागभावाघटितमासिद्धत्व साधयति । सुखोत्पादिति । महाप्रलयोपगमे तत्र व्यभिचार इत्यता हेत्वन्तरमाह । एतादृशेति । असिद्धत्वस्य । वर्तमानप्रागभावप्रतियोगित्वादिरूपस्य । शाब्दमणिदीधिताविति । पाकानुमानव्याख्यायामिति शेषः । सिद्धे प्रवर्तकेदानीन्तनकृतिसाध्यत्वव्याप्यवत्ताया बाधितत्वेन अन्यथाख्यातिमनङ्गीकुर्वतां असिद्ध एव पाके परामर्शस्य स्वीकरणीयत्वादनागतभानासम्भवे प्रवर्तकानुमानस्य दुर्घटत्वादिति भावः ।

(चि०) यत्तु पाकादौ चिकीर्षा सुखादौ इच्छा न स्यात् सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् तस्मात्सुखत्वादिना ज्ञातेषु सर्वेषु सिद्धं विहायासिद्धे इच्छा भवतीत्यभ्युपेयम् । तन्न । असिद्धस्याज्ञा-

नेऽपि सिद्धगोचरज्ञानादेव इच्छाप्रवृत्तिस्वाभाव्याद्‌-सिद्धे तयोरुत्पत्तेः । न चातिप्रसङ्गः, समानप्रकारकत्वेन ज्ञानेच्छाकृतीनां कार्यकारणभावात् न तु समानविषयकत्वेनापि क्वचिदप्यकल्पनात्, समानविषयकत्वे सत्यपि समानप्रकारकज्ञानाभावेनेच्छाकृत्योरभावात् तस्यावश्यकत्वेन गौरवाच्चेति परसिद्धान्तात् । न च सर्वज्ञत्वे संशयो न स्यादिति दोषः, घटः स इति घटत्वप्रकारकं हि ज्ञानं संशयविरोधि तच्च न वृत्तं स्वसामग्रीविरहात् अतो घटत्वादिसकलविशेषज्ञानेऽपि स घटो न वेति संशय इति ॥

(दी०) घटः स इत्यादिसंशयसमानाकारो हि निश्चयस्तद्विरोधी घटो न वेति संशयः कोटितावच्छेदके घटत्वांशे निष्प्रकारकश्च, न च प्रमेयवानिति प्रत्ययस्तथा । अत एव जातिमानिति निश्चयेऽपि घटो न वेति संशयः घटत्ववन्निश्चयस्तु घटेतरावृत्तित्वविशिष्टमवगाहमानो घटान्यतासन्देहं निरुणद्धि, पुरुषावृत्तिवक्रकोटरादिनिश्चय इव पुरुषत्वसंशयम् । स्वसामग्रीविरहादिति । घट इति निश्चयं प्रति घटत्वांशे निर्विकल्पकं ज्ञानं कारणं जातित्वादिना घटत्वादिज्ञानेऽपि तदनुदयात् सामान्यलक्षणायाश्च सामान्यप्रकारकज्ञानजनकत्वानियमात् विशिष्टज्ञानसामग्रीसत्त्वात् ॥

(गा०) घटत्वप्रकारकस्य घटः स इति ज्ञानस्यैव स घटो न वेति संशयविरोधिता न तु तादृशस्यापि प्रमेयवान् स इत्यस्येति मूलोक्तविशेषस्य बीजं स्फुटयति । संशयेति ।

समानाकार इति । निश्चयः । अभेदेन घटत्वावच्छिन्नप्रकारकः समवायेन घटत्वप्रकारको वा समानधर्मितावच्छेदकनिश्चयः । तद्विरोधी । घटभेदसंशयविरोधी एकजातीयविषय-

ताक इत्यर्थः । कोटितावच्छेदके । ग्राह्यघटभेदप्रतियोगिनिष्ठप्रकारतावच्छेदकांशे तत्प्रतियोगितावच्छेदकांशे वा । घटत्वाद्यंशे निष्प्रकारक इति । प्रकारानवच्छिन्नघटत्वादिविषयताक इत्यर्थः । तथा । निष्प्रकारकघटत्वादिविषयताकः । तथा च नासौ स घटो न वेति संशयविरोधीति भावः । अत एव । असमानाकारकनिश्चयस्य संशयाविरोधित्वादेव ।

न चैवं घटो न वेति संशये घटत्ववानयमिति निश्चयस्याप्यविरोधितया तदुत्तरं तादृशसंशयस्यापत्तिस्तस्य कोटितावच्छेदकांशे घटत्वत्वप्रकारकतया तदंशे निष्प्रकारकत्वविरहादित्यत आह । घटत्ववानिति । अवगाह्यमान इत्यन्तं हेतुगर्भविशेषणम् । तथा च घटान्यावृत्तित्वविशिष्टसत्तावगाहितया ग्राह्याविरोधविशिष्टसत्तानिश्चयमुद्रया घटान्योन्याभावकोटिकमुक्तसंशयं विरुणद्धि न तु प्रतियोगितावच्छेदकप्रकारकज्ञानविधयेत्यर्थः । तथा च तस्य धर्मिविशेषणतापन्ने कोटीभूतघटभेदप्रतियोगितायाः स्वरूपतोऽवच्छेदके घटत्वे इतरप्रकारकत्वेऽपि विरोधप्रतियोगितया भासमानग्राह्यघटभेदांशे संशयीयतद्विषयतातोऽविलक्षणविषयताकतया विरोधित्वमक्षतमेवेति भाव । विरोधप्रकारकज्ञानविरोधितां दृष्टान्तेन द्रढयति । पुरुषेति ।

ननु प्रमेयवानित्यादिनिश्चयस्थले विशेषणधीतत्सन्निकर्षादिसत्त्वात्कथं स घट इत्यादिनिश्चयसामग्रीविरह इत्याकाङ्क्षायामाह । घट इतीति । निश्चयमित्यत्र निश्चयत्वस्य जन्यतावच्छेदकत्वम् विवक्षितम्, विशेषणान्तरानवच्छिन्नघटत्वप्रकारताशालिज्ञानत्वस्यैव तादृशघटत्वविषयिताशालिज्ञानजन्यतावच्छेदकत्वात् निर्विकल्पकं प्रकारानवच्छिन्नविषयताकमतो घट इत्यादिबुद्धेरपि तादृशबुद्ध्यन्तरजनकत्वोपपत्तिः । एतादृशविशिष्टबुद्धिविशेषणज्ञानविशेषयोः कार्यकारणभावे मानमाह । जातिरेवेति । तदनुदयात् । घट इत्याकारकविशिष्टबुद्ध्यनुदयात् ।

न च घटत्वांशे सप्रकारकत्वप्रयोजकसामग्र्यभावस्तदंशे निष्प्रकारकत्वप्रयोजकः तत्प्रयोजकाभावस्य तदभावप्रयोजकत्वादिति जातित्वाद्युपस्थितिदशायां घटत्वांशे तत्प्रकारकत्वप्रयोजकसामग्रीसत्त्वान्न तदंशे निष्प्रकारकस्य घट इति ज्ञानस्यापत्तिरिति वाच्यम् । जातित्वादिरूपेण घटत्वोपस्थितिघटितसामग्रीदशायाम-

पि कदाचिज्जातिमान् घट इति ज्ञानोत्पत्त्या घटत्वांशे सप्रकारकत्वप्रयोजकसामग्र्यभावस्यानवच्छिन्नघटत्वविषयत्वाप्रयोजकतया प्रमेयत्वादिसामान्यलक्षणयापि प्रमेयः स घट इत्याकारकनिश्चयसम्भवस्य दुर्वारत्वात् तादृशकार्यकारणभावानभ्युपगमे जातित्वाद्युपस्थितिकालीनतदवच्छिन्नघटत्वादिविशिष्टज्ञाने विशेषणानवच्छिन्नघटत्वादिप्रकारताविरहप्रयोजकस्य दुर्लभतया जातिमानित्याकारकधियो नियमतो जातिमान्घट इत्याकारकतापत्तेश्च ।

न च घटत्वादेः स्वरूपतः प्रकारता क्वचिज्ज्ञाने समवायेनैव क्वचिच्च कालिकादिनैवेत्यत्र न स्वरूपतस्तज्ज्ञानं नियामकं तादृशप्रयोजकस्य साधारण्यात् अतो अननुगतमेव तन्नियामकं वाच्यं तथा च तावतैव तादृशप्रकारतासामान्यनियमोऽप्युपपद्यते विशेषप्रयोजकसामग्र्याः सामान्यप्रयोजकत्वात् तादृशसामान्यभावकूटस्यैव सामान्यविरहप्रयोजकत्वादिति वाच्यम् । यत्र सामान्यकार्येऽनतिप्रसक्तसामान्यकारणविरहस्तत्रैवागत्या विशेषसामग्रीविरहकूटस्य सामान्यकार्याद्यभावप्रयोजकत्वात् । एवं च विशेषणज्ञानस्य सामान्यकारणस्य सम्भवेनानन्तानामननुगतविशेषप्रयोजकाभावानां निरुक्तप्रकारताद्विविरहप्रयोजकतायां गौरवेणानभ्युपगमात् ।

न चोक्तकार्यकारणभावोपगमे जातित्वाद्युपस्थितिकालीनलौकिकसन्निकर्षात् जातित्वादिनैव घटत्वादिज्ञानस्य प्रथमं जनने निर्विकल्पकासम्भवाच्चिरनिरीक्ष्यमाणस्यापि घट इति प्रत्यक्षानुपपत्तिरिति वाच्यम् । तत्रापि फलानुरोधेन निर्विकल्पकोपगमात् जातित्वादिविशिष्टज्ञानेऽपि क्वचिन्निर्विकल्पकविषयताभ्युपगमे बाधकविरहात् ।

एतेन विशेषणान्तराविशिष्टविशेषणकबुद्धिसामान्यं प्रति विशेषणज्ञानसामान्यहेतुतायाः पूर्वं निराकृतत्वेन निर्विकल्पकबुद्धौ मानाभाव इति पूर्वपक्षोऽपि निरस्तः । एतादृशकार्यकारणभावानुरोधेनैव निर्विकल्पकोपगमस्यावश्यकत्वात् ।

न च घटत्वादिव्यञ्जकविलक्षणसन्निकर्षाद्यधीनघटत्वादिविशिष्टबुद्धौ नियमत एव घटत्वादेः स्वरूपतः प्रकारत्वमानुभविकमित्युपनीतभान एव स्वरूपतो घटत्वादिज्ञानस्य प्रत्यासत्ति

तया हेतुत्वमुपेयते न तु लौकिकप्रत्यक्षेऽपीति न निर्विकल्पकसिद्धिरिति वाच्यम् । लाघवेन लौकिकालौकिकसाधारणस्य विशेषणानवच्छिन्नत्वविशिष्टबुद्धित्वस्य विशेषणानवच्छिन्नविशेषणज्ञानजन्यतावच्छेदकत्वोपगमात् गोत्वादिनिर्विकल्पकदशायां च जातित्वादिविशिष्टगोत्वाद्युपनीतभाने गोत्वादेः स्वरूपतः प्रकारत्वमिष्टमेव निर्विकल्पकोपनायकतावादिनां मतेन तद्वारणाय स्वरूपतो गोत्वाद्युपनीतभाने स्वरूपतस्तत्प्रकारकधियो हेतुत्वान्तरस्यावश्यकत्वे किं लौकिकालौकिकसाधारणविशिष्टबुद्धौ विशेषणज्ञानहेतुतयेति पूर्वपक्षानवकाश इत्यलमधिकेन ।

ननु लौकिकसन्निकर्षादिव सामान्यलक्षणातोऽपि निर्विकल्पकसम्भवेन दुष्परिहरमेव सार्वज्ञ्यमित्यत्राह । सामान्येति । सामान्यप्रकारकज्ञानजनकत्वनियमात् । सामान्यधर्मावच्छिन्नविषयतामात्रप्रयोजकत्वात् । तादृशविषयताया एव तज्जन्यतावच्छेदकत्वादिति भावः ।

ननु सामान्याश्रये धर्मिणि सामान्यधर्मविशिष्टज्ञानसामग्र्यसत्त्वे सामान्यधर्मानवच्छिन्नविषयताशालिप्रत्यक्षमपि सामान्यप्रत्यासत्तिनोऽगत्या स्वीकरणीयं तत्कुतस्तादृश्येव विषयता तज्जन्यतावच्छेदिकेत्यत आह । विशिष्टेति । सामान्यज्ञानस्यैव प्रत्यासत्तितया सामान्यजप्रत्यक्षपूर्वं धर्मिणि विशेषणज्ञानादिघटितसामान्यविशिष्टबुद्धिसामग्रीसत्त्वादित्यर्थः ।

यद्यपि प्रमेयत्वादिसामान्यप्रत्यासत्त्युपस्थापितघटत्वादेः स्वरूपतो विशिष्टबुद्ध्युपगमेऽपि यदा तस्य परकीयज्ञानविषयत्वादिरूपतत्त्वादिविशिष्टबुद्धिरुत्पद्यते तदैव घटान्यत्वादेरपि तत्र भानं सम्भवति निश्चयस्य प्रागसत्त्वात् तुल्यबलविरोधिभासकसामग्र्याश्चाप्रतिबन्धकत्वादिति संशयोपपत्त्या उक्तप्रयासो निष्फलः । तथापि यत्र पूर्वं घटान्यत्वमनुपस्थितं प्रमेयवानिति ज्ञानानन्तरमेव तदुपस्थितिस्तत्र स्वरूपतस्तद्विशिष्टबुद्धौ स्वरूपतस्तज्ज्ञानानपेक्षायां स घट इति निश्चयस्य प्राक् सम्भवेन तादृशनिश्चयेऽप्रामाण्यशङ्कामन्तरेणाप्यानुभविकस्य स घटो न वेति संशयस्यानुपपत्त्या सामान्यलक्षणातः सर्वज्ञादीनामिवास्मदादीनां स्वरूपतो निखिलजातिप्रकारिकाया आनुभविकधियोऽप्यापत्त्या

तत्र तदपेक्षा तदवस्थेत्यवधेयम् ॥

गिरीन्द्रदुहितुर्नमत्सुरवरावनम्रोभय-
त्पदाम्बुजरजःकृपाकलिततीक्ष्णधीसम्पदाम् ।
गदाधरविनिर्मिता विषमतर्कदुर्गाटवी
नवीनपदवीमुद वितनुतां सतां धीमताम् ॥

इति श्रीयुतगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता सामान्यलक्षणादीधितिटिप्पणी समाप्ता ॥

अथ उपाधिप्रकरणम् ॥

(चि०) उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपाधिर्निरूप्यते । तत्रोपाधि साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः । अनौपाधिकत्वज्ञानं च न व्याप्तिज्ञाने हेतुः, अतो व्यापकत्वादिज्ञाने नान्योन्याश्रयः । यद्वा व्यापकत्वं तन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, तत्प्रतियोगित्वञ्चाव्यापकत्वम् । प्रतियोगित्वं च तदधिकरणानधिकरणत्वमिति वदन्ति तन्न, साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः । न च तयोरनुपाधित्वम्, दूषकताबीजसाम्यात् ।

(दी०) प्रसङ्गादुपाधिं निरूपयितुमाह उपाधीति । सोपाधौ साध्यत्वसाधनत्वे न सम्भवतोऽत अभिमतेति । यो यद्व्यापकत्वे सति यदव्यापकः स तत्रोपाधिरिति निर्गलितोऽर्थः । व्यापकत्वाव्यापकत्वे एकरूपेण विवक्षिते ।

(गा०) उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्यत्र मूले व्यभिचारज्ञाने सत्युपाधिज्ञानादिति योजना यां व्यभिचारज्ञानस्य हेतुज्ञानविधया उपाधिज्ञापकत्वलाभादुपाधेर्व्यभिचारव्यापकताऽर्थतो लभ्यते, तद्व्यापकता विना तज्ज्ञानज्ञाप्यत्वानुपपत्ते, तथासत्युपाध्यभावस्य व्यापकाभावविधया व्यभिचाराभावज्ञापकत्वलाभात् उपाधे प्रतियोगितया तदभावज्ञानजनकज्ञानविषयताया स्वरसत एव लाभेन प्रकृतस्य व्यभिचाराभावरूपव्याप्तिज्ञानस्य प्रयोजकज्ञानविषयत्वरूपोपपादकत्वमुपा-

धेर्लभ्यत इति उपोद्घातसङ्गतिप्रदर्शनपरं तादृशमूलमिति मिश्राः । तत्र न व्याप्तिनिश्चय इत्यनेनोपाधिज्ञानस्य व्याप्तिनिश्चयाभावप्रयोजकत्वकथनमनुपयुक्तमिति यथाश्रुतयोजनायां उपाधेर्व्याप्तिनिश्चयप्रतिबन्धकव्यभिचारज्ञानजनकज्ञानविषयत्वरूपव्याप्तिनिश्चयसम्बन्धलाभेन व्याप्तिग्रहाभावे सा च क्वचिदुपाधिसन्देहादित्यादिग्रन्थेन स्मृतत्वलाभात् स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गसङ्गतिप्रदर्शनपरतैव तादृशमूलस्येत्याशयेन दीधितिकृदाह । प्रसङ्गादिति ।

केचित्तु व्यभिचारज्ञाने न सतीति योजनया उपाधिरूपप्रतियोगिज्ञानादुपाध्यभावज्ञानेन तादृशव्यावर्तकधर्मदर्शनरूपप्रतिबन्धकवशाद्व्यभिचारज्ञानाभावे सति व्याप्तिनिश्चय इत्यर्थलाभात्प्रकृतव्याप्तिनिश्चयप्रयोजकत्वरूपप्रकृतोपपादकत्वलाभेनोपोद्घातप्रदर्शनपरता मूलस्येत्याहुः ।

वस्तुतस्तु शिष्यस्योपाधिज्ञाने तदुद्भावनेन मध्यस्थस्य व्यभिचारज्ञानं सम्पाद्य वादिसिषाधयिषितसाध्यानुमित्यौपयिकव्याप्तिनिश्चयप्रतिबन्धात् वादिविजयो भवतीत्युपाधिनिरूपणस्य प्रयोजनवत्त्वेति मूलाभिप्रायः । सोपाधौ साध्यत्वसाधनत्वे न सम्भवत इति । साध्यत्वं सिद्धिविषयत्वयोग्यत्वं सिद्धिविषयताप्रयोजकधर्मवत्त्वरूपम्, तादृशो धर्मो व्यापकत्वमेव, साधनत्वमपि सिद्धिजननयोग्यत्वं तज्जननौपयिकव्याप्तिपक्षधर्मत्वे इति भावः । यद्यपि परस्परनिरूपितसाध्यसाधनभावाविवक्षणे नासम्भवः, तथापि सामान्यतस्साध्यत्वसाधनत्वयोर्व्यावर्तकतया तदीयसाध्यव्यापकत्वे सति तदव्यापकत्वं तद्धेतुकोपाधित्वम्, तदीयसाधनाव्यापकत्वे सति तद्व्यापकत्वं तत्साध्यकोपाधित्वमिति यदि विवक्ष्यते तदभिप्रायेणासम्भवप्रदर्शनम् ।

ननु धूमादिसाध्यताभिमानविषयघटादिव्यापकतामादाय तद्व्यापकधूमाद्यव्यापके वह्न्यादिसाधनत्वाभिमानविषयद्रव्यत्वाद्यव्यापकतामादाय तदव्यापकवह्न्यादिव्यापके वह्न्यादिसाध्यकधूमादिहेतुकोपाधित्वं दुर्वारम्, उपाधित्वस्य साध्यसाधनविशेषघटितनियमघटकत्वानुपपत्तिश्च, विशिष्य साध्यसाधनयोर्निवेशे च अभिमानपर्यन्तनिवेशो व्यर्थ इत्याशयेनाभिमतत्वनिवेशोऽपि वि-

शिष्य साध्यसाधननिवेशाभिप्रायक इत्याशयेनाह । यो यदिति । यत्पदं यद्धर्मावच्छिन्नपरम्, तत्पदमपि तद्धर्मावच्छिन्नपरम् ।

अनौपाधिकत्वं यदि साध्यव्यापकानां यावतामव्याप्य त्वसम्बन्धावच्छिन्नाभाव यद्व्यापक इत्याद्यपक तद्भिन्नप्रकृत-साध्यकत्वं वा तदा धूमादिनिष्ठार्द्रेन्धनादिनिरूपितव्याप्तिग्राह कार्द्रेन्धनादिनिरूपितानौपाधिक शरीर धूमादिनिष्ठार्द्रेन्धनादि व्याप्तिर्न निविशते किन्तु आर्द्रेन्धनादिनिष्ठा द्रव्यत्वादिव्याप्तिर त्येत्यन्योन्याश्रयानवकाशात् अनौपाधिकत्वज्ञानस्य व्याप्तिग्राहक तामनुपगम्य मूलकृतो ऽन्योन्याश्रयनिराकरणासङ्गतिरित्यतो ऽन्यादृशानौपाधिकत्वाभिप्रायेण अन्योन्याश्रयाशङ्कया मूलमव तारयति नन्वित्यादिना ।

(दी०) ननूपाधिः साध्यव्यापकत्वे साध्यनिष्ठव्याप्ति निरूपकत्वम्, सा च यावदुपाधिव्यापकव्यापककत्वरूपानौपाधि-कत्वज्ञानादेव ग्राह्या, उपाधिव्यापकयावदर्थान्तर्गतस्य चोपाधे-स्साध्यव्यापकत्वग्रहश्च साध्यनिष्ठव्याप्तिग्रहात् इत्यन्योन्याश्रय इत्यत आह । अनौपाधिकत्वेति । व्यापकत्वं व्याप्तिनिरूपकत्वम्, सा चानौपाधिकत्वग्रहाद् गृहीतव्या, तत्प्रतिनिष्ठव्याप्तिज्ञानमपि अनौपाधिकत्वान्तरग्रहादित्यनवस्थेत्यत आह । अनौपाधिक-त्वेति । अन्योन्याश्रयपदमनवस्थापरमिति सम्प्रदायः ।

(गा०) तत्समानाधिकरणाभावाप्रतियोगित्वरूपव्यापकता ग्रहे नानौपाधिकत्वधर्मो हेतुः किन्तु व्याप्तिज्ञान एव, अत एव अनौपाधिकत्वधियो व्याप्तिग्राहकत्वाभ्युपगमेन य द्वेत्यादिमूलेन तादृशव्यापकता निरुक्ता, अतो व्याप्तिघटि तव्यापकत्वमुपाधिताघटकमिति दर्शयति । साध्यव्यापकत्वे सा ध्यनिष्ठव्याप्तिनिरूपकत्वमिति । सा च । साध्यनिष्ठोपा धिव्याप्तिश्च । यावदुपाधिव्यापकव्यापककत्वरूपानौपाधिकत्वज्ञाना दिति । सिद्धसिद्धिव्याघातवारणाय तन्निरूपितव्याप्तिग्राहकतया यावत्तद्व्यापकव्यापककत्वरूपानौपाधिकत्वस्यैवाहतत्वादिति भावः ।

उपाधीति । आर्द्रेन्धनादिरूपप्रकृतोपाधीत्यर्थः । उपाधेरिति । तदुपाधेरित्यर्थः। साध्यव्यापकत्वग्रहः। धूमादिनिष्ठार्द्रेन्धनादिनिरूपितव्याप्तिग्रहार्थमनौपाधिकत्वज्ञानरूपतया अपेक्षित इति पूरणीयम् । साध्यनिष्ठव्याप्तिग्रहादिति । प्रकृतसाध्यनिष्ठप्रकृतोपाधिनिरूपितव्याप्तिग्रहादित्यर्थः । तादृशव्याप्तेस्तादृशव्याप्तिनिरूपकत्वरूपप्रकृतसाध्यव्यापकत्वघटकतया विशेषणज्ञानादिविधया तज्ज्ञानस्य तादृशव्यापकत्वग्राहकत्वादिति भावः । अन्योन्याश्रयेति । धूमनिष्ठव्याप्तिज्ञानाधीनस्य यावदार्द्रेन्धनव्यापकधर्मिकधूमव्यापकताज्ञानस्य धूमनिष्ठव्याप्तिज्ञाने अपेक्षितत्वादिति भावः ।

न चार्द्रेन्धननिष्ठधूमव्यापकताग्रहे विशेषणज्ञानादिविधया अपेक्षितं यद् धूमनिष्ठव्याप्तिज्ञानं तत्र नानौपाधिकत्वज्ञानं हेतुः प्रतियोग्युपरक्तव्याप्तिज्ञाने एव तद्धेतुत्वात्, प्रतियोग्यनुपरक्तव्याप्तिज्ञानस्यापि विशेषणज्ञानादिमुद्रया व्याप्तिनिरूपकत्वग्राहकतासम्भवादिति वाच्यम् । व्याप्तेस्साध्यमनन्तर्भाव्य निर्वक्तुमशक्यतया प्रतियोग्युपरागेणैव तज्ज्ञानात् ।

व्यापकत्वमित्यादि सम्प्रदाय इत्यन्तमन्यमतम् । व्यापकत्वमित्यादिना ऽनवस्थाकृतया व्याप्तिघटितव्यापकताप्रदर्शनम् । अनौपाधिकत्वेति । अव्याप्यत्वसम्बन्धावच्छिन्नसाध्यव्यापकाभावरूपेत्यादिः । सम्प्रदाय इत्यनेनोदक्षरतया अस्वरसस्सूचितः ।

(दी०) अव्याप्यवृत्तीनां व्यापकत्वमुपपादयितुमाह। प्रतियोगित्वं चेति। तदधिकरणानधिकरणत्वं तदधिकरणाधिकरणत्वविरोधि यत् प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तदिह गृहीतव्यम् ।प्रतियोगिव्यधिकरणत्वेनाभावो विशेषणीय इति फलितोऽर्थः। साधनेति । अनयोरसङ्करोऽग्रे प्रदर्शयिष्यते।

(गा०) अव्याप्यवृत्तीनामिति । द्रव्यत्वादिसाध्यकसंयोगाद्युपाधीनामिति शेषः । व्यापकत्वमुपपादयितुमिति । साध्यवन्निष्ठाभावाप्रतियोगित्वमुपपादयितुमित्यर्थः । इदमुपलक्षणम्, द्रव्यं गुणादित्यादौ संयोगादीनां गुणोऽभिधेयादित्यादौ संयो-

गाभावादीनाञ्च साधनाव्यापकत्वमपि निराकर्तुमित्यपि द्रष्टव्यम् ।

ननु संयोगाभावाधिकरणगुणाद्यनधिकरणकत्वस्य 'सयोगे सत्त्वात्तदधिकरणानाधिकरणकत्वरूपप्रतियोगित्वनिवेशेऽपि संयोगस्य द्रव्यत्वादिव्यापकत्वानुपपत्तिः, गुणादिरूपसाधनाव्यापकतापत्तिश्च । तदधिकरणयावदनधिकरणकत्वस्य विवक्षणे च संयोगादेस्सत्तादिव्यापकतापत्तिः, सत्तादिसमानाधिकरणसंयोगाभावाधिकरणयावदन्तर्गतस्य द्रव्यस्य संयोगाधिकरणत्वेन तादृशाभावाप्रतियोगित्वात् ।

अथ सत्तादिसमानाधिकरणद्रव्यत्वाद्यभावीययावदधिकरणानधिकरणकत्वस्य सत्त्वेन तादृशाभावाप्रतियोगित्वं दुर्घटमिति चेत् ? एवमपि यावत्त्वरूपव्यापकत्वान्तरघटिततयाऽतिगौरवम्, तदधिकरणावृत्तित्वरूपसामान्याभावविवक्षणे च द्रव्यं सत्त्वादित्यादौ पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वादिना उपाधितापसङ्गः विशिष्टद्रव्यत्वाद्यभाववति विशिष्टद्रव्यत्वादेर्द्रव्यत्वत्वादिना वृत्तेस्साध्यसमानाधिकरणाभावाप्रतियोगित्वात्तत: । सत्तादिसमानाधिकरणशुद्धद्रव्यत्वाद्यभाववदवृत्तित्वेन साधनाव्यापकत्वस्यापि सत्त्वात् ।

न च तस्य वक्ष्यमाणसिद्धान्तलक्षणाक्रान्ततया लक्ष्यत्वमेवेति वाच्यम् । तत्समशीले धूमादिसाध्यकवह्न्यादिहेतुकमहानसत्वाद्युपाधौ एतल्लक्षणागमनेन इदानीं तादृशमहानसत्वाद्युपाधेरिवोक्तस्थलीयविशिष्टद्रव्यत्वादेरपि लक्ष्यतानौचित्यात् । एवं जातिमान्मेयत्वादित्यादौ समवायेन सत्ताद्युपाधावव्याप्तिः, उपाधिताघटकसम्बन्धेन वृत्तेरवश्यं विवक्षणीयतया सत्ताद्यभावाधिकरणसामान्यादौ समवायेन वृत्तेरप्रसिद्ध्या साधनाव्यापकत्वस्य दुर्घटत्वात्, इत्यतः प्रतियोगित्वं चेत्यादि मूलं न प्रतियोगित्वानिर्वचनपरम् अपि तु स्वरूपसम्बन्धरूप एव प्रतियोगित्वेऽव्याप्यवृत्त्यभावीयप्रतियोगित्वव्यावर्त्तकविशेषणदानपरमित्याह । तदधिकरणेति । साध्यसामानाधिकरण्यविशिष्टाभावाधिकरणं यत्किञ्चिद्वद्विशिष्टानधिकरणं तदन्यधर्मवत्त्वं साध्यव्यापकत्वम्, साधनसामानाधिकरण्यविशिष्टाभावाधिकरणं यत्किञ्चिद्रूपावच्छिन्नानधिकरणं तद्रूपवत्त्वं साधनाव्यापकत्वमित्यभिप्रायकतया

यथाश्रुतमूलस्यापि सङ्गतिर्बोध्या । तदधिकरणाधिकरणत्वविरोधीति । अधिकरणत्वविरोधित्वं स्वावच्छेदकविशिष्टाधिकरणत्वग्रहप्रतिबन्धकग्रहविषयत्वम् । एवं प्रतियोगिता, विरोधित्वप्रविष्टज्ञाने विशेष्यतावच्छेदकसम्बन्धेन तदधिकरणपदार्थान्वय, तत्पदमभावपरम्, तथा च तदभावाधिकरणविशेष्यकस्वावच्छेदकविशिष्टवत्ताग्रहप्रतिबन्धकप्रमाविषयीभूततदभावीयप्रतियोगित्वं इह गृहीतव्यमित्यर्थः । अनवच्छिन्नविशेषणतासंसर्गविषयकाभावज्ञानस्यैव प्रतियोगिमत्ताज्ञानप्रतिबन्धकतया तादृशसम्बन्धावगाहिन्या द्रव्ये संयोगाभावप्रमाया अप्रसिद्ध्या तत्प्रतियोगित्वमादाय न संयोगस्य द्रव्यत्वाद्यव्यापकतापत्तिः । साध्यसामानाधिकरण्योपलक्षितसंयोगाभावस्याधिकरणे अनवच्छिन्नविशेषणतासंसर्गकसंयोगाभावप्रमादिविषयत्वं तदीयप्रतियोगितायामक्षतमेवेति साध्यसामानाधिकरण्यविशिष्टाभावाधिकरणत्वमेव साध्यव्यापकताया निवेश्यम् । एवं साधनाव्यापकत्वशरीरेऽपि साधनसामानाधिकरण्यविशिष्टाभावाधिकरणत्वं निवेश्यम् अन्यथोक्तरीत्या साध्यव्यापकसंयोगादावतिव्याप्तेः ।

लाघवाय फलितार्थमाह । प्रतियोगीति । अत्र च साध्याधिकरणे प्रतियोगिव्यधिकरणत्वमवश्यमेव निवेश्यम् अन्यथा द्रव्यत्वादिसमानाधिकरणसंयोगाभावस्यापि गुणादौ प्रतियोगिव्यधिकरणतया उक्ताव्याप्तिवारणासम्भवात् । तथा च तादृशाभावीयत्वस्य अधिकस्य प्रतियोगितावि‍शेषणत्वापगमे मूलस्थाभावान्तर्गत्यर्थत्वमित्याशङ्कां निराकरोति । प्रतियोगिव्यधिकरणत्वेनेति । अभाव इति । साध्यादिसमानाधिकरणाभाव इत्यर्थः । विशेषणीय इति । न तु तादृशाभावविशेषितं प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावीयत्वेनेति दोषः । प्रतियोग्यनधिकरणत्वेन साध्याधिकरणं विशेषणीयमिति तु परमार्थः । उपाधितावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगित्वसाध्यवद्वृत्त्यनुयोगिकत्वाभयाभाव तादृशप्रतियोगित्वमेव प्रतियोगितान्तार्थनिष्कर्ष, तेन कालपरिमाणवान् द्रव्यत्वादित्यादौ कालिकसम्बन्धेन घटाद्युपाधेर्नासङ्गहः, यथाश्रुते कालिकसम्बन्धेन प्रतियोग्यनधिकरणस्य साध्यवतो ऽप्रसिद्ध्या तदसङ्ग्रहापत्तेः ।

ननु मित्रातनयपक्षकश्यामत्वसाध्यकमित्रातनयत्वहेतुके साधनावच्छिन्नसाध्यव्यापकशाकपाकजत्वोपाधिः पक्षधर्मावच्छिन्नसाध्यव्यापकोऽपि साधनस्यापि पक्षधर्मत्वात्। एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकमुद्भूतरूपवत्त्वं साधनावच्छिन्नसाध्यव्यापकमपीति मूले उभयोर्भेदेनोपादानमनुपपन्नमत आह । अनयोरिति । अनयोः । साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्योः । असङ्करः। भेदः । अग्रे प्रदर्शयिष्यत इति । यत्र साधनशून्यस्य साध्यवतः काकादेः पक्षता तत्र शाकपाकजत्वादेः साधनावच्छिन्नसाध्यं प्रति व्यापकता न पक्षधर्मावच्छिन्नं प्रति, यत्र पक्षधर्मशून्ये साध्यवत्यपि साधनं द्रव्यत्वादिरूपं तत्र पक्षधर्मावच्छिन्नमेव साध्यं प्रत्युद्भूतरूपादेर्व्यापकता न तु साधनावच्छिन्नं प्रतीति उभयोपादानसङ्गतिरिति भावः।

(चि०) मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्चेति पक्षेतरेऽतिव्याप्तिश्च । न च व्यतिरेके पर्वतेतरान्यत्वादित्यत्र इतरान्यत्वस्याप्रसिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः, बाधोन्नीतस्याप्यनुपाधितापत्तेः । न चेष्टापत्तिः, इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्त्यग्रहेण तत्सार्थक्यात् ।

(दी०) पक्षेतरेति । पक्ष इतरो यस्मादिति बहुव्रीहिः । भावप्रधानश्च निर्देशः । पक्षमितरयति व्यावर्तयतीति व्युत्पत्त्या तदवृत्तिधर्मवचन इत्यपि कश्चित् । तादात्म्येन धर्मिण एव व्यापकत्वमिति तु परमार्थः । अत एवाग्रे पर्वतेतरान्यत्वादि-

ति साधु सङ्गच्छते । इतरथा तु व्यापकाभावस्येव व्यापकवद्न्योन्याभावस्यापि गमकत्वमाश्रित्य सङ्गमनीयम् । व्यतिरेक इति । यद्यपि व्यापकाभावमुद्रया गमकत्वे तथा वैयर्थ्यं न दोषाय तथापि वास्तववैयर्थ्यशून्यत्वमेव विशेषणं देयमिति भावः ।

(मा०) ननु दुष्कतावीजाक्रान्तत्वेऽपि शुद्धसाध्याव्यापकस्य तान्त्रिकव्यवहाराविषयतया न लक्ष्यतेत्यत आह मूले मिश्रेति। प्रत्यक्षस्पर्शाश्रयत्वेनेति ।

न च प्रत्यक्षस्पर्शाश्रयत्वहेतुकस्योद्भूतरूपोपाधेस्साधनावच्छिन्नसाध्यं प्रत्यपि व्यापकतया द्रव्यत्वादिहेतुकनादशोपाधेरेव पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोपपादनं दीधितिकृत्सम्मतम् अतस्तन्मते तस्य लक्ष्यतासम्पादन विरुध्यत इति वाच्यम् । अव्याप्त्यभिधानस्य प्रत्येकावच्छिन्नसाध्यव्यापकोपाधिपरतावत् उभयावच्छिन्नसाध्यव्यापकोपाधिपरताप्यावश्यकी तत्राव्याप्त्यप्रदर्शने न्यूनतापत्तेः, अतस्तस्यापि लक्ष्यतासम्पादनैचित्यात् । उभयावच्छिन्नसाध्यव्यापकोपाधेस्साध्यप्रयोजकतया उपाधित्वव्यवस्थापने प्रत्येकावच्छिन्नसाध्यव्यापकस्य तथात्वेनोपाधितायाः व्यवस्थापितप्रायतया तद्व्यवस्थापनाधीनन्यूनताया अयोगाच्च ।

मिश्रस्तु ज्ञानगर्भमादाय उभयोपादानमुपपादितम्, तन्मते साधनावच्छिन्नमेव पक्षधर्मावच्छिन्नमेव वा साध्यं प्रति गृहीतव्यापकत्वकस्य शाकपाकजत्वोद्भूतरूपाद्युपाधेः शुद्धसाध्यव्यापकताघटितनिरुक्तोपाधित्वज्ञानाविषयत्वादिति साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेरिति मूलार्थः । तयोरनुपाधित्वमिति च तादृशतादृशसाध्यं प्रत्येव व्यापकत्वेन ज्ञातयोरनुमित्यविरोधित्वं उपाधिव्यवहाराविषयत्वं चेत्यर्थकम् । तयोरिति द्विवचन नीलघटयोरभेद इत्यत्रेव प्रकृत्यर्थतावच्छेदकभेदात् । तथा च तत्र निरुक्तोपाधित्वाग्रहेऽपि न क्षतिरिति भावः । तादृशसाध्यव्यापकताग्रहदशायामपि व्यभिचाराद्युन्नायकत्वस्य च शास्त्रीयोपाधिव्यवहारस्य सत्त्वादिति दूरकृतेत्यादेरर्थः । पक्षेतर इति मूले अतिव्या·

तिपदं अनुमानमात्रोच्छेदकज्ञानातिव्याप्तिपरम्, इदानीं चायमाशयो न स्फुट इत्यग्रे शङ्कोत्तराभ्यां स्फुटयिष्यते ।

पक्षेतर इत्यत्र सर्वनामकार्यस्मिन्नादेशाभावमुपपादयति दीधितौ पक्ष इतर इति । बहुव्रीहिरिति । तथाच न बहुव्रीहावित्यनेन सर्वनामत्वनिषेध इति भावः । पक्षेतरस्य पर्वतत्वादेः पक्षे सत्त्वया साधनव्यापकत्वेन नातिव्याप्तिरिति शङ्कां निराकरोति । भावप्रधानश्चेति । प्राधान्येन पक्षनिष्ठभेदप्रतियोगित्वरूपबहुव्रीहिलभ्यतावच्छेदकधर्मपर इत्यर्थः ।

मिश्रास्तु पक्षभेदरूपभावपरतयैव प्रकृते सर्वनामकार्याभावः अर्थविशेषपरस्यैव सर्वादेः सर्वनामत्वात्, अन्यथार्थान्तरसङ्केतितसर्वादिपदेऽपि तत्कार्यापत्तिरित्याहुः । तन्न शोभनम् । संज्ञायां सर्वनामत्वनिषेधानुशासनेन तत्कार्याभावात्, लक्षणया भावप्रधानत्वे सर्वनामकार्यस्य दुर्वारत्वात् । सज्ञायां निषेधादाधुनिकसङ्केतसहकारेण अर्थबोधस्थले तादृशसङ्केतमूललक्षणास्थलेऽपि सङ्केतस्य लक्षणाघटकस्य सहकारितास्त्येवेति तत्कार्याभावः ।

यद्यपि दीधितिकारव्याख्यायामपि इतरपदस्य लक्षणया भेदार्थकत्वे भेदप्रतियोगित्वार्थकत्वे च उक्तबहुव्रीह्यर्थपरित्यागाद्बहुव्रीह्यनुपपत्त्या असङ्गतिः । तथापि अनेनैवाशयेन भावप्रधाननिर्देशमुपेक्ष्य तादात्म्यसम्बन्धेन धर्मिण उपाधित्वमङ्गीकृत्य साधनाव्यापकत्वस्योपपादनीयत्वाददोषः ।

व्युत्पत्त्यन्तरेण सर्वनामकार्याभावं साधनाव्यापकत्वं च साधयतो मतमुपन्यस्यति । पक्षमिति । व्यावर्तयतीति । स्वाश्रयरूपपक्षेमासमानभेदप्रतियोगितया ज्ञापयतीत्यर्थः । तद्वृत्तीति । पक्षावृत्तीत्यर्थः । कश्चिदित्यस्वरससूचनाय । तद्बीजं तु पर्वतेतरान्यत्वादित्यग्रिमग्रन्थे पर्वतेतरपदस्योक्तव्युत्पत्त्या पर्वतावृत्तिधर्मार्थकत्वेऽपि तदन्यत्वस्याश्रयत्वरूपोपाधिताघटकसम्बन्धावच्छिन्नप्रतियोगिताकाभावात्मकतया तेन सम्बन्धेन तदन्यत्वात्मकतया च तद्ग्रन्थासङ्गतिः । धर्मिण एवेति । पक्षनिष्ठभेदप्रतियोगिन एवेत्यर्थः । व्यापकत्वम् । साध्यव्यापकत्वम् । तथा च येन सम्बन्धेन साध्यव्यापकता तेनैव सम्बन्धेन साधनाव्यापकत्वमपि तस्याक्षतमिति भावः । अत एव । तादात्म्यसम्बन्धेन धर्मिण उपाधित्वस्य

अभिप्रेतत्वादेव । साधु सङ्गच्छत इति । पर्वतेतरान्यत्वस्य उपाधितावच्छेदकसम्बन्धावच्छिन्नोपाधिव्यतिरेकरूपतया साध्याभावानुमाने तस्य हेतुताप्रदर्शनौचित्यादिति भावः । भावप्रधाननिर्देशपक्षेऽपि तादृशहेतुप्रदर्शनं कथञ्चित्सङ्गमयति । इतरथा त्विति । गमकत्वमाश्रित्येति । गमकतायां विशेषणवैयर्थ्यस्यानुपाधितावीजत्वपरतामाश्रित्येत्यर्थः । व्यतिरेके व्यर्थविशेषणत्वादिति मूलम्, पक्षेतरान्यत्वस्य साध्याभावव्याप्यतानवच्छेदकपक्षरूपविशेषणघटितत्वादित्यर्थः । अप्रसिद्धिवारकस्यापि व्यभिचारवारकतया व्याप्यतावच्छेदकाघटकत्वमित्यभिमानः । अप्रसिद्ध्या पक्षाघटितस्य इतरान्यत्वत्वस्य तद्व्याप्यतावच्छेदकत्वासम्भवात् व्याप्यतावच्छेदकधर्मान्तराघटितत्वेन पक्षेतरान्यत्वत्वस्य व्याप्यतावच्छेदकत्वमावश्यकमित्यग्रे वक्ष्यते ।

पक्षेतरव्यतिरेकस्य व्यर्थविशेषणघटिततया साध्याभावासाधकत्वात् तत्र साध्यव्यापकताघटितोपाधित्वग्रहे नानुमानमात्रोच्छेद इति मूलाशयमाक्षिपति दीधितौ । यद्यपीति । व्यापकाभावमुद्रयेति । व्यापकतया गृह्यमाणस्याभावमुद्रयेत्यर्थः । गमकत्वे । साध्याभावानुमापकत्वे । तथा । वैयर्थ्यम् । स्वघटितस्य व्याप्यतानवच्छेदकत्वप्रयोजकस्वरूपविशेषणस्य वैयर्थ्यम् । न दोषाय । न साध्याभावानुमापकताव्याघाताय । उपाध्यभावे अन्वयव्याप्तिग्रहस्यानपेक्षितत्वादिति भावः ।

आशयान्तरवर्णनेन मूलं सङ्गमयति । तथापीति । वास्तवेति । साध्याभावानुमापकताविरोधिविशेषणानवच्छिन्नेत्यर्थः । वैयर्थ्यशून्यत्वम् । साध्याभावनिरूपितस्वाभावनिष्ठव्याप्यतावच्छेदकाघटकविशेषणाघटितत्वम् । विशेषणमिति । उपाधितावच्छेदकस्येत्यादिः । साध्याभावव्याप्यतानवच्छेदकस्वाभावच्छिन्नाभावत्वकं यत्साध्यव्यापकतावच्छेदकं तदन्यत्वेन धर्मो विशेषणीय इति फलितार्थः । भेदप्रतियोगिनि विशेष्यदलप्रवेशात् न साध्यव्यापकत्वे सतीत्यस्य वैयर्थ्यम् । विशेषणान्तरप्रवेशस्यैव पक्षेतरे ज्ञानातिव्याप्तिं वारयतः प्रगल्भस्य मतमुपन्यस्यति । यत्त्विति ।

(दी०) यत्तु ययोर्व्यतिरेकव्याप्तिस्तयोरेव व्याप्यवृत्तिव्यतिरेकिणोरन्वयव्याप्तिरिति नियमः । इह तु व्यर्थविशेषणतया व्यतिरेके व्याप्त्यभावादन्वयेऽपि न तथा अतः साध्याव्यापकत्वात्सावमुपाधिरिति भाव इति तन्न । अहेतुकत्वशरीरादेहेतुकत्वयोर्व्यभिचारात्, एवमपि संयोगादौ केवलान्वयिनि च साध्ये पक्षेतरातिव्याप्तितादवस्थ्याच्च ।

(गा०) ययोर्व्यतिरेके व्याप्तिरिति । यद्व्यतिरेके यद्व्यतिरेकनिरूपितव्याप्तिरित्यर्थः । तयोरेवेति । तस्यैव व्याप्यवृत्तिव्यतिरेकिणो व्याप्यवृत्तिव्यतिरेकितद्व्यापकत्वमिति नियम इत्यर्थः । अन्ययोगव्यवच्छेदार्थकैवकारबलाद्व्याप्यवृत्तिव्यतिरेकिनिष्ठतादृशधर्मनिरूपितव्यापकत्वस्य तयोर्व्यतिरेकव्याप्तिव्याप्यत्वलाभः, वह्निमान् यस्स एव धूमवानित्यादौ धूमादेर्वह्न्यादिनिरूपितव्याप्यत्वलाभवत् । यद्योगप्राथम्यसत्त्वेऽपि यत्पदस्य द्विरुक्तिं विना क्वचित्सामानाधिकरण्यमात्रबोधात् ययोर्व्याप्यवृत्तिव्यतिरेकिणोरन्वये व्याप्तिस्तयोर्व्यतिरेकव्याप्तिरित्यभिधाने ऽन्वयव्याप्तौ व्यतिरेकव्याप्तिव्याप्यताया झटिति लाभो न सम्भवतीति एवकारमन्तर्भाव्य वैपरीत्येन लेखनं ययोर्ययोर्व्याप्यवृत्तिव्यतिरेकिणोरित्याद्यनभिधानबीजम् । अशोकवनिकान्यायेन अवश्यं व्यतिरेकव्याप्त्यभावेनान्वयव्याप्त्यभावसाधनस्य वक्ष्यमाणतया व्यतिरेकव्याप्तिव्यतिरेके अन्वयव्याप्तिव्यतिरेकावश्यम्भावप्रदर्शनेन तत्साधने झटिति कथन्तानिवृत्तिरित्याशयेन एवकारघटितोक्तवाक्येन तत्प्रदर्शनम् । यद्योगेन प्रथमतो व्याप्यभूतान्वयव्याप्त्यभिधाने तन्निरूपकविशेषणव्याप्यवृत्तिव्यतिरेकित्वविशिष्टयोर्व्यतिरेकव्याप्तिनिरूपकयोस्तत्पदेन लाभस्स्यात्. तत्र च तादृशविशेषणमविवक्षितम्, वैयर्थ्यादिति वैपरीत्येन लेखनम् । यत्पदोत्तरतत्पदस्य यत्पदोर्धमात्रपरामर्शकत्वादुक्तविशेषणस्य च यत्पदानुपस्थाप्यतया तद्विशिष्टस्य तत्परामर्शनीयत्वासम्भवेऽपि प्रथम अन्वयव्याप्त्यभिधाने तयोरित्यत्र व्याप्यवृत्तिव्यतिरेकीत्यस्य अनुषङ्गाभिमानेन तत्पदार्थे उक्तविशेषणप्रवेशः शक्येतेति प्रथमं तदनभिधान-

।

बीजमिति केचित्।

यद्यपि व्यतिरेकनिष्ठव्याप्तेः व्यधिकरणेनान्वयव्याप्तिव्यापकत्वं न सम्भवति तथापि तद्व्यतिरेकव्याप्यव्यतिरेकप्रतियोगित्वस्य तद्व्यापकता बोध्या, तयोरैक्यत्यनेन तत्पदोपस्थाप्यव्याप्तिनिरूपकव्यतिरेकप्रतियोगिभिन्ने अन्वयव्याप्तिव्यतिरेकप्रत्यायनात्, उक्तशब्देन व्यतिरेकप्रतियोगिताया एव नियमबोधनात्।

यद्यपि पर्वतादिभेदाभावस्य तत्त्वेनैव व्याप्यता न सम्भवति पर्वतादिरूपाप्रसिद्धिमात्रप्रकारकविशेषणघटितत्वात्, पर्वतत्वादिरूपेण व्याप्यत्वं चाव्याहतमेवेति व्यतिरेकव्याप्यभावेन पक्षेतरत्वसाध्ययोरन्वयव्याप्तिविरहसाधनं न सम्भवति स्वरूपासिद्धेः, मेयत्वाभावत्वादिना पर्वतभेदादेरपि वह्न्यादिव्यापकतायाः निर्विवादतया तदभावसाधने बाधश्च। तथाप्युपाधितावच्छेदकत्वाभिमतपर्वतभेदत्वादौ वह्न्याद्यभावव्याप्यतावच्छेदकत्वावच्छिन्नाभावव्यापकत्वविरहेण वह्न्यादिव्यापकतावच्छेदकत्वाभावसाधनोपयिको यो धर्मः व्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदकत्वे सति तादृशप्रतियोगितावच्छेदकयद्धर्मावच्छिन्नव्यापकतावच्छेदकस्सो ऽयद्य तद्धर्मावच्छिन्नाभावव्याप्यतावच्छेदकत्वावच्छिन्नाभाववत्वक इत्येव पर्यवसितो नियमः। द्रव्यत्वादिव्यापकतावच्छेदकवाच्यत्वत्वादौ तावच्छिन्नाभावाप्रसिद्ध्या द्रव्यत्वाद्यभावव्याप्यतावच्छेदकत्वावच्छिन्नाभावत्वकत्वासम्भवात् व्यभिचार इति व्यापकतावच्छेदक व्यतिरेकप्रतियोगितावच्छेदकत्वं विशेषणम्। प्रतियोगिता व्यापकताघटकसम्बन्धावच्छिन्ना ग्राह्या अन्यथा वाच्यत्वत्वादेरपि भेदादिप्रतियोगितावच्छेदकतया व्यावृत्त्ययोगात्। अव्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदके द्रव्यत्वादिव्यापकतावच्छेदकसंयोगत्वादौ द्रव्यत्वाद्यभावव्यभिचारितावच्छेदकत्वावच्छिन्नाभाववत्वके व्यभिचारवारणाय व्यतिरेके व्याप्यवृत्तित्वं विशेषणम्। व्याप्यवृत्तित्वं च अवच्छिन्नवृत्तिकान्यत्वे सति वृत्तिमत्त्वं न त्वनवच्छिन्नवृत्तिकत्वम्, संयोगाभावादेरपि गुणादावनवच्छिन्नवृत्तिकतया तदव्यवच्छेदात् वृत्तिमत्त्वविशेषणात् प्रतियोगिरूपाभावप्रतियोगितावच्छेदके द्रव्यत्वव्यापकतावच्छेदकगगनाभावत्वा·

दौ द्रव्यत्वाद्यभावव्याप्यतानवच्छेदकस्यावच्छिन्नाभावत्वके न व्यभिचारः । द्रव्य विशिष्टसत्त्वावद् गुणादित्यादौ द्रव्यादिभेदे विशिष्टसत्तात्वोपलक्षितसत्ताव्यापकताविरहसाधनमनुपयुक्तम्, साध्यतावच्छेदकविशिष्टनिरूपितव्यापकताया एव उपाधिताघटकत्वादिति विशिष्टसाध्यव्यापकताविरहसाधनाय व्याप्यादिशि यद्धर्मावच्छिन्नेति । तादृशधर्मे व्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदकत्वस्य विशेषणात् संयोगत्वावच्छिन्नव्यापकतावच्छेदकद्रव्यत्वत्वादौ अभावत्वस्यैव केवलान्वयिसंयोगाद्यभावव्याप्यतावच्छेदकत्वसम्भवेन द्रव्यत्वाद्यभावत्वस्य तद्व्याप्यतानवच्छेदकत्वेऽपि न व्यभिचार, संयोगत्वादेः व्यतिरेकप्रतियोगितावच्छेदकत्वेऽपि व्याप्यवृत्तिव्यतिरेकप्रतियोगितानवच्छेदकत्वात् ।

न च व्याप्यवृत्तितावच्छेदकत्वमेव विशेषणमस्तु, तावतैवोक्तव्यभिचारवारणसम्भवात्, व्यतिरेकप्रतियोगितावच्छेदकत्वस्य वैयर्थ्यम्, केवलान्वयितावच्छेदकधर्मावच्छिन्नव्यापकतावच्छेदकस्य व्यतिरेकप्रतियोगितावच्छेदकधर्मस्य अप्रसिद्ध्या वाच्यत्वत्वादिरूपव्याप्यतावच्छेदकधर्ममादाय व्यभिचाराप्रसक्तेरिति वाच्यम् । व्याप्यवृत्तित्वस्य व्याप्यतावच्छेदकप्रविष्टव्यतिरेक एव विशेषणतया व्याप्यवृत्तितावच्छेदकत्वस्य व्याप्यतावच्छेदकविशेषणतया यथासन्निवेशो अर्थवर्थ्यात् । व्यर्थविशेषणाघटितकम्बुग्रीवादिमत्त्वरूपधर्मावच्छिन्नव्यापकतावच्छेदकघटत्वादौ तदवच्छिन्नाभावाप्रसिद्ध्या असम्भवेत्तदवच्छिन्नाभावव्याप्यतावच्छेदकस्यावच्छिन्नाभावत्वकत्वे व्यभिचारवारकत्वाच्च ।

केचित्तु व्याप्यवृत्तिव्यतिरेकिणोरित्यत्र द्वन्द्वाश्रयणात् व्याप्ये व्याप्यवृत्तित्वमात्रस्य व्यापके च व्यतिरेकित्वमात्रस्य विशेषणत्वम् । न च व्यापके व्याप्यवृत्तित्वाविशेषणे पूर्वोपदर्शितव्यभिचारो दुर्वारः । प्रतियोगिवैयधिकरण्यघटितव्यापकताया एव व्याप्यत्वोपगमात्, संयोगादौ च द्रव्यत्वादिनिरूपितायास्तादृशव्यापकताया असत्त्वात्, व्यतिरेकिनिष्ठायाः केवलान्वयिव्यापकताया अप्रसिद्ध्या व्यापके व्यतिरेकित्वविशेषणादेव व्यतिरेकिनिरूपितव्यापकताया व्याप्यत्वपर्यवसानात्, केवलान्वयिनिरूपितव्यापकतायां व्यतिरेकव्याप्तिव्याप्यत्वासम्भवेऽपि अविरोधात् । वक्ष्यमाणस्य केवलान्वयिसा-

व्यकपक्षेतरत्वातिप्रसङ्गस्य व्याप्ये व्यतिरेकित्वविशेषणं विनापि सङ्गतिः ।

न च प्रतियोगिवैयधिकरण्यघटितव्यापकताया एव उपाधित्वघटकतया तस्या व्याप्यत्वमन्तरेण पक्षेतरातिप्रसङ्गस्य दुर्वारत्वाद्व्यापकेऽपि व्याप्यवृत्तित्वविशेषणस्यावश्यकत्वमिति वाच्यम् । व्याप्यवृत्तौ पक्षेतरत्वे प्रतियोगिवैयधिकरण्याघटितव्यापकत्वाभावसिद्धौ व्याप्यवृत्तित्वविशिष्टतदभावेन प्रतियोगिवैयधिकरण्यघटितव्यापकताया अभावस्यापि सिद्धिसम्भवात् । अव्याप्यवृत्तावेव प्रतियोगिवैयधिकरण्याघटितव्यापकताविरहेणतद्घटितव्यापकतायाः क्वचित्सत्त्वेन व्यभिचारात् । व्याप्यवृत्तित्वाविशेषिततद्घटितव्यापकत्वाभावेन तद्घटितव्यापकत्वाभावसाधनायोगादिति वदन्ति । तदयुक्तम् । तथाहि तदवच्छिन्नसामानाधिकरण्यरूपतद्धर्मावच्छिन्नव्याप्तिनिरूपकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकत्वमेवोपाधिघटकतया मूलाभिप्रेतमित्याशयेनैव प्रगल्भानां पक्षेतरातिव्याप्तिवारणसङ्गमनम्, अन्यथा पर्वतभेदादौ द्रव्यभेदादिसमानाधिकरणाभावाप्रतियोगित्वरूपतद्व्यापकत्ववति पर्वतादिविशेषणवैयर्थ्याद्व्यतिरेकव्याप्तिविरहेण व्यभिचाराद्व्यतिरेकव्याप्तिविरहेण तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपव्यापकत्वाभावसाधनासम्भवात् । पर्वतभेदादौ द्रव्यभेदादिसन्निष्ठात्यन्ताभावाप्रतियोगित्वसत्त्वेऽपि, गौरवात्, व्यर्थविशेषणघटितधर्मस्य साध्यसामानाधिकरण्यनिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वाभाववदुक्तव्याप्त्यनुरोधेन द्रव्यभेदत्वादौ तादृशपर्वतभेदादिसामानाधिकरण्यावच्छेदकत्वाभावोपगमेन दर्शितव्यभिचाररूपदोषस्योक्तव्यापकत्वाभावसाधने नावकाशः । तथा च संयोगादौ द्रव्यादिनिष्ठाभावप्रतियोगित्वसत्त्वेऽपि द्रव्यत्वत्वादेस्संयोगादिसामानाधिकरण्यावच्छेदकतया द्रव्यत्वत्वावच्छिन्नव्यापकत्वमक्षतमेवेति व्यापकेऽपि तद्विशेषणमर्थवत् ।

न चैवं व्यर्थविशेषणतया यत्र शरीराहेतुकत्वाभावस्तत्राहेतुकत्वाभाव इति व्यतिरेकव्याप्त्यसम्भवेऽपि उक्तव्याप्त्यनुरोधेन अहेतुकत्वे शरीराहेतुकत्वव्याप्यतावच्छेदकत्वानुपगमसम्भवादुक्तव्याप्तौ दीधितिकारवक्ष्यमाणव्यभिचारसङ्गतिरिति वाच्यम् । इह शरीराहे-

तुकमहेतुकत्वादित्यनुमाननिर्वाहायाहेतुकत्वत्वावच्छिन्नशरीराहेतुकत्वव्याप्तेरवश्योपेयत्वात् ।

न चैवमिदं पर्वतभिन्नं द्रव्यभेदादित्यनुमानानुरोधेन द्रव्यभेदत्वाद्यवच्छिन्नेऽपि पर्वतभेदादिव्याप्त्युपगम आवश्यक इति वाच्यम् । यः पर्वतस्तद्द्रव्यमित्यादिव्यतिरेकव्याप्तित एव तादृशानुमानसम्पत्तेः । इदं शरीराहेतुकमहेतुकत्वादित्यनुमानस्य च यच्छरीरहेतुकं तत्सहेतुकमिति व्यतिरेकव्याप्तेरपि शरीरविशेषणवैयर्थ्येन असम्भवेनानिर्वाहात् । धूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावत्वादेः वह्नित्वाद्यवच्छिन्नाभावसाधारणधूमत्वाद्याश्रयप्रतियोगिकाभावव्याप्यतावच्छेदकत्वं न सम्भवति शुद्धस्याभावत्वस्यैव तद्व्याप्यतावच्छेदकत्वसम्भवादिति व्यभिचारः स्यात्, अतस्तदाश्रयप्रतियोगिकाभावमुपेक्ष्य तदवच्छिन्नाभावप्रवेशनम् । व्याप्यताघटकसम्बन्धावच्छिन्नत्वेनापि तदवच्छिन्नप्रतियोगिता विशेषणीया, अन्यथा ऽन्यसम्बन्धावच्छिन्नाभावसाधारणतया धूमत्वाद्यवच्छिन्नाभावत्वस्य केवलान्वयितावच्छेदकतया तदवच्छिन्ननिरूपितवह्न्याद्यभावनिष्ठव्याप्यभावत्वेनैवावच्छेदेन व्यभिचारात् । वह्नित्वाद्यवच्छिन्नाभावसाधारणवह्नित्वाद्याश्रयप्रतियोगिकाभावत्वस्य धूमत्वाद्यवच्छिन्नाभावव्याप्यतानवच्छेदकतया व्यभिचारवारणाय स्वाश्रयप्रतियोगिताकत्वमुपेक्ष्य स्वावच्छिन्नप्रतियोगिताकत्वनिवेशनम् । तादृशप्रतियोगिता व्यापकताघटकसम्बन्धावच्छिन्नत्वेनापि विशेषणीया, तेन समवायादिसम्बन्धावच्छिन्नवह्न्याद्यभावस्य संयोगादिसम्बन्धावच्छिन्नधूमाद्यभावव्यभिचारित्वेऽपि न व्यभिचारः ।

अथोक्तव्यभिचारवारणाय द्रव्यभेदत्वादेः पर्वतभेदादिव्याप्यतानवच्छेदकत्वे गुणो द्रव्यभिन्नो घटान्यत्वादित्यादौ पर्वतभेदादेरनुपाधितापत्तिरिति चेन्न । बाधोन्नीतपक्षेतरत्ववत्तादृशोपाधेरप्यसङ्ग्रहदोषस्य तन्मते सत्त्वेन तद्वारणासम्भवात्, उक्तविशेषणपक्षेऽपि तदावश्यकत्वात् ।

इदमत्र चिन्त्यते । उक्तव्याप्तिस्वीकारे यत्र आर्द्रेन्धनाभावस्तत्र धूमाद्यभाव इति व्याप्तिर्न सम्भवति, व्यर्थविशेषणतया यत्र धूमाद्यभावाभावस्तत्रार्द्रेन्धनाभावाभाव इति व्यतिरेकव्याप्तेरसम्भवात् तथा च यत्र धूमस्तत्रार्द्रेन्धनमिति व्याप्त्यापि प्रस्थितम्; तद्व-

तिरेकयोर्व्याप्तिविरहादिति उपाधिमात्रोच्छेदस्स्यात्। यदि च व्यापकतावच्छेदकं यद्रूपं तदवच्छिन्नाभावत्वेन व्याप्यता न नियमे निवेश्यते अपि तु तदवच्छिन्नविरोधितावच्छेदकरूपेणैव उक्तस्थले आर्द्रेन्धनाभावव्यापकतावच्छेदकधूमाभावत्वावच्छिन्नाभावत्वेन अप्रसिद्धियारकधूमादिविशेषणघटितेन व्याप्यताविरहेऽपि धूमाभावत्वाद्यवच्छिन्नविरोधितावच्छेदकधूमत्वादिना आर्द्रेन्धनाद्यभावाभावादिव्याप्यतासत्त्वेनोक्तनियमभङ्ग इत्युच्यते तदा तादृशनियमस्य प्रकृतानुपयोगप्रसङ्गः पर्वतभेदत्वाद्यवच्छिन्नविरोधितावच्छेदकपर्वतत्वादिनिष्ठतद्व्यक्तित्वादिना साध्याभावव्याप्यताग्रहसम्भवेन पर्वतभेदत्वादौ व्यापकतानवच्छेदकत्वसाधकहेत्वसिद्धेः पूर्वोक्ताया दुर्वारत्वादिति।

व्यतिरेके व्याप्यभावात्। पक्षेतरत्वव्यतिरेकत्वावच्छिन्ने साध्याभावव्याप्यभावग्रहात्। अन्वयेऽपि न तथा। साध्यतावच्छेदकावच्छिन्ने पक्षेतरत्वव्याप्यभावग्रहः। पक्षेतरत्वाभावत्वे साध्याभावव्याप्यतानवच्छेदकत्वग्रहेण पक्षेतरत्वत्वे साध्याभावव्याप्यतानवच्छेदकत्वग्रहेण पक्षेतरत्वत्वे साध्याभावव्याप्यतावच्छेदकत्वावच्छिन्नाभावत्वकान्यतरत्वेन हेतुना साध्यतावच्छेदकावच्छिन्नव्याप्तिनिरूपकतानवच्छेदकत्वसाधनमिति फलितोऽर्थः। साध्याव्यापकत्वात्। पक्षेतरत्वत्वे साध्यव्यापकतावच्छेदकत्वाग्रहात्। नायमुपाधिः। नोक्तरूपावच्छिन्न उपाधिताग्रहविषयः। उक्तनियमानवधारणस्थले चोपाधिताग्रह इष्ट एवेत्याशयः। अहेतुकत्वेति। व्यर्थविशेषणतया व्यतिरेकव्याप्यसत्त्वेऽपि अहेतुकत्वे शरीराहेतुकत्वव्याप्तिमत्त्वेन उक्तनियमे व्यभिचारादित्यर्थः। अभ्युपेत्याह। एवमपीति। उक्तनियमसत्त्वेऽपीत्यर्थः। संयोगादाविति। अव्याप्यवृत्तावित्यर्थः। अतिव्याप्तितादवस्थ्यादिति। साध्यव्यापकत्वाभावसाधनासम्भवेनेत्यादिः। अव्याप्यवृत्तिनिरूपितायाः केवलान्वयिनिरूपितायाश्च व्यापकतायास्तदभावव्याप्यव्यतिरेकप्रतियोगित्वाव्याप्यत्वेन तदभावाप्रसिद्ध्या च तादृशप्रतियोगित्वाभावेन तदभावसाधनस्य व्याप्तिविरहेण साधनाप्रसिद्ध्या चासम्भवादिति भावः।

यद्यपि वाच्यत्वादौ केवलान्वयित्वनिश्चयदशायां व्यतिरेकित्व-

घटितसाधनाव्यापकतया गृह्यमाणे पक्षेतरत्वे न वाच्यत्वादिव्यापकताग्रहसम्भवः केवलान्वयिन्येन लिङ्गेन तत्र व्यतिरेकिणो व्यभिचारानिश्चयात्, तथापि तत्र साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयदशायां तत्रातिप्रसङ्ग इति बोध्यम् । व्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदकत्वे सति यो यः किञ्चिद्धर्मावच्छिन्नव्यापकतावच्छेदकः स यत्किञ्चिदभावव्याप्यतावच्छेदकस्वावच्छिन्नाभाववत्त्व इति व्याप्तिरुप्यते तदा नायं दोषः, संयोगादिव्यापकतावच्छेदकद्रव्यत्वत्वाद्यवच्छिन्नाभाववत्त्वस्य व्यर्थविशेषणतया संयोगाद्यभावव्याप्यतानवच्छेदकत्वेऽपि घटत्वाद्यभावव्याप्यतावच्छेदकतया व्याप्यदिशि व्याप्यवृत्तित्वानिवेशे क्षतिविरहात्, अव्याप्यवृत्तिव्यापकत्वाभावस्यापि व्यतिरेकव्याप्यभावेन साधनसम्भवात्, पक्षेतरत्वाभाववत्त्वस्य व्यर्थविशेषणतया केनचिदपि निरूपिते व्याप्यत्वे ऽवच्छेदकत्वाभावात्, वाच्यत्वाद्यभाववद्घटितसाधनाप्रसिद्धावपि सामान्यतो व्याप्यतावच्छेदकस्वावच्छिन्नाभाववत्त्वकत्वविरहेण वाच्यत्वादिव्यापकतावच्छेदकत्वाभावसाधनासम्भवादिति ध्येयम् ।

बाधोन्नीतपक्षेतरस्योपाधित्वानभ्युपगमेऽपि न प्रतीकारः, तथा सत्यपि व्यभिचारवारकस्यैव व्याप्तिग्रहौपयिकतया ऽप्रसिद्धिवारकस्यापि विशेषणस्य व्याप्यतावच्छेदके ऽवश्यं प्रवेशादुक्तरीत्या बाधोन्नीतपक्षेतरे ऽतिव्याप्तेर्दुर्वारत्वादित्याह मूले न चेष्टापत्तिरित्यादिना ।

(चि०) वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत् ? अस्तु तथा, तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वम्, तच्च तत्राप्यस्ति, अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत । विपक्षाव्यावर्तकविशेषणशून्यत्वं विशेषणम्, तेन बाधोन्नीतपक्षेतरस्य परिग्रहः, तत्र पक्षस्यैव विपक्षत्वात्, न तु पर्वततरत्वादेरिति चेन्न । न हि वस्तु विपक्षव्या-

यत्किञ्चिद्विशेषणशून्यम्, सर्वत्र प्रमेयत्वादेरसत्त्वात्। तत्रोपात्तेति विशेषणे सिद्धयसिद्धिव्याघातः ।

(दी०) वस्तुगत्येति। तथा च पक्षे साध्यवति तदितरत्वं साध्याव्यापकं तद्रहिते च बाधोन्नीतत्वादुपाधिरेवेति भावः । यद्विषयतया ज्ञानस्यानुमितिप्रतिबन्धकत्वं तदेव प्रकृते उपाधित्वं वाच्यं नान्यदनुपयुक्तत्वात्, तच्चेदुक्तं रूपं तदा तद्वत्तया पक्षेतरस्यापि ग्रहादनुमितिमात्रोच्छेद इत्यभिप्रायवानाह । अस्त्विति । उपाधिमात्रमिति। सत्प्रतिपक्षोन्नायकतया दूषकत्वमिति मते। इतरथा तु पक्षावृत्तेरुच्छेदो बोध्यः । विपक्षेति । विपक्षव्यावर्तकधर्मान्तरावच्छिन्नपक्षेतरत्ववारणाय निषेधद्वयगर्भता ।

(गा०) पक्षेतरेऽतिव्याप्तिरिति ग्रन्थस्य ज्ञानातिव्याप्तिपरत्वेऽपि वस्त्वतिव्याप्तिपरत्वाभिमानेन मूलं वस्तुगत्येत्यादिशङ्का। तत्र पर्वतो वह्निमान् धूमादित्यादौ पक्षेतरस्यालक्ष्यतया नाव्याप्तिरित्यभिप्रायप्रकाशमन्तरेण दोषोद्धारो न स्फुटीभवतीति शब्दतो लक्ष्ये बाधोन्नीतपक्षेतरत्वे वास्तवसाध्यव्यापकत्वघटितलक्षणसत्त्वमात्रलाभेऽपि पक्षविशेषे तादृशलक्षणसत्ताकथनादपरे तद्व्यवच्छेदलाभो व्युत्पत्तिसिद्ध इत्यर्थत औत्सर्गिकं तादृशाभिप्रायं प्रकाशयति दीधितिकृत्। तथा चेति।

अत्र स्वाभिप्रायं प्रकाशयन् उक्तातिव्याप्तिं सङ्क्रमयति मूले अस्तु तथेति। तथा। अलक्ष्ये पक्षेतरत्वे वस्तुतस्साध्यव्यापकताघटितलक्षणासत्त्वम्। पक्षातिरिक्ते। साध्यवत्तया निश्चिते। उपाधिव्यतिरेकाग्रहमात्रेणेति शेषः । साध्यव्यापकताग्रहादिति । साध्यसंशयविषये उपाधिव्यतिरेकग्रहस्य व्यभिचारसंशयरूपतया तस्य च व्यापकताग्रहाविरोधित्वोपगमेन तद्ग्रहसम्भवादित्यर्थः। उपाधेः। व्यभिचारहेतुकवास्तवोपाधेः । अनुमितिविरोधित्वम् । तत्रापि। पक्षेतरत्वेऽपि।

ननु पक्षेतरत्वस्य साध्यव्यापकताभ्रमकाले दूषकत्वापत्तावपि ज्ञानागर्भस्योक्तविशेषणधर्मस्य वस्त्वतिव्याप्तिविरहेणेतरभेदा-

नुमापकत्वरूपलक्षणत्वं दुरुपपादमेवेत्याशङ्कां निराचिकीर्षुः अस्त्वित्यादेर्मार्गमाविष्कुरुते दीधितौ । यद्विषयतयेति । यद्रूपवत्तया । यद्धर्मविशिष्टविषयकत्वेन । ज्ञानस्य । उपाधितावज्ञानस्य । अनुमितिप्रतिबन्धकत्वम् । तत्प्रतिबन्धकज्ञानसम्पादकत्वम् । तदेवोपाधित्वम् । तान्त्रिकोपाधिव्यवहारविषयतावच्छेदक तद्रूपमेव । प्रकृते वाच्यम् । प्रकृतनिरुक्तिविषयः । अन्यत् । इतरभेदानुमापकम् । अनुपयुक्तत्वात् । अजिज्ञासितत्वात् । तच्चेदुक्त रूपमिति । उक्तम् । साध्यव्यापकत्वे सतीत्यादिकं यदि तदनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमित्यर्थः । ग्रहात् । प्रायशो ग्रहसम्भवात् । अनुमितिमात्रोच्छेदः । स्वार्थस्थले प्रायशः परार्थस्थले सर्वथैवानुमितेरुच्छेदप्रसङ्गः ।

मूले साध्यसन्देहात् । साध्यसंशयरूपव्यभिचारज्ञानात् । अनुपाधित्वे । पक्षवृत्त्यभावप्रतियोगितया गृह्यमाणे उपाधित्वघटकसाध्यव्यापकत्वाग्रहे ।

ननु उपाधिमात्रमुच्छिद्येत इति मूलमसङ्गतम्, पर्वतो धूमवान्वह्नेरित्यादौ व्यभिचारोन्नायकार्द्रेन्धनाद्युपाधौ सन्देहविषयपर्वतादिरूपपक्षानिश्चितव्यतिरेके साध्यव्यापकताग्रहसम्भवेनोपाधित्वग्रहानुच्छेदादित्यत आह दीधितौ । उपाधिमात्रमितीति । सत्प्रतिपक्षोन्नायकतयेति । तथा चोपाधिमात्रस्य दूषकतोच्छेद इति मूलार्थः । उपाधिव्यवहारबीजदूषकताबीजस्य पक्षावृत्तित्वनियतस्य तन्मते उक्तोपाधावसत्त्वेन तत्र साध्यव्यापकताग्रहसम्भवेऽपि तन्मङ्गति, व्यभिचारोन्नायकतयोपाधेर्दूषकत्वेऽप्युपाधिपदस्य तद्विशेषपरतया तत्सङ्गतिरित्याहुः । इतरथा इवेति । पक्षावृत्तेः । पक्षनिष्ठाभावप्रतियोगितया गृह्यमाणमात्रस्य ।

विपक्षाव्यावर्तकविशेषणशून्यत्वं विशेषणमिति मूलम् । विपक्षात् । साध्याभाववतः । स्वविशेष्यतावच्छेदकावच्छिन्नव्यावर्तक यत्तदन्यविशेषणशून्यत्वमुपाधिलक्षणे निवेशनीयमित्यर्थः । तथा च पर्वतभेदपर्वतनिष्ठभेदप्रतियोगित्वादौ नातिप्रसङ्गः, तत्र प्रविष्टस्य भेदप्रतियोगित्वादिरूपविशेष्ये पर्वतनिष्ठभेदादिरूपविशेषणस्य ह्रदादिरूपविपक्षात् स्वविशेष्यतावच्छेदकभेदत्वप्रतियोगित्वाद्यवच्छिन्नव्यावर्तकत्वात्, तद्विशेषणानवच्छिन्नस्यैव त-

द्विशेषणावच्छिन्नस्यापि भेदत्वाद्यवच्छिन्नस्य ह्रदादिरूपविपक्षवृत्तित्वादिति भावः। विपक्षात्स्वविशेष्यतावच्छेदकावच्छिन्नव्यावर्तकत्वं च स्वविशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नाभाववद्विपक्षकत्वम्, पर्वतादिरूपविशेषणविशिष्टभेदत्वाद्यवच्छिन्नाभाववत्तया विपक्षे सत्त्वात् पर्वतादिरूपविशेषणस्य न विपक्षव्यावर्तकता।

अथैवमपि पर्वतावृत्तित्वपर्वतान्यवृत्तित्वादिविशेषणविशिष्टवह्न्यादेः पर्वतपक्षकवह्न्यादिसाध्यकोपाधितापत्तिर्दुर्वारैव, तादृशविशेषणस्य वह्नित्वाद्यवच्छिन्ने विपक्षव्यावर्त्तकत्वात्।

न च स्वप्रतियोगितावच्छेदकस्य यादृशविशेषणघटितत्वप्रयुक्तं विशिष्टाभावस्य विपक्षवृत्तित्वं तादृशत्वमेव विशेषणस्य विपक्षव्यावर्त्तकत्वम्, पर्वतावृत्तित्वादिविशेषणविशिष्टवह्न्यभावस्य विपक्षवृत्तित्वे च तादृशाभावप्रतियोगितावच्छेदकस्य वह्नित्वादिघटितत्वमेव प्रयोजकं न तु पर्वतावृत्तित्वादिविशेषणम्, वह्न्यादिपरित्यागेन तद्विशिष्टस्य विपक्षे सत्त्वादिति वाच्यम्। प्रयुक्तत्वस्य दुर्वचत्वात्।

न च स्वविशेष्यतावच्छेदकावच्छिन्नाधिकरणीभूतविपक्षवृत्तिस्वविशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नाभावकत्वमेव स्वस्य विपक्षव्यावर्त्तकत्वम्, पर्वतावृत्तित्वादिविशेष्यतावच्छेदकवह्नित्वाद्यवच्छिन्नाधिकरणत्वस्य विपक्षेऽसत्त्वात्तादृशविशेषणविशिष्टवह्नित्वावच्छिन्नाभावस्य विपक्षवृत्तित्वेऽपि न तस्य विपक्षव्यावर्त्तकतेति वाच्यम्। घटाद्यन्तरवति विपक्षे पर्वतीयघटात्यन्ताभावसत्त्वेन पर्वतभेदादावतिव्याप्तेर्वारयितुमशक्यत्वात्। प्रकृतोपाधिप्रविष्टस्य विशेष्यतावच्छेदकस्य विपक्षेण च यादृशोपाधिप्रविष्टविशेष्यतावच्छेदकं न किञ्चिद्विपक्षवृत्तितावच्छेदकं तद्विशिष्टाधिकरणविपक्षाप्रसिद्ध्या तादृशोपाधावव्याप्तिरिति चेन्न। स्वविशेष्यतावच्छेदकतद्धर्मावच्छिन्नाधिकरणविपक्षवृत्तिस्वविशिष्टतद्धर्मावच्छिन्नाभावकं यद्यत्स्वं तदन्यविशेषणविशेष्यतावच्छेदकतापन्नतद्धर्मघटितत्वेनोपाधितावच्छेदकविवक्षितस्य विशेषणीयतया सामञ्जस्यात्। उक्तरीत्या पर्वतादिविशेषणस्य घटत्वावच्छिन्ने विपक्षव्यावर्तकत्वेऽपि भेदत्वाद्यवच्छिन्ने ऽनधात्वात् भेदरूपविशेष्यतावच्छेदकावच्छिन्नस्य व्यापकं ह्रदादेव, तदन्यपर्वतरूपविशेषणविशेष्यतावच्छेदकतापन्नभेदत्वादिघटिते पर्वतभेदादौ नातिव्याप्तिः। वह्न्यादि-

विशिष्टपर्वतभेदाद्यभावस्य विपक्षवृत्तितया भेदत्वाद्यवच्छिन्ने पर्वतादेर्विशेषणस्य विपक्षव्यावर्त्तकत्वं नाशङ्कनीयम्, स्वाविशिष्टतद्धर्मावच्छिन्नाभाव इत्यत्र स्वविशिष्टतद्धर्मपर्याप्तप्रतियोगितावच्छेदकताकाभावस्य विवक्षणीयत्वात्। आर्द्रत्वादिविशेषणस्य इन्धनत्वादिरूपविशेष्यतावच्छेदकावच्छिन्ने विपक्षाव्यावर्त्तकत्वाभावात् तादृशविशेषणविशेष्यतावच्छेदकेन्धनत्वादिघटिते आर्द्रेन्धनाद्युपाधौ लक्षणसमन्वयः।

न चैवं धूमवान्वह्नेरित्यादौ धूमवद्भेदाभावस्य अनुपाधिताप्रसङ्गः, भेदत्वाद्यवच्छिन्नविशेषणतया तद्घटकस्य धूमवदादिविशेषणस्य भेदत्वादिरूपविशेष्यतावच्छेदकावच्छिन्ने विपक्षाव्यावर्त्तकत्वादिति वाच्यम्। विपक्षाव्यावर्तकविशेषणविशेष्यतावच्छेदकतापन्नधर्मस्य इतरविशेषणतानवच्छेदकतया तद्घटकत्वस्य विवक्षणीयत्वात्, उक्तोपाधिशरीरे च धूमवद्विशेष्यतावच्छेदकतापन्नभेदत्वादेः तदभावादिविशेषणतावच्छेदकतयैव प्रवेशात्। एवं पर्वतभेदादेस्तद्व्यक्तित्वादिना उपाधितावारणाय विपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वेनाप्युपाधिनावच्छेदक विशेषणीयम्। तादृशविशेषणेन पर्वतभेदत्वाद्यवच्छिन्नस्योपाधितावारणसम्भवेऽपि पर्वतभेदविशिष्टह्रदभेदादिवारणाय निरुक्तविपक्षाव्यावर्त्तकविशेषणशून्यत्वनिवेशनमिति ध्येयम्। एवं सति पक्षभेदस्य विपक्षह्रदादिभेदाविशिष्टतद्व्यक्तित्वेन विपक्षह्रदादिभेदविशिष्टभेदत्वेन वोपाधिताप्रसङ्गः, एतद्विशेषणेऽपि अणवः सकर्तृकाः कार्यत्वादित्यादौ अनणुत्वादेस्तत्प्रसङ्गवत्, तथापि लक्षणमतिव्यापकमेवेत्यग्रिममूलतात्पर्यविषयतया न क्षतिमावहति।

विपक्षव्यावर्त्तकविशेषणवत्त्वस्य विपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वपर्यवसितस्योपाधितावच्छेदकविशेषणत्वं किमुपेक्षितमित्याशङ्कां निराकुरुते दीधितौ विपक्षव्यावर्त्तकधर्मान्तरावच्छिन्नेति। विपक्षावृत्तिसाध्यादिविशिष्टेत्यर्थः।

उक्तविशेषणस्य पूर्वविशेषणवत् बाधोन्नीतपक्षेतरव्यावर्तकता तत्रापि तत्सत्त्वादित्याह मूले तेनेति। तेन। उक्तविशेषणेन। बाधोन्नीतपक्षेतरस्येत्यनन्तरमपि पूरणीयः। परिग्रहः। आक्रमणम्, स्वाश्रयीकरणमिति यावत्। तदेतत्स्फुटयति। तत्रेति। तत्र। बाधस्थले।

पक्षस्येति । विशेषणतया स्वस्मात्स्वभेदव्यावर्त्तकस्येत्यादिः । पर्वततरत्वादेरिति । वह्न्यादिसाध्यकस्थले इत्यादिः । परिग्रह इत्यनुपज्यते । तत्र पक्षस्य साध्यवत्तया विपक्षत्वाभावादिति भावः । तादृशविशेषणाभाववत्त्वमुपाधौ विशेषणतयाऽभिमतमित्यभिमानेन दूषयति । न हीति । यस्तु किमपीति शापः । तत्रोपाधेति । प्रकृतोपाधितावच्छेदकानिविष्टेत्यर्थः ।

(चि०) तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति तद्व्यावृत्त्या पक्षे साध्यव्यावृत्तिरतो हेतोर्व्यभिचार एव, व्यभिचारे चावश्यमुपाधिरिति पक्षेतर एव तत्रोपाधिः स्यात् । तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम् । अत एवानुमानमात्रोच्छेदकतया जातित्वान्न पक्षेतर उपाधिरित्यपास्तम् । दूषणसमर्थत्वेन जातित्वाभावात् । एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम्, उपाधित्वाभावेऽपि दूषणसमर्थत्वात् ।

(दी०) विपक्षाव्यावर्तकविशेषणानवच्छिन्नसाध्यव्यापकत्वसाधनाव्यापकत्वशालित्वं तद्विवक्षितमित्याशङ्क्य पक्षेतरत्वस्योपाधित्वमनङ्गीकुर्वतस्तत्र मते नातिव्याप्तिरभिहिता । वस्तुतो दूषकताप्रयोजकरूपवतस्तस्यानुपाधित्वाभ्युपगमः तद्वारणाय च विशेषणोपादानं द्वयमपि न युक्तमित्यभिप्रायवानाह । तथापीति । तावन्मात्रस्य । साध्यव्यतिरेकोन्नयनक्षमसाध्यव्यापकतामात्रस्य । दूषकत्वात् । दोषोन्नयनोपयोगित्वात् । जातित्वादिति । त्वदुत्तरस्येत्यादिः । उपाधित्वाभावेऽपीति । उपाधित्वानङ्गीकारेऽपीत्यर्थः ।

(गा०) अभिमाननिराकरणेनोक्तदूषणमुद्धृत्य तथापीत्यादिदोषम-

घटारयति दीधितौ । विपक्षाद्व्यावर्तकेति । विपक्षाद्व्यावर्तकविशेषणघटितधर्मानवच्छिन्नसाध्यव्यापकतेत्यर्थः । तादृशविशेषणाघटिततद्धर्मावच्छिन्नसाध्यव्यापकताशालित्वं तेन रूपेण उपाधित्वमिति यावत् । इत्याशङ्क्येति । आहेत्यग्रिमेणान्वयः । प्रथमं पक्षेतरेऽतिव्याप्तिमुद्भावयतः पूर्वपक्षिणस्तथापीत्यादिना तस्य लक्ष्यत्वस्वीकारो विरुध्यत इत्याशङ्कां निराचिकीर्षुः तस्याशयं प्रकाशयति पक्षेतरत्वस्येत्यादिना । तत्र । सिद्धान्तिनः । तद्वारणाय । उपाधित्ववारणाय ।

मूले तथापीति । विशेषणान्तरप्रवेशेन तत्र कथञ्चिदुपाधित्ववारणसम्भवेऽपीत्यर्थः । व्यापकत्वाव्यापकत्वे इति तज्ज्ञानपरम् । तत्र । पक्षेतरत्वे । स्तः । सम्भवतः । तद्व्यावृत्त्या । तदभावेन हेतुना । पक्ष इति । साधनवतीत्यर्थः । साध्यव्यावृत्तिः । साध्याभावसिद्धिसम्भवः । अतो हेतोर्व्यभिचार एव । हेतौ साध्यव्यभिचारग्रहो भवत्येव । व्यभिचारे च । स्वस्य व्यभिचारोन्नायकत्वे च सति । अवश्यमुपाधिः । अवश्यमुपाधित्वेन ज्ञाप्यः । पक्षेतर एवोपाधिः स्यात् । पक्षेतरः उपाधिः स्यादेव । अत इति पूरणीयम्, तेन व्यर्थविशेषणमित्यग्रिमस्यान्वयः । अत एव दूषकत्वाच्चेत्यग्रिमचकारसङ्गतिः ।

ननु व्यापकत्वादिभ्रमेण व्यभिचारानुमापकत्वेऽपि यथा घटादेर्नोपाधित्वं तथा पक्षेतरस्यापीति न तद्वारकविशेषणदानानौचित्यम् ।

न च घटादेरपि साध्यव्यापकत्वादिग्रहदशायां उपाधित्वमिष्टमेव, वास्तवसाध्यव्यापकत्वादिघटितलक्षणेन तदसङ्ग्रहेऽपि साध्यव्यापकत्वादिना ज्ञायमानः उपाधिरित्येव लक्षणं तत्सङ्ग्रहानुरोधेन क्रियताम्, भवतु चोपाधिः ज्ञानघटिततया सत्प्रतिपक्षादिवदनित्यदोषः, एवं च पक्षेतरस्य सर्वत्रैव साध्यव्यापकत्वादिज्ञानविषयतया उपाधित्वमुचितमिति पूर्वपक्षिणोऽभिप्राय इति वाच्यम् । एवं सति पर्वतो वह्निमानित्यादावपि पक्षादौ साध्याभावादिभ्रमेणानुमितिप्रतिबन्धात्पक्षादौ ज्ञायमानसाध्याभावादेरेव बाधत्वाद्बाधादेरप्यनित्यदोषत्वप्रसङ्गात् इति पूर्वानुशयेन दर्शितविशेषणस्यानुमितिविरोधिधीविषयतावच्छेदकरूपघटकत्वासम्भवेनापि विशेषणत्वानुपयुक्तत्वरूपदोषमाह । तावन्मात्रस्येति ।

दीधितौ साध्यव्यतिरेकोन्नयनक्षमेति । स्वव्यतिरेकस्य साधनवति पक्षे वा साध्यव्यतिरेकोन्नायकतानिर्वाहकेत्यर्थः । सत्प्रति-

पक्षसम्पादके पक्षे साध्यव्यतिरेकोन्नयनयोग्यत्वे साधनाव्यापकत्वांशानुपयोगात् प्रकान्तमपि तदंशं विशिष्यानुपादाय साध्यव्यापकतामात्रस्येत्युक्तम् । मानपदेनोक्तविशेषणस्यैव व्यभिचाराद्युन्नयनोपयोगिताव्यवच्छेदः । व्यभिचारोन्नयने साधनाव्यापकतायाः सत्प्रतिपक्षोन्नयने च पक्षावृत्तिताया उपयोगात्तद्व्यवच्छेदायोगात्साध्यव्यापकत्वेनान्यतरसहितेव्यापकताया विवक्षणीयत्वात् । दूषकत्वादित्यनेन स्वतो दूषकत्वविवक्षासम्भवात् । तदर्थमाह । दोषान्नयनेति । व्यभिचारसत्प्रतिपक्षान्यतरोन्नयनेत्यर्थः । व्यभिचारस्योन्नयनं तदनुमितिः, सत्प्रतिपक्षोन्नयनं च साध्यानुमितिप्रतिरोधप्रयोजकसाध्यव्यापकाभाववत्ताज्ञानसम्पादनम् ।

मूले अनुमानमात्रोच्छेदकतयेति । सर्वत्रैवानुमाने पक्षेतरस्योपाधितयोद्भावनसम्भवात् पक्षेतरत्वव्यभिचारेण साध्यव्यभिचारानुमानमपि न सम्भवतीति दूषणसमर्थत्वेनेत्यर्थः । अनुमानपदं परार्थानुमानपरम्, स्वार्थानुमाने सर्वत्र पक्षेतरत्वे साध्यव्यापकताग्राहकसामग्र्या नियतत्वाभावेन अनुमानमात्रोच्छेदासम्भवात् ।

दूषणासमर्थमुत्तरं जातिरिति जातिलक्षणादुत्तरस्यैव जातित्वं न तु पक्षेतरोपाधेरिति मूलासङ्गतेर्वारणाय पूरयति दीधितौ । स्वदुत्तरस्येति ।

मूले न पक्षेतर उपाधिरिति । जात्युत्तरकान्यस्यालक्ष्यताप्रयोजकत्वादिति शेषः । तथा च तद्व्यावर्त्तनाय विशेषणदानमुचितमेवेति भावः । अत एवेत्यनेनोक्तमुपाधिताहेतुं विवृणोति । दूषणसमर्थत्वेनेति । उक्तयुक्त्या व्यभिचाराद्यननुमापकत्वेऽपि पक्षे साध्यव्यापकाभावज्ञानसम्पादनेन साध्यानुमितिप्रतिरोधसमर्थत्वेनेत्यर्थः । प्रकारान्तरम् । विशेषणान्तरनिवेशनम् । तच्च बाधोन्नीतपक्षेतरभिन्नत्वम् ।

पक्षेतरस्य लक्ष्यताव्यवस्थापनदशायां उपाधित्वाभावेऽपीति कथनासङ्गतेस्तदर्थमाह दीधितौ । उपाधित्वानङ्गीकारेऽपीति । भवतेत्यादिः ।

(दी०) अथोपाधिस्स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया दूषणम् ? पक्षेतरत्वव्यतिरेकश्च न सा-

र्धाभावसाधकोऽसाधारणत्वात्, न तु व्यभिचारोन्नायकतया दूषणम् । यथा हि साध्यव्यापकोपाध्यव्याप्यतया हेतोस्साध्याव्याप्यत्वं तथा साध्यव्याप्यहेत्वव्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिद्ध्येत्, व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगमकाविरहात् । तस्माद्यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापकोपाधिव्यावृत्त्या साध्याभावोऽपि साधनीयो व्याप्तिग्रहतौल्यादिति दूषकताबीजं सोऽयं सत्प्रतिपक्ष एवेति । मैवम् । एवं हि सत्प्रतिपक्ष उपाध्युद्भावनं न स्यात्, सत्प्रतिपक्षान्तरवत् । किञ्च एवं बाधोन्नीतोऽपि पक्षेतरो नोपाधिस्स्यात्, व्यतिरेके ऽसाधारण्यात् ।

(दी०) दूषकताबीजसत्त्वे तस्योपाधित्वं दूषकताबीजं च न व्यभिचारादेरुन्नायकत्वमपि तु सत्प्रतिपक्षस्य तच्च तत्र नास्तीत्यतो न स उपाधिरिति शङ्कते अथेति । व्यभिचारोन्नायकतया । व्यभिचाराद्युन्नायकतया । अव्याप्यतया । अव्याप्यत्वादिना । अव्याप्यत्वम् । अव्याप्यत्वादि । सत्प्रतिपक्षान्तरवदिति । व्याप्तिपक्षधर्मतारूपबलसत्त्वेनैकेनापि बहूनां प्रतिरोधसम्भवात्, बहुत्वस्याबलत्वात् । यत्तु प्रमाणतत्त्वबोधादौ बहुत्वमपि बलमुक्तम्, तन्न सत्प्रतिपक्षतायां, किन्त्वेकत्राङ्गभङ्गप्रसङ्गे । बहुषु तत्कल्पनागौरवं एकत्र च लाघवमिति तर्कोत्थापकतयेति नोपाधेस्सत्प्रतिपक्षोत्थापकतया तत्र दूषणत्वसम्भव इति भावः । एवम् । सत्प्रतिपक्षोन्नायकतया दूषकत्वे ।

(गा०) व्यभिचाराद्युन्नायकत्वस्य दूषकताबीजत्वनिराकरणेन सत्प्रतिपक्षोन्नायकत्वस्य तथात्वं व्यवस्थाप्य तस्य पक्षेतरत्वे ऽस-

तत्कथन । विशेषणान्तरौचित्यप्रयोजकतदलक्ष्यतानिर्वाहकतया प्रकृते उपयोजयितु अथेत्यादिमूलतात्पर्यं सङ्क्षेपेण प्रदर्शयति । दूषकता बीजसत्त्वे इति । न व्यभिचारादेरुन्नायकत्वमिति । येन पक्षेतर-व्यभिचारादिना साधने असाधारण्यादिदोषविरहेण सोऽपि लक्ष्य-मस्यादिति शेष । थादिना अव्यभिचारविशिष्टसाध्यसामानाधिक रण्यग्राहकव्यभिचारपरिग्रहः । तदुन्नायकतया दूषकताबीजत्वेऽपि पक्षेतरालक्ष्यत्वानिर्वाहात् । उन्नायकत्वम् । अनुमापकव्यभिचारादि-प्रतियोगित्वम् । सत्प्रतिपक्षस्येति । साध्यानुमितिप्रतिरोधस्येत्यर्थः । अत्रानुपपद्यमानस्य उन्नायकत्वमित्यस्य प्रयोजकव्यतिरेकप्रतियो-गित्वमर्थः । तद्व्यतिरेकेण सत्प्रतिपक्षोत्थापकतयेति मूलस्यापि प्रतिरोधप्रयोजकस्वव्यतिरेकतयेत्येवार्थः । तच्च । सत्प्रतिपक्षोत्था-पकत्वं च । तत्र । पक्षान्तरे । न स उपाधिरित्युपलक्षणम्, व्यतिरेके ऽसाधारण्याभावनिर्वाहकविपक्षाव्यावर्त्तकविशेषणशून्यत्वविनिर्मु-क्तसाध्यव्यापकत्वस्य न दोषान्नयनोपयोगित्वमित्यपि बोध्यम्, तेन साधनमात्रस्येत्यादिदूषणोद्धारः । अव्याप्यत्वोन्नायकतया अप्रतिक्षेपे न्यूनता स्यादिति तत्सङ्ग्राहकादिपदमन्तर्भाव्य व्याचष्टे । व्यभिचा-रेति । व्यभिचारोन्नायकतया अदूषणत्वस्यापि प्रकृतत्वात्तद्व्यव-स्थापनेन न्यूनतां परिहर्तुं साध्यव्यापकोपाध्यव्याप्यतयेत्यादौ व्यभिचारपरिग्राहकमादिपदमन्तर्भावयति अव्याप्यतयेत्यादिना ।

साध्याव्याप्यत्वमिति मूले संग्रहीतुमर्हतीति शेषः । व्याप्तिग्राहक-स्य । व्यभिचारनिश्चयविरहसहकृतसहचारदर्शनस्य । उभयत्र । सा-ध्योपाध्योर्हेतुसाध्ययोश्च । विनिगमकाविरहादिति ।. तथा च हेतौ साध्यस्य व्यभिचारादिसाधनाय परोद्भावितोपाधौ वादिनोक्तहेतुना साध्यव्यापकत्वे साधयितुमारब्धे व्यभिचाराद्यनुमापकव्याप्तेरनि-श्चयात् न व्यभिचारानुमाननिर्वाह इति भावः । व्याप्तिग्रहविरोधिव्य-भिचारज्ञानस्य गृहीतायां व्याप्तौ अनुपयोगाद्व्याप्तावगृहीतायां यत्रो-पाधौ साध्यव्यापकताग्रहस्तत्रैव व्यभिचारोन्नायकतयोपाधेर्दूषक-त्वाङ्गीकारात् स्वार्थस्थले व्यभिचारोन्नायकत्व सम्भवतीति परा-र्थानुमानाभिप्रायकतया दर्शितम् । अत एवाग्रे साधनीयमित्याद्यु-क्तिः साधु सङ्गच्छते । साधनीयम । वादिना साधनीयम । व्याप्ति-ग्रहेति । व्याप्तिग्रहसामग्रीत्यर्थः । सोऽयम् प्रकारः । सत्प्रतिपक्ष एव ।

प्रतिरोधसम्पादनरूप एव । तथा च पक्षेतरव्यतिरेको ऽसाधारण्यदोषदुष्टतया निग्रहभयेन परणोद्भावयितुं न शक्यत इति तेन न प्रतिरोधसम्भव इति नासावुपाधिरिति भावः । एवं हीति । सत्प्रतिपक्षोन्नायकत्वस्यैव दूषकताबीजत्वे इत्यर्थः । उपाध्युद्भावनम् न स्यात् । नोपयुज्येत । तत्साधनीयस्य साध्याभावाभावरूपसाध्यस्य साधनाय प्रयुक्तात् प्रथमहेतोरेव प्रतिहेतोर्विरुद्धत्वादिति भावः । सत्प्रतिपक्षान्तरवदिति । प्रतिहेतुदूषणाय प्रकृतसाध्यसाधकहेत्वन्तरस्य यथा वादिना नोद्भावनं पूर्वोपन्यस्तहेतुनैव तत्कार्यप्रतिरोधादित्यर्थः ।

ननु पूर्वोपन्यस्तहेतोर्हेत्वन्तरसाहित्यरूपाधिकबलनानिर्वाहाय उपाधेः सत्प्रतिपक्षान्तरस्य च उद्भावनं युज्यत एवेत्यत आह दीधितौ । व्याप्तिपक्षधर्मतारूपबलेति । एकेनापि हेतुना बहूनां हेतूनां कार्यस्य प्रतिरोधसम्भवात् प्राचीनग्रन्थे हेतुबहुत्वस्य बलत्वोक्तिविरोधं परिहरति । यत्त्विति । बहुत्वमपि बलमिति यदुक्तमित्यन्वयः । उक्तमिति । उपायहृदुक्तमित्यर्थः । सत्प्रतिपक्षतायामिति । विरोधितयेति शेषः । एकत्राङ्गभङ्गप्रसङ्ग इति । एकसाध्यसाधकहेतुविषयकव्याप्तिपक्षधर्मताज्ञानप्रामाण्यस्य अनयोरेकतरं बाध्यमित्याद्यनुमानेन सामान्यतस्साधन इत्यर्थः । इति तर्कोत्थापकतयेति । विशेषपर्यवसानसम्पादकतादृशप्रतिसन्धानसम्पादकतयेत्यर्थः । बहुत्वं बलमुक्तमित्यनुपपद्यते ।

न चैवं तादृशतर्कावतारार्थमेव सत्प्रतिपक्षे उपाधेः प्रतिपक्षान्तरस्य चोद्भावनमुपयुज्यतामिति वाच्यम् । तावतापि अनयोः कस्य बाध्यता कस्य बाध्यतामित्याकाङ्क्षामन्तरेणाप्युपाधेः प्रतिहेतौ तान्त्रिकैरुद्भावनस्यानुपपत्तेः । किञ्चेत्यनन्तरमेवमिति मूलं गृहन् व्याचष्टे । एवमिति ।

(चि०) ननु बाधे नोपाधिनियमः, धूमेन ह्रदे वह्निसाधने तदभावात्, न तु ह्रेतुमनि पक्षे बाधे पक्षेतरोपाधिनियमः, प्रत्यक्षे वह्नौ कृतकत्वेनानुष्णत्वे साध्येऽतेजस्त्वादेरुपाधिस्यसम्भवदिति चेन्न । तेजोमात्रपक्षत्वे ऽतेजस्त्वं विना ऽन्यस्योपाधेरभावात् ।

(दी०) बाधस्यानिश्चये ऽसाधारण्यान्निश्चये च वैयर्थ्यान्मा भूत्सोऽप्युपाधिरित्यभिप्रायेण शङ्कते । नन्विति ।

हेतुमतीति । न चासङ्कीर्णबाधस्थले व्यभिचारः, प्रतियोगिव्यधिकरणसाध्याभावस्यैव प्रकृते बाधत्वात् तदनभ्युपगमाद्वा । अतेजस्त्वं विनेति । तत्समशीलं विना शुद्धसाध्यव्यापकस्योपाधेरभावादित्यर्थः । तेन भास्वररूपशून्यत्वादे रूपवत्त्वावच्छिन्नसाध्यव्यापकगुरुत्वादेश्च सत्त्वेऽप्यदोषः ।

(गा०) ननु नोपाधिः स्यादित्यत्र हेतुतया उक्त व्यतिरेके ऽसाधारण्यादित्यसङ्गतम्, वह्न्यावनुष्णत्वबाधावतारे तस्य विपक्षतया वह्नीतरत्वव्यतिरेकस्य विपक्षव्यावृत्तत्वाभावादित्यतो बाधावतारदशाभिप्रायकतया तत्सङ्गमयितुं पूरयति । बाधस्येति । न्यूनताभङ्गाय बाधावतारस्थले वह्न्यादीतरत्वस्योपाधितया दूषकत्वं पूरणेन निराकुरुते । निश्चये चेति । बाधस्येत्यनुषज्यते । वैयर्थ्यादिति । साध्याभावस्यानिश्चिततया तत्साधकोपाधेर्निष्फलत्वादित्यर्थः ।

नन्वित्यादिमूले बाधे उपाधिनियमखण्डनस्य बाधोन्नीतपक्षेतरत्वानुपाधितापत्तिरूपदूषणसमाधानतामुपपादयति । मा भूत्सोऽप्युपाधिरिति । तस्यानुपाधित्वमिष्टमेवेति न तदापत्तिसम्भव इत्यर्थः । एवं च नोपाधिर्नियम इति मूलस्य येन तन्नियमरक्षायै वह्नीतरत्वादेरुपाधित्वमावश्यक स्यादिति शेषः ।

मूले हेतुमति पक्षे बाध इति । बाधितसाध्यकपक्षवृत्तिहेतावित्यर्थः । पक्षेतरेति नियमे नान्तर्भावनीयम् । पक्षतावच्छेदकावच्छिन्नभेदात्मकातेजस्त्वादिरूपोपाधिमादाय नियमस्य अग्रे निर्वाह्यत्वात् ।

बाधहेत्वाभाससत्त्वादिति पक्षवृत्तिहेतौ सोपाधित्वनियम इति मूलाभिप्रायेण शङ्कते दीधितौ । न चेति । व्यभिचारेणासङ्कीर्णो यत्र बाधहेत्वाभासः पक्षतावच्छेदकावच्छेदेन साध्यासिद्धिविरोधी तदवच्छेदेन साध्याभाववत्त्वरूपः तादृशे गन्धप्रागभावादिविशिष्टघटादिपक्षकगन्धादिसाध्यकपृथिवीत्वादिहेतावित्यर्थः ।

व्यभिचार इति । तादृशहेतोस्साध्यव्याप्यतया उपाधेर्व्यभिचारोन्नायकतया दूषकतामभ्युपगच्छत उक्तनियमवादिनो मते साधनाव्यापकत्वस्योपाधिलक्षणे ऽवश्यं प्रवेशात्तादृशलक्षणाक्रान्तस्य उपाधेस्तत्रासम्भवादिति भावः । प्रकृते बाधत्वादिति । बाधपदेन प्रकृते विवक्षणादित्यर्थः । तथा च तादृशसाध्याभाववत्पक्षवृत्तिहेतोस्सोपाधित्वनियम इति मूलार्थः । उक्तस्थले च पक्षे न तादृशसाध्याभाव इति न व्यभिचार इति भावः । सर्वत्र पक्षतावच्छेदकसामानाधिकरण्येनैवानुमितिस्साध्यमवगाहते इत्यबाधलाघवज्ञानबलादपि न व्यापकतानवच्छेदकरूपेण साध्यभानमिति प्राचीनमते ऽसिद्धिव्यभिचारान्यतरासङ्कीर्णबाधस्थलमेव नास्ति, तथा च तन्मते हेत्वाभासग्रन्थे निर्वक्ष्यमाणबाधहेत्वाभासविभाजकधर्मपुरस्कारेण बाधोपपादनेऽपि न व्यभिचारः, गन्धादिमद्भिन्नगन्धप्रागभावादिरूपपक्षतावच्छेदकावच्छिन्नगन्धाद्यभावस्यानुमित्यविरोधितया बाधत्वविरहादित्याशयेनाह । तदनभ्युपगमाच्चेति । असङ्कीर्णबाधस्यैवोक्तनियमवादिनाऽनभ्युपगमाच्चेत्यर्थः ।

ननु तेजस्त्वावच्छिन्नपक्षकानुष्णत्वावच्छिन्नसाध्यकस्थले ऽतेजस्त्वरूपपक्षेतरत्वं विना अन्योपाधेरभावादुक्तनियमानुरोधेन तस्योपाधित्वमावश्यकम्, सत्प्रतिपक्षोन्नायकत्वस्य दूषकताबीजत्वमते च तद्व्यतिरेकस्यासाधारणतया तस्य दूषकत्वासम्भव इति मूलोक्तं न सङ्गच्छते अतेजस्त्वभिन्नस्यापि शुद्धसाध्यव्यापकभास्वररूपशून्यत्वावच्छिन्नसाध्यव्यापकगुरुत्वादेरुपाधेस्सम्भवादित्यतो ऽतेजस्त्वं विनेत्यादि व्याचष्टे । अतेजस्त्वमिति । तत्समशीलमिति । असाधारणव्यतिरेकप्रतियोगित्वेन तत्तुल्यमित्यर्थः । तथा चासाधारण्यव्यतिरेकप्रतियोगिनः उपाध्यन्तरस्य सत्त्वेऽपि पक्षेतरत्वव्यतिरेकस्येव तद्व्यतिरेकस्य असाधारणत्वेन सत्प्रतिपक्षानुन्नायकत्वात् सत्प्रतिपक्षोन्नायकत्वस्योपाधिदूषकताबीजत्वमते उक्तनियमस्य पक्षेतरत्वेनेव तादृशोपाधिनापि न निर्वाहः पक्षेतरस्येव तस्यापि तन्मते उपाधित्वासम्भवादिति मूलाभिप्रायः । शुद्धसाध्यव्यापकस्येति । तथा चावच्छिन्नसाध्यव्यापकोपाधिसत्त्वेऽपि उक्तलक्षणस्य शुद्धसाध्यव्यापकताघटितत्वेन तल्लक्षणकर्तृमते तस्याप्यनुपाधित्वेन तमादायापि नोक्तनियम-

निर्वाह इति मूलाशयः। अदोष इति। अतेजस्त्वं विनाप्यस्योपा-
धेरभावादित्युक्तोर्नासङ्गतिः।

(दी०) न चैतद्व्यतिरेको नासाधारणः, पक्षे साध्यस्यासिद्धौ सपक्षाभावात्, सिद्धौ च तत्रैव सपक्षे वर्तमानत्वादिति वाच्यम्। पक्षमात्रवृत्तिरसाधारण इत्यभिप्रायात्। जलादावुष्णत्वभ्रमदशायां तथात्वमित्यपरे। ग्रीष्मोष्मणि तेजस्त्वाग्रहदशायामप्रतीतसाध्यतदभावसहचाररूपत्वमसाधारण्यमित्यन्ये।

(गा०) एतद्व्यतिरेक इति। तेजस्त्वावच्छिन्नपक्षे अनुष्णत्वाभावस्य उष्णत्वस्य साधने पक्षमात्रवृत्तिरप्यतेजस्त्वव्यतिरेक इत्यर्थः। पक्षे साध्यस्यासिद्धाविति। तत्रापि अनुष्णत्वानिर्णयदशायामित्यर्थः। सपक्षाभावादिति। स्वधर्मिकतदानीन्तनतान्निश्चयविषयसाध्यवतोऽप्रसिद्धया असाधारण्यघटकतद्व्यावृत्तत्वदलासत्त्वादित्यर्थः। सिद्धौ च। पक्षे साध्यस्य सिद्धिदशायां च। तत्रैव। पक्ष एव। सपक्षे। स्वस्मिन्निश्चीयमानसाध्यवति। वर्तमानत्वात्। वर्तमानत्वेन तद्व्यावृत्तत्वाभावात्। पक्षमात्रवृत्तिरिति। पक्षत्वं सन्दिग्धसाध्यकत्वम्, तथा च क्वचित्तेजसि तदानीं उष्णत्वानिश्चयेऽपि कालान्तरीणोष्णत्वग्रहजन्यसंस्कारमूलककोटिस्मृत्या यदा तेजोमात्रे तत्संशयः तदा तेजस्त्वव्यतिरेकस्य साध्यसंशयविषयमात्रवृत्तित्वात् साध्यसहचारमात्रग्रहविरोधितादृशासाधारण्यरूपदोषेण तादृशव्यतिरेकस्य सत्प्रतिपक्षोत्थापकत्वासम्भव इति भावः।

अथ वा अनुमितिविशेष्य एव पक्षः, पक्षे साध्यनिश्चयदशायां तन्मात्रवृत्तित्वस्य सहचारग्रहाविरोधित्वेऽपि तदा बाधादेव पक्षे विपरीतसाध्यसिद्धेः सत्प्रतिपक्षस्याकिञ्चित्करतया नोपाधेर्दूषकत्वमिति भावः। जलादावुष्णत्वभ्रमदशायामिति। तथात्वम्। अस्य व्यतिरेकस्य हेतोरसाधारण्यम्। तच्छरीरे धर्मिणि वास्तवसाध्यवत्त्वानिवेशादिति शेषः। तथा च तदानीमेव सत्प्रतिपक्षानुमापकत्वेन तत्प्रतियोगिनो नोपाधित्वमस्येव इति मूलाशयः। ग्रीष्मोष्मणीति। उष्णतया निश्चीयमान इति शेषः। तेजस्त्वस्याग्रहमात्रस्व-

ररूपग्रहाभावलाभायानुद्भूतरूपवत्तेजोऽनुसरणम् । तत्र तेजस्त्वाग्रहदशायामपि वास्तवनद्व्यावृत्तत्वघटितासाधारण्यायोगादाह । अप्रतीतेति । उष्णत्वाग्रहेऽपि साध्यतदभावसहचरिततया ऽप्रतीयमानत्वरूपासाधारण्यं यद्यपि निर्वहति, तथापि तदानीं साध्याप्रसिद्ध्यैव सत्प्रतिपक्षासम्भवादसाधारण्यमकिञ्चित्करं स्यादित्युष्णत्वग्रहानुसरणम् ।

अथ वा अप्रतीतसाध्यतदभावसहचारत्वमित्यस्य साध्यादिमत्तया निश्चीयमाने धर्मिणि अप्रतीयमानत्वमित्येवार्थः, तथा चासाधारण्यसम्पादक एवोष्णत्वनिश्चयः, अपरेषामन्येषां च मते दशाविशेषे ऽसाधारण्येऽपि अन्यदा सत्प्रतिपक्षोत्थापकत्वेन अतेजस्त्वादेरुपाधित्वसम्भवेन तदानीन्तनोपाधित्वमादायैव च उक्तनियमनिर्वाहादसाधारण्यदशायां तस्यादोषत्वे न क्षतिरित्यस्वरसबीजमाहुः ।

न च पक्षमात्रवृत्तित्वस्यासाधारणत्वेऽपि पक्षत्वं यदि सन्दिग्धसाध्यकत्वं तदाप्यनित्यमिति तुल्योऽनुयोगः यदि चानुमितिविशेष्यत्वमात्रं तत्तदा विपक्षैकदेशे साध्यनिश्चयदशायां साध्यसहचारग्रहसम्भवेन व्याप्तिग्रहसम्भवात् पक्षतावच्छेदकावच्छेदेनातेजस्त्वादिज्ञानादुक्तसाध्यवत्त्वनिश्चयाप्रतिबध्याया एकदेशे साध्यानुमितेः प्रतिरोधादुपाधेर्दोषत्वमक्षतमेवेति व्यतिरेकेऽसाधारण्यमकिञ्चित्करमेवेति वाच्यम् । पक्षतावच्छेदकावच्छेदेन यत्रानुष्णत्वसिद्ध्युद्देश्या तत्रानुमितिविशेष्यपक्षमात्रवृत्तेरुपाधिव्यतिरेकहेतोः पक्षैकदेशे उष्णत्वनिश्चयदशायां उष्णत्वव्याप्तिग्रहसम्भवेऽपि बाधनिश्चयबलादेव उद्देश्यानुमितेरसम्भवेन तद्विपरीतस्वप्रयोज्ययादृशानुमितिविरोधिबाधरूपदोषवान् यः पक्षधर्मो हेतुः स उपाधिज्ञानानधीनदोषज्ञानाप्रयोज्ययादृशानुमित्यनुत्पादप्रयोजकोपाधिमानित्येतादृशनियमनिर्वाहान्मूलसङ्गतेः ।

(चि०) किञ्च पर्वतावयववृत्त्यन्यत्वं पर्वतेतरद्रव्यत्वं ह्रदपर्वतसंयोगानाधारत्वं ह्रदपर्वतान्यत्वादिकमुपाधिः स्यादेव, व्यतिरेकेऽसाधारण्याभावात्, व्यतिरेकिणा सत्प्रतिपक्षसम्भवाच्च । न चासाधारण्यम्, तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वात्, तस्मा-

द्नभयोरपि व्याप्तिग्राहकनान्ये विरोधान्न व्याप्ति-निश्चयः, किन्तूभयत्र व्यभिचारसंशयः। तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वम्, तच्च पक्षेतरेऽप्यस्ति। तदुक्तं उपाधेरेव व्यभिचारशङ्केति।

(दी०) असाधारणे हि साध्यसहचारग्रहप्रतिबन्धेन व्याप्तिग्रहप्रतिबन्धः, व्यतिरेकव्याप्त्यादरे तु साध्यतदभावयोरपि तद्विशेषात्सत्प्रतिपक्षो दूषकताबीजम्। न चेहाद्यः, व्यतिरेकित्वात्, न द्वितीयः सप्रतिपक्षे तदनवकाशात्, अतः पक्षेतरोऽपि सत्प्रतिपक्षोन्नायकतयोपाधिरेवेत्याह। व्यतिरेकिणेत्यादिना। नन्वेवं प्रागुक्तरीत्या व्यभिचाराद्युन्नायकत्वस्य सत्प्रतिपक्षेऽनुद्भावनीयतापत्त्या च सत्प्रतिपक्षोन्नायकत्वस्य दूषकताया-मबीजत्वे उपाधिर्दूषणमेव न स्यात् -बीजाभावादत आह। तस्मादिति। तदुक्तमुपाधेर्व्यभिचारशङ्केति।

(गा०) सत्प्रतिपक्षोत्थापकताया दूषकताबीजत्वं स्वीकृत्यापि पक्षेतरत्वसमशीलानामन्येषामुपाधित्वमुपपादयति मूले किञ्चेति। व्यतिरेके असाधारण्याभावादिति। पर्वतावयवरूपादौ गुणादौ ह्रदे च सपक्षे उक्तधर्माणां व्यतिरेकरूपस्य साध्याभावसाधकहेतोर्वर्त्तमानत्वादिति भाव.। पर्वतेतरत्वस्यापि सत्प्रतिपक्षोत्थापकत्वमुपपादयति। व्यतिरेकिणेति। व्यतिरेकिहेतुरूपेण पर्वतेतरत्वाभावेन साध्याभावसाधनसम्भवादित्यर्थ.।

व्यतिरेकितया सत्प्रतिपक्षोन्नायकत्वमात्रोक्तौ व्यतिरेकित्वस्यासाधारण्यदूषकतानिवारकत्वलाभात्तच्छङ्कानुदयेन न चासाधारण्यमित्यग्रिमग्रन्थानुत्थितिरतोऽसाधारण्यस्य दूषकताबीजद्वयं व्यतिरेकितया तदेकतरोद्धारेऽप्यपरतच्छङ्कया न चेत्यादिग्रन्थोत्थितिरिति दर्शयति दीधितौ असाधारणे हीति। शब्दादौ। नित्यत्वादिसाध्यकशब्दत्वादिहेतावित्यर्थः। साध्यसहचारग्रहप्रतिबन्धेनेति। सपक्षव्यावृत्तेरित्यादिः। व्याप्तिग्रहप्रतिबन्धः। अन्वयव्याप्ति-

ग्रहप्रतिबन्धः । दूषकताबीजमित्यग्रिमेणान्वयः । व्यतिरेकव्याप्त्या-
दरे त्विति । तादृशदूषणोद्धारायेत्यादिः । साध्यतदभावयोरपि तद्-
विशेषादिति । हेतुव्यतिरेके साध्याभावस्येव साध्यस्यापि व्यापक-
ताग्राहकतत्सहचारज्ञानघटितसामग्र्याः सत्त्वादित्यर्थः । सत्प्रतिपक्षः ।
स्वेनैव स्वसाध्यानुमितिप्रतिरोधः । इह प्रतिरोधायोपन्यस्तस्यो-
पाधेर्व्यतिरेके हेतौ अन्वयव्याप्यग्रहरूप आद्यो दोषो नेत्यर्थः ।
सत्प्रतिपक्षे तदनवकाशादिति । प्रतिरोधे प्रतिरोधरूपदोषानवका-
शादित्यर्थः । परेण प्रतिरुद्धकार्यस्यापि परकार्यप्रतिरोधकत्वात्
अन्यथा वाऽनुपन्यस्तहेतुना प्रतिरुद्धत्वादेव प्रतिरोधकत्वानुपपत्ति-
रिति भावः । व्यतिरेकिणेत्यादिनेति । दोषत्वादित्यन्तेनेति शेषः ।
एवं च व्यतिरेकित्वादेर् अन्वयव्याप्तिग्रहप्रतिबन्धरूपबीजासम्भवेऽ-
पि अन्यदेव किमपि दूषकताबीजं स्थास्यतीति नाशङ्क्यम् उक्तबी-
जशून्यस्य असाधारण्यस्यापि सत्प्रतिपक्षोत्थापकतामात्रेण दोष-
त्वात् तादृशदोषस्य च सत्प्रतिपक्षे ऽनवकाशादिति न चेत्यादिमू-
लार्थ इति भावः । पक्षेतरस्य सत्प्रतिपक्षानुत्थापकताव्यवस्थापनेन
तस्य दूषकताबीजत्वमुपगम्य पक्षेतरस्य अलक्ष्यत्वमुपपादयतः सि-
द्धान्तिनो निराकृतवतस्तस्मादित्यादिना व्यभिचारसंशयाधायक-
तया तस्य लक्ष्यताव्यवस्थापनमाकाङ्क्षाविरहेण नावतरितुमर्हतीति
तटस्थस्योपाधेरदूषणत्वशङ्कायां व्यभिचारसंशायकतया तद्दोषत्व-
व्यवस्थापनमवतार्य तादृशदूषकताबीजस्य पक्षेतरे सत्त्वकथनं सङ्ग-
मयति । नन्वेवमिति । प्रागुक्तरीत्येति । न तु व्यभिचारोन्नायकतये-
त्यादिसिद्धान्तिप्रदर्शितदोषेणेत्यर्थः । सत्प्रतिपक्षे ऽनुद्भावनीयताप-
त्त्या । पूर्वपक्षिदर्शितया । मूले उभयोरपि व्याप्तिग्राहकसाम्य इति ।
साध्यसाधनयोरुपाधिसाध्यनिरूपितव्याप्तिग्राहकसामग्र्याविशेषेणे-
त्यर्थः । विरोधादिति । वह्न्यादौ ग्राह्यया धूमादिव्याप्त्या आर्द्रेन्धनादौ
च वह्न्याद्यव्यापकत्वग्राहकसामग्रीसहितया आर्द्रेन्धनादौ धूमादि-
व्यापकताग्राहकसामग्रीग्राह्यस्य धूमादिव्यापकाव्याप्यत्वस्य विरो-
धादित्यर्थः । न व्याप्तिनिश्चय इति । एकयापि सामग्र्येति बोध्यम् ।
उभयत्र व्यभिचारसंशयः । साध्ये उपाधेः साधने च साध्यस्य व्य-
भिचारसंशय एव । व्यभिचारसंशयाधायकत्वेनेति । स्वधर्मिकोपा-
धित्वग्राहकसामग्रीसंवलनाधीनसाधनधर्मिकव्यभिचारसंशयप्रयो-

अकृतयेत्यर्थः ।

ननु उपाधेरेव व्यभिचारशङ्केति मूलमसङ्गतम्, सहचारादिरूपसाधारणधर्मदर्शनादितोऽपि व्यभिचारसंशयेनोपाधिभिन्ने तदवच्छेदकत्वव्याघात्, अत एवकारं व्यत्यस्यति दीधितौ उपाधेरिति । ईदृशैवकारेण चानुमितिविरोधिकार्यान्तरे व्यभिचारनिश्चयादौ उपाध्यधीनत्वव्यवच्छेदः ।

(चि०) भवतु वोक्तन्यायेन सकलानुमानभङ्गभिया पक्षेतरोऽनुपाधिः, तथापि लक्षणमतिव्यापकम् । नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वम्, दूषकताबीजस्य व्यभिचारोन्नयनस्य सत्प्रतिपक्षस्य वा साम्येन विषमव्याप्तस्याप्युपाधित्वात् । तथा दूषकतायां साध्यव्याप्यत्वस्याप्रयोजकत्वाच्च ।

(दी०) भवतु वा पक्षेतरो नोपाधिः, उपादीयताञ्च तद्व्यावृत्तये विपक्षाव्यावर्तकेत्यादिकं विशेषणम्, तथापि लक्षणमतिव्यापकमेव । अणवो जन्याणवो वा सकर्तृकाः कार्यत्वादित्यादावनणुत्वादौ । ननु व्यभिचाराद्युन्नायकतामात्रेणोपाधित्वे व्याप्यव्यभिचारित्वादानतिप्रसङ्ग इत्यत आह । तथेति । तथा । तेन रूपेण । स्वव्यभिचारेण स्वव्यतिरेकेण वा । दूषकतायाम् । व्यभिचारस्य सत्प्रतिपक्षस्य चोन्नायकतायाम्, अतिप्रसङ्गभञ्जिकायां साध्यव्याप्यत्वस्य व्यर्थत्वात् ।

(गा०) भवतु वेत्यादिना पक्षेतरस्यालक्ष्यत्वमभ्युपेत्य तत्रातिव्याप्तिप्रसञ्जनमसङ्गतम्, अलक्ष्यत्वे उक्तविपक्षाव्यावर्त्तकविशेषणशून्यत्वेनातिव्याप्तेर्वारितत्वात्, अत उक्तविशेषणेऽपि पक्षेतरविशेषे ऽतिव्याप्तिरित्यर्थकतां पूरणेन प्रकाशयति भवतु वेत्यादिना । अणवस्सकर्त्तृकाः कार्यत्वादित्यादौ अनणुत्वादिरूपपक्षेतरविशेषणस्याणोः परमाणुरूपविपक्षव्यावर्त्तकत्वेऽपि पक्षतावच्छेदकानाक्रान्तविपक्षाव्यावर्तकतानिवेशनातिव्याप्तिरतो जन्याणवो वेति । अनणुत्वादाविति ।

न च अणुत्वेन भेदविशेषणयोः परमाणुद्व्यणुकयोः परमाणुरूपविशेषणस्य परमाणुरूपविपक्षव्यावर्तकत्वेऽपि द्व्यणुकरूपविशेषणस्य न तथेति नातिव्याप्तिरिति वाच्यम् । अणुत्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकान्यसम्बन्धेन द्व्यणुकविशेषितस्यापि भेदस्य भेदाधिकरणपरमाण्ववृत्तितया द्व्यणुकस्यापि परमाणुरूपविपक्षव्यावर्तकत्वात् ।

यद्यपि पर्वतो धूमवान् पर्वतो वह्निमानित्यादावपि पर्वततरत्वादौ अतिव्याप्तिस्सम्भवति, पर्वतादिरूपविशेषणस्य निर्वह्निपर्वतादिरूपविपक्षव्यावर्तकत्वात्, तथापि पर्वतादिविशेषे वह्न्याद्यभावनिश्चये पर्वतादिविशेषणस्य विपक्षव्यावर्तकत्वं दुर्ग्रहम्, तत्र च वह्न्याद्यभावनिश्चयो न सार्वत्रिकः, उक्तस्थले च अजन्याणौ कर्तृजन्यत्वरूपसकर्तृकत्वशङ्काया असम्भवेन तत्र तदभावनिश्चयस्य परार्थस्थले प्रतिवादिना सम्पादनसम्भवेन अनणुत्वस्योपाधित्वनिश्चयः सर्वत्र सम्भवतीतीश्वरसाधकतादृशानुमानस्यैवोच्छेद इति विशेषात् उक्तस्थलानुधावनम् । व्यभिचाराद्युन्नायकतया विशेषेणोक्तविपक्षव्याप्यस्योपाधित्वे तथा दूषकतायामित्यादिना व्यभिचाराद्युन्नायकत्वे साध्यव्याप्यत्वस्याप्रयोजकताया हेतुत्वेनाभिधानेऽप्रयोजकत्वाद्येति चकारासङ्गतिः, अतस्तादृशग्रन्थावतारबीजशङ्कां दर्शयति । नन्विति । व्यभिचारादीत्यादिना सत्प्रतिपक्षपरिग्रहः । व्यापकव्यभिचारादीत्यादिना व्यापकाभावपरिग्रहः । अतिप्रसङ्ग इति । साध्यव्यापकस्योपाधेरुन्नायकव्यभिचारादिप्रतियोगित्वमिव तद्व्यभिचारादेरपि स्वतो व्यभिचाराद्युन्नायकत्वादिति भावः । इत्यतः । उन्नायकतायां विशेषानभिधानादवतीर्णतादृशाशङ्कातः । आह । उन्नायकताविशेषस्योपाधित्वप्रयोजकत्वप्रदर्शनेनातिप्रसङ्गं वारयन् उपाधित्वे साध्यव्याप्यत्वस्यानुपयोगितां दर्शयति । तथेत्यस्य व्याख्या तेन रूपेणेति । एतस्यैव विवरणं स्वव्यभिचारेण स्वव्यतिरेकेण वेति । उन्नायकस्य स्वव्यभिचारस्य स्वव्यतिरेकस्य वा ज्ञानसम्पादनेनेत्यर्थः । दूषकतायामित्यस्य व्याख्या व्यभिचारस्येत्यादि । तादृशोन्नायकताया उपाधित्वप्रयोजकत्वेनातिप्रसङ्गलाभाय पूरयति । अतिप्रसङ्गभञ्जिकायामिति । सत्यामिति शेषः ।

(चि०) अथ साध्यप्रयोजको धर्म उपा-

धिः, प्रयोजकत्वं च न न्यूनाधिकदेशवृत्तेः, तस्मिन् सत्यभवतस्तेन विनापि भवतस्तदप्रयोजकत्वात्, अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्गादिति चेन्न । दूषणौपयिकं हि प्रयोजकत्वमिह विवक्षितम्, तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकम्, न त्वधिकं व्यर्थत्वात् ।

(दी०) साधनाव्यापकधर्मस्योपाधित्वे साध्यान्वयव्यतिरेकोन्नायकान्वयव्यतिरेकशालित्वरूपं साध्यप्रयोजकत्वं नियामकम्, अन्यथाऽतिप्रसङ्गादित्याशङ्कते । अथेति । अभवतः । असतः । भवतः । सतः । व्यर्थत्वादिति । न चैवं पक्षेतरेऽतिप्रसङ्गः, तत्रापि पक्षेतरसाध्यवत्त्वादौ अतिप्रसङ्गात् ।

(गा०) नापीत्यादिलक्षणे साध्याविषमव्याप्तपक्षेतरत्वेऽतिव्याप्तिवारणाय साध्यान्याप्यत्वोपादानं दूषणौपयिकत्वेनानुचितम्, दूषकतया आवश्यकोपाधिभावे आर्द्रेन्धनादावव्याप्तिकरं चेत्युक्तविषमव्यापकस्य अलक्ष्यतामव्यवस्थाप्य तादृशपक्षेतरादिव्यावर्तकविशेषणान्तरघटितलक्षणाभिधानमयुक्तमित्यतः अथ साध्येत्यादिग्रन्थस्य न लक्षणपरता, किन्तु विषमव्यापकस्य अलक्ष्यत्वव्यवस्थापनपरतैवेति स्फुटयितुं तत्तात्पर्यार्थं प्रकाशयति । साधनाव्यापकेति । सद्धेतुव्यापकसाध्यसमव्याप्तधर्मसाधारण्येन साध्यप्रयोजकत्वस्योपाधित्वनियामकत्वासम्भवात् साधनाव्यापकधर्मस्येति पूरणम् । प्रयोजकत्वं च न न्यूनाधिकदेशवृत्तेरित्यत्र दृष्टान्तानिवृत्तये प्रयोजकत्वस्वरूपं निर्वक्ति । साध्यान्वयेति । अन्वयव्यतिरेकयोरन्वयव्यतिरेकोन्नायकत्वस्य यथासङ्ख्यमन्वयः । तस्मिन् सत्यभवत इति मूले तत्राधिकरणे अभवत इत्यर्थः । तथा चार्द्रेन्धनादेर्विषमव्यापकस्य यत्किञ्चिदधिकरणे धूमादिसाध्यस्यासत्त्वेन आर्द्रेन्धनादेर्धूमान्वयानुमापकान्वयप्रतियोगित्वघटितधूमादिप्रयोजकत्वाभावान्नोपाधित्वमिति भावः । नञ् च भूधातोरुत्पत्त्यर्थकत्वे तदीययत्किञ्चिदधिकरणोत्पत्तिकान्यस्येति तदीययत्किञ्चिद-

धिकरणे यस्य नोत्पत्तिस्तस्येति वाऽभवत इत्यस्यार्थः स्यात्, प्रथमे नित्यसाध्यस्योपाध्यधिकरणोत्पत्तिकान्यस्य उपाध्यप्रयोज्यतापत्तिः, द्वितीये नित्यसाध्यस्यात्यन्ताप्रसिद्धेरनुत्पत्तेरप्रसिद्ध्या यत्पदेनोपादानासम्भवात् तत्र विषमव्यापकाप्रयोज्यत्वालाभात्तदुपाधित्वनिराकरणायोग इति तस्य वृत्त्यर्थकतामाश्रित्य व्याचष्टे दीधितौ समवेतः असत इति। तेन विनापि भवत इति मूलस्य तदनधिकरणे भवत इत्यर्थः, तेन धूमादिन्यूनवृत्तिमहानसत्वादेर्धूमादिव्यतिरेकोन्नायकव्यतिरेकप्रतियोगित्वघटितप्रयोजकत्वाभावात्तस्यानुपाधितेति लब्धम्, तथापि भवतेरुत्पत्त्यर्थकत्वे नित्यसाध्यस्य न्यूनवृत्तिधर्माप्रयोज्यत्वालाभात् न तत्र तस्योपाधित्वनिराकरणम्, अतस्तत्रापि तदर्थकतामाह दीधितौ भवत· सत इति।

मूले इह विवक्षितम्। उपाधित्वे नियामकम्। तच्च। दूषणौपयिकञ्च। तदेव। तावदेव। प्रयोजकम्। उपाधित्वे प्रयोजकम्। अधिकम्। साध्यव्यापकत्वपर्यवसितािधकधर्मसहितम्। व्यर्थत्वात्। तादृशस्य व्यर्थत्वात्।

दीधितौ न चैवमिति। एवम्। साध्यव्यापकत्वे सति साधनाव्यापकत्वग्रहमात्रस्य उपाधितानियामकत्वे। अतिप्रसङ्ग इति। तथा च तद्वारणाय उपाधित्वप्रयोजकशरीरे अधिकनिवेशनमावश्यकमिति भावः।

तथापि। पक्षेतरत्वव्यावृत्तोक्तधर्मस्य उपाधितानियामकत्वमङ्गीकृतवतोऽपि। पक्षेतरसाध्यवत्वादाविति। पक्षेतरत्वविशिष्टसाध्यवत्त्वादावित्यर्थः। अतिप्रसङ्गात्। साध्यसमव्याप्तत्वगर्भनिरुक्तरूपवानस्यातिप्रसक्तत्वात्। तथा चानुमानमात्रोच्छेदतादवस्थ्ये आर्द्रेन्धनादिरूपविषमव्यापकधर्मस्य उपाधितानभ्युपगमो निरर्थक इति भावः।

(चि०) अथोपाधिरस्य उच्यते यद्धर्मोऽन्यत्र प्रतिबिम्बते, यथा जपाकुसुमं स्फटिकलौहित्य उपाधिः। तथा चोपाधिवृत्तिव्याप्यत्वं हेतुत्वाभिमते चकास्ति तेनासावुपाधिः, न च व्याप्यत्वमात्रेण ऽदूषकत्व-

मिति साध्यव्यापकतापीष्यते । तथा च समव्याप्त एवोपाधिरिति चेत् ? तत्किं विषमव्याप्तस्य दूषकताबीजाभावान्नोपाधिशब्दवाच्यत्वम्, तथात्वेऽप्युपाधिपदप्रवृत्तिनिमित्ताभावाद्वा? नाद्यः, तस्यापि व्यभिचाराद्युन्नायकत्वात्, नापरः, न हि लोके समव्याप्त एवान्यत्र स्वधर्मप्रतिबिम्बजनके एवोपाधिपदप्रयोगः । लाभाद्युपाधिना कृतमित्यादौ लाभादावुपाधिपदप्रयोगात् । किञ्च न शास्त्रे लौकिकव्यवहारार्थमुपाधिव्युत्पादनम्, किन्त्वनुमानदूषणार्थं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्रमिति शास्त्रे तत्रैवोपाधिपदप्रयोगः ।

(दी०) विषमव्याप्तस्यानुपाधित्वे योगाभावं नियामकमाशङ्कते। अथेति । उप ।समीपवर्तिनि, आदधाति स्वीयं धर्ममित्युपाधिः । यद्धर्मबोधकपदसमभिव्याहारेण चोपाधिपदं प्रयुज्यते तद्धर्मसङ्क्रामकत्वं तद् बोधयति । यथा स्फटिकलौहित्ये जपाकुसुममुपाधिरित्यत्र. लौहित्यसङ्क्रामकत्वम् । प्रयुज्यते च शास्त्रे व्याप्यत्वबोधकपदसमभिव्याहारेण तत्, यथा अत्र साधने असावुपाधिरिति, अतो व्याप्तिसङ्क्रामकत्वलाभः ।

(गा०) अथोपाधिः स उच्यत इत्यादिना उपाधिपदव्युत्पादनं विषमव्यापकस्याप्यव्याप्यतासम्पादकतया पूर्वोक्तलक्षणे साध्यव्यापकत्वविशेषणसार्थक्योपपादकमिति प्रदर्शयन् तत्सङ्गमयति । विषमव्याप्तस्येति । योगाभावम् । अवयवार्थान्वयलभ्यस्वनिष्ठव्याप्तिसङ्क्रामकत्वरूपोपाधिव्यवहारविषयताप्रयोजकधर्माभावम् । नियामकम् । प्रयोजकम् ।

यद्धर्मोऽन्यत्र प्रतिबिम्बते यस्य धर्मः समीपवर्तिनि स्वभिन्ने भासत इति मूलार्थः । कथं तादृशस्य उपाधिपदाल्लाभ इत्याकाङ्क्षायामाह दीधितौ उपेति । उपेत्यस्य सप्तम्यन्तोपपदस्य व्याख्या समीप-

धर्मिणीति । आदधानेत्यारोपजननात्मकाधानार्थकस्य स्वधर्माधानरूपविशेषपरत्वाशयेनाह । आदधानि स्वीय धर्ममिति । उक्तव्युत्पत्त्या सामान्यतः स्वधर्मसङ्क्रामकत्वलाभेऽपि युक्त स्वनिष्ठव्याप्तिसङ्क्रामकत्वलाभ इत्यत आह । यद्धर्मेति । उपाधिपदमित्यस्य यदित्यादिः । तदिति । तदुपाधिपदमित्यर्थ । एतत् दृष्टान्तेन द्रढयति । यथेति । लौहित्यसङ्क्रामकत्वम् । स्फटिके लौहित्यभ्रमजनकत्वम्, यथा चैतत्प्रकारोऽधस्तात्प्रदर्शितः । शास्त्रे । शास्त्रीयकथायाम् । व्याप्यत्वबोधकपदम् । साधनादिपदम्, सिद्धिस्वरूपयोग्यतायाः व्याप्तिपर्यवसितत्वादिति भाव ।

(चि०) अन्ये तु यदभावो व्यभिचारविरोधी स उपाधिः न च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि, तस्याभावेऽपि व्यभिचारात्, अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वम्, तद्व्याप्यं च गुणत्वम्, न चानित्यत्वगुणत्वयोर्व्याप्तिरस्ति । समव्याप्तिकस्य च व्यतिरेकस्तथा । न हि साध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत्तत्साध्यं व्यभिचरति । व्यभिचारे चान्ततस्साध्यमेवोपाधिः, अभेदेऽपि व्याप्यव्यापकत्वात्साधनाव्यापकत्वादिति स्वीचक्रु ।

तन्न । तथापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्त्रम्, आवश्यकत्वात् लाघवाच्च । न तु साध्यव्यापकव्याप्यत्वमपि, भवतैव व्यभिचारस्य दर्शितत्वात् । न च साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वम्, साध्यव्याप्यमित्यत्रापि ह्यनौपाधिकत्वं तदेव वाच्यम्, तथा चानवस्थेति ।

(दी०) यदभाव इति । अस्ति तावदिह हेतावुपाधिर्नेह हेतावुपाधिरिति प्रतीतिर्व्यवहारश्च, तावालम्ब्य चेदं लक्षणवाक्यम् । तत्र

यदि साधने उपाधिव्यभिचाराव्यभिचारौ तद्व्याप्यत्वव्याप्यत्वे वा, यदि वा तेन सम्बन्धेन तद्वृत्त्यवृत्ती एव तदालम्बनम् उभयथापि नेह क्षतिः, यदभावशब्देनापि तथैव वक्तुं शक्यत्वात् । तदभावस्य च व्यभिचारविरोधित्वं तत्सत्त्वेऽवश्यं व्यभिचारविरहस्तद्विरहिणि धर्मे चावश्यं व्यभिचारसत्त्वम्, तत्सत्त्वेऽवश्यं व्यभिचारविरहः, व्यभिचारविरहिणि धर्मे चावश्यं तत्सत्त्वमिति वा । ईदृशश्च विरोधो न विषमव्यापकाभावस्य, तत्सत्त्वेऽपि व्यापक एव व्यभिचारसत्त्वात्, नापि विषमव्याप्याभावस्य, साध्य एव तद्विरहेऽपि व्यभिचाराभावात्, तादृशधर्मस्य चोक्तसम्बन्धेन उक्ततत्सम्बन्धस्य वा यत्र वृत्तिस्तत्रायमुपाधिः, स एव च सोपाधिः।

(गा०) विषमव्याप्तस्य दूषकतावीजाक्रान्तत्वेऽपि नोपाधिता, उपाध्यभावरूपव्याप्तौ यस्य प्रतियोगितया प्रवेशस्तस्यैव दूषकस्य लक्ष्यत्वात्, साध्यसमव्याप्ताभावस्यैव साधननिष्ठस्य व्याप्तित्वात्, विषमव्यापकाभावस्य व्यभिचारिसाधारणतया ऽतथात्वात् तस्य तत्राप्रवेशादिति सौन्दडोपाध्याया वदन्ति । सम्मतसिद्धलक्ष्यतावच्छेदकं दर्शयति मूले । अन्ये त्वित्याद । यदभावः । यद्धर्मावच्छिन्नाभावः । व्यभिचारविरोधी । साध्यव्यभिचारविरोधी । सः । तद्धर्मावच्छिन्नः । उपाधिरिति । व्यभिचारिसाधारणस्य व्याप्तित्वासम्भवेन व्यभिचारिव्यावृत्तस्यैवाभावस्य व्याप्तिरूपतया तत्प्रतियोगिन एवानौपाधिकत्वरूपव्याप्तिघटकत्वादिति भावः ।

तत्रोपाध्यभावरूपव्याप्तौ प्रतियोगितावच्छेदकसम्बन्धविशेषानिवेशे धूमादिरूपसाध्यसमव्याप्तार्द्रेन्धनप्रभवत्वरूपादिरूपोपाधेरपि यत्किञ्चित्सम्बन्धावच्छिन्नाभावस्य साध्यव्यभिचारिवह्न्यादिसाधारणतया अतिव्याप्तिः, उपाधितावच्छेदकसाधनतावच्छेदकसम्बन्धद्वयघटितसामानाधिकरण्यसम्बन्धावच्छिन्नाभावनिवेशे साधनव्यापकसाध्यसमव्याप्तस्य सद्धेतुघटितस्याप्रसिद्ध्या साधनाव्यापकत्वं प्रतियोगिविशेषण परित्यज्य साध्यसमव्याप्ताभावस्यैव निवेशनीयत-

या सङ्केतावपि साध्यसमव्याप्तसाध्यादिसामानाधिकरण्येनानन्वयः, पारिभाषिकानौपाधिकत्वस्य व्याप्तित्वोपगमे उपाधेर्व्याप्तिघटकत्वानुपयोगः ।

अथ साधनाव्यापकसाध्यसमव्याप्तोपाधेरप्रसिद्धावपि व्यधिकरणधर्मावच्छिन्नाभावरूपः साधनाव्यापकत्वावच्छिन्नसाध्यसमव्याप्ताभावः प्रसिद्ध एव शशीयत्वावच्छिन्नविषाणाभाववत्, सौन्दडमते व्यधिकरणधर्मावच्छिन्नाभावस्यापि सत्त्वात्, व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयितया व्यभिचारसाधारण्येऽपि स्वाव्यापकत्वावच्छिन्नसाध्यसमव्याप्ताभावस्य स्वनिष्ठत्वविशेषितस्य व्यभिचारिव्यावृत्ततया व्याप्तिरूपता निराबाधैव, धूमादिव्यभिचारिवह्न्याद्यव्यापकत्वस्य धूमादिसमव्याप्तोपाधिनिष्ठतया तेन रूपेण सामानाधिकरण्यसम्बन्धावच्छिन्नसाध्यसमव्याप्ताभावस्य व्यधिकरणधर्मावच्छिन्नाभावात्मकतया वह्न्यादावसत्त्वेनातिव्याप्तिविरहात् । एवञ्च यदभाव इत्यादावपि यद्रूपवत्सामानाधिकरण्यसम्बन्धावच्छिन्नस्वव्यापकत्वावच्छिन्नप्रतियोगिताकाभावस्वनिष्ठत्वविशेषितः साध्यव्यभिचारिव्यावृत्तः तद्रूपावच्छिन्न उपाधिरित्यत्रार्थः, प्रकृतसाधनाव्यापकत्वस्यापि निवेशनीयतया सङ्केतौ साध्यसमव्याप्तस्य नोपाधिताप्रसङ्ग इति चेन्न । असङ्केतावपि साध्यसमव्याप्तस्योभयत्वादिना साधनाव्यापकतया तेन रूपेण तदभावस्य सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकस्यासत्त्वादसम्भवापत्तेः ।

न च साधनाव्यापकतावच्छेदकत्वरूपेण साध्यसमव्यापकतावच्छेदकरूपाभाववत्तद्रूपाश्रयत्वं व्याप्तिरित्येव वक्तव्यम् अतो नोक्तदोष इति वाच्यम् । तथा सति व्याप्तेरुपाध्यभावरूपत्वाभावेन पारिभाषिकानौपाधिकत्वरूपतापत्तेः ।

न च व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकः स्वव्यापकतावच्छेदकत्वावच्छिन्नसाध्यसमव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभावः स्वस्य व्याप्तिरित्यस्त्विति वाच्यम् । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य सत्त्वेऽपि तदवच्छिन्नप्रतियोगितावच्छेदकताकसंसर्गाभावस्याप्रामाणिकत्वात् । केनापि ग्रन्थकारेण तस्यानभ्युपगतत्वाच्च । तत्सत्त्वे केवलान्वयिस्थले साध्यताव-

च्छेदकावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धावपि तदवच्छिन्नप्रतियोगिताकत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकसाध्याभाववद्वृत्तित्वाभावरूपाव्यभिचारस्य व्याप्तित्वसम्भवात् कूटादिघटितपारिभाषिकाव्यभिचारस्यानुसरणासङ्गतेरित्याशङ्क्य व्यभिचारादेस्सम्बन्धतायाः प्रामाणिकत्वे व्यभिचारेणाव्याप्यत्वेन वा सम्बन्धेन यदवच्छिन्नप्रतियोगिताकसाध्यसमव्यापकताव-च्छेदकावच्छिन्नाभाव एव अनौपाधिकत्वम्, तथा च साधनाव्यापकत्वाविशेषितसाध्यसमव्याप्त एवोपाधिपदार्थः, प्रकृतेऽपि यदभावपदेन तादृशसम्बन्धावच्छिन्नाभाव एव विवक्षितः व्यभिचारादेस्सम्बन्धताया अप्रामाणिकत्वे तूपाधिव्यभिचारादेरुपाधिपदार्थताया आवश्यकत्वात् साधनाव्यापकत्वाविशेषितसाध्यसमव्याप्तरूपोपाधिव्यभिचाराभावस्तदव्याप्यत्वाभावो वाऽनौपाधिकत्वम्, प्रकृतेऽपि यदभावपदेन यद्व्यभिचाराभावः यदव्याप्यत्वाभावो वा विवक्षित इति वक्तु व्यभिचारादेस्सम्बन्धतया उपाधिपदस्य तद्व्यभिचारार्थकतया वा आवश्यकत्वसाधकप्रतीतिव्यवहारौ दर्शयति। अस्ति तावदिति। व्यवहारस्यैव प्रकृते उपाधिव्यभिचारादौ उपाधिपदप्रवृत्तिसाधकतया व्यवहारालम्बनम्। उपाधिव्यभिचाराव्यभिचारौ तदालम्बनमित्यग्रिमेण सम्बन्धः। इहोपाधिरित्यत्रैतन्निष्ठव्यभिचारः, नेहोपाधिरित्यत्रैतन्निष्ठव्यभिचाराभावो विषय इत्यर्थः। नेहोपाधिरित्यत्र हेतौ उपाधेरेव यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकाभावविषयकत्वे यत्र हेताविहोपाधिरिति प्रतीतिव्यवहारौ तत्रापि नेहोपाधिरित्याकारेण तौ स्यातामिति सूचयितुमिहोपाधिरिति प्रतीत्यादिकथनम्। केवलान्वयिसाध्यके साध्यसमव्याप्तस्य उपाधेर्व्यभिचाराप्रसिद्ध्या तद्व्यभिचाराभावरूपानौपाधिकत्वाप्रसिद्धिरतः तदव्याप्यत्वस्याप्यत्वे वेति। व्याप्यत्वं अव्याप्यत्वाभावत्वेन विषय इत्यवधेयम्। केवलान्वयिनि तदव्याप्यत्वमप्रवृत्तौ प्रसिद्धम्, अतो न तत्रानौपाधिकत्वस्य प्रतियोग्यप्रसिद्धिः। अव्याप्यत्वं च स्वव्यापकतत्कं यद्यत्त्वाभावः, न स्वव्यभिचरितसामानाधिकरण्याभावः, व्यभिचाराप्रसिद्ध्या तद्घटितस्य तस्याप्रसिद्धेः। तेन सम्बन्धेनेति। व्यभिचारेण अव्याप्यत्वेन वा सम्बन्धेनेत्यर्थः। तद्वृत्त्यवृत्तौ इति। तस्योपाधेस्सत्त्वासत्त्वे इत्यर्थः। तथैव। तादृशाभावस्यैव। साध्य-

न्यूनवृत्तिमहानसत्वादेः व्यभिचाराभावादेरपि साध्यव्यभिचाराभावव्याप्यत्वसत्त्वादतिव्याप्तिः स्यादतो व्यभिचारविरोधित्वं तद्व्यावृत्तं निर्वक्ति । तदभावस्येति । तत्सत्त्वे अवश्य व्यभिचारविरह इति । स्वव्यापकसाध्यव्यभिचाराभावकत्वमित्यर्थः । तद्विरहिणि धर्मे चावश्यं व्यभिचारसत्त्वमिति । स्वविरहिधर्मत्वव्यापकसाध्यव्यभिचारकत्वमित्यर्थः । धर्मे चेति चकारेण समुच्चयार्थकेन उक्तयोर्मिलितयोर्व्यभिचारविरोधित्वरूपत्वेनेति सूचितम्, प्रत्येकस्यातिप्रसक्तत्वात् । उपाध्यव्याप्यत्वाभावविरहिण्यवृत्तौ साध्यव्यभिचारासम्भवात्तस्य तद्विरहव्यापकत्वसम्भव इति धर्मत्वनिवेशनम् । उक्तदलद्वयनिवेशापेक्षया स्वव्यापकसाध्यव्यभिचारविरहविशिष्टधर्मत्वव्यापकत्वनिवेशे लाघवम्, साध्यव्यभिचारस्यैकधानिवेशात् स्वविरहस्य चानिवेशात्, बहुर्थाद्यर्थप्रवेशाद्येत्यालोच्य तथैव विरोधित्वं निर्वक्ति । तत्सत्त्व इति । अत्र व्यभिचारविरहस्य न द्वेधा निवेशः, स्वव्यापकत्वविशेष्यतापन्नस्य व्यापकत्वविशेषणविधया एकधा निवेशेनैव उपपत्तेः । पूर्वदलप्रयोजनं प्रकाशयति । ईदृशश्च विरोधो न विषमव्यापकाभावस्येति । साध्यविषमव्यापकार्द्रेन्धनादेर्व्यभिचारादिसम्बन्धावच्छिन्नाभावस्य तद्व्यभिचाराद्यभावस्य चेत्यर्थः । तत्सत्त्वेऽपीति । तादृशाभाववत्यार्द्रेन्धनादावेव साध्यव्यभिचारसत्त्वेन साध्यव्यभिचारविरहस्य तादृशाभावाव्यापकत्वादित्यर्थ । नापि विषमव्याप्याभावस्येति ।साध्यविषमव्याप्यमहानसत्वाद्यभावस्य तद्व्यभिचाराभावस्य च नैतादृशो व्यभिचारविरोध इत्यर्थः । साध्य एवेति । तादृशाभावविरहवति साध्ये साध्यव्यभिचाराभावेन साध्यव्यभिचारस्य तद्विरहव्यापकत्वात्तस्य च साध्यव्यभिचाराभावाव्यापकत्वादित्यर्थः । उक्तरीत्या साध्यसमव्यापकत्वपर्यवसानेऽपि साधनाव्यापकत्वालाभात् सद्धेतौ साध्यसमव्याप्ते साधनव्यापकेऽतिप्रसङ्ग इत्यत आह । तादृशधर्मस्येति । उक्तसम्बन्धेन । व्यभिचारेणाव्याप्यत्वेन वा सम्बन्धेन । यत्र वृत्तिरित्यग्रिमेणान्वयः । उक्ततत्सम्बन्धस्य । उक्तस्य तादृशसम्बन्धस्य । तथायमुपाधिरिति । तद्धेतुविषयतादृशधर्मेण अयमत्रोपाधिरिति व्यवहारः । स एव च सोपाधिरिति । स एव हेतुस्तादृशधर्ममादाय सोपाधिव्यवहारविषय इत्यर्थः । तथा च वह्न्यादिसमव्याप्ततत्सामग्र्यादीनामुक्तधर्माक्रान्तत्वेऽपि धूमादौ तदीयोक्तसम्ब-

न्धाभावात्तस्य सोपाधितामसङ्गविरहात्साधनाव्यापकत्वानन्तर्भावेऽपि न क्षतिरिति भावः ।

यद्यपि चैतावता केवलान्वयिसमव्याप्तस्य केवलान्वयिनः क्वचिदप्युपाधित्वाभावात् तत्रोपाधिव्यवहारापत्तिर्विशेषणान्तरमप्रवेश्य दुर्वारैव, तथापि व्यतिरेकित्वविशेषणेन तद्वारणसम्भवात् साधनाव्यापकत्वनिवेशः, उपाधिपदार्थे व्यतिरेकित्वनिवेशेऽपि तत्र पृथक् शक्त्युपगमादभावप्रतियोगितया यत्रोपाधिमानं तत्रैव तदन्वयोपगमेन केवलान्वयिसाध्यके नानौपाधिकत्वप्रतियोग्यप्रसिद्धिः ।

(दी०) अत एव तदभावलक्षणमनौपाधिकत्वं व्याप्तिरिति गीयते । विरोधघटकदलद्वये च एकैकस्य व्याप्तिशरीरघटकता दुष्करा या न स्यादित्युभयोपादानमिति सर्वं सुस्थम् । यदि च समव्याप्ताकाशाभयमात्रवृत्तिधर्मेणाकाशस्योपाधित्वं वारणीयं तदा यत्पदं वृत्तिमत्परं बोध्यम् । अत्र च व्यभिचारस्य घटकत्वेऽग्रे प्रमेयत्वपदं व्यतिरेकिधर्मोपलक्षकम् ।

अथैतादृशोपाध्यभावस्य व्याप्तिलक्षणत्वे यत्र व्यभिचारिणि नैतत्सम्भवस्तत्रातिव्याप्तिः, तस्यात्यन्तमसत्त्वेनाभावानिरूपणे तु तत्रसद्धेतावव्याप्तिरत आह । व्यभिचारे चेति । यस्य यद्व्यभिचारस्य यदव्याप्यत्वस्य वा अभावः साध्यव्यापके साध्यव्यभिचारविरोधी स साधनाव्यापक उपाधिरित्यपि वदन्ति । यद्व्यभिचाराभावसमाधने साध्यव्यभिचाराभावापादकस्स साध्यव्यापक उपाधिरित्यपि केचित् ।

१ (ना०) अत एवेति । सोपाधिनिरुपाधिव्यवहारविषयोपाधिपदार्थे साध्यसमव्याप्तमात्रनिवेशादेव । तदभावलक्षणम् । उपाध्यभावस्वरूपम् । अनौपाधिकत्वम् 'यौगिकानौपाधिकत्वपदप्रतिपाद्यम् । व्याप्तिरिति गीयत इति । साधनाव्यापकत्वस्य व्यतिरेकित्वस्य चाऽधिकस्योपाधिपदार्थे घटकत्वे सर्वस्यैव सद्धेतौ केवलान्वयिसाध्यके वा प्रतियोग्यप्रसिद्ध्या अनौपाधिकत्वानुपपत्तिरिति भावः । उक्तल-

क्षणतावच्छेदकघटकं साध्यव्याप्यताप्रापकं साध्याव्यापकताप्रापकं च दलं सार्थकयति। विरोधघटकेति । एकैकस्येति । व्यापकताप्रापकदलमात्रस्य व्याप्यताप्रापकदलमात्रस्य वेत्यर्थः । तदवच्छिन्नाभावस्य व्यभिचारिसाधारणतया व्याप्तिघटकता तत्प्रकारकज्ञानस्यानुमित्यविरोधितया दूषकता न स्यादिति यथासङ्ख्येनान्वयः ।

ननु साध्यसमव्यापकतावच्छेदकार्द्रेन्धनप्रभवत्वह्वयाकाशान्यतरत्वाद्यवच्छिन्नाभावस्य साध्यव्यभिचाराभावसमनियततया तेन रूपेणावृत्तेरुपाधितापत्तिरित्यत आह । यदि चेति । तेन रूपेण तस्योपाधित्वे क्षतिविरह इत्यभिसन्धाय यदि चेत्युक्तम् । यत्पदं वृत्तिमत्परमिति । यद्धर्मावच्छिन्नवृत्तिमदभावो व्यभिचारविरोधी स तेन रूपेणोपाधिरिति विवक्षणीयमित्यर्थः ।

ननु यदभावपदेन यद्व्यभिचाराभावविवक्षणपक्षे अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वमित्यग्रिममूलेन सह विरोधः, तादृशमूलस्य हि तत्पक्षेऽनित्यत्वविषमव्यापकं प्रमेयत्वं तद्व्याप्यं तद्व्यभिचाराभाववद् गुणत्वम्, न चानित्यत्वगुणत्वयोर्व्याप्तिरस्ति गुणत्वेनानित्यत्वव्यभिचाराभाव इत्यर्थः, स च प्रमेयत्वव्यभिचाराप्रसिद्ध्या सङ्गत इत्यत आह । अत्र चेति । व्यभिचारस्य घटकत्वे इति । अभावप्रतियोगितया प्रवेशे इत्यर्थः । व्यभिचारितत्सम्बन्धावच्छिन्नयदभावस्य यद्व्याप्यत्वाद्यभावस्य वा घटकत्वे तु प्रमेयत्वव्यभिचाराप्रसिद्धावपि व्यभिचारत्वव्यधिकरणसम्बन्धावच्छिन्नाभाव अवृत्तो प्रसिद्धस्य तद्व्याप्यत्वस्य चाभावः प्रसिद्ध एवेति तद्घटकत्वपक्षे नासङ्गतिरिति । व्यतिरेकिधर्मोपलक्षकमिति । अनित्यगुणान्यतरत्वतत्प्रकारकप्रमाविषयत्वादिरूपव्यतिरेकिधर्मपरमित्यर्थः। व्याप्तिलक्षणत्वे । व्याप्तिस्वरूपत्वे । यत्र व्यभिचारिणीति । अयमेतद्वृत्तियावद्धर्मवान् मेयत्वादिरत्रादाधिरित्यर्थः । नेतरसम्भव इति । न समव्याप्तोपाधिसम्भव इत्यर्थः । तत्र साध्यसमव्याप्तत्वेनाभिमतधर्ममात्रस्यैव साध्यान्तर्गततया तद्भेदघटितसमव्याप्तत्वासम्भवादिति भावः । अतिव्याप्तिरिति ।

न च प्रतियोग्यप्रसिद्ध्या अभावाप्रसिद्धिरित्यतिव्याप्तिर्न सम्भवति, यद्यपीयमनुपपत्तिः स्वयमेव तस्यात्यन्तमसत्त्वेनेत्यादिना प्रदर्शयिष्यते, तथाप्यसम्भवयुक्तिकतया इदानीमतिव्याप्तिप्रसञ्जनमनु-

चितमेवेति वाच्यम् । व्यधिकरणधर्मावच्छिन्नाभावाङ्गीकारे साध्यसमव्याप्तत्वघटकसाध्यभेदावच्छिन्नघटकदलान्तरविशिष्टाभावरूपानौपाधिकत्वस्य वक्ष्यमाणाव्याप्तिवारणाय विवक्षणे इयमतिव्याप्तिरित्याशयात् व्यधिकरणधर्मावच्छिन्नाभावानुपगमेन तत्सत्त्वेऽपि समव्याप्तत्वघटकभेददलान्तरयोरुभयोरेव प्रतियोगिविशेषणतापक्षयोः प्रतियोगितावच्छेदकविधया निवेशेन वा अतिव्याप्तिवारणेऽव्याप्तिरभिधास्यते इति सामञ्जस्यात् ।

न चोपाधिपदस्य साध्यभेदव्यापकसाध्यव्यापकत्वोभयविशिष्टार्थकतया प्रतियोगिविशेषणतापन्नभेदस्य प्रतियोगितावच्छेदकतया अनौपाधिकत्वशब्दार्थे प्रवेशो न सम्भवति, येन व्यधिकरणधर्मावच्छिन्नाभावघटकतया अतिव्याप्तिः प्रसज्येतेति वाच्यम् । भेदे स्वतन्त्रवृत्तिस्वीकारेण उपाधिरस्तीत्यादौ दलान्तरविशिष्टधर्मिणि भेदान्वयोपगमेन उभयदलविशिष्टधर्मिलाभेऽपि उपाधिर्नास्तीत्यादौ नञर्थाभावे स्वातन्त्र्येण प्रतियोगितावच्छेदकतया भेदस्यान्वयसम्भवात् । वृत्तिस्तु शक्तिस्तान्त्रिकमङ्केतो वेत्यन्यदेतत् । ईदृशरीत्यैव साधनाव्यापकत्वस्य उपाधिपदार्थघटकत्वे व्यधिकरणतादृशधर्मावच्छिन्नसाध्यसमव्याप्ताभावस्य उपाध्यभावरूपतानिर्वाहः ।

केचित्तूक्तस्थले भेदघटितसाध्यसमव्याप्तेरप्रसिद्धावपि यस्य समव्याप्तं प्रकृतसाधनाव्यापकं तदन्यप्रकृतसाध्यकत्वं प्रकृतसाधने प्रकृतसाध्यनिरूपिताऽनौपाधिकत्वलक्षणा व्याप्तिरिति चेदग्रिमाव्याप्तिवारणाय विवक्ष्यते तदेयमतिव्याप्तिरिति भावं वर्णयन्ति । तथा सत्यनौपाधिकत्वस्य पारिभाषिकतापत्त्या साध्यव्याप्यत्वनिवेशवैयर्थ्येन विषमव्यापकस्योपाधिताया दुर्वारत्वात् तदनुपादेयम् ।

आहेति । समव्याप्ततया अभेदसाधारणतया साध्यभिन्नतत्समव्याप्त्यप्रसिद्धिस्थलेऽपि साध्यसमव्याप्त्यप्रसिद्धिमित्यादिः । व्यभिचाराविरोधित्वं यथाश्रुततदभावव्याप्यत्वमेव, विरोधित्वभावे साध्यव्यापकनिष्ठत्वनिवेशान्न साध्यान्यूनवृत्तावतिप्रसङ्गः, साधनाव्यापकत्वस्यापि प्रवेशनीयतया न साधनव्यापकस्योपाधित्वमिति वर्णयतां मतमुपन्यस्यति । यस्येति । साध्यव्यापके साध्यव्यभिचारविरोधी साध्यव्यापकनिष्ठस्सन् साध्यव्यभिचाराभावव्याप्यः । सा-

व्यन्यूनवृत्तिव्यभिचारस्य साध्यव्यापकेऽवश्यं सत्त्वात्तद्व्युदासः । यच्चाभिचाराप्रभावे साध्यनिष्ठत्वनिवेशेनैव न्यूनवृत्तिवारणसम्भवात् साध्यव्यापकनिष्ठत्वनिवेशोऽनतिप्रयोजनक इति नाशङ्क्यम्, उपाध्यभाववति सम्बन्धान्तरेण वृत्तित्वरूपव्यभिचारस्य साध्येऽपि सत्त्वादुपाधिव्यभिचाराभावस्य साध्यनिष्ठत्वं दुर्लभमिति साध्यतावच्छेदकसम्बन्धेन वृत्तेर्व्यभिचारशरीरे निवेशनीयतया जातिमान् मेयत्वादित्यादौ सत्ताद्युपाधावव्याप्तिः, साध्यतावच्छेदकसमवायादिसम्बन्धेन सत्ताद्यभाववति वृत्तेरप्रसिद्धेः । साध्यव्यापकनिष्ठत्व निवेशे च व्यापकतायां व्यभिचारे च विशेषणताविशेषसम्बन्धस्यैव निवेशनीयतया अप्रसिद्धिविरहेण तत्राव्याप्त्यनवकाशात् ।

केचित्तु साध्यव्यापके साध्यव्यभिचारविरोधीत्यस्य साध्यव्यापकवृत्तिस्सन् साध्यव्यभिचारविरोधीति नार्थः, तथा सति साध्यव्यापक इत्यत्र साध्ये साध्याधिकरणत्वे वा इत्युक्तावेव निर्वाहात्, अपि तु साध्यव्यापकान्तर्भावेण साध्यव्यभिचारस्य विरोधीत्येवार्थः, व्यापकान्तर्भावेण तद्विरोधित्वं च स्वाधिकरणीभूतसाध्यव्यापकनिष्ठाभावप्रतियोगिसाध्यव्यभिचाराभावकत्वम्, तत्र च व्यापकांशमनुपादायोक्तदिशा साध्यान्तर्भावेणाविरोधित्वनिवेशे विषमव्यापकार्द्रेन्धनादिवारणासम्भवः, धूमादिव्यभिचाराभावस्य आर्द्रेन्धनादिव्यभिचाराभाववत्साध्यनिष्ठाभावाप्रतियोगित्वादित्यतो व्यापकनिवेशः । तथा चार्द्रेन्धनादेरपि साध्यव्यापकतया धूमादिव्यभिचाराभावस्य आर्द्रेन्धनादिव्यभिचाराभाववदार्द्रेन्धनादिनिष्ठाभावप्रतियोगित्वात्आर्द्रेन्धनादिव्यभिचाराभावस्य साध्यव्यापकान्तर्भावेण व्यभिचारविरोधित्वमित्यनतिप्रसङ्गादित्याहुः ।

अत्र चास्वरसबीजं साधनाव्यापकत्वस्योपाधिपदार्थे प्रवेशे व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे विशिष्टप्रतियोग्यप्रसिध्या व्याप्तिरूपाभावरूपत्वासम्भवः । एतत्प्रकाशनायैव व्यभिचारेत्यादिफक्किकावतरणोत्तरमेतद्व्याख्यानमुपन्यस्तम् । ताद्दशावतरणमध्ये प्रतियोगिनो ऽत्यन्तासत्त्वे ऽभावज्ञानासम्भवोक्तेर्विशेषणान्तरपूरणञ्च तद्वीजम् ।

विरोधिपदार्थविवरणेन साधनाव्यापकार्थं साध्यव्यापकपदपूरणेन च साध्यव्यापकत्वविशेषणं वर्णयतां मतमाह । यद्व्यभिचारा-

भाव इति । साधने साध्यव्यभिचाराभावापादक इति । साधनपक्षकसाध्यव्यभिचाराभावापत्तियोग्य इत्यर्थः । आपत्तियोग्यता च पक्षे आरोपितत्वे सत्यापाद्यव्याप्यत्वम्, तच्चारोपितत्वं तदवृत्तित्वपर्यवसितम्, आरोपितत्वस्य विषयबाधाधीनत्वात् । उपाधिव्यभिचाराद्यभावस्य साधनावृत्तित्वादिलाभे साधने उपाधिव्यभिचारादिलाभात्फलत उपाधेस्साधनाव्यापकत्वलाभः । अत्रापि दर्शितमेवास्वरसबीजम् ।

साध्यसमव्याप्तस्य व्यभिचाराद्यभावस्साध्यसमव्याप्यव्याप्यत्वपर्यवसितानौपाधिकत्वरूपा व्याप्तिरुपाधेस्साध्यव्याप्यत्वव्यापकत्वे तावद्व्याप्तिघटकतायामुपयुज्यते, अतस्तदुभयपर्यवसितविशेषणद्वयं लक्ष्यतानियामकमित्युक्तलक्ष्यतावच्छेदकानैवक्तुराशयं मन्वानो व्यापकताया व्याप्तिघटकतया उपयोगितां खण्डयति मूले तथापीत्यादिना । साध्यव्याप्यव्याप्यत्वमव्यभिचारे तन्त्रमित्यन्वयः । अव्यभिचारे । साध्यव्यभिचाराभावे । तन्त्रम् । प्रयोजकम् । आवश्यकत्वादिति । तदव्यभिचारिणि तद्व्याप्यव्याप्यत्वस्यावश्यं सत्त्वादित्यर्थः । लाघवात् । व्यापकताघटितसमव्याप्यत्वापेक्षया लघुशरीरत्वात् ।

(चि०) अनौपाधिकत्वे च व्याप्तिलक्षणे यावदिति पदं साध्यव्यापके विशेषणं दत्तमेव । किञ्च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणम्, न तु यद्व्यतिरेके भवत्येवेत्येतद्दुर्भगम्, विरुद्धत्वादेरप्यदोषत्वापत्तेः । नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम्, साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् ।

(दी०) न तु यद्व्यतिरेक इति । यद्व्यतिरेकेऽनुमितिप्रयोजकं रूपं व्याप्त्याद्यन्यतमं भवत्येव, यथाऽसिद्धिव्यतिरेके सिद्धिरित्यर्थः । विरुद्धत्वादेरिति । विपक्षमात्रगामित्वसपक्षविपक्षगामित्वलक्षणविरोधव्यभिचारयोरेकैकविरहेऽपि व्याप्तेरनियमादित्यर्थः ।

(गा०) ननु व्याप्यत्वाघटितं साध्यव्यापकव्याप्यत्वमेव किं नाव्यभिचारप्रयोजकमुच्यते, इत्याकाङ्क्षायामाह । न त्विति । एवञ्चाव्यभिचारप्रयोजकतया साध्यव्याप्यव्याप्यत्वमेव अनौपाधिकत्वरूपा व्याप्तिः, न तु साध्यव्याप्ये तद्व्यापकत्वमपि निविष्टम्, तथा च अनौपाधिकत्वघटकस्य साध्यविषमव्याप्यस्यानुपाधितावत् तद्घटकस्यापि विषमव्यापकस्योपाधिता स्यादिति भावः । मा भूद्व्यापकत्वांशस्य व्याप्तिघटनोपयोगितया लक्ष्यतानियामकत्वम्, दूषकतोपयोगितया तु स्यादेवेत्याशङ्कते । न चेति । अनौपाधिकत्वमिति । व्यापकत्व तु दूषणौपयिकमिति शेषः । इत्यत्रापि । प्रविष्टं साध्यव्याप्यत्वरूपमनौपाधिकत्वम् । तदेव । साध्यव्याप्यव्याप्यत्वमेव । तथा चेति । स्वनिष्ठानौपाधिकत्वरूपव्याप्यत्वशरीरे स्वव्यापकनिष्ठानौपाधिकत्वस्य, तच्छरीरे च तद्व्यापकनिष्ठानौपाधिकत्वान्तरस्य प्रवेश इति रीत्या अन्यान्यानौपाधिकत्वप्रवेशेनेत्यर्थः । अनवस्थेति । तथा च साध्यव्याप्यत्वाघटितमव्याप्यत्वसम्बन्धावच्छिन्नसाध्यव्यापकाभावरूपमेवानौपाधिकत्वं साध्यव्यापकव्यापकत्वपर्यवसितं वक्तव्यम्, तत्र च विषमव्यापकमपि प्रविष्टमिति कथं तस्यालक्ष्यतेति भावः ।

ननु साध्यव्यापकव्यापकत्वमव्याप्यत्वसम्बन्धावच्छिन्नसाध्यव्यापकाभाववत्त्वं च यत्किञ्चिद्व्यापकमादाय व्यभिचारिसाधारणमिति न तस्य व्याप्तिरूपतेत्यत आह । अनौपाधिकत्वे चेति । विशेषणं दत्तमेवेति । तथा च स्वव्यापकतावच्छेदकयावत्साध्यव्यापकतावच्छेदकत्वपर्यवसितम्, साध्यव्यापकतावच्छेदका यावन्तो धर्मा अव्याप्यत्वसम्बन्धावच्छिन्नतदवच्छिन्नाभाववत्त्वमनौपाधिकत्वं व्यभिचारिव्यावृत्तमेवेति भावः ।

ननु स्वव्यापकसाध्यव्यापकाभावो ऽनौपाधिकत्वम्, तत्र च नानौपाधिकत्वरूपव्याप्तिप्रवेश इति नानवस्था, यद्वयेन व्यापके यावत्त्वं निवेश्य विषमव्यापकसाधारणस्य व्यापकमात्रस्याभाव एवानौपाधिकत्वमुच्यते । भवतु वा विषमव्यापकसाधारणसाध्यव्यापकाभाव एवानौपाधिकत्वम्, वार्यतां च व्यापके यावत्त्वविशेषणेनातिप्रसङ्गः, तथापि न विषमव्यापक उपाधिः यद्व्यतिरेके ऽनुमितिप्रयोजकरूपनियमस्तस्यैव दूषणत्वात् यदभावो व्यभिचारविरोधी

तदभावे ऽनुमितिप्रयोजकव्याप्तिनियमेन तस्यैवोपाधित्वात् समव्याप्तस्यैव च तथात्वादित्यत आह । किञ्चेति । यस्मिन् सति । यज्ज्ञाने सति । अनुमितिर्न भवति । यज्ज्ञानमनुमित्यनुत्पादप्रयोजकमिति समुदितार्थः । तदेव दूषणमिति । दूषणत्वं तस्यैव व्याप्यमित्यर्थः । एवकारलभ्यमुक्तव्यवच्छेद्यं स्पष्टयति । न त्विति ।

यस्य यज्ज्ञानस्य वा व्यतिरेके ऽनुमितिर्भवत्येवेत्येतद्भिन्नं दूषणं तत्त्वनियतं दूषणत्वमिति यथाश्रुतं न सङ्गच्छते, असिद्ध्यादेस्तज्ज्ञानस्य वा व्यतिरेकेऽपि कारणान्तराभावेनानुमित्यनुत्पत्त्योक्तनियमस्यासम्भवदुक्तिकत्वात् । विषमव्यापकाभावस्यानुमितिप्रयोजकव्याप्यनियतत्वेनादूषणत्ववादिनानुमितिप्रयोजकव्याप्त्यादिनियतव्यतिरेकप्रतियोगित्वस्य दूषणतानियामकतया एव शङ्कितत्वात्, यथाश्रुतनियमस्य तदनाशङ्कितत्वेन तत्प्रतिक्षेपायोगाच्चेत्यतो दीधिकृत्तादृशमूलं विवृणोति । यद्व्यतिरेक इति । अनुपद्यमानानुमितिपदं तत्प्रयोजकं लाक्षणिकमित्याशयेनोक्तमनुमितिप्रयोजकमिति । अत्र प्रयोजकत्वं यदि जनकज्ञानविषयत्वं तदा अबाधितत्वादिज्ञानस्यानुमित्यजनकतया बाधादौ व्यभिचारः, अबाधितत्वादिरूपस्य सङ्ग्रहसम्भवे विरुद्धत्वादेरित्यादिपदेन बाधादिपरिग्रहानौचित्यात्, भावसाधारणव्याप्तिघटकाभावत्वे तथाविधानुमितिप्रयोजकत्वसत्त्वात्तद्विरोधव्यतिरेकिण्यपि तस्यावश्यकतया विरुद्धत्वादेरित्यादिमूलविरोधः प्रकृतानुपयोगश्च, अन्यादृशं चानुगतं दुर्वचमित्यतोऽनुमितिपदस्य न तत्प्रयोजकत्वावच्छिन्नपरता अपि तु व्याप्त्याद्यनुगतधर्मान्तरावच्छिन्नपरतैव, अनुमितिप्रयोजकमिति तु शब्दसम्बन्धकथनमिति प्रदर्शयति । व्याप्त्याद्यन्यतमेति । आदिपदात् पक्षधर्मत्वासत्प्रतिपक्षितत्वाबाधितत्वपरिग्रहः । ईदृशव्याप्तेरापातत उक्तिसम्भवमाविष्कर्तुं स्वयं दृष्टान्तमाह । यथेति । असिद्धिः । अपक्षधर्मता व्याप्यभावश्च । सिद्धिः । पक्षधर्मत्वं व्याप्तिश्च ।

मूले विरुद्धत्वादेरित्यादिपदेन न बाधसत्प्रतिपक्षपरिग्रहः, तद्व्यतिरेके अनुमितिप्रयोजकाबाधितत्वादिरूपसत्त्वनियमात्, अतो व्यभिचारस्यैव परिग्रह इति प्रदर्शयन् विरोधव्यभिचारयोस्स्वरूपप्रदर्शनेन तदभावयोः व्याप्यनियतत्वं स्फुटयति । विपक्षेति । विरोधस्य साध्यासामानाधिकरण्यरूपत्वे व्यभिचारस्य च विपक्षगामि-

त्वमात्ररूपत्वे व्याप्तिपदेन विशकलितयोः विपक्षासत्त्वसपक्षसत्त्वयो-रुपादाने न तयोरुक्तनियमभङ्गप्रसङ्गः, तयोरेकैकस्य व्यतिरेके सपक्षसत्त्वविपक्षासत्त्वयोरेकैकसत्त्वनियमात्, अतोऽन्यादृशयोस्तयोर्निर्वचनम् । तथा सति सपक्षावृत्तित्वसहितवृत्तिमत्त्वरूपविपक्षमात्रगामित्वव्यतिरेकिणि अवृत्तौ सपक्षसत्त्वस्य, व्यभिचारिणि च विपक्षासत्त्वस्याभावाद्विरोधव्यतिरेकेण तदेकतरनियमस्य पक्षविपक्षोभयगामित्वविरहिणि च विरुद्धे सपक्षसत्त्वस्य विपक्षासत्त्वस्य चाऽभावात् व्यभिचारव्यतिरेके न तदेकतरनियम इति मूलसङ्गतिः । उक्तविरोधस्यापि व्यतिरेकं प्रति सपक्षसत्त्वविपक्षासत्त्वयोरन्यतरत्वेन व्यापकत्वेऽपि न क्षतिः, अन्यतरत्वघटकभेदप्रतियोगितावच्छेदकरूपेण व्यापकतया नियमाप्रविष्टत्वेनाभिमतत्वादिति ।

(दी०) यत्र पक्षे हेतुमति च साध्यम्, हेतुश्च पक्षावृत्तिः तत्रैकः पक्षावृत्तिर्हेतुसमानाधिकरणः, अपरश्च पक्षनिष्ठः साध्यवति हेत्वसमानाधिकरणः, हेत्वसमानाधिकरण एव वा उपाधिः, तत्र साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोरसङ्करो बोध्यः । यथा घटः प्रत्यक्षो नित्यद्रव्यत्वात् विभुत्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकमात्मत्वं पक्षधर्मावच्छिन्नसाध्यव्यापकमुद्भूतरूपवत्त्वं प्रत्यक्षस्पर्शाश्रयत्वं वा मिथोऽसङ्कीर्णमुपाधिः ।

(गा०) पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकत्वरूपविशेषणद्वयघटितलक्षणयोः साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्योरव्याप्त्या मूलकृता दूषणं तादृशविशेषणयोरसङ्करस्थलसत्त्व एव सङ्गच्छते, तदेकतरस्य विशेषणस्यापरविशेषणव्यापकत्वे व्यापकविशेषणघटितलक्षणस्याव्याप्त्यनवकाशादतस्तयोरसङ्करं एकपक्षसाध्यसाधनकस्थले सामान्यतो दर्शयति । यत्रेति । काकः श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वाद्युपाधौ पक्षधर्मावच्छिन्नसाध्यव्यापकतायाः, वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ उद्भूतरूपाद्युपाधौ साधनावच्छिन्नसाध्यव्यापकताया असत्त्वेन लक्षणद्वयस्याव्याप्तिसङ्गतावपि पक्षादिभेदेन लक्षणभेदात्प्रथमस्थलीयोपाधिलक्षणे साधनावच्छिन्नत्वस्य,

द्वितीयस्थलीयोपाधिलक्षणे च पक्षधर्मावच्छिन्नत्वस्य निवेशे नाव्याप्तिप्रसङ्ग इत्यत एकस्थले परस्परासङ्कीर्णोपाधिद्वयानुधावनम् ।

वायुः प्रत्यक्षः नित्यद्रव्यत्वादित्यादौ पक्षावृत्तिसाध्यके साधनावच्छिन्नसाध्यव्यापकस्यात्मत्वादेः पक्षधर्मात्मवायुत्वान्यतरत्वावच्छिन्नसाध्यव्यापकत्वसत्त्वात्पक्षधर्मावच्छिन्नत्वघटितलक्षणे नाव्याप्तिरतः पक्षस्य साध्यवत्त्वानुसरणम् । यत्र हेतुमति न साध्यं वायुः प्रत्यक्ष आकाशत्वादित्यादौ तत्र साधनावच्छिन्नसाध्याप्रसिद्ध्या न तद्व्यापकोपाधिसम्भव इत्यतो हेतुमतस्साध्यवत्त्वानुसरणम्। यत्र हेतोः पक्षे सत्त्वं घटोऽप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादौ तत्र साधनस्यापि पक्षधर्मतया साधनावच्छिन्नसाध्यव्यापकस्यापक्षधर्मावच्छिन्नसाध्यव्यापकत्वनियम इत्यतो हेतुश्च पक्षावृत्तिरिति । तत्रैकः पक्षावृत्तिर्हेतुसमानाधिकरण उपाधिरित्यन्वयः । स एव साधनमात्रावच्छिन्नसाध्यव्यापकः । पक्षवृत्तित्वे पक्षनिष्ठयत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वसम्भवात् पक्षावृत्तिरित्युक्तम् । हेतुमत्यवृत्तित्वे साधनविशिष्टसाध्यवत्यवृत्तेर्न तादृशविशिष्टसाध्यव्यापकतासम्भव इत्यतो हेतुसमानाधिकरण इत्युक्तम् । हेतुसामानाधिकरण्यं साध्यवत्सकलहेत्वधिकरणवृत्तित्वम् । अपरश्च पक्षनिष्ठ इति । अयमेव पक्षधर्ममात्रावच्छिन्नसाध्यव्यापकः । पक्षावृत्तित्वे तस्यासम्भवात् पक्षनिष्ठेत्युक्तम् । साध्यवद्धेत्वधिकरणवृत्तित्वे साधनावच्छिन्नसाध्यव्यापकत्वमपि सम्भवत्येवेति साध्यवति हेत्वसमानाधिकरण इत्युक्तम् । वक्ष्यमाणे घटः प्रत्यक्षो नित्यद्रव्यत्वादित्यत्रोद्भूतरूपोपाधौ साध्यशून्यहेतुमत्पार्थिवादिपरमाणुवृत्तित्वात्तत्सङ्ग्रहाय साध्यवतीत्युक्तम् । अन्यस्यापि पक्षधर्मावच्छिन्नसाध्यव्यापकासङ्कीर्णोपाधेः सम्भवान्नोक्तोपाधेरसङ्ग्रहेऽपि क्षतिरित्याशयेनाह । हेत्वसमानाधिकरण एव वेति । असङ्करः । मिथो भेदः । तदेव स्थलं विशिष्य दर्शयति । यथेति । शुद्धद्रव्यत्वस्य नित्यत्वस्य वा हेतुत्वे आत्मत्वोपाधेर्घटादौ जन्यद्रव्ये नित्ये च जात्यादौ साध्यवत्यवर्तमानतया साधनावच्छिन्नसाध्यव्यापकत्वासम्भवान्नित्यत्वविशिष्टद्रव्यत्वहेत्वनुसरणम् । उद्भूतरूपोपाधेः साधनवत्सामान्यावृत्तित्वमप्युपपादयितुं हेत्वन्तरमाह । विभुत्वाद्वेति । उद्भूतरूपवत्त्वमसङ्कीर्णमुपाधिरिति योजना । अत्रासङ्कीर्णत्वं साधनावच्छिन्नसाध्यव्या-

पकत्वम् । आत्मत्वे चासङ्कीर्णत्वं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वम् । उद्भूतत्वाविशेषितरूपस्यापि यथोक्तोपाधित्वसम्भवेऽपि तान्त्रिकैस्तद्विशिष्टरूपस्य साध्यप्रयोजकतयोपाधित्वोपगमात्तदुपादानम् । नित्यद्रव्यत्वहेतुकस्थलेऽपि हेत्वसमानाधिकरणमुपाध्यन्तरमाह । प्रत्यक्षस्पर्शाश्रयत्वं वेति । स्पर्शे प्रत्यक्षत्वविशेषण तदविशेषितस्य हेतुमत्परमाणुवृत्तित्वाद्धेत्वसामानाधिकरण्यायोगात्तम् । एतच्च प्रभाया अप्रत्यक्षतामते वहिर्द्रव्यत्वरूपपक्षधर्मावच्छिन्नस्यापि साध्यस्य व्यापकम्, तत्प्रत्यक्षतामते तु पृथिवीत्वादिधर्मावच्छिन्नस्येति बोध्यम् ।

(चि०) शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वस्योपाधित्वापत्तेश्च, शब्दधर्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्राश्रावणत्वं व्यापकं, पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत् । आर्द्रेन्धनवत्त्वादावुपाधौ पक्षनियततादृशधर्माभावाच्च ।

(दी०) अश्रावणत्वेति । घटो मेयो द्रव्यत्वादित्यादौ गन्धवत्त्वाद्यवच्छिन्नसाध्यव्यापकपृथिवीत्वादावतिव्याप्तिर्द्रष्टव्या । न चानेन रूपेण ज्ञातस्य दूषकत्वमित्याह । आर्द्रेन्धनेति ।

(गा०) शब्दो ऽभिधेय इत्यादावश्रावणत्व मूलकृता ज्ञानातिव्याप्तिर्दर्शिता, घस्त्वतिव्याप्तिमपि स्वयमाह । घट इति । आर्द्रपदाभ्यां पर्वतो वह्निमान् धूमादित्यादौ महानसान्यत्वावच्छिन्नसाध्यव्यापकव्यञ्जनवदन्यत्वादिपरिग्रहः ।

मूले आर्द्रेन्धनवत्त्वादावुपाधाविति । यद्धर्मावच्छिन्नसाध्यव्यापकत्वं ग्राह्यमिति शेषः । पक्षनियतेति । पक्षनिष्ठेत्यर्थः ।

नन्वयोगोलकं धूमवद्वह्नेरित्यादावप्ययोगोलकमहानसान्यतरत्वादिरूपतादृशपक्षधर्मसम्भव इति मूलासङ्गतिमाशङ्क्याह । न चेति । अनेन । पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेनैव । ज्ञातस्य दूषकत्वमिति । शुद्धसाध्यव्यापकतया ज्ञातस्यापि दूषकत्वात्तादृशाव्यापकताग्रहदशायामयोगोलकमहानसान्यतरत्वादिरूपपक्षधर्मोपस्थित्यनैयत्येन पक्षधर्मावच्छिन्नसाध्यव्यापकताग्रहानैयत्यादिति

भावः । इत्याहेति । तादृशधर्माभावादित्यस्य तादृशधर्मोपस्थित्यनियमादित्यर्थकत्वादिति भावः । केचित्तु गुणत्वाद्यवच्छिन्नसाध्यव्यापकतया उक्तातिप्रसङ्गवारणाय पक्षधर्मपदेन पक्षधर्मनियतधर्मश्चेद्विवक्ष्यते तदा दूषणान्तरमाह । आर्द्रेन्धनेति । अयोगोलकं धूमवद्वह्नेरित्यादावित्यादिः । तादृशधर्माभावादिति । अयोगोलकमहानसान्यतरत्वादेः पक्षमात्रवृत्तित्वादिरूपपक्षनियतत्वाभावादित्यर्थ इति मूले व्याकुर्वते ।

(चि०) अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः, तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः, श्यामत्वे शाकपाकजत्वमुपाधिरिति । तन्न । पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्, जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नसाध्यव्यापकपृथिवीत्वस्योपाधित्वप्रसङ्गात्, सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे वा साधनावच्छिन्नेत्यस्य व्यर्थत्वप्रसङ्गाच्च ।

(दी०) पक्षधर्मेति । विरुद्धस्थलीयोपाध्यव्याप्तिरपि द्रष्टव्या । साधनावच्छिन्नेति । स्वावच्छिन्नेत्यर्थात्साधनवतीति विशेषणाद्वा न व्यभिचारः ।

(गा०) अवच्छेदकांशप्रयोजनमाह मूले । तेनेति । विरुद्धस्थले साधनावच्छिन्नसाध्याप्रसिद्ध्या तत्स्थलीयोपाधिमात्र एवाव्याप्तेरपि सत्त्वात् स्वयं तद्दोषमाह दीधितौ । विरुद्धेति ।

मूले जलं प्रमेयमित्यादिनातिव्याप्तिर्दर्शिता, अत्र च पूर्वलक्षणद्वये क्वापि सङ्केतो वस्त्वतिव्याप्तिसम्भवः, हेतोः साध्यव्याप्यत्वे तद्विशिष्टसाध्यव्यापकस्य तदव्यापकत्वाप्रसक्तेरिति ध्येयम् । येन रूपेणोपाधेरसाधकत्वसाधकता तदेव रूपमुपाधित्वमित्यभिमानेन

द्यवच्छिन्नसाध्यव्यापकताघटितमुपाधित्वं निराकरोति मूले । सोपाधित्वादिति । व्यभिचारित्वे । व्यभिचारित्वरूपसोपाधित्वहेतौ ।

ननु मित्रातनयत्वं श्यामत्वासाधकम्, मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकव्यभिचारित्वादित्याद्यनुमानमसम्भवदुक्तिकमेव, तादृशहेतुमति काकत्वादौ श्यामत्वसाधकत्वसत्त्वेन व्यभिचारादित्यत आह दीधितौ । स्वावच्छिन्नेति । न व्यभिचार इति । हेतुस्थस्वपदेन हेतुमत एवोपादेयतया काकत्वादौ काकत्वाद्यवच्छिन्नश्यामत्वव्यापकव्यभिचाराद्यसम्भवादिति भावः ।

स्वपदार्थाननुगमेन मित्रातनयत्वादिपक्षकानुमाने विशिष्य मित्रातनयत्वादिकमेवोपादेयम्, तथा च दर्शितव्यभिचारस्तदवस्थ एव, मित्रातनयत्वरूपस्ववृत्तित्वविशिष्टस्य व्यभिचारस्य हेतुत्वे च विशिष्य विशेष्यतावच्छेदकस्य वैयर्थ्यं दुर्वारमेवेत्याशङ्क्य समाधानान्तरमाह । साधनवतीति । विशेषणाद्वेति । मित्रातनयत्वादिमन्निरूपितत्वस्य व्यभिचारविशेषणाद्वेत्यर्थः । मित्रातनयत्वादिनिरूपितवृत्तिमात्रस्य हेतुत्वे श्यामत्वादावेव व्यभिचारस्स्यात् तद्वारकतया वृत्तिविशेषणोपाध्यभावाधिकरणपर्यन्तसार्थक्यम् ।

(चि०) किञ्च पक्षत्रयेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात्केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयः, तथा चार्थान्तरम्, केवलसाध्ये हि विवादो न तु विशिष्टे ।

(दी०) ननु शुद्धसाध्याव्यापकस्थले पक्षासिद्धिशङ्कानिरासायावच्छेदकांशोऽपि निवेशनीयः । अखण्डाभावस्य घटकतया च न वैयर्थ्यम्, येन रूपेणोपाधिता विशेषणवति तद्रूपावच्छिन्नव्यभिचारस्यैव वा हेतुत्वम्, शुद्धसाध्यव्यापकस्थले तु साध्यव्यापकव्यभिचारो व्यापकतावच्छेदकार्द्रेन्धनत्वाद्यवच्छिन्नव्यभिचारो वा हेतुरुपन्यसनीयः, प्रायशस्तद्धर्मवति तद्धर्मविशिष्टसाध्यव्यापकव्यभिचारित्वस्य हेतुत्वेऽपि

न वैयर्थ्यम्, अखण्डाभावस्यातिरिक्तत्वात् । वस्तुतस्तु उपाधिना असाधकत्वासाधनेऽपि न क्षतिः, उद्भावितयावद्दोषैरेव तत्साधनीयमिति नियमाभावात्, तदुन्नीतव्यभिचारेण तत्साधनसम्भवात् सन्दिग्धोपाधिसमशीलस्सन्दिग्धो व्यभिचार इत्यत आह । किञ्चेति । केवलेति । तथा च केवलस्यैव साध्यस्य व्यभिचारो व्यतिरेको वा जिज्ञासितो विरोधित्वात्, न तु विशिष्टस्य, अविरोधित्वादिति भावः ।

(गा०) किञ्चेत्यादिदूषणमवतारयितुं पूर्वदूषणोद्भावनायासाधकतासाधकव्यभिचारप्रतियोगिन एव उपाधित्वनियमेऽपि तत्साधकशरीरप्रविष्टरूपमेव उपाधित्वमिति नियमो नास्तीत्याशयेन यत्र साधनावच्छिन्नत्वप्रवेशे व्यापकतायां नाभावान्तरस्य घटकता तत्र तत्प्रवेश एव नास्ति, यत्र तत्प्रवेशस्तत्राभावान्तरस्य घटकतया तद्वैयर्थ्यमित्याह नन्वित्यादिना । शुद्धसाध्याव्यापकस्थले एवेति । शाकपाकजत्वाद्युपाधिस्थल एवेत्यर्थः । असिद्धिशङ्कानिरासायेति । मित्रातनयत्वादौ शुद्धश्यामत्वादिव्यापकव्यभिचारहेतोरित्यादिः । व्यभिचारिणि मित्रातनयत्वादिहेतौ शुद्धश्यामत्वादिव्यापकस्यान्तश्श्यामत्वादेरेव व्यभिचारस्य सत्त्वेनासिद्धिरिह इति शङ्कोपादानं साध्यव्यभिचारस्य सिद्धिदशायां तेनैवासाधकतापादनसम्भवादुपाधेरनुपयोगेन तत्सन्देहदशायामिव उपाधिव्यभिचारेणासाधकत्वस्य साधनीयतया साधनावच्छिन्नत्वानिवेशे निश्चितव्यभिचारप्रतियोगिनश्शाकपाकजत्वादेरनन्तर्भावेनासिद्धिशङ्का, तदन्तर्भावे च तद्व्यभिचारनिश्चयसत्त्वेन हेतुसंशयनिरास इति भावः ।

अखण्डाभावस्येति । अतिरिक्तस्येति शेषः । शाकपाकजत्वादिव्यावृत्ताच्छुद्धश्यामत्वादिव्यापकतावच्छेदकत्वात्तत्साधारणसाधनविशिष्टश्यामत्वादिव्यापकतावच्छेदकत्वात्मकाभावस्य भिन्नतया तद्घटितहेतोः शुद्धश्यामत्वव्यापकताघटितहेत्वघटिततया न वैयर्थ्यमित्यर्थः । उक्तनियमाभ्युपगमे ऽवच्छिन्नसाध्यव्यापकोपाधिस्थलेऽपि अवच्छिन्नसाध्यव्यापकतावच्छेदकशाकपाकजत्वादिकं विशिष्योपादाय शाकपाकजत्वावच्छिन्नाभावप्रतियोगित्वादित्येव हेतुर्वक्तव्यो

न तु विशिष्टश्यामत्वादिव्यापकतावच्छेदकत्वेन सन्निवेश इति न वैयर्थ्यशङ्कापीत्याह । येन रूपेणेति । विशेषणवतीति । विशेषणम् । साध्यनिष्ठोपाधिव्याप्यतावच्छेदकं साधनं पक्षधर्मो वा तद्वन्निरूपितस्येत्यर्थः ।

शुद्धसाध्याव्यापकस्थले एवेत्यनेन शुद्धसाध्यव्यापकोपाधिस्थलीयं विशेषं प्रदर्श्य विशिष्योपाधितावच्छेदकनिवेशे उभयस्थलाविशेषं दर्शयति । शुद्धसाध्येति । शुद्धसाध्यव्यापकार्द्रेन्धनादिव्यभिचारेण वह्न्यादेर्धूमाद्यसाधकत्वसाधने वह्न्यादिविशिष्टधूमादिव्यापकत्वेनार्द्रेन्धनादेरुपादाने वह्न्यादिविशिष्टत्ववैयर्थ्यं दुर्वारम्, धूमाद्यधिकरणस्य वह्न्यादिविशिष्टतदधिकरणत्वनियमेन शुद्धधूमादिव्यापकताघटकतद्वन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावाद्वह्न्यादिविशिष्टतदधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्यानतिरिक्तत्वात्. अतस्तत्रावच्छेदकांशो नोपादीयते, तदनिवेशेऽपि निश्चितव्यभिचारप्रतियोगिन आर्द्रेन्धनाद्युपाधेर्हेतुघटकतया तदसिद्धिशङ्काया असम्भवात्, व्यापकसावच्छेदकपर्यन्तमेव वा ऽनिवेश्य वस्तुतो व्यापकतावच्छेदकमार्द्रेन्धनत्वादिकं विशिष्य निवेश्य तदवच्छिन्नव्यभिचारो हेतुतयाऽयसनीयः, व्यापकतावच्छेदकत्वस्य च वह्निरूपपक्षवृत्तिव्यभिचारप्रतियोगितावच्छेदकं आर्द्रेन्धनत्वं यदि धूमासाधकत्वसाधकव्यभिचारप्रतियोगितावच्छेदकं न स्यात् धूमव्यापकतावच्छेदकं न स्यात् व्यापकव्यभिचारिणो व्याप्यव्यभिचारनियमादिति तर्कसम्पादनोपयोग इत्यर्थः । शुद्धसाध्यव्यापकार्द्रेन्धनादेरपि पक्षधर्मायोगोलकमहानसान्यतरत्वाद्यवच्छिन्नसाध्यव्यापकत्वेनासाधकतासाधकशरीरे निवेशसम्भवति, तद्विशिष्टसाध्यव्यापकताघटकस्याभावस्य शुद्धसाध्यव्यापकताघटकाभावभिन्नतयाऽवैयर्थ्यादित्याह । प्रायश इति । एकमात्रवृत्तितद्धूमादिसाध्यके विशिष्टसाध्यव्यापकताघटकस्याभावस्यातिरिक्तत्वासम्भवात् प्रायश इत्युक्तम् । साध्यादौ व्यभिचारवारणाय तद्धर्मवतीति व्यभिचारविशेषणम् । असाधकतासाधकव्यभिचारप्रतियोगिन एव उपाधित्वमिति नियमस्याप्रामाणिकतया व्यर्थविशेषणतया उपाधिव्यभिचारस्य तदसाधकत्वेऽपि न क्षतिरित्याह । वस्तुतस्त्विति ।

ननूद्भावितहेतुदोषेणासाधकत्वे साध्यते इति नियमानुरोधादु-

पाधौ दोषतयोद्भाविते तेनासाधकत्वसाधनमावश्यकम्, तथा चाव-च्छिन्नसाध्यव्यापकोपाधिर्नोद्भावयितुं शक्यः व्यर्थविशेषणतया तेनासाधकत्वसाधनासम्भवादिति नासौ दोष इत्यत आह । उद्भावितेति । उक्तनियमसत्त्वेऽपि बाधद्दोषान्तर्भावेन तथा नियमाभावे-नोक्तोपाधिनाऽसाधकत्वासाधनेऽपि क्षतिविरहादित्यर्थः । तर्हि त-त्साधकस्तत्र का दोष इत्याकाङ्क्षायामाह । तदुन्नीतेति । व्यभिचार-स्योपाध्युन्नीतत्वकथनं व्यभिचारे पक्षधर्मताज्ञानसम्पत्तिमुपाध्यु-द्भावनस्य साध्यर्थ्यं च सूचयितुम् । अवच्छिन्नसाध्यव्यापकोपाधिना व्यभिचारसाधने व्यर्थविशेषणतापरिहारकोक्तरीत्यादरे यद्यप्यसा-धकत्वसाधनमपि तेन सम्भवति तथापि तदनावश्यकतया मूल-कृतां तद्दूषणमेवायुक्तम्, किं तत्र दूषणोद्धारेणेत्याशयेनेदम् ।

ननु सन्दिग्धव्यभिचारेणासाधकत्वसाधनं न सम्भवति, यत्रो-पाधिर्व्यभिचारसंशयमेवादधाति तत्र उपाधिनैवासाधकत्वं साध-नीयमित्यत आह । सन्दिग्धोपाधीति । सन्दिग्धोपाधेरेव व्यभिचा-रसंशयाधायकत्वम् निश्चितेन तेन व्यभिचारानुमानस्यैव सम्भवा-त्, तथा च व्यभिचारसंशयस्थले उपाधेरपि सन्दिग्धतया नासाध-कत्वसाधकत्वसम्भव इत्युपाधिसंशयविषयत्वमेव तत्साधकत्वेनोपे-यम्, तथा च तस्यैव व्यभिचारसंशयविषयत्वस्यापि तत्रासाधकत्व-साधकत्वेसम्भव इति तस्य निश्चितत्वाद्व्यभिचारादेरेव दोषतया तत्संशयस्यादोषत्वेऽपि न क्षतिः, उपाधिसंशयस्याप्यदोषतया दोषे-णैवासाधकतासाधनमिति नियमस्यानभ्युपगमादित्यर्थः ।

मूले पक्षद्वयेऽपीति । पक्षधर्मावच्छिन्नसाध्यव्यापकस्योपाधिता-पक्षे साधनावच्छिन्नसाध्यव्यापकस्योपाधितापक्षे चेत्यर्थः । प्रसा-ध्येति । विशिष्टसाध्यव्यापकस्य उपाधेर्व्यभिचारेण व्यतिरेकेण वा साधने पक्षे चेत्यादिः । पश्चादिति । तादृशोपाधिव्यभिचारादिना प्रथमं शुद्धसाध्यव्यभिचारादिसाधनासम्भवादिति भावः । साध-नीय इति । विशेषणव्यभिचारविशिष्टविशिष्टव्यभिचारेण विशेषण-विशिष्टव्यतिरेकेण चेत्यादिः । अर्थान्तरमिति । विशिष्टसाध्यव्य-भिचारादिसाधने इत्यादिः ।

विशिष्टसाध्यस्य विप्रतिपत्तिविषयत्वाभावस्य विशिष्टव्यभिचा-रादिसाधने ऽर्थान्तरताहेतुत्वं मूलोक्तमुपपादयति दीधितौ । तथा

घेति । केवलसाध्यस्यैव विप्रादविपयत्व इत्यर्थः । विरोधित्वादिति । तादृशसाध्यसिद्धिविरोधित्वादित्यर्थः । यादृशसाध्यं विप्रतिपत्तिविषयस्तत्साधनायोपन्यस्तहेतौ तद्धर्मकताविरोधिदोपतद्भावयोः स्सन्दिग्धतया तादृशसंशयविरोधितदेकतरकोटिनिर्णये निश्चयोदयादिति भावः । न तु विशिष्टस्येति । व्यभिचार इत्यादिरनुषञ्जनीय. ।

(चि०)अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचारः साध्य इति चेन्न । अप्राप्तकालत्वात् । प्रथमं साध्यव्यभिचार एवोद्भाव्यः, तत्रासिद्धावुपाधिरिति चेत् ? तर्हि प्रकृतानुमाने नोपाधिर्दूषणं स्यात् । किञ्च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचार एवोपन्यसनीयो नोपाधिः ।

(दी०) उद्भाव्यः । विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचारेण साधनीयः । तत्र । विशिष्टव्यभिचारे असिद्धौ उद्भावितायां तत्सिद्धये उपाधिरुद्भाव्य इति । तर्हीति । प्रकृतानुमितिविरोधिशुद्धसाध्यव्यभिचारासाधकत्वादिति भावः । अथ वक्ष्यमाणरीत्याऽवच्छिन्नसाध्यव्यापकेनाप्युपाधिना आहत्यैव साध्यव्यभिचारस्साधनीय इत्यत आह । किञ्चेति । पक्षधर्मावच्छिन्नेत्यादिकमुपाधिमात्रव्यभिचारोपलक्षकम् । न प्राधान्येनोपाधिर्व्याप्त्यादिविरहेणाहेतुत्वात् ।

(गा०) ननु प्रथमं साध्यव्यभिचारादेराकाङ्क्षितत्वेऽपि तत्साधकतया विशिष्टव्यभिचारादेरप्याकाङ्क्षितत्वादुपाधिना तत्साधने नार्थान्तरमित्याशयेन शङ्कते मूले । अथेति । विशिष्टसाध्यव्यभिचार इति । साधनीय इति शेपः । अप्राप्तकालत्वात् । शुद्धसाध्यव्यभिचारमनुद्भाव्य उपाधिना विशिष्टव्यभिचारसाधने तदानीमनाकाङ्क्षितत्वरूपाप्राप्तकालत्वस्य तावताऽपि दुर्वारत्वादित्यर्थः ।

उद्भावितव्यभिचारासिद्धिर्न दोषः, हेत्वसिद्धेरेव दोषत्वादतस्तत्रासिद्धाविति तत्पदेन साध्यव्यभिचारस्य प्रक्रान्तस्य परामर्शे-

ऽसङ्गतिरतः तत्परामर्शानवलम्बार्थं पूरयन् उद्भाव्येति व्याचष्टे दीधितौ । उद्भाव्य इति । विशेषणीभूतमित्रतनयत्वाद्यव्यभिचारित्वरूपहेतुविशेषणं हेतौ सिद्धमेवेति विशेष्यमात्रपरामर्शकतां तत्पदस्याह । तत्र विशिष्टव्यभिचार इति । यत्सिद्धौ उपाधिरित्यत्र सतिसप्तम्याऽऽकाङ्क्षितस्य सत्त्वामिति क्रियान्तरस्य पूरणे ऽसङ्गतिः, उक्तहेतौ वास्तविकासिद्धेरसत्त्वादतः क्रियान्तरं पूरयति । उद्भावितायामिति । उपाध्युद्भावनस्य फलमाह । तत्सिद्धये इति । पक्षीभूतप्रकृतहेतौ तत्सिद्धयेत्यर्थः । उपाधिरिति मूले क्रियान्तराकाङ्क्षापूरणाय पूर्वोक्तक्रियापदमनुषञ्जयति । उद्भाव्य इति । उपाधेः प्रकृतानुमाने ऽदूषकत्वापत्तौ मूलाभिप्रेतमाकाङ्क्षितहेतुमाह । प्रकृतेति । विरोधीति । साक्षाद्विरोधीत्यर्थः । व्यभिचारस्यापि शुद्धसाध्यव्यभिचारोन्नयनद्वारा विरोधित्वाद्यथाश्रुतासङ्गतिः, परम्परया विरोधिनस्साधकस्य दोषत्वे उपाधिसाध्यतत्साधकपरम्परया अपि दोषतापत्तेरिति भावः । वक्ष्यमाणेति । सिद्धान्ते वक्ष्यमाणेत्यर्थः । सा च रीतिः विशिष्टव्यभिचारसाधके विशिष्टव्यापकव्यभिचाररूपेहेतौ विशेषणव्यभिचारबाधराहित्यम्, व्यभिचारवारणाय विशेषणाव्यभिचारित्वेन तादृशहेतु विशेष्य शुद्धसाध्यव्यभिचारस्यैव साध्यस्यादरो वा । शुद्धसाध्यसाधनावच्छिन्नसाध्यव्यापकयोरुपाध्योस्तव्यभिचारेणैव साध्यव्यभिचारसाधकतया तत्र तद्व्यभिचारमात्रस्य उद्भावयितुमुचिततया सङ्कोचेन पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिमात्रस्योपन्यसनीयताव्यवच्छेदो न युज्यते, ऽतस्तादृशोपाधिसामान्योपलक्षणतामाह । पक्षेति । उपाधिव्यभिचारे हेतावुपाधिविशेषणत्वेनावश्योपादेयतया तदुद्भावनव्यवच्छेदासङ्गतिमाशङ्क्य पूरयति । प्राधान्येनेति । अत्रायमुपाधिरित्याकारेण इतराविशेषणतयेत्यर्थः । हेतुं पूरयति । व्याप्त्यादीति । साध्यव्यभिचारव्याप्त्यादीत्यर्थः । आदिपदात्साधनरूपपक्षधर्मतापरिग्रहः । व्यभिचारस्य सन्दिग्धत्वे मानाभावादिति भावः ।

(चि०) स्यादेतत्, पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः, पर्यवसितं साध्यं पक्षधर्मतावलभ्यम्, यथा शब्दोऽनित्यत्वातिरिक्तशब्दधर्मा-

निरिक्तधर्मंधान् मेयत्वादिरयञ्च पर्यवसितं यत्साध्यम-
नित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः ।

(दी०) पर्यवसितेति । अत्र लक्ष्यतानियामकं दूषकता-
बीजं सत्प्रतिपक्षोन्नायकत्वम्, व्यभिचारोन्नायकत्वस्य तत्त्वे
साध्यवत्पक्षावृत्तौ व्यभिचारोन्नायकेऽव्याप्तेः, वक्ष्यमाणकृतक-
त्वोपाधेरदूषकतापत्तेश्च । न हि तद्व्यभिचारेण हेतौ शुद्धसाध्य-
व्यभिचारश्शब्दयोन्नयनः, बाधानवतारदशायां तादृशव्यभि-
चाराप्रसिद्धेः । न च पर्यवसितसाध्यव्यभिचारस्साध्यव्याप्य-
ताबोधविरोधीति । न चैवमपि कथं तत्र सद्धेतावुपाधिसम्भ-
वः ? मीमांसकमतेन तदभिधानात् । शब्दशब्दयोर्भावप्रधानत्वा-
द्वा । पक्षतावच्छेदकादेरुपाधितावारणाय पक्षावृत्तित्वे सतीति
विशेषणीयम् ।

(गा०) तत्त्वे । लक्ष्यतानियामकत्वे । साध्यवत्पक्षावृत्तौ । साध्य-
वत्पक्षावृत्तितया पक्षधर्मतावच्छेदकविपक्षीयसाध्यव्यापके पाकादिपक्ष-
कश्यामत्वादिसाध्यकमित्रातनयत्वादिहेतुकशाकपाकजत्वाद्युपाधौ
उपदर्शितरीत्या व्यभिचारोन्नायके । अव्याप्तेरिति । सत्प्रतिपक्षो-
न्नायकस्य लक्ष्यत्वे च पक्षस्य साध्यवत्तया तत्र साध्याभावसाध-
कत्वेनालक्ष्यत्वान्नाव्याप्तिरिति भावः ।

दोषान्तरमाह । वक्ष्यमाणेति । अनुपदं सङ्क्रमणीये तल्लक्षण
इत्यर्थः । अदूषकतापत्तेरिति । व्यभिचारान्नायकतया लक्ष्यतानुपप-
त्तेरित्यर्थः । तथा चाग्रिममूलविरोधस्स्यादिति भावः । तादृशो-
पाधेस्सत्प्रतिपक्षोत्थापनमविकलम्, पक्षधर्मताबलेन तत्रानित्य-
त्वभाने तद्व्यापककृतकत्वाभावज्ञानस्य प्रतिबन्धकत्वात्, इतरथा-
ऽोद्व्यापकाभावच्छेदकरूपेणैव विशेषभानमते समानाविषयकत्व-
मात्रस्य विरोधिताबीजत्वेन विशेषरूपेण व्यापकाभावज्ञाने सामान्य-
रूपेणापि विरोधाङ्गानात् । एवं विशिष्टसाध्यव्यापकाभावज्ञानस्यापि
विशेषणवत्तानिश्चयसहकृतस्य शुद्धसाध्याभावानुमितिसामग्रीत्वेन
शुद्धसाध्यानुमितिप्रतिबन्धकतया वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रय-

त्वादित्यादौ उद्भूतरूपादेस्तथात्वमपि फलमित्यवधेयम् ।

ननु शब्दस्य नित्यतापक्षे प्रमेयत्वमानित्यत्वाभिन्नो यः शब्दधर्मस्तद्भिन्नधर्मव्यभिचारि शब्दत्ववति कृतकत्वव्यभिचारित्वादेति रीत्या वक्ष्यमाणसाध्यव्यभिचारोन्नायकत्वं 'कृतकत्वस्य सम्भवत्येव व्यभिचारादिविरहादित्यत आह । बाधेति । व्यभिचाराप्रसिद्धेरिति । उक्तसाध्याभावस्य पक्ष एव सत्त्वेन तत्प्रसिद्धिं विना शब्दत्वादौ तद्वद्वृत्तित्वरूपव्यभिचारसाध्यस्य प्रसिद्धसम्भवादित्यर्थः । भावसाध्यके साध्यप्रसिद्धिं विना व्याप्यग्रहेण अनुमानायोगादिति शेषः । बाधावतारदशायां च तत एवागमकत्वसम्भवात्तस्योपाधित्वाव्यवस्थितेरिति भावः ।

ननूपदर्शितसाध्यतावच्छेदकावच्छिन्नाभावस्य पक्षातिरिक्तेऽप्रसिद्धावप्यनित्यतारूपपर्यवसितसाध्यस्य तत्त्वेनाभाव आकाशादौ प्रसिद्ध इति तदभाववद्वृत्तित्वरूपव्यभिचारस्य आकाशादिवृत्तौ बाधानवतारदशायामपि प्रसिद्धिरस्तीत्यत आह । न चेति । न हीत्यर्थः । साध्यव्याप्यतेति । उपदर्शितसामान्यधर्मावच्छिन्नसाध्यव्याप्यतेत्यर्थः । बोधविरोधीति । तथा च तादृशव्याप्तिबोधाधीनायां पक्षधर्मताबलान्नित्यत्वसिद्धौ विशेषव्यभिचारस्याद्रोषतया तदुन्नयनेन नोपाधेर्दूषकत्वमिति भावः । न्यायमते शब्दस्यानित्यतया उक्तानुमानं सदनुमानमेवेति तत्र कृतकत्वे उपाधिलक्षणसङ्गमनं विरुद्धमिति शङ्कते । न चैवमपीति । मीमांसकमतेनेति । शब्दनित्यतावादिनां तेषां मते तदनुमानस्य दुष्टत्वादिति भावः । स्वमतेऽपि तन्मूलं सङ्गमयति । शब्दशब्दयोरिति । पक्षस्थसाध्यस्थशब्दपदयोरित्यर्थः । भावप्रधानत्वात् । शब्दत्वपरत्वात् । तथा च न्यायमते शब्दत्वस्य नित्यतया तत्रोक्तरीत्या ऽनित्यत्वसाधकमनुमानमसदेवेति भावः । सत्प्रतिपक्षनिर्वाहायानित्यत्वशून्यशब्दत्वस्य पक्षत्वे साध्ये शब्दत्वानन्तर्भावे शब्दत्वे पक्षे शब्दधर्मातिरिक्तस्याबाधेनानित्यत्वपर्यवसानामिति तत्रापि भावप्रधानत्वादरः । तद्धर्मविशिष्टे तद्धर्मवद्वृत्तित्वादिविशिष्टस्य संशयाभावाच्छब्दत्वादिविशिष्टे शब्दावृत्तिधर्माभावस्य सुनिश्चेयतया तत्रानित्यत्वस्य वस्तुनो बाधितस्यापि संशयसम्भवेन तत्र पर्यवसानसम्भव इत्यवधेयम् । पक्षतावच्छेदकादेरिति । पर्वतो वह्निमानित्यादौ पर्व·

वसितपर्वतीयवह्न्यादिरूपसाध्यव्यापकसाधनाव्यापकपर्वतत्वादावि-त्यर्थः । विशेषणायमिति । इदं च एतन्मतेऽपि साधनव्यापकस्य नोपाधितेत्यभिमानेन विशेष्यदलस्यावश्यकतया स्वतन्त्रविशेषणं द-त्तम् । वस्तुतो विशेष्यदलस्य सत्प्रतिपक्षोत्थापकतायामनुपयो-गितयाऽव्याप्तिकरत्वेन च तेनैव पक्षावृत्तित्वं विवक्षणीयमिति ।

(चि०) यदि च तथैव कृतकत्वमपि शब्दे साध्य-ते तदा अनित्यत्वमुपाधिः, तदुक्तम् यथोक्तसाध्य-नियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः पर्यवसितं नि-यमवन्दूषकताबीजसाम्राज्यादिति । अनेन पक्षधर्मसा-धनावच्छिन्नसाध्यव्यापकोपाधिस्सङ्गृह्यते, तादृशा-साध्यस्य पर्यवसितत्वादिति तन्न । एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यद्रव्यासमवेतं जन्य-महत्त्वानधिकरणद्रव्यत्वादित्यत्र नित्यस्पर्शद्रव्यसमवे-तत्वमुपाधिस्स्यात् । भवति हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यम्, तस्य व्यापकं साधनाव्यापकं च ।

(दी०) यदि चेति । एतच्च स्वतन्त्रकृतकत्वसाधनदशायां बोध्यम् । अनित्यत्वसाधनोपयोगितया तु कृतकत्वसाधने द्वयो-रपि सन्दिग्धत्वेनैकतरव्यतिरेकस्यान्यतरव्यतिरेकासाधकत्वा-त् । एवं हीत्यादि । असमवेतत्वेन द्रव्यासमवेतत्वेन वा अर्था-न्तरवारणाय सावयवत्व इति । साध्ये द्रव्यपदं नित्यद्रव्यवृत्ति-तायास्स्फुटतरसिद्ध्यर्थम्, द्रव्यसमवेते ऽनित्यद्रव्यासमवे-तत्वस्य नित्यद्रव्यसमवेतत्वमादाय पर्यवसानात् । हेतौ च जन्यपदं परमाणुनित्यत्वासिद्धिदशायामाकाशादौ व्याप्तिग्रहाय । विशिष्टाभावस्यातिरिक्तत्वाच्च वैयर्थ्यम् । नित्यमहत्त्वव्यावृत्ता-नित्यावन्महत्त्ववृत्तिजातिपरिचयाय तदिति तु न । तादृशजा-

तौ मानाभावात् । वैभवापेक्षिकापकर्षव्यवहारस्यानुगतजातिभिरेव सम्भवात् । तुल्यन्यायतया त्रसरेणुवद्दव्यापेक्षिकोत्कर्षेणैकजात्या सङ्करप्रसङ्गाच । निरवयवेति । साध्योपाध्योर्व्याप्तिदार्ढ्यप्रदर्शनाय द्रव्यपदम्, गमकता तु तेन विनापि । पर्यवसितसाध्यसमव्याप्त एवोपाधिरिति मतेनेदमित्यपि कश्चित् ।

(गा०) मूले तथैवेति । यत्सिद्धिरुद्देश्या पक्षावृत्तिसामान्यसाधारणतद्वृत्तिनोक्तसमशीलरूपेणैवेत्यर्थः ।

दीधितौ स्वतन्त्रकृतकत्वसाधनेति । कृतकत्वस्यानित्यत्वसाधनाप्रयोजनकसाधनेत्यर्थः । अनित्यत्वासाधने उद्भावितस्य कृतकत्वोपाधेः सत्प्रतिपक्षोत्थापकतानिराकरणाय तत्साधने नित्यत्वस्योपाधित्वासम्भवमाह । अनित्यत्वेति । द्रव्यसमवेतत्वरूपसाध्यपर्यवसितिवशानुसरणप्रयोजनमाह । असमवेतत्वेन द्रव्यासमवेतत्वेन चेति । उभयथैव अनित्यद्रव्यासमवेतत्वोपपत्तेरिति भावः । समवेतत्वमात्रसिद्धावपि असमवेतत्वेनार्थान्तरानवकाशात् द्रव्यासमवेतत्वानुधावनम् । अर्थान्तरवारणायेति । अर्थान्तरेण।नित्यद्रव्यसमवेतत्वरूपसाध्यपर्यवसानासम्भवस्य वारणायेत्यर्थः ।

मूले इत्यनेनेति । इति रीत्या द्व्यणुकसमवायिना नित्यद्रव्यस्य साधने इत्यर्थः ।

ननु पक्षधर्मताबलाद्व्यापकतावच्छेदकान्तस्यैव सामान्यरूपेण विशेषरूपेणापि वा सिद्धेः कथमभावसाध्यकानुमानान्नित्यद्रव्यसमवेतत्वसिद्धिः ? अत्र केचित् द्रव्यसमवेतत्वसिद्धौ तदपि पक्षतावच्छेदकेऽन्तर्भाव्यम्, तच्च द्विविधम् नित्यद्रव्यसमवेतत्वरूपमनित्यद्रव्यसमवेतत्वरूपं च, तत्रानित्यद्रव्यसमवेतत्वरूपेणाविशेषाभावरूपसाध्यव्याप्यहेतुमत्तानिश्चयरूपतादृशविशेषभानविरोधिसहकृतात्सामान्यरूपेणोक्तपक्षतावच्छेदकस्य साध्यधर्मितावच्छेदकतया भासकात्तादृशव्याप्यवत्तापरामर्शान्नित्यद्रव्यसमवेतत्वात्मकविशेषरूपेण तदुद्भावनमविरुद्धमिति तन्न । मूलकृता सावयवत्वस्य पक्षतावच्छेदकत्वेनानुपादानात्स्वतन्त्रतत्सिद्धेरेवोक्तत्वात् । भवतु वा सावयवत्वस्य पक्षतावच्छेदकप्रवेशो मूलाभिप्रेतः, तथापि

पक्षतावच्छेदकतया भाने पर्यवसितसाध्यताविरोध एव ।

वस्तुतस्तु यथा सामान्यानुमितिसामग्री एकविशेषबाधसहकृता ऽपरविशेषरूपेण सामान्यं बोधयति, तथा विशेषबाधसामग्र्यपि सामान्यनिश्चयसहकृताऽपरविशेषरूपेण सामान्यबोधिका, सामान्यनिश्चयविशेषान्तरबाधयोरेकतरसामग्र्या सह परसंवलनस्य द्विरूपस्य एकविधानुमितिजनकत्वानुभवात् । अतो नित्यद्रव्यासमवेतत्वनिश्चयसाहित्यं द्रव्यसमवेतत्वव्याप्यवत्ताज्ञानमिव द्रव्यसमवेतत्वनिश्चयसाहित्यमनित्यद्रव्यासमवेतत्वव्याप्यवत्ताज्ञानमपि नित्यद्रव्यसमवेतत्वेन सामान्यं गमयति द्रव्यसमवेतत्वेनानित्यद्रव्यासमवेतत्वेन च निश्चये नित्यद्रव्यसमवेतत्वसंशयानुदयात् ईदृशानुभवानादरे इतरबाधबलाद्व्यापकस्यापि विशेषरूपेण भानविलयप्रसङ्गादिति मूलकृताशयः । अत एव भ्रमत्वाभावसाध्यकानुमानाद्भावरूपप्रामाण्यसिद्धिस्तेरङ्गीकृता । न च नित्यद्रव्यसमवेतत्वेनानुपस्थितौ तेन रूपेण भानासम्भवः, विशेष्ये विशेषणमिति न्यायेन अनुमितौ विशेषणतावच्छेदकप्रकारकज्ञानानपेक्षणात् ।

न च यद्रूपावच्छिन्नं बाध्यते तद्रूपविरोधिरूपेणैव विशेषान्तरभानमानुभविकम्, न तु तत्समनियतरूपान्तरेणापि, उक्तस्थले समवेतत्वद्रव्यसमवेतत्वादिना नित्यद्रव्यसमवेतत्वमानस्य त्वयाप्यनभ्युपगमात्, तथा च प्रकृतस्थले ऽनित्यद्रव्यसमवेतत्वान्यत्वविशेषितेन द्रव्यसमवेतत्वेन नित्यद्रव्यसमवेतत्वं भासताम्, न तु अनित्यद्रव्यसमवेतत्वग्रहाविरोधिग्रहाविषयनित्यद्रव्यसमवेतत्वेनेति वाच्यम् । विशेष्यघटितसामान्यवत्तया निश्चिते यादृशविशेषणावच्छिन्नयादृशविशेष्यघटितस्य विशेषरूपावच्छिन्नस्य यत्र बाधः तत्रापरविशेषसिद्धौ तत्र तादृशविशेषणाभावविशेषिततादृशविशेष्यघटितविशेषधर्मप्रकारकत्वानुभवात्, प्रकृते ऽनित्यत्वविशेषणावच्छिन्नद्रव्यसमवेतत्वबाधनिश्चयसाहित्येऽनित्यत्वाभावरूपनित्यत्वविशेषितद्रव्यघटितविशेषप्रकारकताया निष्प्रत्यूहत्वात् । अत एव वह्नित्वाभाववति वह्नित्वप्रकारकत्वस्याभावे सिद्ध्यति वह्नित्ववति वह्नित्वप्रकारकत्वत्वेन भावरूपप्रामाण्यसिद्धिर्मूलकृतोक्ता सङ्गच्छते । यत्र च विशेषणविशिष्टविशेष्यस्य, तादृशविशेष्यविशिष्टस्य वा ऽभावे भासमाने तदुपपादकस्य विशेष्ये

विशेषणाभावस्य भानं तत्र दर्शितविशिष्टाभावादिप्रतियोगिकोटिप्रविष्टतया भासमानतद्विशेषणधर्मितावच्छेदकत्वमेव पर्यवसितसाध्यसिद्धौ विशेषणाभावधर्मितावच्छेदकतानियामकम्, दण्डवान् पुरुषो रक्तदण्डाभाववानित्यादौ पुरुषादिरूपधर्मिणि पर्यवसितारक्तत्वादिविशेषितदण्डादिभाने च दण्डत्वादेरेवारक्तत्वादिधर्मितावच्छेदकतया भानात्। अत एव पुरोवर्तिनि वह्नि वप्रकारकं ज्ञानं वह्नित्वाभाववति वह्नित्वाप्रकारकमित्याद्यनुमितौ वह्नित्ववति वह्नित्वप्रकारकत्वादिरूपप्रामाण्यज्ञानं वह्नित्वांशे निर्धर्मितावच्छेदकमेव, भ्रमत्वाभावघटकतया भासमानवह्नित्वाभावादेर्धर्मितावच्छेदकाभानादिति द्यणुके ऽनित्यासमवेतत्वसाधने तद्घटकतया भासमानानित्यत्वांशे द्रव्यत्वस्य धर्मितानवच्छेदकतया पर्यवसितनित्यद्रव्यसमवेतत्वभानमपि नित्यत्वांशे निर्धर्मितावच्छेदकमेव स्यात्, नित्यद्रव्यसमवेतं द्व्यणुकमित्याकारिका उद्देश्यभूता सिद्धिर्न स्यादिति द्रव्यपदोपादानमित्याह दीधितौ। साध्येति। स्फुटतरसिद्धिः। नित्यद्रव्यसमवेतत्वत्वेन सिद्धिः। तदर्थम्। एतदेव स्पष्टयति। द्रव्यसमवेत इति। द्रव्यसमवेतत्वेन निश्चित इत्यर्थः। अनित्यद्रव्यासमवेतत्वस्य। अनित्यत्वविशेषितद्रव्यत्वावच्छिन्नसमवेतत्वाभावभानस्य। नित्यद्रव्यसमवेतत्वम्। नित्यत्वविशेषितद्रव्यत्वावच्छिन्नसमवेतत्वम्। आदाय। अवगाह्य। व्यभिचारावारकस्यापि महत्त्वविशेषणस्य जन्यत्वस्य च हेतावुपादानमुपपादयितुं तत्प्रयोजनमाह। हेताविति। परमाणुनित्यत्वासिद्धिदशायामिति। महत्त्वानधिकरणद्रव्यमात्रस्य नित्यतादशायामित्यर्थः। आकाशादाविति। तदा महत्त्वसामान्यानधिकरणस्यापि भूतपरमाणोर्मनसश्च अनित्यद्रव्यासमवेतत्वरूपसाध्यनिश्चयाविषयत्वेन दृष्टान्तत्वाभावात् परममहतां आकाशादीनामेव दृष्टान्ततायाः स्वीकार्यतया महत्त्वे जन्यत्वविशेषणं विना तेषामपि साधनवैकल्येन तत्त्वानुपपत्तेरिति भावः। तथापि व्यभिचारावारकतया तद्वैयर्थ्यं दुष्परिहरमेवेत्याशङ्कां निराकरोति। विशिष्टाभावस्येति। प्रकृतहेतुघटकस्य जन्यत्वविशेषितमहत्त्वाभावस्येत्यर्थः। अतिरिक्तत्वात्। शुद्धमहत्त्वाभावभिन्नत्वात्। अभावान्तरप्रवेशेऽपि वैयर्थ्याभिमानिनां प्रकारान्तरेण व्यर्थविशेषणतासमाधानमुपन्यस्य दूषयति। नि-

त्येति । जातिपरिचयायेति तादृशजातिपुरस्कारेण महत्त्वस्य हेतुप्रवेशलाभायेत्यर्थः । तत् । जन्यपदम् । तथा च जन्यत्वस्याप्रवेशान्न वैयर्थ्यशङ्का, तादृशजातेः नित्यगगनादिमहत्त्वावृत्तितया गगनादौ न साधनवैकल्यम् । अनित्ययावन्महत्त्ववृत्तितया सर्वत्रैवानित्यद्रव्यसमवेतद्रव्ये तदवच्छिन्नसत्त्वेन साध्यशून्ये तदवच्छिन्नाभावविशिष्टद्रव्यत्वासत्त्वान्न व्यभिचार इति भाव । मानाभावादिति ।

न च द्रव्यचाक्षुषत्वावच्छिन्नं प्रति महत्त्वत्वेन हेतुत्वे नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावाद्गगनादीनामपि चाक्षुषापत्तेरिति तज्जनकतावच्छेदकतया नित्यमहत्त्वव्यावृत्तजातेरावश्यकतेति वाच्यम् । तादृशनियमस्याप्रामाणिकत्वात् महत्त्वत्वेन तद्धेतुत्वेऽपि सहकारिविरहेणापत्त्यभावात् । अवयविमहत्त्वे ऽवयवमहत्त्वस्य सामान्यतो हेतुतायाः प्रामाणिकत्वेऽपि तज्जन्यतावच्छेदिका जातिः त्रुटिमहत्त्वव्यावृत्तैव, तादृशजात्यवच्छिन्नाभावस्य च न हेतुतासम्भवः त्रुटौ व्यभिचारात् ।

ननु त्रसरेण्वादिमहत्त्वे गगनादिमहत्त्वापेक्षया अनुगतापकर्षव्यवहारानियामकतया तत्सिद्धेरावश्यकतेत्याशंक्याह । वैभवेति । अननुगतजातिभिरेवेति । आवश्यकत्रुटित्वत्वादिजातिभिरेवेत्यर्थः । सम्भवादिति । विषयाननुगमेऽपि नानार्थशब्दमादायानुगतव्यवहारे बाधकाभावात्, अन्यथा उक्तजात्याऽप्यणुपरिमाणसाधारणस्य वैभवापेक्षयाऽनुगतापकर्षव्यवहारस्यानुपपत्तिरिति भावः । तादृशव्यवहारेण जातिसिद्धौ बाधकमप्याह । तुल्येति । तुल्यन्यायतया । तुल्ययुक्तित्वात् । सिद्धेति शेषः । उत्कर्षेण । उत्कर्षरूपया जात्या ।

मूले निस्स्पर्शद्रव्यसमवेतत्वमुपाधिस्स्यादिति । गगनादौ चाक्षुषान्यत्वसाध्यव्यापकतारहितमपि निस्स्पर्शद्रव्यसमवेतत्व पक्षे पर्यवसितसाध्यस्यासिद्धतादशायां सर्वदोपाधित्वेन शक्योद्भावनं स्यादित्यर्थः । पर्यवसितसाध्यव्यापकतायास्सुग्रहत्वादिति भावः । तदेवोपपादयति भवति हीति । तस्य व्यापकम् । द्रव्यग्रहव्यापकताकम् । साधनाव्यापकं चेति । गगनादाविति शेषः ।

निस्स्पर्शद्रव्यसमवेतत्वस्य पर्यवसितसाध्यव्यापकत्वे निस्स्पर्शसमवेतत्वेऽपि तथात्वस्याऽऽवश्यकतया द्रव्यत्वनिवेशवैयर्थ्यमित्याशङ्क्याह दीधितौ । साध्योपाध्योरिति । व्याप्तिदार्ढ्यप्रदर्शनायेति । व्याप्तेर्निश्चयलाभायेत्यर्थः । निस्स्पर्शद्रव्येत्युक्तौ साध्यघटकनि-

रवयवद्रव्यस्योपाधिघटकनिस्स्पर्शद्रव्यस्य च भेदलाभेन तत्समवे तत्वरूपसाध्योपाध्योरभेदलाभात् स्वाभिन्न च स्वव्यभिचाराप्र सक्तेरिष्टेति व्याप्तिनिश्चयस्सम्भवति, तदुक्तम्, तादात्म्यकार्यकारणभावाभ्यां व्याप्तिनिश्चय इतीति भाव । गमकता । स्वव्यतिरेकेण पक्षे साध्याभावगमकता । तेन विनापि । द्रव्यत्वान्तर्भावमन्तरेणापि । तथा चोपाधिशरीरे तदन्तर्भावव्यर्थमिति भावः ।

अन्यमतमाह पर्यवसितेति । इति मतेनेदमिति । तथा चोपाधेस्साध्यव्यापकतानिर्वाहाय तच्छरीरे द्रव्यान्तर्भाव, अन्यथा निस्स्पर्शसमवेतगुणत्वादौ निरवयवद्रव्यसमवेतत्वरूपसाध्यासत्त्वेन तदनिर्वाहादिति भावः । व्याप्यतया दूषकतायामनुपयोगाल्लक्ष्यतानियामकदूषकताबीजस्य यथाश्रुतलक्षणस्य च विषमव्यापकसाधारण्यादत्रास्वरस ।

(चि०) किञ्च पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधिः, तदसिद्धौ च कस्य व्यापकः ? न हि सोपाधौ पक्षधर्मताबलात्साध्यं सिद्ध्यति, यस्य व्यापक उपाधिस्स्यादिति ।

(दी०) ननु भवतां शुद्धसाध्यव्यापकस्पर्शवदसमवेतत्वं कथं नोपाधिः ? अनवस्थाभिया कस्यं चिन्निरवयवस्य स्पर्शवतस्सिद्धौ तत्समवेतद्रव्ये साध्याव्यापकत्वादिति चेत् ? तुल्यं ममापीत्यत आह । किञ्चेति । सोपाधौ । सोपाधितया निश्चिते ।

(गा०) भवतामिति । शुद्धसाध्यव्यापकताघटितोपाधितावादिनामित्यर्थ । शुद्धसाध्यव्यापकमिति । शुद्धसाध्यव्यापकतया ग्रहीतुं शक्यमित्यर्थं । कथं नोपाधि । उपाधिग्रहणे कथ न दूषक । समाधित्सयाय स्पर्शवदसमवेतत्वे साध्याव्यापकत्वग्रहं शङ्कते । अनवस्थेति । अनवस्थितावयवपरम्पराकल्पने गौरवभयेनेत्यर्थं । कस्य चिदिति । कश्चित् स्पर्शवान्निरवयव इति सामान्यतस्सिद्धावित्यर्थ । तत्साधकं च स्पर्शत्व असमवेतवृत्तिवृत्ति द्रव्यविभाजकोपाधिव्याप्यताव्च्छेदकत्वात्, शब्दत्ववदित्याद्यनुमान यो-

ध्यम् । लाघवमेव व्याप्तिग्राहकतर्कः । तत्समवेतद्रव्ये । अनित्यद्रव्यासमवेतत्वनिश्चयेन तद्वृत्त्युक्तधर्मे। साध्याव्यापकत्वात् । साध्याव्यापकत्वग्रहात् । स नोपाधिरिति समाधानम । तुल्यमिति । निस्स्पर्शद्रव्यसमवेतत्वेऽपि तथैव पर्यवसितसाध्याव्यापकत्वग्रहसम्भवादिति भावः ।

पक्षधर्मताबलाद्यादृशं साध्यं पक्षे कदाचित्सिध्यति तादृशसाध्यव्यापकत्वविवक्षणे पर्वते महानसीयवह्नेरपि कदाचिदितरबाधबलात्सिद्धेः पर्वतो वह्निमानित्यादौ महानसत्वादिकमप्युपाधिस्स्यात्, अतः पक्षधर्मताबलात् तदानीं यादृशस्य सिद्धिः तादृशसाध्यव्यापकस्तदानीमुपाधिविधया दूषक इति विवक्षणीयमित्याशयेन पक्षधर्मताबलादित्यादि मूलोक्तदूषणम् । साध्यसिद्धौ । साध्यसिद्धिदशायाम् । निष्फल इति । साध्यसिद्धिविघातस्यैव तत्फलत्वादिति भावः । कस्य व्यापक इति । कस्य व्यापकतया उपाधिस्स्यादित्यर्थः । उपाधेर्यदा दूषकत्वं तदा साध्यसिद्धेरसम्भव इत्येव द्रढयति । न हीति ।

सोपाधावपि उपाधेरज्ञाने साध्यसिद्धिसम्भवाद्यथाश्रुतेऽसङ्गतेराह दोषितौ । सोपाधाविति । सोपाधितया निश्चित इति । सन्दिग्धोपाधेस्सत्प्रतिपक्षोन्नायकताविरहात् एतन्मते निश्चयदशायामेवोपाधेर्दूषकतया तदानीं साध्यसिद्ध्यसम्भवकथनेनैव यदा पक्षधर्मताबलात्साध्यसिद्धिस्तदा तत्साध्यव्यापको दूषक इति विवक्षानिराकरणसम्भवात् निश्चितत्वपर्यन्तानुधावनम् । अत्र साध्ये पर्यवसितत्वोपादानं साध्यस्य हेतुव्यापकतावच्छेदकतारूपेण व्याप्यतया न निवेशोऽपि तु येन केनापि रूपेण इत्येतल्लाभाय, तथा च यद्धर्मावच्छिन्नव्यापकः पक्षावृत्तिः तद्धर्माश्रयसाधने उपाधिरिति विवक्षणीयम्, पर्वतादौ महानसीयवह्न्यादेः वह्नित्वाद्यवच्छिन्ननिरूपितव्याप्त्या साधनेऽपि महानसत्वादेरुपाधित्वमिष्टमेव । यन्मते व्यापकतानवच्छेदकप्रकारेणानुमितिरितरबाधादिबलादपि न जायते तन्मते समानविषयकत्वेनैव विरोधितया वह्नित्वादिना महानसीयवह्न्यादिग्रहेऽपि तद्व्यापकमहानसत्वाद्यभावग्रहस्य प्रतिबन्धकत्वात् महानसत्वादेर्दूषकतोपपत्तिः । समानप्रकारकत्वेन विरोधितामते तद्धर्मावच्छिन्नव्यापकस्तद्रूपावच्छिन्नसाधने उपाधि-

रिति विवक्षितेणीयम्, तन्मते इतरबाधादिबलात् महानसीयव-ह्नित्वाद्यवच्छिन्नसिद्धौ महानसत्वाद्यभावग्रहस्य विरोधितया महानसत्वादेर्दूषकतेति ।१

न चैव वाय्वादौ सामान्यतः प्रत्यक्षविषयत्वादिविवादृदशायां सामान्यतस्तत्साधने उद्भूतरूपाद्युपाध्युद्भावनानुपपत्तिः, तदभावग्रहस्य सामान्यतः स्पार्शनप्रत्यक्षविषयत्वादिसिद्धावविरोधित्वात्, समानविषयकत्वमात्रेण विरोधित्वेऽपि सामान्यतो मानसप्रत्यक्षविषयत्वादिसिद्धावतथात्वादिति वाच्यम् । समानविषयकत्वमात्रेण विरोधितामते वाय्वादौ प्रमाणान्तरेण मानसप्रत्यक्षादिविषयत्वादिबाधग्रहदशायां तादृशोपाध्युद्भावनोपपत्तेः, समानप्रकारकत्वेन विरोधित्वेऽपि बहिर्द्रव्यत्वादिविशेषितोद्भूतरूपाद्यभावेन शुद्धसाध्याभावसाधनसम्भवासद्धर्मैव तादृशोपाध्युद्भावनादिति परिष्कारो द्रष्टव्यः ।

(दी०) ननु लभ्यत्वं लाभयोग्यता पक्षे यादृशं साध्यं सेद्धुमर्हति तद्व्यापकत्वे सति पक्षावृत्तित्वम्, पक्षे साध्यसिद्धिविरोधिव्यापकताशालित्वमिति यावत् । स्वव्यतिरेकेण पक्षे साध्यसिद्धिविरोध्युन्नायकत्वमिति तु निर्गलितोऽर्थः । भवति च शब्दधर्मातिरिक्तधर्मरहिते शब्दे ऽनित्यत्वाभावसिद्धिर्यथोक्तसाध्यसिद्धिविरोधिनी, तथा साधनादिमति साधनाद्यवच्छिन्नसाध्याभावसिद्धिरपि । वस्तुतस्तु पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वम् । सिद्ध्यति च विशेषणवति विशिष्टसाध्यव्यापकव्यतिरेकेण शुद्धसाध्यव्यतिरेकः । तादृशश्च साधनव्यापकस्सङ्ग्राह्यः, व्यभिचारोन्नायक इव पक्षवृत्तिरितरेषाम् । अपरेषां सत्प्रतिपक्षोन्नायकस्य साधनव्यापकस्येवास्माकमपि व्यभिचारोन्नायकस्य पक्षवृत्तेरसङ्ग्रहो न दोषाय । परेषां साधनभेदादिवास्माकमपि पक्षभेदादुपाधिभेद इति चेत् ? अत्र वक्ष्यते ग्रन्थकृतैव ।

(गा०) दीधितिकृदन्यथैतल्लक्षणपरिष्कारमाशङ्कते । नन्विति । लाभयोग्यतेति । तथा च सोपाधितया निश्चिते पक्षधर्मताबलात् साध्यस्यालाभेऽपि न क्षतिरिति भावः । योग्यतामन्तर्भाव्य साधनाव्यापकत्वस्थले पक्षावृत्तित्वं प्रवेश्य समुदितलक्षणार्थमाह । पक्ष इति । यादृशम् । यद्रूपाक्रान्तम् । तद्व्यापकत्वे । तदवच्छिन्नव्यापकत्वे । अर्हत्यर्थस्य दुर्वचत्वात् सत्यन्तस्य फलितार्थमाह । पक्षे साध्यसिद्धीति । प्रकृतपक्षे प्रकृतसाध्यवत्ताबुद्धेः विरोधिनी या व्यापकता तद्वत्त्वमित्यर्थः । तादृशव्यापकतावच्छेदकपक्षनिष्ठाभावप्रतियोगितावच्छेदकधर्मवत्त्वं दलद्वयार्थः । विरोधित्वं च प्रतिबन्धकतावच्छेदकप्रकारताश्रयत्वम्, तथा च यद्धर्मप्रकारकनिश्चयविशिष्टयदवच्छेदकावच्छिन्नाभावनिश्चयत्वेन उपदर्शितसाध्यवत्ताबुद्धिविरोधिता तादृशधर्मावच्छेदकत्वं व्यापकतावच्छेदकान्तार्थः ।

एतेन व्याप्यव्यापकताया विशेषघटिततया तद्विशेषमनन्तर्भाव्य ताद्रूप्येण निवेशासम्भवेऽपि न क्षतिः, तदनन्तर्भावेणाप्युक्तरूपेण व्यापकतानिवेशसम्भवात् । शब्दधर्मातिरिक्तधर्मराहित्येन निश्चिते शब्दे अनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवत्ताबुद्धौ अनित्यत्वव्यापकं कृतकत्वमिति निश्चयसहितस्य कृतकत्वाभावनिश्चयस्य प्रतिबन्धकतया अनित्यत्वव्यापकताया उक्तरूपतया कृतकत्वे लक्षणसमन्वयः । शुद्धवह्निव्यापकतात्वेन महासत्वत्वावच्छिन्नमहानसीयवह्निव्यापकताग्रहसहितमहानसत्वाभावज्ञानस्य पर्वते वह्निमत्ताज्ञानविरोधितया महानसत्वादावतिव्याप्तेर्वारणाय प्रतिबन्धकतायां भ्रमत्वनियतधर्मविशिष्टज्ञानानवच्छिन्नत्वमपि निवेश्यम्, तेन च पर्वते महानसीयेतरवह्न्यभाववत्ताभ्रमदशायां महानसीयवह्निव्यापकताप्रकारेण महानसत्वज्ञानविशिष्टस्य पर्वते महानसत्वाभावज्ञानस्य सत्त्वे पर्वते वह्निविशिष्टबुद्धेरनुदयेऽपि न पर्वतो वह्निमानित्यत्र महानसत्वेऽतिव्याप्तिः, तत्र तादृशव्यापकताज्ञानसहकृततदवच्छेदकावच्छिन्नाभावज्ञानप्रतिबन्धकताया महानसीयेतरवह्न्यभाववान् पर्वत इति ज्ञानेन भ्रमत्वनियतधर्मविशिष्टेनावच्छिन्नत्वात् ।

अथ भ्रमवैशिष्ट्यानवच्छिन्नस्यापि महानसीयवह्निव्यापकताप्रकारेण महानसत्वग्रहविशिष्टस्य पर्वते महानसत्वाभावग्रहस्य

पर्वते महानसीयवह्निरूपसाध्यवत्ताग्रहविरोधितया उक्तस्थले महानसत्वातिव्याप्तिर्दुर्वारैव ।

न च पक्षे साध्यवत्ताग्रहसामान्यविरोधितानिवेशान्न दोष इति वाच्यम् । उक्तकृतकत्वोपाधेरेवासङ्ग्रहात्, अनित्यत्वव्यापककृतकत्वाभावज्ञानस्य शब्दावृत्तिधर्मवत्ताज्ञानाविरोधित्वात् ।

न च शब्दावृत्तिधर्माभाववत्तानिश्चयसहितस्य साध्यसामान्यवत्ताज्ञानप्रतिबन्धकतया तदुपाधिसङ्ग्रह इति वाच्यम् । तत्तद्विशिष्टविरोधिनिश्चयप्रतिबन्धकतयैवोपपत्तौ समानविषयकत्वेन विरोधितामते सामान्यज्ञाने एकविशेषविरोधिनिश्चयविशिष्टापरविशेषविरोधिनिश्चयप्रतिबन्धकतायां मानाभावात् । नैवम्, प्रतिबन्धकत्वमत्र फलानुत्पत्तिप्रयोजकत्वम्, तथा च भ्रमाविशिष्टस्य यत्प्रकारकनिश्चयविशिष्टस्य यद्यदवच्छेदकावच्छिन्नाभावनिश्चयस्य पक्षे साध्यानुमितिसामान्यानुत्पादप्रयोजकत्वम् तादृशधर्मशालित्वमित्यर्थविवक्षया सामञ्जस्यात् । पर्वतो वह्निमानित्यादौ वह्निमत्प्रथादिनिष्ठवह्न्यादिव्यापकताज्ञानविशिष्टा वह्निसामग्रीत्वावच्छिन्नाभावस्य पर्वतादौ या धीस्तस्याः पर्वतादौ वह्न्यादिज्ञानप्रतिबन्धकतया तादृशव्यापकतामादाय वह्निसामग्र्यादावतिव्याप्तिवारणाय पक्षावृत्तित्वनिवेशः, उक्ताभावज्ञानस्य भ्रमत्वेऽपि तत्प्रतिबन्धकताया भ्रमानवच्छिन्नत्वात् । पक्षावृत्तित्वस्य यथाश्रुतस्य निवेशे उपाधितावच्छेदकसम्बन्धेन तत्र वृत्तेर्विवक्षणीयतया जात्यादिपक्षकजात्यादिसाध्यके समवायादिना सत्तानुपाधौ समवायादिना पक्षवृत्तित्वाप्रसिद्ध्या अव्याप्तिरतः पक्षवृत्त्यभावप्रतियोगित्वपरतया तदुपवर्णितम् ।

पर्वतत्वादिरूपपक्षतावच्छेदकसमानाधिकरणाभावप्रतियोगिवह्न्यादिसामग्र्यादावतिव्याप्तिभिया पक्षतावच्छेदकव्यापकाभावप्रतियोगित्वनिवेशे च द्रव्यत्वावच्छेदेन वह्न्यादिसाधनेऽपि वह्निसामग्र्यादेरनुपाधितापत्तिरतः समुदितपर्यवसितार्थमाह । स्वव्यतिरेकेणेति । पक्षे साध्यविरोध्युन्नायकव्यतिरेकप्रतियोगित्वमित्यर्थः । पक्षतावच्छेदकसाध्ययोर्यादृशसम्बन्धावगाहिज्ञानविरोधिनो या अनुमितिस्तज्जनकतावच्छेदकसामान्यपरामर्शविषयतावद्व्यतिरेकप्रतियोगितावच्छेदकावच्छिन्नः पक्षतावच्छेदकसाध्ययोस्तादृशसम्ब-

न्धसाधने उपाधिरिति निष्कर्षः । पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितौ तदवच्छेदेन साध्याभावानुमितिरेव विरोधिनी, तज्जनकश्चावच्छेदकावच्छेदेन साध्यव्यापकाभावपरामर्श एवेति द्रव्यत्वादिपक्षतावच्छेदकवह्न्यादिसाध्यसामानाधिकरण्यसाधने वह्निसामग्र्यादिर्नोपाधिः, द्रव्यत्वावच्छेदेन सामान्यवह्निसामग्र्यभाववविषयकपरामर्शाप्रसिद्धेः । अवच्छेदकावच्छेदेन अनुमितौ च अवच्छेदकसामानाधिकरण्यमात्रेण साध्याभावानुमितिरपि विरोधिनीति द्रव्यत्वादौ वह्न्यादिसाध्यस्यावच्छेदकत्वसाधने वह्निसामग्र्यादिरुपाधिः, तादृशसाध्यकानुमितिजनकसामान्यद्रव्यत्वादिसामानाधिकरण्यमात्रविषयकपरामर्शविषयव्यतिरेकप्रतियोगित्वात् । उपाध्यभावसमानाधिकरणाभावान्तरस्यापि व्याप्तिघटकतया विरोध्यनुमापकपरामर्शविषयत्वात् तत्प्रतियोगिन्यतिव्याप्तिवारणाय विरोध्यनुमापकज्ञानीयमुख्यविशेष्यतानिरूपितप्रकारतारूपविषयतैव व्यतिरेकविशेषणतया निवेश्या । ' '

उक्तज्ञनकत्वोपाधौ गौरमित्रातनयादिपक्षकश्यामत्वादिसाध्यकशाकपाकजत्वाद्युपाधौ च लक्षणसङ्गमनाय तादृशोपाधीनां यादृशसाध्यविशेषव्यापकत्वं तादृशसाध्यविशेषाभावानुमितेः पक्षे सामान्यरूपेण साध्यसिद्धिविरोधितां दर्शयति । भवति चेति । रहिते । रहिततया निश्चिते । यथोक्तसाध्यसिद्धिविरोधीनीति । अनित्यत्वातिरिक्तेत्यादिसाध्यसिद्धिविरोधिनीत्यर्थः । समानप्रकारकत्वस्यातन्त्रत्वादिति भावः । अत्रापि साध्यतावच्छेदकावच्छिन्नसाध्यसिद्धेसामान्यप्रतिबन्धकत्वमवश्यं विवक्षणीयम्, अन्यथा पर्वतो वह्निमानित्यादौ महानसत्वादेरुपाधितापत्तिः, महानसीयवह्न्यादिमत्ताग्रहविरोधिमहानसीयवह्न्याद्यभावानुमापकव्यतिरेकप्रतियोगित्वात् । तथा चानित्यत्वाभावसिद्धेरुक्तसाध्यतावच्छेदकाक्रान्तानित्यत्वसिद्धिप्रतिबन्धकत्वेऽपि शब्दावृत्तिधर्मसिद्धिविरोधित्वाभावादनित्यत्वाभावज्ञापकव्यतिरेकप्रतियोगिनोऽपि कृतकत्वस्य नोपाधितासम्भव इति पूर्वपक्षे साध्यसिद्धिसामान्यविरोधित्वं तत्सिद्धिसामान्यानुत्पादप्रयोजकत्वरूपं वाच्यम्, एवं चैकविशेषसामग्रीविरहसहकृतापरविशेषसामग्र्यभावस्य सामान्यकार्यानुत्पादप्रयोजकतया एकविशेषाभावनिश्चयसहितापरविशेषाभावनिश्चय-

स्य यथोक्तसाध्यवत्ताग्रहसामान्यानुत्पादप्रयोजकत्वमक्षतमेवेति नो-क्तदोषावसरः। एवं पर्वते महानसीयेतरवह्न्यभावनिश्चयसहितमहा-नसीयवह्न्यभावनिश्चयस्यापि वह्निमत्ताग्रहसामान्यानुत्पादप्रयोजक-तया पर्वतो वह्निमानित्यादौ महानसत्वादावतिव्याप्तिः पूर्ववदेव वारणीया। साधनादिमतीति। मित्रातनयत्वादिमत्तया निश्चित इत्यर्थः। आदिपदात्पक्षधर्मविशेषपरिग्रहः। साधनाद्यवच्छिन्न-साध्याभावसिद्धिरपीति। मित्रातनयत्वाद्यवच्छिन्नश्यामत्वादेरभाव-सिद्धिरपीत्यर्थः। यथोक्तेत्यादिकमनुषज्यते, श्यामत्वादिसिद्धि-सामान्यविरोधिनीति तदर्थः।

अत्र कल्पे समानप्रकारकत्वेन विरोधित्वे न निर्वाहः, एवं सक-लसाध्यस्य तदनधिकरणे सर्वत्र भ्रमे मानाभावाद्यत्र पक्षे साध्यस्य विशिष्टज्ञानमप्रसिद्धं तत्पक्षकतत्साध्यकोपाधावव्याप्तिः, एवं स-कलसाध्याभावानुमितेरप्रामाणिकतया यदुपाध्यभावलिङ्गकयत्सा-ध्याभावानुमितिर्यत्र पक्षे न प्रसिद्ध्यति तत्पक्षकतत्साध्यकतदुपा-धावप्यव्याप्तिरिति दूषणमाशङ्क्याह। वस्तुतस्त्विति। पक्षधर्माव-च्छिन्नेति। यत्किञ्चित्पक्षधर्मविशिष्टेत्यर्थः। वैशिष्ट्यं सामानाधि-करण्यसम्बन्धेन। एतदुपादानाच्छुद्धसाध्याव्यापकोपाधिसङ्ग्रहः। साध्याधिकरणमात्र एव पक्षधर्मेयत्वाविशिष्टसाध्यसत्त्वाच्छुद्धसा-ध्यव्यापकस्यासङ्ग्रह इति यत्किञ्चिदित्युक्तम्। पक्षधर्मविशिष्ट-त्वन्तरस्य यत्र पक्षे साध्यतावच्छेदकसम्बन्धेन वृत्तिः तत्रत्योपा-धावव्याप्तिवारणाय साध्येति, साध्यतावच्छेदकविशिष्टार्थकम्, तेन गुणो द्रव्यत्वविशिष्टसत्तावानित्यादौ गुणवत्त्वाद्युपाधिसङ्ग्रहः।

व्यापकत्वे सति पक्षावृत्तित्वम्। व्यापकतावच्छेदकपक्षनिष्ठाभा-वप्रतियोगितावच्छेदकरूपवत्त्वम्, तेन न विभिन्नरूपेण तादृशसा-ध्यव्यापकत्वपक्षनिष्ठाभावप्रतियोगित्वे आदाय पक्षतावच्छेदका-दावतिप्रसङ्गः। पक्षनिष्ठत्वं पक्षतावच्छेदकव्यापकत्वमेव यत्र पक्ष-तावच्छेदकसामानाधिकरण्यमात्रेण साधनम्, अन्यत्र यथाश्रुतमेव, लक्ष्यानुगमेन लक्षणाननुगमस्यादोषत्वाच्छब्दैक्यस्यानुपादेय-त्वात्, अतो न पूर्वोक्तदोषावसरः। उक्तरूपत्वोपाधौ शब्दघटा-न्यतरत्वादिरूपपक्षधर्मावच्छिन्नयथोक्तसाध्यव्यापकतामादायैव ल-क्षणसमन्वयः।

नन्ववच्छिन्नसाध्याभावव्यतिरेकप्रतियोगिनोऽवच्छिन्नसाध्यव्यापकोपाधेः सत्प्रतिपक्षोत्थापकता न सम्भवति, विशिष्टव्यापकाभावज्ञानस्य शुद्धविशेष्यज्ञानाप्रतिबन्धकत्वादित्याशङ्क्याह । सिध्यति चेति । विशेषणवतीति । विशेषणवत्त्वे सति विशिष्टव्यापकव्यतिरेकेणेत्यर्थः । शुद्धसाध्यव्यतिरेक इति । मित्रातनयत्वादिविशिष्टस्य शाकपाकजत्वादिव्यतिरेकस्य शुद्धश्यामत्वाद्यभावव्याप्यतया तद्वत्त्वज्ञानस्य शुद्धश्यामत्वादिसिद्धिविरोधित्वात्पक्षधर्मावच्छिन्नसाध्यव्यापकस्याप्युपाधेः सत्प्रतिपक्षोत्थापकत्वमविफलमिति भावः ।

इदमुपलक्षणम्, शुद्धसाध्याभावव्याप्यतया विशेषणविशिष्टोपाध्यभावज्ञानं विनापि विशेषणवत्तया निश्चिते पक्षे विशेषणविशिष्टसाध्यव्यापकतया गृहीतस्योपाधेरभावज्ञानात् पक्षधर्मतावलेन शुद्धसाध्याभावसिद्धिसम्भवात् तदवच्छिन्नसाध्यव्यापकोपाधेः शुद्धसाध्यानुमितिविरोधिताहशसामग्रीसम्पादकतयापि सत्प्रतिपक्षोत्थापकत्वं द्रष्टव्यम् ।

नन्वेवं हृदो वह्निमान् धूमादित्यादौ साधनव्यापकवह्निसामग्र्यादिरप्युपाधिस्स्यादित्यत्रेष्टापत्तिमाह । तादृशश्चेति । उक्तलक्षणाक्रान्तश्चेत्यर्थः । सङ्ग्राह्य इति । लक्ष्यतानियामकसत्प्रतिपक्षोन्नायकत्वाक्रान्तत्वादिति भावः । तस्य व्यभिचारोन्नायकत्वं नेतन्मते लक्ष्यताप्रयोजकम्, व्यभिचारोन्नायकत्वेनोपाधेर्दूषकतावादिनां मते सत्प्रतिपक्षोन्नायकतावदिति दृष्टान्तेन दर्शयति । व्यभिचारोन्नायक इति । पक्षवृत्तिरिति । धूमवान् वह्नेरित्यादावार्द्रेन्धनादिरित्यर्थः । सत्प्रतिपक्षानुन्नायकोऽपीति शेषः । इतरेषाम् । व्यभिचारोन्नायकत्वेन दूषकतावादिनाम् । सङ्ग्राह्य इत्यनुषज्यते । एतन्मते उक्तस्थले व्यभिचारोन्नायकार्द्रेन्धनादेस्तन्मते सिद्धस्य कस्यचिदुपाधेरन्यमतालक्ष्यतादृष्टान्तेनालक्ष्यतां प्रदर्शयन् परिहरति । अपरेषामिति । साधनव्यापकस्येवेति । हृदो वह्निमान् धूमादित्यादौ वह्निसामग्र्यादेरित्यर्थः । उपाधिलक्षणस्य पक्षघटितत्वे एकसाध्यकैकसाधनस्थले एव एकस्य पक्षभेदेनोपाधित्वमनुपाधित्वं च स्यादित्यत्र एकसाध्यकैकपक्षकस्थले एकैकस्य साधनभेदे परमते उपाधित्वानुपाधित्ववद्दृष्टान्तेन इष्टापत्तिमाह । परेषामिति । वक्ष्यते इति । केचित्तु

साधनव्यापकोऽपीत्यादिना ।

(चि०) अत्रोच्यते यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः ।

(दी०) लक्ष्यतावच्छेदकमाह यद्व्यभिचारित्वेनेत्यादि उन्नीयत इति शेषः । उन्नायकत्वं तद्योग्यता, सा च व्याप्तिपक्षधर्मते इति । तथा च यद्व्यभिचारो यद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किञ्चिदधिकरणवृत्तित्वसामान्यं साध्यव्यभिचारव्याप्यं साधनवृत्ति च तद्धर्मावच्छिन्नं तत्रोपाधिरित्यर्थः । तेनार्द्रेन्धनाभाववद्वृत्तित्वेन वह्नौ धूमव्यभिचारसाधनेऽप्यार्द्रेन्धनद्रव्यत्वादिना न तत्रोपाधिः । तद्रूपावच्छिन्नाभाववद्वृत्तित्वस्य वह्न्यवृत्तित्वात् । शुद्धसाध्यव्यापके तदभाववन्मात्रवृत्तित्वं साध्यव्यभिचारव्याप्यम्, अवच्छिन्नसाध्यव्यापके त्ववच्छेदकाधिकरणीभूततदभावाधिकरणवृत्तित्वमित्युभयत्रापि सङ्गतिः । द्रव्यत्वेन रूपवत्त्वेन साध्ये सत्ताद्रव्यत्वजलत्वमात्रविशेष्यिका या धीस्तद्भिन्नत्वे जलसमवेतनित्यत्वे वा सति पृथिवीत्ववद्वृत्तित्वादित्यादिना प्रकारेण व्यभिचारोन्नयनसमर्थोऽपि पृथिवीत्वाभावादिर्नोपाधिः ।

(गा०) यद्व्यभिचारित्वेनेत्यादेर्लक्षणत्वे लक्षणं स्विन्यग्रिमग्रन्थविरोध इत्यत आह ।

लक्ष्यतेति । उपाधिव्यभिचारस्य साध्यव्यभिचारोन्नायकतालाभाय पूरयति । उन्नीयते इति । एवं च मूले साधनस्येति सप्तम्यर्थे षष्ठी, तथा च साधने पक्षे साध्यव्यभिचारानुमापकव्यभिचारप्रतियोग्युपाधिरिति मूलार्थ इति भावः ।

यद्यपि जनकत्ववज्ज्ञापकत्वरूपहेतुत्वमपि तृतीयापञ्चम्योरर्थ इत्युक्तपूरणमन्तरेणापि व्यभिचारोन्नायकत्वं व्यभिचारस्य लभ्यते ।

न च धूमाद्वह्निमानयमितिवत् धूमेन वह्निरित्यप्रयोगाद्धर्मिविशेषणतापन्नसाध्य एव तृतीयार्थज्ञापकत्वान्वय इति व्युत्पत्तिः, प्रकृते मुख्यविशेष्यतया भासमाने साध्यव्यभिचारे न तृतीयया ज्ञापकत्वबोधनसम्भव इति वाच्यम् । तथा व्युत्पत्तौ अस्यैव अत्राकाशमात्मन इत्यादिलिखनविरोधात् सम्प्रदायविरोधेन वह्निः धूमादित्यादिप्रतिज्ञानिराकरणविरोधाच्च ।

न चोन्नीयते इत्यस्यापूरणे तृतीयया साधनविषयोन्नयनप्रयोजकत्वं न बोधयितुं शक्यते, तथा च सति साधनस्येत्यस्य व्यभिचारित्वमित्यनेनैव सम्बन्धात् साधनसम्बन्धिसाध्यव्यभिचारस्यैव उन्नायकतालाभात् । तथा च साधनव्यापकस्यापि व्यभिचारस्यान्यत्र साधनसम्बन्धिसाध्यव्यभिचारोन्नायकतया तत्रातिव्याप्तिरिति वाच्यम् । यद्धर्मपुरस्कारेण भासमानसाध्ये तृतीयार्थान्वयस्तद्धर्मिणि साध्यज्ञापकतया ज्ञापकत्वार्थकविभक्त्या बोध इति व्युत्पत्तेः, अन्यथा पर्वतो वह्निमान् धूमादित्यादौ पर्वतांशे ज्ञापकताया अलाभे तदुपपादकपर्वतवृत्तित्वाद्याकाङ्क्षानुदयेन तत्प्रदर्शकोपनयानुत्थानप्रसङ्गात्, पर्वतो वह्निमान् महानसत्वादित्यादावपि योग्यतासङ्गाच्च, तथापि तृतीयादिना व्याप्तिपक्षधर्मतानिर्धारितहेतुविधया ज्ञापकज्ञानविषयकत्वमेव बोध्यते न तु ज्ञापकज्ञानविषयतामात्रम्, पर्वतो वह्निमान् वह्निव्याप्तेरित्याद्यप्रयोगात्, तथा च तद्व्यभिचारस्य पक्षतावच्छेदकहेतुसामानाधिकरण्यविधया साधनरूपपक्षतावच्छेदके साध्याभावरूपसाध्यसामानाधिकरण्यरूपव्यभिचारोन्नायकत्वमिति यद्व्यभिचारित्वेनेत्यस्य यद्भावेन साधनवति साध्याभाव उन्नीयत इत्यर्थपर्यवसानस्याग्रे कर्तव्यस्य विरोधः, उक्तविधया ज्ञापकतायास्तृतीययाऽबोधनादित्युन्नीयत इत्यन्तपूरितम् । तथा सति पर्वतत्वस्य धूमसामानाधिकरण्येन वह्निसामानाधिकरण्यमनुमीयत इति प्रयोगाद्धेत्वर्थानुमितौ उक्तविधया प्रयोज्यत्वस्यापि तृतीयया बोधनान्न विरोधः ।

नन्वनुपाधिव्यभिचारस्यापि साध्यव्यभिचारव्याप्तेः पक्षधर्मताया वा भ्रमेण साधने साध्यव्यभिचारानुमापकत्वादतिप्रसङ्गः, एवं सकलोपाधिव्यभिचारस्य सकलसाधने व्यभिचारानुमित्युपधायकताया अप्रामाणिकतया ऽव्याप्तिश्चेत्यत आह । उन्नायकत्वमिति । ननु

क्रमेण फलोपधायके स्वरूपयोग्यता वर्त्तत एवेत्युक्तातिप्रसङ्गो दुर्वार इत्यत आह। सा चेति। व्याप्तिपक्षधर्मते इति। साध्यव्यभिचारव्याप्तिसाधनवृत्तित्वोभयरूपे इत्यर्थः।

ननु शुद्धेन व्यभिचारित्वेन व्याप्यता विवक्षिता, विशेषिताविशेषितसाधारणव्यभिचारित्वेन वा, येन केनापि रूपेण वा? आद्ये मवच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्, श्यामत्वादिव्यभिचारशून्यकाकत्वादौ शाकपाकजत्वावच्छिन्नव्यभिचारत्वावच्छिन्नसत्त्वेन शुद्धव्यभिचारत्वस्य श्यामत्वादिव्यभिचारव्याप्यतानवच्छेदकत्वात्, अन्त्ययोः रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादावनिव्याप्तिः, पृथिवीत्वाभावव्यभिचारस्यापि रूपवन्मात्रवृत्तिधर्मव्यावर्तककिञ्चिद्विशेषणविशिष्टव्यभिचारत्वेन रूपव्यभिचारव्याप्यत्वात्। समानाधिकरणमात्रस्यैव किञ्चिद्विशिष्टत्वेन अवश्यमेव व्याप्यतया व्याप्यान्तपर्यन्तनिवेशवैयर्थ्याच्च।

न च पृथिवीत्वाभावव्यभिचारत्वस्य पृथिवीत्वाभावाभाववद्वृत्तित्वरूपस्य गौरवेण न व्याप्यतावच्छेदकघटकता, उक्तस्थले पृथिवीवृत्तितात्वस्यैव निवेशेन व्यभिचारवारणसम्भवादिति न मध्यमपक्षे अतिप्रसङ्ग इति वाच्यम्। एवं सतीदं जलं गुरुत्वादित्यादावपि पृथिवीत्वाभावादेरनुपाधितापत्तेः, लघुगुरुसाधारणव्याप्यतावच्छेदकताया एव विवक्षणीयत्वादित्याशङ्क्य निष्कृष्टार्थमाह। तथा चेति। व्यभिचार इत्यस्य व्याख्या यद्धर्मावच्छिन्नेत्यादि सामान्यमित्यन्तम्। यत्किञ्चिदधिकरणवृत्तित्वसामान्यम्। यत्किञ्चिदधिकरणवृत्तित्वत्वावच्छिन्नम्, तथा च तादृशयत्किञ्चिदधिकरणवृत्तितात्वं साध्यव्यभिचारव्याप्यतावच्छेदकत्वे सति साधनवृत्तिवृत्तीत्यर्थः। सामान्यपदशून्य एव क्वचित्पाठः, तत्रापि मन्यधितावच्छेदकावच्छेदेन व्याप्यत्वान्वये यत्किञ्चिदधिकरणवृत्तित्वमित्यस्य यत्किञ्चिदधिकरणवृत्तित्वत्वावच्छिन्नमित्यर्थकतया उक्त एवार्थः, अतो ऽयोगोलकादिव्यक्तिवृत्तित्वसामान्यान्तर्गतान्यानिष्ठतद्वृत्तित्वस्य तन्निष्ठवह्न्यादावसत्त्वेऽपि न क्षतिः। उपाधेरपि क्वचित् केनचिद्रूपेणैव उपाधिनेति उपाधितावच्छेदकरूपनिवेशस्य आवश्यकतया व्यभिचारशरीरे यत्प्रतियोगिकाभावत्वेन अभावमनिवेश्य यद्धर्मावच्छिन्नाभावत्वेन तन्निवेशः। यद्धर्माश्रयप्रतियोगिकाभावत्वेन तन्नि-

षेऽ अतिप्रसङ्गमाह । तनेति । आर्द्रेन्धनेत्यादि । द्रव्यत्वाद्याश्रयेत्यादिः । तादृशार्द्रेन्धनाद्यभाववद्वृत्तित्वस्य वह्निधूमव्यभिचारसिद्धियोग्यत्वेऽपीत्यर्थः । तद्रूपेति । द्रव्यत्वादीत्यर्थः । वह्न्यवृत्तित्वात् । वह्न्यवृत्तित्वेन यत्पदेन द्रव्यत्वाद्युपादानासम्भवादित्यर्थः । यत्किञ्चिदधिकरणवृत्तित्वस्य व्याप्यताविवक्षणात् शुद्धसाध्यव्यापक इव सर्वाच्छिन्नसाध्यव्यापकेऽपि लक्षणसमन्वयसम्भव इत्याह । शुद्धेति । तदभाववन्मात्रवृत्तित्वम् । तदभाववत्सकलाधिकरणवृत्तित्वम्, तथा च यत्किञ्चिदधिकरणवृत्तित्वस्य सुतरां व्याप्यतेति भावः । अवच्छेदकेति । व्याप्यतावच्छेदकमित्रातनयत्वाद्यधिकरणीभूता या शाकपाकजत्वाद्यभावाधिकरणव्यक्तिस्तद्वृत्तित्वमित्यर्थः । सामानाधिकरण्यमुपेक्ष्य व्याप्यतापर्यन्तनिवेशस्य यत्किञ्चिदधिकरणवृत्तितात्वे व्याप्यतावच्छेदकत्वपर्यन्तनिवेशस्य च प्रयोजनमाह । द्रव्यत्वेनेति । रूपवत्त्वे साध्ये पृथिवीत्वाभावादिर्नोपाधिरित्यन्वयः । समर्थोऽपीत्यन्तेन यथाश्रुतव्यभिचारोन्नायकत्वं प्रदर्शितम् । पृथिवीत्वादौ रूपव्याप्यधर्मे व्यभिचारवारणाय पृथिवीवृत्तित्वे सत्ताविषयमात्रधीविशेष्यकधीविशेष्यत्वजलसमवेतनित्यत्वयोर्वैकल्पिकविशेषणयोरुपादानम् । सत्ताया धीविशेष्यतयोपादान तस्या दृष्टान्तत्वनिर्वाहाय, अन्यथा हेतोर्द्रव्यत्वरूपपक्षमात्रवृत्तितया व्यभिचारोन्नायकतानुपपत्तेः ।

यद्यपि पक्षमात्रवृत्तित्वेऽपि व्याप्तिपक्षधर्मतारूपाश्रयनयोऽस्यत्वमविकलमेव, तथाप्युन्नयनौपयिकसपक्षवृत्तित्वानियेधेऽप्यतिप्रसङ्गस्य दुर्वारत्वमित्येतत्प्रदर्शनाय तदुपादानम् । विशेष्यस्य विशेष्यतावच्छेदकपृथिवीवृत्तिनात्वस्य वा सार्थक्याय जलत्वोपादानम्, तथा सति जलत्वे व्यभिचारवारकतया तत्सार्थक्यात् ।

न च धीविशेषविशेष्यत्वविशिष्टत्वेन पृथिवीत्वाभावव्यभिचारस्य साध्यव्यभिचारोन्नायकतयापि तत्रोपाधित्वप्रसक्त्या पृथिवीत्वांशसार्थक्यप्रयासो विफल इति वाच्यम् । तद्व्यभिचारमात्रवृत्तिधर्मपुरस्कारेण उन्नायकतेति विवक्षणे अतिप्रसङ्गवारणसम्भवे उक्तविवक्षाया निष्प्रयोजनतापातात् पृथिवीवृत्तित्वांशसार्थक्यस्यावश्यकत्वात् ।

न च व्यर्थविशेषणघटितधर्मपुरस्कारेणोन्नायकस्य व्याप्तिपक्ष-

धर्मतारूपेऽन्वयनयोग्यत्वमविकलम्, परार्थस्थले एव आधिक्येन निग्रहप्रयोजकविशेषणवैयर्थ्यमिति वाच्यम्। व्यर्थविशेषणशून्यत्व-गर्भव्याप्यतावच्छेदकताया व्यभिचारमात्रवृत्तिधर्मस्य विवक्ष-णेऽपि न प्रतीकार इत्याशयेन विशेषणसार्थक्योपपादनात्। सत्ता-द्रव्यत्वभिन्नाविशेष्यकत्वात् त्रितयभिन्नाविशेष्यकत्वरूपं त्रितयमा-त्रविशेष्यकत्वघटकं अभावान्तरमिति जलत्वांशवैयर्थ्यम्। पक्षवृ-त्तित्वसम्पत्तये द्रव्यत्वोपादानम्। घटत्वादिविशेष्यकत्रितयविशे-ष्यकसमूहालम्बनविशेष्ये घटत्वादौ व्यभिचारवारणाय मात्रपदम्। त्रितयमात्रविषयकधीरप्रसिद्धा, तत्त्रितयनिर्विकल्पकेऽपि व्यक्ति-भाननियमादतः त्रितयमात्रविशेष्यकत्वोपादानम्। विशेष्यपदेन मुख्यविशेष्यता विवक्षणीया, अतस्सत्ताद्रव्यत्वजलत्वानीति बुद्धा-वपि सदितरावृत्तित्वादिरूपसत्तात्वादिघटकसदितराद· सदितर-त्वादिविशेष्यतया न त्रितयमात्रविशेष्यकत्वानुपपत्तिः। तादृशवि-षयत्वनिवेशे उक्तधीविषये सत्तात्वादिघटकरूपाद्यात्मकसदादौ व्य-भिचार इति धीविशेष्यतानिवेश। इयमपि विशेष्यता मुख्यविशेष्य-तारूपा, अन्यथा तद्दोषतादवस्थ्यात्। लाघवमनुरुध्य द्वितीयविशेष-णानुसरणम्। तत्र नित्यपृथिवीत्वादौ व्यभिचारवारणाय जलसमवे-तत्वोपादानम्। जलसमवेतजलपृथिवीसंयोगादौ व्यभिचारवारणाय नित्यत्वोपादानम्। एतद्घटितहेतावपि सत्ता दृष्टान्तः। जलत्वा-दौ व्यभिचारवारणाय विशेष्यदलम्। नोपाधिः। नोक्तलक्ष्यताव-च्छेदकाक्रान्ते। साध्यव्यभिचारनिरूपकाधिकरणवाय्वादौ द्रव्य-त्वस्य पृथिवीत्वाभावव्यभिचारविरहात् अस्यासङ्ग्राह्यता, तदुक्तम्—"सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः। हेतोरेकाश्रये येषां स्व-साध्यव्यभिचारिते"ति।

(दी०) न हि पृथिवीत्वात्मकतदभावाधिकरणं तादृशं किञ्चिदस्ति यद्वृत्तित्वसामान्यं साध्यव्यभिचारव्याप्यम्, पृथिवीत्वादावेव व्यभिचारात्। न च व्यभिचारोन्नायकतामात्रेण प्रकृतोपाधितानिर्वाहः, अपि तु कथकानां तान्त्रिकाणां च तऽ-थाविधव्यवहारविषयत्वेन, तदवच्छेदकञ्चोक्तरूपम्। व्याप्यत्वा-

मिदुष्युन्नायकत्वादिकं सम्भवदपि न तथा, गौरवात्। अत एवेदं जलमाकाशादित्यत्र स्वाव्याप्यत्वेन जलत्वाव्याप्यत्वोन्नायकस्यापि द्रव्यत्वादेरसङ्ग्रहो न दोषाय।

(गा०) यथानिरुक्तस्य तत्रासत्वं स्फुटयति । न हीति । तदभावेति । पृथिवीत्वाभावाभावेत्यर्थ । यद्वृत्तित्वसामान्यम् । यद्वृत्तित्वत्वावच्छिन्नम् । पृथिवीत्वादावेवेति । रूपव्यभिचारविरहेणेत्यादिः । व्यभिचारात् । पृथिवीत्वाधिकरणव्यक्तिवृत्तित्वत्वावच्छिन्नस्य तादृशव्यभिचाररूपसाध्यव्यभिचारित्वात् । तादृशयत्किञ्चिदधिकरणवृत्तित्वस्य साध्यव्यभिचारव्याप्यतावच्छेदकत्वं च स्वावच्छिन्नव्यापकतावच्छेदकसाध्यव्यभिचारत्वकत्वम्, न तु साध्यव्यभिचारशून्यवृत्तितानवच्छेदकत्वम्, अयोगोलकवृत्तित्वादौ विशेष्यभूताधेयतात्वस्य साध्यव्यभिचारशून्यवृत्तितावच्छेदकतया विशिष्टाधेयतात्वरूपे तस्मिन् साध्यव्यभिचारशून्यवृत्तितानवच्छेदकत्वस्य दुर्घटत्वादिति ध्येयम्।

उक्तरीत्या व्यभिचारोन्नायकस्य पृथिवीत्वाभावादेः कथमनुपाधित्वम्? यतः तद्वारणायायं प्रयास इत्यत आह। न चेति। प्रकृतोपाधिता। एतच्छास्त्रनिर्वाच्योपाधिता। कथकानाम्। वादजल्पादिकथानिपुणानाम्। तथाविधव्यवहारः। उपाधिव्यवहारः। तथा च कथकादीनामुपाधिव्यवहारविषयताविरहान्न पृथिवीत्वाभावादेरुक्तस्थल उपाधितेति भावः। तद्व्यवहारविषयतावच्छेदकं यदि व्यभिचारोन्नायकत्वमेव तदा तदाक्रान्तस्य पृथिवीत्वाभावादेरप्युपाधित्वमावश्यकं स्यादित्यत आह। तदवच्छेदकं चेति। उक्तरूपमिति। पृथिवीत्वाभावादिव्यावृत्तनिरुक्तधर्म इत्यर्थः। तत्रोपाधिव्यवहारविरहस्य निर्विवादत्वादिति भावः।

नन्वव्याप्यवृत्तिहेतुके साध्यव्यापकस्यासङ्ग्राहकतया न निरुक्तरूपस्य उपाधिव्यवहारविषयतावच्छेदकत्वसम्भव इत्यव्याप्यत्वोन्नायकत्वमेव तथास्तु, तच्च यद्धर्मावच्छिन्नाभावाधिकरणयत्किञ्चिद्धकत्यवृत्तित्वविशिष्टवृत्तिमत्त्वाभावः साध्याभाववद्वृत्तित्वविशिष्टवृत्तिमत्त्वाभावव्याप्यः, साधनवृत्तिश्च तद्धर्मावच्छिन्नत्वम् अव्याप्यवृत्तिहेतौ

व्यभिचारासत्त्वेऽपि वृत्तिमत्त्वाभावेन निरुक्तसाध्योपाध्योर्व्याप्तिवि रहाऽक्षत एवेति तद्धेतुकोपाधेस्सङ्ग्रह इत्यत आह। व्याप्यत्वेति। व्याप्यत्वासिद्धिः। व्याप्यत्वाभावः। सम्भवत्यपीति। पृथिवीत्वाभावादित्यावृत्तमित्यादिः। न तथा। नोपाधिव्यवहारविषयतावच्छेदकम्। गौरवात्। निरुक्तव्यभिचारोन्नायकत्वापेक्षया गुरुशरीरत्वात्। अपि तु लघुशरीरं निरुक्तव्यभिचारोन्नायकत्वमेवेति शेषः। अत एव। अव्याप्यत्वोन्नायकत्वस्य गौरवेण तदनवच्छेदकत्वादेव। असङ्ग्रहः। निरुक्तरूपेण। न दोषायेति। तत्रोपाधिव्यवहारस्य स्वारसिकस्य सविवादतया तदनभ्युपगमसम्भव इति भावः।

(दी०) अथैवं स्वव्यभिचारेण व्यभिचारोन्नायकत्वमेव तथास्तु, लाघवात्, तच्चोक्तोपाधावप्यस्तीति चेत् ? एवं तर्हि साध्याभावसाधनोभयाधिकरणवृत्त्यभावप्रतियोगित्वमेव तथास्तु, अतिलाघवात्, अस्तु च सहार्थतृतीयाश्रयणेनास्यापि स एव फलितोऽर्थः। एतद्रूपमात्रज्ञाने तेषां नोपाधिव्यवहार इति चेत्? तुल्यं त्वदुक्तेऽपि। अत एव शुद्धसाध्याव्यापकस्थले साध्ये व्याप्यतावच्छेदकं नियमतस्तादृशं धर्ममनुसरन्ति न यद्वति साध्यव्यभिचारनियमो भवत्युपाधिव्यभिचारस्य। वस्तुतस्तु यदभाभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिर्लाघवात्। अत एव जलत्वतेजस्त्वयोर्न तदुभयत्वेन क्वचिदप्युपाधित्वम्।

(गा०) ननु यदि व्यवहारविषयतावच्छेदकलाघवानुरोधाद्वृत्तिहेतुकोपाधौ स्वारसिकव्यवहारो न स्वीक्रियते तदा उक्तस्थलीयपृथिवीत्वाभावादिसाधारणस्य यथाकथञ्चित्साध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगित्वस्य लघीयसो व्यवहारविषयतावच्छेदकत्वानुरोधात्तदाक्रान्तोक्तस्थलीयपृथिवीत्वाभावादौ उपाधिव्यवहारस्स्वीक्रियताम्, तत्र तद्व्यवहारस्यासिद्धत्वादित्याशङ्कते। अथेति। एवम्।

लाघवादरे । व्यभिचारेणेति । साध्यव्यभिचारमहितव्यभिचारा-धिकरणं साधनं तत्त्वमित्यर्थः । उक्तोपाधौ । उक्तस्थलीयपृथिवीत्वा-भावादुपाधौ । तादृशधर्मे उपाधिव्यवहारविरहस्य सविवादत्वेऽपि तत्साधारणोक्तरूपादपि लघुतरं तद्व्यावृत्तं तद्विषयतावच्छेदकरूपा-न्तरं सम्भवतीति तस्यानुपाधित्वमेवेत्याह । एवमिति । यदीति शेषः । यदि लाघवानुरोधेन पृथिवीत्वाभावादावुपाधिव्यवहाराभावे विप्रतिपद्यामहे इत्यर्थः । नहि । तदानीम् । साध्याभावसाधनोभया-धिकरणेति । साध्याभाववत्साधनाधिकरणेत्यर्थः । तेन सर्वत्र सा-ध्याभावसाधनयोरेकसम्बन्धासम्भवेन तदुभयत्वावच्छिन्ननिरूपिते-काधिकरणतानिवेशासम्भवेऽपि न क्षतिः । प्रतियोगित्वम् । प्रति-योगितावच्छेदकं यद्रूपं, तदवच्छिन्नत्वम्, पृथिवीत्वाभावादेश्च न तथात्वम्, नीरूपसाधनाधिकरणवाय्वादौ पृथिवीत्वाभावाद्यभाव-विरहादिति भावः । व्यभिचारित्वेनेति मूलस्यापीदृशार्थकत्व-सम्भवान्न तदुपेक्षानिबन्धनो मूलविरोध इत्याह । अस्तु चेति । सहार्थेति । एकाधिकरणनिरूपितत्वरूपसाहित्यार्थकेत्यर्थः । स एव फलितार्थः । तादृश एवार्थे पर्यवसानम् । साधने साध्योपाध्योरेका-धिकरणान्तर्भावेण व्यभिचारस्य साध्याभाववति साधनाधिकरणे उपाधेरभाववृत्त्यैव निर्वाहादिति भावः । शङ्कते । एतद्रूपेति । मात्र-पदेन व्यभिचारोन्नायकत्वज्ञानव्यवच्छेदः । तेषाम् । कथकादीनाम् । नोपाधिव्यवहार इति । तथा च लघीयस्त्वेऽपि नोक्तरूपस्य तद्व्यवहा-रविषयतावच्छेदकत्वसम्भव इति भावः । इदम् । नोपाधिव्यवहार इतीदम् । त्वदुक्तेऽपि । पृथिवीत्वाभावादिसाधारणयथाकथञ्चिद्व्यभि-चारोन्नायकव्यभिचारप्रतियोगित्वमात्रज्ञानेऽपि पृथिवीत्वाभावादौ कथकादीनामुपाधिव्यवहाराभावात्, तत्र विवादे मदुपवर्णितरूप-ज्ञानेनोपाधिव्यवहार इत्यत्रापि विवादसौकर्यादिति भावः । यथा-कथञ्चित्स्वव्यभिचारेण व्यभिचारोन्नायकतयैवोपाधित्वे ऽवच्छिन्न-साध्यव्यापकशाकपाकजत्वादुपाधिस्थले सर्वत्र धीविशेषविषय-त्वेनोपाधिव्यभिचारं विशेष्यैव साध्यव्यभिचारानुमानसम्भवे धर्म-विशेषावच्छिन्नसाध्यव्यापकतया तेषामुपाधित्वसमर्थनप्रयासो ऽन-र्थक एवापद्येत, तादृशसाध्यव्यापकतामप्रतिसन्धायापि साधना-व्यापकतामात्रं प्रतिसन्धाय साध्यव्यभिचारसंशयविषयहेतौ उपा-

धिव्यभिचारसामान्यस्य साध्यव्यभिचारानुमापकतायास्सुग्रहत्वात्
यत्किञ्चिदधिकरणान्तर्भावेणोपाधिव्यभिचारसामान्यस्य साध्यव्य-
भिचारानयनयोग्यताया उपाधितानियामकत्वे तु यदवच्छिन्नसा-
धनाव्यापकत्वमुपाधेस्तदवच्छिन्नसाधनाव्यापकत्वप्रतिसन्धाने ता-
दृशावच्छेदकधर्माधिकरणसाधनवत्युपाधिव्यभिचारसामान्यस्या
साध्यव्याप्यता पक्षधर्मता च गृहीतुं शक्यते तदवच्छिन्नसाध्य
व्यापकाभाववति तद्धर्माधिकरणे साध्याभावस्यावश्यकतेति ग्रहण
तदधिकरणवृत्तिसामान्येऽवश्य साध्याभाववद्वृत्तित्वमिति ग्रहात्,
अतस्साधनावच्छिन्नसाध्यव्यापकताग्रहस्य निरुक्तोपाधिताप्रयोजक-
रूपग्रहोपयोगितया उपाधितासमर्थनाय व्याप्यतावच्छेदकधर्मवि-
शेषानुसरणमित्याह । अत एवेति । निरुक्तव्यभिचारानायकताया
उपाधितानियामकत्वादेवेत्यर्थः । शुद्धसाध्य व्यापकादिन्धनादुपाधेः
व्याप्यतावच्छेदकधर्माननुसरणात् शुद्धसाध्याव्यापकस्थले इत्युक्तम् ।
साध्ये व्याप्यतावच्छेदकम् । साध्यनिष्ठोपाधिव्याप्यतायां सामाना-
धिकरण्येनावच्छेदकम् । ते । कथकनान्त्रिकाः । यद्वतीति । यद्धर्मा-
वच्छिन्नाधिकरणे इत्यर्थः । साध्यव्यभिचारनियम इति । उपाधि
व्यभिचारसामान्यस्य साध्यव्यभिचारव्याप्यतेत्यर्थः ।

ननु द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ गुणवत्त्वादेरुपा-
धिताप्रसङ्गः, गुणवत्त्वाद्यभावाधिकरणगुणादिवृत्तित्वसामान्यस्य
साध्यव्यभिचारव्याप्यत्वात् साधनवृत्तित्वाच्च, साधनस्य विशिष्ट-
सत्तादेः शुद्धसत्त्वाद्यनतिरिक्तत्वात् । साध्यव्यभिचारव्याप्यताव-
च्छेदकीभूततादृशकिञ्चिदधिकरणवृत्तितात्वाश्रयस्य साधनताव-
च्छेदकावच्छिन्नत्वविवक्षयैतदुद्धारेऽपि महाकालान्यत्वादिसाध्यके
कालिकसम्बन्धेन घटादिहेतुके खण्डकालभेदादेरुपाधितापत्तिः, ख-
ण्डकालभेदाभावाधिकरणखण्डकालवृत्तित्वसामान्यस्य महाकाल-
भेदाभावाधिकरणमहाकालवृत्तित्वव्याप्यत्वात् साधनवृत्तित्वाच्च,
साधने खण्डकालभेदव्यभिचारस्य खण्डकालान्तर्भावेणैव महाका-
लभेदव्यभिचारस्य च महाकालान्तर्भावेणैव तत्त्वात्, एकाधिकरणे
उभयव्यभिचारविरहेण रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभाव-
वत्त्वस्यानुपाधित्वात् ।

न च महाकालवृत्तित्वरूपमहाकालभेदव्यभिचारव्याप्यताव-

च्छेदकं लाघवाद् वृत्तिमत्त्वमेव न तु यत्किञ्चिदधिकरणवृत्तित्वम्, अतो नोक्तातिप्रसङ्गः, उपाध्यभावोपलक्षितस्याधिकरणस्य व्याप्यतावच्छेदकप्रवेशविवक्षणादिति वाच्यम्। तथा सत्युक्तस्थलीयोपाधौ महाकालपरिमाणाभावव्याप्तिप्रसङ्गात्, उक्तन्यायेन तदभावोपलक्षिताधिकरणस्यापि साध्यव्यभिचारव्याप्यतावच्छेदकेऽनन्तर्भावात्।

न चोपाधिव्यभिचारस्य तादात्म्यसम्बन्धेन साध्यव्यभिचारव्याप्यत्वविवक्षया नैष दोषः, आधेयताया निरूपकाधिकरणभेदेन भेदात् खण्डकालमहाकालनिरूपितयोराधेयतयोस्तादात्म्याभावेन तादृशसम्बन्धेन व्याप्तिविरहात्, एतेनैतद्रूपभिन्नं गुणत्वादित्यादौ एतद्रूपजातीयरूपान्तरव्यक्तिभेदादेरुपाधितापत्तिरपि निरस्तेति वाच्यम्। एवं सति साधननिष्ठोपाधिव्यभिचारे साध्यव्यभिचारतादात्म्यनिवेशेनैवोपपत्तौ व्याप्यतानिवेशवैयर्थ्यात्, पृथिवीवृत्तित्वरूपे पृथिवीत्वाभावव्यभिचारे वाय्वादिवृत्तित्वरूपसाध्यव्यभिचारतादात्म्यविरहेणैव पृथिवीत्वाभावातिप्रसङ्गानवकाशात्, उपाधिव्यभिचारस्य तादात्म्यसम्बन्धेन पक्षावृत्तितया तेन सम्बन्धेन तस्य साध्यव्यभिचारव्याप्यतायास्साधने साध्यस्य व्यभिचारोन्नयनयोग्यतानात्मकत्वाच्च। एतेन निरूपकतासम्बन्धेन व्याप्यत्वविवक्षया उक्तातिप्रसङ्गवारणमपि हेयमेवेत्यत आह। वस्तुतस्त्विति। यदभावो यद्भेदो वा विशेषितोऽविशेषितो वा हेतुमति पक्षे साध्याभावोन्नायक इत्यर्थः। अत्राप्युन्नायकत्वमुन्नयनयोग्यता, तथा च साध्याभावव्याप्यतावच्छेदकरूपेण यद्रूपावच्छिन्नाभावो यद्रूपावच्छिन्नभेदो वा साधनतावच्छेदकविशिष्टवृत्तिः तद्रूपावच्छिन्न उपाधिरित्यर्थः। द्रव्यं विशिष्टसत्त्वादित्यत्र विशिष्टसत्त्वाधिकरणीभूतद्रव्ये द्रव्यत्वाद्यभावव्याप्यतावच्छेदकावच्छिन्नस्यावर्त्तमानत्वान्न गुणवत्त्वादावतिप्रसङ्गः। एवं महाकालभेदादिसाध्यके खण्डकालभेदाद्यभावस्य साध्याभावव्याप्यताविरहात्खण्डकालभेदादौ रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाद्यभावाभावस्य पृथिवीत्वादेरूपाद्यभावाद्यव्याप्यतया च पृथिवीत्वाभावादौ नातिप्रसङ्गः। साध्याभावासामानाधिकरण्यावच्छेदकरूपेण यद्रूपावच्छिन्नाभावः साधनवद्वृत्तिरित्युक्तौ वह्निमान् धूमादित्यादौ महानसत्वादेरुपाधितापत्तिः,

वह्न्यभावसामानाधिकरण्यावच्छेदकमहानसत्वाभावत्वेन तदभावस्य धूमादिमत्पर्वतादिवृत्तित्वात्, अतः साध्याभाववद्व्याप्यतापर्यन्तानिवेशः। ह्रदादिवृत्तित्वविशिष्टत्वेन वह्न्याद्यभावव्याप्यस्य महानसत्वाद्यभावस्य तदभावत्वेन साधनवद्वृत्तित्वाद्रूपावच्छिन्नाभावः साध्याभावव्याप्यः साधनवद्वृत्तिरित्येतावन्मात्रोक्तौ तत्रैवातिव्याप्तिस्स्यादिति व्याप्यतावच्छेदकरूपेण साधनवद्वृत्तित्वं विवक्षितम्।

अथ यदभावेन साध्याभाव उन्नीयते इत्येतत्कल्पे धूमवान् वह्नेः पृथिवी द्रव्यत्वादित्यादौ साधनव्यापकसंयोगादेरभावस्य उत्पत्तिकालावच्छेदेन अयोगोलकादिवृत्तितया तद्वृत्तित्वविशिष्टत्वेन साध्याभावव्याप्यत्वात् साधनवद्वृत्तित्वाच्च तत्रातिव्याप्तेर्वारणाय यदभावमात्रवृत्तिधर्मावच्छिन्ना साध्याभावव्याप्यतेति विवक्षणीयम्, तथा चायोगोलकादिवर्त्तित्वविशिष्टत्वस्य च संयोगाद्यभावभिन्नेऽपि वृत्तेर्न तद्रूपावच्छिन्नव्याप्यतामादायातिप्रसङ्गः, अयोगोलकादिवर्त्तित्वविशिष्टसंयोगाद्यभावत्वस्य च संयोगाद्यभावमात्रवर्त्तित्वेऽपि विशेष्यवैयर्थ्यान्न व्याप्यतावच्छेदकतेति तेन रूपेण व्याप्यतामादायातिप्रसङ्गस्यापि नावकाशः, द्रव्यं सत्त्वादित्यादौ गुणादिवृत्तित्वविशिष्टत्वेन संयोगादौ लक्षणसमन्वयस्य उक्तन्यायेनासम्भवेऽपि व्याप्यवृत्तित्वविशिष्टसंयोगाद्यभावत्वरूपतदभावमात्रवृत्तिधर्मावच्छिन्नसाध्याभावव्याप्यतामादाय लक्षणं सङ्गमनीयम्।

वस्तुतो लघुरूपसमनियतगुरुधर्मावच्छिन्नोपाधौ तदवच्छिन्नाभावाप्रसिद्ध्या अव्याप्तेर्वारणाय तद्रूपविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावस्यैव उन्नायकताया विवक्षणात् द्रव्यं सत्त्वादित्यादौ द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभावत्वेन साध्याभावोन्नायकतया संयोगत्वाद्यवच्छिन्नस्योपाधितानिर्वाहः, अत एव सत्तावान् प्रमेयत्वादित्यादौ व्याप्यवृत्तित्वविशिष्टसंयोगाभावत्वाद्यवच्छिन्नाभावस्य गुणादिवृत्तितया सत्ताद्यभावानुन्नायकत्वेऽपि न संयोगाद्युपाध्यसङ्ग्रहः, संयोगत्वादिविशिष्टव्यापकतावच्छेदकजातित्वाद्यवच्छिन्नाभावस्य सत्ताद्यभावोन्नायकत्वेन सङ्ग्रहात्। तथा च व्याप्यतावच्छेदकरूपेण साधनवद्वृत्तित्वानिवेशेऽपि वह्निमान् धूमादित्यादौ महानसत्वाद्यभावस्येतरसाधारणह्रदादिवृत्तित्वविशिष्टत्वेन व्याप्यता-

मादाय नातिव्याप्तिसम्भव इति किं तन्निवेशेनेति चेन्न । एवमपि तदनिवेशे वह्निमान् धूमादित्यादौ संयोगाभावादेः व्याप्यवृत्तित्ववि-शिष्टसंयोगाद्यभावत्वेन वह्न्याद्यभावव्याप्यतया केवलसंयोगाभाव-त्वादिना च हेतुमद्वृत्तितया संयोगादेरुपाधितापसङ्गात् । कथञ्चि-दुद्धारेऽपि द्रव्यं गुणादित्यादौ द्रव्यान्यविशिष्टसत्ताभावादौ अति-प्रसङ्गस्य दुर्वारत्वात्, तदभावस्य सत्त्वादेस्तन्मात्रवृत्तिविशिष्टसत्ता-त्वादिना द्रव्यत्वाद्यभावव्याप्यत्वात्, सत्ताव्यादिना च साधनवद्वृ-त्तित्वादिति तद्विवक्षाया आवश्यकत्वात् ।

यदभावेनेति कल्पे व्यभिचारिणि साध्यव्यापकसंयोगादेरुपा-धितावारणाय यदभावमात्रवृत्तिधर्मपुरस्कारेण व्याप्यताप्रवेशे गौ-रवम्, अतो लाघवाय यद्वदन्यत्वेन चेत्युक्तम् ।

न च धूमवान् वह्नेरित्यादौ साध्यविरुद्धस्य ह्रदत्वादिविशिष्टद्र-व्यत्वादेर्वारणाय यद्वदन्यत्वेन चेति कल्पेऽपि यद्धर्मावच्छिन्नवद्भे-दमात्रवृत्तिधर्मपुरस्कारेण साध्याभावव्याप्यतेति विवक्षणीयम्, अ-न्यथा तादृशविशिष्टद्रव्यत्वादिमद्भेदस्यायोगोलकादिवृत्तित्ववि-शिष्टत्वेन साध्याभावव्याप्यत्वसाधनवद्वृत्तित्ववत्तया विशिष्टस्य अ-नतिरिक्तत्वेन विशिष्टद्रव्यत्वत्वादावपि साध्यसमानाधिकरणवृत्ति-त्वरूपवक्ष्यमाणविशेषणवत्तया च तदवच्छिन्नवारणासम्भवादिति वाच्यम् । साध्यवद्वृत्तितावच्छेदकत्वस्य साध्यवद्वृत्तित्वापेक्षया गुरोर्विशेषणतया विशिष्टद्रव्यत्वादेर्वारणासम्भवेन यद्वदन्यत्वेन चेति कल्पे तन्मात्रवृत्तिधर्मपुरस्कारेण उन्नायकत्वाविवक्षणेऽपि प्रतीकारत्‌ ।

अथ यदभावेनेति कल्पेऽपि यदभावमात्रवृत्तिधर्मपुरस्कारेणोन्ना-यकत्वमिति न विवक्षणीयम्, गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे यद्धर्मावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावस्यैवोन्नायकताया वि-वक्षणीयतया तद्धर्मविशिष्टनिरूपितव्यापकतायां विशेषणताविशेष-सम्बन्धावच्छिन्नप्रतियोगितानिवेशे प्रतियोगिवैयधिकरण्यानिवेशे क्षतिविरहेण संयोगत्वादेः संयोगादिव्यापकतानवच्छिन्नत्वेन तदव-च्छिन्नाभावस्यायोगोलकादिवृत्तित्वविशिष्टत्वेन वह्न्यादिमति धूमा-द्यभावोन्नायकत्वेऽपि साधनव्यापकसंयोगादावतिव्याप्त्यप्रसक्तेः ।

एतेन यदभावेनेति कल्पे द्रव्यत्वाभाववान्, सत्त्वादित्यादौ सं-

योगाद्यभावेऽतिव्याप्तिः तदभावस्य संयोगादेः संयोगत्वादिना द्रव्यत्वादिव्याप्यत्वात्, अतो द्वितीयकल्पानुसरणमित्यपि निरस्तम्। संयोगाभावत्वादौ प्रतियोगिवैयधिकरण्यघटिततद्व्यापकतावच्छेदकत्वाभावेन तदवच्छिन्नाभावस्य संयोगस्याप्रवेशादिति चेत्? सत्यम्। एवमपि गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमते उपाधितावच्छेदकावच्छिन्नाभावस्यैव यथाश्रुतस्य निवेशेऽपि गुरुधर्मावच्छिन्नोपाधावव्याप्त्यनवकाशाद् धूमवान् वह्नेरित्यादौ संयोगाद्यतिव्याप्तिवारणायैव यदभावेनेति कल्पे व्यापकतावच्छेदकावच्छिन्नाभावस्य निवेशनीयतया गौरवेण यद्वदन्यत्वेन वेति कल्पाश्रयणसङ्गतेरिति।

अत एवेत्यादिपाठः प्रामादिकः, धूमादिसाध्यके ह्रदत्वविशिष्टद्रव्यत्वादावतिव्याप्तिवारणाय सकलकल्प एव साध्यसामानाधिकरण्यावच्छेदकत्वेन धर्मस्य विशेषणीयतया द्रव्यं सत्त्वादित्यादौ जलत्वतेजस्त्वोभयावच्छिन्नाभावाधिकरणगुणादिवृत्तित्वसामान्यस्य द्रव्यत्वाव्यभिचारव्याप्यस्य सत्त्वादौ सत्त्वेऽपि गुणादिवृत्तित्वविशिष्टत्वेन द्रव्यत्वाभावव्याप्यस्य तदभावस्य सत्त्वादिमति सत्त्वेऽपि च क्वचिदपि कल्पे तादृशोभयत्वावच्छिन्नेऽतिप्रसङ्गाभावादुपष्टम्भासङ्गतेः।

न च धूमवान् ह्रदवृत्तित्वविशिष्टद्रव्यत्ववान् द्रव्यं जलत्वतेजस्त्वोभयवदित्येव न प्रतीयते, विशिष्टद्रव्यत्वं धूमवद्वृत्ति जलत्वतेजस्त्वोभयं द्रव्यवृत्तीति प्रतीयत एव, तथा च विशिष्टद्रव्यत्वत्वतादृशोभयत्वादिकं साध्यसामानाधिकरण्यावच्छेदकमेव, धूमाधिकरणस्य विशिष्टद्रव्यत्वाद्यधिकरणत्वमेव परं नास्तीति वाच्यम्। विशिष्टद्रव्यत्वत्वादेर्धूमाद्यधिकरणवृत्तितायामवच्छेदकत्वे तदधिकरणवृत्तितासमशीलतन्निष्ठाधिकरणतानिरूपकत्वेऽप्यवच्छेदकत्वध्रौव्यात् तदवच्छिन्ननिरूपकताकाधिकरणताया एव च तद्विशिष्टाधिकरणतारूपतया धूमाद्यधिकरणस्य विशिष्टद्रव्यत्वाद्यधिकरणताया अपि दुर्वारत्वापत्तेः। साध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वविवक्षयाप्युक्तोभयत्वावच्छिन्नेऽतिप्रसङ्गवारणासम्भवात्।

अथ साध्यसामानाधिकरण्यावच्छेदकत्वस्य धर्मविशेषणत्वे आर्द्रेन्धनत्वादिनापि धूमादिसाध्यकोपाधितानुपपत्तिः, सामाना-

धिकरण्यातिप्रसक्तस्य तदवच्छेदकत्वानुपपत्तेः ।

न च प्रतियोगित्वकारणत्वादेरवच्छेदकतायामेव अवच्छेद्यानतिप्रसक्तत्व नियमः, न त्वाधेयत्वादेरवच्छेदकत्वेऽपीति वाच्यम् । मणिकृतैव व्याप्तिवादे साध्यसम्बन्धितावच्छेदकरूपात्मकव्याप्तिलक्षणे न ह्यतिप्रसक्तमवच्छेदकमित्युक्त्वा वह्नित्वादौ धूमसामानाधिकरण्यावच्छेदकत्वं निरस्य अतिव्याप्तिर्वारितत्वात् । अत एव दीधितिकृता विरुद्धातिप्रसङ्गवारणाय लक्षणव्याख्याने साध्यसामानाधिकरण्यावच्छेदकत्वमुपेक्ष्य साध्यसमानाधिकरणयत्किञ्चिद्धर्मव्यापकतावच्छेदकत्वं धर्मविशेषणं वक्ष्यते । एवं च समानाधिकरणवृत्तित्वं धर्मविशेषणं तेजो द्रव्यत्वादित्यादौ स्पर्शाभावादिवारकम् । ह्रदवृत्तित्वविशिष्टद्रव्यत्वादेर्वारणं च यदभावादिमात्रवृत्तिधर्मपुरस्कारेणाग्राहकत्वविवक्षया । वस्तुतस्त्वित्यादिकल्पे पूर्वकल्पे च जलत्वतेजस्त्वोभयत्वादिना व्यभिचारमात्रे ह्रदवृत्तित्वविशिष्टद्रव्यादिना च धूमादिसाध्यके उपाधिता धर्मस्य साध्यसमानाधिकरणवृत्तित्वविशेषणेन दुर्वारेति कल्पद्वयाभिप्रायेणैव अत एवेत्यादिग्रन्थः सङ्गच्छते । अत्र च जलत्वतेजस्त्वयोरित्यादिकमुपलक्षणम्, विशिष्टद्रव्यत्वत्वादिना नोपाधित्वमित्यपि बोध्यम् । अथ वा साध्यसमानाधिकरणयत्किञ्चिद्धर्मव्यापकतावच्छेदकत्वमेव साध्यसमानाधिकरणवृत्तित्वं धर्मविशेषणम्, तच्च साध्यवद्यत्किञ्चिद्व्यक्तिनिष्ठभेदप्रतियोगितावच्छेदकत्वमेव, अत्यन्ताभावगर्भव्यापकतायामपि प्रतियोगिवैयधिकरण्यनिवेशेन भेदगर्भव्यापकतायामेव पर्यवसानात्, तथा च यदभावेनेति कल्पेऽपि एतादृशविशेषणेन विशिष्टद्रव्यत्वादिवारणसम्भवेऽपि जलत्वतेजस्त्वोभयत्वावच्छिन्नवारणमशक्यम्, तादृशोभयवद्भेदाप्रसिद्ध्या तादृशोभयत्वस्य भेदप्रतियोगितावच्छेदकतानवच्छेदकत्वादिति यद्वदन्यत्वेनेति । कल्पाभिप्रायेणैव अत एवेति ।

न च यदभावेनेति कल्पे धूमवान् वह्नेरित्यादौ संयोगादावतिव्याप्तेर्वारणाय यदभाववमात्रवृत्तिधर्मेण व्याप्यतया विवक्षणीयत्वात् उक्तोभयत्वेनोपाधितया अपि ततो वारणसम्भवान्नोपष्टम्भसङ्गतिरिति वाच्यम् । उक्तसंयोगाद्युपाध्यतिव्याप्तिवारणायैव तद्द्वितीयकल्पानुसरणेन प्रथमकल्पे यदभाववमात्रवृत्तिधर्मपुरस्कारेणो-

च्छायकतया अविवक्षणीयत्वात्। तदविवक्षणेऽपि वस्तुतोऽनवच्छिन्ना या आधेयता तद्विशिष्टत्वेनोपाध्यभावस्य साध्याभावोच्छायकताविवक्षया उक्तसंयोगादावुपाधिवारणसम्भवाच्च, अयोगोलकवृत्तित्वविशिष्टत्वेन सयोगाभावस्य धूमाभावोच्छायकतायामुत्पत्तिकालावच्छिन्नाया एव संयोगाभावनिष्ठाधेयताया अवच्छेदकप्रवेशात्।

न च महाकालपरिमाणवान् द्रव्यत्वादित्यादौ कालिकसम्बन्धेन साध्यवन्निष्ठभेदप्रतियोगितायामवच्छेदकाप्रसिद्धा तेन सम्बन्धेन घटादेरुपाधितानुपपत्तिरत्युपाधिताघटकसम्बन्धसामान्ये यद्धर्मविशिष्टप्रतियोगिकत्वसाध्यवत्सामान्यानुयोगिकत्वोभयाभावस्तद्व्यापकत्वरूपव्यापकतावच्छेदकताया एव निवेशनीयतया उक्तोभयत्वे तादृशव्यापकतावच्छेदकताविरहेण पूर्वकल्पे यदभावेनेति कल्पे च तदवच्छिन्नेऽतिप्रसङ्गानवकाश इति वाच्यम्। कालिकसम्बन्धेन गगनादेरपि वृत्तिमत्त्वस्यावश्यकतया कालिकसम्बन्धेन महाकालवृत्तित्वकिञ्चिद्धर्मविशिष्टप्रतियोगिकत्वोभयाभावाप्रसिद्धा उक्तस्थले कालिकसम्बन्धनापोषटकरीत्यापि दुस्सङ्ग्रहतया साध्यवत्किञ्चिद्व्यक्तिनिष्ठभेदप्रतियोगितावच्छेदकतासामान्ये उपाधिताघटकसम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः तत्स्वरूपव्यापकतावच्छेदकताया एव निवेशनीयतया यद्यदन्यत्वेनान्येतदन्यकल्पे उक्तोभयत्वस्य तादृशविशेषणेनापि दुर्वारत्वात्, समवायेनोभयत्वावच्छिन्नस्य भेदप्रतियोगितानवच्छेदकत्वेन भेदप्रतियोगितावच्छेदकतासामान्ये समवायावच्छिन्नत्वतादृशोभयत्वावच्छिन्नत्वोभयाभावसत्त्वादिति चेन्न। आर्द्रेन्धनत्वादेस्साध्यसामानाधिकरण्यानवच्छेदकत्वे उक्तयुक्त्या साध्यवतस्तद्विशिष्टत्वासम्भवेन तत्र तद्विशिष्टाभावप्रत्ययापत्तेरतिप्रसक्तस्यापि सामानाधिकरण्यावच्छेदकतायाः स्वरूपसम्बन्धरूपाया अवश्योपेयत्वात्, अनतिरिक्तवृत्तित्वरूपावच्छेदकताभिप्रायेण मणिकृतो न ह्यतिप्रसक्तमित्युक्तेः शिरोमणिसम्मतत्वात्, तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशस्य तदसम्मतत्वात्।

(दी०) यद्व्यभिचारित्वेनेत्यस्यापि स एवार्थः, तथा हि यद्व्यभिचारित्वेन हेतुपक्षवृत्तित्वविधया साधनस्य पक्षतावच्छेदकी-

भूतस्य साध्याभावरूपसाध्यवत्पक्षवृत्तित्वं सिद्ध्यतीति ।
अत्र च साध्यसमानाधिकरणत्वेनावच्छिन्नो धर्मो साध्यसमानाधिकरणार्द्रेन्धनादिव्यक्तेरार्द्रेन्धनत्वादिनोपाधित्वे पुनरवच्छेदको धर्म एव साध्यसमानाधिकरणवृत्तित्वेन विशेषणीयः । तेन जलह्रदत्वाभावाधिकरणायोगोलकवृत्तित्वस्य धूमव्यभिचारव्याप्यस्य वह्निवृत्तित्वेऽपि जलह्रदत्वादौ नातिप्रसङ्गः, न वा द्रव्यत्वेन तेजस्त्वसाधने शीतस्पर्शजलत्वाद्यात्मकस्त्वाभावेन तद्वद्वृत्तित्वेन वा द्रव्ये द्रव्यत्वे वा साध्याभावस्य व्यभिचारस्य वा साधके स्पर्शाभावजात्यभावादौ । द्रव्यत्वादिना तु कम्बुग्रीवादिमत्त्वादौ साध्ये स्वव्यभिचारेण स्वाभावेन वा हेतौ तद्वृत्तिर्वा व्यभिचारस्य साध्याभावस्य वा साधकं घटत्वादिव्यभिचारित्वमुपाधिरेव । घटत्वादेस्तदभावस्य वा गमकत्वेऽपि धूमप्रागभाववद्वैयर्थ्यम् ।

(गा०) साधनवतीति साध्याभावोन्नायकाभावप्रतियोगित्वस्य तत्र तदुन्नायकभेदप्रतियोगितानवच्छेदकत्वस्य च स्वोक्तस्य मूललभ्यत्वमुपपादयति । तथा हीति । यद्व्यभिचारित्वेनेत्यादि ।

यद्व्यभिचारित्वं यदभाववद्वृत्तित्वं यद्वदन्यवृत्तित्वं वा । साधनवान् साध्यव्यापकाभाववान् साध्यव्यापकवद्भेदवान्वेति ज्ञाने तुल्यवित्तिवेद्यतया भासमानयदभावादिरूपहेतुसामानाधिकरण्यविषया साधनरूपपक्षतावच्छेदके साध्याभावरूपसाध्यवत्पक्षवृत्तित्वरूपसाध्यसामानाधिकरण्यावगाहिनी साधनवान् साध्याभाववान् साध्यवद्भिन्नो वेति या सिद्धिः तत्प्रयोजकमित्यर्थः । इतीति । तन्मूलार्थ इति शेषः । साध्यविरुद्धधर्मस्योपाधितां वारयितुमाह । अत्र चेति । यद्धर्मावच्छिन्नव्यभिचारः साधने साध्यव्यभिचारसाधक इत्यत्र प्रविष्ट इत्यर्थः । अवच्छिन्नो धर्मीत्यनेन अवच्छेदको धर्म इत्यनेन चास्य सम्बन्धः । धर्मीत्यस्य विशेषणीय इत्यग्रिमेणान्वयः । अत्र कल्पे साध्यसमानाधिकरणार्द्रेन्धनव्यक्तेरलक्ष्यत्वेऽपि । तल्लक्ष्यता-

पक्षे धर्मिण्युक्तविशेषणद्वानासम्भवादाह । साध्येति । तद्व्यक्तित्वेन तादृशव्यक्तेरनुपाधित्वं सर्वथैवेत्यत आर्द्रेन्धनत्वादिनेति । पूर्वकल्पे एतद्विशेषणप्रयोजनं दर्शयति । जलह्रदत्वेति । वस्तुतस्त्वित्यादिकल्पे यदभावमात्रवृत्तिधर्मस्योक्षायकतावच्छेदकत्वविवक्षणे अयोगोलकवृत्तित्वविशिष्टत्वेन जलह्रदत्वाभावादेः साध्याभावाक्षायकत्वेऽप्यतिव्याप्तिवारकतामाह । न चेति । द्रव्यत्वेन तेजस्त्वसाधने स्पर्शाभावजात्यभावादावतिप्रसङ्ग इति योजना । अतिप्रसक्तिं दर्शयति । शीतस्पर्शेति । शीतस्पर्शात्मकेन स्पर्शाभावाभावेन जलत्वात्मकेन जात्यभावाभावेनेत्यर्थः ।

द्रव्ये साध्याभावस्य साधक इति योजना । पूर्वकल्पेऽप्यतिव्याप्तिप्रसक्तेस्सत्वात्तत्कल्पेऽपि तामाह । तद्वद्वृत्तित्वेन द्रव्यत्वे व्यभिचारस्य वा साधक इति । तद्वद्वृत्तित्वम् । शीतस्पर्शादिमद्वृत्तित्वम् । उत्पत्तिकाले जन्यतेजस्यपि स्वमते स्पर्शाभावसत्त्वात्साध्यसमानाधिकरणतया जलतेजःपरमाणुषु च साधनाव्यापकतया स उपाधिरेवेति जात्यभावपर्यन्तानुसरणम् ।

ननु कम्बुग्रीवादिमान् द्रव्यत्वादित्यादौ संयोगेन समवायेन वा घटत्वादिव्यभिचारस्योपाधेः सर्वेष्वेव कम्बुग्रीवादिमत्सु घटेषु घटत्वाभाववति भूतलादौ घटोत्पत्त्युत्पन्नविनष्टघटव्यक्तेरधस्तनघटावयवे संयोगसम्बन्धेन तादृशे च कपाले समवायेन वृत्तिमत्त्वेन साध्याव्यापकत्वेऽपि तद्व्यभिचारस्य व्यर्थविशेषणतया व्यभिचारानुन्नायकत्वादव्याप्तिः, तथा हि साधनपक्षकव्यभिचारानुमाने घटत्वव्यभिचारित्वव्यभिचाररूपहेतुघटकघटत्वस्यैव कम्बुग्रीवादिमत्त्वव्यभिचारव्याप्यतया स्वरूपासिद्धिवारकेतरांशस्य व्यभिचारावारकतया वैयर्थ्यम् साधनधर्मपक्षकसाध्याभावसाध्यकानुमानेऽपि घटत्वव्यभिचाराभावादिरूपहेतुघटकघटत्वाभावस्यैव तादृशसाध्यव्याप्यतया इतरांशवैयर्थ्यमित्याशङ्कां निराकरोति । द्रव्यत्वादिनेति । उपाधिरेवेत्येवकारः साधकमित्यनन्तरं योज्यः । व्यभिचाराद्यवारकविशेषणघटकस्तादृशोपाधिव्यभिचारादेः कथं साधकत्वमित्याकाङ्क्षायामाह । घटत्वादेरिति । यत इत्यादिः । धूमप्रागभाववदिति । यथा धूमत्वावच्छिन्नस्य वह्निगमकत्वेऽपि धूमप्रागभावहेतौ वह्निष्ठा वह्निरूपितेत्यादिन्यायेन नेतरांशवैयर्थ्यं तथा धर्मिभेदाद् घटत्वव्यभिचारित्व-

व्यभिचारादिहेताविति रांशवैयर्थ्यमित्यर्थः।

न च साधनपक्षकव्यभिचारानुमाने हेतौ घटत्वव्यभिचारित्वाभाववद्वृत्तित्वे वृत्तिघटीयरूपादिवृत्तित्वात्मके घटत्वव्यभिचारित्वभेदाभावात् तद्घटत्वव्यभिचारस्य कम्बुग्रीवादिमत्वव्यभिचारगमकतया इतरांशवैयर्थ्यं दुर्वारमेवेति वाच्यम्। संयोगेन घटत्वव्यभिचारस्य उपाधिताया हेतुतावच्छेदकसमवायसम्बन्धेन तादृशोपाधिव्यभिचारस्य स्वघटकसंयोगावच्छिन्नघटत्वव्यभिचारित्वाभेदाप्रसक्तेः समवायघटितघटत्वव्यभिचारस्य तादृशव्यभिचारे स्वघटकीभूततादृशघटत्वव्यभिचारभेदाद् वैयर्थ्येन घटत्वव्यभिचारित्वव्यभिचारित्वेन अगमकत्वेऽपि घटत्वव्यभिचारित्वेनैवोपाधिव्यभिचारस्य गमकतया उपाधिव्यभिचारित्वेन गमकतायाश्चाविवक्षणेनाव्याप्त्यनवकाशात्।

अथ पूर्वकल्पेऽपि उपाध्यभावाधिकरणयत्किञ्चिद्व्यक्तिवृत्तित्वविशिष्टव्यापकत्वमेव साध्यव्यभिचारविशेषणम्, न तूपाधिव्यभिचारत्वे साध्यव्यभिचारसामानाधिकरण्यनिरूपितस्वरूपसम्बन्धरूपावच्छेदकतात्मकतद्व्याप्यतावच्छेदकता, अवच्छिन्नसाध्यव्यापकोपाध्यसङ्ग्रहात्, तथा चोपाधिव्यभिचारित्वघटकविशेषणवैयर्थ्येऽप्यव्याप्तिशङ्कानवकाशः। अस्तु वा तादृशाभावाधिकरणत्वोपलक्षितकिञ्चिदधिकरणवृत्तितात्वे तादृशव्याप्यतावच्छेदकत्वं विशेषणम्, तथापि तच्छरीरे दर्शितघटत्वादेरनिवेशात् तदवच्छिन्नस्य गमकत्वेऽपि तादृशवृत्तितात्वस्य व्याप्यतानवच्छेदकत्वाप्रसङ्गः। एवं वस्तुतस्त्वित्यादिकल्पेऽपि उपाध्यभावत्वे न व्याप्यतावच्छेदकत्वं विशेषणम् उक्तदोषात्, किन्तु उपाध्यभावमात्रवृत्तिधर्मस्यैव तथात्वम्, तथा च सति दर्शितस्थले उपाध्यभावत्वस्य विशेषणवैयर्थ्येन साध्याभावव्याप्यतानवच्छेदकत्वेऽपि उपाध्यभावमात्रवृत्तितद्व्यक्तित्वस्य तद्व्याप्यतावच्छेदकत्वे बाधकविरहात् नाव्याप्तिशङ्कावकाश इति तच्छङ्कया घटत्वादेरित्यादिग्रन्थस्यमयतर्गं धर्मिभेदेन लक्ष्यतावच्छेदकसमन्वयपरतया तद्व्याख्यानमयुक्तमिति चेन्न। उपाधिव्यभिचारित्वे तदभावत्वे च व्यर्थविशेषणघटितरूपस्यावृत्तव्याप्यतावच्छेदकत्वनिवेशाभिमानेनाव्याप्तिशङ्कया ग्रन्थस्य तन्निवेशस्य स्वानभिमतत्वेऽपि तमभ्युपगमसम्भवाभिप्रायेण धर्मिभेदेन समाधानस्य

च सङ्गतेः। अत एवोपाधिव्यभिचारत्वादिना गमकत्वनिवेशाभ्युपगमे ऽभावस्यानुपाधित्वापत्तिरभावाभावरूपधर्मिणः प्रतियोगिभेदाभावेन दुर्वारेति तदनिवेशप्रकाशनेनाग्रे तां निराकरिष्यति।

वस्तुतस्तु विशेषिताविशेषितसाधारणव्यभिचारत्वाद्यवच्छिन्नेन हेतौ साध्यव्यभिचारस्य तादृशयद्भावत्वावच्छिन्नेन हेतुमति वा साध्याभावस्य साधने न निग्रहः तस्यैवोपाधित्वनियमात् द्रव्यत्वादिना कम्बुग्रीवादिमत्त्वादिसाधने घटत्वादिव्यभिचारो यथाख्यातलक्ष्यतावच्छेदकाक्रान्तोऽपि

दिसाधने व्यर्थविशेषण

व्यव्यापकस्योपाधिता निर्वहति, विशेषणव्यभिचारादिविशेषितव्यभिचारत्वाद्यवच्छिन्नेन साध्यव्यभिचारसाधने निग्रहाभावात्, तथा च यथाव्याख्यातलक्ष्यतावच्छेदकस्य घटत्वादिव्यभिचारित्वेऽतिप्रसङ्ग इत्याशङ्कां तादृशोपाधिव्यभिचारादौ विशेषणवैयर्थ्यमुद्धृत्य निराचकार। एवं च साधकं घटत्वादिव्यभिचारित्वमुपाधिरेवेत्यस्य यथाव्याख्यातसाधकतावद् घटत्वादिव्यभिचारित्वं लक्ष्यमेवेत्यर्थः। तथा च यथास्थानस्थ एवैवकारः, घटत्वादेरित्यादौ पूर्वपद्यत इति पूरणीयम्। अवैयर्थ्यम्। अवैयर्थ्येन घटत्वव्यभिचारित्वेत्यादिप्रयोक्तुर्न निग्रह इत्यर्थः।

(दी०) न चाभावस्यानुपाधितापत्तिः; प्रतियोगिनस्तद्वद्वृत्तित्वस्यैव वा हेतुत्वादिति वाच्यम्। तदप्रवेशेऽपि वस्तुतो यस्तदभावस्तस्य तद्वद्वृत्तित्वस्य च हेतुत्वानपायात्। तदभावाभाववद्वृत्तित्वेनोपस्थितावपि तद्वद्वृत्तित्वेनानुपस्थितेर्व्यभिचारसाधने न वैयर्थ्यमित्यपि वदन्ति।

(गा०) न चेति। तथापीति शेषः। अभावस्य। धूमवान् वह्नेरित्यादौ अयोगोलकत्वाभावस्य। अनुपाधितापत्तिः। उपाधित्वानुपपत्तिः। तथा च लक्ष्यतावच्छेदकस्य तत्रातिप्रसङ्गो दुर्वार एवेति भावः। प्रतियोगिनः। प्रतियोगितावच्छेदकावच्छिन्नस्य। साध्याभावे साध्ये। तद्वद्वृत्तित्वस्य। तद्वद्वृत्तित्वत्वावच्छिन्नस्य। हेतुत्वात्। साध्यव्यभिचारसाधने हेतुत्वात्। एवकारस्य प्रतियोगिन इत्यत्रापि सम्ब-

न्येन, साध्याभावसाधने–ऽभावाभावत्वावच्छिन्नस्य व्यभिचार साधन ऽभावव्यभिचारत्वावच्छिन्नस्य वैयर्थ्येन हेतुतावच्छेदात् तद्रूपेण हेतूपन्यासानुपपत्ति । उपाध्यभावादेर्हेतोरुपाध्यभावत्वादिना उपन्यासासम्भवेऽपि येन केनापि रूपेण उपन्याससम्भवादेव उपाधित्वमित्याशयेनाह । तदप्रवेशेऽपीति । हेतुतावच्छेदके उपाधेरप्रवेशेऽपीत्यर्थ । व्यभिचारसाधने वैयर्थ्यं प्रकारान्तरेण परिहरतां मतमाह । तदभावेति । अनुपस्थितेः । उपस्थित्यनियमात् । न वैयर्थ्यमिति । यद्रूपावच्छिन्नोपस्थितिकाले लघुव्याप्यतावच्छेदकान्तरोपस्थितिनियम तद्रूपघटकविशेषणस्यैव वैयर्थ्यमिति भाव । उक्तनियमस्याप्रामाणिकत्वात् वदन्तीति ।

(चि०) लक्षणं तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वम् । यद्धर्मावच्छेदेन साध्य प्रसिद्ध तदवच्छिन्नं पर्यवसितं साध्यम् ।

(दी०) लक्षणमाह । पर्यवसितेति । पर्यवसितपदार्थमाह । यद्धर्मेति । यद्धर्मवतीत्यर्थः ।

(गा०) मिथ लक्षण त्विति लक्षणपद व्यभिचारोन्नायकताप्रयोजकपरतया व्याख्यातम्, अत स्वमते तद्यथाश्रुतार्थकमेवेति सूचनायाह । लक्षणमाहेति । यद्धर्मावच्छेदेनेत्यत्र धर्मस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वविवक्षण मित्रातनयत्वादे श्यामत्वादिसाध्यातिरिक्तवृत्तितया तस्य तादृशधर्मपरत्वाभिमानविरोध, सामानाधिकरण्यमात्रविवक्षयैवोपपत्तौ अनतिरिक्तवृत्तित्वपर्यन्तविवक्षाया वैफल्य चेत्यतो व्याचष्टे । यद्धर्मवतीति । सम्बन्धमात्रस्यैवावच्छेदकपदार्थतया विशेषणे तृतीयया धर्मिणीति पूरणेन यद्धर्मसम्बन्धिनीत्यर्थलाभ इति भाव । इत्थ च यद्धर्मवति साध्य प्रसिद्ध तद्धर्मस्यैव सामानाधिकरण्यसम्बन्धेन साध्यनिष्ठव्याप्यतावच्छेदकत्वसम्भवात् यद्धर्मावच्छेदेनेत्यादि न लक्षणघटकम्, परन्तु धर्मविशेषपरिचायकमात्रम्, किञ्चिद्धर्मविशिष्टसाध्यव्यापकत्वमेव लक्षणघटकमिति ध्येयम् ।

(दी०) नन्वेवं सद्धेतौ सपक्षैकदेशवृत्तिधर्मेऽतिप्रसङ्गः। अथ यद्धर्मावच्छेदेन साधनवति साध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्य व्यापकत्वम्, साध्यसाधनसम्बन्धव्यापकत्वमिति यावत्। विरुद्धमात्रे चोपाधिविरहेऽपि न क्षतिः । लक्ष्यतावच्छेदके च साध्यसमानाधिकरणत्वेन साधन तादृशवृत्तित्वेन वा साधनतावच्छेदक विशेषणीयम् । साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकत्व वा विवक्षितम्। विरुद्धेऽपि साधनव्यापकेनानन्ततोऽन्यतरत्वादिनावच्छिन्नस्य साध्यस्य व्यापकत्वमस्त्येवोपाधीनाम् । प्रमेयत्वादिना च वाय्वादौ प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वादिकं नोपाधि , लक्ष्यतावच्छेदकवाक्यस्थप्रयोजकत्वबाचितृतीयाबलाद्व्यभिचारस्थले साधनस्य साध्यव्यभिचारनियम इत्यर्थे पर्यवसानात् । मैवम्, जनकत्वेन वह्नौ कार्यानुकूलत्वघाद्यात्मकशक्तिसाधने वह्निरिन्द्रियाप्रत्यक्षत्वस्योपाधिर्ग्रन्थकृतैवोद्भावयिष्यमाणत्वात्, तस्य च गुरुत्वात्मकसाध्यस्य साधनस्य चाधिकरणे घटादाववृत्तेरुक्तरूपाभावादेवविघबहुलग्रन्थविरोधात् । दूषकताबीजस्य तत्रापि सम्भवाच्च ।

(गा०) सद्धेतौ । वह्न्यादिसाध्यकधूमादौ । सपक्षैकदेशवृत्तिधर्म । महानसत्वाद्यवच्छिन्नसाध्यव्यापकव्यञ्जनवत्त्वादौ । सद्धेतौ यावत्साध्याधिकरणवृत्त । साधनाव्यापकत्वासम्भवादेक देशत्युक्तम । यद्धर्मावच्छेदेन साधनवति साध्यमिति । साधनवन्निष्ठसाध्यवत्त्वे यो धर्मोऽवच्छेदक इत्यर्थ । अवच्छेदकत्व चान्यूनवृत्तित्वम्, व्यापकत्वमिति यावत् । महानसत्वादिर्न साधनविशिष्टसाध्याधिकरणपर्वतादाववर्त्तमानतया न तादृशसाध्यवत्त्वव्यापक इति न तदवच्छिन्नसाध्यव्यापके ऽतिप्रसङ्ग । तादृशधर्मावच्छिन्नसाध्यव्यापकत्वस्य साध्यसाधनसम्बन्धव्यापकत्वसमनियतत्वाल्लाघवेन तन्निर्देशनमेवोचितमित्याशयेनाह ।साध्येति।

नन्वेव विरुद्धस्थलीयोपाधिमात्र एव अव्याप्ति , साध्यसामान-

र्य-धाप्रसिद्धेरित्यत आह । विरुद्धमात्रे चेति । मात्रपदं कृत्स्नार्थकम् । न क्षतिरिति । दुष्टहेतुमात्रस्य सोपाधित्वनियमानभ्युपगमादिति शेष । तथा चायं गारस्वत्वादित्यादौ विरुद्धे सास्नादिमत्त्वादिर्लक्ष्य एवेति न तत्राव्याप्तिरिति भाव । तस्यालक्ष्यत्वे निरुक्तलक्ष्यतावच्छेदकस्य तत्साधारण्यं दोषायेति लक्ष्यतावच्छेदके तद्व्यावर्त्तनाय विशेषणान्तर प्रवेशयति । लक्ष्यतावच्छेदक इति । साध्यसमानाधिकरणत्वेन साधनं विशेषणीयमित्यग्रिमेणान्वयः ॥ धूमवान् वह्नेरित्यादौ साध्यसमानाधिकरणमहानसीयवह्न्यादौ साध्योपाध्योर्व्यभिचारासत्त्वात् साध्यसमानाधिकरणसाधन नोपाधिव्यभिचारस्य साध्यव्यभिचारोन्नायकत्वसम्भव इत्याशङ्क्याह । तादृशेति । साध्यसमानाधिकरणवृत्तित्वेनेत्यर्थ । स्वविशिष्टाधिकरणसाध्याधिकरणवत्त्वेनेति यावत् । तेन गुणवद् द्रव्यान्यत्वे सति सत्त्वादित्यादौ विरुद्धे द्रव्यान्यत्वविशिष्टसत्त्वात्वादे साध्यसमानाधिकरणशुद्धसत्तादिवृत्तित्वेऽपि न द्रव्यत्वादावतिव्याप्ति । विरुद्धस्थलीयोपाधिमङ्ग्रहायान्यथोपाधिलक्षणमाह । साधनव्यापकीभूतेति । महानसत्वादेर्धूमाद्यव्यापकतया न व्यञ्जनवत्त्वादावतिप्रसङ्ग । विरुद्धस्थलीयोपाधावेव नदू घटयति । विरुद्धेऽपीति । अन्यतरत्वादिनेति । साधनाधिकरणसामान्यसाध्याधिकरणान्यतरत्वादिनेत्यर्थ । आदिना तदुभयविशेष्यकधीविशेषविशेष्यत्वपरिग्रहः ।

नन्वेव वायु प्रत्यक्षः प्रमेयत्वादित्यादौ उद्भूतरूपादावव्याप्ति, साध्यसाधनसम्बन्धस्य साधनव्यापकधर्मावच्छिन्नसाध्यस्य वाधिकरणे आत्मादाववर्त्तमानत्वेन तदव्यापकत्वादिति शङ्कां तस्यालक्ष्यत्वोपगमेन परिहरति । प्रमेयत्वादिनेति । लक्ष्यतावच्छेदकस्य तत्साधारण्य वारयति । लक्ष्यतावच्छेदकेति । प्रयोजकत्ववार्त्तेति । नियतस्वरूपवैशिष्ट्यवार्त्तेत्यर्थः । यद्व्यभिचारस्थले साधनस्य साधननिष्ठव्यभिचारनिरूपकाधिकरण इत्यर्थः । साध्यव्यभिचारनियम । साध्यव्यभिचारनिरूपकत्वनियम । तथा च प्रमेयत्वादिनिष्ठोद्भूतरूपादिव्यभिचारनिरूपकाधिकरणात्मगुणादौ साध्यसत्त्वेन तद्व्यभिचारनिरूपकत्वाभावादुक्तस्थलीयोद्भूतरूपादेर्न तादृशत्वमिति भाव । जनकत्वेन । जनकत्वहेतुना । वह्नौ । पक्षे । कार्यानु-

स्यायोगात् ।

(दी०) अत्राहुः यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वम्, अवच्छेदकत्वं च सामानाधिकरण्येन । न चैतद्घटोत्पत्तिकालीनत्वसामानाधिकरण्यविशिष्टरूपवति तद्घटेऽवर्तमानमपि तद्घटान्यत्वं तद्व्यापकम्, येन पृथिवीत्वेन रूपे साध्ये तद्घटोत्पत्तिकालावच्छिन्नरूपव्यापकतयोपाधिस्स्यात् । स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा ।

(गा०) यद्धर्मावच्छिन्नेति । अवच्छिन्नत्वं विशिष्टत्वम् । महानसत्वादिविशिष्टवह्न्यादिव्यापकव्यञ्जनवत्त्वादेः तद्विशिष्टधूमादिकं प्रत्यपि व्यापकत्वात्पोक्तातिप्रसङ्ग ।

नन्वेवं रूपवान् पृथिवीत्वादित्यत्र तद्घटान्यत्वादिकमुपाधिस्स्यात्, आधेयतासम्बन्धेन एतद्घटोत्पत्तिक्षणविशिष्टस्य आश्रयतासम्बन्धेनैतद्घटोत्पत्तिक्षणवृत्तित्वविशिष्टस्य वा रूपस्य एतद्घटे सत्त्वेन तद्विशिष्टरूपं प्रति एतद्घटान्यत्वस्य व्यापकत्वात्तादृशविशेषणविशिष्टस्य पृथिवीत्वस्य तद्घटेऽपि सत्त्वेन तद्विशिष्टमपि पृथिवीत्वं प्रति तस्याव्यापकत्वादिति प्रगल्भोक्तदूषणोद्धाराय मिश्रसमाधानमुपन्यस्यति । अवच्छेदकत्वं चेति । अवच्छेदकत्वं विशेषणत्वम् । सामानाधिकरण्येनेति । तथा च सामानाधिकरण्यसम्बन्धेन यद्धर्मविशिष्टसाध्यव्यापकत्वं तेन सम्बन्धेन तद्धर्मविशिष्टसाधनाव्यापकत्वमित्यर्थः । तावता न तद्दोष इति स्फुटयति । न चेति । न हीत्यर्थः । एतद्घटोत्पत्तिकालीनत्वसामानाधिकरण्यविशिष्टरूपवतीति । सामानाधिकरण्यसम्बन्धेन एतद्घटोत्पत्तिक्षणवृत्तित्वविशिष्टरूपवतीत्यर्थः ।

न चोत्पत्तिक्षणवृत्तित्वविशिष्टस्य घटोत्पत्तिक्षण एव सत्त्वात् रूपस्य तदानीमसत्त्वात् सर्वथैव विशेषणविशेष्ययोरेकतराभावसत्त्वात् विशिष्टाभाव इति नैतद्घटस्य विशिष्टरूपवत्त्वमिति वाच्यम् । एकक्षणावच्छिन्नत्वाविशेषितसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराधिकरणताया भिन्नकालावच्छेदेन विशेषणविशेष्योभयवत्यपि स्वीकारात् । विवेचनीयमिदमग्रे ।

अथ वा सामानाधिकरण्येनावच्छेदकत्वमित्यस्य सामानाधिकरण्यविशेषणतया धर्मस्यावच्छेदकत्वं विवक्षणीयमित्यर्थः। एवं च यद्धर्मसामानाधिकरण्यविशिष्टसाध्यव्यापकत्वं सद्धर्मसामानाधिकरण्यविशिष्टसाधनाव्यापकत्वमित्यर्थः। इत्थं च सामानाधिकरण्यविशिष्टरूपवतीति लिखनमपि यथाश्रुतमेव सङ्गच्छते। तथा च यद्धर्मसामानाधिकरण्येत्यत्र यद्धर्मोपलक्षितधर्मिवृत्तित्वमेव विवक्षितमित्येतद्घटोत्पत्तिक्षणवृत्तित्वोपलक्षितधर्मिवृत्तित्वविशिष्टरूपवत्त्वमेव तद्घटेऽप्यक्षतमिति न तद्विशिष्टरूपव्यापकत्वमेतद्घटान्यत्वस्येति नातिव्याप्तिः। तद्व्यापकमिति। उक्तविशेषणविशिष्टरूपव्यापकमित्यर्थः। धर्मस्याननुगततया यत्त्वतत्त्वाभ्यां प्रवेशे एकस्याप्युपाधेस्तादृशनानाधर्मभेदेन उपाधित्वं भिद्यत इति स्वयमन्यत् सद्धेतुस्थलीयसाध्यसामानाधिकरण्यव्यावृत्तलक्षणमाह। स्वानधिकरणीभूतेति। स्वमुपाधित्वेनाभिमतधर्मः। सद्धेतौ व्यञ्जनवत्त्वाद्यनधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यस्य तदनधिकरणे अवश्यं सत्त्वान्न तस्य तादृशधर्मावच्छिन्नसाध्यव्यापकतासम्भव इति नातिव्याप्तिः। साधनाव्यापकत्वस्यात्र पृथक्प्रवेशो व्यर्थः, साधनाधिकरणस्य साधनव्यापकधर्मानधिकरणस्याप्रसिद्ध्यैव साधनव्यापकस्य उपाधित्ववारणादतो न तन्निवेशितम्। साधनवतः स्वानधिकरणत्वलाभायैव मूले साधनाव्यापकत्वोपादानमित्याशयः। द्रव्यं सत्त्वादित्यादौ सत्त्वाद्यनधिकरणसाधनाधिकरणाप्रसिद्धावपि सत्त्वादेर्विशिष्टसत्त्वादिना उपाधित्वनिर्वाहाय यद्धर्मावच्छिन्नस्योपाधित्वमभिमतं तद्विशिष्टानधिकरणत्वं निवेश्यम्। द्रव्यं विशिष्टसत्त्वादित्यादौ गुणादेरुपाधितावारणाय साधनतावच्छेदकविशिष्टानधिकरणत्वं विवक्षणीयम्। स्वानधिकरणवृत्तिधर्मव्यापकतायाः स्वस्मिन्नसम्भवात् तादृशधर्मविशिष्टसाध्यव्यापकत्वनिवेशः। यादृशधर्मो विशिष्योपादाय तादृशधर्मत्वेन निवेशे साध्याधिकरणमात्रस्यैव तादृशमेयत्वादिविशिष्टसाध्याधिकरणतया शुद्धसाध्यव्यापकोपाध्यसङ्ग्रहात्। साध्यपदं विशिष्टसाध्यपरम्, तेन श्यामत्वविशिष्टसत्तावन्मित्रातनयत्वादित्यादौ गौरमित्रातनयादेस्साध्यवत्त्वेऽपि न तद्वृत्तिशाकपाकजत्वादेरसङ्ग्रहः। वह्निमान् धूमादित्यादौ व्यञ्जनवत्त्वाद्यनधिकरणपर्वतादिवृत्तिद्रव्यत्वादिसमानाधिकरणवह्न्यादेः समा-

माधिकरणत्वस्य व्यञ्जनवत्त्वाद्यावतिव्याप्तिवारणाय तादृशसाध्यसामानाधिकरण्यमुपेक्ष्य व्यापकत्वनिवेशः । यद्धर्मविशिष्टानधिकरणत्वं साधनवतस्तेन रूपेण व्यापकत्वं बोध्यम्, तेन प्रमेयत्वादिना व्यापकत्वमादाय न व्यञ्जनवत्त्वाद्यतिव्याप्तिः ।

(दी०) यद्यपि शुद्धसाध्यव्यापकस्थलेऽवच्छिन्नसाध्यत्वेन न व्याप्यता, तथापि तद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वादिरूपं तद्व्यापकत्वमक्षतमेव । गुणत्वादिना प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वं द्व्यणुकजन्यत्वाद्यवच्छिन्नसाध्यव्यापकं भवत्येवोपाधिः । एवं च यत्रैव स्वानधिकरणे साधनस्य साध्यव्यभिचारो यत्र च स्वाधिकरणे साध्यं तदुभयमात्रवृत्तिर्यो धर्मस्तद्वृत्ति व्यभिचारेण साधने साध्यव्यभिचारस्साधनवति वा तद्धर्मवत्त्वे सति तदभाववत्त्वेन साध्याभावस्साधनीयः । साध्यासमानाधिकरणस्य साध्यव्यापकाभावस्य वाऽधिकरणं यत्साधनवत्तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वमुपाधित्वम् ।

(गा०) ननु शुद्धसाध्यव्यापकार्द्रेन्धनादौ अयोगोलकमहानसान्यतरत्वादिरूपतादृशधर्मावच्छिन्नसाध्यव्यापकतामादाय लक्षणं सङ्गमनीयम्, तच्च न सम्भवति, शुद्धधूमत्वादेरेव तद्व्याप्यतावच्छेदकत्वसम्भवेन विशिष्टधूमत्वादेर्व्याप्यतानवच्छेदकतया तत्र विशिष्टव्यापकत्वानुपपत्तेरित्याशङ्कां परिहरति । यद्यपीति । अवच्छिन्नसाध्यत्वेन । विशिष्टधूमत्वादिना । तद्व्यापकत्वम् । तद्धर्मविशिष्टसाध्यव्यापकत्वम् । अक्षतमेवेति । तथा च तादृशमेव व्यापकत्वं विवक्षितम्, न तु विशिष्टसाध्यतावच्छेदकावच्छिन्नव्याप्तिनिरूपकत्वमिति नाव्याप्तिरिति भावः ।

ननु घटरूपं प्रत्यक्षं गुणत्वादित्यादौ शुद्धस्य साधनावच्छिन्नस्य पक्षधर्मावच्छिन्नस्य च साध्यस्य व्यापके उद्भूतरूपेऽतिव्याप्तिः, तस्यापि स्वानधिकरणीभूतसाधनाधिकरणद्व्यणुकरूपादिवृत्तिद्व्यणुक-

जन्यत्वादिरूपपक्षधर्मविशिष्टप्रत्यक्षत्ववति नियमतः सत्त्वेन तद्विशिष्टसाध्यव्यापकत्वादित्याशङ्कां लक्ष्यतया परिहरति। गुणत्वादिनेति।

केचित्तु उक्तस्थले उद्भूतरूपे कथमुक्तलक्षणसमन्वयः, तादृशोपाधिव्याप्यतावच्छेदकधर्मैर्द्रव्यत्वादेस्साधनाधिकरणवृत्तित्वात् स्वानधिकरणेत्यादिना तदुपादानासम्भवात्, अतो यादृशधर्मावच्छिन्नसाध्यव्यापकतया तत्र लक्षणसमन्वयस्तं दर्शयति। गुणत्वादिनेति। साध्यव्यापकमित्यनन्तरमत इति पूरणीयम्। उपाधिरिति। उक्तोपाधिलक्षणाक्रान्त इत्यर्थ इत्याहुः।

साध्यसाधनयोरेकरूपेणोपाधिव्याप्यत्वान्याप्यत्वस्य उपाध्यनधिकरणसाधनवद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकताया वा लक्षणघटकत्वे यादृशधर्मो लक्षणघटकः अनुगतीकृत्य तं दर्शयन् तादृशधर्मवत्युपाधिव्यभिचारेण शुद्धसाध्यव्यभिचारानुमानस्य सर्वत्र सम्भवं दर्शयति। एवं चेति। यत्र स्वानाधिकरणे साधनस्य साध्यव्यभिचार इति। स्वाभावसाध्याभावोभयाधिकरणं यत्साधनवदित्यर्थः। अत्राग्रे च स्वमुपाधिः। तादृशमधिकरणं श्यामो मित्रातनयत्वादित्यादौ गौरमित्रातनयः। यत्र च स्वाधिकरणे साध्यमिति। साध्योपाध्युभयाधिकरणं यदित्यर्थः। तादृशमधिकरणं श्याममित्रातनयः। तदुभयमात्रवृत्तिः। मित्रातनयत्वादिः। तद्वति व्यभिचारेण। उपाध्यभावाधिकरणतद्धर्मवद्वृत्तित्वेन। साधने। पक्षे। साध्यव्यभिचारः, साधनीय इत्यग्रिमेणान्वयः। साधनवति। पक्षे। तद्धर्मवत्त्वे सति तदभाववत्त्वेन। तद्धर्मविशिष्टोपाध्यभाववत्त्वेन। उक्ताधिकरणद्वयवृत्तिद्रव्यत्वादिकमपि तद्वत्युपाधिव्यभिचारादिव्यभिचारेण न साध्यस्य व्यभिचारसाधकमिति मात्रपदोपादानम्, तेन च तदधिकरणभिन्नं यदुपाधिशून्यसाध्याधिकरणं तद्वृत्तित्वमेव व्यवच्छेद्यम्, तद्वृत्तिधर्मः तद्वत्युपाधिव्यभिचारस्यान्ततः साध्य एव, साध्यव्यभिचारित्वात् तदधिकरणभिन्नाधिकरणस्य साध्यशून्यस्योपाधिमतः साध्योपाधिसाधनशून्यस्य च सम्भवेऽपि तद्वृत्तित्वस्य व्यवच्छेदोऽविवक्षितः, तत्साधारणधर्मस्याधिकरणे तत्रोपाधिव्यभिचारस्य साध्यव्यभिचारित्वाप्रसक्तेः, उभयोरेव साध्यशून्यतया साध्यव्यभिचारानिरूपकत्वात्, प्रथमान्तिमाभावेन उपाधिव्यभिचाराप्रसिद्धेश्च। एवं च वायुः प्रत्यक्षः

प्रत्यक्षस्पर्शाश्रयत्वादित्यादौ प्रत्यक्षत्वशून्योद्भूतरूपोपाधिमत' परमाणवादौ तृतीयशून्यगगनादौ वर्त्तमानस्य वहिर्द्रव्यत्वादेरपि सङ्ग्रहः, एवं चापाधिशून्यसाध्यवद्वृत्तित्वरूपविशेषणाक्रान्ते साध्याभावोपाध्यभावसाधनैतत्त्रितयाधिकरणवृत्तित्वविशेषणे साध्याभावप्रवेशो ऽनर्थकः, उपाध्यभावाधिकरणस्य साध्याभावशून्यत्वे तद्वत्त्वस्योपाधिशून्यसाध्यवद्वृत्तित्वासम्भवेन तादृशविशेषणाक्रान्तधर्माधिकरणे उपाध्यभावसत्त्वे साध्याभावसत्त्वनियमादिति ।

यत्र स्वानधिकरणे साधनस्य साध्यव्यभिचार इत्यस्य उपाध्यनधिकरणं यत्साधनवदित्येवार्थः, तथा यत्र स्वाधिकरणे साध्यमित्यत्रापि साध्याधिकरणमात्रं विवक्षितम्, उक्तविशेषणाक्रान्तधर्मस्याधिकरणे साध्याधिकरणत्वसत्त्वे उपाधेरावश्यकत्वात्, अन्यथा वृत्तित्वान्तविशेषणव्याघातात् । तथा च व्यवच्छेद्यविशेषणतयैव तदुपादानम् । उपाध्यनधिकरणसाध्यवद्वृत्तित्वे सत्युपाध्यनधिकरणसाधनाधिकरणसाध्याधिकरणोभयवृत्तिधर्म एव विवक्षितः । सत्यन्तमध्ये उपाध्यनधिकरणत्वस्य साध्यवद्विशेषणत्वे साध्याधिकरणमादायोभयवृत्तौ साध्याधिकरणवृत्तित्वाप्रसिद्धिस्स्यादिति तदुपादानम् । उपाध्यनधिकरणवृत्तित्वमात्रविशेषणेऽप्यसिद्धि", उपाध्यनधिकरणसाधनाधिकरणवृत्तौ तदसम्भवात्, अतो अवृत्तित्वप्रतियोगिकोटौ साध्यवत्त्वनिवेशः । उद्भूतरूपानधिकरणप्रत्यक्षत्वाश्रयावृत्तिघटत्वादिमति तादृशोपाधिव्यभिचाराप्रसिद्ध्या तद्धर्मव्यावृत्तये उपाध्यनधिकरणसाधनाधिकरणवृत्तित्वनिवेशः । साधनशून्योपाध्यनधिकरणसाध्याश्रयघटादावुभयवृत्तिगगनघटान्यतरत्ववत्युपाधिव्यभिचारस्य प्रत्यक्षस्पर्शादिरूपसाधने ऽसिद्धिः, अत उपाध्यनधिकरणे साधनाधिकरणत्वविशेषणम् । उपाधिमत्साधनाधिकरणवृत्तित्वं न घटत्वादिव्यावर्त्तकम्, अत उपाध्यनधिकरणत्वनिवेशः । उद्भूतरूपानधिकरणसाधनाधिकरणवृत्तिवायुत्वादिमत्युपाधिव्यभिचारेण साध्यव्यभिचारसाधने वायुत्वादिमद्वृत्तित्वस्यैव हेतुतासम्भवेनोपाधिव्यभिचारघटकोपाध्यभावांशवैयर्थ्यमिति तत्सार्थक्याय साध्याधिकरणवृत्तित्वोपादानम् ।

उक्तलक्षणे स्वत्वेनोपाध्युपादानात् तदननुगमेन साध्यसाध-

नभेदेनैव उपाधिभेदादप्युपाधित्वं भिद्यते इति तदसहिष्णुतया एकसाध्यसाधनकसकलोपाधिसाधारणमनुगतमुपाधित्वमाह । साध्यासमानाधिकरणस्येति । धूमाद्यधिकरणावृत्त्ययोगोलकत्वादेः श्यामत्वाद्यधिकरणावृत्तिगौरमित्रातनयत्वादेश्च अधिकरणं साधनाधिकरणायोगोलकगौरमित्रातनयादि, तन्निष्ठस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणस्यार्द्रेन्धनशाकपाकजत्वादेरभावस्य प्रतियोगितावच्छेदकं साध्यसमानाधिकरणवृत्ति आर्द्रेन्धनत्वशाकपाकजत्वादिकम्, तदादाय सर्वत्र लक्षणसमन्वयः । सद्धेतौ साध्यासमानाधिकरणाधिकरणसाधनाधिकरणाप्रसिद्ध्या व्यञ्जनवत्त्वादौ नातिप्रसङ्गः । तदर्थमेव साधनवति साध्यासमानाधिकरणाधिकरणत्वं विशेषणम् । यद्यपि साध्यानधिकरणत्वं निवेश्यापि तद्वारणं सम्भवति, तथापि तथा सति उपाधिलक्षणज्ञानस्यैव हेतौ साध्यानधिकरणवृत्तित्वरूपव्यभिचारविषयकतया उपाधित्वज्ञानानन्तरमुपाधिना व्यभिचारानुमानमनर्थकमापद्येतेति तदुपेक्ष्य गुर्वप्युक्तविशेषणमादृतम् । अत्रोपाधिन्वघटकेन साध्यासमानाधिकरणधर्मेणापि हेतुना साधनवति साध्याभावसिद्ध्या व्यभिचारः सिध्यतीति वक्ष्यते, तत्र तादृशधर्मेणापि साध्याभावसाधने तादृशधर्मे साध्याभावस्य व्याप्त्यन्तरज्ञानमपेक्षितमतो यादृशविशेषणेन साध्याभावसाधने न व्याप्त्यन्तरज्ञानमपेक्षितं तादृशं वैकल्पिकं विशेषणान्तरमाह । साध्यव्यापकाभावस्येति । सद्धेतौ साधनवति साध्यव्यापकाभावस्यासत्त्वात् न व्यञ्जनवत्त्वादावतिप्रसङ्गः । साधनपदं साधनतावच्छेदकविशिष्टार्थकम्, नातो द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ घटत्वादावतिप्रसङ्गः न वा द्रव्यं गुणान्यत्वे सति सत्त्वादित्यादौ साधनव्यापकगुणान्यत्वादौ । धूमवान् वह्नेः पृथिवी द्रव्यत्वादित्यादौ संयोगादिवारणाय व्यधिकरणान्तम् । द्रव्यं जातेरित्यादौ विशिष्टसत्त्वाद्युपाधित्वव्युदासाय प्रतियोगितावच्छेदकावच्छिन्नेति ।

न च साधनवति स्वप्रतियोगितावच्छेदकावच्छिन्नानाधिकरणत्वनिवेशे तत्तदुपाध्यभावस्य स्वपदेनोपादानात् तदननुगमेन सकलोपाधिसाधारणमीदृशोपाधित्वमपि न सम्भवतीति वाच्यम् । साधनवन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वेन प्रतियो-

गितानामनुगमसम्भव इत्याशयात्। साध्यविरुद्धजलत्वादेरुपाधितावारणाय साध्यसमानाधिकरणवृत्तित्व धर्मविशेषणम्। धर्मिणि साध्यसामानाधिकरण्यनिवेशे साध्यासमानाधिकरणार्द्रेन्धनादिव्यक्तीनामसङ्ग्रहप्रसङ्गात् न तन्निवेशितम्।

न चैवमपि जलवृत्तित्वविशिष्टद्रव्यत्वादावतिप्रसङ्गं कुर्यादः, स्वविशिष्टाधिकरणसाध्याधिकरणकत्वेन धर्मविशेषणे स्वत्वाननुगमात् सकलोपाधिसाधारण्यानिर्वाह इति वाच्यम्। साध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वस्य विवक्षणीयत्वात्।

(दी०) एवं च साध्यसमानाधिकरणत्वेनैव साध्यवदवृत्तिवारणसम्भवे पर्यवसितसाध्यव्यापकत्वाभिधानं तु व्यापकाभावेन व्याप्याभावस्यावश्यम्भावप्रदर्शनार्थम्। तत्साध्यकतत्साधनकसकलोपाधिसाधारणं चेदम्। साध्यव्यापकत्वसाधनाव्यापकत्वावच्छेदकरूपानतिरिक्तवृत्तिमाध्यसमानाधिकरणयत्किञ्चिद्धर्मव्यापकत्वावच्छेदकरूपवत्त्वमुपाधित्वम्। अवच्छिन्नसाध्यव्यापकोपाधौ चान्ततस्साध्योपाधिशून्या साधनवती या व्यक्तिस्तद्वृत्तित्वमेव तादृशं रूपमित्यपि वदन्ति। रूपादिसाध्यकद्रव्यत्वादिहेतौ पृथिवीत्वाभावादेरुपाधितापक्षे तु, स्वविशिष्टसाध्यानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वम्। अत्र च पूर्वदलप्रविष्टा या साधनव्यक्तिस्तदव्यापकत्वं बोध्यम्, तेन रूपादिना गुरुत्वादौ साध्ये पृथिवीत्वाभावादौ नातिप्रसङ्गः। विवेचयिष्यते चेदमुपरिष्टात्।

(गा०) उक्तविशेषणेन लघीयसा विरुद्धवारणात् तन्मात्रवारणप्रयोजनकपर्यवसितसाध्यव्यापकत्वाप्रवेशात् मूलविरोधमुद्धरति। एव चेति। व्यापकाभावेनेति। उपाधेः पर्यवसितसाध्यव्यापकतया तदभावे तादृशसाध्याभावस्यावश्यम्भावेन तेन साधनवति साध्याभावो वक्ष्यमाणरीत्या साधयितु शक्यते इत्युपाधेर्व्यभिचारोन्नायकतां स्फुटीकर्तुमित्यर्थः।

तत्साध्यकेति। तत्संसर्गकेत्यपि बोध्यम्। उपाधितावटकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयतया विशिष्य तादृशसम्बन्धनिवेशावश्यकत्वात्। मूलानुसारेण साध्यव्यापकत्वसाधनाव्यापकत्वघटितमपि लक्षणान्तरमाह। साध्येति। साध्यव्यापकत्वसाधनाव्यापकत्वयोरवच्छेदकं यद्रूपं तदनतिरिक्तवृत्ति यत्साध्यसमानाधिकरणयत्किञ्चिद्धर्मव्यापकतावच्छेदकं रूपं तद्वत्त्वमित्यर्थः। सद्धेतौ साध्यव्यापकतावच्छेदकसाधनाव्यापकतावच्छेदकरूपाप्रसिद्ध्या नातिप्रसङ्गः। आर्द्रेन्धनाद्युपाधौ तादृशार्द्रेन्धनत्वादेरेवानतिरिक्तवृत्त्यार्द्रेन्धनत्वादिकम्, शाकपाकजत्वादौ तु तादृशगौरमित्रातनयावृत्तित्वाद्यनतिरिक्तवृत्ति शाकपाकजत्वादिकमादाय लक्षणसमन्वयः। शाकपाकजत्वादेस्साध्यव्यापकतानवच्छेदकत्वात् तत्सङ्ग्रहाय तादृशरूपानतिरिक्तवृत्तित्वनिवेशः। तदनतिरिक्तवृत्तित्वं च न तच्छून्यावृत्तित्वम्, तथा सति द्रव्यं सत्त्वादित्यादौ तादृशविशिष्टसत्त्वादिरूपशून्यावृत्तिसत्तात्वाद्यवच्छिन्नस्योपाधिताप्रसङ्गात्, अपि तु स्वविशिष्टव्यापकतावच्छेदकतादृशधर्मकत्वम्। धूमादिसाध्यके व्यभिचारिणि साध्यविरुद्धजलवृत्तित्वविशिष्टद्रव्यत्वादिवारणाय साध्यसमानाधिकरणेत्यादि। शाकपाकजत्वादेः साध्यसामानाधिकरण्यविशिष्टधर्मसामान्यं प्रति व्यापकतानवच्छेदकत्वात् यत्किञ्चिदिति। तथा च साध्यवद्यत्किञ्चिन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमवच्छेदकान्तार्थः।

यद्यपि साध्यवन्निष्ठाधिकरणतानिरूपकतानवच्छेदकत्वमेव तदपेक्षया लघु, उक्तस्थले विशिष्टद्रव्यत्वत्वादिव्यावृत्तं च, तथापि विशिष्टद्रव्यत्वादिवारकप्रकारान्तरप्रदर्शनायैव तदुक्तम्। साध्यवन्निष्ठाधिकरणत्वनिरूपकतावच्छेदकत्व एव वा तात्पर्यम्, अवच्छिन्नसाध्यव्यापकोपाधौ साध्यव्यापकत्वसाधनाव्यापकतावच्छेदकतया यादृशं रूपमादाय लक्षणं सङ्गमनीयं तादृशरूपमनुगतीकृत्य दर्शयति। अवच्छिन्नेति। उपाधिशून्या साध्यसाधनवती या व्यक्तिः तद्वृत्तित्वं न साध्यव्यापकतावच्छेदकम्, साध्यशून्याप्युपाधिमती या व्यक्तिः तद्वृत्तित्वातिरिक्तवृत्ति नोपाधितावच्छेदकम्, तादृशं साधनशून्या या व्यक्तिः तद्वृत्तित्वं साधनाव्यापकतावच्छेदकमेवेति साध्यशून्यत्वादिपदोपादानम्। तद्वृत्तित्वमित्युपलक्षणम्। निरुक्ता-

नतिरिक्तवृत्तित्वप्रवेशे तु तद्भेदत्वसत्त्वाभावत्वादिकमपि तादृशं बोध्यम् । रूपवान् द्रव्यत्वादित्यादौ यथाकथञ्चित्स्वव्यभिचारेण साध्यव्यभिचारोन्नायकस्य पृथिवीत्वाभावादेस्सङ्ग्राहत्वे उक्तप्रकाराणामनुसरणेऽपि न निस्तारः, यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वविवक्षामते पृथिव्यवृत्तिधर्मावच्छिन्नरूपं प्रति व्यापकस्य पृथिवीत्वाभावस्य तादृशधर्मावच्छिन्नद्रव्यत्वं प्रत्यपि व्यापकत्वेन तत्सङ्ग्रहासम्भवात् , स्वानधिकरणसाधनवद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकताविवक्षापक्षेऽपि पृथिवीत्वाभावानधिकरणं पृथिव्येव, तद्वृत्तिधर्मावच्छिन्नसाध्याधिकरणे तत्रावर्तमानस्य तस्य न तादृशसाध्यव्यापकतेति तदसङ्ग्रहात् । साध्यासमानाधिकरणस्येत्यादिलक्षणपक्षेऽपि पृथिव्यां रूपासमानाधिकरणस्य रूपव्यापकाभावस्य चाऽधिकरणत्वाभावात्तदधिकरणनिष्ठाभावप्रतियोगित्वस्य पृथिवीत्वाभावेऽनधिकरणत्वाभावात्तदसङ्ग्रहात् । साध्यव्यापकत्वेत्यादिलक्षणपक्षेऽपि साध्यव्यापकत्वसाधनाव्यापकत्वावच्छेदकव्याप्यवृत्तित्वाद्यनतिरिक्तवृत्तित्वं पृथिवीत्वाभावत्वस्य न सम्भवति तदभावस्य घटत्वादिवृत्तित्वादिति तत्सङ्ग्रहासम्भवात् ।

न च समवायसम्बन्धेन साध्यव्यापकत्वसाधनाव्यापकत्वयोरवच्छेदकं पृथिवीत्वाभावरूपान्यतरत्वं तदनतिरिक्तवृत्तित्वं पृथिवीत्वाभावत्वस्याक्षतमिति पृथिवीत्वाभावे तादृशलक्षणसमन्वयसम्भव इति वाच्यम् । व्यभिचारिजात्यादिसाधनाव्यापकतावच्छेदकद्रव्यत्वादिसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वादेर्यथाश्रुतानतिरिक्तवृत्तित्वस्य सत्तात्वादौ सत्त्वादतिप्रसङ्गस्य वारणाय स्वविशिष्टव्यापकतावच्छेदकतत्कत्वरूपतदनतिरिक्तवृत्तित्वस्यावश्यं विवक्षणीयतया धूमवान् वह्नेरित्यादौ संयोगेन साध्यव्यापकत्वसाधनाव्यापकत्वयोरवच्छेदकस्य धूमद्रव्यत्वान्यतरत्वस्य द्रव्यत्वावच्छिन्नं प्रति समवायेन व्यापकतायामवच्छेदकतया द्रव्यत्वादेरुपाधितावारणाय येन सम्बन्धेन साध्यव्यापकत्वादेरवच्छेदकत्वं यस्य तस्य तत्सम्बन्धघटितस्वविशिष्टव्यापकतावच्छेदकत्वविवक्षाया आवश्यकतया रूपपृथिवीत्वाभावान्यतरत्वावच्छिन्नस्य घटत्वादिसाधारणपृथिवीत्वाभावं प्रति समवायेनाव्यापकतया पृथिवीत्वाभावत्वे तादृशानतिरिक्तवृत्तित्वस्य दुर्घटत्वादित्यत आह ।

रूपादीति। स्वविशिष्टेति। धात्वादेः रूपात्मकसाध्यानधिकरण-त्वेन पृथिवीत्वाभावाधिकरणत्वेऽपि तद्विशिष्टसाध्यानधिकरणत-या तादृशसाधनाधिकरणवृत्तिवायुजलान्यतरत्वावच्छिन्नसा-ध्यव्यापकतया उक्तस्थले पृथिवीत्वाभावादिसङ्ग्रहः। साधनाधिक-रणे च स्वविशिष्टत्वाविशेषितसाध्यानधिकरणत्वनिवेशे उपाधिशरी-रे व्यभिचारप्रवेशात् तज्ज्ञानस्य व्यभिचारभाननियततया उपाधि-त्वज्ञानानन्तरं व्यभिचारानुमानस्यानुपपत्तिः। कथञ्चिदुपपत्ताव-पि वैयर्थ्यमतः स्वविशिष्टत्वं साध्यविशेषणम्। अखण्डाभाव-घटकतया न तद्वैयर्थ्यम्। स्वानधिकरणत्वस्थाने स्वविशिष्टसाध्या-नधिकरणत्वनिवेशे साधनव्यापकमपि तादृशं सम्भवति, द्रव्यत्वा-देः स्वविशिष्टधूमाद्यनधिकरणवह्न्यधिकरणायोगोलकादिवृत्तिधर्मा-वच्छिन्नधूमादिव्यापकत्वादतोऽत्र स धनाव्यापकत्वस्यापि निवेशः।

नन्वेवमिदं गुरु रूपादित्यादावपि पृथिवीत्वाभावादेरुपाधिताप-त्तिः, पृथिवीत्वाभावविशिष्टगुरुत्वानधिकरणतेजोवृत्तिजलतेजोन्यत-रत्वावच्छिन्नगुरुत्वव्यापकत्वात् पृथिव्यां रूपाव्यापकत्वाच्चेत्यत आह। अत्र चेति। पूर्वदलप्रविष्टेति। साधनतावच्छेदकाविशिष्टयत्साधन-व्यक्त्यधिकरणं यत्स्वविशिष्टसाध्यानधिकरणं तदधिकरणवृत्तिध-र्मावच्छिन्नसाध्यव्यापकत्वे सति साधनतावच्छेदकविशिष्टतद्य-क्त्यव्यापकत्वं विवक्षणीयमित्यर्थः। नातिप्रसङ्ग इति। तैजसरूप-व्यक्तीनां अधिकरणमेव पृथिवीत्वाभावविशिष्टगुरुत्वानधिकरणत्वे-नोपादाय तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकतायाः पृथिवीत्वाभावे सम्पादनीयत्वात् तद्व्यक्तिव्यापकतायाः पृथिवीत्वाभावस्याऽऽवश्यक-त्वादिति भावः। द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ पृथिवी-त्वविशिष्टद्रव्यत्वाद्यनधिकरणसत्ताधिकरणगुणादिवृत्तिगुणघटान्य-तरत्वावच्छिन्नसाध्यव्यापके गुणाद्यन्यत्वविशिष्टसत्तात्वविशिष्ट-सत्ताव्यक्त्यव्यापके च पृथिवीत्वादावतिव्याप्तिवारणाय प्रथमं वि-शिष्टान्तम्। इदं गुरु रूपविशिष्टद्रव्यत्वादित्यादौ पूर्वदलप्रविष्ट-द्रव्यत्वाद्यात्मकसाधनव्यक्तिरूपवैशिष्ट्यानवच्छिन्नं प्रति पृथिवी-त्वाभावस्याव्यापकतया अव्याप्तिवारणाय द्वितीयं विशिष्टान्तम्।

ननु रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेः सङ्ग्राह्य-त्वे इदं गुरु रूपादित्यादौ तदसङ्ग्राह्यतायां किं बीजमित्यत आह।

धिवेचयिष्यते इति । रूपवान् द्रव्यत्वादित्यादौ हेतोरेकव्यक्तिकतया यत्र हेतावुपाधिव्यभिचारः तत्रैव साध्यव्यभिचार इत्युपदर्शितविशेषणावच्छिन्नोपाधिव्यभिचारस्य हेतौ साध्यव्यभिचारानुमापकत्वसम्भवः, इद गुरु रूपादित्यादौ च विभिन्नयोस्तैजसपार्थिवरूपादिव्यक्त्योरेव गुरुत्वादिसाध्यपृथिवीत्वाभावव्यभिचारयोः सत्त्वेन विशेषणविशेषं निवेश्य व्यभिचारवारणसम्भवेऽपि बाधासिद्धयोरन्यतरस्य दुष्परिहरतया हेतौ पृथिवीत्वाभावस्य साध्यव्यभिचारानुमापकत्वासम्भव इति विशेषो वक्ष्यत इत्यर्थः ।

(दी०) साध्यासमानाधिकरणधर्मस्य साध्यव्यापकाभावस्य वा समानाधिकरणं यत्साधनं तद्वृत्तिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वं वा । एवं चावगते साधनवति साधने वा साध्यासमानाधिकरणधर्मादिना तत्सामानाधिकरण्येन वा साध्याभावो व्यभिचारो वा शक्यते ज्ञातुमिति ध्येयम् । उपाधिशरीरभानस्य साधननिष्ठसाध्याव्यभिचारादिविषयत्वसहिष्णुतायां तु साध्यव्यभिचारित्वेन साध्याव्याप्यत्वेन वा साधनं विशेषणीयम् ।

(गा०) तत्साध्यकतत्साधनकसकलोपाधिसाधारणं साध्यासमानाधिकरणधर्मस्येत्यादिलक्षणमुक्तोपाधिसङ्ग्रहाय परिष्करोति । साध्येति । वाय्वादौ रूपाद्यसमानाधिकरणवायुत्वादेरुपाधिव्यापकतावच्छेदकवायुभेदाद्यवच्छिन्नाभावस्य च समानाधिकरणं यत्साधनं द्रव्यत्वादिकं तादृशधर्मसामानाधिकरण्योपलक्षिततदधिकरणे पृथिव्यादौ पृथिवीत्वाभावत्वावच्छिन्नाभावसत्त्वात् पृथिवीत्वाभावे लक्षणसमन्वयः । इदं गुरु रूपादित्यत्र साध्यासमानाधिकरणतैजसत्वसमानाधिकरणं यद्रूपं तद्वृत्ति तेजसि तदभावासत्त्वान्न तस्योपाधिता । अन्यत्सर्वं पूर्ववत् । एवं चावगते इति । साध्यासमानाधिकरणधर्मेत्यादिना निरुक्तोपाधित्वेनोपाधौ गृहीत इत्यर्थः । उक्तरूपघटकतया साधनवति साध्यासमानाधिकरणधर्म-

ध्यत्वस्य साधने च तादृशधर्मादिसामानाधिकरण्यस्याग्रहीतत्वादि-ति शेषः। साधनवति साध्यासमानाधिकरणधर्मादिना साध्याभा-वस्साधने वा साध्यासमानाधिकरणधर्मादिसामानाधिकरण्येन व्यभिचारः शक्यते ज्ञातुमिति योजना। तथा चोपाधिव्यभिचाररूप-हेतुप्रतिसन्धानमन्तरेणैव व्यभिचारानुमानस्य सौकर्यमिति भावः।

निरुक्तोपाधित्वशरीरे साधनस्य साध्यव्यभिचारनिवेशेऽपि उक्तो-पाधित्वाज्ञानदशायां व्यभिचारोन्नायकताप्रयोजकतद्धर्मावच्छिन्न-साध्यव्यापकत्वसाधनाव्यापकत्वाभ्यां ज्ञातस्योपाधेर्व्यभिचारेण साध्यव्यभिचारानुमानं सुकरमेव, येन रूपेण ज्ञातस्य व्यभिचारो-न्नायकत्वं तदेवोपाधिलक्षणमिति नियमानभ्युपगमादित्याशयेनाह। उपाधीति। व्यभिचारादीत्यादिना साध्याव्याप्यत्वपरिग्रहः। सा-ध्यवदन्यवृत्तित्वरूपसाध्यव्यभिचारस्य साध्यासमानाधिकरणधर्म-सामानाधिकरण्यापेक्षया लघुतया तन्निवेशस्यैव युक्तत्वादिति भावः। साध्याव्याप्यत्वेन साधनज्ञानेऽपि साध्यव्यभिचारानुमानं सम्भवति सिद्धसाधनानवकाशादिति तदेव विशेषणमाह। सा-ध्याव्याप्यत्वेनेति। साध्यवदन्यावृत्तित्वविशिष्टवृत्तिमत्त्वाभावे-नेत्यर्थः।

यद्यप्यस्य साध्यवदवृत्तिमद्वृत्तित्वापेक्षया न लाघवम्, तथा-प्येतद्घटितोपाधित्वज्ञानं स्वतो व्याप्तिज्ञानविरोधीत्याशयेन एत-द्विशेषणादरः।

(दी०) मिश्रास्तु यद्व्यभिचारित्वेनेत्याद्येव लक्षणम्, पर्यवसि-तेत्यादिकं तु व्यभिचारोन्नायकताप्रयोजकरूपप्रदर्शनम्, तत्र पूर्वं प्रतीकं व्याप्तेर्द्वितीयं च पक्षधर्मतायाः प्रदर्शनार्थम्, एवं चाय-मेतत्साधननिष्ठसाध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगीत्यर्थ-के अयमत्र हेतावुपाधिरित्युक्ते कथमस्य व्यभिचारोन्नायकत्व-मित्याशङ्कायां व्यभिचारोन्नयनमपि साधु सङ्गच्छते इत्याहुः।

(गा०) लक्षणमिति। उपाधित्वस्वरूपमित्यर्थः, इतरभेदा-नुमापकमित्यर्थे पर्यवसितसाध्येत्यादेरपि इतरभेदानुमापकत्वस्य दुर्वारतया प्रकारासङ्गतेः। उक्तस्योपाधिपदार्थतावच्छेदकत्वावि-

रहे च तस्य व्यभिचारोन्नायकत्वावोधकतया कथमस्य व्यभिचारोन्नायकत्वमित्याकाङ्क्षानुत्थापकत्वेन एवं चेत्याद्यग्रिमग्रन्थासङ्गतेः । एवं सति लक्षण इत्यस्य विरोधमुद्धरति । पर्यवसितेत्यादिकं त्विति । व्यभिचारोन्नायकतेति । लक्षणपदस्य तादृशरूपार्थकत्वादिति भावः । उन्नायकताप्रयोजकव्याप्तिपक्षधर्मतयोः कस्य कुतो लाभ इत्याकाङ्क्षायामाह । तत्रेति । पूर्वप्रतीको व्यापकत्वान्तभागः, उपाधेः साध्यव्यापकत्वे तद्व्यभिचारस्य तद्व्यभिचारव्याप्यतया अवश्यम्भावाद्व्याप्तेः प्रदर्शकः, द्वितीयभागोऽव्यापकत्वान्तः, उपाधेस्साधनाव्यापकत्वे साधनरूपपक्षे उपाधिव्यभिचाररूपहेतुसत्त्वावश्यम्भावात् पक्षधर्मतायाः प्रदर्शक इत्यर्थः । लक्षणपदस्योक्तव्याख्यानं उपाधिपदस्य उक्तधर्मार्थकत्वावश्यकतया आवश्यकमित्याह । एवं चेति । इत्थमेवेत्यर्थः । अयमित्यारभ्य प्रतियोगीत्यन्तमर्थकथनम् । इत्युक्ते । इति वाक्ये प्रतिवादिना प्रयुक्ते सति । कथमस्य व्यभिचारोन्नायकत्वमिति । अस्य । उपाधिव्यभिचारस्य, व्यभिचारोन्नायकताप्रयोजकाकाङ्क्षायामित्यर्थः । व्यभिचारोन्नयनम्, उदाहरणादिना व्यभिचारव्याप्त्यादिप्रदर्शनम् । सङ्गच्छत इति । उपाधिरित्यस्य पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक इत्यर्थकत्वे तस्योक्ताकाङ्क्षानुत्थापकतया व्यभिचारानुमाने ऽर्थान्तरप्रसङ्गादिति भावः । मिश्रा आहुरित्यस्वरससूचनाय । अयमुपाधिरित्यस्योक्तार्थकत्वे तत एवोपाधिव्यभिचारस्य साध्यव्यभिचारज्ञापकतालाभे हेत्वाकाङ्क्षाविरहात् अयं हेतुः साध्यव्यभिचारी एतदुपाधिव्यभिचारित्वादिति हेत्वन्तरप्रयोगे ऽर्थान्तरं दुर्वारम् । एवमुन्नायकत्वमुन्नयनयोग्यतारूपमेव वाच्यम्, सा च व्याप्तिपक्षधर्मते इति तल्लाभे तदुन्नायकताप्रयोजकरूपाकाङ्क्षापि दुर्घटा ।

न चोन्नायकताप्रयोजकत्वेन सामान्यरूपेण व्याप्तिपक्षधर्मतालाभेऽपि किं तत्प्रयोजकमिति विशेषजिज्ञासायां विशिष्य तत्प्रयोजकप्रदर्शनसङ्गतिरिति वाच्यम् । उन्नयनप्रयोजकत्वेन व्याप्तिपक्षधर्मतयोरुपाधित्वघटकत्वे तदुपाधिव्यभिचारलिङ्गकयत्साध्यव्यभिचारानुमितिरप्रसिद्धा तत्राव्याप्तेर्दुर्वारतया विशिष्यैव व्याप्तिपक्षधर्मतयोरुपाधिलक्षणे निवेशनीयत्वादित्यादिकं तद्बीजम् ।

(दी०) नव्यास्तु संयोगवदन्यत्वेन द्रव्यत्वाभावस्येव संयोगाभावस्याभावेन संयोगेन द्रव्यत्वाभावाभावस्य द्रव्यत्वस्य साधनसम्भवात्, एकशेषस्य दुष्करत्वात् तस्याप्युपाधित्वम्, लक्षणं तु साधनवति साध्याभावोन्नायकव्यतिरेकप्रतियोगितावच्छेदकरूपवत्त्वम्, प्रतियोगित्वं च तदभाववत्त्वम्, व्युत्पादितं च प्रतियोगितावच्छेदकस्यैवान्योन्याभावाभाववत्त्वम्, शेषं पूर्ववदिति ।

(गा०) क्वचित्साधनव्यापकस्यापि स्वव्यभिचारेण साधने साध्यव्यभिचारोन्नायकतया उपाधित्वमभ्युपगम्य साधनाव्यापकत्वघटितोपाधिलक्षणं दूषयतां मतमुपन्यस्यति । नव्यास्त्विति । संयोगवदन्यत्वेन द्रव्यत्वाभावस्येति । यथा द्रव्यं सत्त्वादित्यत्र द्रव्यसाधारणतया संयोगाभावस्य गुणादौ द्रव्यत्वाभावासाधकत्वेऽपि तद्रूपेण तत्सम्भव इत्यर्थः । संयोगाभावस्याभावेनेति । द्रव्यत्वाभाववान् सत्त्वादित्यादावित्यादिः । एकशेषस्य दुष्करत्वादिति । यद्रूपवत्त्वस्य साधनवति साध्याभावोन्नायकत्वं यदभावाभावस्य वा तथात्वं तयोरेकस्यैवोपाधित्वमिति नियन्तुमशक्यत्वादित्यर्थः । तस्यापि । उक्तस्थले संयोगाभावस्यापि । उपाधित्वम् । उपाधित्वमेव । साधनवतीति । द्रव्ये साधनवति द्रव्यत्वोन्नायकसंयोगरूपव्यतिरेकप्रतियोगितावच्छेदकसंयोगाभावत्वमादाय संयोगाभावे लक्षणसमन्वयः ।

नन्वेवं द्रव्यं सत्त्वादित्यत्र संयोगस्यासङ्ग्रहः, साध्याभावोन्नायकसंयोगवदन्यत्वप्रतियोगितायां संयोगत्वस्यानवच्छेदकत्वादित्यत आह । प्रतियोगित्वं चेति । व्यतिरेकप्रतियोगित्वं चेत्यर्थः । तदभाववत्त्वम् । व्यतिरेकाभाववत्त्वम् । क्वचित्तदभावाभाववत्त्वमिति पाठः, तत्र तत्पदाभावपदयोः कर्मधारयः । संयोगत्वस्य संयोगवद्भेदप्रतियोगितानवच्छेदकत्वेऽपि तदभावत्वावच्छेदकत्वाल्लक्षणसमन्वयः । तदेवोपपादयति । व्युत्पादितं चेति । शेषम् । उपनयनयोग्यतादिविधघटनम् ।

(चि०) स च धर्मः क्वचित्साधनमेव, क्वचित् द्रव्यत्वादि, क्वचित् महानसत्वादि । तथा हि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुट एव, व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारनियमात् । साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव, यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य, वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् । अत एव नार्थान्तरम् ।

(गा०) अवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण परं प्रति प्रथमं विशिष्टसाध्यव्यभिचारस्यैव साधनीयतया ऽर्थान्तरमिति पूर्वपक्षग्रन्थोक्तदूषणं परिमार्ष्टुं प्रथममेव सर्वत्र शुद्धसाध्यव्यभिचारप्रसिद्धिप्रकारं दर्शयन् सर्वत्र निरुक्तव्यभिचारोन्नयनयोग्यतारूपलक्ष्यतावच्छेदकसत्त्वं सूचयति मूले । तथा हीत्यादि । प्रथमं विशिष्टसाध्यव्यभिचारसाधनस्य विशेषणव्यभिचारयाधेन शुद्धसाध्यव्यभिचारसिद्धिपर्यवसानं वक्ष्यति, तथा सति च हेतोरेकाधिकरणे साध्योपाध्योर्व्यभिचार आवश्यकः, विशेषणाव्यभिचारिहेत्वधिकरणे विशेषणसत्तानियमेन यत्र हेत्वधिकरणे उपाध्यभावस्तत्र साध्यसत्त्वे तत्र विशिष्टसाध्यस्योपाधिव्यभिचारिताप्रसङ्गेन उपाधेर्विशिष्टसाध्यव्यापकत्वानुपपत्त्या शुद्धसाध्याभावस्याऽऽवश्यकत्वात्, अतोऽवच्छिन्नसाध्यव्यापकेऽप्युपाधौ यद्व्यभिचारेणेत्यादेर्यथाव्याख्यातार्थसम्पलाभः, चरमं च विशेषणवति विशिष्टसाध्यव्यापकोपाधिव्यभिचारेण हेतुना शुद्धसाध्यव्यभिचारत्वावच्छिन्नसाध्यसिद्धिं वक्ष्यति, तथा सत्यपि एकहेत्वधिकरणे उभयव्यभिचारस्याऽऽवश्यकतया व्याख्यातोपाधितालाभः । साध्यव्यापकस्येति । शुद्धेत्यादिः । साधनस्य । साधने । साध्यव्यभिचारः । साक्षाच्छु-

ष्टसाध्यव्यभिचारग्रहः । व्यभिचारित्वेन । व्यभिचारित्वेनापि । साधनस्य साध्यव्यभिचारित्वमेव । साक्षाच्छुद्धसाध्यव्यभिचारित्वग्रह एव । तदेवोदाहरति । यथेति । विशेष्यव्यभिचारित्वनियमात् । विशेष्यव्यभिचाररूपतानियमात् ।

(चि०) विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारसिद्ध्यन्विशेष्यसाध्यव्यभिचारमादायैव सिद्ध्यति, पक्षधर्मताबलात्, अन्यथा प्रतीतेरपर्यवसानात् । न च पक्षधर्मताबलात्प्रकृतसिद्धावर्थान्तरम् ।

(दी०) विशेषणाव्यभिचारित्वेनेत्यादि । सामान्यतो दृष्टमेवैकविशेषबाधे भावयति विशेषान्तरप्रकारिकामनुमितिम्, न चातिरिच्यते विशिष्टाभावो विशेषणविशेष्याभावाभ्यामिति मतेनेदम् ।

(गा०) ननूपाधिव्यभिचाररूपहेतुव्यापकतावच्छेदकविशिष्टसाध्यव्यभिचारत्वस्य विशेषणव्यभिचारसाधारणतया तमादायैव न कथं पर्यवसानमित्याशङ्कां परिहरति । विशेषणाव्यभिचारित्वेनेति । ज्ञाते । निश्चिते । विशेष्यव्यभिचारमादायैवेत्येवकारो व्यभिचारमित्यनन्तरं योज्यः, तेन च विशेषणव्यभिचारसिद्धिव्यवच्छेदः । तत्रैव हेतुस्तदव्यभिचारितया निश्चितत्वं विशेषणतयोपात्तम् ।

ननु तथापि विशेष्यव्यभिचारित्वत्वावच्छिन्नस्य न व्याप्तिनिरूपकत्वम्, अपि तु विशिष्टव्यभिचारित्वस्यैवेति व्याप्तिज्ञानबलात्तेनैव रूपेण व्यभिचारसिद्धिर्भविष्यति, सा च न प्रकृतव्याप्तिग्रहविरोधिनी, असमानप्रकारकत्वादित्यत आह । पक्षधर्मताबलादिति । इतरबाधनिश्चयविशिष्टधर्मिवृत्तित्वव्यापकविषयकपरामर्शबलादित्यर्थः । अन्यथा प्रतीतेरपर्यवसानादिति । इतरबाधबलादपि साध्यव्यभिचारित्वासिद्धौ तत्कालीनानुमानिकप्रत्ययस्य साध्यव्यभिचारी न वेति संशयानिवर्तकत्वेन 'तदेकतरकोटिजिज्ञासानिवर्तकत्वानुपपत्तेरित्यर्थः ।

एतदेवोपपादयति दीधितौ । सामान्यतो दृष्टमिति । सामान्यतः । सामान्यधर्मावच्छिन्ननिरूपितव्याप्तिप्रकारेण । दृष्टम् । गृहीतं लिङ्गम् । एकविशेषबाधे । सामान्यव्याप्त्यैकधर्मावच्छिन्नाविरोधिग्रहे । भावयति । जनयति । विशेषान्तरप्रकारिकाम् । बाधितविशेषावृत्तिताद्दशधर्मावच्छिन्नप्रकारिकाम् । तथा च विशिष्टव्यभिचारित्वेन व्याप्तिग्रहादपि शुद्धसाध्यव्यभिचारित्वेन सिद्धिर्निष्प्रत्यूहेति भावः ।

ननु साधनपक्षकोपाधिव्यभिचारलिङ्गकानुमानाद्विशिष्टसाध्यव्यभिचारसिद्धिः शुद्धसाध्यव्यभिचारत्वमवगाहताम्, विशिष्टाभावस्य विशेषणविशेष्याभावाभ्यामतिरिक्तत्वेऽपि तस्य ताद्दशाभावद्वयव्यापकतया तद्वद्वृत्तित्वत्वरूपस्य व्यापकतावच्छेदकविशिष्टाभाववद्वृत्तित्वत्वस्य विशेष्यविशेषणाभाववद्वृत्तित्वत्वव्यापकतया विशेषणाभाववद्वृत्तित्वत्वावच्छिन्नबाधे विशेष्याभाववद्वृत्तित्वत्वरूपविशेषधर्मप्रकारेणानुमितिसम्भवात्, तथाप्यवच्छिन्नसाध्यव्यापकोपाधिना सत्प्रतिपक्षो न सम्भवति, तद्व्यतिरेकेण विशिष्टव्यतिरेकस्यैव साधनीयतया पक्षे विशेषणवत्तानिश्चयेऽपि नतिसद्धेर्विशेष्याभावविषयकत्वानिर्वाहात्, विशिष्टाभावस्य विशेष्याद्यभावाद्यतिरिक्ततया उक्तरीत्यसम्भवादिति पश्चादेव शुद्धसाध्यव्यतिरेकस्य साधनीयतया मूलोपदर्शितप्राप्तकालताया दुर्वारत्वादित्याशङ्क्य उक्तोपाधेस्सत्प्रतिपक्षोन्नायकतां विशिष्टाभावस्यानतिरिक्ततामतमालम्ब्योक्तरीत्या शुद्धसाध्याभावसिद्धिं सूचयन्नुपपादयति । न चातिरिच्यते इति । नापि भिद्यत इत्यर्थः । इति मतेन इति प्राचीनमतेन ।

(चि०) यद्वा प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वात् महत्त्ववत् । तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत् । अव्यभिचारश्च तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वम् । तच्चाभेदेऽपि ।

(दी०) स्वमतेनाह यद्वेति । प्रत्यक्षस्पर्शाश्रयत्वमित्यादि प्रत्यक्षसङ्ख्यापरिमाणवत्त्वाद्युपाध्यभिप्रायेण यथाश्रुतमेव साधु, आत्मैकत्वादेरपि प्रत्यक्षत्वाङ्गीकारात् । उद्भूतरूपादिपरत्वे च साध्ये हेतौ च प्रत्यक्षपदं बहिरिन्द्रियप्रत्यक्षपरम्, द्रव्यपदे वा बहिर्द्रव्यपरे, महत्त्वपदं च जन्यमहत्त्वपरमिति । व्यापकव्यभिचारित्वं च व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वम् । न च द्रव्यपदवैयर्थ्यम्, विशिष्टाभावस्यातिरिक्तत्वात् । द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपादिव्यभिचार एव हेतुः । व्यापकस्योपन्यासस्तु तर्कप्रदर्शनायेति तत्त्वम् । द्रव्यत्वाव्यभिचारः । द्रव्यत्वाभाववद्वृत्तित्वम् । मित्रातनयत्वमिति । अनुमानमिदमुपाधेः प्रमाणान्तरेण साधनाव्यापकतानिर्णयदशायाम् ।

(गा०) पक्षधर्मताबलात्प्रकृतसिद्धिमवलम्ब्य उभयपक्षेऽर्थान्तरवारणम् । स्वमतेनेति । विशिष्टाभावातिरिक्ततावादिग्रन्थकारमतेनेत्यर्थः । आहेति । व्यभिचारोन्नयनपक्षे हेतौ सङ्कोचकविशेषण प्रक्षिप्य विशेषधर्मावच्छिन्नव्याप्त्यैव शुद्धसाध्यव्यभिचारसिद्धिप्रकारं दर्शयन् तद्दिशा सत्प्रतिपक्षोन्नयनपक्षेऽपि पक्षधर्मविशेषादिरूपविशेषणविशिष्टेनोपाध्यभावहेतुना पक्षे विशेष्याभावस्यैव शुद्धसाध्याभावसिद्धिस्सम्भवतीति दर्शयतीत्यर्थः ।

केचित्तु यथाश्रुतासङ्गतिमालोच्य एवं वर्णयन्ति, इतरबाधबलाच्छुद्धसाध्यव्यभिचारत्वेन व्यापकस्य विशिष्टसाध्यव्यभिचारस्य सिद्धिरित्युक्तमुपपादयितुं विशिष्टव्यभिचारत्वस्य शुद्धसाध्यव्यभिचारसाधारण्यं दर्शयति । न चेति । विशेषणाभावविशेष्याभावाभ्याम् । विशेषणाभावविशेष्याभावाधिकरणाभ्यां विशिष्टाभावो न व्यावृत्तो भवतीत्यर्थः । तथा च विशेष्याद्यभाववतो विशिष्टाभाववत्त्वनियमेन विशेष्याद्यभाववद्वृत्तित्वं विशिष्टव्यभिचाररूपमेवेति भावः । इति मतेन । इतरबाधबलाद्व्यापकतानवच्छेदकप्रकारेणाप्यनु-

मितिरिति पक्षाश्रयणेन । स्वमतेनेति । व्यापकतावच्छेदकप्रकारेणै-
वानुमितिरिति स्वमतेनेत्यर्थ इति । तदसत् । समानविषयकत्वेन
विरोधिताया विचारासहत्वात् । पक्षधर्मताबलात्प्रसिद्धं बाधाच्च नि-
वर्त्स्यतीत्यादिना द्वयमित्यन्तेन मणिकृता प्रदर्शितं बाधस्य दूषणा-
न्तरासाङ्कर्यं सङ्गमयितुं चैत्रो जीवनमरणान्यतरप्रतियोगी प्राणित्वा-
दित्याद्यनुमानेन बहिस्सत्त्वसाधकहेतुघटकजीवित्वसिद्धिप्रकारस्य
मणिकारोक्तस्यान्यथानुपपत्त्या व्यापकतानवच्छेदकप्रकारेण साध्या-
नुमितिस्तन्मतसिद्धेति दीधितिकृता प्रदर्शनीयत्वात् स्वमतेनेत्य-
स्यासङ्गतेः । समानप्रकारकत्वेन विरोधितामते व्यापकतानवच्छेद-
कप्रकारेणानुमितेरावश्यकत्वाच्च । अन्यथा कर्तुरेकत्वे लाघवमिति
ज्ञानकालीनसकर्तृकत्वानुमित्या क्षितिरेककर्तृका न वेति संशयनि-
वर्तनायोगात् । समानविषयकत्वेन विरोधित्वे च विशिष्टव्यभिचा-
रित्वेन शुद्धसाध्यव्यभिचारसिद्ध्यापि प्रकृतव्याप्तिग्रहप्रतिबन्धस-
म्भवात् ताद्रूप्येण सिध्यर्थं यद्वेत्यादिकल्पानुसरणानुपपत्तेश्चेति ।

प्रत्यक्षस्पर्शाश्रयत्वमित्याद्यनुमानमुद्भूतरूपोपाध्यभिप्रायेण य-
थाश्रुतं न सङ्गच्छते, तस्य द्रव्यप्रत्यक्षत्वव्यापकताया आत्मनि व्य-
भिचारेणासम्भवात् द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वेन तद्व्यभिचा-
रोपादानासम्भवादित्युपाध्यन्तराभिप्रायेण यथाश्रुतं सङ्गमयति । प्र-
त्यक्षेति । यथाश्रुतमेव साधित्यनेन सम्बध्यते । प्रत्यक्षसङ्ख्यापरि-
माणयोः प्रत्येकमेवोपाधिता । साधनाव्यापकत्वनिर्वाहाय उभयत्र
प्रत्यक्षत्वविशेषणम् । तच्च लौकिकप्रत्यक्षविषयत्वयोग्यतारूपम्,
तेनाऽऽवरणादिदोषेण प्रत्यक्षद्रव्यविशेषनिष्ठपरिमाणादेर्नियमतो
ऽप्रत्यक्षत्वेऽपि नोक्तोपाधेर्द्रव्यप्रत्यक्षत्वाव्यापकता ।

तद्योग्यता च तत्प्रयोजकसन्निकर्षाश्रयत्वम् वायुपरिमाणादेर्वि-
षयत्वादिना प्रत्यक्षस्वरूपयोग्यस्यापि लौकिकविषयताप्रयोजकलौ-
किकविषयतावदाश्रयघटितसन्निकर्षानाश्रयत्वाच्च निरुक्तयोग्यतेति
न सत् । वायोः प्रत्यक्षत्वमते तु तदीयसङ्ख्यापरिमाणयोरपि उक्तस-
न्निकर्षाश्रयतया वायौ प्रत्यक्षयोग्यसङ्ख्यादिमत्त्वोपाधेः सत्त्वेन
साधनाव्यापकताया दुर्निश्चेयत्वात्, आत्मैकत्वादेरप्रत्यक्षत्वेऽपि ता-
दृशसन्निकर्षाश्रयत्वस्वरूपयोग्यतासत्त्वेन आत्मैकत्वादेरिति पङ्-
क्त्यनुत्थानाच्च ।

एतेनोद्भूतरूपशून्यमूर्तावृत्तित्वमेव योग्यतेत्यपि परास्तम्। आत्मैकत्वादेरप्रत्यक्षत्वेऽपि एतादृशयोग्यतायास्तत्रानपायादिति।

अपि तूद्भूतरूपवदन्यवृत्तित्वाप्रत्यक्षत्वोभयाभाव एव तद्योग्यता, आत्मैकत्वादावप्रत्यक्षत्वाभावेनोभयाभावमुपपादयितुमात्मैकत्वादेरित्युक्तम्। आश्रयप्रत्यक्षदशायामर्थावरणदोषेण परिमाणादिगतजातिभेद एव न गृह्यते, परिमाणादिकं गृह्यत एवेत्यभिप्रेतमिति केचित्।

साध्ये हेतौ च प्रत्यक्षत्वं लौकिकप्रत्यक्षविषयत्वमेव तत्र योग्यताप्रवेशे प्रयोजनाभावात्, आत्मैकत्वपरिमाणयोरप्रत्यक्षत्वे ईदृशोपाधेरप्यात्मनि साध्याव्यापकत्वं स्यात्, अतस्तत्प्रत्यक्षतामतमवलम्ब्य निरस्यति। आत्मैकत्वादेरिति। पूर्वं उद्भूतरूपोपाधेर्व्यभिचारस्य पक्षधर्मतावलात् शुद्धसाध्यव्यभिचारसाधकताकथनात् इदानीं व्याप्तिवलेन तस्य तत्साधकत्वानुक्तौ सन्दर्भविरोधः। एवं वायोः प्रत्यक्षतामते तदीयसङ्ख्यादिकमपि प्रत्यक्षम्, अत एव दीधितिकृता फूत्कारादौ च स्फुटतरप्रत्यक्षास्तत्सङ्ख्यादय इत्युक्तमित्याशयेनाह। उद्भूतरूपेति। साध्ये प्रत्यक्षत्वव्यभिचारि इत्यत्र। हेतौ। द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वादित्यत्र। बहिरिन्द्रियप्रत्यक्षेति। बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयेत्यर्थः। बहिष्ट्वं मनोभिन्नत्वम्। हेतौ प्रत्यक्षपदस्य यथाश्रुतार्थकत्वे व्यापकान्तेनोद्भूतरूपस्यैवासङ्ग्रहः, साध्यस्थतत्पदस्य यथाश्रुतार्थकत्वे च प्रत्यक्षत्वाव्यभिचारिणि सुखादावुद्भूतरूपव्यभिचारस्य व्यभिचारस्स्यादिति उभयत्र यथाश्रुतार्थपरित्यागः। एवं च वायोः प्रत्यक्षत्वे साध्ये इति पूर्वग्रन्थेऽपि प्रत्यक्षपदं दर्शितार्थकमेव, अन्यथा तद्ग्रन्थोपदर्शितानुमाने दर्शितोद्भूतरूपादेस्तदीयसाध्यव्यभिचारानुमापकत्वाकथनेन सन्दर्भविरोधापरिहारात्। प्रत्यक्षे मनोभिन्नेन्द्रियजन्यत्वविवक्षापेक्षया द्रव्ये आत्मभिन्नत्वविवक्षणमेव लाघवादुचितमित्याशयेनाह। द्रव्यपदे वेति। हेतुस्थद्रव्यपदद्वयमित्यर्थः। विशेष्यदलस्थद्रव्यपदस्य यथाश्रुतार्थकत्वे व्यापकान्तेन उद्भूतरूपस्यैवासङ्ग्रहः, सत्यन्तस्थतत्पदस्य तथात्वे सुखादौ व्यभिचारः स्यादित्युभयत्र बहिष्ट्वनिवेशनम्।

नन्वेवं महत्त्ववदिति दृष्टान्तासङ्गतिः, महत्त्वस्य आत्मन्यपि

सत्त्वेन वह्निर्द्रव्यत्वाव्यभिचारासत्त्वात्, महत्त्वविशिष्टस्य दृष्टान्तत्वासम्भवादित्यत आह। महत्त्वपदं चेति।

ननु महत्त्वत्वविशिष्टगगनादिमहत्त्वे एव साध्यसाधनोभयसत्त्वात्तादृशस्य च दृष्टान्तत्वं सम्भवत्येव, तत्सामान्यस्य तथात्वमकिञ्चित्करम्, अन्यथा जन्यमहत्त्वसामान्यान्तर्गतघटादिमहत्त्वे उद्भूतरूपादिव्यभिचाराभावेन तत्सामान्यस्यापि दृष्टान्तत्वासम्भवात्।

न च वह्निर्धूमाव्यभिचारीति व्यवहाराभावात् अव्यभिचारस्य-नञर्थसामान्यस्यैवान्वयितावच्छेदकावच्छेदेनान्वयानियमात् महत्त्वत्वावच्छेदेन वह्निर्द्रव्यत्वाव्यभिचारान्वयो बाधेन न सम्भवतीति जन्यमहत्त्वपरतया महत्त्वपदवर्णनसङ्गतिः, जन्यमहत्त्वत्वावच्छेदेन तदन्वये बाधात् उद्भूतरूपादिव्यभिचारान्वयस्य च तत्सामानाधिकरण्येनैवोपगमादिति वाच्यम्। द्रव्यत्वाद्यव्यभिचारित्वे सतीत्यादितो वह्निर्द्रव्यत्वाव्यभिचारसामानाधिकरण्यविशिष्टोद्भूतरूपव्यभिचाररूपहेतोरेव लाभात् स्वातन्त्र्येण वह्निर्द्रव्यत्वाव्यभिचारस्य महत्त्वेऽनन्वयात्, विशिष्टहेतोश्चावच्छेदकावच्छेदेनान्वयस्य महत्त्वपदस्य जन्यमहत्त्वपरत्वेऽप्यसम्भवात्, घटादिमहत्त्वे विशेष्यासत्त्वात्। मैवम्। हेतुतावच्छेदकविशिष्टे साध्यव्यभिचार एव दोषो न तु तदुपलक्षितेऽपि, तथा सति द्रव्यत्वादौ साध्ये विशिष्टसत्त्वादेर्दुष्टत्वापत्तेः, पक्षतावच्छेदकविशिष्टे साध्यसाधनं च यद्विशिष्टे हेतुस्तद्विशिष्टे साध्यमिति व्याप्तयैव, गन्धप्रागभावादिविशिष्टे गन्धानुमानस्य सद्धेतुतानभ्युपगमात्, उक्तव्याप्तिश्च यद्विशिष्टस्य दृष्टान्तता तद्विशिष्टस्य साध्यसाधनोभयवत्त्वादेव निर्वहति, एवं च वह्निर्द्रव्यत्वाभाववद्वृत्तित्वावच्छेदकस्य महत्त्वत्वस्य तदभावानुयोगितानवच्छेदकतया तद्विशिष्टे न वह्निर्द्रव्यत्वाव्यभिचार इति तद्घटितसाधनविकलतया जन्यमहत्त्वस्य दृष्टान्तत्वानुसरणमिति केचित्।

ननु निरुक्तप्रत्यक्षत्वव्यापकव्यभिचारित्वं यदि तादृशप्रत्यक्षत्वव्यापकत्वावच्छिन्नाभाववद्वृत्तित्वं तदा तद्व्यापकस्य प्रमेयत्वादेः केवलान्वयितया तादृशाभावाप्रसिद्धिः, उपाधितावच्छेदकसमवायसम्बन्धावच्छिन्नाभावस्य सामान्यादौ प्रसिद्धावपि साधनवति वायौ तदभावासत्त्वेन प्रत्यक्षस्पर्शाश्रयत्वे हेत्वसिद्धिः, व्यापक-

प्रतियोगिकाभावनिवेशे चोद्भूतरूपादिविशेषाभाववद्वृत्तितया घटत्वादौ साध्यव्यभिचारशून्ये व्यभिचार इत्यतो व्याचष्टे ,। व्यापकव्यभिचारित्वं चेति । व्यापकतावच्छेदकरूपेणेति । व्यापकतावच्छेदकत्वोपलक्षितेत्यर्थः । तथा चोद्भूतरूपत्वावच्छिन्नाभाववद्वृत्तित्वमादायैव हेतुसिद्धिरिति भावः । द्रव्यपदवैयर्थ्यमिति। शुद्धप्रत्यक्षत्वव्यापकव्यभिचारस्यापि प्रत्यक्षत्वव्यभिचारव्याप्यतया प्रत्यक्षत्वे द्रव्यवृत्तित्वविशेषणस्य व्यभिचाराधारकत्वात्, तदनुपादाने उद्भूतरूपव्यभिचारस्याप्रवेशेन यदा तद्व्यभिचारस्यैव प्रकृतहेतौ निश्चयो न तु शुद्धप्रत्यक्षत्वव्यापकव्यभिचारस्य तदा सन्दिग्धासिद्धिः स्यादिति तन्मात्रवारकत्वात्तस्येति भावः । विशिष्टाभावस्येति । द्रव्यप्रत्यक्षत्वव्यापकताघटकस्य द्रव्यवृत्तित्वरूपविशेषणविशिष्टप्रत्यक्षत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावस्य शुद्धप्रत्यक्षत्वव्यापकताघटकादवच्छेदकत्वाभावादतिरिक्तत्वादित्यर्थः । उद्भूतरूपत्वरूपोपाधितावच्छेदकस्योपलक्षणीभूतव्यापकतावच्छेदकत्वेन । निवेशे प्रयोजनाभावाद्वैयर्थ्यशङ्कैव नास्तीत्याह । द्रव्यत्वाव्यभिचारित्व इति । तर्कप्रदर्शनायेति । उद्भूतरूपत्वं यदि साध्यव्यभिचारव्याप्यव्यभिचारप्रतियोगितावच्छेदकं न स्यात् साध्यव्यापकतावच्छेदकं न स्यादित्येतादृशव्याप्तिग्राहकतर्ककारणीभूतव्यतिरेकनिश्चयसम्भवप्रदर्शनायेत्यर्थः। अव्यभिचारपदस्य तदभाववदवृत्तित्वरूपयथाश्रुतार्थं परित्यज्य अव्यभिचारश्च तत्समानाधिकरणाभावाप्रतियोगित्वमिति मित्रातनयत्वमित्याद्यनुमानेऽघटत्वरूपदृष्टान्तसङ्गमनाय व्याख्यास्यति, अत्रानुमाने द्रव्यत्वाव्यभिचारित्वे सतीत्यत्राव्यभिचारपदस्य यथाश्रुतार्थकत्वेनैवोपपत्तिरिति तद्व्याख्यानमत्राव्यभिचारपदस्यैवेत्यस्य यथाश्रुतार्थकतामाह । द्रव्यत्वेति ।

ननु शाकपाकजत्वं साधनाव्यापकतासन्देहेन सन्दिग्धोपाधितया उदाहरिष्यत्यग्रे, तथा च तद्व्यभिचारस्य साधने सन्दिग्धतया तेनात्र साध्यव्यभिचारसाधनोपन्यासे विरोध इत्यतो दशाभेदेन उभयाविरोधमुपपादयति । अनुमानमिदमिति । प्रमाणान्तरेण। शब्दादिना ।

(दी०) ननु तदव्यभिचारित्वं तदत्यन्ताभाववदवृत्तित्वम्,

तथा च साधनविकलोऽयं साध्यवान् दृष्टान्त इत्यत आह । अव्यभिचारश्चेति । नन्वेवं विशेष्यवैयर्थ्यम्, धूमप्रागभाववद्धर्मिभेदाद्वैयर्थ्यमिति चेत् ? तथापि मित्रातनयत्वव्यापकत्वविशेषितं वृत्तिमत्त्वमेव गमकमिति चेन्न । यत्किञ्चित्तदधिकरणनिष्ठात्यन्ताभावाप्रतियोगित्वस्य फलतस्साध्यानाधिकरणपर्यवसिनस्योक्तत्वात् । तथा चायमर्थः, मित्रातनयत्वाधिकरणयत्किञ्चिन्निष्ठात्यन्ताभावाप्रतियोगित्वं तत्र शाकपाकजत्वव्यभिचारित्वात्, मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति यावत् । तेन श्यामत्वादौ न व्यभिचारः । अव्यभिचारश्चेत्यादि । तथा च बहुव्रीहिः । यद्धर्माव्यभिचारित्वे सति तद्धर्मावच्छिन्नयत्साध्यव्यापकव्यभिचारि तत्तत्साध्यव्यभिचारीति सामान्यव्याप्तेरघटत्वं दृष्टान्त इत्यप्याहु ।

(गा०) मित्रातनयत्वाव्यभिचारित्वे सतीत्यत्राव्यभिचारपदार्थस्याव्यभिचारश्चेत्यादिना प्रसिद्धार्थपरित्यागेन वर्णनमघटत्ववदिति दृष्टान्ताविरोधोपपादकतया सङ्गमयितुमवतारयति । नन्विति । अयम् 'अघटत्वरूपो दृष्टान्तः । साधनविकलः । अघटस्य पटादौ मित्रातनयत्वव्यभिचारित्वात, तथा च दृष्टान्तासम्भव इति भावः । व्यतिरेकदृष्टान्ततैवास्त्विति शङ्कां निराकरोति । साध्यवानिति । अघटत्वस्य श्यामत्वव्यभिचारित्वादिति भाव' । विशेष्यवैयर्थ्यमिति । मित्रातनयत्वव्यापकत्वरूपस्य सत्यन्तार्थस्यैव श्यामत्वव्यभिचारगमकत्वसम्भवादिति भावः । शङ्कते । धूमप्रागभाववदिति । यथा धूमप्रागभावस्य वह्निगमकधूमघटितत्वेऽपि तद्भिन्नतया यन्निष्ठेत्यादिन्यायेन विशेष्यावैयर्थ्यं तथा मित्रातनयत्वव्यापकत्वाविशिष्टशाकपाकजत्वव्यभिचारस्य स्वघटकमित्रातनयत्वव्यापकताभिन्नत्वेन विशेष्यावैयर्थ्यमित्यर्थः । तथापि । विशेष्यावैयर्थ्येऽपि । व्यापकत्वविशेषितम् । व्यापकत्वमात्रविशिष्टम् । वृत्तिमत्त्वम् । वृत्तिमत्त्वरूप उपाधिव्यभिचारित्वम् । गमकम् । गमकमस्तु, हेतुतया उपन्यस्तमस्त्विति यावत् । विशेष्यतावच्छेदकस्य

शाकपाकजत्वाभाववद्वृत्तित्वस्य वैयर्थ्येन श्याममित्रातनयत्वव्यापकव्यभिचारित्वादित्युपन्यासासङ्गतेरिति भावः । यत्किञ्चिदधिकरणेति । मित्रातनयत्वाधिकरणयत्किञ्चिद्व्यक्तीत्यर्थः । तथा सति श्याममित्रातनयमात्रवृत्तिवस्तुनोऽपि तादृशाभावाप्रतियोगित्वेन तत्र व्यभिचारवारकतया विशेष्यसार्थक्यमिति भावः । तत्समानाधिकरणमात्रस्यैव यत्किञ्चित्तदधिकरणनिष्ठाभावाप्रतियोगितया सामानाधिकरण्य एव पर्यवसानमाह । फलत इति । उक्तत्वात् । विवक्षितत्वात् । श्यामत्वादौ व्यभिचारं परिजिहीर्षुर्व्याचष्टे । तथा चेति । मित्रातनयत्वाधिकरणेति । श्यामत्वादेः श्याममित्रातनयव्यक्तिनिष्ठाभावाप्रतियोगित्वमेव, तत्र च शाकपाकजत्वनियमात् तदन्तर्भावेण शाकपाकजत्वव्यभिचारित्वमिति श्यामत्वादेर्नोक्तहेतुत्वमिति भावः । उक्तपर्यवसितार्थस्य व्यभिचारवारणाय तस्य निष्कर्षं दर्शयति । मित्रातनय इति । शाकपाकजत्वाभाववन्मित्रातनयवृत्तित्वादिति भावः । मतान्तरमाह । अव्यभिचारश्चेत्यादीति । विशेष्यसार्थक्यायाऽऽह । तथा च बहुव्रीहिरिति । तत्र मित्रातनयत्वं यत्समानाधिकरणाभावाप्रतियोगीति बहुव्रीह्याश्रयणेन स्वव्यापकमित्रातनयत्वकत्वं विवक्षितमित्यर्थः । तथा च तन्मात्रस्य न गमकता, श्याममित्रातनयमात्रवृत्तिधर्मे व्यभिचारादिति भावः ।

नन्वेवमघटत्ववदिति दृष्टान्तविरोधो दुरुद्धरः, मित्रातनयत्वस्याघटत्वाव्यापकत्वादित्यत आह । यदिति । अघटत्वं दृष्टान्त इति । अघटत्वमघटत्वाव्यभिचारित्वे सति अघटत्वविशिष्टद्रव्यत्वादिव्यापककुसुमादिमदन्यद्रव्यत्वादिव्यभिचारि, अथ च द्रव्यत्वादिव्यभिचारीति क्रमेणेत्यर्थः । विशेषणीभूतधर्मे यत्त्वतत्त्वेन निवेश्य प्रकृतसाध्यं विशिष्य निवेश्य व्याप्तिस्वीकारेऽप्येतद्दृष्टान्तसङ्गतिरिति ध्येयम् । आहुरित्यस्वरससूचनाय, स चैवं तदभाववद्वृत्तित्वरूपयथाश्रुतार्थपरित्यागे बीजाभावादवसेयः ।

केचित्तु विशेषव्याप्तावेव मित्रातनयत्वविशिष्टमघटत्वं दृष्टान्तः, तत्र विशेष्यस्याघटत्वस्य मित्रातनयत्वाभाववद्वृत्तितया न विशिष्टे तदवृत्तित्वसम्भव इति स्वव्यापकतत्काररूपाव्यभिचारनिवेशः, विशिष्टाघटत्वव्यापकत्वं च मित्रातनयत्वस्याक्षतमेवेति मूलं सङ्गमयन्ति । तत्र स्वत्वाननुगमेन हेतुविशेषस्य न दृष्टान्तपक्षसाधारण्यम् ।

एवं साध्यव्यभिचारोऽपि स्वाव्यापकसाध्यकत्वरूप एव साधनीयः, साध्याभाववद्वृत्तित्वस्य व्यभिचारिविशेष्यघटितविशिष्टरूपसद्धेतुसाधारणतया ऽदोषत्वात्, तथा च मित्रातनयत्वरूपपक्षे साध्यव्यभिचारसन्देहदशायां तद्विशिष्टाघटत्त्वेऽपि, साध्यव्यभिचारस्योक्तरूपस्य दुर्निश्चेयतया न दृष्टान्ततासम्भवः ।

न च हेतुतावच्छेदकावच्छेदेन साध्याभाववद्वृत्तित्वस्य दोषतासम्भवात्तदेव प्रकृते ऽनुमेयमित्यघटत्वे तन्निर्णयादेव विशिष्टस्य तस्य दृष्टान्ततासम्भव इति वाच्यम् । एवं सति बाधानवतारदशायां शुद्धसत्तादिकं दृष्टान्तीकृत्य विशिष्टसत्तात्वावच्छेदेन गुणादिव्यभिचारेण द्रव्यत्वव्यभिचारसाधनेन द्रव्यं विशिष्टसत्त्वादित्यादिप्रयोक्तुर्निग्रहापत्तेरित्यादिकं चिन्त्यम् ।

केचित्तु मित्रातनयत्वं मित्राजन्यवृत्त्येककालीनोभयावृत्तिजातिरूपं समवायेन हेतुः, तत्सम्बन्धघटितयोस्साध्योपाधिव्यभिचारयोर्व्यतिरेको ऽसमवेते ऽघटत्वे सुलभ इति व्यतिरेकदृष्टान्त एवायमित्याहुः ।

(चि०) यद्वा यत्साध्यव्यभिचारी साध्यव्यभिचारोन्नायकस्स उपाधिः । तत्त्वं च साक्षात्परम्परया वेति नार्थान्तरम् ।

(दी०) मेयत्वादावपि विशेषणवति विशिष्टसाध्यव्यापकोपाधिव्यभिचारेण शुद्धसाध्यव्यभिचारस्साधनीयः । एवं विशिष्टसाध्यव्यापकस्यापि साक्षाच्छुद्धसाध्यव्यभिचारोन्नायकतयोपाधित्वं समर्थ्य साक्षात्परम्परासाधारणतदुन्नायकतामात्रेण तथात्वं व्यवस्थापयति । यद्वेत्यादिना । अत्रापि पूर्ववद्विरुद्धवारणाय साध्यसमानाधिकरणेति बोध्यम् । व्यभिचारोन्नायकत्वं च यत्र क्वचित् । एवं च पृथिवीत्वादिना गुरुत्वादौ साध्ये द्रव्यत्वादौ व्यभिचारोन्नायकस्य रूपवत्त्वादेर्वारणाय साधनव्यभिचारीति बहुव्रीहिः । न चैवमपि गुरुत्वादिसाध्यके रस-

वत्त्वादिहेतौ द्रव्यत्वं गुरुत्वादिव्यभिचारि जलभिन्ने पृथिवीत्वादिव्यभिचारित्वादिति व्यभिचारोन्नायकं पृथिवीत्वादावतिप्रसङ्गः, साधननिष्ठं यद्व्यभिचारित्वं साध्यव्यभिचारोन्नायकं तत्त्वस्योक्तत्वात् । उक्तिवैचित्र्याच्च पूर्वस्माद्भेदः ।

(गा०) ननु यथाश्रुताव्यभिचारनिवेशेऽपि गौरमितातनयमात्रवृत्तिधर्माणां दृष्टान्तानां मौलभ्यात्तदुपेक्षणं मूलकृतोऽनुचितमित्याशङ्कां निराकर्तुं यथाश्रुताव्यभिचारघटितहेतोर्मित्रातनयमात्रवृत्तिहेतुकस्थले सम्भवेऽपि प्रमेयत्वादिहेतुके स्वरूपासिद्ध्याऽसम्भवादुक्तरीतेरावश्यकतेत्याह । मेयत्वादावपीति । विशेषणवत्तेति । मित्रातनयत्वादिमतीत्यर्थः । मित्रातनयत्वाव्यभिचारित्वे सतीत्यत एवोक्तरीत्या तादृशार्थलाभादित्यर्थः ।

व्याप्यव्यापकभावस्य भेदघटितत्वाभिमानेन स्वरूपासिद्ध्याशङ्काया अप्येवं नावकाश इत्याह मूले । नचाभेदेऽपीति । तत्त्व च साक्षात्परम्परया चेत्यग्रिमग्रन्थस्वरसेन मा भूदवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण साक्षाच्छुद्धसाध्यव्यभिचारसिद्धिः, तथापि तस्योपाधित्वमक्षतमेवेति परम्परया व्यभिचारोन्नायकस्य प्रथममुन्नायनेऽप्रसक्तत्वेऽपि तस्य निरूप्यमाणोपाधित्वाव्याघातत्वादित्यभिप्रायकतया यद्वेत्यादि मूलं सङ्गमयति । एवमिति । उक्तरीत्येत्यर्थः । उपाधित्वं समर्थ्य । निरुक्तोपाधित्वनिर्वाहं सूचयित्वा । तदुन्नायकतामात्रेण तथात्वं व्यवस्थापयति । शुद्धसाध्यव्यभिचारोन्नायकतासामान्येनैवोपाधित्वं निर्वहतीति दर्शयतीत्यर्थः । शाकपाकजत्वादिव्यभिचारत्वेन तद्व्यभिचारमेव हेतूरत्य विशिष्टसाध्यव्यभिचारत्वावच्छिन्नसाधनसम्भवेऽपि शाकपाकजत्वाभावधर्मिमित्रातनयत्वादिमद्वृत्तित्वरूपस्य तद्व्यभिचारस्य तत्त्वेन शुद्धसाध्यव्यभिचारव्याप्यत्वरूपोन्नयनयोग्यतया आवश्यकत्वादिति भावः । पूर्वं साक्षादुन्नायकताघटितमुपाधित्वं निरुक्तम्, इदानीं साक्षात्परम्परासाधारणोन्नायकतासामान्यघटितं निर्वक्तीति तु नार्थः, तदुन्नयनयोग्यताया अवश्यं विवक्षणीयतया तस्या व्याप्तत्वादिरूपाया अविशेषात् ।

न च साक्षादुन्नयनयोग्यत्वं तद्व्याप्यत्वम्, परम्परया तथात्वं च तद्व्याप्यव्याप्यत्वमिति विशेष इति वाच्यम् । तथा सति तयोरननुगमेनात्र साधारणोन्नायकताप्रवेशासम्भवात्, उक्तिवैचित्र्याच्च पूर्वस्मादिद इत्युत्तरग्रन्थासङ्कोचश्च । इत्थं च तत्त्वं चेत्यादिरुपाधित्वघटकमुन्नायकत्वं च साक्षात्परम्परया चेति नार्थः, अपि तु निरुक्तोपाधिनानियतमुन्नयनं साक्षात्परम्परया चेति नार्थान्तरं क्षनिकर्षमिति । विरुद्धवारणाय । साध्यविरुद्धजलत्वादिवारणाय । पूर्ववत्साध्यसमानाधिकरणेति बोध्यम् । धर्मिणि साध्यसामानाधिकरण्यं धर्मे वा साध्यसमानाधिकरणवृत्तित्वविशेषण बोध्यम् । साधने साध्यव्यभिचारोन्नायकत्वविवक्षणे साधनव्यभिचारीत्यस्य वैयर्थ्यादाह । व्यभिचारोन्नायकत्वं च यत्र क्वचिदिति । एवं चेति । तत्सार्थक्यं दर्शयति । द्रव्यत्वादौ व्यभिचारोन्नायकस्येति । द्रव्यत्वं गुरुत्वव्यभिचारि रूपव्यभिचारित्वादिति रीत्येत्यादिः ।

यद्यपि वह्निमान् धूमादित्यादावपि रासभादौ वह्निव्यभिचारोन्नायकव्यभिचारप्रतियोगिवह्निसामग्र्यादिवारकमपि तत्, तथाप्यग्रे गुरुत्वसाध्यकपृथिवीत्वाद्यतिप्रसङ्गस्य शङ्कनीयतया गुरुत्वसाध्यकानुधावनम् । बहुव्रीहिरिति । साधनं व्यभिचारि यस्येतीत्यादिः । तत्पुरुषेण उक्तातिप्रसङ्गस्यैव दुर्वारत्वादिति भावः । पृथिवीत्वादावतिप्रसङ्ग इति । अवच्छिन्नसाध्यव्यापकसङ्ग्रहाय विशेषिताविशेषितसाधारणयद्व्यभिचारोन्नायक इति वक्तव्यत्वादिति भावः । साधननिष्ठमिति । उन्नायकत्वं तद्योग्यता, सा चात्र व्याप्तिरेव, पक्षधर्मताया अन्तर्भावस्य वैयर्थ्यात्, साधननिष्ठत्वनिवेशेनैव साधनव्यापकवारणात् । रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावव्यभिचारस्य वारणाय पूर्वोक्तैव रीतिरादरणीया ।

नन्वेवं यद्व्यभिचारेणेत्याद्यभेद इत्यत आह । उक्तिवैचित्र्याच्चेति । पूर्वमुन्नयनस्य साधनपक्षकत्वोक्तेर्यद्व्यभिचारस्य साधनरूपपक्षधर्मतालाभः, अत्र तु साधनव्यभिचारोन्नयत इति विशेषादित्यर्थः । तथा च पूर्वनिरुक्तस्यैव उक्तिभङ्ग्याऽनुवादोऽयम्, न तु निरुक्त्यन्तरम्, पूर्वमुपाधेः साक्षात्साध्यव्यभिचारानुमापकत्वनिर्वाहे आग्रहः, इदानीं तु न तथात्वाभ्युपगम इत्येतावतैव फलभेदादिति भावः ।

(दी०) केचित्तु व्यभिचारोन्नायकत्वमिह तद्व्याप्यकोटिप्रविष्टतामात्रेण, इत्थं च जलत्वेन करकात्वे साध्ये जलत्वं करकात्वव्यभिचारि स्नेहव्यापकत्वात्, घटेन वा घटत्वे साध्ये घटो घटत्वव्यभिचारी जन्यद्रव्यत्वादिति व्यभिचारोन्नयनसमर्थस्य स्नेहस्य द्रव्यत्वस्य च वारणाय साधनव्यभिचारीति । अयं घटः सत्त्वादित्यादौ सत्त्वं घटत्वव्यभिचारि शब्दादिवृत्तित्वादिति व्यभिचारोन्नायकस्य शब्दादेर्वारणाय साध्यसमानाधिकरणेत्यपि वक्तव्यम्, एवं च रूपेण गुरुत्वादौ साध्ये रूपं गुरुत्वादिव्यभिचारि जलभिन्नपृथिवीत्वाभाववद्वृत्तित्वादिति व्यभिचारोन्नायकस्य गुरुत्वव्यभिचारितैजसरूपादिनिष्ठव्यभिचारप्रतियोगिनः पृथिवीत्वाभावस्य वारणाय यत्राधिकरणे साधनाव्यापकत्वं तत्र व्यभिचारोन्नायकत्वं वक्तव्यम् । यथाकथञ्चित्स्वव्यभिचारेण व्यभिचारोन्नायकमात्रस्य लक्ष्यत्वे यत्साधनव्यक्त्यव्यापकत्वं तद्व्यक्तौ व्यभिचारोन्नायकं वाच्यमित्याहुः ।

(गा०) ये तु पूर्वकल्पभेदायान्यथा व्याचक्षते तन्मतमाह । केचित्त्विति । तद्व्याप्यकोटिप्रविष्टतामात्रेणेति । व्यभिचारव्याप्यतावच्छेदकावच्छिन्नघटकत्वरूपमेव न तु पूर्ववद्व्यभिचारप्रतियोगित्वरूपमित्यर्थः । स्नेहव्यापकत्वादिति । व्यभिचारोन्नयनसमर्थस्य स्नेहस्य वारणायेत्यन्वयः व्यभिचारोन्नयनसमर्थत्वं स्नेहव्यभिचारोन्नयनयोग्यो यो हेतुस्तद्घटकत्वम् । घटेनेति । घटस्य हेतुता संयोगेन समवायेन वा, उभयथैव व्यभिचारिता । जन्यद्रव्यत्वादिति । व्यभिचारोन्नयनसमर्थस्य द्रव्यत्वस्य चेत्यन्वयः । अवृत्तौ व्यभिचारशून्ये व्यभिचारवारणाय जन्येति । घटरूपादौ व्यभिचारवारणाय द्रव्येति । स्नेहव्यापकत्वे स्नेहस्य विशेषणतया जन्यद्रव्यत्वे च द्रव्यत्वस्य विशेष्यतया प्रवेशः, उभयथैवातिप्रसङ्गः, प्रवेशे वैलक्षण्यस्य अविवक्षणादित्येतत्सूचनाय स्थलान्तरकथ-

नम्। करका जलत्वादित्यादौ स्नेहादिवारणं साधनव्यभिचारीत्यत्र षष्ठीसमासेनापि, घटत्ववान् घटादित्यत्र द्रव्यत्वस्य घटाभाववद्वृत्तितया बहुव्रीह्यनादरे न वारणसम्भव इति तदादरप्रयोजनप्रदर्शनाय वा द्वितीयस्थलानुधावनम्। धूमवान् वह्नेरित्यादौ साध्यविरुद्धह्रदत्वाद्यभावाधिकरणायोगोलकवृत्तित्ववत्त्वादिना धूमादिव्यभिचारोन्नयने ह्रदत्वादेरप्रवेशेन तत्रातिव्याप्त्यप्रसक्त्या स्थलान्तरेऽतिव्याप्तिवारणाय साध्यसामानाधिकरण्यं प्रवेशयति। अयमिति। शब्दादीत्यादिना ज्ञानादिपरिग्रहः। मणौ सपक्षैकदेशवृत्तिधर्मवारकतया साध्यव्यभिचारोन्नायकप्रविष्टस्य सार्थक्यं बोध्यम्। इदं गुरु रसवत्त्वादित्यादौ द्रव्यत्वादौ गुरुत्वादिव्यभिचारोन्नायकजलान्यपृथिवीत्वाभाववद्वृत्तित्वाद्घटकपृथिवीत्वादावतिव्याप्तिवारणाय साधने साध्यव्यभिचारोन्नायकत्वं विवक्षणीयम्। इति व्यभिचारोन्नायके। इति रीत्या व्यभिचारोन्नायके, उक्तहेतौ प्रविष्टस्य पृथिवीत्वाभावस्येत्यनेनान्वयः। तस्यानुपाधिताप्रयोजकविशेषणमाह। गुरुत्वादीति। तथा च तद्व्यतिरेकेण कथञ्चिदपि रूपेण न साध्यव्यभिचारानुमानसम्भव इति भावः। यत्राधिकरणे इति। यत्र साधनाधिकरणे स्वाभावः साध्याभाववत्तदधिकरणवृत्तित्वोन्नायकत्वमित्यर्थः। उक्तस्थले च तादृशसाधनाधिकरणे पृथिव्यां साध्याभावासत्त्वात्पृथिवीत्वाभावस्य न तादृशत्वमिति नातिव्याप्तिरिति भावः।

नन्वेवं रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावस्य सङ्ग्राह्यत्वे तत्राव्याप्तिरित्यत आह। यथाकथञ्चिदिति। यत्साधनेति। उक्तस्थले पृथिवीवृत्तिसाधनव्यक्त्यधिकरणं वाय्वादिकमपीति तदन्तर्भावेण साध्यव्यभिचारस्य हेतौ सत्त्वाल्लक्षणसमन्वये इति भावः। अत्र चाभावरूपोपाधेः प्रतियोगिमद्वृत्तित्वस्यैव व्यभिचारोन्नायकतया तदप्रविष्टत्वादसङ्ग्रहः, गुरुधर्मसाधारण्योन्नायकतावच्छेदकत्वस्य प्रवेशेनैतद्दोषस्य वारणेऽपि यत्र साधनाधिकरणे स्वाभावः साध्याभाववत्तदधिकरणकत्वस्य साध्याभाववत्तदीयाधिकरणकत्वस्य वा साधुनया शेषवैयर्थ्यम्, पूर्वनिरुक्तोपाधित्वस्यैव परम्परया व्यभिचारोन्नायकत्वेऽप्यवच्छिन्नसाध्यव्यापकोपाधिसाधारण्येनास्यादृशोपाधित्वनिर्वाहानौचित्यमित्यस्वरसवीजम्।

(चि०) किञ्च अर्थान्तरस्य पुरुषदोषतयाऽऽभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः।

(दी०) नन्वस्तु पारिभाषिकमुपाधित्वम्, तथापि साक्षाद् व्यभिचारानुन्नायकतया दोषत्वाभावेन तदुद्भावनेऽर्थान्तरं स्यादेवेत्यत आह। किञ्चेति। आभासान्तरस्य। तदानीं ज्ञाप्यमानस्य, तथा च तस्यावश्याभ्युपेयदोषभावत्वे तदुद्भावने नार्थान्तरमिति भावः।

(गा०) अवच्छिन्नसाध्यव्यापकस्य साक्षाद्व्यभिचारानुन्नायकत्वाभ्युपगमपक्षे कथञ्चिदुपाधित्वसमर्थनेऽपि तान्त्रिकाणां परार्थस्थले तदुद्भावनमर्थान्तरादिदोषेणानुपपन्नमेवेति शङ्कानिवर्तकतया किञ्चेत्यादिमूलमवतारयति। नन्वस्त्विति। उपाधित्वम्। तान्त्रिकाणामुपाधिव्यवहारविषयत्वम्। पारिभाषिकम्। स्वकल्पितपरिभाषानिर्वाह्यमित्यतोऽवच्छिन्नसाध्यव्यापकस्य साक्षात्साध्याव्यापकत्वेऽपि अस्तु उपाधित्वनिर्वाह इत्यर्थः। साक्षादिति। परम्परया व्यभिचारोन्नायकस्य दोषत्वे उपाध्युन्नायकपरम्पराया अपि तथात्वापत्तेरिति गूढाऽभिसन्धिः। दोषत्वाभावेनेति प्रथममनाकाङ्क्षितत्वादिति शेषः। आहेति। तस्य दोषत्वं व्यवस्थापयतीत्यर्थः।

मूले अर्थान्तरस्य। अर्थान्तरादेः। पुरुषदोषतया। वादिनां तदुद्भावनदशायां आकाङ्क्षाविरहाधीनतया। आभासान्तरस्य। दोषान्तरज्ञानस्य। तत्र। तदानीम्, तदुपाध्युद्भावनदशायामिति यावत्।

उपाधिस्थले व्यभिचारस्याऽऽवश्यकतया आभासान्तरस्य तत्राभावादिति यथाश्रुतासङ्गतिः, अत आभासपदं तज्ज्ञानार्थकमकृत्वा पूरणेन उक्तासङ्गतिं दीधितिकृत् परिहरति। तदानीमिति।

मूले उपाधिरेवेति। एवकारव्यत्यासेन उपाधिर्भावत्वादिकं दोष एव दोषतया उद्भाव्यमेवेत्यर्थः।

अर्थान्तरसत्त्वे उद्भाव्यत्वासम्भवादर्थान्तरप्रयोजकत्वेनाभिहितस्य आकाङ्क्षाविरहस्य प्रकृतेऽसत्त्वलाभायाभासान्तरज्ञानाभावाभिधानस्य भावं प्रकाशयति दीधितौ। तथा चेति तस्याव-

इयेनि परम्परया व्यभिचारोन्नायकत्वेनापि तस्य अनुमितिविरो-
धितया अवश्याभ्युपेयत्वेन तेन रूपेणाकाङ्क्षितत्व इत्यर्थः ।

(दी०) अत्र वदन्ति साध्योपन्यासानन्तरं तत्साधकस्येव साधनोपन्यासानन्तरं तद्दोषस्य व्यभिचारादेराकाङ्क्षितत्वात्तम-नुद्भाव्य साक्षात्तत्साधकस्य शुद्धसाध्यव्यापकस्योपाधेरुद्भावने एवाऽप्राप्तकालत्वम्, का कथा परम्परया तत्साधकस्यावच्छिन्नसाध्यव्यापकस्य, अन्यथा तत्साधकपरम्पराया अपि मध्यमुपन्यासे तथात्वं न स्यात् । न च निग्रहस्थानत्वेन विशेषः, प्रतिज्ञाहान्यादितो हेत्वाभासाच्च बहिर्भूतस्य तथात्वायोगात् ।

(गा०) परम्परया व्यभिचाराद्युन्नायकस्य प्रथममाकाङ्क्षितत्वे उपाध्युन्नायकपरम्परोद्भावनप्रतिबन्देरनुद्धारात् स्वयमन्यानुद्भावनपरिपाटीं प्रदर्शयिष्यन् साम्प्रदायिकोद्भावनक्रमं निराकरोति । अत्र वदन्तीति । साध्योपन्यासानन्तरं तत्साधकस्येवेति । पक्षे साध्यस्योद्भावने कृते उद्भावयितुरज्ञातत्वशङ्कया उद्भावितार्थेऽप्रमितत्वशङ्कया मध्यस्थस्य यथा तन्निवर्तकप्रमाणगोचरनिर्णयेच्छा सम्भवति तथा साधनोपन्यासे कृते तस्य दुष्टत्वादुष्टत्वकोटिकशङ्कया तन्निवर्त्तकतदन्यतरकोटिनिर्णयेच्छया व्यभिचारादिरूपदोषस्याकाङ्क्षितत्वाद्व्यभिचारादिकमनुद्भाव्य प्रथममनाकाङ्क्षितस्य साक्षाद्व्यभिचारादिसाधनस्यापि शुद्धसाध्यव्यापकोपाधेरुद्भावन एव अप्राप्तकालत्वमित्यर्थः । परम्परया । अवच्छिन्नसाध्यव्यभिचारादिसाधनद्वारा । तत्साधकस्य शुद्धसाध्यव्यभिचारादिसाधकस्यावच्छिन्नसाध्यव्यापकस्य, उद्भावने अप्राप्तकालतायाः । का कथा । को विपरीतकथावसरः । अन्यथा । तदाकाङ्क्षावसर एव तत्साधकाकाङ्क्षायाम् । तत्साधकेति । तादृशोपाधिप्रभृतिसाधकेत्यर्थः । तथात्वम् । अप्राप्तकालत्वम् । निग्रहस्थानत्वेनेति । उपाधेरित्यादिः । विशेषः । अतथाभूततत्साधकपरम्परातः, तथा च निग्रहप्रयोजकत्वेन हेत्वाभासादीनामिव उपाधेरपि प्रथममाकाङ्क्षितत्वमिति प्रथमं तदुद्भावने नाप्राप्तकालत्वम्, अपि तु त-

त्माधेर्कोद्भावन पर्येति भावः। प्रतिज्ञाहान्यादित इति। "प्रतिज्ञाहानिः प्रतिज्ञान्तर"मित्यादिसूत्रपरिगणितादित्यादिः। प्रतिज्ञाहान्यादित उपाधेर्मद्भिर्भावस्फुटतर एव। अनौपाधिकत्वस्य व्याप्तित्वमते उपाधेर्व्याप्यत्वासिद्धिरूपतया हेत्वाभासान्तर्भावप्रसङ्गसम्भवात् हेत्वाभासाश्चेति परिगणितत्वेऽपि आदिपदार्थे तमनन्तर्भाव्य हेत्वाभासाधेति पृथगुपादानम्। अनौपाधिकत्वस्य व्याप्तित्वनिरासादित्यादिः। तथात्वायोगात्। निग्रहस्थानत्वायोगात्।

(दी०) न च विभाजकसूत्रस्थेन हेत्वाभासाश्चेति चकारेणानुक्तसमुच्चयपरेण साक्षात्परम्परया वाऽनुमितिदोषोन्नायकस्य सङ्ग्रहः, तथा सति व्यभिचारस्येवाऽऽश्रयासिद्ध्यादेरप्युन्नायकस्य तदुभयोन्नायकपरम्परायाश्च तथात्वापातात्। न चाभासकालतामासादयन्नपि प्रथममुपाध्युपन्यासः कथकसम्प्रदायानुरोधादेव कर्तव्यः, तादृशसम्प्रदायमननुरुन्धानस्य तदुद्भावकं पराभवतश्चायथनिवारणीयतापत्तेः। तस्मात्प्रथमं शुद्धसाध्यव्यभिचार एवोद्भाव्यः, तत्र कथन्तायां तद्धेतुत्वेन शुद्धसाध्यव्यापकोपाधिव्यभिचारः, विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यापकस्योपाधेर्विशिष्टसाध्यस्य वा व्यभिचारः, अत्र च विशेष्ये विशिष्टसाध्यव्यापकोपाधिव्यभिचार इति। वक्ष्यते च व्यभिचारादेरिव तद्व्याप्यवत्त्वादेरपि ज्ञानं व्याप्त्यादिग्रहप्रतिबन्धकम्, तथा च साध्यव्यभिचारव्याप्योपाधिव्यभिचारवानयमिति बोद्धावनीयमिति।

(गा०) तदुभयेति। व्यभिचाराश्रयासिद्ध्युभयेत्यर्थः। तथात्वापातात्। निग्रहस्थानत्वापातात्। तथा चाश्रयासिद्ध्याद्युन्नायकस्य प्रथममुद्भावनेऽपि तथात्वं न स्यादिति भावः। चकारेणोपाधिरेव महर्षिणा सङ्गृहीत इति नाशङ्कनीयम्, दोषोन्नायकत्वाविशेषेणाश्रयासिद्ध्याद्युन्नायकोपेक्षाया निर्बीजत्वात्। तदुद्भावकम्। उपाध्युद्भावकम्। पराभवतः। निगृह्णतः।

नन्वेवमुपाधिः किमुद्भाव्य इत्येत्याकाङ्क्षायामाह । तस्मादिति । तत्र । शुद्धसाध्यव्यभिचारे । कथन्तायाम् । साधकाकाङ्क्षायाम् । तद्धेतुत्वेन शुद्धसाध्यव्यापकोपाधिव्यभिचारः, उद्भाव्य इत्यनुषज्यते । एवमुत्तरत्रापि । व्यभिचारादेस्सम्बन्धताविरहे प्राधान्येनोपाधिर्नोद्भाव्यते एवेति ध्वनितम् । अवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारस्य विशेषणान्तरानवच्छिन्नशुद्धसाध्यव्यभिचारासाधकत्वेऽपि विशेषणान्तरविशिष्टतया तदुद्भावनमपि प्रथमतस्सम्भवतीत्याह । विशेषणेति । अविशिष्टेनापि विशिष्टसाध्यव्यापकव्यभिचारेण विशिष्टसाध्यव्यभिचारे सिद्ध्यति पक्षधर्मताबलात् शुद्धसाध्यव्यभिचारसिद्धिसम्भवेऽपि विशेषणान्तरानवच्छिन्ने विशिष्टसाध्यव्यापकोपाधिव्यभिचारे शुद्धसाध्यव्यभिचारावच्छिन्नस्य साधकतयोपन्यस्ते तद्रूपावच्छिन्नसिद्ध्यौपयिकतद्रूपावच्छिन्ननिरूपितव्याप्तिस्तादृशोपाधिव्यभिचारहेतावाकाङ्क्षोदयात् तस्याश्च तादृशहेतौ बाधेनोद्भावनासम्भवात् सत्यन्तविशेषितस्यैवोद्भाव्यत्वमुक्तम् । तादृशविशेषणाविशेषितेन तादृशोपाधिव्यभिचारेणैव तथाविधेन विशिष्टसाध्यव्यभिचारेणापि शुद्धसाध्यव्यभिचारसाधनसम्भवात्तस्याप्युद्भावनीयतामाह । विशिष्टसाध्यस्य चेति । अत्रापि सत्यन्तमनुषज्यते । चाकारो व्यवस्थितविकल्पार्थः । अत्र च विशेष्य इति । उपन्यस्तस्य विशेषणाव्यभिचारविशिष्टसाध्यव्यभिचारस्य घटके विशिष्टसाध्यव्यभिचार इत्यर्थः । व्यभिचारव्याप्यत्वविशिष्टस्य व्यभिचारान्तर्भावात्तादृशस्योपाधिव्यभिचारस्य प्रथममुद्भावनेऽपि नाप्राप्तकालतेत्याह । वक्ष्यते चेति । व्याप्त्यादिग्रहप्रतिबन्धकमिति । साक्षादित्यादिः । तथा च तद्व्याप्यवत्त्वमपि हेत्वाभास इति भावः ।

(चि०) न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वम्, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात्, केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् । न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः, तत्रानुकू-

लतर्काभावेन साध्यव्यापकत्वानिश्चयात्,

(दी०) साध्यव्यापकत्वानिश्चयात्। उपाधित्वौपयिकतदनिश्चयात्। अनुकूलतर्कादिना तादृशव्यापकतानिश्चये तु बाधोन्नीतवदस्यैव निश्चितोपाधिः। न च स्वव्याघातकत्वान्नायमुपाधिः, तद्धि न सर्वानुमानसाधारणम्, अनुकूलतर्कादिनिश्चितव्याप्तिके हेतौ तदभावात्। नापि तद्व्यभिचारेण व्यभिचारानुमानेऽपि पक्षेतरान्तरस्योपाधित्वसम्भवः, अनुकूलतर्कादिना तस्य साध्यव्यापकत्वनिश्चये व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यम्भावेन तदयोगात्। अत एव पक्षेतरस्योपाधित्वे सर्वत्रैव तादृशोपाधिसम्भवेनानुमानमात्रविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्य व्याघात इति परास्तम्। कथकसम्प्रदायानुरोधाद्बाधानुन्नीतः पक्षेतरो नोपाधित्वेन कथायामुद्भाव्य इति तु वदन्ति।

(गा०) ननु पक्षेतरत्वे व्यापकताग्राहकतर्काभावेन साध्यव्यापकत्वानिश्चयात् न तस्य दूषकत्वमिति मूलोक्तं न सङ्गच्छते, तत्र शुद्धसाध्यव्यापकत्वानिश्चयस्यावच्छिन्नसाध्यव्यापकोपाधिसाधारणतया अदूषकताप्रयोजकत्वात्, किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकतायाः पक्षेतरत्वेऽपि निश्चयसम्भवादित्याशङ्क्य साध्यव्यापकत्वानिश्चयादिति व्याचष्टे। उपाधित्वौपयिकेति उपाधित्वौपयिकस्य तस्यानिश्चयादित्यर्थः। उपाधित्वौपयिकं च साध्यव्यापकत्वं पूर्वोक्तं यदवच्छिन्नसाधनाव्यापकत्वं तदवच्छिन्नसाध्यव्यापकत्वरूपम्। सद्धेतौ च पक्षेतरत्वेन तन्निश्चयासम्भवः, तदसत्त्वादिति भावः।

ननु तत्र तादृशव्यापकताया असत्त्वेऽपि तर्काभासात् स्वतस्सिद्धव्यभिचाराग्रहाद्वा तन्निश्चयः सम्भवत्येवेत्यत आह। अनुकूलतर्कादिनेति। तादृशेति। उपाधित्वौपयिकेत्यर्थः। बाधोन्नीतवत्। वह्निरनुष्ण इत्यादिस्थलीयवह्नीतरत्वादिवत्। निश्चितोपाधि। व्यभिचारनिश्चयाधायकतया अनुमानविरोधी। अयम्। बाधानुन्नीत-

पक्षेतरः । नोपाधिः । न दूषकः । हि । यतः । तत् । अदूषकताप्रयोजकं स्वव्याघातकत्वम् । सर्वानुमानसाधारण्यम् । सर्वत्रैवानुमाने पक्षेतरत्वस्य साध्यव्यापकतानिश्चयसम्भवेन दूषकताप्रसक्तिः । स्वपदस्यानुमानसामान्यपरतया ईदृशसर्वानुमानसाधारण्यस्य स्वव्याघातकता । निश्चितव्याप्तिके इति । प्रथमतो हेतौ व्याप्तिनिश्चये सतीत्यर्थः । तदभावात् । पक्षेतरत्वे साध्याव्यापकत्वज्ञानेन प्रतिबन्धात् साध्यव्यापकतानिश्चयासम्भवात् । स्वपदस्य स्वव्यभिचारहेतुकव्यभिचारानुमानार्थकतया अन्यादृशं स्वव्याघातकत्वपदार्थं निराकुरुते । नापीति । तद्व्यभिचारेण । पक्षेतरव्यभिचारेण । उपाधित्वसम्भवः । दूषकताप्रसक्तिः । तस्य । पक्षेतरस्य । व्यापकव्यभिचारिणि । व्यापकतया गृहीतस्य व्यभिचारिणि । व्याप्येति । व्याप्यस्य । व्याप्यतया गृहीतस्य साध्यस्य व्यभिचाराद्यसम्भावनिश्चयेनेत्यर्थः । पक्षेतरो यदि साध्यव्यभिचारव्याप्यव्यभिचारप्रतियोगी न स्यात् साध्यव्यापको न स्यात् पक्षेतरव्यभिचारो यदि साध्यव्यभिचारव्याप्यो न स्यात् तद्व्यापकव्यभिचारो न स्यात् इति तर्केण पक्षेतरव्यभिचारस्य साध्यव्यभिचारव्याप्यतया निश्चयेनेति यावत् । तदयोगात् । व्यभिचारानुमाने साधनरूपपक्षेतरस्य दूषकत्वायोगात् । एवं स्वस्योपाधित्वम् तद्व्याघातकत्वमित्यर्थः । दूषयति । अत एवेति । अत एव । पक्षेतरत्वस्य अनुकूलतर्कादिना यत्र साध्यव्यापकताग्रहस्तत्रोक्तयुक्त्या तद्व्यभिचारेण साध्यव्यभिचारासिद्धेरनपवादत्वादेव । पक्षेतरत्वस्य क्वचिद् दूषकत्वसम्भवेऽपि उपाधितया अनुद्भावनं व्यवस्थापयतां मतमाह । कथकेति । अत्र कथकसम्प्रदायमननुरुन्धानस्य तदुद्भावनं दुर्निवारमेवेत्यस्वरसः ।

(चि०) सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तम् । बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति । एवं पर्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वम्, पक्षमात्रव्यावर्तकविशेषणवत्त्वात् । अत एव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वम्, द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वम्, मित्रातनयश्यामत्वे शाकपाकजत्वम्,

जन्यानित्यत्वे भावत्वमुपाधिः ।

(दी०) पक्षमात्रेति । यद्यपि पर्वतावयवरूपादेरपि व्यावर्त्तकं तत्, तथापि तस्य व्यावृत्तिर्नोपाधितायामुपयुज्यते, अपि तु पक्षस्यैवेति तन्मात्रव्यावर्तकत्वमुक्तम् । इदं चानुपाधितायां न बीजं परिभाषामात्रत्वात्, किन्त्वनुकूलतर्काभावेन तादृशसाध्यव्यापकत्वानिश्चय इति द्रष्टव्यम् । अत एव । व्यापकताग्राहकप्रमाणसम्भवादेव । आर्द्रेन्धनेति ।

(गा०)पर्वतावयववृत्त्यन्यत्वादौ वृत्त्यन्तस्य भेदविशेषणस्य पक्षभिन्नमपि व्यावर्त्यमस्तीति मूलोक्तस्य पक्षमात्रव्यावर्तकविशेषणवत्त्वादिति तदनुपाधित्वप्रयोजकहेतोरसङ्गतिमाशङ्कते । यद्यपीति । नोपाधितायामुपयुज्यत इति । उपाधेस्सङ्कोचन तल्लक्षणप्रविष्टसाधनाव्यापकत्वसम्पादकतयोपयुज्यते, तदव्यापकत्वसम्पादकता च तदधिकरणानुपाधिव्यावृत्तिरेव, न तु तदनधिकरणपर्वतावयवरूपादिव्यावृत्तिरिति भावः । पक्षस्यैवेति । व्यावृत्तिरुपाधितायामुपयुज्यते इत्यनुषज्यते । पक्षस्य साधनवत्त्वादिति भावः । इति । इत्याशयेन । उक्तमिति । मात्रपदेन उपाधित्वौपयिकपक्षभिन्नव्यावृत्तिप्रयोजकताया विशेषणे व्यवच्छेदात् पर्वतभिन्नतदवयवरूपादिव्यावर्त्तकत्वेऽप्युक्तविशेषणे । उक्तव्यावृत्तिविशेषणप्रयोजकत्वाभावस्याक्षततया मात्रार्थसङ्गतेरिति भावः । अनुपाधितायाम् । अदूषकतायाम् । न बीजम् । न प्रयोजकम् । परिभाषेति । तादृशविशेषणवत्त्वेऽपि साध्यव्यापकत्वादिग्रहदूषकताया दुर्निवारत्वादिति भावः । द्रष्टव्यम् । अनुपाधित्वबीजतया ।

केचित्तु पक्षमात्रव्यावर्त्तकं विशेषणं यस्य पक्षेतरस्य तत्तथा, तद्वत्त्वात् तत्तुल्यत्वात् । विशेषणवत्त्वादिति । तादृशार्थकवतिप्रत्ययबलान्मूलस्यार्थः । पक्षेतरतुल्यता च व्यापकताग्राहकानुकूलतर्कराहित्येन, तथा च दीधितिकारोक्तदूषकताबीज एव मूलस्य तात्पर्यमिति वदन्ति ।

अत एवेति मूलस्याव्यवहितोक्तपक्षेतरत्वादानुपाधित्वोपष्टम्भपरत्वासम्भवादनुपाधिताप्रयोजकाभावप्रतियोगितया प्रक्रान्तानु-

फलतर्कसम्भवोपष्टम्भपरतामाह । व्यापकताग्राहकेति । प्रमाणपदं प्रमाणसहकारितत्कारणपरम् ।

(दी०) अथात्र स्वतन्त्रान्वयव्यतिरेकाभ्यामार्द्रेन्धनत्वेनैव कारणत्वम्, न पुनरार्द्रेन्धनप्रभववह्नित्वेनेति चेत् ? किञ्चातः ? न हि कारणतावच्छेदकमेव व्यापकतावच्छेदकम्, तादृशाभावप्रतियोगितानवच्छेदकस्यैव तथात्वात्, तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्वद्वृत्तित्वेन साध्यव्यभिचारसाधने वैयर्थ्याभावात् ।

(गा०) कारणतावगमेनेत्यग्रिममूलस्य उपाधितावच्छेदकावच्छिन्नस्य कारणतानिश्चयेनेत्यर्थाभिमानेन आर्द्रेन्धनप्रभववह्नित्वेन धूमकारणतया तेन रूपेण उपाधित्वानुपपत्तिं शङ्कते । अथेति । स्वतन्त्रान्वयव्यतिरेकाभ्यामिति । आर्द्रेन्धनस्य वह्नेश्च पृथगन्वयव्यतिरेकयोर्धूमान्वयव्यतिरेकप्रयोजकत्वदर्शनेनेत्यर्थः । न पुनरिति ।

यद्यपि आर्द्रेन्धनप्रभववह्नित्वेन कारणत्वेऽपि तादृशान्वयव्यतिरेकोपपत्तिः ।

न च तेन रूपेण कारणत्वे आर्द्रेन्धनप्रभववह्नित्वे आर्द्रेन्धनविरहे धूमविरहो नोपपद्यत इति वाच्यम् । कारणतावच्छेदकविशिष्टस्य प्राक्सत्तायाः प्रकृते कार्योत्पादप्रयोजकत्वोपगमेनाकारणस्याप्यार्द्रेन्धनस्य कारणतावच्छेदकतया तदभावेन धूमाभावोपपत्तेः, तथापि आर्द्रेन्धनप्रभवत्ववह्नित्वयोरप्येकविशिष्टत्वेनापरस्य जनकतावच्छेदकत्वं वाच्यम्, तथा च तयोर्विशेषणविशेष्यभावे विनिगमनाविरह इति प्रत्येकमेव कारणत्वम्, अन्यथा घटादावपि चक्रविशिष्टदण्डत्वादिना हेतुताप्रसङ्गात् ।

न चैवमार्द्रेन्धनस्य शुष्केन्धनमात्रजन्यवह्नेश्च सत्त्वे धूमोत्पत्तिप्रसङ्ग इति वाच्यम् । प्रत्येकरूपेण स्वरूपयोग्यत्वेऽपि आर्द्रेन्धनवह्न्योर्जन्यजनकभावरूपप्रत्यासत्तेः फलोपधाने तन्त्रतया आर्द्रेन्धनप्रभववह्नित्वस्य धूमोपधायकतावच्छेदकत्वात् । अत एव दण्डत्वचक्रत्वादिना पृथग्घटादिस्वरूपयोग्यत्वेऽपि चक्रादिविशिष्टदण्डत्वं घटाद्युपधायकतावच्छेदकम् ।

अथ कारणतावच्छेदकसम्बन्धेनैकक्षणावच्छिन्नसामानाधिकरण्यमेव कार्योपधाने प्रयोजकम्, न तु जन्यजनकभावादिरूपप्रत्यासत्तिः, अव्यापकत्वात्, यत्तु कृतिसाध्यताज्ञानेष्टसाधनताज्ञानयोः पृथक्पृथक्प्रवृत्तिहेतुत्वेऽपि तयोरभेदस्य कार्योपधानप्रयोजकतया कृतिसाध्यताविषयकेष्टसाधनताज्ञानत्वं फलोपधानरूपकारणतायामवच्छेदकमिति विधिवादे मिश्राणां मणिकारतात्पर्यवर्णनं तदपि इच्छातद्विषयफलसाधनताज्ञानकृतिसाध्यताज्ञानानां त्रयाणां युगपदवस्थानासम्भवेनैकक्षणावच्छिन्नसामानाधिकरण्यापेक्षायामेव ज्ञानयोरभेदापेक्षापर्यवसानमित्यभिप्रायेण सङ्गच्छते, अन्यथा कारणयोः क्वचिदभेदरूपायाः क्वचिज्जन्यजनकभावरूपायाः प्रत्यासत्तेः फलोपधानप्रयोजकताभ्युपगत्यातिप्रसङ्गवारणे कृतिसाध्यताविषयकनिश्चयत्वादिना प्रवृत्त्यादिहेतुत्वे तद्विषयकत्वसंशयान्यत्वज्ञानत्वादीनां विशेषणविशेष्यभावे विनिगमनाविरहेण तेन रूपेण पृथगेव कारणता, तत्तत्कारणतावच्छेदकावच्छिन्नानामभेदः कार्योपधाने प्रयोजक इत्यपि स्यात्। एवं न दण्डचक्रसंयोगादेः कारणप्रत्यासत्तिविधया न घटाद्युपधाने अपेक्षा, अपि तु स्वतन्त्रान्वयव्यतिरेकेण तस्यापि घटादिकं प्रति कारणता, इति चेत् ? सत्यम्, इन्धनारम्भकपरमाणुषु वह्निनोदनाख्यसंयोगात्तेषां क्रिया, ततो विभागः, ततो द्व्यणुकारम्भकसंयोगनाशः, तन्नाशाद् द्व्यणुकनाशः, ततः पाकजविलक्षणरूपवद्भिः परमाणुभिः धूमद्व्यणुकाद्युत्पत्त्या त्रसरेण्वादिक्रमेण महाधूम उत्पद्यते, सामानाधिकरण्यप्रत्यासत्त्या धूमहेतुरूपविशेषस्याग्निसंयोगेन जनने च परमाणूनां जलसंयोगरूपमार्द्रत्वं सहकारि, अम्लद्रव्यसंयोग इव दधिहेतुभूतरसविशेषस्य दुग्धारम्भकपरमाणुषु तेजस्संयोगेन जनने, एवं च वह्नित्वादिना कारणत्वे वह्न्यार्द्रेन्धनयोरुभयोस्सत्त्वे आर्द्रेन्धनदाहं विना धूमोत्पत्तेर्नावकाशः, द्रव्यान्तरारम्भरहितानां रूपविशेषविशिष्टपरमाणूनामभावादिति किमार्द्रेन्धनप्रभववह्नित्वेन कारणतयेति।

न चैवं वह्नित्वादिनापि कारणत्वमनर्थकम्, पूर्वद्रव्यविनाशरूपविशेषोपपादकस्य वह्नेस्तेनैवान्यथासिद्धत्वात्, स्वनाशेन इन्धनस्यापि तथात्वात्, अन्यथाऽन्यत्रापि स्वनाशद्वारा प्रतिबन्धकस्य हेतुताप्रसङ्गादिति वाच्यम्। वह्निना इन्धनं विनाश्य परमाणुषु रूप-

विशेषे जनितेऽपि वह्नीन्धनयोरसत्त्वे धूमानुत्पादेन तद्धेतुताया आवश्यकत्वात् ।

न च रूपविशेषमुत्पाद्य विनष्टे वह्नौ परमाणवादावारम्भकसंयोगानुकूलक्रियामुत्पादाद्य धूमोत्पत्तिः, तादृशक्रियामुत्पाद्य वह्नौ विनष्टे च तादृशक्रियारम्भकसंयोगजनने जायत एव त्रिचतुरादिक्षणमध्ये धूमः, वह्न्यवयवेषु संयुक्तेषु कारणान्तरविरहात् कार्यद्रव्यं नोत्पद्यते, अवयवसंयोगानां चरमकारणत्वादिति वाच्यम् । एवं सत्यवयवसंयोगसम्पादकत्वात्तद्धेतुत्वस्याप्रत्याख्येयत्वात्, अन्यथा घटपटादावपि दण्डवेमादेरन्यथासिद्धा अहेतुतापत्तेः ।

न चैवं वह्नेर्हेतुत्वेऽपि इन्धनस्य हेतुत्वमप्रामाणिकमिति वाच्यम् । इन्धनासत्त्वे वह्नेरनवस्थानेन तदवस्थापनद्वारा तस्यापि हेतुताया आवश्यकत्वात् । जलसंयोगरूपमार्द्रत्वं रूपविशेषद्वारा पृथगेव हेतुः । न हीन्धनकारणतायां तस्यावच्छेदकत्वम् । आर्द्रेन्धनत्वादिनैव कारणत्वमित्यस्याप्यत्रैव तात्पर्यम् ।

यत्तु आर्द्रेन्धनप्रभववह्नेर्जातिविशेषपुरस्कारेण हेतुता, न तु तादृशवह्नित्वेनेति नोक्तविनिगमनाविरह इति तदपि न सत् । प्रामाणिकवह्नित्वजात्या कारणत्वेऽप्युक्तदिशाऽतिप्रसङ्गवारणसम्भवेनावान्तरजातौ मानाभावादित्यलमधिकेन ।

कारणतावगमेन इति मूलस्य आर्द्रेन्धनप्रभववह्नित्वादिरूपोपपाधितावच्छेदकाभिमतरूपेण कारणतानिश्चयेनेति नार्थः, परन्तु यादृशयादृशकार्यकारणभावादिना तत्तद्रूपावच्छिन्नस्य फलोत्पत्तिप्रयोजकत्व तादृशकार्यकारणभावपरमेव तदित्याशयेन समाधत्ते । किञ्चात इति ।

नन्वेवमार्द्रेन्धनप्रभववह्नित्वं यदि धूमव्यापकतावच्छेदकं न स्यात् तदा तत्कारणतावच्छेदकं न स्यादिति व्यापकताग्राहकतर्कस्येष्टापत्त्या नावतार इति कथं तद्ग्रहसम्भवतीत्यत आह । न हीति । यतः स्वरूपयोग्यतावच्छेदकत्वमात्रं व्यापकतावच्छेदकत्वनिर्वाह्यमिति न, येन आर्द्रेन्धनप्रभववह्नित्वादेरन्यथासिद्धिनिरूपकत्वेन स्वरूपयोग्यतानवच्छेदकत्वस्येष्टतया तदापत्तेरसम्भवेनैव व्यापकतावच्छेदकत्वग्रहो न स्यात्, अपि तु फलोत्पत्तिप्रयोजकतावच्छेदकत्वमपि तन्निर्वाह्यम्, तदभावापत्त्यैव व्यापकतावच्छेदकत्वं

सुग्रहमित्यर्थः । यादृशान्यथासिद्ध्या आर्द्रेन्धनप्रभववह्नित्वादिकं न स्वरूपयोग्यतावच्छेदकं तादृशी यदि व्यापकतावच्छेदकत्वमपि विघटयेत्तदा तद्रूपसाधारणं धूमोत्पत्तिसामान्यप्रयोजकतावच्छेदकत्वं व्यापकतावच्छेदकत्वानियतं न स्यादिति तदभावस्तदभाव न प्रसञ्जयेत्, न चैव न, कारणतावच्छेदकत्वे इव व्यापकतावच्छेदकत्वे ऽन्यथासिद्धत्वप्रवेशस्याभावादित्याह । तादृशीति । तथात्वात् । व्यापकतावच्छेदकत्वात् ।

ननु तथापि आर्द्रेन्धनप्रभववह्नित्वादिना वह्न्यादेर्नोपाधित्वासम्भवः, वह्नित्वावच्छिन्नव्यभिचारस्यैव धूमादिव्यभिचारव्याप्यतया आर्द्रेन्धनप्रभवत्वादिविशेषणस्यासिद्धिमात्रवारकतया वैयर्थ्येन तद्घटितरूपावच्छिन्नव्यभिचारस्य साध्यव्यभिचारासाधकत्वादित्यत आह । तदवच्छिन्नाभावस्य चेति । विशिष्टवह्नित्वावच्छिन्नाभावस्येत्यर्थः । अतिरिक्ततया शुद्धवह्नित्वावच्छिन्नाभावभिन्नतया । तदघटितत्वेन । शुद्धवह्नित्वावच्छिन्नाभावाघटितेन विशिष्टवह्नित्वावच्छिन्नव्यभिचारेण ।

(दी०) सत्यपि चाऽऽर्द्रेन्धने तत्संयुक्ते च वह्नौ दाहप्रतिबन्धकसत्त्वे धूमानुत्पादात् क्लृप्तकारणभावस्य वह्नेर्विशेषरूपेण कारणत्वकल्पनयैवोपपत्तावक्लृप्ततत्कारणभावानां दाहप्रतिबन्धकाभावानां तत्कारणत्वकल्पनानौचित्यात् । एकस्यामार्द्रेन्धनव्यक्तौ प्रतिबद्धायां तत्रैव व्यक्त्यन्तराद्धूमोत्पादात् तत्तदिन्धनजन्यधूमं प्रति तत्तदभावानां कारणत्वस्य वाच्यत्वेऽतिगौरवाच्च । महति चाऽऽर्द्रेन्धने तत्प्रभवे चाणीयसि वह्नौ महति वह्न्यन्तरे विद्यमानेऽप्यार्द्रेन्धनप्रभवमहावह्नेरनुत्पाददशायां प्रकृष्टधूमानुत्पादादार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमित्यपि वदन्ति ।

(गा०) आर्द्रेन्धनप्रभववह्नित्वेनापि धूमस्वरूपयोग्यत्वं व्यवस्थापयतां मतमाह । सत्यपि चेत्यादिना वदन्तीत्यन्तेन । धूमानुत्पादादित्यादिकं आर्द्रेन्धनप्रभववह्नित्वेन कारणमित्यग्रिमे हेतुः । आर्द्रेन्धने वह्निसंयोगस्थले पृथक्कारणतामतेऽपि धूमानुत्पादो निर्वहति, कार-

णानां कारणतावच्छेदकसम्बन्धघटितसामानाधिकरण्यातिरिक्तपरस्परप्रत्यासत्तेः कार्योत्पत्तावनपेक्षितत्वेऽपि संयोगविशेषसम्बन्धेन धूमं प्रति तादात्म्यसम्बन्धेनाऽऽर्द्रेन्धनस्य संयोगसम्बन्धेन च वह्नेः कारणत्वे आर्द्रेन्धनतादात्म्यवति वह्निसंयोगस्य धूमोत्पत्तावपेक्षासम्भवात्, अत उक्तं तत्संयुक्ते च वह्नाविति । आर्द्रेन्धने वह्निसंयोगे सति तस्यापि दाहसम्भवेन धूमोत्पत्तिरिष्टैवेत्यत आह । दाहप्रतिबन्धकसत्त्वे इति । एतदुपलक्षणम्, दाहप्रतिबन्धकासत्त्वेऽपि दाहोत्तरमेव धूमोत्पादात् तत्पूर्वं धूमोत्पत्त्यापत्तिरपि पृथक्कारणतामते द्रष्टव्या । दाहप्रतिबन्धकसत्त्वे धूमोत्पत्तिस्तदभावस्य धूमकारणताकल्पनेनापि शक्यते वारयितुमित्याशङ्कां निराकरोति । फलेनेत्यादिना । क्लृप्तकारणभावस्य । अवश्यकल्पनीयकारणताकस्येत्यर्थः । विशेषरूपेण । आर्द्रेन्धनप्रभववह्नित्वेन । अक्लृप्तेति । उभयासिद्धेत्यर्थः । दाहप्रतिबन्धकाभावानाम् । मणिमन्त्रादिविशेषाद्यभावादीनाम् । तत्कारणत्वेति । धूमकारणत्वेत्यर्थः । अनौचित्यं कारणतायाबाहुल्येन । मणिविशेषादीनामपि धूमसामान्यं प्रति नैकप्रतिबन्धकतया निर्वाह इति दर्शयति । एकस्यामिति । प्रतिरुद्धायाम् । दाहप्रतिबन्धकमण्यादिसमवहितायां सत्याम् । तत्रैव । तदिन्धनव्यक्तावेव । व्यक्त्यन्तरात् । सन्निहितार्द्रेन्धनान्तरात् । तत्तदभावानाम् तत्तदिन्धनप्रत्यासन्नमण्याद्यभावानाम् । कारणत्वस्येति । एतदुपलक्षणम्, यद्व्यक्तिजन्यधूमोऽप्रसिद्धः तज्जन्ये धूमे प्रतिबन्धकाभावकारणत्वस्य दुष्कल्पतयाऽसति प्रतिबन्धके वह्न्यादिघटितसामान्यसामग्रीबलात् तत्र धूमोत्पत्तिवारणाय तत्तदिन्धनानां विशेषसामग्रीत्वस्य कल्पनीयतयेत्यपि द्रष्टव्यम् । आर्द्रेन्धनदाहस्य धूमकारणतयाऽप्युक्तापत्तिवारणसम्भवः, एवमिन्धनस्यादाहे तदारम्भकाणुषु द्रव्यान्तरावष्टम्भरूपप्रतिबन्धकसत्त्वेन धूमोत्पत्तिप्रयोजकरूपविशेषाभावेन च न धूमोत्पत्तिरित्यनुशयान प्रकृष्टापकृष्टधूमयोग्यप्रकृष्टापकृष्टार्द्रेन्धनप्रभववह्न्यन्वयव्यतिरेकानुविधायितया तादृशतादृशधूमं प्रति तादृशतादृशवह्निविशेषरूपेण हेतुताया आवश्यकतया वह्निधूमयोरिति न्यायेन धूमसामान्यं प्रत्यार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमावश्यकमित्याह । महति चेति । आर्द्रेन्धनस्य वह्निसामान्यस्य च प्रकर्षो न धूमप्रकर्ष

प्रयोजक इत्याविष्कर्तुम्महार्द्रेन्धनमहावह्न्यन्तरयोरसत्त्वानुधावनम्। आर्द्रेन्धनवह्न्योः पृथक्कारणत्वेऽपि तयोर्जन्यजनकभावप्रत्यासत्तेर्धूमोत्पत्त्यावश्यकत्वेन आर्द्रेन्धनप्रभववह्निं विना धूमोत्पत्त्यापत्तेः कथञ्चिद्वारणसम्भव इत्यतोऽपीयासि तत्प्रत्यये यत्नादित्युक्तम्।

यद्वन्त्यान्यस्वरससूचनाय, तद्बीजं च धूमनिष्ठप्रकर्षो महत्त्वविशेषः रूपविशेषवदारम्भकसंयोगवद्द्रव्यबहुत्वघटितसामग्रीवशादेव धूमस्य तद्रूपनिर्वाहेण तस्य न धूमजनकतावच्छेदकत्वम्, अन्यथा नीलघटत्वादेरपि नीलकपालजन्यतावच्छेदकतापातात्, भूयसां परमाणूनां पाकजरूपविशेषे धूमारम्भानुगुणसंयोगविशेषे च व्यापकवह्नेरपेक्षया तदन्वयव्यतिरेके महाधूमान्वयव्यतिरेक इति।

(चि०) तदुत्कर्षेण साध्योत्कर्षात्। अनन्यथासिद्धान्वयव्यतिरेकतो वैयक्त्यात्कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात्।

(दी०) तदुत्कर्षेणेति। आर्द्रेन्धनप्रभववह्निसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टधूमस्यानुत्पादनियमादार्द्रेन्धनप्रभववह्नेरेव धूमोपधायकत्वम्, तत्रार्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमथर्वैशसम्पन्नं नान्तरीयकमेवास्तु, फलतो न कश्चिद्विशेष इति भावः। अनन्यथेति। तादृशान्वयव्यतिरेकाभ्यामुद्भूतरूपस्य तद्वतो द्रव्यस्यैव वा कारणत्वम्, उभयथापि व्यापकत्वम्, उद्भूतरूपत्वेन तत्त्वं पुनरुपवर्णितमेव। घटोन्मज्जनेति। ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वानियमात्। न च प्रागभावस्य ध्वंसप्रतियोगिध्वंस इव तद्ध्वंसोऽपि प्रतियोगिनो ध्वंस इति वाच्यम्। अप्रामाणिकध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्वकल्पनाया एवोचितत्वादिति भावः।

(गा०) पूर्वोक्तमाशयं प्रकाशयन् तदुत्कर्षेणेत्यादिमूलं धूमत्वावच्छिन्नं प्रत्यार्द्रेन्धनप्रभववह्नित्वादिना अकारणत्वेऽपि सङ्गमयति।

तदुत्कर्षेणेतीति । अर्थवशसम्पन्नं नान्तरीयकमिति । तेन रूपेणाहेतुत्वेऽपि प्रत्येककारणतानिर्वाह्यव्यापकतावच्छेदकताकमित्यर्थः । वाय्वादेः प्रत्यक्षवारणाय उद्भूतरूपस्यापि प्रत्यक्षे हेतुतां प्राञ्चो न स्वीकुर्वन्ति अपि तु विषयनिष्ठतद्धेतुतायामवच्छेदकत्वमेव तस्येति तथाऽपि न प्रकृतक्षतिरित्याह । अनन्यथेतीति । अनन्यथासिद्धत्वं च कारणत्वं तदवच्छेदकत्वं च विनाऽनुपपद्यमानत्वम्। अन्वयव्यतिरेकाभ्याम् । उद्भूतरूपान्वयव्यतिरेकाधीनप्रत्यक्षाव्यवहितान्वयव्यतिरेकाभ्याम् । उद्भूतरूपस्य समवायेन तद्वतो द्रव्यस्यैव वा तादात्म्येन कारणत्वम् । तस्य पुनरिति । विषयस्य सामान्यतः प्रत्यक्ष विषयत्वेन तद्व्यक्तिप्रत्यक्षे तद्व्यक्त्वेन हेतुना, बहिर्द्रव्यादिप्रत्यक्षे च बहिर्द्रव्यादिरूपविषयस्य कारणत्वान्तरं निष्प्रमाणमेव, कुत उद्भूतरूपस्यावच्छेदकत्वम् ।

न च वाय्वादे प्रत्यक्षवारणान्यथानुपपत्तिरेव बहिर्द्रव्यप्रत्यक्षे उद्भूतरूपवत्त्वेन विषयहेतुतायां प्रमाणमिति वाच्यम् । उद्भूतरूपत्वेन लघुना हेतुतयैव तद्वारणसम्भवेन अन्यथानुपपत्त्यनवकाशात् ।

वस्तुत उद्भूतरूपत्वेनापि न हेतुता, उद्भूतत्वस्य दुर्वचत्वात् ।

न च तद्रूपत्वव्याप्यजातिविशेष, नीलत्वादिजात्या सङ्करात् । न च नीलत्वादिव्याप्यं नानैवोद्भूतत्वम्, कारणतावच्छेदकाननुगमेन व्यभिचारात् ।

न च नीलादिप्रत्यक्षत्वं नीलत्वादिव्याप्योद्भूतत्वावच्छिन्नजन्यतावच्छेदकमिति न व्यभिचारः, नीलादिरूपस्य विषयोपलक्षणत्वे न्यायमते पाकरक्तघटादिप्रत्यक्षे व्यभिचारात्, तद्विशेषणत्वे निर्विकल्पकासङ्ग्रहात्, स्वविषयनीलादिमत्त्वविशिष्टविषयतासम्बन्धेन गुणप्रत्यक्षत्वावच्छिन्नस्य नीलादिजन्यत्वेनोक्त्या निर्विकल्पकसङ्ग्रहेऽपि नीलाद्यभिभवकालीनतदाश्रयप्रत्यक्षस्य दुरुपह्नवत्वात्, नापि लौकिकप्रत्यक्षविषयत्वमुद्भूतत्वम्, गुणादेः लौकिकप्रत्यक्षविषयतायां सन्निकृष्टाश्रयनिष्ठलौकिकप्रत्यक्षविषयतायाः प्रयोजकत्वादन्योन्याश्रयेणाश्रयप्रत्यक्षतायां तस्याः प्रयोजकत्वासम्भवात् ।

अनुद्भूतत्वं जातिः नीलत्वादिव्याप्या नानैव, तदवच्छिन्नभेदकूट एवोद्भूतत्वमिति चेत् ? तर्हि तेन रूपेण रूपस्य हेतुत्वे ताव-

द्रेदानी मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणता- या बाहुल्यस्य अवच्छेदकगौरवस्य च प्रसङ्गाद्रूपत्वेन तत्त्वावच्छिन्न- स्य अनुद्भूतत्वावच्छिन्नान्यतराभावत्वेन च पृथक्कारणत्वकल्पनमेवो- चितम्, तावता उद्भूतरूपत्वावच्छिन्नस्य बहिर्द्रव्यप्रत्यक्षत्वाव- च्छिन्नव्यापकत्वमव्याहतमेव।

यदि च अनुद्भूतत्वं शुक्लत्वव्याप्यं भास्वरत्वविरुद्धमेव, र- सनेन्द्रियादिरूपस्य शुक्लतया घ्राणेन्द्रियादावपि शुक्लरूपस्यैव क- ल्पनादित्युच्यते, तदा तदवच्छिन्नाभावस्य पृथक्कारणत्वमेवोचितम्। अन्यथा तदवच्छिन्नभेदरूपत्वयोर्विशेष्यविशेषणभावे विशेष्यविशेष- णतावच्छेदकभावे वा विनिगमनाविरहेण कारणताद्वयस्याऽऽवश्यक- त्वात्, अवच्छेदकगौरवापित्तेरित्यादिकमुपवर्णितप्रायमित्यर्थः।

उच्छृङ्खलास्तु पृथिव्यादिसमनिष्ठजातिविशेष एव बहिर्द्रव्यप्र- त्यक्षजनकतावच्छेदकतया स्वीक्रियते, तदभावादेव न वाय्वादीनां प्रत्यक्षता।

न च तादृग्जातेः पृथिवीत्वादिना सङ्करभयेन घ्राणेन्द्रियाद्य- घयवेयवेयतया तत्प्रत्यक्षवारणायानुद्भूतरूपप्रतिबन्धकताया आव- श्यकत्वेन रूपत्वेन हेतुतयैव नीरूपप्रत्यक्षवारणसम्भवे किमुक्त- जात्येति वाच्यम्। रूपत्वेन हेतुत्वे नानाजातीयरूपवदारब्धद्रव्ये अतिरिक्तचित्ररूपस्य नीलपीतादीनां वा कल्पनीयतया गौरवात्। एतन्मते तत्र विजातीयसंयोगप्रतिबन्धेन रूपानुत्पादस्यैवोपगमात्।

अथ वा उद्भूतत्वमदेकत्वमेव प्रत्यक्षजनकम्, तद्गतमुद्भू- तत्वं चैकैव जातिः, सङ्करानवकाशात्। घ्राणेन्द्रियाद्येकत्वव्यावृत्तैव सा जातिः, अतो न तत्प्रत्यक्षता। न च प्रभायाश्चाक्षुषानुरोधेन त- देकत्वे तादृशजातेरावश्यकतया तस्य स्पार्शनापत्तिरिति वाच्यम्। स्पार्शनप्रत्यक्षे ऽनुद्भूतस्पर्शविशेषस्य प्रतिबन्धकतां स्वीकृत्य त- स्य वारणीयत्वात्। अस्तु वा स्पार्शनप्रत्यक्षप्रयोजकमपि प्रभैक- त्वव्यावृत्तं चाक्षुषप्रयोजकजातिव्याप्यं जात्यन्तरम्, न्यायादि- मते वायोरिवोष्मणोऽप्यतीन्द्रियतया तदेकत्वे स्पार्शनप्रयोजकजा- तेरप्यनभ्युपगमेन तद्याप्यतानिर्वाहादित्याहुः।

. मूले वैद्यकादिति। वैद्यकशास्त्रतः शाकाद्याहारपरिणामजन्य- त्वस्य नरदयामरूपप्रयोजकत्वावगमेनेत्यर्थः। जाठरानलेनाभ्यवहृ-

तथा शाकाद्यारम्भकेष्ववयवेषु शरीरगतश्यामरूपसजातीयं रूपमुत्पाद्यते, तैश्चावयवैरदृष्टवशप्रेरिताभ्यन्तरसमीरणसञ्चारितैर्गर्भाशयं प्रविश्य परस्परसंयुक्तैः शरीरमारभ्यत इति तत्रावयवश्यामरूपात्तज्जातीयं रूपमुत्पद्यते, तत्र शरीरगतशाकपाकजत्वस्य शाकपाकजत्वेन शरीरस्य वा हेतुतया निष्प्रमाणकत्वेऽपि जाठरानलपाकाधीनरूपविशेषशाकाद्यवयवस्य वा तन्निष्ठविजातीयाग्निसंयोगस्य वा हेतुतयाऽपि शाकेतरभुक्तद्रव्ये तादृशरूपस्य जाठरानल जनयितुमशक्यत्वाच्छाकावयवजन्यत्वस्य मित्रातनयशरीरे श्यामविशेषोत्पादप्रयोजकतया वैप्रकरोधितया आवश्यकत्वेन तदनुपपत्त्या तस्य मित्रातनयश्यामत्वव्यापकतानिश्चयो निर्वहत्येवेति ध्येयम् । घटोन्मज्जनेति । तद्घटोत्तरकाले तद्घटसत्त्वापत्त्यर्थः । आपत्तिश्च जन्यत्वविशिष्टविनाशित्वं यद्यत्यन्ताभावावृत्तित्वे सति *भावत्वव्यभिचारि स्यात् ध्वंसवृत्ति स्यात् ध्वंसत्ववदित्याकारा* भावत्वोपाधौ विशिष्टसाध्यव्यापकतां ग्राहयति, विशेषणवत्त्वेन निश्चिते पक्षे विशिष्टापादकतर्कस्य विशेष्यशङ्कानिवर्तकत्वात् जन्यत्वविशिष्टे विनाशित्वे अत्यन्ताभावावृत्तित्वविशेषणस्य निश्चयादुक्ततर्के सति जन्यत्वविशिष्टे विनाशित्वे भावत्वव्यभिचारशङ्कानिवृत्तेः, तादृशापत्तिपरिपन्थिन्या विनाशित्वे ध्वंसवृत्तित्वस्येष्टापत्तिशङ्काया निवृत्त्यर्थमेव तर्कः घटादिध्वंसो यदि किञ्चित्कालवृत्तिध्वंसप्रतियोगी स्यात् स्वानधिकरणतत्काले स्यात्, तद्घटप्रागभावानधिकरणतया निश्चितस्य कालस्य तद्घटध्वंसानधिकरणत्वे इष्टापत्तिशङ्कायां च स कालस्तद्घटप्रागभावानधिकरणत्वे सति यदि तद्घटध्वंसानधिकरणकालः स्यात् तद्घटाधिकरणं स्यादिति घटोन्मज्जनप्रसङ्गो विरोधिपरम्परया साध्यव्यापकताया ग्राहकः ।

उक्ततर्के मूलशैथिल्यशङ्कानिरासाय सामान्यतो व्याप्तिं घटयति दीधितौ । ध्वंसेति । तदीयकादाचित्काभावानधिकरणकालत्वस्य तदधिकरणत्वव्याप्यत्वादित्यर्थः । तदधिकरणत्वं कालिकसम्बन्धेन, अतो विश्वविषयकज्ञानध्वंसस्य ध्वंसाधिकरणत्वेनाभ्युपगते काले विषयतया तज्ज्ञानवति तज्ज्ञानोन्मज्जनप्रसङ्गे नेष्टापत्त्यवसरः । गगनादौ व्यभिचारवारणायाऽऽपादके कालत्वप्रवेशः । यत्र काले यद्घटध्वंसादिध्वंसो येनाभ्युपेयते तेनापि तत्र काले तद्घटध्वं-

तानधिकरणत्वं नोपगम्यते इति कथमुक्तापत्तिः, विपर्ययानुमाने सिद्धसाधनादिति शङ्कते । न चेत्यादिना । प्रागभावस्य प्रतियोगिध्वंस इवेति । यथा प्रागभावप्रतियोगिनो घटादेर्ध्वंसोऽपि तत्प्रागभावप्रतियोगिकः स्वीक्रियते इत्यर्थः । अन्यथा प्रतियोगिध्वंसकाले प्रागभावोन्मज्जनप्रसङ्गात्, प्रागभावप्रागभावाप्रसिद्ध्या तत्प्रागभावानधिकरणत्वगर्भापादकाप्रसिद्धावपि कादाचित्कभावत्वेनोभयसङ्ग्राहकापादकप्रसिद्धिसौलभ्यादिति भावः । तद्ध्वंसोऽपि । प्रतियोगिध्वंसध्वंसोऽपि । प्रतियोगिनो ध्वंसः । प्रतियोगिप्रतियोगिकः । उपेयत इति शेषः । तथा च तद्ध्वंसध्वंसाधिकरणकालस्यापि तत्प्रतियोगिकध्वंसाधिकरणत्वमेवेति भावः । एव कल्पनया प्रागोन्मज्जनप्रसङ्गोद्धारेऽपि लाघवेन ध्वंसस्याविनाशित्वसिद्ध्या भावत्वस्य जन्यानित्यत्वव्यापकत्वं सुघटमेवेत्याह । अप्रामाणिकेति । ध्वंसतत्कारणधाराकल्पनात इति । ध्वंसप्रतियोगिकध्वंसपरम्परायास्तत्क्रमे तत्तत्प्रतियोगिपरम्परायाः प्रतियोगितानियामककारणतानां च कल्पनामपेक्ष्येत्यर्थः । अन्यत्वम् । अविनाशित्वम् । उचितत्वादिति । लाघवेनेत्यादिः ।

अथ विनाशं प्रति जन्यभावत्वेन पृथक्कारणत्वस्य जन्यत्वेन भावत्वेन कारणताद्वयस्य च कल्पनातो, लाघवात् जन्यत्वमात्रेण प्रतियोगिनां कारणत्वकल्पनेन, तदवच्छिन्नमात्रस्य च लाघवात् ध्वंसप्रतियोगितानियामकत्वसिद्धौ, ध्वंसेऽपि तादृशसामग्र्याः प्रामाणिकत्वात् ध्वंसप्रतियोगिकध्वंसधारायाः प्रामाणिकत्वमेवेत्यप्रामाणिकेत्यसङ्गतम् ।

अत्र वदन्ति प्रागभावप्रतियोगित्वरूपजन्यत्वापेक्षया लघीयसा जातिरूपसत्त्वेनैव प्रतियोगितासम्बन्धेन ध्वंसं प्रति तादात्म्यसम्बन्धेन हेतुता कल्प्यते, तदवच्छिन्नघटिता च सामग्री न ध्वंसे, कालिकसम्बन्धेन सर्वं कारणतावच्छेदकं समवायेन चेत्यत्र विनिगमनाविरहेऽपि समवायेन तदवच्छिन्नहेतुताया निष्प्रत्यूहतया, ध्वंसे सामग्रीविरहस्य सूपपादत्वात् ।

न च समवायसम्बन्धेन सत्त्वावच्छिन्नस्य हेतुत्वे नित्यानां द्रव्यगुणानां नाशः स्यादिति कालिकसम्बन्धेन सत्त्वावच्छेदेन जन्यमात्रस्य कालोपाधित्वाभावे च प्रागभावप्रतियोगित्वेन हेतुता वाच्येति ध्वंसेऽपि तत्सत्त्वेन तस्यापि नाशो भवेदिति

वाच्यम् । प्रतियोगिमात्रस्य प्रतियोगितासम्बन्धेन कार्योत्पादकसामग्रीत्वेन जन्यत्वेन प्रतियोगिनो हेतुत्वेऽपि द्वितीये तृतीये वा क्षणे घटादिनाशः स्यादिति द्रव्यादिनाशे विशेषसामग्र्यन्तरस्याऽऽवश्यकतया तदभावादेव नित्यद्रव्यादीनां नाशवारणसम्भवे समवायेन सत्ताया अपि प्रतियोगिनिष्ठकारणतावच्छेदकत्वसम्भवात् तथा हि आश्रयनाशानाश्यद्रव्यस्य नाशे ऽसमवायिकारणविजातीयसंयोगनाशो विशेषसामग्री, आश्रयनाशजन्यद्रव्यनाशे व्यभिचारवारणाय आश्रयनाशानाश्यत्वं कार्यतावच्छेदके नाशप्रतियोगिविशेषणम्, आश्रयनाशानाश्यत्वं च स्वप्रतियोगिसमवेतत्वकालिकविशेषणत्वोभयसम्बन्धेन नाशविशिष्टान्यत्वम्, शिरोमणिमते द्रव्यनाशत्वमेव कार्यतावच्छेदकम्, तन्मते सर्वत्रासमवायिकारणनाशादेव द्रव्यनाशात्, कारणतावच्छेदकप्रत्यासत्तिः स्वप्रतियोगिजन्यत्वम्, तेन च सम्बन्धेनासमवायिकारणनाशस्य गगनादौ अभावान्न तन्नाशापत्तिः, आश्रयनाशकालस्थायिगुणकर्मणोर्विनाशे च आश्रयनाशो हेतुः, विभागसंयोगादिजन्ये संयोगविभागकर्मादिनाशे व्यभिचारवारणाय आश्रयनाशकालस्थायित्वं कार्यतावच्छेदककोटौ प्रतियोगिविशेषणम्, तदर्थश्च स्वप्रतियोगिसमवेतत्वकालिकविशेषणत्वोभयसम्बन्धेन नाशविशिष्टत्वम्, आश्रयनाशस्य नाशत्वेनैव हेतुता, स्वप्रतियोगिसमवेतत्वं प्रत्यासत्तिः, तादृशसम्बन्धेन नाशश्च न नित्यगुणे, तदाश्रयस्यापि नित्यत्वेन नाशाप्रतियोगित्वात्, आश्रयनाशानाश्यरूपरसगन्धस्पर्शनाशे विजातीयतेजस्संयोगरूपः पाको हेतुः, कारणतावच्छेदकसम्बन्धः सामानाधिकरण्यम्, तेन सम्बन्धेन तस्य पार्थिवपरमाण्वेकत्वादिषु सत्त्वेऽपि रूपादिनाशे तादात्म्यसम्बन्धेन रूपत्वादिनापि हेतुत्वात्तेन सम्बन्धेन तेषामेकत्वादिष्वसत्त्वान्न पाकघटितसामग्रीबलात्तद्विनाशापत्तिः रूपाद्यात्मकप्रतियोगिनां पाकसहकारित्वानुपगमे जन्यत्वेन प्रतियोगिनां हेतुत्वेऽपि पाकाद्रूपादिनाशसमये तत्समानाधिकरणविभागादिरूपजन्यगुणानां विनाशप्रसङ्गात्, आश्रयनाशानाश्यसंयोगादिनाशे स्वावच्छेदकावच्छिन्नत्वस्वव्यापकत्वोभयसम्बन्धेन विभागो हेतुः, तादृशसम्बन्धेन विभागो न नित्यगुणे, न वा तत्र तत्सहकारिसंयोगरूपप्रतियोगी तादा-

स्यसमवेतत्वेन प्रत्यासत्तिः, एवं विभागनाशे स्वजनकसंयोगनाशजनकत्वसम्बन्धेन संयोगो हेतुः, कर्मनाशेऽपि जनकत्वसम्बन्धेन संयोगो हेतुः पूर्वसंयोगनाशोत्तरसंयोगजनकत्वस्येश्वरज्ञानादिसाधारण्यवत् तदाश्रयजन्यद्रव्यसाधारण्यात् तदुत्तरसंयोगात्तन्नाशवारणाय तत्रापि विभागकर्मरूपप्रतियोगिनोऽसहकारितायाः आवश्यकत्वात्तत एवेश्वरज्ञानादिव्यावृत्तिः । अपेक्षाबुद्धिजन्यगुणनाशे अपेक्षाबुद्धिनाशः स्वप्रतियोगिजन्यत्वसम्बन्धेन हेतुः, नित्ये तेन सम्बन्धेन नाशासत्त्वान्नातिप्रसङ्गः, शब्दज्ञानादिरूपयोग्यविभुविशेषगुणनाशे स्वपूर्वत्वस्वसामानाधिकरण्योभयसम्बन्धेन विशेषगुणत्वेन हेतुता, स्वपूर्वत्वं च कालिकसम्बन्धेन स्वप्रागभावाधिकरणत्वम्, गगनैकत्वादौ शब्दादिरूपविशेषगुणस्य सामानाधिकरण्यसत्त्वेऽपि कालिकसम्बन्धेन न तत्प्रागभाववत्त्वम्, महाकाले तत्सत्त्वेऽपि न सामानाधिकरण्यमिति न तद्बलात्तन्नाशापत्तिः ।

वस्तुतस्तु तत्रापि तादात्म्येन तादृशप्रतियोगिनां सहकारित्वमावश्यकम्, अन्यथा संयोगादिष्वादावपि तज्जन्यतावच्छेदकावच्छिन्नापत्तेः, तथा च नित्यैनद्विलम्बादपि तद्घटितसामग्रीविलम्बः ।

एतेनापेक्षाबुद्धेरपि तृतीयक्षणे विनाशस्य शिरोमणिना स्वीकृतत्वात् शब्दादिनाशे च वर्त्तमानकालीनपदार्थनाश एव नाशत्वेन हेतुः, कालिकसम्बन्धेन प्रतियोगिमत्त्वं प्रत्यासत्तिः, नाशत्वमेव जन्यतावच्छेदकम्, जन्यमात्रस्य कालोपाधितया सर्वस्यैव नाशप्रतियोगिनि तादृशकारणसत्त्वेन व्यभिचारानवकाशात्, तथा च तादृशकारणबलान्महाकालस्य नाशापत्तिरिति परास्तम् । घटादावपि समकालपदार्थनाशस्योक्तसम्बन्धेन तद्द्वितीयक्षणे सत्त्वात् तृतीयक्षणे तन्नाशापत्तिवारणाय शब्दादीनां तादात्म्यसम्बन्धेन तत्सहकारितायाः आवश्यकत्वात् तत एवातिप्रसङ्गनिर्वाहात् ।

न चैवं सत्त्वेन हेतुत्वमप्यनर्थकम्, 'सत्ताशून्यानां जात्यादीनां नाशस्योक्तविशेषसामग्र्यभावादेव वारणसम्भवादिति वाच्यम् । तत्र स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशहेतुभूताश्रयनाशस्य एकत्वपरिमाणादाविव जातावपि सत्त्वेन तादृशविशेषसामग्रीबलात् तस्या नाशवारणाय सत्त्वेन तादृशप्रतियोगिनां कारणत्वस्याऽऽवश्यकत्वात् । एकत्वादिनाशे एकत्वादीनां विशिष्य कारणताया अ-

नावश्यकत्वात्, नाशप्रतियोगिनां सर्वेषां स्वनाशे विशिष्य हेतुत्वेऽपि यद्विशेषयोरिति न्यायबलात् सत्त्वेन तेषां सामान्यहेतुताया आवश्यकत्वाच्च अन्यथा तत्तादृशसामग्रीविरहकूटस्य जात्यादौ प्रतियोगितया नाशसामान्यानुत्पादप्रयोजकत्वकल्पनायां गौरवात्, अन्यथा तत्तद्व्यक्तिस्थलीयविशेषसामग्र्यभावेन सर्वत्र सामान्यकार्यातिप्रसङ्गवारणसम्भवेन सामान्यकारणमात्रोच्छेदप्रसङ्गात्।

अथ नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसत्त्वसम्बन्धेन नाशत्वेन हेतुतामते तादृशसामान्यकारणाभावादेव न जात्यादावाश्रयनाशघटितसामग्रीतो नाशापत्तिः, यद्विशेषयोरित्यादिर्नियमश्चाप्रयोजक इति चेन्न। प्रागभावस्य कालोपाधित्वाभावेन तत्र कालिकसम्बन्धेन प्रतियोगिसत्त्वाभावात्तन्नाशे व्यभिचारवारणाय समानकालीनपदार्थनाशस्य स्वप्रतियोगिवृत्तित्वसम्बन्धेनैव नाशत्वावच्छिन्नं प्रति हेतुताया वक्तव्यतया प्रागभावेऽपि तादृशसम्बन्धेन तस्य सत्त्वाच्च व्यभिचार इति जातावपि तादृशसम्बन्धेन तस्य सत्त्वात् सत्त्वेन हेतुतां विना तन्नाशापत्तिवारणासम्भवात्। यदि चासमवायिकारणनाशस्यैव द्रव्यनाशकतामतेऽवयवनाशादसमवायिकारणसंयोगनाशोत्पत्तिक्षण एव द्रव्यनाशस्य वारणाय गुणकर्मणोर्द्रव्यान्यत्वेन कारणतां कल्पयित्वा तदवच्छिन्नस्याऽऽश्रयनाशसहकारिता वाच्या, तथा सति कारणतावच्छेदकगौरवं लाघवेन गुणकर्मणोर्द्रव्यावृत्तिजातिविशेषमङ्गीकृत्य तेन रूपेण तयोराश्रयनाशसहकारित्वमुचितम्, तादृशसहकारिविरहादेव न जातेर्नाशापत्तिरिति विभाव्यते, मा भूत् तन्नाशे सत्त्वेन हेतुत्वम्, ध्वंसध्वंसापादकसामग्रीदुर्भिक्षं दुर्वारमेव, चरमसंयोगानां विनाशेऽदृष्टविशेषनाशस्य कालिकसम्बन्धेन हेतुत्वात्, तस्य च ध्वंसेऽपि सत्त्वात् तद्बलाद् ध्वंसध्वंसापत्तिरिति चेन्न। विजातीयसत्त्वावच्छिन्नस्यैव तत्सहकारित्वोपगमेन तदापत्त्यभावात्, चरमध्वंसातिरिक्तस्य ध्वंसस्य कालोपाधितया निर्युक्तिकतया तत्र कालिकसम्बन्धेनादृष्टविशेषनाशासत्त्वाच्च, चरमध्वंसे च चरमध्वंसवृत्तिपदार्थनाशरूपकारणाभावेन तन्नाशापत्तेरयोगादिति कृतं पल्लवितेन।

(चि०) तत् किं कार्यकारणयोरेव व्याप्तिः, तथा च

यद्धूभ्या व्याकुली स्यादिति चेन्न। तद्धूपजीव्यान्येषाम-प्यनुकूलतर्केण व्याप्तिग्रहात्। यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यातिकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वम्, व्यभिचारसंशयोपधायकत्वात्। यदा च तादृशैकग्राहकानुकूलतर्कानवतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितम्। पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वम्, अतो न सन्दिग्धोपाधिरपि सः। यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि, ग्राहकसाम्यात्, तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्तितव्यम्, न चैवम्, तथा च पक्षेतरस्साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति, तन्न। तथापि हि साध्यव्यापकतापक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव। ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावेनैव व्याप्त्यग्रहः, अथास्ति तदा साध्यव्याप्यव्यापकत्वेनोपाधिः साध्याव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणम्। न च व्याप्त्यभावव्याप्यमुन्नयत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यम्। उपाधेरात्मनाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेन्न।

(दी०) कार्यकारणयोरेव। कार्यकारणभावग्राहकप्रमाणक्रोडीकृतयोरेव।

(गा०) ययोर्न मिथः कार्यकारणभावस्तयोरपि साध्योपाध्योः प्रदर्शितत्वात् कार्यकारणयोरेवेति मूलादाद्याया असङ्गतिः। तथा हि दया-

मन्ये शाकारम्भकावयवसमवेतत्वरूपशाकपाकजत्वं न कारणमपि तु तादृशावयवरूपमेव प्रत्यक्षविषयत्वरूपं, प्रत्यक्षत्वमपि नोद्भूतरूपकार्यमपि तु मतविशेषे प्रत्यक्षमेव तत्कार्यम्, परन्तु प्रदर्शितेषु धूमार्द्रेन्धनप्रभववह्न्यादेरेव कार्यकारणभावः, तादृशवह्नेः तादृशवह्नित्वेन वह्नित्वेन वा कारणत्वमित्यन्यदेतत्, इत्यतः कार्यकारणयोरिति व्याचष्टे । कार्यकारणयोरेवेति । प्रमाणक्रोडीकृतत्वम् । प्रमाणविषयत्वम्, तथा च एककारणताप्रविष्टविषयान्तःपातिप्रमाविषयताश्रययोरुभयोरेवेत्यर्थः । तेन कार्यकारणभावविषयकसमूहालम्बनप्रमाविषयत्वस्य केवलान्वयित्वेऽपि न व्यवच्छेद्याप्रसिद्धिः । तथात्वं च कार्यकारणयोः कार्यत्वकारणतावच्छेदकत्वयोः कारणतावच्छेदककार्यतावच्छेदकयोश्चेति दर्शितसकलोपाधिसङ्ग्रहः । वह्निधूमयोः कारणकार्योभयरूपत्वात्, विनाशप्रतियोगित्वस्य भावत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकसम्बन्धत्वात्, सम्बन्धरूपावच्छेदकस्यापि कारणताघटकव्यापकताप्रविष्टत्वेन निरुक्तप्रमाविषयतावत्त्वात्, शाकारम्भकावयवसमवेतत्वस्य चावयवश्यामरूपनिष्ठकार्यभूतश्यामरूपकारणतावच्छेदकसम्बन्धत्वात्, प्रत्यक्षविषयत्वस्य च रूपस्य रूपवतो वा कार्यतावच्छेदकसम्बन्धत्वादिति ध्येयम् ।

मूले बहुधा व्याकुली स्यात् । द्रव्यत्वपृथिवीत्वाद्योर्व्याप्तिनिश्चयानुपपत्तिस्स्यादित्यर्थः । तदुपजीव्येति । कार्यकारणभावग्राहकप्रमाणपरम्परयोपजीव्येत्यर्थः । अन्येषाम् । द्रव्यत्वपृथिवीत्वादीनाम् । अनुकूलतर्केति । पृथिवीत्वं यदि द्रव्यत्वशून्यवृत्ति स्यात् जन्यगुणशून्यवृत्ति स्यादिति तर्कः पृथिवीत्वादौ द्रव्यत्वादिव्याप्तिग्राहकः, तत्र द्रव्यत्वशून्याऽपि पृथिवी जन्यगुणशून्या न भविष्यतीत्यादिव्यभिचारशङ्का विरोधिनी, तां च जन्यगुणा यदि द्रव्यत्वव्यभिचारिणः स्युः द्रव्यत्वावच्छिन्नसमवायिकारणजन्या न स्युरित्यादितर्को विरुणद्धि, तत्र चेष्टापत्तिशङ्काविरोधितया जन्यसत्त्वद्रव्यत्वादिना कार्यकारणभावग्राहकप्रमाणमुपयुज्यते, प्रथमतर्के च नेष्टापत्तिसम्भवः, पृथिव्यादेस्संयोगादिरूपगुणशून्यत्वे मूर्तत्वानुपपत्तेः, मूर्तत्वादेः विभुसंयोगादिव्याप्यत्वादिति । एवमन्यत्रापि कार्यकारणभावस्योपयोगित्वमूह्यम् । कार्यकारणभावग्रहोपजीवनं प्रायिकं बोध्यम् ।

(दी०) पक्षेतरस्येत्यादि । ननु सन्दिग्धोपाध्यन्तरव-

त्पक्षेतरोऽपि व्यभिचारशङ्कामादधानः केन वारणीयः, स्वव्या-
घातकत्वं च निराकृतमेव ।

(गा०) पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमिति न सन्दिग्धोपाधिरपि स इति मूलस्य यथाश्रुतार्थमाक्षिपति। नन्वित्यादिना । सन्दिग्धोपाध्यन्तरवदिति। व्यभिचारशङ्काधायकत्वे दृष्टान्तः। साध्यव्यापकत्वेन सन्दिग्धं साधनाव्यापकधर्मान्तरमेवेत्यर्थः । व्यभिचारशङ्कामादधान इति । व्याप्यसंशयात्मकसाध्यधर्मिकसाधनाव्यापकव्याप्यत्वसंशयद्वारा साध्ये साधनाव्यापकत्वशङ्कां साध्यव्यापकत्वसंशयाधीनसाधनधर्मिकसाध्यव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशयरूपव्याप्यसंशयद्वारा साधनधर्मिकसाध्याभाववद्वृत्तित्वशङ्कां वा जनयन्नित्यर्थः । तादृशशङ्काया जनने स्वव्याघातकत्वं मूलोक्तबाधकमुद्धरति । स्वव्याघातकत्वं चेति । निराकृतमेवेति । तच्च न सर्वानुमानसाधारण्यमित्यादिनेति शेषः ।

(दी०) अथात्र कश्चिदुपाधिर्भविष्यतीति शङ्का शङ्कापिशाचीत्वाद्यथा न व्यभिचारशङ्काधायिका, तथा पक्षेतरस्योपाधित्वशङ्काऽपि, तदाहिताऽपि च व्यभिचारशङ्का पक्षे व्यभिचारशङ्केव न प्रतिबन्धिका, अन्यथा निरुपाधिकसहचारभङ्गप्रसङ्गमात्रवलम्बमानानामनुमानानां विलयप्रसङ्गादिति चेन्न । सन्दिग्धोपाध्यन्तरसाधारणव्यभिचारशङ्काधीनप्रयोजकरूपवत्ता पक्षेतरेण तदाधाने प्रयोजनक्षतेः प्रतिबन्धकत्वासम्भवात् । व्यभिचारज्ञानत्वेन च प्रतिबन्धकतायां कारणविशेषजन्यत्वादिकं न निविशते गौरवात् मानाभावाच्च । कथमन्यथा करत्वाह्निसंयोगः सर्वः संयोगो वा प्रत्यक्षसंयोगधर्मातिरिक्तधर्मसमवायी समवायित्वादित्यादितो न शक्त्यादिसिद्धिः? निरुपाधित्वेऽप्यप्रयोजकत्वादिति चेन्न। निरुपाधित्वस्यैव प्रयोजकत्वात् । तथात्वेऽपि चाप्रयोजकत्वे निरुपाधित्वाभिमतानामितरेषामपि तथात्वात् ।

(गा०) अत्र कश्चिदुपाधिर्भविष्यतीति शङ्केति । विशेषत उपाधितावच्छेदकमनुल्लिख्य एतत्साध्यव्यापक एतत्साधनाव्यापको न वा, एतत्साधनाव्यापक एतत्साध्यव्यापको न वेति शङ्केत्यर्थः । शङ्कापिशाचीत्वात् । दुरुच्छेदशङ्कात्वात् । पक्षेतरस्योपाधित्वशङ्काऽपीति । शङ्कापिशाचीत्वाच्च व्यभिचारशङ्काप्रायिकेत्यनुषज्यते । अत्र व्यभिचारशङ्कासामग्र्याः स्थलान्तरे कल्पनाया अपि सत्त्वे तच्छङ्काया अनुत्पादोऽनुभवविरुद्ध इत्यनुशयानो न हेतुव्यभिचारसंशयाबाधकत्वमित्यस्यानुमितिविरोधिव्यभिचारशङ्कानाधायकत्वाशयेन प्रकारान्तरेण पक्षेतरस्यादूषकत्वं शङ्कते । तदाहितास्पि चेति । तस्योपाधित्वशङ्काहिता चेत्यर्थः । पक्ष व्यभिचारशङ्केवेति । पक्षे साध्यसन्देहदशायामप्यनुमित्युत्पत्त्या पक्षान्तर्भावेण व्यभिचारशङ्का यथा न प्रतिबन्धिकेत्यर्थः । न प्रतिबन्धिका । नानुमितिप्रतिबन्धिका । एतच्चानुमितिं प्रत्येव साक्षात्संशयसाधारणव्यभिचारग्रहः प्रतिबन्धकः, व्याप्तिज्ञाने तु व्यभिचारनिश्चय एवेति मतेन, व्याप्तिज्ञानविघटनद्वारा व्यभिचारसंशयस्यानुमितिविरोधित्वमते व्याप्तिज्ञानप्रतिबन्धकतायाः पक्षविशेषनियन्त्रितत्वाभावेन तत्र पक्षीयव्यभिचारसंशयस्यानुमितिविरोधित्वव्यावर्त्तनायोगात्, सामान्यतः पक्षत्वस्य केवलान्वयित्वात् । अन्यथा । उक्तव्यभिचारशङ्काया अपि प्रतिबन्धकत्वे । निरुपाधिकेति । पक्षेतरत्वतत्समशीलातिरिक्तोपाधिविरहविशिष्टसहचारसङ्ग्रहमात्रबलेन प्रवृत्तानां गगनं परिमाणवत् द्रव्यत्वाद् घटादिवदित्यनुमानानामुच्छेदापत्तेरित्यर्थः । तत्र पक्षे साध्यसन्देहेन तदन्तर्भावेण व्यभिचारशङ्कायां पक्षेतरत्वोपाधित्वशङ्काहितव्यभिचारशङ्कायाश्च सम्भवादित्यर्थः ।

न च तत्र व्यभिचारापादकनिरुपाधित्वभङ्गप्रसङ्ग एव व्यभिचारशङ्कानिवर्त्तक इति नोक्तानुमानविलयप्रसङ्ग इति वाच्यम् । अनौपाधिकत्वस्य दुर्निश्चेयतया तद्भङ्गापत्तेरयोगात् । बलान्तेन च उपाध्यन्तराग्रहसहितव्यभिचारग्रहमात्रसमाधानस्यैव विवक्षिततया तत्सङ्गतेश्च ।

प्रथमपक्षं दूषयति । सन्दिग्धेति । रूपवतेति । साध्यव्यापकतासंशयविषयत्वधर्मवतेत्यर्थः । प्रतिबन्धकत्वासम्भवादिति । न हि प्रयोजनक्षतिभिया सामग्री कार्यं न जनयतीति न्यायादिति भावः ।

व्यामोहो यत्राप्तिग्राहकदृढतरप्रमाणविरहिणां निरुपाधित्वमिति, यतस्तत्र तत्रान्ततः पक्षसपक्षैकदेशवृत्तिधर्मानवच्छिन्नसाध्यव्यापकानां सपक्षैकदेशवृत्तिधर्माणामुपाधित्वं सम्भाव्यते । इत्थं च यथा नातिप्रसङ्गस्तथा तत्र तत्र वक्ष्याम इति । सत्यम्, कथकसम्प्रदायानुरोधात् कथायां सन्दिग्धोपाधित्वेन पक्षेतरो नोद्भाव्य इत्येवम्परोऽयं ग्रन्थ इत्याहुः ।

(गा०) उक्तशक्तिसाधकानुमाने सिद्धान्तिमतसिद्धप्रतिबन्धकताकव्यभिचारशङ्काविरहं स्पष्टयति । अत्र चेति । कुत्र पक्षातिरिक्ते इति । पक्षातिरिक्तेकिधर्म्यन्तर्भावेणेत्यर्थः । संयोगातिरिक्ते सर्वत्रैव समवायिनि संयोगधर्मातिरिक्तधर्मसमवायितारूपसाध्यस्य निश्चितत्वादिति भावः । पक्षेतरत्वादेरनुपाधित्वेऽपि सिद्धान्तिनां गगनं परिमाणवत् द्रव्यत्वादित्याद्यनुमानस्य निरुपाधित्वाभिमानं निराकरोति । कश्चायमिति । कः । कुत्सितः । व्यामोहः । भ्रमः । दृढतरेति । सत्तर्केत्यर्थः । पक्षसपक्षैकदेशवृत्तिधर्मेति । गगनघटान्यतरत्वादीत्यर्थः । सपक्षैकदेशवृत्तिधर्माणाम् । घटत्वादीनाम् । उपाधित्वम् । सन्दिग्धोपाधित्वम् । पक्षे साध्यव्यापकत्वसंशयस्य दुर्वारत्वात् ।

ननूक्तव्यभिचारशङ्कायाः प्रतिबन्धकत्वे पर्वतो वह्निमान् धूमादित्यादावपि वह्न्यादिसिद्ध्यभावप्रसङ्ग इत्यत आह । इत्थं चेति । तत्र तत्र । व्यभिचारादिग्रन्थे । वक्ष्याम इति । प्रकृतहेतुसाध्ययोर्व्याप्तिग्राहकतर्कसत्त्वेन धूमादौ वह्न्यादिव्याप्तिनिश्चयात्तत्र तस्य व्यभिचारसंशयायोगः, तादृशतर्कस्य व्याप्तिनिश्चयस्य च तत्संशयप्रतिबन्धकत्वादिति वक्ष्याम इत्यर्थः । आहुरित्यनेन सम्प्रदायानुरोधेन तदुद्भावनं दुर्वारमित्यस्वरसः सूचितः ।

(चि०) सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदकभेदेन तदुभयसम्बन्धो वाच्यः, तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवनमन्तरेणोपाधिरावश्यकः तथाऽनुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिग-

सक्ताभावाद् दूषकत्वम् ।

(दी०) सोपाधावेकत्रेत्यादि । उपलक्षणमेतत् । व्यभिचारिण्युपाधेरवश्यम्भावमात्रे तात्पर्यम् । उपजीव्योपजीवकभावो हि न कार्यकारणभावः, असम्भवात्. व्याप्यव्यापकभावस्त्वकिञ्चित्कर एव, विशेषतस्तु ज्ञायमानदूषकतायामेकमविज्ञायाऽप्यन्यतरज्ञानाच्च न ज्ञाप्यज्ञापकभावः,न चानुकूलतर्कविरहादेव व्याप्तिग्रहे कृतमुपाधिज्ञानेन, विनाऽप्यनुकूलतर्कं व्यभिचाराग्रहे व्याप्तिग्रहसम्भवादिति भावः ।

(गा०) अनुकूलतर्काभाव उपाधिज्ञानोपजीवक इति तद्दूषकतयैवोपपत्तौ उपाधेर्दूषकत्व निर्युक्तिकमिति पूर्वपक्षे सोपाधावेकत्रेत्यादिना मूलकृत उपाधेर्दूषकताव्यवस्थापनं न सङ्गच्छते, व्यभिचारिणि साध्यतदभावसहचारयोरविरोधायोपाधेरवश्यसत्ताया दूषकताव्यवस्थापकत्वादित्यत आह । उपलक्षणमेतदिति । युक्त्यन्तरस्यैव उपाधेर्दूषकत्वसाधकत्वपरमेतदित्यर्थः ।

ननु यथाश्रुते उपाधेरवश्यम्भावस्य तद्दूषकतासाधकत्वेऽस्य तात्पर्यमित्याह । व्यभिचारिणीति । अवश्यम्भावमात्रेति । मात्रपदेन तद्दूषकतासाधकत्वव्यवच्छेदः । अनुकूलतर्काभावे उपजीव्यतायाः तद्दूषकतायां विनिगमकत्वेनोक्तत्वात् तां निराकृत्य उपाधेर्दूषकतां व्यवस्थापयति । उपजीव्योपजीवकभावो हीति । प्रकृते इति शेष । असम्भवात् । अनुकूलतर्काभावस्याऽऽर्द्रेन्धनादिकारणत्वासम्भवात् । अकिञ्चित्करः । सम्भवन्नपि दूषकताया अविनिगमकः । उभयोरेव प्रत्येकमपरव्यापकत्वादिति भावः । विपर्ययस्य व्याप्यव्यापकभावेऽपि व्यापकस्याज्ञानदशायां व्याप्यज्ञानसत्त्वेऽनुमित्यनुत्पादनिर्वाहाय व्याप्यज्ञानस्यापि, दूषकताया आवश्यकत्वादुपाध्यनुकूलतर्काभावयोर्ज्ञायमानयोर्विरोधित्वे तयोर्व्याप्यव्यापकभावः सुतरामविनिगमक इत्याह । विशेषतस्त्विति । दूषकतायामित्यत्राकिञ्चित्कर इत्यनुषज्यते । ज्ञानाच्चेति चस्त्वर्थः । अनुकूलतर्काभावः स्वरूपसन्नेव व्याप्त्यग्रहप्रयोजकः, उपाधिस्तु ज्ञायमानः, एवं चोपाधित्वज्ञानदशायामनुकूलतर्काभावस्य स्वरूपसतो नियततया तत्र

एव व्याप्तिग्रहनिर्वाहे उपाधेर्न तत्प्रयोजकत्वमित्याशङ्कां निराकरोति। न चेत्यादिना। विनाऽप्यनुकूलतर्कमिति। तथा चानुकूलतर्काभावो न स्वतो व्याप्तिग्रहप्रयोजकोऽपि तु व्यभिचारग्रहद्वारा, स च सोपाधित्वज्ञानमपेक्षत इति तद्द्वारोपाधेर्दूषकत्वं निराबाधमेवेति भावः।

(चि०) अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं निवर्तते स धर्मस्तत्र हेतावुपाधिः, स च धर्मो यस्याभावात्पक्षे साध्यसाधनसम्बन्धाभावः, यथा आर्द्रेन्धनवत्त्वम्। व्यावर्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके। अत एव तत्र साध्यसाधनसम्बन्धाभावः पक्षे। एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोरसम्बन्धो निवर्तमानः पक्षधर्मताबलाद् नित्यत्वाभावमादाय सिद्ध्यति, तथा बाह्यावुद्भूतरूपवत्त्व निवर्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयत् प्रत्यक्षत्वाभावमादाय सिद्ध्यति, तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति। अत एव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्तकत्वादिति।

(दी०) यद्व्यावृत्त्येति। अत्र पक्ष इति पूरणात्पक्षनिष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः। सत्प्रतिपक्षोन्नायकत्वं चात्र दूषकताबीजम्। तत्र चाप्रयोजकत्वात्साधनाव्यापकत्वं नोक्तम्। साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यस्य साधनस्येति। यद्वा साधनस्येत्यनन्तरमधिकरणे इति पूरणात् साधनवन्निष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः, तथा च यद्व्यभिचारित्वेनेत्यादेरुपदर्शितार्थनिष्कर्षे

शुद्धसाध्यव्यापकार्द्रेन्धनोपाधेः साक्षात्साध्याभावोन्नायकतयैव लक्षणसमन्वये अत एवेत्यादिना शुद्धसाध्याभावसाधकतया साध्यसाधनसम्बन्धाभावोन्नायकत्वसम्पादनं व्यर्थमित्याशङ्कां निरस्यति । शुद्धस्येति । साधनावच्छिन्नस्येति । पक्षधर्मावच्छिन्नसाध्यव्यापकस्याभावात् साध्यसाधनसम्बन्धाभावसिद्धेरसम्भवेन वक्ष्यमाणप्रकारेण साध्याभावोन्नायकत्वं न तस्येति साधनावच्छिन्नस्येत्युक्तम् । सत्प्रतिपक्षोन्नायकतया उपाधितापक्षे पक्षाव्यापकविपर्ययस्य उपाध्याभासतया पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन साध्याभावोन्नयनमेवोपाधिनानिर्वाहकमतः पक्ष इति सामान्यत उक्तम् । व्यभिचारोन्नायकतया उपाधितापक्षे साधनवत्त्वावच्छेदेन साध्याभावोन्नयनमप्रयोजकम्, यत्किञ्चित्साधनवति साध्याभाववत्त्वस्यैव व्यभिचारत्वादतः क्वचित् साधनवतीत्युक्तम् । एकमुन्नयनप्रकारम् । साध्यसाधनसम्बन्धाभावं साध्यमाने पक्षधर्मताबलात् साध्याभावसाधकत्वरूपम् ।

मूले साध्यसाधनसम्बन्धाभावः साध्यसाधनयोरेकाधिकरण्यापराभावः । पक्ष इत्यस्य उत्तरकल्पे साधनवतीत्येवार्थः । एवमग्रेऽपि ।

साध्यसाधनसम्बन्धाभावसाधकतयाऽपि कथं साध्याभावसाधकत्वमित्यत आह दीधितौ । साधनवत्त्वेनेति ।

(दी०) ननु शुद्धसाध्याभावोन्नायकस्यार्द्रेन्धनवत्त्वादेः कथं साध्यसाधनसम्बन्धाभावोन्नायकत्वमत आह । आर्द्रेन्धनेति । अत एवेति । साध्याभावसत्त्वे साध्यसाधनसम्बन्धाभावस्याऽऽवश्यकत्वाचदुन्नायकत्वमक्षतमिति भावः । द्रव्यत्वे इति । द्रव्यत्वस्य हेतुत्वाभिप्रायेण । अयञ्च प्रायशस्सम्भवतीत्यभिहितः । वस्तुतः प्रकारभेदेऽपि न क्षतिः । तथा च शुद्धसाध्यव्यापकोपाधिस्थले शुद्धसाध्याभावः अवच्छिन्नतद्व्यापकस्थले त्ववच्छेदकवत्त्वयवच्छिन्नसाध्याभावोऽवच्छेदकवत्त्वविशेषितेन चोपाधिविरहेण शुद्धसाध्याभावस्साधनीयः, अत एव गगनादौ स्पर्श-

वत्त्वेन प्रमेयत्वेन च प्रत्यक्षत्वे साध्ये वह्निर्द्रव्यत्वावच्छिन्नसाध्य-व्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतुत्वमिति । पक्षे यद्व्यावृत्त्या यस्य साधनस्य सम्बन्धि यत्साधनाविशिष्टं साध्यं निवर्तते इत्यर्थस्तु यथाश्रुतग्रन्थस्वरससिद्धः, तत्र दूषकताबीजं यदि सत्प्रतिपक्षोन्नायकत्वं तदा साधनानुप्रवेशो व्यर्थः, जलं द्रव्यं गन्धवत्त्वादित्यादौ पृथिवीत्वादावतिव्याप्तिश्च ।

(गा०) शुद्धसाध्यस्यापक्षाभावस्य नावच्छिन्नसाध्याभावसाधकत्वमित्यभिमानविजृम्भितशङ्कावारकतया यथाऽऽर्द्रेन्धनवत्त्वमित्यादिग्रन्थमवतारयति । नन्विति । अत एवेत्यादिना साध्याभावस्य साध्यसाधनसम्बन्धाभावप्रयोजकत्वमुक्तम्, तावता तत्सत्त्वे तत्सत्त्वावश्यकत्वलाभादुक्तशङ्कानिराकरणमिति स्फुटयति । अत एवेतीति । तदुन्नायकत्वमित्यस्य बाधव्यभिचारयोरप्रसक्त्येत्यादिः । द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयदित्यस्य साध्यसाधनोभयसम्बन्धाभावसाधनपरत्वाभावे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीत्याग्रिममूलस्य यदभावात् पक्षे साध्यसाधनसम्बन्धाभाव इत्यस्य च विरोधः, प्रत्यक्षस्पर्शाश्रयत्वस्य हेतुत्व च तत्परत्वासम्भव इत्यतो द्रव्यत्वस्येति ।

मूलकृता तथा चेत्यादिना तदुभयसम्बन्धाभावस्याबाधो दर्शितः । साध्याभावसिद्ध्या । साध्याभावस्य प्रमितत्वेन ।

मूलकृतोऽप्युन्नयनप्रकारैक्ये निर्बन्धमाह । अयं चेति । सत्प्रतिपक्षोन्नायकस्य उपाधितामते पक्षे साधनस्यासत्त्वे तत्र साधनवत्त्वानिश्चयादुपाध्यभावेनोभयसम्बन्धाभावसाधने साध्याभावपर्यवसानासम्भवात् प्रायश इत्युक्तम् । प्रकारभेदं दर्शयति । तथा चेति । उक्तप्रकारसम्भवस्थलं दर्शयति । अत एवेति । स्पर्शवत्त्वेन प्रमेयत्वेन चेति । प्रथमे उपाध्यभावेन साध्यसाधनसम्बन्धाभावसाधने शुद्धसाध्याभावापर्यवसानम्, स्पर्शरूपसाधनाभावाबाधेन पक्षधर्मताबलाभावात्, द्वितीये तद्व्याप्तिविरहेण साध्यसाधनसम्बन्धे प्रवेश्य उक्तलक्षणव्याख्यानं दूषयितुमाह । पक्ष इति । गौरत्वाभाववान् मित्रातनयत्वादित्यादौ शाकपाकजत्वापु-

पाधेः साधनसामानाधिकरण्योपलक्षितसाध्यव्यापकतया न स्वव्यतिरेकेण तादृशसाध्याभावसाधकत्वम्, अतो यत्साधनविशिष्टमिति वर्णितम्। सत्प्रतिपक्षोन्नायकत्वम् तदुन्नायकतामात्रम् । लक्ष्यतानियामकमिति शेषः । साधनानुप्रवेशो व्यर्थ इति । शुद्धसाध्याव्यापकस्यापि पक्षे उक्तरीत्या शुद्धसाध्याभावोन्नायकतया तदन्तर्भावेऽपि लक्षणसमन्वयसम्भवादिति भावः । अतिव्याप्तिरिति । पक्षे साध्यसत्त्वेन सत्प्रतिपक्षानुन्नायकत्वात् साधनावच्छिन्नसाध्यव्यापकतया यथोक्तलक्षणसत्त्वाच्चेति भावः।

(दी०) अथासिद्ध्युन्नायकत्वं तदा साध्यानुप्रवेशो निरर्थकः, जलं गन्धवत् द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसङ्गश्च । अथ यथासम्भवमसिद्धिसत्प्रतिपक्षस्य चोन्नायकत्वं तदा वायुः स्नेहवान् गन्धवत्त्वादित्यादौ जलत्वपृथिवीत्वादावतिव्याप्तिः, साधनविशिष्टसाध्याप्रसिद्धेः । साध्यसाधनवत्त्वप्रकारकबोधविरोधिबुद्धिकाभावोन्नायकत्वमर्थः, विरुणद्धि चैकैकाभावबुद्धिरुभयवत्ताबोधम्, विरुद्धस्थले तु भ्रमादिरूपतथाविधबोधप्रसिद्ध्या समन्वय इत्यपि वदन्ति ।

(गा०) असिद्ध्युन्नायकत्वम् । असिद्ध्युन्नायकतामात्रम् । एवं सति साधनानुप्रवेशसार्थक्यं भवति, उक्तस्थलीयपृथिवीत्वादेः स्वरूपासिद्ध्युन्नायकतया लक्ष्यस्य सङ्ग्राहकत्वात् । साध्यानुप्रवेश इति । आत्मा प्रत्यक्षः स्पर्शाश्रयत्वादित्यादौ शुद्धसाधनाव्यापकस्योद्भूतरूपादेरभावेन पक्षधर्मविभुत्वादिविशिष्टेन साधनाभावोन्नयनसम्भवेन तदनन्तर्भावेऽपि लक्षणसमन्वयसम्भवात्, पृथिवीत्वादौ पक्षे साधनसत्त्वेन स्वरूपासिद्ध्यनुन्नायकतया ऽलक्ष्ये साधनावच्छिन्नसाध्यव्यापकतया यथोक्तलक्षणसत्त्वेनातिप्रसङ्गः । प्रत्येकोन्नायकेऽपि यथोक्तलक्षणसत्त्वादुभयोन्नायकत्वस्य लक्ष्यतानियामकत्वेऽतिव्याप्तिरिति यथासम्भवमित्युक्तम्, तथा चैकोन्नायकतयैव लक्ष्यतया नोक्तातिव्याप्तेरवकाशः, तदुपाधिसङ्ग्राहकतया चोभयानुप्रवेशसार्थक्यमिति भावः । जलत्वपृथिवीत्वादाविति । प्रथमस्य सत्प्रतिपक्षोन्नायकतया द्वितीयस्यासिद्ध्युन्नायकतया ल-

स्यत्वाद् इति भावः । साधनविशिष्टसाध्यस्याभावो न प्रविष्टः, अपि तु द्वयोरभावद्वयमनुगतरूपेणेति नोक्ताव्याप्तिरिति यदुक्तं मतमाह । साध्येति । साध्यसाधनोभयप्रकारकबोधविरोधिनी बुद्धिर्यस्य तादृशाभावो ज्ञापकत्वमित्यर्थः । यत्किञ्चिदेकधर्मिकतादृशोभयप्रकारकलौकिकसन्निकर्षाजन्यज्ञानसामान्यप्रतिबन्धकतावच्छेदकतद्धर्मिविशेष्यतानिरूपकप्रकारताश्रयाभावो ज्ञायकत्वं विवक्षितम् । पदार्थान्तरसहिततदुभयप्रकारकबोधविरोधितावच्छेदकत्वमन्याभावेऽपीति तद्ज्ञापकेऽतिव्याप्तिवारणाय सामान्येत्युक्तम् । नानाधर्मिकोभयप्रकारकज्ञानसामान्यप्रतिबन्धकतावच्छेदकत्वं विशेष्यभेदभिन्नतया न कस्याऽपि साध्याभावादिप्रकारतया इति प्रतिबध्यज्ञाने यत्किञ्चिदेकधर्मिकत्वनिवेशः । विशिष्टरूपादेयेव साध्यता साधनता वा तत्र साध्यादौ तद्विशेषणाभावग्रहस्यापि विशिष्टसाध्याभावादिप्रकारकज्ञानविरोधितया प्रकृतपक्षे तद्ज्ञापकस्य वारणाय तद्धर्मिविशेष्यतानिरूपकत्वं प्रकारताविशेषणम् । प्रकृतपक्षे तादृशाभावो ज्ञायकत्वविवक्षयाऽन्यत्र तद्ज्ञापकेऽनुपाधौ नातिप्रसङ्गः ।

ननु उभयवत्ताज्ञानप्रतिबन्धकमुभयाभावज्ञानम्, तथा सति च यत्र एकसम्बन्धेनैव साध्यसाधनभावः तत्र तत्सम्बन्धेनोभयप्रकारकज्ञानविरोधितत्सम्बन्धावच्छिन्नोभयाभावो ज्ञापकतया सत्प्रतिपक्षाद्युन्नायकत्वदृष्टेऽपि यत्र भिन्नसम्बन्धेन तथात्वं तत्र विभिन्नतत्सम्बन्धेन साध्यसाधनोभयप्रकारकज्ञानं प्रति नैकसम्बन्धावच्छिन्नोभयाभावज्ञानं प्रतिबन्धकमिति कीदृशाभावो ज्ञापकतया लक्षणे सङ्ग्रहणीयमित्याशङ्कां निराचिकीर्षुः साध्यसाधनोभयस्य विभिन्नतत्सम्बन्धावगाहिज्ञानस्याधिकं त्विति न्यायेन प्रत्येकसम्बन्धावच्छिन्नप्रत्येकाभावज्ञानप्रतिबध्यत्वमपीति तद्ज्ञापकत्वेनैवोभयविरोध्यनुगमकम्, अत उभयत्वाप्रकारकोभयज्ञाने उभयाभावज्ञानस्याविरोधित्वेऽपि न क्षतिरिति समाधत्ते । विरुध्यतीति । विरुद्धसाध्यसाधनयोरेकधर्मिणि प्रमारूपज्ञानासम्भवेऽपि भ्रमरूपस्य संशयरूपस्य वा उभयज्ञानस्य विरोधित्वेनैव 'तत्राभावद्वयानुगम' इत्याह । विरुद्धस्थले चेति । अत्र च यादृशविरुद्धस्य न कुत्रापि धर्मिणि भ्रमः संशयो वा प्रसिद्धस्तदेकतरसाध्यकापरहेतुकोपाध्यव्याप्तिः, यत्किञ्चिदेकधर्मिणि साध्यप्रकारकं यत्किञ्चिदेकधर्मिणि च साधनप्रकारक-

मिति रीत्या निवेशे भिन्नधर्मिकतदुभयप्रमामादाय वृत्तिमत्साध्यसाधनकोपाधिसङ्ग्रहेऽपि साध्यतावच्छेदकादसम्बन्धेनावृत्तिसाध्यादिके तेन तेन सम्बन्धेनोभयप्रकारकस्य भिन्नधर्मिकस्यापि प्रमाज्ञानस्याप्रसिद्ध्या तत्र भ्रमाप्रसिद्धावव्याप्तिः, एवं साध्याभावोन्नायकताया एव मूलकृतोपादानादसिद्ध्युन्नायकस्य लक्ष्यत्वं न तदभिप्रेतमित्यादिकमस्वरसबीजम् ।

(दी०) यत्तु साध्यावृत्तित्वे सति साधनावृत्तिर्यस्तच्छून्यत्वेन साध्यसाधने अनुगमय्य तदभावोन्नायकत्वं वाच्यमिति तन्न । यत्र भिन्नाभिन्नसम्बन्धेन साध्यसाधनभावस्तत्र सद्धेतुके हेतुतासम्पादकेन सम्बन्धेन साध्यस्य साध्यतासम्पादकेन च हेतोरन्यत्रापि च यथा कथञ्चित्सम्बन्धेनोभयरूपाभावोन्नायकेऽतिव्याप्तेः । किञ्च तादृशधर्मशून्यत्वेन रूपान्तरेण वा तदभावस्योन्नायकत्वमभिमतम् ? नाद्यः, साध्यसाधनान्यतरवति तदसम्भवात् । नान्त्यः, धूमेन पर्वते वह्नौ साध्ये महानसीयवह्नित्वावच्छिन्नाभावोन्नायकमहानसत्वादावतिव्याप्तेः ।

(गा०) साध्यसाधने अनुगमय्य तदभावत्वेनाभावद्वयानुगमनं दूषयितुमुपन्यस्यति । यत्त्विति । यत्र प्रमेयमात्रस्य साध्यता साधनता वा तत्र साध्यसाधनयोस्तदन्यान्यत्वेनानुगमो न सम्भवति, प्रमेयभिन्नाप्रसिद्धेरिति तत्तदवृत्तिशून्यत्वेनानुगमः । प्रमेयावृत्ति चावृत्त्येव प्रसिद्धम् । यत्रेति । पर्वतो वह्निमान् धूमसंयोगादित्यादाविंत्यर्थः । सद्धेतुक इति । अभावोन्नायक इत्यनेनान्वितम् । हेतुतासम्पादकेन सम्बन्धेनाभावस्य विवक्षणे तादृशेन समवायादिना साध्यस्य वह्न्यादेरभावस्योन्नायके वह्न्यवयवत्वादौ, साध्यतासम्पादकेन सम्बन्धेनाभावस्य विवक्षणे तादृशेन संयोगादिना हेतोर्धूमसंयोगादेरभावस्योन्नायके महानसत्वादौ, यत्किञ्चित्सम्बन्धेनाभावस्य विवक्षणे च तत्तत्सम्बन्धेन तत्तदभावस्योन्नायके तत्र तत्रैवातिव्याप्तिरित्यर्थः । अभावस्य प्रतियोगितावच्छेदकं विकल्प्यापि दूषयति । किञ्चेति । तादृशधर्मेति । धर्मपदं स्वरूपार्थकम्, तादृशान्यतरत्वावच्छिन्नप्रतियोगिताकस्य तादृशान्यतरत्वाश्रयप्रतियोगिताक-

स्य चाऽभावस्योन्नायकत्वं विवक्षितमित्यर्थः । अन्यतरवति । पक्षे । तदसम्भवात् । अन्यतरत्वावच्छिन्नाभावस्य बाधेनोन्नायकत्वासम्भवात् । तथा च ह्रदो वह्निमान् द्रव्यत्वादित्यादौ वह्निज्ञानप्रसादे, पर्वतो वह्निमान् महानसत्वादित्यादौ च व्यञ्जनवत्त्वादेः सत्प्रतिपक्षस्यासिद्धेश्च उन्नायकस्यासत्त्वाद् इति भावः ॥

(दी०) यत्र पक्षावृत्तित्वे सति ये साधनवदवृत्तिपक्षतच्छून्यत्वेन पक्षसाधनवन्नावृत्तीति समविशेष्यत्वेन वा द्वयमनुगमय्य तत्र साध्यव्यावर्तकत्वमर्थमाहुः । तत्र यदि सत्प्रतिपक्षव्यभिचारयोरन्यतरमात्रोन्नायकत्वं दूषकताबीजम् तदा द्वयोरनुगमनमफलम् । अथ यथासम्भवमुभयोन्नायकत्वम् तदाऽवृत्तिहेतुके सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः ।

(गा०) सत्प्रतिपक्षव्यभिचारयोरुन्नायकतद्द्वय उन्नयनसम्भूतपक्षसाधनवतोरनुगतरूपेणान्तर्भावं दर्शयति । यत्रेत्यादिना । प्रमेयत्वस्य यत्र पक्षतावच्छेदकता साधनता वा तत्राप्रसिद्धिभयेन तत्तदन्यान्यत्वोपेक्षा । पक्षसाधनवन्नावृत्तीति । इतरविशेषणकसमूहालम्बनव्यावृत्तयद्धर्मवत्त्वेन प्रमाया निवेशो बोध्यः, अतः पूर्वापेक्षया लाघवम्, तादृशसमूहालम्बनव्यावृत्तस्य पूर्वापेक्षया लघुरूपान्तरस्य दुर्वचत्वात् । साध्यव्यावर्तकत्वम् । साध्याभावोन्नायकत्वम् । अर्थम् । उक्तलक्षणस्यैवेति शेषः । सत्प्रतिपक्षेति । सत्प्रतिपक्षोन्नायकत्वमात्रम् । व्यभिचारोन्नायकत्वमार्थमित्यर्थः । अवृत्तिहेतुके इति । ह्रदो वह्निमान् गगनादित्यादिस्थले वह्निज्ञानप्रसादादावित्यर्थः । अव्याप्तिः, साधनवतोऽप्रसिद्ध्या ।

(दी०) यदपि च पक्षतावच्छेदके साधने च न वर्तते पक्षतच्छून्यस्य पक्षतावच्छेदकसाधने इति प्रतीतिविशेष्यस्य वाऽऽश्रये साध्यव्यावर्तकत्वमर्थमाहुः । तत्रापि किं येन सम्बन्धेन हेतुता तेन, अथ येन पक्षतावच्छेदकं पक्षे वर्तते तेन, उत येन केनचित् तादृशधर्माश्रये साध्यव्यावर्तकत्वमभिमतम् ? नाद्यः, जलं वह्निमद्धूमादित्यादौ जलपक्षकवह्निसाध्यके संयोगसम्बन्धेन

साधने धूमादौ वह्निसामग्र्यादावव्याप्तेः; पक्षतावच्छेदकस्य संयोगेनावृत्तेः, संयोगेन धूमवतश्च वह्निमत्त्वनियमात् । न द्वितीयः, घटो जातिमान्मेयत्वादित्यादौ समवायित्वादावव्याप्तेः, वह्निमत्पर्वतपक्षके पर्वतो वह्निमान् धूमादित्यत्र धूमावयवे वह्निव्यावर्तके वह्निसामग्र्यादावतिव्याप्तेश्च । अत एव नेतरोऽपि, इत्यादि स्वयमूहनीयमिति कृतं पल्लवितेन ।

(गा०) साधनपक्षतावच्छेदकान्यतराश्रयत्वेनोभयोर्निवेशे साधनवतोऽप्रसिद्धावपि नान्यतराश्रयाप्रसिद्धिरित्याशयेन तत्र साध्याभावोन्नायकत्वार्थकत्वेन तल्लक्षणव्याख्यामुपन्यस्य दूषयति । यदपीत्यादि । पक्षतावच्छेदक इति । प्रमेयमात्रस्य यत्र पक्षतावच्छेदकता साधनता वा तत्सङ्ग्रहानुरोधेन तदन्यान्यत्वमुपेक्षितम् । पक्षतावच्छेदकसाधने इतिप्रथमाद्विवचनम् । तेनेति । द्वयं तादृशधर्माश्रय इत्यन्वयि । येन पक्षतावच्छेदकमिति । येन सम्बन्धेन पक्षतावच्छेदकावच्छिन्नं साध्यं साधनीयमित्यर्थः । वह्निसामग्र्यादौ । सत्प्रतिपक्षोन्नायके । संयोगेनावृत्तेरिति । तथा च जलरूपपक्षस्य साधनशून्यस्यान्यतराश्रयत्वेनोपादानासम्भवात् तत्र साध्याभावोन्नायकतया न लक्षणगमनसम्भव इति भावः । साधनतावच्छेदकसम्बन्धेन साधनवतः प्रसिद्धावपि साध्याभावस्य तत्र बाधेनोन्नायनं न सम्भवतीत्याह । संयोगेन धूमवतश्चेति । समवायित्वादौ व्यभिचारोन्नायके । अव्याप्तेरिति । पक्षतावच्छेदकताघटकसमवायेन मेयत्वाश्रयाप्रसिद्धेः, पक्षतावच्छेदकघटत्वाश्रयस्य च साध्यवत्त्वनियमादिति भावः । अतिव्याप्तिमप्याह । वह्निमदिति । पक्षस्य साध्यशून्यत्वे वह्निसामग्र्यादिः सत्प्रतिपक्षोत्थापकतया लक्ष्य एव स्यादिति वह्निमत्पर्वतपक्षक इत्युक्तम् । धूमावयवे । पक्षतावच्छेदकताघटकसमवायेनान्यतरान्तर्गतसाधनाश्रये । अत एव । यत्किञ्चित्सम्बन्धेन धूमावयवादेर्धूमाद्याश्रयतया तत्र साध्यव्यावर्तकवह्निसामग्र्यादावतिव्याप्तेरेव ।

(चि०) यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मत्वं पक्षेतरोऽपि कश्चिदुपाधिः, तत्तदुपाधेस्तु

तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वम्। न च वह्निधूमसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम्। आपाद्याप्रसिद्धेरिति। तन्न। अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यम्। तच्च न व्यभिचारोन्नायकत्वम्, अतिप्रसङ्गात्, विशेषलक्षणत्वे तु वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च।

(गा०) मूले व्यतिरेकिधर्मत्वमिति। तत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वे सति तत्सम्बन्धावच्छिन्नवृत्तिमत्त्वावच्छेदको यो धर्मस्तद्वत्त्वं तेन सम्बन्धेन तद्रूपेणोपाधित्वमित्यर्थः, अतो द्वित्वाद्यवच्छिन्नव्यतिरेकप्रतियोगित्वस्य यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगित्वस्य वाऽव्यावर्त्तकत्वेऽपि न क्षतिः। संयोगादिसम्बन्धेन गुणत्वगुणघटोभयत्वाद्यवच्छिन्नस्योपाधितावारणाय विशेष्यदलम्। तत्तदुपाधेस्तु। तत्तद्रूपावच्छिन्नतद्धेतुकोपाधेस्तु। लक्षणमित्यनुषज्यते। तत्तत्साध्येति। तत्तद्रूपावच्छिन्नसाध्यसाधनव्यापकत्वाव्यापकत्वावच्छेदकरूपवत्त्वमित्यर्थः। पक्षेतरत्वं वह्निधूमसम्बन्धोपाधिः स्यादिति योजना। वह्निधूमसम्बन्धोपाधिः। वह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकोपाधिः।

(दी०) आपाद्याप्रसिद्धेः। आपाद्यस्य वह्निव्यापकत्वे सति धूमाव्यापकत्वस्य अप्रसिद्धेः। अनुमितीति। अस्मदुक्तं व्यभिचारोन्नायकत्वं तदुन्नयनस्वरूपयोग्यत्वं तच्चापि पक्षधर्मतारूपम् पर्यवसितसाध्यव्यापकत्वादिकं चानुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमेवेति भावः। ननु सामान्यलक्षणमितरव्यावृत्त्यौपयिकम्, विशेषलक्षणं तु दूषकतायामुपयुज्यते इत्यत्राऽऽह। विशेषेति।

(गा०) तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वस्य तत्तत्साध्यसाधनकोपाधिव्यवहारविषयतावच्छेदकत्वमुपगच्छता वह्निव्यापकत्वे सति धूमाव्यापकत्वस्य वह्निसाध्यकधूमसाधनकोपाधिव्यवहारविषयतावच्छेदकत्वोपगमात् तस्य तद्व्याप्यतया वह्नि-

व्यापकत्वे सति धूमाव्यापकत्वेन तथाविधोपाधिव्यवहारविषयतावच्छेदकवत्त्वस्याभिमता, एकस्यैव भिन्नरूपेणापाद्यापादकभावाविरोधादित्याशयेनापाद्याप्रसिद्धिं दीधितिकृद्व्याचष्टे । आपाद्यस्येति । धूमाव्यापकत्वस्य । धूमाव्यापकत्वरूपतादृशव्यवहारविषयतावच्छेदकस्य । अप्रसिद्धेः । तादृशावच्छेदकत्वेनापि क्वचित् प्रसिद्धिविरहात् ।

मूले आपाद्येत्युपलक्षणम्, उक्तधर्माप्रसिद्ध्या आपादकाप्रसिद्धिरपि द्रष्टव्या । तादृशव्यवहारविषयत्वापादनेऽपि उक्तस्यापादकत्वे आपादकाप्रसिद्धि । भ्रान्तस्य तथा व्यवहारादिष्टापत्तिः । यथार्थतादृशव्यवहारविषयत्वापादने आपाद्याप्रसिद्धिरपि । व्यवहारस्य याथार्थ्यापादने वह्निव्यापकत्वसहितधूमाव्यापकत्वरूपव्यवहारविषयतावच्छेदकवह्निव्यापकत्वस्यैवापादकत्वेनोपगन्तव्यतया आपादकाप्रसिद्धिर्दुर्वारेत्यपध्येयम् । एतेन पक्षेतरत्वे वह्निव्यापकत्वे सति धूमाव्यापकत्वरूपस्याऽऽपादकस्यापि उक्तलक्षणकर्त्राऽनुपगमात्तस्याऽऽपत्त्यप्रसक्त्याऽऽपाद्याप्रसिद्ध्या तन्निराकरणासङ्गतिरिति परास्तम् ।

ननु व्यतिरेकिधर्मत्वस्य सिद्धान्तिनिरुक्तव्यभिचारोन्नायकत्वादिज्ञानस्यापि स्वतो व्यभिचारज्ञानद्वारा वाऽनुमित्यप्रतिबन्धकत्वेन सिद्धान्तिनिरुक्तरूपस्यापि न यथोक्तरूपतेति तुल्यानुयोग इत्यत आह । अस्मदुक्तमिति । तच्च व्याप्तिपक्षधर्मतारूपम् । साध्यव्यभिचारव्याप्यत्वे सति साधनरूपपक्षवृत्तितारूपम् । अनुमितिप्रतिबन्धकेत्यादिनाऽन्वयः । तस्य तथात्वं च व्यभिचारानुमितिजनकज्ञानविषयत्वावच्छेदकतया पर्यवसितसाध्यव्यापकताघटितो-

[illegible]

त्वादित्यवधेयम् ।

अन्वयस्यापि व्यादिनो विशेषलक्षणमनुमितिविरोधिज्ञानविषयतावच्छेदकमित्येतन्मतेऽपि न दोष, इत्याशङ्कायां विशेषलक्षणे दोषमवतारयति । नन्वित्यादि । दूषकतायाम् । अनुमितिप्रतिबन्धकव्यभिचारज्ञानजनने ।

मूले विशेषलक्षणत्वे इति । उक्तविशेषधर्मस्य लक्षणत्वे । अनु-

मितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वे स्वीकृते इत्यर्थः। वह्नि-धूमेति। पक्षेतरत्वे वह्निसाध्यकधूमहेतुकानुमितिप्रतिबन्धकज्ञान-विषयतावच्छेदकरूपत्वस्यावश्यकत्वापत्तेरित्यर्थः।

(दी०) यथाश्रुते ऽवच्छिन्नसाध्यव्यापकोपाध्यव्याप्तया य-त्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वमेव वक्तव्यम्, तथा च वह्निना धूमस्य धूमेन वह्नेर्वा साधने पक्षेतरस्य तद्रूपज्ञानादनुमितिप्रति-बन्धापत्तिरित्यर्थः। व्यवहारौपयिकत्वे च तत्रोपाधिव्यवहाराप-त्तिः, पर्यवसितेत्याद्यभिधाने,चास्मत्पक्षप्रवेश इति भावः। व्यव-हारौपयिकम्। स्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वम्। लक्षणं तु तत्तत्साध्यसमानाधिकरणत्वे सति तत्तत्साधनाव्याप-कत्वं साध्यसाधनभेदाद्भिन्नमेव। वस्तुतो व्यभिचारिणस्साधन-स्यैवानुप्रवेशाच्च नातिप्रसङ्गः। न च रूपेण गुरुत्वे साध्ये पृथि-वीत्वाभावादेरुपाधितापत्तिः, गुरुत्वव्यभिचारिरूपव्यक्तेस्तद्व्या-प्यत्वात् तदव्याप्यरूपव्यक्तेश्च गुरुत्वाव्यभिचारादिति। दूषणौ-पयिकं तु यथासम्भवमननुगतमेवेति मतमिदं परे परिष्कुर्व-न्ति। तन्न। तथा हि साध्यसाधनव्यक्तिस्वरूपगर्भं नोपाधित्वम्, अपि तु साध्यतावच्छेदकसाधनतावच्छेदकधर्मगर्भम्, तत्तद्गुण-त्वेन सकलगुणव्यक्तिषु सोपाधेरपि द्रव्यत्वस्य गुणत्वेन सकल-गुणेष्वेव निरुपाधित्वात्, गुणत्वेन गुणे साध्ये सत्तात्वेन रूपेण सोपाधेरपि सत्ताया गुणकर्मान्यत्वविशिष्टसत्तात्वेन निरुपाधि-त्वात्। तथा च तद्रूपावच्छिन्ने साध्ये तद्रूपावच्छिन्ने साधने च क उपाधिरित्यत्र तद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रू-पावच्छिन्नसाधनाव्यापकत्वमनुगतं लक्षणं वाच्यम्, न तु तद्रू-पावच्छिन्नतत्तत्साधनव्यक्त्यव्यापकत्वम्, अननुगमात्, तथा च गुरुत्वत्वावच्छिन्नसमानाधिकरणस्य रूपत्वावच्छिन्नाव्यापकस्य

पृथिवीत्वाभावादेरुपाधित्वं दुर्वारम् । व्यभिचारित्वेन साधनविशेषणं तूपदर्शितमेवेति सङ्क्षेपः ।

(गा०) अत्रापि तादृशरूपाप्रसिद्ध्या पूर्ववदापत्त्यसम्भव इति तत्सम्भवं दीधितिकृदुपपादयति । यथाश्रुते इति । शुद्धसाध्यव्यापकत्वान्तर्भाव इत्यर्थः । तद्रूपवत्ताज्ञानादनुमितिप्रतिबन्धापत्तिरिति । यद्यपि नेयमापत्तिर्यथाश्रुतमूलतो लभ्यते, तथापि पक्षेतरत्वेऽनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकरूपवत्त्वापत्तौ पक्षेतरत्वनिष्ठयत्किञ्चित्साध्यव्यापकताघटितरूपेऽनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वापत्तिः पर्यवस्यति, तस्याश्च पर्यवसान तद्रूपावच्छिन्नविषयकज्ञानस्यानुमितिप्रतिबन्धकत्वापत्ताविति न विरोधः ।

उक्तरूपस्य व्यवहारमात्रौपयिकत्वेऽपि न निर्वाह इत्याह । उपाधिव्यवहारापत्तिरिति । वह्निसाध्यकधूमहेतुकोपाधिव्यवहारस्य यथार्थतापत्तिरित्यर्थः । अतो न पूर्वोक्तव्यवहारापत्तिदूषणावसरः । अत्रापादके पूर्वोक्तव्यवहारविषयतावच्छेदकवह्निविषयकत्वमेव तच्च रूप नेदानीमप्रसिद्धमित्यवधेयम् ।

ननु निरुक्तपर्यवसितसाध्यव्यापकताघटितमेव लक्षणमेतन्मतेऽपि विवक्षणीयम्, अतो नावच्छिन्नसाध्यव्यापकासङ्ग्रहः, न वा पक्षेतरातिव्याप्तिरित्यत आह । पर्यवसितेत्यादीति । एतन्मतं परिष्कुर्वतां मतमुपन्यस्यति । व्यवहाराविति । व्यवहारौपयिकम् । उपाधिव्यवहारौपयिकम् । लक्षणम् । इतरभेदानुमापकम् । तत्तत्साध्येति । अवच्छिन्नसाध्यव्यापकोपाधिसङ्ग्रहाय लाघवाय च व्यापकत्वमुपेक्ष्य सामानाधिकरण्यनिवेशः । साध्यविरुद्धवारणाय साध्यसामानाधिकरण्यावच्छेदकसाधनाव्यापकतावच्छेदकरूपवत्त्वविवक्षया धूमवान् वह्नेरित्यादौ ह्रदवृत्तित्वविशिष्टद्रव्यत्वादिकं वारणीयम् । साध्यसाधनयोर्विशिष्य निवेशस्याऽऽवश्यकतया तद्भेदादुपाधिभेद इष्ट एवेत्याह । साध्येति । सद्धेतौ सपक्षैकदेशवृत्तिधर्मेऽतिव्याप्तिं वारयति । वस्तुत इत्यादि । वस्तुतः । वस्तुगत्या । व्यभिचारिण इति । साध्यसाधनयोर्विशिष्य प्रवेशाद्यत्साध्यस्य यत्साधनं व्यभिचारि तदुभयघटितमेव लक्षणं कर्तव्यम्, तथा च यस्य यद्व्यापकं तदुभयघटितं नोपाधित्वमिति नातिप्रसङ्ग इत्यर्थः । गुरुत्व-

व्यभिचारादीति । तैजसरूपव्यक्तीनां पृथिवीत्वाभावव्याप्यत्वादित्यर्थः । तथा च तत्तद्व्यक्तित्वेनैव साध्यसाधनयोर्निवेशनीयतया तैजसरूपहेतुकगुरुत्वसाध्यकोपाधिलक्षणप्रविष्टतद्रूपाव्यापकत्वस्य पृथिवीत्वाभावे ऽसत्त्वान्नातिप्रसङ्ग इत्यर्थः । तद्रूपघटितलक्षणस्य तत्रातिव्याप्तिविरहेऽपि पार्थिवरूपात्मकहेतुघटितलक्षणातिव्याप्तिरेवेति शङ्कामुद्धरति । तदव्याप्येति । पृथिवीत्वाभावो यदव्यापकस्तद्रूपेत्यर्थः । गुरुत्वाव्यभिचारादिति । तथा च गुरुत्वतद्रूपोभयघटितलक्षणमेव नास्ति, क्वातिप्रसङ्ग इति भावः ।

ननु उक्तरूपज्ञानं व्यभिचारानुमानानुपयोगि, व्यापकत्वाघटितत्वात्; नापि साध्यव्यापकत्वघटितम्, अवच्छिन्नसाध्यव्यापकासङ्ग्रहात्, नापि साधनपक्षधर्मावच्छिन्नसाध्यव्यापकताघटितम्, अननुगमादित्यसदुक्तरीतिरेवाऽऽदरणीयेत्यत आह । दूषणतेति । दूषणता । व्यभिचारोन्नायकता । अननुगतमेव । शुद्धसाध्यतत्तद्धर्मावच्छिन्नसाध्यव्यापकताघटितमेव, तदननुगमस्यादोषत्वादिति भावः । स्वरूपगर्भम् । स्वरूपमात्रगर्भम् । मात्रपदेन साध्यतावच्छेदकगर्भताव्यवच्छेदः । धर्मगर्भमिति । तत्कुत इत्यपेक्षायामाह । तत्तदिति । गुणव्यक्तिषु । साध्यीभूतासु । घटत्वाद्युपाधिना, सोपाधेरपि द्रव्यत्वस्य निरुपाधित्वादिति । तथा च साध्यस्य रूपभेदानिवेशे रूपभेदेन पक्षसाध्यके सोपाधिनिरुपाधिभेदानुपपत्तिरिति भावः । साध्यस्य रूपभेदान्तर्भावफलमुक्त्वा साधनस्य रूपभेदान्तर्भावफलमाह । गुणत्वेनेति । रूपभेदान्तर्भावेन यादृशं लक्षणं तद्दर्शयति तथा चेति । रूपभेदपक्षे हेतुभूतधर्मिणोऽपि विशिष्टान्तर्भावे रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावस्योपाधितावारणं सम्भवतीति तदन्तर्भावं निराकरोति । न त्विति । अनुगमादिति । हेतुव्यक्तिभेदेनोपाधितभेदस्य निष्प्रयोजनकत्वादित्यर्थः । धूमादौ साध्ये वह्नित्वावच्छिन्नमहानसीयवह्न्यादिहेतावव्यार्द्रेन्धनादेरनुपाधित्वानुपपत्तिरिति भावः । तावता लक्षणे को दोष इत्यपेक्षायामाह । तथा चेति । पृथिवीत्वाभावादेरिति । रूपत्वावच्छिन्नतैजसरूपव्यक्त्यव्यापकताशून्यस्यापीति शेषः ।

ननु साध्यव्यभिचारिसाधनाव्यापकत्वनिवेशे नायं दोषो वारणीय इत्यत आह । व्यभिचारित्वेनेति । तथा चासम्भव एव प्रवेशे

इति भावः।

(चिं०) केचित्तु साधनाव्यापकोऽप्युपाधिः क्वचिद् यत्र पक्षावृत्तिर्हेतुः। यथा करका पृथिवी कठिनसंयोगादित्यत्रानुष्णाशीतस्पर्शवत्त्वम्। न च तत्र स्वरूपासिद्धिरेव दोषः, सर्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः।

(दी०) उपाधिलक्षणे साधनाव्यापकत्वं न विशेषणम्, दूषकतायामनुपयोगात्, अव्याप्तिकरत्वाच्चेति सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनामभिप्रायं प्रकाशयति केचित्त्विति।

(गा०) ननु साधनाव्यापकत्वघटितस्यैवोपाधिलक्षणस्योक्तत्वात् करका पृथिवी कठिनसंयोगादित्यत्र साधनाव्यापकस्य कथम् उपाधित्वस्वीकार इत्याशङ्कां निराकरोति। उपाधिलक्षण इति। दूषकतायाम्। सत्प्रतिपक्षोत्थापकतायाम्। व्यभिचारिणि साधने साध्यस्यापि निरुक्तोपाधिलक्षणाक्रान्ततयोपाधित्वे व्यभिचारसाधने तद्व्यभिचाररूपसाधनस्य साध्याविशेषादिदोषस्याकिञ्चित्करतया साध्य च नोपाधिरिति मूलासङ्गतिपरिजिहीर्षया पर प्रत्युक्तावय इति पूरयिष्यन् साध्यतावच्छेदकावच्छिन्नसाध्यस्योपाधितयाद्भावने वक्ष्यमाणसाध्याविशेषादिदूषणैर्वकाशात् तद्रूपावच्छिन्नोद्भावनखण्डनायोगात् साध्यविशेषण पूरयति। साध्यतावच्छेदकावच्छिन्नमिति। साध्याविशिष्टत्वादिति मूल धारयन् साध्याविशिष्टताया दूषकताबीजं पूरयति। पक्षे इति। पक्षे साधनरूपे। साधनस्य। साध्यात्मकोपाधिव्यभिचारस्य। अनुमानस्य। सिषाधयिषया सम्भवेऽपि वैयर्थ्यात्। हेतुनिश्चयेनैव व्याप्तिविज्ञानविघटनात्। अनिश्चये। पक्षे साधनस्येत्यनुषज्यते। तस्य। अनुमानस्य। यद्यप्युपाध्यन्तरव्यभिचारलिङ्गकव्यभिचारानुमापकपरामर्शस्यापि व्याप्तिज्ञानं प्रति व्याघातकधर्मदर्शनत्वेन विरोधितया सर्वत्रैव व्यभिचारानुमितिवैयर्थ्यम्, तथाप्युपाध्यन्तरोद्भावने तादृशपरामर्शसम्पादकतयैवोपयुज्यते, साध्यस्य च साध्याव्यापकताघटितोपाधितयोद्भावनम

नुपयुक्तम्, उपाधिव्यभिचारे साध्यव्यभिचारव्याप्तिनिश्चयस्यैवोपाधौ साध्यव्यापकतोपदर्शनफलत्वात्, साध्यव्यभिचारे तु साध्यव्यभिचारव्याप्तिग्रहस्यानुपयुक्तत्वात्, तद्ग्रहमन्तरेणापि हेतौ तद्ग्रहस्य स्वतो व्याप्तिज्ञानप्रतिबन्धकत्वादित्यत्र तात्पर्यम्। हेतौ साध्यग्राहकतर्कसद्भावे सन्दिग्धोपाधेर्नानुमानोच्छेदकत्वम्, अतः साध्यस्य सन्दिग्धोपाधितया उद्भावनं स्वयं निराकरोति। हेनानिति। कृत सन्दिग्धोपाधिनेति। तत्कर्तव्यस्य व्यभिचारसंशयान्तरस्यानपेक्षणात् साध्य उपाधित्वसंशयस्यैव साध्ये साधनाव्यापकत्वसंशयरूपत्वादिति भावः। कथमिति। साध्ये साध्यव्यापकत्वसंशयायोगेन साधने तद्व्यभिचारसंशयरूपेण तत्र साधनाव्यापकत्वसंशयेनैव सन्दिग्धोपाधित्वनिर्वाहादिति भावः।

(चि०) साध्यं च नोपाधिः, व्यभिचारसाधने साध्याविशिष्टत्वात्, अनुमितिमात्रोच्छेदप्रसङ्गाच्च। स चायं द्विविधः निश्चितः सन्दिग्धश्च। साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकतया निश्चितोपाधिः। यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्। यत्र च साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशयाधायकतया सन्दिग्धोपाधिः।

(गा०) मूले स चेति। उपाधित्वग्रहेणानुमानदूषकश्चेत्यर्थः, ईदृशसाधकसदनुमानेऽपि सन्दिग्धोपाधेरुदाहरणीयतया तस्य चानुपाधित्वेन एतद्ग्रन्थस्य वास्तवोपाधिविभाजकत्वायोगात्। निश्चित इति। उपाधित्वाश्रयविषय। सन्दिग्ध। तत्संशयविषयः। निश्चितोपाधिः। निश्चयविषयतयाऽनुमानदूषक। तथा दूषकत्वे हेतुः व्यभिचारनिश्चयाधायकतयेति। यत्र चेति। यत्र धर्मे इत्यर्थः। तत्र धर्मे। सन्दिग्धोपाधिरिति भावप्रधानम्। तथा च संशयविषयतया दूषकत्वमित्यर्थः। तथात्वे हेतुव्यभिचारसंशयाधायकतयेति। शाकपाकजत्वादावुपाधित्वसंशयस्य साधने सोपाधित्वसंशयपर्यवसिततया

तत्र साध्यव्यभिचारसंशयाधायकतयेत्यर्थः ।

(दी०) साध्यतावच्छेदकावच्छिन्नस्य साध्ये च नोपाधिः परं मत्युद्भाव्यः, साध्याविशिष्टत्वात् पक्षे सत्यनस्य निश्चयेऽनुमानस्य वैयर्थ्यात् अनिश्चये च तस्यायोगात् । सन्दिग्धोपाधित्वेनापि न तदुद्भावनमित्याह । अनुमिनीति । हेतौ साध्यव्यभिचारस्सन्दिग्धश्चेत्कुतं सन्दिग्धोपाधिना ? असन्दिग्धश्चेत्कथं तस्य सन्दिग्धोपाधित्वमिति तु तत्त्वम् । हेतुव्यभिचारेति । व्याप्यसंशयस्य व्यापकसंशयहेतुत्वादिति भाव । न च तत्र मानाभावः, कोटिस्मरणादित एव तदुपपत्तेः, क्वचित्तदनुविधानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरणे एवोपक्षीणत्वात् । तदग्रहे तु तत्संशयाद्व्यापकसंशयाभावादिति वाच्यम् । महानसे हुताशनो न जलहृदे इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वात् । अत एवोत्कटकोटिकाद्व्याप्यस्य संशयाद्व्यापकस्याप्युत्कटकोटिकः संशयः, कारणोत्कर्षेणैव कार्योत्कर्षात् । समानेत्यादिसूत्रं तूपलक्षणपरम्, तत्रस्थश्चकारो वाऽनुक्तसमुच्चयार्थ इति वदन्ति ।

(गा०) तत्संशयस्य व्यभिचारसंशयाधायकत्वमेव कथमित्यत आह दीधितौ । व्याप्यसंशयस्येति । तथा च व्याप्यसंशयविषया व्यभिचारव्याप्यसोपाधित्वसंशयस्य तत्संशयाधायकत्वमिति भावः । तत्र । व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे । तस्य तद्धेतुत्वे तद्दशायां तदुत्पाद- कुतः कारणादित्यपेक्षायामाह । कोटिस्मरणादित इति । अन्यथाऽनुपपत्तेः । तदुपपत्तेः । व्यापकसंशयोपपत्तेः । व्याप्यसंशयासत्त्वे क्वचिदनुत्पन्नस्य व्यापकसंशयस्य तदनन्तरमुत्पत्तेस्तद्धेतुत्वसिद्धिः स्यादित्यत आह । क्वचिदिति । तदनुविधानस्य । अन्वयव्यतिरेकानुविधानस्य । तत्स्मरणे एव । व्यापकतदभावरूपकोटिस्मरणे एव । उपक्षीणत्वात् । उपयोगितया चरितार्थ-

त्वात्। व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यग्रहस्थले व्याप्यसंशयस्य व्यापकतदभावास्मारकतया न कोटिद्वयोपस्थापकतया उपयोगित्वमित्यत आह । तदिति । तद्ग्रहे । साहचर्यग्रहे । तत्संशयात् । व्याप्यसंशयात् । व्यापकसंशयाभावात् । तादृशकारणाभावेनानुत्पादात् । प्रकारान्तरेण कोटिद्वयोपस्थितिस्थले इतरसकलकारणसत्वे व्याप्यसंशयान्वयव्यतिरेकाभ्यां व्यापकसंशयान्वयव्यतिरेकतस्तत्र तद्धेतुत्वं दुरपवादमेव, अन्यथा साधारणधर्मदर्शनादेः कोटिस्मरणादिनाऽन्यथासिद्धिः स्यादिति समाधत्ते । महानस इति । पर्वतादिकमपि पश्यतामित्यनेन धर्मिज्ञानसत्वं दर्शितम् । भावाभावाभ्यां भावाभावदर्शनादिति यथासङ्ख्यमन्वयः । तत्र एव । तस्य तद्धेतुत्वादेव । उत्कटकोटिकान् । व्याप्यांशे तदभावांशे वा उत्कटात् । उत्कटकोटिकः । व्याप्यांशे तदभावांशे वा उत्कटः । औत्कट्यं चाव्याप्यवृत्तिजातिविशेषो विषयताविशेषो वा । कारणोत्कर्षेणेति । कारणोत्कर्षस्यैव कार्योत्कर्षप्रयोजकत्वात्, तस्याकारणत्वे कोटिस्मरणादिरूपकारणस्याविशेषेण व्यापकसंशयौत्कट्यस्याकिंचित्करतापत्तेरित्यर्थः । व्याप्यसंशयस्य साधारणधर्मदर्शनादितुरीयस्य समानानेकधर्मोपपत्तेरित्यादिसूत्रविरोधः, संशयहेतुसाधारणधर्मदर्शनादिचयस्यैव परिगणनादित्यत आह । समानेत्यादीति ।

तत्सूत्रं तु समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति । अस्यार्थः समानमेको योऽनेकयोः तत्कोटितदभावकोटिमतोः धर्मः तत्तदभावसहचरितत्वेन तत्तदभावसहचरितवृत्तिधर्मवत्त्वेन वा गृहीतो गृह्यमाणो वा यो धर्म इति यावत्, तदुपपत्तेः धर्मिणि तद्वत्ताज्ञानात्, तादृशज्ञानस्य कोट्युपस्थितिद्वारा साक्षादेव वा हेतुत्वमिति हेत्वाभासे व्यक्तीभविष्यति । विप्रतिपत्तेः । एकधर्मिणि विरुद्धकोटिद्वयप्रतिपत्तिजनकं वाक्यद्वयं शब्दो नित्यो न वेत्यादिरूपम्, ततः तादृशवाक्ययोर्मिथो विरोधेन शाब्दयोधानुपधायकयोर्धर्मिणि कोटिद्वयोपस्थितिद्वारा मानससंशयजनकत्वम्, तादृशवाक्यज्ञानस्य तत्तद्धर्मिकतत्तत्कोटिसंशये तत्तद्धर्मिवाचकपदसाकाङ्क्षतत्तत्कोटिवाचकपदज्ञानत्वेन हेतुना, त-

द्रूपावच्छिन्नजन्यत्वेऽपि संशयस्य न शाब्दत्वापत्तिः, विरोधिकोटिगोचरशाब्दसामग्र्यभावादिघटितसामग्रीजन्यत्वात्, तज्जन्यत्वस्यैव शाब्दत्वप्रयोजकत्वात् । तत्तत्कोटिप्रत्यक्षे तुल्यबलायास्तद्विपरीतकोटिप्रत्यक्षसामग्र्या इव तच्छाब्दबोधे विपरीतकोटिशाब्दसामग्र्या अपि प्रतिबन्धकत्वे मानाभावात् तत्र संशयाकार एव शाब्दबोध इत्येकदेशिनः । उपलब्धिः । तत्कोटिनिश्चयः । अनुपलब्धिः । तत्कोट्युपलब्धिविरोधिनी तदभावोपलब्धिः । तदव्यवस्था । धर्मिणि तद्विषयत्वव्याप्यावृत्तधर्मवत्त्वधीः, ततश्च तत्कोटिमद्व्यावृत्तत्वविशिष्टवत्ताज्ञानस्य तत्कोटिविशिष्टबुद्धिविरोधितया कोटिद्वयविशिष्टधीरूपसंशयजनकत्वासम्भवात् तत्तत्कोटिमत्त्वमुपेक्ष्य स्वरूपसत्तत्कोटिनिश्चयविषयत्वं धर्मिणि विशेषणतयोपात्तम् ।

अत्र च तत्तत्कालसहकृतस्य तत्तत्कालीनतत्पुरुषीयतत्तत्कोटिनिश्चयाविषया ये ये तत्तद्धर्मिव्यावृत्तत्वज्ञानस्य संशयजनकत्वे तत्तद्धर्मिव्यावृत्तत्वज्ञानाभावविशिष्टतत्तद्धर्मिकतत्तत्कोटिनिश्चयस्य संशयप्रतिबन्धकत्वे वा गौरवमित्यालोच्य तत्तत्कोटिसहचरिताभावप्रतियोगित्वमेव ज्ञानागर्भमसाधारण्यं संशयप्रयोजकमिति दीधितिकृता वक्ष्यते । निरुक्तसाधारणधर्मदर्शनादित्रयस्य प्रत्येकमेव संशयोपधायकता, तृणारणिमणीनां वह्न्युपधायकतावत्, चाक्षुषत्वादिभिः सङ्करेणेह प्रकृते जनकतावच्छेदकजातिकल्पनासम्भवाद्व्यभिचारः प्रकारान्तरेण वारणीयः । साधारणधर्मदर्शनादीनां संशयहेतुत्वेऽपि तदसत्त्वे कोटिस्मरणादिघटिततुल्यबलकोटिभासकसामग्रीभ्यां विरोधग्रहसत्त्वेऽपि स्वस्वकार्यजनने बाधकाभावात् संशयो दुर्वारः, तादृश्योरपि प्रत्यक्षसामग्र्योः परस्परप्रतिरोधकत्वे साधारणधर्मदर्शनादिसत्त्वेऽपि संशयविलोपप्रसङ्ग इति संशयत्वस्य विषयताविशेषरूपतायामेव निर्वाहः, तथा सति तादृशविषयताभिन्नविषयताया एव विरोधिकोटिग्रहसामग्रीप्रतिबध्यतावच्छेदकत्वोपगमात् तादृशविषयताप्रयोजकसाधारणधर्मदर्शनादितः संशयनिर्वाहः, विरोधग्रहेण तद्ग्राहकसामग्र्या वा सहिताया एव विरोधिकोटिभासकसामग्र्याः प्रतिबन्धकत्वाच्च कोटिद्वयसमुच्चयानुपपत्तिरित्यादि बोध्यम् ।

१ साधारणधर्मदर्शनादिकमन्तरेणापि तुल्यबलसामग्रीभ्यां संश-

यो जन्यते, साधारणधर्मदर्शनादेः कोटिद्वयोपस्थापकतयैवोपयोग इति संशयत्वादेः कार्यतावच्छेदकत्वविद्वेषिणो नव्याः, तन्मते संशयत्वं न विषयताविशेषः, परन्तु एकधर्मिकभासमानविरोधिकोटिद्वयज्ञानत्वं तत्तत्सामग्रीसमाजप्रयोज्यमेवेति । विशेषापेक्ष इति विशेष्यते व्यावर्त्यते विशेषदर्शनविषयो ऽनेनेति विशेषो विशेषदर्शनम्, तदपेक्षस्तज्जन्यः, तादृशविशेषापेक्षत्वं संशयसामान्यस्यैव । विमर्शः । एकधर्मिणि विरुद्धकोटिद्वयज्ञानम् , तच्च संशयलक्षणमिति ।

साधारणधर्मदर्शन एव व्याप्यसंशयस्यान्तर्भावनीयतया तस्य स्वतन्त्रतायामस्वरसो वदन्तीत्यनेन सूचितः ।

(दी०) कोटिद्वयसहचरितधर्मवत्तया धर्मिज्ञानं हेतुः, धर्मस्यैकत्वं ज्ञानस्य च निश्चयत्वं नोपयुज्यते गौरवात्, अत एव च लिङ्गसन्देहो लिङ्गिकतदभावसहचरितौ लिङ्गतदभावौ धर्मिणः, तथा च साधारणधर्म एव तस्यान्तर्भाव इति तु नव्याः ।

(गा०) नव्यमतमाह । कोटिद्वयेति । तत्तत्कोटिसहचरितधर्मवद्धर्मिज्ञानत्वेन साधारणधर्मवत्ताज्ञानं संशयहेतुरित्यर्थः । अत्र तत्तत्कोटिसहचरितधर्मयोः पृथगन्तर्भावेन कारणताद्वयम्, न तु कोटिद्वयसाहचर्यावच्छिन्नत्वद्वयं धर्मस्यैकविषयतायां निवेश्यैककारणत्वं कल्प्यते, येनोभयसहचरितधर्मभेदादेकस्यापि धर्मस्य विषयतायां साहचर्यावच्छिन्नत्वद्वयासत्त्वेन कोटिद्वयसहचरितव्याप्याभावोभयावगाहिसंशयो न सङ्गृहीतः स्यादित्याह । धर्मस्यैकत्वमिति । निश्चयत्वेन हेतुत्वे संशयासङ्ग्रहात् तत्परित्यागमपि स्फुटयति । ज्ञानस्य च निश्चयत्वमिति ।

न च ज्ञानस्य निश्चयत्वाविवक्षणे कारणतावच्छेदकाभावप्रतियोगित्वप्रामाण्यग्रहे निश्चयत्वस्य निवेशनीयतया गौरवमिति वाच्यम् । भवतामप्रामाण्यानिश्चयाभावविशिष्टत्वेन व्याप्यसंशयस्य हेतुत्वान्तरकल्पनेन महागौरवात् ।

एतेन तत्तत्कोटिसहचरितधर्मवत्ताज्ञानस्य हेतुतायां तत्तद्धर्मविषयता अवश्यं विशिष्य निवेश्याः, साहचर्यावच्छिन्नविषयतात्वेन सकलधर्मविषयतानामनुगमे सकलधर्मघटितभ्रमत्वग्रहाणामभावकूटस्यैकत्र निवेशनीयतया एकधर्मघटितभ्रमत्वग्रहविषयधर्मा-

न्तरग्रहस्य संशयाजनकत्वापत्तेः, तथा च तत्कोटिसहचरिततद्धर्मवत्ताज्ञानस्य तदभावसहचरिततद्धर्मवत्ताज्ञानसहकारेणैव फलोपधायकत्वमुपेयते, न तु तादृशधर्मान्तरज्ञानसहकारेण गौरवादिति धर्मस्य एकत्वापेक्षेत्यादि परास्तम् । व्याप्यसंशयस्य पृथक्कारणत्वादिकल्पनापेक्षया लाघवेन तत्कोटिसहचरितैकधर्मवत्ताज्ञानेन फलजनने तदभावसहचरितधर्मान्तरवत्ताज्ञानस्यापि फलसकारणताकस्य सहकारित्वोपगमात् ।

यत्तु तत्तत्कोटिसहचरितधर्मवत्तानिश्चयजन्यसंशये तादृशधर्माणामपि धर्मितावच्छेदकतया भानमुपेयते, तथा च तत्र विशेष्यतावच्छेदकज्ञानविधयैव तादृशधर्मवत्तानिश्चयस्य हेतुत्वात् संशये न तस्य स्वतन्त्रहेतुत्वमिति व्याप्यसंशयस्य पृथक्कारणत्वमावश्यकमिति तदपि न । तत्कोटिसंशये तद्व्याप्यतद्व्याप्याभावोभयप्रकारज्ञानत्वरूपव्याप्यसंशयत्वेन हेतुत्वे व्याप्यतदभावप्रकारकत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहात्, सामानाधिकरण्यापेक्षया गुरुशरीरस्य व्याप्यत्वस्य निवेशे गौरवाच्च तत्तत्कोटिसहचरितधर्मवत्ताज्ञानत्वेन पृथक् पृथक् कारणत्वान्तरकल्पनाया एवोचितत्वात् । व्याप्यसंशयस्य कोटिद्वयसहचरितधर्मावगाहित्वं स्फुटयति । अवगाहते चेति । लिङ्गम् । व्याप्यम् । लैङ्गिकम् । व्यापकम् । लिङ्गतदभावयोर्लैङ्गिकतदभावसहचरितत्वस्य यथासङ्ख्यमन्वयः । व्याप्यसंशयदशायां व्याप्ये व्याप्तिघटकसहचरितत्वस्य ग्रहनियमेऽपि तदभावे व्यापकाभावसहचारग्रहो न नियत इति चेत्? एवमेव, परन्तु यदा व्यापकसंशयस्तदा तद्ग्रहोऽपि फलबलात् कल्प्यते, यत्र च तदग्रहस्तत्र व्यापकसंशयस्यैवापलाप इति भावः ।

(दी०) लिङ्गतदभावयोः प्रत्येकमेकैककोटिसाधारण्येऽपि मिलितयोरसाधारण्यम्, सत्प्रतिपक्षस्थले विरुद्धयोरिव हेत्वोरिति तु टीकाकारानुयायिनः ।

(गा०) सत्प्रतिपक्षस्थले विरुद्धहेतुद्वयज्ञानस्यासाधारणधर्मवत्ताज्ञानविधया साध्यसंशायकत्वम्, तदभावव्याप्यवत्ताग्रहप्रतिबन्धकतायां तद्व्याप्यवत्ताज्ञानस्योत्तेजकतया न हेतुरूपपरामर्शस्य संशयप्रतिबन्धकत्वमिति टीकाकारमतमनुसृत्य व्याप्यसंशयस्या-

प्यसाधारणधर्मज्ञानान्तर्भावं वदतां मतमाह । लिङ्गेति । कोटिसा-
धारण्येऽपि । कोटिसहचरितत्वेऽपि । मिलितयोरिति । उभयत्वाव-
च्छिन्नयोरित्यर्थः । असाधारण्यम् । तत्तद्भावव्यापकाभावप्रतियो-
गित्वम् । उभयत्वावच्छिन्नाभावस्य तत्तत्कोटिव्यापकत्वग्रहे च
व्यापकसंशयोऽपलपनीय एवेति भावः । हेत्वोरित्यत्र प्रत्येकमित्या-
दिकं सर्वमनुपपन्नम्।

अत्रेदमस्वरसबीजम्, शब्दत्वादेः शब्दत्वत्वादिना नित्यत्वादिम-
द्व्यावृत्तत्वस्य आकाशत्वादिना च धर्मिवृत्तित्वस्य ग्रहे संशयानुदयात्
येन रूपेणासाधारण्यग्रहस्तेनैव रूपेणासाधारणधर्मस्य धर्मिणि धीः
संशयहेतुरुपेया, धूमादिसंशयस्य च धूमधूमाभावाद्युभयत्वेन उभ-
याविषयकतया कथं संशायकता ? विरुद्धतया गृह्यमाणयोरेकवि-
शिष्टेऽपरप्रकारकमिवोभयत्वेनोभयप्रकारकमपि ज्ञानमनाहार्यमनुभ-
वविरुद्धमिति न संशयस्य तथात्वसम्भवः ।

यदि च तत्तद्रूपावच्छिन्नोभयत्वेनासाधारण्यग्रहसहिततत्त-
द्रूपावच्छिन्नोभयवत्ताज्ञानस्य हेतुतायां तत्तद्रूपावच्छिन्नप्रकार-
कत्वमेवावच्छेदकं न तूभयत्वसहिततत्तद्रूपावच्छिन्नप्रकारता-
कत्वं गौरवादित्युच्यते, तथापि उभयत्वेनासाधारण्यग्रहसहितस्य
भावाभावोभयवत्ताज्ञानस्यान्यत्र संशयहेतुतया क्लृप्ततयासामञ्ज-
स्यस्य व्याप्यसंशयत्वेन पृथक्कारणताखण्डनानुपपत्तिः, उभयत्वेन
तत्तद्भावव्यापकाभावप्रतियोगित्वज्ञानसाहित्यं निवेश्य भावाभावो-
भयप्रकारकज्ञानहेतुतापेक्षया धूमादौ वह्न्यादिव्याप्यत्वग्रहसहितधू-
मादितदभावप्रकारकज्ञानत्वरूपसंशयत्वेन हेतुतायामेव लाघवात्,
यदि चोभयत्वेनासाधारण्यग्रहसहितभावाभावोभयप्रकारकज्ञा-
नहेतुता तदुभयसमुच्चयस्थले फलतीत्युच्यते, तथाप्येतन्मते संशय-
मानीयकोटिद्वयमात्रस्यैव मिलितस्यासाधारणतया व्यभिचारिजल-
त्वादिसंशयाद्व्याप्यधूमादिसंशयस्याविशेषः ।

न च साधारणधर्मदर्शनान्तर्भावमतेऽपि जलत्वादेर्वह्न्यादावभा-
वस्य जलत्वाद्यभावस्य च वह्न्यादेः सहचरिततया तत्संशयविशेष
इति वाच्यम् । व्याप्यत्वस्य व्यापकसामानाधिकरण्यनियततया
व्याप्याभावत्वस्य च व्यापकाभावसामानाधिकरण्यनियततया तत्त-
त्कोटिसाधारण्यग्राहकत्वेन संशयोपयोगितया तन्मते व्याप्यसंशय-

स्य संशयान्तरो विशेषात्, असाधारण्यग्रहे च व्याप्त्यादिग्रहस्यानुपयोगात्, एवमेकसम्बन्धेन तत्तत्कोटिमद्व्यावृत्तस्य सम्बन्धान्तरेण धर्मिणि ग्रह संशयानुत्पत्त्या सम्बन्धैक्यमवश्यमपेक्षणीयम्, धूमतदभावयोश्च मिलितयोः संयोगेन विशेषणताविशेषण वा व्यावृत्तत्वग्रहेऽपि धूमादिसंशये तादृशेन केनापि सम्बन्धेन धर्मिण्युभयप्रकारकताविरहेण कथं संशायकता ?

यत्तु अन्यतरसम्बन्धेन भावाभावोभयस्य व्यावृत्ततया तेन सम्बन्धेन च संशयस्योभयप्रकारकतया संशायकत्वाभावात् । तदसत् । यद्रूपावच्छिन्नसम्बन्धेन उभयत्वावच्छिन्नस्यासाधारण्यग्रहः अन्यतरत्वरूपतद्रूपावच्छिन्नस्य संसर्गतया संशये भानात् । यद्रूपावच्छिन्नसम्बन्धघटितासाधारण्यग्रहस्तद्रूपाश्रयसम्बन्धेन धर्मिण्यसाधारणधर्मग्रहमात्रस्य संशायकत्वे शब्दत्व नित्यसम्बन्धेनोभयव्यावृत्तमिति ग्रहदशायां समवायस्यानित्यत्वभ्रमेऽपि अखण्डोपाधिरुपसमवायत्वावच्छिन्नसम्बन्धेन शब्दत्वज्ञानस्य नित्यत्वादिसंशायकतापातादित्याद्युद्भनीयम् ।

(दी०) इत्थं च साधनाव्यापकत्वसंशये साध्यव्यापकव्यभिचारसंशयात्साध्यव्यभिचारसन्देहो हेतौ स्फुट एव । साध्यव्यापकत्वसन्देहे तु साधनाव्यापकव्याप्यत्वसंशयात्साध्ये साधनाव्यापकत्वसन्देहो बोध्यः । उपाधेस्साध्यव्यापकत्वसन्देहेनाऽऽहितात्साधने साध्यव्यापकव्यभिचारसन्देहात् साध्यव्यभिचारसन्देह इत्यमेव च दलद्वये संशयस्थले व्यभिचारसंशयस्योक्तिसम्भव इत्यपि वदन्ति ।

(गा०) उपाधित्वघटकसाधनाव्यापकत्वादिसंशयस्य साध्यव्यभिचारव्याप्यसंशयपर्यवसानं दर्शयति । इत्थ चेति । साधनाव्यापकत्वसंशय इति । साध्यव्यापकतावच्छेदकतया निश्चिते शाकपाकजत्वस्वादौ साधनाव्यापकतावच्छेदकत्वसंशये सतीत्यर्थः । साध्यव्यापकव्यभिचारसंशयात् । स्वस्मिन् । तद्व्यापकत्वस्य तस्मिन् स्वाभाववद्वृत्तित्वेन तुल्यवित्तिवेद्यतया साधने साध्यव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशयपर्यवसानात् । स्फुट एवे-

ति । व्यापकव्यभिचारस्य व्याप्यव्यभिचारव्याप्यत्वादिति भावः । साध्यव्यापकत्वसन्देहे इतीति । साधनाव्यापकतावच्छेदकत्वनिश्चयविषयधर्मे साध्यव्यापकतावच्छेदकत्वसंशये इत्यर्थः । साधनाव्यापकव्याप्यत्वसंशयादिति । व्यापकत्वव्याप्यत्वयोस्तुल्यवित्तिवेद्यतया साध्यतावच्छेदके साधनाव्यापकतावच्छेदकावच्छिन्नव्याप्यतावच्छेदकत्वरूपसाधनाव्यापकतावच्छेदकत्वव्याप्यधर्मसंशयादित्यर्थः । साध्ये । साध्यतावच्छेदके । साधनाव्यापकत्वसन्देहः । साधनाव्यापकतावच्छेदकत्वरूपव्यभिचारसंशयः । अत्र साधने उपाधिव्यभिचारस्य निश्चितत्वेन संशयायोगात् तत्र तत्संशयाधीनसाध्याभाववद्वृत्तित्वसंशयानवकाश इत्याशयः । तथापि हेतुधर्मिकसाध्याभाववद्वृत्तित्वरूपव्यभिचारसंशयमुपपादयतामत आह । उपाधेरिति । उपाधेः । उपाधितावच्छेदकस्य । साध्यव्यापकत्वसन्देहेन । विशेषणीभवत्साध्यव्यापकत्वसंशयेन । आहितात् । साधने साध्यव्यापकतावच्छेदकत्वविशेषितोपाधितावच्छेदकत्वावच्छिन्नाभाववद्वृत्तित्वसंशयादित्यर्थः । अत्र च संशये साध्यव्यापकतावच्छेदकत्वस्य उपलक्षणतयैवाभावप्रतियोगितावच्छेदकतया भासमानोपाधितावच्छेदके भानम्, उपाधितावच्छेदकतया भानासम्भवात्, तादृशभाने तन्निश्चयस्यापेक्षितत्वात् ।

न च व्यापकतावच्छेदकत्वमात्रेणैवोपाधितावच्छेदकभानं न तु तद्गतासाधारणरूपेणापीति तादृशसंशयस्य व्यापकतावच्छेदकत्वांशे निर्धर्मितावच्छेदकतयाऽवच्छेदकतया भानेऽपि न तन्निश्चयोऽपेक्षित इति वाच्यम् । व्यापकतावच्छेदकप्रमेयत्वादिविशिष्टस्य केवलान्वयितया व्यापकतावच्छेदकत्वविशिष्टावच्छिन्नाभावस्याप्रसिद्ध्या संशयेनास्पर्शात् ।

न च व्यापकतावच्छेदकत्वोपलक्षिततद्धर्मावच्छिन्नाभाववद्वृत्तित्वसंशयोऽपि दुर्घटः, तद्धर्मावच्छिन्नाभाववद्वृत्तित्वनिश्चयस्य तद्विरोधित्वादिति वाच्यम् । उपलक्षणीभूतव्यापकतावच्छेदकत्वमात्रपुरस्कारेणोपाधितावच्छेदकभानोपगमात् तत्तद्धर्मावच्छिन्नाभाववद्वृत्तित्वनिश्चयस्य च विशेषतत्तद्धर्मावगाहितत्तद्धर्मावच्छिन्नाभाववद्वृत्तित्वसंशयं प्रत्येव विरोधितया व्यापकतावच्छेदकत्वमात्रेण तदवगाहिसंशयस्याप्रत्यूहत्वात् ।

न च विशेषणसन्देहाद्विशिष्टसंशयो भवन् विशेषणसंशयधर्मितावच्छेदकमवश्यमुल्लिखतीति नियमः प्रामाणिकः, दण्डी पुरुष इति निश्चयादशायां पुरुषस्य दण्डो रक्तो न वेति संशयात् रक्तदण्डवान् पुरुष इत्यादिनिश्चयासत्त्वे रक्तवान् न वा पुरुष इत्यादिसंशयस्योपगमात् ।

न चाभावप्रतियोगितावच्छेदकतया तदवच्छेदकतया वा भासमाने नोपलक्षणस्य प्रकारतया भानम्, नीला घटो नास्तीत्याद्याकारकस्य घटादिसामान्याभावग्रहस्य नीलदण्डवान्नास्तीत्याकारकस्य दण्ड्यादिसामान्याभावादिग्रहस्य वाऽननुभविकत्वादिति कथं व्यापकतावच्छेदकत्वमुपलक्षणतया साध्यतावच्छेदकेऽवगाहमानो व्यापकव्यभिचारसंशय इति वाच्यम् । प्रतियोगितायां यत्र प्रतियोगिसंसर्गतया भानं तत्रैव तथा नियमात् । अत्रोपाध्यभावे उपाधितावच्छेदकावच्छिन्नप्रतियोगितायास्तादृशरूपावच्छिन्नाभाववद्वृत्तित्वाभावे तादृशाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च प्रकारतयैव भानोपगमात् । इत्थमेव चेति । विशेषरूपावच्छिन्ने यत्र धर्मिणि यद्रूपं सन्दिग्धं विशेषरूपावच्छिन्नतद्रूपावच्छिन्नतद्धर्मिघटितकोटितावच्छेदकावच्छिन्नविषयकसंशयोपगमेनैवेत्यर्थः ।

दलद्वयेति । साध्यव्यापकत्वसाधनाव्यापकत्वोभयेत्यर्थः । उक्तिसम्भव इति । अन्यथा साधनाव्यापकत्वनिश्चयस्थले साध्यव्यापकत्वसन्देहे साध्ये साधनाव्यापकव्याप्यत्वसंशयात् साधनाव्यापकत्वसन्देहसम्भवेऽपि यत्र साधनाव्यापकत्वमप्युपाधौ सन्दिग्धं तत्र साध्यव्यापकत्वस्य सन्दिग्धतया साधने साध्यव्यापकोपाधिव्यभिचारस्येव साध्ये सन्दिग्धसाधनाव्यापकत्वविशेषितोपाधिव्याप्यत्वस्यापि संशयासम्भवेन व्यभिचारसंशयाधाननिर्वाहादिति भावः । साधनाव्यापकत्वनिश्चयस्थले उक्तरीत्या साध्ये साधनाव्यापकत्वसंशयस्यानुमित्यौपयिकव्यापकतानिश्चयत्वविरोधिनः सुघटतया हेतौ साध्याभाववद्वृत्तित्वसम्पादनाय प्रयासो विफल इत्यस्वरसो वदन्ति इत्यनेन सूचितः ।

(चि०) यथा मित्रातनयत्वेन श्यामत्वे साध्ये

शाकाद्याहारपरिणतिजत्वम् । न च तेनैव हेतुना शाकपाकजत्वमपि साध्यम्, तत्र श्यामत्वस्योपाधित्वादुभयथापि साधने ऽर्थान्तरम् । श्यामत्वमात्रे विवादो न तूभयत्र । न चैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात् । तत्र वह्निरिव तत्सामग्र्यामपि समं धूमस्यानौपाधिकत्वनिश्चयात्, अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्र्या स्यात्तद्रूपमित्यत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात् । अत एव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः, यत्र तु तन्नास्ति तत्र साऽप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्र इत्युक्तम् । यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः, यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे ।

(दी०) उभयेति । एकांशेऽपरस्यैकविशिष्टापरसाध्यतायान्तु एकैकस्योपाधित्वमिति तु तत्त्वम् । ईश्वरेति । वस्तुतः सद्धेतावपि तत्त्वाग्रहदशायामुपाधिसन्देहेन व्यभिचारसन्देह इति भावः ।

(गा०) परार्थस्थले सन्दिग्धोपाधितया उद्भावितस्य शाकपाकजत्वस्य साधनाव्यापकत्वसंशयनिरासाय श्यामत्वसंशयविषयमित्रातनये शाकपाकजत्वसाधने श्यामत्वस्योपाधित्वं मणिकारेणोक्तम्, युगपदुभयसाधने साध्यतया न कस्याप्युपाधित्वसम्भव इत्यभिमानेन युगपदुभयसाधनमाशङ्क्य चार्थान्तरेण तद् दूषितम् । तत्र च श्यामत्व इव शाकपाकजत्वेऽपि विवादसम्भवान्नार्थान्तरमित्यालोच्य एकदा उभयानुमानमुपाधिनैव स्वयं दूषयति ।

एकांशेऽपरस्येति। उपाधित्वमित्यग्रिमेणान्वयः। साध्यं च सोपाधिरिति प्रवादस्य तद्रूपावच्छिन्नसाधने तद्रूपावच्छिन्नस्य नोपाधितयोद्भावनमित्यर्थकत्वादिति भावः।

नन्वस्तु विभिन्नरूपेणोभयसाधने एकांशे ऽपरस्योपाधित्वम्, उभयत्वेनैकविशिष्टापरत्वेन वोभयं साधनीयमित्यत आह। एकविशिष्टापरेति। उभयत्वावच्छिन्नस्याप्युपलक्षणमेतत्। एकैकस्येति। प्रत्येकरूपावच्छिन्नस्य उभयस्यैवेत्यर्थः। साध्यस्य भिन्नरूपेणोपाधितायामविवादादिति भावः।

मूले न चैवमिति। एवम्। साध्योत्पादप्रयोजकशाकपाकजत्वस्य साधनाव्यापकत्वसंशयेन सन्दिग्धोपाधित्वे। वह्निसामग्री। वह्न्युत्पादप्रयोजिका सामग्री। उपाधिः। सन्दिग्धोपाधिः। स्यात्। अनौपाधिकत्वनिश्चयात्। व्याप्तिग्राहकतर्कसम्भवेन तन्निश्चयात्। तथा च साधनाव्यापकत्वसंशयायोगेन न तत्सामग्र्याः सन्दिग्धोपाधित्वमपीति भावः। श्यामसामग्र्या। शाकपाकजत्वेन। व्याप्य स्यात्त्वम्। व्यापनीयम्। इत्यत्र। इति निश्चयविषयतयाऽभिमतयोर्मित्रातनयत्वशाकपाकजत्वयोः। कार्यकारणभावादीनामभावात्। अभावेन तादृशनिश्चयासम्भवात्। अत्र हेतुगर्भविशेषणं व्याप्तिग्राहकाणामिति। साध्यव्यापकतासंशयेन सन्दिग्धोपाधिमुदाहरति। यथा तुल्ययोगक्षेमयोरिति। सतोरिति शेषः। योगक्षेमयोस्तुल्यत्वे सतीत्यर्थः। साध्ये साधनस्य उपाधौ च साध्यस्य व्यापकताग्राहकसामग्रीसाम्य इति यावत्।

नन्वीश्वरसाधकसदनुमाने कथं शरीरजन्यत्वादेरुपाधित्वमुक्तमित्यत आह। दीधितौ वस्तुत इति। वस्तुगत्येत्यर्थः। तत्त्वाग्रहदशायाम्। अनुकूलतर्कानवतारेण सद्धेतुत्वाग्रहदशायाम्। उपाधिसन्देहेन शरीरजन्यत्वादावुपाधित्वसंशयेन। व्यभिचारसन्देह इति। अतोऽनुपाधेरपि तस्य उपाधित्वसंशयविषयतया दूषकत्वमिति शेषः।

उभयसंशयस्थलमुदाहरति मूले। यथा चेति। सन्दिग्धानैकान्तिकवदिति दूषकत्वमात्रांशे दृष्टान्तः। तथा च व्यभिचारसन्देहस्येव उपाधिसन्देहस्याप्युद्भावनं युज्यत एवेति भावः।

(चि०) यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति । तन्न, सन्दिग्धानैकान्तिकवद्व्यभिचारसंशयाधायकत्वेन दूषकत्वात् ।

(दी०) सन्दिग्धेति । न चानैकान्तिकत्वसन्देहः प्रतिबन्धको न तु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यम् । अनैकान्तिकत्वसंशयान्मम व्याप्तिग्रहो मा भूदित्यभिप्रायेण प्राचां हेतुदोषत्वेनासाधकतासाधकतया जिज्ञासादिद्वारा परम्परया सन्देहोपयोगित्वेन च तदुद्भावनस्य साम्प्रदायिकत्वात् । उपाधित्वस्य संशये निश्चये च जायमानं यज्ज्ञानमनुमितिं विरुणद्धि तदेवास्य दूषकताबीजमित्यभिप्रायेणाह । सन्दिग्धेति । तद्व्यतिरेकस्य क्वचिद्व्यापकत्वेन क्वचिच्च पक्षधर्मत्वेन सन्दिग्धत्वाद् बाधोन्नीतेति ।

(गा०) व्यभिचारसंशयोद्भावनमेव न घटत इत्याशङ्कते दीधितौ । न चेति । न तु तज्ज्ञानमिति । न व्यभिचारसंशयस्य विषयो हेतुरिति सशयज्ञानं प्रतिबन्धकमित्यर्थः । तदर्थम् । सन्देहज्ञानफलकम् । अफलम् । अनुपयुक्तफलम् । तथा च सन्दिग्धोपाधेर्व्यभिचारसंशयाधायकतया दूषकत्वेऽपि तत्सन्देहोद्भावनं सुतरामफलमिति भावः । मा भूत् । न भवति । इत्यभिप्रायेण । एतदर्थबोधनेच्छया । तथाच व्याप्तिरनुमता नवेति प्रतिवादिनं प्रति मध्यस्थानुयोग उक्ताभिप्रायेण व्यभिचारसंशयोद्भावनसङ्गतावपि, तादृशानुयोगं विना तदुद्भावनमसङ्गतम्, अतस्तदपि प्रकारान्तरेण सङ्गमयति । प्राचामिति । दोषेणैवासाधकत्वसाधनं साम्प्रदायिकमते उक्तं प्राचां हेतुदोषत्वेनेति । ज्ञायमान सद्यदनुमितिविरोधीति तस्यैव स्वमते हेतुदोषतया व्यभिचारसन्देहस्य च स्वरूपसत एव तथात्वेन न तथात्वसम्भव इत्यत उक्तं प्राचामिति । एतदनुशयेनैव प्रकारान्तरमाह । जिज्ञासादिद्वारेति । प्रतिवादिना स्वसंशयो·

द्भावने संशयप्रयोजकजिज्ञासोदयेन तत्प्रयोजकरूपप्रतिसन्धाने सति सामग्रीवशान्मध्यस्थस्यापि संशयो भवतीति संशयोद्भावनस्य संशयोपयोगित्वेन तस्य सम्प्रदायसिद्धत्वादित्यर्थः । परम्परया यदुद्भावनं संशयोपयोगि तस्याप्युद्भावने ऽन्येषामपि तथाविधाना- मुद्भावनप्रसङ्ग इत्याशङ्कावारणाय साम्प्रदायिकत्वादित्युक्तम् । तथा चान्येषां तथाविधानामुद्भावनमसाम्प्रदायिकत्वान्न क्रियत इति भावः।

(चिं०) उपाधेरिव व्यभिचारनिश्चयाधायकतया इदानीमुपाधेर्दूषकताबीजं निरूप्यते । नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वम्, तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् । न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुद्भावनम्, शतमप्यन्धानां न पश्यतीति न्यायात्, एकेनापि बहूनां प्रतिबन्धाच्च । व्याप्तिपक्षधर्मते हि बलम्, तच्च तुल्यमेव, न तु भूयस्त्वमपि, एकस्मादप्यनुमितिदर्शनात् । सन्दिग्धोपाधेरदूषकतापत्तेश्च, तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात् । अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात्, व्यतिरेकेऽसाधारण्यात् ।

(गा०) मूले प्रतिपक्षबाहुल्येनाधिकबलार्थमिति । प्रतिपक्षः । प्रतिसाध्यसिद्धेर्विरोधी प्रकृतसाध्यसाधको हेतुः, तस्य बाहुल्यमनेकता, तदभिन्नं यदधिकबलं तदर्थमित्यर्थः । उद्भावनमित्यत्र न चेत्यस्य सम्बन्धः । अत्र हेतुः व्याप्तिपक्षधर्मते हीत्यादि । हि । यस्मात् । व्याप्तिपक्षधर्मते । तयोर्ज्ञानम् । बलम् । शतमपीति । व्याप्तिपक्षधर्मताज्ञानासत्त्व इत्यादिः । कार्यप्रयोजकस्य कस्यचिद्विरहे एकजातीयानेककारणान्तरसत्त्वेऽपि फलानुत्पत्तिरिति न्यायेन भूयोभिरपि प्रतिहेतुभिरनुमितिप्रतिबन्धरूपफलानिर्वाहादित्यर्थः । एकेनापीति । व्याप्तिपक्षधर्मताभ्यां ज्ञायमानेनेत्यादि । प्रतिबन्धात् । कार्यस्य । व्याप्तिपक्षधर्मताभ्यां एकमात्रहेतुज्ञानस्यापरानुमितिबन्धकताप्रयो-

अतः विरोध्यनुमितिसामग्रीत्वं दर्शयति । एकस्मादपीति ।

ननु सन्दिग्धोपाधेरदूषकतापत्तेरिति मूलमसङ्गतम्, तस्य सत्प्रतिपक्षोत्थापकत्वासम्भवेऽपि व्यभिचारसंशयाधायकत्वेन दूषकत्वसम्भवादित्याशङ्क्याह दीधितौ । उपाधित्वस्येति । उपाधित्वस्य संशयो निश्चयश्चानुमितिविरोधिविषयकज्ञानजनकस्तद्विषयकज्ञानजनकत्वमेवास्य सन्दिग्धोपाधेर्दूषकताबीजमिति नियमाभिप्रायेणेत्यर्थः । तथा च सत्प्रतिपक्षोत्थापकत्वेन निश्चितोपाधेर्दूषकत्वमते उपाधित्वनिश्चयस्य नानुमितिविरोधिव्यभिचारज्ञानजनकत्वमिति न तत्संशायकतया सन्दिग्धोपाधेर्दूषकतासम्भवः । अस्येत्यत्रेदंशब्दस्य नोपाधिसामान्यपरत्वम्, तथा सत्युपाधित्वसंशयस्य साध्यव्यापकाभावज्ञानजनकतया दूषकत्वान्निश्चितोपाधेरपि तद्द्वारा दूषकत्वानुपपत्त्या उपाधिमात्रस्यैवादूषकतापत्त्या सन्दिग्धेत्यभिधानासङ्गतेः । सन्दिग्धोपाधेः सत्प्रतिपक्षानुत्थापकत्वे तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वादिति मूलोक्तहेतुर्न साधकः, साधनाव्यापकत्वेन निश्चितस्य साध्यव्यापकत्वेन च सन्दिग्धस्योपाधेर्व्यतिरेकस्य पक्षे सन्दिग्धत्वादिति पूरयन् व्याचष्टे तद्व्यतिरेकस्येति । क्वचिदिति । साध्यव्यापकतासंशयस्थल इत्यर्थः । क्वचिच्चेति । साधनाव्यापकत्वसंशयस्थले चेत्यर्थः ।

(चिं०) पक्षवृत्तिश्चोपाधिर्न स्यात्, यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वम्, अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वम्, तद्व्यतिरेकस्य पक्षावृत्तित्वात्, न च नायमुपाधिः, तल्लक्षणसत्त्वात्, अन्यथाऽपि दूषकत्वसम्भवाच्च, किञ्च साध्यव्यापकव्याप्यत्वेनोपाधेस्साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः ? न ह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः । नापि व्याप्तिविरहरूपतया, असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात् । नाप्यनौपाधिकत्वज्ञानस्य, व्याप्तिधीहेतुत्वस्य तत्त्वेन

व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावन्त-र्भावः । न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्तिज्ञानं प्रति प्रतिबन्धकमि-त्युक्तम् ।

(दी०) ननु बाधे ऽवतीर्णे तत एव हेतोरसाधकत्वात्कृतमुपाधिना, न वाऽसाधारण्यम्, पक्षस्यैव सपक्षत्वात्, अवतीर्णे तु नोपाधित्वम्, पक्षेतरान्तरवत्साध्यव्यापकताया एवाग्रहात् अनुकूलतर्कादिना कथञ्चित्तद्ग्रहे च नासाधारण्यम् व्यतिरेकितयाऽन्वयव्याप्त्यग्रहस्य सत्प्रतिपक्षतया च सत्प्रतिपक्षान्तरस्याकिञ्चित्करत्वात्, इत्यरुचेराह । पक्षवृत्तिश्चेति । पक्षे तद्ग्रहदशायां तदभावग्रहासम्भवादिति भावः । व्याप्तिविरहरूपतां निरस्य व्याप्तिज्ञानाभावद्वारकतां निरस्यति । नापीति । अनौपाधिकत्वज्ञानस्य । औपाधिकत्वज्ञानाभावस्य । कारणविघटकतया । कारणाभावरूपतादृशज्ञानविषयतया । अनौपाधिकत्वज्ञानस्य कारणत्वं नान्वयव्यतिरेकासिद्धम्, परन्तु सोपाधित्वज्ञानस्य प्रतिबन्धकताया विना कारणीभूतज्ञानविघटनमसम्भवित्वेन कल्पनीयम्, सैव त्वसिद्धेति दूषणतात्पर्याद्यथाश्रुतमेव साधीय इत्यपि वदन्ति । व्याप्यत्वासिद्धेर्व्याप्यत्वज्ञाने । अन्तर्भावः तद्द्वारा दूषकत्वम् ।

(गा०) बाधोन्नीतेत्यादि दूषणमुद्धृत्य दूषणान्तरमवतारयति नन्वित्यादिना । बाधे वह्न्यादावनुष्णत्वादौ । निश्चित इत्यर्थः । तत एव । बाधावतारादेव । हेतोः । कृतकत्वादेः । असाधकत्वात् । अनुष्णत्वादेरसाधकत्वात् । कृतमुपाधिनेति । तथा च तदा पक्षेतरस्यादूषकत्वेऽपि क्षतिविरहादिति भावः । सपक्षत्वात् । साध्याभावरूपसाध्यवत्त्वेन निश्चितत्वात् । हेतोश्च तदव्यावृत्तत्वादिति शेषः । अनवतीर्णे त्विति । बाध इत्यनुपज्यते । नोपाधित्वम् । नैव दूषकत्वम् ।

पक्षेतरान्तरत्वादिति । पर्वतो वह्निमानित्यादिस्थलीयपक्षेतरत्य इवे-त्यर्थः । साध्यव्यापकताया एवाग्रहादिति । पक्षे साध्यसन्देहस्य व्यभिचारसंशयतया साध्यव्यापकतानिश्चयप्रतिबन्धकत्वादिति भावः । व्यापकताग्राहकानुकूलतर्कसत्त्वे व्यभिचारसंशयो ऽकिञ्चित्कर इत्यत आह । अनुकूलेति । आदिपदात् स्वतःसिद्धव्यभिचाराग्रहपरिग्रहः । नासाधारण्यम् । तदभावस्य दोष इति शेषः । व्यतिरेकितया । साध्याभावगमकतौपयिकसाध्यव्यापकतानिश्चयविषयप्रतियोगिरूपव्यतिरेकप्रतियोगितया । अन्वयव्याप्तग्रहस्य । असाधारण्यप्रयुक्तस्य । अकिञ्चित्करत्वादित्यग्रिमेणान्वयः । सत्प्रतिपक्षतया । प्रतिरोधमात्रफलकतया । सत्प्रतिपक्षान्तरस्य । असाधारणतया विरोधिसाध्यसिद्ध्यौपयिकव्यापकतान्तरग्रहविषयप्रतियोगित्वकस्य । पक्षवृत्तिश्चेति मूले पक्षवृत्तितया गृह्यमाणपरमित्याशयेन तस्य दूषकत्वानुपपत्तिबीजमाह । पक्ष इति ।

मूले तल्लक्षणसत्त्वादिति । साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपलक्षणसत्त्वादित्यर्थः । साधनाव्यापकत्वस्थले पक्षावृत्तित्वप्रवेशे उक्तधर्मेषु लक्षणासत्त्वानिर्वाहमालोक्य अन्यथाऽपीति । व्यभिचाराद्युन्नायकतया ऽपीत्यर्थः । दूषकत्वसम्भवादिति । तथा च नोपाधित्वानभ्युपगमसम्भव इति भावः । साध्याव्यापकत्वे । साध्याव्यापकत्वग्रहे । अव्यापकेति । अव्यापकत्वेन गृहीतेत्यर्थः । अव्याप्येति । अव्याप्यतया गृहीतेत्यर्थः ।

नापि व्याप्तिविरहरूपतयेत्यादिना व्याप्यत्वासिद्धन्तर्भावशङ्काया निराकृतत्वात् । नाप्यनौपाधिकत्वेत्यादिना पुनस्तदन्तर्भावशङ्कानिराकरणस्यासङ्गतिरित्याशङ्कां निराकरोति दीधितौ । व्याप्तिविरहेति । अत्रानौपाधिकत्वज्ञानरूपव्याप्तिज्ञानकारणविघटकतयोपाधित्वज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्व यथाश्रुतार्थः, तदर्थपरत्वे भिन्नधर्मकतया उपाधित्वप्रकारकज्ञानस्य स्वतो व्याप्तिज्ञानप्रतिबन्धकताखण्डनमनाशङ्कितनिराकरणमित्याशङ्क्य तद्ग्रन्थं व्याप्तेरनौपाधिकत्वरूपताविरहेऽपि व्याप्तिग्रहे स्वत उपाधिज्ञानं प्रतिबन्धकमित्यर्थकतया व्याचष्टे । अनौपाधिकत्वेति । औपाधिकत्वज्ञानं साध्यव्यापकत्वसाधनाव्यापकत्वाभ्यां कस्यचिद्धर्मिणो ज्ञानम्, न तु साधनधर्मिकं स्वाव्यापकसाध्यव्यापकत्वज्ञानम्, असमानधर्मिकतया

प्रतिबन्धकतारखण्डनपराग्रिममूलग्रन्थासङ्गतेः । अभावरूपकारणप्रतिबन्धकासम्भवाद्विघटकपदस्य प्रतिबन्धप्रयोजकार्थकता न सम्भवतीत्यन्यथा व्याचष्टे । कारणेति । तादृशज्ञानेति । औपाधिकत्वज्ञानेत्यर्थः । असिद्ध्यन्तर्भावनायोपाधिनिष्ठतासम्पत्तये ज्ञानविषयतापर्यन्तनिवेशनम् । यथाश्रुतेऽप्यग्रिमदूषणग्रन्थ सङ्गमयतां मतमाह । अनौपाधिकत्वज्ञानस्येति । विनाकारणीभूतज्ञानविघटनं सोपाधित्वज्ञानस्य प्रतिबन्धकताया असम्भवित्वेनेति योजना । सोपाधित्वज्ञानस्येति । भिन्नधर्मितासम्पत्तये पूर्ववद्व्याख्येयम् । असम्भवित्वेनि । जनकज्ञानं विघटयत एवेत्यादिनियमादिति भावः । सेव । तस्य प्रतिबन्धकतैव । असिद्धा । भिन्नधर्मिकत्वात् । सोपाधित्वज्ञानप्रतिबन्धकताया अनौपाधिकत्वज्ञानहेतुत्वसाधकतया शङ्कितुरभिप्रेतत्वे उपाधिज्ञानस्य साक्षात्प्रतिबन्धकस्य कारणाविघटकत्वकथनासङ्गतिरिति तत्प्रतिबन्धकतायाः शङ्कितुरनभिप्रेततया तन्निराकरणानौचित्यमत्रास्वरसबीजम् । व्याप्त्यभावात्मकत्वे व्याप्यत्वासिद्धहेत्वाभासेऽन्तर्भावासम्भवात् व्याप्यत्वासिद्ध इत्यादिकं कथितव्याप्तिज्ञानाभावद्वारकत्वार्थकतया व्याचष्टे । व्याप्यत्वासिद्ध इति ।

(चि०) न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यम् । न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणम्, येन तत्प्रतिबन्धकं स्यात्, किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा । नापि व्यभिचारोन्नायकत्वेन, यथा हि साध्यव्यापकव्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयम्, व्याप्तिग्राहकसाम्यात् । नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधे-

रेव साध्याव्यापकत्वसाधनात् । तस्मादुपाधिर्हेत्वाभासान्तरमिति ।

(दी०) भिन्नधर्मिकत्वं परिहरन्नाह। न चेति । न हीति। विरोधिविषयकत्वाभावेन साक्षात्प्रतिबन्धकत्वासम्भवादिति भावः। साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमित्युभयत्रैव बहुव्रीहिः । तस्मादित्यादेरदूषणं चेति शेषः ।

(गा०) भिन्नधर्मिकत्वपरिहारेण न चेत्यादिना उपाधिज्ञानदशायां व्याप्तिज्ञानोत्पत्त्यसम्भवकथनेन तस्य प्रतिबन्धकत्वव्यवस्थापन न सङ्गच्छते, तद्दशायामन्यत्र व्याप्तिज्ञानानुत्पादस्य परासिद्धत्वादिति भिन्नधर्मिकत्वपरिहारेण सोपाधित्वग्रहस्य व्याप्तिग्रहानुत्पादप्रयोजकत्वप्रदर्शनपरतां तद्ग्रन्थस्याह । भिन्नेति । बाधादिबुद्धेर्विशिष्टबुद्धाविव जनकज्ञानाविरोधित्वेऽपि सोपाधित्वज्ञानस्य समानधर्मिकव्याप्तिज्ञाने प्रतिबन्धकत्वं सम्भवतीति कथं न हीत्यादिना जनकज्ञानाविरोधित्वेन तत्प्रतिबन्धकताखण्डनमित्याशङ्कानिराकरणाय प्रकृते बाधादिबुद्धिवैधर्म्यं दर्शयति । विरोधीति । ग्राह्याभावादीत्यर्थः । असम्भवादिति । ग्राह्याभावाद्यविषयकज्ञानस्य साक्षात्प्रतिबन्धकत्वनियमादिति भावः ।

मूले येनेत्यस्य कारणविघटनद्वारेति शेषः । तर्हि किन्द्वारेत्याकाङ्क्षायामाह । किन्त्विति ।

तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमिति मूलस्य यथाश्रुतासङ्गतिः, उपाधौ साध्यव्यभिचारज्ञानस्य उपाधित्वघटकसाध्यव्यापकताज्ञानाविरोधितया ऽप्रसक्तत्वात् साध्यव्याप्यव्यभिचारस्य साध्य एव साध्यव्यभिचारव्यभिचारितया तदनुमापकत्वात्, इत्यतो व्याचष्टे । उभयत्रैव बहुव्रीहिरिति । साध्यव्याप्यव्यभिचारि यस्येति बहुव्रीहिणा तृतीयान्तस्य व्याप्यव्यापकत्वेनेत्यर्थः, साध्यं व्यभिचारि यस्येति बहुव्रीहिणा चरमपदस्य साध्याव्यापकत्वमित्यर्थः। इति नोक्तदूषणद्वयावकाश इति भावः । फलप्रदोषानन्तर्भावे उपाधेरदूषकत्वमपि सम्भवतीति उपाधिर्हेत्वा-

भासान्तरमिति निर्भरो नोपपद्यत इत्यतः पूरयति । अदूषणं चेति(१)।

(चि०) उच्यते । आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनम्, यदि हि साध्यसाधनसहचारदर्शने नोपाधौ साध्यव्यापकतानिश्चय एव नास्ति, तदोपाधित्वनिश्चयाभावाद् दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता । किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्यव्यापकतानिश्चयो वाच्यः, तेन विना तेषामभावात् । तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः तत्संशयात्तत्संशय इति व्यभिचारज्ञानद्वारा । साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वोपाधेर्दूषकत्वम् । यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयम् । न च साधनाभाववद्वृत्तित्वमुपाधिरिति वाच्यम् । उपाधिमात्रोच्छेदप्रसङ्गात् । सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवत् । अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च ।

(दी०) दूषकताबीजचिन्तनमिति निश्चयदशामधिकृत्य । यन्निश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्वं तत्संशयद्वारा तत्संशयस्यापि तथात्वमिति भावः । व्यभिचारज्ञानद्वारेति । मानसे व्यभिचारनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते, व्यभिचारानुमाने पुनरग्रे वक्ष्यति ।

(१) इतः परं समाप्तिपर्यन्तं पुस्तकान्तरे पाठो न दृश्यते ।

(गा०) साध्यव्यापकतायास्साधनाव्यापकताया वा निश्चयविरहेऽपि सन्दिग्धोपाधेर्दूषकतया तन्निश्चयस्थले एव दूषकताबीजविचार इति मूलोक्तासङ्गतिमाशङ्क्याह । दूषकतेति । निश्चयदशामिति । उपाधिना दूषकत्वदशाभिप्रायेणेत्यर्थः । उपाधित्वसंशयदशायां कथ दूषकत्वमित्याकाङ्क्षापूरणाय भावं व्याचष्टे । यन्निश्चयेति । तत्संशयस्यापीति । उपाधित्वसंशयस्यापीत्यर्थः । इदानीं व्यभिचारसंशयद्वारकत्वमुपाधिसंशयस्य सामान्यतोऽभिप्रेतम्, तत्संशयात्तु तत्संशय इत्यग्रिमग्रन्थेन च विशेषतस्तदभिधास्यत इति न पौनरुक्त्यम् । व्यभिचारज्ञानद्वारेति मूले ज्ञानपदस्यानुमितिसंशयोभयपरत्वे यद्वेत्यादिना वक्ष्यमाणस्य व्यभिचारोन्नायकतापेक्षस्यानेन सह पौनरुक्त्यमित्यत आह । मानस इति । उपयुज्यत इत्यत्रोक्तम्, न तु तदनुमापकत्वमिति शेषः । व्यभिचारानुमानम् । उपाधिव्यभिचारानुमापकम् ।

(दी०) व्याप्तीति । साध्यसम्बन्धितावच्छेदकरूपाविरहः साधनतावच्छेदके साध्यसम्बन्धितानवच्छेदकत्वपर्यवसन्नः साध्यवदन्यावृत्तित्वविशिष्टसाध्यवद्वृत्तित्वविरहो वोध्येयः, न तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वम्, स्वत्वस्याननुगतरूपाभावेन तत्तत्साधनपर्यवसाने साध्यप्रसिद्धिमात्रेणैव कृतार्थत्वात् । साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ साध्यव्यभिचारित्वं साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति तु नव्याः । व्यतिरेकिणि साधने व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधिः साधनाभाववद्वृत्तित्वम् । व्यभिचारास्फुरत्तादशायामुपाध्यनुसरणाद्यत्राधिकरणे हेतोः साध्यव्यभिचारित्वं तदीयधर्मे नास्य साध्याव्यापकत्वग्रहः । उपाधिमात्रेति । तेनापि व्यभिचारानुमाने तत्रापि तथाविधोपाधिसम्भवादिति भावः । वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्याव्यभिचारित्वे व्याप्यव्यापकभावव्याघातापत्त्या हेतोः सा-

धूमव्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वान्नो-पाधित्वमिति तत्त्वम् । अवृत्तीति व्याप्यत्वाभावसाधनाभिप्रा-येण । साधनाव्याप्यस्योपाधित्वे च नैष दोषः ।

(गा०) व्याप्तिविरहोऽग्राहकतया चेत्यत्र स्वव्यापकसामानाधि-करण्यरूपव्याप्तेर्विवक्षितत्वेऽसङ्गतिः, तादृशव्याप्तेः सोपाधिसाधनघ-टितायाः अप्रसिद्ध्या तदभावाप्रसिद्धेः,साधनान्तरघटिततादृशव्याप्ति-विरहग्रहस्य च प्रकृतव्याप्तिग्रहाविरोधित्वात्, तद्वदन्यावृत्तित्वरूप-व्याप्तेर्विवक्षितत्वे तदभावो व्यभिचार एवेति कल्पभेदानुपपत्तिः, अतो व्याप्त्यन्तरपरतामाह । साध्येत्यादि । तथा च धूमादाविव धू-मादिरूपसाध्यसम्बन्धितावच्छेदकरूपव्याप्तेः प्रसिद्ध्या आर्द्रेन्धना-दिव्यभिचारेण वह्न्यादौ तदभावसाधने न दोष इति भावः । अव-च्छेदकत्वं च स्वरूपसम्बन्धविशेषः, स्वत्वघटिततया ऽननुगमने विशिष्य साधनतावच्छेदकानां निवेशनीयतया व्यभिचारिणि प्र-तियोग्यप्रसिद्ध्या साध्याप्रसिद्धेर्दुर्वारत्वात् ।

नतु द्रव्यं सत्त्वादित्यादौ सत्तादिहेतोः साध्यसम्बन्धितावच्छे-दकविशिष्टसत्तात्वादिमत्त्वादुपाधिव्यभिचारेण तत्रापि तदभावसाध-ने बाध इत्यत आह । साधनेति । साध्यसम्बन्धितानवच्छेदकत्वेति । तथा च शुद्धसत्तात्वादिरूपसाधनतावच्छेदके उपाध्यभाववद्वृत्ति-तावच्छेदकत्वेन द्रव्यत्वादिसामानाधिकरण्यानवच्छेदकत्वं साध-नीयम्, तत्र च न बाधावसरः, तत्तत्साधनतावच्छेदके तदवच्छेद-कत्वावगाहिनो ऽनुमितिजनकज्ञानस्य विरोधितयोपपत्तेरिति भावः । स्वरूपसम्बन्धरूपावच्छेदकत्वघटितोक्तव्याप्तेर्व्याप्तिवादे स्वयं दूषि-त्वादव्यभिचरितसामानाधिकरण्यरूपव्याप्त्यभावस्योन्नायकतामाह । साध्यवदिति । विरहो वेति । एतादृशव्याप्तिविरहो न व्यभिचाररूपः, अपि तु तदतिरिक्तोऽवृत्तिवृत्तिः साधनाभावरूपव्याप्यप्रसिद्ध्यप्रति-योगिकश्चेति सामञ्जस्यम् ।

यदि च लाघवात्साध्यवदन्यावृत्तित्वविशिष्टवृत्तिमत्त्वमेव व्या-प्तिरुच्यते, तदा तदभाव एवात्र विवक्षितः । ननु स्वव्यापकसाध्य-सामानाधिकरण्याभावस्याप्रसिद्ध्या साधनासम्भवेऽपि स्वाव्यापक-साध्यकत्वस्य प्रसिद्धस्य साधनं कथमुपेक्षितम्, तज्ज्ञानस्यापि

स्वहेतुकानुमितिजनकज्ञाने साध्यांशे स्वव्यापकत्वभानविरोधितयोपयुक्तत्वादित्यत आह । न त्विति । स्वसमानेति । स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकसाध्यतावच्छेदककत्वमित्यर्थः । उन्नेयमिति विपरिणतेन सम्बन्धः । तत्तत्साधनपर्यवसाने । विशिष्य तत्तत्साधनानां साध्यविशेषणाव्यापकत्वघटकतया निवेशने । कृतार्थत्वादिति । उक्तसाध्यप्रसिद्धावेव प्रकृतसाध्यविशेषणतया प्रकृतसाधनाव्यापकत्वभानेन तस्या एव प्रकृतसाध्यसाधनव्याप्तिग्रहप्रतिबन्धकतया समीहिते सिद्धे साधने उपाधिव्यभिचारेण स्वाव्यापकसाध्यकत्वानुमानवैयर्थ्यात् । साध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधिकरण्याभावसाधनेऽपि साधने विशेष्यविशेषणभावानापन्नाव्यभिचारसाध्यसामानाधिकरण्योभयप्रकारकानुमितिजनकज्ञानस्य विशिष्टाभावप्रकारकज्ञानाप्रतिबध्यस्य सम्भवाद्व्यभिचारिमात्रसाधनेनैव चानुमितिजनकज्ञानप्रतिबन्धकसम्भवाद्विशिष्टाभावानुमानमफलमित्यालोच्याव्यभिचाररूपव्याप्तिग्रहविघटनाय व्यभिचारः साधने साधनीयः व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धाय परसाध्ये साधनाव्यापकत्वमेव साधनीयम्, न तु साधने स्वाव्यापकसाध्यसामानाधिकरण्यं स्वाव्यापकसाध्यकत्वं वा, येन साध्याप्रसिद्ध्यादिरिति निष्कृष्टमतमाह । साध्येति । केवलान्वयिनि साधने व्यभिचाराद्यनुमानेऽप्रसिद्ध्या साधनाभाववद्वृत्तित्वोपाधिशङ्कानवकाशाद्व्यतिरेकिसाधनपक्षकव्यभिचाराद्यनुमानपरतां शङ्काग्रन्थस्याह । व्यतिरेकिणीति । व्यभिचारानुमाने तादृशोपाधेः साध्यशून्येऽवृत्तौ वक्ष्यमाणसाध्याव्यापकत्वासङ्गतेर्व्यभिचारानुमान एव च तस्य सम्भवदुक्तिकोपाधिताकतया च शङ्काया उभयानुमानपरतामाह । व्याप्तीति । ननु व्यभिचारनिरूपकाधिकरणमात्रवृत्तिधर्मे साध्यव्यभिचारिणि साधनाभाववद्वृत्तित्वासत्त्वात्कथं तस्य साध्यव्यभिचाररूपसाध्यव्यापकत्वघटितोपाधित्वं ग्राह्यमित्यत आह । व्यभिचारास्फुटतादशायामिति । साधनाधिकरणे साध्याभावानिश्चयदशायामित्यर्थः । उपाध्यनुसरणात् । उपाधित्वेन व्यभिचारानुमानात् । तन्निश्चयदशायां तदनुमानवैयर्थ्यादिति भावः । अस्य । साधनाभाववद्वृत्तित्वस्य । साध्याव्यापकत्वग्रहः । साध्याव्यभिचाररूपसाध्याव्यापकत्वनिश्चयः । तादृश-

धर्मे साध्यव्यभिचाररूपसाध्यानिश्चयादिति भावः ।

मूले उपाधिमात्रोच्छेदप्रसङ्गादिति । उपाधिमात्रस्यैव व्यभिचारानुमापकत्वे च्छेदप्रसङ्गादित्यर्थः ।

साधनाभाववद्वृत्तित्वरूपोपाधिव्यभिचारहेतुकव्यभिचारानुमानमेवास्ति कथमुपाधिमात्रोच्छेद इत्याशङ्कापरिहारायाग्र हेतुमाह दाधिनौ । तेनापीति । साधनाभाववद्वृत्तित्वोपाधिनापीत्यर्थः । साधनाभाववद्वृत्तित्वरूपोपाधिव्यभिचारेणेति यावत् । व्यभिचारानुमाने । स्वव्यभिचारद्वारा कर्त्तव्ये । तत्रापि । तादृशव्यभिचारानुमानेऽपि । तथाविधेति । उपाधिव्यभिचाररूपसाधनाभाववद्वृत्तित्वरूपेत्यर्थः ।

व्यभिचारानुमानासम्भवेऽपि तत्संशायकतया उक्तोपाधिदूषणं स्यादेवेत्यतस्तदनुपाधित्वनिश्चयं स्वयमुपपादयति । वस्तुतस्त्विति । व्यापकव्यभिचारिण इति । साध्यव्यापकत्वेन निश्चितस्य व्यभिचारोन्नायकोपाधेर्व्यभिचारितया निश्चितस्य प्रकृतहेतोः । व्याप्यव्यभिचारित्वे । प्रकृतसाध्याव्यभिचारित्वे । व्याप्यव्यापकभावव्याघातापत्त्या । साध्योपाध्योर्व्याप्यव्यापकभावभङ्गापत्त्या । उपाधिव्यभिचारि साधनं यदि साध्यव्यभिचारशून्यं स्यात्, उपाधिव्यभिचारशून्यवृत्तिः स्यात् इति यावत्, तदा साध्यव्यापकव्यभिचारो न स्यादित्याकारा उपाधिव्यभिचारे साध्यव्यभिचारव्यभिचारशङ्कानिवर्त्तकापत्तिर्बोध्या । हेतोः । उपाधिव्यभिचारस्य । साध्यव्याप्यत्वेन । साध्यव्यभिचाररूपसाध्यव्याप्यतया निश्चयेन । साधनाभाववद्वृत्तित्वस्येति । उपाधिव्यभिचाररूपहेत्वव्यापकतया निश्चितस्येत्यादिः । साध्याव्यापकत्वात् । साध्याव्यभिचाररूपसाध्याव्यापकत्वनिश्चयात् । नोपाधित्वम् । नोपाधित्वग्रहः । नैष दोष । नावृत्तौ साध्यव्याप्यत्वरूपसाध्याव्यापकत्वम्, उपाधेरपि तत्र सत्त्वादिति शेषः ।

(दी०) साधनेति यथाश्रुताभिप्रायेण. प्रतियोगिव्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्यवृत्तित्वस्य चोक्तौ तथात्वासम्भवात् । एवञ्च सत्प्रतिपक्षे निश्चितोपाधिवत्सन्दिग्धोपाधिरुद्भाव्यः । न च तत्कर्त्तव्यस्य व्यभिचारसन्देहस्य प्रति-

हेतुसमाजादेव सिद्धेः किं तेनेति वाच्यम्। परस्परसंवलनेनैवानुमित्यनुत्पादे तत्र व्यभिचारसन्देहस्यावश्यमुत्पत्तौ मानाभावात् उपाधिसन्देहाद्विशिष्यैकत्र व्यभिचारसन्देहेन तुल्यबलत्वाभावात्। न चातुल्यबलेन सत्प्रतिपक्षो व्यभिचारादिशङ्काधानं वा, स्वरसतः सन्दिग्धव्यभिचारादिनापि तथात्वप्रसङ्गादिति। अत्र च क्वचिदुपाधेस्तुल्यबलत्वे सत्प्रतिपक्षोन्नायकतया तर्कादिसाचिव्यादधिकबलत्वे च बाधोन्नायकतयापि दूषकत्वम्, व्याप्यत्वादिप्रतिसन्धाने तदुन्नयनस्य ततोऽनुमितिप्रतिरोधस्य च दुर्वारत्वात्। परन्तु सार्वत्रिकत्वं न तस्येति ध्येयम्।

(गा०) संयोगादिहेतुकव्यभिचारानुमानेऽप्युपाधेः साधनाव्यापकत्वमुपपादयिष्यन्नाह। यथाश्रुतेनेति। उक्तौ उपाधितयोक्तौ। तथात्वम्। साधनाव्यापकत्वम्। सत्प्रतिपक्षोत्थापकतया दूषकतापक्षे सन्दिग्धोपाध्युद्भावनप्रसक्तस्य पूर्वपक्षे उक्तत्वात् प्रसङ्गमुद्धरति। एवं चेति। व्यभिचारज्ञानद्वारोपाधेर्दूषकत्वे चेत्यर्थः। तत्कर्तव्यस्य। सन्दिग्धोपाधिफलस्य। प्रतिहेतुसमाजादेव सिद्धेरिति। एकधर्मिगते विरुद्धभावाभावसाध्यकतयोपन्यस्तहेतुद्वये तत्तत्साध्यसाधनौपयिकव्याप्तिद्वयसत्त्वं साध्यतदभावव्याप्ययोरविरोधप्रसङ्गेनासम्भवीति प्रतिसन्धानेन सत्प्रतिपक्षसंवलनादुभयत्र हेतौ स्वसाध्यव्यभिचारसंशयस्य सिद्धेरित्यर्थः। किं तेनेति। किमुपाधिसन्देहेनेत्यर्थः। तथा च सत्प्रतिपक्षे सन्दिग्धोपाध्युद्भावनमफलमिति भावः। परस्परसंवलनेनेति। विरोध्यनुमितिसामग्र्योर्मिथो मेलनेनैवेत्यर्थः। अनुमित्यनुत्पादे। साध्यतदभावयोरनुमित्यनुत्पादोपपत्तौ। तस्य व्यभिचारसंशयात्मकफलस्येनेति शेषः। तत्र। सत्प्रतिपक्षसंवलनस्थले। अवश्यमुत्पत्तौ। उक्तप्रतिसन्धानात्तदुत्पत्तेरावश्यकत्वे। मानाभावादिति। तथा च प्रतिहेतौ व्यभिचारसंशयार्थं सन्दिग्धोपाध्युद्भावनमुपयुक्तमेवेति भावः।

ननु तथापि सन्दिग्धोपाधिरकिञ्चित्करः, प्रतिहेतोरनुमित्यनुत्पादकतायाः सत्प्रतिपक्षसंवलनादेव सिद्धेरित्याशङ्कानिवृत्त्यर्थं प्र-

तिहेतोर्दुर्बलत्वे प्रकृते साध्यसिद्धिनिर्वाह इति तस्य हीनबलार्थं सन्दिग्धोपाध्युद्भावनमित्याह उपाधिसन्देहादिति । एकत्रेति । उपाध्युद्भावनविषयहेतावित्यर्थः । तुल्यबलत्वाभावादिति । तस्य हेतोर्हेत्वन्तरापेक्षया हीनबलत्वादित्यर्थः । तदर्थं सन्दिग्धोपाध्युद्भावनौचित्यादिति शेषः ।

प्रतिहेतौ हीनबलत्वेन किमुपक्रियत इत्याकाङ्क्षायामाह । न चेति । न हीत्यर्थः । अतुल्यबलेन । हीनबलेन । प्रतिहेतुना । सत्प्रतिपक्षः । अनुमितिप्रतिबन्धः । तुल्यबलविरोध्यनुमितिसामग्र्या एवानुमितिप्रतिबन्धकत्वादित्यर्थः । तथा च स्वाभिमतसाध्यसिद्ध्यर्थमेव प्रतिहेतौ सन्दिग्धोपाध्युद्भावनादिति भावः । हीनबलप्रतिहेतुज्ञानस्य स्वतोऽनुमित्यप्रतिबन्धकत्वेऽपि प्रकृतहेतौ व्यभिचारशङ्कासम्पादनेनानुमितिविरोधित्वमेवेत्याशङ्कां परिहरति । व्यभिचारशङ्काधानं चेति । विनिगमकबलेन हीनबले व्याप्तिभङ्गावधारणे ऽधिकबले व्याप्तिनिश्चयादिति भावः । स्वरसत इति । उपाधिसन्देहाद्यघटितसामग्रीतोऽपीत्यर्थः । तथात्वप्रसङ्गात् । सत्प्रतिपक्षादिप्रसङ्गात् । व्यभिचारोन्नायकतया ऽव्याप्यत्वोन्नायकतया च दूषकत्वमुपाधेर्मूलकृतोक्तम्, न तु सत्प्रतिपक्षोन्नायकतया, क्वचित्तु तदुन्नायकतयाऽपि दूषकत्वसम्भवान्मूले न्यूनतेति स्वयं तदाह । अत्र चेति । ध्येयमित्यग्रिमेण सम्बध्यते । तुल्यबलत्वे इति । साध्यधर्मिकप्रकृतहेतुव्यापकताग्राहकसामग्रीतुल्यबलस्वधर्मिकसाध्यव्यापकताग्राहकतायामित्यर्थः । सत्प्रतिपक्षोन्नायकतयेति । दूषकत्वमित्यग्रिमेण सम्बध्यते । सत्प्रतिपक्षोन्नायकत्वम् । साध्यानुमितिसामग्रीतुल्यबलसाध्याभावानुमितिसामग्रीसम्पादकत्वम् । अधिकबलत्वे इति । निश्चितप्रामाण्यकसाध्यव्यापकताग्रहविषयत्व इत्यर्थः । तथा सति प्रकृतहेतौ साध्यव्याप्तिग्रहे ऽप्रामाण्यग्रहेण साध्यानुमितिसामग्र्याः साध्याभावानुमित्यप्रतिबन्धकत्वेन साध्याभावानुमापकतया । दूषकत्वम् । साध्यानुमितिविरोधित्वम् । साध्यानुमानसामग्र्या अपूर्णतयाऽपि तदनुमित्यनुत्पादसम्भवात् सम्भेदे नान्यतरवैयर्थ्यमिति न्यायेन बाधनिश्चयस्याप्यनुमितिविरोधित्वं दुर्वारम् । व्याप्यत्वादिप्रतिसन्धान इति । उपाधौ निश्चितप्रामाण्यकसाध्यव्यापकत्वज्ञान तदभावस्य च पक्षधर्मतानिश्चये । तदुन्नयनस्य । बाधोन्नयन-

स्य । तत इति । तुल्यव्यापकत्वादिग्रहविषयोपाधित इत्यर्थः । अनुमितिप्रतिरोधस्य । प्रतिरोधकरूपसत्प्रतिपक्षोत्थापनस्य । सार्वत्रिकत्वं न नस्येति । यथा साधनाव्यापकत्वघटितोक्तलक्षणाक्रान्तस्योपाधेर्व्यभिचारस्याव्याप्यत्वस्य चोन्नायकत्वं सार्वत्रिकं तथा न बाधादुन्नायकत्वम्, पक्षे साध्यवति तदसम्भवादिति भावः ।

(चि०) अथोपाध्याभासाः । असाधारणविपर्ययो यथा अन्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम् । अप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः । बाधितसाध्यविपर्ययो यथा वह्निरुष्णस्तेजस्त्वादित्यत्राकृतकत्वम् । पक्षाव्यापकविपर्ययो(१) यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम् । अत्राणुव्यतिरिक्तस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धेः । पूर्वसाधनव्यतिरेको यथा शर्करारसोऽनित्योऽनित्यवृत्तिगुणत्वात्, रसो नित्यो रसनेन्द्रियजन्यनिर्विकल्पकविषयत्वात् रसत्ववदित्यादौ, पूर्वसाधनतायाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात्, उपाधेर्नित्यदोषत्वाच्च । न हि यद्येन सोपाधिसम्बद्धं तत्तेनानुपाधित्वसम्बद्धं सम्भवति, न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजम् । स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्यव्यापकत्वेनानुपाधित्वात् । न च पूर्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्य

(१) पक्षाविपर्यय इति पु० पा० ।

तत्रेति वाच्यम् । अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात् । पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्तृकत्वानुमाने नित्यत्वादिः । पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम् । पक्षेतरसाध्याभावो यथा अत्रैव पर्वतेतराग्निमत्त्वम् । न चात्र व्यर्थविशेषणत्वं दूषणम्, तत्त्वेऽप्युपाधेराभासत्वात् । तत्तुल्यश्च यथा अत्रैव पर्वतेतरेन्धनवत्त्वम् । एवं वह्निसामग्र्यादिकमूह्यम् ॥

इति तत्त्वचिन्तामणावुपाधिप्रकरणम् ॥

(दी०) असाधारणविपर्यय इति । इदं च सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्य । यद्यपि व्यतिरेकेण सत्प्रतिपक्षत्वे सत्प्रतिपक्षान्तरस्यादोषत्वान्नासाधारण्यं दोषाय, तथापि सत्प्रतिपक्षोन्नयनौपयिकसाध्यव्यापकत्वग्राहकप्रमाणाभावे तात्पर्यम् ।

(गा०) ननूपाधेरसाधारणविपर्ययत्वं कथमाभासताप्रयोजकम्, तद्व्यतिरेकस्यासाधारण्येन पक्षे साध्याभावासाधकत्वेऽपि तद्व्यभिचारेण हेतौ साध्यव्यभिचारसाधने असाधारण्यानवकाशेन तत्साधकतया दूषकत्वसम्भवात्, दूषकत्वे सदुपाधितया दुर्वारत्वादित्यत आह । इदं चेति । असाधारणविपर्ययस्याऽऽभासताधानं चेत्यर्थः । सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्येति । यत्र सत्प्रतिपक्षोन्नयनार्थमुपाध्युद्भावनं तादृशस्थलाभिप्रायेणेत्यर्थः । व्यतिरेकेणेति । उपाधिव्यतिरेकहेतुनेति शेषः । सत्प्रतिपक्षत्वे । साध्याभावसाधने । असाधारण्यम्, न दोषायेत्यनेन सम्बध्यते ।

ननु व्यतिरेकिणि असाधारणफलस्यान्वयव्याप्तिग्रहस्याकिंचित्करत्वेऽपि सत्प्रतिपक्षप्रयोजकतया असाधारण्यं दोष एवेत्यत आह ।

सत्प्रतिपक्षे इति । पक्षोन्नायकतयेत्यर्थः । अदोषत्वात् । अदोषनाशा व्यवस्थापितत्वात् । प्रमाणाभावे तात्पर्यमिति । असाधारणविपर्ययस्य प्रसिद्धानुमानीयपर्वतेतरत्वादेस्तादृशप्रमाणाभावेनादूषकत्वादुपाध्याभासत्वे तात्पर्यम् । यद्यप्येवं व्यभिचारोन्नायकत्वे व्याप्यत्वनवकाशः, तत्रातिव्यापकतानिश्चयस्यापेक्षितत्वात्, तथापि असाधारणविपर्ययत्वेनैवोपाध्याभासतेति यथाश्रुताभिप्रायेण सत्प्रतिपक्षोन्नायकत्वाभिप्रायेणेति प्रथममुक्तम् ।

(दी०) तदयं निष्कर्षः, यत्र यद्दोषोन्नायकतया दूषणत्वमुपाधेस्तत्र तदुन्नयनौपयिकरूपवैकल्यमेवाभासत्वे प्रयोजकम्, एवं च यत्र स्थापनायां पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तत्र पक्षाव्यापकविपर्ययस्याभासत्वम्, तद्विरहेण पक्षैकदेशे सत्प्रतिपक्षेऽप्येकदेशान्तरे साध्यसिद्धेरप्रत्यूहत्वात्, यत्र तु पक्षतावच्छेदकावच्छेदेन तथा तत्र तादृशस्योपाधित्वमेव, एकदेशे प्रतिपक्षस्यापि तादृशसिद्धिविरोधित्वात् साध्यविपर्ययस्यासत्त्वमनुपाधित्वे प्रयोजकम्, न त्वज्ञातम्, अज्ञातस्यापि तस्य व्यापकव्यतिरेकेण सिद्धिसम्भवात् ।

(गा०) उपाधेराभासताबीजं सर्वसाधारणं निर्वक्ति । तदयमित्यादिना । दूषणत्वमुपाधेरिति ।। उपाधिमुद्भावयतोऽभिमतमिति शेषः । एवं सति पक्षाव्यापकविपर्ययस्य यत् उपाध्याभासत्वमुक्तं तदपि न सार्वत्रिकमित्याह । एवं चेति । सामानाधिकरण्येन । सामानाधिकरण्यमात्रेण । आभासत्वमिति । अदूषकत्वादिति शेषः । अदूषकत्वमेव विवृणोति । पक्षैकदेशे इति । सत्प्रतिपक्षेऽपि पक्षतावच्छेदकसामानाधिकरण्यमात्रेण साध्याभावव्याप्यवत्ताज्ञानसम्पादनेऽपि । तादृशोपाधिव्यतिरेकस्य पक्षतावच्छेदकावच्छेदेनावर्तमानतया तदवच्छेदेन साध्याभावव्याप्यवत्ताज्ञानासम्पादकत्वादिति भावः । एकदेशान्तरे इति । पक्षतावच्छेदकसामानाधिकरण्यमात्रेणेत्यर्थः । उपाधित्वमेव । न तु तदाभासत्वम् । दूषक-

त्वादिति शेषः। तदेव दर्शयति। एकदेश इति। ताद्दशसिद्धिविरोधित्वात्। अवच्छेकावच्छेदेनानुमितौ विरोधित्वात्। अप्रसिद्धसाध्यविपर्यय इत्यत्राप्रसिद्धपदस्य तदानीमज्ञायमानत्वार्थकताभ्रमनिराकरणाय साध्यविपर्ययस्याज्ञाततत्त्वरूपमप्रसिद्धत्वं नोपाधेराभासताप्रयोजकम्, बीजाभावात्, किन्तु अत्यन्तासत्त्वरूपम्, केवलान्वयिसाध्यके एव उपाधेरसत्साध्यविपर्ययकत्वेनाभासत्वात्, तत्र विपर्ययस्यात्यन्तासत्त्वेन साधयितुमशक्यत्वादित्याह साध्यविपर्ययस्येति। साध्यविपर्ययस्यासत्त्वम्। विपर्ययत्वावच्छेदेन साध्यप्रतियोगिकत्वम्, साध्यतावच्छेदकविपर्ययप्रतियोगितानवच्छेदकत्वमिति यावत्। तस्य। साध्यविपर्ययस्य। व्यापकव्यतिरेकेणेति। साध्यव्यापकतया गृहीतस्योपाधेर्व्यतिरेकेणेत्यर्थः। सिद्धिसम्भवादिति। पृथवीत्वादिना पृथिवीतरभेदादेरिवेत्यादिः।

(दी०) अथ सिद्धसाध्यविपर्ययत्वेन चाभासत्वम्, व्यभिचारोन्नायकतया दूषकत्वपक्षे विनापि साध्यप्रसिद्धिं प्रत्येकपदार्थप्रसिद्ध्यैव घटो नाभिधेय इत्यादिप्रतिज्ञापत्तेः, व्युत्पादयिष्यते च तत्र प्रतिज्ञाविरहः, व्यापकाभावेनाप्रसिद्ध्यैव व्याप्याभावस्य सिद्ध्यभ्युपगमात्, पूर्वसाधनव्यतिरेकत्वन्तु नोपाधित्वेन नाप्यनुपाधित्वेन नियतम्, वह्निना धूमस्य स्थापनायां प्रतिहेतावार्द्रेन्धनाभावे वह्न्यभावस्योपधितायां धूमाभावस्य चार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वह्नावार्द्रेन्धनस्यानुपाधितायाश्च प्रसङ्गात्। परन्तु पूर्वसाधनव्यतिरेकस्य प्रतिहेतावुपाधित्वेनोद्भावने सत्प्रतिपक्षमात्रमुच्छिद्येत, सर्वत्रैव तत्सम्भवात्। आभासत्वेऽपि स्थापनया विशेषाग्रहदशायामेव सत्प्रतिपक्षोपन्यासात्, वस्तुतः साध्याव्यापकस्यापि पूर्वसाधनव्यतिरेकस्य तदानीं तत्त्वेनाग्रहादुपन्याससम्भवात्। अतो बलवत्तरानुकूलतर्कं विना पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथकसमयवशादेवासावुपाधित्वेन नोपन्यस्यत इति। यथा अकर्तृकत्वेति।

कादाचित्कत्वेन सकर्तृकत्वस्थापनायामजन्यत्वे प्रतिहेतावित्यर्थः।

इति तत्त्वचिन्तामणिदीधितावुपाधिप्रकरणम् ॥

(गा०) पूर्वसाधनव्यतिरेकत्वं नोपाध्याभासताप्रयोजकम्, क्वचित्तस्यापि सदुपाधित्वात्, परं तु सत्प्रतिपक्षस्थले कथकसमयवशात्तस्योपाधित्वेन नोद्भावनमित्यत्रैव मूलतात्पर्यमित्याह । पूर्वेति । नोपाधित्वेन नियतमिति दृष्टान्तविधयोक्तम् । एतन्नियमेति प्रसङ्गमाह । वह्निनेति । हेतुनेति शेषः । स्थापनायाम् । वादिना प्रथमसाधने । प्रतिहेतौ । धूमाभावसाधके । वह्न्यभावस्येति । धूमाभावव्यापकतया अनुपाधेरित्यादिः । पूर्वसाधनव्यतिरेकस्येति शेषः । उपाधितायाः प्रसङ्गादित्यन्वयः । द्वितीयनियमेऽतिप्रसङ्गमाह । धूमाभावस्येति । प्रतिहेतौ । धूमस्य साधके । आर्द्रेन्धनस्येति । प्रसिद्धोपाधेरिति शेषः । परन्त्विति । अस्य नोपाधित्वेनोद्भाव्य इत्यग्रिमेणान्वयः । असौ । पूर्वसाधनव्यतिरेकः । उपाधित्वेनानुद्भावने हेतुं वक्ष्यति कथकसमयवशादिति । तत्समयबीजमाह पूर्वसाधनव्यतिरेकस्येत्यादिना । सर्वत्रैव । प्रतिहेतुमात्र एव । तत्सम्भवात् । पूर्वसाधनव्यतिरेकस्योपाधितयोद्भावनसम्भवात् ।

नन्वयोगोलके धूमवद्वह्नेः, तत्र धूमवदार्द्रेन्धनाभावादित्यादौ सत्प्रतिपक्षे वह्न्यभावस्य पूर्वसाधनव्यतिरेकस्य नोत्तरसाधने उपाधितयोद्भावनसम्भवः, वह्नेर्धूमाव्याप्यत्वेन तदभावत्वस्य धूमाभावाव्यापकत्वग्रहादित्यत आह । आभासत्वेऽपि स्थापनाया इति । पूर्वसाधनस्य वस्तुगत्या तत्साध्याव्याप्यत्वेऽपीत्यर्थः । विशेषाग्रहदशायामेव । तस्य तदव्याप्यत्वाग्रहदशायामेव । सत्प्रतिपक्षोपन्यासात् । साध्याभावसाधकहेतूपन्यासात् । तद्ग्रहदशायां तत एव हेतोरसाधकतया प्रतिहेतूपन्यासवैयर्थ्यादिति भावः । वस्तुतः । वस्तुगत्या । तदानीम् । विशेषाग्रहदशायाम् । तत्त्वेन । साध्याव्यापकत्वेन । उपन्याससम्भवादिति । उपाधितया पूर्वसाधनव्यतिरेकोद्भावनसम्भवादित्यर्थः । अतः । उक्तरीत्या सत्प्रतिपक्षोच्छेदप्रसङ्गात् । बलवत्तरेत्यादिर्नोद्भाव्य इत्यन्तः कथकसमयाकारः । इति कथकसमयेति । इ-

त्याकारकसमयेत्यर्थः । यद्यादेवेति । न त्वाभासत्वादित्येवकारार्थः । असौ । पूर्वसाधनव्यतिरेकः ।

ननु क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्र स्थापनायां अनित्यत्वस्य प्रागभाववृत्तेः कार्यत्वाव्याप्यत्वेन नित्यत्वं पूर्वसाधनव्याप्यव्यतिरेकं न भवति, एवं क्षित्यादिकमकर्तृकं शरीराजन्यत्वात् व्योमवदित्यादौ क्षित्यादिव्योमान्यतरत्वावच्छिन्नसाध्यव्यापकत्वे सति तदन्यतरत्वावच्छिन्नसाधनाव्यापक नित्यत्वञ्चोपाधिरेवेति कथमाभास इत्यत आह । कादाचित्कत्वेनेति । तथा च क्षित्यादिकं सकर्तृकं कादाचित्कत्वादित्यत्रानित्यत्वं कादाचित्कत्वव्याप्यम्, तद्व्यतिरेकश्च नित्यत्वमिति न पूर्वोक्तो दोषः, क्षित्यादिकमकर्तृकमजन्यत्वादिति प्रतिहेतौ क्षित्यादिव्योमान्यतरत्वावच्छिन्नाकर्तृकत्वव्यापकं यथा नित्यत्वम्, तथा तदवच्छिन्नाजन्यत्वरूपसाधनाव्यापकमपीति न स उपाधिरिति न द्वितीयोऽपि दोष इति दिक् ॥

इति श्रीमहामहोपाध्यायश्रीगदाधरभट्टाचार्यचक्रवर्तिकृतौ
तत्त्वचिन्तामणिदीधितिव्याख्याने

उपाधिप्रकरणम् ॥

पक्षताप्रकरणम् ।

(चि०) व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते । तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वम् । सन्देहो हि न विशेषणं, परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात् । नोपलक्षणम्, अव्यावर्त्तकतापत्तेः ।

(दी०) अनुमितिलक्षणैककार्यानुकूलतासङ्गत्या पक्षधर्मतां निरूपयितुमाह । व्याप्तीति । सन्दिग्धेति । यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्षतेत्यर्थः । तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम्, न वा तमःप्रभृतिषु समवायेन आकाशादिसाधने तद्वैकल्यम् ।

(गा०) मूले व्याप्तिपक्षधर्मतयोः सङ्गत्यप्रदर्शनेन न्यूनतां परिजिहीर्षुस्तयोरेककार्यकारित्वरूपसङ्गतिं दर्शयन् व्याप्त्यनन्तरमित्यादिमूलमवतारयति । अनुमितीति । अनुमितिलक्षणं अनुमितिस्वरूपं यदेककार्यं तदनुकूलत्वसङ्गत्या तत्प्रयोजकत्वरूपसङ्गत्या, प्रयोजकत्वञ्च कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्मतयोः परामर्शनिष्ठकारणतायामवच्छेदकत्वेन अनुमित्यजनकत्वेऽपि न क्षतिः । यद्यपि पक्षताया न कारणतावच्छेदकघटकत्वं तामनन्तर्भाव्य पर्वतादिवृत्तित्वज्ञानत्वेनैवानुमितिजनकत्वात् तथाऽपि पक्षताया अनुमितौ स्वातन्त्र्येण कारणतया तदुपलक्षितधर्मिवृत्तितायाश्च कारणतावच्छेदकतया तद्घटितविशिष्टस्यैककार्यानुकूलत्वमक्षतमेवेति ध्येयम् ।

निरूपयितुमिति । निरूपणं प्रतिपत्त्यनुकूलो व्यापारः । एवञ्च पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्रतिपत्त्यनुकूलत्वेन तन्निरूपणत्वमक्षतमिति मूले पक्षतानिरूपणेऽपि पक्षधर्मतां निरूपयितुमित्यस्य नासङ्गतिः । पक्षे धर्मत्वं यस्या इति व्युत्पत्त्या पक्षधर्मतापदं पक्षीयधर्मविशेषरूपपक्षतापरमिति केचित् । तच्चिन्त्यम् । तथात्वे लिङ्गनसङ्क्षेपनिर्बन्धिनो दीधितिकारस्य पक्षतां निरूपयितुमित्यस्य उपेक्षाया बीजाभावात् ।

व्याप्तीतीति । व्याप्तिनिरूपणानन्तरमिति मूलपाठाभिप्रायेण । व्याप्त्यनन्तरमिति पाठे च तत्प्रकाराभावात् प्रत्यक्षेत्यादीत्युपेत्य प्रत्यक्षचिन्तादि इति रीत्या प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थधारकस्य तथाविधलिखनासङ्गतेः ।

तत्रेति मूले तत्पदं पक्षधर्मतापरं सप्तम्यर्थश्च घटकत्वं अन्वयश्चास्य पक्षत्वमित्यत्रेत्यवधेयम् । सन्दिग्धेत्यादिमूलग्रन्थस्य सन्दिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्मसन्देहवत्त्वं, तादृशसन्देहपर्यवसितं पक्षत्वमित्यर्थः । तत्र साध्य धनत्वांनिवेशनमफलं धर्मपदसार्थक्याय, एवमस्मिन् सन्दिग्धं साध्यवत्त्वं साध्य धर्मो यस्य इति बहुव्रीहिबलात् साध्यनिरूपितधर्मित्वपर्यवसितं पक्षत्वमित्युक्तौ, साध्ये सन्दिग्धं स्वधर्मत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षनिरूपितधर्मत्वस्य चाप्रसिद्धिस्थले वक्ष्यमाणानुपपत्तिप्रयोजकं तत् । एवं साध्यकोटिकसंशयस्य निवेशे साध्यं पक्षवृत्ति न वा, साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयासंग्रहः तादृशसंशयोपादाने च पक्षः साध्यवान्न वेति संशयादनुमित्यनुपपत्तिरतो धर्मत्वांशं परित्यज्य केवलान्वयिग्रन्थे मणिकृतैव वक्ष्यमाणतथाविधसकलसंशयानुगमप्रकारं दर्शयति । यत्रेति । यत्र इति यद्धर्मावच्छिन्ने, सप्तम्यर्थश्च निरूपितान्वयि विशेष्यत्वम्, साध्यस्य । साध्यतावच्छेदकावच्छिन्नस्य । पञ्चम्यर्थः प्रकारत्वं, तस्यापि निर्णयेऽन्वयः । तत्र । तद्धर्मावच्छिन्ने, सप्तम्यर्थोऽनुमित्यन्वयि विशेष्यत्वम् । तादृशसम्बन्धेन साध्यानुमितौ । तादृशसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नविधेयकानुमितौ जनकीभूतेत्यर्थः । पक्षविशेष्यकसाध्याभाववैशिष्ट्यबुद्धाविव साध्यधर्मिकपक्षावृत्तित्वपक्षनिष्ठाभावप्रतियोगित्वविशिष्टबुद्धावपि पक्षः

साध्यवानिति निश्चयस्य प्राचीनमते प्रतिबन्धकत्वात् साध्यं पक्षवृत्ति न वेत्यादिसंशयसंग्रहः। एवञ्च शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकताकसंशयो हेतुरिति पर्यवसितम्। तादृशनिश्चयप्रतिबध्यत्वस्य यथाश्रुतस्य घटादिविषयकसमूहालम्बनात्मकवह्निमत्त्वादिनिश्चयप्रतिबध्यघटादिसंशयसाधारणत्वात् तादृशनिश्चयत्वावच्छिन्नप्रतिबन्धकताप्रवेशः।

अवच्छिन्नत्वञ्चान्यूनवृत्तित्वं न तु स्वरूपसम्बन्धविशेषः। तेन वह्निसामान्याभावविशिष्टबुद्धौ महानसीयत्वादिविषयतामनन्तर्भाव्य वह्निमान् महानसीयवह्निमानित्यादिसकलज्ञानसाधारणवह्नित्वावच्छिन्नवत्तानिश्चयत्वेनैव प्रतिबन्धकताकल्पनान्महानसीयवह्निमान् वह्निसामान्याभाववान् वा पक्ष इत्याकारकसंशयं प्रति महानसीयवह्नित्वावच्छिन्नप्रकारकनिश्चयत्वेनाप्रतिबन्धकत्वेऽपि न तथाविधसंशयस्य महानसीयवह्नित्वावच्छिन्नसाध्यकानुमितौ पक्षतात्वानुपपत्तिः। न वा महानसीयवह्न्यभावादिविशिष्टबुद्धिप्रतिबन्धकतावच्छेदककोटौ वह्नित्वावच्छिन्नप्रकारताकत्वादेर्निविष्टत्वेऽपि वह्निमानित्याद्यनुमितौ महानसीयवह्निमान्न वा पक्ष इत्यादिसंशयस्य पक्षतात्वापत्तिः। इत्थञ्चाहार्यस्य भ्रमत्वज्ञानास्कन्दितस्य च निश्चयस्याप्रतिबन्धकतया अनाहार्यत्वं भ्रमत्वज्ञानानास्कन्दितत्वञ्च निश्चयविशेषणं देयमतो न तथाविधनिश्चयत्वान्यूनवृत्तिप्रतिबन्धकत्वाप्रसिद्धिः। पर्वतो वह्निमान्न वेत्यादेः कस्यापि संशयस्य धर्मान्तरावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्मावच्छिन्नप्रकारकनिश्चयसाधारणसंयोगसंसर्गकवह्नित्वावच्छिन्नप्रकारकनिश्चयत्वाद्यन्यूनवृत्तिप्रतिबन्धकताकत्वं न सम्भवतीति प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादेः प्रकारताविशेषणत्वम्। उपनीतमानात्मकबाधनिश्चयस्यापि साध्यवत्तानिश्चयसामान्यनिवर्त्तनीयतया भ्रमत्वज्ञानास्कन्दितस्य च तस्यानुमित्यविरोधितया तथाविधबाधदशायामनुमित्यापत्तिरतः संशयत्वनिवेशनम्।

न च पक्षसाध्यविशेष्यकसंशयसाधारणस्यानतिप्रसक्तस्य सं-

शयस्य दुर्वचतया पुनरननुगमतादवस्थ्यमिति वाच्यम्। बाधानिश्चयानन्तर्यं चात्र संशयपदेन विवक्षितत्वात् केवलान्वयिनि च साध्ये पक्षनिष्ठाभावप्रतियोगित्वनिश्चय एव सुलभो बाध, एकविधबाधोपादानेनैव त्रिविधसंशयानुगमसम्भवाच्चाननुगमो न दोषाय, अनुगमस्यापि कथञ्चित् सम्भवात्।

यत्तु साध्यपक्षवैशिष्ट्यावगाहित्वमेव संशयपदेन विवक्षितमिति नाननुगमः। साध्यं पक्षवृत्ति न वेति साध्यविशेष्यकसंशयस्यापि तथात्वादिति, तदसत्। तथा सति साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयस्यासंग्रहात्।

न च केवलान्वयिस्थले साध्यं पक्षवृत्ति न वेत्येतादृशसंशयादेवानुमित्युपपत्त्या तथाविधसंशयासंग्रहो न दोषाय इति वाच्यम्। प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयस्य केवलान्वयिग्रन्थे मणिकृतैव संगृहीततया तद्विरोधात्।

वस्तुतस्तु तादात्म्यसम्बन्धेन वाच्यसाध्यकप्रमेयपक्षकस्थले च तादृशसंशयाप्रसिद्धिः तादात्म्यसम्बन्धेन पक्षसम्बन्धत्वाभावरूपकोट्यप्रसिद्धेः। न च साध्यं पक्षनिष्ठाभावप्रतियोगित्वसंशयस्य पक्षतात्वेऽपि उक्तस्थले पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितेरुद्देश्ये पक्षतावच्छेदकावच्छेदेन वर्त्तमानभेदप्रतियोगित्वकोटिकसंशयस्यैव सामानाधिकरण्येन साध्यवत्तानिश्चयप्रतिबन्धकतया पक्षतात्वमङ्गीकर्त्तव्यं तच्च न सम्भवति प्रमेयत्वाद्यवच्छेदेन वर्त्तमानभेदाप्रसिद्ध्या कोट्यप्रसिद्धेरिति वाच्यम्। प्रमेयत्वाद्यवच्छेदेन वर्त्तमानस्य द्वित्वावच्छिन्नभेदस्यैव प्रसिद्ध्या साध्यतावच्छेदकावच्छिन्नतादृशभेदप्रतियोगित्वकोटिकसंशयस्यैव तत्र पक्षतात्वसम्भवात्। तत्र पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वोभयत्वावच्छिन्नतदभावकोटिकसंशयस्य पक्षतात्वोपगमसम्भवाच्च। एवमप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थले पक्षसाध्यवैशिष्ट्यावगाहिसंशयानुपपत्तेस्तत्र साध्यात्मकाभावप्रतियोगिनि पक्षसम्बन्धित्वसंशयस्य पृथिवीतरत् पक्षसम्बन्धि न वेत्याकारकस्यैव पक्षतात्वेनोपगन्तव्यतया पक्षसाध्यवैशिष्ट्यावगाहित्वनियमासम्भवात्।

अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नित्वावच्छिन्नसाध्यकस्थले च वह्निमान्न वा पक्ष इत्यादिसंशयस्य पक्षतात्वप्रसङ्गः साध्यवत्तानिश्चयनिवर्त्तनीयत्वात्। न च सिद्धिकाले ऽनुमितिवारणमेव पक्षताहेतुत्वकल्पनफलं एवञ्च उक्तसंशयस्यानुमितिहेतुत्वोपगमेऽपि सिद्धिदशायमनुमित्यापत्त्यसम्भवात् तस्य पक्षतात्वमिष्टमेव इति वाच्यम्। साध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्मिन् पक्षसम्बन्धावगाहिसन्देहस्यैव प्राचीनैः पक्षतात्वोपगमात् अन्यथा बाधसाधारणरूपेण पक्षतात्वोपगमेऽपि सिद्धिकाले ऽनुमितिवारणसम्भवात् बाधवारकसंशयत्वनिवेशनस्यापि निष्प्रयोजनकतापत्तेः।

न च तादृशसंशयस्य वह्निव्याप्याभाववत्तानिश्चयरूपबाधाप्रतिबध्यतया नातिप्रसङ्ग इति वाच्यम्। वह्निव्याप्याभावाभाववान् पर्वतः पर्वतो वह्निमान्न वा इति संशयस्य तादृशबाधनिश्चयाप्रतिबध्यतया तावताऽपि तद्वारणासम्भवात्।

यत्तु प्रकृतसाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यतानिवेशान्नोक्तातिप्रसङ्गः, वह्न्यभावविशिष्टज्ञानत्वावच्छिन्नाया वह्निव्याप्यवत्तानिश्चयप्रतिबध्यताया अवच्छेदककोटौ वह्निव्याप्यत्वावच्छिन्नविषयताया अनन्तर्भावादिति तन्न। वह्न्यभावादिमात्रकस्थले वह्निमान्न वेत्यादिसंशयासंग्रहप्रसङ्गात्, वह्निविशिष्टबुद्धित्वावच्छिन्नाया वह्न्यभावादिनिश्चयप्रतिबध्यताया अवच्छेदकगर्भे वह्न्यभावत्वावच्छिन्नविषयताया अनिवेशात् यत्र च वह्निव्याप्यत्वावच्छिन्नस्यैव पक्षत्वं साध्यत्वञ्च तत्र वह्निव्याप्यो वह्निमान्न वेति संशयवारणस्याप्यशक्यत्वात्।

यत्तु साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयताघटितधर्मावच्छिन्नत्वेन प्रतिबध्यताया निवेशनीयतया वह्निव्याप्यवत्ताज्ञानं प्रति वह्न्यभावादिनिश्चयत्वेनाप्रतिबन्धकतया तद्विषयतायाः साध्यवत्त्वज्ञानप्रतिबन्धकतावच्छेदकत्वविरहेण नातिप्रसङ्गः। तदपि न। तावताऽपि महानसीयवह्नित्वावच्छिन्नसाध्यकस्थले महानसीयवह्न्यभावाभाववान् पर्वतः स वह्निमान्न वेति संशयवारणासम्भवात्।

अत्रोच्यते, संशयत्वं स्वानिष्ठविषयताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालित्वं ज्ञानभेदेन विषयताभेदानभ्युप-

समासत् संशयनिष्ठवह्निमत्पर्वतादिविषयताया अपि प्रत्येकं निश्चयवृत्तित्वात् प्रतिबन्धकतावच्छेदकघटकत्वोपपत्तिः वह्न्यभाववान् पर्वतो घटवांश्च वेत्याकारकसंशयस्य तादृशधर्माक्रान्तस्य साध्यवत्त्वनिश्चयप्रतिबध्यस्य च वारणाय साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वेन निरुक्तसंशयत्वघटकप्रतिबध्यता विशेषणीया, घटादिमत्ताज्ञानत्वावच्छिन्नप्रतिबध्यताया अतथात्वात् नातिप्रसङ्गः । तत्र पक्षे वह्न्यभाववान्न वेति संशयस्य पक्षतात्वमिष्टमेव तस्य वह्निः पक्षनिष्ठाभावप्रतियोगी न वेति संशयसमशीलत्वात् । स्वनिष्ठविषयतायाञ्च बाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयमनेन वह्निव्याप्यसाध्यकस्थले वह्निमान्न वा पक्ष इत्येतादृशसंशयस्य व्युदासः तत्र वह्निव्याप्याभावाभावत्वेन व्याप्यस्य पृथग्भाने ऽपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयितायां वह्निव्याप्याभावनिश्चयप्रतिबध्यतावच्छेदकत्वविरहात् । एवञ्च शुद्धवह्नित्वावच्छिन्नसाध्यकस्थले वह्न्यभाववान् पक्ष इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्निमान्न वा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशनमित्यवधेयम् ।

एतेनावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चयप्रतिबध्यत्वेऽपि निरुक्तसंशयत्वाभावेन न पक्षतात्वमिति संक्षेपः ।

अथावच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयावगाहिनः समुच्चयस्य पक्षतात्वापत्तिः तस्याप्युक्तरूपाक्रान्तत्वात् ।

न च विरोधावगाहित्वनिवेशात्तद्वारणसम्भवः । कुत्रचित् किञ्चित्प्रतियोगिकविरोधभानस्य समुच्चयेऽप्यक्षततत्वात् साध्यतदभावादिविरोधावगाहित्वस्य प्रत्येकं सकलसंशयसाधारण्यासम्भवादिति चेन्न । संयोगादेरव्याप्यवृत्तित्वज्ञानदशायान्तद्वत्त्वग्रहविषयीभूतधर्मिणि तदभावादिग्रहोत्पत्त्या तद्वत्ताग्रहस्य तदभावग्रहप्रतिबन्धकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामपेक्ष्य व्याप्यवृत्तितावगाहित्वेनैव प्रतिबन्धकतोपेयते । व्याप्यवृत्तित्वज्ञानवच्छिन्नाधारताकत्वं सर्वत्र प्रतिबन्धकज्ञाने तादृशाधारताया अन्ततः संसर्गतयै-

च मानमुपेयते एवञ्च समुच्चयनिष्ठकोटिविषयिता न विपरीतधी-प्रतिबन्धकतावच्छेदिका, व्याप्यवृत्तित्वविषयित्वानिरूपितत्वात् अत उक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपादानासम्भवेन तस्य पक्षतात्वापत्तिविरहात् ।

अथवा स्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्य-तावच्छेदकीभूता या स्वावच्छेदकधर्मावच्छिन्ननिरूपितविरोधवि-षयितानिरूपना प्रकारिता सामानाधिकरण्यसम्बन्धेन तद्विशिष्ट-प्रकारितैव संशयत्वं तच्च समुच्चयव्यावृत्तं समुच्चये विरोधाभा-नेन कोटिद्वयविषयितयोर्विरोधविषयित्वानिरूपितत्वात् संशये चा-न्ततः कोट्योः संसर्गतयापि परस्परविरोधभानोपगमेन सकलसं-शयसंग्रहः । यदंशे संशयत्वं तत्कोटिविरोधस्यैव उक्तरूपेण उपा-दानसम्भवात् न वस्त्वन्तराविरोधभानमादायातिप्रसङ्गः ।

केचित्तु साध्यनिश्चयसाध्याभावनिश्चयप्रतिबध्यतावच्छेदकवि-शेष्यताशालित्वं समुदितार्थः संशये च धर्मिणि उभयप्रकारतानि-रूपितैकविलक्षणविषयता समुच्चयवैलक्षण्यायोपगम्यते इति सा-दृशविषयताया विभिन्नरूपेण उभयनिश्चयप्रतिबध्यतावच्छेदकतया नासम्भव इत्याहुः । तच्चिन्त्यम् ।

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटि-कज्ञानत्वादिकमुपेक्ष्य निरुक्तरूपेण संशयनिवेशस्य प्रयोजनं दर्शयति । तेनेति । न पक्षेति । पक्षविशेष्यकस्य । पक्षः साध्यवान्न वेत्यस्य । साध्यविशेष्यकस्य । साध्यं पक्षवृत्ति न वेत्याकारकस्य संशयस्य, नाननुगमः तथा सति फलस्याविलक्षणतया व्यभिचारे-ण कारणता भज्येतेति भावः ।

इदमुपलक्षणम्, साध्यवत्त्वद्वेदकोटिकसंशयाननुगमोऽपि बो-ध्यः । विशिष्य सम्बन्धानिवेशनप्रयोजनं दर्शयति । न वेति । सम्ब-न्धान्तरेण । तत्सम्बन्धातिरिक्तसम्बन्धेन । सन्देहे । सन्देहदशाया-म् । निर्णीतसम्बन्धेन । पक्षांशे साध्यीयसम्बन्धविधया तत्कालीन-निर्णयविषयीभूततत्सम्बन्धेन । पतदनन्तरमनुमितावितिपूरणीयम् । तत्सम्बन्धेन संशयसत्त्वेऽपि तत्सम्बन्धेन सिद्धिशून्यकाले इष्टाप-त्तिसम्भवाच्छिर्णीतेत्युक्तं, सम्बन्धमनिवेश्य साध्यनिर्णयसामान्यनि-वर्त्यत्वानिवेशेऽप्रसिद्धिप्रसङ्गात् यत्किञ्चिन्निश्चयनिवर्त्यत्वं यत्किञ्चि-

रसंसर्गकनिर्णयसामान्यनिवर्त्यत्वं वा यदि निवेश्यते तदाऽपत्ति-
प्रसङ्गो बोध्यः । धर्मत्वांशपरित्यागप्रयोजनमाह । न वा तमःप्रभृति-
ष्विति । स्वधर्मत्वसंशयविषयसाध्यकत्वं पक्षत्वमित्युक्तौ धर्मत्वनि-
वेशेऽव्याप्यवृत्तिसाध्यकघटादिपक्षकस्थले न पक्षतावैकल्यम्, यद्वादि-
समवेतत्वस्य प्रसिद्धा गगनादौ तत्संशयसम्भवादिति तमःप्रभृति-
पर्यन्तस्य पक्षत्वानुसरणम्, तथा च साध्ये सम्बन्धान्तरेण पक्ष-
वृत्तित्वसन्देहदशायां निर्णीतसम्बन्धेनानुमितिवारणाय प्रकृतसा-
ध्यतावच्छेदकसम्बन्धेन स्ववृत्तित्वसंशयस्यावश्यं निवेशनीयतया
तमःप्रभृतिसमवेतत्वस्याप्रसिद्धा साध्ये पक्षवृत्तित्वसंशयमादाया-
पि न तत्र पक्षत्वोपपत्तिरिति भावः । स्वरूपसम्बन्धेन तमोवृत्ति-
त्वस्य प्रसिद्धा तेन सम्बन्धेनानुमितौ नानुपपत्तिरतः समवायेने-
ति । पक्षे साध्यीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नधर्मितासंश-
यस्य पक्षतात्वे तमःप्रभृतिषु वृत्तिमत्साध्यसाधने नानुपपत्तिरत
आकाशादीति । तद्वैकल्यम् । पक्षतावैकल्यम् ।

सन्देहोऽनुमितौ हेतुः । विशेषणतया । पक्षधर्मताज्ञाननिष्ठानुमि-
तिजनकतायामवच्छेदको वा । अथ वा उपलक्षणतया तादृशजनक-
तायामवच्छेदकस्तत्राद्यं पक्षद्वयं दूषयति मूले सन्देह इति । विशेष-
णम् । अपेक्षणीयानुमित्यव्यवहितप्राक्सत्ताकं सत् अनुमितिकारणं
विशेषणविधया कारणतावच्छेदकं वेति यावत् । परामर्शपूर्वं
तस्य संशयस्य नाशादित्यन्वयः । यत्रादौ लिङ्गदर्शनं ततो व्या-
प्तिस्मरणं तदभिप्रायेण लिङ्गदर्शनस्य, यत्र तयोर्विपरीतक्रम-
स्तदभिप्रायेण व्याप्तिस्मरणस्य नाशकत्वमभिहितं, अत एकत्र
उभयोर्नाशकत्वासम्भवेऽपि न क्षतिः । आदिपदेन यत्र संशया-
नन्तरक्षणे व्याप्तिस्मरणाद्यनुगुणज्ञानोत्पादस्तदनन्तरमेव व्याप्ति-
स्मरणादिः तत्रत्यतादृशज्ञानसंग्रहः । द्वितीयं दूषयति । नोपल-
क्षणमिति । अव्यावर्त्तकतापत्तेः । सिद्धिस्थलेऽनुमित्यवारकतापत्तेः ।
तत्कालीनपरामर्शस्यापि कालान्तरीयसंशयविषयधर्मिवृत्तित्वाव-
गाहितया सामग्र्या अक्षतत्वादिति भावः ।

अथ साध्यसन्देहोऽनुमितौ हेतुरेव लिङ्गदर्शनादेः पूर्वोत्पन्नस्य
संशयस्य तेन विनाशेऽपि तदनन्तरं परामर्शाव्यवहितप्राक्क्षण-
जातसंशयान्तरादेवानुमितिरिति कल्प्यते ।

न चानुत्पन्न एव संशये यत्र स्वसामग्रीबलात् परामर्शोत्पत्तिस्तत्रानुमित्यनुदयप्रसङ्गः परामर्शकाले तदुत्तरञ्च विशेषदर्शनरूपप्रतिबन्धकवशेन संशयोत्पादासम्भवादिति वाच्यम् । फलानुरोधेन सर्वत्रैवानुमित्युपधायकपरामर्शाव्यवहितप्राक्क्षणे संशयोत्पादकल्पनात् । यत्र संशयोत्पादद्वितीयक्षण एव परामर्शसामग्री प्रमाणसिद्धा यत्र वा परामर्शसामग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिकस्तत्र परामर्शानन्तरं साध्यस्य प्रत्यक्षनिश्चय एव उपगम्यते तत एव प्रवृत्त्याद्युपपत्तेः तत्रानुमिनोमीत्यनुव्यवसायस्याप्यगत्या भ्रमत्वमेव कल्प्यते अनुगताननुगतसिषाधयिषाभावकूटविशिष्टसिद्ध्यभावस्यानुमितिहेतुत्वापेक्षया संशयहेतुतायां लाघवात् । संशयहेतुत्वोपगमे बाधनिश्चयदशायां संशयाभावादेवानुमितिवारणसम्भवात् नानाविधबाधाभावस्यानुमितिहेतुत्वाकल्पनेनानुमितिसामग्रीप्रतिबन्धकतायां तदनिवेशेन च लाघवात् । जनकज्ञानविरोधितयैव च बाधादीनां हेत्वाभासतोपपत्तेः । संशयस्य च कार्यतावच्छेदककोटौ कारणवैशिष्ट्य निवेश्य तादृशसंशयत्वेनैव हेतुता वाच्या, अतो दीधितिकारोक्तप्रकारस्य स्वत्वघटिततया स्वत्वाननुगमेन प्रतिबध्यतादीनां स्वस्वावच्छेदकभेदेन भिन्नानामननुगमे न च शब्दानुगममात्रपर्यवसानेऽपि न क्षतिः । संशयस्य बाधसाधारणतदभाववत्ताज्ञानत्वेन कारणत्वं न तु पक्षधर्मिकसाध्यतदभावोभयज्ञानत्वरूपसंशयत्वेन गौरवात् । बाधनिश्चयदशायाञ्च नानुमित्यापत्तिसम्भवः । प्रत्यक्षादिसाधारणालौकिकविशिष्टबुद्धित्वावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबन्धकताया आवश्यकत्वादिति तु न श्रद्धेयम् । बाधनिश्चयेऽप्रामाण्यग्रहसत्त्वेऽनुमित्यापत्तेः, अप्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजनविरहेणानिवेशात्, साध्यसन्देहेऽप्रामाण्यग्रहसत्त्वेऽप्यनुमित्युपगमे क्षतिविरहात्, संशयेऽप्रामाण्यनिश्चयेऽनुमित्युत्पादेऽपि संशये विषयसंशयस्याकिञ्चित्करत्वात् ,˚ तत्राप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैव निवेशनीयतयाऽप्रामाण्यशङ्कास्कन्दितबाधनिश्चयादनुमित्यापत्तेर्दुर्वारतापत्तेरिति चेन्न । प्रत्यक्षादिना निर्णीतस्यापि साध्यस्यानुमिन्मया अनुमितेरानुभविकत्वात् संशयस्य पक्षतात्वे तदनुपपत्तेरनुभवापलापे विशेषदर्शनमूलकप्रत्यक्षादेव सर्वत्र प्रवृत्त्यादिसम्भवे

अनुमानप्रामाण्यस्यैव विलयापत्तेः संशयानन्तरजातसिद्ध्यात्मकप-रामर्शादनुमित्यापत्तेश्च इति संक्षेपः।

(चि०) नापि साधकबाधकप्रमाणाभावः, उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात्। नापि अभावद्वयं तथा, बाधकप्रमाणाभावस्य व्यर्थत्वात्, ह्रदादेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेरावश्यकत्वेन अनुमित्यनुत्पादात्। नापि साधकप्रमाणाभावः श्रोतव्यो मन्तव्य इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात्। प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात्। एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च मन्तव्यश्चोपपत्तिभिरिति स्मरणात्।

(दी०) संशययोग्यतां निरस्यति। नापीति। साधकबाधकमाने सिद्धिबाधौ। केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाधः।

(गा०) संशयनाशेऽपि यावन्न निर्णयस्तावत्पर्यन्तं संशययोग्यताया अनपायात् तस्या एव पक्षतात्व सम्भवतीति तन्निराकरणे मूलस्य न्यूनता, अतो नापीति मूलमेव संशययोग्यतानिराकरणपरतया व्याचष्टे। संशययोग्यतामिति। साधकबाधकमानपदस्य सिद्धिबाधहेतुरूपयथाश्रुतार्थपरत्वे सर्वदैवानुमित्यनुपपत्तिः अनुमितिपूर्वं सिद्धिबाधहेतुचक्षुरादेः सिद्धिहेतुपरामर्शस्य च सर्वत्रैव सत्त्वादतः तत्पदं सिद्धिबाधपरतया व्याचष्टे। साधकेति। यद्यपि बाधकमानपदस्य बाधजनकतत्सामग्रीपरत्वेऽपि न क्षतिः बाधसामग्र्यसत्त्वक्षणे कदाप्यनुमितेरनुत्पादात्। तथाऽपि बाधजनकत्वमात्रेण तत्सामग्रीपरत्वे तदवच्छिन्नाभावस्य हेतुता लभ्येत तत्र चोक्तैवानुपपत्तिः बाधसामग्रीत्वेन तत्परत्वञ्च विना लक्षणां न निर्वहति लक्षणाया आवश्यकत्वे बाध एव लक्षणोचिता इत्यभिप्रायेण इदम्।

नतु पक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनि सा-

स्यामावाप्रसिद्धा बाधाप्रसिद्धिरतस्तदभावघटितपक्षतावैकल्यम् अत आह। केवलान्वयिनि चेति। पक्षानैष्टेति। साध्य इत्यादिः। धीः। निर्णयः। सुलभो बाध इति। तथा च तादृशबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः। सुलभ इत्यनेन तत्राभावांशे साध्यीयत्वभ्रमात्मकबाधस्यापि कदाचित् कस्यचित् पुरुषस्य प्रसिद्धा तदभावघटितत्वमपि पक्षतायाः सम्भवतीति सूचितम्।

(चि०) अथ सिषाधयिषितसाध्यधर्मा धर्मी पक्षः। तथा हि मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशेषानुमितीच्छया आत्मानुमानम्। अत एव 'प्रत्यक्षपरिकलितमपि अर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः। न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः' इति वाचस्पतिवचनयोरविरोधः अनुमित्साविरहाभ्यां तदुपपत्तेरिति चेन्न। सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अपि अभावात्, योग्यताया अनिरूपणात्, सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात् स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेन अनपेक्षितानुमानदर्शनाच्चेति।

(दी०) ननु तत्रापि पुनरनुमित्सा, ततः परामर्शान्तरं, स्मरणात्मकाद्वा परामर्शादनुमितीष्टसाधनताविषयकादनुमित्सा, ततोऽनुमितिरिति फलबलात् कल्पनीयमित्यत आह। सिषाधयिषेति। न च अनुमितिजनिकेच्छैव पक्षता। सा च क्वचित् स्वनिष्ठैव सर्वत्र ईश्वरनिष्ठैव सुलभेति वाच्यम्। तस्या नित्यत्वेन सिद्धौ सत्यामपि पक्षतामसङ्गात्। न च तस्यास्तदानीं न तज्जनकत्वम्। तद्धि न तद्योग्यता, अनपायात्। न च तदुपधानम्। अनुमितेः पूर्वं तदभावात्। न च तत्सामग्रीसमवधानम्।

कारणमात्रस्य पक्षताकुक्षिनिक्षेपासङ्गाच्छेषवैयर्थ्यात् । तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य पक्षरूपत्वापाताच्च ।

(गा०) व्याप्तिस्मरणादिना पूर्वानुमित्सानाशस्थलेऽनुमितिमुपपाद्य सिषाधयिषाविरहेत्यादिग्रन्थमवतारयति । नन्विति । तथापि । परामर्शपूर्वमनुमित्सानाशस्थलेऽपि । पुनरनुमित्सा । परामर्शानन्तरमनुमित्सान्तरम् ।

ननु परामर्शानन्तरोत्पन्नेन इच्छाजनकज्ञानेन इच्छाजननसमकालं परामर्शस्य विनाशात्तादृशेच्छातः कथमनुमितिरित्यत आह । ततः परामर्शान्तरमिति । विनश्यदवस्थानुमित्सयाऽनुमितिमुपपाद्याविनश्यदवस्थयाप्युपपादयति । स्मरणात्मकाद्वेति । चाक्षुषादिपरामर्शस्यानुमित्साक्षणे इष्टसाधनताप्रकारकसमूहालम्बनत्वं नोपपद्यते स्वायोग्यमुख्यविशेष्यकज्ञाने बहिरिन्द्रियस्यासामर्थ्यादतस्तस्य तथात्वमुपेक्ष्य तन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात् पूर्वानुमित्साजनकेष्टसाधनताज्ञानाहितसंस्कारसहकृतात्समूहालम्बनस्मरणात्मकपरामर्शान्तरस्यानुसरणम् । स्मरणेत्युपलक्षणम्, तथाविधमानसपरामर्शोऽपि बोध्यः ।

ननु फलपक्षाभावान्नैतादृशकल्पनासम्भव इत्याशङ्कां परिहरति । फलबलादिति । सिषाधयिषारूपकारणं विना अनुमित्यात्मककार्यानुपपत्तिबलादित्यर्थः । सिषाधयिषाविरहेऽपीति मूलस्यानुमातुरित्यादि', तेन ईश्वरस्य सिषाधयिषायास्तत्राक्षतत्वेऽपि न क्षतिः । इच्छारूपपक्षताया आत्मनिष्ठप्रत्यासत्त्यैव हेतुता इत्यभिप्रायेणेदम् ।

न च तथापि पूर्ववत् फलबलादनुमित्सां कल्पयित्वा अनुमितिः शक्योपपादिका। तत्र तदभावस्यानुभवसिद्धतया कल्पनासम्भवात्, पूर्वं कदापि यस्य मेघानुमितिर्नासीत् तेन तदिष्टसाधनताया अगृहीतत्वेन तद्गोचरस्मरणस्य तदनुभावकस्य तदानीमभावेन तद्गोचरानुभवस्य चासम्भवेन तदनुमित्सासामग्र्या एव दुर्घटत्वाच्च विषयनिष्ठप्रत्यासत्त्यैवानुमित्साया हेतुता वाच्या इत्यभिप्रायेण उक्तस्थले पक्षतोपपत्तिं दीधितिकृदाशङ्कते । न चानुमितीति । इच्छैव । समानाधिकरणव्यधिकरणसाधारणमिच्छामात्रमेव । स्व-

निष्ठेव । अनुमातृमनवेतेव । तस्याः । ईश्वरेच्छायाः । पक्षताप्रसङ्गादिति । तथा च सिद्ध्यनन्तरमनुमित्यापत्तिरित्यर्थः । तदानीम् । सिद्धिदशायाम् । न तज्जनकत्वमिति । तथा चानुमितिजनकत्वविशिष्टेच्छात्वेनैव हेतुता, कारणतावच्छेदकविशिष्टस्य प्राक्सत्त्वमेव फलोपधाने तन्त्रमिति नातिप्रसङ्ग इति भावः । जनकत्वेन जनकत्वे आत्माश्रयसत्त्वेऽपि स्फुटत्वात्तमुपेक्ष्य दूषणान्तरमाह । तद्धीति । योग्यता । स्वरूपयोग्यता । अनपायादिति । कारणतावच्छेदकधर्मरूपयोग्यतायाः सर्वदैव सत्त्वादित्यर्थः । तदुपधानम् । तद्वैशिष्ट्यम् । तदभावात् । अनुमितिवैशिष्ट्याभावात् । तथा चानुमित्युत्पादनियामिकाया अनुमितिविशिष्टेच्छायाः प्रागसत्त्वादनुमितेरेवानुपपत्तिः । इदमुपलक्षणम्, अनुमित्यनन्तरमनुमित्यापत्तिरपि द्रष्टव्या ।

नन्वनुमितिजनकतावच्छेदका यावन्तो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टत्वरूपतत्सामग्रीसमवधानमेव इच्छाविशेषणं देयं तच्च कार्याव्यवहितप्राक्क्षण एव इति नातिप्रसङ्ग इति शङ्कां परिहरति । न तत्सामग्रीति । कारणमात्रस्येति । तथा च परामर्शाद्यसत्त्वदशायामीदृशपक्षताविरहादेवानुमितिवारणसम्भवात् परामर्शादीनां हेतुताविलयप्रसङ्ग इति भावः ।

ननु सामग्रीसमवहितेच्छात्वेन न पक्षताया हेतुत्वमुपेयते सामग्रीघटकहेतूनां विशेष्यविशेषणभावे विनिगमनाविरहात् तेषां स्वतन्त्रकारणतयैवातिप्रसङ्गस्य वारितत्वात् किन्तु ईश्वरेच्छामादाय सिद्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्तत्वमेव ताद्रूप्येण उपेयते अतो नायं दोष इति दूषणान्तरमाह । शेषेति । अनुमितिसामग्र्या एव पक्षतात्वसम्भवेन इच्छारूपविशेष्यभागनिवेशस्य निष्प्रयोजनकत्वादित्यर्थः । अत्रेष्टापत्तौ दूषणान्तरमाह । तदानीमिति । तदानीम् । परामर्शादिसमवहितसिद्धिदशायाम्, अन्यथास्य सामग्रीविरहेत्यनेन । वक्तव्यतापातात् । सामग्रीमध्यनिवेशापातात् । तथा च तादृशकारणं सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव । एवञ्च तस्यैव पक्षतात्वमस्तु अलङ्कारणान्तरस्य पक्षताकुक्षिनिवेशनेनेति सिद्धान्तलक्षण एव पर्यवसानमिति भावः ।

(चि०) उच्यते—सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः । तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः । यत्र साधकप्रमाणे सति असति वा सिषाधयिषा, यत्र वा उभयाभावस्तत्र विशिष्टाभावात् पक्षत्वम् । यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वं तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम् ।

इति चिन्तामणौ पक्षताप्रकरणम् ।

(दी०) सिषाधयिषेति । यत्र अनुमित्सानन्तरं साध्यतव्याप्यवत्त्वविशिष्टपक्षस्मरणम्, अनुमितीच्छाधीनताविषयकतादृशस्मरणाद्वा अनुमित्सा, अनुमित्सापूर्वकालोत्पन्नविशेषणस्मरणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितात् साध्यतव्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरं च अनुमितिस्तत्र पक्षतासम्पत्तये सहकृतान्तं साधकमानविशेषणम् ।

(गा०) सिद्धान्तलक्षणे सिद्ध्युत्तरक्षणे सिषाधयिषाधीनानुमितेरुपपादनाय सहकृतान्तविशेषणमुपात्तम्, तच्च तदैवोपपद्यते यदि सिद्धिसिषाधयिषापरामर्शानां त्रयाणां अनुमित्यव्यवहितप्राक्क्षणेऽवस्थितिः सम्भवति, न चैवमुपपद्यते, आत्मसमवेतयोग्यविशेषगुणानां द्विक्षणस्थायितया त्रयाणां युगपदनवस्थानात् ।

न च यत्रापेक्षाबुद्ध्यात्मकपरामर्शस्य साध्यनिश्चयस्य वा प्रथममुत्पादस्तत्रैव तृतीयक्षणे त्रयाणामेवावस्थानं सम्भवति इति वाच्यम् । अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमङ्गीकुर्वाणैस्तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादानभ्युपगमात् । अन्यथा स्वसमानाधिकरणस्वानन्तरोत्पन्नविशेषगुणात्मकनाशकबलात् तस्या अपि तृतीयक्षणे विनाशापत्तेरित्याशङ्कापरिजिहीर्षया सिद्ध्यात्मकसमूहालम्बनपरामर्शस्थले तादृशविशेषणप्रयोजनं दर्शयति । यत्रेत्यादिना । अनुमित्साव्यवहितोत्तरक्षणे विशिष्टपक्षप्रत्यक्षं न सम्भवति,

इच्छोत्पत्तिकाले ज्ञानानुत्पत्त्या विशेषणज्ञानघटितसामग्रीविरहात्, इच्छापूर्वक्षणे तादृशसामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या बलवत्त्वेन तस्या एवोत्पादासम्भव इत्यतो विशिष्टस्मरणानुधावनम् । न्यूनताभङ्गाय परामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनन्तरोत्पन्नेच्छास्थले तद्दर्शयति । अनुमितीति । यत्रेत्यनुषज्यते । इच्छासामग्रीसम्पत्तयेऽनुमितीष्टसाधनताविषयकेति । तादृशस्मरणात् । साध्यतद्व्याप्यविशिष्टपक्षस्मरणात् । पूर्वोक्तयुक्त्या चाक्षुषादिपरामर्शस्यानुमितीष्टसाधनताग्राहित्वासम्भवात्, यत्र परामर्शाव्यवहितपूर्वक्षणे इष्टसाधनताज्ञानं तत्र तत्पूर्वक्षण एव फलेच्छासम्भवेन तस्याः परामर्शोत्पत्तिसमये नाशात् तदुत्तरमनुमित्साया असम्भवेनेष्टसाधनताविषयकपरामर्शस्याऽऽवश्यकत्वात् स्मरणानुधावनम् । न्यूनतापरीहाराय प्रत्यक्षात्मकपरामर्शस्थले प्रयोजनमाह । अनुमित्सापूर्वेति । अत्रापि यत्रेत्यनुषज्यते । प्रत्यक्षात्मकधूमत्वादिविशेषणज्ञानस्थले तज्जनकसन्निकर्षादितस्तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव भविष्यति न त्विच्छा । विनश्यदवस्थसन्निकर्षाद्विशेषणप्रत्यक्षानुधावने च प्रयासगौरवमतो विशेषणस्मरणपर्यन्तानुधावनम् । अनुमित्सापूर्वकाले परामर्शजनकसन्निकर्षसत्त्वे तस्या एव अनुपपत्तिरतोऽनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितादिति । सहकृतान्तम् । सहकृतान्तभागोपस्थाप्यसिषाधयिषाविरहवैशिष्ट्यम् । तस्य अभावविशेषणत्वे सिषाधयिषादशायां तदभावविशिष्टस्य सिद्ध्यभावस्यासम्भवात् सिद्धौ सत्यामसत्याञ्चानुमित्यनुपपत्तिरतः साधकमानविशेषणमिति ।

(दी०) सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारिका अनुमितिविषयिणीच्छा । यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वे अनुमित्यनुत्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते वह्निज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरमनुमित्युत्पादाच्च

(गा०) सिषाधयिषापदस्य सिद्धीच्छासामान्यपरत्वे प्रत्यक्षत्वादिप्रकारकेच्छाबलादसत्यां प्रत्यक्षादिसामग्र्यां सिद्धिदशाया-

मनुमित्यापत्तिः, अनुमितिगोचरेच्छासत्त्वे यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छाबलात् सिद्धिकालेऽनुमित्यापत्तिः । न चानुमित्युत्पत्त्यापि तादृशेच्छाविषयसिद्धेस्तत्रानुमितिरिष्टैवेति वाच्यम् । प्रकृतानुमित्युत्पत्त्यैव यादृशेच्छाया विषयसिद्धिस्तादृशेच्छासत्त्वे एव सिद्धिकालेऽनुमितेरानुभविकत्वात् उक्तेच्छायाश्चान्तत उपस्थितपदार्थगोचरमानसज्ञानेनापि विषयसिद्ध्या अकिञ्चित्करत्वादित्यतः सिषाधयिषापदार्थं व्याचष्टे । सिषाधयिषा चेति ।

वह्निविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वे सिद्धिसत्त्वे वह्न्यनुमित्यनुत्पादात्तत्साध्यविशिष्टेति । तत्सम्बन्धेन तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः । तेन कालिकसम्बन्धेन वह्निविशिष्टपर्वतविषयकानुमितिर्जायतां द्रव्यत्वावच्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वेऽपि सिद्धिकाले संयोगादिना न वह्नित्वावच्छिन्नस्यानुमितिः । वह्निविशिष्टमहानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानुमितिर्जायतामितीच्छाबलात् सिद्धिसत्त्वे पर्वतो वह्निमानित्यनुमित्यनुत्पादात् तत्पक्षेति । तत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः ।

न च यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छाबलादिव आलोकवान् पर्वत इत्याद्यनुमितिसामग्रीदशायां वह्निमत्पर्वतविषयकानुमितिर्जायतामितीच्छाबलादपि सिद्धिसत्त्वे वह्निविधेयकानुमितिर्न जायते तत्कालीनसिद्ध्यप्रतिवध्यालोकाद्यनुमित्युत्पत्त्यैव तादृशेच्छाविषयवास्तववह्निमत्पर्वतविषयकानुमितिसिद्धेरित्युक्तरूपेणापि इच्छाया उत्तेजकत्वं न सम्भवतीति वाच्यम् । साध्यविशिष्टपक्षनिरूपितविलक्षणविषयिताप्रकारकत्वेनैवेच्छाया उत्तेजकत्वोपगमात् । आलोकवान् पर्वत इत्याद्यनुमितेर्वह्निविशिष्टपक्षनिरूपितविलक्षणविषयिताशून्यत्वेन तदुत्पत्त्या तादृशविषयिताप्रकारकेच्छाविषयसिद्ध्यसम्भवात् । साध्यविशिष्टपक्षनिरूपितत्वञ्च साध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्वमतो ह्रदो वह्निमानित्यादौ साध्यविशिष्टपक्षाप्रसिद्धावपि न तादृशविषयितायास्तत्प्रकारकानुमित्साया श्चाप्रसिद्धिः । ह्रदादिनिष्ठस्य तादृशप्रमवृत्तिविषयितानिरूपकत्वस्यापि ह्रदांशे प्रकारीभूतवह्न्याद्यवच्छिन्नत्वात् ।

वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वेत्यनेन तत्साध्यता-

वच्छेदकावच्छिन्नत्संसर्गावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदकावच्छिन्नाद्देश्यताकत्वं विवक्षितं अतो वह्निमान् पर्वतो घटवानित्याद्यनुमितिसामग्रीदशायां पूर्वोक्तयुक्त्या वह्निमत्पर्वतविषयकानुमितिर्जायतामित्याकारकेच्छाबलात् पर्वतादिपक्षकवह्न्यादिविधेयकानुमित्यनुत्पादेऽपि न क्षतिः । तादृशोद्देश्यतात्वेन च तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयं तेन केवलपर्वतत्वावच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताकत्वप्रकारकानुमित्साद‍शायां पर्वते अन्यानुमितिसामग्रीसत्त्वे वह्नेः सिद्धिसत्त्वे न वह्न्यनुमित्यापत्तिः (१) । साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशप्रयोजनं दर्शयति । यत्किञ्चिदिति । यत्किञ्चिद्विषयकत्वप्रकारकत्वनिवेशेऽपि यत्किञ्चिज्ज्ञानं जायतामित्यादीच्छावारणं सम्भवतीति यत्किञ्चिद्गोचरत्वप्रकारकेच्छानुधावनम् ।

न चेच्छापूर्वं यत्किञ्चिद्गोचरज्ञानस्यावश्यं सिद्धत्वात् तादृशेच्छैव न सम्भवति ज्ञानगोचरेच्छायाः स्वरूपसत्या स्वविषयसिद्धेरेव विरोधित्वात् । तदुक्तं न हि ज्ञाने जाते ज्ञानेच्छा भवतीति वाच्यम् । एतदुत्तरवर्त्ति यत्किञ्चिद्गोचरं ज्ञानं जायतामित्याद्याकारकेच्छाया विवक्षितत्वात् ।

नन्वनुमितित्वप्रकारकत्वं निवेश्यैव तथाविधेच्छावारणसम्भवे किं गुरुतरसाध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनेनेत्यत आह । अनुमितित्वाप्रकारिकायामपीति । प्रत्यक्षाद्यात्मकसिद्धिदशायां पर्वतं वह्निमानं जायतामित्याकारकेच्छा न सम्भवतीति तद्विषयीभूतप्रत्यक्षादिरूपसिद्धेरेव सत्त्वात्, अत प्रत्यक्षाद्यतिरिक्तेमिति । शाब्दादिरूपसिद्धौ सत्यां प्रत्यक्षाद्यतिरिक्तं ज्ञानं जायतां इत्या

---

(१) एवं पक्षतावच्छेदकादिनिष्ठानवच्छिन्नत्वावगाहित्वमपि निवेशनीयं अन्यथा जातिमान् वह्निव्याप्यवानिति परामर्शकाले पर्वतो वह्निमानिति सिद्धिसत्त्वेऽनवच्छिन्नत्वानवगाहीच्छाकाले पर्वतो वह्निमानित्यनुमित्यापत्तिः, पर्वतो वह्निव्याप्यवानिति परामर्शकालीनजातिमान् वह्निव्याप्यवानिति परामर्शशून्यकालीनानवच्छिन्नत्वानवगाहीच्छानाश्च तत्तद्व्यक्तित्वेनोत्तेजकत्वं इति बोध्यमिति पाठः क्वचित् पुस्तके दृश्यते ।

दीच्छाया उत्पादासम्भवात् । प्रत्यक्षाद्यनन्तरमिति । प्रत्यक्षादिरूपसिद्ध्यनन्तरमित्यर्थः । अनुमित्युत्पादाद्येति । तथा चानुमितित्वप्रकारकत्वं निवेशयितुमशक्यमेव तादृशेच्छानामसंग्रहप्रसङ्गादिति भावः ।

इदमुपलक्षणम् । अनुमितित्वप्रकारकत्वनिवेशेऽपि घटाद्यनुमितिर्जायतामित्यादीच्छाकाले सिद्धिसत्त्वे वह्न्याद्यनुमितिवारणाय प्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकम् ।

न च प्रकृतसाध्यादिविषयिणी या अनुमितिस्तद्विषयकत्वनिवेशेनापि दर्शितेच्छावारणसम्भव इति वाच्यम् । दर्शितेच्छाया अपि घटाद्यनुमितित्वेन वह्न्यादिगोचरसमूहालम्बनानुमितिविषयकत्वात् ।

न चानुमितित्वप्रकारकत्वानिवेशेऽपि अनुमितिरेव यत्र प्रत्यक्षत्वादिना इच्छाविषयस्तत्रानुमित्यापत्तिरिष्टत्वात् । अनुमितौ प्रत्यक्षत्वभ्रमदशायामेव तादृशेच्छाया उत्पादात् तस्या अनुमितित्वप्रकारकेच्छासमशीलत्वादिति हृदयम् ।

न चानुमितित्वप्रकारकत्वस्यानिवेशे पर्वते वह्निः प्रत्यक्षतः सिद्धो शाब्दसामग्र्याञ्च सत्यां पर्वते प्रत्यक्षातिरिक्तं वह्निज्ञानं जायतामितीच्छासत्त्वेऽनुमित्यापत्तिरिति वाच्यम् । तत्र पक्षतासत्त्वेऽप्यनुमितित्वप्रकारकेच्छाविरहविशिष्टसमानविषयकशाब्दसामग्र्याः प्रतिबन्धकत्वादेवानुमितिवारणसम्भवात् ।

अथ सिद्धिदशायां पर्वते वह्नेरन्यज्ज्ञानं जायतामितीच्छासत्त्वेऽनुमित्यापत्तिस्तस्या अप्यनुमितिविषयकत्वात् । न चेष्टापत्तिः, तदुत्तरं पर्वतो वह्निमान् इत्यादिमानसाद्युत्पत्त्याऽपीच्छाविषयसिद्धेस्तादृशेच्छाया यत्किञ्चिद्गोचरं ज्ञानं जायतामित्येतादृशेच्छातुल्यत्वात् ।

न च प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबन्धकसत्त्वान्नापत्तिरिति वाच्यम् । प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टाया एव मानसादिसामग्र्या अनुमितिप्रतिबन्धकत्वात् । अन्यथा सिद्धिशून्यकालेऽपि तादृशेच्छासत्त्वेऽनुमित्यनुत्पादप्रसङ्गात् ।

न चोक्तयुक्त्या वह्निविधेयकत्वावगाहित्वनिवेशस्यावश्यकत्वात् वह्निप्रकारकत्वावगाहिदर्शितेच्छाबलात् नानुमितिप्रसङ्गः, तद्विधेयकत्वावगाहीच्छादशायाञ्च जायत एवानुमितिः विधेयतायाः प्रत्य-

क्षेऽप्रामाणिकतया तत्प्रकारकेच्छाया अनुमित्युत्पत्त्यैव विपयसिद्धेरिति वाच्यम् । विधेयतायाः प्रत्यक्षन्यावृत्तत्वे तत्प्रकारिकायाः प्रत्यक्षान्यत्वाप्रकारिकाया अपीच्छायाः प्रत्यक्षसिद्धिकाले सम्भवात् प्रत्यक्षान्यत्वप्रकारकेच्छापर्यन्तानुसरणस्य निर्वीजत्वात् ।

न च विधेयता प्रत्यक्षव्यावृत्तैव तदवगाहित्वसूचनायैवोपदर्शितेच्छाकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्यम् । एवमपि वक्ष्यमाणस्य शाब्दसिद्धिकालेऽशाब्दं ज्ञानं जायतामितीच्छाबलेनानुमितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य सङ्गमयितुमशक्यत्वात् । तादृशेच्छायाः प्रत्यक्षव्यावृत्तविधेयतायवगाहित्वे प्रत्यक्षसामग्रीकालेऽपि तद्बलादनुमित्युत्पत्त्यौचित्यात् । तदनवगाहित्वे सिद्धावप्यनुत्तेजकत्वात् ।

अत्रोच्यते । अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकेच्छात्वेनैवानुगमः । पर्वते वह्नेरन्यज् ज्ञानं जायतामित्याद्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्याश्चानुमितेर्वारणाय तथाविधेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकता कल्प्यते इति न दोषः ।

न च तासां तत्तद्व्यक्तित्वेनानन्तप्रतिबन्धकताकल्पनामपेक्ष्यानुमितित्वादिरूपप्रकारविशेषमन्तर्भाव्यैवानुमित्सानामुत्तेजकत्वमुचितमिति वाच्यम् । तथा सति पर्वते वह्नेरन्यज् ज्ञानं जायतामितीच्छाकाले तथाविधोपनीतभानविरोधिघटाद्यनुमितीच्छाविशिष्टतत्सामग्रीसत्त्वे सिद्धौ सत्यां वह्न्याद्यनुमित्युपपत्तये तादृशतादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्धावुत्तेजकत्वापत्त्या तदभावसहस्रस्य मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण सिद्धिप्रतिबन्धकतानन्त्यप्रसङ्गात् ।

(दी०) यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य विशेषणत्वादिच्छाया अननुगमेऽपि न क्षतिः ।

(गा०) ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छाया उपादाने पक्षोद्देश्यकत्वावच्छिन्नसाध्यविधेयकत्वप्रकारकेच्छाया असङ्ग्रहः । एवं विपयानुपरक्तानुमितिविपयिण्या अनु-

मितिर्जायतामितीच्छाया अपि निरुक्तरूपेणासङ्ग्रहः। न च सा अ-सङ्ग्राह्येव, असिद्धसाध्यान्तरानुमितिसामग्र्यामसत्यां तद्बलादपि सिद्धस्य प्रकृतसाध्यस्यानुमितेः तदिच्छाविषयसिद्ध्यनुरोधेनावश्यकत्वादित्यत आह। यादृशयादृशीति। असत्यां सिद्धौ यत्किञ्चिद्गोचरं ज्ञानं जायतामित्यादीच्छासत्त्वेऽनुमित्युत्पादात् तासाञ्चानुत्तेजकत्वात् सिद्धौ सत्यामिति। तत्तदिच्छाभावसमुदायस्येति। साध्यविशेषविशिष्टपक्षविशेष्यकत्वावगाहित्वप्रकारकेच्छानां तत्तदवगाहित्वप्रकारकानुमितिगोचरेच्छात्वेनानुगमय्य एकैकाभावा निवेश्यन्ते, अतथाविधानाम् अनुमितिर्जायतां प्रत्यक्षान्यज्ञानं जायतामित्याकारकेच्छानान्तु यद्यद्व्यक्तिसत्त्वे सिद्धिदशायां अनुमितिस्तत्तद्व्यक्तित्वावच्छिन्नाभावा एव निवेशनीया अन्यथा अतिप्रसङ्गात् सिद्धौ तत्कालीनसिद्धिभेदा एव वा।

एतेन तत्कालीनसंयोगविभागादिव्यक्तिविशेषाभावनिवेशमादाय विनिगमनाविरहोऽपि निरस्तः। सामानाधिकरण्यसम्बन्धेन तदत्यन्ताभाववैशिष्ट्यनिवेशापेक्षया तत्तत्सिद्धिभेदानां विशेषणताविशेषसम्बन्धेन वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसम्बन्धानिवेशे च लाघवम्। सिद्ध्युत्तरं तथाविधेच्छोत्पत्तिकालेऽनुमित्यापत्तिस्तु इच्छासामग्र्या अनुमितिविरोधित्वादेव न सम्भवतीति ध्येयम्।

इदमवधेयम्। तादृशेच्छाभावसमुदायस्य न तत्समुदायत्वेन सिद्धौ विशेषणत्वं(१) किन्तु तत्तदभावत्वेनैव युगपत्तावदभावानां तथात्वं तावदभावमात्रविषयकधीविषयत्वरूपस्य तावदभावसमुदायत्वस्य ताद्रूप्येण निवेशे तावदभावानां तत्तदभावत्वेन नि-

---

(१) तादृशेच्छाभावसमुदायत्वस्य दुर्वचत्वात्, न च तावदभावमात्रविषयकधीविषयत्वं तत्, तावत्त्वस्य दुर्वचत्वात्। तावदभावविषयकबुद्धेस्तत्तदभावविषयकत्वेन निवेशे तु तत्तदभावविशिष्टसिद्धेरेव निवेशयितुमुचितत्वात् तत्तदभावानां मिथो विशेष्यविशेषणभावानापन्नानां निवेशे च प्रत्येकाभाववैशिष्ट्यस्यातिप्रसक्तत्वेनावच्छेदकत्वायोगादिति चेदेकविशिष्टापराभावत्वेनाभावानां निवेशनीयत्वात्। इति क्वाचित्कः पाठः।

वेशनीयतया तत्तद्भावत्वेन तत्तद्भाववैशिष्ट्यनिवेशापेक्षया महागौरवात् । तादृश्या यत्किञ्चिद्विषयतत्तद्व्यक्तित्वेन निवेशे तथाविधधीसहस्रस्य विनिगमनाविरहेण निवेशप्रसङ्गात् ।

यदि च मिथो विशेष्यविशेषणभावानापन्नेषु नानाविशेषणेषु व्यासज्यवृत्तिकमवच्छेदकत्वं सिद्धान्तविरुद्धमिति मन्यते तदा एकाभावविशेषितापराभावस्यावच्छेदकत्वमुपेयम् । तत्र च विशेष्यविशेषणभावे विनिगमनाविरहेऽपि न क्षतिः गत्यन्तराभावात् । तत्तद्भावमात्रविषयकधीविषयत्वेन निवेशेऽपि ज्ञाने तत्तद्भावविषयितानां एकविशिष्टापरत्वेनैव निवेशनीयतया विशेष्यविशेषणभावे विनिगमनाविरहस्याऽऽवश्यकत्वादिति । इच्छाया अननुगमेऽपि । एकरूपेण सर्वासामिच्छानामुपादानासम्भवेऽपि । न क्षतिः । न सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यानुमितिहेतुत्वानुपपत्तिः । तावद्भावाविशिष्टसिद्ध्यभावस्यानुगतत्वादिति भावः ।

इदं पुनरत्रावलोकनीयम् । वह्निविशिष्टपर्वतमहानसोभयानुमितिर्जायतामित्याकारकेच्छानामपि तत्साध्यविशिष्टतत्पक्षावगाहित्वप्रकारकतया पर्वते वह्नेः सिद्धिकाले महानसपक्षकानुमित्यादिसामग्र्यामसत्यां तादृशेच्छाबलात् पर्वते वन्ह्यनुमित्यापत्तिः, अनुमित्यंशे तत्साध्यविशिष्टतत्पक्षविषयकत्वान्यांकिञ्चिद्विषयकत्वाप्रकारकत्वविशेषणस्य इच्छायां निवेशे वह्निविशिष्टं पर्वतं महानसञ्चानुमिनुयामित्यादिसमूहालम्बनेच्छाया असङ्ग्रहप्रसङ्गः । वह्निविशिष्टपर्वतविषयिणी 'महानसाविषयकानुमितिभिन्नानुमितिर्जायतामित्याकारकेच्छाबलात् उपदर्शितस्थलेऽतिप्रसङ्गस्यावारणता चेतीच्छाविषयतावच्छेदकतायाः पर्याप्तिनिवेशनमावश्यकम् । तथा च वह्निविशिष्टपर्वतानुमितिर्भवत्वित्यादीच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैव उत्तेजकत्वं पर्यवसितम्, अनुमितित्वानन्तर्भावे तादृशेच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वपरिसमाप्तविषयतावच्छेदकत्वाभावेनाऽसङ्ग्रहत्वात् । एवञ्चानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरूपेण सङ्ग्रहाभिधानमसङ्गतम् ।

न च तत्कल्पं परित्यज्यैव यादृशयादृश इत्याद्यभिधानम्, इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक् पृथगभा-

धनिवेशनमेवाभिप्रेतमिति वाच्यम् । पक्षान्तरसूचकवाकाराद्यभावात् ।

अथ अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुगम एव सम्भवति, तथा हि तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वपर्याप्तावच्छेदकताकत्वं तादृशधर्मघटकपरिसमाप्तावच्छेदकताकत्वं तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकत्वमेव पर्यवसितम्, एवञ्च तत्साध्यविशिष्टतत्पक्षविषयकप्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकेच्छात्वादिना प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथगुत्तेजकत्वापेक्षया निरुक्तधर्मघटकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकतायामेव प्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नत्वनिवेशनमुचित लाघवात्, इत्थञ्च तादृशरूपेणैव प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामपि सङ्ग्रहः सम्भवति ।

न च वह्निविशिष्टपर्वतविषयकं जायतामित्याकारकेच्छायाः सिद्ध्यधीनसंस्कारोत्पत्त्यैव चरितार्थतया वारणाय विषयतायामनुमितित्वावच्छिन्नत्वनिवेशनस्याऽऽवश्यकतया न तत्सङ्ग्रह इति वाच्यम् । समवायेन किञ्चिदवच्छिन्नत्वं निवेश्यैव तादृशेच्छावारणसम्भवादिति चेत् ? तर्हि पक्षांशे साध्यावगाहित्वेनानुमितिविषयकेच्छानामुक्तरूपसमशीलरूपान्तरेण उत्तेजकत्वापेक्षया तादृशावच्छेदकतायामेव पक्षांशे साध्यावगाहित्वीयावच्छेदकताभिन्नत्वमपि निवेश्यतां तावतैव तत्सङ्ग्रहस्यापि सम्भवात् इच्छाया अननुगमाभिधानासङ्गतिः ।

न च विषयतायां साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्वनिवेशनमावश्यकम्, अन्यथा अन्यानुमितिसामग्रीसमवहितानामनुमितिर्जायतामित्याकारकविषयविशेषानुपरक्तानुमितीच्छानां वारणासम्भवादिति, अन्यानुमितिसामग्र्यसमवहिततादृशेच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वस्योपगन्तव्यतया उत्तेजकानामननुगमाभियानसङ्गतिरिति वाच्यम् । तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतयैवातिप्रसङ्गवारणसम्भवेन तासां वारणानौचित्यात् । साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्वमधिकमनुमितिनिष्ठविषयतायां निवेश्य

दर्शितसामग्र्यसमवहिततथाविधेच्छानां तत्तद्व्यक्तित्वेन उत्तेजकताकल्पने तत्तदिच्छाभावानां विशेष्यविशेषणभावे विनिगमनाविरहेण गौरवप्रसङ्गात् । अन्यानुमितिसामग्रीकालीनतादृशेच्छानां प्रतिबन्धकत्वे तत्कालीनवायुसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबन्धकताप्रसङ्गवत् तादृशसामग्र्यभावकालीनतथाविधेच्छानामुत्तेजकतामतेऽपि विनिगमनाविरहेऽपि तत्तदिच्छाकालीनसंयोगविशेषाणामुत्तेजकताप्रसङ्गस्य दुर्वारत्वात् । अथ योक्तानुगतरूपेणोत्तेजकीभूतायामिच्छायामनुमितिर्जायतामित्याकारकान्यानुमितिसामग्रीसमवहितेच्छाव्यक्तीनां भेदा एव निवेशनीया न तु तासामनुमितिप्रतिबन्धकत्वमिति, तत्तदिच्छाभेदनिवेशस्थले तत्कालीनवायुसंयोगादिभेदनिवेशनेन नोपपत्तिः, इच्छायां तत्तद्भेदस्याऽव्यवच्छेदकत्वात्तत्तत्संयोगाभावानां वैशिष्ट्यनिवेशे च तादृशवैशिष्ट्यस्य सामानाधिकरण्यरूपतया साक्षात्सम्बन्धेन इच्छाभेदनिवेशे लाघवस्यैव विनिगमकत्वात् ।

अत्राहुः । उक्तसकलेच्छानां निरुक्तरूपेणानुगमेऽपि एतत्क्षणानन्तरक्षणेऽनुमितिर्भवत्वित्याकारकेच्छानामेव निरुक्तरूपेणासङ्ग्रहात्तत्तद्व्यक्तित्वेन पृथगभावा निवेशनीयाः तादृशक्षणवृत्तित्वस्यावच्छेदकताभेदं उक्तावच्छेदकतायां निवेश्य सङ्ग्रहे कालान्तरेऽपि तथाविधेच्छाबलात् अनुमित्यापत्तेः, कालान्तरे अनुमित्युत्पत्त्या च तादृशानुमितेस्तद्विषयालिङ्गेरेिष्टापत्त्ययोगादित्यननुगमाभिधानसङ्गतिः ।

न च कालान्तरीणतादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतया तादृशेच्छाबलादनुमित्यापत्तिवारणसम्भव इति वाच्यम् । उपदर्शितैकैकधर्मप्रकारकैकानुमितेरव्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वापेक्षया तत्समानप्रकारककालान्तरीणबहुतरेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वे गौरवात् ।

न चैवमपि प्राथमिकस्य साध्यविशिष्टपक्षविषयित्वप्रकारकत्वविशेषणस्याभिधानासङ्गतिर्दुर्वारैवेति वाच्यम् । अनुमितिनिष्ठविषयतायां साध्यविशिष्टपक्षविषयकत्वाद्यन्यप्रकारकत्वानवच्छिन्नत्वनिवेश एव तत्तात्पर्यात् ।

वस्तुतः साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनमप्यावश्यकम्, अन्यथा किञ्चिज्ज्ञानं जायतां यत्किञ्चिद्गोचरं ज्ञानं जा-

यतामितीच्छावारणासम्भवात् तत्सद्भावे तादृशीनां सर्वासामिच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वे गौरवात् । अनुमितिर्जायतामित्यादीच्छानाञ्च पृथगनुमितित्वादिपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैवोत्तेजकता अन्यानुमितिसामग्र्यसमवहिततादृशेच्छानाञ्च तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वमेवेति सर्वं समञ्जसम् ।

(दी०) धूमेन अनुमिनुयामितीच्छायामालोकपरामर्शादसत्यामपि सिद्धौ यदि नानुमितिस्तदा अन्यमात्रलिङ्गकानुमितीच्छा कामिनीजिज्ञासादिवत् पृथक् प्रतिबन्धिका । यदि च तत्र अनुमितिस्तदा सिद्धिसत्त्वे तत्र अनुमितेर्वारणाय तल्लिङ्गकानुमितीच्छा तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छा वा वाच्या ।

(गा०) ननु धूमेन पर्वते वह्निमनुमिनुयामित्याकारकेच्छाबलाद् धूमादिलिङ्गकानुमित्युत्पत्त्या तत्साधारणरूपेणैव सिषाधयिषाणां सिद्ध्युत्तेजकताया आवश्यकत्वात् तत्तत्सिद्धिकालेऽसत्यपि धूमपरामर्शे आलोकादिपरामर्शादनुमित्यापत्तिः पक्षताया अक्षतत्वादित्यत आह । धूमेनेति । भिन्नलिङ्गकेच्छासत्त्वेऽपि सिद्धिदशायामेव यदि नानुमितिस्तदा तादृशेच्छायाः प्रतिबन्धकत्वं न सम्भवतीत्यतोऽसत्यामपि सिद्धाविति, तत्रानुमितेः सन्दिग्धतया यदीति । तदेति । तल्लिङ्गकानुमिताविति शेषः ।

अन्यमात्रेति । तदन्यमात्रलिङ्गकत्वप्रकारकासिद्धीत्यर्थः । धूमलिङ्गकानुमितिरालोकलिङ्गकानुमितिश्च जायतामित्याद्याकारकसमूहालम्बनेच्छाकाले आलोकादिपरामर्शादनुमित्युपपत्तये मात्रेति । तदन्यमात्रलिङ्गकत्वप्रकारकत्वञ्च तल्लिङ्गकत्वाप्रकारकत्वे सति किञ्चिल्लिङ्गकत्वप्रकारकत्वम् । अतः प्रमेयसामान्यलिङ्गकस्थले तदन्याप्रसिद्धावपि न दोषः । तल्लिङ्गकत्वाप्रकारकत्वञ्च तल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नानुमितिनिष्ठविशेष्यताकान्यत्वम् । अत आलोकेनेन्धनं धूमेन तु वह्निमनुमिनुयामित्यादीच्छादशायामालोकादिलिङ्गकवह्न्याद्यनुमितेर्नापत्तिः । आ-

लोकलिङ्गकत्वप्रकारताशरीरे च वास्तवालोकादिप्रकारता न निवेशनीया किन्तु आलोकत्वाद्यवच्छिन्नप्रकारतैव, अन्यथा आलोकत्वादिना धूमत्वादिना च धूमादिकमालोकादिकमवगाहमानयोरिच्छयोरालोकलिङ्गकानुमित्यादौ प्रतिबन्धकत्वतदभावयोरापत्तेः। द्रव्येणानुमिनुयामित्यादीच्छाया आलोकादिलिङ्गकानुमित्यविरोधित्वोपपत्तये चालोकत्वाद्यवच्छिन्नत्वस्थले आलोकाद्यवृत्तित्वेनाज्ञायमानधर्मावच्छिन्नत्वमेव निवेश्यं द्रव्यत्वादेरालोकत्वादिविरुद्धत्वभ्रमदशायां तादृशेच्छाया विरोधित्वोपपादनायालोकत्वादेरालोकादिवृत्तित्वज्ञानशून्यकालीनाया आलोकेनानुमिनुयामित्यादीच्छाया अविरोधित्वोपपत्तये च वास्तवालोकादिवृत्तित्वस्य तेन रूपेण ज्ञायमानत्वस्य चोपेक्षणम्। धूमत्वादेरालोकादिवृत्तित्वग्रहदशायां धूमेनानुमिनुयामित्यादीच्छाया आलोकादिलिङ्गकानुमित्यविरोधित्वमिष्टमेव। विरोधित्वञ्च तादृशेच्छाया धूमत्वादेरालोकत्वादिविरुद्धत्वग्रहदशायामेव।

वस्तुतस्तु द्रव्यं नालोक इत्यादिज्ञानशून्यकालीनानां आलोको द्रव्यमित्यादिज्ञानकालीनानां वा इच्छानां तत्तद्व्यक्तित्वेन भेदकूट एव स्वातन्त्र्येण प्रतिबन्धकतावच्छेदकेऽनुप्रवेशनीयः तेन उक्तकल्पे कालान्तरीणपुरुषान्तरीयज्ञानवारणाय स्वसमानकालीनत्वस्वसमानाधिकरणत्वयोर्ज्ञानविशेषणतया धौव्य स्वपदेन फलीभूतानुमित्युपादाने यादृशानुमितिदशायां क्वचिदपि धर्मे नालोकाद्यवृत्तित्वज्ञानं प्रसिद्ध्यति तत्र स्वसमानाधिकरणस्वसमानकालीनालोकत्वादिविरुद्धत्वज्ञानाविषयधर्मेच्छालिङ्गकत्वप्रकारकानुमित्साभिन्नानुमित्साभावरूपकारणाप्रसिद्धिः स्वत्वाननुगमेन कार्यकारणभावस्य तत्तदनुमितिव्यक्तिविश्रामश्च। भेदप्रतियोग्यनुमित्सोपादाने चालोकेन द्रव्येण वाऽनुमिनुयामित्याद्याकारकयादृशेच्छासमानाधिकरणसमानकालीनतादृशज्ञानाप्रसिद्धिस्तादृशेच्छायास्तथाविधस्वभिन्नत्वेनालोकादिलिङ्गकानुमितिप्रतिबन्धकत्वापत्तिरिति परास्तम्।

यद्वा आलोको द्रव्यमित्यादिज्ञानविशिष्टत्वेनालोको न द्रव्यमित्यादिज्ञानविरहविशिष्टत्वेन वा द्रव्यत्वादिमल्लिङ्गकत्वप्रकारकेच्छा अनुगमय्य तद्भेदा एव प्रतिबन्धकतावच्छेदककोटौ निवेशनीयाः। भेदस्य कालिकाव्याप्यवृत्तित्वोपगमात्तादृशज्ञानशून्यकाली-

नानां द्रव्येणानुमिनुयामित्यादीच्छानां विशिष्टमिव्रतया प्रतिबन्धक-त्वोपपत्तिः। सामानाधिकरण्यसम्बन्धेन वैशिष्ट्यनिवेशान्न पुरुषान्तरीणज्ञानादिकमादाय दोषः। द्रव्यत्वावच्छिन्नानुमिनुयामित्याद्याकारिकाणां द्रव्यत्वादि लिङ्गतावच्छेदकत्वावगाहिनीनामिच्छानां न्तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वादिमल्लिङ्गकत्व-प्रकारकत्वं विषयितायामिव तत्र द्रव्यत्वावच्छिन्नत्वाभावात् लिङ्गादौ द्रव्यत्वाद्यनवगाहनादतस्तथाविधेच्छानामालोकत्वाद्यवच्छिन्नलिङ्ग-कानुमितिविरोधित्वमक्षतमेव। आलोकत्वावच्छिन्नेनानुमिनुयामित्यादीच्छानां तादृशानुमित्यविरोधित्वोपपत्तये चालोकलिङ्गकत्वाद्यप्रकारकत्वचदालोकत्वाद्यवच्छिन्नलिङ्गकत्वाद्यप्रकारकत्वमप्यालोकत्वाद्यवच्छिन्नलिङ्गकानुमितिप्रतिबन्धकतायां निवेशनीयम्। एवं ते वह्निमनुमिनुयामित्याद्याकारकलिङ्गविशेषजन्यत्वानवगाहिनीनामिच्छानामविरोधित्वोपपत्तये किञ्चिल्लिङ्गकत्वनिवेशः। तदर्थश्च किञ्चिल्लिङ्गकत्वप्रकारतानिरूपिततत्तत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वम्। अतो धूमेन इन्धनमनुमिनुयाम् इत्याद्याकारकेच्छानां नालोकादिलिङ्गकवह्न्याद्यनुमितिविरोधित्वम्।

इदमत्रावधेयम्। आलोकलिङ्गकधूमलिङ्गकानुमितिर्जायतामित्याद्याकारकेच्छाकाले केवलालोकलिङ्गकपरामर्शादनुमितिर्न जायते तथाविधानुमितेस्तादृशेच्छाया अविषयत्वात्, उभयादिलिङ्गकानुमितेरेव तद्विषयत्वात्। एवं धूमलिङ्गकवह्न्यनुमितिरालोकलिङ्गकवह्निघटोभयानुमितिश्च जायतामित्याद्याकारकेच्छाकाले घटाद्यनुमितिसामग्र्यामसत्यां आलोकपरामर्शाद्वह्न्यनुमितिर्न जायते घटाद्यविषयकानुमितेरुक्तरूपा तादृशेच्छाविषयासिद्धेरतस्तथाविधेच्छानां तत्र तत्र प्रतिबन्धकतानिर्वाहाय तत्तल्लिङ्गकत्वतत्तत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताशून्यत्वमेव तल्लिङ्गकत्वाप्रकारकत्वेत्यनेन विवक्षणीयम्। उक्तस्थले चालोकलिङ्गकवह्न्यनुमितित्वादिप्रकारतानिरूपितविशेष्यता तादृशप्रकारतातिरिक्तधूमलिङ्गकत्वादिप्रकारतानिरूपितैव, समूहालम्बन एव प्रकारताभेदेन विशेष्यताभेदात्। अन्यथा समूहालम्बनेच्छातस्तादृशेच्छावैलक्षण्यानुपपत्तेः, तथा च तादृशेच्छानां तथाविधप्रकारत्वानिरूपितविशेष्यताशून्यत्वेन प्रतिबन्धकत्वनिर्वा-

हः, यालोकेनानुमितिर्जायतां धूमेन च पर्वते वह्निमनुमिनुयामि-
त्याकारकसमूहालम्बनेच्छानां तादृशविशेष्यताशून्यत्वविरहेऽपि
आलोकलिङ्गकान्यानुमितिसामग्रीकालीनतथाविधेच्छानां तत्त-
द्व्यक्तित्वेन पृथक् प्रतिबन्धकत्वोपगमेन न तदानीमालोकलिङ्गकानु-
मित्यापत्तिः। पर्वते वह्निमनुमिनुयां धूमेन च वह्निमनुमिनुयामित्या-
द्याकारकसमूहालम्बनेच्छायाः प्रामाणिकत्वे तत्रालोकपरामर्शादनु-
मितिर्भवत्येव एवञ्च लिङ्गविशेषजन्यत्वाद्यविषयकेच्छाया विशेषण-
दलेनैव प्रतिबन्धकत्ववारणे धूमेन घटमनुमिनुयामित्यादीच्छाया-
रणमेव विशेष्यदलप्रयोजनम्, तदर्थञ्च न किञ्चिल्लिङ्गकत्वप्रकार-
तानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वं
तथा सति धूमेनानुमिनुयामित्याद्याकारकविषयविशेषानुमितीच्छा-
नामसंग्रहापत्तेः, किन्तु किञ्चिल्लिङ्गकत्वतत्साध्यविशिष्टतत्पक्ष-
विषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपितविशेष्यता-
कत्वमेव विशेष्यदलेन विवक्षणीयम् । धूमेन घटमनुमिनुयामिती-
च्छावत् धूमेन वह्निघटोभयमनुमिनुयामित्यादीच्छाया अपि आलो-
कलिङ्गकवह्न्याद्यनुमित्यविरोधित्वमिष्टमेव, सिद्धौ तादृशेच्छाया अ-
नुत्तेजकतया सिद्धिकाले तादृशेच्छाबलादसत्यामालोकलिङ्गकानु-
मितीच्छायां न तादृशानुमितिरिति दिक् ।

एकलिङ्गकेच्छाकालीनोभयलिङ्गकपरामर्शजन्यानुमितौ व्यभि-
चारवारणप्रकारः पुनरग्रे प्रदर्शयिष्यते ।

ननु स्वविषयसजातीयज्ञाने इच्छाया विरोधित्वमदृष्टचरमि-
त्यत आह । कामिनीजिज्ञासादिवदिति । यथा कामिनीदिदृक्षा घटा-
दिविषयकचाक्षुषादिप्रतिबन्धिका तथेत्यर्थः । पृथक् प्रतिबन्धिकेति ।
पक्षतासमवधानदशायामनुमित्यनुत्पादप्रयोजिकेत्यर्थः, तथा चो-
क्तस्थले पक्षतासत्त्वे क्षतिविरहात्तदिष्टमेवेति भावः ।

ननु कामिनीजिज्ञासास्थले कामिनीभिन्नविषयकज्ञानानुत्पादस्य
सर्वानुभवसिद्धतया तत्र तस्याः प्रतिबन्धकत्वमस्तु, सिद्धिसत्त्वे
धूमादिलिङ्गकानुमित्सादशायां आलोकलिङ्गकवह्न्यनुमित्यनुत्पादस्तु
नानुभविकः । तथा सति तुल्ययुक्त्या घटाद्यनुमित्साप्रत्यक्षादि-
गोचरेच्छादशायामपि तदनुत्पादस्य तथात्वप्रसक्तेः । न ह्येकमपि
विशेषमीक्षामहे इत्यभिसन्धाय उक्तापत्तिवारकं कल्पान्तरमनुसर-

नि। यदि चेति। तथा चान्यलिङ्गकानुमित्साया: प्रतिबन्धकत्वमसम्भावितमेवेति भाव:। तत्रेति। अन्यलिङ्गकानुमित्सास्थले इत्यर्थ:। तल्लिङ्गकानुमितीच्छा। तल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वावच्छिन्नविशेष्यताकेच्छा सिषाधयिषापदेन विवक्षणीयेत्यर्थ:।

नन्वेवं लिङ्गविशेषानुपरकानुमित्साकाले सिद्धौ सत्यामनुमित्यनुपपत्तिरत आह। तदन्यमात्रलिङ्गकेति। धूमेनालोकेन वानुमिनुयामित्यादिसमूहालम्बनेच्छाकाले आलोकादिलिङ्गकानुमित्युपपत्तये मात्रेति। तथा च तल्लिङ्गकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वाप्रकारिका सती या किञ्चिल्लिङ्गकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वप्रकारिकेच्छा तदन्यतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारिकेत्यर्थ:।

लिङ्गविशेषोपरकानुमितीच्छासंग्रहाय सत्यन्तम्। आलोकेनेन्धनमनुमिनुयां धूमेन च वह्निमनुमिनुयामित्याद्याकारकेच्छायामालोकलिङ्गकवह्न्याद्यनुमितेरापत्तिवारणाय तत्र साध्यादिनिवेश:। लिङ्गविशेषानुपरकानुमितीच्छाकाले पर्वते वह्निमनुमिनुयां धूमेनेन्धनमनुमिनुयामित्याद्याकारकसमूहालम्बनेच्छाकाले चालोकलिङ्गकानुमित्युपपत्तये तद्विशेष्यदलम्। यत्किञ्चिद्गोचरं ज्ञानं जायतामित्यादीच्छावारणाय चरमदलम्।

यद्यपि आलोकधूमोभयलिङ्गकवह्निविशिष्टपर्वतविषयकानुमितिर्जायतामालोकेन वह्निघटोभयविशिष्टपक्षविषयकानुमितिर्धूमेन वह्निविशिष्टपर्वतमहानसोभयविषयकानुमितिश्च जायतामित्यादीच्छावारणाय तल्लिङ्गकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारतानिरूपकत्वानिरूपितविशेष्यताकान्यत्वमेव सत्यन्तदलेन विवक्षणीयम्। तथा च लिङ्गविशेषानुपरकानुमितीच्छानां तादृशविशेष्यताकान्यत्वविरहात्किञ्चिल्लिङ्गकत्वादिप्रकारतानिवेशनमफलमेवेति तथाविधविशेष्यताशालित्वेनैवेच्छाया उत्तेजकत्वमुचितं, तथापि तादृशविशेष्यताशालीच्छायामेव तदन्यमात्रेत्यादिग्रन्थतात्पर्यमिति। शेषं पूर्वोक्तादिशाऽवसेयम्।

(दी०) लिङ्गविशेषेणापि च नियन्त्रितं पक्षत्वम्। तल्लि-

ङ्गकानुमितीच्छाविरहविशिष्टान्यलिङ्गकानुमितीच्छा एव वा प्रतिबन्धिका।

(गा०) नन्वेवं धूमालोकादिलिङ्गकानुमितिसाधारणैकपक्षत्वासम्भव इत्यत्र इष्टापत्तिमाह। लिङ्गविशेषेणापीति। लिङ्गभेदेनापि पक्षत्वं भिन्नमेवेत्यर्थः। अपिः साध्यादिभेदसमुच्चायकः। तत्प्रदर्शनञ्च दृष्टान्तार्थम्। तथा च साध्यादिभेदेनेव लिङ्गभेदेनापि पक्षताभेदो न क्षतिकर इति भावः।

नन्वेवं लिङ्गभेदेन पक्षताया अननुगमात् तस्या व्यभिचारेणानुमितिरूपानुगतकार्ये हेतुत्वासम्भवः। न च तत्तत्साध्यकत्वादिवत्तत्तल्लिङ्गकत्वस्यापि कार्यतावच्छेदके निवेशान्न व्यभिचार इति वाच्यम्। तावताप्यालोकादिलिङ्गकानुमितीच्छाधीनधूमालोकोभयादिविषयकसमूहालम्बनपरामर्शजन्यानुमितौ धूमादिलिङ्गकानुमितीच्छाविरहविशिष्टसिद्ध्यभावव्यभिचारस्य दुर्वारत्वात्तादृशानुमितावपि धूमादिलिङ्गकपरामर्शजन्यत्वरूपधूमलिङ्गकत्वस्याक्षतत्वात्।

न च यत्र धूमलिङ्गकानुमितीच्छाया उत्तेजकता तत्रालोकलिङ्गकानुमितीच्छानामपि तत्तल्लिङ्गकपरामर्शविशिष्टानामुत्तेजकत्वोपगमाद्वोक्तस्थले व्यभिचार इति वाच्यम्। तथा सति तत्र धूमलिङ्गकेच्छाया अपि धूमलिङ्गकपरामर्शविशिष्टाया एवोत्तेजकत्वौचित्यात्, सर्वसाधारणैकपक्षताया एव सुवचतया लिङ्ग विशेषेणापीति ग्रन्थासङ्गतिरिति चेन्न। धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यानुमितित्वमेव तादृशसिद्ध्यभावजन्यतावच्छेदकम्। तादृशसिद्धिविशिष्टत्वञ्च,स्वसामानाधिकरण्यानवच्छिन्नस्वाव्यवहितोत्तरोत्पत्तिकत्वसम्बन्धेन, उक्तसमूहालम्बनस्थलीयानुमितिस्तथाविधसिद्धिविशिष्टैवेति तत्र न व्यभिचारः। सिद्धिकालेऽसत्यां तल्लिङ्गकसिषाधयिषायामुक्तस्थल इव न धूमपरामर्शादनुमित्यापत्तिः, धूमादिलिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावादिघटितस्यैव धूमादिपरामर्शघटितकारणस्तोमस्य कार्योत्पत्तिप्रयोजकत्वोपगमात्। समूहालम्बनस्थले आलोकपरामर्शादिघटितसामग्रीत एव कार्योत्पत्तिनिर्वाहात्।

अथात्राव्यवहितोत्तरत्वमवश्यं तृतीयक्षणसाधारणं, स्वध्वंसा-

धिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वरूपं वाच्यम् । अन्यथा यत्र क्रमेण सिद्ध्यात्मकधूमालोकाभयलिङ्गकपरामर्शालोकालिङ्गकेच्छानुमितयस्तत्रानुमित्युत्पत्त्यधिकरणक्षणस्य धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणत्वेन तदुत्पत्तिकानुमितेरुक्तसम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वात् तादृशसिद्ध्यभावस्य व्यभिचारतादव-

शिष्टत्वेन पक्षताकार्यत्वानुपपत्तिरिति चेन्न । तादृशसिद्धिविशिष्टत्वं स्वाधिकरणक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वसम्बन्धेन वाच्यम् । उक्तसमूहालम्बनस्थले अनुमित्यव्यवहितपूर्वक्षणस्यापि धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणत्वात्तादृशक्षणध्वंसोत्पत्त्यधिकरणोत्पत्तिकत्वमनुमितेरिति न व्यभिचारः । एवं सिद्ध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणप्रथमक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वाभावात् पक्षताकार्यत्वनिर्वाहः ।

अथ वा स्वाव्यवहितपूर्वकालावच्छिन्नतल्लिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावाधिकरणताविशिष्टसमवाय एव तादृशसिद्ध्यभावकार्यतावच्छेदकसम्बन्ध इति न कोऽपि दोषः ।

अथ वा स्ववृत्तित्वतिमत्त्वस्ववृत्तिप्रागभावप्रतियोगित्वस्वसामानाधिकरण्यैतादृशत्रितयसम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वं तादृशसिद्ध्यभावजन्यतावच्छेदकमिति न कोऽपि दोषः ।

अथ वा तादृशसिद्धिविशिष्टत्वं तादृशस्वाधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणध्वंसानधिकरणं यस्तादृशस्वाधिकरणक्षणध्वंसाधिकरणक्षणस्तदुत्पत्तिकत्वसम्बन्धेन वाच्यम् । उक्तसमूहालम्बनस्थले च तादृशसिद्ध्यधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणमनुमित्युत्पत्तिक्षण एवेति तद्ध्वंसानधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति न व्यभिचारः । सिद्ध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणद्वितीयक्षणध्वंसानधिकरणक्षणोत्पत्तिकत्वविरहात्, विशिष्टसिद्धिविशिष्टान्यत्वमव्याहतमिति । एवं यत्र धूमपरामर्शस्तदुत्तरं त-

दप्रामाण्यानवगाही आलोकपरामर्शस्तदुत्तरमनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शविशिष्टत्वरूपाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शजन्यतावच्छेदकाक्रान्तत्वात्, अव्यवहितपूर्वक्षणे चाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शसत्त्वेन प्रसक्तस्य व्यभिचारस्य एतादृशैर्बहुभिः प्रकारैरेव वारणमवसेयम् । लिङ्गोपधानमते च न काचिदनुपपत्तिः । तन्मते धूमविशिष्टपर्वतत्वाद्यवच्छिन्नविशेष्यताकवह्न्यनुमितित्वादिरेव धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावादिजन्यतावच्छेदकत्वादुक्तसमूहालम्बनस्थले चालोकवान् पर्वतो वह्निमानित्याद्याकारकानुमितेरेवोपगमेन व्यभिचारानवकाशादिति । धूमेनानुमिनुयामालोकेनानुमिनुयामित्यादिसकलेच्छासाधारणरूपेणैव सिषाधयिषाणां सिद्धावुत्तेजकत्वम् । तथा च धूमालोकादिलिङ्गकनिखिलानुमितिसाधारणी एकैव पक्षता । उक्तस्थलेऽतिप्रसङ्गभङ्गाय च प्रतिबन्धकान्तरमेव कल्प्यत इत्याशयेनाह । तल्लिङ्गकेति । असत्यां सिद्धावन्यलिङ्गकानुमितीच्छासत्त्वेऽनुमित्युपपत्तये, सिद्धिकालीनेति । सामानाधिकरण्यसम्बन्धेन सिद्धिविशिष्टेत्यर्थः । समूहालम्बनेच्छाकाले सिद्धिसत्त्वेऽनुमित्युपपत्तये तल्लिङ्गकानुमितीच्छाविरहविशिष्टेति । धूमलिङ्गकत्वादिप्रकारतान्यप्रकारत्वानिरूपितविशेष्यताकेच्छाविरहविशिष्टत्यर्थकम् । तेन न धूमालोकोभयलिङ्गकवह्न्यनुमितिर्जायतामित्याकारकेच्छाबलात् सिद्धिकाले केवलालोकलिङ्गकानुमितिप्रसङ्गः । न वाऽऽलोकेन वह्निघटोभयानुमितिर्धूमेन वह्न्यनुमितिर्जायतामित्येतादृशेच्छाकाले सिद्धिसत्त्वे केवलालोकादिपरामर्शात् केवलवह्न्याद्यनुमित्यापत्तिः ।

यद्यपि तादृशप्रकारत्वानिरूपितविशेष्यताकान्यत्वस्य इच्छाविशेषणत्वोपगम एव समूहालम्बनेच्छास्थलेऽनुमितिरुपपादयितुं शक्यते, तथापि ज्ञानेच्छयोर्युगपदुत्पादमङ्गीकुर्वतां नवीनानां मते यत्र सिद्ध्युत्पत्तिकाले धूमादिलिङ्गकानुमितीच्छायास्तद्वितीयक्षणे चालोकलिङ्गकानुमितीच्छाया उत्पादस्तत्रालोकलिङ्गकानुमित्युपपत्तये तादृशविशेष्यताशालीच्छाविरहवैशिष्ट्यपर्यन्तानुसरणम् । लिङ्गविशेषानुपरक्तानुमितीच्छानामपि निरुक्तोत्तेजकतावच्छेदकाक्रान्ततया तादृशेच्छायाः प्रतिबन्धकत्वाप्रसक्तेरन्यलिङ्गकेति सम्पातायातम् । सिद्धिविशिष्टेच्छामात्रस्य प्रतिबन्धकत्वे सि-

द्विविशिष्टघटवदनुमित्यादिगोचरेच्छाकालीनाननुगतेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेनाभावानां निवेशनीयतया महागौरवमिति तत्तादृ-विशिष्टतत्पक्षविषयकत्वप्रकारकानुमितीच्छात्वेनैव विशेष्यीभूते-च्छानिवेशो वाच्यः।

वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकत्वमप्यन्य-लिङ्गकानुमित्सायां न निवेश्यं घटादीच्छाकालीनाननुगतेच्छानां भवन्मतेऽपि सिद्ध्युत्तेजकतया वक्तव्यतया तन्मते तत्र घटादीच्छा-साधारणरूपेणैवानुमित्साया उत्तेजकत्वोपगमावश्यकस्थले पक्षता-निर्वाहेण तादृशाननुगतेच्छानामन्यलिङ्गकेच्छायामेवोत्तेजकत्वात्।

अत्र चैतादृशगुरुधर्मावच्छिन्नाभावस्य लिङ्गभेदेनानन्तकार-णतानां पक्षताकारणतान्तरस्य च कल्पनामपेक्ष्य लिङ्गभेदेन तत्त-ल्लिङ्गकानुमितीच्छाविरहविशिष्टसिद्धित्वरूपलघुधर्मावच्छिन्नाभा-वहेतुताकल्पनस्यैव लाघवेन पूर्वमतस्यैव सम्यक्तया वाकारो-ऽनिर्भरसूचनायेति वदन्ति।

परे तु अन्यलिङ्गकत्वप्रकारकानुगतानुमित्सासमवहित-सिद्धिदशायामननुगतानुमित्साबलात्तल्लिङ्गकानुमित्युपपत्तये सिद्धौ तादृशेच्छाभावकूटवैशिष्ट्यनिवेशेन पूर्वमते गौरवमेतन्मते चान्य-लिङ्गकानुगतानुमित्सारूपोत्तेजकबलादेव तदनुमित्युपपत्तेः सिद्धौ तासामभावानिवेशात्।

न चैतन्मतेऽप्यन्यलिङ्गकानुमित्साप्रतिबन्धकतायामेव तासामु-त्तेजकत्वस्यावश्यकतया साम्यमिति वाच्यम्। यतो यत्रानुग-तसाध्यानुमित्सात्मकसमूहालम्बनरूपा एवान्यलिङ्गकानुमितीच्छा-स्तत्रान्यलिङ्गकानुमितीच्छायां तादृशेच्छाव्यक्तिभेदा एव निवेश-नीया-। सिद्धौ तु सामानाधिकरण्यसम्बन्धेन तत्तदत्यन्ताभावास्तत्र च तत्कालीनसंयोगाद्यभावानां निवेशमादाय विनिगमनाविर-हेण गौरवम्। न च पूर्वमतेऽपि तत्तत्सिद्धिव्यक्तिभेदा एव सिद्धौ नि-वेशनीया न तु तत्तदिच्छाभावा इति न विनिगमनाविरहावकाश इति वाच्यम्। सिद्धेरनन्तरं यत्र तादृशसमूहालम्बनेच्छाव्यक्तीना-मुत्पत्तिस्तत्र तादृशसिद्धिभेदानां सिद्धौ निवेशे इच्छोत्पत्तिकाले ऽनुमित्यापत्तेः। ज्ञानेच्छयोर्युगपदुत्पादमते इच्छासामान्या ज्ञाना-विरोधित्वात्। यादृशस्थले च सिद्धिजननकाले प्रतिबन्धकोत्तेज-

केचत्तु परेकस्या अपरव्यक्तेश्च तत्पूर्वमुत्पत्तिः तत्र द्वितीयक्षणेऽनुमित्युपपत्तये पतन्मतेऽपि तत्तत्सिद्धिभेदा अन्यलिङ्गकेच्छाविशेषणीभूतसिद्धयो निवेश्या न त्वन्यलिङ्गकेच्छायां तद्विशेषणीभूतसिद्धो वा तदिच्छात्यन्ताभावो अतो न तत्कालीनसंयोगादिव्यक्त्यभावनिवेशमादाय विनिगमनाविरहप्रसङ्ग इत्याहुः ।

(दी०) साधकमानं, साध्यवत्त्वनिश्चयः । पाषाणमयत्वादिना पर्वते तेजस्त्वादिना च वह्नेः सिद्धावपि पर्वतत्वेन तत्र वह्नित्वेन च तस्य अनुमितेर्धर्मित्वसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौ ।

(गा०) साधकमानपदस्य सिद्धिकारणपरत्वे पूर्वोक्तदोषप्रसङ्गात् तद्व्याचष्टे । साधकेति । साध्यवत्त्वनिश्चयः । प्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्चयः । पाषाणमयो वह्निमान् पर्वतस्तेजस्वीत्याद्याकारकामानप्रकारकनिश्चयदशायां पर्वतो वह्निमानित्याद्याकारकानुमितेरानुभविकतया यथाश्रुते तदनुपपत्तेः प्रकारविशेषं निवेशयति । पाषाणमयत्वादिनेति । तत्र । पर्वते । तस्य । वह्नेः । धर्मित्वसाध्यत्वयोः । उद्देश्यत्वविधेयत्वयोः । अनुप्रवेशनीयावित्यस्य पक्षताशरीर इत्यादिः । तथा च पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नवह्नित्वावच्छिन्नविधेयताकानुमितिं प्रति तद्रूपावच्छिन्नविशेष्यतानिरूपिततत्संसर्गावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नस्य सिषाधयिषाविरहविशिष्टस्याभावो हेतुरिति पर्यवसितम् ।

पर्वतो वह्निमानित्यादिसिद्धिदशायां वह्निमान् पर्वत इत्याकारकानुमित्युदयात् तत्प्रतिबध्यतावच्छेदककोटौ प्रकारतामुपेक्ष्य विधेयतानिवेशनम् । विधेयता च वह्निमनुमिनोमीत्यनुव्यवसायनियामकः पक्षतावच्छेदकव्यावृत्तो विषयताविशेषः । स्वरूपतः पर्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां जातिमान् वह्निमान् पर्वतो जातिमत्त्वादित्याद्यनुमित्युत्पत्तेः शुद्धपर्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां अधिकविषयिण्याः सुन्दरः पर्वतः सुन्दरवह्निमानित्याद्यनुमितेरुत्पत्त्या च प्रतिबध्यदिशि पर्वतत्वाद्यवच्छिन्नेत्यादिना

किञ्चिद्विशेषितपर्वतत्वादिपर्याप्तावच्छेदकताकत्वमेव विवक्षणीयम् । तदर्थश्च पर्वतत्वादिनिष्ठानिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपकत्वम् । पर्वतो वह्निमानित्याद्यनुमितौ जातिमान् पर्वतो जातिमत्त्वानित्यादिसिद्धेरप्रतिबन्धकतया प्रतिबन्धकसिद्धावपि पर्वतत्वावच्छिन्नेत्यादिना किञ्चिदविशेषितत्वावच्छिन्नत्वमेव विवक्षणीयम् । तदर्थश्च निरवच्छिन्नत्वघटितावच्छेदकताकत्वमिति ध्येयम् ।

(दी०) यदि च पर्वतत्वसामानाधिकरण्येनैकत्र साध्यसिद्धावपि विनाप्यनुमित्सामन्यत्र तादृशानुमितिरानुभविकी तदा धर्म्मिविशेषोऽपि निवेश्यो नान्यथा ।

(गा०) ननु पर्वतत्वाद्यवच्छिन्नविशेष्यताकानुमितौ पर्वतत्वावच्छिन्नविशेष्यताकसिद्धेः प्रतिबन्धकत्वे पर्वतत्वेनैकपर्वतविशेष्यकसिद्धिदशायां तेन रूपेणान्यपर्वतेऽपि साध्यानुमित्यनुदयापत्तिरत आह । यदि चेति । पर्वतत्वांशेऽवच्छेदकत्वावगाहिन्यतिरिक्ताकिञ्चिद्विशेष्यकसिद्धिदशायां तेन रूपेण धर्म्यन्तरेऽनुमित्यनुत्पादस्य निर्विवादतया सामानाधिकरण्येनेति । एकत्र । एकधर्म्मिणि, अनुमित्सासत्त्वे विशेषणाभावादेव विशिष्टाभावनिर्वाहात् धर्मिविशेषनिवेशनफलं यतो विनाप्यनुमित्सामिति । अन्यत्र । अन्यधर्म्मिणि, धर्म्मिविशेषानन्तर्भावेऽपि वक्ष्यमाणरीत्या सामानाधिकरण्येन सिद्धिदशायां अवच्छेदकावच्छेदेनानुमितौ बाधकाभावात् तादृशेति । सामानाधिकरण्यमात्रावगाहीत्यर्थः । धर्म्मिविशेषोऽपीति । तथा च पर्वतत्वाद्यवच्छिन्नतत्पर्वतादिनिष्ठोद्देश्यताकानुमितौ पर्वतत्वाद्यवच्छिन्नतत्पर्वतादिविशेष्यकसाध्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वं कल्प्यमिति भावः । अन्यथा । तदानीं तादृशानुमितेरानुभविकत्वविरहे । न धर्म्मिविशेषो निवेश्य इत्यनुषज्यते । अनुमितिर्द्विविधा पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमात्रावगाहिनी, तयोरवच्छेद्यावच्छेदकभावावगाहिनी च, अवच्छेद्यावच्छेदकभावोऽपि क्वचित् स्वरूपसम्बन्धविशेषः, यथा मूलावच्छिन्नो वृक्षः संयोगीत्यादौ मूलादिसंयोगयोः । अत्र अन्यादृशस्य तस्य दुर्वचत्वात् ।

(१)क्वचिच्च व्याप्यव्यापकभावः यथा पृथिवी रूपवतीत्यादौ पृथिवीत्वरूपयोः । तत्र साध्यांशे पक्षविशेषणतापन्नस्य पक्षतावच्छेदकस्यावच्छेद्यतासम्बन्धेन प्रकारत्वं पक्षतावच्छेदकावच्छिन्नत्वेन तद्विशिष्टसाध्येन वा विशेषितस्य संयोगादेः पक्षांशे साध्यसंसर्गत्वमित्यन्यदेतत् । तादृशी चानुमितिः पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिसिद्धिदशायां जायते, न्यूनविषयकसिद्धिदशायां अनुमितेः सर्वानुभवसिद्धत्वात् । अत एव यत्रावच्छेदकावच्छेदेनानुमितिरुद्देश्या तत्र नांशतः सिद्धसाधन दोष इत्यतस्तदेवोपपादयति ।

(दी०) पक्षतावच्छेदकस्य सामानाधिकरण्येनैकत्र साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन सिद्धेस्तत्सामानाधिकरण्यमात्रेणानुमितिं प्रति तु सिद्धिमात्रस्य विरोधित्वम् ।

(गा०) पक्षतावच्छेदकस्येति । सामानाधिकरण्येन । सामानाधिकरण्यमात्रेण । तदवच्छेदेन । पक्षतावच्छेदकावच्छेदेन । सिद्धेः । सिद्धेरेव । सामानाधिकरण्यमात्रावगाहिसिद्धे प्रतिबन्धकत्वमेवकारव्यवच्छेद्यम् ।

अयम्भावः । पर्वतो वह्निमानित्यादिसिद्धिदशायां पर्वतः सुन्दरवह्निमानित्याकारकानुमितेरुत्पत्त्या विधेयतावच्छेदकतायाः पर्याप्तिः प्रतिबध्यतावच्छेदककोटौ निवेशनीया । एवं संयोगादिना साध्यस्य दण्डोपलक्षितपुरुषादेः सिद्धावपि विशिष्टनिरूपितसंयोगादिना दण्डिपुरुषाद्यनुमित्युत्पत्त्या संसर्गतावच्छेदकताया अपि पर्याप्तिर्निवेशनीया । एवञ्चावच्छेदकावच्छेदेनानुमितौ शुद्धवह्नित्वादौ शुद्धसंयोगत्वादौ वा विधेयतावच्छेदकतायाः संसर्गतावच्छेदकताया वा अपर्याप्ततया तादृशानुमितेर्न सामानाधिकरण्यमात्रावगाहिसिद्धिप्रतिबध्यत्वमिति ।

प्राञ्चस्तु व्यापकतायाः संसर्गतया भाने मानाभावात् पक्षता-

---

(१) तदवगाहिन्यामेव चानुमितौ पक्षतावच्छेदकदेशकालावच्छेदेन बाधग्रहस्य विरोधितया बाधस्यासिद्धिव्यभिचारासङ्करं मणिकृद्व्यवस्थापयिष्यति इति क्वचित्कोऽयं पाठः ।

वच्छेदकाक्रान्तयावद्व्यक्तिविषयकानुमितिरेव पक्षतावच्छेदकावच्छेदेनानुमितिरिति। (१)तत्र सामानाधिकरण्यमात्रावगाहिन्याः सिद्धत्वविरोधितया पक्षतावच्छेदकव्यापकोद्देश्यताकान्यत्वमेव सिद्धिसामान्यप्रतिबध्यतावच्छेदककोटौ निवेशनीयम्।

न च विषयभेदेन विषयताभेदात्पक्षतावच्छेदकावच्छेदेनानुमितेर्विषयतानामपि नानाव्यक्तिपक्षकस्थले प्रत्येकं पक्षतावच्छेदकाव्यापकत्वमेवेति तत्र पक्षतावच्छेदकव्यापकोद्देश्यताया अप्रसिद्धिरिति वाच्यम्। उद्देश्यतासम्बन्धेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वोपगमेन निर्वाहादिति वदन्ति।

दीधितिकारस्य तु अवच्छेदकावच्छेदेनानुमितौ अवच्छेद्यावच्छेदकभावस्य स्वरूपसम्बन्धात्मकस्येव व्याप्यव्यापकभावरूपस्यापि तस्य भानमनुमतम्भागासिद्धेर्दोषत्वनिर्वाहार्थं पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानकारणताया आवश्यकत्वात्। शिखरविशिष्टः पर्वतो वह्निमान् धूमादित्यादौ शिखरे हेतोस्तत्सम्बन्धस्य चावच्छेदकताविरहेण हेत्वसिद्धेरावश्यकतेत्याशङ्क्य पक्षतावच्छेदके अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनुमितौ तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुताया भागासिद्धेर्दोषत्वार्थमुपगमेऽपि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानापेक्षा नोपेयत इति समाधानस्य स्वयं अवच्छेदकान्वयोर्वस्तुनोर्भेदादित्यनेनात्र वक्ष्यमाणत्वात्। एवं व्यापकत्वभानस्य तदननुमतत्वे पर्वतत्वसामानाधिकरण्येनैकत्रेत्यत्र एकत्र साध्यसिद्धावित्यनेनैवावच्छेदकावच्छेदेन या सिद्धिस्तदभावलाभे तल्लाभप्रयोजनकस्य सामानाधिकरण्येनेत्युपादानस्यासार्थक्याच्च।

युज्यते चैतदेव मतम्। प्राचीनमतेऽपि उक्तयुक्त्या विधेयतावच्छेदकत्वादिपर्याप्तिनिवेशस्याऽऽवश्यकत्वात्, तादृशोद्देश्यताकान्यत्वस्याधिकस्य निवेशनीयतया गौरवात्। एवं सिद्धिसामान्यशून्यतादशायामवच्छेदकावच्छेदेनानुमितावुत्पद्यमानायां सिद्धमा-

(१) तन्मते मणिकारोक्तन्यायेनांशतः सिद्धसाधनस्यानुगतरूपावच्छिन्ननानाव्यक्तिपक्षकानुमितावदोषत्वे, इति तु पाठान्तरम्।

घबलात् तत्तत्कार्यतावच्छेदकीभूतपक्षतावच्छेदकव्यापकान्यानुमितित्वावच्छिन्नस्यापत्तेः ।

अस्मन्मते च सिद्धिसामान्याभावकालीनायामवच्छेदकावच्छेदेनानुमितौ विशिष्टवह्नित्वे विशिष्टसंयोगे वा पर्याप्तविषयताविशेष इव शुद्धवह्नित्वे शुद्धसंयोगे वा पर्याप्तो विषयताविशेषः स्वीक्रियते । एकज्ञानस्यैकत्र विषये विषयताद्वयोपगमे क्षतिविरहादिति सिद्धिसामान्याभावकार्यतावच्छेदकावच्छिन्नोत्पत्तिरिष्टैव ।

न चावच्छेदकावच्छेदेनानुमितौ व्यापकतायाः संसर्गतया मानोपगमे तादृशानुमितौ अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य पृथक्कारणताकल्पने गौरवम् । एतन्मते तत्तत्पर्वतोद्देश्यकानुमितौ तत्तत्पर्वताविशेष्यकपरामर्शस्य हेतुतयाऽर्थवशादेव यावत्पर्वतविशेष्यकपरामर्शात्तथाविधानुमितेरुत्पादात्, तादृशानुमितौ परामर्शस्य स्वतन्त्रहेतुत्वाकल्पनात्, व्यापकतायाश्च संसर्गविधया मानस्य क्वचिदप्यनभ्युपगमादिति वाच्यम् । यत्रैकः परामर्शः कतिपयपर्वतविषयकः, अन्यश्च तदितरयावत्पर्वतविषयकस्तत्रापि अवच्छेदकावच्छेदेनानुमितेरुत्पादापत्तेः । न चेष्टापत्तिः, अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानं विनाऽवच्छेदकावच्छेदेनानुमित्यनुत्पादस्य सर्वसम्मतत्वात् । तत्र च कस्यापि परामर्शस्य मदभिमतसिद्धाया अवच्छेदकावच्छेदेन हेतुमत्तावगाहिताया असम्भवः । एवं यत्र पक्षतावच्छेदकताघटकसम्बन्धेन पक्षतावच्छेदकमवृत्ति तत्र तेन सम्बन्धेन पक्षतावच्छेदकाक्रान्ताप्रसिद्ध्या अनुमितिद्वैविध्यानुपपत्तिश्च । तन्मतेऽपि चावच्छेदकावच्छेदेनानुमितौ अवच्छेद्यावच्छेदकभावरूपाधिकविषयानवगाहने सामानाधिकरण्यमात्रेण सिद्धिदशायां तादृशानुमित्युत्पत्तौ बीजाभावः । सिद्धिविषयीभूतधर्मिविषयकत्वस्य तद्बीजत्वे तथाविधसिद्धिदशायां सिद्धिविषयीभूतकतिपयपर्वतादिविषयकानुमितेरप्युत्पादौचित्यात् ।

अथ मणिकृता पक्षतावच्छेदकेऽर्थेऽशतः सिद्धसाधनस्यादोषत्वोपगमेऽपि तदितरप्राचीनैरनुमितिमात्र एवांशतः सिद्धसाधनस्यापि दोषत्वमुपेयते, अत एव चैतेषां मतमालम्ब्य मणिकृताऽपि शब्दानित्यत्वाद्यनुमाने ध्वन्यादांशतः सिद्धसाधनवारणाय वर्णात्मकत्वादिविशेषणं पक्षे निवेशितम् । अत एव गन्धादिपक्षताव-

च्छेदकस्य पृथिवीतरभेदादौ साध्ये हेतुता नाचार्यैरनुमन्यते। व्याप्तिग्रह एव हेतुरुपपक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यभानेन सिद्धसाधनात्। सकलपृथिवीविषयकानुमितेरप्ययोगात्। न चांशे साध्यसिद्धावपि अधिकधर्मिविषयतया यावत्पर्वतादिविषयकानुमित्युत्पाद उचितः। अधिकधर्मिविषयकानुमितेः सिद्धिदशायां उत्पादे घाचोऽनित्या इत्यादिसिद्धिदशायां अनित्ये वाङ्मनसी इत्यादिसमूहालम्बनानुमित्युत्पादस्याप्यौचित्यात्। न हि तत्र कस्याप्यनुमितिः, नवीनैरपि पक्षतावच्छेदकैक्य एवांशतः सिद्धसाधनस्यादोषत्वस्योपगमात्। एवञ्च नवीनमत एव अवच्छेदकावच्छिन्नत्वावगाहितदनवगाह्यनुमितिभेदेन पक्षताभेदस्य स्वीकरणीयतया गौरवम्।

न च विशिष्टबुद्धौ धर्मितावच्छेदकव्यापकत्वमानानुपगमे पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिबाधदशायां तत्सामानाधिकरण्येन तादृशबाधविषयधर्मिविषयिण्याः कतिपयधर्मिविशेष्यकानुमितेरिव सकलधर्मिविशेष्यकानुमितेरप्युत्पादौचित्यादवच्छेदकावच्छेदेनानुमितावुद्देश्यायामप्यंशतो बाधस्यादोषतापत्तिरिति वाच्यम्। सामानाधिकरण्यमात्रावगाहिन्यां विशिष्टबुद्धौ समानविषयकतथाविधविपरीतनिश्चयप्रतिबन्धकतायाः प्राचामनुमततयांऽशतो बाधस्य दोषतोपपत्तेः। एवञ्च यावत्पक्षविषयकानुमितौ यावत्पक्षविषयकहेतुमत्ताज्ञानापेक्षया तद्विरोधितया भागासिद्धेरपि दोषतानिर्वाहः। यत्र सकलपर्वतानां नैकपरामर्शविषयता अपि तु परामर्शद्वयविषयता तत्र यावत्पर्वतविषयकानुमितिरूपावच्छेदकावच्छेदेनानुमितिः प्राचीनमते इष्टैव। नवीनमतेऽपि तत्र तादृशानुमितेरावश्यकत्वादित्यवच्छेदकावच्छेदेनानुमितौ तादृशपरामर्शस्य हेतुत्वाकल्पनेनापि तन्मते लाघवम्। मैवम्। अवच्छेदकावच्छेदेन विशिष्टबुद्धौ व्यापकत्वभानानुपगमे व्यापकत्वमानस्य विपरीतज्ञानप्रतिबन्धकत्वप्रयोजकत्वासम्भवेन तत्प्रयोजकत्वस्य दुर्निर्वचतापत्तेः।

न चैकरूपेण समानधर्मिविषयकत्वमेव विपरीतज्ञानविरोधित्वे बीजम्। तथा सति पार्थिवगन्धत्वावच्छेदेन जलावृत्तित्वादिनिश्चयस्यापि शुद्धगन्धत्वावच्छेदेन तन्निश्चयस्यैव गन्धो जलवृत्तिर्न वे-

त्यादौ गन्धत्वादिसामानाधिकरण्यमात्रेण जलवृत्तित्वादिसंशये विरोधिताप्रसङ्गात् । उभयोरेव निश्चययोर्गन्धत्वाश्रययावद्धर्मिणि ग्राह्याभावावगाहितयाऽविशेषात् । विरोधिविषयकत्वाविशेषे धर्मितावच्छेदककोटावधिकभानस्याविरोधितावीजत्वाभावात् ।

मन्यमते उभयनिश्चयविषयव्यापकतयोर्भेदाद्विशेषसम्भवात् । एतेनावच्छेदकावच्छेदेनानुमितौ व्यापकत्वभानापेक्षया लाघवाद्यावद्धर्मिवृत्त्यखण्डैकविषयत्वाभ्युपगम एवोचितः । तदन्यविषयतैव सिद्धिसामान्यप्रतिबध्यतावच्छेदिका, सिद्धिसामान्याभावकालीनानुमितावेतादृश्यैकैकधर्मिविषयता अपीष्यत इति परास्तम् ।

पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धिदशायां सामानाधिकरण्यमात्रावगाहिन्यनुमितिर्न जायते, उभयोरेव सिद्धयोः पक्षतावच्छेदकवति साध्यसम्बन्धरूपतदुभयसामानाधिकरण्यावगाहितया तादृशानुमितेस्तदतिरिक्तानवगाहित्वात्, अतस्तथाविधानुमितौ उभयविधसिद्धयोरेव प्रतिबन्धकत्वं दर्शयति । तत्सामानाधिकरण्येनेति । तत्सामानाधिकरण्यमात्रेण । पक्षतावच्छेदकसामानाधिकरण्यमात्रेण । अवच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्यावगाहितया तद्व्यावर्त्तनायावच्छेद्यावच्छेदकभावावगाहित्वव्यवच्छेदार्थं मात्रपदम् । अवच्छेद्यावच्छेदकभावानवगाहित्वञ्च न सिद्ध्यभावजन्यतावच्छेदककोटौ निवेशनीयम् । उक्तदिशा आपत्तिसम्भवात्, पर्याप्तिनिवेशादेवोपपत्तेर्वैयर्थ्याच्चेत्यवधेयम् ।

सिद्धिमात्रस्येति । मात्रपदं कृत्स्नार्थकम् । तथा च पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धेरित्यर्थः । प्रतिबन्धकता चोभयविधसिद्धयोः संसर्गादीनां पर्याप्तिमनिवेश्यैकरूपेणैव यदुभयसाधारणं निश्चयत्वं शक्यते निर्वक्तुं, अन्यथा पुनः पृथक् पृथगेवेति ध्येयम् ।

यत्तु सामानाधिकरण्येनानुमितौ तथाविधसिद्धेरवच्छेदकावच्छेदेन सिद्धिव्यावृत्तरूपेण प्रतिबन्धकत्वेऽपि तत्रावच्छेदकावच्छेदेन सिद्धेर्न प्रतिबन्धकताधिकय अवच्छेदकावच्छेदेनानुमितौ तस्याः प्रतिबन्धकत्वे कल्पनीये अवच्छिन्नसंयोगादिपर्याप्तसंसर्गताकत्वस्य प्रतिबध्यतावच्छेदकेऽवश्यं निवेशनीयतया अवच्छिन्नत्वातिरिक्तधर्मानवच्छिन्नसंयोगादिनिष्ठसंसर्गताकत्वस्यैव च तदर्थतया तस्य

शुद्धसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृशप्रतिबन्धकत्वैवो-पपत्तेरिति। तदसत्, सामानाधिकरण्येनानुमिनुयामवच्छेदकावच्छे-देनानुमिनुयामित्याद्याकारकेच्छानां पृथक् पृथगुत्तेजकताया वक्ष्य-माणतया पृथक् पृथक् प्रतिबन्धकताकल्पनस्याऽऽवश्यकत्वात् ॥

(दी०) इत्थञ्च लिङ्गभेदन्यायो ऽनुसरणीयः। साध्य-विशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे तां प्रति पक्षविशेष्यिकैव सिद्धिर्विरोधिनी।

(गा०) ननु तादृशसिद्धिदशायां पक्षतावच्छेदकावच्छेदेनानुमि-नुयामित्याकारकसिषाधयिषासत्त्वेऽसति चावच्छेदकावच्छेदेन हे-तुमत्तापरामर्शे सामानाधिकरण्यमात्रावगाहिपरामर्शाच्चादृशानुमि-तेरापत्तिः, तथाविधसिषाधयिषासत्त्वेन पक्षताया अक्षतत्वादित्यत आह। इत्थञ्चेति। इत्थञ्च। तुल्ययुक्त्या पक्षतावच्छेदकावच्छिन्नत्व-तत्सामानाधिकरण्यमात्रावगाह्यनुमित्योः सिद्धेः पृथक् पृथक् प्रति-बन्धकत्वे च। लिङ्गभेदन्याय इति। यथा तत्तल्लिङ्गकानुमितौ सिद्धेः प्रतिबन्धकतायां तत्तल्लिङ्गकानुमितीच्छैवोत्तेजिका, न त्वन्यलिङ्गका-नुमितीच्छापि, तथा पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहि-नीमनुमितिं प्रति सिद्धेः प्रतिबन्धकतायां तादृशानुमितीच्छैवोत्ते-जिका न त्वन्यविधानुमितीच्छेति स्वीकरणीयमिति नातिप्रसङ्ग इत्यर्थः। यदि पर्वते वह्निरित्याद्याकारकसाध्यनिश्चयानन्तरं पर्वतो वह्निमानित्याद्याकारकानुमितिर्जायते तदा साध्यविशेष्यकानुमितौ साध्यविशेष्यकसिद्धेरेव प्रतिबन्धकत्वेन सामान्यतः साध्यपक्षवैशि-ष्ट्यावगाह्यनुमितौ तादृशसिद्धित्वेन नैकं प्रतिबन्धकत्वं कल्पनीयम् अपि तु विशिष्यैव प्रतिबन्धकताद्वयम्, अगत्या गौरवस्यादोषत्वा-दित्याशयेनाह। साध्यविशेष्यकेति। द्वयोः समानविषयकत्वे वि-शेष्यविशेषणभाववैपरीत्यमकिञ्चित्करमित्यभिप्रायेणानिर्भरसूचनाय प्रामाणिकत्वे इत्युक्तम्। पक्षविशेष्यिकैवेति। तथा च प्रकारताविशे-ष्यते निवेश्यैव प्रतिबध्यप्रतिबन्धकभावः कल्पनीय इति भावः। त-त्र तादृशानुमित्यभावस्य प्रामाणिकत्वे तु उभयविधज्ञानसाधारण-, पक्षसाध्यवैशिष्ट्यावगाहिनिश्चयत्वस्यानतिप्रसक्तस्य सुवचत्वे उ-

भयविधसिद्धोरनुगतरूपेणैव प्रतिबन्धकता, प्रतिबध्यतावच्छेदक-न्तु पक्षविशेष्यकसाध्यप्रकारकानुमितित्वादिकमेव न त्वनुगतम्। पक्षविशेष्यकसाध्यप्रकारकानुमितिर्जायतां साध्यविशेष्यकपक्षप्रकारकानुमितिर्जायतामित्याकारकयोरिच्छयोः पृथक् पृथगुत्तेजकत्वानुरोधात्।

(दी०) एवञ्च पक्षविशेष्यकसिद्ध्यनन्तरमपि साध्यविशेष्यकानुमितिर्जायते तुल्यन्यायात्, समानाकारायाः सिद्धेः प्रतिबन्धकत्वे पर्यवसानात् । तादृशानुमितिं प्रति सिद्धिमात्रं विरोधि साध्यप्रसिद्धिरेव वा । अत एव प्रसिद्धसाध्यकस्थले पक्षविशेष्यिकैवानुमितिरनुभूयते इति ।

(गा०) एवञ्च । साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रामाणिकत्वं च । तुल्यन्यायादिति । पर्यवसानादित्यन्तस्य हेतुः । समानाकारायाः सिद्धेरिति । अन्यूनाकारसिद्धेरित्यर्थः । पर्वतः सुन्दरवह्निमानित्यादिसिद्धिदशायामपि न्यूनविषयिण्याः पर्वतो वह्निमानित्याद्यनुमितेरनुत्पादात् । अधिकविषयकसिद्धेरविरोधित्वेऽवच्छेदकावच्छेदेन सिद्धेः सामानाधिकरण्येनानुमितौ प्रतिबन्धकतालिखनस्यासङ्गतेः । एवं जातिशक्तिवादे गोत्वत्वेन गोवृत्तित्वानुमानं सिद्धसाधनान्न सम्भवतीति अविशिष्टहेतुना विशिष्टसाध्यसाधन एव सिद्धसाधनानवकाशो न तु विशिष्टेनाविशिष्टसाधनेऽपीति जात्या व्यक्त्यनुमानपक्षमाक्षिप्य मिथ्या अर्थापत्त्या वा तत्सिद्धिरिति मूलमवतारयामासुः ।

ननु साध्यविशेष्यकानुमितिस्तावन्न सर्वानुभवसिद्धा पर्वतो वह्निमानित्याद्याकारिकाया एवानुमितेरनुभवात् किन्त्वप्रसिद्धसाध्यकस्थले विशेषणज्ञानादिविरहेण साध्यविशेषणकानुमितेरनुपपत्त्या साध्यविशेष्यकानुमितिरुपेयते एवञ्च पक्षविशेष्यकसिद्धिदशायामपि तादृशानुमितेरप्रामाणिकतया तदनभ्युपगमे ऽपि क्षतिविरहात् । तां प्रति साध्यपक्षवैशिष्ट्यावगाहिज्ञानत्वेनोभयविधसिद्धिसाधारणेनापि प्रतिबन्धकत्वं सम्भवतीत्यभिप्रेत्य मतान्तरमाह । तादृशानुमितिमिति । साध्यविशेष्यकानुमितिमित्यर्थः ।

सिद्धिमात्रम्। पक्षविशेष्यिका साध्यविशेष्यिका च सिद्धिरित्यर्थः।

ननूच्छृङ्खलसाध्यज्ञानदशायामपि साध्यविशेष्यिकाऽनुमितिरप्रामाणिकी, तत्र साध्यविशेषणकानुमितेरेव सम्भवादिति, तादृशानुमितिप्रतिबन्धकतायां पक्षादिविषयतायाः सिषाधयिषाविरहस्य निश्चयत्वस्य च निवेशनं गौरवायेत्यभिसन्धायाऽऽह। साध्यप्रसिद्धिरिति। साध्यतावच्छेदकप्रकारकज्ञानमित्यर्थः। तेनेतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शाच्छेदत्वादिना साध्यज्ञानसत्त्वेऽपि पृथिव्यामितरभेद इत्याद्याकारकानुमितेर्नानुपपत्तिः। न च तत्र पृथिवी इतरभिन्ना इत्येतादृशानुमिते सम्भवः, विशेषणतावच्छेदकीभूतेतरभेदत्वादप्रकारकज्ञानविरहात्।

अथेतरभेदत्वादिप्रकारकज्ञानस्य यदीतरभेदत्वाद्यवच्छिन्नमुख्यविशेष्यकज्ञानत्व प्रतिबध्यतावच्छेदकं तदा तथाविधज्ञानदशायां इतरभेदादिपक्षकप्रमेयत्वाद्यनुमितेरनुपपत्तिः। तद्धर्मावच्छिन्नविधेयकत्वस्याधिकस्य निवेशेऽपि इतरभेदः प्रमेयः पृथिवी इतरभिन्नेत्यादिसमूहालम्बनानुमितेर्गोत्वाभावो गोत्वाभाववानित्याद्यनुमितेश्चानुपपत्तिः।

अत्र केचित्। पृथिवी इतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणी विशेष्यत्वाद्यवच्छेदकताभिन्ना प्रकारतैव विधेयता, साध्यविशेष्यकानुमितौ च ततो ऽन्या, तथा च प्रकारताभिन्नविधेयतैव साध्यप्रसिद्धिप्रतिबध्यतावच्छेदिकेति नानुपपत्तिरित्याहुः। तन्न। प्रकारताविशेषस्य विधेयतात्वोपगमे जलभेदे तेजोभेदः इत्याद्याकारकतेजोभेदादिसाध्यविशेष्यकानुमितेर्जलभेदादिविधेयकत्वापातात्। न चाधेयतासम्बन्धावच्छिन्नप्रकारताव्यावृत्तं तदिति वाच्यम्। तथा सत्याधेयतासम्बन्धेन जलभेदादिसाध्यकतादृशानुमितेरपि तद्विधेयकत्वानुपपत्तेः। यदि च यत्राधेयत्व साध्यतावच्छेदकसम्बन्धस्तत्र विधेयत्वमतिरिक्तमित्युच्यते, तदा तत्सम्बन्धेन जलभेदसाध्यकानुमितौ प्रकारताभिन्नविधेयताशालिन्यां साध्यप्रसिद्ध्यभावव्यभिचारो दुर्वारः।

वस्तुतस्तु तद्धर्मावच्छिन्नाप्रकारकत्वे सति तद्धर्मावच्छिन्नविधेयकानुमितित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदक, साध्य-

प्रसिद्धिस्थले च साध्यप्रकारिका एवानुमितिर्जायते न तु तदप्रकारिकेति न तत्र व्यभिचारः । अत एव । साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबन्धकत्वादेव । प्रसिद्धसाध्यकस्थले । अभावरूपसाध्यप्रसिद्धिस्थले, न तु भावसाध्यकस्थले इत्यर्थः । तत्र परामर्शस्य नियमतः साध्यघटितव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिद्ध्या साध्यप्रसिद्धिप्रतिबन्धकतायाः कल्पयितुमशक्यत्वात् उपष्टम्भकत्वासङ्गतेः, स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविधेयतावच्छेदकतापर्याप्त्याश्रयत्वसम्बन्धेनानुमितिं प्रति विषयतावच्छेदकतारूपविषयनिष्ठप्रत्यासत्त्या ज्ञानस्य सर्वसाधारण्येन प्रतिबन्धकताया आपातत उक्तिसम्भवेऽपि साध्यघटितव्यतिरेकव्याप्तिविषयकपरामर्शघटितसामग्र्या एव साध्यविशेष्यकानुमित्युत्पादप्रयोजकतायाः फलत्वाद्भावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसक्त्या अनुमितेः साध्यविशेष्यकत्वे तादृशप्रतिबन्धकताया अप्रयोजकत्वात् उपष्टम्भासङ्गतितादवस्थ्यात् ।

यत्तु यत्र महानसीयवह्निमात्रविषयकः परामर्शः तत्र पक्षधर्मताबलात् पर्वते पर्वतीयवह्निर्भासमानविशेषणज्ञानविरहेण विशेष्यतयैव भासत इति भावसाध्यकस्थलेऽपि साध्यविशेष्यकानुमितिसम्भव इति तत्तुच्छम् । सामान्यलक्षणायाः प्रत्यासत्तित्वमते महानसीयवह्निविषयकपरामर्शे पर्वतीयवह्न्यभानप्रयोजकस्य दुर्लभत्वात । न च स्मरणात्मकपरामर्शे कदाचिदुद्बोधकविरहात्तद्भानसम्भव इति वाच्यम् । उद्बोधकस्य फलबलकल्प्यत्वाद्विशिष्टविशेषणकबुद्धौ विशेषणज्ञानहेतुताया निर्युक्तिकत्वात्, विशेष्यतावच्छेदकप्रकारकज्ञानस्य चाक्षतत्वात्, पर्वतीयवह्न्यविषयकपरामर्शादपि वह्नित्वेन तद्वह्निविशेषणकानुमितिसम्भवाच्च । –

इदमत्रावधेयम्, साध्यप्रसिद्धिप्रतिबन्धकतायामपि साध्यविशेष्यकानुमितित्वप्रकारकेच्छाया उत्तेजकत्वमावश्यकम्, अन्यथा पक्षविशेष्यकसिद्धिदशायां तादृशेच्छासत्त्वे साध्यविशेष्यकानुमित्यपलापापत्तेः । सिद्धसमवहितसाध्यप्रसिद्धिदशायां साध्यविशेषणकानुमितेः सम्भवेन तत एव उद्देश्यसंशयनिवृत्त्यादिसम्भवे साध्यविशेष्यकानुमित्यनभ्युपगमोऽपि न क्षतिकर इत्यभिप्रेत्यैव साध्यप्रसिद्धेस्तद्विरोधित्वमुररीकृतं ग्रन्थकृता । प्रकृते च साध्य

विशेषणकानुमित्यपलापानौचित्यात् । तथा च यत्र सिद्ध्यनवहिता साध्यप्रसिद्धिरथ चानुमित्सा तत्र व्यतिरेकिपरामर्शात् साध्यविशेष्यिका तद्विशेषणिका चानुमितिरापद्येत । न ह्येकविधादेव परामर्शादेकदा द्विविधाऽनुमितिरानुभविकी तस्माद्व्यतिरेकिपरामर्शात् साध्यप्रसिद्धिदशायामपि साध्यविशेष्यिकाया एवानुमितेः स्वीकारः समुचितः। सिद्धिप्रतिबन्धकतापेक्षया साध्यप्रसिद्धिप्रतिबन्धकतायामवच्छेदकलाघवमप्यकिञ्चित्करमेव,व्यतिरेकिपरामर्शात् क्वचित्साध्यविशेषणकानुमितिस्वीकारे तादृशानुमितिं प्रति व्यतिरेकिलिङ्गकत्वान्वयिलिङ्गकत्वप्रकारकानुमितित्वं पृथगुपेजकीकृत्य सिद्धेः प्रतिबन्धकताद्वयेनैव गौरवात् ।

परे तु अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेषणिकैवानुमितिर्जायते इतरभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानविरहेऽपि विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेनैव पृथिवीतरभिन्नेत्याद्यनुमितिसम्भवात् ।

न च लाघवानवकाशः तादृशानुमितिं प्रत्येव साध्यप्रसिद्धिप्रतिबन्धकताया अवश्यकल्पनीयत्वादिति वाच्यम् । तथाविधानुमितौ यादृशी विषयता तस्याः साध्यप्रसिद्धिकालीनविशिष्टवैशिष्ट्यावगाह्यनुमितिसाधारण्योपगमात्, साध्यविशेष्यकानुमित्यनुपगमेन साध्यप्रसिद्धिप्रतिबन्धकताया एव कल्पनात् ।

न च सिद्धिकाले तथाविधानुमितेर्वारणाय तत्र सिद्धेः प्रतिबन्धकताकल्पनाधिक्यमावश्यकमिति वाच्यम् । विशिष्टवैशिष्ट्यावगाह्यनुमितिस्थलीयसिद्धिप्रतिबन्धकतयैवोपपत्तेः ।। इतरभेदत्वादिना इतरभेदादिविधेयकानुमितित्वस्य तत्स्थलीयप्रतिबध्यतावच्छेदकस्योभयसाधारणत्वादिति ।

यत्तु विशिष्टवैशिष्ट्यावगाह्यनुमितौ विशिष्टवैशिष्ट्यावगाहिनी सिद्धिरेव विरोधिनी न तु केवलं विशेष्ये विशेषणम् तत्र च विशेषणान्तरमिति रीत्या जायमानापि सा तथा तस्याः संसर्गांशे विशिष्टनिरूपितत्वानवगाहितया न्यूनविषयकत्वात्।एवञ्च केवलं विशेष्ये विशेषणमिति न्यायेनानुमित्युपगमे तादृशसिद्धिदशायां तस्या वारणाय तत्र तादृशसिद्धेर्विरोधित्वकल्पनाधिक्यमावश्यकमेवेति किमपराद्धं साध्यविशेष्यकानुमितिस्वीकारेण । विशिष्टवैशिष्ट्याव-

वगाहिसाध्यविशेषणकानुमितेरभ्युपगमेन प्रतिवध्यप्रतिबन्धकभावसाम्यादिति । तदपि तुच्छम् । विशिष्टवैशिष्ट्यभानमात्रविरोधिबाधादिकाले केवलं विशेष्ये विशेषणमित्यादिन्यायेनानुमितेः सर्वसंमततया तत्र तादृशसिद्धेः प्रतिबन्धकताया आवश्यकत्वेन साध्यविशेष्यकानुमितिस्वीकर्तुरधिकप्रतिबन्धकताकल्पनस्य दुर्वारत्वादिति । यदि च विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यानवगाहिन्यपि विशिष्टविशेषणज्ञानमपेक्षितं तदा तुल्ययुक्त्या विशिष्टविशेष्यकज्ञानेऽपि विशिष्टविशेष्यज्ञानहेतुतया साध्यतावच्छेदकविशिष्टविशेष्यकानुमितिरप्रतिरुद्धसाध्यकस्थले न सम्भवति ।

न च विशेष्यज्ञानस्य विशिष्टबुद्धावहेतुतया तद्विशेषस्यापि न तद्विशेषहेतुतेति वाच्यम् । सामान्यप्रत्यासत्तिजन्यज्ञाने विशेष्यज्ञानस्य व्यभिचारेण सामान्यहेतुत्वासम्भवेऽपि तुल्यरूपोभयविशेषणावगाहिज्ञानस्यान्यतरविशिष्टापरविशेषणकत्ववारणाय विशेषहेतुताया आवश्यकत्वात्, अन्यथा विशेषणज्ञानस्यापि विशेषहेतुताया उच्छेदात् । अत एव विशिष्टवाक्यार्थविशेष्यकशाब्दबोधे अवान्तरवाक्यार्थज्ञानापेक्षा । न च साध्यविशेष्यकानुमितौ तुल्यरूपयोरेव पक्षविधेयतावच्छेदकयोः साध्यांशे प्रकारता न त्वेकविशिष्टांशेऽपरस्येति न विशिष्टसाध्यज्ञानापेक्षेति वाच्यम् । निर्विशेष्यतावच्छेदकानुमितेरनुभवविरुद्धत्वात् प्रत्यक्षस्य च निर्धर्मितावच्छेदककस्याभ्युपगमात् प्राथमिकाभावप्रत्यक्षे प्रतियोग्यधिकरणयोरभावविशेषणतया भानोपपत्तिः । तथा च साध्यविशेष्यकानुमितिर्निर्युक्तिकैवेति वदन्ति ।

अथ जलव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शाज्जलभेदत्वरूपविशेषणज्ञानं विना स्वरूपतस्तत्प्रकारिका पृथिव्यां जलभेद इत्याद्याकारिका अनुमितिरेव कथमुत्पद्यते इति चेन्न । कथञ्चित्तत्र जलीयत्वादिमात्रपुरस्कारेणैवाभावानुमित्युपगमादिति कृतं पल्लवितेन ।

(दी०) अत्र च व्याप्तिस्मरणादिना पूर्वानुमित्यनाशे परामर्शकाले च सिद्धिसत्त्वेऽनुमित्यन्तरोत्पत्त्यैव अनुमितिस्तथैव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तेरित्युपाध्यायाः ।

(गा०) ननु सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वेऽपि सन्देहवत्परामर्शपूर्वमित्यादिग्रन्थेन सिषाधयिषापक्षतापक्षोक्तस्य व्यभिचारस्य सिद्धिकालीनानुमितिस्थले तादवस्थ्यम् । सिषाधयिषानाशे विशिष्टप्रतिबन्धकस्यानुमित्यव्यवहितप्राक्कालेऽसत्त्वादित्याक्षेपे यथाश्रुतसमाधानमाह । अत्र चेति । व्याप्तिस्मरणादीत्यादिनाऽनुमित्साद्वितीयक्षणे यत्र पक्षधर्मताज्ञानं तत्स्थलीयतादृशज्ञानपरिग्रहः । पूर्वेति । व्याप्तिस्मरणादिपूर्वकालीनेत्यर्थः । परामर्शदशायामसत्यां सिद्धौ विशेष्याभावादेव विशिष्टाभावनिर्वाहेण नानुमित्यनुपपत्तिरतः परामर्शकाले च सिद्धिसत्त्वे इति । अनुमित्सान्तरेति । परामर्शद्वितीयक्षणे तदव्यवहितप्राक्क्षणे चेत्यादि, तदुत्पत्तिप्रकारश्चाधस्ताद्दर्शितः । एवञ्च सिषाधयिषापक्षतापक्षः सिषाधयिषाविरहेऽपीत्यादिदोषादेव हेय इति भावः ।

ननु सर्वत्र पुनरनुमित्सोत्पत्तौ मानाभाव इत्यत आह । तथैवेति । अनुमित्सान्तरोत्पत्त्यैवेत्यर्थः । कारणीभूतस्येति । तथा च तादृशविशिष्टाभावात्मककारणं विनानुपपत्तिरेव सिद्धिस्थलीयविशिष्टाभावनिर्वाहकानुमित्सान्तरोत्पत्तौ मानमिति भावः । एतन्मते एव दीधितिः २ तोऽपि निर्भरः मिश्रादिमतस्य गौरवकवलितत्वादिति ध्येयम् ।

(दी०) अन्ये तु द्वित्रिक्षणान्तरितायामपि अनुमित्सायामनुमितिदर्शनात् अनुमित्सायोग्यता वाच्या । सा च न स्वोत्पत्त्यनन्तरं स्वविषयसिद्ध्यनुत्पादः । अनुमित्सानन्तरमन्तराऽनुमित्यनुत्पादे दिवसादिविलम्बेनेन्द्रियादिना निर्णीतेऽपि साध्ये लिङ्गपरामर्शादनुमितिप्रसङ्गात् । किन्तु अनुमित्सानन्तरं लिङ्गदर्शनादिक्रमेण यावता कालेन उत्सर्गतः परामर्शो जायते तावानेव कालः, फलबलेन तथा कल्पनात् ।

(गा०) मिश्रमतमाह । अन्ये त्विति । द्वित्रिक्षणान्तरितायामपीति । द्विक्षणव्यवहितायां क्षणत्रयव्यवहितायाञ्चेत्यर्थः । अनुमित्सायाम् । अनुमित्सोत्पत्तौ । तेन एकक्षणान्तरितायामप्यनुमित्सायां यत्रानुमितिस्तत्राप्यनुपपत्तिसत्त्वेन तदनभिधाने न्यूनता । एवं प्रथमकल्पे सिषाधयिषोत्पत्तिक्षणमारभ्य क्षणचतुष्टयात्मककालस्यैव

विवक्षणीयतया त्रिक्षणान्तरानुमित्सास्थलेऽनुमित्यनिर्वाहश्चेति दू-
षणद्वयानवकाशः । एवञ्चानुमितिदर्शनादित्यस्यानुमित्सोत्पत्तेश्चतु-
र्थक्षणे पञ्चमक्षणे वा अनुमितिदर्शनादित्यर्थः । बाच्या । सिषाधयि-
षापदेन विवक्षणीया । सा च । योग्यता च । स्वोत्पत्त्यनन्तरमिति ।
स्वप्रागभावोत्तरमित्यर्थः । स्वस्योत्पत्तिर्यस्मादिति व्युत्पत्त्या स्वो-
त्पत्तिपदस्य प्रागभावपरत्वात्, अन्यथा सिषाधयिषोत्पत्तिकाले
योग्यतानुपपत्त्या तद्द्वितीयक्षणे अनुमितेरनिर्वाहात् । सिद्ध्यनुत्पादः ।
सिद्धिप्रागभावः । तथा च स्वप्रागभावध्वंसविशिष्टस्वविषयसिद्धि-
प्रागभाव एवानुमित्सायोग्यतेति पर्यवसितम् । अनुमित्सापूर्वं तद्वि-
षयीभूतसिद्ध्यनन्तरञ्चानुमितिवारणाय दलद्वयापादानम् ।

न चानागतानां यावदनुमितीनामेवानुमित्साविषयत्वसम्भ-
वात् स्वविषयीभूतैकानुमितावुत्पन्नायामपि भाविव्यक्त्यन्तरप्रा-
गभावमादाय योग्यताप्रसङ्ग इति वाच्यम् । स्वविषयसिद्धित्वा-
वच्छिन्नप्रागभावस्य विवक्षितत्वात् । अत एव स्वविषयेत्युक्तम्,
यत्किञ्चिद्विशेषध्वंसवति काले सामान्यधर्मावच्छिन्नप्रागभावास-
म्भवेन सिद्धित्वावच्छिन्नप्रागभावस्य कदाऽप्यसत्त्वात् । सामा-
न्यधर्मस्य प्रागभावप्रतियोगितावच्छेदकत्वानङ्गीकारे पुनः स्व-
विषयसिद्ध्यसमानकालीनत्वमेव प्रागभावे विशेषणं देयम् । वह्न्य-
नुमितिर्घटानुमितिश्च जायतामित्यादीच्छानन्तरं घटानुमित्या-
दिरूपविषयसिद्धावपि वह्न्याद्यनुमित्युत्पत्त्या सिद्धीति, प्रकृतसा-
ध्यपक्षवैशिष्ट्यावगाहिनिश्चयार्थकम् । अनुमित्सोत्तरं दिवसादिवि-
लम्बेनाप्यनुमितिप्रसङ्गादित्यन्वयः । अन्तराऽनुमित्युत्पादे स्ववि-
षयसिद्धित्वावच्छिन्नप्रागभावासत्त्वेन योग्यताक्षतेर्नापत्तिसम्भव
इत्यतोऽन्तराऽनुमित्यनुत्पाद इति । द्वित्रिक्षणादिविलम्बेनानुमिते-
रिष्टत्वात्, दिवसादिविलम्बेनेति । सिद्धसत्त्वे अनुमितेरिष्टत्वा-
दिन्द्रियादिना निर्णीत इति । लिङ्गेन निर्णीते साध्येऽन्तराऽनुमित्य-
नुत्पाद एव न सम्भवतीत्यत इन्द्रियादिनेति । आदिना शब्दादि-
परिग्रहः । अनुमित्सेति । अनुमित्साधिकरणक्षणाव्यवहितोत्तरक्ष-
णे क्रमेण पक्षविषयकलिङ्गज्ञानव्याप्तिस्मरणयोरुत्पत्तौ सत्यामुत्स-
र्गतो यावता कालेन परामर्शोत्पत्तिः अनुमित्सोत्पत्तिक्षणमारभ्य
तत्क्षणपर्यन्तं यावन्तः क्षणा यो वा तावदधिकक्षणानवस्थायी

स्थूलकालः तत्समुदाय एव सेत्यर्थः। एवञ्च क्षणचतुष्टयं तदधिकक्षणानवस्थायिनः स्थूलसमयाश्च योग्यतति पर्यवसितम्। तदनुगमश्च स्वप्रागभावानधिकरणस्वध्वंसानधिकरणसमयध्वंसानधिकरणत्वोभयसम्बन्धेन सिषाधयिषावत्कालत्वेन न तु अननुगतेन तत्तत्कालत्वेन गौरवात्, तत्तत्कालोत्तेजकत्वापेक्षया तत्तत्सिद्धिव्यक्तिभेदानामेव निवेशनौचित्यात्। यावत्तया उत्तेजकत्वकल्पनेऽपि वक्ष्यमाणायाः पूर्वानुमित्सावलादनुमित्युत्तरमनुमित्यापत्तेरसङ्गत्यापाताच्च तत्रानुमितिक्षणस्योत्तेजकताकल्पकाभावादिति विभावनीयम्। अनुमित्सोत्तर यत्र विलम्बेन लिङ्गदर्शनादिक ततश्च परामर्शः तत्रानुमित्सोत्पत्तिक्षणमारभ्य परामर्शोत्पत्तिक्षणपर्यन्तस्थायी दण्डादिरपीति तद्वारणाय लिङ्गदर्शनादेरनुमित्साक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वमनुसृतम्। यत्रानुमित्सोत्पत्तिद्वितीयक्षणे पक्षलिङ्गव्याप्तिविषयकमेकं स्मरणम्, तदनन्तरक्षणे परामर्शोत्पत्तिस्तत्र क्षणत्रयमध्ये एव परामर्शोत्पत्त्या तदनतिरिक्तकालमात्रस्य तथात्वभ्रमवारणाय क्रमेणेति। अनुमित्सोत्पत्तिद्वितीयक्षणतृतीयक्षणयोर्लिङ्गदर्शनव्याप्तिस्मरणयोः क्रमेणोत्पत्तावपि कुतश्चित्प्रतिबन्धकात् यत्र विलम्बेन परामर्शोत्पत्तिस्तत्राधिकक्षणानामपि तथाविधतया तद्वारणाय उत्सर्गत इति। तादृशव्याप्तिस्मरणानन्तरक्षण परामर्शोत्पत्त्यवसाति विरोधिनीत्यर्थः। अनुमित्यननुगुणक्षणव्यवधानविरहेण पञ्चमक्षणेऽनुमितिरुत्पद्यते न तु तदग्रेऽपि तथाविधक्षणव्यवधानादित्येतत्सूचनाय भङ्ग्या तादृशकालविशेषोपादानमित्यवधेयम्। ननु तथाविधकालस्योत्तेजकत्वे गौरवमित्यत आह। फलवलेनेति। अनुमित्सानाशे अनुमित्यात्मककार्योत्पत्त्यनुरोधेनेत्यर्थः। तथा कल्पात्। तादृशकालस्योत्तेजकत्वकल्पनात्।

(दी०) अथ वा अनुमित्सोत्पत्त्यनन्तरमनुमित्सानाशेऽपि सिद्धौ सत्यां यावत्कालमध्ये ऽनुमितिर्जायते तावानेव कालोऽनुमित्सया उपलक्षितः। यदि च सिद्ध्यनन्तरं तन्नाशेऽपि द्वित्रिक्षणमध्ये विना अनुमित्सामनुमित्यनुत्पादोऽनुभवसिद्धस्तदा सिद्ध्याऽपि तावानेव समय उपलक्षणीयः।

विशिष्य क्षणनियमस्त्ववहितैः करणीय इति वदन्ति ।

(गा०) यत्र तथाविधपरामर्शोत्पत्तिक्षणे अनुमितिप्रतिबन्धकबाधादिसमवधानमासीत्, तदपगमश्च तद्द्वितीयक्षण तत्र सिद्धौ सत्यां तदनन्तरञ्चेदनुमितिः प्रामाणिकी । एवं यत्रानुमितेस्तद्द्वितीयक्षणे लिङ्गदर्शनसामग्रीसमवधानं, तदनन्तर लिङ्गदर्शनादिक्रमेण परामर्शोत्पत्तिस्तत्र सिद्धौ सत्यामनन्तरक्षणे अनुमितिर्वा, तद्वा उक्तापेक्षया अधिकस्य कालस्योत्तेजकत्वमावश्यकमित्याशयेनाह । अनुमितेसोत्पत्त्यनन्तरमिति । अनुमित्सोत्पत्तिक्षणमारभ्य तदुत्तरमित्यर्थः । यावत्कालमध्ये अनुमितिर्जायते इत्यग्रेतनेनान्वयः । अनुमित्सोत्तरमनुमित्सान्तरोत्पत्त्या दिवसादिविलम्बेनापि सिद्ध्यनन्तरमनुमित्युत्पत्त्या तावत्कालस्य चानुत्तेजकत्वादनुमित्सानाशेऽपीति । प्रागनुमित्सायामसत्यामपीत्यर्थः । असत्यां सिद्धौ अनुमित्सोत्तरं दिवसादिविलम्बेनाप्यनुमित्युदयात्, सिद्धौ सत्यामिति । प्रागिन्यादिः । यावत्कालमध्ये । यावत्क्षणानन्तरक्षणे । तावानेव कालः । तावत्क्षणाधिकक्षणानवस्थायी स्थूलकालः । अनुमित्सया । अनुमित्सार्थकसिषाधयिषापदेन । उपलक्षितः । विवक्षितः ।

अनुमित्सायोग्यतया उत्तेजकत्ववत् तुल्ययुक्त्या सिद्धियोग्यतया अपि प्रतिबन्धकत्वमुचितमित्याशयेनाह । यदि चेति । सिद्ध्यनन्तरमेवेति शेषः । तेन नास्य वैयर्थ्यम् । द्वित्रिक्षणमध्ये इति । द्विक्षणमध्ये त्रिक्षणमध्ये वेत्यर्थः । सिद्धेश्चतुर्थक्षणे पञ्चमक्षणे वेति फलितम् । सिद्ध्याऽपि । सिद्धिपदेन । तावान् । तन्नाशानन्तरमपि द्विक्षणस्थायी त्रिक्षणस्थायी वा । उपलक्षणीयः । विवक्षणीयः ।

ननु सिद्ध्युत्तरं कियत्क्षणमध्य अनुमितिर्न जायते कियत्क्षणानन्तरं वा जायत इत्यस्य विशिष्य निर्णेतुमशक्यतया कालस्य प्रतिबन्धकत्वकल्पनमसम्भवि । एवमुत्तेजककालस्यापि विशिष्य निर्णेतुमशक्यतया तदुत्तेजकत्वमपि तथेत्यत आह । विशिष्येति । अवहितैः । सावधानैः । नियमः । निर्णयः । तथा च येषां विशिष्य तावत्कालनिर्णयो भवति तेषामेव तत्र विशिष्य प्रतिबन्धकत्वावगमो भविष्यति अन्येषां तु सामान्यत एवेति भावः ।

केचित्तु ननु कालविशेषाणां सिद्धिसिषाधयिषाधिकरण-

कालत्वेन चेत्प्रतिबन्धकोत्तेजकभावः तदा अधिकाधिककालस्यापि तथात्वप्रसङ्गः, अनतिप्रसक्तानुगतधर्मान्तरञ्च दुर्वचमेवेत्यत आह। विशिष्येति। अनतिप्रसक्तानुगतविशेषणविशेषं निवेश्येत्यर्थः। क्षणनियमः। कतिपयक्षणानामेव तथात्वं न त्वधिकाधिकक्षणानामिति नियमनिर्वाहः। अवहितैः। निरुक्तिकुशलैः। सिद्ध्युत्पत्तिक्षणमारभ्य क्षणचतुष्टयादेः स्वप्रागभावानधिकरणत्वस्वनाशाधिकरणसमयनाशाधिकरणसमयनाशानधिकरणत्वोभयसम्बन्धेन सिद्ध्यादिमत्त्वमेवानुगमकमनतिप्रसक्तञ्चेति भावः। इति व्याचक्षते।

वदन्तीत्यस्वरससूचनाय। स च उक्तपरम्परायाः सम्बन्धत्वे मानाभावात् तत्तद्व्यक्तित्वेन उत्तेजकत्वाभ्युपगमे च उक्तदोषापातादिति।

(दी०) अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्वोक्तन्यायेन साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा। यत्र वा साध्यतद्व्याप्यधर्मनादृशव्याप्यधर्मान्तरविशिष्टपक्षस्य तत्पक्षकसाध्यतद्व्याप्यवत्त्वानुमित्योरिष्टसाधनतायाश्चैकं स्मरणं, ततस्तयोरनुमित्सा, ततः साध्यतद्व्याप्यवत्त्वानुमितिस्तत्र तदनन्तरमनुमितिप्रसङ्गः। योग्यताविवक्षणे तु सुतरामेवेति तदिच्छाविषयसिद्ध्यनुपहितत्वं तद्विशेषणम्।

(गा०) इच्छाया विषयसिद्धौ सत्यां चरितार्थतया नोत्तरकालमनुमितिर्जन्यत इति तद्वारणाय स्वविषयसिद्ध्यनुपहितत्वेनेच्छा विशेषणीया। तत्र तद्विषयसिद्धिदशायाम् परामर्शानुमित्सासमवधानसम्भव एव तद्विशेषणमर्थवद्भवति, तच्च आपाततो न घटते इच्छापरामर्शयोर्युगपदुत्पादासम्भवेनानुमितिकाले एकतरविनाशावश्यकत्वादित्यतस्तद्घटयति। अत्र चेति। सिद्धिप्रतिबन्धकतावच्छेदककोटौ चेत्यर्थः। तदिच्छाविषयसिद्ध्यनुपहितत्वं तद्विशेषणमित्यग्रिमेणान्वयः। निर्णयेच्छा। निर्णयत्वप्रकारकेच्छा। अनुमितित्वप्रकारकेच्छायाः प्रत्यक्षात्मकसिद्ध्या अचरितार्थतया तद्दशायां तादृशसिद्ध्युत्तरमप्यनुमित्युत्पत्तेः सा नोपात्ता। अनुमित्सोत्पत्तिकाले विशेषणज्ञानोत्पत्तिसम्भ-

वेन तत्पूर्वमेव तद्घटितविशिष्टपक्षप्रत्यक्षसामग्रीसम्पादनस्य वा-च्यतया प्रत्यक्षसामग्र्या बलवत्त्वेनेच्छोत्पत्तिरेव न सम्भवतीत्य-तः पूर्वोक्तन्यायेनेति । अनुमित्साप्रकालोत्पन्नेत्यादिप्रकारेणेत्यर्थः । स्मरणे विशेषणज्ञानापेक्षाविरहादुक्तप्रयासं विनैवेच्छाद्वितीयक्षणे विशिष्टपक्षस्य स्मरणं निर्वहतीत्यभिसन्धायाऽऽह । स्मरणं वेति । अनुमितित्वप्रकारकेच्छायामपि तद्विशेषणदानस्य सप्रयोजनकत्वा-दाह । यत्र वेति । साध्यव्याप्यविशिष्टपक्षस्य स्मरणानन्तरमनुमि-तिरेव भविष्यति न त्विच्छेत्यतोऽनुमितिसामग्रीविघटनाय तथा-विधस्मरणस्य साध्यविशिष्टपक्षविषयकत्वानुसरणम् । तृतीयक्षणे साध्यस्य तद्व्याप्यस्य च अनुमितेर्द्वितीयक्षणे साध्यतद्व्याप्ययोरनुमि-त्सायाश्च निर्वाहाय साध्यतद्व्याप्यतदुभयानुमितिनिष्ठसाधनता-विषयकत्वानुसरणम । साध्यानुमितेस्तदनन्तरं पुनस्तदनुमित्या-पत्तेश्च सम्पादनाय साध्यानुमित्सायाः, साध्यव्याप्यस्यापि निश्चित-तया तदनुमितेः सम्पादनाय च साध्यव्याप्यानुमित्सायास्ततस्तयो-रित्यादिनाऽनुसरणम् । अनुमित्साद्वितीयक्षणे साध्यस्याननुमितौ तदनन्तरं तदनुमितिरिष्टैवेति, साध्यव्याप्यस्याननुमितौ च परा-मर्शाभावाद्यापत्तिसम्भव इत्यतस्तदनन्तरमुभयानुमित्यनुसरणम् ।

'अनुमित्सोत्पत्तिक्षणावधिकक्षणचतुष्टयादिरूपयोग्यतया उत्ते-जकत्वमते यत्र पर्वते वह्निमनुमिनुयामितीच्छा ततो वह्निव्याप्यवान् पर्वत इति परामर्शस्तदनन्तरञ्च पर्वतो वह्निमानित्यनुमितिस्तत्रापि तादृशानुमित्यापत्तिः सम्भवतीत्याह । योग्यतेति । तदिच्छाविष-यसिद्ध्यनुपहितत्वं तदिच्छायां विशेषणं देयमिति शेषः । प्रत्यक्षा-द्यात्मकसिद्धिसमवहितानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छा-बलादेवानुमित्युत्पत्त्या तदिच्छाविषयेति सिद्धिविशेषणम्, विशेष्य-तयाऽभिमता या इच्छा तद्विषयेत्यर्थः ।

अथ तादृशेच्छाया उत्तेजकीभूतसकलेच्छासाधारणेनानुमिति-गोचरेच्छात्वेन निवेशे प्रत्यक्षाद्यात्मकसिद्धेरपि निर्णयत्वादिप्रकार-कानुमित्साविषयतया विषयान्तरस्याव्यावर्त्तकतापत्तिः । तत्तद्व्यक्ति-त्वेन निवेशे च उत्तेजकीभूतेच्छाव्यक्तिसमसंख्याकाभावानां सिद्धौ विशेषणतया गौरवम् । तत्तदिच्छाविषयसिद्ध्यनुपहिततत्तदिच्छा-त्वेनोत्तेजकतामपेक्ष्य लाघवात् तत्तत्क्षणावच्छिन्नेच्छात्वेन तथात्व-

कल्पनाप्रसङ्गश्चेति चेन्न । प्रागुक्तयुक्त्या इच्छाविषयतावच्छेदकनायाः प्रकृतसाध्यविशिष्टप्रकृतपक्षविषयकानुमितित्वादिपर्याप्तिनिवेशनस्याऽऽवश्यकतया इच्छाविषयतावच्छेदकतापर्याप्त्यधिकरणरूपभेदेनेच्छायाः पृथक् पृथगुत्तेजकताया आवश्यकत्वात् । तत्तद्धर्मावच्छिन्नानुपहितत्वं तत्तद्धर्मप्रकारकेच्छायां निवेशनीयमित्यस्यैव तात्पर्यात् । अत एव चानुमितिद्वयं जायतामित्येतादृशेच्छाबलात् क्रमिकानुमितिद्वयमुत्पद्यते, एकानुमित्युपधानदशायामपि द्वित्वावच्छिन्नानुपहितत्वस्याक्षतत्वात् ।

अथ वा स्वविषयकत्वस्वसामानाधिकरण्योभयसम्बन्धेन प्रकृतपक्षधर्मिकप्रकृतसाध्यनिश्चयविशिष्टान्यत्वमेवानुपहितत्वान्तार्थः । भेदस्याव्याप्यवृत्तितया अनुमितिदशायामिच्छायाः सिद्धिविशिष्टत्वेऽपि तत्पूर्वं विशिष्टान्यत्वमप्यव्याहतं प्रकृतपक्षकप्रकृतसाध्यकानुमितिविषयकसमूहालम्बनेच्छायां यत्रान्यपक्षकानुमितेरन्यसाध्यकानुमितेर्वा विषयता तत्र तद्बलादन्यानुमित्यनन्तरं प्रकृतानुमितिनिर्वाहाय प्रकृतपक्षप्रकृतसाध्यावगाहित्वं निश्चयविशेषणम् । एतद्विशेषणमनन्तर्भाव्य द्वित्वादिप्रकारकेच्छायाः पृथगुत्तेजकत्वाङ्गीकाराच्च तादृशेच्छाबलादनुमित्यनन्तरमनुमित्यनुपपत्तिः । द्वित्वप्रकारकेच्छाबलाच्च नानुमितिद्वयानन्तरमनुमित्यन्तरं तावत्पर्यन्तमिच्छाया एवानवस्थानात् । योग्यताया उत्तेजकतामते च द्वित्वादिप्रकारकेच्छायोग्यताया द्वित्वाद्यवच्छिन्नानुपहितत्वेन एव पृथगुत्तेजकता वाच्या इति कृतं विस्तरेण ।

(दी०) पक्षसाध्यभेदेन च पक्षताया भेदात् पृथक् पृथगेव कार्यकारणभावः । तथा च यत्र सिद्ध्यनन्तरं कदाऽप्यनुमितिर्न जाता तत्र सिद्ध्यभावमात्रं कारणं न तु तत्र इच्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च । तेन यत्पक्षयत्साध्यकानुमितौ कस्यापि इच्छा न जाता तत्र व्यक्तिसाधारण्यमात्रसम्पादनाय ईश्वरेच्छानिवेशनायासो नोपादेयः ।

(गा०) नन्विच्छाया इच्छाघटितनिरुक्तयोग्यताया वा अभावेन विशिष्टायाः सिद्धेरभावस्य पक्षतात्वे यत्साध्यकयत्पक्षकस्थले कदाचिदपि कस्यचिदिच्छा न जाता तत्र पक्षत्वाप्रसिद्धिरित्याश-

च्छायां विरुद्धविषयिणी भगवदिच्छामादाय केषाञ्चिन् समाधानमाक्षेप्तुं तादृशस्थले इच्छाविरहाविशेषितः सिद्ध्यभाव एव पक्षतेति समाधत्ते । पक्षसाध्येति । पक्षतावच्छेदकसाध्यतावच्छेदकादिभेदेनेत्यर्थः । पक्षताभेदादिति । सिद्धिपदार्थस्य प्रकृतपक्षतावच्छेदकादिघटितत्वादिति भावः । यत्रेति । यादृशपक्षकयादृशसाध्यकस्थले इत्यर्थः । सिद्ध्यनन्तरं कदाप्यनुमितिर्न जातेति । सिद्धिकाले परामर्शादिसत्त्वेऽनुमितेस्तया असमवधानादिति भावः । सिद्ध्यभानमाश्रमिति । इच्छाभावाविशेषितायाः एव सिद्धेरभाव इत्यर्थः । सिद्धिकालीनानुमित्यनुरोधेनैव विशिष्टसिद्ध्यभावस्य पक्षतात्वोपगमादिति भावः । तेनेति । पश्चानुमितेरुत्पत्तप्रसिद्धा प्रसिद्धाऽपि वा नानुमित्युत्पादोपयोगिनी तत्र विशिष्टाभावस्य पक्षतात्वस्वीकारप्रयोजनविरहेणेत्यर्थः । उक्तिसाधारण्येति । सर्वत्रैव पक्षतायाः सिषाधयिषाविरहविशिष्टसिद्ध्यभावपदार्थत्वसम्पादनायेत्यर्थः । नोपादेय इति । शब्दैकयस्यानुपादेयतया कारणतावच्छेदकगौरवसहिष्णुताया अन्याय्यत्वादिति भावः ।

(दी०) यत्तु सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्ना या सिद्धिः सिषाधयिषाविरहविशिष्टायास्तस्या अभावः पक्षता ।

(गा०) परामर्शपूर्वकालोत्पन्नानुमितेस्तन्नाशेऽनुमित्यन्तरमकल्पयित्वा योग्यतायाश्चोत्तेजकत्वमनादृत्यानुमितिमुपपादयतः सार्वभौमस्य मतमाह । यत्त्विति । सिषाधयिषानाशे सति यादृशसिद्ध्यनन्तरमनुमितिस्तस्याः सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतया भिन्नान्तर्निवेशात्तत्प्रतिबन्धकत्वोपपत्तिः । सिषाधयिषाविरहविशिष्टत्वं स्वक्षणस्य स्वाधिकरणदेशावच्छेदेन बोध्यम् । तेन सिषाधयिषावतोऽपि कालस्य सिषाधयिषानधिकरणदेशावच्छेदेन सिषाधयिषाविरहविशिष्टतया यत्र क्रमेण सिषाधयिषासिद्धिपरामर्शानुमितयस्तत्र सिषाधयिषाविरहविशिष्टत्वविशेषणेनोपपाद्यस्यानुमित्युत्पत्तिक्षणाव्यवधानस्यैवानुपपत्तिरिताद्दवस्थ्यं निरस्तम् । स्वपदेनापि भेदप्रतियोगिनी सिद्धिरेवोपादेया । प्रतियोगिवैयधिकरण्यस्याभावविशेषणतामादाय सिषा-

धयिषाधिकरणक्षणघारणं पुनरनुपादेयम् । प्रतियोगिपदेन सिषाधयिषाविरहप्रतियोगिन एव विवक्षणीयतया सिषाधयिषायाः सिषाधयिषात्वेन निवेशनमुपेक्ष्य सिषाधयिषाविरहप्रतियोगित्वेन निवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात् । सिषाधयिषानधिकरणत्वनिवेशने च सिषाधयिषाविरहविशिष्टध्वंस्यमाणक्षणत्वनिवेशनव्यावृत्त्यसङ्गतेः । सर्वेषामेव क्षणानां सिषाधयिषाविरहविशिष्टपूर्वपूर्वक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणतया तादृशध्वंसानधिकरणत्वरूपाव्यवहितत्वाश्रयक्षणाप्रसिद्धेरतः सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वनिवेशः । स्वपदं भेदप्रतियोगित्वत्तत्सिद्धिव्यक्तिपरम् । सिद्धिसामान्यपरत्वे पूर्वसिद्ध्यधिकरणकालध्वंसानधिकरणकालतया पूर्ववदप्रसिद्ध्यापत्तेः । इच्छाविरहविशिष्टे स्वक्षणाव्यवहितोत्तरत्वनिवेशे ज्ञानेच्छयोर्युगपदुत्पादमते यत्रानुमित्सातृतीयक्षणे घटेच्छासिद्ध्यात्मकपरामर्शौ तदुत्तरञ्चानुमितिस्तत्र तादृशसिद्धेरिच्छाविरहविशिष्टस्वाधिकरणक्षणाप्रसिद्ध्या इच्छाविरहविशिष्टस्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नैव सा सिद्धिः, अनुमित्साविरहविशिष्टतदभावस्य परामर्शक्षणेऽसत्त्वात्तदुत्तरमनुमित्यनुपपत्तिरतः सिषाधयिषापर्यन्तानुसरणम् ।

अथ वा ज्ञानेच्छयोर्यौगपद्यानभ्युपगमे इच्छासामान्यनिवेशे यत्र घटेच्छानन्तरक्षणे सिद्ध्यात्मकपरामर्शस्तदनन्तरक्षणे सिद्धाप्रामाण्यग्रहस्तदनन्तरमनुमितिः सिद्धेरप्रामाण्यज्ञानानास्कन्दितायाः एवानुमितिप्रतिबन्धकत्वात्तत्र तादृशानुमित्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टसिद्धिद्वितीयक्षणाव्यवहितोत्तरतया सिद्धेः स्वपदेनोपादानसम्भवेनाविरोधितयाऽप्रामाण्यग्रहकालेऽनुमितिवारणाय सिषाधयिषापदम् । तथा सति अनुमित्युत्पादक्षणस्य सिषाधयिषाविरहविशिष्टसिद्ध्युत्पादक्षणाव्यवहितत्वाप्रापत्तिः ।

ज्ञानेच्छयोर्यौगपद्यानुपगमे यत्रानुमित्साद्वितीयक्षणे सिद्ध्यात्मकपरामर्शस्तदनन्तरं घटेच्छा तत्र तादृशसिद्ध्यधिकरणस्य कस्यापि क्षणस्येच्छाविरहविशिष्टत्वाभावात् स्वपदेनोपादातुमशक्यतया सिषाधयिषाविरहविशिष्टतदभावो नानुमित्यव्यवहितपूर्वक्षणे इति तत्रानुमितिनिर्वाहाय इच्छासामान्योपेक्षणम् इति तु न साधी-

यः । घटेच्छोत्पत्तिर्यत्र क्षणे दर्शिता तत्पूर्वमनुमितिसामग्रीसत्त्वे तदानीमनुमित्यनुत्पादबीजस्य दुर्घटत्वात् । न चानुमित्सापूर्वकालोत्पन्नापेक्षाबुद्ध्यात्मकबाधादिवशात्तदानीमनुमित्यनुत्पादसम्भवः । अपेक्षाबुद्ध्यनन्तरक्षणे विशेषगुणानुत्पत्तावेव तस्याः क्षणत्रयावस्थानसम्भवात् ।

यत्तु यत्रानुमित्सानन्तरं घटेच्छा तदनन्तरं सिद्ध्यात्मकपरामर्शस्तदनन्तरञ्चानुमितिस्तत्रानुमित्युत्पादक्षणा नेच्छाविरहविशिष्टसिद्ध्यधिकरणक्षणाव्यवहितोत्तर इति तादृशसिद्धेस्तदनुमित्यप्रतिबन्धकत्वाय सिषाधयिषापर्यन्तानुसरणमिति । तदप्यसत् । इच्छाविरहविशिष्टस्वक्षणाव्यवहितात्तरत्वशरीरेऽव्यवधानप्रतियोगित्वक्षण एवेच्छाविरहविशिष्टत्वनिवेशस्य प्रयोजनवत्तया तदुत्तरत्वप्रतियोगिनि स्वक्षणे तद्विशिष्टत्वस्यानिवेशनीयतया उक्तानुमित्युत्पत्तिक्षणस्य इच्छाविरहविशिष्टनत्सिद्ध्यधिकरणक्षणाव्यवहिततया तादृशसिद्ध्युत्पादक्षणोत्तरतया च तादृशसिद्धेरिच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकतया अनुमित्यनिर्वाहविरहात् ।

प्रथमविशिष्टान्तव्यावृत्तिस्थले सिषाधयिषापूर्वस्थायिनः कस्यचित् स्थूलकालस्य परामर्शोत्पत्तिकाल विनाशे पूर्वकालावच्छेदेन सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणतादृशकालध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणस्यानुमित्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणकालाव्यवहितोत्तरत्वानुपपत्तिरतः कालपदमुपेक्ष्य क्षणपदोपादानम् ।

न च सिषाधयिषाविरहविशिष्टस्वनिरूपिताधिकरणत्वनिवेशेऽपि उक्तस्थूलकालस्य विभिन्नक्षणावच्छेदेन सिषाधयिषाविरहसिद्ध्युभयाधिकरणत्वेऽपि सर्वदैव विशेष्याभावविशेषणाभावान्यतरप्रयुक्तविशिष्टाभाववत्तया विशिष्टाधिकरणत्वासम्भवात् क्षणत्वनिवेशमन्तरेणैव व्यावृत्ति सम्भवतीति वाच्यम् । सिषाधयिषापूर्वक्षणादेः सिद्धिक्षणादेश्च प्रत्येकं विशिष्टाभावावच्छेदकत्वेऽपि तदुभयानुगमकान्यतरत्वावच्छिन्नस्य एकक्षणावच्छिन्नत्वाविशेषितसामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्टायाः सिद्धेरधिकरणतावच्छेदकत्वे बाधकाभावात् । एकरूपावच्छिन्नस्यैव

विरुद्धत्वावच्छेदकत्वविरहात् ।

न च सिद्ध्यनधिकरणस्य स्थूलकाले सिद्धिवृत्तौ नावच्छेदकतासम्भवः। देशे वृत्तौ कालस्येव काले वृत्तावप्यन्तरकालस्याप्यधिकरणीभूतस्यैवावच्छेदकत्वात् । तथा च विशेष्यीभूतसिद्ध्यनवच्छेदकस्य विशिष्टसिद्ध्यनवच्छेदकतया तत्साधारणरूपावच्छिन्नावच्छेदेन स्थूलकालस्य विशिष्टाधिकरणत्वं न सम्भवतीति वाच्यम् । एवं सति विभिन्नावच्छेदेन उभयवति काले उभयत्वविशिष्टवत्ताया अपि दुर्घटत्वापत्तेः । प्रत्येकाधिकरणक्षणस्य उभयत्वविशिष्टानधिकरणत्वेन उभयत्वविशिष्टावच्छेदकत्वासम्भवात्, प्रत्येकाधिकरणक्षणयोरनुगतरूपेणाप्यवच्छेदकत्वानुपपत्तेः । न हि एकरूपावच्छिन्नस्य तस्याधिकरणं रूपान्तरावच्छिन्नस्य तस्यानधिकरणमप्यवच्छेदकं भवितुमर्हति, दण्डाद्यनधिकरणपुरुषाद्यधिकरणदिवसाद्यवच्छेदेन मासादौ दण्डविशिष्टपुरुषत्वाद्यवच्छिन्नस्यावृत्तित्वात् । यदि चागत्या उभयत्वविशिष्टानधिकरणयोरपि प्रत्येकाधिकरणयोरनुगतरूपेण उभयत्वविशिष्टावच्छेदकत्वमुपेयते तदा उक्तस्थले सिषाधयिषाविरहक्षणसिद्धिक्षणोभयान्यतरावच्छेदेन सिषाधयिषाविरहसिद्ध्युभयाधिकरणतावतः स्थूलकालस्य तदवच्छेदेन सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणत्वमनपवादमेव, उभयाधिकरणत्वस्यैव लाघवेन एकविशिष्टापराधिकरणतारूपत्वोपगमात् । अत्र विभिन्नकालावच्छेदेन उभयाधिकरणे विशेष्यमात्रसत्त्व एव न केवलसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावोऽपि तु एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावः, अत एकक्षणावच्छिन्नैकात्मवृत्तित्वं सिषाधयिषाभावस्य सिद्धौ वैशिष्ट्यमित्यग्रिमदीधितिकारोक्तिरपि सङ्गच्छते । एकक्षणावच्छिन्नत्वनिवेशेनैव सिषाधयिषाकाले सिद्धित्वे सिषाधयिषाभावविशिष्टसिद्ध्यभावनिर्वाहात् ।

न चैवं विशिष्टाभावस्यातिरिक्ततामते केवलसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावस्य विशेषणाभावसत्त्वेऽप्यसत्त्वादसौ विशेष्याभावरूप एव वाच्यः । तथा च तादृशसम्बन्धेन रूपादिविशिष्टद्रव्यत्वाद्यभावः, पवनादौ मा वर्त्तिष्ट विशेष्याभावासत्त्वादिति वाच्यम् । तादृशद्रव्यत्वाभावस्यानतिरिक्तत्वमतेऽपि तस्य क-

पादिमन्निष्ठद्रव्यत्वाद्यधिकरणत्वाभावरूपतया पर्वोपगमेन नीरूपद्रव्यादौ तत्सत्त्वनिर्वाहात्। एवञ्च उक्तस्थूलकाले केवलसामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्टसिद्धयभावासत्त्वात्, विशिष्टसिद्धिसत्त्वमव्याहतमेव । एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन विशिष्टस्याधिकरणत्वनिवेशापेक्षया च सिषाधयिषाविरहविशिष्टे सिद्ध्यधिकरणकाले क्षणत्वनिवेशनमेव सम्यगित्यपि प्रतिभाति ।

यद्यपि सिषाधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वनिवेशेऽपि तादृशकाल कालान्तरीणसिषाधयिषाविरहवैशिष्ट्यस्य तन्निष्ठसिद्ध्यधिकरणतानवच्छेदकत्वादितादृशकालमादाय उक्तदूषणस्यानवकाशस्तथाऽपि सिषाधयिषाविरहवैशिष्ट्योपलक्षिते सिद्ध्यधिकरणत्वनिवेशाभिप्रायेण क्षणत्वोपादानम् ।

यद्यपि क्रियादिरूपतादृशस्थूलकालस्याप्यन्त्यक्षणावच्छिन्नस्य क्षणतया क्षणत्वनिवेशेऽपि तद्दापत्तादवस्थ्यम् । तथाऽपि स्वध्वंसियावद्धर्मविशिष्टत्वरूपक्षणत्वावच्छेदेन सिषाधयिषाविरहविशिष्टत्वनिवेशनान्न दोषः । सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वमवश्यं सिषाधयिषाविरहवैशिष्ट्यावच्छिन्नम्, स्थूलकाले स्वाधिकरणत्वस्य च न तदवच्छिन्नत्वनियम इति सिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वलाभायैव क्षणपदोपादान न तु क्षणत्वमपि निविष्टमिति तु तत्त्वम् ।

अव्यवहितोत्तरक्षणोत्पत्तिः स्वाधिकरणावच्छेदेन बोध्या । अनुमितिपदं वा स्वसमानाधिकरणानुमितिपरम् । तेन महाप्रलयानभ्युपगमे सकलसिद्धीनामुत्तरमेवासंख्यानामात्मनां कस्मिंश्चिदवश्यमनुमित्युत्पत्त्या सिषाधयिषाविरहविशिष्टतादृशक्षणानन्तरक्षणोत्पन्नानुमितिरूभिन्ना' सिषाधयिषाद्ययोत्पत्तिमध्यमक्षणोत्पन्ना ईश्वरीया च सिद्धिरेव, सिषाधयिषाविरहविशिष्टतदधिकरणक्षणाप्रसिद्ध्या स्वपदेन तस्या एवोपादातुमशक्यत्वात्तस्याश्च सिषाधयिषाविरहविशिष्टत्वाभावात्, सिषाधयिषाविरहविशिष्टनिरुक्तसिद्धिभिन्नसिद्धेरप्रसिद्धेः महाप्रलयस्य प्रामाणिकत्वे तु यदुत्तरमनुमितिः क्वचिदपि नोत्पत्स्यते । तादृश्याश्चरमसिद्धेरेव प्रतिबन्धकत्वं न त्वन्यस्या इत्यनुपपत्तेर्नावकाशः ।

अन्यवधानांशानिवेशात् प्रतिबन्धकसिद्धिनाशोत्तरं तदधिकरणे अनुमित्युत्पत्तावपि न तस्याः प्रतिबन्धकत्वानुपपत्तिः। स्वपूर्वसकलक्षणानामेव स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वरूपस्वक्षणाव्यवहितत्वाक्रान्ततया अनादौ संसारे सर्वासामेव सिद्धीनां पूर्वं कदाचित् स्वाधिकरणे ऽनुमित्युत्पत्त्या सिषाधयिषयोरन्तरोत्पन्नसिद्धेरेव सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितक्षणोत्पन्नानुमितिकाभिन्ना, तस्याश्च सिषाधयिषाविरहविशिष्टत्वाभावादप्रसिद्धिरत उत्तरेति, स्वाधिकरणक्षणध्वंसाधिकरणार्थकम्।

सकलसिद्धीनामेव स्वक्षणाव्यवहितोत्तरत्वाक्रान्तस्वतृतीयक्षणविनष्टानुमित्युत्पत्तिक्षणपर्यन्तस्थायिस्थूलकालोत्पन्नानुमितिकतया पूर्ववदप्रसिद्धिरिति द्वितीयक्षणपदम्। अनुमित्यात्मकसिद्धीनां स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया अप्रतिबन्धकत्वापत्तिरत उत्पत्तिनिवेशः।

यद्यपि स्वान्यत्वस्यानुमितिविशेषणत्वेऽप्येतद्दोषवारणसम्भवः। तथाऽप्यपेक्षाबुद्धेः क्षणत्रयावस्थायित्वस्य तदुत्तरं समानाधिकरणविशेषगुणान्तरोत्पादस्य चोपगमे यत्रापेक्षाबुद्ध्यात्मकानुमितिद्वितीयक्षणे तादृशी प्रत्यक्षादिरूपसिद्धिस्तस्याश्चतुर्थक्षणेऽनुमित्युत्पादवारकं तत्प्रतिबन्धकत्वं नोपपद्येतेति गुरुशरीराया अप्युत्पत्तेर्निवेशनम्।

अथानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नत्वं निरुक्तक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नत्वापेक्षया लघीयः कथमुपेक्षितमिति चेत्? तथा-सति यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र इच्छाजनकसामग्र्या अनुमितिप्रतिबन्धकत्वेनैव इच्छोत्पत्तिक्षणेऽनुमितिवारणसम्भवादव्यवहितपूर्वत्वघटकानुमित्युत्पत्तिक्षणे तदव्यवहितप्राक्क्षणे वा सिषाधयिषाविरहविशिष्टत्वस्य तद्वारणानुरोधेन निवेशवैयर्थ्यात्। तादृशस्थलीयसिद्धेस्तृतीयक्षणेऽनुमित्युत्पत्त्यविरोधितायाः सिद्धौ सिषाधयिषाविरहवैशिष्ट्यानिवेशनमन्तरेणैवोपपत्तेः मूलोपात्तं सिद्धिविशेषणं सहकृतान्तं निष्प्रयोजनकं स्यादिति मूलविरोधः। तथा चेच्छाजनकसामग्र्या अनुमितिप्रतिबन्धकत्वमतेऽपि मूलाविरोधोपपादनायोक्तगुरुधीतेरादरः। अत्र क-

त्वे वक्ष्यमाणानुपपत्ति तृतीयक्षणसाधारणाव्यवहितोत्तरत्वं विनि-वेश्योद्देश्यकामस्त्वगत्या इच्छासामग्र्या अनुमित्यप्रतिबन्धकत्वम-तमाश्रित्यैव मूलोपात्तं सहकृतान्त सार्थकयिष्यतीत्यवधेयम् ।

अनुमितेर्व्यवहितपूर्वोत्पन्नस्याव्यवहितपूर्वस्थायिनो घटज्ञानादे-रविरोधित्वोपपत्तये सिद्धिपदम्॥

(दी०) अथ तृतीयक्षणव्यवधायकाद्वितीयक्षण एव अव्यव-हितत्वपर्यवसानाद् यत्र अविरलक्रमेण सिद्धिसिषाधयिषानुमि-तयस्तत्र द्वितीयक्षणे पक्षतासम्पत्तये द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः, प्राथमिकस्तु स्वक्षणस्य किमर्थमिति चेत् ? यत्र क्रमेण सिषाधयिषाप्रात्यक्षिकासिद्धिपरामर्शानुमितयस्तत्र तृतीयक्षणे पक्षतासम्पत्त्यर्थमिति । तन्न । यत्र अनुमित्सानाश-काले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमिती तत्र पक्षतावि-रहप्रसङ्गात् ।

(गा०) अवगतद्वितीयसिषाधयिषाविरहविशेषणप्रयोजनं तत्र सप्रतिपत्तिं प्रदर्शयन् प्रथमसिषाधयिषाविरहविशेषणप्रयोजनं पृ-च्छति । अथेति । तृतीयक्षणे स्वाधिकरणकालध्वंसाधिकरणका-लध्वंसाधिकरणत्वसामान्याभावरूपाव्यवधानाभावस्फुटीकरणाय तृतीयक्षणव्यवधायकत्वं द्वितीयक्षणस्याभिहितम् । तृतीयक्षण-व्यवधायकत्वम् । तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वे सति स्वा-धिकरणक्षणध्वंसाधिकरणत्वम् । सिद्धिनाशक्षणे सिषाधयिषो प-त्तौ सिद्ध्युत्तरसिषाधयिषानाशक्षणेऽनुमित्युत्पत्तौ वा विशेष्या-भावादेवानुमितेः पूर्वं पक्षता निर्वहति अतोऽविरलेति । पक्षतास-म्पत्तये इति । सिद्धौ सिषाधयिषाविरहस्याविशेषणत्वे उक्तस्थले सिद्धेर्द्वितीयक्षणेऽनुमित्यनुत्पत्त्या तस्याः स्वक्षणाव्यवहितोत्तरक्ष-णोत्पत्तिकानुमितिकभिन्नत्वेन सिषाधयिषोत्पत्तिक्षणेऽपि च तादृश-सिद्धिसत्त्वेन तदभावरूपपक्षताया अनिर्वाहादिति भावः । प्राथ-मिकस्त्विति । सिषाधयिषाविरह इत्यनुषज्यते । स्वक्षणस्येति । विशेषणमित्यनुषज्यते । उत्तरयति । यत्रेति । ज्ञानेच्छयोर्युगपदुत्पा-

क्षमते सिषाधयिषोत्पत्तिकाले सिद्ध्युत्पादे सिद्धेर्वा परामर्शरूपत्वे परामर्शोत्पत्तिकाले सिषाधयिषासत्त्वादेव विशिष्टाभावो निर्वहतीति क्रमेणेति । अविरलक्रमेणेत्यर्थः । सिषाधयिषासिद्ध्योरन्तरा क्षणैकविलम्बे सिषाधयिषाविरहेण क्षणं विशिष्यापि पक्षतानिर्वाहस्य वक्ष्यमाणत्वात् । सिद्धिपरामर्शयोः परामर्शानुमित्योर्वा कालव्यवधानेनोत्पत्तौ विशेष्याभावादेव विशिष्टाभावसम्पत्तेश्च । सिषाधयिषा । अनुमितित्वप्रकारिकेच्छा । अनुमित्यात्मकसिद्धाविच्छायाः स्वविषयसिद्ध्युपहितत्वात् तदुत्तरमनुमित्यन्तरोत्पत्तिरेव न सम्भवतीति प्रात्यक्षिकेति । पक्षतासम्पत्त्यर्थमिति । सिषाधयिषाविरहस्य क्षणविशेषणस्यानुपादाने तत्रानुमित्युत्पादक्षणस्य सिद्धिक्षणध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणत्वेन सिद्धिक्षणाव्यवहितत्वविरहात्तादृशसिद्धेरपि प्रतिबन्धकतापत्त्या पक्षतानुपपत्तिः । तद्विशेषणोपादाने च सिद्ध्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टस्वक्षणः परामर्शोत्पत्तिक्षण एव, तद्ध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमव्यवधानमनुमित्युत्पादक्षणस्याक्षतमेवेति पक्षतोपपत्तिरिति भावः । यत्र परामर्शात्मकसिद्ध्यनन्तरं घटेच्छा तत्रानुमितिवारणाय इच्छासामान्यमुपेक्ष्य द्वितीयसिषाधयिषाया उपादानम् । पक्षताविरहेति । सिद्ध्युत्पादक्षणस्यापि सिषाधयिषाविरहविशिष्टतयाऽनुमित्युत्पादक्षणस्य तादृशक्षणध्वंसाधिकरणकालध्वंसाधिकरणतया तत्सामान्याभावात्मकतादृशक्षणाव्यवधानविरहादिति भावः ।

यद्यपि सिषाधयिषाविरहविशिष्टानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नत्वविशिष्टसिद्ध्यभावस्य पक्षतात्वमङ्गीकृत्याप्युक्तानुपपत्तिः शक्यते वारयितुं तथाऽपि अव्यवहितोत्तरक्षणोत्पत्तिघटितपक्षतापक्षस्याक्षिप्तत्वात्तत्रैव दोषोद्धारः ।

(दी०) अथ प्रथमक्षणमपेक्ष्य द्वितीयस्येव द्वितीयमपेक्ष्य तृतीयस्यापि अव्यवहितोत्तरत्वम् । स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वं वा तादृशाव्यवहितोत्तरत्वं वाच्यम् । तथा च यत्र क्रमेण सिद्धिसि-

पाधयिषानुमितयस्तत्र प्रथमक्षणे पक्षतावारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टान्तं । द्वितीयन्तु सिद्धेस्तत्रैव द्वितीयक्षणे पक्षतासम्पत्तये । यदि पुनरिच्छाजनिका सामग्री प्रतिबन्धासनुमितिं तदाऽनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावमात्रं पक्षतेति चेत् ? ।

(गा०) तृतीयक्षणसाधारणमव्यवधानं निवेश्य शङ्कते । अथेति । तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वमिति क्षणद्वयानुगमकस्वक्षणत्वेन स्वक्षणमनन्तर्भाव्य प्रातिस्विकरूपेण स्वक्षणस्याव्यवधानशरीरे निवेशनीयत्वात् । तृतीयक्षणे च स्वोत्पत्तिक्षणध्वंसाधिकरणद्वितीयक्षणध्वंसाधिकरणत्वेऽपि स्वाधिकरणद्वितीयक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेन स्वक्षणाव्यवधानस्याक्षतत्वमिति भावः । द्वितीयतृतीयक्षणसाधारणस्वक्षणध्वंसाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपानुगताव्यवधाननिवेशनं न सम्भवति । अपेक्षाबुद्ध्यात्मकसिद्धिचतुर्थक्षणसिषाधयिषापञ्चमक्षणोत्पन्नानुमितौ (१)व्यभिचारतादवस्थ्यात् । चतुर्थक्षणसाधारणानुगताव्यवहितोत्तरत्वस्य कथञ्चिन्निवेशे चतुर्थक्षणोत्पन्नानुमितिकापेक्षाबुद्ध्यनात्मकसिद्धेरप्रतिबन्धकत्वापत्तेरिति ध्येयम् ।

अपेक्षाबुद्धिद्वितीयक्षणावधिकक्षणत्रयतदितरबुद्धिद्वितीयतृतीयक्षणसाधारणमनुगताव्यवहितोत्तरत्वं प्रकारान्तरेण निर्वक्ति । स्वध्वंसेति । उभयत्र कालपदं कालिकसम्बन्धेन स्वध्वंसवत्त्वलाभाय । तेन सर्वस्यैव क्षणस्य स्वनाशविषयकपूर्वपूर्वज्ञाननाशवत्त्वेऽपि न सत्यन्ताप्रसिद्धिः । न वा स्वपूर्वकालस्य तत्पूर्वकालीनस्वविषयकज्ञाननाशवत्त्वेऽप्युत्तरत्वस्य तत्साधारण्यप्रसङ्गः । एवं सति यत्र सिषाधयिषासिद्धिपरामर्शानुमितीनां क्रमेणोत्पादस्तत्रत्यसिद्धेस्तत्क्षणे सिषाधयिषाविरहविशेषणमन्तरेणापि अव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वनिर्वाहादुक्तप्रथमविशिष्टान्तव्यावृत्त्यसङ्गतेः स्थलान्तरे तद्व्यावृत्तिमाह । तथा चेति । प्रथमक्षणे पक्षतावारणायेति । ता-

(१) तृतीयक्षणसाधारणाव्यवहितोत्तरत्वकल्पे सिषाधयिषाविरहे उत्तरक्षणस्यैव विशेषणमिति ध्येयम् ।

दृशसिद्धेस्तृतीयक्षणोत्पन्नानुमितिकतया निरुक्तसिद्धिभिन्नत्ववि- रहेण पक्षताप्रसक्तेरिति भावः । प्रथमक्षणे पूर्ववत् सिषाधयिषावि- रहविशेषणसत्त्वेऽपि स्वनाशाधिकरणकालध्वंसानधिकरणत्वघटि- ताव्यवहितोत्तरत्वनिवेशकल्पे नोक्तातिप्रसङ्गावकाशसम्भवः । अ- नुमित्युत्पत्तिक्षणे तत्सिद्धिनाशाधिकरणकालध्वंसानधिकरणत्वस्य सिषाधयिषाविरहविशिष्टतत्सिद्ध्यधिकरणप्रथमक्षणध्वंसाधिकरण- त्वस्य च सत्त्वादतोऽव्यवहितोत्तरक्षणे तस्य विशेषणतामाह । उत्तरे- ति । तथा च उक्तस्थले सिद्ध्यव्यवहितोत्तरतृतीयक्षणेऽपि सिषाध- यिषासत्त्वात् सिषाधयिषाविरहविशिष्टतादृशक्षणोत्पत्तिकत्वं नानु- मितेरिति तादृशसिद्धेरनुमितिप्रतिबन्धकत्वनिर्वाहः ।

द्वितीयविशिष्टान्तस्य यद्विशेषणत्वं यत्प्रयोजनकत्वं वा प्राग- भिहितम् इदानीमपि तस्य तद्विशेषणत्वं तत्प्रयोजनकत्वं न तु प्रथ- मविशिष्टान्तवदन्यादृशमिति दर्शयितुं पूर्वोक्तमप्यनुवदति । द्विती- यन्त्विति । सिद्धेर्विशेषणमित्यनुपज्यते । तत्रैवेति । यत्र क्रमेण सि- द्धिसिषाधयिषानुमितयः तत्रैवेत्यर्थः । द्वितीयक्षण इति । तृतीयक्ष- णेऽनुमितिनिर्वाहार्थमित्यादिः । पक्षतासम्पत्त्य इति । विशेषणा- भावेन विशिष्टाभावरूपपक्षतानिर्वाहायेत्यर्थः । अन्यथा उक्तक्रमेण तादृशसिद्धेर्निरुक्तसिद्धिभिन्नतया विशेष्यसत्त्वेन पक्षतानुपप- त्तेरिति भाव. ।

ननु दर्शितस्थले प्रथमक्षणे पक्षतासत्त्वेऽपि न क्षतिः । सिषा- धयिषाकालेऽनुमित्युत्पादस्य इच्छासामग्र्याः प्रतिबन्धेनाप्यसम्भ- वात् । इत्थञ्च निष्प्रयोजनकतया प्रथमविशिष्टान्तानुपादाने द्विती- यमपि निष्प्रयोजनक, तादृशसिद्धेः स्वाव्यवहितोत्तरतृतीयक्षणोत्प- न्नानुमितिकतयैवाप्रतिबन्धकत्वेन तृतीयक्षणोत्पन्नानुमितिनिर्वाहा- दित्याशयेन इच्छासामग्र्या अनुमितिप्रतिबन्धकत्वमते तदुभयं परित्यजति । यदि चेति । इच्छासामग्र्यपेक्षयाऽनुमितिसामग्र्या हीनबलत्वेऽपि अनुमित्साविशिष्टाया अनुमितिसामग्र्या इच्छां प्र- ति प्रतिबन्धकताकल्पनस्याऽऽवश्यकतया तस्या एव बलवत्त्वकल्पन- मुचितम् , अन्यथा इच्छासामग्र्यपेक्षया बाधादिरूपानेकप्रतिबन्ध- काभावघटिततया गुरुशरीराया अपि अनुमितिसामग्र्या प्रतिब न्धकतायामिच्छानिवेशेन गौरवादिति युक्त्या ज्ञानेच्छयोर्योगप-

धस्वीकारसम्भवेन च इच्छासामग्र्या अनुमितिविरोधिताव्यवस्थापनं न सम्भवतीत्याशयेन यदि चेत्युक्तम् । सिषाधयिषाविरहविशेषणसार्थक्यस्याशक्यत्वेऽनुमित्यव्यवहितपूर्ववर्त्तित्वं परित्यज्याव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वरूपगुरुविशेषणोपादानमनुचितमित्याशयेनाह । अनुमित्यव्यवहितेति । अनुमितिपदं स्वसमानाधिकरणानुमितिपरमतो व्यधिकरणानुमित्यव्यवहितपूर्ववर्त्तिसिद्धेराश्रयेऽनुमित्यनुत्पादोपपादकतानिर्वाहः । यत्राशानन्तरमनुमितिरुत्पत्स्यते तादृशसिद्धेरप्रतिबन्धकतावारणाय अव्यवहितत्वोपादानम् । तच्चानुमितिपूर्वकालीनध्वंसाप्रतियोगित्वरूपं पूर्वक्षणे सिद्धावेव वा विशेषणम् । पूर्वकालीनत्वञ्च कालिकसम्बन्धेन प्रागभाववत्त्वमेव । ध्वंसस्य कालोपाधितया तदुपपत्तिः । सर्वासामेव सिद्धीनां पूर्वजातकिञ्चिदनुमितिनिरूपितनिरुक्ताव्यवधानवत्तयाऽनुमित्यव्यवहितसिद्धिभिन्नसिद्ध्यप्रसिद्धिरतः पूर्वक्षणवृत्तित्वं विशेषणम् । पूर्वत्वं प्रागभाववत्त्वम् । अनुमित्यादिपर्यन्तावस्थायिस्थूलकालमहाकालसाधारणमित्युक्तदोषतादवस्थ्यमतः क्षणत्वपर्यन्तनिवेशः । प्रागभावावच्छिन्नवृत्तित्वनिवेशे च क्षणत्वमनुपादेयमेव । जन्यमात्रस्य कालोपाधित्वे तु कालिकसम्बन्धेन प्रागभाववत्त्वं सिद्धेरेव विशेषणं देयम् । प्रागभावानभ्युपगमे वक्ष्यमाणं तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमव्यवहितपूर्वत्वमेव, क्षणविशेषणम्, तद्घटकदलानां व्यावृत्तिरग्रे व्यक्तीभविष्यति । अनुमित्यव्यवहितपूर्ववर्त्तिनो मनोयोगादेस्तादृशसिद्धिभिन्नतया प्रसक्तप्रतिबन्धकतावारकद्वितीयसिद्धिपदसार्थक्याय प्रथमसिद्धिपदम् ।

न च प्रक्षालनाद्धीत्यादिन्यायेन उभयपरित्याग उचित इति वाच्यम् । तथा सति बाधबुद्ध्यादेरपि निरुक्तरूपेणैव प्रतिबन्धकतया स्वतन्त्रतत्प्रतिबन्धकताव्याघातात् ।

न च व्याहन्यतां प्रतिबन्धकत्वान्तरं न हि तत् क्षतिमावहति, *किन्तु तावता लाघवमेवेति वैयर्थ्यदोषो दुर्वार एवेति वाच्यम् ।* एतद्दोषस्य वैयर्थ्याच्च सिद्धेरित्यनेन स्वयं दर्शनीयत्वात् ।

यद्यप्येवं प्रथमसिद्ध्यनुपादानेऽपि बाधादेश्च स्वतन्त्रप्रतिबन्धकताविलोपभीरूणां द्वितीयसिद्धिपदोपादानं न विरुध्यते, अखण्डाभावसम्पादकत्वेन लक्षणदोषासंस्पर्शादिति प्रथमतदुपादानमनु-

चितम्। तथाऽपि अनुमित्यव्यवहितपूर्ववर्त्तिनां स्वत्वघटितत्वेन निरुक्तरूपेणाननुगमासम्भवेन तत्तद्व्यक्तित्वेन भेदकूटस्य निवेशनीयतया सिद्धौ सिद्ध्यतिरिक्ततादृशपदार्थभेदानामव्यावर्त्तकानां निवेशे गौरवात्। सिद्धिव्यक्तीनामेव भेदा निवेशनीया इत्येतत्सूचनाय प्रथमसिद्धिपदोपादानम्। अत एव तत्तद्व्यक्तित्वेन सिद्धिव्यक्तीनां भेदनिवेशे च भेदानां विशेष्यविशेषणभावे विनिगमनाविरहेण महागौरवात्, फलानुत्पादनियतसिद्धिव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतापक्ष एव साधीयान्, सिषाधयिषाविरहविशेषणपरित्यागश्चानुचितः। सिषाधयिषाकालीनसिद्धिव्यक्तीनां अनन्तानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशापेक्षया तद्विशेषणदानस्यैव युक्तत्वादिति कथञ्चिदनुगमप्रकारः परिचिन्तनीय इति।

(दी०) तादृशसिद्धीनां तत्तद्व्यक्तित्वेनाभावः कारणम्, निरुक्तरूपविशिष्टत्वेन वा? नाद्यः, अनन्तकार्यकारणभावप्रसङ्गात्। तादृशसकलसिद्धौ अनुमित्साविरहविशेषणदानस्य वैयर्थ्यात्। तत्तत्समयसम्बन्धव्यक्तीनां तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्वप्रसङ्गाच्च।

(गा०) सिद्धेर्वैयर्थ्यमित्याशयेन वैयर्थ्याच्च सिद्धेरिति वक्ष्यति। तादृशसिद्धीनाम्। भिन्नान्तपरिचेयसिद्धिव्यक्तीनाम्। निरुक्तरूपेति। निरुक्तसिद्धिभिन्नत्वविशिष्टसिद्धित्वेनेत्यर्थः। अगत्या कार्यकारणभावानन्त्यमदोषायेत्यत आह-। तादृशेति। तत्तद्व्यक्तित्वेन कल्प्यमानप्रतिबन्धकताकेत्यर्थः। यादृशसिद्ध्युत्तरं सिषाधयिषोत्पत्तावनुमितिः सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणाय कल्पनीयप्रतिबन्धकताकतादृशव्यक्तौ सिषाधयिषाविरहवैशिष्ट्यनिवेशस्याऽऽवश्यकतया सकलेति।

ननु कश्चित् सिषाधयिषाविरहविशेषणस्याऽऽवश्यकतया तदभिप्रायेणैव मूलोक्ततदुपादानसङ्गतिरतो दूषणान्तरमाह। तत्तत्समयेति। तत्तदात्मनिष्ठा याः सिद्ध्यभावातिरिक्तसकलकारणसमवधानाधिकरणीभूतक्षणसम्बन्धव्यक्तयः तासां विनिगमनाविरहेण क्रमिकासिद्धिसिषाधयिषानुमित्युत्पत्तिस्थले सिषाधयिषोत्पत्तिक्षणेऽनुमिति-

वारणाय सिद्धेः सिषाधयिषाविरहविशिष्टत्वद्यक्तित्वेन प्रतिबन्धकत्वापेक्षया लाघवेन च प्रतिबन्धकतापत्तेरित्यर्थः। तथा च मूलोक्तस्य सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वव्याघात इति भावः।

ननु तत्तत्समयैः समं तत्तदात्मनां सम्बन्धाः स्वरूपानतिरिक्ताः तथा च तत्तदात्मस्वरूपस्य तत्तत्समयस्वरूपस्य वा सम्बन्धस्य प्रतिबन्धकत्वे तत्तदात्मन्यन्यदा तत्तत्समये चान्यत्रात्मनि अनुमित्यनुपपत्तिरतोऽन्यस्य प्रतिबन्धकतां प्रसञ्जयति। तत्तत्समयेति। सिद्ध्यनन्तरं सिषाधयिषाद्वितीयक्षणेऽनुमितिस्थले इत्यादिः। सिषाधयिषाविरहविशिष्टसिद्ध्यभावेतरसकलकारणाधिकरणतत्तत्क्षणावच्छिन्नानां तत्तदात्मनिष्ठतत्तन्मनोयोगादिव्यक्तीनामित्यर्थः। सामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहावच्छिन्नायास्तत्तत्सिद्धिव्यक्तेः प्रतिबन्धकत्वापेक्षया लाघवादिति भावः।

(दी०) नान्त्यः, सत्यपि परामर्शादौ कस्याश्चित्सिद्धेरनन्तरमनुमितिः कस्याश्चिन्नेत्यत्र नियामकाभावात् । न वा कारणतावच्छेदकावच्छिन्नमात्राधीनकार्योत्पादादिकं कारणतावच्छेदककोटौ निविशते। तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयकत्वेन, स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसविषयकत्वेन, स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषयकत्वेन वा। किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टज्ञानत्वादिना कारणत्वं स्यात् । अव्यवहितोत्तरश्च तृतीयक्षण एवेति नातिप्रसङ्गः।

(गा०) नियामकाभावात् । नियामकाभावप्रसङ्गात् । सिषाधयिषाविरहविशिष्टसिद्धिसत्त्वे द्वितीयक्षणेऽनुमित्युत्पत्तिनिर्वाह्यायाः निरुक्तसिद्धिभिन्नसिद्ध्यभावरूपपक्षतायाः अनुमित्यनुत्पादनिर्वाह्यतदभावस्य चान्योन्याश्रयभियाऽनुमित्युत्पादानुत्पादप्रयोजकत्वासम्भवादिति भावः। इदरान्योन्याश्रयस्यादोषतावादिनं प्रतिब;

न्यथा निरस्यति । न वेत्यादिना । एवार्थे वा । कार्योत्पत्तेः कारणतावच्छेदकावच्छिन्नसमवधानाधीनत्वकथनेन तस्याः कारणताव च्छेदककुक्षिनिवेशेऽन्योन्याश्रयः सूचितः । तथा सति प्रायशः कारणतावच्छेदकावच्छिन्नसमवधानस्याप्यन्नेन कार्योत्पत्त्यधीनत्वापातात् । निविशते । निविशमानमदूषणावहम् ।

अथ वा उक्तपक्षतायाः कार्योत्पत्तिनियामकत्वमेव न वेत्यादिना निराकृतम । कारणतावच्छेदककोटावित्यादेः कार्योत्पत्तिनियामकतावच्छेदकघटकमित्यर्थः ।

यद्यपि स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वं स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रान्तमिति भेदप्रतियोगितावच्छेदकगर्भे तन्निवेशानर्थक्यात्, तत्परिचेयव्यक्तीनां तत्तद्व्यक्तित्वेनैव भेदाः सिद्धौ निवेशनीयाः । तथा च कारणतावच्छेदकस्य नोत्पत्तिघटितत्वम् । तथाऽपि भेदकूटनिवेशे विशेष्यविशेषणभावे विनिगमनाविरहेण कारणतानन्त्यं दुष्परिहरमेवेति भावः । कार्योत्पादादिकमित्यादिपदेन ईदृशगौरवप्रयोजकभेदकूटस्याऽपि सङ्ग्रहः । तस्य कारणतावच्छेदकत्व एव तृतीयप्रतिबन्धे सङ्गतेः । अत्रान्योन्याश्रयदोषं प्रतिबन्ध्या स्वीकारयति । तथा सतीति । अनुमित्यव्यवहितपूर्वोत्पन्नपरामर्शादितोऽनुमित्युत्तरमनुमित्यापत्तेर्वारणाय उत्पत्तिकालावच्छिन्नत्वविशेषितेनेति । स्वाधिकरणसमयध्वंसवदन्यकालसम्बन्धविशेषितेनेत्यर्थः । तादृशध्वंसवत्त्वं कालिकसम्बन्धेन । तेन उत्पत्तिक्षणस्यापि प्रतियोगित्वादिसम्बन्धेन स्वाधिकरणकालध्वंसावच्छिन्नत्वेऽपि न क्षतिः । एवञ्च कालिकसम्बन्धेन तादृशध्वंसवदन्यात्मसम्बन्धविशिष्टस्य ज्ञानादेर्द्वितीयादिक्षणे सत्त्वादुक्तातिप्रसङ्गतादवस्थ्यमतः कालपदम् । ईदृशकालसम्बन्धस्य उपलक्षणविधयाऽवच्छेदकत्वे स एव दोष इत्यतो विशेषणविधया तथात्वलाभाय उत्तरत्रानुपद्गाय चावच्छिन्नान्तस्य कर्मधारयमध्ये प्रक्षेपमुपेक्ष्यावच्छिन्नत्वविशेषितेनेत्युक्तम् । विशेषणत्वञ्चास्य सामानाधिकरण्यसम्बन्धेन बोध्यम् । धर्मिणो विशेष्यत्वात् । कालान्तरीणानुमितिसमानाधिकरणघटज्ञानादितोऽनुमित्यापत्तिवारणाय स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वमनुमितिविशेषणम् । तदर्थश्च स्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाध-

करणकालध्वंसाधिकरणं यः क्षणस्तदुत्पन्नत्वम् । सत्यन्तनिवेशात् स्वोत्तरदिवसाद्यन्तरितक्षणोत्पन्नानुमितिकज्ञानादितस्तद्द्वितीयक्षणे नातिप्रसङ्गः। तादृशानुमितिकसंस्कारद्वितीयक्षणेऽनुमितिवारणाय स्वाधिकरणत्वे सतीत्युपेक्षितं तृतीयादिक्षणस्य ज्ञानाद्यनाधिकरणत्वेऽपि संस्काराद्यधिकरणत्वाक्षतेः। तादृशापेक्षाबुद्धिद्वितीयक्षणेऽनुमितिवारणानुरोधस्तु न तदुपेक्षाबीजम्। तदानीं समानाधिकरणविशेषगुणान्तरस्याप्यनुत्पत्त्या तत्प्रयोजकादेवानुमित्यनुत्पादोपपत्तेः। अपेक्षाबुद्धिद्वितीयक्षणे समानाधिकरणविशेषगुणोत्पादोपगमे त्वपेक्षाबुद्धेस्तृतीयक्षणावस्थायितया एवानुपपत्तेः।

यस्तु नस्त्वपेक्षाबुद्धिद्वितीयक्षणावस्थायितामत एवैतत्प्रतिबन्दिप्रदर्शनम्। अन्यथा मिलितद्विद्वितीयक्षणोत्पन्नापेक्षाबुद्ध्यात्मकपरामर्शतृतीयक्षणेऽनुमित्यनुपपत्तेः। तस्यास्तृतीयक्षणपर्यन्तावस्थानमते तद्द्वितीयक्षणे विशेषगुणानुत्पत्त्या तदानीमुत्पत्तिकालावच्छिन्नसविषयकत्वस्य दुर्घटत्वादित्यवधेयम्।

अनुमितेः स्वसमानाधिकरणानुमित्युत्तरोत्पन्नज्ञानान्तराद्याऽनुमितिप्रसङ्गवारणायाधिकरणान्तं क्षणविशेषणम्। स्वपूर्वकालोत्पन्नानुमितेरपि स्वाव्यवहितोत्तरत्वाक्रान्तस्वद्वितीयक्षणपर्यन्तस्थायिस्थूलकालोत्पन्नतया तद्दोषतादवस्थ्यमतः क्षणत्वनिवेशः। अनुमितेः स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वसमानाधिकरणस्वात्मकानुमितिकतया तद्वारणायोत्पत्तिनिवेशः।

वस्तुतस्त्वपेक्षाबुद्धिद्वितीयक्षणे विशेषगुणानुत्पादेन अनुमितौ स्वान्यत्वस्य निवेशादपि उत्पत्तिनिवेशप्रयोजननिर्वाहो बोध्यः। तथा सति अपेक्षाबुद्ध्यात्मकानुमित्यनन्तरोत्पन्नज्ञानादनुमित्यापत्तेरसम्भवात्। पुरुषान्तरीयानुमित्यव्यवहितपूर्वोत्पन्नज्ञानाच्चैत्रः पुंसोऽनुमितेर्वारणाय स्वसामानाधिकरण्यमनुमितिविशेषणम्, एकपुरुषीयानुमित्यव्यवहितपूर्वोत्पन्नेच्छादितस्तच्चैत्रः पुरुषान्तरस्यानुमितेर्वारणाय सविषयकत्वनिवेशनम्। अनुमित्यव्यवहितपूर्वक्षणे ज्ञानोत्पत्त्यनियमाशङ्कया ज्ञानत्वमुपेक्षितम्। व्यक्तीभविष्यति चेदमुपरिष्टात्।

बहुव्रीहिप्रतिपाद्यसम्बन्धांशस्याधिकस्याय निवेशाद्दुर्ग्रहं परित्यज्य लघुरूपान्तरमाह। स्वसमानाधिकरणेति। अत्राप्युत्पत्ति-

कालावच्छिन्नत्वविशेषितेनेत्यनुपपद्यते । अन्यथाऽनुमित्यव्यवहितपूर्वोत्पन्नज्ञानादेरनुमित्युत्पत्त्यधिकरणक्षणेऽपि सत्त्वात् तदनन्तरमप्यनुमित्यन्तरापत्तेः ।

न चानुमित्यव्यवहितपूर्वक्षणोत्पत्तेर्विशेषणतयैव सामञ्जस्ये उत्पत्तिकालावच्छिन्नत्वस्य पृथग्विशेषणत्वमनुपयुक्तमिति वाच्यम् । अव्यवहितपूर्वक्षणोत्पत्तेर्विशेषणत्वे तद्घटकध्वंसांशस्य विशेषणतयैव सामञ्जस्ये लक्षणे स्वाधिकरणकालध्वंसानधिकरणरूपस्य उत्पत्तिघटकांशस्य वैयर्थ्यापातात्प्रक्षालनाद्धीति न्यायेन तदंशमपि परित्यज्य स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टज्ञानत्वेन कारणताप्रसङ्गोऽग्रे प्रदर्शयिष्यत एव । तदनुमितौ सामानाधिकरण्यविशेषणप्रयोजनं पूर्ववत् । अनुमित्यव्यवहितपूर्वत्वं प्रागभावसत्त्वे तत्प्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति तत्प्रागभाववत्त्वम् । अनुमितिपूर्वविनष्टस्य तदुत्तरोत्पन्नस्य च घटज्ञानादेर्वारणाय दलद्वयम् । अव्यवहितोत्तरत्वघटकस्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपसत्यन्तादेतदीयसत्यन्तस्य लघुत्वादप्येतत्कल्पे लाघवं बोध्यम् ।

प्रागभावानङ्गीकारे तदघटितवक्ष्यमाणाव्यवहितपूर्वत्वमेव निवेश्यम्, अनुमित्यव्यवहितपूर्वोत्पन्नतदुत्तरस्थायिस्थूलकाले अनुमित्युत्तरमुत्पन्नस्य घटादिज्ञानस्य वारणाय क्षणत्वनिवेशनम् । अनुमितिप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे क्षणपदं कालपरमेव । अनुमित्यव्यवहितपूर्वक्षणपर्यन्तस्थायिनस्तत्पूर्वजातघटज्ञानादिनोऽनुमितिपूर्वमनुमितेर्वारणाय उत्पन्नत्वनिवेशनम् । पूर्ववद् द्वित्वादिवारणाय सविषयकत्वनिवेशनम् । ज्ञानत्वोपेक्षाबीजमपि पूर्ववद्बोध्यम् ।

अथोभयत्र स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रामादननुगम इति प्रतियोगिनि स्वत्वमन्तर्भाव्यानुगतभेदकूटत्वादितधर्मेण कारणतां प्रसञ्जयति । स्वक्षणेति । स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकं स्वं अनुमितिसामग्र्यसमवधानक्षणोत्पन्नं घटादिज्ञानादिकमेव तदन्यसविषयकोऽनुमित्यव्यवहितपूर्वोत्पन्नतत्समानाधिकरणपरामर्शादिस्ततोऽनुमित्युपपत्तिः । तादृशादेव परामर्शादनुमित्यनन्तरमनुमित्यन्तरवारणायात्राप्युत्पत्तिकालावच्छिन्नत्वविशेषितेनेत्यनुपपद्यते ।

न चैवं स्वोत्पत्तिक्षणावच्छिन्नत्वस्यानुयोगिनि निवेशेनाननुगम-स्याऽऽवश्यकतया प्रयासोऽयमफल इति वाच्यम् । तत्तद्वस्तुनिष्ठत-त्तदधिकरणसमयध्वंसाधिकरणसमयसम्बन्धानामभावकूटविशिष्टत्व-स्यैवात्र उत्पत्तिकालावच्छिन्नत्वार्थकत्वात, तादृशस्य चानुगतत्वात् । स्वसमानाधिकरणानुमितित्वावच्छेदेन स्वक्षणाव्यवहितोत्तरक्षणा-नुत्पत्तिकत्वं विवक्षणीयमतोऽनुमित्युत्पादकपरामर्शाद्यधिकरणक्ष-णानुत्पत्तिकत्वस्य तत्परामर्शसमानाधिकरणकालान्तरीणानुमितौ सत्त्वेऽपि न जन्यसविषयके भेदकूटाप्रसिद्धिः । स्वक्षणाव्यवहितो-त्तरत्वं पूर्वनिरुक्तं ग्राह्यम् । तत्पुरुषीययादृशघटज्ञानाद्युत्तरं तदीया-नुमितावनुत्पन्नायामेव तस्य पुंसो मुक्तिस्तादृशघटज्ञानादिकं स्वाधि-करणसमयोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिसामान्यक-मिति परामर्शाद्यसमवहितात्तदन्यघटज्ञानादितोऽनुमित्यापत्तिः, तस्य स्वपदेनोपादानासम्भवादतोऽव्यवधाननिवेशः । निरुक्ताव्यवधान-स्यानुमित्यनुत्पादकघटज्ञानादेः पूर्वं कदाचिदुत्पन्नाया अप्यनुमितेरु-त्पत्त्यधिकरणक्षणे अव्यवहितोत्तरत्वस्य च तादृशानुमित्युत्पत्तिमति तादृशघटज्ञानादिद्वितीयक्षणपर्यन्तस्थायिस्थूलकाले सत्त्वात् तादृ-शं स्वमप्रसिद्धमेव स्यादत उत्तरत्वक्षणत्वयोर्निवेशनम् । अनुमितेः स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया स्वपदेन उपादा-नासम्भवात् ततोऽनुमित्यन्तरापत्तिरत उत्पत्तिनिवेशः । व्यधिक-रणानुमित्यव्यवहितपूर्वक्षणोत्पन्नघटज्ञानादिवारणाय सामानाधिक-रण्यमनुमितिविशेषणम् । द्वितीयकल्पेऽनुमित्यव्यवहितपूर्वक्षणो-त्पत्तिमुपलक्षणीकृत्य पृथगुत्पत्तिकालस्य विशेषणतया निवेशापेक्ष-या तादृशक्षणोत्पत्तिघटकतादृशक्षणवृत्तित्वस्य विशेषणतया निवेश-नमेवोचितम्, तावतैवातिप्रसङ्गभङ्गादित्याशयेनाह । किं चेति । पद-व्यावृत्तिः स्फुटैव । यादृशपरामर्शद्वितीयक्षणे किमपि ज्ञानं नोत्पन्नं तृतीयक्षणेऽप्यनुमितिर्जाता तत्र परामर्शरूपज्ञानस्यैवानुमित्यव्य-वहितपूर्वक्षणवृत्तित्वविशिष्टस्यानुमित्यव्यवहितपूर्वक्षणे सत्त्वात् ज्ञानत्वमुपेक्ष्य सविषयकत्वनिवेशनमफलमित्यतो ज्ञानत्वमेवात्र निवेशितम् । तत्रानुयोगिनि स्वत्वान्तर्भावेनाननुगमस्तु नाशङ्कनीयः । पूर्वकल्पद्वयेऽपि तत्सत्त्वात् गौरवस्य चाधिक्यात् । अननुगमास-हिष्णुतायाञ्च तत्तद्वस्तुनिष्ठतत्तद्वस्तुसमानाधिकरणानुमित्यव्यवहि-

तत्पूर्वत्वानधिकरणक्षणसम्बन्धानामभावकूटविशिष्टज्ञानत्वेन कारणत्वप्रसक्तेर्बोध्या ।

न चोपदर्शितसकलरूपापेक्षया लिङ्गपरामर्शत्वस्य लघुतया तेनैव रूपेण परामर्शहेतुत्वमुचितमिति न प्रतिबन्धावकाश इति वाच्यम् । उक्तरूपेण हेतुत्वे कारणान्तरविरहदशायाम् उक्तरूपावच्छिन्नत्वविरहेणानुमितिवारणसम्भवात् कारणान्तरस्याकल्पनीयतया लिङ्गपरामर्शत्वापेक्षया तत्तच्छरीरगौरवस्याकिञ्चित्करत्वात् ।

ननु यत्र घटज्ञानादिद्वितीयक्षणे लिङ्गपरामर्शस्तदुत्तरमनुमितिस्तत्र परामर्शोत्पत्तिक्षणेऽप्यनुमितिप्रसङ्गः । प्रथमक्षणमपेक्ष्य द्वितीयस्येव द्वितीयक्षणमपेक्ष्य तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वेन तादृशघटज्ञानादेः स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वादित्यत आह । अव्यवहितोत्तरश्चेति । द्वितीयक्षण एवेति । अव्यवहितोत्तरत्वमध्ये स्वक्षणस्य न प्रातिस्विकरूपेण निवेशः किन्तु स्वाधिकरणकालत्वेन, तथा च स्वाधिकरणकालध्वंसाधिकरणत्वसामान्याभावस्य स्वतृतीयक्षणेऽसत्त्वान्न तस्याव्यवहितोत्तरत्वमिति भावः ।

(दी०) न च आदिमेषु परामर्शस्थितिक्षणे यत्र विरोधिसिद्ध्यादिविनाशस्तत्र उत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्य अतथात्वादिति वाच्यम् । अनुमितिसामग्र्या विरोधिन्या विरहेण तदानीमुत्पन्नादनुव्यवसायादेरन्ततः संस्काराद्वा तत्सम्भवात् । संस्कारजन्यत्वेन स्मृतित्वस्य प्रागेव निरासात् ।

(गा०) पूर्वकल्पद्वये ज्ञानत्वमुपेक्ष्य सविषयकत्वनिवेशनप्रयोजनं स्फुटयितुमाशङ्कते । न चादिमेष्विति । शेषकल्पे विनश्यदवस्थपरामर्शजन्यानुमितिस्थलेऽप्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टपरामर्शस्यैवानुमित्यव्यवहितपूर्वक्षणे सत्त्वान्नानुपपत्तिरित्यत आदिमेष्वित्युक्तम् । अतथात्वादिति । द्वितीयक्षणेऽनुमित्यनुत्पत्त्या तत्कारणतावच्छेदकानाक्रान्तत्वादुत्पत्तिक्षणावच्छिन्नस्यानुमित्यव्यवहितप्राक्क्षणेऽसत्त्वाच्चेत्यर्थः । अनुमित्युत्पत्तिक्षण इव दर्शितस्थलेऽनुमितिपूर्वमपि परामर्शेन प्रतिबन्धादनुव्यवसायादिर्नोत्पत्तुमर्हतीति

शङ्कानिरासायानुमितिसामग्र्या विरोधिन्या विरहेणेति । परामर्शमात्रं न प्रतिबन्धकम् अपि त्वनुमितिसामग्र्येव, तदानीन्तु न तत्सामग्री तस्याः फलाव्यवहितप्राक्क्षण एव सत्त्वादिति । तदानीम् । तादृशपरामर्शद्वितीयक्षणे । अनुव्यवसायादरित्यादिना सन्निकृष्टवस्त्वन्तरज्ञानपरिग्रहः ।

ननु यत्र परामर्शोत्पत्तिकाले समानविषये लौकिकचाक्षुषादिप्रत्यक्षस्य भिन्नविषये च शाब्दबोधस्य सामग्र्यासीत्तत्र द्वितीयक्षणे विनिगमनाविरहेण किमपि ज्ञानं न जायते सकलज्ञानसामग्रीषु प्रतिबन्धकसमवधानस्य तुल्यत्वादतस्तद्द्वितीयक्षणे प्रत्यक्षादिसामग्रीविगमेऽपि तृतीयक्षणे नानुमितिः स्यात् । उक्तकारणतावच्छेदकाक्रान्तज्ञानाभावादित्यत आह । अन्तत इति । कथञ्चिज् ज्ञानानुत्पादेऽपीत्यर्थः । संस्कारादिति । तस्यापि सविषयकत्वघटिततत्कारणतावच्छेदकाक्रान्तत्वादिति भावः ।

न च यत्र परामर्शादिरुपेक्षात्मकस्तत्र का गतिरिति वाच्यम् । फलानुरोधेन तत्र संस्कारकल्पनाया आवश्यकत्वेन परामर्शादेरुपेक्षात्वस्यैवासिद्धेः ।

नन्वनुमितेः संस्कारजन्यत्वोपगमे तस्याः स्मृतित्वापत्तिः, संस्कारजन्यज्ञानत्वस्य स्मृतित्वप्रयोजकत्वादत आह । संस्कारजन्यत्वेनेति । निरासादिति । संस्कारत्वेन संस्कारजन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात्, अन्यथा कालोपाधिविधया ज्ञानान्तरेऽपि, ज्ञायमानलिङ्गकरणतामते संस्कारलिङ्गकानुमितौ च संस्कारस्य जनकत्वेनातिप्रसङ्गादिति भावः ।

(दी०) स्याद्वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन, स्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणक्षणवृत्तित्वविशिष्टत्वेन वा स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेन वा प्रतिबन्धकत्वम् । तदव्यवहितपूर्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम् ।

(गा०) प्रकृतसाम्याय कार्यानुत्पत्तिनिर्वाहतावच्छेदकरूपे-

ण प्रतिबन्धकत्वमेव प्रसञ्जयति । स्वसमानाधिकरणेति । एतद्व्या-
वृत्तिरनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावपक्षतावद्बोध्या।

सिद्ध्यात्मकपरामर्शानन्तरसिषाधयिषोत्पत्तिकाले सर्वत्र तत्त-
दात्मसमवेतधर्मनाशस्याप्रामाणिकत्वे यत्र न तन्नाशस्तत्र प्रथम-
क्षणेऽप्युक्तप्रतिबन्धकतावच्छेदकावच्छिन्नस्यासत्त्वेनातिप्रसङ्गसम्भ-
वात् कल्पान्तरमाह । स्वसमानाधिकरणेति । उक्तस्थले परामर्शा-
देरनुमित्यव्यवहितपूर्वक्षणवृत्तित्वेऽपि तदुत्पादक्षणस्यानुमित्यव्य-
वहितपूर्वत्वानधिकरणतया तद्वृत्तित्वविशिष्टत्वेन परामर्शादेरेव
प्रतिबन्धकत्वात्तत्र कल्पे तादृशस्थले सिषाधयिषोत्पादकालेऽनु-
मितिप्रसङ्ग इति भावः ।

अत्रानुमितेरव्यवहितपूर्वत्वं वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंस-
प्रतियोगित्वम् । तत्र क्षणत्वानिवेशेऽनुमित्युत्पत्त्यधिकरणमहाका-
लाद्युत्पत्तिकध्वंसमादायातिप्रसक्तमिति क्षणत्वनिवेशनमावश्यकम्।
एवञ्च एतदपेक्षया तादृशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंस-
प्रतियोगिक्षणवृत्तित्वविशिष्टत्वेन प्रतिबन्धकत्वमेवोचितम्, अनु-
मित्युत्पत्त्यनधिकरणसमयस्य क्षणत्वेनानिवेशेऽपि क्षतिविरहात् ।
अनुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पन्नध्वंसप्रतियोगित्वस्यानुमि-
त्यव्यवहितपूर्वक्षणभिन्नक्षण एव सत्त्वात् । चरमक्षणत्वनिवेशनञ्च
उभयत्रैवावश्यकम् ।

अनुमित्यव्यवहितप्राक्क्षणेऽपि तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रति-
योगित्वानधिकरणमहाकालादिवृत्तित्वविशिष्टसत्त्वेनानुमित्युत्पत्त्यन-
धिकरणसमयोत्पन्नध्वंसप्रतियोगिस्थूलकालविशेषवृत्तित्वविशिष्टस-
त्त्वेन चानुमितिमात्रानुत्पत्तेरित्याशयेनाह । स्वसमानाधिकरणेति।
यदि च पूर्वकल्पे क्षणत्वानिवेशेऽनुमित्युत्पत्त्युपलक्षितकालोत्पत्ति-
कत्वनिवेशन एवान्यकालावच्छेदेनानुमित्युत्पत्त्यधिकरणमहाकाला-
द्युत्पत्तिकध्वंसमादायातिप्रसङ्गः, न तु तदुत्पत्तिविशिष्टसमयोत्प-
त्तिकत्वनिवेशे, तथा च क्षणत्वमनुत्पत्त्यधिकरणकाले न निवेश्यमेवे-
त्युच्यते तथाऽपि उपलक्षितोत्पत्तिकत्वापेक्षया तदुत्पत्तिकत्वविशि-
ष्टोत्पत्तिकत्वस्य गुरुशरीरतयैव कल्पान्तरानुसरणसङ्गतिः।

न चैतत्कल्पेऽप्यनुमित्युत्पत्त्यभावविशिष्टसमयोत्पत्तिकत्वमेव ध्वं-
से निवेश्यम्, अनुमित्युत्पत्त्यधिकरणभिन्नोत्पत्तिकत्वनिवेशो यत्रानु-

मित्यात्मकपरामर्शानन्तरजातानुमित्यन्तरेच्छाबलात् पुनरनुमितिः तत्रानुमित्सोत्पादकालस्य तत्पूर्वं परतो वाऽवस्थानावश्यकतयाऽनुमित्युत्पत्त्यधिकरणत्वनियमेन प्रथमानुमित्युत्पत्तिक्षणस्यानुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वंसप्रतियोगिताया दुर्घटतयाऽनुमित्सोत्पत्तिकालेऽनुमित्यापत्तेः । अनुमित्युत्पत्त्यभावोपलक्षितसमयोत्पत्तिकत्वनिवेशेऽनुमित्यव्यवहितप्राक्क्षणस्यापि तदुत्पत्त्यभावाधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगितया तद्व्याप्तिपरामर्शादेरनुमितिविरोधितापत्तेः, तथा च साम्यमिति वाच्यम् । क्षणिकक्षणाभ्युपगमेऽनुमित्युत्पत्त्यनधिकरणत्वोपलक्षितसमयोत्पत्तिकत्वनिवेशेऽपि दर्शितस्थलेऽनुमित्सोत्पत्तिक्षणस्यानुमित्युत्पादानधिकरणतयोक्तदोषानवकाशेन तत्कल्पे लाघवसम्भवात् । अनुमित्यनधिकरणत्वस्य समयविशेषणत्वेऽनुमित्युत्पत्तिक्षणस्याप्यनुमित्यधिकरणसमयविशेषं *प्रत्येवाव्यवहितपूर्वतया तदुत्तरमनुमित्याशक्तिरतस्तदुत्पत्त्यन*धिकरणत्वपर्यन्तनिवेशः ।

समयाव्यवहितपूर्वत्वं समयोत्पत्तिध्वंसप्रतियोगित्वमेव न तु वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम्, तदुत्पत्तिक्षणनिवेशे प्रयोजनाभावात् । प्रागभावानभ्युपगन्तृनये तदुत्पत्तिकालीनध्वंसप्रतियोगित्वं तत्पूर्वत्वम् । तथा च तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तिध्वंसाप्रतियोगित्वरूपाव्यवहितत्वस्य स्वातन्त्र्येण निवेशनमफलम्, तदुत्पत्तिकालीनत्वस्थले तदुत्पत्तिकालोत्पत्तिकत्वनिवेशन एव व्यवहितपूर्वकालवारणसम्भवादित्याशयेनानुमित्यव्यवहितपूर्वत्वमनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमेव वाच्यमित्याह । तदव्यवहितेति । अनुमितिस्थितिकालोत्पन्नध्वंसप्रतियोगित्वमनुमित्युत्पत्तिक्षणसाधारणमतस्तद्वृत्तित्वविशिष्टस्य विरोधित्वोपपत्तये प्रथमोत्पत्तिनिवेशः । उत्पत्तिविशिष्टोत्पत्तिकत्वनिवेशो तल्लाभायैव क्षणपदम् ।

(दी०) न चात्र प्रथमे यत्र सिद्ध्यात्मकपरामर्शानन्तरं सिषाधयिषाया उत्पत्तिकाले तत्पुरुषीयस्य कस्यापि धर्मस्य न विनाशोऽनन्तरं पुनरनुमितिः, तत्र तदुत्पत्तिसमयेऽपि सा स्यात्, तत्पूर्वकालीनानां सर्वेषां तादृशपूर्ववर्त्तित्वेन अविरोधि-

त्वादिति वाच्यम् । अनवरतपरिस्पन्दमानापरिमितपवनादिपरमाणुचेतनसंयोगसन्तानान्तःपातिव्यक्तीनामविरतमेवोपरमात्, फलानुत्पादबलेनापि तादृशकल्पनासम्भवात्, कारणान्तरकल्पने गौरवाच्च अन्वयव्यभिचारसन्देहस्य च कारणत्वग्रहाविरोधित्वात् ।

(गा०) द्वितीयकल्पानुसरणबीजीभूतप्रथमकल्पदोषं कथञ्चिदुद्धर्तुमाशङ्कते । न चार्शति । सिषाधयिषोत्पत्तिकाले कस्यचित्तदात्मधर्मस्य नाशे तस्यैवानुमितिपूर्ववर्तिभिन्नत्वेन विरोधितया न सिषाधयिषोत्पादकालेऽनुमित्यापत्तिसम्भव इति तदविनाशस्थलानुधावनम् । अन्यदीयधर्मनाशेऽपि तेन धर्मेणाप्रत्यासन्नतया अन्यदीयानुमितिप्रतिबन्धासम्भवात्तत्पुरुषीयस्येत्युक्तम् ।

यद्यपि परामर्शानन्तरं सिषाधयिषोत्पादस्थले परामर्शाव्यवहितक्षणे फलेच्छा अवश्यमेव स्वीकार्या, तथा च तस्या एव सिषाधयिषोत्पत्तिकाले अवश्यं विनाशस्तथाप्यपेक्षाबुद्ध्यात्मकफलज्ञानात् यदि परामर्शोत्पत्तिकाले फलेच्छा स्वीक्रियते, तदा परामर्शोत्पत्तिद्वितीयक्षणे न आत्मधर्मविनाशः सम्भवतीत्यभिप्रायेणेदम् । अनुमितौ सुखत्वभ्रमदशायां फलान्तरेच्छामन्तरेणैव सुखत्वप्रकारेणानुमित्सा सम्भवतीत्यभिप्रायेण वा ।

सिषाधयिषानन्तरमनुमित्यनुत्पादे तत्पूर्वोत्पन्नपरामर्शादेरेवानुमित्यव्यवहितपूर्ववर्तिभिन्नतया विरोधित्वेनापत्त्यसम्भव इत्यतोऽनन्तरमनुमितिरित्युक्तम् । अनवरतेति । अनवरतपरिस्पन्दमानानामपरिमितपवनादिपरमाणूनां चेतनेनात्मना सह यः संयोगसन्तानः संयोगधारा, तदन्तर्गतव्यक्तीनां प्रतिक्षणमेव नाशादित्यर्थः। अपरिमितानामपि घटादीनामिव स्थिरत्वे, सदागतिस्वभावानामपि एकद्व्यादिरूपत्वे प्रतिक्षणं न संयोगोत्पादविनाशसम्भव इत्यपरिमितान्तम् । प्रतिक्षणमात्मसमवेतसंयोगादिनाशस्य सम्भवेऽपि न प्रामाणिकतेत्याशङ्क्याह । फलानुत्पादेति । कल्पनासम्भवादिति । अनुमित्युत्पत्तेरुक्तकारणमन्यस्यावश्यकतया तदनुत्पादस्य तादृशसंयोगादिनाशमन्तरेणानुपपद्यमानत्वादिति भावः ।

ननु तत्रानुमित्यनुत्पादनिर्वाहाय सिद्ध्यभावादिरूपकारणान्तरमेव कल्प्यतां तद्विरहेणापि तत्र तदुपपत्तेरित्यत आह । कारणान्तरेति ।

ननु अनुमितिपूर्ववर्त्तिभिन्नत्वावच्छिन्नाभावस्य कारणतासिद्धौ उक्तस्थलेऽनुमित्यनुत्पादनिर्वाहाय तादृशकारणाभावोपपादकसंयोगादिविनाशः कल्पनीयः । प्रथमञ्च तादृशग्रह एव न सम्भवति उक्तस्थले तदानीं तादृशाभावरूपकारणसत्त्वस्य सन्दिग्धतया अन्वयव्यभिचारसन्देहादित्यत आह । अन्वयव्यभिचारेति । कारणत्वग्रहाविरोधित्वादिति । कारणतायाः कार्यव्यापकतागर्भाया ग्रहे ग्राह्याभावावगाहितया व्यतिरेकव्यभिचारग्रहस्यैव विरोधित्वात्, सामग्रीनिष्ठकार्यव्याप्तेश्च कार्यकारणभावाघटकतया तादृशव्याप्तिविरोध्यन्वयव्यभिचारग्रहस्य कार्यकारणभावग्रहविरोधित्वे मानाभावादिति भावः ।

(दी०) उपादीयन्तां वा तत्तदात्मसमयविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः । भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वम् । तथा च उपमानादेः प्रमाणान्तरत्वं भज्येत सर्वत्र अनुमितिसामग्रीसम्भवात् । विलीयेत च परामर्शत्वादिना कारणत्वम् बाधत्वादिना च प्रतिबन्धकत्वम् । अनयैव रीत्या कार्यान्तरेष्वपि क्लृप्तानां कारणानां प्रतिबन्धकानाञ्च अतथात्वमक्लृप्तानाञ्च तथात्वं प्रसज्येत । अत एव न ने द्वितीयोऽपि प्रकारः वैयर्थ्याच्च सिद्धेः ।

(गा०) ननु प्रतिक्षणमात्मनि संयोगादिविनाशेऽपि यत्र दर्शितस्थले सिद्धिरनुमितिरूपा तत्र तद्द्वितीयक्षणविनष्टसंयोगादेरनुमितिपूर्वमपि सत्त्वेनाविरोधितया उक्तापत्तिस्तदवस्थैवेत्यत आह । उपादीयन्तामिति । प्रतिबन्धकतया स्वीक्रियन्तामित्यर्थः । समयविशेषः । यदा तत्रात्मनि अनुमितिर्नोत्पद्यते तत्क्षणाव्यवहितपूर्वक्षणरूपः । तत्सम्बन्धस्यानुमित्यव्यवहितपूर्वमभावात् । एवं सति प्र-

तिबन्धकता स्वरूपसम्बन्धेनैव वाच्या । सर्वत्र क्षणविशेषसम्बन्धस्यैव प्रतिबन्धकतासम्भवेन सिद्ध्यादिसाधारण्यविरहेऽपि क्षतिविरहात् । क्षणसम्बन्धस्य स्वरूपातिरिक्तत्वमभ्युपेत्येदम् । अनतिरिक्तत्वाभिप्रायेणानुगतेन भेदकूटाघटितलघुरूपान्तरेण कारणतां प्रसञ्जयति । भवेद्वेति । एकपुरुषीयानुमित्युत्पादक्षणे सर्वात्मन्यनुमित्यापत्तेर्वारणाय तत्तत्पुरुषीयत्वनिवेशः । क्षणस्य कारणता च यदा तादृशक्षणः तदुत्तरं कार्यमिति कालिकप्रत्यासत्त्या बोध्या । परामर्शसाधारण्यानुरोधेनाह । तादृशेति । तदीयानुमितित्वव्यवहितपूर्ववर्तीत्यर्थः ।

यद्यप्यत्र पूर्वोपदर्शितस्वसामानाधिकरण्यस्यानुमितिविशेषणतयाप्यतिप्रसङ्गः शक्यवारणस्तथापि तत्र स्वत्वान्तर्भावेनाननुगममाशङ्क्य तत्पुरुषीयत्वघटितैतत्कल्पानुसरणं बोध्यम् ।

न चैव पुरुषभेदेन कारणताभेदात् सामानाधिकरण्यप्रत्यासत्त्या लिङ्गपरामर्शत्वादिसिद्ध्यभावत्वादिना कारणताकल्पनमेवोचितमिति वाच्यम् । लिङ्गपरामर्शादेरपि लिङ्गादिभेदेन कारणताभेदस्याऽऽवश्यकत्वात् पुरुषापेक्षया लिङ्गादीनामेव भूयस्त्वात् ।

उक्तरूपेण कारणतास्वीकारे अनिष्टं प्रदर्शयति । तथा चेति । उपमानादेरित्यादिना शब्दपरिग्रहः । प्रमाणान्तरत्वम् । अनुमितिबहिर्भूतप्रमाणत्वम् । सर्वत्रैवेति । उपमानादिस्थले लिङ्गपरामर्शादिघटितानुमितिसामग्र्यनियमात् तत्र प्रमित्यन्तरमुपपद्यते अत उपमानादेः प्रमाणान्तरता अनुमित्युत्पत्तिमात्रनिर्वाह्यस्य उक्तकारणस्यानुमितिसामग्रीत्वे तु तस्याः सर्वत्रैव सम्भवेनोपमित्यादिरूपविलक्षणप्रमितेरेवासिद्ध्यापत्तेरिति भावः ।

ननु सर्वत्रैकजातीयप्रमितिसामग्रीसम्भवेऽपि उपमिनोमि शाब्दयामि अनुमिनोमीत्यनुभवसाक्षिकं प्रमितिवैलक्षण्यं दुरपह्नवमेवेति नोपमानादेः प्रमाणान्तरताभङ्ग इत्यतोऽन्यदोषमाह । विलीयेतेति । उक्तरूपेण परामर्शादेरपि कारणत्वात् परामर्शत्वादिनेति । अनुमित्यव्यवहितपूर्ववर्तित्वभिन्नत्वादिना बाधादेरपि प्रतिबन्धकत्वात् बाधत्वादिनेति । कार्यान्तरेषु । प्रत्यक्षादिषु । कारणानाम् । सर्ववादिसिद्धकारणतावच्छेदकेन्द्रियसन्निकर्षत्वाद्यवच्छिन्नानाम् । प्रतिबन्धकानाम् । सर्वसम्मतप्रतिबन्धकतावच्छेदकदोषविशेषत्वाद्यवच्छि-

ध्ानाम्। अतथात्वम्। अकारणत्वमप्रतिबन्धकत्वञ्च। अस्लृप्तानाम्। अकारणत्वादिना सर्वानुमतानां कार्याव्यवहितपूर्ववर्त्तितद्भिन्नाना-मुदासीनवस्तूनाम्। तथात्वम्। कारणत्वादिकम्। प्रसज्येत। ते-षामप्युक्तकारणतावच्छेदकादिरूपाक्रान्तत्वादिति भावः।

अत एवेति। अनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्धीनां तत्तद्व्यक्तित्वावच्छिन्नाभावस्य हेतुत्वेऽनन्तकारणताप्रसङ्गात्, तादृश-सिद्धिभिन्नसिद्धित्वावच्छिन्नाभावहेतुत्वे तस्यानुमित्युत्पत्त्यधीनतया अन्योन्याश्रयात्, नत्तत्सिद्धिभेदकूटवत्सिद्धित्वावच्छिन्नाभावहेतु-त्वे भेदानां विशेष्यविशेषणभावे विनिगमनाविरहादेवेत्यर्थः। एत-न्मते अधिकदूषणमाह। वैयर्थ्याच्चेति। अनुमित्यव्यवहितपूर्ववर्त्तिभि-न्नत्वावच्छिन्नाभावस्यैव कारणत्वसम्भवात्, बाधबुद्ध्यादेरभावस्य परामर्शादेश्च कारणतान्तरताविलयप्रसङ्गस्येष्टत्वादिति भावः। एत-न्मते इव दर्शिततृतीयक्षणसाधारणाव्यवहितोत्तरत्वघटितस्वक्षणा-व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्ध्यभावरूपपक्षतापक्षेऽपि पूर्वोक्तसिद्धिपदव्यावृत्त्यसङ्गतस्तद्वैयर्थ्यं बोध्यम्।

न च ज्ञानेच्छयोर्यौगपद्ये सिषाधयिषाकालोत्पन्नानुमितिपूर्वव-र्त्तिपरामर्शादेः सिषाधयिषाविरहाविशिष्टाव्यवहितोत्तरक्षणोत्पन्ना-नुमितिकभिन्नतया पूर्वं सिषाधयिषाविरहविशिष्टतया चानुमितिवि-रोधिता स्यादिति तत्सार्थकता इति वाच्यम्। ज्ञानेच्छयोर्यौगपद्ये सिद्ध्युपादानेऽपि यत्र पूर्वोत्पन्नसिषाधयिषाचतुर्थक्षणे सिद्ध्यनन्तरं पुनः सिषाधयिषा अनुमितिश्च युगपत्तत्र सिद्धिविरोधितापत्तेर्दु-र्वारत्वात्। ०

न च तत्र सिद्ध्यनुपादाने सिषाधयिषाविरहविशेषणस्यापि वै-यर्थ्यमापतितं यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिद्धेर-नुमित्यविरोधित्वेऽपि सिषाधयिषोत्पत्तिकालविनष्टफलेच्छादीनां विरोधितयैव सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणसम्भवादिति वा-च्यम्। सिद्धेरनुमितिरूपत्वे इच्छाकालाविनष्टफलेच्छादेरनुमित्यव्य-वहितपूर्ववर्त्तितया विरोधित्वासम्भवादिति।

(दी०) सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानानति-रिक्तसाधकमानयोरन्यतरस्याभावः कारणमिति तु केचित्तन्न।

साधकं हि मानं सिद्धिस्वरूपयोग्यं तदुपहितं तत्सामग्री वा ? नाद्यः, चक्षुरादिसत्त्वे विनाऽनुमित्सामनुमित्यभावप्रसङ्गात् । न द्वितीयः, सिद्धेः पूर्वं तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तेः, अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च । न तृतीयः, अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वम् अनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेन चानुमितिकारणत्वमित्यन्योन्याश्रयात् । स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोपविरहेणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्त्वे स्थाणुत्वारोपक्षणे तदभावानुमित्यापत्तेरित्यपि कश्चित् ।

(गा०) समानविषयकप्रत्यक्षसामग्रीकाले पक्षताविरहेणानुमितिं वारयतो मूलस्थसाधकमानपदं सिद्धिसाधकमानविशेषान्यतरपरतया वर्णयत उपाध्यायस्य मतमाह । सिषाधयिषेति ।

सिद्धाविव साधकमानेऽपि अनुमित्साया उत्तेजकत्वात् प्रत्येकं तदभावविशेषणत्वे गौरवमित्यन्यतरत्वावच्छिन्ने सत्त्वाद्विशेषणतालाभाय समास उपेक्षितः । अनुमितिपूर्वमनुमानरूपस्यैव साधकमानस्य नियमेन सत्त्वात् सिषाधयिषां विना कदाऽप्यनुमितिर्न स्यादित्यनुमानातिरिक्तत्वं साधकमानविशेषणम्, साधकमानपदार्थघटकसिद्धावनुमित्यन्यत्वविशेषण पर्यवसितम्, इदञ्च लाघवमाशङ्क्याग्रे निराकार्यम् । साधकमानपदार्थं वितर्क्य दूषयति । साधकं हीति । तदुपहितम् । स्वजन्यसिद्धिविशिष्टम् । तत्सामग्री । सिद्धेः कारणसमुदायः । अनुमित्सासत्त्वे तदभावविशिष्टसाधकमानाभावस्याक्षतत्वाद्विनाऽनुमित्सामिति । अनुमित्यभावप्रसङ्गादिति । कालिकप्रत्यासत्त्या प्रतिबन्धकत्वाभिप्रायेण । समवायेन प्रतिबन्धकत्वे आत्मनि सर्वदैव चक्षुरादिप्रमाणाभावादतिप्रसङ्गो बोध्यः । प्रत्यक्षसामग्रीसत्त्वे अनुत्पन्ने प्रत्यक्ष इति शेषः ।

ननु तत्रानुमितिवारणायान्यदेव प्रतिबन्धकमास्थेयं सिद्ध्यभावपक्षतामतेऽपि तदावश्यकत्वादित्यत आह । अनुमानातिरिक्तेति । तथा सति पक्षताशरीरेऽनुमानातिरिक्तसाधकमानान्तर्भावस्य निष्फल-

त्यादित्यर्थः । सिद्धयभावविहितप्रत्यक्षादिसामग्रीदशायां अनुमिति-वारणस्यैव तत्फलत्वात्, साधकमानपदेन सिद्ध्युपहितविवक्षणे च तन्निर्वाहादिति भावः ।

केचित्तु यथाश्रुतानुरोधेनानुमानातिरिक्तेति तन्मात्रपरमेव ।

न च सामग्र्याः पृथक् प्रतिबन्धकत्वे साधकमानपदार्थस्य सिद्ध्युपहितस्यापि निवेशनमफलमेवात वाच्यम् । यत्र विषये प्रत्यक्षाद्युपहितसन्निकर्षादिघटितप्रत्यक्षादिसामग्रीदशायामेव परामर्शादिसमवधान तत्रानुमितिवारणाय तादृशसाधकमानस्यैव पक्षतायां निवेशयितुमुचितत्वात् ।

न च तत्रापि सिद्धिप्रतिबन्धकतयैव उपपत्तौ सिद्ध्युपहितनिवेशनमफलमिति वाच्यम् । शाब्दसिद्धिकाले अशाब्द ज्ञान जायतामितीच्छाबलादनुमित्युपपत्तये सिद्धौ तादृशेच्छाया अवश्यमुत्तेजकत्वोपगमात् । तथाविधेच्छाबलादुपदर्शितप्रत्यक्षसामग्र्यनन्तरमनुमितेर्वारणाय साधकमानान्तर्भावसार्थक्यात् ।

न च सिद्ध्युपहितचक्षुःसंयोगादिसत्त्वे आलोकसमवधानासत्त्वे तादृशेच्छाबलात् अनुमित्युत्पत्त्या साधकमानेऽपि तादृशेच्छाया उत्तेजकताया आवश्यकत्वात् पक्षतायां तदन्तर्भावेऽपि उक्तापत्तिवारणासम्भव इति वाच्यम् । यत्र प्रत्यक्षोपहितचक्षुःसंयोगादिसत्त्वे इतरकारणसमुदायसत्त्वे पत्राशाब्दं ज्ञानं जायतामितीच्छा न तु इतरकारणाभावविशिष्टचक्षुःसंयोगादिसत्त्वे तत्र तादृशेच्छाभावस्य प्रत्यक्षोपहितचक्षुःसंयोगादिरूपसाधकमानविशेषणत्वानुपगमात् तादृशविषयविशेषीयपक्षतायामेव तथाविधसाधकमानान्तर्भावस्य सार्थकत्वादित्याहुः ।

अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वमिति । अन्यथा अनुमित्साधीनानुमित्युत्पत्तिकाले प्रत्यक्षापत्तेरिति भावः । प्रत्यक्षसामग्र्यभावत्वेन । सिद्धिप्रत्यक्षसामग्र्यन्यतराभावत्वेन । अन्योन्याश्रयादिति । अनुमितिसामग्र्यभावं प्रत्यक्षकारणकलापान्तर्गतमज्ञात्वा प्रत्यक्षसामग्र्या अज्ञानात् तदज्ञाने च तदभावघटितानुमितिसामग्र्या अज्ञानात् तदभावादिज्ञानाभावादिति भावः ।

अथ वा कारणसमुदायत्वेन सामग्र्या निवेशे समुदायभेदस्य प्रत्येकं सकलकारणेष्वेव सत्त्वात् व्यासज्यवृत्तिधर्मावच्छिन्नानुयो-

गिताकाराभावानुपगमे सामग्र्यां(१) सामग्रीभिन्नभिन्नत्वं दुर्वचमिति कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेनैव सा निवेश्या, अव्याप्यवृत्तेस्तत्क्षणावच्छिन्नभेदस्याव्याप्यवृत्तितानभ्युपेत्य अन्यदा कार्याव्यवहितपूर्वक्षणावच्छिन्नभेदवत्त्व, कार्याव्यवहितप्राक्क्षणे च तादृशभेदावच्छिन्नभेदवत्त्व फलोपधायकस्योपपादनीयम् । तथा च परामर्शसत्त्वे प्रत्यक्षोत्पत्तिकालेऽनुमित्यनुत्पादः प्रत्यक्षादुपपादनीयः उक्तानुमितिप्रतिबन्धकत्वस्य प्रत्यक्षोत्पत्तिमन्तरेणानिर्वाहात् प्रत्यक्षोत्पत्तिरपि अनुमित्यनुत्पादमपेक्षते, तदुत्पादे अनुमित्यव्यवहितप्राक्क्षणावच्छिन्नस्य प्रत्यक्षप्रतिबन्धकस्यावश्य सत्त्वादित्यन्योन्याश्रय इति भाव ।

अत्रैव कल्पे अन्यथा दूषणमुपन्यस्यति स्थाणुत्वाभावेति ।

इत्थोक्तदोषस्याप्येतदनुमततया चकारसङ्गतिः (२) यत्र विशेषदर्शनानन्तरक्षणजातप्रतियोग्यारोपात् स्थाणुत्वाभावप्रत्यक्षं तत्रेत्यादि । तदभावानुमित्यापत्ते । स्थाणुत्वाभावानुमित्यापत्ते । तथा चानुमित्यन्यासिद्धिनाममप्रमाचस्य कार्यकालवृत्तितया पृथगेव कारणत्वमावश्यकमिति भाव ।

न च प्रतियोग्यारोपस्याभावप्रत्यक्षकारणतामते यत्र विशेषदर्शनकाले तत्पूर्वं वा प्रतियोग्यारोपस्तत्रैव विशेषदर्शनाधीनमभावप्रत्यक्षं न तु विशेषदर्शनोत्तरप्रतियोग्यारोपानन्तरमिति वाच्यम् । प्रतियोग्यारोपस्याहेतुतामते विशेषदर्शनपर्यन्तं प्रतियोग्यारोपानुत्पादस्थले विशेषदर्शनोत्तरमभावप्रत्यक्षोपगमस्या फलसाम्याय तद्धेतुतामतेऽपि क्षणैकव्याजनाभावप्रत्यक्षस्वीकारस्याऽऽवश्यकत्वायातात् ।

न च विशेषदर्शनानन्तरमाहार्य एव प्रतियोग्यारोपो भविष्यति तत्सामग्र्यामिच्छाघटिताया बलवत्त्वादुक्तस्थलेऽनुमित्यापत्तिरिति वाच्यम् । धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहिविशेषदर्शनोत्तरमिच्छां विनैव प्रतियोग्यारोपसम्भवात्(३) । प्रतियो

(१) "सामग्र्या" मिति पाठोऽन्यस्मिन् पुस्तके नास्ति ।

(२) दीधितौ "इत्यपि" इत्यत्र "इति च" इति पाठः क्वचित् पुस्तके स्यादिति भाति ।

(३) "न च प्रतियोग्यारोपस्ये" इत्यादिः "प्रतियोग्यारोपसम्भवा" दित्यन्तः पाठस्तु सर्वस्मिन् पुस्तके न दृश्यते ।

ग्यारोपकारणतायाः स्वासम्मततया "केचिदिति" (१)।

(दी०) वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेकशालित्वान्नियमेन प्रथमोपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरपि अत्रैवान्तर्भावप्रसङ्गात्, न चानुमित्साविरहस्य प्रत्येकविशेषणत्वे गौरवं शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जायतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषयकेच्छाविरहस्य, प्रत्यक्षसामग्रीसत्त्वे च तादृशेच्छायामप्यनुमित्यनुत्पादात् साधकमाने अनुमितित्वादिप्रकारकेच्छाविरहस्य पृथगेव विशेषणतायास्त्वयाऽपि वाच्यत्वात् ।

(गा०) ननु पक्षतावटकप्रत्यक्षसामग्री नानुमितिसामग्र्यभावघटितकारणसमुदायरूपा, अपि तु तदतिरिक्ता प्रत्यक्षासाधारणकारणसमुदायरूपैव वाच्या, अनुमित्साविशिष्टसमानविषयकानुमितिसामग्रीदशायां सिषाधयिषारूपोत्तेजकबलादेवानुमित्युपपत्तेः। एवं प्रत्यक्षं प्रत्यनुमितिसामग्रीप्रतिबन्धकतायामपि निरुक्तपक्षता न निवेश्यते, अपि तु लाघवादनुमित्सावैशिष्ट्यमेव, असत्यामनुमित्सायां समानविषये प्रत्यक्षोत्पत्तेरावश्यकत्वात्तत्सत्त्वे च पक्षताया अपि आवश्यकत्वात् । तथा च न प्रथमोक्तान्योन्याश्रयावकाशः, एवं सामग्र्याः कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेन प्रतिबन्धकत्वेऽपि समानविषयकप्रत्यक्षं प्रति प्रतिबन्धकतायामनुमित्सावैशिष्ट्यं निवेश्यते। तथा चोक्तस्थले प्रत्यक्षोत्पत्तिर्नानुमित्यनुत्पादमुपजीवति अनुमित्युत्पादेऽप्यनुमित्साविरहेण प्रत्यक्षप्रतिबन्धकासत्त्वात् अपि तु अनुमित्साविरहमेवेति नापरोऽप्यन्योन्याश्रयः। अन्यथा सामग्र्याः पक्षतायामनन्तर्भावेऽपि पृथक् प्रतिबन्धकताया आवश्यकत्वेनानिस्तारादित्यत आह। वस्तुतस्त्विति।

स्वतन्त्रान्वयव्यतिरेकशालित्वं सिद्धित्वादिरूपप्रत्येकवृत्तिधर्मावच्छेदेन कार्यानुत्पादे प्रत्यन्वयव्यतिरेकानुविधायित्वम्।

ननु अन्यतरत्वेन प्रतिबन्धकत्वेऽपि तन्नियतसिद्धित्वाद्यवच्छि-

(१) दीधितौ "कश्चित्," इत्यस्य स्थाने केचिदित्येव पाठो भट्टाचार्यसम्मत इत्यतः केचिदितीत्युक्तम्।

ऽस्य कार्यानुत्पादान्वयनियतत्वं तदवच्छिन्नव्यतिरेकस्य च कारणान्तरपरामर्शादिसहितस्य कार्योत्पादानियतत्वं सम्भवति इति न तावता सिद्धित्यादिना प्रतिबन्धकतासिद्धिरित्यतो हेत्वन्तरमाह। नियमेनेति। प्रथमोपस्थितत्वात्। प्रत्येकरूपावच्छिन्नस्य तदवच्छिन्नान्यतरत्वापेक्षया प्रथममुपस्थितत्वात्। उपस्थितिलाघवमुक्त्वा शरीरलाघवमाह। लाघवादिति। उक्तरूपद्वयमपेक्ष्य तदुभयघटितस्याधिकभेदादिघटितत्वया गुरुत्वादिति भावः। प्रत्येकम्। सिद्धित्वादिना। तथात्वम्। प्रतिबन्धकत्वम्। अन्यथा। प्रतिबन्धकत्वैक्यानुरोधेन नानाधर्मावच्छिन्नानां तत्तदवच्छिन्नभिन्नभिन्नत्वेन प्रतिबन्धकत्वे। बाधादेरित्यादिना सत्प्रतिपक्षादिपरिग्रहः। (१) अत्रैव। पक्षतायामेव। अन्तर्भावप्रसङ्गात्। घटकताप्रसङ्गात्। सिद्धिबाधसामग्रीविशेषाद्यन्यतमत्वावच्छिन्नाभावस्य पक्षतात्वप्रसङ्गादिति समुदायार्थः। अन्यथा बाधबुद्ध्याद्यभावस्य कारणतान्तरकल्पनापत्तेरिति भावः।

न च वह्न्यादिनिश्चयाप्रतिबन्ध्यायामपि वह्निमान् पर्वतो घटवानित्याद्यनुमितौ वह्न्यभावादिनिश्चयस्य प्रतिबन्धकतया वह्न्यादिप्रकारताघटितरूपावच्छिन्नं प्रति वह्न्यभावादिनिश्चयस्य प्रतिबन्धकतान्तरकल्पनमावश्यकमिति कथं साध्यतदभावादिनिश्चयानामेकरूपेण प्रतिबन्धकताप्रसक्तिरिति वाच्यम्। वह्न्यादिप्रकारकानुमितौ वह्न्यभावादिनिश्चयस्य पृथक् प्रतिबन्धकत्वेऽपि वह्निमान् पर्वतो घटवान् इत्याद्यनुमितिहेतुपक्षतायामाश्रयासिद्ध्यादिनिश्चयान्तर्भावेणैव तादृशनिश्चयदशायां तथाविधानुमितिवारणसम्भवात्, अवच्छेदकगौरवस्य तावतैवाप्रयोजकीकृतत्वात्।

न च तथाऽपि बाधकाले प्रत्यक्षादेरप्यनुत्पत्त्या विशिष्टबुद्धिसामान्यं प्रति बाधबुद्धेः प्रतिबन्धकतान्तरकल्पनमावश्यकमिति पक्षतायां तदन्तर्भावो निरर्थक इति वाच्यम्। तत्रापि भिन्नविषयकानुमितिसामग्र्यादीनामवश्यकल्पनीयप्रतिबन्धकतायां बाधसाधारणान्यतरत्वादेरवच्छेदकत्वेनैवोपपत्तेर्बाधबुद्धेः सामान्यप्रतिबन्धकत्वासिद्धेः, प्रत्यक्षस्थले इच्छानामुत्तेजकत्वेनापि तदसिद्धेः।

(१) स प्रतिपक्षादिपरिग्रह इत्यपि क्वाचित्कः पाठः।

केचित्तु । अत्रैव । ईदृशप्रतिबन्धकतायामेव । प्रतिबन्धकान्तरसाधारण्यान्यतरत्वावच्छिन्नप्रतिबन्धकतायामेवेति यावत् । अन्तर्भावप्रसङ्गात् । अवच्छेदकघटकताप्रसङ्गात् । तदभावव्याप्यवत्ताज्ञानादिसाधारणान्यतरत्वेनैव बाधादेः प्रतिबन्धकताप्रसङ्गादिति समुदायार्थः । तथा च पक्षतायां बाधान्तर्भावपरत्वाभावान्नोक्तासङ्गतिरिति व्याचक्षुः ।

केचित्तु तदभावनिश्चयदशायां बाधशङ्काविशेषधर्मितावच्छेदकतायनुमितः कारणान्तरविरहादेव नियमतोऽनुत्पादस्तत्साध्यकस्थलाभिप्रायकोऽयं ग्रन्थ इत्याहु ।

ननु सिद्धिसामग्रीविशेषयोरुभयोरेवानुमित्सायाः उत्तेजकतया तयोरनुगतरूपेण प्रतिबन्धकत्वे अनुमित्साविरहस्यान्यतरत्वावच्छिन्ने सकृद्विशेषणतया लाघवम्, अनुमित्साविरहविशिष्टसिद्धिसामग्रयन्यतरत्वापेक्षया तद्विशिष्टसिद्धित्वतद्विशिष्टसामग्रीत्वयोरेकस्यापि विशेषणस्य द्विधा निवेशेन गौरवात्, अन्यतरत्वघटकांशापेक्षया सिषाधयिषाविरहांशस्य गुरुतायाः स्फुटत्वात् । अत एव बाधाद्यन्तर्भावप्रतिबन्धेरपि नावकाशः । बाधसिद्धितद्विशेषसामग्र्यन्यतमत्वेन प्रतिबन्धकत्वे अनुगतरूपावच्छिन्नांशे सिषाधयिषाविरहविशेषणतायां सिद्ध्यादिकाल इव बाधकालेऽपि अनुमित्साबलादनुमित्यापत्तेः, सिद्धित्वाद्यवच्छिन्न एव पृथक् तद्विशेषणतया उक्तलाघवानवकाशात् । विशिष्टबुद्धिसामान्ये बाधतदभावव्याप्यवत्ताज्ञानादीनामेकरूपेण प्रतिबन्धकत्वे उक्तदिशा लाघवासम्भवेनावच्छेदकगौरवस्य दुष्परिहरत्वात् ।

न च प्रत्यक्षस्थले बाधबुद्धौ तदभावव्याप्यवत्ताबुद्धौ च इच्छाया उत्तेजकतया तत्रानुगतरूपेण तयोः प्रतिबन्धकत्वे इच्छाविरहस्य सकृद्विशेषणतया लाघवमक्षुण्णमेवेति वाच्यम् । बाधादौ प्रत्यक्षेच्छाया उत्तेजकत्वे नानाप्रतिबन्धकताप्रसङ्गेन तदनभ्युपगमात्, अनाहार्यत्वस्य प्रतिबध्यतावच्छेदकत्वमङ्गीकृत्यैव बाधादिसमये आहार्यप्रत्यक्षस्योपपादनीयत्वादित्याशङ्कां निरस्यति । न चेत्यादिना । गौरवमित्यन्तेनाशङ्का । अनुमितेरुत्पादादिति । प्रत्यक्षसामग्रयसत्त्वेऽनुमित्युत्पत्त्यैव तादृशेच्छाविषयासिद्धेरिति भाव. । अनुमितिविषयकेच्छाविरहस्य । अनुमितित्वाप्रकारकतादृशेच्छा-

साधारणानुगतरूपावच्छिन्नविरहस्य । तादृशञ्च रूपं प्रागेवावेदितम् । अनुमित्यनुत्पादादिति । प्रत्यक्षोत्पत्त्या तादृशेच्छाविषयसिद्धेरिति भावः । अनुमितित्वादिप्रकारकेच्छाविरहस्य । अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छाविरहस्य । पृथगेव । यथायोग सिद्धित्वप्रत्यक्षसामग्रीत्वाद्यवच्छिन्न एव ।

(दी०) स्वनिवर्त्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिना च तादृशेच्छयोरननुगमेऽतीव गौरवम्, अन्यतरत्वघटकयोरन्योन्याभावयोर्मिथोविशेषणविशेष्यभावे विनिगमकाभावश्च । आत्मनिष्ठश्च समवायेन सिद्धेरभावः कारणम्, भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारणरूपायास्तत्सामग्र्याः, मणिविशिष्टस्य वह्नेरिव इतरविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वायोगात् । तथा च कथमनुगतरूपेण तयोरभावः कारणम् ।

(गा०) ननु अनुमितित्वादिप्रकारकेच्छातदप्रकारकेच्छानामनुगतरूपावच्छिन्नाभाव एवान्यतरत्वावच्छिन्ने विशेषणं वाच्यम्, प्रत्यक्षादिसामग्रीदशायामुक्तेच्छाबलादनुमितेर्वारणाय चानुमितिभिन्नालौकिकप्रत्यक्षान्यस्वविषयतावच्छेदकावच्छिन्नसामग्रीसमवहितान्यत्वेनेच्छा विशेषणीया । अनुमितिसामग्र्या, उपनीतभानसामग्र्या च समवहितायां इच्छायाः सङ्ग्रहाय भेदद्वयमवच्छिन्नान्तविशेषणम् । अनुमितित्वादिप्रकारिकायाः प्रत्यक्षादिसामग्रीसमवहितेच्छायाः संग्रहायावच्छिन्नान्तम् , एवञ्चोक्तलाघवमक्षुण्णमेवेत्यत आह । स्वनिवर्त्तकेति ।

निवर्त्तकत्वं विषयतया बोध्यम् । अतीव गौरवमिति । अतिगुरुशरीरतादृशेच्छाविशेषणस्याधिकस्य निवेशादिति भावः ।

नन्वेवमपि प्रतिबन्धकतैक्यनिबन्धनं लाघवं दुर्वारमेव, प्रतिबन्धकत्वान्तराकल्पने एकत्रावच्छेदकगौरवस्याकिञ्चित्करत्वात् । अनेकत्र पक्षताहेतुतायाम् एकैकविधवह्न्यभावादिनिश्चयानामन्तर्भावेऽनन्तस्थले अवच्छेदकगौरवात् स्वातन्त्र्येण एकैकप्रतिबन्धकताकल्पनस्योचिततया बाधादेः पक्षतान्तर्भावप्रतिबन्ध्यनवकाशात् । प्रतिबन्धेरनुत्तरत्वाद्वेत्याशयेनान्यतरत्वेन प्रतिबन्धकत्वमतेऽपि

विनिगमनाविरहेण प्रतिबन्धताद्वयमापादयति । अन्यतरत्वेति । अन्योन्याभावयोः । सिद्धिभेदसामग्रीभेदयोः । तथा च सिद्धिभेद-विशिष्टसामग्रीभेदावच्छिन्नभेदः सामग्रीभेदविशिष्टसिद्धिभेदाव-च्छिन्नभेदश्च विनिगमनाविरहात् प्रतिबन्धकतावच्छेदक इत्यवच्छे-दकभेदात् प्रतिबन्धकताभेद आवश्यकः ।

न च तादृशभेदयोः समनियतयोरभेदान्नावच्छेदकभेद इति वा-च्यम् । तादृशभेदाभेदेऽपि तस्य सिद्धिभेदविशिष्टसामग्रीभेदाव-च्छिन्नभेदत्वेन सामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदत्वेन च वि-निगमनाविरहेणावच्छेदकतायाः स्वीकरणीयतया विशिष्टस्यावच्छे-दकस्यावश्यं भेदात् ।

न चाखण्डस्य तस्य स्वरूपत एवावच्छेदकतासम्भवादुक्तवि-शेषणपुरस्कारेण नावच्छेदकत्वमिति कथं विनिगमनाविरह इति वाच्यम् । अभावस्याखण्डत्वेऽपि स्वरूपतोऽवच्छेदकतायाः सिद्धा-न्तविरुद्धत्वात्, यस्य स्वरूपतो भानं तस्यैव तथाऽवच्छेदकतायाः सिद्धान्तसिद्धत्वात्, विशेषणपुरस्कारेणोपस्थितेऽवच्छेदकत्वग्र-हस्य विशेषणावच्छिन्ने अवच्छेदकतावगाहित्वनियमात्, स्वरूपतो (१)ऽभासमाने स्वरूपतोऽवच्छेदकत्वस्य प्रमाणेनास्पर्शाच्च ।

न च तद्व्यक्तित्वेनैव भेदस्यावच्छेदकत्वं स्वीकरणीयं न तु स्व-रूपतः, तथा च नोपदर्शितविनिगमनाविरहावकाश इति वाच्यम् । भेदनिष्ठतद्व्यक्तित्वस्य भेदस्वरूपातिरिक्तस्य दुर्वचत्वात्, भेदरूपस्य च तस्य स्वरूपतो विशेषणत्वासम्भवात् ।

एतेनाखण्डस्यान्यतरत्वावच्छिन्नाभावस्य तद्व्यक्तित्वेनैव हेतु-त्वमित्यपि परास्तम् ।

यत्तु सिद्धिभेदसामग्रीभेदयोः सामानाधिकरण्येन मिथो वि-शेष्यविशेषणभावापन्नयोर्न भेदप्रतियोगितावच्छेदकत्वं येन विनि-गमनाविरहः स्यात्, अपि तु धर्मिविशेषणतापन्नयोरेव व्यासज्य-वृत्त्यवच्छेदकत्वं तथाविधयोरप्यवच्छेदकतापर्याप्तेर्महानसीयवह्नि-र्नास्तीति प्रतीत्याऽवगाहनादिति, तदपि न । महानसीयवह्निर्नास्ती-त्यादिबुद्धौ वह्नित्वाद्येकधर्मितावच्छेदकावच्छिन्न एव महानसीय-त्वादिपरविशेषणभाननियम इत्येकत्रानेकेषामवच्छेदकत्वे प्रा‍ह्ये ध-

---

(१) किञ्चिद्रूपेण भासमान इत्यपि पुस्तकान्तरे पाठः ।

मितावच्छेदकावच्छिन्नविशेषणतापन्नस्यैवावच्छेदकत्वग्रहो न तु धर्मितावच्छेदकावच्छिन्नविशेषणतानापन्नस्यावच्छेदकताग्रह इति नियमेन प्रकृते कस्य धर्मितावच्छेदकतापन्नस्य कस्य वा सद्वच्छिन्नविशेषणतापन्नस्यावच्छेदकत्वमित्यत्र विनिगमनाविरहेणावच्छेदकताभेदस्याऽऽवश्यकत्वादवच्छेदकविषयतावैलक्षण्यस्यावच्छेदकतावैलक्षण्यनियतत्वादित्यन्यत्र विस्तरः। अन्यतरत्वेन उभयोरनुगमेऽपि प्रतियोगितावच्छेदकसम्बन्धाननुगमान्न तयोरेकाभावस्य कारणतासम्भव इत्याह। आत्मनिष्ठेति। समवायसम्बन्धावच्छिन्नप्रतियोगिताकःसिद्ध्यभाव आत्मप्रत्यासन्नतया कारणम्, प्रत्यक्षासाधारणकारणचक्षुःसंयोगादिरूपसामग्र्यास्तु स्वाश्रयसंयुक्तमनःसंयोगादिरूपपरम्परात्मकभिन्नभिन्नसम्बन्धावच्छिन्नाभाव आत्मप्रत्यासन्नतया कारणं वाच्यमित्यर्थः। विषयचक्षुःसंयोगादेः समवायेनाभावस्य सर्वदैवात्मनि सत्त्वात्। तादृशाभावकारणताया अतिप्रसङ्गावारकत्वादिति(१) भावः।

ननु विषयचक्षुःसंयोगादेर्न प्रतिबन्धकत्वं स्वीक्रियते येन सम्बन्धाननुगमः स्यात्, किन्तु चक्षुःसंयोगादिविशिष्टस्य मनोयोगस्यैव समवायेन प्रतिबन्धकत्वं वाच्यमित्यत आह। मणीति। वह्नेरित्यनन्तरं प्रकृते इति, पूरणीयम्। प्रतिबन्धकत्वायोगादिति। मनोयोगस्यानुमितावपि हेतुत्वात् कारणस्य प्रतिबन्धकत्वायोगादिति भावः।

यद्यपि कारणस्यापि रूपान्तरेण प्रतिबन्धकत्वे क्षतिविरहः, दाहप्रतिबन्धकत्वे वह्नेः प्रयोजनविरहादेवानिवेशः, प्रकृते तु सम्बन्धैक्यानुरोधादेव मनोयोगादेरनुप्रवेश इत्यकिञ्चित्करमेतत्, तथाऽपि मनोयोगस्याधिकस्य निवेशनीयतया गौरवमेव बाधकं बोध्यम्।

न च सामग्र्याः स्वतन्त्रप्रतिबन्धकतामतेऽप्यात्मनिष्ठतासम्पत्तये चक्षुःसंयोगादेः सम्बन्धतया मनोयोगादिप्रवेशस्याऽऽवश्यकत्वान्नाधिक्यमेतन्मतेऽपि, कालनिष्ठतया सामग्र्यभावहेतुत्वे तत्तत्पुरुषीयत्वनिवेशस्यावश्यकतया गौरवादिति वाच्यम्। तथाऽपि मनोयोगादिसम्बन्धस्याधिकस्य निवेशनीयतया गौरवस्य दुर्वारत्वात्, विषयभेदेन प्रतिबन्धकताभेदाविरहानुरोधेन विषयप्रत्या-

(१) अतिप्रसङ्गबोधकत्वादित्यपि पुस्तकान्तरे पाठः।

सत्तया चक्षुःसंयोगादिप्रतिबन्धकतापक्षस्यैव स्वतन्त्रसामग्रीप्रतिबन्धकतावादिभिराश्रयणीयतया तत्र मनोयोगादेर्निवेशाभावाच्च । तथा चेति । एवं रीत्या प्रतिबन्धकतावच्छेदकसम्बन्धभेदस्याऽऽवश्यकत्वे च इत्यर्थः ।

(दी०) एवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वं प्रत्यक्षादिकारणचक्षुःसंयोगादेस्तन्यादृशामिति सामग्रीविशेषाभावस्य हेतुत्वेऽपि लाघवात् सिद्ध्यभाव एव पक्षव्यवहारनिमित्तम् , एतदेवाभिसन्धाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति ।

(गा०) पूर्वं प्रतियोगितावच्छेदकभेदेन सिद्धिसामग्रीविशेषणयोः सिषाधयिषाविरहपदार्थयोर्भेदात्तद्विशेषणप्रवेशसार्थक्यं व्यवस्थापितं इदानीं सम्बन्धभेदेन तद्विशेषणतामेवं व्यवस्थापयति । एककालेति । एकक्षणावच्छिन्नमेकात्मसमवेतत्वमित्यर्थः ।

यद्यपि सम्बन्धमध्ये एकक्षणावच्छिन्नत्वानन्तर्भावेऽपि सिषाधयिषाकाले तद्विरहरूपविशेषणाभावाद्विशिष्टाभावोऽक्षत एव ।

न च तत्र कालानन्तर्भावे सिषाधयिषाकालेऽपि सिद्धौ कालान्तरावच्छिन्नतद्विरहवत्यात्मनि वृत्तित्वरूपवैशिष्ट्यं वर्त्तते, अन्यात्मनि घटादौ च तादृशविशेषणञ्चेति विशिष्टसिद्धिसत्त्वमव्याहतमिति कथं विशिष्टाभावेन वर्त्तितव्यं कालान्तर्भावे तु तादृशकालाभावान्न तदानीं तद्घटितवैशिष्ट्यमिति विशिष्टाभावोऽक्षत इति वाच्यम् । सिषाधयिषाकालस्य तदधिकरणनिष्ठतदभावाधिकरणतानवच्छेदकतया तादृशाधिकरणताघटितसामानाधिकरण्यरूपतदिच्छासमानाधिकरणसिद्धिनिष्ठवैशिष्ट्येऽप्यनवच्छेदकत्वात् तत्तत्कालावच्छेदेन सिद्धिमत्यपि तदिच्छाधिकरणे इच्छाविरहविशिष्टसिद्धिसत्त्वानुपपत्तेः । अन्यथा स्वाधिकरणकालावच्छिन्नत्वस्य स्वाधिकरणवृत्तिताविशेषणत्वेऽपि तत्कालस्याप्यन्याधिकरणावच्छिन्नस्वाधिकरणतया कालविरहप्रयुक्तवैशिष्ट्यविरहस्यानिर्वाहात् । विशेष्यीभूततत्सिद्ध्यधिकरणावच्छिन्नस्वाधिकरणकालत्वेन कालस्य सम्बन्धघटकत्वे चाननुगमादिति । तथापि विभिन्नकाले विशे-

पणविशेष्ययोः सामानाधिकरण्यसत्त्वेऽपि एकक्षणावच्छेदेन सामानाधिकरण्यस्यैव विशिष्टसत्त्वनिर्वाहकत्वमित्येतत्सूचनायैव एककालावच्छिन्नत्वकथनम् ।

केचित्तु कालस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वघटकसम्बन्धाघटकत्वे तदुपलक्षिताभावात्तद्विशिष्टाभाववैलक्षण्यानिर्वाहः, प्रतियोगितावच्छेदकवैलक्षण्यात् सर्वदा दण्डरहितपुरुषाधिकरणक्षणे दण्डोपलक्षितपुरुषाभावस्य सत्त्वेन पुरुषत्वादिमात्रस्य तत्प्रतियोगितावच्छेदकत्वासम्भवात् तादृशपुरुषान्तरव्यावर्त्तकानुगतधर्मान्तरविरहेण, सत्त्वे वा प्रतियोगिकोटौ तस्याभानेन, प्रतियोगितावच्छेदके तदन्तर्भावासम्भवादित्याहुः । तच्चिन्त्यम् ।

अन्यादृशामिति । स्वाश्रयीभूतात्मन्युक्तपरम्परासम्बन्धेन सम्बद्धत्वरूपमित्यर्थः ।

ननु पक्षताशरीरे प्रत्यक्षादिसामग्र्यनन्तर्भावे तदभावस्यानुमितौ स्वतन्त्रहेतुताकल्पनमावश्यकं, तथा च तस्यैव पक्षपदप्रवृत्तिनिमित्तता स्वीक्रियतां न तु सिद्ध्यभावस्य, तथा च पक्षपदप्रवृत्तिनिमित्तामिदमिति मूलविरोध इत्यत आह । सामग्रीति । हेतुत्वेऽपि । अनुमित्यसाधारणकारणत्वेऽपि । लाघवात् । लघुशरीरत्वात् ।

(दी०) फलानुपहितसिद्धीच्छाविरहविशिष्टसिद्ध्यभावापेक्षया बाधाभावस्य लघुत्वेऽपि सिद्धसाधनस्थले पक्षव्यवहारविरहेण तादृशसिद्ध्यभावस्याऽऽवश्यकत्वे बाधाभावो न निविशते गौरवात् । विशिष्टसिद्ध्यभावस्य चाऽऽत्मनिष्ठस्यैवानुमितिहेतुत्वेऽपि तस्य परम्परासम्बन्धादेव पर्वतादौ पक्षव्यवहार इति ध्येयम् ।

(गा०) ननु लाघवस्य पक्षपदप्रवृत्तिनिमित्तत्वोपष्टम्भकत्वे बाधाभावस्यैव तथात्वमुचितं तत्र सिषाधयिषाविरहाप्रवेशात्, यदि च सिद्धसाधनस्थले पक्षव्यवहारो नास्तीति सिद्ध्यभावस्य तथात्वमुच्यते, तदा बाधदशायामपि तद्विरहात् सोऽपि निविशतामित्यत आह । फलानुपहितेति । स्वविषयसिद्ध्यनुपहितेत्यर्थः । एतच्चाति·

गौरवसूचनाय । सिद्धसाधनस्थल । साध्यनिश्चयदशायाम् । पक्षव्यवहारविरहेण । पक्षव्यवहारविरहस्य सर्ववादिसिद्धत्वेन(१) । गौरवादिति । याश्रस्थले पक्षव्यवहारस्य सविवादतया गौरवसहिष्णुताया अन्याय्यत्वादिति भावः ।

ननु समवायसम्बन्धावच्छिन्नसिद्ध्यभावस्यात्मप्रत्यासन्नतयैवानुमितिहेतुतया तस्य पक्षपदप्रवृत्तिनिमित्तत्वे आत्मन्येव पक्षव्यवहारप्रसङ्ग इत्यत आह । विशिष्टेति । सिषाधयिषाविरहविशिष्टेत्यर्थः । एतदभिधानञ्च सिद्धेः पक्षनिष्ठाया उद्देश्यतासम्बन्धेनानुमितिं प्रति प्रतिबन्धकत्वासम्भवप्रदर्शनाय, पर्वते वह्निमनुमिनुयां महानसे वह्निमनुमिनुयामित्याकारिकाणामनुमित्सानामेकशोत्तेजकत्वेऽतिप्रसङ्गेन पृथगवोत्तेजकतया पक्षभेदेन कारणताभेदस्याऽऽवश्यकतया आत्मनिष्ठप्रत्यासत्तेरेवोचितत्वात् । अन्यथा पुरुषविशेषाणामन्तर्भावनीयतापत्त्या गौरवात् समानप्रकारिकाया असमानविशेष्यकसिद्धेरनुमितिप्रतिबन्धकतयाऽपि पक्षनिष्ठप्रत्यासत्त्यसम्भवो बोध्यः (२) । परम्परासम्बन्धादिति । स्वप्रतियोगितावच्छेदककोटिप्रविष्टविशेष्यतावच्छेदकत्वरूपादित्यादिः ।

न च सिद्धिकालेऽपि एतादृशसम्बन्धेन पक्षे सिद्ध्यभावो वर्त्ततेऽत्यन्ताभावस्य नित्यत्वादित्यतिप्रसङ्ग इति वाच्यम् । तत्तदात्मवृत्तित्वविशिष्टस्यैव सिद्ध्यभावस्य तादृशसम्बन्धेन तत्पुरुषं प्रति पक्षव्यवहारनियामकत्वात् ।

(दी०) एकस्य पुंसोऽनुमित्सासत्त्वेऽपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसामग्रीसत्त्वेऽनुमित्यनुत्पादात् तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्साविरहकालीनतत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरुपेतव्य इति वदन्ति ।

(गा०) ननु विषयचक्षुःसंयोगादिरूपायाः प्रत्यक्षसामग्र्या आत्मनिष्ठप्रत्यासत्त्या न प्रतिबन्धकतासम्भव उक्तपरम्परया अति-

(१) पक्षव्यवहारस्य सर्ववादिसिद्धत्वेनेत्यपि पुस्तकान्तरे पाठः ।

(२) सामानाधिकरण्येनानुमितौ धर्म्यन्तरविशेष्यकसिद्धेरपि प्रतिबन्धकत्वादिति भावः ।

प्रसक्तत्वात् सम्बन्धत्वे मानाभावाच्च, तथा च यदा तादृशसामग्री तदुत्तरक्षणे नानुमितिरिति कालिकप्रत्यासत्त्यैव प्रतिबन्धकत्वं कल्पनीयम्, तथा च पुरुषान्तरीयप्रत्यक्षसामग्र्यापि पुरुषान्तरीयानुमितिप्रतिबन्धः स्यात्, एवं कालिकसम्बन्धावच्छिन्नानुमित्साविरहस्यैव दैशिकसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन सामग्र्यां विशेषणत्वं स्वीकार्यम्, तथा च पुरुषान्तरीयानुमित्साकालीनाया अपि पुरुषान्तरीयप्रत्यक्षसामग्र्यास्तदीयानुमित्यप्रतिबन्धकत्वापत्तिरित्याशङ्कां चक्षुःसंयोगादौ तत्पुरुषीयत्वमन्तर्भाव्य निराकरोति । एकस्येति ।

अनुमित्यनुत्पादादित्यन्तमुपलक्षणम्, अन्यस्य प्रत्यक्षसामग्रीसत्वेऽन्यस्य तद्विरहिणोऽनुमित्युत्पादाच्चेत्यपि द्रष्टव्यम् (१) । तत्पुरुषीयानुमित्सायाः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसम्बन्धेनाधिकरणं यः कालस्तत्र कालिकसम्बन्धेन वर्त्तमानत्वं कालीनान्तार्थः सामग्रीविशेषणम् ।

अथ वा समवायसम्बन्धावच्छिन्नप्रतियोगिताकतदात्मवृत्तित्वविशिष्टाभावावच्छेदकक्षणे कालिकसम्बन्धेन वृत्तित्वमेव तदर्थः । तत्र तत्पुरुषीयानुमित्साक्षणस्यापि अन्यदेशावच्छेदेन दैशिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नतदिच्छाभाववत्त्वेऽपि न क्षतिः । तत्पुरुषीयसिद्धिसामग्रीविशेषविरहेति । कालिकसम्बन्धावच्छिन्नप्रतियोगिताकः पक्षनिष्ठतदीयेन्द्रियसन्निकर्षादिविशिष्टसाध्यनिष्ठतदीयेन्द्रियसन्निकर्षादिविरह इत्यर्थः । वैशिष्ट्यमेककालीनत्वमेव । विशेष्यविशेषणभावे विनिगमनाविरहान्नानाकारणताकल्पनमगत्या न दोषाय । यावत्त्वेन तदसाधारणकारणसमुदायस्य प्रतिबन्धकत्वं पुनरनुपादेयमेव यावत्त्वस्य दुर्वचत्वात् । पर्वतो वह्निमानित्याद्यनुमितिसमानविषयचाक्षुषादिसामग्र्याः प्रतिबन्धकतायां रूपादिकं नान्तर्भावनीयं तत्र साध्यपक्षयो रूपादिमत्त्वानियमेन तन्निवेशे प्रयोजनाभावात्, किन्तु पर्वतो द्रव्यवान्, द्रव्यं वह्निमत्, द्रव्यं द्रव्यवदित्याद्यनुमितौ वाय्वादीन्द्रियसन्निकर्षस्यावि-

(१) "अन्यथा प्रत्यक्षसामग्रीसत्त्वे अन्यस्य तद्विरहेणानुमित्युत्पादाच्चेत्यपि द्रष्टव्य"मिति पुस्तकान्तरे पाठः ।

रोधितोपपत्तये यथायोग्यं साध्यपक्षादौ रूपादिसत्त्वं निवेशनीयम् ।

अथ प्रतिबन्धकसामग्रीमत्यपि काले तदनधिकरणदेशावच्छेदेन तदभावस्य सौलभ्यादनुमित्यापत्तिः ? न च प्रतिबन्धकसत्तायाः कार्यानुत्पादप्रयोजकत्वात् तत्सत्त्वे कथं कार्योत्पत्ति(१)रिति वाच्यम् । सामग्र्याः कार्योत्पत्तिप्रयोजिकायाः प्रतिबन्धकसत्त्वेऽपि तदभावसत्त्वेनाक्षतत्वे कार्योत्पत्तदुर्वारत्वादिति चेन्न । यादृशकारणताघटकनियमे देशान्तरावच्छेदेन कार्यसमानाधिकरणकारणाभावव्यावर्त्तकं देशभेदानवच्छिन्नत्वमन्यद्वा विशेषणमभावे निविशते यथा समवायादिसम्बन्धावच्छिन्नसंयोगज्ञानादिनिष्ठकारणताघटकनियमे तदन्यकारणतावच्छेदकावच्छिन्नस्य देशभेदानवच्छिन्नवृत्तिरेवाधिकरणे कार्योत्पत्तिप्रयोजिका उक्तप्रतिबन्धकाभावस्य च कारणता न तादृशी, किञ्चिदवच्छेदेन तत्प्रतिबन्धकसत्त्व एव तत्र कार्यानुत्पत्त्या तादृशाभावे विशेषणप्रवेशे प्रयोजनाभावात्, तथा च देशभेदावच्छिन्नप्रतिबन्धकाभावबलान्नानुमित्यापत्तिः ।

एतेनात्मनि शरीरविशेषावच्छेदेन सिद्ध्यादिरूपप्रतिबन्धकसत्त्वे घटाद्यवच्छिन्नतदभावबलादनुमित्यापत्तिरपि निरस्ता ।

न च सिद्ध्यादिमत्यात्मनि तत्काले घटाद्यवच्छिन्ना या तदभाववृत्तिस्तत्तदन्यदेशभेदानवच्छिन्नतद्वृत्तेरप्रामाणिकतया सिद्ध्यासत्त्वेऽप्यनुमित्यनुपपत्तिरिति वाच्यम् । तादृशवृत्त्यनभ्युपगमे सिद्ध्यासत्त्वदशायां तदभावस्यात्मनि दैशिकाव्याप्यवृत्तितायाः सर्वानुभवसिद्धाया अनुपपत्तेः ।

यदि च कायव्यूहस्थले एकत्रात्मनि शरीरान्तरावच्छेदेन सिद्ध्यभावाधभावस्य, सिद्ध्यादेः सत्त्वेऽपि अन्यशरीरावच्छेदेनानुमित्यादुयुत्पत्तिः प्रामाणिकी तदा सिद्ध्याद्यभावनिष्ठकारणताघटकनियमशरीरेऽभावांशे उक्तविशेषणप्रवेशस्याऽऽवश्यकत्वात् घटाद्यवच्छिन्नसिद्ध्यभावबलात् सिद्ध्यादिदशायामनुमित्यापत्तेर्वारणाय गत्यन्तरमेवानुसरणीयमिति दिक् ।

(दी०) अथ सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरस्तु ? न चैवं मण्यादिस्थलीयदाहं प्रति उत्तेजकस्य हेतुत्वापत्तिः, उत्ते-

---

(१) कार्योत्पत्तिरित्यपि पुस्तकान्तरे पाठः ।

जकानामननुगतत्वात्, तावद्भावविशिष्टमण्याद्यभावस्य चानुगतत्वादिति चेत् ? इहापि दर्शितोऽननुगमः सिपाधयिषायाः।

(गा०) उत्तेजकत्वा(१) भिमतसिषाधयिषाकारणतां स्वीकृत्य सिद्ध्यभावस्य कारणतामाक्षिपति अथेत्यादिना, चेदित्यन्तेन।

एतावतैव विना सिषाधयिषां सिद्ध्यनन्तरमनुमितिवारणसम्भवादिति भावः। प्रतिबन्धिमाशङ्कते। न चैवमिति। उत्तेजकस्य। मन्त्रौषधिविशेषादेः। प्रतिबन्धिमुद्धरति । उत्तेजकानामिति । मण्यादिस्थलीयोत्तेजकमन्त्रौषधिविशेषादीनामित्यर्थः । अननुगतत्वादिति। तथा चानुगतकार्यं प्रति व्यभिचारेण कारणत्वासम्भवादिति भावः। इहापि । सिद्धिस्थलेऽपि । दर्शित इति। यादृशयादृशेच्छासत्त्व इत्यादिनेत्यादिः। सिपाधयिषाया इति। उत्तेजकीभूताया इत्यादिः। तथा च तुल्ययुक्त्या उत्तेजकाभावकूटविशिष्टायाः सिद्धेरभाव एव दाहादौ मण्याद्यभाववद्धेतुर्भविष्यतीति भावः।

(दी०) सिद्ध्युत्तरानुमितित्वञ्च अनुगतानतिप्रसक्तं दुर्वचम्, सिद्धिस्थितिकालीनां स्वेतरसिद्धिकालीनां वाऽनुमितिं प्रति हेतुत्वकल्पने च विनाऽपि सिपाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दुर्वारः, एकस्य च पुंसः सिद्धिसत्त्वेऽन्यस्य सिपाधयिषाशून्यस्यानुमित्यनुत्पादप्रसङ्गः, तत्तत्पुरुषीयतादृशानुमितिं प्रति तत्तत्पुरुषीयसिषाधयिषाया हेतुत्वेऽनन्तकार्यकारणभावप्रसङ्गः। अपि च सिद्धौ सत्यां विनाऽपि सिपाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गात्।

(गा०) ननु तावदभावकूटाविशिष्टसाध्यनिश्चयाभावत्वापेक्षया लघीयसा अन्ततस्तावदन्यतमत्वेनैवा(२)नुगमः सम्भवति सिषाधयिषाणामित्यत आह। सिद्ध्युत्तरानुमितित्वञ्चेति।

अनुगतस्य तस्य सिद्धिसमानकालीनप्रागभावप्रतियोगित्वरूप-

(१) प्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वम् उत्तेजकत्वम्।

(२) तावदन्यतमत्वेनैवेत्यपि क्वचित् पाठः।

स्यानतिप्रसक्तस्य च तत्तत्सिद्धिनाशकालीनप्रागभावाप्रतियोगित्वे सति तत्तत्सिद्धिसमानकालीनप्रागभावप्रतियोगित्वात्मकस्यैव सम्भवादनुगतानातिप्रसक्तेत्युभयमुपात्तम्। तथा च प्रथमधर्मस्य कार्यतावच्छेदकत्वे सिषाधयिषामन्तरेण सिद्धिनाशोत्तरकाले जायमानायामनुमितौ सिषाधयिषाव्यभिचारः, उत्तरस्य तथात्वे चानन्तकार्यकारणभावप्रसङ्ग इति भावः। सिद्धिध्वंसकालीनामिति। स्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्वक्षणवृत्तित्वोभयसम्बन्धेन सिद्ध्यवच्छिन्नामित्यर्थः। लाघवादाह। स्वेतरेति। स्वभिन्नत्वस्वक्षणवृत्तित्वोभयसम्बन्धेन सिद्ध्यवच्छिन्नामित्यर्थः। दलद्वयव्यावृत्तिस्तु स्फुटैव। सम्बन्धविधया स्वक्षणवृत्तित्वादीनां निवेशान्न स्वानुगमनिबन्धनो दोषः, सम्बन्धमध्ये स्वपदार्थनिवेशेऽप्यन्याधिकरणवृत्तित्वादेरन्यसम्बन्धत्वाभावेनातिप्रसङ्गविरहात्(१)। यदि च उत्पत्तिमध्ये स्वपदार्थविशेषणान्तर्भावस्याप्रसिद्धिवारणायावश्यकतया अननुगमः शङ्क्यते, तदा स्ववृत्तिप्रागभावप्रतियोगित्वस्वक्षणवृत्तित्वोभयसम्बन्धेन सिद्धिविशिष्टत्वम् अनुमितौ प्रवेश्यम्(२)। नाशकाले। नाशोत्पत्तिक्षणे। अनुमित्युत्पादो दुर्वार इति। सिद्धिनाशसमयोत्पन्नाया अनुमितेः उक्तसिषाधयिषाकार्यतावच्छेदकानाक्रान्तत्वादिति भावः।

ननु स्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्वनाशक्षणवृत्तिप्रागभावाप्रतियोगित्वोभयसम्बन्धेन सिद्ध्यवच्छिन्नानुमितित्वमेव सिषाधयिषाजन्यतावच्छेदकं वाच्यम्? एतच्च सिद्धिनाशकालोत्पन्नानुमितिसाधारणमेवेति नातिप्रसङ्गः।

न च सामान्यतो नाशक्षणवृत्तिप्रागभावाप्रतियोगित्वं जन्यमात्रस्यैव न सम्भवतीति यदधिकरणक्षणवृत्तिप्रागभावप्रतियोगित्वं तद्व्यक्तिनाश एव विशिष्य निवेश्य इत्यननुगमतादवस्थ्यमिति वाच्यम्। सम्बन्धाननुगमस्यादोषत्वात्, स्ववृत्तिप्रागभावप्रतियोगि-

(१) अन्यसम्बन्धत्वाभावातिप्रसङ्गविरहादित्यपि पुस्तकान्तरे पाठः।

(२) यदि चेत्यादिः प्रवेश्यमित्यन्तः पाठस्तु सर्वेषु पुस्तकेषु न दृश्यते।

त्वस्वबृत्तिकृतिमत्वोभयसम्बन्धेन सिद्धिविशिष्टत्वेन कथञ्चिदनुगमस्यापि सम्भवाच्चेत्यतो दोषान्तरमाह । एकस्येति । सिद्धिसत्त्व इति । अव्यवहितपूर्वकाले इत्यादिः । अनुमित्यनुत्पादप्रसङ्ग इति । पुरुषान्तरीयसिद्ध्यव्यवहितोत्तरोत्पन्नपुरुषान्तरीयानुमितेरप्युक्तसिषाधयिषाजन्यतावच्छेदकधर्माक्रान्तत्वादिति भावः । सामानाधिकरण्यस्याधिकस्य दर्शितकार्यतावच्छेदकताघटकसम्बन्धमध्ये निवेशेन पुरुषान्तरीयसिद्ध्यनन्तरोत्पन्नानुमितौ सिषाधयिषाया व्यभिचारवारणसम्भवात् दोषान्तरमाह । अपि चेति । सामान्यसामग्रीतः । अनुमितिसामान्यहेतुभूतपरामर्शादितः ।

(दी०) न हि ईदृशविशेषसामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति, न चान्यत्रापि विशेषसामग्र्यन्तरमस्ति तत्कल्पने चातिगौरवम् । इह जायमाना सा सिद्ध्युत्तरैव स्यात्, सा च न जायते कारणाभावादिति चेत् ? सा मा जनिष्ट अनुमितिसामान्यन्तु स्यादेव, कार्यानुत्पादस्य विना कारणविरहमसम्भवात् ।

(गा०) ननु विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्योत्पादकत्वान्नापत्तिसम्भव इत्याशङ्कायामाह । न हीति । ईदृशेति । सिषाधयिषारूपेत्यर्थः । जनकत्वम् । उपधायकत्वम् । नास्तीति । न हीत्यन्वयः । सिद्धिसत्त्वे सिषाधयिषां विनापि परामर्शादेरनुमित्युत्पादकत्वादिति भावः । तथा च तत्रैव सिद्धिदशायामपि परामर्शादिसत्त्वे सिषाधयिषाविरहो नानुमित्यनुत्पादप्रयोजको भवेदिति पर्यवसितम् ।

ननु विशेषसामग्रीविरहकूट एव सामान्यसामग्रीदशायां सामान्यकार्यानुत्पादप्रयोजकः, सिद्धिसत्त्वस्थलीयविशेषसामग्रीविरहघटितस्य कूटस्य च सिषाधयिषाविरहसहकृतसिद्धिस्थल एव सत्त्व न तु सिद्ध्यसत्त्वस्थले इति न दोष इत्यत आह । न चेति । अन्यत्रापि । सिद्ध्यसत्त्वस्थलेऽपि । विशेषसामग्र्यन्तरमिति । सिद्ध्यभावस्यैतन्मतेऽहेतुत्वादिति भावः । तत्तदनुमितिव्यक्त्युत्पादकतत्तत्परामर्शव्यक्तीनां विशेषसामग्रीत्वेऽपि अनुमित्युत्पत्तिकालेऽपि

सत्त्वेन तदनन्तरमनुमित्यनुत्पादे प्रयोजकविरहः, तत्तद्व्यक्तिविरहाणामनन्तानां सामान्यकार्यानुत्पादप्रयोजकत्वे गौरवञ्च, अन्यथा बहुतरसामान्यकारणताया उच्छेदप्रसङ्ग इत्याशयः ।

अत्राहुः, सिद्ध्युत्तरानुमितौ सिद्ध्यभावस्य हेतुत्वान्तरकल्पनयैव ईदृशातिप्रसङ्गवारणसम्भवात् विशिष्टसिद्ध्यभावहेतुत्वमयुक्तम्, सिद्धिसिषाधयिषाविरहयोर्विशेषणविशेष्यभाव विनिगमनाविरहेण प्रतिबन्धकताद्वयस्य तन्मतेऽप्यावश्यकत्वात्, प्रतिबन्धकतावच्छेदकगौरवस्याऽऽधिक्यात् ।

न च सिषाधयिषाहेतुतापक्षेऽपि कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वादिनिवेशाधिक्येन गौरवमित्याशङ्क्यम् । तल्लिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावस्य पूर्वोपदर्शितसमूहालम्बनजन्यानुमितौ व्यभिचारवारणायाव्यवहितोत्तरत्वसम्बन्धेन तादृशसिद्ध्यनवच्छिन्नानुमितिं प्रत्येव हेतुताया भवताऽपि वाच्यत्वादिति सिद्धिस्थले विनापि सिषाधयिषां सामान्यकार्योत्पत्तावपि तद्दशकार्यस्य कविशेषसामग्रीकार्यतावच्छेदकाक्रान्तता स्यात् तथा च विशेषसामग्रीं विना तदुत्पत्तौ तस्याव्यभिचाराद् कारणतैव व्याहन्येत इति न तत्र तदुत्पत्त्यापत्तिरिति शङ्कते । इहेति । कार्योत्पादप्रयोजकसामग्रीसत्त्वे प्रयोजनक्षतिर्न कार्योत्पत्तिं विरुणद्धि, तथा च प्रकृते सिषाधयिषाऽघटितायाः सामान्यकार्यप्रयोजकसामग्र्याः सिद्धिकालेऽपि सत्त्वे विशेषसामग्रीविरहेण तत्कार्यतावच्छेदकावच्छिन्नापत्त्यसम्भवेऽपि सामान्यधर्मावच्छिन्नापत्तिर्दुर्वारैवेत्यत आह । सा मा जनिष्टेति । सा । सिद्ध्युत्तरानुमितिः । कार्यानुत्पादस्य । तद्धर्मावच्छिन्नानुत्पादस्य । विना कारणविरहम् । तद्धर्मावच्छिन्नोत्पादप्रयोजकसामग्रीविरहं विना ।

(दी०) करणव्यापारत्वेनावश्यककारणभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः, प्रतिबन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् । अन्यथा यथासम्भवं निमित्तकारणस्य समवायिकारणत्वाद्यवच्छेदकत्वप्रसङ्गात् ।

(गा०) अनुमितिं प्रति पक्षतासहितपरामर्शत्वेन हेतुता, न तु पक्षतापरामर्शयोः पृथक्कारणताद्वयं गौरवात् ।

न च विशेषणविशेष्यभावे विनिगमनाविरहः । परामर्शस्याहेतुत्वे तस्य व्याप्तिज्ञानरूपकरणव्यापारत्वासम्भवात्, व्यापारतायाः फलजनकतागर्भत्वात् इत्यस्यैव विनिगमकस्य सम्भवादिति केषाञ्चिन्मतं दूषयति । करणेत्यादिना ।

परामर्शस्येति षष्ठ्यर्थो वृत्तित्वस्याः कारणतायामन्वयः । निमित्तकारणस्य दण्डादेः । समवायिकारणत्वात् । कपालादिनिष्ठघटत्वाद्यवच्छिन्नकारणतेत्यर्थः । समवायनियमाय तत्कारणताया आवश्यकत्वादिति भावः । जन्यसत्त्वाद्यवच्छिन्ननिरूपितायाञ्च समवायिकारणतायां दण्डादेर्व्यभिचारेण प्रवेशासम्भवाद्यथासम्भवमित्युक्तम् । कारणतातदवच्छेदकत्वयोरुक्तविनिगमकत्वेन नियतत्वेऽपि सिद्ध्यभावसाहित्यपरामर्शान्यतरैकविशिष्टस्यैव एकविशेष्यतावच्छेदकतापक्षस्यैव वाऽपरस्यावच्छेदकत्वं वाच्यम्, तत्र विनिगमनाविरहो दुर्वार इति तु तत्त्वम् ।

(दी०) अथानुमितिसाधारणसिद्धेः प्रतिबन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले च तदसम्भवात् सा नोत्पद्येतेति चेत् ? न, यस्य मण्याद्यभावादेः कार्यसमकालतया अन्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु सर्वस्य गौरवात् । अन्यथा समवायिकारणस्य कार्यसहभूतस्यैव हेतुत्वात् कारणतामात्रस्य तथात्वप्रसक्तौ प्राभाकरा एव विजयेरन्निति ।

(गा०) ननु सिद्ध्यभावस्यानुमितिहेतुत्वेऽनुमितेस्तं विना कदाप्यनुमितिर्नोत्पद्येत मणिसमवधानोत्पत्तिकाले दाहानुत्पत्त्या प्रतिबन्धकाभावस्य कार्यकालसत्तायाः फलोपधानप्रयोजकत्वात्, अनुमितिकाले च सिद्ध्यभावासत्त्वादित्यगत्या तस्य कारणतावच्छेदकत्वमेव, न तु कारणत्वमिति शङ्कते । अथेति ।

कार्योत्पत्तिक्षणावच्छेदेनापि कार्याधिकरणे नियतसत्त्वं यत्कारणताघटकं तत्कारणताश्रयस्यैव कार्योत्पत्तिक्षणसत्त्वं कार्योत्प.